श्रीमच्छङ्करभगवत्पादाचार्यविरचितम्

शारीरकमीमांसाभाष्यम्

प्रथम खण्डः

1'2

शारीरकमीमांसाभाष्यम्
प्रथमखण्डः

Advaita Grantha Ratna Mañjūṣā : 46-Ratna

ŚRĪ ŚAṄKARABHAGAVATAPĀDA'S

ŚĀRĪRAKAMĪMĀṀSĀ-BHĀṢYAM

VOLUME-I

(FROM THE FIRST ADHYĀYA TO THE FIRST PĀDA OF SECOND ADHYĀYA)

With the Commentaries

PRAKAṬĀRTHA VIVARAṆAM OF ANUBHŪTISVARŪPĀCĀRYA,
BHĀṢYABHĀVAPRAKĀŚIKĀ OF CITSUKHĀCĀRYA,
NYĀYANIRṆAYA OF ĀNANDAGIRI
and
ŚĀRĪRAKA-NYĀYA-SAṄGRAHA
OF PRAKĀŚĀTMAN

Critically edited with notes etc.,
by

Mīmāṁsā-Vedāntācārya
DR. MAṆI DRĀVIḌ

Under the direction of
ŚRĪ SVĀMĪ MAHEŚĀNANDA GIRI MAHĀRĀJA
MAHĀMAṆḌALEŚVARA
ŚRĪ DAKṢIṆĀMŪRTI MAṬHA

ŚRĪ DAKṢIṆĀMŪRTI MAṬHA PRAKĀŚANA
VĀRĀṆASĪ

अद्वैतग्रन्थरत्नमञ्जूषायाः ४६-रत्नम्

श्रीशङ्करभगवत्पादाचार्यविरचितम्

शारीरकमीमांसाभाष्यम्

[खण्डः-१]

(प्रथमाध्यायः, द्वितीयाध्यायस्य प्रथमपादश्च)

टीकाः

श्रीमदनुभूतिस्वरूपाचार्यविरचितं प्रकटार्थविवरणम्, श्रीचित्सुखाचार्यकृता भाष्यभावप्रकाशिका, श्रीमदानन्दगिर्याचार्यकृतो न्यायनिर्णयश्च तथा श्री प्रकाशात्मयतिविरचितः शारीरकन्यायसंग्रहः

श्रीदक्षिणामूर्तिपीठाधीश्वरमहामण्डलेश्वर-
श्रीमन्महेशानन्दगिरिमहाराजानां
निदेशेन

मीमांसा-वेदान्ताचार्येण
श्रीमता (डॉ.) मणिद्राविडेन
संशोध्य पाठभेदटिप्पणादिभिः
सम्पादितम्

श्रीदक्षिणामूर्तिमठप्रकाशनम्
वाराणसी

Published By
SHRI DAKSHINAMURTI MATHA, PRAKASANA
D 49/9, Mishrapokhara
Varanasi-221 010

भगवत्पादाब्द : १२१४
वैक्रमाब्द : २०५९
खीष्टाब्दः : २००२

First Edition

Price : 360.00
(Price : Three Hundrad Sixty Rupees only)

Printed By
MAHIM PATRAN PVT. LTD.
5/161, Sonth Ki Mandi, Agra

निदर्शिका

प्रथमः खण्डः

		पृ.सं.
१.	शुभाशीः	१-२
२.	आँग्लभूमिका	३-१३
३.	भूमिका	३-२२
४.	विषयसूचिका	२३-४२
५.	शारीरकन्यायसंग्रहविषयाः	४३-५२
६.	दश शान्तयः	५३
७.	शब्दसंक्षेपविवरणम्	५४
८.	ब्रह्मसूत्रशांकरभाष्यम्–आदितः प्रभृति द्वितीयाध्याये प्रथमपादपर्यन्तम्	१-५५५

श्रीदक्षिणामूर्तिर्विजयतेतमाम्

श्रीमत्परमहंसपरिव्राजकाचार्य-पदवाक्यप्रमाणपारावारपारीण-शमदमोपरतितितिक्षासमाधानश्रद्धाचरणनिष्ठ-ब्रह्मविद्वरिष्ठ-यतिचक्रवर्ति-त्वाद्यनाद्यनवच्छिन्नगुरुपरम्पराप्राप्तब्रह्मात्मैक्यज्ञानवैभवानुभवप्रद्योतितान्तःकरण-वेदान्तमार्गप्रवर्तक-श्रीकाशीक्षेत्रस्थितश्रीकेवलाद्वैत-व्याख्यानसिंहासन-दक्षिणामूर्तिपीठाधीश्वर-शङ्करधर्मस्थापनाचार्य-श्रीशङ्करभगवत्पादारविन्दोपासक-तोटकाचार्यानन्दगिरि-परम्पराप्राप्तमहामण्डलेश्वरस्थानवैभव-सर्वतन्त्रस्वतन्त्र-अनन्तश्रीविभूषित-नृसिंहगिरिस्वामि-करकमलसञ्जात-श्रीदक्षिणामूर्ति-निरञ्जनपीठाचार्य-**महेशानन्दगिरि**-महामण्डलेश्वरस्वामिभिः क्रियन्ते नारायणस्मृतयः

वेदान्तमञ्जूषायाः षट्चत्वारिंशं सप्तचत्वारिंशं च रत्नं प्रकाश्यत इति ज्ञात्वा हर्षिता वयम्। घोरेऽस्मिन् कलौ श्रीशङ्करभगवत्पूज्यपादप्रदर्शितं मार्गं विहाय नान्यमुपायं शान्तिकरमुत्पश्यामः। मुमुक्षूणां कृते तु पूर्वमपि नासीद् ब्रह्मज्ञानाद् ऋते किमप्युपायान्तरम्। वैदिककर्मणा ह्यापेक्षिकी शान्तिरासीदपि, अधुना पुनर्द्रव्यादेरनुपलभ्यता, वर्णाश्रमादिसाङ्कर्याद् अधिकारिणामनुपलभ्यता च वर्ततेतराम्। तस्माद्भाष्यकारप्रदर्शितं विधुराधिकरणमनुसृत्य पुरुषमात्रसम्बन्धिभिः जपोपवासदेवताराधनादिभिः अन्तःकरणस्यापि संशुद्धिः सम्भवति। तदनुकूलस्तोत्रदेवमन्दिरादीनामपि सौलभ्यं कृतं शङ्करभगवत्पूज्यपादैः, तदनुसारिभिश्च दशनामसम्प्रदायाचार्यैस्तत्र तत्र तदा तदा। एवं बहिरङ्गं संसाध्य निर्गतनिखिलकल्मषान्तःकरणैस्तु बाह्याभ्यन्तरिकाऽलिङ्ग-सलिङ्गपारिव्राज्यं गृहीत्वा सभाष्यं सवार्तिकं प्रस्थानत्रयं श्रोतव्यम्, संशयविप्रतिपत्तिनिवारणाय प्रकरणग्रन्थानां लघुचन्द्रिकापर्यन्तानां विचारणं विधेयम्; कृते चित्तैकाग्र्येण श्रवणमनने पर्याप्ते ब्रह्मवेदने, प्रारब्धदोषतो नानुभूयते जीवन्मुक्तिश्चेज्जीवन्मुक्तिमिच्छता प्रबलदोषनिवृत्त्यै संयमाभ्यासादिकमेकान्तसेवनादिकं च कार्यम्। अल्पदोषनिवृत्तये तु वेदान्तपाठनं शिष्यबोधायेति। तत्र च शिष्यसन्देहनिवृत्ति-फलकयत्नजनितेनापूर्वेण जीवन्मुक्तेर्लाभोऽसन्दिग्धः। अयमेव राजमार्गः श्रेयस्करः।

किन्तु ग्रन्थानां दौर्लभ्ये कथं पठनं पाठनं वा सिद्ध्येदिति भृशं चिन्तयन्तः खिन्ना वयं भगवन्तं भूतभावनं शङ्करं प्रार्थितवन्तः। भिक्षुभिरस्माभिर्द्रव्याऽनर्हैर्न तादृशी चिन्ता कार्येति श्रीदक्षिणामूर्तिना **विष्णुदासमेहताख्यः** कश्चिच्छ्रेष्ठी प्रवरः प्रेरितः। तन्मुखात् 'सर्वं प्रकाशनं स्वकीयद्रव्येण करिष्यामि' इति प्रतिज्ञां श्रुत्वा निश्चिन्ता अभूम। पारिव्राज्यधर्ममनुसरद्भिर्नैकत्र स्थातव्यमस्माभिः, सम्पादनं तु नैवं भवेद् इति कृत्वा पण्डितराजादिबिरुदान्विता एकविंशतिविक्रमशताब्दे वेदान्तज्ञाने मार्तण्डवद् उद्भासिताः शास्त्रिप्रवराः **श्रीसुब्रह्मण्यशास्त्रिणो**ऽस्य सम्पादने संयोजिताः। अल्पीयसैव कालेन महता श्रमेण सत्यपि वार्धक्ये श्रीशङ्करानुरागमात्रेण कृतसङ्कल्पाः शास्त्रिणो बहून् सद्ग्रन्थान् सम्पादयामासुः। उपदेशसहस्रिकादिद्वादशप्रकरणानि, दशोपनिषद्भाष्याणि, तैत्तिरीयबृहदारण्यकभाष्यवार्तिके, पञ्चपादिकाविवरणम्—एते ग्रन्थतल्लजाःटीकाटिप्पणादिभिरलङ्कृतास्तेषां सम्पादकत्वे वेदान्तमञ्जूषारत्नतया प्रकाशिताः। २०४८ तमे विक्रमाब्दे शास्त्रिणां देहत्यागानन्तरं तेषामेवाऽन्तेवासिनो न्यायमीमांसादिसर्वसच्छास्त्रेषु कृतभूरिपरिश्रमाः समधीतसर्ववेदान्तग्रन्थाः **श्रीमणिद्राविड**महाशयाः सम्पादका नियुक्ताः। पूर्णपरिश्रमेण सटीकं श्रीमच्छारीरकभाष्यमेतैः सम्पादितमिति महान् सन्तोषः।

विशेषोऽयमस्मिन् सम्पुटे यत् प्रकटार्थविवरण-भाष्यभावप्रकाशिका-न्यायनिर्णयैः सह ब्रह्मसूत्रभाष्यम्, प्रत्यधिकरणं च शारीरकन्यायसंग्रह इति दिव्यप्रबन्धा एकत्र सम्मुद्र्योपलब्धाः। तत्र श्रीचित्सुखमुनिकृता भाष्यभावप्रकाशिकाऽखिलाऽप्रकाशितपूर्वा। प्रकटार्थविवरणस्य चैकमेव संस्करणमुपलभ्यते यत्र पाठान्तरप्रदर्शनेऽपि सम्पादका विषमस्थलेषु कमपि पन्थानं न दर्शयाम्बभूवुः। अध्येतृसौकर्यायास्मिन् संस्करणे, विशेषतः प्रकटार्थविवरणसन्दर्भे, प्रभूतानि टिप्पणानि विराजन्ते, अनुसन्धित्सुसुकरतायै च सूचीजातं समायोजितम्।

ग्रन्थस्यास्य पाठकाः श्रीशङ्करभगवत्पादप्रसादानुगृहीता ब्रह्मलोकं गत्वा क्रममुक्तिभाजना भवेयुः। एषां समेषां ग्रन्थानां लौकिकभाषानुवादोऽपि यथोपलब्धि प्रकाशयिष्यते येनाऽसंस्कृतज्ञा अपि श्रवणमननादिसिद्धिं कृत्वा प्राप्स्यन्ति शान्तिं ज्ञानं च। उमारमणं रमारमणं च प्रार्थये यत्समेषां बुद्धौ स्फुरतु ब्रह्मात्मैक्यम्। येषां गृहे शङ्करवचनरूपा ग्रन्थाः स्थिता मन्ये तेषां गृहाद् भूतग्रहपिशाचगदाकालमृत्युशान्त्यभावादीनि निर्गच्छेयुः इति।

वसुबाणवियन्नेत्रमिते वैक्रमाब्दे व्यासपूर्णिमायाम्।

– नारायणस्मृतयः

Introduction

Vedas are the Himalayas of spiritual treasures. All the jewels of spiritual practices and attainment are embedded in them. From immemorial past different aspirants in different times and climes have been benefitting by them and have kept the torch of spiritual life continuously glowing. Out of many rivulets that flow from it, most of them merge either in the east-flowing Ganges or the west-flowing Indus. Just as these are the two directions in which all the rivers from the Himālayas eventually flow, all Vedic thoughts flow either towards the east i.e. the origin, or towards the west i.e. development. The current of desire oriented action flows towards the west, meaning the progress of the world of name and forms while the current of knowledge flows towards the origin, from which comes out the universe and by attaining which, this continuous cycle of life and death comes to an end. Thus the Vedas can be explained either in terms of action or knowledge depending on whether development in the world is aimed at, or the attainment of liberation. Most of the early portions of the Vedas which describe rectitude, worship and meditation are connected with Saguṇa Brahma and most of the later portions namely the Upaniṣads deal with the path of liberation and Nirguṇa Brahma. The early portion has been elaborately treated in the Pūrvā Mīmāmsa and the later portion in the Uttara Mīmāmsa. The present volume deals with the later portion.

The Brahma Sūtra enunciates the laws of interpretation of the Upaniṣads. Āçārya Śaṅkara has extensively commented upon it in his famous Śarīraka Bhāṣya. The work is divided into heads in which both views are present—those of the opponent and of the proponent i.e. Siddhānti. The first four aphorisms are extensively dealt by the great commentator and they form the basis for the rest of the treatise. The introductory section by Śaṅkara is the famous Adhyāsa Bhāṣya. Since Brahman is defined in the aphorism, as that from which the universe is born, by which it is sustained and in which it dissolves the question arises—why does this activity take place when the Brahman is all contentment ? For any action to take place there has to be a purpose to attain and that implies discontentment. Āçārya Śaṅkara clearly enunciates that it is ignorance which is the cause of the disturbance in Brahman. Just as when a rope is not seen clearly due to darkness, it appears as a snake, similarly until Brahman is not known

in the light of the Upaniṣad-teaching, generation, sustenance, dissolution etc. appear to take place. But once, its correct knowledge dawns, it all disappears just as the mistaken snake does not remain on the apprehension of the rope.

The first sub-commentary, namely the Pañçapādikā was written by the first disciple of Śaṅkara, but as it is available only upto the first four aphorisms, so the great Prakāśātmā wrote upon it an extensive commentary called the Vivaraṇa. Prakāśātmā also wrote a concise treatise explaining topicwise the whole Brahmasūtra; the present volume contains this work. Śārīraka-nyāyasangraha. Since even this commentary did not elucidate the complete Bhāṣya, so Āçārya Anubbūtiswarūpa wrote an extensive commentary called Prakaṭārtha-Vivaraṇa, presented in the present volume. The name of Āçārya Ċitsukha is very important in the tradition of Vedānta, for his Pratyaktattvapradipika (Ċitsukhi) is one of the most extensive work dealing with all the opposition views presented by logicians against Vedānta. He has also written an important commentary on the Śārīraka Bhāṣya, the Bhāṣyabhāvaprakāshika which is also included in this volume. Its complete text is printed for the first time, though a portion was published more than sixty years ago. Acarya, Ānanda Giri has commented on all the major works of Śaṅkara and Sureśvara. His commentary on the Śārīraka Bhāṣya is extremely extensive and this forms the fourth work included in this volume.

The Prakaṭārthavivaraṇa has followed the leads of the Vivaraṇa and as the name indicates has uncovered the secrets of that work implying that it be called Gūḍhārtha-Vivaraṇa. Anubhūtiswarūpa was a great grammarian, he has written a grammar of his own—the Sārasvata Vyākaraṇa which is very popular in the western part of India. He has also commented on works like Māndūkya Upaniṣad, Gītā etc.

Āçārya Vācaspati was a personality of whose stature there would ever be very few people. He has extensively commented upon all the six systems of Vedic philosophies. His commentary on the Śankara Bhāṣya is called Bhāmati, but on many issues he differs from the great Āçārya. Thus strictly following Śaṅkara's main thesis in toto in the Prakaṭartha Vivarana all such differences have been extensively treated, logically answered and usually the views as enunciated by the Vivarana have been strengthened. This commentary was printed fifty years ago by the Madras University, but it seems their

manuscript had many imperfections. The book was first entrusted to S. Subramanyam Śāstrī for editing and annotations, but he passed away before he could complete it. So his disciple Mani Drāvida was approached who readily agreed to prepare this edition. Having studied this work from Śri Śāstrī and also possessing a copy corrected by him, Maṇi has done a thorough editing and given detailed notes which makes this edition an important landmark for the study of Vedāntā. He is a young person and we have great hope from him that he will be able to continue the torch of S. Subramanyam Śhāstrī and attain many insurmountable peaks. Our blessings to him for complete success in life and attainment of the final bliss. Ċitsukha's commentary has also been properly edited and published in the full for the first time. Ānandagiri's Nyāyanirṇaya has been printed several times, for this is a very popular annotation, yet there are places where meanings are not quite clear. Such portions have been indicated in the foot-notes. All these commentaries were composed between the twelfth and thirteenth centuries of the Christian era. This was a period of great masters of Vedāntā. The order of presenting these commentaries followed here is historical. The commentaries of Ċhitsukha and Ānandagiri are extremely similar. Yet they have their own importance and facilitate understanding of Śankara's commentary. Thus, their presentation fulfils a great need. The Prakaṭārtha makes a distinction between Māyā and Avidya. The cosmic ignorance is Māyā, and individual ignorance is Avidyā. The former is associated with Isvara, and latter with the Jīvas. For a beginner, this is the easiest way to understand the role of ignorance. There have been other schools which have done away with this duality. Philosohically and logically, they may give more satisfaction but for an early aspirant Prakaṭārthas method is the simplest. Māyā is the power of projecting while Avidya is the power of covering, thus the Jīvas are covered by ignorance whereas Īśvara only projects by Māyā's power. Citsukha has generally followed the Vivarana-school which enunciates only one ignorance with two powers. Ānandagiri, of course, is always close to the original commentary and thus he avoids any conflicting opinion on these issues. The basic tenet of Vedāntā is that Brahman alone is real but due to ignorance appears both as Jīva the sufferer, and Isvara the controller.

Once the ignorance is negated, there remains neither the controller nor the controlled. It is the one Supreme Being which appears due to ignorance in these two forms. The

ignorance may be annihilated by the knowledge produced by the final impartite teaching of the Vedas and having one's doubts removed by a Guru. Once the doubts are removed one cannot help but continuously stay in this Supreme Bliss.

The Śarīrakamīmānsā is divided into four chapters, each of which is further divided into four sections which are further divided into heads whose numbers vary. The first chapter mainly dwells upon those Upaniṣad-passages which deal with the cause of the universe. The ultimate cause according to the Veda, is Brahman. The second chapter mainly deals with the views of the opponents and answers them logically. Of course, logic implies that the principle enunciated is according to the text of the Vedas. Since the arguments posed against it are framed logically so they are answered also in a logical manner. The third chapter deals with the means of attaining liberation while the fourth describes different aspects of liberation. The first section of the chapter demonstrates that all the Upanisads establish the non-dual Brahman which is identical with the soul i.e. Ātmā. At some places it is done directly, elsewhere indirectly, but the purpose everywhere is the same.

Śaṅkara's introduction raises the question that the knower and the known are so distinct that there should be no confusion between the two, yet our experience shows that this confusion is natural in all people. For example, I have a hand and I know it. Therefore, I, the knower, am different from the hand. Yet, when someone touches my hand I say 'why did you touch me ?' that is to say that I am taking my hand as my ownself. Similarly, 'I am blind' is an experience, whereas I am the knower of the fact that the eyes are blind. Further more, I know that my mind is agitated and yet I feel that I am agitated. In all such instances, the confusion between the known and the knower exists. According to Śaṅkara, the cause of this confusion is basic ignorance and until this is annihilated, the experience of the identity of the soul with Brahman is not possible. All the duties laid down in the scriptures or by society are based on this confusion. Thus, it is the body which is born of Brāhmaṇa parents and hence is a Brāhmaṇa. Since I confuse the body with my ownself, therefore I consider myself a Brāhmaṇa. The scriptures say that a Brāhmaṇa has certain duties. If I am not a Brāhmaṇa, those duties would not bind me. Similarly a wife is also with respect to a particular

body since marriage takes place between two bodies. Thus it is only based on a confusion between my body and myself, that I accept that I have the duties of a husband.

Since all relationships are based on this confusion, all duties and prohibitions are only for those who are ignorant about their true nature i.e. the identity of the soul with Brahman. It is only the configuration, the centre of which is the ego, which visits heaven or hell as a result of virtue or vice. Since I also know my ego therefore I am different even from it. Thus all duties and prohibitions depend upon my false identification with the ego. As the great Śaṅkara points out, this confusion is eternal, natural and makes us feel that we are performers of actions and enjoyers of their results. This confusion is directly experienced by all. It is only to obliterate this basic cause of all misery that the Upaniṣads affirm the identity of the soul with Brahman.

The first section of the first chapter mainly deals with those passages with a comparatively clear indication that they refer to Brahman. The disquisition commences with the word 'atha' which Śankara interprets to mean 'after' i.e. it implies certain qualifications subsequent to which alone would the study of Mīmāṁsā lead directly to liberation. In a nutshell it is only after (*a*) discriminating between the ephermal and eternal, (*b*) being courageous to renounce the ephermal, which needs (*c*) calmness of the mind, (*d*) control of the senses, (*e*) quiescence, (*f*) forbearance, (*g*) concentration and (*h*) absolute faith in the Veda. These are the prerequisites which make our longing for liberation one-pointed and our perusal fruitful. Any one may study this text, acquiring a load of information, but the real fruit of knowledge—liberation—can be had only by those who have cultivated these qualities.

Śaṅkara points out that all know themselves, but not their real essence. In the experience "I am", the existence of the self is verified, but who this "I" really is, remains unclear. On the material level, the conscious body seems to be "I". Some feel that the mind is 'I'. The Buddhists establish that it is the momentary I-consciousness which is its real form. The extreme Buddhists feel that 'I' is total vacuity. Within the fold of the followers of Vedas some maintain that 'I' is different from the body and mind but is a performer of actions, enjoys their results and after death moves to another body. Some others assert that 'I' is only an observer, enjoyer and not a performer. Almost

all believers in God are of the opinion that the omniscient, omnipotent God is the supreme soul different from the 'I'. The Vedantis assert that Isvara is the real form of the self which appears under ignorance to undergo change due to transient experiences. As an insufficiently illuminated rope is perceived by different people as a snake, a necklace, trickling water or a crack in the ground, but the moment there is enough light it is perceived as only a rope, so is 'I' misunderstood due to nescience. When different people perceive a thing differently, then all of them may be perceiving wrongly, such is the case with the knowledge of 'I' which is perceived differently by different people. When an aspirant with an unblemished mind discovers the self under the brilliance of the Upanisads, 'I' is perceived as the Supreme Reality which due to ignorance manifests as the soul, God and the world.

The next head explains where alone may the reality be searched. It says that from which the world emanates, by which it is sustained and in which it is dissolved is Brahman, the reality of 'I'. Thus the text clearly lays down that it is by searching the cause of the universe that ignorance can be destroyed, not by any other means. Since the origin of the universe connot be a matter of our direct perception, hence any inference based on direct perception can only lead to further ignorance. Inference is based on the understanding of an indispensable connection, as that between a cause and its effect. For example, after realizing a cause-effect relationship between smoke and fire it can be concluded that fire exists wherever there is smoke, and thus when at a distance smoke is perceived we decide that fire is also present there. Where such connections cannot be known by perceptions one has to depend on revelation. The Veda is the most authoritative revelation since its knowledge has been again and again found to be reliable. Thus it is the study of the Upanisads which can reliably ascertain the origin of the universe which they all declare with certitude is pure existence, pure knowledge and pure bliss. Furthermore, our discriminating experience corroborates the said truth : All things 'exist' and have a relation with 'knowledge'. Thus, there is nothing in the Universe which is not of the form of existence and knowledge. Like all pottery emanates from, remains, as well as dissolves in clay, confirming that it is produced from clay, or all clothes being permeated by cotton testifies that it is made out of cotton, similarly as existence and

knowledge permeates the universe, we can affirm that it has emerged out of pure existence and knowledge. Hence once all these names and forms dematerialize, pure existence and pure knowledge alone will remain without any manifestations. Since Brahman is absolute knowledge existence, the Upaniṣads disclose that the universe is born out of Brahman is sustained by It, and will eventually dissolve into It. This is made clear in the second head of the first section of the first chapter. The fourth head says that the omniscient, omnipotent, creater of the universe is established by all the Upaniṣads for they all point towards It. Since they all indicate from different directions, each pointer removes some possible misunderstanding about the Supreme. Scripturalist scholars interpret only the earlier portion of the Veda and assert that since something already existing cannot be propounded by the Veda, so the purpose of the Veda can only be to *make* the obedient do something with whatever thing is existing is expressed by the Veda i.e. the Veda *makes* us perform some physical or mental action with things that exist. In his great commentary Śaṅkara deals with this school extensively and establishes that the Veda only informs. It intimates about virtue or vice which are physical and mental actions and also about their results. Thus, even in the injunctive portion it is only the knowledge of duties and their results that is imparted by the Veda, it has no impelling property. The Veda imparts purposeful knowledge. The information about actions and their results is fruitful for a person who desires those results and will be directed to perform those actions. The knowledge of Brahman is fruitful as it alone liberates. The Veda lays down before us purposeful knowledge, whether it be of action or of the ultimate self. Even those who profess that the Veda possesses a property to impel, do accept the validity of prohibitions. Though in the case of prohibitions nothing is to be *done* by a person. The knowledge of prohibitions is fruitful as it prevents us from going wrong. So, it is fruitful and irrefutable knowledge, whether about an existing entity or about cause-effect relationship that the Veda imparts. Thus, in these first four heads, the essence of the whole text has been laid down. The remaining first section of the first chapter establishes that Brahman alone has been laid down as the cause of the universe, and not nature or anything else.

In an exhaustive text like this it is natural that certain digression take place but they help removing doubts concerning the main text. In the second section those passages are taken up which deal with different types of meditations and where indications about

Brahman are unclear while explaining the method to analyze those indications to conclude that they all deal with the Absolute conscious Being. The third section also deals with such unclear passage in the Upaniṣads, but in most cases cited here, the indications are about the Absolute which is to be realized rather than meditated upon. The fourth section of the first chapter deals with such *words* occurring in the Vedas, instead of complete *passages*. These are similar to the words used by Maharṣi Kapila, thus causing confusion that they establish 'Pradhāna' i.e. nature as the cause of the universe. Removing the possibility of misinterpretation, all such incongruity has been clarified by explaining that though similar yet the words in the Veda refer to an entirely different entity than the ones used by Kapila. The basic argument is that meanings of the words must be understood from the text and passages in different parts of the Veda, rather than accepting connotations used by other authors. Thus, since in the Veda nowhere do these words convey the sense of nature, therefore, while occurring in the Upaniṣads also they cannot be accepted as referring to Pradhāna to be the cause of the universe.

The second chapter establishes that the conclusion of Vedāntā cannot be contradicted by other pseudo Vedic and non-Vedic schools, for each of them contradicts the concluion of the other. The third and fourth sections deal with the possible contradictions among certain Vaidika passages. The third chapter commences by explaining the system of life after death as expressed in the Veda with the purpose of creating dispassion in the aspirants' mind. The second section deals with analysing the reality of the creator, Īśvara and the transmigrating soul or Jīva. This helps in understanding the main concept of Vedāntā i.e. the unity of the universal and the individual self. The third section explains in detail the Brahman to be meditated upon and the one to be directly experienced. The fourth section deals with the peripheral and proximate means to realize the said unity. The first section of the fourth chapter explains liberation while living. The second deals with the process of death and the third, with the process of entering Brahmaloka as a result of meditating on Brahman. The last section elucidates the attainment by the emancipated, rounding off the discussion by explaining the attainment by those ascending to the Brahmaloka. Thus the Brahmasutras contain all that needs to be explained in Vedanta philosophy thereby justifying their classification as Shastra i.e. a complete text.

The Śārīrakabhāṣya by Śrī Śaṅkara of the eighth century is described by his disciple Padmapada as well as the great Vācaspati as lucid and profound. Its profundity is remarkable, for in the past twelve hundred years almost all great Indian Philosophers have either tried to develop some of its latent thoughts or have felt the need to criticize it but none has ignored it. In the tradition of Advaita, most masters have directly or indirectly commented upon it. Prakaṭārtha Vivraṇa is one such direct commentary published in the present volume. Its text was known for a long time and many compendiums have referred to it, but for some unknown reason the name of its author had passed into oblivion. Therefoe Anubhūtisvarūpa was referred to as the Prakaṭārtha Vivaraṇakāra. Therefore Madras University published the first volume of this work in 1935 and the second in 1939 as penned by an unknown author. It is peculiar to note that the Īṣtasidhi Vivaraṇa was also handed down without indicating its author. It is mainly due to the hard work put in by V. Rāghavana that we have come to know definitely that Anūbhutisvarūpa authored the Prakaṭartha Vivaraṇa. He made a thorough comparison between the Gītā Bhāṣya-ṭippaṇa, Gauḍapādīya Bhāṣya-ṭippana, Iṣṭasiddhi Vivaraṇa and concluded firmly that their author was identical with the great grammarian Anubhūtisvarūpa. His disciple Janārdana wrote the Tattvāloka, a compilation primarily of topics discussed in the Prakaṭārtha Vivaraṇa. Janārdana himself says that after thoroughly studying the Prakaṭārtha he compiled the Tattvāloka. In the colophon he describes himself as a disciple of Anūbhutisvarūpa. Anūbhutisvarūpa has also written a gloss on the Pramaṇamālā of Ānandabodha. In the edition of Tarkasangraha published in the Gayakavada series, Nyāyamakaranda-Saṅgraha and Nyāyadipāvaliccandrikā are also mentioned as his works. He has also extensively commented upon Sri Harsa's Khandana Khanḍakhadya naming it Śiṣyahitaiṣiṇi. In the concluding verse of this text the name of the author is given as Anūbhavasvarūpa which is for Anubhūtisvarūpa due to metrical consideration. Pragyānanda in his gloss on the Tattvāloka uses the term Anūbhavasvarūpa for the same reason. Anūbhutisvarūpa has also written a gloss on the Gīta Bhāṣya. It is very concise yet explains some of the more philosophically contradictory verses in the Gīta. We plan to publish it in our edition of the Gīta Bhāṣya. The comments on chapters 14, 15 and 16 seem to be missing in the manuscripts but on close analysis

it seems that the author has not commented upon them because he considered them as clear enough. His main target is the comments of Bhāskara who was a propounder of simultaneously following the paths of knowledge and action. Even Ānandagiri, the most perfect annotator of the Bhāṣya, reproduces from Anūbhutisvarūpa's gloss on the Gīta Bhāṣya, as well as the Prakatartha. In the gloss on the Īṣṭasiddhi, Anubhūtisvarūpa criticizes the view that there is only one Jīva on whose liberation all are liberated. In the Gaudapādīya Ṭippaṇam also, he has contemplated on this subject and expressed almost the same ideas in identical words. The explanation of the word 'Puṅkṣu—a very rarely used form—in the Īṣṭasiddhi Vivaraṇa strongly suggests that its authorship may safely be decided in favour of Anūbhutisvarūpa who has pre-emptorily affirmed its grammatical correctness in his Sāraswatā-prakriya, as Pāṇini fails to explain the said form. The Īṣṭasiddhivivaraṇa begins with the verse which is practically the same as the concluding one of Prakatartha's first chapter. Similarly, the opening and concluding verses of Gauḍapādīya Bhāṣya-ṭippaṇam and the Prakaṭārtha vivaraṇa are similar. It seems Anubhūtisvarupa has a tendency of writing practically the same text when the same issues are involved. While reading his different works we come across many such passages and this has helped in identifying him as their author, Jñānottamā's comments on the Istasiddhi were for a long time considered to be original but now we can definitely say that he was not the original thinker that we took him to be, but one who compiled from Anūbhutisvarūpa as well as Citsukha. On comparing the works of all the said writers we can be quite sure that Anūbhutisvarūpa belonged to the twelfth century A.D. and had a number of disciples like Narendra Puri, Janārdana etc.

The present edition juxtaposes three commentaries on the Bhāṣya with the intention that their comparative study will be very helpful not only to understand more completely the import of Śaṅkara's words but also to trace the development of philosophical thoughts in the Advaita tradition as well as appreciate the variety of explanations offered by the annotators without getting confused about the fundamental tenets of Vedāntā. For example, Citsukha explains Vimuktatma as accepting the singularity of the limited self i.e. Jiva, whereas Anūbhutisvarūpa emphatically refutes that idea, yet both systems remain exigetically and logically correct as they are capable to explain Advaita. In due course

we hope to present Anūbhutisvarūpas commentaries on the Gīta and if possible, the Khaṇḍankhandakhādya in our following publications. It is expected that the study of these texts would help the aspirants to be firm in their conviction about the ultimate teaching of Vedāntā which is the only remedy for all problems. Deep study of the original texts gives us a directive to solve our problems, for such solutions cannot be found clearly expressed in words but must be comprehended by penetrating into the inner depths which is facilitated by a comparative study of commentaries and sub-commentaries.

May Siva bless the world with peace and harmony.

Sri Sankara Matha, Abu **Mahesananda Giri**

Gita Jayanti, 2059 Vikramabda

भूमिका

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेय:प्राप्तिनिमित्ताय नम: सोमार्धधारिणे ।।१।।
अभिवन्द्य गुरूनादौ शिष्यधीपद्मिनीरवीन् ।
सटीकसूत्रभाष्यस्य भूमिकां विलिखाम्यहम् ।।२।।

सांख्य-योग-न्याय-वैशेषिक-मीमांसा-प्रभृतीनां समेषां दर्शनानां दर्शनीयतमं दर्शनं वेदान्तदर्शनम्। तदिदं साधनचतुष्टयसम्पन्नस्य परमपुरुषार्थं प्रेप्सतोऽधिकारिधौरेयस्यापेक्षितोपायमात्मसाक्षात्कारं सपरिकरं निरूपयितुं वेदान्तवाक्यविचारमुखेन प्रवृत्तं भगवता **बादरायणाचार्येण** प्रणीतम्। तच्च 'अथातो ब्रह्मजिज्ञासा' इत्यादिकम् 'अनावृत्ति: शब्दादनावृत्ति: शब्दात्' इत्येतदवसानं सूत्रसमुदायात्मकं प्रत्येकंपादचतुष्टययुतै: चतुर्भिरध्यायैरुपेतं वेदान्तविचारोपयोगिन्यायकलापसंग्राहकं 'श्रोतव्य:' इति विधिमूलकं विराजते। तत्र चाद्यसूत्रेण विषयप्रयोजनाधिकारिनिरूपणेन शास्त्रारम्भमुपपाद्य, वेदान्तानां ब्रह्मणि समन्वय:, तस्य मानान्तराविरोध:, मोक्षसाधनज्ञान-साधनानि, मुक्तिफलस्वरूपमिति विषया: क्रमेणाध्यायै: विवेचिता:। यद्यपि सर्वाण्येव दर्शनानि स्वस्वप्रक्रियानुसारेण मोक्षस्वरूपं तत्साधनं च निरूपयन्ति, दृश्यते चैषां मोक्षादिस्वरूपे बहुशो वैलक्षण्यम्, न च संभवति वस्तुनि विकल्प:, तथापि लोके अधिकारितारतम्यस्य प्रसिद्धत्वात् अधिकारिविशेषसामर्थ्यं पुरस्कृत्यैव परमकारुणिकै: महर्षिभिस्तत्तद्दर्शनानां प्रवर्तनात् गुडजिह्विकान्यायेन वैलक्षण्येन तन्निरूपणं नानौचितीमावहति। तैरपि दर्शनै: संस्कृतचित्ता: सदसद्विवेचनक्रमेण वेदान्तदर्शननिष्ठायोग्यतां प्राप्ता: वेदान्तोदितेन मार्गेण संगंस्यन्ते इति। वेदान्तदर्शनस्य तु उत्तमाधिकारिणं प्रति प्रवृत्ते:, तन्निरूपितप्रमेयस्य तात्त्विकत्वमभ्युपयन्त्यभियुक्ता:—'तत्त्वं तु बादरायणात्' इति वदन्त:। भगवता बादरायणाचार्येण च 'संपद्याविर्भाव: स्वेनशब्दात्' 'मुक्त: प्रतिज्ञानात्' 'अविभागेन दृष्टत्वात्' '—आविर्भूतस्वरूपस्तु' '—तिरोहितं ततो ह्यस्य बन्धविपर्ययौ' इति च तत्र तत्र सूत्रयताऽविद्यया तिरोहितस्यात्मस्वरूपस्य विद्ययाऽविद्यानिवृत्तौ आविर्भाव एव मोक्ष इति स्पष्टीकृतम्। अविद्यायाश्च विद्याया अन्येन न निवृत्तिरिति ज्ञानमेवैकं परम-पुरुषार्थसाधनं बादरायणमते। सति चैवं बन्धस्याविद्याकृतत्वे मिथ्यात्वं पर्यवस्यति। व्यावहारिक्यां त्ववस्थायां सर्वस्यापि द्वैतस्य यथायोगमुपगमात् न व्यवहारहानिरिति नासूयितव्यं बादरायणसिद्धान्ते व्यवहारप्रवणैरिति।

तानि चेमानि सूत्राणि औपनिषदब्रह्मस्वरूपप्रकाशकतया ब्रह्मसूत्राणीति, शारीरस्य ब्रह्मभावसमर्पणपरतया शारीरकसूत्राणीति, वेदान्तवाक्यविचारोपयोगिन्यायसंग्राहकतया वेदान्तमीमांसाशास्त्रमिति चैवमादिभिरभिधानैर्व्यवह्रियन्ते विद्वद्भि:। तेषां च यथावत् तात्पर्यस्फोरणाय श्रीसदाशिवावतारै: **श्रीमच्छङ्करभगवत्पादाचार्यै:** प्रसन्नगम्भीरं श्रुति-स्मृति-न्यायकलापोपबृंहितं विद्वद्वरैरास्वाद्यं भाष्यं विरचितम्। तच्च महनीयै: बहुभिराचार्यैर्विरचितव्याख्योपव्याख्यापरम्परया विभूषितं विराजते।

तत्र भाष्यकाराणां साक्षाच्छिष्यै: **श्रीमत्पद्मपादाचार्यै: पञ्चपादिकाख्या** सूत्रभाष्यव्याख्या विरचिता, यस्या: सम्प्रति चतुस्सूत्र्यन्त एव भाग: समुपलभ्यते। पञ्चपादिकायाश्च **प्रकाशात्मश्रीचरणै:** प्रणीतं **विवरणा**भिधानं व्याख्यानं प्रामुख्येन गण्यते। विवरणस्यापि तत्त्वदीपनप्रभृतीनि सन्ति व्याख्यानानि। तदिदं पञ्चपादिकाप्रस्थानमिति विवरणप्रस्थानमिति वा व्यवह्रियते।

षड्दर्शनकाननपञ्चाननै: **श्रीवाचस्पतिमिश्रैरपि** पञ्चपादिकोन्नीतां सरणिं विहाय स्वयंस्वीकृतविलक्षणसरणिभि: भामतीनाम्नी भाष्यटीका प्रणीता। भामत्याश्च अमलानन्दयतिवर्यै: प्रणीतं नातिविस्तृतं नातिसंक्षिप्तं कल्पतर्वाख्यानं व्याख्यानं प्रामुख्यं भजते। कल्पतरोरपि परिमलाख्यं विवरणमनेकशास्त्रार्थगर्भितं श्रीमदप्पय्यदीक्षितेन्द्रै: प्रणीतम्। तदिदं भामतीप्रस्थानमिति प्रसिद्धम्।

एवमुक्तप्रस्थानद्वयरीतिमनुसरन्तः साक्षाद् भाष्यव्याख्यानरूपाः प्रकटार्थविवरण-भाष्यभावप्रकाशिका-न्यायनिर्णय-रत्नप्रभा-ब्रह्मविद्याभरणादयो ग्रन्थाः, अधिकरणार्थसंग्रहरूपाश्चानेके ग्रन्थाः सन्ति। शारीरकन्यायसंग्रह एकः भाष्यादृतन्यायसंग्राहकः प्रकाशात्मश्रीचरणैर्विरचितो विराजते।

प्रकाशात्मश्रीचरणाः

श्रीमत्पद्मपादाचार्यविरचितपञ्चपादिकायाः विवरणाख्यव्याख्याप्रणयनेन विवरणाचार्या इति प्रसिद्धाः श्रीप्रकाशात्मश्रीचरणाः अनन्यानुभवपूज्यपादशिष्याः क्रैस्तवीयदशमशताब्द्यामासन्निति विमर्शकाः। पञ्चपादिकाप्रस्थानस्य परिष्करणेन प्रक्रियाविशेषसंरचनेन चैते विवरणप्रस्थानस्य प्रवर्तकतया व्यवह्रियन्ते। स्वजन्मनैभिः कतमः प्रदेशोऽलंकृत इति तु न ज्ञायते। इष्टसिद्धिकाराणां श्रीविमुक्तात्मनां मतमेभिः विवरणे सबहुमानं पुरस्कृतमिति इष्टसिद्धेः पश्चाद् विवरणग्रन्थरचनेत्यूह्यते। श्रीरामानुजाचार्यैः श्रीभाष्ये एतेषां मतं खण्डनाय विस्तरेणानूदितमित्येते तत्पूर्वकालीना इति निश्चीयते।

एतैः प्रणीता इमे ग्रन्थाः सम्प्रत्युपलभ्यन्ते—

१. पञ्चपादिकाविवरणम्
२. शाब्दनिर्णयः
३. शारीरकन्यायसंग्रहः

शारीरकन्यायसंग्रहः

पूर्वमीमांसायामिवोत्तरमीमांसायामपि विषयनिरूपणार्थमधिकरणरूपो विचारप्रकारः समाश्रितः। अधिकरणं च—'विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरः। संगतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं विदुः'। इत्युक्तरीत्या विषय-संशय-पूर्वपक्ष-सिद्धान्त-संगतिरूपावयवसमुदायरूपम्। 'प्रयोजनं संगतिश्च' इति पाठे षडङ्गमधिकरणम्। 'विषय-संशय-पूर्वपक्ष-सिद्धान्त-फलात्मको हि पञ्चावयवो विचारः अधिकरणम्' इति प्रकटार्थविवरणम्। केचित् संशयबीजम् पूर्वोत्तरपक्षयुक्ती च संगृह्याधिकामप्यवयवसंख्यामाचक्षते। विचारे सर्वमेतत् सर्वैरपि अपेक्षणीयमेव। अवयवत्वेन परिगणन एव मतभेदः। संशये एका सिद्धान्तकोटिः, अन्या पूर्वपक्षकोटिर्भवति। पूर्वपक्षकोटिः क्वचिदेका, क्वचिदनेकाऽपि भवति। पूर्वपक्षोत्तरपक्षयोः स्थापनायाश्रीयमाणाः युक्तिविशेषाः न्यायपदेन व्यवह्रियन्ते। अत्रैवानुमानस्य, पूर्वतन्त्रोक्तश्रुतिलिङ्गादेः, उपक्रमोपसंहारैकरूप्यादेश्चोपयोगः। पूर्वोत्तरपक्षयोरुभयोरपि स्थितासु युक्तिषु को विशेषः उत्तरपक्षयुक्तौ, येन स एव सिद्धान्तत्वेन परिगृह्यते इत्यपेक्षायां तन्निर्धारणोपयोगी युक्तिविशेषः सिद्धान्तप्रदर्शिभिः सूत्रैरेव सूचितो भवति। यथा—'आकाशस्तल्लिङ्गात्' इत्यधिकरणस्य विषयवाक्ये आकाशपदं ब्रह्मलिङ्गानि च श्रूयन्ते। तत्र वाक्यप्रतिपाद्योऽर्थः भूताकाशः ब्रह्म वेति संशयः। श्रुत्या भूताकाश इति पूर्वपक्षः, ब्रह्मलिङ्गाद् ब्रह्मेति उत्तरपक्षः। तत्र यद्यपि लिङ्गात् श्रुतेर्बलीयस्त्वात् पूर्वपक्षो युक्त इति भाति, तथापि ब्रह्मपक्षं सिद्धान्तयता सूत्रेणात्र लिङ्गस्य बलीयस्त्वं बोधितम्। तत्र च न्यायः—तात्पर्यवल्लिङ्गं श्रुत्यपेक्षया प्रबलमिति। एतादृशन्यायप्रदर्शनमेवाधिकरणानां मुख्यमुद्देश्यम्। 'रूढ्योः कलहे योगस्योन्मेषः' इति न्यायः बालाक्यधिकरणसिद्धः आकाशाधिकरणेऽपि 'सर्वाणि ह वा इमानि भूतानि' इत्यत्र भूतशब्दार्थनिर्णय उपयुज्यते। अतश्च सूत्राणि न सिद्धान्तप्रदर्शनमात्रेण पर्यवस्यन्ति, अपि तु तन्निर्णयोपयुक्तं न्यायमपि सूचयन्ति। सिद्धान्तप्रदर्शनं हि संकुचितफलम्, एकत्रैव निर्णयोपयोगात्। न्यायप्रदर्शनं तु महाफलम्, अनुक्तस्थलेऽपि सिद्धान्तनिर्णयोपयोगात्। अत एव कृत्वाचिन्तयाऽप्यधिकरणानि शास्त्रे रच्यन्ते। तेषु हि निर्णीतो न्यायोऽन्यत्रोपयोक्ष्यते इति।

एतादृशानां न्यायानां निष्कृष्टं स्वरूपं न सामान्यैः भाष्यादवगन्तुं शक्यते। क्वचित्तु अधिकरणस्वरूपमपि व्याख्यानमन्तरेण न भाष्यादवगन्तुं शक्यते। यथाऽऽहुः प्रकटार्थकाराः—'तदेतद् भाष्यतात्पर्यपर्यालोचनातो निश्चेतव्यम्' इति।

तदेवं न्यायानां निष्कृष्टस्वरूपज्ञानस्यावश्यकत्वं सामान्यानां दुर्ज्ञेयत्वं च पश्यद्भिः प्रकाशात्मश्रीचरणैः अधिकरणन्यायानां निष्कृष्टस्वरूपपरिज्ञानाय **शारीरकन्यायसंग्रहः** प्रणीतः। तत्र प्रायेण सिद्धान्तन्यायानां समन्वयपुरस्सरं निरूपणं कृतम्। क्वचिच्च

पूर्वपक्षन्यायोऽपि संगृहीतः। प्रकटार्थादयोऽपि न्यायनिरूपणेऽनुमानप्रयोगे चानेकत्रेममेव ग्रन्थमुपजीवन्ति। भाष्यभावप्रकाशिकायां बहुष्वधिकरणेषु आनुपूर्व्या एतद्ग्रन्थांशः संगृहीतः।

संग्रहोऽयं त्रिनवत्यधिकशतं न्यायान् संगृह्णाति। तथा च ग्रन्थान्ते श्लोकः 'शारीरकाणां न्यायानां सप्तन्यूनशतद्वयम्। प्रकाशात्ममुनीन्द्रेण निर्णीतं न्यायवेदिना।' इति। श्लोकोऽयं केषु चिल्लिखितपुस्तकेषूपलब्धः अत्रापि संनिवेशितः। यद्यपि भाष्ये (१९१) एकनवत्यधिकशतसंख्यान्यधिकरणानि दृश्यन्ते तथापि ज्योतिश्चरणाधिकरणे 'छन्दोऽभिधानात्' इत्यन्तरागर्भिताधिकरणस्य, दहराधिकरणेऽन्तरागर्भितस्य 'उत्तराच्चेत्—' इत्यधिकरणस्य च मेलनेनोक्ता संख्या संपद्यते। 'यदेव विद्ययेति हि' इत्यधिकरणमेकं लेखकप्रमादेनात्र नोपलभ्यते।

क्वचिदेकस्यैवार्थस्य सिद्धयेऽनेकेऽपि न्यायाः आश्रिताः भाष्येऽत्रापि संगृहीताः। आनन्दमयाधिकरणे वृत्तिकारमतसंग्रहो न कृतो ग्रन्थकृद्भिः। समन्वयाधिकरणे षड्विधतात्पर्यलिङ्गसंग्रहः, आनन्दमयाधिकरणे श्रुतिलिङ्गादिस्वरूपनिरूपणं च सकलशास्त्रोपयोगितया अत्र कृतम्। तत्र 'संज्ञासाम्यं समाख्या' इति निरूपणं 'समाख्या यौगिकः शब्दः' इति मीमांसकसंमताल्लक्षणाद् वैलक्षण्यमावहति। संग्रहोक्तसमाख्यालक्षणं **कल्पतरुकारै**रपि वेधाद्यधिकरणे पुरस्कृतम्। ७७५ पृ। आत्मगृहीत्यधिकरणे च कल्पतरुकारैः—'श्रुतिद्वयेऽपि विद्यैक्ये सदात्मभ्यामुपक्रमः। कृतः किमिति तत्रोचुः आचार्या न्यायसंग्रहे।' इत्यादिना न्यायसंग्रहोक्तो विषयः संगृहीतः। विषयवाक्ये विशेष्यपदं चेद् ब्रह्मवाचि तदा सा ब्रह्मणि श्रुतिः, विशेषणपदं चेत् तदा तस्य ब्रह्मपरत्वेन निर्णिनीषितस्य विशेष्यपदस्य च समभिव्याहाररूपं वाक्यमिति व्यवस्था न्यायसंग्रहाभिप्रेता ज्योतिश्चरणाधिकरणे कल्पतरौ समाश्रिता। (२०५ पृ.)

प्रकटार्थविवरणकाराः

भामत्याः पञ्चपादिकायाश्च पश्चात् प्रादुर्भूतेषु साक्षाद् भाष्यव्याख्यानेषु प्राचीनं प्रकटार्थविवरणमिति विद्वांसो मन्यन्ते। मद्रपुरीविश्वविद्यालयतः प्रकाशिते प्रकटार्थविवरणस्य प्रथमसंस्करणे ग्रन्थकर्तुर्नाम न निर्दिष्टम्। सिद्धान्तलेशसंग्रह-रत्नप्रभादिष्वपि 'प्रकटार्थकाराः' इत्येवोल्लेखो दृश्यते। तथापि अनुभूतिस्वरूपाचार्यकृतत्वेन संप्रतिपन्नेषु इष्टसिद्धिविवरणादिग्रन्थेषु प्रकटार्थनिरूपिता असाधारणप्रमेया अविकलमुपलभ्यन्ते; वाक्यरचनायां, भास्करादिखण्डने च साम्यं, प्रकटार्थस्यासकृदुल्लेखश्च तत्र संदृश्यते; अतः प्रो. वि.राघवन् महोदयैः प्रकटार्थस्य कर्तारः अनुभूतिस्वरूपाचार्या एवेति सप्रमाणं निरूपितमिति द्वितीयसंस्करणभूमिकायां निर्दिष्टम्। श्रीमदनुभूतिस्वरूपाचार्याः दक्षिणदेशे क्वचिल्लब्धजन्मानः गुर्जरप्रान्ते द्वारकादिक्षेत्रेषु क्रैस्तवीयद्वादशशताब्द्यां न्यवात्सुरिति विमर्शकाः। मायाऽविद्यादिविषयेऽसाधारणप्रक्रियानिरूपका एते सति प्रसङ्गे परमतनिराकरणेऽपि विशिष्य पराक्रमन्ते। आनन्दबोधाचार्यप्रणीतग्रन्थान् व्याचक्षाणाः एते तदुत्तरकालीना इति, कल्पतरुकारैः खण्ड्यमानाः तत्पूर्वकालीना इति च निश्चिनुमः। एतत्प्रणीतेषु ग्रन्थेषु प्रकटार्थविवरणम्, इष्टसिद्धिविवरणम्, माण्डूक्यभाष्यटिप्पणम्, गीताभाष्यटिप्पणम्, न्यायदीपावलीचन्द्रिका, प्रमाणमालानिबन्धः, खण्डनखण्डखाद्यटीका इत्यादयः प्रमुखाः सन्ति। व्याकरणे सारस्वतप्रक्रिया एतैरेव रचितेति विद्वांसो वदन्ति। अनुभूतिस्वरूपाचार्याणां शिष्याः जनार्दननामानः प्रकटार्थस्थितानि परमतनिराकरण-स्वमतव्यवस्थापनपराणि स्थलानि संगृह्य 'वेदान्ततत्त्वालोका'ख्यं ग्रन्थं निर्मितवन्तः। जनार्दनाश्चेमे न्यायनिर्णयकारादभिन्ना इति केचिन्मन्यन्ते।

प्रकटार्थविवरणम्

प्रकटार्थविवरणं च नातिविस्तृतं सरलं स्पष्टार्थकं ब्रह्मसूत्रभाष्यव्याख्यानमक्लेशेन भाष्यपङ्क्तियोजने तत्तात्पर्यावगमे च भृशमुपकरोति। एतद्व्याख्यानकरणे प्रवृत्तौ उद्देश्यं ग्रन्थकृतैव निर्दिष्टम्—

'ज्ञात्वाऽपि यस्य बहुकालमचिन्तनेन व्याख्यातुमक्षमतया परितापि चेतः।
तस्योपतापहरणाय मयेह भाष्ये प्रारभ्यते विवरणं प्रकटार्थमेतत्'।। इति।

अत्र प्रकटार्थमिति विशेषणेन प्रसिद्धविवरणग्रन्थस्य गूढार्थता ध्वनितेति विद्वांसो वदन्ति।

विवरणोक्तानां प्रमेयाणां संक्षेपेण विशदीकरणम्, तदुपरि परैरुद्भाविताक्षेपाणां साटोपं खण्डनं चात्र बहुश उपलभ्यते। श्रवणविधि-जीवेश्वरस्वरूप-जीवन्मुक्त्यादिनिरूपणेषु प्रकटार्थकृतोऽसाधारणं प्रक्रियाविशेषमाश्रयन्ति।

अद्वैतसिद्धान्तस्यानादिसम्प्रदायागतत्वप्रतिपादने, एकदण्डसंन्यासस्य प्रामाणिकत्वव्यवस्थापने चैते नितरामादरं बिभ्रति। अवसरेऽस्मिन् श्रीमद्भागवतस्य प्रमाणतयोपस्थापनं प्रकटार्थकृतां विशिष्यते।

प्रकटार्थस्यारम्भे—

'सत्यं ज्ञानमनन्तं यत् कूटस्थं सुखविग्रहम्।
नित्यमुक्तं परं ब्रह्म भवामि तदहं सदा' ।। इति,

समाप्तौ च—

'शुद्धं ब्रह्मास्म्यहं नित्यमक्षरं परमं पदम्।
तिष्ठामि क्व क्व गच्छामि जगदापूरितं मया' ।।

इति वेदान्ततात्पर्यविषयप्रत्यग्ब्रह्मैक्यानुसंधानमेतेषां वेदान्तसिद्धान्ते आदरातिशयं जीवन्मुक्तत्वं च व्यनक्ति।

भाषासरणिरपि प्रकटार्थकृतामत्यन्तं विशिष्टा विलसति। क्वचिद् यङन्त-यङ्लुगन्तपदबहुलया वचनभङ्ग्या व्यवहरन्तो विद्वच्चेतश्चमत्कुर्वन्ति। क्वचिच्च प्रसन्नां वाक्यसरणिमाश्रित्य वेदान्तसिद्धान्तं निरूपयन्ति। क्वचिच्चात्यन्तसंक्षिप्तां दुरूहार्थां वाचं प्रयुज्य विदुषां बुद्धिसामर्थ्यं परीक्षन्ते। क्वचिच्च भास्करकृतं भाष्यदूषणमसहमानाः 'भास्करेण शुना बुबुक्के' 'भास्करसारमेयश्चुक्रोश' इत्यादिरूपां सहृदयहृदयोद्वेजिकामपि वचनभङ्गीमङ्गीकुर्वते।

महाविद्याप्रयोगकुशला इमे महाविद्यानुमानेनेश्वरं सिषाधयिषतां महाविद्ययैव जगत्कारणत्वेन गर्दभसिद्धिमप्यापादयन्ति।

अद्वैतसिद्धान्तविरुद्धं मतं न कथंचिदप्येते सहन्ते। भास्करकेशवप्रभृतिभिः अद्वैतसिद्धान्ते उद्भावितान् दोषान् सविशेषं पराकुर्वन्ति। सति प्रसङ्गे तार्किकादिप्रक्रियामपि विविधं दूषयन्ति। उदयनाचार्याणां नामग्रहणपुरस्सरं खण्डनं कुर्वन्ति। भासर्वज्ञादीनां तु विनैव नामोल्लेखं खण्डनमिहोपलभ्यते।

स्वयूथ्यान् श्रीवाचस्पतिमिश्रानप्येते बहुत्र खण्डयन्ति। तान् प्रत्यपि 'वाचस्पतिस्तु मण्डनपृष्ठसेवी' इत्यादिरूपां रूक्षां वाचं प्रयुञ्जते। परन्तु भास्करं प्रतीव न कटुतरा वाक्यशैली भामतीकारं प्रति समाश्रिता।

प्रकटार्थे भामतीदूषणानि

अथ प्रकटार्थे वाचस्पतिमिश्रदूषणपराणि कानिचित् स्थलानि परामृश्यन्ते—

१. समन्वयसूत्रे भाष्ये ज्ञानस्यापुरुषतन्त्रत्वं व्युत्पाद्याविधेयत्वात् तद्विषये श्रूयमाणा लिङादयो विधित्वं जहतीति निरूप्य प्रश्नोऽयमुत्थापितः—'किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादीनि विधिच्छायानि वचनानि?' इति। तत्समाधानं च 'स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः' इति तत्रैवोक्तम्। विधित्वाभावेऽपि स्तुतिद्वारा प्रवृत्तिप्रयोजकानीति तदाशयः। अत्र वाचस्पतिमिश्राः श्रवणमनननिदिध्यासनानामपि ब्रह्मसिद्धिकारोक्तदिशा ज्ञानरूपत्वं व्यवस्थाप्य तेष्वपि विधिनिराकरणपरतया भाष्यं व्याचक्षते। पुनश्च 'सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्' (ब्र.सू. ३-४-४७) इति सूत्रे 'विद्यासहकारिणो मौनस्य बाल्यपाण्डित्यवद् विधिरेवाश्रयितव्यः, अपूर्वत्वात्' इति बाल्यपाण्डित्यशब्दित-मननश्रवणनिदर्शनेन मौनशब्दितनिदिध्यासने विधिप्रतिपादकं भाष्यं व्याचक्षाणाः 'तत्राश्रूयमाणविधित्वेऽपि अपूर्वत्वाद् विधिरास्थेयः इत्यर्थः' इति श्रवणादिषु विधिमूरीकृतवन्तः।

तदेतत् पूर्वोत्तरविरुद्धम्। तथा श्रवणादेः संन्यासाश्रमधर्मत्वात् अविहितस्य धर्मत्वानुपपत्तेः तद्विधिनिराकरणं संन्यासाश्रमद्वेषसूचकम्। अपिच श्रवणविध्यभावे 'श्रवणे कोऽधिकारी' इति जिज्ञासाया अभावात् 'अथ' शब्देनाधिकारिविशेषनिर्णायकमाद्यसूत्रं व्यर्थमापद्येतेति दूषयन्ति प्रकटार्थकाराः—

'वाचस्पतिस्तु मण्डनपृष्ठसेवी सूत्रभाष्यार्थानभिज्ञः समन्वयसूत्रे श्रवणादिविधिं निराचचक्षे। अत्र तु तद्विधिमूरीचक्रे। अहो बतास्य पाण्डित्यम्! श्रवणादीनां च संन्यासाश्रमधर्मत्वात् तद्विधिं निराकुर्वन् संन्यासाश्रमायैव द्वेष्टि। विध्यभावे च 'अथ' शब्देन साधनचतुष्टयसंपन्नाधिकारिसूत्रणं चानुपपन्नम्। तस्माद् वाचस्पतिप्रलापमुपेक्ष्य यावत्साक्षात्कारं श्रवणादि विधितोऽनुष्ठेयम्' इति।

अत्र कल्पतरुकाराः प्रकटार्थोक्तदूषणपरिहारायेत्थं प्रयतन्ते—'समन्वयसूत्रे निदिध्यासनादेः वस्त्ववगमवैशद्यं प्रति अन्वयव्यतिरेकसिद्धत्वादविधेयत्वमुक्तम्। इह तु अन्वयव्यतिरेकसिद्धत्वेऽपि शाब्दज्ञानात् कृतकृत्यतां मन्वानो यदि कश्चित् ज्ञानातिशयरूपे निदिध्यासने न प्रवर्तेत, तं प्रत्यप्राप्तं तद् विधीयत इत्युच्यते' इति। समन्वयसूत्रे श्रवणादिषु अपूर्वविधित्वं निराक्रियते, न नियमविधित्वम्, इह तु नियमविधित्वमेव स्वीक्रियत इत्यविरोध इति तदाशयः परिमले वर्णितः।

ततः—'नियमविधित्वस्वीकारेऽपि विधित्वानपायात् 'विधिच्छायानि' इति समन्वयसूत्रस्थभाष्यविरोधः, तत्रैव विधिसरूपार्थवादत्व-प्रतिपादनपरभामतीविरोधश्चेत्यस्वरसात् समाधानान्तरमुक्तं कल्पतरुकारैः—'अथवा पाण्डित्यादिशब्दान्तरादप्राप्तिः अपूर्वत्वम्, विधित्वं चार्थवादस्यैव सतो वाक्यस्य प्रशंसाद्वारेण प्रवृत्त्यतिशयकरत्वम्। अत एव समन्वयसूत्रे भाष्यम्—'विधिच्छायानि वचनानि' इति। अपि च—नात्रापूर्वविधिः प्राप्तेरनन्योपायतो न च। नियमः परिसंख्या वा श्रवणादिषु संभवेत्। ....तस्मान्न वाचस्पतेः पूर्वापरव्याहतभाषिता, नापि सूत्रभाष्यार्थानभिज्ञता' इति। अस्मिन् पक्षे सूत्रे भाष्ये भामत्यां च विधिपदं विधिसरूपार्थवादपरमिति कल्पतर्वाशयः।

परन्त्वत्र विधिपदस्य मुख्यार्थत्यागो दोषः। अपि च अस्मिन्नधिकरणे 'अथ मुनिः' इति वाक्ये विधिसरूपार्थवादत्वस्यैव सिद्धान्तयितव्यत्वे 'अथ मुनिः' इति प्रशंसावाद इति पूर्वपक्षासंगतिः, तस्यैव सिद्धान्तत्वात्। यदि च पूर्वपक्षसिद्धान्तयोः तस्य वाक्यस्यार्थवादत्वसाम्येऽपि पूर्वपक्षे बाल्यस्य प्रशंसा, सिद्धान्ते तु मौनस्य प्रशंसेति भेदः कल्प्येत, तदापि उदक्षरं क्लिष्टं चेदं व्याख्यानं भाष्याभिप्रेतं न भवितुमर्हतीति प्रकटार्थाशयः।

अत्र प्रकटार्थोक्तेषु त्रिषु दोषेषु आद्यः परिशीलितः कल्पतरौ। अवशिष्टदोषद्वयं तु भामत्यभिप्रायवेदिनां विदुषां सुगमसमाधानमिति उपेक्षितं कल्पतरुकृद्भिरिति भाति।

२. 'ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्' (ब्र.सू. ३-४-५१) इत्यधिकरणे श्रवणादीनां फलं साक्षात्कारः अस्मिन्नेव जन्मनि भवत्यसति प्रतिबन्धके। सति तु प्रतिबन्धके जन्मान्तरे इति निर्णीतम्। इत्थं श्रवणादीनां जन्मान्तरीयफलजनकत्वस्वीकारः दर्शनोद्देशेन श्रवणादिविधायकशास्त्रमूलक एवेत्यभिप्रेत्य प्रकटार्थकारा वाचस्पतिमिश्रानुपहसन्ति—

'विधिसामर्थ्यमाश्रित्य ब्रुवन्नामुष्मिकं फलम् ।
श्रवणादेः कथंकारं वाक्पतिर्न च तत्रपे' ।। इति।

भामत्यां त्वत्रैवमुक्तम्—'यत एवात्र विद्योत्पादे श्रवणादिभिः कर्तव्ये यज्ञादीनां सत्त्वशुद्धिद्वारेण वा विघ्नोपशमद्वारा वोपयोगः, अत एव तेषां यज्ञादीनां कर्मान्तरप्रतिबन्धाप्रतिबन्धाभ्यामनियतफलत्वेन तदपेक्षाणां श्रवणादीनामप्यनियतफलत्वं न्याय्यम्' इति। (पृ. ९२४) एवं च यज्ञादीनामेव विधिसामर्थ्यसिद्धमनियतफलत्वम्, तत्सापेक्षत्वाच्चाविधेयस्यापि श्रवणादेरनियतफलत्वमिति वाचस्पत्याशयः। ततश्च विधिसामर्थ्यात् श्रवणादेरामुष्मिकफलत्वं नोक्तं वाचस्पतिनेति न प्रकटार्थकृताक्षेपस्यावकाशः। तथा च कल्पतरावुक्तम्—'एवं च—विधिसामर्थ्यमाश्रित्य ब्रुवन्नामुत्रिकं फलम्। श्रवणादेः कथंकारं वाक्पतिर्न च तत्रपे—इति कैश्चित् कृत उपालम्भः एतद्ग्रन्थार्थालोचने परावृत्य तत्रैव धावति' इति। (पृ. ९२४) .

अत्रापि—कृतश्रवणादिकस्य पुंसः प्रतिबन्धवशादिह जन्मनि फलानुत्पादेऽपि पूर्वजन्मनि कृतःश्रवणादिः जन्मान्तरे फलिष्यतीति न लौकिकप्रमाणेनावगन्तुं शक्यम्। ततश्च साक्षात्कारोद्देशेन श्रवणादिविधायकं शास्त्रमेवोक्तकल्पनायां मूलमङ्गीकार्यम्। ततश्च श्रवणादेरामुष्मिकफलत्वस्य विधिसामर्थ्यसिद्धत्वमेवायातमिति कथं प्रकटार्थोक्तदोषानवकाश इति चिन्तनीयम्।

३. वाचस्पतिमते—अविद्यावच्छिन्नं चैतन्यं जीवः। जीवाश्रिताविद्याविषयीभूतमनवच्छिन्नं चैतन्यमीश्वरः। तदेव प्रपञ्चस्य विवर्तोपादानम्। तथा च ब्रह्मणो जगत्कर्तृत्व-सर्वज्ञत्व-सर्वेश्वरत्वादिधर्माः जीवाश्रिताविद्याविषयीभूतस्यैव, न शुद्धस्येति सर्वेऽपि पारमेश्वरा धर्माः जीवभ्रमसिद्धाः जीवकल्पिताः। एवं स्थिते 'परात्तु तच्छ्रुतेः' (२.३.४१) इत्यधिकरणे यत् जीवस्य कर्तृत्वमीश्वरप्रेरणाधीनमिति निरूपितं तद् वाचस्पतिमते न संगच्छते। जीवस्य भ्रान्तत्वसिद्धौ ईश्वरस्य प्रेरकत्वसिद्धिः। भ्रान्तत्वं = भ्रमकर्तृत्वम्। तच्चेश्वरस्य प्रेरकत्वसिद्धौ जीवस्य सिध्यतीत्यन्योन्याश्रयात्। तथा च प्रकटार्थविवरणम्—'इदमधिकरणं वाचस्पतेर्दुर्योजम्। यतः—

'प्रेरकत्वे परेशस्य जीवस्य भ्रान्तिकर्तृता।
जीवभ्रान्त्या परेशस्य प्रेरकत्वं सुदुर्घटम्' ।। इति।

अत्रान्योन्याश्रयपरिहाररीतिः कल्पतरुकारैः स्थलान्तरे दर्शिता। जीवस्य भ्रान्तत्वम्, ईश्वरस्य प्रेरकत्वं चेत्युभयोरनादितया नान्योन्याधीनता क्षतिमावहति। अपि च गन्धो यथा विषयतया घ्राणस्य प्रेरकः, अत एव तस्यातिग्रहत्वम्, एवमीश्वरोऽपि जीवाश्रिताविद्याविषयतयैव प्रेरकोऽभिमतः। उक्तं च कल्पतरौ—'अविद्याविषयत्वेन च तत्प्रेरकत्वम्, गन्धस्येव घ्राणं प्रति' इति। (पृ. ३७८)

४. वाचस्पतिमते ब्रह्मणो जीवकल्पितसर्वज्ञत्वाद्यभ्युपगमे मुक्तस्य पुनर्बन्धापत्तिः। जीव कल्पितस्य बद्धत्वस्यापि तत्र संभवात्। न च तस्य कल्पितत्वान्न दोष इति वाच्यम्। जीवानामपि कल्पितस्यैव बद्धत्वस्य स्वीकारादविशेषात् इति प्रकटार्थकृतो वाचस्पतिमतं प्रतिक्षिपन्ति—'वाचस्पतेस्तु स्वाविद्यानाशेन ब्रह्मीभूतस्यापि द्वैतदर्शित्वं न व्यावर्तते। जीवाविद्याभिरेव ब्रह्मणः सर्वाशि [सर्वदर्शि] त्वाभ्युपगमात्। तदा च 'यत्र नान्यत्पश्यति' 'यत्र त्वस्य' इत्यादिश्रुतिविरोधः। जीवाश्च पुनर्ब्रह्मणो जगदुत्पत्तीः कल्पयन्तीति तद्भावापन्नस्य पुनर्देहाद्यात्मतापत्तावपुनरावृत्तिश्रुतिबाधः। न ह्यविद्यावतामपि तात्त्विकी पुनरावृत्तिः। जीवाविद्यानां च ब्रह्मसंस्पर्शित्वाभ्युपगमादविद्याया अपि पुनरावृत्तिप्रसङ्गः' इति (पृ. १२४२)।

अत्र भामत्याशयाभिज्ञाः—वाचस्पतिमते जीवोपाधीनामविद्यानां नानात्वात् यदविद्योपाधिको यो जीवः तस्य विद्यया तदविद्याव्यक्तिनिवृत्तौ द्वैतदर्शित्वापादनं न संगच्छते। तदुपाधिव्यक्त्यभावे तज्जीवव्यक्तेरेवाभावात्। यावदेकोपाधिगता बन्धानुवृत्तिः तावद्धि एको जीव इति व्यवहारः। तथा च मुक्तस्य जीवस्य न बन्धापत्तिरिति।

५. वाजसनेयिब्राह्मणे अग्निहोत्राहुती अधिकृत्य जनकयाज्ञवल्क्ययोः संवादः प्रवृत्तः। तत्र जनकः—अग्निहोत्राहुत्योः उत्क्रान्तिः, गतिः, प्रतिष्ठा, तृप्तिः, लोकंप्रत्युत्थायीति षट्सु विषयेषु याज्ञवल्क्यस्याज्ञानमुद्भावितवान्। याज्ञवल्क्येन च स्वीयाज्ञानेऽनुमोदिते जनक एव षण्णामपि विषयाणां निरूपणं 'ते वा एते आहुती हुते उत्क्रामतः' इत्यादिना कृतवान्। अत्राग्निहोत्राहुत्योरुत्क्रमणादिकथनं जीवस्य जन्मान्तरप्राप्तौ जीवेन सह सूक्ष्मरूपेण तयोः गमनाभिप्रायम्। तदिदम् आहुतिमयीभिरद्भिः परिवेष्टितो जीवो लोकान्तरं गच्छतीत्यत्र संवादरूपेण भाष्यकारैरुदाहृतम्—'तथा चाग्निहोत्रे षट्प्रश्नीनिर्वचनरूपेण वाक्यशेषेण 'ते वा एते आहुती हुते उत्क्रामतः' इत्येवमादिनाऽग्निहोत्राहुत्योः फलारम्भाय लोकान्तरप्राप्तिः प्रदर्शिता' (ब्र.सू. ३-१-६) इति। अत्र 'षट्प्रश्नीनिर्वचनरूपेण' इति भाष्ये पूर्वोक्ताः षट् प्रश्ना एव विवक्षिताः। वाचस्पतिमिश्रास्तु अत्रैवं व्याचक्षते—'अग्निहोत्रे षट्सूत्क्रान्तिगतिप्रतिष्ठातृप्तिपुनरावृत्तिलोकप्रत्युत्थायिषु अग्निसमिद्धूमार्चिरङ्गारविस्फुलिङ्गेषु प्रश्नाः षट्, तेषां यः समाहारः षण्णां सा षट्प्रश्नी, तस्या निरूपणं प्रतिवचनम्' इति। (पृ. ६६३)

अत्र जनकेन कृताः षट् प्रश्नाः उत्क्रान्त्यादिविषयकाः, न त्वग्निसमिदादिविषयकाः इति वाचस्पतिग्रन्थोऽनुपपन्न इत्याहुः प्रकटार्थकाराः—'वाचस्पतिस्तु एतदज्ञात्वा 'अग्निसमिद्धूमार्चिरङ्गारविस्फुलिङ्गविषयाः षट् प्रश्नाः' इति व्याचख्यौ' इति।

अत्र कल्पतरुकारा: षट्प्रश्ननिरूपणे प्रस्तुता विद्या पञ्चाग्निविद्यातोऽभिन्ना। भूतसूक्ष्माणां द्युलोकगमनं, ततः प्रत्यावर्तनं, प्राप्यानां द्युलोकादीनामग्नित्वकल्पनम्, अन्तिमाहुत्यनन्तरं पुरुषरूपेणाविर्भावः इत्याद्यंशानामुभयत्र साम्येन प्रत्यभिज्ञानात्। ततश्च तत्राश्रुतानां धूमादीनां पञ्चाग्निविद्यात उपसंहारात्, प्रतिवचनेऽग्निसमिदादिनिरूपणदर्शनेन प्रश्नानामपि तत्सहितोत्क्रान्त्यादिविषयकत्वावगमात्, अन्यथा प्रश्नोत्तरयोः भिन्नविषयत्वापत्तेः षडपि प्रश्ना: अग्न्यादिविषया इत्येवं प्रौढ्या विद्यैक्याभ्युपगमेन वाचस्पतिग्रन्थं संगमय्य प्रकटार्थोक्तदूषणमुद्धरन्ति—'एवं च विस्फुलिङ्गादिषु षट्प्रश्नानुपलम्भात्, उत्क्रान्त्यादिविषयाणां च विस्फुलिङ्गादिविषयत्वाभावात् श्रुत्यनभिज्ञो वाचस्पतिरित्युपहासोऽनवसरः' इति। (पृ. ६६४)

६. तृतीयाध्याये तृतीयपादे 'हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत् तदुक्तम्' (ब्र.सू. ३-३-२६) इत्यधिकरणे निरूपितम्—'उपासकस्य विद्याबलात् सुकृतदुष्कृते हीयेते। उपासकस्य सुहृद्भिः तदीयं सुकृतमुपादीयते, द्विषद्भिश्च दुष्कृतमिति कस्यांचित् शाखायां श्रूयते विद्याप्रशंसार्थम्। क्वचिच्छाखायां केवलं हानमेव पठ्यते। तत्रापि शाखान्तरश्रुतमुपादानमुपसंहर्तव्यं स्तुतिप्रकर्षलाभाये'ति। शाखान्तरस्थितस्य शाखान्तरे उपसंग्रहे दृष्टान्तचतुष्टयं सूत्रे 'कुशा' इत्यादिनोपात्तम्। उद्गातॄणां गानकाले स्तोत्रीयापरिगणनार्थं निक्षिप्यमाणा: दारुशलाकाविशेषा: कुशा उच्यन्ते। 'औदुम्बराः कुशाः' इति शाट्यायनिशाखायां विशेषतः औदुम्बरत्वं श्रूयते। शाखान्तरे 'कुशा वानस्पत्याः' इत्येव श्रूयते। तत्र वनस्पतिविशेषानाम्नानेऽपि शाखान्तरोक्तमौदुम्बरत्वं संगृह्यते इति प्रथमदृष्टान्तोपपत्तिः।

अत्र 'अस्त्री कुशम्' इति कोशात् कुशशब्दस्य स्त्रीलिङ्गेऽभावात् 'कुशाच्छन्दः' इति सौत्रप्रयोगानुपपत्तिं मत्वा भामत्याम् 'आच्छन्दः' इति पदच्छेदः आश्रितः। तत्र 'अस्त्री कुशम्' इति कोशस्य दर्भवाचककुशशब्दविषयत्वात्, समिद्वाचिकुशाशब्दस्य च स्त्रीलिङ्गत्वात् तदज्ञानात् वाचस्पतिस्तथा पदं चिच्छेदेति प्रकटार्थकारा: अधिक्षिपन्ति।

अत्र कल्पतरुकाराः—'औदुम्बराः कुशाः' इति श्रुतौ कुशशब्दः पुंलिङ्ग एव। अन्यथा 'औदुम्बर्यः' इति स्यात्। अमरसिंहोऽपि 'अस्त्री कुशम्' इति कुशशब्दस्य स्त्रीलिङ्गताविरहमनुशास्ति। ततश्च पुंलिङ्गतैवोचिता। कुशशब्दस्य दर्भरूप तृणविशेषवाचकस्यैव लक्षणया शलाकायामपि प्रयोगोपपत्तौ शलाकावाची कुशशब्दः स्त्रीलिङ्गोऽन्य एवेत्ययुक्तम्, 'अन्याय्यश्चानेकशब्दत्वम्' इति न्यायात्। 'औदुम्बर्यः कुशाः' इति भाष्ये स्त्रीलिङ्गप्रयोगश्च कस्याश्चिच्छ्रुतेरनुकारमात्रम्। अतः कुशशब्दो लोके न स्त्रीलिङ्ग इति भामत्याम् 'आच्छन्द' इति च्छेदेन सूत्रावयवो व्याख्यातः इति प्रकटार्थोक्तदूषणं निरस्यन्ति। तथा च कल्पतरुः—'समिद्वाची कुशाशब्दः अन्य एव स्त्रीलिङ्ग इति लिङ्गानभिज्ञानाद् वाचस्पतिः पदं चिच्छेदेति केचित्। तदतिमन्दम्, अनेकशब्दत्वस्यान्याय्यत्वात्। ....तस्मात् पदवाक्यप्रमाणाब्धेः परं पारमुपेयुषः। वाचस्पतेरियत्यर्थेऽप्यबोध इति साहसम्' इति। (पृ ८०६)

इदं त्वत्र विवेचनीयम्—'शाट्यायनिनाम् 'औदुम्बराः कुशाः' इति विशेषवचनात् औदुम्बर्यः कुशा आश्रीयन्ते' इति प्रकृता भाष्यपङ्क्तिः। 'औदुम्बर्यः कुशाः' 'औदुम्बराः कुशाः' इति द्विविधोऽपि प्रयोगोऽस्यां पङ्क्तौ दृश्यते। तत्र प्रथमं 'शाट्यायनिनाम्' 'इति विशेषवचनात्' इति पूर्वोत्तरसमभिव्याहारात् श्रुतिवचनम् इति कल्पतरुकाराणामपि संमतम्। एवं स्थिते भाष्ये 'औदुम्बर्यः कुशाः' इति श्रुत्यन्तरानुकरणस्य किं प्रयोजनम्? अतश्च 'औदुम्बर्यः कुशा आश्रीयन्ते' इति भाष्यकाराणां स्ववचनमेव। तच्च शलाकावाचिकुशाशब्दस्य स्त्रीलिङ्गत्वात् पूर्वोदाहृतश्रुतौ 'औदुम्बराः' इति पुंलिङ्गप्रयोगो वा, स्त्रीलिङ्गत्वेऽपि टाप्प्रयोगो वा छान्दस इति द्योतयति। 'कुशा वानस्पत्याः स्थ ता मा पात' इति श्रुतौ स्त्रीलिङ्गेन तच्छब्देन परामर्शोऽपि कुशाशब्दस्य स्त्रीलिङ्गत्वे प्रमाणम्। अतश्च स्त्रीलिङ्गकुशाशब्दस्य प्रामाणिकत्वेन न 'अन्याय्यश्चानेकशब्दत्वम्' इति न्यायविषयता।

किञ्च तत्रभवान् पाणिनिरपि शलाकावाचिकुशशब्दस्य स्त्रीत्वं संमनुते। तेन हि—'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य' (पा.सू. ८-३-४६) इति सूत्रे 'कुशा' इति आबन्तप्रयोगः कृतः। तथा 'जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद् वृत्त्यमात्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु' (पा.सू. ४-१-४२) इति सूत्रेण अयोविकारवचनात् कुशशब्दात् ङीष्विधानादपि 'अस्त्री कुश' मिति कोशो दर्भवाचिकुशशब्दविषय इति स्वीकार्यम्। अतश्च सर्वमिदमालोच्य लिङ्गानुशासनव्याख्यायां कुशशब्दमधिकृत्य **भट्टोजिदीक्षितैरुक्तम्**—'शलाकावाची तु स्त्रियाम्। तथा च जानपदादिसूत्रेणायोविकारे

ङीषि कुशी। दारुणि तु टाप् कुशा। 'कुशा वानस्पत्याः स्थ ता मा पात' इति श्रुतिः। 'अतः कृकमि' इति सूत्रे कुशाकर्णीष्विति प्रयोगश्च। व्याससूत्रे च—हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दः' इति। तत्र शारीरकभाष्येऽप्येवम्। एवं च श्रुतिसूत्रभाष्याणामेकवाक्यत्वे स्थिते 'आच्छन्दः' इत्याङ्प्रश्लेषपरो भामतीग्रन्थः प्रौढिवादमात्रपर इति विभावनीयं बहुश्रुतैः' इति।

वाचस्पतिव्याख्यानुसरणम्

१. एवं वाचस्पतिं बहुधा दूषयन्तोऽपि प्रकटार्थकाराः अनेकेषु स्थलेषु वाचस्पतिव्याख्यामेवानुमन्यन्ते। यथा—प्रतर्दनाधिकरणे 'जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्' (ब्र.सू. १-१-३१) इति सूत्रे भाष्ये 'नोपासात्रैविध्यात्' इत्यादिभागस्य स्वमतेनार्थं व्याख्याय 'अथवा नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् इत्यस्यायमन्योऽर्थः' इत्यादिना वृत्तिकारमतेनार्थो वर्णितः। तत्र च ब्रह्मोद्देशेनोपासनत्रयविधाने वाक्यभेदप्रसङ्गरूपो दोषो वृत्तिकारमतेऽरुचिबीजतया भामत्यां वर्णितः। प्रकटार्थकाराश्च सनामोल्लेखं वाचस्पत्युक्तमरुचिबीजमुपन्यस्य भट्टवार्तिकोपन्यासेन तत् समर्थयन्ते—'तदेतद् वाचस्पतेर्न रोचते। कथम्? 'सोमेन यजेत' इत्यादौ युक्तं विशिष्टविधानम्, अपूर्वार्थत्वात्। इह तु ब्रह्मणः सिद्धतया विधानानर्हत्वात् तदुद्देशेनोपासनत्रयं विधातव्यमिति स्फुटो वाक्यभेद इति। वार्तिककृताऽप्युक्तम्—'प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः। अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः' इति' इति। (पृ. २०७)

परन्तु प्रकटार्थकारैरनुमोदितोऽप्ययं भामतीपक्षः भाष्यभावप्रकाशिकाकारैस्तिरस्क्रियते। तैस्तु धर्मत्रयविशिष्टोपासनाविधानं स्वीकृत्य भामत्युक्तो वाक्यभेददोषो दूषितः। तस्य चोद्धारः कल्पतरुकारैः, न्यायनिर्णयकारैश्च एकयैव रीत्या कृतः।

२. जिज्ञासासूत्रे अथशब्दस्यानन्तर्यरूपस्वाभिमतार्थनिर्धारणार्थमर्थान्तराणां प्रकृतासंगतिप्रदर्शनावसरे भाष्यम्—'मङ्गलस्य च वाक्यार्थे समन्वयाभावात्' इति। एतद्भाष्यव्याख्याने भामतीप्रस्थानस्य विवरणप्रस्थानस्य चास्ति वैलक्षण्यम्। विवरणं मङ्गलस्याथशब्दार्थत्वं स्वीकृत्य 'ब्रह्मजिज्ञासा कर्तव्या' इति वाक्यार्थेऽन्वयाभावं निरूपयति। भामती तु मङ्गलास्याथशब्दार्थत्वाभावादेव वाक्यार्थे समन्वयाभावं वदति। तत्र प्रकटार्थकृता भामतीप्रस्थानमनुसृतम्—'पदार्थो हि वाक्यार्थे समन्वेति। मङ्गलं च नाथपदार्थः, किन्तु प्रयोजनमिति भावः।' इति। (पृ. ३८-३९)। तत्र टिप्पण्यामथशब्दस्य मङ्गलवाचकत्वावश्यकत्वं प्रतिपाद्य विवरणपक्षस्यैव युक्ततरत्वं प्रदर्शितमस्माभिः।

३. साधनाध्याये वैराग्यपादेऽनुशयिनामवरोहनिरूपणे 'त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते' इति श्रुतं व्रीह्यादिरूपेण जन्म न मुख्यम्, इष्टादिकारिणां तादृशजन्महेतोः पापकर्मणोऽभावादिति जीवान्तराधिष्ठितेषु व्रीह्यादिषु तेषां संश्लेषमात्रं 'जायन्ते' इत्यनेन विवक्षितमिति सिद्धान्तितम्। तत्र इष्टादिकारिणामपि पापकर्म विद्यतेऽग्नीषोमीयपश्वालम्भाद्यात्मक-मित्याशङ्क्य धर्माधर्मयोः शास्त्रैकप्रमाणकत्वात् शास्त्रेण चाग्नीषोमीयपशोर्धर्मत्वबोधनात् न तेषां पापकर्मेति समाहितम्—'अशुद्धमिति चेन्न शब्दात्' (ब्र.सू. ३-१-२५) इति। पुनरपि 'न हिंस्यात् सर्वा भूतानि' इति शास्त्रेणैव अग्नीषोमीयहिंसाया अपि निषिद्धत्वेनाधर्मत्वमाशङ्क्य उत्सर्गापवादन्यायेन अग्नीषोमीयपशुविधिः हिंसानिषेधस्य बाधक इति निषेधाविषयत्वात् न तस्याधर्मत्वमिति समाहितं भाष्यकारैः—'बाढम्, उत्सर्गस्तु सः। अपवादः 'अग्नीषोमीयं पशुमालभेत' इति। उत्सर्गापवादयोश्च व्यवस्थितविषयत्वम्। तस्माद् विशुद्धं कर्म वैदिकम्' इति।

अत्रोत्सर्गापवादन्यायो भाष्योक्तो न प्रवर्तते। निषेधशास्त्रं हि पुरुषार्थहिंसां निषेधति, न क्रत्वर्थहिंसाम्। विधिश्च क्रत्वर्थहिंसां विधत्ते। अतो विषयभेदान्नानयोः उत्सर्गापवादभावः। यत्र हि सामान्यशास्त्रं विशेषशास्त्रविषयमपि क्रोडीकरोति, तत्रोत्सर्गापवादन्यायः प्रवर्तते। यथा 'पदे जुहोति' 'आहवनीये जुहोति' इत्यादिषु। अतो विभिन्नविषयकत्वात् विधिविषयहिंसायां निषेधशास्त्रं न प्रवर्तते इत्येतस्मिन्नर्थे उत्सर्गापवादन्यायो भाष्ये उपचरितः इति भामतीकाराः। प्रकटार्थेऽपि तदेवानुसृतम्—'सत्यं धर्मत्ववदधर्मत्वमपि शास्त्रादेव गम्यते, किन्तु भिन्नविषयत्वान्न विरोध इत्याह—बाढमिति। 'न हिंस्यात्' इति निषेधस्य प्राप्तिसापेक्षत्वात् मानान्तरप्राप्तस्य च मानान्तरेण निषेद्धुमशक्यत्वात् रागतः पुरुषार्थत्वेन प्राप्ताया हिंसाया निषेधकत्वम्, न क्रत्वर्थायाः। अतः क्रत्वर्थहिंसायाः प्रतिषेधाभावान्नाधर्मत्वम्। पुरुषार्थहिंसायाश्च प्रतिषिद्धत्वेनाधर्मत्वमिति विभिन्नविषयत्वमित्यर्थः।' इति।

वस्तुतस्तु 'न हिंस्यात्' इत्यत्र हिंसिधातुना हिंसासामान्यस्यैव निषेधविषयत्वेनोपस्थापनात् अग्नीषोमीयहिंसाया अपि तदन्तर्भावात् भिन्नविषयकत्वाभावेन विशेषविषयकत्वेन विधिशास्त्रं निषेधशास्त्रं बाधते इति मुख्य एवोत्सर्गापवादन्यायो भाष्याभिप्रेतः। विस्तरेण निरूपितमेतत् परिमले। विवरणाचार्यैरपि विधिनिषेधयोः सावकाशनिरवकाशन्यायेन व्यवस्थामुक्तवद्भिः भिन्नविषयकत्वाभाव उक्त एव भवति। भिन्नविषयकत्वे सावकाशनिरवकाशन्यायस्याप्यप्रवृत्तेः।

एवं च भाष्यभावप्रकाशिका-न्यायनिर्णययोः प्रकृतस्थले **'तस्मादिति'**। इति प्रतीकधारणोत्तरम् 'नानृतं वदेदित्यादिवत्' इत्यतः पूर्वं 'यद्वा' इति पूरयित्वा भामत्यभिप्रायवर्णनपरत्वेन ग्रन्थो नेयः। विवरणाचार्योक्तस्यैवार्थस्योभयत्रानुवाददर्शनात्।

४. एवमध्यासभाष्ये 'इतरेतराविवेकेन' इति पदस्य 'भेदास्फुरणा'दिति प्रकटार्थकृतां विवरणं भामत्यनुसारि। विवरणप्रस्थानं त्वत्र प्रकारान्तरेणैव विवृणोति। तच्च न्यायनिर्णये स्पष्टम्।

इत्थं केषु चित् स्थलेषु प्रकटार्थकृतां वाचस्पत्यनुसरणं निदर्शितम्।

प्रकटार्थकृतां स्वतन्त्रव्याख्यानम्

सम्प्रति प्रकटार्थकृतां स्वतन्त्रव्याख्यानप्रकारः किञ्चिदिवालोच्यते।

१. 'युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यतः..... अध्यासो मिथ्येति भवितुं युक्तम्' इति आत्मानात्मनोः परस्पराध्यासाक्षेपपरं भाष्यम्। अत्र 'इतरेतरभावानुपपत्तिः' इत्यन्तम् 'अध्यासो मिथ्येति भवितुं युक्तम्' इति प्रतिज्ञायां हेतुः। स च साक्षाद् हेतुर्न भवितुमर्हति। यतः—आत्मानात्मनोस्तादात्म्याभावात् तयोस्तादात्म्याध्यासो नास्ति इति तदा वक्तुं शक्यते, यदि तयोस्तादात्म्याध्यासे तयोस्तादात्म्यमपेक्षितव्यं स्यात्। न च तत् संभवति, तादात्म्यरूपविषयसत्त्वे तज्ज्ञानस्य प्रमात्वापत्त्याऽध्यासत्वानुपपत्तेः। अतः तादात्म्यरूपविषयाभावे तत्प्रमाया अभावः, तत्प्रमाया अभावे तज्जन्यसंस्काराभावः, तदभावे च तादात्म्यभ्रमरूपाध्यासाभावः इति परम्परयोक्तहेतुं योजयन्ति विवरणानुसारिणः।

भामत्यनुसारिणस्तु—इतरेतरभावानुपपत्तिः = इतरेतरभावप्रतीत्यनुपपत्तिः। सा च अध्यासाभावे हेतुरिति व्याचक्षते। अत्र च 'इतरेतरभावानुपपत्ति'पदे लक्षणा स्वीकार्या।

प्रकटार्थकारास्तु—इतरेतरभावानुपपत्तिः तादात्म्याभावः; तादात्म्यरूपविषयाभावात् तत्प्रतीतिरूपाध्यासाभावः, विषयं विना ज्ञानस्यासंभवात्। तथा च 'इतरेतरभावानुपपत्ति'रित्यन्तं भाष्यमर्थाध्यासनिरासपरम्, ततः परं भाष्यं ज्ञानाध्यासनिराकरणपरमिति लक्षणामकृत्वा, साक्षाच्च हेतुतयोक्तं भाष्यं व्याचक्षते—'नन्वध्यासोऽर्थज्ञानात्मकः, तत्रार्थाभावेऽपि असदवभास एव विभ्रमः स्यादित्याशङ्क्याह—इत्यतोऽस्मत्प्रत्ययेति। यतोऽर्थाध्यासो न संबोभूयते, अतोऽर्थावभासोऽपि न जाघट्यते, निरालम्बनज्ञानाभ्युपगमप्रसङ्गात्' इति। टिप्पण्यां स्पष्टीकृतोऽयमर्थः (पृ. ९)।

२. अध्याससमाधानभाष्येऽपि प्रकटार्थकृतां विलक्षणा व्याख्यानसरणिर्दृश्यते। प्रकटार्थरीत्या युष्मदस्मदित्यादिषष्ठ्यन्तत्रयेण क्रमेण विलक्षणशब्दप्रतीतिविषयतया भेदग्रहः, द्वयोर्विषयत्वाभावः, सादृश्याभावश्च अर्थाध्यासाभावे तद्द्वारा ज्ञानाध्यासाभावे च हेतुरुक्तः। तत्र विलक्षणशब्दवाच्यतामात्रेण, तादृशप्रतीतिमात्रेण वा यो भेदः सिध्यति, नासावध्यासविरोधी, 'इदं रजतम्' इत्यत्रापि हि विलक्षणशब्दवाच्यत्वं, तादृशप्रतीतिविषयत्वं चास्ति, अथ चाध्यासोऽप्यस्ति। अतश्च शास्त्रजन्यो यो देहाद्यात्मनोर्विवेकः, स एवाध्यासविरोधी, स चात्र नास्तीति प्रदर्श्यते—'अत्यन्तविविक्तयोधर्मधर्मिणोः इतरेतराविवेकेन' इति। 'नैसर्गिक' इति च शास्त्राद्याधीयसंस्काराजन्य इत्यर्थकम्। तथा च आभ्याम् अंशाभ्यामध्यासविरोधिभेदग्रहाभाव उक्तः। 'मिथ्याऽज्ञाननिमित्तः' इति विशेषणं च विषयत्वं सादृश्यं च नापेक्षितमध्यासे, अज्ञानमेवाध्यासेऽपेक्षितमिति द्योतयति। तथा च विरोधिनोऽभावात् कारणस्य चाज्ञानस्य सद्भावात् अन्योन्यस्मिन् आत्मदेहादौ अ्योन्यात्मकतां देहाद्यात्मभावं परस्परधर्मांश्च अध्यस्य समारोप्य 'अहमिदम्'

'ममेदम्' इति अभिज्ञाऽभिवदनरूपो लोकव्यवहारो भविष्यति। तथा च अध्यासो निर्विघ्न इति भाव:। तदेवं 'सत्यानृते मिथनीकृत्य' इति भाष्यांशोऽवशिष्यते। स च पुरोवर्तिरजतयो: सत्ययोरेव संसर्ग 'इदं रजतम्' इति भ्रमे विषय इति यन्नैयायिका वदन्ति, तन्निरासार्थ:—सत्यानृतयोरेव संसर्गो भ्रमे विषय इति। (द्र.सम्पूर्णमध्यासभाष्यव्याख्यानम्)

अत्र प्रकटार्थकृतामेवमध्यासभाष्ययोजना इतरविलक्षणेति स्फुटम्।

३. एवं 'स्मृतिरूप: परत्र पूर्वदृष्टावभास:' इति अध्यासलक्षणभाष्यमपि प्रकारान्तरेणैव व्याख्यान्ति। तत्र स्मृतावतिव्याप्तिवारणाय स्मृतिसदृशार्थकं स्मृतिरूपपदम्। स्मृतिसादृश्यं च संस्कारजन्यत्वेन। परत्रेत्यनुपादाने संस्कारजन्यत्वे सति पूर्वदृष्टावभासत्वस्य प्रत्यभिज्ञायां सत्त्वादतिव्याप्ति:। तद्वारणाय परत्रेति। परत्रेति विषयसप्तमी। पूर्वदृष्टो योऽर्थ: तद्भिन्नविषयकेत्यर्थ:। प्रत्यभिज्ञायां च पूर्वदृष्टस्यैव विषयत्वात् नातिप्रसङ्ग:। एवमपि 'गोसदृशोऽयं गवय:' इति प्रत्यक्षेऽतिव्याप्ति:, तत्र पूर्वदृष्टगोभिन्न-गवयविषयकत्वसत्त्वात्, सादृश्यविशिष्टगवयांशे तस्य प्रत्यक्षत्वेऽपि गवांशे संस्कारजन्यत्वेन स्मृतिरूपत्वाच्च। अत: 'पूर्वदृष्ट' इत्यावर्त्यते। पूर्वदृष्टस्यैवावभास:, न तत्सादृश्यस्येत्यर्थ:। पूर्वदृष्टसादृश्याविषयकत्वं फलितोऽर्थ:। उक्तप्रत्यक्षस्य पूर्वदृष्टगोसादृश्यविषयकत्वादतिव्याप्तिनिरास:। एवं च पूर्वदृष्टभिन्नविषयकत्वं पूर्वदृष्टविषयकत्वं पूर्वदृष्टसादृश्याविषयकत्वं संस्कारजन्यत्वमिति विशेषणचतुष्टयमवभासे फलितम्। पूर्वदृष्टविषयकत्वं चावश्यं वक्तव्यम्। अन्यथा घटादिस्मृतावतिव्याप्ते:। तत्र पूर्वदृष्टपटभिन्नघटादिविषयकत्वस्य तत्सादृश्याविषयकत्वस्य संस्कारजन्यत्वस्य च सत्त्वात्। तदुक्तौ न दोष:। अत एवावृत्तिराश्रिता। एवं सति वेदान्तिमतेऽसंभव:, तन्मते भ्रमविषयस्यानिर्वाच्यरजतस्य पूर्वदृष्टत्वाभावादिति न शङ्क्यम्। भ्रमसंततेरनादित्वेन पूर्वपूर्वभ्रमविषयत्वेनानिर्वाच्यस्यापि रजतस्य दृष्टत्वानपायात्। एवं वदन्त: प्रकटार्थकारा: समानाकारकभ्रमेषु विषयैक्यमभिप्रयन्तीति ज्ञायते। उपपत्तिस्तु तत्र विद्वद्भिश्चिन्तनीया। नन्वेवं स्मृतिरूपपदवैयर्थ्यम्, स्मृतावतिव्याप्ते: पूर्वदृष्टभिन्नविषयकत्वाभावेनैव वारणसंभवादिति चेन्न। एवमपि 'पर्वतो वह्निमान्' इत्यनुमितौ अतिव्याप्ते:। तत्र हि पूर्वदृष्टाग्नित्वविषयकत्वं तद्भिन्नाग्निविषयकत्वं तत्सादृश्याविषयकत्वं चास्तीति। अत: स्मृतिरूपपदम्। तेन च पूर्वदृष्टविषयकसंस्कारजन्यत्वं विवक्षितम्। अनुमितौ च व्याप्तिसंस्कारजन्यत्वाङ्गीकारेऽपि वह्नित्वविषयकसंस्कारजन्यत्वाभावान्नातिव्याप्तिरिति। इयं च व्याख्यारीति: स्पष्टं वैलक्षण्यमावहति।

अत्र चास्माभि: प्रकटार्थमुपस्कृत्य तदभिप्रेता भाष्ययोजना प्रदर्शिता। तेन प्रकटार्थपङ्क्तीनां गाम्भीर्यं स्फुटं भवति।

४. 'अथातो ब्रह्मजिज्ञासा' इति सूत्रे अथशब्दोक्तनित्यानित्यवस्तुविवेकाद्यसंभवाशङ्कानिरासेन तद्धेतुत्वप्रतिष्ठापनार्थतया 'अत:' इति पदं व्याख्यातं भामत्यां विवरणादौ च। प्रकटार्थकृतस्तु साधनचतुष्टयसंपन्नस्य ब्रह्मजिज्ञासायां पाक्षिकाप्रवृत्तिनिरासकतया सौत्रमत:शब्दं व्याचक्षते—'अथेति मुमुक्षुत्वानन्तरं ब्रह्मजिज्ञासा कर्तव्येति प्रवृत्तिसिद्धयेऽनुवादपरिहाराय च कर्तव्यपदाध्याहारेण तावदन्वय:। तत्र ब्रह्मजिज्ञासैव मुमुक्षुणा किमिति कर्तव्या? आवृत्त्या कर्म कस्मान्न क्रियते? इति हेत्वाकाङ्क्षायामाह—अत: लोकवेदप्रसिद्धाद्धेतोरिति' इति। (पृ. ४७)

५. समन्वयाधिकरणे भाष्ये आत्मस्वरूपस्य मोक्षस्य संस्कार्यकर्मत्वनिराकरणावसरे अन्याश्रयक्रिययाऽऽत्मन: संस्कार्यत्वाभाव उक्ते इदं शङ्कासमाधानं प्रवृत्तम्—'ननु देहाश्रयया स्नानयज्ञोपवीतादिकया क्रियया देही संस्क्रियमाणो दृष्ट:? न, देहादिसंहतस्यैवाविद्यागृहीतस्यात्मन: संस्क्रियमाणत्वात्। प्रत्यक्षं हि स्नानाचमनादेर्देहसमवायित्वम्। तया देहाश्रयया तत्संहत एव कश्चिदविद्ययाऽऽत्मत्वेन परिगृहीत: संस्क्रियत इति युक्तम्' इति। (पृ. १०१-१०२) प्रकटार्थकारा एतद् भाष्यं मीमांसकानां वेदान्तार्थानभिज्ञतां कटाक्षयन्त: सचमत्कारं व्याचक्षते—'जाह्नवीजलाप्लवनादिना शुद्धोऽभूवम्' इत्यादिप्रत्ययविरोधमाह—**ननु देहाश्रययेति**। न तत्राप्यन्याश्रयक्रिययाऽऽत्मन: परमार्थत: संस्क्रियमाणत्वम्, किन्तूदकचलनेन प्रतिबिम्बचलनवत् अविद्याप्रतिबिम्बितस्य चिद्धातो: तदुत्थदेहादिसंसृष्टस्यानिर्वाच्यमेव तत्संस्कारेण संस्क्रियमाणत्वमित्याह—**न, देहादिसंहतस्यैवेति**। **कश्चिदिति**। अनिर्धारितविशेषरूप: परलोकफलभोक्ता कश्चिदस्तीत्येवं प्रतिपन्न इत्यर्थ:। **अविद्ययेति**। वेदान्तार्थानभिज्ञतया। **आत्मत्वेनेति**। ब्रह्मत्वेन परिगृहीतो मीमांसकै:—अहं प्रत्ययावसेय एव जीवो ब्रह्मशब्दाभिधेय:, तस्यालौकिकं बिम्बस्थानीयं ब्रह्मरूपं नास्तीत्येवं मन्यमानैरित्यर्थ:' इति। अध्यासाक्षेपभाष्यमपि प्रकटार्थकृता मीमांसकपूर्वपक्षतयैवावतारितम्।

६. आनन्दमयाधिकरणे वृत्तिकारमतं निरस्य पुच्छब्रह्मवादः सिद्धान्तितो भाष्यकारैः। तत्र स्वमतानुसारेण सूत्रयोजना प्रदर्शिता—'सूत्राणि त्वेवं व्याख्येयानि' इत्यादिना। सूत्राणां भाष्यकारोक्तोऽर्थः न स्वारसिक इति बहवो मन्यन्ते। भामतीकाराः श्रुतिसूत्रयोर्विरोधे 'गुणे त्वन्याय्यकल्पना' इति न्यायेन पूर्वमीमांसासूत्राणामिव श्रुत्यनुरोधेन सूत्राणां नेयत्वात् अस्वारसिकोऽपि भाष्यकारोक्त एवार्थो न्याय्य इति निरूपयन्ति।

प्रकटार्थकारास्तु न्यायसहिष्णोरेव वेदार्थस्य सूचकत्वात् सूत्राणां स एव मुख्यार्थ इति निरूपयन्ति—'न च नैवं सूत्रार्थ इति राज्ञामाज्ञा व्यज्ञायि, वेदाज्ञा वा। न चान्यैरनुक्तत्वात् नायं सूत्रार्थ इति वाच्यम्। अन्योक्तस्यापि अस्माकीनैरनुक्तत्वादसूत्रार्थत्वप्रसङ्गात्। तस्मात् न्यायसहिष्णोरेवागमार्थस्य सूचकत्वात् सूत्राणाम्, अन्यथा विचारानारम्भप्रसङ्गात्, अध्याहारेणापि व्याख्यानं समञ्जसम्' इति। (१६७)

तत्रैव भाष्ये—'अपराण्यपि सूत्राणि यथासंभवं पुच्छवाक्यनिर्दिष्टस्यैव ब्रह्मण उपपादकानि द्रष्टव्यानि' इत्युक्तम्। तत्र प्रकटार्थकाराः सर्वेषामपि सूत्राणां पुच्छब्रह्मवादे योजनां स्वयं प्रदर्शयन्ति। तत्र पुच्छब्रह्मणः प्राधान्यं प्रथमसूत्रेण, पुच्छशब्दस्य गतिः द्वितीयतृतीयसूत्राभ्याम्, आनन्दमयस्याप्रतिपाद्यत्वं प्रकरणस्य निर्विशेषब्रह्मात्मैक्यपरत्वं च चतुर्थपञ्चमषष्ठसूत्रैः, आनन्दमयस्य ब्रह्मत्वानुमाननिरासः सप्तमसूत्रेण, प्रतिपाद्यब्रह्मणः सविशेषत्वनिरासः अष्टमसूत्रेणेति प्रकटार्थकृतां योजना। तत्र 'भेदव्यपदेशाच्च' इति सूत्रं भेदस्य निन्दाव्यपदेशाच्चेति व्याख्यातमसाधारण्या सरण्या।

एवं प्रकटार्थकृतां व्याख्यावैचित्र्यस्य दिङ्मात्रं प्रदर्शितम्। सन्ति चैतादृशानि बहूनि स्थलानि। न शक्यन्ते तानि साकल्येनात्र संकलयितुमित्यन्यतः प्रवर्तामहे।

कल्परुकृतं प्रकटार्थसमालोचनम्

सम्प्रति कल्पतरुकारैः समालोचितानि कतिपयानि प्रकटार्थस्थलानि संगृह्यन्ते।

१. 'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः' इति बृहदारण्यकवाक्ये 'पञ्चजनाः' इति समस्तं पदमिति भाषिकस्वरबलान्निर्णयन्ति 'न संख्योपसंग्रहादि'त्यधिकरणे भाष्यकाराः। भाषाशब्दः ब्राह्मणग्रन्थे वैदिकानां प्रसिद्धः। तत्र भवो भाषिकः स्वरः संहितास्वराद् भिन्नो भवति। शतपथब्राह्मणस्य स्वरबोधको भाषिकसूत्रमिति प्रसिद्धो ग्रन्थो विद्यते। तत्र—'उदात्तमनुदात्तमनन्त्यम्' 'स्वरितोऽनुदात्तो वा' इति सूत्राभ्यां संहितायामुदात्तस्य ब्राह्मणेऽनुदात्तत्वम्, संहितायामनुदात्तस्य स्वरितस्य च ब्राह्मणे उदात्तत्वं च विधीयते। पञ्चजनशब्दस्य संहितायां 'समासस्य' इति अन्तोदात्तः स्वरः—'**पञ्चजनाः**' इति। तस्यैव ब्राह्मणे उक्तरीत्या स्वरवैपरीत्ये अन्तानुदात्तः स्वरः—'पञ्चजनाः' इति। अयमेव भाषिकस्वरः। तेन एकपदत्वनिर्णयो भाष्ये कृतः।

अत्र **प्रकटार्थकाराः** अन्तोदात्तत्वं भाषिकस्वरत्वेन व्याख्याय पञ्चजनशब्दस्यान्तोदात्तत्वे पाणिनिसंमतिमपि प्रदर्शयन्ति—'**भाषिकेणेति**। पाठकप्रसिद्धेनान्तोदात्तस्वरेणेत्यर्थः। उक्तं हि—'छन्दोगा बह्वृचाश्चैव तथा वाजसनेयिनः। उच्चनीचस्वरं प्राहुः स वै भाषिक उच्यते' इति। पाणिनिरपि 'तत्पुरुषस्य च' [समासस्य] इति सूत्रेण तत्पुरुषस्यान्तोदात्तस्वरं विदधौ' इति। (पृ. ४१७)।

अत्र **कल्पतरुकाराः** पूर्वोक्तरीत्या भाषिकस्वरं विवृत्य प्रकटार्थं खण्डयन्ति—'ये तु—'छन्दोगा.... उच्यते' इति वचनमुदाहृत्यान्तोदात्तो भाषिक इति व्याचक्षते, तेषामध्ययनविरोधः। अन्तानुदात्तं हि समाम्नातारः पञ्चजनपदमधीयते' इति। (पृ. ३९२)। **आनन्दगिर्याचार्याश्च** कल्पतरुकृतं खण्डनमनुमोदन्ते—'अन्तोदात्तो भाषिक इति पक्षे त्वध्ययनविरोधः' इति।

चित्सुखाचार्या अपि प्रकटार्थवदेव 'अन्तोदात्तो भाषिक' इति वदन्ति। ते भाषिकपदस्य सामासिक इत्यर्थं स्वीकृत्य समासे एकस्याचः उदात्तत्वे इतरेषामनुदात्तत्वं भवतीत्येतदेव 'छन्दोगा—' इत्याद्युक्तश्लोके 'उच्चनीचस्वरं प्राहुः' इत्यंशस्यार्थ इति वर्णयन्ति—'उच्चैकस्वरो भाषिकः सामासिक इति यावत्। इतरेषां नीचस्वरत्वनियमात् उच्चनीचस्वरं प्राहुः इति व्यपदेशः।

अत्र त्वन्तोदात्तो भाषिक इति' इति। अत्र प्रकटार्थकृतां चित्सुखाचार्याणां च भाषिकसूत्रादर्शनप्रयुक्तमेवेदृशं व्याख्यानमिति प्रतीयते।

२. देवताधिकरणे स्फोटवादनिरासावसरे 'सोऽयं गकार:' इत्यादिगकारव्यक्त्यैक्यप्रत्यभिज्ञया 'उत्पन्नो गकार:, विनष्टो गकार:' इति गकारभेदप्रत्ययस्य बाध इति निरूपणानन्तरमिदं भाष्यम्—'कथं ह्येकस्मिन् काले बहूनामुच्चारयतामेक एव सन् गकारो युगपदनेकरूप: स्यात्—उदात्तश्चानुदात्तश्च' इत्यादि। एतच्च भाष्यं व्याख्यातृभि: अनेकधाऽवतारितम्। 'एष एव च वर्णविषयस्य भेदप्रत्ययस्य बाधक: प्रत्ययो यत् प्रत्यभिज्ञानम्' इति पूर्वमुक्तं प्रत्यभिज्ञानस्य बाधकत्वमुपपादयति—**कथं हीति**।' इत्येकाऽवतारिका। 'पूर्वोक्तप्रत्यभिज्ञाया बाधकमाशङ्कते—**कथं हीति**' इति द्वितीया। भामत्यां द्वितीयरीत्याऽवतार्य आवृत्त्या समाधानपरतयाऽपि योजितमिदं भाष्यम्। प्रकटार्थकारास्तु—प्रत्यभिज्ञया एकत्वम्, उत्पत्त्यादिप्रतीत्या नानात्वं चोभयमस्तु, किमर्थं प्रत्यभिज्ञया भेदप्रत्ययस्य बाध उच्यत इत्याशङ्कानिरासकतयाऽवतारयन्ति—'ननु बाधोऽगतिका गति:, एकत्वं नानात्वं चास्त्वित्याशङ्क्याह—**कथं ह्येकस्मिन्निति**।' इति। न्यायनिर्णयेऽप्येवमेवावतारिकाऽऽश्रिता। तदिदं **कल्पतरुकृता** खण्डितम्—'यत्तु केचिद् व्याख्यातारो वर्णेषु भेदाभेदनिषेधोऽयमिति वदन्ति, तत् प्रकृतासंगतेरयुक्तम्' इति। पृ. ३२६। एकत्वनानात्वयोरेकत्र वास्तवत्वं स्वीकृत्योभय- प्रामाण्योपपादनस्य स्फोटवाद्यनभिमतत्वेन तत्खण्डनस्य प्रकृतासंगतेरित्यर्थ:।

३. दहराधिकरणे 'प्रसिद्धेश्च' इति सूत्रेण परमात्मनि आकाशशब्दस्य वेदे प्रसिद्धिरुक्ता। तत्र प्रसिद्धि: रूढिरिति पञ्चपादिकामतम्। तच्च दूषितं भामत्याम्। भामतीमते आकाशशब्दस्य ब्रह्मणि विभुत्वादिगुणयोगेन प्रवृत्ति:। तत्राप्यसंतोषेण आकाशशब्दस्य योगवृत्तिं स्वीकुर्वन्ति **प्रकटार्थकारा:**—'आसमन्तात् प्रकाशत इति यौगिकवृत्त्या परमात्मनि आकाशशब्दस्य मुख्यत्वाच्च दहर: परमात्मैवेत्याह—'प्रसिद्धेश्चेति।' इति। (पृ. ३०८) अत्र मुख्यत्वादित्युक्त्या भामतीकारैरङ्गीकृतं गौणत्वमयुक्तमिति सूचितम्। तदिदं **कल्पतरुकारै:** रूढिपूर्वकलक्षणाया योगापेक्षया बलीयस्त्वमिति मीमांसान्यायाश्रयणेन खण्डितम्—'अत्र केचित् आ समन्तात् काशत इत्याकाशशब्दस्यावयववृत्तिसंभवे सेतुशब्दस्येव तद्बहिर्भूतगुणवृत्तिरयुक्तेत्याहु:। तन्न; अपहृत्य योगं रूढ्यर्थे प्रत्यायिते रूढिं पुरस्कृत्य क्लृप्तादेव गुणयोगादन्यत्र वृत्तिलाभे अनपेक्ष्य रूढिमवयवव्युत्पत्तिक्लेशस्यायुक्तत्वात्' इति। (पृ.२९८)

प्रकटार्थकारैस्तु— 'केवलाया रूढे: विवक्षितलिङ्गानुगृहीता योगवृत्तिर्बलीयसी' इत्यक्षराधिकरणन्यायसंग्रहे व्युत्पादितो न्याय इहाश्रित इति भाति।

४. द्वितीयाध्याये तृतीयचतुर्थयो: पादयोर्विषय: श्रुतीनामन्योन्यविरोधपरिहार:। तत्र प्रथमं श्रुत्यो: विरोधादप्रामाण्यमिति पूर्वपक्ष:, तत एकदेशिमतेन पूर्वपक्षसमाधानम्, तत: सिद्धान्त इति रीति: प्रत्यधिकरणमाश्रिता। यथा वियदधिकरणे— छान्दोग्ये वियदुत्पत्तिर्न श्रूयते, तैत्तिरीयके तु श्रूयते इति श्रुत्योर्विराधादप्रामाण्यमिति पूर्वपक्ष:। तत्र वियदुत्पत्तिश्रुतेर्गौणत्वात् अनुत्पत्तिश्रुतिविरोधाभावात् प्रामाण्यमित्येकदेशिमतम्। वियदुत्पत्तिश्रुतेर्गौणत्वं निरस्य अनुत्पत्तिश्रुतेरविरोधसाधनेन प्रामाण्यमिति सिद्धान्त:। तत्र 'न वियदश्रुते:' (ब्र.सू. २-३-१) इति सूत्रम् एकदेशिनो मतम्, 'अस्ति तु' (ब्र.सू. २-३-२) इति सूत्रं च निगूढाभिसंधे: सिद्धान्तिनो मतमुपस्थापयति। तत: 'गौण्यसंभवात्' (ब्र.सू. २-३-३) इत्यादिसूत्रै: एकदेशिन: स्वाभिप्रायविवरणम्, तत: 'प्रतिज्ञाऽहानि:' इत्यादिसूत्राभ्यां सिद्धान्तिनोऽभिप्रायनिरूपणमिति सूत्रयोजना भामतीकल्पतर्वादिसंमता। अत्र च पूर्वपक्ष: उत्सूत्रमेव प्रदर्शनीय:।

प्रकटार्थकारास्तु—प्रथमं सूत्रद्वयेन श्रुत्योर्विप्रतिषेध इति पूर्वपक्ष: प्रदर्श्यते, तत एकदेशिमतम्, तत: सिद्धान्तश्चेति सूत्राणि योजयन्ति—'सूत्रद्वयेन मतद्वयमुपन्यस्य विप्रतिषेधमाह—तत्र तावदित्यादिना।' इति। तदेतत् कल्पतरुकारा: खण्डयन्ति—'केचित्तु सूत्रद्वयेन पक्षद्वयं प्रदर्श्य विप्रतिषेध उच्यते, पादसंगतपूर्वपक्षार्थत्वसंभवे सूत्रस्यैकदेशिमतार्थत्वायोगादित्याहु:। तन्न,' इत्यादिना। तत्र-अश्रुतेरिति किं सर्वत्राश्रवणमभिप्रेतम्, उन क्वचिदश्रवणम्? आद्ये तैत्तिरीयके श्रवणाद् हेत्वसिद्धि:। द्वितीये क्वचिदश्रवणेन नानुत्पत्तिसिद्धि:, अन्यत्र श्रुतस्याश्रवणस्थलेऽप्युपसंहारसंभवात्। अत: सूत्राभ्यां विप्रतिषेध: प्रदर्शयितुमशक्य इति सूत्राद् बहिरेव विप्रतिषेधेनाप्रामाण्यपूर्वपक्ष: प्रवर्तनीय इति तदाशय:। न्यायनिर्णयेऽप्यनुमोदितोऽयमर्थ:।

वस्तुतस्तु—अश्रुतेरित्यस्य छान्दोग्येऽश्रवणादित्यर्थस्वीकरणेन भाष्योक्तरीत्या छान्दोग्ये तेजसः प्राथम्यस्य भङ्गापत्त्या श्रुत्यन्तरश्रुतवियदुत्पत्त्युपसंहारस्यासंभवेन वियदुत्पत्त्यसंभवयुक्त्यनुगृहीता छान्दोग्यश्रुतिराकाशस्यानुत्पत्तिं बोधयति; तैत्तिरीयकश्रुतिश्च तदुत्पत्तिं प्रतिपादयतीति श्रुत्योर्विरोधः सूत्राभ्यां प्रतिपादयितुं शक्य एव। अतः प्रकटार्थकृदुक्तः प्रकारो युक्त एवेति। अत एव परिमलेऽपि प्रकटार्थपक्षः समर्थितः।

प्रमेयनिरूपणम्

प्रकटार्थकाराः न केवलं भाष्यव्याख्यानमेव कुर्वन्ति, अपि तु सति प्रसङ्गे बहूनद्वैतसिद्धान्तप्रमेयान् विवरणादिग्रन्थसिद्धानपि प्रसक्ताक्षेपनिराकरणपुरस्सरं संक्षेपेण निरूपयन्ति। स्वल्पैरेव शब्दैः बहूनां विषयाणां संग्रहः एतेषामनितरसाधारणं पाण्डित्यमवगमयति। यथा—मिथ्याज्ञाननिमित्त इति भाष्यव्याख्यावसरे भावरूपाज्ञाने 'न जानामि' इति प्रत्यक्षम्, सुप्तोत्थितस्य 'न किंचिदवेदिषम्' इति स्मरणानुमेयं सौषुप्तप्रत्यक्षं च प्रमाणयन्ति—'न चाज्ञाने प्रमाणप्रश्नं प्रशंसन्ति, द्रष्टृत्वादेवाज्ञत्वोपगमात्, सुषुप्ते च सकलप्रमाणविकले कथमन्यथोत्थितोऽनुसंदध्यात्?' इति (पृ. १३)। ततश्चाज्ञानस्य ज्ञानाभावत्वनिरासं सोदाहरणं प्रस्तुवन्ति—'अभावमानं विना सिद्धत्वाच्चाभावत्वं प्रत्युक्तम्; ज्ञानसहभावित्वाच्च। न हि घटावष्टब्धे भूतले 'निर्घटं भूतल'मिति जाघटीति। किञ्च विमतमज्ञानं नाभावः, उपादानत्वात्, मृद्वत्; आवरणत्वात्, प्रकाशहेयत्वाद्वा; तमोवत्' इति। अत्र पञ्चानुमानानि संगृहीतानि। ततः अज्ञानस्य प्रमाणनिवर्त्यत्वात् प्रमाणविषयत्वं विरुद्धमित्यज्ञाने प्रमाणप्रदर्शनमयुक्तमित्याक्षेपं समादधति—'स्वरूपेण प्रमाणायोग्यत्वेऽपि अभावव्यावृत्तिभ्रमकारणत्वादिधर्मविशिष्टस्य प्रामाणिकत्वं न विरुध्यते, धर्मस्येवाशब्दगोचरस्य फलदानायोन्मुखीभावविशिष्टस्य फललिङ्गगम्यता' इति। अत्र विवरणादौ विस्तरेण निरूपितोऽर्थः कतिपयैरेव वाक्यैः संगृहीतः। एवमेव—आत्मनः स्वप्रकाशत्वम्, तमसो भावरूपत्वम्, प्रपञ्चस्य मिथ्यात्वम्, अख्यात्यन्यथाख्यात्यादिनिरासः, अनिवर्चनीयख्यातिस्थापनम्, वेदापौरुषेयत्वम्, अतिरिक्तशक्तिसाधनम्, आनुमानिकेश्वरनिरासः, अखण्डार्थविचारः, स्वतःप्रामाण्यस्थापनम्, अन्विताभिधानवादः, अभिहितान्वयवादनिरासः, कार्यान्वितशक्तिनिरासः, परमाणुवादनिराकरणम्, विवर्तवादस्थापनम्, शब्दक्षणिकत्वनिरासः, शरीरस्य पाञ्चभौतिकत्वम्, वृत्तिनिर्गमप्रक्रिया, ज्ञानसंविद्विभागः, भेदखण्डनम् इत्यादयो विषयाः अत्र संगृहीताः। तेषां निरूपणे प्रकटार्थकाराः प्रायेण विवरणाचार्याणाम्, आनन्दबोधाचार्याणां च मार्गमनुसरन्ति। वैशेषिकाणां षट्पदार्थीखण्डनम्, नैयायिकानां षोडशपदार्थखण्डनं चात्र विस्तृतम्। तत्र प्रशस्तपादभाष्य-न्यायलीलावती-न्यायसार-मानमनोहरादिग्रन्थानामत्र विना नामनिर्देशं खण्डनमुपलभ्यते। नैयायिकेषु उदयनाचार्याणामेव नामनिर्देशोऽत्र दृश्यते।

अद्वैतसिद्धान्ते परैरुद्भाविताक्षेपनिराकरणम्

अद्वैतसिद्धान्ते प्रतिपक्षिभिः बहुविधा आक्षेपाः उद्भाव्यन्ते। तेषां समाधानं प्रकटार्थेऽत्यन्तं मनोरमं दृश्यते। कानिचित् स्थलानि उदाहरामः।

१. अद्वैतिनां बन्धस्य मिथ्यात्ववर्णनं व्यर्थम्। बन्धस्य सत्यत्वेऽपि ज्ञानेन निवृत्तिसंभवात्। न च सत्यस्य ज्ञानेन निवृत्तिर्लोके न दृश्यत इति वाच्यम्। अदृश्यमानमपि तत् शास्त्रप्रमाणात् सेत्स्यति। यथा यागस्य स्वर्गजनकत्वं लोके न दृष्टम्। तत् शास्त्रबलादेव स्वीक्रियते, एवं ज्ञानात् सत्यस्य निवृत्तिः लोकेऽदृष्टाऽपि शास्त्रबलादेव स्वीक्रियताम्। किञ्च ज्ञानात् सत्यस्य निवृत्तिर्लोकेऽपि बहुधा दृष्टैव। गरुडस्मरणेन विषस्य निवृत्तिः, रामसेतुदर्शनेन पापनिवृत्तिः, विषयदोषदर्शनेन रागनिवृत्तिः, ज्ञानेन स्वप्रागभावनिवृत्तिश्च लोके प्रसिद्धैव। अतो बन्धस्य मिथ्यात्ववर्णनं व्यर्थमेवेति **अमृतानन्दब्रह्मप्रकाशिकाकारौ** आक्षिपतः।

प्रकटार्थकारा अत्रैवं समादधति—शास्त्रमपि लोकसिद्धां पदशक्तिं पदार्थयोग्यतां च स्वीकृत्यैव प्रवर्तते। अत एव 'अन्धो मणिममविन्दत्' इत्यादिशास्त्रस्य यथाश्रुतार्थो न स्वीक्रियते। अत एव च प्रत्यक्षं विनष्टस्य यागस्य जन्मान्तरभाविस्वर्गजनकत्वं श्रुतमपि अनुपपन्नमिति तदुपपत्त्यर्थमपूर्वं कल्प्यते। तथा सत्यत्वे बन्धस्य ज्ञानान्निवृत्तिः श्रुताऽप्यनुपपन्नेति तदुपपत्त्यर्थं मिथ्यात्वं कल्प्यते। ज्ञानेन सत्यस्य निवृत्तावुदाहृता दृष्टान्ता विषमाः। गरुडस्मरणमात्रेण विषनिवृत्तिर्न भवति। किन्तु ध्यान-मन्त्रप्रयोगादिक्रियया।

सेतुदर्शनमात्रेण पापनिवृत्तिरपि न भवति। किन्तु ब्रह्मचर्याद्यनेकनियमकलापसहितसेतुस्नानेनैव। विषयदोषदर्शनेन वैराग्यं जायते। वैराग्यं च न रागनिवृत्तिमात्रम्, अपितु रागविरोधी चित्तवृत्तिविशेषः। तादृशचित्तवृत्तिरेव रागनिवर्तिका। अतो नैतान्युदाहरणानि। ज्ञानं न स्वप्रागभावनिवृत्तिजनकम्, प्रागभावकाले स्वस्यैवाभावात्, किन्तु प्रागभावनिवृत्तिरेव ज्ञानम्। तच्च न ज्ञानजन्यम्, किन्तु तत्सामग्रीजन्यमिति न तदप्युदाहरणम्। अतश्च बन्धस्य मिथ्यात्ववर्णनं सार्थकमेवेति (द्र.पृ. ३)।

२. अनिर्वचनीयरजतादिस्वीकारे किं प्रमाणम्? 'इदं रजतम्' इत्यादिप्रत्यक्षमेवेति चेन्न; भ्रमः खल्वयम्; नानेन वस्तुसिद्धिः; प्रमया हि वस्तुसिद्धिरित्याक्षिपति **ब्रह्मप्रकाशिकाकारः**—'भ्रान्त्यैवार्थं साधयन्नेष वादी लोकोत्तीर्णः' इति। अत्रेदं प्रकटार्थकृतां समाधानम्—सर्वस्यापि ज्ञानस्य यथायोगं बाधितोऽबाधितो वा विषयः स्वीकार्यः। अन्यथा निर्विषयस्य ज्ञानस्योत्पत्तिस्वीकारे बौद्धस्वीकृतसाकारज्ञानवादप्रसरापत्तेः। अतश्च भ्रमात्मकज्ञानेन मा नाम सैत्सीद् वस्तुभूतं रजतादिकम्, प्रातिभासिकं तु तत् सेत्स्यत्येवेति (द्र.पृ. १९)।

३. यद्यनिर्वचनीयं रजतं भ्रमविषयः, तर्हि भ्रान्तस्य रजतार्थिनस्तत्र प्रवृत्तिर्न स्यात्। न हि कोऽपि अनिर्वचनीयं रजतं वाञ्छति। यदि मिथ्यात्वाग्रहात् प्रवृत्तिः, तर्हि अख्यातिवादापत्तिः, यदि सत्यत्वग्रहात् प्रवृत्तिस्तदाऽन्यथाख्यात्यापत्तिरिति दूषयति **ब्रह्मप्रकाशिकाकारः**।

अत्र प्रकटार्थकारा वदन्ति—भ्रमकाले पुरुषः 'इदं रजतम्' इत्येव पश्यति, न तु अनिर्वचनीयरजतमिति। अनिर्वचनीयत्वं तु तस्य बाधोत्तरं निर्णीयते। एवं च रजतत्वावगमेनेष्टसाधनतामनुमाय प्रवर्तते पुरुषः इति (द्र.पृ. १९)।

४. अत्र **माधवो** दूषयति—यदि रजतत्वावगमादेव प्रवृत्तिः, तर्हि रजतत्वजातिमात्रस्य भवत्वारोपः, लाघवात्; किमर्थं मिथ्यारजतव्यक्त्युत्पत्तिकल्पनमिति। अत्रैवं परिहरन्ति प्रकटार्थकाराः—जातिसाक्षात्कारो व्यक्तिसाक्षात्कारनियतः। न हि व्यक्तिं विना जातिमात्रस्य प्रत्यक्षं कुत्रापि दृष्टम्। अतः प्रत्यक्षनिर्वाहार्थमेव रजतव्यक्त्युत्पत्तिस्वीकार इति (द्र.पृ. १९)।

५. **केशवः** आक्षिपति—अद्वैतिनां यथा बौद्धशास्त्रं मिथ्या तथा वेदोऽपि मिथ्या। एवं मिथ्यात्वाविशेषे वेदः प्रमाणम्, बौद्धशास्त्रमप्रमाणमिति स्वीकारः कुतः? इति। अत्रोत्तरं ददति प्रकटार्थकाराः—प्रपञ्चसत्यत्ववादिनस्तव मते बौद्धशास्त्रमपि सत्यम्, वेदोऽपि सत्यः। अतः सत्यत्वाविशेषे सति बौद्धशास्त्रस्य प्रामाण्यं कथं वार्यते? परमार्थतस्तु वेदस्य मिथ्यात्वेऽपि अपौरुषेयत्वं, तत्प्रतिपाद्यस्य वस्तुनोऽबाधितत्वं च प्रामाण्यस्वीकारे कारणम्। न चैतद् बौद्धशास्त्रस्यास्तीति (द्र.पृ. १२५)।

६. अध्ययनविधिप्रयुक्तो विचारः, कृत्स्नश्च वेदार्थो विचारयितव्यः, तत्र पाठक्रममुल्लङ्घ्य त्वरया ब्रह्मविचारस्य प्रथमकरणे किं निमित्तम्? इति 'धर्मजिज्ञासायाः प्रागपि अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः' इत्येतद्भाष्यमाक्षिपति **ब्रह्मप्रकाशिकाकारः**। प्रकटार्थकाराः विस्तरेणाध्ययनविधिप्रयुक्तत्वं विचारस्य निरस्य पाठक्रमोल्लङ्घने हृदयङ्गमं निमित्तं निरूपयन्ति—'यच्चाभाणि—किं त्वरयेति, तत्र सोपहासमाह स्मेतिहासः—'मृत्युना ह्याहते लोके जरया परिवारिते। व्याधिभिर्ग्रस्यमाने च किं स्वस्थ इव भाषसे। सर्वोपायैर्यदा नास्ति मर्तव्यस्य प्रतिक्रिया। सोऽहं कथं प्रतीक्षेय जालेनेवावृतश्चिरम्। रात्र्यां रात्र्यां व्यतीतायामायुरल्पतरं यदा। स्वल्पोदके मत्स्य इव धृतिं विन्देत कस्तदा।' इति। भगवता व्यासेनाप्युपन्यासि—'महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया। तावदुत्तर दुःखाब्धिं यावदेषा न शीर्यते' इति। (पृ. ४५)

एतादृशा अद्वैतिभिरवश्यं विज्ञेया बहवो विषया निरूपिताः प्रकाटार्थे। नैते विषया ब्रह्मसूत्रभाष्यस्य व्याख्यानान्तरेषूपलभ्यन्ते। अत एतन्निरूपणेन महदेवोपकुर्वन्ति प्रकटार्थकाराः।

प्रकटार्थे खण्डिता ग्रन्थकाराः

१. **भास्करः**—प्रकटार्थदूषितेषु भाष्यदूषकेषु भास्करः अग्रगण्यः। अयं शांकरभाष्यदूषणार्थमेव ग्रन्थं रचितवानिति एतदीयब्रह्मसूत्रभाष्यप्रारम्भश्लोकादवगम्यते। प्रकटार्थे विंशत्यधिकेषु स्थलेषु अस्य मतं खण्डितम्। अयं च प्रस्थानत्रयेऽपि भाष्यं

रचितवानिति तत्र तत्र ग्रन्थकृद्भिरुल्लेखादवगम्यते। अस्य ब्रह्मसूत्रभाष्यं समग्रं, गीताभाष्यस्य कश्चानांशश्च सम्प्रत्युपलभ्यते। न्यायरत्नदीपावल्यामस्य कृते 'लटकः कर्णाटवटुः' इति प्रयोगादयं कर्णाटदेशीय इत्यवगच्छामः। भाष्यकाराणामनन्तरं वाचस्पतिमिश्रेभ्यः पूर्वमस्य कालः। एतस्य खण्डनं भामत्यां विवरणे चानेकेषु स्थलेषु कृतम्। प्रकटार्थकृतः पिष्टपेषणभिया तानि स्थलानि विहायैव स्थलान्तरेष्वेतं खण्डयन्ति। 'द्युभ्वाद्यायतनं स्वशब्दात्' इति सूत्रे 'द्युभ्वाद्यायतनः स्वशब्दात्' इति पाठः एतत्काले प्रसिद्ध आसीदिति ज्ञायते। यतः भास्करभाष्ये आयतनशब्दस्य नपुंसकत्वात् द्युभ्वाद्यायतनमिति पाठस्य युक्तत्वं वर्णितम्। प्रकटार्थकारास्तु—अहन्शब्दस्य नपुंसकलिङ्गत्वेऽपि 'मध्याह्न' इत्यादौ तदन्तसमासस्य यथा पुंलिङ्गता, एवमायतनशब्दस्य नपुंसकलिङ्गत्वेऽपि द्युभ्वाद्यायतनशब्दस्य पुंलिङ्गता युक्तेति तत् खण्डयन्ति। द्र.टिप्पणी। एवं द्वितीयाध्याये तृतीयपादे—'आभास एव च' इति सूत्रपाठं स्वीकृतवान् भास्करः। तदपि प्रकटार्थे खण्डितम्।

२. **केशवः** [ब्रह्मप्रकाशिकाकारः]—केशवः भास्करानुवर्ती भास्करभाष्यस्य व्याख्यातेति वदन्ति। नास्य ग्रन्थ उपलभ्यते। अस्य खण्डनं कल्पतरावपि दृश्यते। प्रकटार्थे (पृ-५४६) 'यदत्र **केशवेन** प्रलेपे—'विरोध एव नास्ति, विकारोत्पत्तेः पूर्वं कारणस्याविकारित्वात् तदभिप्रायाः श्रुतयः' इति केशवस्य मतमनूदितं खण्डनार्थम्। अयमेवांशः वेदान्ततत्त्वालोके—'यदत्र **ब्रह्मप्रकाशिकाकारो** ववल्ग—विरोध एव नास्ति, विकारोत्पत्तेः पूर्वम्.........' पृ-१६ इत्यनूदितः। तेन केशव एव ब्रह्मप्रकाशिकाकार इत्यवगम्यते। अतश्चानेन ब्रह्मप्रकाशिकानाम्नी भास्करीयब्रह्मसूत्रभाष्यस्य व्याख्या रचितेत्यूह्यते।

३. **अमृतानन्दः**—स्थलद्वयेऽयं प्रकटार्थे खण्डितः। अस्यापि ग्रन्थो नोपलभ्यते। चित्सुखविरचितायां विवरणव्याख्यायामप्यस्योल्लेखो दृश्यते—'अमृतानन्दीयमतमाशङ्क्ते' इति।

४. **माधवः**—एकस्मिन्नेव स्थलेऽयं प्रकटार्थे उल्लिखितः। न्यायभूषणेऽप्येको माधवः सांख्यमतानुयायी उल्लिखितः। संभाव्यते स एवायं स्यादिति।

५. **उदयनः**—अयं प्रसिद्धो न्यायाचार्यः अद्वैतसिद्धान्ते श्रद्धासंपन्नः, तात्पर्यपरिशुद्धि-न्यायकुसुमाञ्जल्यात्मतत्त्वविवेकाद्यनेकग्रन्थानां प्रणेता। अस्य कालः (ई. ९८४)

६. **कश्चित्, नैयायिकम्मन्यः**—न्यायसारकारः **भासर्वज्ञः** 'कश्चित्' इति, 'नैयायिकम्मन्यः' इति च द्वित्रेषु स्थलेषु प्रकटार्थेऽनूदितः। अयं च भूषणकार इति ग्रन्थान्तरेषु प्रसिद्धः। भूषणमिति एतत्प्रणीतस्य न्यायसारस्य स्वेनैव कृतं व्याख्यानम्।

एतदतिरिक्ता अपि सांख्य-पातञ्जल-नैयायिक-वैशेषिक-बौद्ध-लोकायतिक-जैनादिमतानि स्वातन्त्र्येणात्र निरस्तानि।

प्रकटार्थे उल्लिखिता अन्ये ग्रन्थकाराः ग्रन्थाश्च

एवं तत्र तत्र स्वोक्तार्थे प्रमाणतया प्रकटार्थे उल्लिखिता इमे ग्रन्थकाराः—आपस्तम्बः, कुमारिलभट्टः, बोधायनः हारीतः, मनुः, नारदः, पराशरः, व्यासः, शुकदेवः, विश्वामित्रः, प्रभाकरः, शौनकः, वसिष्ठः, पाणिनिः, कात्यायनः, योगभाष्यकारः, शबरस्वामी, निरुक्तकारः, विवरणाचार्यः, इत्यादयः। महद्दीर्घाधिकरण एतैः चिरन्तनवैशेषिकमतं, रावणप्रणीतं भाष्यं च निर्दिष्टम्।

प्रकटार्थे प्रक्रियाविशेषाः

माया—अनिर्वाच्याऽनादिः पञ्चभूतप्रकृतिः ईश्वरोपाधिभूता माया।

अविद्या—मायाया अनन्ताः प्रदेशाः आवरणविक्षेपशक्तिमन्तः अविद्याशब्दवाच्याः जीवोपाधयः। कल्पिताकाशप्रदेशानां यथा प्रदेशवतो महाकाशादनन्यत्वम्, तथाऽविद्यानामपि मायातोऽनन्यत्वम्। अत एव 'अविद्या माया' इति 'अविद्यात्मिका हि माया' इति च तत्र तत्राभेदव्यवहारो भाष्ये।

ईश्वरः—मायाप्रतिबिम्बितं चैतन्यमीश्वरः मायावृत्तिरूपैः सर्वविषयकैः ज्ञानैः सर्वज्ञः। ततो जगत्कारणत्वादिमान्। स चैक एव, उपाधेरेकत्वात्।

जीवः—अविद्याप्रतिबिम्बितं चैतन्यं जीवः। अविद्यानां च नानात्वात् जीवनानात्वम्। मायाकार्यम् पृथिव्यादीनि पञ्च भूतानि मायाप्रकृतिकानि। भौतिकाश्च बाह्या घटादयः भूतद्वारा मायाप्रकृतिकाः।

मायाविद्योभयकार्यम्—मायाकार्यैः महाभूतैः, तत्तज्जीवसंबन्धिनीभिः कर्मसहिताविद्याभिः कृतभूतसूक्ष्मैश्च जीवस्य देहेन्द्रियाण्युत्पद्यन्ते। देहादिकं स्वरूपेण महाभूतकार्यम्, जीवसंसृष्टरूपेण तत्तज्जीवाविद्याकार्यम्। अत एवोत्क्रान्ते जीवे तच्छरीरं स्वरूपेणोपलभ्यते, भूतेषु लयमेति च। अतश्च स्वरूपेण देहादीनां भूतेषु लयप्रतिपादिका 'गताः कलाः पञ्चदश प्रतिष्ठाः' इति श्रुतिः, 'पुरुषं प्राप्यास्तं गच्छन्ति' इति श्रुतिश्च विद्ययाऽविद्यानिवृत्तौ अन्तःकरणादिनिवृत्तिपरा संगच्छते।

बन्धमुक्तिव्यवस्था—यस्य जीवस्य तत्त्वसाक्षात्कारः तस्याविद्या निवर्तते, तन्निवृत्तौ तदन्तःकरणादिकं तत्संसर्गं जहाति। ततश्चान्तःकरणासंबन्धात् प्रमातृत्वाभावः। तेन स्वरूपावस्थानम्, सा मुक्तिः। अन्तःकरणाभावादेव मायाकार्यवियदादिप्रपञ्चो विद्यमानोऽपि नानुभूयते। 'भूयश्चान्ते विश्वमायानिवृत्तिः' इति श्रुतौ मायापदेनाविद्योच्यते।

जीवन्मुक्तिः—तत्त्वसाक्षात्कारेणागामिसंसारकारणशक्तिमदविद्यादिनिवृत्त्या मुक्तः, वर्तमानभोगवत्त्वाच्च जीवन् यः स जीवन्मुक्तः। प्रारब्धकर्मरूपप्रतिबन्धकक्षये सत्युत्पद्यमानः तत्त्वसाक्षात्कार एवाविद्यायाः निवर्तकः, न ततः पूर्वं भवन्।

श्रवणादिविधिरपूर्वविधिः—'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति आत्मदर्शनोद्देशेन श्रवणादिषु विधिरपूर्वविधिः। 'अपूर्वत्वाद् विधिरास्थेयः' इति भाष्यात्। पुरुषविशेषं प्रति नियमविधित्वेऽपि न क्षतिः।

दिक् कालः च—आदित्योदयाद्युपलक्षित आकाशप्रदेशो दिक्। आदित्योदयादिक्रियाधर्मः कालः।

वागिन्द्रियम्—वागिन्द्रियं शब्दव्यञ्जकत्वादाकाशीयम्।

सुषुप्त्यवान्तरप्रलयमहाप्रलयानां विशेषः—सुषुप्ते जातिव्यक्त्योश्चिद्विषयत्वमात्रविलयः, अवान्तरप्रलये व्यक्तीनां विलयः, न जातीनाम्। महाप्रलये तु उभयोरपि विलयः।

श्रीचित्सुखाचार्याः

तत्त्वप्रदीपिकाख्यग्रन्थरत्ननिर्माणेन प्रथितयशस्काः नृसिंहोपासकाः श्रीचित्सुखाचार्याः क्रैस्तवीयत्रयोदशशताब्द्यामासन्निति वदन्ति। न्यायदीपावलीटीकाकाराः श्रीसुखप्रकाशमुनयः एतेषां शिष्या इति— 'यत्पदाम्भोजयुगलचिन्तामृतमयोर्मयः। निरस्यन्ति तमःपङ्कं तं नुमश्चित्सुखं गुरुम्'—इति तद्वचनादवगम्यते। एतान् सुखप्रकाशमुनीन् कल्पतरुकाराः स्वीयविद्यागुरुत्वेन नमस्यन्ति। श्रीचित्सुखाचार्यैः प्रणीता बहवो ग्रन्था विलसन्ति, येषु तत्त्वप्रदीपिका, भाष्यभावप्रकाशिका, विवरणटीका, ब्रह्मसिद्धिटीका, न्यायमकरन्दव्याख्या इत्यादयः प्रमुखाः।

भाष्यभावप्रकाशिका

श्रीमच्चित्सुखाचार्यैः प्रणीता भाष्यभावप्रकाशिका भामती-विवरणप्रस्थानयोरुभयोः संग्राहिकाऽत्र विराजते। प्रथमं विवरणानुसारि भाष्यव्याख्यानमुपन्यस्य 'अथवा' इत्युपक्रम्य भामत्यनुसारि व्याख्यानस्य संग्रहः अत्र संदृश्यते। तदुक्तं तैरेव—

नानानिबन्धपदलब्धसदर्थमाना सत्संप्रदायपदवीरनुवर्तमाना।
वाचस्पतेरपि वचांसि विवर्तयन्ती वागीश्वरीव विदुषां कृतिरिष्टदैषा।।

इति। भामत्यादिवाक्यस्यानुपूर्वीमपि यथासंभवं स्वग्रन्थे संरक्षितुं प्रयतन्त एते।

ईक्षत्यधिकरणे 'ईक्षतेरिति च धात्वर्थनिर्देशोऽभिप्रेत:, यजतेरितिवत्' इति भाष्ये 'इतिकर्तव्यताऽविधेर्यजतेः पूर्ववत्त्वम्' इति जैमिनिसूत्रस्थो यजतेरित्यंशो दृष्टान्तित इति प्रकटार्थकारादयः। भाष्यभावप्रकाशिकाकारास्तु कात्यायनश्रौतसूत्रं तत्रोदाहरन्ति— 'वषट्कारप्रदाना यजतयः' इति यागा इति वक्तव्ये लक्षणकारस्य प्रयोगो दृश्यते' इति। (पृ. १३०)

'व्याप्तेश्च समञ्जसम्' (ब्र.सू. ३-३-९) इत्यधिकरणे 'ओमित्येतदक्षरमुद्गीथम्' इति वाक्ये श्रुतं सामानाधिकरण्यम् अध्यासे, बाधायाम्, अभेदे, विशेषणविशेष्यभावे वा इति विचार्य अन्तिमपक्षः सिद्धान्तितः। तत्र भाष्यकारैः अन्यतमपक्षनिर्धारणकारणाभावात् अनिर्धारणेन पूर्वपक्षः कृतः। चित्सुखाचार्यैस्तु—अध्यासपक्षनिर्धारणे कारणं प्रदर्श्य अध्यासे सामानाधिकरण्यमिति पूर्वपक्षान्तरमिह द्रष्टव्यमिति निरूपितम्। नायं विचारः अन्यत्रोपलब्धः।

जीवस्वरूपविषये आनुमानिकाधिकरणेऽविद्यानिरूपणे च भामतीपक्ष एवाङ्गीकृतः चित्सुखाचार्यैः। वाक्यैकवाक्यता-पदैकवाक्यता-विवेचनं देवताधिकरणे एभिः सम्यक् कृतम्।

पूर्वमीमांसाधिकरणप्रदर्शनावसरे प्रायेण शाबरभाष्योक्तमेव प्रकारमेते आलम्बन्ते। 'तथा प्राणाः' इत्यधिकरणे अश्वप्रतिग्रहेष्ट्यधिकरणनिरूपणे—अश्वप्रतिग्रहेष्टिः लौकिकेऽश्वप्रतिग्रहे, वैदिके वेति संशयं यथाभाष्यं निरूपयन्ति। लौकिकेऽश्वदाने वैदिके वेति संशयः प्रदर्शनीयः उत्तराधिकरणसिद्धान्तानुरोधात् इति कल्पतरुकारा निरूपयन्ति। न्यायनिर्णयेऽपि कल्पतरूक्तरीत्यैव संशयः प्रदर्शितः।

प्रकटार्थपरिचयो भाष्यभावप्रकाशिकायां लेशतोऽपि नोपलभ्यते। शारीरकन्यायसंग्रहं प्रायेणानुपूर्व्या तत्तदधिकरणेषु पूर्वपक्षसिद्धान्तयोर्यथायोगं योजयन्ति। परामर्शाधिकरणे भाष्ये ब्रह्मसंस्थतया प्राप्तिब्राज्यलाभाय कृतं विचारमेते पूर्वपक्षादिविभागं कृत्वाऽन्तरागर्भिताधिकरणत्वेन व्यवहरन्ति। न्यायनिर्णयेऽपि एवं दृश्यते।

आनन्दगिर्याचार्याः

आनन्दज्ञानापरनामधेयाः श्रीमदानन्दगिर्याचार्याः शुद्धानन्दपूज्यपादशिष्याः श्रीभगवत्पादप्रणीतानां सर्वेषां ग्रन्थानां व्याख्यामकुर्वन् इति प्रसिद्धम्। ईशावास्यभाष्यव्याख्यायां तत्त्वालोकस्य स्वकृतत्वेनैभिर्निर्दिष्टत्वात्, तत्त्वालोकसमाप्तौ च 'अनुभूतिस्वरूपाचार्यशिष्येण श्रीमता जनार्दनेन विनिर्मिते' इत्युल्लेखात् एते संन्यासाश्रमस्वीकारात् पूर्वं जनार्दननामानः इति, अनुभूतिस्वरूपाचार्या एतेषां विद्यागुरवः, शुद्धानन्दाश्च दीक्षागुरव इति चानुमीयते। एते च तत्त्वदीपनकृतां विद्यागुरवः। व्याख्येयग्रन्थस्य प्रतिपदं तात्पर्यवर्णनमेतेषां वैशिष्ट्यमावहति। एते बृहदारण्यकभाष्यवार्तिकव्याख्यायां मङ्गलाचरणे 'देवः श्रीपुरुषोत्तमो विजयते नीलाद्रिचूडामणिः' इति भगवन्तं नीलाचलनायकं श्रीजगन्नाथं स्तुवन्ति। तथा स्वकृतायां पदार्थतत्त्वनिर्णयव्याख्यायां— 'कलिङ्गदेशाधिपतौ नरेन्द्रे भुवं प्रशासत्यमरेन्द्रतुल्ये। नृसिंहदेवे जगदेकवीरे नरोत्तमेऽकारि मया प्रबन्धः' इत्युल्लिखन्ति। तेन जगन्नाथपुर्यामेतेषां स्थितिरासीदित्यवगम्यते। एतत्प्रणीताः त्रिंशदधिका ग्रन्था उपलभ्यन्ते।

न्यायनिर्णयः

श्रीमदानन्दगिर्याचार्यैः प्रणीतो न्यायनिर्णयाख्यो व्याख्यानतल्लजो भाष्यस्य प्रतिपङ्क्ति सुगमतयाऽऽशयावबोधे बहूपकरोति। अध्यासभाष्यस्य प्रतिपदं विशदमाशयवर्णनं न्यायनिर्णय इव नान्यत्रोपलभ्यते। शास्त्रारम्भे उपोद्घातरूपेण जिज्ञासाधिकरणस्य चतुर्णां वर्णकानामर्थसंक्षेपणम्, अधिकरणरचनां प्रदर्श्याध्यासभाष्यावतारणं चास्मिन् व्याख्याने वैशिष्ट्यमावहति। प्रत्यधिकरणं संगतिप्रदर्शनम्, पूर्वोत्तरपक्षयोः फलप्रदर्शनं चास्यासाधारणो विशेषः। अवतारिकायामेवावतारणीयभाष्याशयाविष्करणमत्र विद्वन्मनोऽनुरञ्जयति।

न्यायनिर्णयोऽनेकत्र प्रकटार्थविवरणं भाष्यभावप्रकाशिकां चानुसरति। भाष्यभावप्रकाशिकायामस्पृष्टाः भाष्यपङ्क्तयो यत्र प्रकटार्थे व्याख्यातास्तत्र न्यायनिर्णयः प्रकटार्थव्याख्यानमेव स्वीकरोति। यथा—साधनचतुष्टयस्वरूपविवरणं भाष्यभावप्रकाशिकायां न लभ्यते। तत्र प्रकटार्थकृतं व्याख्यानं समग्रं स्वीकृतं न्यायनिर्णये। प्रकटार्थे श्रद्धास्वरूपवर्णनं न दृश्यते, तदपि न्यायनिर्णये

दृश्यते। अन्यत्र प्रायो भाष्यभावप्रकाशिकामेवानुसरति न्यायनिर्णयः। तत्रापि विवरणानुसारि व्याख्यानमेवात्र संगृहीतम्। भामत्यनुसारि व्याख्यानं तु क्वचिदेव संगृह्यते। अवसरेऽस्मिन् अनेकत्र संक्षेपार्थं शब्दान्तरं प्रयुज्यते न्यायनिर्णयकारैः। यथा—'तज्ज्ञानसाधनविधानात्' इति भाष्यभावप्रकाशिकायां पाठः, 'तद्धीहेतुविधेः' इति न्यायनिर्णये।

क्वचिच्च न्यायनिर्णयो भाष्यभावप्रकाशिकया व्याख्यातो भवति। यथा—'यतो ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मलक्षणं वक्ष्यति, अतो वृत्तिकारप्रयासो वृथेत्याह—**अत एवेति**'। इति न्यायनिर्णयः। [पृ. ४] अत्र वृत्तिकारप्रयासः कीदृश इति स्पष्टं न ज्ञायते। स च भाष्यभावप्रकाशिकायां स्पष्टं निरूपितः।

केषु चित् स्थलेषु चित्सुखाचार्यव्याख्यानं विहाय प्रकटार्थव्याख्यानमेव न्यायनिर्णये पुरस्कृतम्। यथा—'ईक्षतेरिति च धात्वर्थनिर्देशोऽभिप्रेतः, यजतेरितिवत्' इति भाष्ये प्रकटार्थानुसारेण 'इतिकर्तव्यताऽविधेः यजतेः पूर्ववत्त्वम्' इति जैमिनिसूत्रैकदेशो दृष्टान्तित इति न्यायनिर्णयः। न तु चित्सुखाचार्यवत् कात्यायनश्रौतसूत्रैकदेशपरतया व्याख्यातम्।

क्वचित् न्यायनिर्णये प्रकटार्थ-भाष्यभावप्रकाशिकयोरुभयोरपि व्याख्यानं स्वीकृतम्। यथा—'यथा च षोडशिस्तोत्रे केषांचित् कालविशेषाप्राप्तौ 'समयाध्युषिते सूर्ये' इत्यार्चश्रुतेः कालविशेषप्रतिपत्तिः' [पृ. ९७५] इति भाष्ये 'आर्चश्रुतेः' इति पदं प्रकटार्थे 'ऋचोऽधीयते इत्यार्चाः, तदीयश्रुतेः' इति व्याख्यातम्। भाष्यभावप्रकाशिकायां तु 'तैत्तिरीयकाणां वचनात्' इति तत् विवृतम्। न्यायनिर्णये तदुभयमपि क्रमेण संगृहीतम्।

न्यायनिर्णये कल्पतरुसाम्यम्

न्यायनिर्णये कल्पतरौ चानेकत्र पङ्क्तयः समाना दृश्यन्ते। विशेषतः पूर्वतन्त्राधिकरणानुक्रमणे, अधिकरणाद्यसूत्रावतारणे च प्रायेण साम्यमुपलभ्यते। न्यायनिर्णये वेधाद्यधिकरणे—'नन्वेवं मीमांसकानां मुद्राभेदः कृतः'। [पृ. ९६५] इत्यादिः शङ्कासमाधानग्रन्थः कल्पतरौ [पृ. ७८८] दृश्यमानः न्यायनिर्णयकाराः कल्पतरुमपि संगृहीतवन्त इति स्पष्टमवगमयति। प्रमिताधिकरणे कल्पतरौ [पृ. ३१६] पूर्वतन्त्रस्थितं तिर्यगधिकरणमपशूद्राधिकरणं चानुक्रान्तम्। तत्र तिर्यगधिकरणसिद्धान्तभागः लेखकप्रमादात् नष्टः, मुद्रितपुस्तकेषु नोपलभ्यते। तत्रत्यः शुद्धः पाठः न्यायनिर्णयदर्शनेन स्पष्टमवगन्तुं शक्यते।

विवरणाचार्यसिद्धान्तविरोधे तु न्यायनिर्णयः कल्पतरुं नानुसरति। न्यायनिर्णये न कस्यापि परमतस्य नामग्राहं खण्डनं दृश्यते। भाष्यपङ्क्तेः यथावदाशयस्फोरणमेवास्य परममुद्देश्यम्। अतो मतान्तरखण्डनेऽस्य व्यापृत्यभावः इति ज्ञायते।

न्यायनिर्णये विचारणीयानि स्थलानि

१. द्युभ्वाद्यायतनं स्वशब्दात् (ब्र.सू. १-३-१) इति सूत्रे 'न भूसुधियोः' इति निषेधात् 'द्युभ्वादी'ति यणादेशासिद्धिमाशङ्क्य विस्तरेण समादधते न्यायनिर्णयकाराः। [द्र. १-३-१] परन्तु 'न भूसुधियोः' इति अजादौ सुप्येव यणो निषेधः। अतः आदिशब्दे परतः न तस्य प्रसक्तिरिति किमर्थं प्रयास इति शङ्कोद्भवति। मया तत्र टिप्पण्यामिमां शङ्कां प्रदर्श्य प्रयासोऽयं चिन्त्य इति व्यलेखि।

प्राच्य-प्रतीच्यविद्यानदीष्णाः आचार्याः V. स्वामिनाथशास्त्रिणः कदाचित् प्रसङ्गवशेनास्मिन् विषये मया निवेदिताः। ते च बहु विचार्य इत्थमवोचन्—'द्यौश्च भूश्च द्युभ्वौ' इति भाष्यपाठमभिप्रेत्यायं न्यायनिर्णयकाराणां प्रयासः। तत्र 'औ' विभक्तौ परतः प्रसज्यते यण्निषेधः। अतो यणादेशासिद्धिशङ्का। श्रीसदाशिवब्रह्मेन्द्रसरस्वतीविरचितब्रह्मसूत्रवृत्तावपि 'द्युभ्वौ' इति पाठो दृश्यते। एवं च न्यायनिर्णये 'द्युभ्वादीति' इति प्रतीकस्थाने 'द्युभ्वाविति' इति शोधनीयम्। एवं शङ्कासंगतौ समाधाने 'गतिकारकोपपदाभ्यामन्यपूर्वस्य नेष्यते' इति वचनात् गतिकारकपूर्वस्य यणः इष्टत्वात् कथंचित् कारकोपपदत्वं समर्थ्य यणादेशः समर्थ्यत इति ग्रन्थसंगतिरिति।

२. 'मन्त्रादिवद्वाऽविरोधः' (ब्र.सू. ३-३-५६) इति सूत्रे वेदान्तरोक्तस्य वेदान्तरे स्वीकारे अनेके दृष्टान्ता उपात्ताः। तेष्वयमेकः—'तथा बह्वृचपठितस्य सूक्तस्य 'यो जात एव प्रथमो मनस्वान्' इत्यध्वर्यवे 'सजनीयं शस्यम्' इत्यत्र परिग्रहो

दृष्टः' इति। उदाहृते भाष्ये 'सजनीयं शस्यम्' इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितागतं वचनम्। 'आध्वर्यवे' इत्यनेन यजुर्वेदो विवक्षितः। न्यायनिर्णयकारास्तु 'अध्वर्यवे सजनीयं शस्य' मित्याकारकं वचनं स्वीकृत्य—'अध्वर्यवे = तत्कर्तृकप्रयोगार्थं सजनीयं = 'स जनास' इत्येतेनोपलक्षितं सूक्तं शस्यं = शंसनीयमित्यर्थः'—इति व्याख्यान्ति। अत्र भाष्ये 'आध्वर्यवे'. इति पदच्छेदे कर्तव्ये 'अध्वर्यवे' इति च्छेदः कृत इति स्पष्टम्।

सर्वेषु मुद्रितभाष्यपुस्तकेषु न्यायनिर्णयानुरोधेन भाष्ये 'अध्वर्यवे' इति पदं छित्त्वैव मुद्रणं कृतम्। मया तु पाठकाले श्रीगुरुचरणैः कृतशोधनानुसारेण 'आध्वर्यवे' इति पदच्छेदोपयोगितया भाष्ये 'इत्यस्याध्वर्यवे' इति संधिरादृतः।

३. 'हानौ तूपायन-' (ब्र.सू. ३-३-२६) इत्यधिकरणे कुशाशब्दलिङ्गविवेचनं प्रकटार्थे कृतम्। न्यायनिर्णये तूक्तम्—'औदुम्बराः इति श्रुतेः दर्भविषयकुशशब्दस्यास्त्रीत्वम्। अत एव 'अस्त्री कुशम्' इत्यमरसिंहेनानुशिष्टम्। औदुम्बर्य इति भाष्यात् कुशशब्दस्य शङ्कुविषयस्य स्त्रीत्वमपीति विवेक्तव्यम्' इति। [पृ. ९७५] तत्र 'औदुम्बराः कुशाः' इति श्रुतौ कुशशब्दो न दर्भविषयः। तथा सति औदुम्बरत्वविशेषणानन्वयात्। तस्य दर्भविषयत्वे एतच्छ्रुतिबलात् शाखान्तरीयकुशाशब्दस्य शलाकावाचकस्यौदुम्बरत्वनिर्णयानुपपत्तेश्च। अतोऽस्याशयो नावगम्यते।

प्रस्तुतं संस्करणम्

संस्करणेऽस्मिन् ब्रह्मसूत्रशांकरभाष्यम्, शारीरकन्यायसंग्रहः, प्रकटार्थविवरणम्, भाष्यभावप्रकाशिका, न्यायनिर्णयः इत्येते ग्रन्था विराजन्ते। एतेषु ग्रन्थेषु यत्रार्थावगमे क्लेशो मयाऽनुभूतः, ग्रन्थान्तरसाहाय्येन चार्थोऽवगतः, तेषु स्थलेषु अध्येतॄणां सौकर्याय काचित् टिप्पणी अपि योजिता। तत्र व्याख्यान्तरेषु दृष्टाः विशेषा अपि केचन संगृहीताः। उचितानि पाठान्तराणि निर्दिष्टानि। अनेकत्र न्यायसंग्रहे प्रकटार्थादिषु चापेक्षिताः संभाविताः शुद्धपाठा अपि संसूचिताः। भाष्येऽपि शुद्धपाठसंरक्षणार्थं यथाशक्ति प्रयत्नः कृतः।

शोधनार्थमुपयुक्तानि पुस्तकानि

संस्करणेऽस्मिन् शोधनार्थमिमानि पुस्तकानि उपयुक्तानि—

भाष्यम्— १. अद्वैतसभाषष्ट्यब्दपूर्तिप्रकाशनम्, २. ब्रह्मविद्याभरणोपेतं मद्रपुर्यां प्रकाशितम्, ३. निर्णयसागरीयम्, ४. आनन्दाश्रमप्रकाशितम्, ५. चौखम्बाप्रकाशितं रत्नप्रभोपेतम्, ६. खेमराज श्रीकृष्णदासप्रकाशितम्, ७. प्रकटार्थयुतम्।

शारीरकन्यायसंग्रहः— १. मद्रपुरीविश्वविद्यालयप्रकाशितम्, २. कलकत्ता-संस्कृत-ग्रन्थावलीप्रकाशितं च।

प्रकटार्थविवरणम्— १. मद्रपुरीविश्वविद्यालयप्रकाशितम्।

न्यायनिर्णयः— १. निर्णयसागरीयम्, २. आनन्दाश्रमप्रकाशितम्, ३. खेमराजश्रीकृष्णदासप्रकाशितं च।

भाष्यभावप्रकाशिका— १. कलकत्ता-संस्कृत-ग्रन्थावलीप्रकाशितम्—द्वितीयाध्याय-द्वितीयपादान्तम्, २. द्वितीयाध्याय-तृतीयपादप्रभृति समाप्तिपर्यन्तम् लिखितम् मुद्रपुरीस्थराजकीयहस्तलिखितग्रन्थागारस्थस्य R ३०२० संख्याकस्य प्रतिलिपिभूतम्।

मुद्रितग्रन्थेषु निर्दिष्टानि पाठान्तराणि बहुषु स्थलेषु औचित्यं पुरस्कृत्य मूलपाठत्वेन स्वीकृतानि। मुद्रितग्रन्थेषु स्थिता अधिका अनपेक्षिता वर्णाः ( ) वर्तुलकोष्ठकेषु निवेशिताः। परिवर्तनीयाः संयोजनीयाश्च शब्दाः [ ] चतुरस्रकोष्ठकेषु निवेशिताः। यथा—१४ पृष्ठे १६ पङ्क्तौ—'अभूततद्भावार्थस्येह [च्वेः] प्रयोगः' इति। तत्रैव २२ पङ्क्तौ—'शास्त्रस्य तत्त्वनिर्णयार्थतया (ऽनु)वादत्वात् तत्र गुरुशिष्ययोरधिकारात्' इति। पूर्वमुद्रितपुस्तकेषु स्थिताः कोष्ठकगताः पाठाः अनेकत्र निरस्ताः। केषुचित् स्थलेषु कोष्ठकगतवर्णपरिवर्तनमप्याश्रितम्।

शारीरकन्यायसंग्रहस्य पाठशोधने मद्रपुरीमुद्रितपुस्तकेऽनुबन्धरूपेण मुद्रितः पण्डितपत्रप्रकाशितन्यायसंग्रहपाठः अनेकत्रोपयुक्तः। भाष्यभावप्रकाशिकादिग्रन्थस्याप्यत्रोपयोगः संजातः। प्रकटार्थस्य शोधने न्यायनिर्णयः, वेदान्ततत्त्वालोकश्च बहुत्रोपयुक्तः।

भाष्यभावप्रकाशिकाशोधने न्यायनिर्णयः, भामती च बहूपकरोति. स्म। अस्याः द्वितीयाध्याय-तृतीयपादप्रभृतिसमाप्त्यन्तो ग्रन्थः लिखितः अशुद्धिबहुलः न्यायनिर्णयसाहाय्येनैव कथंचित् संशोध्यात्र प्रकाशितः। तत्र ग्रन्थपातः अनेकत्र दृश्यते। त्रुटितोंऽशः प्रायेण न्यायनिर्णय उपलभ्यते।

न्यायनिर्णयशोधने भाष्यभावप्रकाशिकायाः, कल्पतरोरपि भूयान् उपयोगः संजातः।

काशीस्थश्रीदक्षिणामूर्तिनिरञ्जनपीठाधीश्वराणां महामण्डलेश्वराणां **श्रीमन्महेशानन्दगिरिस्वामिमहाराजानामाज्ञया** महेशानुसंधानसंस्थानेन प्रकाश्यमानायाः अद्वैतग्रन्थरत्नमञ्जूषायाः षट्चत्वारिंशं सप्तचत्वारिंशं च रत्नमिदं व्याख्यात्रयोपेतं ब्रह्मसूत्रशांकरभाष्यम्। यदस्य संपादनकार्यं मया कथं कथमपि निरूढं तत्र श्रीमहाराजानां शुभाशिष एव परमं निदानम्। तन्निमित्तं श्रीमहाराजानां चरणकमलयोः प्रणामाञ्जलिं समर्पये।

महता श्रमेण शोधने कृतेऽपि मद्दृष्टिपथादपेता अशुद्धयोऽत्रावशिष्टाः स्युरेव। विद्वांसः कृपया स्वयमेव ताः शोधयन्त्विति सविनयमभ्यर्थये।

पूर्वरूप (प्रूफ) संशोधनादिकार्ये यथायोगं साहाय्यं कृतवतां मदन्तेवासिनां श्रेयांसि आशासे।

श्रद्धया समीचीनरीत्या मुद्रणकार्यं संपादितवतां तारामुद्रणालयाधिपतीनां **श्रीरविप्रकाशपण्ड्यामहोदयानाम्**, श्रीजीमुद्रणालयाधिपतीनां **श्रीअनूपकुमारनागरमहोदयानां** च साधुवादैरभिनन्दनं विदधामि।

विदुषां विधेयः
मणिद्राविडः

।।श्रीगणेशाय नमः।।

सव्याख्यब्रह्मसूत्रभाष्यस्थविषयानुक्रमणिका

पृ.सं.

प्रथमोऽध्यायः

प्रथमः पादः

मङ्गलाचरणम् [प्र.,भा.,न्या.] १
प्रपञ्चमिथ्यात्ववर्णनं व्यर्थमिति आक्षेपः [प्र.] २
प्रथमसूत्रप्रतिपाद्यार्थसंग्रहः [न्या] २
प्रपञ्चमिथ्यात्ववर्णनसार्थक्यनिरूपणम् [प्र.] ३
अध्यासाश्रयादिनिरूपणम् [प्र.] ४
जिज्ञासाधिकरणरचना- प्रथमवर्णकम् [न्या.] ५
अध्यासभाष्यम्। ६-१२
आत्मानात्मनोर्मिथोऽध्यासाक्षेपः। ६
अध्यासाक्षेपस्य समाधानम्। १०
अज्ञानस्याध्यासोपादानत्वम्, भावरूपाज्ञानसाधनं च [प्र.] १२-१३
अध्यासलक्षणभाष्यम्। १४
अध्यासे मतान्तराणामुपन्यासः। १७
आरोप्यस्यानिर्वाच्यतानिरूपणम् [प्र.] १८
अनिर्वचनीयख्यातौ परोक्तदूषणनिरसनम् [प्र.] १९
अनिर्वचनीयख्यातौ प्रमाणनिरूपणम् [प्र.] २०
अध्याससंभावनाभाष्यम्। २१
आत्मस्वप्रकाशत्वसाधनम् [प्र.,भा.,न्या.] २२
नभसः साक्षिवेद्यत्वम् [प्र.] २४
अध्यासप्रमाणभाष्यम्। २६
प्रमाणानामध्यासमूलकत्वम्। २६
विवेकिनामपि व्यवहारः अध्यासमूलः। २९
शास्त्रीयव्यवहारोऽपि अध्यासमूलः। ३१
अध्यासोदाहरणम्। ३३
अध्यासनिरूपणोपसंहारः। ३५

१. जिज्ञासाधिकरणम्

द्वितीयवर्णकम्। ३५
तृतीयवर्णकम्। ३७
अथशब्दार्थविचारः। ३७
विचारस्याध्ययनविधिप्रयुक्तत्वनिरासपुरस्सरं श्रवणविधि-प्रयुक्तत्वनिरूपणम् [प्र.] ४३
पाठक्रमस्य कर्मब्रह्मविचारपौर्वापर्यानियामकत्वम् [प्र.] ४४
साधनचतुष्टयविवेचनम्। ४५

पृ.सं.

अतःशब्दार्थः। ४७
ब्रह्मजिज्ञासापदव्याख्यानम्। ४८
ब्रह्मजिज्ञासापदस्य कर्मषष्ठीसमासत्वव्यवस्थापनम्। ४९
ज्ञान-संवित्पदार्थविवेचनम् [प्र.] ५०-५१
चतुर्थवर्णकम्। ५२
प्रसिद्धिमुपपाद्य ब्रह्मणो जिज्ञास्यत्वसमर्थनम्। ५३
वेदान्तवाक्यमीमांसाया निःश्रेयसप्रयोजनत्वप्रतिपादनम्। ५६

२. जन्माद्यधिकरणम्

सौत्रपदानामर्थकथनम्। ५८
सूत्रार्थवर्णनम्। ६०
विपरिणामादीनां शेषभावविकाराणां जन्मादिष्वन्तर्भावप्रति-पादनम्। ६१
उक्तस्य ब्रह्मलक्षणस्यातिव्याप्तत्वशङ्कानिरासाय जगतः कारणान्तरादसंभवप्रतिपादनम्। ६२
ईश्वरानुमाननिराकरणम् [प्र.] ६४-६५
जन्मादिसूत्रस्यानुमानोपन्यासपरत्वशङ्कानिरासः। ६६
श्रुतिलिङ्गादिस्वरूपनिरूपणम् [प्र.] ६७
प्रकृताधिकरणस्य विषयवाक्यप्रदर्शनम्। ७०

३. शास्त्रयोनित्वाधिकरणम्

ब्रह्मणो वेदकर्तृत्वप्रतिपादनेन जगद्योनित्वावगतनिरतिशय-सर्वज्ञत्वदृढीकरणम्। ७३
वेदस्य पौरुषेयत्वनिरासः [प्र.] ७५

द्वितीयवर्णकम्

ब्रह्मणः शास्त्रप्रमाणकत्वप्रतिपादनम्। ७६

४. समन्वयाधिकरणम्

सूत्रनिवर्त्यपूर्वपक्षाभिधानम्। ७८
अर्थवादाधिकरणस्वरूपम् [प्र.न्या.] ७८
मन्त्राधिकरणम् [प्र.न्या.] ८०
वेदान्तानामेकान्तेन ब्रह्मप्रतिपादनपरत्वमाख्यातुं केषांचिद् वाक्यानामुपदर्शनम्। ८१
श्रौतज्ञानस्य प्रत्यक्षादिबाधकत्वम् [प्र.] ८२
ब्रह्मणः सिद्धत्वेन मानान्तरवेद्यत्वमित्यादीनां पूर्वपक्षबीजानां निराकरणम्। ८२

द्वितीयवर्णकम्

ब्रह्मण उपास्तिविधिशेषत्ववादिमतोपन्यासः। ८५
कर्मज्ञानफलयोर्वैलक्षण्यप्रदर्शनम्। ८९

पृ.सं.

ब्रह्मणस्तज्ज्ञानस्य च कार्यानुप्रवेशानर्हत्वम्। ९२
ब्रह्मज्ञानस्य संपदादिरूपत्वाभाव:। ९६
ब्रह्मण: संस्कार्यत्वनिरास:। १००
ज्ञानस्य क्रियावैलक्षण्यम्। १०४
ज्ञाने विधिनिराकरणम्। १०५
ब्रह्मात्मावगतौ सर्वकर्तव्यताहान्यादेरिष्टत्वकथनम्। १०६
केवलवस्तुवादी वेदभागो नास्तीति प्राभाकरमतस्य निराकरणम्। १०७
शवरस्वामिवचनस्याशयवर्णनम्। ११०
अन्विताभिधानसमर्थनम् [प्र.] ११०-१११
कार्यान्वितशक्तिनिरास: [प्र.] १११
आम्नायस्य क्रियार्थत्वादितिसूत्रविरोधपरिहार:। ११२
निषेधवाक्यवद्वेदान्तानां सिद्धेऽर्थे प्रामाण्यप्रतिपादनम्। ११४
अभावबुद्धेरौदासीन्यस्थापनकारणत्वनिरूपणम्· [भा.] ११६
अभावपदार्थस्थापनम् [प्र.] ११७
वेदान्तानां कर्तव्यविध्यनुप्रवेशमन्तरेण रज्जुस्वरूपकथनवदर्थवत्त्वम्। ११८
आत्मन: सशरीरत्वस्य मिथ्याज्ञाननिमित्तकत्वकथनम्। ११८
शरीरात्माभिमानस्य गौणत्वं वदत: मीमांसकस्य खण्डनम्। १२०
ब्रह्मणो विधिशेषत्वनिराकरणम्। १२२
अद्वैतात्मसाक्षात्कारेणाविद्यानिवृत्तौ प्रमात्रादिभावविरहात्प्रमाणादि-व्यवहारबाधप्रतिपादनम्। १२४

५. ईक्षत्यधिकरणम्।

उत्तरसूत्रावतरणम्। १२५
सांख्यपूर्वपक्षवर्णनम्। १२७
सूत्रयोजनया सिद्धान्तकथनम्। १२९
ईक्षतेरित्यस्य धात्वर्थनिर्देशत्वकथनं तत्प्रयोजनकथनं च। १३०
सत्त्वधर्मेण ज्ञानेन सर्वज्ञं प्रधानं भविष्यतीति सांख्योक्ति-खण्डनम्। १३१
ब्रह्मणोऽपि न मुख्यं सर्वज्ञत्वमुपपद्यते इति पूर्वपक्षबीजस्य निरसनम्। १३२
जीवस्येव ब्रह्मणोऽपि ज्ञाने शरीरसंबन्धाद्यपेक्षेत्याशङ्क्य तन्निराकरणम्। १३४
ईश्वरादतिरिक्तस्य संसारिणोऽभावाशङ्का तत्परिहारश्च। १३५
अचेतनेऽपि प्रधाने ईक्षितृत्वस्यौपचारिकत्वोपपादनेनोत्तर-सूत्रावतरणम्। १३६
उक्तशङ्कापरिहार:। १३७
आत्मशब्दस्य प्रधानेऽपि नानार्थत्वाद्गुणवृत्त्या वा संभवाभिधाने-नोत्तरसूत्रावतरणम्। १३८
तन्निष्ठस्य मोक्षोपदेशात् प्रधानस्यात्मशब्दालम्बनत्वाभाव-प्रतिपादनम्। १३९

पृ.सं.

गौणत्वसाधारणत्वयोर्दृष्टान्तवैषम्यप्रदर्शनेन निराकरणम्। १४०
स्वतन्त्रहेतुपरतया सूत्रव्याख्यानम्। १४२
स्थूलारुन्धतीन्यायेन तत्त्वमसीत्यत्र प्रधानस्यैवात्मत्वोपदेश इत्याशङ्कानिराकरणम्। १४३
जगत्कारणं प्रकृत्य स्वपितिनामनिर्वचनं कुर्वत्या श्रुत्या चेतनस्यैव जगत्कारणत्वप्रतिपादनाभिधानम्। १४४
सर्वेषु वेदान्तेषु जगत्कारणस्य चैतन्यावगते: प्रधानस्य जगत्कारणत्वाभावप्रतिपादनम्। १४५
सर्वज्ञस्य जगत्कारणत्वप्रतिपादकश्रुतिप्रदर्शनम्। १४७
वृत्तसंकीर्तनपुर:सरमुत्तरसूत्रसंदर्भाक्षेप:। १४८

६. आनन्दमयाधिकरणम्

द्विरूपब्रह्मबोधकश्रुतिप्रदर्शनपूर्वकमुत्तरग्रन्थप्रयोजनकथनम्। १४८
वृत्तिकारमतेन सूत्रव्याख्यानम्। १५१
विषयवाक्यप्रदर्शनपूर्वकं तद्गतेनानन्दमयशब्देन किं ब्रह्मोच्यतेऽ-र्थान्तरं वेति संदिह्य पूर्वपक्षसमर्थनम्। १५२
परस्मिन्नानन्दशब्दाभ्यासप्रदर्शनेन सिद्धान्त:। १५३
अमुख्यात्मप्रवाहपतितत्वरूपपूर्वपक्षबीजनिरसनम्। १५४
प्रियादीनां शिरस्त्वादिकल्पनानुपपत्तिरूपपूर्वपक्षबीजनिरसनम्। १५४
मयटो विकारे दर्शनाद्विकारविषयत्वमानन्दमयशब्दस्याशङ्क्य प्राचुर्येऽपि स्मरणात्तद्विषयत्वप्रतिपादनम्। १५५
ब्रह्मण आनन्दहेतुत्वव्यपदेशाद्धेतोर्मयट:प्राचुर्यार्थत्वप्रतिपादनम्। १५५
मान्त्रवर्णिकस्यैव परस्य ब्रह्मणो ब्राह्मणे आनन्दमयशब्देन गानादानन्दमय: पर एवात्मेति प्रतिपादनम्। १५६
शरीराद्युत्पत्ते: प्रागभिध्यानाद्यसंभवाज्जीवस्यानन्दमयत्वाभाव-प्रतिपादनम्। १५६
'रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती'ति भेदव्यपदेशादानन्दमय-शब्देन न संसारिणो ग्रहणम्। १५७
लब्धुर्लभ्यत्वाभावे श्रुतिस्मृतिबाधमाशङ्क्य तत्परिहार:। १५७
भास्करखण्डनम् [प्र.] १५८
कामयितृत्वनिर्देशात्प्रधानमानन्दमयत्वेन कारणत्वेन वाऽपेक्षितुं न शक्यत इति प्रतिपादनम्। १५८
आनन्दमयविषयकप्रबोधवतो जीवस्य मुक्तिशासनादानन्दमय-शब्द: प्रधाने जीवे वा न प्रवर्तत इति प्रतिपादनम्। १५९
स्वमतेनाधिकरणपरिग्रहार्थमेकदेशिमतदूषणम्। १६०
भास्करखण्डनम् [प्र.] १६०
विशिष्टपदार्थस्वरूपम् [प्र.] १६०
केशवदूषणम् [प्र.] १६२
स्वसंमताधिकरणानुगुण्येन सूत्राणां व्याख्यानम्। १६६
अध्याहारादिना सूत्रव्याख्यानस्यादोषत्वम्। १६७
अवशिष्टसूत्राणां भाष्यानुसारिव्याख्यानम् [प्र.] १६८

पृ.सं.

७. अन्तस्तद्धर्माधिकरणम्

विषयवाक्यप्रदर्शनपूर्वकं विवक्षितोपाधिभेदं ब्रह्म उपास्यत्वेन श्रूयते उत विद्याकर्मातिशयलब्धोत्कर्षो जीव इति संदिह्य रूपवत्त्वश्रुतेराधारश्रवणादैश्वर्यमर्यादाश्रुतेश्च पूर्वपक्षसमर्थनम्। १६९

तद्धर्मोपदेशादिति सूत्रावयवव्याख्यानेन सिद्धान्तप्रतिपादनम्। १७०

पूर्वपक्षसमर्थकप्रथमहेतुनिराकरणम्। १७१

द्वितीयतृतीयहेतुनिराकरणम्। १७२

आदित्यादिशरीराभिमानिभ्यो जीवेभ्योऽन्यस्यान्तर्यामिण ईश्वरस्य श्रुत्योपदेशाद् ब्रह्मण एवोपास्यत्वप्रतिपादनम्। १७३

८. आकाशाधिकरणम्

'अस्य लोकस्ये'ति छान्दोग्यवाक्ये आकाशपदं भूताकाशपरं ब्रह्मपरं वेति संदिह्य पूर्वपक्षसमर्थनम्। १७४

तल्लिङ्गादिति सूत्रस्थपदव्याख्यानेन सिद्धान्तप्रतिपादनम्। १७५

प्रसिद्धिबलेन शीघ्रं बुद्ध्यारोहादिति पूर्वपक्षसमर्थकहेतोर्निराकरणम्। १७७

९. प्राणाधिकरणम्

'कतमा सा देवते'तिवाक्ये पूर्ववत्संशयनिर्णययोरतिदेशः। १७८

अधिकाशङ्काप्रदर्शनम्। १७९

वृत्तिकारकृतव्याख्यानखण्डनम्। १८१

१०. ज्योतिश्चरणाधिकरणम्

'अथ यदतः परो दिवो ज्योतिर्दीप्यते' इति वाक्ये आदित्यादिज्योतिरभिधीयते किंवा परमात्मेति संदिह्य इह पूर्ववत्तल्लिङ्गाभावात्प्रसिद्धेर्मर्यादाश्रुतेः आधारश्रुतेः परस्य ज्योतिषोऽध्यासात् अल्पफलश्रुतेः पूर्ववाक्ये ब्रह्मनिर्देशाभावात् दिव आधारत्वश्रवणेन प्रत्यभिज्ञानाभावाच्च पूर्वपक्षसमर्थनम्। १८२

तमसो भावत्वसाधनम् [प्र.] १८३

चरणाभिधानादिति सूत्रावयवव्याख्यानेन ब्रह्मनिर्देशोपपादनम्। १८६

संदंशन्यायप्रदर्शनम्। १८७

प्रसिद्धेरित्यस्य निरसनम्। १८७

मर्यादाश्रुत्यादीनां निरसनम्। १८९

पूर्वस्मिन्वाक्ये ब्रह्मनिर्देशाभावादिति पूर्वपक्षसमर्थकहेतुपरिहारप्रतिज्ञा। १९०

प्रश्नपूर्वकं हेतुप्रदर्शनम्। १९०

'तावानि'ति मन्त्रस्य ब्रह्मप्रकाशकत्वाभावप्रतिपादनम्। १९०

'यद्वै तद् ब्रह्मे'ति मन्त्रगतब्रह्मशब्दस्य छन्दोविषयत्वप्रतिपादनम्। १९१

'तथा चेतोऽर्पणनिगदादि'ति सूत्रावयवव्याख्यानेन गायत्र्याख्यविकारानुगतस्य जगत्कारणस्य ब्रह्मणः सर्वशब्देन प्रतिपादनाभिधानम्। 'तथाहि दर्शनमि'ति सूत्रशेषव्याख्यानम्। १९१

गायत्रीशब्दस्य संख्यासामान्याद्गौण्या वृत्त्या ब्रह्माभिधायित्वमिति मतान्तरप्रदर्शनम्। १९२

पृ.सं.

भूतादिपादव्यपदेशादपि पूर्ववाक्ये ब्रह्मणः प्रकृतत्वाभिधानम्। १९३

दिव आधारत्वेन मर्यादात्वेन चोपदेशान्न प्रत्यभिज्ञानमित्येतस्याक्षेपस्य परिहारः। १९५

११. प्रतर्दनाधिकरणम्

विषयवाक्यप्रदर्शनपुरःसरं प्राणशब्देन वायुमात्रं वा देवतात्मा वा जीवो वा परं ब्रह्म वा गृह्यत इति चतुष्कोटिकसंशयोपपादनम्। १९६

सिद्धान्तप्रतिपादनम्। १९७

न वक्तुरात्मोपदेशादिति सूत्रावयवव्याख्यानेन 'प्राणो ब्रह्मेति' पूर्वसूत्रसिद्धान्तं आक्षिप्य देवतात्मेति द्वितीयकोटिसमुत्थापनम्। १९८

अध्यात्मसंबन्धभूमा ह्यस्मिन्निति सूत्रशेषव्याख्यानेन ब्रह्मोपदेश एवायं न देवतात्मोपदेश इति सिद्धान्तः। २००

देवतालिङ्गानां गतिप्रदर्शनम्। २०१

जीवमुख्यप्राणलिङ्गप्रदर्शनेन प्राणशब्दस्य ब्रह्मपरत्वाक्षेपः। २०२

'नोपासात्रैविध्यादि'ति सूत्रांशव्याख्यानेन समाधानम्। २०३

'आश्रितत्वादि'त्यादिसूत्रशेषव्याख्यानम्। २०३

जीवमुख्यप्राणलिङ्गानां ब्रह्मणि नयनम्। २०४

वृत्तिकारमतेन 'नोपासात्रैविध्यादि'त्यादिसूत्रभागस्य व्याख्यानम्। २०५

द्वितीयः पादः

वृत्तसंकीर्तनपूर्वकमत्र द्वितीये पादे निर्णेयार्थस्य कथनम्। २०८

१. सर्वत्रप्रसिद्ध्यधिकरणम्

'सर्वं खल्विद'मित्यादिछान्दोग्योपनिषद्गतं वाक्यं विषयत्वेन निर्दिश्य किमिह शारीर उपास्यत्वेनोपदिश्यत आहो परं ब्रह्मेति संशयप्रदर्शनम्। २०९

शारीर इति पूर्वपक्षस्योपपादनम्। तदर्थं सर्वमित्यादिवाक्यस्य शमविधिपरत्वप्रतिपादनम्। २१०

जीवे ज्यायस्त्वायोगशङ्का तत्परिहारश्च। अन्ते ब्रह्मसंकीर्तनस्यापि जीवविषयत्वसमर्थनम्। २११

परमेव ब्रह्मेति सिद्धान्तोपपादनम्। २१२

श्रुत्युक्तगुणानां विवक्षितत्वोपपादनम्। सत्यसंकल्पत्वादीनां गुणानां ब्रह्मण्युपपादनम्। २१३

मनोमयत्वादिजीवलिङ्गानां ब्रह्मण्युपपादनम्। २१३

सत्यसंकल्पत्वादीनां शारीरे आञ्जस्येनानुपपत्तेर्ब्रह्मण उपास्यत्वप्रतिपादनम्। २१५

कर्मकर्तृव्यपदेशाच्च मनोमयत्वादिगुणः शारीरो न भवतीति प्रतिपादनम्। २१५

शब्दविशेषात्सिद्धान्तोपपादनम्। २१६

'ईश्वरः सर्वभूतानामि'त्यादिस्मृतेरपि हृदिस्थस्य जीवाद्भेदप्रतिपादनम्। २१६

पृ.सं.

जीवस्य परस्माद्भेदायोगशङ्का तत्परिहारश्च। २१७

अर्भकौकस्त्वाणीयस्त्वरूपजैवलिङ्गद्वयस्य निरासः। २१७

ब्रह्मणो हार्दत्वेऽनिष्टसंभोगापत्तेर्जीव एव हार्द उपास्य इत्याशङ्क्य तन्निराकरणम्। २१९

२. अत्त्रधिकरणम्

'यस्य ब्रह्म चे'ति विषयवाक्यं प्रदर्श्यौदनोपसेचनसूचितोऽत्ता अग्निर्वा जीवो वा परमात्मा वेति संदिह्य 'अनश्नन्नन्यो' इति दर्शनात्परमात्मनोऽत्तृत्वासंभवादग्निर्वा जीवो वेति पूर्वपक्षः। २२१

'चराचरग्रहणादि'ति सूत्रशेषव्याख्यानेन परमात्मेति सिद्धान्तः। २२२

प्रकरणात्परमेश्वरप्रतिपादनम्। २२३

३. गुहाप्रविष्टाधिकरणम्

'ऋतं पिबन्तौ' इति मन्त्रे बुद्धिजीवौ निर्दिष्टावुत जीवपरमात्मानाविति संदिह्य पक्षद्वयस्याप्युपपत्तिप्रदर्शनम्। २२४

पक्षद्वयस्याप्याक्षेपः। २२४

आक्षेपनिरासेन संशयोपपादनम्। २२५

बुद्धिक्षेत्रज्ञाविति पूर्वपक्षस्य समर्थनम्। २२६

जीवपरमात्मानाविति सिद्धान्तव्यवस्थापनम्। २२६

अग्रे गन्तृगन्तव्यत्व-मन्तृमन्तव्यत्वविशेषणश्रवणाज्जीव-परमात्मानावेव गुहां प्रविष्टौ गृह्येते। २२८

प्रकरणस्याप्युक्तार्थोपष्टम्भकत्वप्रतिपादनम्। २२८

कृत्वाचिन्तया 'द्वासुपर्णे'त्यादावस्य न्यायस्यातिदेशः। २२८

कृत्वाचिन्तोद्घाटनम्। २२९

बुद्धेः भोक्तृत्वासंभवात् सत्त्वक्षेत्रज्ञपरत्वानुपपत्तिशङ्कानिरासः। २३०

४. अन्तराधिकरणम्

'य एषोऽक्षिणी'ति वाक्ये किं प्रतिबिम्बात्माऽक्ष्यधिकरणो निर्दिश्यतेऽथवा विज्ञानात्मा उत देवतात्मेन्द्रिय-स्याधिष्ठाताऽथवेश्वर इति संदिह्य त्रयाणामपि पूर्वेषां पक्षाणां समर्थनम्। २३२

'उपपत्तेरि'ति सूत्रांशव्याख्यानेन परमेश्वर इति व्यवस्थापनम्। २३३

परमेश्वरस्याक्षिस्थानानुपपत्तिनिराकरणम्। २३४

प्रकृतानुसारादपि ब्रह्मण एव प्रत्येतव्यत्वम्। २३५

ब्रह्मविद्विषयाया गतेरक्षिपुरुषविदोऽभिधानादक्षिस्थानस्य ब्रह्मत्व-निर्णयः। २३८

छायात्म-विज्ञानात्म-देवतात्मनामक्षिस्थानत्वनिराकरणम्। २३९

५. अन्तर्याम्यधिकरणम्

'यः पृथिव्यां तिष्ठन्नि'त्यादिवाक्ये अधिदैवतादिः कश्चिदन्तरवस्थितो यमयिता श्रूयते; स किं तत्तदभिमानी देवतात्मा किंवा प्राप्ताणिमाद्यैश्वर्यः कश्चिद्योगी उत परमात्मा आहोस्विदर्थान्तरमिति संदिह्य परमात्मव्यतिरिक्तानां त्रयाणामपि पक्षाणां समर्थनम्। २४१

पृ.सं.

तद्धर्मव्यपदेशादिति सूत्रावयवव्याख्यानेन परमात्मैवेति सिद्धान्तोपपादनम्। २४३

प्रधानस्यान्तर्यामिशब्दत्वाशङ्कापरिहारः। २४४

शारीरस्यान्तर्यामित्वशङ्कोपपादनेनोत्तरसूत्रावतरणम्। २४५

शारीरस्य काण्वैर्माध्यन्दिनैश्चान्तर्यामिणः भेदेनाधीतत्वादन्तर्या-मित्वाभावप्रतिपादनम्। २४६

शारीरपरमात्मनोस्तात्त्विकभेदाशङ्कानिरासाय द्रष्टृद्वयानुपपत्त्या-शङ्का तत्परिहारश्च। २४६

६. अदृश्यत्वाद्यधिकरणम्

'अथ परा यये'ति वाक्ये अदृश्यत्वादिगुणको भूतयोनिः प्रधानमुत शारीर आहो परमेश्वर इति संदिह्य प्रधानस्य तत्त्वोपपादनम्। २४८

शारीरस्य भूतयोनित्वप्रतिपादनम्। २५०

'धर्मोक्तेरि'ति सूत्रावयवव्याख्यानेन परमेश्वर इति प्रतिपादनम्। २५०

'यः सर्वज्ञ' इति वाक्यशेषस्य भूतयोनिविषयत्वाभाव-खण्डनम्। २५१

परविद्येति समाख्यया भूतयोनेर्ब्रह्मत्वप्रतिपादनम्। २५१

ब्रह्मविद्येति समाख्यया भूतयोनेर्ब्रह्मत्वप्रतिपादनम्। २५३

अचेतनानां दृष्टान्तत्वेनोपन्यासादिति भूतयोनेः प्रधानत्वापादक-हेतोर्निराकरणम्। २५३

विशेषणाच्छारीरस्य भूतयोनित्वाभावप्रतिपादनम्। २५४

भेदव्यपदेशात् प्रधानस्य भूतयोनित्वाभावप्रतिपादनम्। २५४

वृत्तिकृन्मतेन रूपोपन्याससूत्रव्याख्यानम्। २५५

स्वमतेन व्याख्यानम्। २५६

७. वैश्वानराधिकरणम्

विषयवाक्यं प्रदर्श्य तत्र वैश्वानरशब्देन किं जाठरोऽग्नि-रुपदिश्यते उत भूताग्निरथ तदभिमानिनी देवताऽथवा शारीर आहोस्वित्परमेश्वर इति संदिह्य संदेहकारणं चाभिधाय चतुर्णामपि पूर्वपक्षाणां क्रमेणोपपादनम्। २५८

'साधारणशब्दविशेषादि'ति सूत्रावयवव्याख्यानेन परमात्मेति सिद्धान्तोपपादनम्। अत्रैवार्थे लिङ्गान्तराभिधानं च। २६१

अग्निरास्यं द्यौर्मूर्धेत्यादि त्रैलोक्यात्मकं परमेश्वरस्य रूपं स्मर्यमाणं मूलभूतां श्रुतिमनुमापयत् वैश्वानरशब्दस्य परमेश्वरपरत्वे गमकमिति प्रतिपादनम्। २६१

शब्दादीनां गतिं वक्तुमुक्तसिद्धान्ताक्षेपः। २६२

सूत्रव्याख्यानेन जाठरो वैश्वानरः प्रत्येतव्य इति प्रथम-पक्षनिराकरणम्। २६३

सूत्रे 'पुरुषमपी'तिस्थानीयस्य 'पुरुषविधमपी'ति पाठस्य व्याख्यानम्। २६४

भूताग्निर्वा देवतात्मा वेति द्वितीयतृतीयपक्षनिरसनम्। २६५

पृ.सं.

प्रतीकोपाधिकल्पनाभ्यां विनापि परमेश्वरस्योपास्यत्वप्रतिपादनम्। २६५
आश्मरथ्यमते परमेश्वरपरिग्रहे प्रादेशमात्रश्रुत्युपपत्तिप्रदर्शनम्। २६७
बादरिमतेन प्रादेशमात्रश्रुत्युपपादनम्। २६८
प्रादेशमात्रश्रुतेः जैमिनिसंमतश्रुत्युक्तगतिप्रदर्शनम्। २६८
प्रादेशमात्रश्रुतेः संपत्तिनिमित्तत्वे जाबालश्रुतिसंवादप्रदर्शनम्। २७०

तृतीयः पादः

१. द्युभ्वाद्यधिकरणम्

'यस्मिन्द्यौरि'ति वाक्ये द्युप्रभृतीनामोतत्ववचनाद् गम्यमानमायतनं किं ब्रह्म स्यादाहो अर्थान्तरमिति संदिह्यार्थान्तरमिति पूर्वपक्षस्योपपादनम्। २७२
सूत्रव्याख्यानेन सिद्धान्तः। २७३
सेतुश्रुतेर्गतिप्रदर्शनम्। २७६
सेतुशब्दस्य ज्ञानपरत्वेन व्याख्यानम्। २७६
द्युभ्वाद्यायतनस्य मुक्तोपसृप्यत्वव्यपदेशाद् ब्रह्मत्वप्रतिपादनम्। २७७
वाग्विमुक्तैर्विज्ञेयत्वव्यपदेशस्यापि तत्र हेतुत्वप्रतिपादनम्। २७८
प्रधानस्य वायोश्च द्युभ्वाद्यायतनत्वनिराकरणम्। २७८
विज्ञानात्मनो द्युभ्वाद्यायतनत्वनिराकरणम्। २७९
ज्ञेयज्ञातृभावरूपभेदव्यपदेशादपि विज्ञानात्मनो द्युभ्वाद्यायतनत्वप्रतिषेधः। २७९
तत्रैव प्रकरणस्य हेतुत्वप्रतिपादनम्। २८०
द्युभ्वाद्यायतनं प्रकृत्य 'द्वा सुपर्णा' इत्यत्र स्थित्यदनाभ्यामीश्वरक्षेत्रज्ञयोः पृथग्ग्रहणादपि विज्ञानात्मनो न द्युभ्वाद्यायतनत्वमिति प्रतिपादनम्। २८०
'द्वासुपर्णे'त्यत्र पैङ्ग्युपनिषत्कृतव्याख्यानेन सत्त्वक्षेत्रज्ञावुच्येते इत्येतस्मिन्पक्षे व्याख्यानम्। २८१

२. भूमाधिकरणम्

'भूमा त्वेवे'ति छान्दोग्यवाक्ये भूमा प्राण उत परमात्मेति संदिह्य संशयबीजप्रदर्शनम्। २८२
पूर्वपक्षसमर्थनम्। २८३
प्राणो भूमेति पक्षे भूमलक्षणविरोधाशङ्का तत्परिहारश्च। २८४
प्रकरणविरोधाक्षेपस्तत्परिहारश्च। २८४
संप्रसादादध्युपदेशादिति सूत्रावयवव्याख्यानेन परमात्मैवेह भूमेति सिद्धान्तोपपादनम्। २८५
भूम्नि श्रूयमाणानां धर्माणां परमात्मन्युपपत्तिप्रदर्शनम्। भूम्नो लक्षणस्य सुखत्वामृतत्वयोश्च प्राणेऽयोगप्रदर्शनञ्च। २८९

३. अक्षराधिकरणम्

'कस्मिन्नु खल्वाकाश' इति वाक्ये अक्षरशब्देन वर्ण उच्यते किंवा परमेश्वर इति संदिह्य वर्ण इति पूर्वपक्षस्य समर्थनम्। २९०
अम्बरान्तधृतेरित्यस्य व्याख्यानेन परमेश्वर इति सिद्धान्तः। २९१

पृ.सं.

अम्बरान्तधृतिः प्रधानवादिनोऽप्युपपद्यत इत्याशङ्कानिराकरणम्। २९२
अक्षरस्य श्रुत्या वर्ण-प्रधान-अव्याकृतत्वव्यावर्तनादक्षरं ब्रह्मेति प्रतिपादनम्। २९२

४. ईक्षतिकर्माधिकरणम्

'यः पुनरेत'मिति वाक्ये किं परं ब्रह्माभिध्यातव्यमुच्यत आहोस्विदपरमिति संदिह्यापरमिति पूर्वपक्षोपपादनम्। २९४
सूत्रव्याख्यानेन परमिति सिद्धान्तोपपादनम्। २९५
देशपरिच्छिन्नस्य फलस्योच्यमानत्वादिति पूर्वपक्षहेतोर्निराकरणम्। २९७

५. दहराधिकरणम्

'अथ यदिदमस्मिन्नि'ति वाक्ये यो दहरे पुण्डरीके दहराकाशः श्रुतः स किं भूताकाशोऽथवा विज्ञानात्माऽथवा परमात्मेति संशय्य संशयहेतोः प्रतिपादनम्। २९८
भूताकाश इति जीव इति च पक्षस्य समर्थनम्। २९९
अथवा भूताकाश एव दहराकाशोऽस्तु दहराकाशान्तःस्थस्य ध्येयत्वेनोपादानादिति पक्षान्तरम्। ३००
'उत्तरेभ्य' इति सूत्रावयवव्याख्यानेन दहराकाशपदेन भूताकाशग्रहणासंभवप्रदर्शनम्। ३००
जीवपक्षस्य निरसनम्। ३०२
दहराकाशान्तःस्थस्य ध्येयत्वनिरसनम्। ३०३
पूर्वसूत्रे उत्तरेभ्यो हेतुभ्य इत्युक्तेषूत्तरहेतुषु गतिशब्दयोः प्रदर्शनम्। ३०५
सर्वजगद्धारणस्य परमात्मलिङ्गस्य दहरे दर्शनाद्दहरस्य ब्रह्मत्वप्रतिपादनम्। ३०६
आकाशशब्दस्य परमात्मनि प्रसिद्धत्वादपि 'दहरोऽस्मिन्नन्तराकाशः' इति परमेश्वर एवोच्यत इति प्रतिपादनम्। ३०८
वाक्यशेषे जीवस्यापि परामर्शाद्दहराकाशो जीव इत्याशङ्कानिराकरणम्। ३०८
जीवाशङ्कायाः प्राजापत्यवाक्यात्पुनः समुत्थानम्। ३१०
'आविर्भूतस्वरूपस्तु' इति सूत्रावयवव्याख्यानेन सिद्धान्तनिरूपणम्। ३११
स्वेन रूपेणाभिनिष्पत्तिरित्यत्र विरोधाशङ्का। ३१३
तत्परिहारः। ३१४
श्रुत्यर्थस्याविरुद्धतया 'आविर्भूतस्वरूपस्त्वि'ति सूत्रशेषस्य युक्तत्वप्रतिपादनम्। ३१४
प्रजापतिवाक्यसंदर्भपर्यालोचनयाऽपि भेदस्य मिथ्यात्वप्रतिपादनम्। ३१५
श्रुतेरेकदेशिव्याख्यानम् तन्निरसनञ्च। ३१७
मतान्तरमुपन्यस्य तत्र शारीरकशास्त्रस्यैवोत्तरत्वाभिधानम्। ३१७
शारीरकार्थस्य संक्षेपेण कथनम्। ३१८

पृ.सं.

जीवपरामर्शस्य गतिप्रदर्शनम्। ३१९

दहरशब्दाद्गम्यमानमल्पत्वमौपाधिकं परमेश्वरस्यावकल्पते। ३२०

६. अनुकृत्यधिकरणम्

'न तत्र सूर्य' इति मुण्डकवाक्ये तच्छब्दोपात्तः किं तेजोधातुः कश्चिदुत प्राज्ञ आत्मेति संदिह्य तेजोधातुरिति पूर्वपक्षस्य समर्थनम्। ३२१

सूत्रव्याख्यानेन प्राज्ञ इति सिद्धान्तोपपादनम्। ३२२

दर्शितमुण्डकश्रुतिगतसर्वशब्दस्यार्थान्तरमादाय व्याख्यानम्। ३२३

प्रकरणादपि ब्रह्मैवात्र ग्राह्यम्। ३२४

णिजध्याहारेण ब्रह्मणः सूर्याद्यभास्यत्वे श्रुत्युक्ते स्मृतेः प्रमाणत्वेनोपन्यासः। ३२५

७. प्रमिताधिकरणम्

'अङ्गुष्ठमात्र'- इति काठकवाक्ये श्रूयमाणोऽङ्गुष्ठमात्रः पुरुषः किं विज्ञानात्मा किं वा परमात्मेति संदिह्य परिमाणोपदेशात्स्मृतिसंवादाच्च जीव इति पूर्वपक्षसमर्थनम्। ३२६

सूत्रव्याख्यानेन परमात्मेति सिद्धान्तप्रतिपादनम्। ३२७

परिमाणोपदेशोपपत्तिप्रदर्शनम्। ३२८

पूर्वपक्षबीजनिरसनम्। ३२९

८. देवताधिकरणम्

संगतिप्रदर्शनपूर्वकं देवादीनामप्यस्ति ब्रह्मज्ञानाधिकार इति सिद्धान्तमुपन्यस्य संभवादित्यस्य व्याख्यानेन तत्समर्थनम्। ३३२

कर्मानधिकारकारणस्य ब्रह्मविद्यानधिकाराकारणत्वोपपादनम्। ३३४

देवादीनां विग्रहवत्त्वे कर्मणि विरोधाशङ्का। ३३५

अनेकप्रतिपत्तेरिति सूत्रावयवव्याख्यानेन तत्परिहारः। ३३५

अनेकप्रतिपत्तिपदस्य अनेकेषु कर्मसु युगपदङ्गभावगमनपरतया व्याख्यानम्। ३३६

देवताया विग्रहवत्त्वे वैदिके शब्दे प्रामाण्यविरोधाशङ्का। ३३७

नातः प्रभवादित्यस्य व्याख्यानेन तत्परिहारः। ३३८

इन्द्रादिपदानामुपाधिनिमित्तत्वकथनम्। ३३९

जगतो ब्रह्मप्रभवत्वतः शब्दप्रभवत्वस्य वैलक्षण्यप्रतिपादनम्। ३३९

प्रत्यक्षानुमानाभ्यामित्यस्य व्याख्यानेन जगतः शब्दप्रभवत्वे मानप्रदर्शनम्। ३३९

जगतः शब्दप्रभवत्वमाक्षिप्य शब्दस्वरूपनिरूपणम्। स्फोटवादिमतनिरूपणम्। वर्णपक्षे दोषाः। ३४१

वर्णा एव तु शब्द इति सिद्धान्तोपपादनम्। ३४३

शब्दानित्यत्वानुमाननिरासः [प्र.] ३४९

वेदनित्यत्वदृढीकरणम्। ३५०

महाप्रलये जगतो निर्लेपप्रलयाच्छब्दार्थसंबन्धस्यानित्यत्वाशङ्का। ३५१

समाननामरूपत्वाच्चावृत्तावप्यविरोधः। ३५२

पृ.सं.

मध्वादिष्वसंभवाद् ब्रह्मविद्यायां देवादीनां नाधिकार इति जैमिनिः। ३५७

विग्रहाभावाच्चानधिकारो देवानाम्। ३५९

बादरायणो भावमधिकारस्य देवादीनां मन्यते। ३६०

विग्रहाभावादित्येतस्य निरसनम्। ३६२

९. अपशूद्राधिकरणम्

संगतिप्रदर्शनपूर्वकमधिकरणतात्पर्यमुक्त्वा शूद्रस्य विद्यायामधिकारोऽस्तीति पूर्वपक्षसमर्थनम्। ३६८

न शूद्रस्याधिकार इति सूत्राद् बहिरेव सिद्धान्तः। ३६९

संवर्गविद्यायां शुश्रूषोः शूद्रशब्देन परामर्शस्य पूर्वपक्षबीजस्य सूत्रव्याख्यानेन शूद्रशब्दस्य यौगिकत्वप्रदर्शनेन निरसनम्। ३७०

प्रकरणनिरूपणादिना जानश्रुतेर्जातिशूद्रत्वनिराकरणम्। ३७२

विद्योपदेशप्रदेशेषूपनयनसंस्कारपरामर्शाच्छूद्रस्य ब्रह्मविद्यायामनधिकाराभिधानम्। ३७३

शूद्रत्वाभावे निर्धारिते उपनयनेऽनुशासने च प्रवृत्तिप्रदर्शनेन शूद्रस्य विद्यायामनधिकारप्रतिपादनम्। ३७४

श्रवणादिप्रतिषेधादप्यनधिकार इति प्रतिपादनम्। ३७५

अधिकरणस्य वेदपूर्वकविद्याधिकारखण्डनपरत्वाभिधानम्। ३७५

१०. कम्पनाधिकरणम्

'यदिदं किंचे'ति वाक्ये श्रूयमाणः प्राणो वज्रश्च क इति जिज्ञासायां क्रमेण वायुरशनिश्चेति पूर्वपक्षसमर्थनम्। ३७६

पूर्वोत्तरालोचनाद् ब्रह्मेति सिद्धान्तसमर्थनम्। प्राणवज्रशब्दयोर्ब्रह्मणि योगप्रदर्शनं च। ३७८

११. ज्योतिरधिकरणम्

'एष संप्रसाद' इति वाक्ये ज्योतिःशब्दं तेज उत परं ब्रह्मेति संशय्य तेज इति पूर्वपक्षसमर्थनम्। ३८०

दर्शनादिति सूत्रावयवव्याख्यानेन ब्रह्मेति सिद्धान्तोपपादनम्। ३८१

१२. अर्थान्तरत्वादिव्यपदेशाधिकरणम्

'आकाशो वै नामे'ति वाक्ये आकाशशब्दं भूताकाशं ब्रह्म वेति संदिह्य भूताकाश इति पूर्वपक्षसमर्थनम्। ३८३

अर्थान्तरत्वादिव्यपदेशादित्येतद् व्याख्याय परं ब्रह्मेति सिद्धान्तोपपादनम्। ३८४

१३. सुषुप्त्युत्क्रान्त्यधिकरणम्

बृहदारण्यके षष्ठे प्रपाठके 'कतम आत्मे'त्युपक्रम्य भूयानात्मविषयः प्रपञ्चः कृतः। तत्किं संसारिस्वरूपाख्यानपरं वाक्यमुतासंसारिस्वरूपप्रतिपादनपरमिति संशय्य संसारिस्वरूपमात्रविषयमिति पूर्वपक्षस्य समर्थनम्। ३८५

व्यपदेशादिति पूर्वसूत्रतोऽनुषज्य सूत्रव्याख्यानेन परमेश्वरोपदेशपरमिति सिद्धान्तः। ३८६

पूर्वपक्षबीजनिरसनम्। ३८६

असंसारिस्वभावप्रतिपादनपरैः संसारिस्वभावप्रतिषेधपरैश्च शब्दैरसंसारिस्वरूपप्रतिपादनपरत्वोपपादनम्। ३८८

पृ.सं.

चतुर्थः पादः

१. आनुमानिकाधिकरणम्

वृत्तसंकीर्तनपूर्वकं 'महतः परमव्यक्तम्' इति काठकश्रुतौ महदादीनां श्रवणात् प्रधानस्याशब्दत्वानुपपत्त्युपपादनम्। ३८९

काठकश्रुत्यन्तर्गताव्यक्तशब्दस्य प्रधानपरत्वनिरासः। ३९१

शरीररूपकविन्यस्तगृहीतेरिति सूत्रावयवव्याख्यानेन अव्यक्तशब्दस्य शरीरपरत्वप्रतिपादनम्। ३९२

शरीरादिषु रथादिरूपककल्पनायाः प्रयोजनप्रदर्शनम्। ३९३

काठकग्रन्थस्यैक्यतात्पर्ये लिङ्गप्रदर्शनम्। ३९५

स्थूलशरीरारम्भकस्य भूतसूक्ष्मस्याव्यक्तत्वाच्छरीरेऽव्यक्तपदार्हत्वप्रतिपादनम्। ३९६

बीजात्मकस्यानभिव्यक्तनामरूपस्य प्रागवस्थस्य जगतोऽभ्युपगमे प्रधानवादप्रसङ्गोपपादनम्। ३९६

प्रागवस्थाया अविद्याशक्तिमायादिपदवाच्यायाः अनिर्वचनीयायाः प्रदर्शनेनाव्याकृतवादस्य प्रधानवादाद्भेदप्रतिपादनम्। ३९७

सूत्रद्वयस्य वृत्तिकृत्संमतार्थप्रदर्शनम्। ३९८

तत्खण्डनम्। ३९९

अत्राव्यक्तस्य ज्ञेयत्वेनोपास्यत्वेन वाऽनुक्तत्वात्सांख्यैश्चोक्तत्वादयमव्यक्तशब्दो न सांख्याभिमतप्रधानपर इति प्रतिपादनम्। ४००

ज्ञेयत्वावचनस्यासिद्धत्वोपपादनम्। ४०१

'अशब्दमस्पर्श'मिति वाक्ये निचाय्यत्वेन श्रूयमाणस्य ब्रह्मत्वप्रतिपादनेन ज्ञेयत्वावचनासिद्धिनिरसनम्। ४०२

कठवल्लीषु अग्निजीवपरमात्मनां त्रयाणामेव वरप्रदानसामर्थ्यात्, वक्तव्यत्वेनोपन्यासात्प्रधानस्य नाव्यक्तशब्दवाच्यत्वं ज्ञेयत्वं वेति प्रदर्शनम्। ४०२

जीवपरमात्मविषयकप्रश्नयोरेकत्वे सूत्रविरोधाशङ्का। ४०३

भेदे वरप्रदानानन्तर्भावेऽपि प्रश्न इव प्रधानाख्यानमप्यदुष्टमित्याक्षेपः। ४०४

वस्तुतो जीवपरमात्मनोरभेदात्प्रष्टव्याभेदेनैक एव प्रश्नः। सूत्रं त्ववास्तवभेदाभिप्रायमिति परिहारः। ४०७

सांख्यप्रसिद्धेर्वैदिकप्रसिद्ध्या विरोधादव्यक्तशब्दो वैदिके प्रयोगे न प्रधानमभिधातुमर्हतीति प्रतिपादनम्। ४०८

२. चमसाधिकरणम्

'अजामेका'मित्यादिमन्त्रेऽवगम्यमानत्वात्प्रधानस्याशब्दत्वमसिद्धमित्याक्षेपः। ४०९

सूत्रोक्तचमसदृष्टान्तेनात्र प्रधानमेवाभिप्रेतमिति नियन्तुमशक्यमिति प्रतिपादनम्। ४१०

उत्तरसूत्रावतरणम्। ४११

पृ.सं.

इयमजा चतुर्विधभूतग्रामप्रकृतिर्भूतत्रयलक्षणा प्रतिपत्तव्या, शाखान्तरे तेषामेव रोहितादिरूपताख्यानादिति प्रतिपादनम्। ४११

मायाप्रकरणादपि अजामन्त्रे न प्रधानाम्नानमिति प्रतिपादनम्। ४१२

उत्तरसूत्रावतरणम्। ४१३

नायमजाशब्दस्तेजोबन्नलक्षणायामवान्तरप्रकृतौ जातिनिमित्तो, नापि यौगिकः, किंतु रूपकक्लृप्त्युपदेशोऽयमिति प्रतिपादनम्। ४१४

मध्वादिवदित्यादिसूत्रावयवव्याख्यानम्। ४१४

३. नसंख्योपसंग्रहाधिकरणम्

'यस्मिन्पञ्च पञ्चजनाः' इति वाक्ये पञ्चसंख्याविषयापरपञ्चसंख्याश्रवणेन पञ्चविंशतिसंख्याप्रतीतेः सांख्यसंख्यातपञ्चविंशतितत्त्वोपसंग्रहात् प्रधानस्य श्रुतिमत्त्वमिति पूर्वपक्षः। ४१५

नानाभावादिति सूत्रावयवव्याख्यानम्-तत्त्वानां पञ्चशः पञ्चशः साधारणधर्माभावात्पञ्च पञ्चसंख्यानिवेशासंभवप्रतिपादनम्। ४१६

अवयवद्वारेण पञ्चविंशतिसंख्या लक्ष्यत इति मतनिरसनम्। ४१७

संख्यान्तरानाकाङ्क्षा-नोपसर्जनन्यायाभ्यां पूर्वपक्षनिरसनम्। ४१८

पञ्चपञ्चजनशब्दस्य अतिरेकादिति सूत्रावयवव्याख्यानेन पञ्चविंशतितत्त्ववाचकत्वनिरासः। ४१९

पञ्चजनशब्दस्य रूढत्वप्रतिपादनम्। ४२०

प्राणादीनां पञ्चजनपदप्रतिपाद्यत्वप्रतिपादनम्। ४२०

एकदेशिमतद्वयप्रदर्शनम्। ४२२

काण्वानां ज्योतिषा पञ्चसंख्यापूर्तिरिति प्रतिपादनम्। ४२३

४. कारणत्वाधिकरणम्

वृत्तकीर्तनपूर्वकं ब्रह्मणो जगज्जन्मादिकारणत्वं ब्रह्मविषयं गतिसामान्यं च वेदान्तवाक्यानां परस्परविरोधादाक्षिप्य कारणान्तरं परिग्रहीतव्यमिति पूर्वपक्षसमर्थनम्। ४२४

कार्यविषयके विगाने सत्यपि कारणनिरूपणपरस्य वाक्यजातस्य प्रतिवेदान्तमविगीतार्थत्वात्र ब्रह्मणः कारणत्वे विरोध इति सिद्धान्तप्रतिपादनम्। ४२६

'असद्वा इदमग्र' इत्यादिकारणविषयविगानस्य परिहारः। ४२८

५. बालाक्यधिकरणम्

'यो वै बालाक' इत्यादिकौषीतकिवाक्ये किं जीवो वेदितव्यत्वेनोपदिश्यते उत मुख्यः प्राण उत परमात्मेति संशय्य प्राणपक्षसमर्थनम्। ४३१

जीवपक्षसमर्थनम्। ४३२

परमेश्वर एवेति सिद्धान्तोपपादनम्। ४३३

यस्य वैतत्कर्मेति वाक्ये कर्मपदस्य जगद्वाचित्वावधारणम्। ४३४

पूर्वपक्षबीजस्य प्रतर्दनन्यायेन निरासः। ४३६

प्रतर्दनाधिकरणेनास्य गतार्थत्वाशङ्का तन्निरासश्च। ४३६

जीवव्यतिरिक्तविषयकप्रश्नप्रतिवचनाभ्यां जीवपरामर्शस्य ब्रह्मप्रतिपत्त्यर्थत्वप्रतिपादनम्। ४३७

पृ.सं.

वाजसनेयिनां बालाक्यजातशत्रुसंवादगतपरमात्मप्रतिपादक-वाक्यप्रदर्शनम्। ४३७

६. वाक्यान्वयाधिकरणम्

'न वा अरे पत्युः कामाये'ति वाक्ये द्रष्टव्यत्वेन विज्ञानात्मा उपदिश्यत उत परमात्मेति संदिह्य संशयकारणं चोक्त्वा विज्ञानात्मोपदेश इति पूर्वपक्षस्य समर्थनम्। ४३९

वाक्यान्वयादिति सूत्रव्याख्यानेन परमात्मोपदेश इति सिद्धान्तः। ४४१

एवविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः सिद्धिं सूचयति विज्ञानात्म-परमात्मनोरभेदांशेनोपक्रमणमिति आश्मरथ्यमतप्रति-पादनम्। ४४३

जीवः परमात्मनोऽत्यन्तं भिन्नोऽपि ज्ञानध्यानादिसाधना-नुष्ठानात्संप्रसन्नः परमात्मनैक्यमापद्यतेऽत उपपन्नमभेदेनोप-क्रमणमित्यौडुलोमिमतप्रदर्शनम्। ४४३

जीव आत्मनो नान्यो, नापि तद्विकारः, किंत्वात्मैवाविद्या-कल्पितावच्छेद इति काशकृत्स्नमतोपपादनम्। ४४४

दर्शितमतत्रयं विभज्य युक्तायुक्तत्वविचारः। ४४५

द्वितीयपूर्वपक्षबीजनिरासपरतया त्रिसूत्रीयोजना। ४४६

'एतेभ्यो भूतेभ्य' इति श्रुतावुत्पत्त्युच्छेदावुक्तौ नाभेद इत्याक्षेप-परिहारः। ४४६

तृतीयपूर्वपक्षबीजपरिहारः। ४४७

काशकृत्स्नीयमतस्य श्रुतिस्मृतिमत्त्वप्रदर्शनम्। ४४७

७. प्रकृत्यधिकरणम्

ब्रह्मणो जगत्कारणत्वं प्रकृतित्वनिमित्तत्वोभयरूपमुत निमित्तत्व-मात्रमिति संदिह्य निमित्तत्वमेवेति पूर्वपक्षस्य समर्थनम्। ४५१

प्रतिज्ञादृष्टान्तानुपरोधादिति सूत्रावयवव्याख्यानेन प्रकृतित्व-साधनम्। ४५३

पञ्चमीश्रुत्याऽपि प्रकृतित्वसाधनम्। ४५४

निमित्तत्वसाधनम्। ४५४

अभिध्योपदेशात्प्रकृतित्वप्रतिपादनम्। ४५५

साक्षाद् ब्रह्मैव कारणमुपादाय प्रभवप्रलयाम्नानादपि ब्रह्मणः प्रकृतित्वमिति प्रतिपादनम्। ४५५

कर्तृत्वकर्मत्वदर्शनादात्मनः प्रकृतित्वस्य निमित्तत्वस्य च प्रतिपादनम्। ४५५

सौत्रपरिणामपदस्य विवर्तपरत्वोपपादनम् [प्र.] ४५६

केशवोक्तनिर्विकारश्रुतिगतिनिरासः [प्र.] ४५६

भास्कराभिमतपरिणामित्वखण्डनम् [प्र.] ४५६

मायावादस्य वेदाचार्यपरम्परागतत्वम् [प्र.] ४५६

परिणामादित्यस्य योगविभागेन व्याख्यानम्। ४५७

योनित्वेन पाठादपि प्रकृतित्वसाधनं पूर्वपक्षोक्तानुमानदूषणं च। ४५७

पृ.सं.

८. सर्वव्याख्यानाधिकरणम्

अण्वादिकारणवादानां प्रधानकारणवादनिराकरणेन प्रधानमल्ल-निराकरणन्यायेन निराकृतत्वबोधनम्। ४५९

इति प्रथमोऽध्यायः

●

द्वितीयोऽध्यायः

प्रथमः पादः

१. स्मृत्यधिकरणम्

वृत्तवर्तिष्यमाणयोरध्याययोः संगतिप्रदर्शनाय संक्षेप-तस्तात्पर्यार्थकथनम्। ४६१

कपिलादिस्मृतीनां मोक्षसाधनप्रकाशकत्वाभावे आनर्थक्यापाता-त्तदविरोधेन वेदान्ता व्याख्यातव्या इति पूर्वपक्षसमर्थनम्। ४६२

पूर्वपक्षस्यायुक्तत्वाशङ्का तत्परिहारश्च। ४६३

नान्यस्मृतीत्यादिसूत्रशेषव्याख्यानेन स्मृतीनां विगानाच्छ्रौत एवार्थ आस्थेय इति प्रतिपादनम्। ४६४

कपिलादिस्मृतीनां प्रत्यक्षमूलत्वाशङ्का तन्निराकरणं च। ४६६

श्रुत्या कपिलादीनां ज्ञानातिशयबोधनात्कथं तेषां वचनम-प्रमाणमित्याशङ्कानिराकरणम्। ४६७

मन्वादीनां श्रौतत्वप्रदर्शनम्। ४६८

उक्तेऽर्थे महाभारतसंमतिप्रदर्शनम्। ४६८

मनुस्मृतेः श्रुतिसंवादप्रदर्शनम्, उपसंहारश्च। ४६९

महदादीनामलोकवेदप्रसिद्धत्वात् सांख्यस्मृतेरनवकल्पनप्रदर्शनम्। ४७०

२. योगप्रत्युक्त्यधिकरणम्

औपनिषदेन तत्त्वज्ञानेनापेक्षणात्संवादबाहुल्याच्च योगस्मृतिः प्रमाणमिति अधिकाशङ्कानिरासः। ४७१

येनांशेन वेदेन न विरुध्यते तत्रेष्टं प्रामाण्यं नान्यत्रेति सिद्धान्तः। ४७३

३. नविलक्षणत्वाधिकरणम्

पूर्वपक्षानवकाशाक्षेपसमाधी ४७४

'न विलक्षणत्वादस्य' इति सूत्रावयवव्याख्यानेन जगतो ब्रह्म-प्रकृतिकत्वाक्षेपः। ४७६

चेतनकारणश्रवणबलाज्जगतश्चेतनत्वोत्प्रेक्षा। तथात्वं च शब्दा-दित्यस्य व्याख्यानेन जगतोऽचेतनत्वोपपादनम्। ४७७

अचेतनत्वेनाभिमतानां भूतेन्द्रियाणां चेतनत्वप्रदर्शकश्रुतीनामुप-न्यासेनोत्तरसूत्रावतरणम्। ४७९

दर्शितश्रुतीनां तत्तदभिमानिदेवताव्यपदेशपरत्वोपपादनेन जगतो ब्रह्मविलक्षणत्वं व्यवस्थाप्याब्रह्मप्रकृतिकत्वरूपपूर्व-पक्षोपसंहारः। ४७९

विलक्षणत्वादिति हेतौ व्यभिचारोद्भावनम्। ४८०

	पृ.सं.
विलक्षणत्वहेतोस्त्रिधा विकल्प्य दूषणम्।	४८१
ब्रह्मणि परिनिष्पन्नेऽपि प्रमाणान्तरानवकाशोपपादनम्।	४८२
मननविधानाद् ब्रह्मणस्तर्कविषयत्वमित्याक्षेपनिरासः।	४८३
चेतनाचेतनविभागश्रुतिविरोधपरिहारः।	४८४
असत्कार्यवादापत्तिपरिहारः।	४८५
जगद्ब्रह्मणोः कार्यकारणभावबोधकोपनिषद्दर्शने चतुर्विधा-सामञ्जस्यप्रदर्शनम्।	४८६
प्रथमाऽसामञ्जस्यपरिहारः।	४७७
सिद्धान्तरहस्यप्रदर्शनम्।	४८८
द्वितीयाद्यसामञ्जस्यपरिहारः।	४८९
वैलक्षण्यादीनां दोषाणां सांख्यपक्षसाधारणत्वप्रतिपादनम्।	४९०
निरागमानां तर्काणामप्रतिष्ठितत्वोपपादनम्।	४९१
प्रतिष्ठिततर्कसंभवप्रदर्शनम्।	४९१
एवमप्यनिर्मोक्षप्रसङ्ग इति सूत्रावयवव्याख्यानेनागमानुसारित-र्कवशेन जगतो ब्रह्मप्रकृतिकत्वव्यवस्थापनम्।	४९३
४. शिष्टापरिग्रहाधिकरणम्	
मन्वादिभिः शिष्टैरपरिगृहीतानामण्वादिवादानां प्रधानकारणवाद-निराकरणकारणातिदेशेन निराकरणम्।	४९५
५. भोक्त्रापत्त्यधिकरणम्	
प्रमाणान्तरसिद्धभोक्तृभोग्यविभागबाधकत्वं श्रुतेरयुक्तमित्याक्षिप्य परिणामदृष्टान्तेन तन्निरासः।	४९७
६. आरम्भणाधिकरणम्	
पूर्वाधिकरणपूर्वपक्षस्य विवर्ताश्रयणेन परमसमाधानम्।	५००
अनेकान्तवादोत्थापनम्, तन्निरसनञ्च।	५०३
एकत्वैकान्ताभ्युपगमे लौकिकवैदिकप्रमाणव्याघातापादनम्। मोक्षशास्त्रस्याप्यनृतत्वेन तद्बोधितात्मैकत्वस्यासत्यत्वा-पत्तिश्च।	५०६
प्रमाणानां प्राग्ब्रह्मात्मताविज्ञानात्सत्यत्वोपपादनेन तन्निरसनम्।	५०६
मोक्षशास्त्रानृतत्वेऽप्यात्मैकत्वस्यानृतत्वनिरासः।	५०७
अनेकत्वस्य श्रौतत्वाशङ्का, तन्निरासश्च।	५१०
ईश्वरकारणप्रतिज्ञाविरोधाशङ्का, तन्निरासश्च।	५१२
मायावादस्य सूत्रकारसंमतत्वम् [प्र.]	५१४
भास्करोक्तदूषणापकरणम् [प्र.]	५१४
केशवोक्तदूषणनिरासः [प्र.]	५१५
मिथ्यात्वेऽनुमानानि [प्र.]	५१५
कारणसत्त्वे एव कार्यस्योपलम्भात्कार्यस्य कारणानन्यत्व-प्रतिपादनम्।	५१६
भावाच्चेति पञ्चम्यन्तपाठपक्षे सूत्रव्याख्यानम्।	५१७
उत्पत्तेः प्राक्कारणात्मना कार्यस्य सत्त्वश्रवणात्तदनन्यत्व-प्रतिपादनम्।	५१८
'असदेवेद'मित्यादिश्रवणात् प्रागुक्तकार्यसत्त्वमाक्षिप्य तन्निरासः।	५१९
कार्यस्य कारणानन्यत्वावगमकयुक्तिप्रदर्शनम्।	५२०
समवायदूषणम्।	५२१
अवयविनोऽवयवातिरिक्तत्वनिराकरणम्।	५२२
असत्कार्यवादे उत्पत्तेरकर्तृकत्वनिरात्मकत्वयोरापत्तिः।	५२३
सिद्धान्ते कारकव्यापारस्यार्थवत्त्वोपपादनम्।	५२५
असत्कार्यवादिमते कारकव्यापारस्य निर्विषयत्वापत्तिः।	५२७
शब्दान्तरात्कार्यस्य कारणानन्यत्वोपपादनम्	५२७
संवेष्टितप्रसारितपटन्यायेन कार्यस्य कारणानन्यत्वप्रतिपादनम्।	५२८
कार्यस्योपादानाद्भेदसाधक-भिन्नकार्यकरत्वहेतौ प्राणान्तर्भावेन व्यभिचारं दर्शयित्वा जगतो ब्रह्मानन्यत्वोपपादनम्।	५२८
भास्कराभिमतभेदाभेदवादस्य निरसनम् [प्र.]	५२९
७. इतरव्यपदेशाधिकरणम्	
शारीरस्य ब्रह्मात्मत्वव्यपदेशाद्धितक्रियाद्यदर्शनाच्च चेतन-कारणवादाक्षेपः।	५३०
जीवेश्वरयोः कल्पितभेदाङ्गीकारात्र हिताकरणादिदोषप्रसक्तिरिति सिद्धान्तप्रतिपादनम्।	५३१
जीवप्राज्ञपृथक्त्वस्याश्मादिनिदर्शनेनोपपादनम्।	५३३
८. उपसंहारदर्शनाधिकरणम्	
अद्वितीयस्य ब्रह्मणो जगत्कारणत्वानुपपत्त्याशङ्का।	५३४
क्षीरादिवद्विचित्रपरिणामोपपत्तिप्रदर्शनेन तन्निरासः।	५३५
दृष्टान्तवैषम्याच्चेतनकरणत्वाक्षेपः, देवादिदृष्टान्तेन तन्निरासश्च।	५३६
कुलालादिदृष्टान्तवैलक्षण्यमात्रस्योक्तदृष्टान्तैः विवक्षिततत्वम्।	५३७
९. कृत्स्नप्रसक्त्यधिकरणम्	
ब्रह्मणो निरवयवत्वात् क्षीरादिवत्परिणामः कृत्स्नस्य प्राप्नोतीति परिणामपक्षानुपपत्तिप्रदर्शनम्।	५३८
विकारव्यतिरेकेणापि ब्रह्मणोऽवस्थानश्रवणाच्छब्दप्रमाणकत्वाच्च नास्मत्पक्षे कश्चिद्दोष इति प्रतिपादनम्।	५३९
शब्दस्य विरुद्धार्थप्रत्यायनासामर्थ्यादिकेदेशिव्याख्यानाक्षेपः, विवर्तवादमाश्रित्य तत्परिहारश्च।	५४१
ब्रह्मणि स्वरूपानुपमर्देनानेकाकारा सृष्टिर्भवतीति मायावाद-स्फुटीकरणम्।	५४२
कृत्स्नप्रसक्त्यादिदोषाणां परपक्षेऽपि समानत्वप्रदर्शनम्।	५४३
१०. सर्वोपेताधिकरणम्	
ब्रह्मणः पूर्वदर्शितविचित्रशक्तिमत्त्वे प्रमाणश्रुत्युपन्यासः।	५४५
'अचक्षुष्कमश्रोत्रम्' इत्यादिशास्त्रेण परस्या देवतायाः विकरणत्वशासनात् सर्वशक्तियोगासंभवाशङ्कापरिहारः।	५४६
११. नप्रयोजनवत्त्वाधिकरणम्	
परमात्मन आत्मप्रयोजनाभावाज्जगत्कर्तृत्वप्रतिक्षेपः।	५४७

पृ.सं.

प्रेक्षावत्प्रवृत्तेः श्वासप्रश्वासादिक्रियासु प्रयोजनव्यभिचारदर्शनाद् ब्रह्मणोऽपि जगत्सर्जने प्रवृत्तिर्नानुपपन्नेति प्रदर्शनम्। ५४८

१२. वैषम्यनैर्घृण्याधिकरणम्

वैषम्यनैर्घृण्यप्रसङ्गादीश्वरस्य जगज्जन्मादिहेतुत्वाक्षेपः। ५५०

सृज्यमानप्राणिधर्माधर्मसापेक्षत्वादीश्वरस्य न वैषम्यनैर्घृण्य-प्रसक्तिरिति तन्निरासः। ५५१

सापेक्षत्वे मानप्रदर्शनम्। ५५१

सृष्टेः प्राक्कर्मणोऽभावादाद्यसृष्टेस्तुल्यत्वापत्तिशङ्कायाः संसार-स्यानादित्वान्निरासः। ५५२

उपपत्तिसहितश्रुतिस्मृतिभ्यां संसारस्यानादित्वसाधनम्। ५५२

१३. सर्वधर्मोपपत्त्यधिकरणम्

स्वपक्षपरिग्रहप्रधानप्रकरणोपसंहारः। ५५५

द्वितीयः पादः

१. रचनानुपपत्त्यधिकरणम्

अस्य द्वितीयपादस्य सांख्यादिदर्शननिराकरणरूपविषयप्रदर्शनम्। ५५८

सांख्यादिदर्शननिराकरणस्य प्रयोजनवत्त्वप्रतिपादनम्। ५५८

अत्र सांख्यादिपक्षप्रतिक्षेपस्य पौनरुक्त्यमाशङ्क्य विशेष-प्रदर्शनम्। ५५९

सर्वेषां बाह्याध्यात्मिकभेदानां सुखदुःखमोहात्मतयाऽन्वीय-मानत्वाज्जगत्कारणत्वेन प्रधानसिद्धिरिति पूर्वपक्षोपपादनम्। ५५९

विचित्ररचनानुपपत्तिरूपसूत्रोक्तहेतुप्रपञ्चनेन सांख्यानुमानदूषणम्। ५६१

अन्वयादिति हेतावसिद्ध्युद्भावनम्, परिमाणादिहेतूनां दूषणं च। ५६३

प्रवृत्त्यनुपपत्तेरपि जगत्कारणत्वेनाचेतनानुमानदूषणम्। ५६४

केवलस्य चेतनस्य प्रवृत्तिमाक्षिप्याचेतने तदुपपादनम्। ५६४-६६

प्रवृत्तिरहितत्वेऽपीश्वरस्य प्रवर्तकत्वोपपादनम्। ५६७

प्रवर्त्याभावप्रयुक्तप्रवृत्त्यनुपपत्तिनिरसनम्। ५६७

क्षीरादिवदचेतनं स्वत एव प्रवर्तत इति सांख्यमतनिरसनम्। ५६८

प्रवर्तकाभावात् प्रधानप्रवृत्त्यनुपपत्तिप्रदर्शनम्। ५६९

तृणादिवत्स्वाभाविकप्रधानपरिणामवादनिरासः। ५६९

प्रधानस्य स्वाभाविकप्रवृत्तिमभ्युपगम्य तस्याः पुरुषार्थत्व-खण्डनम्। ५७०

दृष्टान्तवलेन पुरुषस्य प्रवर्तकत्वमाशङ्क्य तन्निषेधः। ५७२

गुणानां साम्यावस्थायां परस्परमङ्गाङ्गिभावानुपपत्तेः प्रधान-प्रवृत्त्यनुपपत्तिः। ५७३

गुणानां वैषम्योपगमयोग्यत्वानुमानदूषणम्। ५७४

परस्परविरोधाच्छ्रुतिस्मृतिविरोधाच्च सांख्याभ्युपगमस्या-सामञ्जस्यप्रतिपादनम्। ५७५

तप्यतापकभावस्यैकस्मिन्ननुपपत्तेरौपनिषददर्शनमप्यसमञ्जसमिति सांख्यस्य प्रत्यवस्थानम्। ५७५

तप्यतापकभावस्यापारमार्थिकत्वोपपादनम्। ५७७

पृ.सं.

तस्य तात्त्विकत्वेऽनिर्मोक्षप्रसङ्गः। ५७९

औपनिषदस्य तदभावः। ५८०

२. महद्दीर्घाधिकरणम्

परमाणुकारणवादिमतानुवादेनोत्तरसूत्रावतरणम्। ५८१

परमाणुकारणवादिनां तत्प्रक्रियायामेव समानजातीयोत्पत्ति-व्यभिचारं दर्शयित्वा चेतनाद् ब्रह्मणोऽचेतनस्य जगत उत्पत्तावनौचित्याभावप्रदर्शनम्। ५८२

३. परमाणुजगदकारणत्वाधिकरणम्।

परमाणुकारणवादिनां मते परमाणुसद्भावे उपपत्तिः, परमाणुभिः जगदुत्पत्तिप्रक्रिया च। ५८८

निमित्ताभावादाद्यकर्मानुत्पत्त्या तन्निबन्धनसंयोगानुपपत्तिः। ५९०

परमाणुषु संयोगस्वरूपानुपपत्तिः। ५९२

महाप्रलयेऽणूनां विभागजनककर्मासंभवः। ५९३

समवायाभ्युपगमादनवस्थापत्त्याऽणुवादस्यायुक्तत्वम्। ५९४

परमाणूनां प्रवृत्तिस्वभावत्वादिचतुर्विधविकल्पासहत्वम्। ५९५

रूपादिमत्त्वात्परमाणूनां सावयवत्वमनित्यत्वं च। ५९६

वैशेषिकोक्तस्य नित्यत्वे कारणत्रयस्य परमाणौ व्युदासः। ५९६

पृथिव्यादिपरमाणूनामुपचितापचितगुणत्वदर्शनादपरमाणुत्वम्। ५९९

शिष्टापरिगृहीतत्वात्परमाणुकारणवादस्यानादरणीयत्वम्। ६००

वैशेषिकतन्त्राभ्युपगतपदार्थदूषणम्। गुणादीनां मिथो भेदे द्रव्याधीनत्वानुपपत्तिः। ६००

द्रव्यादिलक्षणानि तद्भेदाश्च [भा.] ६००

षट्पदार्थखण्डनम् [प्र.] ६०१

लक्षणप्रयोजनखण्डनम् [प्र.] ६०१

अयुतसिद्धत्वस्य त्रिधा विकल्प्य खण्डनम्। ६०२

सम्बन्धिव्यतिरेकेण सम्बन्धस्याप्रामाणिकत्वम्। ६०४

निरवयवयोः संयोगानुपपत्तिः। ६०५

परमाणूनां निरवयवत्वखण्डनम्। ६०७

परमाणुसाधकानुमानखण्डनम् [प्र.] ६०८

परमाणुसाधकमहाविद्यादूषणम् [प्र.] ६०९

४. समुदायाधिकरणम्

वैनाशिकैकदेशिनोः सर्वास्तित्ववादिनोर्मतम्। ६११

अस्मिन्मते समुदायिनामचेतनत्वात् संहन्तुः स्थिरस्यान-भ्युपगमाच्च समुदायानुपपत्तिः। ६१२

संहन्तुरभावेऽप्यविद्यादिषु परस्परकारणत्वेनानिशमावर्तमानेषु समुदायस्यार्थात्तिसिद्धिः। ६१३

अविद्यादीनामुत्तरोत्तरोत्पत्तिमात्रनिमित्तत्वम्। ६१५

संघातानादित्वस्य विचारासहत्वम्। ६१६

भोक्त्रभावात्संघातासिद्धिः। ६१६

पृ.सं.

अविद्यादीनामितरेतरोत्पत्तिनिमित्तत्वस्य निरसनम्। ६१७
हेत्वसत्त्वेऽपि फलोत्पत्तौ 'चतुर्विधान्हेतून्प्रतीत्य चित्तचैत्ता उत्पद्यन्ते' इति प्रतिज्ञाया उपरोधः। पूर्वक्षणस्योत्तर-क्षणोत्पत्तिपर्यन्तमवस्थाने क्षणिकत्वप्रतिज्ञोपरोधः। ६१८
प्रतिसंख्याऽप्रतिसंख्यानिरोधप्रत्याख्यानम्। ६१९
अविद्यादिनिरोधप्रत्याख्यानम्। ६२०
आकाशस्य निरुपाख्यत्वप्रत्याख्यानम्। ६२१
अनुस्मृतेरुपलब्धृक्षणिकताप्रत्याख्यानम्। ६२२
उपलब्धुः क्षणिकत्वे प्रत्यभिज्ञाविरोधः। ६२३
क्षणिकत्वे प्रमाणखण्डनम् [प्र.] ६२३
प्रत्यभिज्ञास्वरूपम् [प्र.] ६२३
प्रामाण्यस्वतस्त्वसाधनम् [प्र.] ६२४
विकल्पप्रत्ययस्य विषयद्वैविध्यखण्डनम् [भा.] ६२६
अभावाद्भावोत्पत्तिप्रत्याख्यानम्। ६२७
अभावाद्भावोत्पत्त्यभ्युपगमेऽप्रयतमानानामप्यभिमतसिद्ध्यापत्तिः। ६२९

५. अभावाधिकरणम्
विज्ञानवादिकृतं बाह्यार्थाभावोपपादनम्। ६३१
बाह्यार्थाभावखण्डनम्। ६३४
ज्ञानस्य स्वरूपमात्रपर्यवसितत्वे दोषः। ३३७
उपलब्धिव्यतिरेकेण बाह्यार्थाङ्गीकारावश्यकत्वम्। ६३८
जागरितप्रत्ययानां स्वप्नप्रत्ययवैधर्म्यम्। ६४०
वासनानुपपत्त्या तद्वैचित्र्याज्ज्ञानवैचित्र्यानुपपत्तिः। ६४२
आलयविज्ञानस्य वासनानाश्रयत्वम्। ६४३
शून्यवादस्य सर्वप्रमाणविप्रतिषिद्धत्वात् तन्निराकरणे सूत्रकृतोऽनादरः। ६४४
वैनाशिकसमयस्य सर्वथाऽनुपपन्नत्वम्। ६४४

६. एकस्मिन्नसंभवाधिकरणम्।
जैनानां समयः। ६४५
सप्तभङ्गीनयखण्डनम्। ६४८
जीवस्य शरीरपरिमाणत्वखण्डनम्। ६५०
जीवस्य पर्यायेणावयवोपगमापगमखण्डनम्। ६५१
स्रोतःसन्ताननित्यतान्यायेन जीवस्य नित्यतावादखण्डनपरतया सूत्रव्याख्यानम्। ६५३
मोक्षावस्थाभाविजीवपरिमाणस्य नित्यत्वखण्डनम्। ६५३

७. पत्यधिकरणम्।
केवलाधिष्ठात्रीश्वरकारणवादनिरूपणम्। ६५५
तस्यासामञ्जस्यम्। ६५६
ईश्वरस्य प्रधानादिना सम्बन्धानुपपत्तिः। ६५८
प्रधानस्याधिष्ठेयत्वानुपपत्तिः। ६५९

पृ.सं.

पुरुषस्य करणाधिष्ठातृत्ववदीश्वरस्य प्रधानाधिष्ठातृत्वे भोगादिप्रसङ्गः। ६६०
सूत्रद्वयस्य ईश्वरस्य सशरीरत्वापत्तिपरतया व्याख्यानम्। ६६०
ईश्वरस्यान्तवत्त्वासर्वज्ञत्वापत्तिः। ६६१
नैयायिकसंमतषोडशपदार्थखण्डनम् [प्र.] ६६३
प्रमाणसामान्यलक्षणनिराकरणम् [प्र.] ६६३
प्रत्यक्षप्रमाणखण्डनम् [प्र.] ६६३
सविकल्पक-निर्विकल्पकखण्डनम् [प्र.] ६६४
अनुमानप्रमाणखण्डनम् [प्र.] ६६४
व्याप्तिस्वरूपखण्डनम् [प्र.] ६६४
दृष्ट-सामान्यतोदृष्टानुमानयोः खण्डनम् [प्र.] ६६५
स्वार्थपरार्थानुमाननिरासः [प्र.] ६६५
लिङ्गत्रैविध्यखण्डनम् [प्र.] ६६५
हेत्वाभासलक्षणखण्डनम् [प्र.] ६६५
प्रमेयखण्डनम् [प्र.] ६६६
संशयादिलक्षणखण्डनम् [प्र.] ६६६
जातिलक्षणपरीक्षा [प्र.] ६६७
निग्रहस्थानखण्डनम् [प्र.] ६६७

८. उत्पत्त्यसंभवाधिकरणम्
भागवतमतम्। ६६८
जीवस्योत्पत्तिखण्डनम्। ६६९
मनसो जीवप्रभवत्वखण्डनम्। ६७०
संकर्षणादीनां वासुदेवान्निर्विशेषत्वम्। ६७१
अस्मिन् शास्त्रे बहुविधविप्रतिषेधोपलम्भः। ६७२

तृतीयः पादः

१. वियदधिकरणम्
आकाशस्योत्पत्त्यश्रवणादनुत्पत्तिः। ६७३
तैत्तिरीयश्रुतावाकाशस्योत्पत्तिश्रवणेऽपि छान्दोग्ये तदनुरोधेनासहाय-तयाधिगतस्य तेजसः ससहायत्वकल्पनमयुक्तम्। ६७५
वियदुत्पत्तिश्रुतेर्गौणत्वम्। ६७६
श्रुतित आकाशस्याजत्वम्। ६७७
एकस्यापि संभूतशब्दस्य विषयविशेषवशात् गौणत्वम्, मुख्यत्वं च। ६७८
ब्रह्मणः अद्वितीयत्वप्रतिज्ञायाः स्वकार्यापेक्षया लक्षणान्यत्वा-भावाच्चोपपत्तिः। ६८०
सिद्धान्तः—प्रतिवेदान्तं दृश्यमानप्रतिज्ञायाः कृत्स्नस्य जगतो ब्रह्मणोऽव्यतिरेक एवानुपरोधः। ६८०
शब्देभ्यश्च प्रकृतिविकाराव्यतिरेकन्यायेनैव प्रतिज्ञासिद्ध्यवगमः। ६८१
वियदुत्पत्तिश्रुतीनां छान्दोग्यश्रुत्याऽविरोधः। ६८१

	पृ.सं.
आकाशस्य सर्वेणानन्यदेशकालत्वात् क्षीरोदकन्यायेन प्रतिज्ञोपपादनदूषणम्।	६८४
आकाशोत्पत्तावसंभवाशङ्कानिराकरणम्।	६८५
दिक्कालखण्डनम् [प्र.]	६८६
'न चाकाशस्यैकजातीयमनेकमस्त्यारम्भकद्रव्य' मित्युद्भावितविरोधस्य परिहार:।	६८९
आकाशस्योत्पत्तौ न पूर्वोत्तरकालयोर्विशेष: संभावयितुं शक्यत इत्याक्षेपपरिहार:।	६९०
आकाशेऽजत्वसाधकपृथिव्यादिवैधर्म्यहेतोर्दुष्टत्वम्।	६९०
शब्दाच्चेत्यादेर्निरसनम्।	६९१
२. मातरिश्वाधिकरणम्	
वियद्वदतिदेशेन वायोरुत्पत्तिसाधनम्।	६९२
३. असंभवाधिकरणम्	
ब्रह्मण: सदात्मकस्य न कुतश्चिदुत्पत्ति:।	६९४
४. तेजोधिकरणम्	
तेजस आकाशवायुप्रणाड्या ब्रह्मयोनित्वम्।	६९५
५. अबधिकरणम्	
अपां तेजोयोनित्वम्।	६९५
६. पृथिव्यधिकाराधिकरणम्।	
'ता आप ऐक्षन्ते'ति वाक्ये श्रूयमाणस्यान्नशब्दस्य प्रकरणादिभ्य: पृथिवीपरत्वम्।	७००
७. तदभिध्यानाधिकरणम्	
ईश्वराधिष्ठितेभ्यो वियदादिभ्य उत्तरोत्तरभूतसर्ग:।	७०२
८. विपर्ययाधिकरणम्	
भूतानामुत्पत्तिक्रमविपर्ययेणाप्ययक्रम:।	७०४
९. अन्तराविज्ञानाधिकरणम्	
बुद्धीन्द्रियमनसां भौतिकत्वात्र भूतानामुत्पत्तिप्रलयक्रमभङ्ग:।	७०६
१०. चराचरव्यपाश्रयाधिकरणम्	
जीवात्मनो न देहाश्रयौ स्थूलावुत्पत्तिप्रलयौ।	७०९
११. आत्माधिकरणम्	
जीवस्यांकाशादीनामिव नोत्पत्तिप्रलयौ।	७११
१२. ज्ञाधिकरणम्	
जीवात्मनो नित्यचैतन्यस्वरूपत्वम्।	७१५
१३. उत्क्रान्तिगत्यधिकरणम्	
पूर्वपक्ष:—जीवस्योत्क्रान्तिगत्यागतिश्रवणादणुत्वम्।	७१८
गमे: कर्तृस्थभावत्वाद्गत्यागती अमध्यमपरिमाणस्याणुत्वे एव संभवत:।	७२०
महत्त्वश्रुते: परमात्मप्रकरणस्थत्वात्र जीवविषयत्वम्।	७२१
साक्षादस्याणुत्वश्रवणादुन्मानश्रुतेश्चाणुत्वं जीवस्य।	७२२
हरिचन्दनबिन्दु: सकलदेहव्यापिनमाह्लादमिवात्माऽपि देहैकदेशस्थ: सकलदेहव्यापिनीमुपलब्धिं करिष्यति।	७२२
उक्तचन्दनदृष्टान्तस्य दार्ष्टान्तिकस्य च वैषम्याशङ्का, तत्परिहारश्च।	७२३
मणिप्रदीपादीनामपवरकैकदेशवर्तिनामपि प्रभा यथाऽपवरकव्यापिनी एवमणोरपि जीवस्य चैतन्यं सकलदेहव्यापि।	७२४
अणोरपि जीवस्य चैतन्यं तमतिक्रम्य देहं व्याप्नुयात् गन्धवत्।	७२४
आत्मनश्चैतन्येन गुणेन समस्तशरीरव्यापित्वं श्रुतिर्दर्शयति।	७२६
आत्मप्रज्ञयो: कर्तृकरणभावेन पृथगुपदेशादपि चैतन्यगुणेनात्मन: शरीरव्यापित्वम्।	७२६
अथ सिद्धान्त:—परब्रह्मतादात्म्योपदेशाज्जीवस्य विभुत्वम्।	७२७
त्वक्सम्बन्धेऽपि सकलशरीरगतवेदनानुपपत्ति:।	७२७
गुणव्याप्तिखण्डनम्।	७२७
बुद्धिगुणसारत्वादणुत्वादिव्यपदेश:।	७२८
स्वशब्दोन्मानादीनां निरास:।	७२९
सम्यग्दर्शनेन संसारित्वनिवृत्तिपर्यन्तमात्मनो बुद्ध्या संयोगो न शाम्यतीति न बुद्धिसंयोगविनाशस्यावश्यंभावादकस्मादसंसारित्वप्रसक्ति:।	७३०
सुषुप्तिप्रलययोरपि सूक्ष्मात्मना बुद्धिसंयोगस्य सत्त्वम्।	७३२
अन्त:करणानभ्युपगमे नित्योपलब्ध्यनुपलब्धिप्रसङ्ग:, प्रतिबन्धककल्पनापत्तिर्वा।	७३३
१४. कर्त्रधिकरणम्	
विधिशास्त्रार्थवत्त्वाज्जीवस्य कर्तृत्वम्।	७३५
विहारोपदेशात् जीवप्रक्रियायां करणानामुपादानसंकीर्तनाच्च कर्तृत्वम्।	७३६
लौकिकवैदिकक्रियासु जीवस्य कर्तृत्वव्यपदेशाच्च।	७३७
स्वतन्त्रस्यापि जीवस्योपलब्धिवदिष्टानिष्टप्रवृत्तिरविरुद्धा।	७३७
बुद्धे: कर्तृत्वे करणशक्तिविपर्ययापत्ति:।	७३८
श्रवणादिविधानस्यात्मन: कर्तृत्वमन्तरेणानुपपत्ति:।	७३९
१५. तक्षाधिकरणम्	
शास्त्रार्थवत्त्वादिभिर्हेतुभि: स्वाभाविकं कर्तृत्वं जीवस्येति पूर्वपक्ष:, अनिर्मोक्षप्रसङ्गादुपाधिनिमित्तमिति सिद्धान्त:।	७४०
शास्त्रार्थवत्त्वादिहेतूनामन्यथोपपत्ति:।	७४३
औपाधिककर्तृत्वस्य मिथ्यात्वम् [प्र.]	७४६
१६. परायत्ताधिकरणम्	
ईश्वरमनपेक्ष्य कर्तृत्वं जीवस्येति पूर्वपक्ष:।	७४७
ईश्वरायत्तमिति राद्धान्त:।	७४८
जीवस्य धर्माधर्मावपेक्ष्येश्वर: कारयिताऽतो न वैषम्यनैर्घृण्यापत्ति:।	७४९
संसारस्यानादित्वात्र परायत्तकर्तृत्वेऽपि जीवे ईश्वरस्य कृतप्रयत्नापेक्षत्वमुपपत्ति:।	७५०

	पृ.सं.
१७. अंशाधिकरणम्	
भेदाभेदावगमाज्जीव ईश्वरस्यांशः।	७५१
मन्त्रवर्णाच्चांशत्वावगमः।	७५३
भगवद्गीतायामपि जीवस्यांशत्वश्रवणम्।	७५४
परमात्मनो देहाद्यभिमानाभावान्न जैवदुःखेन दुःखित्वम्।	७५४
व्यासादीनां जैवेन दुःखेन न परमात्मा दुःखायत इति स्मृतिः।	७५५
एकस्मिन्नेव परमात्मनि सर्वभूतेषु जीवभावेन स्थितेऽपि देहोपाधिसंबन्धान्नानुज्ञापरिहारानुपपत्तिः।	७५७
ऐकात्म्याभ्युपगमेऽप्युपाध्यसंतानान्न कर्मफलव्यतिकरः।	७५९
जीवः परमात्मनः प्रतिबिम्ब इत्यतोऽप्यव्यतिकरः कर्मफलयोः।	७६०
प्रतिबिम्बपक्षोपपादनम् [प्र.]	७६०
परपक्ष एवैष व्यतिकरः।	७६१
अदृष्टस्यानियामकत्वम्।	७६२
अभिसंध्यादीनामपि नियमहेतुत्वानुपपत्तिः।	७६२
शरीरावच्छिन्नात्ममनःसंयोगस्याप्यनियामकत्वम्।	७६३
आत्मबहुत्वखण्डनम् [प्र.]	७६४

चतुर्थः पादः

१. प्राणोत्पत्त्यधिकरणम्	
प्राणानामुत्पत्त्याम्नानानाम्नानाभ्यां श्रुतिविप्रतिपत्तेरुत्पत्तिश्रुतेः गौणत्वम्।	७६५
तथाशब्देऽसंबद्धत्वाक्षेपः, तत्परिहारश्च।	७६६
प्राणोत्पत्तिश्रुतेर्गौणत्वासंभवः।	७६८
एकस्यैव जन्मवाचिपदस्य प्राक्प्राणेषु श्रुतस्योत्तरत्राकाशादिषु श्रवणादपि प्राणानां जन्मश्रुतेर्मुख्यत्वम्।	७७०
वाक्प्राणमनसां तेजोबन्नपूर्वकत्वाभिधानादपि प्राणोत्पत्तिश्रुतेर्मुख्यत्वम्।	७७१
२. सप्तगत्यधिकरणम्	
सप्तैव प्राणा इति पूर्वपक्षः।	७७२
एकादश प्राणा इति सिद्धान्तः।	७७४
वर्णकान्तरम्।	७७६
३. प्राणाणुत्वाधिकरणम्	
प्राणानां सूक्ष्मत्वं परिच्छिन्नत्वं च।	७७८
४. प्राणश्रैष्ठ्याधिकरणम्	
मुख्यप्राणस्यापि ब्रह्मविकारत्वम्।	७८०
५. वायुक्रियाधिकरणम्	
मुख्यप्राणो वायुर्वा करणवृत्तिर्वेति पूर्वपक्षः।	७८२
अध्यात्ममापन्नो वायुभेद एव प्राण इति सिद्धान्तः।	७८२
प्राणस्य न जीववत्स्वातन्त्र्यम्।	७८४

	पृ.सं.
देहेन्द्रियविधारणप्रयोजनकत्वात्प्राणस्य न विषयान्तरप्रसङ्गलक्षणो दोषः।	७८६
प्राणस्य कार्यभेदाः पञ्च वृत्तयः।	७८७
६. श्रेष्ठाणुत्वाधिकरणम्	
मुख्यप्राणस्य सौक्ष्म्यपरिच्छेदरूपाणुत्ववत्त्वम्।	७८८
७. ज्योतिराद्यधिकरणम्	
प्राणानां स्वमहिम्नैव स्वकार्ये प्रवृत्तिरिति पूर्वपक्षः।	७८९
ज्योतिराद्यधिष्ठितानामेव प्रवृत्तिरिति सिद्धान्तः।	७९०
शारीरस्यैव भोक्तृत्वं, न प्राणाधिष्ठातृदेवतानाम्।	७९२
शारीरेणैव प्राणानां नित्यसंबन्धश्रवणान्न करणनियन्त्रीणां देवतानां भोक्तृत्वम्।	७९२
८. इन्द्रियाधिकरणम्	
वागादीनामेकादशप्राणानां मुख्यप्राणवृत्तित्वमिति पूर्वपक्षः।	७९३
वागादीनि तत्वान्तराणीति सिद्धान्तः।	७९४
वागादिभ्यो भेदेन प्राणस्य श्रवणादपि तत्वान्तरत्वं वागादीनाम्।	७९५
विरुद्धधर्मवत्त्वाच्च तथा।	७९५
९. संज्ञामूर्तिक्लृप्त्यधिकरणम्	
जीवकर्तृकं नामरूपव्याकरणमिति पूर्वपक्षः।	७९७
त्रिवृत्कुर्वतः परमेश्वरस्यैव नामरूपव्याकर्तृत्वम् इति सिद्धान्तः।	७९८
अध्यात्मं त्रिवृत्करणम्।	८०१
अविशेषात्सर्वेषां त्र्यात्मकत्वेऽपि भूयस्त्वादेव तेजोबन्नविशेषवादस्य भूतभौतिकेषूपपत्तिः।	८०२
इन्द्रियाणां तत्तद्भूतकार्यत्वम् [प्र.]	८०२

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

प्रथमः पादः

१. तदन्तरप्रतिपत्त्यधिकरणम्	
वृत्तसंकीर्तनम्।	८०४
पूर्वदेहाद्देहान्तरं प्रतिपद्यमानो जीवो देहबीजैर्भूतसूक्ष्मैरसंपरिष्वक्तो गच्छतीति पूर्वपक्षः।	८०६
भूतसूक्ष्मैः संपरिष्वक्तो गच्छतीति सिद्धान्तः।	८०७
अपां त्र्यात्मकत्वादप्शब्देन सर्वेषां देहबीजभूतानां भूतसूक्ष्माणां ग्रहणम्।	८०९
प्राणगतिश्रवणादपि तदाश्रयभूतानामपां भूतान्तरोपसृष्टानां गतिः।	८११
वागादीनामग्न्यादिगतिश्रुतेर्भाक्तत्वम्।	८११
प्रथमाग्नौ होम्यद्रव्यत्वेनाप एव श्रद्धाशब्देनाभिप्रेयन्ते।	८१२

पृ.सं.

आहुतिमयीभिरद्भिः संपरिष्वक्ता जीवा रंहन्ति। ८१४
इष्टादिकारिणां श्रूयमाणस्यान्नभावस्य भाक्तत्वम्। ८१६

२. कृतात्ययाधिकरणम्

चन्द्रमण्डलमधिरूढा भुक्तभोगा निरनुशया अवरोहन्तीति पूर्वपक्षः। ८१९
सानुशया एवावरोहन्तीति सिद्धान्तः। ८२०
अनुशयशब्दार्थविचारः। ८२१
पूर्वपक्षबीजापाकरणम्। ८२३
चरणश्रुतिरनुशयं लक्षयति। ८२५
इष्टादिकर्मजातस्य चरणापेक्षत्वान्न चरणानर्थक्यम्। ८२६
सुकृतदुष्कृते एव चरणशब्देन प्रत्याय्येते इति बादरिः। ८२७

३. अनिष्टादिकार्यधिकरणम्

पूर्वपक्षः—इष्टादिकारिणामितरेषां च समाना चन्द्रप्राप्तिः। ८२८
सिद्धान्तः—इष्टादिकारिण एव चन्द्रमसमारोहन्ति नेतरे। ८२९
इतरेषां यमायत्तः कपूयकर्मविपाकः स्मर्यते। ८३०
रौरवप्रमुखान् सप्त नरकाननिष्टादिकारिणः प्राप्नुवन्ति। ८३०
यमप्रयुक्तानामेव चित्रगुप्तादीनां रौरवादिष्वधिष्ठातृत्वम्। ८३०
क्षुद्रजन्तुलक्षणतृतीयमार्गोपदेशादपि नानिष्टादिकारिणश्चन्द्रमसं प्राप्नुवन्ति। ८३१
तृतीयस्थाने देहलाभायाहुतीनां पञ्चसंख्यानियमो नादर्तव्यः। ८३२
द्रोणधृष्टद्युम्नादीनां शरीरारम्भं प्रत्याहुतिसंख्यानादरो भारतादिषु स्मर्यते। ८३३
स्वेदजोद्भिज्जयोरप्याहुतिसंख्यानादरो दृश्यते। ८३३
'आण्डजं जीवजमुद्भिज्जम्' इति छान्दोग्यश्रुतावुद्भिज्जशब्देन स्वेदजोपसंग्रहः। ८३४

४. साभाव्यापत्त्यधिकरणम्

चन्द्रमसोऽवरोहन्त आकाशादिसाम्यं प्रतिपद्यन्ते न तत्स्वरूपत्वम्। ८३५

५. नातिचिराधिकरणम्

अनुशयिनां व्रीह्यादिभावापत्तेः प्रागल्पेनैव कालेनावरोहः। ८३७

६. अन्याधिष्ठिताधिकरणम्

व्रीहियवादयः अनुशयिनां भोगाधिष्ठानं भवन्तीति पूर्वपक्षः। ८३९
सिद्धान्तः—क्षेत्रज्ञान्तराधिष्ठितेष्वेव व्रीहियवादिष्वनुशयिनां संसर्गमात्रप्रतिपत्तिः। ८४०
आध्वरिकस्य कर्मणोऽशुद्धत्वाक्षेपनिरासः। ८४१
व्रीह्यादिभावस्यानन्तरमनुशयिनां रेतःसिग्भावाम्नानादपि व्रीह्यादिसंश्लेषमात्रं तद्भावः। ८४३
योनेः शरीरश्रुतेरपि व्रीह्यादिसंश्लेषमात्रमनुशयिनां तज्जन्म। ८४३

द्वितीयः पादः

१. संध्याधिकरणम्

संध्ये स्थाने सृष्टिः पारमार्थिकीति पूर्वपक्षः। ८४५

पृ.सं.

संध्ये स्थाने प्राज्ञस्यात्मनः कामानां निर्मातृत्वाम्नानाच्च तथा। ८४६
सिद्धान्तः—स्वप्नदर्शनस्य मायामात्रत्वम्। ८४७
स्वप्नस्य भविष्यतोः साध्वसाधुनोः सूचकत्वम्। ८४९
रथादिसृष्टिवचनस्य भाक्तत्वम्। ८५०
संध्ये स्थाने जीवस्य निर्मातृत्वम्। ८५१
जीवस्येश्वरांशत्वेऽप्यविद्यादिव्यवधानेन ज्ञानैश्वर्यतिरोधानान्न सांकल्पिकी रथादिसृष्टिः। ८५२
देहेन्द्रिययोगाज्जीवस्य ज्ञानैश्वर्यतिरोभावः। ८५३

२. तदभावाधिकरणम्

नाडीपुरीतद्ब्रह्मणां परस्परनिरपेक्षतया सुषुप्तिस्थानत्वमिति पूर्वपक्षः। ८५५
नाडीपुरीतद्ब्रह्मणां समुच्चितानां सुषुप्तिस्थानत्वम्। ८५६
तत्रापि नाडीपुरीततोर्द्वारत्वं ब्रह्मण एव स्थानत्वम्। ८५९
ब्रह्मणः सकाशात् जीवस्य प्रबोधश्रुतेः तस्यैव सुषुप्तिस्थानत्वम्। ८६१

३. कर्मानुस्मृतिशब्दविध्यधिकरणम्

सत्संपत्तेः प्रबुध्यमानो यः कश्चित्प्रबुध्यत इति पूर्वपक्षः। यो यत्र सुप्तः स एव जीवस्तत्र प्रबुध्यत इति सिद्धान्तः। ८६२

४. मुग्धाधिकरणम्

मुग्धावस्थाया जागरितस्वप्नसुषुप्तमृत्यन्यतमावस्थायामन्तर्भाव इति पूर्वपक्षः। ८६५
जागरितादिष्वन्तर्भावनिरासः। ८६५
परिशेषान्मुग्धता अर्धसंपत्तिरिति सिद्धान्तः। ८६६

५. उभयलिङ्गाधिकरणम्

ब्रह्मण उभयलिङ्गश्रुत्यनुग्रहादुभयलिङ्गत्वमिति पूर्वपक्षः। निर्विशेषलिङ्गकत्वमिति राद्धान्तः। ८६९
प्रत्युपाधिभेदं ब्रह्मणोऽभेदश्रवणान्न सविशेषत्वम्। ८७०
भेददर्शननिन्दापूर्वकमभेदसमाम्नानादपि न तात्त्विको भेदः। ८७१
सविशेषब्रह्मविषयकवाक्यानामाकारे तात्पर्याभावादनाकारत्वं ब्रह्मणः। ८७२
कल्पितद्वैते सावकाशत्वादाकारवद्विषयश्रुतीनामवैयर्थ्यम्। ८७२
श्रुत्या चैतन्यमात्रस्वरूपत्वप्रतिपादनाद् ब्रह्म निर्विशेषम्। ८७३
श्रुतिस्मृत्योः पररूपप्रतिषेधेन ब्रह्मोपदेशादपि ब्रह्मणो निर्विशेषत्वम्। ८७४
ब्रह्मणो निर्विशेषत्वादेव जलसूर्यकोपमोपादानम्। ८७४
दृष्टान्तवैषम्यशङ्का। ८७५
अवैषम्योपपादनम्। ८७५
श्रुतिः परस्यैव ब्रह्मणो देहादिषूपाधिष्वनुप्रवेशं दर्शयति। तेन प्रतिबिम्बपक्षः श्रुतिसिद्धः। ८७६

पृ.सं.

केचिदत्र ११ सूत्रमारभ्य १४ सूत्रपर्यन्तमेकं १५ सूत्रमारभ्य २१ सूत्रपर्यन्तमपरमित्यधिकरणद्वयं कल्पयन्ति। तन्मतस्योपन्यासपूर्वको निरासः। ८७६
अखण्डवाक्यार्थनिरूपणम् [प्र.] ८७८
प्रपञ्चप्रविलयवादः। ८७८
तत्खण्डनम्। ८७९
प्रपञ्चप्रविलये नियोगाशङ्का। ८८०
तन्निरासः। ८८१
नियोज्याभावाच्च नियोगाभावः। ८८२

६. प्रकृतैतावत्त्वाधिकरणम्

ब्रह्मणो रूपद्वयं ब्रह्म चैतदुभयं प्रतिषिध्यते, ब्रह्मैव वा प्रतिषिध्यत इति पूर्वपक्षः। ८८७
रूपद्वयं प्रतिषेधति, ब्रह्म परिशिनष्टीति सिद्धान्तः। ८८७
अग्राह्यत्वाद् ब्रह्मणोऽसत्त्वमाशङ्क्याव्यक्तत्वादग्राह्यत्वोपपादनम्। ८९१
संराधनकाले योगिभिर्ब्रह्म साक्षात्क्रियते। ८९२
उपाधिनिमित्त एवात्मनो भेदः, स्वतस्त्वैकात्म्यम्। ८९३
जीवस्य ब्रह्मात्मत्वश्रुतिवशादपि नानात्वस्यौपाधिकत्वम्। ८९३
भेदाभेदवादोत्थापनम्। ८९३
प्रकाशाश्रयवद्भेदव्यपदेशो जीवपरयोः। ८९४
सिद्धान्तः—प्रकाशादिवच्चावैशेष्यमित्यस्यैवौचित्यम्। ८९४
परमात्मनोऽन्यस्य चेतनस्य प्रतिषेधाच्च पूर्वोक्त एव सिद्धान्तः। ८९४

७. पराधिकरणम्

सेत्वादिव्यपदेशेभ्योऽस्ति ब्रह्मव्यतिरिक्तं वस्त्विति पूर्वपक्षः। ८९५
सिद्धान्तः—सेतुव्यपदेशो जगतस्तन्मर्यादानां च विधारकत्वेनात्मस्तुत्यर्थः। ८९७
उन्मानव्यपदेशस्योपासनार्थत्वं न ब्रह्मव्यतिरिक्तवस्तुसत्ताप्रतिपादनार्थत्वम्। ८९८
संबन्धभेदव्यपदेशयोरुपाधिभेदापेक्षत्वम्। ८९९
तस्यैवोपपन्नत्वम्। ८९९
श्रुतिभिरपि ब्रह्मणः परं वस्तु प्रतिषिध्यते। ९००
सेत्वादिव्यपदेशनिराकरणेनान्यप्रतिषेधसमाश्रयणेन व्याप्तिवचनशब्दैश्चात्मनः सर्वगतत्वसर्वात्मत्वसिद्धिः। ९०१

८. फलाधिकरणम्

ईश्वरस्यैव कर्मफलदातृत्वम्, न तत् कर्मणः संभवति, नाप्यपूर्वस्य। ९०२
श्रुतेरपीश्वरस्य फलहेतुत्वम्। ९०४
पूर्वपक्षः—जैमिनिराचार्यो धर्मात्फलं मन्यते। ९०४
सिद्धान्तः—बादरायणस्त्वीश्वरमेव फलहेतुं मन्यते। ९०५

पृ.सं.

तृतीयः पादः

१. सर्ववेदान्तप्रत्ययाधिकरणम्

विज्ञेयैक्याद्विज्ञानभेदाभेदचिन्तावताराक्षेपस्तत्परिहारश्च। ९०७
नामरूपधर्मभेदादिभ्यः प्रतिवेदान्तं विद्याभेद इति पूर्वपक्षः। ९०९
चोदनाद्यविशेषात् प्रतिवेदान्तं विज्ञानाभेद इति सिद्धान्तः। ९१३
गुणभेदेऽप्येकविद्यम्। ९१५
शिरोव्रतस्याध्ययनधर्मत्वान्न विद्याभेदकत्वम्। ९१७
श्रुतिरपि वेद्यैकत्वेन विद्यैकत्वं दर्शयति। ९१८

२. उपसंहाराधिकरणम्

अन्यत्रोदितानां विज्ञानगुणानामन्यत्रापि समाने विज्ञान उपसंहारः सर्ववेदान्तप्रत्ययत्वसाधनफलम्। ९१९

३. अन्यथात्वाधिकरणम्

छान्दोग्यबृहदारण्यकोक्तयोरुद्गीथविद्योरेकत्वं बहुतरस्याविशेषस्य प्रतीयमानत्वादिति पूर्वपक्षः। ९२०
प्रकमभेदाद् विद्याभेद इति सिद्धान्तः। ९२२
तत्रानुरूपं पूर्वतन्त्रीयोदाहरणम्। ९२४
संज्ञैकत्वरूपपूर्वपक्षबीजनिराकरणम्। ९२६

४. व्याप्त्यधिकरणम्

'ओमित्येतदक्षरमुद्गीथ'मित्यत्राक्षरोद्गीथशब्दयोः सामानाधिकरण्ये श्रूयमाणेऽध्यासापवादैकत्वविशेषणपक्षाः प्रतिभान्ति; तेषु विशेषणपक्षस्यैव सामञ्जस्यम्। ९२७

५. सर्वाभेदाधिकरणम्

प्राणविद्यायाश्छान्दोग्यकौषीतकिप्रभृतिषु श्रूयमाणाया एकत्वात् क्वचिदुक्तानामपि गुणानामन्यत्रोपसंहारः। ९३१

६. आनन्दाद्यधिकरणम्

ब्रह्मस्वरूपप्रतिपादनपरासु श्रुतिषूक्तानामानन्दरूपत्वादीनां सर्वत्र प्रतिपत्तिः। ९३४
प्रियशिरस्त्वादीनां नोपसंहारः। ९३५
आनन्दादीनां स्वरूपप्रतिपत्तिप्रयोजनतया प्रियशिरस्त्वादिभ्यो वैषम्यम्। ९३७

७. आध्यानाधिकरणम्

'इन्द्रियेभ्यः परा ह्यर्था' इत्यादिवाक्यैः सर्वेषां परत्वेन प्रतिपादनमिति पूर्वपक्षः। पुरुष एव सर्वेभ्यः परः प्रतिपाद्यत इति सिद्धान्तः। ९३७
श्रुतिरेव प्रकृतं पुरुषमात्मेत्याह, आत्मनश्च दुरधिगमत्वं श्रुत्या स्वयमेव दर्शितमिति पुरुषप्रतिपत्त्यर्थैवेन्द्रियादिप्रवाहोक्तिः। ९३९

८. आत्मगृहीत्यधिकरणम्

'आत्मा वा इद'मित्यत्रात्मशब्देन सूत्रात्माऽभिलप्यत इति पूर्वपक्षः। परमात्मैवाभिलप्यत इति सिद्धान्तः। ९४०

पृ. सं.

वाक्यान्वयदर्शनान्न परमात्मग्रहणमिति पूर्वपक्ष्युक्तस्य परिहारः। सूत्रात्मपरिग्रहे लिङ्गस्य पूर्वपक्षिदर्शितस्य विवक्षितार्थानुगुण्येन ग्रहणम्। ९४३
वर्णकान्तरम्—'कतम आत्मे'त्यादिवाजसनेयकश्रुतेः 'सदेव सोम्ये'त्यादिच्छान्दोग्यश्रुतेश्चातुल्यार्थत्वमिति पूर्वपक्षः। प्रतिपादनप्रकारभेदेऽपि प्रतिपाद्यार्थाभेद इति सिद्धान्तः। ९४४

९. कार्याख्यानाधिकरणम्

छान्दोग्यवाजसनेयकयोश्च प्राणसंवादे आचमनमेव विधीयत इति पूर्वपक्षः। वासोविज्ञानं विधीयत इति सिद्धान्तः। ९४६

१०. समानाधिकरणम्

अग्निरहस्यबृहदारण्यकयोः पठिते शाण्डिल्यविद्ये परस्परभिन्ने इति पूर्वपक्षः। विद्यैकत्वमिति सिद्धान्तः। ९५१

११. संबन्धाधिकरणम्

बृहदारण्यके सत्यविद्यायामुपदिश्यमानयोरुपनिषदोरुभयोरविभागेनोभयत्रानुसंधानमिति पूर्वपक्षः। ९५४
व्यवस्थयेति सिद्धान्तः। ९५५
अतिदेशलिङ्गादप्युपनिषदोर्व्यवस्थितिः। ९५६

१२. संभृत्यधिकरणम्

संभृतिद्युव्याप्तिप्रभृतीनां विभूतीनां शाण्डिल्यविद्यादिष्वनुपसंहारः। ९५७

१३. पुरुषविद्याधिकरणम्

शाखान्तराधीतानां पुरुषविद्याधर्माणां तैत्तिरीयकेऽप्राप्तिः। ९५९

१४. वेधाद्यधिकरणम्

'सर्वं प्रविध्य' इत्यादिमन्त्राणां प्रवर्ग्यादिकर्मणां च संनिधिपाठाद्विद्यासूपसंहार इति पूर्वपक्षः। ९६६
वेधाद्यर्थानामुपनिषदुदितविद्याभिरसंबद्धत्वात्तास्वनुपसंहार इति सिद्धान्तः। ९६६
पूर्वतन्त्रीयबलाबलाधिकरणोपन्यासः। ९६७-९७०

१५. हान्यधिकरणम्

यत्र सुकृतदुष्कृतयोर्हानमात्रश्रवणं तत्रोपायनस्यासंनिपात इति पूर्वपक्षः।
हानशब्दशेषत्वादुपायनशब्दस्यास्त्युपायनसंनिपात इति सिद्धान्तः। ९७३
सूत्रोपात्तदृष्टान्तानां विवरणम्। ९७५
स्वोक्तेऽर्थे जैमिनिसंमतिप्रदर्शनम्। ९७६
वर्णकान्तरम्—विधूननश्रुत्या सुकृतदुष्कृतशब्दयोः स्वकार्याच्चालनमात्रमभिधीयत इति पूर्वपक्षः। हानमेवेति सिद्धान्तः। ९७८

१६. सांपरायाधिकरणम्।

पर्यङ्कस्थं ब्रह्माभि प्रस्थितः व्यध्वन्येव सुकृतदुष्कृते विधूनुते इति पूर्वपक्षः। देहादपसर्पण एव जहातीति सिद्धान्तः। ९८०

पृ. सं.

मृतस्य छन्दतो विद्याभ्यासाद्यनुष्ठानानुपपत्तेः सुकृतदुष्कृतक्षयस्यानुपपत्तिः। ९८१

१७. गतेरर्थवत्त्वाधिकरणम्

हानाविशेषेण देवयानः पन्थाः संबध्यत इति पूर्वपक्षः। विभागेनेति सिद्धान्तः। ९८२
सगुणोपासनेषु देवयानपथापेक्षा। ९८३

१८. अनियमाधिकरणम्

गतिर्यासु विद्यासु श्रूयते तत्रैव नियम्यत इति पूर्वपक्षः। अभ्युदयफलानां सगुणानां सर्वासामेव विद्यानामविशेषेण गतिर्भवितुमर्हतीति सिद्धान्तः। ९८५

१९. यावदधिकाराधिकरणम्

अपान्तरतमःप्रभृतीनां जन्मस्मरणान्निर्गुणविद्यायाः पाक्षिकं मोक्षहेतुत्वमहेतुत्वं वेति पूर्वपक्षः। ९८७
ते प्रारब्धविपाकस्य कर्मणः प्रक्षयं यावदवतिष्ठन्ते, तत्प्रक्षयान्मोक्षं प्राप्नुवन्तीत्यैकान्तिकी विदुषः कैवल्यसिद्धिः। ९८८

२०. अक्षरध्यधिकरणम्

अक्षरविशेषणानामस्थूलत्वादीनामेकत्र श्रुतानां सर्वत्राभिसम्बन्धः। ९९२

२१. इयदधिकरणम्

'द्वा सुपर्णा', 'ऋतं पिबन्तौ' इति मन्त्रद्वये विद्यानानात्वमिति पूर्वपक्षः। विद्यैकत्वमिति सिद्धान्तः। ९९५

२२. अन्तरत्वाधिकरणम्

बृहदारण्यके कौषीतकेयकहोळचाक्रायणोषस्तप्रश्नोपक्रमयोर्विद्ययोरभ्याससामर्थ्यान्नानात्वमिति पूर्वपक्षः। वेद्यैकत्वाद्विद्यैकत्वमिति सिद्धान्तः। ९९७
आम्नानभेदानुपपत्तिपरिहारः। ९९८

२३. व्यतिहाराधिकरणम्

'तद्योऽहं सोऽसौ', 'त्वं वा अहमस्मि' इत्यत्र संसारिणीश्वरदृष्टिरेव विधीयत इति पूर्वपक्षः। ९९९
व्यतिहारेणोभयदृष्टिरिति सिद्धान्तः। १०००

२४. सत्याद्यधिकरणम्

'स यो हैतं', 'तद्यत्तत्सत्यम्' इत्येते द्वे सत्यविद्ये फलसंयोगभेदादिति पूर्वपक्षः। फलान्तरश्रवणस्य 'तस्योपनिषदहरह'मित्यङ्गान्तरोपदेशस्तावकतया विद्यैकत्वमिति सिद्धान्तः। १००१
अस्य सूत्रस्य अक्ष्यादित्यपुरुषविद्याविषयतया एकदेशिव्याख्याया उपन्यासनिराकरणे। १००३

२५. कामाद्यधिकरणम्

दहरविद्याया हार्दविद्यायाश्चैकत्वं परस्परगुणयोगश्च। १००४

२६. आदराधिकरणम्

भोजनलोपेऽप्यद्भिर्वाऽन्येन वा द्रव्येणाविरुद्धेन प्राणाग्निहोत्रस्यानुष्ठानमिति पूर्वपक्षः। १००६

	पृ.सं.
भोजनलोपे लोप एव प्राणाग्निहोत्रस्येति सिद्धान्तः।	१००८
२७. तन्निर्धारणाधिकरणम्	
कर्माङ्गव्यपाश्रयाणामुद्गीथाद्युपासनानां नित्यत्वमिति पूर्वपक्षः।	१०११
अनियमदृष्टेर्न तेषां नित्यवत्कर्मसु नियम इति सिद्धान्तः।	१०१२
पृथक्फलश्रुतेरपि तेषामनियतत्वम्।	१०१४
२८. प्रदानाधिकरणम्	
वायुप्राणयोस्तत्त्वाभेदात्तद्विषयकोपासनयोरेकत्वमिति पूर्वपक्षः।	१०१६
आध्येयांशपृथक्त्वादाध्यानपृथक्त्वमिति सिद्धान्तः।	१०१८
तत्र दृष्टान्तत्वेन संकर्षगताधिकरणोपन्यासः।	१०१९
२९. लिङ्गभूयस्त्वाधिकरणम्	
मनश्चिदादीनां सांपादिकाग्नीनां स्वातन्त्र्यमिति सिद्धान्त-प्रदर्शनम्।	१०२१
पूर्वपक्षः—मनश्चिदादीनां प्रकरणात्क्रियाशेषत्वम्।	१०२३
तत्र मानसग्रहदृष्टान्तः।	१०२३
इष्टकाचितेनातिदेशादप्येतेषां क्रियानुप्रवेशित्वम्।	१०२५
सिद्धान्तः—विद्यात्मका एवैते।	१०२५
लिङ्गदर्शनाच्च स्वातन्त्र्यम्।	१०२५
श्रुतिलिङ्गादीनां प्रकरणाद् बलीयस्त्वाच्च तथा।	१०२५
क्रियाङ्गानां मनआदिष्वनुबन्धादपि मनश्चिदादीनां स्वातन्त्र्यम्।	१०२७
क्रियाप्रकरणादुत्कर्षे पूर्वतन्त्रदृष्टान्तः।	१०२९
मानसवदिति दृष्टान्तस्य विघटनम्।	१०३०
पूर्वोक्तब्राह्मणयोः स्वतन्त्रविद्याविधानान्मध्यस्थस्यापि ब्राह्मणस्य स्वतन्त्रविद्याविधिपरत्वम्।	१०३१
३०. ऐकात्म्याधिकरणम्	
देहादात्मनोऽव्यतिरेक इति लोकायतिकस्य पूर्वपक्षः।	१०३२
व्यतिरेक एवात्मन इति सिद्धान्तः।	१०३४
चैतन्यस्य भूतभौतिकधर्मत्वानुपपत्तिः।	१०३५
अनुमानादीनां प्रत्यक्षान्तर्भावखण्डनम् [प्र.]	१०३७
३१. अङ्गावबद्धाधिकरणम्	
उद्गीथादिकर्माङ्गावबद्धाः प्रत्ययाः शाखाभेदेषु विहितास्तत्तच्छाखागतेष्वेवोद्गीथादिषु भवेयुरिति पूर्वपक्षः। सर्वशाखागतेषूद्गीथादिष्वेवंजातीयकाः प्रत्ययाः स्युरिति सिद्धान्तः।	१०३८
मन्त्रादिवदुपसंग्रहोऽन्यशाखाविहितप्रत्ययानाम्।	१०४०
३२. भूमज्यायस्त्वाधिकरणम्	
वैश्वानरविद्यायां व्यस्तोपासनमपीति पूर्वपक्षः।	१०४१
समस्तोपासनमेवेति सिद्धान्तः।	१०४२
उभयथोपासनमित्येकदेशिपक्षदूषणम्।	१०४३
३३. शब्दादिभेदाधिकरणम्	
सर्वासामीश्वरगोचराणां विद्यानामभेद इति पूर्वपक्षः।	१०४४
वेद्याभेदेऽपि शब्दादिभेदाद्विद्याभेद इति सिद्धान्तः।	१०४५
३४. विकल्पाधिकरणम्	
अहंग्रहोपास्तीनां समुच्चयनियमे विकल्पनियमे च कारणा-भावाद्यथाकाममनुष्ठानमिति पूर्वपक्षः।	१०४८
अविशिष्टफलत्वाद्विकल्पनियम इति सिद्धान्तः।	१०४९
३५. काम्याधिकरणम्	
काम्यास्तु विद्या यथाकामं समुच्चीयेरन्न वा समुच्चीयेरन्।	१०५०
३६. यथाश्रयभावाधिकरणम्	
कर्माङ्गव्यपाश्रयप्रत्ययानां समुच्चित्यानुष्ठानमिति पूर्वपक्षः।	१०५१
उपदेशसाम्यादपि तथा।	१०५१
क्षतसंधानलिङ्गादपि समुच्चयः।	१०५२
ओंकारस्योपास्यस्य वेदत्रयसाधारण्यादुपासनानां समुच्चयः।	१०५२
सिद्धान्तः—उपासनानां सहभावाश्रुतेर्न समुच्चयः।	१०५३
श्रुतिः प्रत्ययानामसहभावं दर्शयति।	१०५४
चतुर्थः पादः	
१. पुरुषार्थाधिकरणम्	
वेदान्तविहितात्मज्ञानस्य क्रियानुप्रवेशमन्तरेणैव पुरुषार्थहेतुत्वम्।	१०५६
पूर्वपक्षः—आत्मविज्ञानस्य कर्मशेषत्वादात्मज्ञाने या फल-श्रुतिस्तस्या अर्थवादत्वम्।	१०५७
ब्रह्मविदां कर्माचरणदर्शनं विद्यायाः कर्मशेषत्वे लिङ्गम्।	१०५९
श्रुतिर्विद्यायाः कर्मशेषत्वं दर्शयति।	१०५९
विद्याकर्मणोः फलारम्भे सहकारित्वदर्शनम्।	१०६०
समस्तवेदार्थविज्ञानवतः कर्मविधानादुपनिषदर्थविज्ञानस्य कर्माङ्गत्वम्।	१०६०
यावज्जीवं कर्मनियमोऽपि विज्ञानस्य कर्माङ्गत्वे लिङ्गम्।	१०६०
सिद्धान्तः— शारीरादीश्वरस्याधिकस्योपदेशाद् बादरायणमतमौप-निषदात्मविज्ञानस्य स्वातन्त्र्येण पुरुषार्थहेतुत्वमेव सम्यक्।	१०६१
तुल्यमाचारदर्शनमकर्मशेषत्वेऽपि विद्यायाः।	१०६२
विद्यायाः कर्मशेषत्वे प्रमाणतयोपन्यस्तश्रुतिरुद्गीथविद्याविषया।	१०६३
समन्वारम्भवचनस्य विभागेन व्यवस्था।	१०६३
भाष्यकारमतेन तद्व्याख्यानं च।	१०६३
समस्तवेदार्थविज्ञानवतः कर्मविधानादित्यस्य खण्डनम्।	१०६४
यावज्जीवं कर्मनियमस्य विद्वदविषयत्वम्।	१०६४
उक्तकर्मनियमस्य विद्यास्तुत्यर्थत्वम्।	१०६४
स्वेच्छातः कर्मसाधनप्रजादित्यागलिङ्गाद्विद्या स्वतन्त्रफला।	१०६५
कर्माधिकारोच्छेदकत्वादपि न विद्या कर्माङ्गम्।	१०६५
उर्ध्वरेतःसु चाश्रमेषु विद्याश्रवणान्न विद्या कर्माङ्गम्।	१०६६
२. परामर्शाधिकरणम्	
उर्ध्वरेतसामाश्रमाणां सत्त्वे प्रमाणाभावः इति पूर्वपक्षः।	१०६७

पृ.सं.

आश्रमचतुष्टयचातुर्विध्यनिरूपणम् [प्र.] १०६८
सिद्धान्तः—गार्हस्थ्यवदाश्रमान्तरमपि प्रतिपत्तव्यम्। १०७०
स्कन्धश्रुतेरुपरिधारणवद्विधित्वम्। १०७१
परामर्शपक्षेऽपि संस्तवसामर्थ्यात्पारिव्राज्यं विधेयम्। १०७२
ब्रह्मसंस्थशब्दस्य यौगिकत्वेऽपि परिव्राजकमात्रपरत्वम्। १०७४
भास्करकृतदूषणनिरासः [प्र.] १०७४
भिक्षोः संध्यावन्दनाकरणनिमित्तप्रत्यवायविचारः [प्र.] १०७५
परमहंससंन्यासस्य प्रामाणिकत्वस्थापनम् [प्र.] १०७७

३. स्तुतिमात्राधिकरणम्

'स एष रसानां रसतम' इत्यादिश्रुतीनां स्तुत्यर्थत्वमिति पूर्वपक्षः। कल्प्यं विध्यर्थत्वमिति सिद्धान्तः। १०७९
विधिश्रुतेर्विध्यर्थत्वमुद्गीथादिश्रुतीनाम्। १०८१

४. पारिप्लवाधिकरणम्

औपनिषदाख्यानानां पारिप्लवार्थत्वमिति पूर्वपक्षः। १०८२
पारिप्लवे कथानां विशिष्योक्तत्वान्नासां पारिप्लवार्थत्वम्। १०८३
आख्यानश्रुतीनां तत्संनिहितविद्याशेषत्वम्। १०८३

५. अग्नीन्धनाद्यधिकरणम्

विद्यायाः फले आश्रमकर्मणामनपेक्षा। १०८५

६. सर्वापेक्षाधिकरणम्

आश्रमकर्मणां विद्याया उत्पत्तावपेक्षा, स्वार्थसिद्धावनपेक्षा। १०८६
यज्ञादीनि शमदमादीनि च यथाश्रमं सर्वाण्याश्रमकर्माणि विद्योत्पत्तावपेक्षितव्यानि। १०८८

७. सर्वान्नानुमत्यधिकरणम्

प्राणसंवादे 'न ह वा एवंविदि' इत्यनेन सर्वान्नाभ्यनुज्ञानं विद्याङ्गतया विधीयत इति पूर्वपक्षः। १०९०
प्राणान्नविज्ञानप्रशंसार्थोऽर्थवादोऽयमिति सिद्धान्तः। १०९१
एवं सति भक्ष्याभक्ष्यशास्त्रमबाधितं भविष्यति। १०९३
आपदवस्थायामभक्ष्यभक्षणानुज्ञाने स्मृतिः। आपद्यपि मद्यपान-निषेधः। १०९३
उदाहृतस्मृतिमूलभूतकाठकश्रुतिप्रदर्शनम्। १०९३

८. आश्रमकर्माधिकरणम्

आश्रममात्रनिष्ठेनामुमुक्षुणाऽप्याश्रमकर्माण्यनुष्ठेयानि। १०९४
आश्रमकर्मणां विद्यासहकारित्वेऽपि न नित्यानित्यसंयोगविरोधः विनियोजकवाक्यद्वयसत्त्वात्। १०९५
आश्रमकर्मत्वपक्षे विद्यासहकारित्वपक्षे चाभिन्ना एवाग्निहोत्रादयः। १०९६
ब्रह्मचर्यादीनामाश्रमकर्मणां क्लेशतनूकरणेन विद्योत्पत्तिहेतुत्वम्। १०९७

९. विधुराधिकरणम्

अन्यतमाश्रमप्रतिपत्तिहीनानामपि विद्यायामधिकारः। १०९८
संवर्तप्रभृतीनामनपेक्षिताश्रमकर्मणामपि महायोगित्वस्मरणम्। १०९९
विधुरादीनां जपोपवासादिभिर्विद्याया अनुग्रहः। १०९९

पृ.सं.

अनाश्रमित्वापेक्षयाऽऽश्रमवर्तित्वं ज्यायो विद्यासाधनम्। ११००

१०. तद्भूताधिकरणम्

ऊर्ध्वरेतसां प्रत्यवरोहाभावः। ११०१

११. आधिकारिकाधिकरणम्

नैष्ठिकब्रह्मचारिणां प्रमादात्प्रच्युतब्रह्मचर्याणां प्रायश्चित्ताभावः इति पूर्वपक्षः। ११०२
सिद्धान्तः—गुरुदारादिभ्योऽन्यत्र ब्रह्मचर्यविशरणमुपपातकम्, तस्मान्नैष्ठिकस्यापि ब्रह्मचारिणोऽस्ति प्रायश्चित्तम्। ११०३

१२. बहिरधिकरणम्

कृतनिर्णेजना अपि नैष्ठिकाः शिष्टैर्बहिष्कर्तव्याः। ११०६

१३. स्वाम्यधिकरणम्

क्रत्वङ्गव्यपाश्रयेषूपासनेषु यजमानस्य कर्तृत्वमित्यात्रेयमतं पूर्वपक्षः। ११०७
ऋत्विक्कर्माण्युपासनानीति औडुलोमिमतं सिद्धान्तः। ११०८
श्रुतिरपि ऋत्विक्कर्तृकस्य विज्ञानस्य यजमानगामि फलं दर्शयति।

१४. सहकार्यन्तरविध्यधिकरणम्

'तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य' इति बृहदारण्यकश्रुत्यां न मौनविधिरिति पूर्वपक्षः। ११०९
अपूर्वत्वादस्ति मौनविधिरिति सिद्धान्तः। १११०
बहुलायाससाध्यधर्मबाहुल्याद् गृहिणोपसंहारश्छान्दोग्ये। १११३
मौनगार्हस्थ्यवद् वानप्रस्थगुरुकुलवासयोरप्याश्रमयोः श्रुतिमत्त्वम्। १११३

१५. अनाविष्काराधिकरणम्

संन्यासिनो विधीयमानं बाल्यं भावशुद्धिरूपमिहाश्रीयते। १११४

१६. ऐहिकाधिकरणम्

ऐहिकमामुष्मिकं वा विद्याजन्म प्रतिबन्धक्षयापेक्षया। १११६

१७. मुक्तिफलाधिकरणम्।

मुक्तावुत्कर्षनिकर्षात्मकोऽतिशयो नोपपद्यते। १११९

इति तृतीयोऽध्यायः

चतुर्थोऽध्यायः

प्रथमः पादः

१. आवृत्त्यधिकरणम्

श्रवणादीनां यावदात्मदर्शनमावर्तनम्। ११२२
निर्विशेषे ब्रह्मणि प्रमोत्पत्तावावृत्त्यानर्थक्यशङ्का। ११२५
प्रतिबन्धनिरासेनावृत्तेरर्थवत्त्वम्। ११२७
अधिकारिविशेषं प्रत्यावृत्त्यानर्थक्यमिष्टमेव। ११२८

२. आत्मत्वोपासनाधिकरणम्

ध्यात्रा ब्रह्म स्वान्यत्वेन ग्रहीतव्यमिति पूर्वपक्षः। ११३१
आत्मत्वेनैवेति सिद्धान्तः। ११३२

पृ.सं.

पूर्वपक्षबीजानामपाकरणम्। ११३२

३. प्रतीकाधिकरणम्

प्रतीकेष्वात्मदृष्टिर्न क्रियते। ११३४

४. ब्रह्मदृष्ट्यधिकरणम्

प्रतीकेष्वेव ब्रह्मदृष्ट्यध्यारोपणम्। ११३६

५. आदित्यादिमत्यधिकरणम्

उद्‌गीथादिष्वेवादित्यादिमतयः। ११३९

६. आसीनाधिकरणम्

उपासनायामासीनतानियमः। ११४५

आसीने एव ध्यायत्यर्थसंभवः। ११४६

पृथिव्यादिष्वप्यचलत्वमपेक्ष्यैव ध्यायतिवाद उपासनस्यासीन-कर्मत्वे लिङ्गम्। ११४६

उपासनाङ्गत्वेन शिष्टा आसनं स्मरन्ति। ११४६

७. एकाग्रताधिकरणम्

अङ्गानाश्रितोपासनेषु नास्ति दिग्देशकालनियमः। ११४७

यत्रैकाग्रता चित्तस्य तत्रैवोपासना। ११४७

८. आप्रायणाधिकरणम्

अभ्युदयफलानामुपासनानामाप्रायणादभ्यासः। ११४८

९. तदधिगमाधिकरणम्

ब्रह्माधिगमे उत्तरपूर्वयोर्दुरितयोः अश्लेषक्षयौ। ११५१

अनुपभुक्तफलकर्मणः क्षये शास्त्रविरोधशङ्कानिरासः। ११५३

१०. इतरासंश्लेषाधिकरणम्

विदुषोऽविशेषेण पुण्यस्याप्यश्लेषविनाशौ। ११५५

११. अनारब्धकार्याधिकरणम्

अनारब्धकार्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात्क्षयः। ११५७

१२. अग्निहोत्राद्यधिकरणम्

अग्निहोत्रादीनां विद्योपयोगिनामविनाशः। ११५९

अग्निहोत्रादिनित्यव्यतिरिक्तस्य फलाभिसंधानेन क्रियमाणस्य 'सुहृदः साधुकृत्या'मित्यादिविनियोगः। ११६१

१३. विद्याज्ञानसाधनत्वाधिकरणम्

विद्यासंयुक्तं विद्याविहीनं चोभयविधमपि कर्म ब्रह्माधिगमहेतुः। ११६१

१४. इतरक्षपणाधिकरणम्

आरब्धकर्मक्षये विदुषः कैवल्यमवश्यंभावि। ११६३

द्वितीयः पादः

१. वागधिकरणम्

'वाङ्मनसि संपद्यते' इत्यादौ वागादीनां वृत्त्युपशममात्रं विवक्षितम्। ११६५

वाच्युक्तन्यायस्य चक्षुरादावतिदेशः। ११६७

२. मनोधिकरणम्

मनसः प्राणे वृत्त्यप्ययः। ११६८

पृ.सं.

३. अध्यक्षाधिकरणम्

प्राणस्य विज्ञानात्मनि वृत्तिप्रलयः। ११७०

'प्राणस्तेजसी'ति प्राणसंपृक्तस्य जीवस्य तेजःसहचरितेषु भूतेष्ववस्थानम्। ११७१

शरीरान्तरप्रेप्सावेलायां जीवो नैकस्मिन्नेव तेजस्यवतिष्ठते, तत्कार्यस्य शरीरस्यानेकात्मकत्वात्। ११७२

४. आसृत्युपक्रमाधिकरणम्

विद्वदविदुषोः समानोत्क्रान्तिरर्चिरादिमार्गपर्यन्तम्। ११७३

५. संसारव्यपदेशाधिकरणम्

तेजःप्रभृतीनां परमात्मनि बीजभावावशेषा संपत्तिः। ११७५

अस्माच्छरीरात्प्रवसतो जीवस्याश्रयभूतं भूतान्तरसहितं तेजः स्वरूपतः प्रमाणतश्च सूक्ष्मं भवितुमर्हति। ११७६

सूक्ष्मत्वादेवास्य शरीरस्य स्थूलशरीरदाहेऽप्यनुपमर्दः। ११७६

स्थूलशरीरे विज्ञायमानस्योष्मणः सूक्ष्मशरीरव्यपाश्रयत्वम्। ११७६

६. प्रतिषेधाधिकरणम्

आत्यन्तिकेऽमृतत्वे यो गत्युत्क्रान्तिप्रतिषेध उक्तः स शारीरा-पादान इत्यस्ति ब्रह्मविदोऽपि देहादुत्क्रान्तिरिति पूर्वपक्षः। ११७७

एकेषां समाम्नातृणामुत्क्रान्तेर्देहापादानायाः प्रतिषेधस्य स्पष्टोप-लम्भादन्यत्राप्युक्तप्रतिषेधो देहापादानविषयः। ११७९

महाभारतादिष्वपि परब्रह्मविदो गत्युत्क्रान्त्यभावः स्मर्यते। ११८१

७. वागादिलयाधिकरणम्

ब्रह्मविद इन्द्रियादीनि परस्मिन् ब्रह्मणि प्रलीयन्ते। ११८२

८. अविभागाधिकरणम्

विदुषः कलाप्रलयो निरवशेषो भवति। ११८३

९. तदोकोधिकरणम्

मूर्धस्थानादेव विद्वान्निष्क्रामति, स्थानान्तरेभ्य इतरे। ११८४

१०. रश्म्यधिकरणम्

उपासकस्याविशेषेण रात्रावहनि च मृतस्य रश्म्यनुसारित्वम्। ११८६

रात्रौ प्रेतस्य नाडीरश्मिसंबन्धविश्लेषात्र रश्म्यनुसारित्व-मित्याशङ्कानिरासः। ११८६

११. दक्षिणायनाधिकरणम्

दक्षिणायने मृतोऽपि विद्वान् प्राप्नोत्येव विद्याफलम्। ११८८

स्मृतौ श्रूयमाणस्य कालभेदविनियोगस्य स्मार्तोपासना-संबद्धत्वम्। ११८९

तृतीयः पादः

१. अर्चिराद्यधिकरणम्

अर्चिरादयः परस्परं भिन्नाः सृतय इति पूर्वपक्षः। ११९०

एकैवेयं सृतिरनेकविशेषणेति सिद्धान्तः। ११९१

२. वाय्वधिकरणम्

अर्चिरादिपर्वसु संवत्सरादूर्ध्वं देवलोकस्य ततो वायोश्च निवेशः। ११९४

	पृ.सं.
३. तडिदधिकरणम्	
तडित उपरिष्टाद्वरुणलोकः।	११९६
४. आतिवाहिकाधिकरणम्	
अर्चिरादयो मार्गचिह्नानि भोगभूमयो वेति पूर्वपक्षः।	११९८
गन्तॄणां नेतारो देवतात्मान इति सिद्धान्तः।	११९८
अर्चिरादीनामचेतनत्वेऽनेतृत्वे चोभयोरपि अज्ञत्वादूर्ध्वगत्यनुपपत्तिः।	११९९
विद्युदभिसंभवादूर्ध्वं वैद्युतेनैव पुरुषेणातिवाह्यमाना ब्रह्मलोकं गच्छन्ति।	१२०१
५. कार्याधिकरणम्	
अर्चिरादिमार्गेण सुगणमपरं ब्रह्म गमयत्यमानवः पुरुष इति बादरिः।	१२०३
वहुवचनलोकशब्दाधिकरणाधिकर्तव्यनिर्देशैरप्यपरमेव ब्रह्म गमयतीति निर्णीयते।	१२०३
परब्रह्मसामीप्यादपरस्मिन्नपि ब्रह्मणि ब्रह्मशब्दप्रयोगः।	१२०४
कार्यब्रह्मलोकप्रलयप्रत्युपस्थाने तत्रैवोत्पन्नसम्यग्दर्शना हिरण्यगर्भेण सह परं ब्रह्म प्रतिपद्यन्ते ब्रह्मलोकगताः।	१२०५
स्मृतिः पूर्वोक्तमर्थमनुजानाति।	१२०५
पूर्वपक्षः—परमेव ब्रह्म गमयतीति जैमिनिराचार्यो मन्यते।	१२०५
श्रुतिरपि गतिपूर्वकममृतत्वं दर्शयति।	१२०६
प्रजापतिवेश्मप्रतिपत्तेः प्रकरणात्परविषयत्वम्।	१२०६
तत्र मतद्वये पूर्वपक्षसिद्धान्तव्यवस्था।	१२०७
पूर्वाणि पूर्वपक्षसूत्राण्युत्तराणि सिद्धान्तसूत्राणीति नियमखण्डनम्।	१२०८
ऐकभविकमतखण्डनम्।	१२१३
सोपाधिकनिरुपाधिकत्वाभ्यां ब्रह्मणो भेदः।	१२१७
६. अप्रतीकालम्बनाधिकरणम्	
प्रतीकालम्बनान् वर्जयित्वा सर्वाननन्यान् विकारालम्बनान् ब्रह्मलोकं नयति।	१२१८
प्रतीकतारतम्येन फलतारतम्यश्रुतेर्न प्रतीकध्यायिनां ब्रह्मप्राप्तिः।	१२२०
चतुर्थः पादः	
१. संपद्याविर्भावाधिकरणम्	
मोक्षे स्वरूपं केनचिदागन्तुकविशेषेणाभिनिष्पद्यत इति पूर्वपक्षः। केवलेनात्मनाऽऽविर्भवतीति सिद्धान्तः।	१२२१
बन्धविगमपूर्वकं शुद्धेनात्मनाऽवस्थानलक्षणः पूर्वावस्थातो मोक्षावस्थायां विशेषः।	१२२२
'परं ज्योतिरुपसंपद्य'त्यत्र ज्योतिःशब्देनात्माऽऽवेद्यते।	१२२३

	पृ.सं.
२. अविभागेन दृष्टत्वाधिकरणम्	
मुक्तस्य ब्रह्माभिन्नत्वम्	१२२४
३. ब्राह्माधिकरणम्	
जैमिनिः सत्यसंकल्पत्वादिधर्माणां सत्यत्वं मन्यते।	१२२५
औडुलोमिस्तेषां धर्माणां शब्दविकल्पजत्वं मन्यते।	१२२६
व्यावहारिकप्रमाणोपनीततया लोकसिद्धास्ते धर्मा नात्यन्तासन्त इति बादरायणः।	१२२७
मतान्तराणां निरासेन स्वाभिमतमोक्षनिरूपणम् [प्र.]	१२२७
४. संकल्पाधिकरणम्	
अपरविद्याफलं यत्संकल्पात्पित्रादिसमुत्थानं तत्रास्ति निमित्तान्तरापेक्षेति पूर्वपक्षः। संकल्पमात्रात् पित्रादिसमुत्थानमिति सिद्धान्तः।	१२२९
अवन्ध्यसंकल्पत्वादेव विद्वाननन्याधिपतिः।	१२३०
५. अभावाधिकरणम्	
प्राप्तैश्वर्यस्य विदुषः शरीराद्यभावं बादरिर्मन्यते।	१२३१
जैमिनिर्मनोवच्छरीरादिसद्भावं मन्यते।	१२३१
बादरायण उभयविधत्वं मन्यते।	१२३२
शरीराद्यभावे संध्यस्थानवदुपलब्धिमात्राः पित्रादिकामा उपपद्यन्ते।	१२३३
शरीरादिसद्भावे जाग्रद्वदुपपत्तिस्तेषाम्।	१२३३
६. प्रदीपाधिकरणम्	
संकल्पनिर्मितशरीराणि निरात्मकानीति पूर्वपक्षः।	१२३४
विदुषः प्रदीपवदनेकभावापत्त्या सात्मकानीति सिद्धान्तः।	१२३४
संज्ञाऽभाववचनस्य सुषुप्तिकैवल्यान्यतरावस्थापेक्षत्वम्।	१२३५
७. जगद्व्यापाराधिकरणम्	
सगुणब्रह्मोपासनादीश्वरसायुज्यं गतानां निरवग्रहमैश्वर्यं भवतीति पूर्वपक्षः। जगद्व्यापारवर्जमन्यदैश्वर्यं भवतीति सिद्धान्तः।	१२३७
'आप्नोति स्वाराज्य'मित्यादिप्रत्यक्षोपदेशाद्विदुषां निरवग्रहमैश्वर्यं भवतीत्यस्य निरासः।	१२३८
यथा द्विरूपे परमेश्वरे निर्गुणं रूपं नाप्नुवन्त्येवमेव निरवग्रहमैश्वर्यमपि नाप्नुवन्ति सगुणोपासकाः।	१२३९
परमेश्वरस्य विकारावर्तित्वं श्रुतिस्मृती दर्शयतः।	१२४०
निर्गुणोपासकानामीश्वरेण भोगमात्रसाम्यश्रवणात्र निरवग्रहमैश्वर्यम्।	१२४०
देवयानेन पथा ब्रह्मलोकगतानां न पुनरावृत्तिः।	१२४१

इति चतुर्थोऽध्यायः

शारीरकन्यायसंग्रहविषयानुक्रमणिका

विषयः		पृष्ठसंख्या
प्रथमाध्याये प्रथमः पादः		
१. जिज्ञासाधिकरणम्	श्रवणविधावनुबन्धत्रयनिर्णयः	३६
२. जन्माद्यधिकरणम्	तटस्थस्वरूपलक्षणाभ्यां जिज्ञास्यब्रह्मनिर्णयः	५७
३. शास्त्रयोनित्वाधिकरणम्	ब्रह्मणः सर्वज्ञत्वसमर्थनम्	७२
४. समन्वयाधिकरणम्	तात्पर्यलिङ्गैः वेदान्तानां ब्रह्मप्रमितिशेषत्वम्	७७
	पदानां कार्यान्वितस्वार्थे शक्तिनिराकरणम्,	७७
	पदानामन्वितस्वार्थे शक्तिः	७७
५. ईक्षत्यधिकरणम्	ब्रह्मणि समन्वयो, न प्रधानादौ	१२५
	अत्र न्यायाः— १. गौणमुख्ययोर्मुख्यार्थप्रत्ययो न्याय्यः	
	२. प्रकृतिप्रत्ययार्थयोर्विरोधे प्रकृत्यर्थो निरपेक्षश्चेत् प्रबलः	
	यद्वा— ३. जानातीत्यादौ आश्रयत्वमेवाख्यातार्थः	
६. आनन्दमयाधिकरणम्	आनन्दमयवाक्यं पुच्छब्रह्मपरम्	१४७
	'एकवाक्ये प्रथमचरमश्रुतशब्दयोर्विरोधे प्रथमानुसारेण चरमं नेतव्यम्'	
	'एकस्याः श्रुतेः श्रुतिलिङ्गप्रकरणानि बलवन्ति'	
	श्रुतिलिङ्गादिस्वरूपबलाबलनिरूपणम्	१४८
७. अन्तस्तद्धर्माधिकरणम्	'प्रथमश्रुतादपि लिङ्गात् चरमश्रुतमपि फलवल्लिङ्गं बलीयः'	१६८
८. आकाशाधिकरणम्	'प्रथमश्रुताया अपि श्रुतेः चरमश्रुतमपि तात्पर्यवल्लिङ्गं बलीयः'	१७३
९. प्राणाधिकरणम्	न्यायः स एव।	१७८
१०. ज्योतिश्चरणाधिकरणम्	'प्रमाणान्तरसापेक्षश्रुत्यपेक्षया श्रुतिप्रमाणसिद्धैकवाक्यतासाकाङ्क्षं लिङ्गं बलवत्'	१८२
	'एकस्मिन् निश्चितेऽर्थे बुद्धिस्थे शब्दान्तराभिधानमपि तत्परमेव'	
(छन्दोऽभिधानाधिकरणम्)	'श्रुत्यादिषु प्रथमैकप्रमाणात् उत्तरानेकप्रमाणं बलवत्'	१८२
११. प्रतर्दनाधिकरणम्	'एकस्मिन् वाक्ये ब्रह्माब्रह्मलिङ्गेषु संनिहितेषु अब्रह्मलिङ्गानि ब्रह्मपरतया नेतव्यानि'	१९६
	उत्तरमीमांसायां श्रुत्यादिनेतरबाधे विशेषः	
द्वितीयः पादः		
१. सर्वत्र प्रसिद्ध्यधिकरणम्	'निष्फलाल्लिङ्गात् फलवत् प्रकरणं बलवत्'	२०८
	'निष्फलाद् रात्रिसत्रन्यायात् सफलो विश्वजिन्न्यायो बलवान्'	

२. अत्त्रधिकरणम्	'प्रसिद्धार्थगुणलेशेनार्थान्तरे प्रयुज्यमानः शब्दः संनिहितपदार्थानुसारेण गुणमादत्ते'	२२१
३. गुहाधिकरणम्	'संख्याश्रवणे एकस्य निश्चिततत्वे लघुधर्मेण तत्सजातीयो द्वितीयो ग्राह्यः'	२२३
४. अन्तराधिकरणम्	'उपक्रमस्थादप्येकस्माल्लिङ्गात् वाक्यशेषगतानि बहूनि लिङ्गानि बलवन्ति'	२३२
	'इतिशब्दशिरस्कत्वेऽपि क्वचिदर्थविवक्षा'	
	'पूर्वस्योत्तरेणैकवाक्यतायां सत्यां तदनुकूलं प्रकरणं तद्भेदापादकात् लिङ्गात् प्रबलम्'	
५. अन्तर्याम्यधिकरणम्	'श्रूयमाणेन धर्मेण धर्मिग्रहणे नित्यसिद्धतद्धर्मवतो लाभे साधनसाध्यतद्धर्मवतो न ग्रहणम्'	२४१
६. अदृश्यत्वाद्यधिकरणम्	'द्वयोः साधारणप्रमाणस्यान्यतरस्मिन् नियामकाङ्क्षायाम् अविवक्षितां श्रुतिं विहाय विवक्षितं लिङ्गं नियामकत्वेन ग्राह्यम्'।	२४८
	'शब्दप्रत्यभिज्ञायां द्वयोस्तुल्यायां लिङ्गेन निर्णयः'	
७. वैश्वानराधिकरणम्	'उपक्रमगताया अपि अनेकार्थसाधारणश्रुतेः वाक्यशेषगतेनासाधारणलिङ्गेन नियमनम्'	२५८
तृतीयः पादः		
१. द्युभ्वाद्यधिकरणम्	'उपक्रमगतस्यापि अनेकार्थसाधारणलिङ्गस्य वाक्यशेषगतलिङ्गापेक्षया विशेषश्रुत्या नियमनं युक्तम्'	२७२
	'प्रसिद्धार्थादर्थान्तरे प्रयुज्यमानेन शब्देन प्रसिद्धार्थगुणलेशेऽवलम्बनीये शब्दैकदेशमुख्यार्थलाभे स एवावलम्बनीयः'	
२. भूमाधिकरणम्	'प्रकरणलिङ्गाभ्यां संभूय प्रतिपादकाभ्यां वाक्यश्रुती संभूय प्रतिपादिके बलीयस्यौ'	२८२
	'संनिहितप्रकरणादपि निराकाङ्क्षात् व्यवहितस्यापि प्रकरणं साकाङ्क्षं बलीयः'	
३. अक्षराधिकरणम्	'केवलायाः रूढेः विवक्षितलिङ्गानुगृहीता योगवृत्तिः बलीयसी'	२९०
४. ईक्षतिकर्माधिकरणम्	'प्रकरणानुगृहीताल्लिङ्गात् एकवाक्यतासाकाङ्क्षप्रकरणानुगृहीता श्रुतिप्रत्यभिज्ञा बलीयसी'	२९३
५. दहराधिकरणम्	'उपक्रमगताया अपि श्रुतेः लिङ्गानुगृहीतोपसंहारगतश्रुतिर्बलीयसी'	
	'प्रकृतिप्रत्ययार्थयोर्विरोधे निरपेक्षमुपादेयं सापेक्षं विहाय'	२९७
	'सति भेदे सादृश्ये चोपमानोपमेयभावः'	
(उत्तराधिकरणम्)	'लिङ्गस्य श्रुतिलिङ्गाभ्यां बाधः'	
६. अनुकृत्यधिकरणम्	'श्रुतार्थं परित्यज्याश्रुतार्थोपादानरूपात् लक्षणावृत्तिपरिग्रहात् अश्रुतार्थाध्याहारो वरम्'	२९७ ३२०
७. प्रमिताधिकरणम्	'लौकिकात् सामान्यतोदृष्टानुमानात् तात्पर्यवद्वाक्यं बलीयः'	
	'संभावितदोषात् प्रत्यक्षात् असंभावितदोषं तात्पर्यवद्वाक्यं बलीयः'	३२६
	'अनूद्यमानगतधर्मस्य प्रतिपाद्यमानगतधर्मविरोधे स बाध्यः'	

८. देवताधिकरणम्	'न्यायानुगृहीतमर्थवादलिङ्गं सामान्यतोदृष्टानुमानाद् बलीयः' 'अर्थित्वादिसम्पन्नस्य फलवति प्रवृत्तिः स्वाभाविकी' प्रमाणान्तरप्राप्तिविरोधरहितानामर्थवादमन्त्राणां स्वार्थप्रमितावनन्यार्थता'	३३१
९. अपशूद्राधिकरणम्	'अर्थवादलिङ्गात् न्यायानुगृहीतादपि विध्यन्यथानुपपत्तिर्बलीयसी' 'यौगिकार्थसंनिधाने सत्यप्रतिपन्नरूढ्यर्थग्रहणाद् वरं प्रतिपन्नयौगिकार्थग्रहणम्' 'एकस्य लिङ्गस्य बहुलिङ्गविरोधे बाधः'	३६८
१०. कम्पनाधिकरणम्	'एकस्याः श्रुतेः एकवाक्यतासाकाङ्क्षप्रकरणानुगृहीतबहुलिङ्गविरोधे बाधो युक्तः'	३७६
११. ज्योतिरधिकरणम्	'श्रुतिलिङ्गाभ्याम् उपसंहारसापेक्षोपक्रमगतप्रकरणेनानुगृहीता श्रुतिर्बलीयसी'	३७९
१२. अर्थान्तरत्वाधिकरणम्	'उपक्रमगताभ्यामपि श्रुतिलिङ्गाभ्यां वाक्यशेषगतानि बहूनि श्रुतिलिङ्गानि बलवन्ति'	३८२
१३. सुषुप्त्युत्क्रान्त्यधिकरणम्	'एकस्मिन् वाक्ये प्रसिद्धाप्रसिद्धयोर्लिङ्गेषु संनिविष्टेषु प्रसिद्धानुवादेना- प्रसिद्धात्मता प्रतिपाद्या'	३८५

चतुर्थः पादः

१. आनुमानिकाधिकरणम्	'स्मार्ताभ्यां क्रमलिङ्गाभ्यामेकवाक्यतासंबन्धिनी श्रौते क्रमप्रकरणे बलीयसी'	३८९
२. चमसाधिकरणम्	'अनेकगुणशब्दानां व्यवहितलक्षणापरिग्रहेण गुणिशब्दस्य यौगिकार्थस्वीकारापेक्षया तेषामव्यवहितलक्षणापरिग्रहेण प्रसिद्धार्थाकृतिकल्पनया रूढिपरिग्रहो न्याय्यः'	४०८
३. नसंख्योपसंग्रहाधि०	'यत्र गुणिशब्दस्य षष्ठ्यन्तता तत्र गुणशब्दः स्वप्रधानः, यत्र सामानाधिकरण्यं तत्र गुणिप्रधानता' 'नोपसर्जनेन पदान्तरस्यान्वयः किन्तु प्रधानेन' 'सामान्यविषयात् विशेषविषयो बलीयान्'	४१४
४. कारणत्वाधिकरणम्	'सर्वशब्दलक्षणापरिग्रहाद् वरं कतिपयशब्दलक्षणा'	४२४
५. जगद्वाचित्वाधिकरणम्	'एकस्य शब्दस्यानेकार्थरूढस्य रूढ्यर्थोपादाने विप्रतिपत्तौ अन्यतरग्रहणनियामकाभावे वृत्त्यन्तराश्रयणं युक्तम्' 'रूढ्योः कलहे योगस्योन्मेषः'	४३१
६. वाक्यान्वयाधिकरणम्	'कार्यकारणभावशून्ययोः द्रव्ययोः सामानाधिकरण्यमेकस्यैवोपाधिकल्पितभेदापेक्षम्'	४३८
७. प्रकृत्यधिकरणम्	'श्रुतिलिङ्गाभ्यां सामान्यतोदृष्टानि बहून्यपि दुर्बलानि'	४५१
८. सर्वव्याख्यानाधिकरणाम्	'अनेकार्थसाधारणस्य शब्दस्य नियतार्थशब्दसामानाधिकरण्यादर्थनिर्णयः'	४५९

द्वितीयाध्याये प्रथमः पादः

१. स्मृत्यधिकरणम्	'प्रबलदुर्बलयोः प्रमाणयोर्विरोधे प्रबलेन दुर्बलस्य बाध एव, न तत्र सावकाशनिरव- काशन्यायः प्रवर्तते' 'क्लृप्तमूलया कल्प्यमूला स्मृतिर्बाध्या'	४६१
२. योगप्रत्युक्त्यधिकरणम्	'ययोर्वाक्यैकवाक्यता तयोरन्यतरबाधेऽपीतरप्रामाण्यं युक्तम्'	४७०

३.	न विलक्षणत्वाधिकरणम्	जगतो ब्रह्मप्रकृतिकत्वाभावानुमानदूषणम्, सत्कार्यवादस्वरूपम् 'व्यवहारागमाभ्यामननुगृहीतस्तर्कोऽप्रतिष्ठितः'	४७४
४.	शिष्टापरिग्रहाधिकरणम्	'चैतन्यं जगत्समवायिकारणविशेषगुणो न भवतीत्यस्य दूषणम्'	४९५
५.	भोक्त्रापत्त्यधिकरणम्	भेदविषयकेण प्रत्यक्षेणाद्वितीयब्रह्मपरसमन्वयस्याबाधः	४९७
६.	आरम्भणाधिकरणम्	प्रत्यक्षानुमानागमार्थापत्तिभिः प्रपञ्चमिथ्यात्वसाधनम्	४९९
७.	इतरव्यपदेशाधिकरणम्	ब्रह्म अनिष्टकार्यप्रपञ्चस्याकारणमित्यनुमानदूषणम्	५२९
८.	उपसंहारदर्शनाधिकरणम्	स्वातिरिक्तोपकरणशून्यत्वहेतुना ब्रह्मणो जगत्कारणत्वाभावानुमानदूषणम्	५३४
९.	कृत्स्नप्रसक्त्यधि.	विरुद्धार्थप्रतिपादकश्रुतिवाक्यानां विषयव्यवस्थया प्रामाण्यम्	५३७
१०.	सर्वोपेताधिकरणम्	चेतनत्वे सत्यकार्यकरणत्वहेतुना ब्रह्मणो विचित्रकार्यकरत्वाभावानुमानदूषणम्	५४५
११.	नप्रयोजनवत्त्वाधि.	स्वप्रयोजनशून्यत्वहेतुना ब्रह्मणो जगत्कारणत्वाभावानुमानदूषणम्	५४७
१२.	वैषम्यनैर्घृण्याधि.	चेतनत्वे सति निर्दोषत्वहेतुना ब्रह्मणः परेषामनर्थकरप्रपञ्चकर्तृत्वाभावानुमानदूषणम्	५५०
१३.	सर्वधर्मोपपत्त्यधि.	अखण्डैकरसत्वेऽपि ब्रह्मणः विचित्रकार्यशक्तिमत्त्वम्	५५४
द्वितीयः पादः			
१.	रचनानुपपत्त्यधिकरणम्	प्रधानानुमानानामसिद्ध्यनैकान्तिकत्वविरुद्धत्वप्रत्यनुमानदुष्टत्वम्	५५७
२.	महद्दीर्घाधिकरणम्	ब्रह्मचैतन्यस्य जगत्समवायिकारणविशेषगुणत्वाभावानुमानस्यानैकान्तिकत्वमागम-बाधितत्वं च	५८०
३.	परमाणुजगदकारणत्वाधि-करणम्	वैशेषिकाणां प्रक्रियानिरूपणम्, तत्र परमाणुसाधकानुमाननिराकरणम्, समवायखण्डनं च	५८८
४.	समुदायाधिकरणम्	सुगतानां प्रक्रियानिरूपणम्; तंत्र संघातापत्ति-क्षणिकत्वयोः खण्डनम्	६०९
५.	नाभावाधिकरणम्	बाह्यार्थाभावसाधकानुमानानां बाधासिद्ध्यप्रयोजकत्वसत्प्रतिपक्षितत्वदोषवत्त्वम्	६३०
६.	एकस्मिन्नसंभवाधिकरणम्	जैनप्रक्रियानिरूपणम्। तदभिमतानैकान्तिकत्वस्यात्मपरिमाणस्य च निरासः	६४५
७.	पत्यधिकरणम्	वैशेषिक-नैयायिक-क्षपणक-सांख्य-योग-सुगतानामीश्वरसाधकानुमाननिराकरणम्; माहेश्वरादीनामागमेन तत्साधननिरसनं च।	६५४
८.	उत्पत्त्यसंभवाधिकरणम्	योगप्रत्युक्त्यधिकरणन्यायेन पाञ्चरात्राप्रामाण्यसाधनम्; अधिकाशङ्कानिराकरणं च	६६८
तृतीयः पादः			
१.	वियदधिकरणम्	'धर्मिबाधकल्पनादुभयबाधप्रसङ्गकात् धर्मबाधकल्पनं लघीयः'	६७३
२.	मातरिश्वाधिकरणम्	'लिङ्गाभ्यासापेक्षया प्रतिपिपादयिषिता श्रुतिर्बलीयसी'	६९२
३.	असंभवाधिकरणम्	ब्रह्मणः कार्यत्वानुमानस्य प्रत्यनुमानागमाभ्यां बाधः	६९३
४.	तेजोऽधिकरणम्	श्रुत्या लिङ्गस्य बाधात् तेजसो लिङ्गसिद्धं ब्रह्मयोनित्वं परम्परया योजितम्	६९५
५.	अबधिकरणम्	'शब्दस्य प्रत्यक्षविरुद्धार्थतया भासमानस्याविरुद्धार्थे प्रामाण्यसंभवे त्यागो न युक्तः'	६९८

६. पृथिव्यधिकरणम्	'द्वयोः प्रमाणयोर्विरोधेऽन्यतरस्यात्यन्तबाधनेनान्यतरोपादानात् वरमन्यतरस्याल्पबाधयाऽन्यतरोपादानम्'	६९९
७. तदभिध्यानाधिकरणम्	'श्रुतपदार्थबाधकल्पनाद् वरमर्थसिद्धधर्मबाधकल्पनम्'	७०२
८. विपर्ययाधिकरणम्	'अयोग्यविषयाभ्यामाकाङ्क्षासंनिधिभ्यां विप्रकृष्टविषये अपि आकाङ्क्षायोग्यत्वे बलवत्तरे'	७०३
९. अन्तराविज्ञानाधिकरणम्	'पाठक्रमादर्थक्रमो बलवान्'	७०६
१०. चराचरव्यपाश्रयाधिकरणम्	'उद्देश्योपादेययोर्विरोधे उपादेयं प्रबलम्'	७०८
११. आत्माधिकरणम्	'प्रधानवाक्याक्षिप्तार्थप्रतिपादकावान्तरवाक्यानुरोधेन प्रधानवाक्यविरुद्धार्थप्रतिपादकावान्तरवाक्यं नेयम्'	७१०
१२. ज्ञाधिकरणम्	'आत्मनः अनित्यज्ञानत्व-ज्ञानान्तरवेद्यत्व-ज्ञानभिन्नत्वानुमानानां तात्पर्यवदागमेन बाधः'	७१५
	'साध्यविवृद्ध्युपादानात् साध्यलेशोपादानं लघीयः'	
१३. उत्क्रान्तिगत्यधिकरणम्	'गुणमुख्यव्यतिक्रमन्यायः'	७१८
	यद्वा—'अर्थवादवाक्यानां लोकविरोधे लौकिकन्यायादपि दौर्बल्यम्'	
१४. कर्त्रधिकरणम्	'आत्मनः कर्तृत्वं श्रुतार्थापत्तिगम्यम्'	७३४
	'द्वयोः प्रमाणयोर्विरोधे कालभेदेनापि व्यवस्था न्याय्या'	
१५. तक्षाधिकरणम्	'निमित्तकारणत्वापेक्षया उपादानकारणत्वकल्पनाऽभ्यर्हिता'	७३९
१६. परायत्ताधिकरणम्	'अन्वयव्यतिरेकयोः दृष्टकारणक्लृप्तिविषयत्वात् तच्छून्यस्यापि ईश्वरस्यागमात् कारणत्वोपपत्तिः'	७४७
१७. अंशाधिकरणम्	'ऐकात्म्य-नियन्तृनियम्यभावप्रमाणयोर्विरोधे ऐकात्म्यानुगुण्येन अंशांशिभावसंबन्धकल्पनेन नियन्तृत्वोपपादनम्'	७५१

चतुर्थः पादः

१. प्राणोत्पत्त्यधिकरणम्	'प्रबलदुर्बलयोर्विरोधे दुर्बलस्यात्यन्तबाधकल्पनाद् वरं विषयभेदकल्पनम्'	७६५
२. सप्तगत्यधिकरणम्	न्यूनाधिकसंख्याविरोधेऽबाधार्थमधिकसंख्योपादानं युक्तम्	७७२
	प्रकरणोपस्थापित-श्रुत्युपस्थापितयोः परामर्शसंशये श्रुत्युपस्थापितपरामर्शो युक्तः	
३. प्राणाणुत्वाधिकरणम्	'श्रुतार्थापत्तिविरोधेऽनुमानं दुर्बलम्'	७७८
४. श्रेष्ठाधिकरणम्	'श्रुतिलिङ्गयोरन्यतरस्य गौणत्वावश्यम्भावे लिङ्गस्य तद् युक्तम्'	७७९
५. वायुक्रियाधिकरणम्	'वाक्यलिङ्गयोर्विरोधे सति संभवे विषयभेदेनाविरोधकल्पना'	७८१
	'सामान्यतोदृष्टानुमानस्य श्रौतलिङ्गेन बाधः'	
६. श्रेष्ठाणुत्वाधिकरणम्	'लिङ्गद्वयविरोधे सति संभवे विषयभेदेन व्यवस्था'	७८८
७. ज्योतिराद्यधिकरणम्	'वागाद्यभिमानसंबन्धप्रतिपादकशास्त्रान्यथानुपपत्त्याऽग्न्याद्यधीना वागादिप्रवृत्तिः'	७८९
	अभिमानिदेवतानां करणजन्यफलासंबन्धित्वम्	
८. इन्द्रियाधिकरणम्	'अन्यपरा श्रुतिः बहुभिर्लिङ्गैर्बाध्या'	७९३

९. संज्ञामूर्तिक्लृप्त्यधि. 'यत्पदस्य यत्पदेन आकाङ्क्षासंनिधियोग्यत्वानि तत्पदार्थस्य तत्पदार्थेनान्वयः' ७९७

तृतीयाध्याये प्रथमः पादः

१. तदन्तरप्रतिपत्त्यधिकरणम् 'श्रौतवाक्यलिङ्गाभ्यां सामान्यतोदृष्टानुमानानुगृहीतलिङ्गबाधः' ८०४

२. कृतात्ययाधिकरणम् 'अनुशयाभावे लिङ्गभूतयोः यत्किञ्चिद्-यावत्संपातशब्दयोः कर्मसद्भावविषयक-विशेषलिङ्गेन आमुष्मिककर्मविषयतया संकोचः' ८१८

३. अनिष्टादिकार्यधि. 'सामान्यवाक्यस्य विशेषवाक्येन विशेषे नियमनम्' ८२८

४. साभाव्यापत्त्यधिकरणम् 'श्रुतार्थापत्त्या युक्त्यन्तरानुगृहीतया श्रुतेः उपचरितार्थत्वम्' ८३४

५. नातिचिराधिकरणम् 'स्ववाक्योपात्तात् दुःखेन निष्क्रमणं तरप्प्रत्ययेन विशेष्यमाणं भिन्नवाक्योपात्तात् सुखेन निष्क्रमणं गमयति' ८३७

६. अन्याधिष्ठिताधि. 'अनुमानानुगृहीतेन श्रुतार्थापत्तिद्वयेन श्रुतेः संकोचः' 'सावकाशनिरवकाशयोर्निरवकाशो बलीयान्' ८३८

द्वितीयः पादः

१. संध्याधिकरणम् 'प्रत्यक्षेण बाधान्यथानुपपत्त्या श्रौतनिषेधान्यथानुपपत्त्या च स्वप्नप्रपञ्चसत्यत्वानुमान-बाधः' ८४४

२. तदभावाधिकरणम् 'नाडीपुरीतद्ब्रह्मसु तुल्यवत्सप्तमीश्रवणेऽपि समुच्चयविषयलिङ्गैः नाड्यां पुरीतति च सामीप्यं सप्तम्यर्थं स्वीकृत्य ब्रह्मण्येवाधिकरणसप्तमी स्वीकृता' ८५४

३. कर्मानुस्मृतिशब्दविध्यधि. 'अज्ञानमेव स्वकार्यान्तःकरणावच्छिन्नं सत् जीवोपाधिः' ८६१

४. मुग्धाधिकरणम् 'प्रसिद्धचतुष्टयापेक्षया लक्षणभेदान्मुग्धावस्था पञ्चमी' ८६४

५. उभयलिङ्गाधिकरणम् 'तत्परवाक्यविरोधे अतत्परवाक्यदौर्बल्यं स्वशेषिवाक्यविरोधाभावेऽपि' 'एकस्य प्रतिपन्नविरुद्धोभयरूपत्वविरोधे तत्त्वातत्त्वविषयतया व्यवस्था' ८६८

६. प्रकृतैतावत्त्वाधिकरणम् 'प्राप्तकृत्स्ननिषेधकल्पनापेक्षया अल्पनिषेधकल्पनं लघीयः' 'प्रकृतपरामर्शकशब्देन अर्थतः प्रधानं विहाय शब्दतः प्रधानस्य परामर्शः' ८८५

७. पराधिकरणम् 'ब्रह्मणः सद्वितीयत्वसाधकानुमानचतुष्टयस्यागमविरुद्धत्वम्' ८९५

८. फलाधिकरणम् 'अनुमानानुगृहीतश्रुतिप्रतिपन्नेश्वररूपधर्मिबाधकल्पनापेक्षया वरमपूर्वस्य नैरपेक्ष्य-धर्मबाधकल्पनम्' ९०२

तृतीयः पादः

१. सर्ववेदान्तप्रत्ययाधि. 'शब्दान्तरादयः कर्मभेदहेतवः, फलसंयोगैक्यादयः तदभेदहेतवः। तत्र रूपभेदाभेदौ इतरेभ्यो हेतुभ्यो बलवत्तरौ' ९०७

२. उपसंहाराधिकरणम् 'विद्यैक्ये गुणोपसंहारः' ९१९

३. अन्यथात्वाधिकरणम् 'संज्ञासाम्यात् अर्थवादसाम्याच्चोपास्यरूपभेदो बलवान्' ९२०

४. व्याप्त्यधिकरणम् 'अध्यासे सामानाधिकरण्यापेक्षया विशेषणविशेष्यभावे सामानाधिकरण्यं लघीयः' ९२७

५. सर्वाभेदाधिकरणम् 'असति बाधके श्रुत्यर्थाभ्यां प्रकृतस्य परामर्शः एवंशब्देन' ९३१

६. आनन्दाद्यधिकरणम् 'प्रमेयाविशेषे शब्दप्रमाणानामप्यविशेषः' ९३४

७. आध्यानाधिकरणम् 'अवान्तरवाक्यानां प्रयोजनवतैकवाक्यत्वसंभवे वाक्यभेद-प्रयोजनकल्पने न युक्ते' ९३७

८. आत्मगृहीत्यधि. 'बहूनामपि लिङ्गानामुपक्रमोपसंहारगताभ्यां श्रुतिभ्यां बाधः' ९४०
'लक्ष्यत्वम्पदार्थप्रतिपादकवाक्यं लक्ष्यतत्पदार्थप्रतिपादकवाक्येन तुल्यार्थकम्'

९. कार्याख्यानाधिकरणम् 'प्राप्तानुवादेनाप्राप्तं विधीयते' ९४६

१०. समानाधिकरणम् 'गुणान्तरविधानार्थं गुणविशिष्टगुण्यनुवादः स्पष्टप्रत्यभिज्ञानार्थः सन् न विद्याभेदकः' ९५१

११. सम्बन्धाधिकरणम् 'स्थानविशिष्टब्रह्मानुवादेन नामसंबन्धविधानात् नामद्वयस्य व्यवस्थिततत्वम्' ९५४

१२. संभृत्यधिकरणम् संभृत्यादिधर्मविशिष्टस्य मनोमयत्वादिगुणविशिष्टस्य च ब्रह्मण उपास्यस्य
भेदात् विद्याभेदः ९५७

१३. पुरुषविद्याधिकरणम् प्रमाणान्तरसिद्धसम्बन्धानुवादसंभवे आध्यासिकापूर्वसम्बन्धकल्पनमन्याय्यम्। ९५९

१४. वेधाद्यधिकरणम् 'एकस्योभयार्थता तुल्यप्रमाणबोधितत्वेऽविरुद्धा, न त्वतुल्यप्रमाणबोधितत्वे' ९६३

१५. हान्यधिकरणम् स्तुतिबुद्धिप्रयोजनायोपायनोपसंहारः ९७१
'शब्दस्य लक्षणोपादाने संनिहितपदानुसारेण लक्षणा न्याय्या'

१६. सांपरायाधिकरणम् 'वाक्ययोर्विरोधे न्यायानुगृहीतेनेतरस्य बाधः' ९७९

१७. गतेरर्थवत्त्वाधिकरणम् 'लौकिकन्यायानुगृहीतवाक्येन ब्रह्मविदो गत्यनुमानबाधः' ९८२

१८. अनियमाधिकरणम् 'लाघवानुगृहीतवाक्येन प्रकरणबाधः' ९८४

१९. यावदधिकाराधिकरणम् आविर्भूतब्रह्मणः शरीरग्रहणानुमानस्य तत्कारणाभावात् प्रत्यनुमानेन बाधः ९८६

२०. अक्षरध्यधिकरणम् ब्रह्मणि प्रपञ्चनिषेधायास्थूलादिशब्दोपसंहारः ९९१

२१. इयदधिकरणम् 'प्रतिपादनप्रकारभेदापेक्षया प्रतिपाद्यरूपैक्यस्यान्तरङ्गत्वात् विद्यैक्यम्' ९९४

२२. अन्तरत्वाधिकरणम् 'अभ्यासस्य विशेषविधानार्थत्वाभावे एव भेदकत्वम्' ९९६

२३. व्यतिहाराधिकरणम् 'वचनादन्यत्रैव लौकिकन्यायावकाशः' ९९९

२४. सत्याद्यधिकरणम् 'यत्र विध्युद्देशे फलश्रवणं तत्राङ्गेषु फलश्रुतिरुपेक्ष्यते, यत्र तु अर्थवादादेव
फलकल्पनं तत्रार्थवादगतं सर्वं फलमेकीकृत्य गुणविशिष्टगुणिनः फलत्वेन
कल्पनीयम्' १००१

२५. कामाद्यधिकरणम् 'आकाङ्क्षायोग्यतासंनिधिवशात् सगुणविद्याश्रुतगुणानां निर्गुणाविद्यायां स्तुत्यर्थम्,
निर्गुणविद्याश्रुतगुणानां सगुणविद्यायामुपास्यत्वार्थं चोपसंहारः' १००४

२६. आदराधिकरणम् उद्देश्याभावे उपादेयाप्रवृत्तिरिति भोजनार्थद्रव्यलोपे प्राणाग्निहोत्रलोपः १००६
'अर्थवादगतोऽग्निहोत्रशब्दः तद्धर्माप्रापकः'

२७. तन्निर्धारणानियमाधि. 'श्रौतलिङ्गैः अङ्गाश्रितोपास्तीनां क्रत्वङ्गत्वानुमानबाधः' १०११

२८. प्रदानाधिकरणम्	'प्रधानभूतसंवर्गगुणविशिष्टवायुप्राणधर्मिभेदविषयेण वाक्येन गुणसमीरणस्वभावैक्य-विषयवाक्यं बाध्यते'	१०१६
२९. लिङ्गभूयस्त्वाधिकरणम्	'श्रुतिलिङ्गवाक्यैः प्रकरणातिदेशयोः मुख्याग्निसंनिधेश्च बाधात् मनश्चिदादीनां स्वातन्त्र्यम्'	१०२१
३०. ऐकात्म्याधिकरणम्	प्रत्यक्षानुमानाभ्यां देहातिरिक्तात्मसाधनम्	१०३१
३१. अङ्गावबद्धाधिकरणम्	'श्रौतेन सामान्येन प्राकरणिकस्य विशेषनियमस्य बाधः'	१०३८
३२. भूमज्यायस्त्वाधिकरणम्	'प्रधानतदङ्गफलानामर्थवादगतानामेकीकरणेन साङ्गप्रधानफलत्वेन कल्पनात् समस्तोपासनमेव'	१०४१
३३. नानाशब्दाधिकरणम्	गायत्रीशाण्डिल्यादिविद्यानां फलसंयोगादिभेदाद् भेदः	१०४४
३४. विकल्पाधिकरणम्	अहंग्रहोपासनानां सामर्थ्यलिङ्गानुसारेण विकल्पनियमः	१०४७
३५. काम्याधिकरणम्	'अनहंग्रहाकर्माङ्गावबद्धोपासनानामविरुद्धभिन्नफलत्वाद् याथाकाम्यम्'	१०४९
३६. यथाश्रयभावाधिकरणम्	'अङ्गाश्रितोपासनानामपि याथाकाम्यम्'	१०५०
चतुर्थः पादः		
१. पुरुषार्थाधिकरणम्	'अनुमानानुगृहीतफलश्रुत्या स्वतन्त्रमेव ब्रह्मज्ञानं फलसाधनम्'	१०५५
२. परामर्शाधिकरणम्	'विधियुक्तवाक्यकल्पनापेक्षया वर्तमानापदेशस्य विधित्वकल्पनं लघीयः' 'ब्रह्मसंस्थतायाः परिव्राजकेन नियतसंबन्धात् तया सह पारिव्राज्यं विधीयते 'ब्रह्मसंस्थोऽमृतत्वमेति' इति वाक्ये	१०६७
३. स्तुतिमात्राधिकरणम्	'स्तुतित्वकल्पनाद् विधित्वकल्पनं युक्तमनुष्ठानफललाभात्'	१०७९
४. पारिप्लवाधिकरणम्	'सामान्यश्रुतेः विशेषपरतया लिङ्गवशेन संकोचः'	१०८२
५. अग्नीन्धनाद्यधिकरणम्	'शास्त्रविरुद्धमोक्षहेतुत्वकल्पनाद् वरं कर्मणां ज्ञानहेतुत्वकल्पनम्'	१०८४
६. सर्वापेक्षाधिकरणम्	'कर्मणां शमादीनां च ज्ञानसाधनत्वं तत्तद्द्वारभेदेन' 'ब्रह्मैकाग्रवृत्तिचित्ते शब्दादपरोक्षज्ञानम्' यद्वा— संवेदनस्य विषयाभेद एव प्रत्यक्षत्वप्रयोजक इति प्रथममेव शब्दादपरोक्षोपपत्तिः।	१०८६
७. सर्वान्नानुमत्यधिकरणम्	'श्रूयमाणस्यैव विशेषविधेः सामान्यविधिबाधकत्वम्; विशेषविधिकल्पना तु सामान्यविधिना बाध्यते'	१०९०
८. आश्रमकर्माधिकरणम्	'संयोगपृथक्त्वात् एकस्यैव नित्यत्वं काम्यत्वं च न विरुध्यते'	१०९४
९. विधुराधिकरणम्	'साधनोपचयापचयाभ्यां विद्यायाः चिराचिराभिव्यक्तिरूपो विशेषः'	१०९८
१०. तद्भूताधिकरणम्	'प्रत्यवरोहस्य शास्त्रेण निषिद्धत्वात् प्रत्यवरुह्यानुष्ठितकर्मणां न विद्याङ्गत्वम्'	११००
११. आधिकारिकाधि०	'ऊर्ध्वरेतसां प्रमादात् क्षतव्रतानां कृतप्रायश्चित्तानां विद्याधिकारः'	११०२
१२. बहिरधिकरणम्	'कृतप्रायश्चित्तानामपि तेषां शिष्टाव्यवहार्यत्वम्'	११०५

१३. स्वाम्यधिकरणम् — लिङ्गेनाङ्गाश्रितोपासनानां यजमानगामिफलत्वम्, ऋत्विक्कर्तृकत्वं च — ११०६

१४. सहकार्यन्तरविध्यधि० — अपूर्वत्वान्मौनं वाक्यभेदेन विधीयते — ११०९

१५. अनाविष्काराधिकरणम् — शास्त्राविरोधाय बाल्यशब्देन प्रशान्तेन्द्रियत्वादिग्रहणम् — १११३

१६. ऐहिकाधिकरणम् — प्रतिबन्धक्षयमपेक्ष्य विद्योत्पत्तिः — १११६

१७. मुक्तिफलानियमाधि० — 'शास्त्रविरोधेनानुमानाप्रवृत्तेः मुक्तौ नोपचयापचयभावः' — १११९

चतुर्थाध्याये प्रथमः पादः

१. आवृत्त्यधिकरणम् — दृष्टफलानां कर्मणां फलपर्यन्तमावृत्तिरिति श्रवणादिषु अहंग्रहोपासनेषु चावृत्तिसिद्धिः — ११२२

२. आत्मत्वोपासनाधि० — 'तात्पर्यवत्या भेदनिषेधश्रुत्या भेदलिङ्गानां बाधात् अविरोधात् तादात्म्यवाक्यैः अहं ब्रह्मेति प्रतिपत्तव्यम्' — ११३०

३. प्रतीकाधिकरणम् — 'ऐक्यचोदनाऽभावे सति स्वरूपतो भिन्नत्वात् न प्रतीकेषु आत्मबुद्धिः कार्या' — ११३४

४. ब्रह्मदृष्ट्यधिकरणम् — 'निकृष्टमुत्कृष्टदृष्ट्या ध्येयमिति न्यायानुगृहीतया द्वितीयाश्रुत्या इति-शब्दश्रुत्या चादित्यादिषु ब्रह्मदृष्टिः' — ११३६

५. आदित्यादिमत्यधि. — 'साधनात् फलस्योत्कृष्टत्वात् फलभूतादित्यादिदृष्टिः कर्माङ्गेषु' — ११३९

६. आसीनाधिकरणम् — 'आसीनेऽचलावयवे प्रतिष्ठितेन मनसाऽनङ्गाश्रितान्युपासनानि कर्तव्यानि' — ११४५

७. एकाग्रताधिकरणम् — यत्र चित्तैकाग्र्यं तत्र देशादौ उपासनम् — ११४७

८. आप्रायणाधिकरणम् — अहंग्रहोपासनमाप्रायणात् कर्तव्यम् — ११४८

९. तदधिगमाधिकरणम् — विद्यासामर्थ्येन मोक्षशास्त्रप्रामाण्यान्यथानुपपत्त्या च सामान्यविषयां प्रतिषेधान्यथानुपपत्तिं बाधित्वाऽर्थवादतः विद्यया दुरितक्षयः प्रमीयते। — ११५०

१०. इतरासंश्लेषाधिकरणम् — पूर्वोक्तन्यायेनैव विद्यया पुण्यक्षयः साध्यते — ११५५

११. अनारब्धकार्याधिकरणम् — 'तस्य तावदेव चिरम्' इत्यवधिकरणलिङ्गं श्रुतिस्मृतिलिङ्गानुगृहीतं सामान्यश्रुतिं बाधित्वा प्रारब्धकर्मपरिशेषं गमयति। — ११५६

१२. अग्निहोत्राद्यधिकरणम् — 'सगुणविद्वदनुष्ठितनित्याग्निहोत्रादीनां विद्यया सहैकफलत्वम्' — ११५९

१४. इतरक्षपणाधिकरणम् — निर्गुणविदः आरब्धकर्मक्षयानन्तरं मुक्तिः — ११६३

द्वितीयः पादः

१. वागधिकरणम् — 'उत्क्रान्तिसमये इन्द्रियसद्भावलिङ्गात् इन्द्रियाणां मनसि वृत्तिलयः' — ११६५

२. मनोधिकरणम् — मनःप्रकृतित्वाभावात् प्राणे मनोवृत्तिलयोपचारः — ११६८

३. अध्यक्षाधिकरणम् — प्राणस्य जीवे वृत्तिलयः, जीवस्य तेजसि वृत्तिलयः — ११६९

४. आसृत्युपक्रमाधि. — सगुणोपासकानामप्युत्क्रान्तिरस्ति, शरीरेन्द्रियवता भोक्तव्यफलत्वात् — ११७३

५. संसारव्यपदेशाधि. — 'तेजः परस्यां देवतायाम्' इत्युक्ता संपत्तिः देहान्तरोपभोगयोग्यफलकर्मविध्यन्यथानुपपत्त्या सावशेषा — ११७४

६. प्रतिषेधाधिकरणम्. 'परब्रह्मविदो न कुतश्चिदुत्क्रान्तिः'
माध्यन्दिनकाण्ववाक्याभ्यां स्मृत्यनुगृहीताभ्यां
'न तस्मात्' इति तच्छब्देन शरीरमेवोपलक्ष्यते। ११७७
७. कलाप्रलयाधिकरणम्. कलाः भूतसूक्ष्मेषु प्रलीय तैः सह ब्रह्मण्यस्तं गच्छन्ति। ११८१
८. अविभागाधिकरणम् परब्रह्मविदुषः निरवशेषः कलालयः ११८३
९. तदोकोधिकरणम् सगुणविदो मूर्धन्यनाड्योत्क्रमणम् ११८४
१०. रश्म्यधिकरणम् 'निशि मृतानामपि रश्मिसंबन्धद्वारेणादित्यगमनम् श्रुतार्थापत्त्या लिङ्गाच्च
सूक्ष्मरश्मिसद्भावावगमात्' ११८५
११. दक्षिणायनाधिकरणम् 'दक्षिणायनमृतानामपि उत्तरायणदेवतासंबन्धेन विद्याफलप्राप्तिः, श्रुतार्थापत्त्या
लोकप्रसिद्ध्यादिबाधात्' ११८८

तृतीयः पादः
१. अर्चिराद्यधिकरणम् 'प्रत्यभिज्ञानादिनोपासनाभेदेऽपि गत्यैक्यम्' ११९०
२. वाय्वधिकरणम् 'अर्थक्रमेण पाठक्रमबाधात् आदित्यात् पूर्वं वायुनिवेशः' ११९२
३. तडिदधिकरणम् आगन्तूनामन्ते निवेश इति न्यायात् तडितः ऊर्ध्वं वरुणादिनिवेशः ११९६
४. आतिवाहिकाधिकरणम् लौकिकन्यायानुगृहीतात् वैद्युतादुपर्यमानवपुरुषेण नयनलिङ्गात् उन्नेतारोऽर्चिरादयः ११९७
५. कार्याधिकरणम् 'बहूनां शब्दार्थानामुपचरितत्वकल्पनापेक्षया एकस्य तत्कल्पनं लघीयः
इति कार्यमेव ब्रह्माभिधेयम्'
'परब्रह्मगमनस्वीकारे विरोधगणोपन्यासः' १२०१
६. अप्रतीकालम्बनाधि. 'प्रतीकालम्बनानां 'स एतान्' इत्येतच्छब्देनापरामर्शात् विद्युत्पर्यन्तमेव गमनम्' १२१८

चतुर्थः पादः
१. संपद्याविर्भावाधिकरणम्. 'मोक्षस्यागन्तुकरूपत्वानुमानस्य 'स्वेन रूपेण' इति विशेषणश्रुत्या बाधः' १२२
२. अविभागेन दृष्टत्वाधि. ब्रह्मभावविरोधिनः फलान्तरस्य प्रकरणाल्लिङ्गस्य बलवत्त्वात् सगुणविद्यया संबन्धः।
'फलवाक्यस्य साधनवाक्यं प्रति शब्दतः गुणभूतत्वम्' १२२
३. ब्राह्माधिकरणम् चिन्मात्रस्यापि सतः तत्त्वातत्त्वविभागापेक्षयोभयथाभावोपपत्तिः १२२५
४. संकल्पाधिकरणम् 'संकल्पादेवे'त्यवधारणश्रुत्या विद्याया अचिन्त्यसामर्थ्यत्वाच्च विदुषः
पित्रादिसंपत्तिः संकल्पव्यतिरिक्तानपेक्षा १२२८
५. अभावाधिकरणम् कालभेदेन संकल्पभेदात् क्रमेण शरीरेन्द्रियादिभावाभावयोरुपपत्तिः १२३०
६. प्रदीपाधिकरणम् 'विदुषः अनेकधाभावे सर्वाणि शरीराणि सात्मकानि,'
'स्वतन्त्रानादिमनोभेदे एव जीवभेदः' १२३३
७. जगद्व्यापाराधिकरणम्. जगत्सृष्ट्यादिव्यापारं विना स्वभोगसाधनसंपत्तावेव सगुणविदामैश्वर्यम् १२३६
भास्करमतनिराकरणम्, स्वमतोपसंहारश्च।

●

शांकरमठसंप्रदायीयाः शान्तयः

।। ॐ तत्सत्परमात्मने नमः ।।

ॐ शं नो मित्रः शं वरुणः।। शं नो भवत्वर्यमा ।। शं न इन्द्रो बृहस्पतिः।। शं नो विष्णुरुरुक्रमः।। नमो ब्रह्मणे ।। नमस्ते वायो ।। त्वमेव प्रत्यक्षं ब्रह्मासि ।। त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि ।। ऋतं वदिष्यामि ।। सत्यं वदिष्यामि ।। तन्मामवतु।। तद्वक्तारमवतु ।। अवतु माम् ।। अवतु वक्तारम्। ॐ शान्तिः शान्तिः शान्तिः।।१।।

ॐ सह नाववतु।। सह नौ भुनक्तु।। सह वीर्यं करवावहै।। तेजस्विनावधीतमस्तु मा विद्विषावहै।। ॐ शान्तिः शान्तिः शान्तिः।।२।।

ॐ यश्छन्दसामृषभो विश्वरूपः।। छन्दोभ्योऽध्यमृतात् संबभूव।। स मेन्द्रो मेधया स्पृणोतु।। अमृतस्य देव धारणो भूयासम्।। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा।। कर्णाभ्यां भूरि विश्रुवम्।। ब्रह्मणः कोशोऽसि मेधया पिहितः।। श्रुतं मे गोपाय।। ॐ शान्तिः शान्तिः शान्तिः।।३।।

ॐ अहं वृक्षस्य रेरिवा।। कीर्तिः पृष्ठं गिरेरिव।। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि।। द्रविणं सवर्चसम्।। सुमेधा अमृतोक्षितः।। इति त्रिशङ्कोर्वेदानुवचनम्।। ॐ शान्तिः शान्तिः शान्तिः।।४।।

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।। ॐ शान्तिः शान्तिः शान्तिः।।५।।

ॐ आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मे अस्तु। तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु।। ॐ शान्तिः शान्तिः शान्तिः।।६।।

ॐ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्त्संदधाम्यृतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारमवतु वक्तारम्।। ॐ शान्तिः शान्तिः शान्तिः।।७।।

ॐ भद्रं नो अपि वातय मनः।। ॐ शान्तिः शान्तिः शान्तिः।।८।।

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः।। स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः। व्यशेम देवहितं यदायुः।। स्वस्ति न इन्द्रो वृद्धश्रवाः।। स्वस्ति नः पूषा विश्ववेदाः।। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः।। स्वस्ति नो बृहस्पतिर्दधातु।। ॐ शान्तिः शान्तिः शान्तिः।।९।।

ॐ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये।। ॐ शान्तिः शान्तिः शान्तिः।।१०।। ।।इति दश शान्तयः समाप्ताः।।

ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो महद्भ्यो नमो गुरुभ्यः। सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि।।१।। ॐ नारायणं पद्मभवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च। व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम्।।२।। श्रीशंकराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम्।। तं त्रोटकं वार्तिककारमन्यानस्मद्गुरून्संततमानतोऽस्मि।।३।। श्रुतिस्मृतिपुराणानामालयं करुणालयम्।। नमामि भगवत्पादं शंकरं लोकशंकरम्।।४।। शंकरं शंकराचार्यं केशवं बादरायणम्।। सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः।।५।। ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने।। व्योमवद् व्याप्तदेहाय दक्षिणामूर्तये नमः।।६।।

अनध्यायमङ्गलपाठः।। अशुभानि निराचष्टे तनोति शुभसंततिम्।। स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मङ्गलं परम्।।१।। अतिकल्याणरूपत्वान्नित्यकल्याणसंश्रयात्। स्मर्तॄणां वरदत्वाच्च ब्रह्म तन्मङ्गलं विदुः।।२।। ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।। कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ।।३।। ओम् तत् सत् परब्रह्मार्पणमस्तु।।

साङ्केतिकशब्दविवरणम्

आप. श्रौ.	आपस्तम्बश्रौतसूत्रम्
आ.ध.सू.	आपस्तम्बधर्मसूत्रम्
आरुणिको.	आरुणिकोपनिषत्
ई. उ.	ईशावास्योपनिषत्
ऋ. सं.	ऋग्वेदसंहिता
ऐ. आ.	ऐतरेयारण्यकम्
ऐ. उ.	ऐतरेयोपनिषत्
ऐ. ब्रा.	ऐतरेयब्राह्मणम्
क. उ.	कठोपनिषत्
का. सं.	काठकसंहिता
के. उ.	केनोपनिषत्
कौ. उ.	कौषीतक्युपनिषत्
गौ. का.	गौडपादकारिका
गौ.ध.सू.	गौतमधर्मसूत्रम्
छा. उ.	छान्दोग्योपनिषत्
जाबाल.	जाबालोपनिषत्
जै. सू.	जैमिनिसूत्रम्
तै. आ.	तैत्तिरीयारण्यकम्
तै. उ.	तैत्तिरीयोपनिषत्
तै. ब्रा.	तैत्तिरीयब्राह्मणम्
तै. सं.	तैत्तिरीयसंहिता
तं. वा.	तन्त्रवार्तिकम्
तां. ब्रा.	ताण्ड्यमहाब्राह्मणम्
न्या. सू.	न्यायसूत्रम्
न्या. कु.	न्यायकुसुमाञ्जलिः
न्या.र.दी.	न्यायरत्नदीपावलिः
न्या. भा.	न्यायभाष्यम्
न्या. सा.	न्यायसारः
पा. सू.	पाणिनीयसूत्रम्

पै. सं.	पैप्पलादसंहिता
प्र. उ.	प्रश्नोपनिषत्
बृ.उ. (मा.)	बृहदारण्यकोपनिषत्(माध्यन्दिनपाठः)
ब्र. सू..	ब्रह्मसूत्रम्
ब्र. बि.	ब्रह्मबिन्दूपनिषत्
ब्र. वि.	ब्रह्मविद्याभरणम्
भ. गी.	भगवद्गीता
भाग.	श्रीमद्भागवतम्
म.भा.	महाभारतम्
म. ना.	महानारायणोपनिषत्
मनु.	मनुस्मृतिः
मा. मे.	मानमेयोदयः
मु. उ.	मुण्डकोपनिषत्
मुद्गलो.	मुद्गलोपनिषत्
मै. सं.	मैत्रायणीसंहिता
मै. ब्रा.	मैत्रायणीब्राह्मणम्
यो. सू.	योगसूत्रम्
रत्न.	रत्नप्रभा
वराहो.	वराहोपनिषत्
वि.पु.	विष्णुपुराणम्
वै. सू.	वैशेषिकसूत्रम्
शत.	शतपथब्राह्मणम्
शाबर.	शाबरभाष्यम्
श्वे. उ.	श्वेताश्वतरोपनिषत्
श्लो. वा.	श्लोकवार्तिकम्
षड्विंश.	षड्विंशब्राह्मणम्
संकर्ष.	संकर्षकाण्डम्
सां. का.	सांख्यकारिका

श्रीदक्षिणामूर्तये नमः

ब्रह्मसूत्रशाङ्करभाष्यम्

प्रकटार्थविवरण-भाष्यभावप्रकाशिका-न्यायनिर्णयोपेतं प्रत्यधिकरणविभक्तशारीरकन्यायसंग्रहयुतं च

प्रथमोऽध्यायः

प्रकटार्थविवरणम्

सत्यं ज्ञानमनन्तं यत् कूटस्थं सुखविग्रहम्। नित्यमुक्तं परं ब्रह्म भवामि तदहं सदा ।।१।।

भाष्यभावप्रकाशिका

यत्साक्षात्सच्चिदानन्दं प्रत्यगक्रियमद्वयम् । तन्नमामि नृसिंहस्य योगगम्यं परं पदम् ।।१।।
ज्योतिर्यद्दक्षिणामूर्तिव्यासशङ्करशब्दितम् । ज्ञानोत्तमाख्यं तद्वन्दे सत्यानन्दपदोदितम् ।।२।।
भगवत्पादपादाब्जपांसवः पान्तु सन्ततम् । अपारासार- संसार- सागरोत्तार- सेतवः ।।३।।
संप्रदायविदामुक्तीः संकलय्याभिधीयते । मुनिना चित्सुखाख्येन भाष्यभावप्रकाशिका ।।४।।

न्यायनिर्णयः

अध्यस्तान्ध्य[1]मपूर्वमर्थधिषणै[2]र्ग्राह्यं पुमर्थास्पदं लक्ष्यं लक्षणभेदतः श्रुतिगतं निर्धूतसाध्यार्थकम् ।
आम्नायान्तविभातविश्वविभवं सर्वाविरुद्धं परं सत्यं ज्ञानमनर्थसार्थविधुरं ब्रह्म प्रपद्ये सदोम् ।।१।।
यो लोकं सकलं पुनाति, निगमा यं प्राहुरेकान्ततो, व्याप्तं येन जगज्जगन्ति सततं यस्मै नमस्कुर्वते ।
यस्मादाविरभूदशेषममरा यस्य प्रसादार्थिनो यस्मिन् पर्यवसास्यति स्फुरदिदं तस्मै नमो विष्णवे ।।२।।
योऽनुग्रानुग्रतेजा जनयति सकलानालयं यं लभन्ते सर्वे निर्वान्ति येन श्रुतिपथपथिका वौषडातन्वते च ।
यस्मै यस्मादकस्मात्परिभवचकिता यस्य संरोचयन्ते चिन्ता यस्मिन्प्रवृत्ता भृशविशदधियः संश्रये तं गिरीशम् ।।३।।
[3]भिन्दानमेनांसि दुरासदानि प्रत्यूहवर्गप्रभवानि तानि। राजानमाघातपरंपराणामारादुपासे गिरिजाभिजातम्।।४।।
श्रीमद्व्यासपयोनिधिर्निधिरसौ सत्सूक्तिपङ्क्तिस्फुरन्मुक्तानामनवद्यहृद्यविपुलप्रद्योतिविद्यामणिः ।
क्षान्तिः शान्तिधृती दयेति सरितामेकान्तविश्रान्तिभूर्भूयान्नः सततं मुनीन्द्रमकरश्रेणीश्रयः[4] श्रेयसे ।।५।।
यद्भाष्याम्बुजजातजातमधुरप्रेयोमधुप्रार्थनासार्थव्यग्रधियः समग्रमरुतः स्वर्गेऽपि निर्वेदिनः ।
यस्मिन्मुक्तिपथो मुमुक्षुमुनिभिः संप्रार्थितः संबभौ तस्मै भाष्यकृते नमोऽस्तु भगवत्पादाभिधां बिभ्रते ।।६।।
यत्पादाम्बुजचञ्चरीकधिषणा निर्वाणमार्गाधिगा पङ्क्तिर्मुक्तनिसर्गदुर्गदुरिता वाचंयमानामियम् ।
यस्मिन्नित्यमिदं शमादि समभूद्बोधाङ्कुरो मे यतः शुद्धानन्दमुनीश्वराय गुरवे तस्मै परस्मै नमः ।।७।।
मातर्नतोऽस्मि भवतीमथ चार्थये त्वां चेतः सरस्वति परास्य पराञ्चमर्थम् ।
शारीरके महदनुग्रहसंप्रसन्नमेकाग्रमस्तु वचसा सह सम्यगर्थे ।।८।।

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने। व्योमवद् व्याप्तदेहाय दक्षिणामूर्तये नमः।।

१. आन्ध्यम् = अविद्या। २. 'अग्र्यधिषणैः' इति पाठः संभाव्यते। 'दृश्यते त्वग्र्यया बुद्ध्या' इति श्रुत्यनुसारात्।
३. विघ्नानां हेतुभूतानि पापानि नाशयन्तम्, आघातपरम्पराणां राजानं = विघ्नराजम्। ४. श्रयः = आश्रयः।

प्रकटार्थविवरणम्

ज्ञात्वाऽपि यस्य बहुकालमचिन्तनेन व्याख्यातुमक्षमतया परितापि चेतः ।
तस्योपतापहरणाय मयेह भाष्ये प्रारभ्यते विवरणं [1]प्रकटार्थमेतत् ।।२।।

[2]श्रीमच्छारीरकं व्याचिख्यासुर्भगवान् भाष्यकारो [3]विषयाद्यसम्भवेनाव्याख्येयत्वमाशङ्क्य बन्धमिथ्यात्वाङ्गीकारेण विषयादिकं सम्भावयन् व्याख्येयत्वं प्रतिजज्ञे— **युष्मदस्मदित्यादिना**। तत्रत्याचिख्यासू च **अमृतानन्दब्रह्मप्रकाशिकाकारौ** आचख्यतुः— 'व्यर्थमिदमनर्थानृतत्ववर्णनम्, शास्त्रप्रामाण्यात् ज्ञानेन सत्यबन्धध्वंससंभवात्। अथ लोके ज्ञानात् सत्यस्य ध्वंसो न दृष्टः? तत् किमिदानीमामुष्मिकफलं कर्मशास्त्रं [कर्म शास्त्रात्] नोपेयते? किञ्च लोकेऽपि तार्क्ष्यस्मरणाद्विषं शंशमीति, सेतुदर्शनाच्चाशुभं सनीस्रस्यते, विषयदोषदर्शनाच्च रागो दनीध्वस्यते। यथा च ज्ञानं स्वप्रागभावं दन्दहीति, तथाऽनर्थहेतुमपि धक्ष्यति। तस्मात्सत्यत्वेऽपि बन्धस्य ध्वंससंभवान्न तदर्थमनर्थवैतथ्यमास्थेयम्। वाक्यार्थान्वयसिद्धये जीवनिर्णयोऽपि जीवपादे[4] प्रववृते। अतो न तदर्थमपि तद्वर्णनम्' इति।

भाष्यभावप्रकाशिका

नानानिबन्ध-पद-लब्धसदर्थमाना सत्संप्रदायपदवीरनुवर्तमाना ।
वाचस्पतेरपि वचांसि [5]विवर्तयन्ती वागीश्वरीव विदुषां कृतिरिष्टदैषा ।।५।।

न्यायनिर्णयः

श्रद्धाभक्ती पुरोधाय विधायागमभावनाम्। श्रीमच्छारीरके भाष्ये करिष्ये न्यायनिर्णयम् ।।९।।

नित्याध्ययनविध्युपादापितवेदान्तवचोभिरापाततः प्रतिपन्नं शास्त्रारम्भौपयिकमनुबन्धजातं न्यायतो निर्णेतुं भगवान् बादरायणः सूत्रितवान् **'अथातो ब्रह्मजिज्ञासा'** इति। तत्र प्रमातृत्वादिबन्धस्याध्यासत्वं, धर्ममीमांसया ब्रह्ममीमांसाया गतार्थताऽभावः, विशिष्टाधिकारिसंभवः, विषयादिसत्त्वं चेति चत्वारोऽर्थाः सूचिताः। तथाहि— सत्यत्वे बन्धस्य बद्धाबद्धयोर्जीव-ब्रह्मणोरैक्यानुपपत्तेः, सत्यस्य च ज्ञानादनिवृत्तेः, ज्ञानस्य चाज्ञानमात्रविरोधित्वात्, उत्तरज्ञानस्य च [6]विरोधिगुणतया पूर्वज्ञानादि-निवर्तकत्वात्, विषयप्रयोजनसिद्धिहेतुतया बन्धस्याध्यासता सूचिता। पूर्व[तन्त्र]सिद्धत्वे वेदान्तविचारस्य विशिष्टाधिकारिणश्चाभावे तं प्रति तत्कर्तव्यतोक्तेरयोगादगतार्थत्वं विशिष्टाधिकारिसंभवश्च ध्वनितः। [7]त्वमर्थदृष्टबन्धस्यान्यदी-यज्ञानादनिवृत्तेः, [8]तदर्थज्ञानमपि [9]तन्निबर्हि त्वमर्थविषयमेवेत्यर्थात्तदैक्यं विषयः सूचितः। मुमुक्षोरथशब्दद्योतितस्य ज्ञानाय

---

१. प्रकटार्थमिति। अनेन प्रसिद्धविवरणग्रन्थस्य गूढार्थता ध्वन्यते।

२. श्रीमच्छारीरकमिति। शरीरमेव शरीरकम्। तत्र भवः शारीरको जीवः। तमधिकृत्य प्रणीतं सूत्रमपि उपचारात् शारीरकपदेनोच्यते। अनेन शास्त्रविषयब्रह्मणः प्रत्यगभेदः सूच्यते।

३. विषयादीति। विषयप्रयोजनाधिकारिरूपानुबन्धत्रयं प्रेक्षावत्प्रवृत्त्यङ्गं सूत्रितम्— "अथातो ब्रह्मजिज्ञासा" इति। तत्राथशब्देनाधिकारी सूचितः। जिज्ञास्यत्वोक्त्या ब्रह्मशब्दार्थो विषय उक्तः। स च प्रत्यगभिन्नं सत्यज्ञानानन्दात्मकं शुद्धं स्वरूपमित्यग्रे निरूपयिष्यते। इच्छायाः फलविषयकत्वात् सन्प्रकृत्यर्थभूतं ज्ञानं प्रयोजनमुक्तम्। ब्रह्मज्ञानस्य च पुरुषार्थत्वमनर्थनिवर्तकत्वेन। परमप्रयोजनं त्वारोपितरूपनिवृत्त्या स्वरूपाविर्भावः इति सूत्रकारेणैव फलाध्याये निरूपयिष्यते— "सम्पद्याविर्भावः स्वेन शब्दात्" इति।

तत्र कर्तृत्वाकर्तृत्वादिविरुद्धधर्मकयोर्जीवब्रह्मणोरभेदासंभवेन विषयस्य, ज्ञानेन सत्यस्य निवृत्त्यसंभवात् प्रयोजनस्य चासंभवात् शास्त्रस्यानारभ्यत्वमाशङ्क्य बन्धस्याध्यस्तत्वेन तयोः संभवमुपपाद्य शास्त्रारम्भं समर्थयितुमुपोद्घातप्रक्रियायां प्रवृत्ता भगवन्तो भाष्यकाराः शास्त्रारम्भोपयोगितयाऽध्यासमेव प्रथमं व्युत्पादयामासुः। उक्तं हि— "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते" इति।

४. जीवपादे = ब्र. सू. ३ अ. २ पादे। ५. विवर्तयन्ती=विवृण्वती। ६. विरोधीति। ज्ञानत्वेन तु ज्ञानस्याज्ञानमात्रविरोधित्वमिति भावः।

७. त्वमर्थो जीवः। ८. तदर्थो ब्रह्म। ९. तन्निबर्हि = त्वमर्थगतबन्धनिवर्तकम्।

प्रकटार्थविवरणम्

अत्रोच्यते— सार्थकमिदमनर्थवैतथ्यवर्णनम्; तदन्तरेण शास्त्रादपि [1]तदसिद्धेः। शास्त्रं किल लोकावलोकितां पदशक्तिं पदार्थयोग्यतां चोरीकृत्य प्रवरीवर्ति; इतरथा "अन्धो मणिमविन्दत्" इत्यादेरपि [2]यथाश्रुते मात्वापातात्, अपूर्वकल्पनानवकाशप्रसङ्गाच्च। लोके च शुक्त्यादितत्त्वज्ञानं तदज्ञानं परं पोप्लुषीति। ततः संसारस्यापि सत्यत्वे न सम्यग्ज्ञानात् प्लुष्टिः स्यात्। न च तार्क्ष्यस्मरणमात्राद्विषोपशमः; अतिप्रसङ्गात्, किन्तु ध्यानमन्त्रप्रयोगादिक्रियया। विषयदोषदर्शनञ्च वैराग्यकारणम्। न च रागध्वंसो वैराग्यम्, भोगेन ध्वस्तेऽपि रागे वैराग्याननुगमात्; किन्तु रागविरुद्धश्चेतोवृत्तिविशेषः। न च सेतुदर्शनमशुभशान्तयेऽलम्, प्रमाणाभावात्। "सेतुं दृष्ट्वा विमुच्येत ब्रह्महा ब्रह्महत्यया" इति विधेरिति चेत्; न दर्शनं विध्यर्हम् [3]क्रियासाधनत्वात्, स्वर्गवत्; अक्रियात्वञ्च प्रकाशत्वात्, प्रदीपवत्। क्रियात्वे च [4]संवित्साधनत्वाभावप्रसङ्गात्, गतिवत्। किञ्च यद् विधिजन्यपुरुषेच्छाप्रयत्नसाध्यं कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं तस्यैव विधितः फलसंबन्धोऽवकल्पते, यथा कर्मणः। न तथा ज्ञानं सति कारणे पुरुषेच्छामप्यपेक्षते। अनिच्छतोऽपि अनिष्टज्ञानादिदर्शनात्। "आज्यमवेक्षेत" "आदित्यमवलोकयेत्" इति चाक्षुससन्निपातविधानम्; ज्ञानं त्वर्थसिद्धमनूद्यते। न च स्मृतेर्वैयर्थ्यम्; "ब्रह्महाऽपि प्रमुच्येत तस्मिन् स्नात्वा महोदधौ" इत्यादिस्मृतिविहितब्रह्मचर्याद्यनेकाङ्गसहितदूरतरदेशगमनसाध्यब्रह्महत्यादिनिवृत्तिफलसेतुस्नानस्तु[5]त्यर्थतयाऽर्थवत्त्वोपपत्तेः। यस्य हि दर्शनमात्रादशुभोपशमः, किमु तत्र [6]स्नानादिना। अन्यथा दूरगमनादेरानर्थक्यात्। एषैव गतिः— "दक्षिणाभिमुखं देवं डोलमानं सुरेश्वरम्। सकृद् दृष्ट्वा तु गोविन्दं मुच्यते ब्रह्महत्यया॥" "अग्निचित् कपिला सत्री राजा भिक्षुर्महोदधिः। दृष्टमात्राः

न्यायनिर्णयः

विचारविधानात् तत्साध्यज्ञानान्मुक्तिः सूचिता। ब्रह्मज्ञानाय च विचारविधानाद् ब्रह्मणः शक्यप्रतिपाद्यतया वेदान्तैः संबन्धोऽपि दर्शितः। तदेतद्भाष्यकृद्यथाक्रमं व्युत्पादयिष्यति।

अस्य चाधिकरणस्य प्राथम्यान्नाधिकरणसंगतिः। उत्तराधिकरणसंगतिस्तु तस्यैवानेनेति नास्योच्यते। विचारविध्यपेक्षितविषयाद्यर्पकश्रुतिभिरस्योत्थानादुत्थाप्योत्थापकत्वं श्रुतिसंगतिः। इदं च धर्मजिज्ञासासूत्रवदुपोद्घाततया 'चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते' इति न्यायेन शास्त्रेण संबध्यते। विचारारम्भोपयोगिनीनामधिकार्यादिश्रुतीनां स्वार्थे समन्वयोक्तेरस्य विशेषतः समन्वयाध्यायसंगतिः। [7]स्पष्टब्रह्मलिङ्गानां विषयाद्यर्पकवाक्यानां स्वार्थे समन्वयोक्त्या विशेषतोऽस्याद्यपादेन संबन्धः। पूर्वपक्षे विचारानारम्भात् तदधीनज्ञानाभावादुपायान्तरसाध्या मुक्तिः, सिद्धान्ते तु तदारम्भसंभवात् तदधीनज्ञानसिद्धेस्तेनैव मुक्तिः सिध्यतीति फलभेदः। तच्चेदमधीतिविधि[8]वदन्तर्भूतमेव शास्त्रे तदारम्भकार्यतापरम्।

---

१. तदसिद्धेरिति। ज्ञानात् सत्यबन्धनिवृत्त्यसिद्धेरित्यर्थः। तथा च श्रुतोपपत्त्यर्थमेव बन्धस्य मिथ्यात्वं कल्पनीयमिति भावः।

२. यथाश्रुत इति। "अपाणिपादो जवनो ग्रहीता" "सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्" इत्यादिश्रुतिस्मृतिभिस्तुल्यार्थेयं श्रुतिः। न तु यथाश्रुतार्था। अस्या एव श्रुतेः— "अन्धः = योगाभ्यासेन निरुद्धेन्द्रियः, मणिम् = मणिमिव स्वयंप्रकाशमात्मानम्, अविन्दत् = समाधिना पश्यति"- इत्यादिः सायणभाष्ये द्वितीयोऽप्यर्थः प्रदर्शितः। द्र. तै. आ. १-११। ३. अक्रियेति। क्रियातत्साधनभिन्नत्वादित्यर्थः।

४. संविदिति। अत्र संविद् विषयेऽभिव्यक्तं चैतन्यम्। मनःपरिणामविशेषरूपं च ज्ञानं तद्व्यञ्जकत्वेन तत्साधनमिति ग्रन्थकृतैव जिज्ञासापदार्थविवेचनावसरे स्फुटीकरिष्यते।

५. स्तुत्यर्थतयेति। "सेतुबन्धपथे भिक्षां चातुर्वर्ण्यात् समाहरेत्" (याज्ञ. स्मृ. मिता. ३-२५०) इत्यादिना विहिताङ्गकलापविशिष्टसेतुस्नानस्तुत्यर्थं 'सेतुं दृष्ट्वा' इत्यादि वचनमिति भावः।

अन्ये तु सेतुदर्शनस्यापि पापविशेषनिवर्तकत्वं स्वीकृत्य पूर्वोक्ताङ्गकलापविशिष्टरूपेण दर्शनविध्यङ्गीकारेण विहितक्रियात्वेन रूपेण तस्य पापनिवर्तकत्वेऽपि अधिष्ठानतत्त्वज्ञानत्वेन तन्निवर्तकत्वाभावात् तत्त्वेन ज्ञाननिवर्त्यस्य मिथ्यात्वं सुस्थिरमेवेत्याहुः। यथा च वेदान्तोत्थज्ञानस्याधिष्ठानतत्त्वज्ञानत्वेनैव बन्धनिवर्तकत्वं, न प्रकारान्तरेण; तथा प्रपञ्चितमद्वैतसिद्धौ। द्र. पृ. ५३०। ६. स्नानादिनेति। 'इति स्तुतिः' इति शेषः।

७. ब्रह्मलिङ्गानां स्पष्टत्वं संभाव्यमानस्वारस्यकब्रह्मेतरलिङ्गानभिभूतत्वम्। अधिकं द्वितीयपादारम्भे टिप्पण्यां द्र.।

८. 'स्वाध्यायोऽध्येतव्यः' इत्यध्ययनविधिवदित्यर्थः। स हि वेदान्तर्भूत एव सन् वेदाध्ययनकर्तव्यतापरः।

प्रकटार्थविवरणम्

पुनन्त्येते तस्मात् पश्येत नित्यशः॥'' इत्यादेः; 'गोविन्दाग्निचिदाद्यर्चापरिचर्यादौ तात्पर्यात्। अतो विधितो न बोधस्य फलसंबन्धः। नापि ज्ञानं स्वप्रागभावं जेघ्नीयते, भावस्याभावयोगादल[2]ब्धात्मकस्य घातकत्वायोगात्; किन्तु तन्निवृत्तिरेव ज्ञानम्। न च तद्ध्वंसे तस्याध्वस्तत्वम्, पुनरुदयो वा; सकृज्जातस्य नाशस्य तत्रोर्ध्वमुपलक्षणत्वेन ध्वस्तत्वव्यवहारप्रवर्तकत्वात्। किञ्च ज्ञानातिरिक्तप्रागभावनिवृत्तेः भावत्वेऽ[3]नवस्था; अभावत्वे तस्या एव प्रागभावत्वप्रसङ्गः[4]। तुल्यकालत्वे न ज्ञानजन्यता; न चैकस्यास्सामग्र्याः विरुद्धकार्यद्वयहेतुत्वसंभवः। तस्माद् ज्ञानमज्ञाननिरासस्यैव निदानमिति सत्यत्वे बन्धस्य ज्ञानात् ध्वंसो नोपपद्यते।

सत्यत्वं चानृतविरोधित्व[5]मविवक्षितविशेषं व्याप्यतयोपादीयते धूमवत्त्ववत्, अपरथा तस्याप्यव्याप्यतापातात्; अतो विकल्पजालप्रलापो निष्फलः— परमार्थत्वं किं प्रामाणिकत्वमात्रमुत तात्त्विकप्रमाणवत्त्वमित्यादि। तस्मात् सनिदानाध्यासध्वंसरूपप्रयोजनसिद्धयेऽध्याससमर्थनं समञ्जसम्।

यच्चोवाच— न [6]परमात्माऽध्यस्यति, विद्यास्वभावत्वात्; न जीवः, अनतिरेकात्, अतिरेकेऽपि कल्पिततत्वात्— इति; तत्रोच्यते; अज्ञोऽध्यस्यति, तस्य भ्रान्तत्वप्रसिद्धेः। अज्ञश्चाज्ञानप्रतिबिम्बिता चिदुच्यते; यथा न घटावच्छिन्नस्य अनवच्छिन्नस्य वाऽऽकाशस्य घटावच्छेदः; [7]अनवस्थानात्, विरोधाच्च, किन्तु स्वरूपस्य। तथा नाज्ञानावच्छिन्नस्यानवच्छिन्नस्य वा

---

१. गोविन्देति। यथाक्रममर्चादौ अन्वयः।

२. अलब्धात्मकस्येति। उत्पन्नं हि ज्ञानं लब्धात्मकं सत् प्रागभावं निवर्तयेत्। न च तत् संभवति। प्रतियोग्यभावयोरयौगपद्यात्। यदा च प्रागभावस्तदा ज्ञानमनुत्पन्नमलब्धात्मकं न प्रागभावं नाशयितुमर्हतीति भावः।

३. अनवस्थेति। प्रागभावनिवृत्तेः प्रतियोग्यतिरिक्तभावरूपत्वाङ्गीकारे तस्या अपि जन्यत्वेन प्रागभावान्तरं स्वीकार्यम्। तन्निवृत्तेरपि तुल्यन्यायेन प्रतियोग्यतिरिक्तत्वे भावत्वे च तस्या अप्यन्यः प्रागभावः। एवं तन्निवृत्तेरपीत्यनवस्था। प्रतियोग्यतिरिक्ता भावरूपा प्रागभावनिवृत्तिरनुपलम्भपराहतेत्यपि बोध्यम्।

४. प्रसङ्ग इति। उत्पन्नं ज्ञानं स्वोत्पत्तिद्वितीयक्षणे स्वप्रागभावं नाशयतीति स्वीकारे ज्ञानजन्यनिवृत्तेरभावत्वे निवर्त्यस्य प्रागभावस्य भावत्वप्रसङ्गः। निवृत्तेरभावत्वे निवर्त्यस्य भावत्वदर्शनात्। तथा नियमानङ्गीकारेऽपि निवर्त्यस्याभावस्य निवृत्तिं प्रत्येव प्रागभावत्वं स्यात्, न तु ज्ञानं प्रति। ज्ञानेन सहावस्थानात्। प्रतियोग्युत्पत्तेः प्राक्कालमात्रसम्बन्धी ह्यभावः प्रागभावः। इदं च दोषद्वयमिष्टसिद्धौ उक्तम्। द्र. पृ. ५१. परं द्वितीयो दोषः ज्ञानजन्यनिवृत्तेः भावत्वपक्षेऽपि समानः।

'अभावत्वे तस्या एव प्रागभावत्वप्रसङ्ग' इति वदन्तः प्रकटार्थकारास्तु अभावत्वपक्षे असाधारणं दोषमापादयन्तीति प्रतीयते। प्रायः प्रकटार्थवाक्यैरेव गुम्फिते 'वेदान्ततत्त्वालोका'ख्यग्रन्थेऽपि— 'निवृत्तेर्भावत्वे ऽनवस्था, अभावत्वे च प्रागभावत्वप्रसङ्गः' (पृ.५५) इति पाठदर्शनमिदमेवोपोद्वलयति। सति चैवं ज्ञानजन्यनिवृत्तेरेव ज्ञानप्रागभावत्वमिहाऽऽपाद्यत इति सिध्यति। उपपत्तिस्तु तत्र विद्वद्भिरनुचिन्तनीयेति।

५. अविवक्षितेति। यथा-धूमः किं महानसनिष्ठो हेतुः, उत पर्वतनिष्ठः? आद्येऽसिद्धिः। अन्त्ये दृष्टान्ते साधनवैकल्यम् इति दूषणस्य धूममात्रस्य हेतूकरणात् नावसरः, तथा अबाध्यत्वमात्रस्य ज्ञाननिवर्त्यत्वव्याप्यतया विवक्षणात् न विकल्पावसर इत्यर्थः।

६. न परमात्मेत्यादि। अविद्या ह्यध्याससमानाश्रया स्वीकर्तव्या, अध्यासोपादानत्वात्। न चासौ परमात्मानमाश्रयते; तस्य विद्यास्वभावत्वात्, विद्याऽविद्ययोर्विरोधात्, भ्रान्तत्वप्रसङ्गाच्चा अथ जीवस्तदाश्रयः; तर्हि वक्तव्यम् - स परमात्मनोऽभिन्नो भिन्नो वेति। तत्राद्ये पूर्वोक्त एव दोषः। द्वितीये जीवस्यापि कल्पितत्वेन अविद्याधीनस्थितिकस्याविद्याश्रयत्वायोग इत्याक्षेप्तुराशयः।

समाधातुस्तु— मायाप्रतिबिम्ब ईश्वरः, अविद्याप्रतिबिम्बश्च जीवः। बिम्बप्रतिबिम्बोभयानुस्यूतं शुद्धं चैतन्यम्। तदेवाविद्याया आश्रयः। स्वरूपज्ञानस्य चाविद्याविरोधित्वाभावात् न तदाश्रयत्वविरोधः। अविद्याकार्याध्यासश्च प्रतिबिम्ब एव भाति, न स्वाश्रये। अत एव आकाशाश्रितजलगतं चलनादि तत्र प्रतिबिम्बित एवाकाशे प्रतीयते, न बिम्बभूते। अत एव न परमात्मनो भ्रान्तत्वप्रसङ्गः। प्रतिबिम्ब एवाविद्यायाः स्वकार्यकरत्वादिति।

७. अनवस्थानात् विरोधाच्चेति। घटावच्छिन्नस्य नभसो घटेनावच्छेदाङ्गीकारे पूर्वं यो घटावच्छेदः सोऽपि घटावच्छेदविशिष्टे, एवं सोऽपि तत्पूर्वघटावच्छेदविशिष्टे इत्येवमनवस्था। अनवच्छिन्नस्य नभसो घटेनावच्छेद इति विरुद्धम्, अवच्छिन्नत्वानवच्छिन्नत्वयोर्विरोधात्। अतो नभस्स्वरूपमेव घटेनावच्छिद्यते। दार्ष्टान्तिकेऽवच्छेदः सम्बन्धः। तथा च शुद्धं चैतन्यमविद्याश्रय इति न दोषः इति भावः।

प्रकटार्थविवरणम्

चिद्धातोरज्ञानावच्छेदः, किन्तु स्वरूपस्य। क्वचित् तु ब्रह्मणोऽ[1]ज्ञत्वाभिधानं परिच्छिन्नाश्रयत्वाभावाभिप्रायम्। जीवाश्रयत्वाभिधानञ्च स्वावच्छिन्न एव स्वकार्याध्याससामर्थ्याभिप्रायम्। यथा ह्याकाशतन्त्रं नीरं न तत्र स्वकार्याध्यारोपं चर्करीति, किन्तु स्वात्मनि प्रतिबिम्बिते स्वकार्याध्यारोपं चेक्रीयते, जानुमात्रेऽपि नीरे साभ्रनक्षत्रस्य नभसो दोधूयमानतादर्शनात्; तथाऽज्ञानमपि स्वप्रतिबिम्बितचिति स्वकार्याध्यारोपकरम्।

तदयं [2]सङ्क्षेपः— एका तावदनाद्यनिर्वाच्या भूतप्रकृतिश्चिन्मात्रसम्बन्धिनी माया। तस्यां चित्प्रतिबिम्ब ईश्वरः तत्परिणामैरेव सर्वज्ञत्वादिमान्। बिम्बकल्पं तु निर्विकल्पकं ब्रह्म कैवल्यावलम्बनम्। तस्या एव परिच्छिन्नानिर्वाच्यानन्तप्रदेशेष्वज्ञानाभिधानेष्वावरणविक्षेपशक्तिमत्सु प्रतिबिम्बितं तदेव चैतन्यमनन्तजीवव्यवहारास्पदम्। न च लोके प्रतिबिम्बस्य बिम्बदर्शनपूर्वकत्वं, स्वरूपैक्यात्। इष्टैव [3]विशिष्टस्य तत्तन्त्रता। न च निरंशस्यैकस्य कृत्स्नस्यानन्तप्रतिबिम्बभावो विरो[रु]ध्येत, "रूपं रूपं प्रतिरूपो बभूव" इत्यादिश्रुतेः, नभसि दर्शनाच्च। प्रत्येकमज्ञानानुबन्धश्च "अविद्यायामन्तरे वर्तमानाः" "न तं विदाथ" "तेन मुह्यन्ति जन्तवः" इत्यादिश्रुतिस्मृतिलिङ्गसिद्धोऽनुभवसिद्धश्च नापलापमर्हति। सति चैवं गुरुशिष्यमुक्तामुक्तादिविभागोऽपि सुगमः। तथा हि यस्य बिम्बकल्पनिर्विकल्पब्रह्मात्मानुभवः तस्य स्वोपाध्यज्ञानभङ्गे तज्जान्तःकरणापसरणे प्रमातृत्वानुपपत्तौ स्वरूपावस्थानं मुक्तिः सञ्जाघटीति। यस्तु मायाविवर्तो महाभूतप्रपञ्चः स विद्यमानोऽपि [4]निरिन्द्रियेणेव रूपं नानुबोभूयते। "भूयश्चान्ते विश्वमायानिवृत्तिः" इत्यत्र मायाशब्देन मायैकदेशाविद्याभिधानादागामिसकलसंसारकारणाविद्यानिवृत्तिर्न स्वरूपेण मायायाः; [5]सदेहत्वादिव्याघातात्। मिथ्यात्वेऽप्यनादित्ववदनुच्छेदसम्भवात्। न चैवमद्वैतव्याघातः; संवित्सुखात्मन एकरसत्वादनिर्वाच्यत्वाच्च विभागस्येति। तस्मादेकस्यैव चिद्धातोरज्ञानानुप्रवेशेन प्रमातृत्वाद्यध्यासशालित्वं संसारः, तद्ध्वंसश्च मोक्ष इत्यद्वैते न कोऽप्यवकरः। यद्यपि चैतद्विस्तरेणाभिधास्यते, तथापि श्रोतृप्रवृत्त्यङ्गतया आदावेवाभ्यधायि किञ्चिदिति सकलमनाकुलम्।

भाष्यभावप्रकाशिका

"तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्, अयमात्मा ब्रह्मे" त्यादिवाक्यप्रतिपन्नं जीवब्रह्मणोरेकत्वलक्षणं विषयम्, "ब्रह्मविदाप्नोति परम्" "तरति शोकमात्मविदि" त्यादिश्रुतिप्रतिपन्नं प्रयोजनं च प्रथमसूत्रेण शास्त्रारम्भसिद्धयेऽर्थात् सूचयितुं प्रतिपादयितुं च तत्प्रत्यनीकस्य बन्धस्याध्यासात्मकत्वं लक्षण-सम्भावना-सद्भाव-प्रमाणैः सिषाधयिषुः प्रथमं तावदध्यासमाक्षिप्य

न्यायनिर्णयः

तत्र वेदान्तमीमांसाशास्त्रं विषयः। तदारभ्यमनारभ्यं वेति विषयाद्यसंभवसंभवाभ्यां संशयः। प्रामाणिकत्वेन प्रमातृत्वादिबन्धस्य सत्यतया तत्त्वज्ञानानपोह्यत्वात्, बद्धाबद्धयोर्जीवब्रह्मणोरैक्यायोगात्, तदभावे च बन्धाध्वस्तेः, बन्धाध्वस्तौ च फलाभावात्, प्राच्या च मीमांसया वेदार्थमात्रोपाधौ प्रवृत्तया गतार्थत्वात्, फलेच्छावतोऽधिकारिणोऽपि [6]तुच्छत्वात्, तद्विशेषणानां च दुर्वचत्वात्, ब्रह्मणः प्रसिद्धत्वे विषयप्रयोजनयोरनुपपत्तेः, अप्रसिद्धत्वे संबन्धप्रयोजनयोरसिद्धेः, तस्य च निःसामान्यविशेषत्वात्, असंभावितविषयादिकमनारभ्यं शास्त्रमिति पूर्वपक्षः। प्रमातृत्वादेर्व्यावहारिकमानसिद्धत्वेऽपि तात्त्विकमानासिद्धतया तथाविधमानजनितबोधबाधाविरोधा[7]दुक्तविषयादिप्रतिलम्भात्, धर्ममीमांसायाश्च वेदार्थैकदेशधर्ममात्रोपहिततया ब्रह्मास्पर्शितया तन्मीमांसया गतार्थताऽनव-

---

१. अज्ञत्वाभिधानम्। "मायिनं तु महेश्वरम्" इत्यादौ अज्ञानाश्रयत्वाभिधानमित्यर्थः।

२. अत्रेदं बोध्यम्। मायायामावरणविक्षेपशक्त्योऽनन्ताः सन्ति। तादृशैकैकशक्तिविशिष्टो मायायाः प्रदेशः एकैकाऽविद्योच्यते। तत्र माया समष्टिरूपा ईश्वरोपाधिः। अविद्या च व्यष्टिरूपा जीवोपाधिः। अतो मायाऽविद्ययोस्तादात्म्यस्वीकाराद्भेदसिद्धान्तस्य न क्षतिरिति।

३. विशिष्टस्य = प्रतिबिम्बत्वविशिष्टस्य, तत्त्वेन ज्ञानस्येति यावत्। तत्तन्त्रता = बिम्बत्वविशिष्टतन्त्रता, बिम्बत्वेन बिम्बज्ञानाधीनतेत्यर्थः।

४. निरिन्द्रियेणेति। अन्धेन विद्यमानमपि रूपं यथा नानुभूयते, तथा मुक्तेन विद्यमानोऽपि प्रपञ्चो नानुभूयते, तत्साधनान्तःकरणाभावादिति भावः।

५. सदेहत्वादीति। मायायाः स्वरूपेण निवृत्तौ अस्मदादीनामनुभूयमानदेहवत्त्वाद्यनुपपत्तेरित्यर्थः।

६. तुच्छत्वात् = असिद्धेः।

७. अविरोधादिति। तात्त्विकप्रमाणेन वेदान्तेन जनितो यो बोधस्तेन बाधसंभवादित्यर्थः।

अध्यासभाष्यम्

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ

प्रकटार्थविवरणम्

प्रयोजनादिसिद्धिसमर्थमध्यासं गौणवादालम्बनेन प्रथममाक्षिपति। तथा हि मेनिरे **मीमांसकाः**— संसर्गाध्यासो भेदाग्रहपुरस्सरो दृष्टः शुक्तिरूप्याद्यध्यासे, देहाद्यात्मनोश्च युष्मदस्मच्छब्दार्थतया 'इदम्' 'अहम्' इति प्रत्ययविषयतया [च] स्फुटतरभेदावभासयोर्व्यापकनिवृत्त्या व्याप्याध्यासनिवृत्तिरिति। तदेतदाह— **युष्मदस्मत्प्रत्ययगोचरयोरिति।** युष्मच्चास्मच्च युष्मदस्मदौ शब्दौ, प्रत्ययौ च 'इदमहम्' इति तयोर्गोचरौ, तयोरिति विग्रहः। शब्दानुकारादेव "प्रत्ययोत्तरपदयोश्च" इति न त्वन्मदादेशप्राप्तिः। केवल[लं] विषयस्यैव विषयान्तरेऽध्यासो दृष्टः; तदभावाच्च नाध्यास इत्याह— **विषयविषयिणोरिति।**

भाष्यभावप्रकाशिका

युष्मदस्मदि त्यादिना **मिथ्येति भवितुं युक्तमि** त्यन्तेन भाष्येणार्थाच्च "सुतरामितरेतरभावानुपपत्ति"रि त्यन्तेन तत्त्वानुस्मरणलक्षणं मङ्गलाचरणं सम्पादयति। 'इदमस्मत्प्रत्ययगोचरयो'रिति वक्तव्ये युष्मद्ग्रहणमत्यन्तभेदोपलक्षणार्थम्; त्वङ्कारवदिदंकारस्याहंकार-प्रतियोगित्वाभानात्, 'एते वयम्' इति प्रयोगदर्शनात्। युष्मच्चास्मच्च युष्मदस्मदी। युष्मच्छब्देन जडस्वभावा बुद्धीन्द्रियदेहा उच्यन्ते;

न्यायनिर्णयः

काशात्, 'अध्यक्षाद्यधिगतमिथ्याभावस्य बन्धस्य ज्ञाननिवर्त्यतया तन्निवृत्तिकामस्याधिकारिणः सुलभत्वात्, विशेषणानां च विवेकादीनामतीते वर्तमाने वा जन्मनि कृतसुकृतजनितचित्तप्रसादासादितानामनुमानागमाधीनतया सुवचत्वात्, ब्रह्मणश्च ब्रह्म-पदादात्मत्वाच्च सिद्धावपि विचारं विना ²मानादसिद्धेः अनन्यलभ्यतया विषयत्वात्, तदवगतेश्च फलत्वात्, अत्यन्तासिद्ध्यभावाच्च शक्यप्रतिपाद्यतया संबन्धादिसिद्धेरारोपितसामान्यविशेषभावमादाय तदीयविषयत्वस्य प्रतिपाद्यत्वात् उक्तविषयादिमदिदं शास्त्रमारभ्यमिति सिद्धान्तः।

तदिदं हृदि निधाय वेदान्तमीमांसाशास्त्रं व्याख्यातुकामो भगवान् भाष्यकारः शास्त्रारम्भार्थमाद्यसूत्रेणार्थतः सूचितं विषयादि वदितुं विरोधिनो बन्धस्याध्यासत्वं लक्षणसंभावनासद्भावप्रमाणैः सिषाधयिषुरादावध्यासमाक्षिपति— **युष्मदस्मत्प्रत्ययगोचरयोः** इत्यादिना **मिथ्येति भवितुं युक्तम्** इत्यन्तेन भाष्येण। अर्थाच्च 'सुतरामितरेतरभावानुपपत्तिः' इत्यन्तेनानुपप्लुतं ³चिन्मात्रमात्मान-मनुसंदधानस्तत्त्वानुस्मरणं मङ्गलाचरणं विघ्नोपशमनाद्य⁴र्थं संपादयति। चैत्रे मैत्रोऽयमिति भ्रान्तिरन्यत्रैक्यप्रमित्यपेक्षा [तत्-] संस्कारजन्यत्वात्, तत्प्रमितिश्चैक्यकृतेत्यात्मानात्मनोरैक्याध्यासेऽपि तत्प्रमित्यादेर्वक्तव्यतां मन्वानस्तयोरैक्याभावे(ऽपि) त्रिविधं विरोधं हेतुमाह— **युष्मदस्मत्प्रत्ययगोचरयोरिति।** न च 'प्रत्ययोत्तरपदयोश्च' इति सूत्रे प्रत्यये चोत्तरपदे च परतो युष्मदस्म-दोरेकार्थवाचिनोर्मपर्यन्तस्य त्वमावादेशावित्युक्तत्वात् त्वत्पुत्रो मत्पुत्र इतिवत् त्वन्मत्प्रत्ययगोचरयोरिति स्यादिति युक्तम्। 'त्वमावेक-वचने' इति सूत्रादेकार्थाभिधायिनोर्युष्मदस्मदोर्मपर्यन्तस्य स्थाने त्वमावादेशौ भवत इति व्याख्यानादेकवचन इत्यधिकारात्; अत्र च युष्मदस्मदोरेकार्थवाचित्वस्याविवक्षितत्वात् युष्मदस्मद्ग्रहणाविरोधात्। अस्मदर्थे साक्षिणि नभोवदौपाधिकं बहुत्वम्। न चैवं यौष्माकीणमित्यादाविव बहुवचनमनुसृत्य विगृह्येत; विरोधोक्त्यनुगुणतया यथा तथा विग्रहेऽपि निवारकाभावात्। ⁵युष्मदस्मत्पद-योश्चेतनाचेतनार्थत्वादात्मानात्मवैलक्षण्यार्थमिदमस्मत्प्रत्ययगोचरयोरिति वक्तव्येऽपि युष्मद्ग्रहणमत्यन्तभेदोपलक्षणार्थम्⁶। न हि त्वंकारवदिदंकारस्याहंकारप्रतियोगित्वम्, एते वयमिमे वयमित्यादिप्रयोगात्। न च यूयं वयं वयमेव यूयमितिवदौपचारिकत्वम्,

१. अध्यक्षादीति। युक्तिसहकृतप्रत्यक्षानुमानादीत्यर्थः। २. मानादसिद्धेः = प्रमाणजन्यज्ञानाविषयत्वात्।

३. चिन्मात्रमिति। चिन्मात्रे ऽध्यासाभावकथनार्थं तदनुसंधानस्यावश्यकत्वात्। 'हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः। अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः' इत्युक्तरीत्या अन्यपरादपि तस्मात् विघ्ननिवृत्तिसंभवादिति भावः।

४. आदिपदेन शिष्टाचारपरिपालनादि ग्राह्यम्।

५. व्युत्क्रमेणान्वयः। युष्मत्पदेनाचेतनस्य, अस्मत्पदेन चेतनस्य च बोधनात्। ६. उपलक्षणार्थम् = प्रदर्शनार्थम्।

सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिः

प्रकटार्थविवरणम्

सदृशसन्दर्शने सदृशान्तराध्यासः प्रायेण दृष्टः, तदभावाच्च नाध्यास इत्याह— **तमःप्रकाशवद्विरुद्धस्वभावयोरिति।** ननु धर्मिणोस्तादात्म्यासंभवेऽपि तद्धर्माणामितरेतरभावः किं न स्यात् अलक्तकलौहित्यवदित्याशङ्क्याह— **तद्धर्माणामपि सुतरामिति।**

भाष्यभावप्रकाशिका

अस्मच्छब्देन तत्साक्षी चिद्रूप आत्मा; तयोः प्रत्ययौ। मनइन्द्रियादिव्यवधानेनात्मनः प्रतीतिः युष्मत्प्रत्ययः, अस्मत्प्रत्ययः स्वाहङ्कारः, तयोर्गोचरयोः = युष्मदस्मत्प्रत्ययगोचरयोः। तदनेन प्रत्ययतो विरोधो दर्शितः। स्वरूपतो विरोधमाह— **विषयविषयिणोरिति।** अत एव विरुद्धस्वभावयोः = तादात्म्यायोग्ययोरिति यावत्। न तु सहानवस्थानयोग्ययोरिति भावः। "तमःप्रकाशव"दिति निदर्शनमेवंविरोधाभिप्रायम्। मन्दप्रभे मन्दिरे तयोस्सहोपलम्भात्। एतेनाभावत्वमपि तमसो निराकृतं वेदितव्यम्। इदमाह— **इतरेतरभावानुपपत्तौ सिद्धायामिति।** तादात्म्यलक्षणकार्यस्यानुपपत्तौ सिद्धायामित्यर्थः।

ननु मा भूत् धर्मिणोरितरेतरभावः, तद्धर्माणां तु जाड्य-चैतन्य-नित्यत्वानित्यत्वादीनामितरेतरारोपः स्यादिति, तत्राह- **तद्धर्माणामिति।** इतिशब्दो हेत्वर्थः। अध्यासव्यापकभेदाग्रहविरुद्धभेदग्रहस्येह संभवाद् अध्यासव्यापकभेदाग्रहं व्यावर्तयन् भेदग्रहस्तद्व्याप्यमध्यासमपि निवर्तयति यस्मादित्यर्थः।

न्यायनिर्णयः

तत्र तथात्वाभिमानवत्प्रकृते तदभावात्। मुख्यामुख्ययोरादौ मुख्योपनिपातादस्मदर्थस्य च मुख्यत्वात् प्रथममस्मद्ग्रहणप्रसक्तावपि युष्मदर्थादनात्मनो निष्कृष्य शुद्धस्य चिद्धातोरध्यारोपापवादन्यायेन ग्रहणं द्योतयितुमादौ युष्मद्ग्रहणम्। तत्र **युष्मदस्मदिति** प्रत्यक्पराक्त्वेनाऽऽत्मानात्मनोः स्वभावविरोधः सूच्यते। युष्मच्छब्देनाहंकारादिरस्मच्छब्देन तत्साक्षी गृह्यते। तयोरेव **प्रत्ययपदेन** स्फुरणतया [1]तद्वत्त्वेन प्रतीतितो विरोधो द्योत्यते। तत्रानात्मा प्रतीतिव्याप्यत्वात्, आत्मा च प्रतीतित्वात्प्रत्ययः। तयोर्व्यवहारतो विरोधो **गोचरशब्दार्थः।** युष्मदर्थो हि कौटस्थ्यादिस्वभावात्मतिरस्कारेण सक्रियत्वादिनाऽस्मदर्थोऽपि ब्रह्मास्मीत्यहंकारादिविलापेन पूर्णतया व्यवह्रियते। युष्मच्चास्मच्च युष्मदस्मदी ते एव प्रत्ययौ तावेव गोचरौ तयोस्त्रिविधविरोधभाजोरन्यत्रैक्यायोगान्न तत्प्रमितिरित्यर्थः। [2]ऐक्यासंस्कारादतदध्यासेऽपि तादात्म्यसंस्कारादिदं रजतमितिवत्तदध्यासः स्यादित्याशङ्क्य, तस्यापि तत्प्रमितिपूर्वकत्वात्तस्याश्च तादात्म्यापेक्षत्वादात्मानात्मनोस्तदभावान्नेति मत्वा तयोस्तादात्म्याभावे हेतुमाह— **विषयविषयिणोरिति।** ऐक्याभावेऽपि जात्यादौ तादात्म्यादपौनरुक्त्यम्[3]। नित्यानुभवविषयो युष्मदर्थो विषयो, विषयी त्वस्मदर्थो नित्यानुभवस्तयोर्दाह्यदाहकवन्मिथो विरुद्धयोर्जातिव्यक्तित्वादेरभावान्न तादात्म्यमित्यर्थः। उक्ताद्धेतोः सिद्धमभेदासंभवं सदृष्टान्तमाह— **तमःप्रकाशवदिति।** न खल्वनयोरभेदः। न च [4]तयोर्भावाभावत्वेन तदभावः, तमसोऽपि गुणवत्त्वादिना भावत्वात्। तथाऽऽत्मानात्मनोरपि मिथो विरुद्धयोर्नाभेदोऽस्तीत्यर्थः। विमतौ नाभिन्नतया प्रमितौ; मिथो विरुद्धत्वात्, तमःप्रकाशवदिति। विरोधफलमाह— **इतरेतरेति।** इतरस्येतरभावो नामेतरेतरत्वमैक्यमितरस्मिन्नितरभावस्तादात्म्यं तयोरप्रतीतावुक्तन्यायप्राप्तायां तत्संस्कारासिद्धिः। नन्वात्मानात्मनोरितरेतरभावाभावेऽपि तद्धर्माणां चैतन्य-जाड्यादीनामितरेतरत्र भावः स्यात्। दृश्यते हि पुष्पपुटिकादौ पुष्पाभावेऽपि तद्धर्मगन्धानुवृत्तिः। तथा चेतरेतरत्रेतरेतरधर्मप्रमित्या तत्संस्कारात्तदध्यासः सिध्यतीति। नेत्याह— **तद्धर्माणामपीति।** तयोरात्मानात्मनोर्धर्माश्चैतन्यजाड्यादयः, तेषामितरेतरत्र न भावः, मिथो विरुद्धयोर्धर्मिणोर्धर्माणामितरेतरत्र भावस्यादृष्टत्वात्, तेषां[5] धर्मितादात्म्याच्चोक्तविरोधभाक्त्वात्, धर्मिणमतिक्रम्य च तद्धर्माणामगमनात्। नहि गन्धोऽपि विना धर्मिणं पुष्पपुटिकादौ दृश्यते,

---

१. तद्वत्त्वेन = स्फुरणविषयत्वेन। २. ऐक्यासंस्कारात् = ऐक्यसंस्काराभावात्, अतदध्यासेऽपि = ऐक्याध्यासाभावेऽपि।

३. अपौनरुक्त्यमिति। तादात्म्यं भेदसहिष्णु, ऐक्यं भेदासहिष्णु। ४. तयोः = तमःप्रकाशयोः।

५. तेषां = धर्माणाम्। धर्मितादात्म्यात् = स्वाश्रयतादात्म्यात्।

इत्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः,

प्रकटार्थविवरणम्

तद्धर्माणां धर्मिणं विहायान्यत्र गमने धर्मत्वस्यैव व्याघातात्; अलक्तके च [१]द्रव्यस्यैव संसर्गाध्यास इत्यर्थः। नन्वध्या-सोऽर्थज्ञानात्मकः[२], तत्रार्थाभावेऽप्यसदवभास एव विभ्रमः स्यादित्याशङ्क्याह— **इत्यतोऽस्मत्प्रत्ययेति**। यतोऽर्थाध्यासो न

भाष्यभावप्रकाशिका

अथवा क्वचित् सामान्यविशेष(ध्यासेन) [भावेन। प्रमिततादात्म्ययोरन्यत्रान्यतरांशदर्शनादन्यतरांशाध्यारोपो दृष्टः, प्रकृते तु चिदचितोस्सामान्य-विशेषात्मनाऽनाकलिततादात्म्ययोरारोपो न संभवति यस्मादित्यर्थः। तस्मादात्मन्यनात्मारोपो न युक्त इत्याह— **अत इति**। आत्मन्यधिष्ठानेऽनात्मारोपो न संभवति चेत्, अस्तु तर्ह्यनात्मन्येवात्मारोप इति, तत्राह— **तद्विपर्ययेणेति**। **तद्धर्माणां चेति**। विषयानुभव-नित्यत्वाऽऽनन्दादीनामन्तःकरणप्रत्ययेन परतन्त्रतयाऽवभासमानत्वादुपचाराद्धर्मत्वव्यपदेशमभ्यु-

न्यायनिर्णयः

सूक्ष्मेण स्वाश्रयेण सहैवोपलम्भादन्यथा गुणत्वव्याघातात्। उत्क्रान्त्यधिकरणे चैतद्वक्ष्यति। तस्मात्तद्धर्माणामपि नेतरेतरत्र सत्त्वप्रमेत्यर्थः। तथाप्यात्मानात्मनोरन्योन्यात्मकताध्यासस्य च किमायातमित्याशङ्क्याह— **इत्यत इति**। **इति**शब्देना-भेदप्रमित्यभावो हेतुरुक्तः। तत्फलमभेद-संस्काराभावो**ऽतः**शब्दार्थः। यदात्मनो मुख्यं प्रत्यक्त्वं प्रतीतित्वमहंकारादिविलापेन ब्रह्मास्मीति व्यवहार्यत्वं चोक्तं; तदयुक्तम्, अहमितिप्रतीयमानत्वादहंकारवदित्याशङ्क्य संस्काराभावफलमध्यासाभावं वक्तुमधिष्ठानस्वरूपमाह — **अस्मत्प्रत्ययगोचर इति**। अहंवृत्तिव्यङ्ग्यस्फुरणत्वं [४]तद्वत्त्वं वा हेतुः। आद्ये साधनविकलो दृष्टान्तो, द्वितीये त्वसिद्धिः। अतोऽनुमानायोगादात्मनो युक्तं मुख्यं प्रत्यक्त्वादीत्यर्थः। यदात्मनो विषयित्वं, तत्र, अनुभवामीति [५]व्यवहृतत्वादहंकारवदित्याशङ्क्याह — **विषयिणीति**। अनुभवामीति व्यवहृतत्वं तद्वाच्यत्वं, तल्लक्ष्यत्वं वा। नाद्यः, असिद्धेः। नेतरः [६]हेतुवैकल्यात्। अतो युक्तं विषयित्वमित्यर्थः। अहंकारस्य देहं जानामीति विषयित्वेऽपि मनुष्योऽहमित्यभेदाध्यासवदिहापि स्यादित्याशङ्क्याहंकारदेहयोर्जाड्यादिना तुल्यत्वादभेदाध्यासेऽपि चित्त्वेनात्मत्वेन वाऽजडेऽनवच्छिन्ने प्रतीचि तद्विपरीताध्यासो न सिध्यतीत्याह— **चिदात्मक इति**। दीपादेर्विषयित्वेऽपि चिदात्मकत्वाभावादपुनरुक्तिः। अहमिति प्रथाऽविशेषादात्मवदहंकारस्यापि मुख्यप्रत्यक्त्वादियोगादयुक्तं पराक्त्वादीत्याशङ्क्याह— **युष्मदिति**। अहंकारतत्साक्षिणोरहमित्येकरूपप्रथानङ्गीकारादहंकारादेः प्रातीतिकप्रत्यक्त्वादिभावेऽपि पराक्त्वाद्येव मुख्यमित्यर्थः। अहंकारादेर्बन्धत्वेनानर्थतया हेयत्वं सूचयति— **विषयस्येति**। तस्माद-ध्यासो मिथ्येति संबन्धः। मा भूदात्मन्यनात्माध्यासः, तद्धर्माणां तु जाड्यादीनां तस्मिन्नध्यासः स्यादित्याशङ्क्याह— **तद्धर्माणां चेति**। न हि धर्मा धर्मिणमतिक्रमन्ते। नरविषाणादिधीवदात्मनि वैकल्पिकी जाड्यादिधीरित्यर्थः। आत्मनो मुख्यप्रत्यक्त्वादिभाक्त्वा-दनात्मतद्धर्माध्यासानधिष्ठानत्वेऽपि तद्वैपरीत्यादहंकारादेरात्मतद्धर्माध्यासाधिष्ठानत्वं स्यादित्याशङ्क्याह— **तद्विपर्ययेणेति**। अहंकारादौ जडे विषये ततो विपर्ययश्चैतन्यं तेनात्मना विषयिणश्चिदात्मनो योऽध्यासः स मिथ्येत्यन्वयः। नन्वनात्मन्यात्मानध्यासेऽपि तद्धर्माणामनुभवादीनां बुद्ध्यादावध्यासः स्यात्। नभसो ध्वन्यभेदानध्यासेऽपि तद्भेदानां वर्णानां ह्रस्वो दीर्घो वेति ध्वनिविशेषे-ऽप्यध्यासदर्शनादित्यत आह— **तद्धर्माणां चेति**। अनुभवादीनां बुद्धिवृत्त्युपाधौ तत्तन्त्रतया भानादुपचारात्तद्धर्मत्वम्। युक्तो वर्णानां ध्वनिभेदेष्वध्यासो जाड्यादिना तुल्यत्वात्; आत्मधर्मत्वाभिमतानामनुभवादीनां चिद्रूपात्ततो भेदाभावान्न जडे बुद्ध्या-दावध्यासोऽतुल्यत्वादित्यर्थः। अध्यासो नामान्यस्मिन्नन्यरूपताधीः। स मिथ्येत्यविद्यमानतोच्यते। अर्थाध्यासो ज्ञाना-

---

१. द्रव्यस्यैवेति। लौहित्याश्रयद्रव्यस्यैव स्फटिके प्रतिबिम्ब इत्यर्थः।

२. अर्थज्ञानात्मकः = अर्थात्मकः, ज्ञानात्मकश्च।

४. तद्वत्त्वं = स्फुरणविषयत्वम्।

५. व्यवहारः = शब्दप्रयोगः। व्यवहृतत्वं = शब्दवृत्तिविषयत्वम्।

६. हेत्विति। 'दृष्टान्ते' इत्यादिः।

तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तम्[1]।

प्रकटार्थविवरणम्

सम्बोभूयते अतोऽवभासोऽपि न जाघट्यते; निरालम्बनज्ञानाभ्युपगमप्रसङ्गात्। ननु अहङ्कारादावात्मनः प्रतिबिम्बत्वेन [नेन] तद्धर्मस्य द्रष्टृत्वादेस्तत्राध्यासोऽस्त्वित्याशङ्क्याह— **तद्विपर्ययेणेति।** द्रष्टृदृश्यविशेषस्फुरणान्नाध्यासस्सम्भवति, इतरथा न कदाचिद्बाधः स्यात्। अतो गौण एवायं सामानाधिकरण्यावभास इति भावः। तथा [च] सत्यात्मनस्संसारस्सत्य एवेति न ज्ञानान्निवर्त्यते। अतो न तद्ध्वंससाधनज्ञानाय शास्त्रारम्भः सम्बोभवीति [इति] पूर्वः पक्षः।

भाष्यभावप्रकाशिका

पगम्य तद्धर्माणामित्युक्तम्। आत्मधर्मत्वाभिमतानामनुभवादीनां चिद्रूपात्ततो भेदाभावान्न जडे बुद्ध्यादावध्यासः तुल्यत्वादित्यर्थः। अध्यासो नाम अन्यस्मिन्नन्यरूपताधीः। मिथ्येत्यविद्यमानतोच्यते; नास्त्येवाध्यास इत्यर्थः। अर्थाध्यासो ज्ञानाध्यासश्चेत्य-ध्यासयोर्नास्तित्वं वक्तुं द्विविधाध्यासवचनम्। आक्षेपमुपसंहरति— **इति भवितुमिति।** 'युक्त'मिति वक्तव्ये 'इति भवितु' मिति आक्षेपस्य संभावनैव मूलम्, नात्र मानमिति दर्शयितुमुक्तम्। तदेवं प्रमातृत्वादिबन्धस्य वस्तुतया विषयाद्यभावादनारभ्यमिदं शास्त्रमित्याक्षेप्तुर्विवक्षितम्। अत्र यद्यपीति पठितव्यम्। तेन यद्यपि भवितुं युक्तमिति योजना।

न्यायनिर्णयः

ध्यासश्चेत्यध्यासयोर्नास्तित्वं वक्तुं द्विरध्यासवचनम्। आक्षेपमुपसंहरति —**इति भवितुमिति।** इति युक्तमिति वक्तव्ये भवितुमिति आक्षेपस्य संभावनैव मूलं; न मानमिति दर्शयितुमुक्तम्। तदेवं मातृत्वादिबन्धस्य वस्तुतया विषयाद्यभावादनारभ्यमिदं शास्त्रमित्याक्षेप्तुर्विवक्षितम्।

---

१. 'युष्मदस्मत्प्रत्ययगोचरयोः.... इतरेतरभावानुपपत्तिरित्यतः... अध्यासो मिथ्येति भवितुं युक्त' मिति भाष्ये अध्यासासंभवे इतरेतरभावानुपपत्तिः हेतुतयोक्तेति प्रतीयते। इतरेतरभावानुपपत्तिः ऐक्यस्य तादात्म्यस्य वा ऽभावः। तत्र-आत्मानात्मनोः वस्तुतः ऐक्याद्यभावः न तयोः तद्विभ्रमं वारयितुं क्षमः; शुक्तिरूप्ययोरपि वस्तुतस्तादात्म्याभावे सत्येव तद्भ्रमदर्शनादिति शङ्काया वारणं व्याख्यातारो विभिन्नैः प्रकारैः विदधति।

तत्र तादात्म्याद्यभावात् तत्प्रमाया अभावः, तदभावात् तत्संस्काराभावः, तदभावाच्चाध्यासाभाव इति भाष्यं व्याचक्षते विवरणानुयायिनः। तत्र आत्मानात्मनोस्तादात्म्याध्यासस्याभावे साध्ये हेतुः तत्कारणसंस्काराभावः 'अतः' इत्यनेनोक्तः। तत्साधकश्च हेतुः तत्प्रमाया अभावः 'इति' पदेनोक्तः। तत्साधकश्च तादात्म्यरूपविषयाभावः 'इतरेतरभावानुपपत्तिः' इत्युक्तः। तादात्म्याभावसाधकश्च विरोधः 'युष्मदि'त्यादिविशेषणेनोक्तः। तथा च रत्नप्रभा— "इति = उक्तरीत्या तादात्म्याद्यभावेन तत्प्रमाया अभावात्, अतः=प्रमाजन्यसंस्कारस्याध्यासहेतोरभावात्, अध्यासो मिथ्येति भवितुं युक्तमित्यन्वयः" इति। समाधानभाष्ये 'नैसर्गिकः' इति पदेन आक्षेपपरिहारो लभ्यते।

भामतीकारास्तु— इतरेतरभावानुपपत्तिः तत्प्रतीत्यनुपपत्तिः। इतरेतरभावप्रतीतिः=अध्यासः, तदनुपपत्तिः= तस्या उपपत्त्यभावः= उत्पत्त्यनर्हत्वं हेतुः। तत्साधकं च तयोर्भेदग्रहस्य सत्त्वं 'युष्मदि'त्यादिनोक्तम्। भेदग्रहस्याभावे एवाभेदप्रतीतेरुत्पत्तियोग्यत्वम्। इह च भेदग्रहस्यैव सत्त्वात् अभेदप्रतीतेरुत्पत्तुमनर्हत्वात् तदभावः— इत्येवं साक्षादेव इतरेतरभावानुपपत्तिम् अध्यासाभावे हेतुतया व्याचक्षते।

'अहं मनुष्य' इति देहात्माभेदभ्रमदृष्टान्तेन 'अहं कर्ता' इति अन्तःकरणात्माभेदभ्रमः सिद्धान्तिना सिषाधयिषितः इहाक्षिप्यते। तत्र 'इतरेतरभावानुपपत्तिः' इत्यन्तेन दृष्टान्तस्य, 'इत्यतः... अध्यासो मिथ्ये' ति दार्ष्टान्तिकस्य च निरासः। तत्र च विषयशब्दः अन्तःकरणपरः— इति ब्रह्मविद्याभरणे विशेषः। शेषं भामतीवत्। समाधाने 'इतरेतराविवेकेन' इत्यनेन अध्यासविरोधिभेदग्रहस्याभावं प्रसाध्य परिहारः।

प्रकटार्थकारास्तु— 'इतरेतरभावानुपपत्तिः= तादात्म्याभावः' इति यथाश्रुतार्थमादाय व्याचक्षते। तादात्म्याभावात् तत्प्रतीतिरूपाध्यासाभावः। विषयं विना ज्ञानासंभवात्। तथा च 'इतरेतरभावानुपपत्ति' रित्यन्तेनार्थाध्यासनिरासः, 'इत्यतः... अध्यासो मिथ्ये' त्यनेन ज्ञानाध्यासनिरासः। अध्यासव्यापकस्य अधिष्ठानारोप्ययोर्भेदाग्रहस्य, उभयोर्विषयत्वस्य, सादृश्यस्य च अभावः 'युष्मदस्मदि'त्यादिषष्ठ्यन्तत्रयेण अध्यासाभावे हेतुतया दर्शितः। एतेनैव षष्ठ्यन्तत्रयेण इतरेतरभावानुपपत्तिरपि सिध्यति। अध्यासविरोधिभेदग्रहस्यासिद्ध्या, विषयत्वसादृश्ययोश्चाध्यासाप्रयोजकत्वेन समाधानम् 'इतरेतराविवेकेन' 'मिथ्याऽज्ञाननिमित्तः' इति विशेषणाभ्यां प्रदर्श्यत इति।

'तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेन अत्यन्तविविक्तयोर्धर्मधर्मिणोः[२]

प्रकटार्थविवरणम्

इदानीमध्याससमर्थनेनार्थं[३] सम्भावयन्नारम्भं सम्भावयति— **तथापीत्यादिना**। तत्रैतद् भवान् व्याचष्टाम्—किमर्थतो[४] भेदोऽध्यासविरोधितया गौणत्वमावहति, किं वा प्रकाशमान इति। नाद्यः; शुक्तिरूप्यादिभ्रमस्यापि भङ्गप्रसङ्गात्। द्वितीयस्तु यद्यप्यदुष्टः, तथापि नास्माकीनपक्षक्षतिः[५]। यतोऽर्थतोऽत्यन्तविविक्तयोरपि धर्मिणोः **इतरेतराविवेकेन** प्रतिभासतो विवेकास्फुरणात् **अन्योन्यस्मिन्** आत्मदेहादौ **अन्योन्यात्मकतां** देहाद्यात्मभावं परस्परधर्मांश्च समारोप्य 'अहमिदम्' 'ममेदम्' इति

भाष्यभावप्रकाशिका

अध्यासस्य नास्तित्वमयुक्तत्वाद्, अभानाद्वा इति विकल्प्याऽऽद्यमङ्गीकरोति— **तथापीति**। पूर्वोक्तरीत्या युक्तिशून्यत्वमध्यासस्याङ्गीकृत्य प्रतिभासमानत्वादपलापायोगाद् 'अहं मनुष्य' इति प्रत्ययस्य देहव्यतिरिक्तात्मवादिमतेऽध्यासमन्तरेणोपपादनासम्भवाच्च तदनुरूपं कारणमेव कल्प्यमित्यभिसन्धायाऽध्यासं प्रतिजानीते— **तथापीत्यादिना लोकव्यवहार** इत्यन्तेन भाष्येण। द्वितीयं प्रत्याह— **अयमिति**। मनुष्योऽहमिति प्रतीतेरध्यासस्वरूपापलापायोगाद् अस्याश्च देहादिव्यतिरिक्तात्मवादे प्रमात्वाभावात् तदनुरूपं कारणं कल्प्यमिति भावः। अपरोक्षमध्यासं द्वेधा विभजन् विशेष्यं निर्दिशति— **लोकव्यवहार इति**। लोक्यते मनुष्योऽहमिति ज्ञायत इति ज्ञानोपसर्जनोऽर्थाध्यासः, लोकविषयो व्यवहार इत्यर्थोपसर्जनज्ञानाध्यासश्चोक्तः। कोऽयमध्यासः? यो विषयादिसिद्धिहेतुरित्याशङ्क्य तल्लक्षणमाह— **अन्योन्यस्मिन्नित्यादिना धर्मधर्मिणोरित्यन्तेन**। अन्योन्यस्मिन्नन्योन्यात्मकतातद्धर्माध्यासलक्षणःसत्यात्मासत्यान्तःकरणादिमिथुनीकरणीभूतो लोकव्यवहारस्तथापि वर्णित इति योजना। तत्र'अन्योन्यस्मि'न्निति

न्यायनिर्णयः

अध्यासस्य नास्तित्वमयुक्तत्वाद्, अभानाद्वेति विकल्प्याऽऽद्यमङ्गीकरोति— **तथापीति**। द्वितीयं प्रत्याह—**अयमिति**। मनुष्योऽहमिति प्रतीतेरध्यासस्वरूपापलापायोगात्, अस्याश्च देहातिरिक्तात्मवादे प्रमात्वाभावात्, तदनुरूपं कारणं कल्प्यमिति भावः। अपरोक्षमध्यासं द्वेधा विभजन् विशेष्यं निर्दिशति— **लोकव्यवहार** इति। लोक्यते मनुष्योऽहमिति ज्ञायत इति ज्ञानोपसर्जनोऽर्थाध्यासः, लोकविषयो व्यवहार इत्यर्थोपसर्जनो ज्ञानाध्यासश्चोक्तः। कोऽयमध्यासो यो विषयादिसिद्धिहेतुरित्याशङ्क्य तल्लक्षणमाह— **अन्योन्यस्मिन्** इत्यादिना **धर्मधर्मिणोः** इत्यन्तेन। तत्र 'अन्यस्मिन्नन्यावभास' इत्युक्ते प्रतिमायां देवतादृष्टिरपि भ्रान्तिः स्यात्, ततो विशिनष्टि— **अन्योन्यस्मिन्निति**।[६]'तत्र देवतादृष्टिमात्रमारोप्यं, न प्रतिमादृष्टिः; 'ब्रह्मदृष्टिरुत्कर्षात्' इति न्यायात्। पटे तन्तवः, स च तन्तुष्विति लोकवादिदृष्ट्या[७] तन्तुपटयोरन्योन्याधारत्वधियोऽध्यासत्वप्राप्तावुक्तम्— **अन्योन्यात्मकतामिति**। 'पटः शुक्लः' 'शुक्लः पट' इति प्रमाव्यावृत्त्यर्थ**मितरेतराविवेकेनेति**। इत्थंभावे तृतीया। स्वरूपविवेकतिरस्कारेणाभेदधीरध्यासः। नैवं

---

१. तथापीत्यादि। अत्र 'अन्योन्यस्मिन्.... अध्यस्ये'ति अध्यासस्वरूपम्, 'इतरेतराविवेकेने'ति तन्निमित्तं भेदाग्रहः, 'लोकव्यवहारः' इति तत्फलं च प्रदर्श्यते। 'अध्यस्य व्यवहारः' इति ल्यपा सूचितमध्यासस्य व्यवहारकारणत्वं स्फुटीक्रियते— 'मिथ्याज्ञाननिमित्तः' इत्यनेन। धर्म्यारोप्ययोः स्वरूपेणोपस्थितौ तयोर्भेदाग्रहेणाध्यासो भवति। तदुच्यते— 'सत्यानृते मिथुनीकृत्ये'ति। मिथुनीकरणम्= स्वरूपेणोपस्थितिः। व्यवहारस्य नैसर्गिकत्वोक्तिः तत्कारणाध्यासस्य नैसर्गिकत्वे पर्यवस्यति। तेनाऽऽक्षिप्तः अध्यास एव प्रतिसमाधीयत इति नासङ्गतिरिति भामती।

'अध्यासो मिथ्ये'त्याक्षिप्तः, 'एवमयम्... नैसर्गिकोऽध्यासः... प्रत्यक्षः' इति चोपसंह्रियमाणः अध्यास एव 'लोकव्यवहारः' इत्यनेनाप्युक्तः। 'अध्यस्य, इतरेतराविवेकेन, सत्यानृते मिथुनीकृत्य' इति विशेषणैरपि तत्स्वरूपमेव प्रदर्श्यते। प्रत्येकं च विशेषणमितरानुक्तं विशेषं बोधयतीत्यपौनरुक्त्यम्। ल्यप्प्रयोगश्च भेदोपचारात्। 'मिथ्याऽज्ञाने'ति तदुपादानाविद्याप्रदर्शनमिति पञ्चपादिका।

२. भाष्ये 'धर्मधर्मिणोः' इत्यत्र 'धर्माणां धर्मिणौ' इति षष्ठीतत्पुरुषः रत्नप्रभासूचितः पूर्णानन्दीये विवृतः। भामतीरीत्या तु 'धर्मसहितौ धर्मिणौ' इति मध्यमपदलोपिसमास आश्रयणीयः। तेन द्विवचनोपपत्तिः। धर्माणां धर्मिणोश्चेति फलितम्। धर्मिणोरतादात्म्यं, धर्माणां चासंकीर्णता विवेकः।

३. अर्थ= प्रयोजनम्। ४. अर्थतः= वस्तुगत्या। ५. अयं भावः— न भेदग्रहमात्रमध्यासविरोधि; किन्तु येन रूपेणाध्यासस्तेन रूपेण भेदग्रहः। तथा च 'अहं मनुष्यः' इत्याद्यभेदाध्यासे 'अहं न मनुष्यः' इत्यादिरूपो भेदग्रहो विरोधी। स च लौकिकस्य नास्ति। अतोऽध्यासो न विरुद्ध इति।

६. तत्र=प्रतिमायाम्। दृष्टिरिति। देवतायामिति शेषः। द्र. ब्र. सू. ४-१-५।　७. 'पटे तन्तवः' इति लोकदृष्टिः। 'तन्तुषु पटः' इति नैयायिकादिवादिदृष्टिः।

प्रकटार्थविवरणम्

अभिज्ञाऽभिवदनरूपो लोकव्यवहारो भविष्यति। न चापुनरुक्तशब्दवाच्यतयैवाध्यासविरोधिभेदाध्यवसायः; 'इदं रूप्य'मित्यत्रापि प्रसङ्गात्। अत एव न पदार्थमात्रज्ञानात्;[1] सप्रतियोगित्वेन स्वरूपत्वासम्भवाच्च भेदस्य। **नैसर्गिक इति**। शास्त्राद्याधेयसंस्काराजन्य इत्यर्थः। तेन यद्यपि शास्त्राहितविवेकस्य 'व्यतिरिक्तगोचरोऽहङ्कारस्तथापि पूर्वं देहादिसमानाधिकृत[3] एवेति भावः।

भाष्यभावप्रकाशिका

परस्पराधिष्ठानत्वम्, अन्योन्यात्मकतामिति परस्परमध्यस्तता च कथ्यते। तत्र'अन्यस्मिन्नन्यावभास' इत्युक्ते प्रतिमायां देवतादृष्टिरपि भ्रान्तिः स्यात्, ततो विशिनष्टि— **अन्योन्यस्मिन्निति**। तत्र देवतादृष्टिमात्रमारोप्यम्, न प्रतिमादृष्टिः; "ब्रह्मदृष्टिरुत्कर्षात्"इति न्यायात्। पटे तन्तवः, स च तन्तुष्विति लोकवादिदृष्ट्या तन्तुपटयोरन्योन्याधारत्वधियोरध्यासत्वप्राप्तावुक्तम्— **अन्योन्यात्मकतामिति**। 'पटः शुक्लः' 'शुक्लः पटः' इति प्रमाव्यावृत्त्यर्थम्— **इतरेतराविवेकेनेति**। इत्थंभावे तृतीया; एकतापत्त्या,भेदाग्रहेण[4] वेत्यर्थः। अनेनाध्यासस्य स्वरूपं, निमित्तं च कथ्यते। यथावभासं पारमार्थिकं किं न स्यात्? इत्यत आह— **अत्यन्तविविक्तयोर्धर्मधर्मिणोरिति**। धर्मिणोरतादात्म्यं विवेकः, धर्माणां चासङ्कीर्णता। स्वरूपविवेकतिरस्कारेणाभेदधीरध्यासः, नैवं शुक्लपटादिधीरित्यर्थः। 'स एवायमयमेव स'इत्यैक्यप्रमां प्रत्याह— **विविक्तयोर्धर्मधर्मिणोरिति**। औपाधिकभेदाभास-तिरस्कारेण प्रत्यभिज्ञायामैक्यं प्रमीयते; विवक्तयोर्धर्मिणोर्विवेकं तिरस्कृत्यैक्यधीर्भ्रान्तिरित्यर्थः। प्रत्यभिज्ञानेऽपि कालद्वय-वैशिष्ट्यादस्ति विविक्ततेति विविक्तपदस्यातद्व्यावर्तकत्वमाशङ्क्याह— **अत्यन्तेति**।

आत्मनो बुद्ध्यादेः स्वच्छत्वादिना साम्यादत्यन्तविवेकासिद्धिमाशङ्क्य जडत्वाजडत्वयोरत्यन्तविवेकाद् धर्मिणोऽपि तत्सिद्धिरित्याह- **अत्यन्तविविक्तयोर्धर्मधर्मिणोरिति**। उक्तरूपयोर्धर्मधर्मिणोरन्योन्यस्मिन्नन्योन्यात्मतारूप इतरेतराविवेकात्मको-ऽध्यास इति समुदायार्थः। "अन्योन्यधर्मांश्चे"ति पृथग् धर्माध्यासकथनं विनाऽपि धर्म्यध्यासं केवलं धर्माणामपि— 'अन्धोऽह'मित्यादौ धर्माध्यासप्राधान्यसूचनार्थम्।

ननु इतरेतराविवेकार्थं द्वयोः स्वरूपतिरस्कारे कथमन्योन्यस्मिन्निति लक्षणांशसिद्धिः? तत्सिद्धये द्वयोः स्वरूपस्थितौ कथमविवेकोपपत्तिः? अत आह— **सत्येति**। सत्यमनिदं चैतन्यम्; संसृष्टरूपेणाध्यस्तत्वेऽपि स्वरूपेणानध्यस्तत्वात्। अनृतमहङ्कारादि; स्वरूपतोऽप्यध्यस्तत्वात्। तदुभयमिथुनीकरणरूपोऽध्यास इति यावत्। असत्यसर्पस्य सत्यरज्ज्वां तन्मात्रतया निमज्जनवदसत्याहङ्कारादेः सत्यचिन्मात्रतया निमज्जनादेकत्वधीः; सत्यासत्ययोरात्मानात्मनोस्तर्कतो विविच्यमानत्वा-दन्योन्यस्मिन्निति लक्षणांशः संभवतीति भावः।

न्यायनिर्णयः

शुक्लपटादिधीरित्यर्थः। 'स एवायमयमेव स' इत्यैक्यप्रमां प्रत्याह[5]— **विविक्तयोर्धर्मधर्मिणोरिति**। औपाधिकभेदाभासतिरस्कारेण प्रत्यभिज्ञायामैक्यं प्रमीयते; विविक्तयोर्धर्मिणोर्विवेकं तिरस्कृत्यैक्यधीर्भ्रान्तिरित्यर्थः। प्रत्यभिज्ञानेऽपि कालद्वयवैशिष्ट्यादस्ति विविक्ततेति विविक्तपदस्यातद्व्यावर्तकत्वमाशङ्क्याह— **अत्यन्तेति**। आत्मनो बुद्ध्यादेश्च स्वच्छत्वादिना साम्यात् अत्यन्तविवेका-सिद्धिमाशङ्क्य जडत्वाजडत्वयोस्तद्धर्मयोरत्यन्तविवेकाद् धर्मिणोरपि तत्सिद्धिरित्याह— **अत्यन्तविविक्तयोर्धर्मधर्मिणोरिति**। उक्तरूपयोर्धर्मधर्मिणोरन्योन्यस्मिन्नन्योन्यात्मकतारूप इतरेतराविवेकात्मकोऽध्यास इति समुदायार्थः। अन्योन्यधर्मांश्चेति पृथक्कथनमन्धोऽहमित्यादौ धर्माध्यासे प्राधान्यसूचनार्थम्।

---

१. अध्यासविरोधिभेदाध्यवसाय इत्यनुषङ्गः। 'स्वरूपभेदपक्षे' इति आदौ शेषः। वस्तुतस्तु नायं पक्षोऽस्मत्संमत इत्याह— सप्रतियोगिकत्वेनेति।

२. व्यतिरिक्ततया गोचर इत्यर्थः। ३. समानाधिकृतः= अभेदसंसर्गकधीविषयः। ४. भेदाग्रहेणेति। अस्मिन् पक्षे इतरेतराविवेकेनेति हेतौ तृतीया बोध्या। आद्यं व्याख्यानं पञ्चपादिकानुसारि, द्वितीयं भामत्यनुसारि। 'स्वरूपं निमित्तं च कथ्यते' इत्यपि यथाक्रमं मतद्वये योज्यम्। अग्रेऽपि 'भाष्यभावप्रकाशिकायां प्रायेण 'अथवा' इत्युपन्यस्यमानं व्याख्यान्तरं भामत्याः इति द्रष्टव्यम्।

५. प्रत्याह=व्यावर्तयति इति यावत्।

[1]मिथ्याऽज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य, अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः।

प्रकटार्थविवरणम्

यदूचिरे— द्वयोर्विषयत्वाभावात्, सादृश्याभावाच्च नाध्यास इति; तत्राह— **मिथ्याऽज्ञाननिमित्त** इति। मिथ्या च तदज्ञानं च, तन्निमित्तस्तदुपादान इत्यर्थः। न विषयत्वं सादृश्यं वाऽध्यासहेतुः; किन्त्वन्वयव्यतिरेकवदज्ञानम्। तथा च प्रयोगः— [2]विमतं, मिथ्याऽज्ञानोपादानं; कार्यत्वात्, अनन्यथासिद्धतदन्वयव्यतिरेकवत्त्वाद्वा, विपक्षबाधकोपगृहीतत्वे सति कार्यत्वाद्वा; न यदेवं न तदेवम्; यथा सम्मतं वस्तु। कार्यं नोपादानहीनम्। न च सदसती साक्षादुपादाने; कार्याननुकूलत्वात्[3]। साक्षादुपादानकल्पनायां च गौरवमनवस्था[4] च। अतो विपक्षबाधकानन्यथासिद्धी।

भाष्यभावप्रकाशिका

किं पुनरध्यासस्य कारणमित्याशङ्क्य— निमित्तमात्रम्, उपादानम्, निमित्तविशेषो वा पृच्छ्यत इति विकल्प्याद्यौ प्रत्याह— **मिथ्येति**। मिथ्याऽज्ञानमिति कर्मधारयसमासः। मिथ्या च तदज्ञानम्, तन्निमित्तमुपादानं यस्येति विग्रहः। तत्र मिथ्येत्युक्ते भ्रान्तिज्ञानमिति शङ्का स्यात्, तन्निवृत्तये अज्ञानमित्युक्तम्। अज्ञानमात्रग्रहणे च ज्ञानाभाव इति शङ्क्येत, अतो **मिथ्येति** विशेषणम्। अतोऽनिर्वचनीयतयाऽभावविलक्षणमनादिसिद्धं ज्ञाननिवर्त्यमज्ञानमिति दर्शितम्। तन्निमित्तः तदुपादान इत्यर्थः। अन्यस्यान्यात्मना प्रतीतिरध्यास इत्युक्ते नीलमुत्पलमित्यादिगुणगुणितादात्म्यप्रत्ययादीनामध्यासात्मकता मा भूदिति विशिनष्टि— **सत्यानृते इति**। सत्यमनिदं चैतन्यम्, अनृतमनात्मा; स्वरूपतोऽध्यस्तत्वात्, आत्मा तु संसृष्टरूपेणैवाध्यस्तो न स्वरूपेणेति सत्यम्। एतदेवाज्ञानं संस्कार-काल-कर्मा[5]दिरूपेण परिणतमध्यासनिमित्तमिति वक्तुं निमित्तग्रहणम्। निमित्तविशेषप्रश्नं प्रतिवक्ति— **नैसर्गिक इति**। प्रत्यक्चैतन्यसत्तामात्रानुबन्धी; प्रवाहरूपेणानादिरिति यावत्। न च प्रवाहस्य प्रवाहिव्यतिरेकेणासत्त्वात्, प्रवाहिव्यक्तीनां च सादित्वात् कुतो नैसर्गिकत्वमिति वाच्यम्; प्रवाहिव्यक्तीनाम् अन्यतमव्यक्त्या विना पूर्वकालानवस्थानं कार्येष्वनादि-त्वमित्यभ्युपगमात्। यद्वा कारणरूपेणास्यानादित्वम्, कार्यात्मना नैमित्तिकत्वमित्युभयमविरुद्धम्। "अध्यस्य मिथुनीकृत्ये"ति क्त्वाप्रत्ययो नाध्यासस्य पूर्वकालत्वमन्यत्वं च लोकव्यवहारादङ्गीकृत्य प्रयुक्तः, लोकव्यवहारस्याध्यासात्मकतया क्रियान्तरत्वाभावात्। अतो

न्यायनिर्णयः

नन्वितरेतराविवेकार्थं द्वयोः स्वरूपतिरस्कारे कथमन्योन्यस्मिन्निति लक्षणांशसिद्धिः, तत्सिद्धये द्वयोः स्वरूपोपस्थितौ कथमविवेकोपपत्तिरत आह— **सत्येति**। सत्यमनिदं चैतन्यम्; तस्य संसृष्टरूपेणाध्यस्तत्वेऽपि स्वरूपेणानध्यस्तत्वात्। अनृतमहंकारादिः, स्वरूपोऽप्यध्यस्तत्वात्। तदुभयमिथुनीकरणरूपोऽध्यास इति यावत्। असत्यसर्पस्य सत्यरज्ज्वां तन्मात्रतया निमज्जनवत् असत्याहंकारादेः सत्यचिन्मात्रतया निमज्जनादेकत्वधीः, सत्यासत्ययोरात्मानात्मनोस्तर्कतो विविच्यमानत्वात् अन्योन्यस्मिन्निति लक्षणांशश्च संभवतीति. भावः। किं पुनरध्यासस्य कारणमित्याशङ्क्य निमित्तमात्रमुपादानं वा निमित्तविशेषो वा पृच्छ्यत इति विकल्प्याद्यौ प्रत्याह— **मिथ्येति**। मिथ्या च तदज्ञानं च, तत् निमित्तमुपादानं यस्य सोऽध्यासस्तथा। तत्र मिथ्येत्युक्ते भ्रान्तिज्ञानप्राप्तावज्ञानमित्युक्तम्। तन्मात्रग्रहे ज्ञानाभावशङ्कायां मिथ्येति। तेनानिर्वाच्यत्वेनाभावविलक्षणं ज्ञाननिवर्त्यमनाद्यज्ञानम्। तदुपादानोऽध्यास इत्यर्थः। एतदेवाज्ञानं संस्कारकालकर्मादिरूपेण परिणतमध्यासनिमित्तमिति वक्तुं निमित्तग्रहणम्। निमित्तविशेषप्रश्नं प्रतिवक्ति— **नैसर्गिक इति**। प्रत्यक्चैतन्यसत्तामात्रानुबन्धी। प्रवाहरूपेणानादिरिति यावत्। न च प्रवाहरूपस्य प्रवाहिव्यतिरेकिणोऽसत्त्वात्, प्रवाहिव्यक्तीनां च सादित्वात्, कुतो नैसर्गिकत्वमिति वाच्यम्, प्रवाहिव्यक्तीनामन्यतमव्यक्त्या विना

---

१. मिथ्याऽज्ञाननिमित्त इत्यत्र निमित्तशब्दः कारणपर्यायः। 'निमित्तं हेतुलक्ष्मणोः' इति कोशात्। 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्' (सि. कौ. कारक.) इति वार्तिके निमित्तशब्दपर्यायतया हेतुकारणशब्दयोः उदाहरणमप्येतदुपोद्बलयति। कारणसामान्यवाचकस्य च प्रकृते उपादानरूपकारणविशेषपरतया व्याख्यानं वस्तुगतिमनुरुध्य। असमवायिकारणत्वसमवायिकारणत्वभिन्नकारणत्ववति निमित्तशब्दप्रयोगस्तु शास्त्रकृतां परिभाषया। एवं चोपादानपदं विहाय कारणसामान्यपरपदप्रयोगः कथं चिद् अविद्यायाः निमित्तकारणत्वमपि संग्रहीतुमिति न्यायनिर्णयाद्याशयो भाति।

२. विमतम् अध्यासः। ३. सत्योपादानकत्वे सत्यत्वापत्तेः। असतस्तूपादानत्वमसंभवनिरस्तम्। सत्यस्यापि ब्रह्मणोऽज्ञानद्वारा जगदुपादानत्वाङ्गीकारात् साक्षादित्युक्तम्। ४. कल्प्यमानस्योपादानस्य सादित्वेऽनवस्था। अनादित्वे तु गौरवम्, अनन्यथासिद्धान्वयव्यतिरेकवतोऽज्ञानस्यैव लाघवादुपादानत्वकल्पनाया उचितत्वात्। ५. कर्म = अदृष्टम्।

प्रकटार्थविवरणम्

न चाज्ञाने प्रमाणप्रश्नं प्रशंसन्ति; द्रष्टृत्वादेवाज्ञत्वोपगमात्। सुषुप्ते च सकलप्रमाणविकले कथ[1]मन्यथोत्थितो[2]ऽनुसन्दध्यात्? [3]अभावमानं विना सिद्धत्वाच्चाभावत्वं प्रत्युक्तम्; ज्ञानसहभावित्वाच्च। न हि घटावष्टब्धे भूतले निर्घटं भूतलमिति जाघटीति। किञ्च विमतमज्ञानं नाभावः; उपादानत्वात्; मृद्वत्; आवरणत्वात्, प्रकाशहेयत्वाद्वा; [4]तमोवत्। स्वरूपेण प्रमाणायोग्यत्वेऽप्यभावव्यावृत्तिभ्रमकारणत्वादिधर्मविशिष्टस्य प्रामाणिकत्वं न विरुध्यते; धर्मस्येवाशब्दागोचरस्य[5] फलदानायोन्मुखीभावविशिष्टस्य फललिङ्गगम्यता।

मनुष्योऽहमित्यारोपमुररीकृत्यापि सत एव सदन्तरसंसर्गं मेनिरे **नैयायिकाः**। तान् व्यावर्तयति— **सत्यानृते मिथुनीकृत्येति**। भ्रमविषयस्य स्वप्नावबुद्धनभोभक्षणवत् अन्यत्र सत्त्वायोगात्, संसर्गवत् भ्रमविषयत्वात् तत्र सत्त्वायोगात्, आत्मनः संसृष्टरूपेण भ्रमविषयस्य तेन रूपेण सत्त्वविधुरस्यापि स्वरूपेणाविषयत्वाद् बाधसाक्षितया परिशेषाच्च सत्यत्वोपपत्तेः सत्यानृते मिथुनीकृत्यैव संव्यवहार इत्यर्थः।

भाष्यभावप्रकाशिका

वस्तुतोऽपौर्वापर्येऽपि विशेषणभेदेन कल्पितभेदं वस्तु तत्प्रतिपत्तिक्रमेण पौर्वापर्यं च। तदालम्बनमनुभवं द्रढयितुमध्यासमभिनयेन दर्शयति— **अहमिति**। तत्र 'अह'मिति कार्याध्यासेष्वाद्योऽध्यासः। तस्याध्यासत्वं चिदचिदात्मकतया युक्तत्वम्। 'इद'मिति च भोक्तुर्भोगसाधनं कार्यकरणसंघातः कथ्यते। 'ममेद'मित्यहंकर्त्रा स्वत्वेन तस्य संबन्धः। तयोश्च 'इदं, ममेद'मिति दृष्टयोरध्यस्तत्वमध्यस्तभोक्तृशेषत्वात् स्वप्नादावध्यस्तराजोपकरणवत्। तदेवं पूर्वभाष्योक्तरीत्या युक्तिशून्योऽप्यत्यन्तविविक्तयोरित्यादिना लक्षितः सत्यानृतमिथुनीकरणस्वरूपेण संभावितोऽध्यासो विशिष्टकारणप्रसूतो नैसर्गिकत्वादागन्तुकदोषानपेक्षोऽहमिदमित्यादिप्रकारैर्निरूपितः। **अयमित्यनुभवसिद्धतामाह।** लोक्यत इति लोकः, प्राणिसमूहः। व्यवहरणं व्यवहारः। अभिज्ञाभिवदने लोकव्यवहारः। लोकव्यवहारो मनुष्योऽहमिति शब्दसञ्जल्पितोऽभिज्ञानमित्यर्थः।

न्यायनिर्णयः

पूर्वकालानवस्थानं कार्येष्वनादितेत्यभ्युपगमात्। यद्वा [6]कारणरूपेणास्यानादित्वम्, कार्यात्मना नैमित्तिकत्वमित्युभयमविरुद्धम्। अध्यस्य मिथुनीकृत्येति क्त्वाप्रत्ययः, नाध्यासस्य पूर्वकालत्वमन्यत्वं च लोकव्यवहारादङ्गीकृत्य प्रयुक्तः, लोकव्यवहारस्याध्यासतया क्रियान्तरत्वाभावात्, अतो वस्तुतोऽपौर्वापर्येऽपि विशेषणभेदेन[7] कल्पितभेदं वस्तु तत्प्रतिपत्तिक्रमेण पौर्वापर्यं च। तदालम्बनमनुभवं द्रढयितुमध्यासमभिनयति— **अहमिति**। तत्राहमिति कार्याध्यासेष्वाद्योऽध्यासः, तस्याध्यासत्वं चिदचिदात्मत्वात्। इदमिति भोक्तुर्भोगसाधनं कार्यकरणसंघातः, ममेदमित्यहंकर्त्रा स्वत्वेन तस्य संबन्धः, तयोश्चेदं ममेदमिति दृष्टयोरध्यस्तत्वमध्यस्तभोक्तृशेषत्वात्, स्वप्नादावध्यस्तराजोपकरणवत्। तदेवं पूर्वभाष्योक्तरीत्या युक्तिशून्योऽपि, अत्यन्तविविक्तयोरित्यादिना लक्षितः, सत्यानृतमिथुनीकरणरूपत्वेन संभावितः, विशिष्टकारणप्रसूतः, नैसर्गिकत्वादागन्तुकदोषानपेक्षः, अहमिदमित्यादिप्रकारैर्निरूपितप्रतिभासत्वेन प्रत्यक्षत्वात् ज्ञेयाध्यासो ज्ञानाध्यासश्चाशक्योऽपह्नोतुमित्यसत्यत्वाद् बन्धस्य, विषयादिसंभवादारभ्यमिदं शास्त्रमित्यभिसंधिः।

---

१. अन्यथा=अज्ञानद्रष्टृत्वाभावे। २. अनुसंदध्यात् = 'गाढं सुप्तोऽहमासं, न किंचिदवेदिषम्' इति अज्ञानं स्मरेत्। ३. अभावमानम्= अनुपलब्धिः।

४. तमो भावरूपमिति अग्रे व्यक्तीभविष्यति।

५. श्रेयस्साधनत्वाकारेण खलु ज्ञानं यागादेरनुष्ठानप्रयोजकमिति तेन रूपेण यागादिर्धर्मः, न स्वरूपतः। तच्च न मानान्तरवेद्यमिति चोदनैकमेयत्वं धर्मस्य जेगीयते। (द्र. श्लो. वा. चोदनासूत्रे १४). सुखादिफलेन तत्कारणधर्मानुमानं च न तस्य वेदैकमेयत्वं विहन्ति। तद्धि स्वानुपजीविमानान्तरेणाबोध्यत्वे सति वेदबोध्यत्वम्। अनुमानं च धर्मत्वेन सुखत्वेन कार्यकारणभावसिद्ध्यर्थं वेदपादोपजीवीति भावः।

६. कारणमज्ञानम्। तच्चानादि। तदात्मनेत्यर्थः।

७. 'दण्डी कुण्डली वासस्वी देवदत्त' इत्यत्र देवदत्तस्य दण्डकुण्डलवासोरूपविशेषणानीव एकस्याध्यासस्य अन्योन्यात्मकतेति, सत्यानृते इति, अहमिदं ममेदमिति च विशेषणानि भिन्नानि। तद्गतश्च भेदः अध्यासे उपचर्यते। तथा एकैकविशेषणविशिष्टमध्यासं ज्ञात्वा क्रमेण तद्बोधकशब्दविरचनात् अस्ति अध्यासविषयकज्ञानानां पौर्वापर्यम्, तच्च विषयेऽध्यासे उपचर्यते इत्यर्थः।

नृसिंहाश्रमश्रीचरणास्तु-अध्यस्य मिथुनीकृत्य लोकव्यवहारः इति त्रयाणामेकार्थत्वेऽपि पूर्वपूर्वाध्यासस्योत्तरोत्तराध्यासे संस्कारद्वारा हेतुत्वात् समानकर्तृकक्रियाव्यक्तिभेदः, पौर्वापर्यं चास्तीति मुख्य एव क्त्वाप्रत्ययः। तेन च नैसर्गिकपदोक्तानादित्वं प्रवाहरूपेणेति सूचितं भाष्यकारैरित्याहुः। तदेव चानुसृतं रत्नप्रभायाम्।

¹आह– कोऽयमध्यासो नामेति।

प्रकटार्थविवरणम्

तदेवं सङ्क्षेपतोऽध्याससमर्थनेनार्थवत्त्वमुपचिक्षेप। पुनस्तमेव लक्षणादिभिः स्फुटीकर्तुं चोद्यमिवोद्भावयाम्बभूव— **आह कोऽयमिति।** यदि 'मनुष्योऽहम्' इत्याद्यवभासो न गौणस्तर्ह्यध्यासलक्षणं ब्रूहि इत्यर्थः। प्रश्नस्थलक्ष्याभिधायि-

भाष्यभावप्रकाशिका

अथवा लोकानां व्यवहारो लोकव्यवहारः। स चायमहमिति व्यपदेशः, इतिशब्दसूचितश्च तदनुरूपः प्रवृत्त्यादिः। अस्मिन् पक्षेऽध्यासव्यवहारक्रिययोरेककर्तृत्वादध्यस्य व्यवहार इति, अध्यासस्य व्यवहारात् पूर्वकालत्वमङ्गीकृत्याध्यस्य लोकव्यवहार इत्युक्तम्। अध्यासस्वरूपं कथ्यते— **अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येति।** तस्य निमित्तमुच्यते— **इतरेतराविवेकेनेति।** चिद्रूपेण विवेकेऽपि तस्य नित्य-शुद्ध-बुद्ध-मुक्तानन्दस्वरूपेणानवभासनादध्यास इति भावः। 'अहमिदं' 'ममेदमि'त्यादिना चाध्यासस्य कार्यमभिधीयते। 'अहमिद'मित्यत्रेदं शरीराद्यहमित्येकोऽध्यासः। इदमिति च वस्तुतो न प्रतीतितः, तथा भानाभावात्। अध्यस्येति पूर्वकालत्वसूचितमध्यासस्य व्यवहारकारणत्वं दर्शयति— **मिथ्येति। मिथ्याज्ञानम्** अध्यासस्तन्निमित्त इत्यर्थः।

ननु एवं शरीरादेरवस्तुत्वात् कुतश्चितो भेदाग्रहः? कुतश्चाध्यास इति? तत्राह— **सत्यानृते इति।** मिथुनीकृत्य युगलीकृत्य। अप्रतीतस्याध्यासायोगादारोप्यस्य प्रतीतिरुपयुज्यते, न वस्तुसत्तेति भावः। परमार्थसतोऽपारमार्थिकेन परमार्थतो मिथुनीभावाभावाद-भूतभावार्थस्येह [च्वेः] प्रयोगः। ननु प्रतीतस्यारोपः, समारोपे च प्रतीतिरिति परस्पराश्रयत्वमित्याशङ्क्याह—**नैसर्गिक इति।** अनादिरित्यर्थः। व्यवहारस्यानादित्वकथनात् कारणस्याध्यासस्यानादितोक्ता। ततश्च पूर्वपूर्वाध्यासोपदर्शितस्य देहा-देरुत्तरोत्तराध्यासहेतुत्वान्न परस्पराश्रयतेत्यर्थः। अत्र च प्रवाहरूपेण नैसर्गिकत्वम्, कार्यव्यक्तिरूपेण च नैमित्तिकत्वमित्यविरोधः। प्रतिभास्यत्वेन प्रत्यक्षत्वाद् ज्ञेयाध्यासो ज्ञानाध्यासश्च न शक्योऽपह्नोतुमित्यसत्यत्वाद् बन्धस्य विषयादिसंभवादारभ्यमिदं शास्त्रमित्यभिसन्धिः।

शास्त्रारम्भहेतुविषयादिसाधकमध्यासमाक्षेपसमाधिभ्यां संक्षिप्य तमेव लक्षण-संभावना-सद्भाव-प्रमाणैः स्फुटीकर्तुं चोदयति— **आहेति।** शास्त्रस्य तत्त्वनिर्णयार्थतया(ऽनु)वादत्वात् तत्र गुरुशिष्ययोरधिकारात् पुरःस्थितमिव शिष्यं गृहीत्वा परोक्तिरिति। "आह कोऽय"मित्यारभ्य "कथं पुनः प्रत्यगात्मनी"त्यतः प्रागध्यासस्वरूपलक्षणपरं भाष्यम्; तस्मादारभ्य "तमेतमविद्याख्य"मित्यतः प्राक्तनं तत्संभावनाय; एतदादि "सर्वलोकप्रत्यक्ष" इत्यन्तं तत्संभवनिर्णयायेति विभागः। समाधानभाष्येऽध्यासलक्षणनिर्देशेऽपि प्रसिद्धाध्यासलक्षणे निर्णीते प्रागुक्तलक्षणस्य तद्विशेषतया सिद्धिरिति मत्वा प्रसिद्धाध्यासं पृच्छति— **कोऽयमिति।** किंशब्दस्याक्षेपेऽपि संभवादत्र सोऽपि विवक्ष्यते। आत्मन्यध्यस्तोऽनात्मेति विशेषोक्तेर-सदृशयोरधिष्ठानाधिष्ठेयत्वायोगात् असंभावनया विशेषाक्षेपात् प्रश्नाक्षेपयोर्भिन्नार्थत्वादुपपत्तिरिति भावः। अध्याससाधारण-

न्यायनिर्णयः

शास्त्रारम्भहेतुविषयादिसाधकमध्यासमाक्षेपसमाधिभ्यां संक्षिप्य तमेव लक्षणसंभावनाप्रमाणैः स्फुटीकर्तुं चोदयति— **आहेति।** शास्त्रस्य तत्त्वनिर्णयार्थतया ²वादत्वात्, तत्र गुरुशिष्ययोरधिकारात्, पुरःस्थितमिव शिष्यं गृहीत्वा परोक्तिः। इत आरभ्य 'कथं पुनः प्रत्यगात्मनि' इत्यतः प्रागध्यासलक्षणपरं भाष्यम्, तस्मादारभ्य 'तमेतमविद्याख्यम्' इत्यतः प्राक्तनं तत्संभावनायाः, एतदादि 'सर्वलोकप्रत्यक्ष' इत्यन्तं तन्निर्णयायेति विभागः। समाधानभाष्येऽध्यासलक्षणनिर्देशेऽपि प्रसिद्धाध्यासलक्षणे निर्णीते प्रागुक्तलक्षणस्य ³तद्विशेषतया सिद्धिरिति मत्वा प्रसिद्धाध्यासं पृच्छति— **कोऽयमिति।** किंशब्दस्याऽऽक्षेपेऽपि संभवादत्र सोऽपि विवक्ष्यते। आत्मन्यध्यस्तोऽनात्मेति विशेषोक्तेः, असदृशयोश्चाधिष्ठानाधिष्ठेयत्वायोगात्, असंभावनया विशेषाक्षेपात्⁴,

---

१. 'अनृतस्य प्रतीत्ययोगेन सत्यानृतमिथुनीकरणासंभवात् अध्यासो न संभवति' इत्याक्षेपपरतया इदं भाष्यमवतारितं भामत्याम्। 'पूर्वदृष्ट' पदेनानृतस्य प्रतीतिसंभवोक्त्या तत्परिहारः। २. वादः= तत्त्वबुभुत्सया क्रियमाणो विचारः।

३. तद्विशेषतयेति। 'स्मृतिरूपः' इत्यादिना अध्याससामान्यलक्षणे उक्ते 'अन्योऽन्यस्मिन्' इत्यादिभाष्योक्तोऽध्यासः तद्विशेषतया ज्ञायते इति भावः।

४. विशेषाक्षेपात्= आत्मन्यनात्माध्यासरूपाध्यासविशेषाक्षेपात्।

उच्यते—[1]स्मृतिरूपः परत्र पूर्वदृष्टावभासः।

प्रकटार्थविवरणम्

पदानुवादेनानिर्वाच्यादिविशेषं हित्वा भ्रममात्रलक्षणमाह— **स्मृतिरूप इति**। 'पूर्वदृष्टावभासोऽध्यास' इत्येतावति लक्षणे स्मृतावतिव्याप्तिः स्यात्। तदर्थमाह— **स्मृतिरूप इति**। संस्कारोत्थत्वेन स्मृतिसदृशो, न पुनः स्मृतिरेवाभ्रमत्वप्रसङ्गात्। अपरोक्षत्वाच्च। अपरोक्षत्वा [क्षावि] विवेकादपरोक्षत्वे पारोक्ष्यस्यापि प्रसङ्गात्[2]। प्रत्यभिज्ञायामतिव्याप्तिव्यवच्छेदायाह— **परत्रेति**। विषयसप्तमीयम्। पूर्वदृष्टो योऽर्थस्ततोऽन्यस्मिन्नित्यर्थः। दृष्टगोर्गवयदर्शने 'अनेन सदृशी मदीया गौः' [3]इति परत्र गवये गोसादृश्यावभासः स्मृतिरूपो भवतीत्यत आह— **पूर्वेति**। पूर्वदृष्टस्यावभासो, न तु तत्सादृश्यस्येत्यर्थः। पूर्वदृष्टत्वं च भ्रमविषयस्यानादिभ्रमसन्तताविति गमयितव्यम्। अनुमाने पूर्वदृष्टाग्नित्वस्य व्यक्त्यन्तरे योऽवभासः तद्व्यवच्छेदायाह— **स्मृतिरूप इति**।

भाष्यभावप्रकाशिका

स्वरूपधीहेतुत्वेन लक्षणस्याभ्यर्हितत्वादाक्षेपमुपेक्ष्य प्रश्नमेव(इति) मत्वाऽऽह— **उच्यत इति**। अत्र विशेष्यतया प्रश्नवाक्यस्थाध्यासपदानुषङ्गान्न साकाङ्क्षत्वम्। परत्रेत्युक्ते परस्येत्यार्थिकम्। परत्र परस्यावभास इत्येव लक्षणम्। तदुपपादकं स्मृतिरूपत्वम्। तत्साधनार्थं पूर्वदृष्टावभासपदम्। **पूर्वदृष्टः** पूर्वदृष्टसदृश इत्यर्थः। अध्यासद्वयेऽपि परत्रेति सामान्यतो धीयोग्यमधिष्ठानमुक्तम्। अर्थपक्षेऽवभास्यत इत्यवभासः। परश्चासाववभासश्चेति परावभासः। तथा ज्ञानपक्षेऽवभासनमवभासः, परस्यावभासः परावभास इति समासः। एतावत्युक्ते घटात्परस्य पटस्यावभासः, स चावभास्यमानोऽध्यासः स्यात्, तन्निवृत्तये **परत्रेति**। नचैवमपि खण्डो गौरित्यादावध्यासः स्यात्; परत्रेत्यारोप्यात्यन्ताभाववतोऽभिधानात्, खण्डगवादीनां तादात्म्यवतां संसर्गशून्यत्वाभावात्। दोष-संस्कार-संप्रयोगोत्थत्वादित्थमवभासः संभवतीति वक्तुं **स्मृतिरूप** इत्युक्तम्। स्मर्यत इति स्मृतिः स्मर्यमाणोऽर्थः। "भावे" "अकर्तरि च कारके संज्ञायाम्" इति सूत्रद्वयमधिकृत्य "स्त्रियां क्तिन्" इति सूत्रेण भावे कर्तृव्यतिरिक्ते कर्मादौ च कारके संज्ञायामसंज्ञायां च क्तिन्विधानाद्, "अकर्तरि चे"ति चकारस्य संज्ञाव्यभिचारित्वाङ्गीकारात्। स्मर्यमाणस्य रूपमिव

न्यायनिर्णयः

प्रश्नाक्षेपयोर्भिन्नार्थत्वादुपपत्तिरिति भावः। अध्याससाधारणस्वरूपधीहेतुत्वेन लक्षणस्याभ्यर्हितत्वात्, आक्षेपमुपेक्ष्य पृष्टमेवेति मत्वाऽऽह— **उच्यत इति**। अत्र प्रश्नवाक्यस्थाध्यासपदानुषङ्गान्न साकाङ्क्षत्वम्। परत्रेत्युक्ते परस्येत्यार्थिकम्। परत्र परावभास इत्येव लक्षणम्। तदुपपादकं स्मृतिरूपत्वम्। तत्साधनार्थं पूर्वदृष्टत्वम्। अध्यासद्वयेऽपि परत्रेति सामान्यतो धीयोग्यमधिष्ठानमुक्तम्। अर्थपक्षेऽवभास्यत[4] इत्यवभासः, परश्चासाववभासश्चेति। तथा ज्ञानपक्षेऽवभासनमवभासः, परस्यावभासः परावभासः। तावत्युक्ते घटात्परस्य पटस्यावभासः, स चावभासमानोऽध्यासः स्यात्, तन्निवृत्तये **परत्रेति**। न चैवमपि 'खण्डो गौ'रित्यादावतिव्याप्तिः; परत्रेत्यारोप्यात्यन्ताभाववतोऽभिधानात्, खण्डगवादीनां तादात्म्यवतां संसर्गशून्यत्वाभावात्। दोषसंस्कारसंप्रयोगोत्यत्वादित्थमवभासः संभवतीति वक्तुं **स्मृतिरूप** इत्युक्तम्। स्मर्यत इति स्मृतिः स्मर्यमाणोऽर्थः। 'भावे' 'अकर्तरि च कारके संज्ञायाम्' इति सूत्रद्वयमधिकृत्य 'स्त्रियां क्तिन्' इति सूत्रेण भावे, कर्तृव्यतिरिक्ते च कारके कर्मादौ संज्ञायामसंज्ञायां च क्तिन्विधानात्, 'अकर्तरि चे'ति चकारस्य संज्ञाव्यभिचारार्थत्वाङ्गीकारात्। स्मर्यमाणस्य रूपमिव रूपमस्येति स्मृतिरूपो, न तु स्मर्यत एव; स्पष्टं पुरोवस्थितत्वेन भानात्। ज्ञानपक्षे स्मरणं स्मृतिः, भावे क्तिन्विधानात्। स्मृते रूपमिव रूपमस्येति स्मृतिरूपः, न स्मृतिरेव; पूर्वानुभूतस्य [5]तथाऽभानात्। स्मृतिरूपता दोषादित्रयोत्थत्वात्, [6]तादृग्धीविषयत्वाद्वा। अदृष्टरजतस्य रजतभ्रमादृष्टेः, तत्संस्काराभावाच्च संस्कारद्वारा स्मृतिरूपतोपयोगि पूर्वदृष्टत्वम्। तदेवं परत्र परावभास इत्येव लक्षणम्, अन्यदुक्तरीत्या तच्छेषमिति स्थितम्।

---

१. वस्तुविशिष्टत्वमध्याससामान्यलक्षणम्। वैशिष्ट्यं च स्वविशिष्टविशेष्यतानिरूपितप्रकारताविशिष्टत्वसम्बन्धेन। प्रथमवैशिष्ट्यं स्वाभाववन्निष्ठत्व-स्वानुयोगितावच्छेदकावच्छिन्नत्वोभयसम्बन्धेन। द्वितीयवैशिष्ट्यं चाश्रयत्व-निरूपकत्वान्यतरसम्बन्धेन। समन्वयप्रकारस्तु गुरुमुखादवगन्तव्यः।

२. अपरोक्षपुरोवर्त्यविवेकाद् यदि रजतस्यापरोक्षत्वं, तर्हि परोक्षारोप्याविवेकात् पुरोवर्त्यपि परोक्षमेव किं न स्यादिति भावः।

३. अत्र 'गोसदृशोऽयं गवय' इति पाठो ऽपेक्षितः। अन्यथा 'गवये गोसादृश्यावभास' इत्यसंगतेः। स चावभासः सादृश्यविशिष्टगवयांशे प्रत्यक्षात्मकोऽपि गवांशे संस्कारजन्यत्वेन स्मृतिरूप इति। ४. एकावच्छेदेन स्वसंसृज्यमाने स्वात्यन्ताभाववति अवभास्यत्वमध्यस्तत्वमिति रत्नप्रभा। द्र.पृ. ११

५. तथा= पूर्वानुभवविषयत्वेन। 'तद् रजतम्' इत्येवं तत्ताऽनुल्लेखादिति यावत्। ६. तादृग्धीविषयत्वात्= दोषादित्रयजन्यधीविषयत्वात्। आरोप्यस्य स्मर्यमाणेन संस्कारजन्यज्ञानविषयत्वेन साम्यात्, दोषादिजन्यज्ञानविषयत्वेन ततो वैषम्याच्च स्मर्यमाणरूपत्वमेव, न तु स्मर्यमाणत्वमिति भावः।

तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति।

प्रकटार्थविवरणम्

नन्वध्यासस्यैतल्लक्षणमित्यत्र किं प्रमाणमित्याशङ्क्य विशेषविवादेऽपि नायथावस्तुख्यातिमात्रे विवाद इति न प्रमाणप्रश्नावकाश इत्यभिसन्धायाह— **तं केचिदित्यादिना**। केचिद् विज्ञानवादिनोऽन्यथाख्यातिवादिनश्च **तमध्यासमन्यत्र** शुक्त्यादा-

भाष्यभावप्रकाशिका

रूपमस्येति स्मृतिरूपः, न तु स्मर्यत एव; स्पष्टं पुरोऽवस्थितत्वेन भानात्। ज्ञानपक्षे स्मरणं स्मृतिः; भावे क्तिन्विधानात्। स्मृते रूपमिव रूपमस्येति स्मृतिरूपः; न पुनः स्मृतिरेव। अनुभूतस्य तथाऽनवभासकत्वात्। स्मृतिरूपता त्वसन्निहितविषयत्वात्[1], दोषादित्रयोत्थत्वात्, तादृग्धीविषयत्वाद्वा। अदृष्टरजतस्य रजतभ्रमादृष्टेः, तत्संस्काराभावाच्च संस्कारद्वारा स्मृतिरूपतोपयोगि पूर्वदृष्टत्वम्। स्मृतिरूपशब्देन दोष-संप्रयोग-संस्कार-लक्षणकारणत्रितयजन्यत्वमुच्यत **इत्याचार्याः**[2]। अवभासनमवभासः। तदेवं स्मृतिरूपः परत्र परावभास इत्येव लक्षणम्, अन्यदुक्तरीत्या तच्छेषमिति स्थितम्। परात्मनाऽवभास इत्युक्ते घटात्परस्य पटस्य स्वात्मनाऽवभासोऽप्यध्यासः स्यात्; तद्व्यावृत्तये स्मृतिरूप इति विशेषणम्। कारणत्रितयजन्यज्ञानविषयत्वलक्षणं स्मृतिरूपत्वम्। अधिष्ठानांशस्याप्यधिष्ठानाध्यस्यमानविषयस्य ज्ञानस्याङ्गत्वाङ्गीकाराय तद् विशिनष्टि— **परत्रेत्यादिना**। ज्ञानाध्यासपक्षेऽपि स्मृतिरूपत्वमधिष्ठानज्ञानस्याप्यस्ति; अधिष्ठानाध्यस्यमानविषयज्ञानस्यैकत्वाङ्गीकारात्, अत उक्तम्— **परत्रेत्यादि**। अथवा परत्र परात्मनाऽवभास इत्येतावदेव लक्षणम्। ननु एवं सति 'शुक्लः पट' इत्यादिप्रत्ययानामध्यासात्मकता स्यात्? मैवम्; परत्रेतिशब्देनारोप्यमाणात्यन्ताभावाधिकरणस्य निर्देशात् शौक्ल्यपटयोश्च संसर्गशून्यताऽभावात्। स्मृतिरूपग्रहणं तु परत्र परात्मनाऽवभासोपपादनाय, कारणविशेषजन्यत्वादित्थंभावस्संभवतीति। न च स्मृतिरूपत्वं लक्षणान्तर्गतम्; तेन कारणत्रितयजन्यत्वविवक्षायामधिष्ठानज्ञानस्य संप्रयोगमात्रजन्यतया पदान्तरव्यावर्त्याभावापातात्। न चाधिष्ठानारोप्यविषयं ज्ञानमेकमेव; [3]एकत्वलक्षणैकत्वस्य वृत्तिभेदेन तत्रासंभवात्। अथ स्मृति[रूप]शब्देन संस्कारजन्यत्वमात्रस्यैव विवक्षितत्वात् प्रत्यभिज्ञाया अपि संस्कारजन्याया भ्रमत्वप्रसक्तौ तद्व्यावृत्तये पदान्तरमिति मतम्, तदपि न समञ्जसम्; 'स एवायं शुक्लः पटः' इत्यादिप्रत्यभिज्ञाया अपि भ्रमत्वप्रसङ्गात्(?)। एवं च "अन्यस्यान्यात्मतावभासतां न व्यभिचरति" इति, "अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचामे"ति च [4]परामर्शः [संगच्छते]

अध्यासे वादिविप्रतिपत्तेरुक्तं तल्लक्षणं कथमित्याशङ्क्याधिष्ठानारोप्यदेशकालविशेषेष्वेव विवादेऽपि परत्र परात्मनावभास इति लक्षणे संवादात्, न्यायतश्च तल्लक्ष्येऽनिर्वाच्यतासिद्धेस्सर्वतन्त्रसिद्धान्तोऽयमिति विवक्षितत्वाद्वादिविवादानुपन्यस्यन् **केषांचिदन्यथाख्यातिवादिनामात्मख्यातिवादिनां चाभिप्रायमाह— तं केचिदिति**। अन्यश्चासौ धर्मोऽन्यधर्मः। अथवा अन्यस्य ज्ञानादेर्धर्मोऽन्यधर्मः। **अन्यत्र** शुक्त्यादौ, अन्यस्य कार्यत्वेन पारतन्त्र्याद्धर्मस्य रजतादेः, **अध्यासः** तादात्म्यधीः। देशान्तरादिगतं रजतादि दोषात् पुरोवर्त्यात्मना भातीत्येवमुक्तमध्यासं केचिदन्यथाख्यातिवादिनो वदन्तीति, **अन्यत्र** बाह्ये शुक्त्यादौ, अन्यस्य ज्ञानस्य धर्मो रजतादिस्तस्य, **अध्यासः** बहिरिव तदभेदेन धीरित्यात्मख्यातिवादिनः तमध्यासमाहुरिति च योजना। पक्षद्वयेऽपि परत्र परावभासे संमतिरस्तीति भावः।

न्यायनिर्णयः

अध्यासे वादिविप्रतिपत्तेः, उक्तं तल्लक्षणं कथमित्याशङ्क्य आरोप्यदेशादौ विवादेऽपि लक्षणसंवादात्, न्यायतश्च तल्लक्ष्येऽनिर्वाच्यतासिद्धेः सर्वतन्त्रसिद्धान्तोऽयमिति विवक्षित्वा वादिविवादानुपन्यस्यन् केषांचिदन्यथाख्यातिवादिनामात्मख्यातिवादिनां चाभिप्रायमाह— **तं केचिदिति**। **अन्यत्र** शुक्त्यादावन्यस्य कार्यत्वेन पारतन्त्र्याद् धर्मस्य रजतादेर**ध्यासस्**तादात्म्यधीः। देशान्तरगतं

---

१. असंनिहितेति। इदं भामतीरीत्या। आरोप्यस्यासंनिहितत्वं चाधिष्ठाने परमार्थतोऽसत्त्वमिति कल्पतरुः। द्र. पृ. १९

२. आचार्याः= विवरणाचार्याः। स्मृतिरूपपदेन तल्लाभप्रकारस्तु तत्त्वदीपने द्रष्टव्यः (पृ. १०८)

३. 'अवच्छेदकवृत्त्येकत्वलक्षणज्ञानैकत्वस्य' इति विवक्षितम्। ४. 'परत्र परावभासः' इत्यंशस्यैवाग्रे परामर्शात् 'स्मृतिरूपः' इत्यंशस्य लक्षणाघटकत्वमवगम्यत इति भावः। स्मृतिरूपपदोक्तं कारणत्रयजन्यत्वमध्यासस्य तटस्थलक्षणम्, इतरत् स्वरूपलक्षणमिति तत्त्वदीपनम्। पृ. १०८.

केचित्तु यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रम इति। [1]अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते इति। सर्वथाऽपि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति।

प्रकटार्थविवरणम्

वन्यधर्मस्यापि [स्य वि] ज्ञानाकारस्य देशान्तरस्थस्य वाऽध्यास इति वदन्ति। [2]विमतं रूप्यं बुद्धिरूपमबाधितापरोक्षत्वात्, बुद्धिवत्; विमतं रूप्यात्मना भाति; तदर्थिनो नियमेन प्रवृत्तिविषयत्वात्; सम्प्रतिपन्नवदिति। अख्यातिवादिनस्तु— यत्र यदध्यास इति प्रसिद्धिस्तयोरेव विवेकाग्रहणनिबन्धनोऽयथाव्यवहार[3] इति वदन्ति। सम्प्रतिपन्नाविवेकादेव व्यवहारोपपत्तौ मिथ्याज्ञान-कल्पनायां गौरवात्। [4]बुद्धिरूपत्वञ्च बुद्धौ कल्पितत्वं चेत्, साध्यवैकल्यम्; बुद्धिमात्रत्वं चेद्, बहिःसंविद्विरोधः। असती चेद् रूप्यात्मता साध्यते, साध्यवैकल्यम्; सती चेद्, बाधविरोधः। न च तदन्तरेणास्ति साधारणगिरोऽर्थ इति। शून्यवादिनस्तु यत्र यदध्यासस्तस्यैव रूप्यादेर्विपरीतधर्मत्वस्याविद्यमानस्य कल्पनां भासमानतामाचक्षतेऽत्यन्तलाघवात्। इतरथा रूप्यस्मरणं, [5]तत्प्रमोषः, तन्निमित्ताविवेकश्चेति गरीयसी कल्पना स्यात्। 'नेदं रूप्य'मिति च प्रतिपन्नस्यासत्त्वसंवेदनादिति। सर्वेष्वपि पक्षेष्वयथावस्तुख्यातितां लक्षणांशं न व्यभिचरति अध्यासः। अख्यातिमतेऽपि यथा विविक्ते वस्तुनी [6]तथा न ख्यातिः; किन्त्वविविक्ततया।

भाष्यभावप्रकाशिका

अख्यातिमतमाह— **केचित् त्विति**। वदन्तीत्यनुषज्यते। तयोर्विवेकः, तदग्रहणनिबन्धनोऽयमेकत्वभ्रम इत्यख्यातिवादिनः। यत्र शुक्त्यादौ, यस्य रजतादेः, अध्यासो लोके प्रसिद्धः, तयोस्तद्धियोश्च दोषाद्विवेकाग्रहे तत्कृतो रजतमिदमित्यादिसंसर्गव्यवहार इत्यख्यातिवादिनः। तैरपि संसर्गव्यवहाराय तद्धीरुपास्या; वस्तुग्रहे तदभिन्नविवेकाग्रहायोगात् तस्य तत्कृतत्वासंभवाद्, अविद्येतरदोषस्य वस्तुन्यन्यभानहेतुताऽनुपलम्भात्। अतः परत्र परावभासे तेषामप्यस्ति संमतिरिति भावः।

केषांचिदन्यथाख्यातिवादिनां माध्यमिकानां च मतं दर्शयति—अन्ये त्विति। यत्र शुक्त्यादौ यस्य रजतादेः, अध्यासः, तस्यैव शुक्तिशकलादेः, विपरीतधर्मत्वस्य भावान्तरत्वेन शून्यत्वेन वा सत्ताहीनस्य, कल्पनाम् भासमानताम्, अध्यासं भावान्तराभाववादिनः शून्यवादिनश्चाचक्षते। तथा च तत्रापि परत्र परावभासे संवादोऽस्तीत्यर्थः। एवं मतान्तराण्युपन्यस्य प्रकृतं स्वमतानुसारित्वं तेषां निगमयति— **सर्वथेति**। सर्वेषु पक्षेषु प्रकारविशेषविवादेऽपि पुरोवर्तिनो रजतादित्वेन वेद्यतामध्यासो न व्यभिचरति, इति युक्तमुक्तलक्षणाध्यासस्य सर्वतन्त्रसिद्धान्तत्वम्। न च तस्य सत्त्वं; बाधात्, अन्यत्र रजतादिसत्त्वस्याभातत्वात्।

न्यायनिर्णयः

हि रजतादि दोषात् पुरोवर्त्यात्मना भातीत्येवमुक्तमध्यासं केचिदन्यथाख्यातिवादिनो वदन्तीत्येकत्र। अपरत्र त्वन्यत्र बाह्ये शुक्त्यादावन्यस्य ज्ञानस्य धर्मो रजतादिस्तस्याध्यासः बहिरिव तदभेदेन धीः, इत्यात्मख्यातिवादिनस्तमध्यासमाहुरिति योजना। पक्षद्वयेऽपि परत्र परावभासे संमतिरस्तीति भावः। अख्यातिमतमाह— **केचित्त्विति**। वदन्तीत्यनुषज्यते। यत्र शुक्त्यादौ यस्य रजतादेरध्यासो लोके प्रसिद्धस्तयोस्तद्धियोश्च दोषवशाद् विवेकाग्रहे तत्कृतो रजतमिदमित्यादिसंसर्गव्यवहार इत्यख्यातिवादिनः। तैरपि संसर्गव्यवहाराय तद्धीरुपास्या। वस्तुग्रहे तदभिन्नविवेकाग्रहायोगात्, तस्य तत्कृतत्वासंभवात्, अविद्येतरदोषस्य भाति वस्तुंन्यभानहेतुतानुपलम्भात्। अतः परत्र परावभासे तेषामप्यस्ति संमतिरिति भावः। [7]केषांचिदन्यथाख्यातिवादिनां माध्यमिकानां च मते दर्शयति— **अन्ये त्विति**। यत्र शुक्त्यादौ यस्य रजतादेरध्यासः, तस्यैव शुक्त्यादेर्विपरीतधर्मत्वस्य रजतादिरूपत्वस्य, भावान्तरत्वेन शून्यत्वेन वा सत्ताहीनस्य, कल्पनां भासमानतामध्यासं भावान्तराभाववादिनः शून्यवादिनश्चाचक्षते। तथा च तत्रापि परत्र परावभासे संवादोऽस्तीत्यर्थः। मतान्तराण्युपन्यस्य स्वमतानुसारित्वं तेषां निगमयति— **सर्वथेति**। सर्वेषु पक्षेषु प्रकारविशेषविवादेऽपि पुरोवर्तिनो रजतादित्वेनैव वेद्यतामध्यासो न व्यभिचरतीति युक्तमुक्तलक्षणस्याध्यासस्य सर्वतन्त्र-सिद्धान्तत्वम्। न च तस्य सत्त्वं, बाध्यत्वात्, अन्यत्र रजतादिसत्त्वस्यामानत्वात्। न च तदसत्त्वं, अपरोक्षत्वात्। नापि विरोधादेकस्य

---

१. इदं ब्रह्मविद्याभरणे स्वमतपरतया व्याख्यातम्। द्र. पृ. ६५ २. आद्यं विज्ञानवादिनोऽनुमानं, द्वितीयं तार्किकस्य। ३. अयथाव्यवहार इति भ्रमपदव्याख्या। ४. अख्यातिवादी पूर्वोक्तानुमानद्वयं क्रमेण दूषयति-बुद्धिरूपत्वमित्यादिना। साध्येति। दृष्टान्त इत्यादिः। एवमग्रेऽपि।

५. तत्प्रमोषः= तत्ताप्रमोषः। ६. तथा=विविक्ततया।

७. 'शुक्त्यभावो रूप्यम्, तद्रूपेण शुक्तिः ख्यातीत्यन्यथाख्यात्येकदेशिनः' इति तत्त्वदीपनम्। पृ. ११६

तथा च लोकेऽनुभवः– शुक्तिका हि रजतवदवभासते, एकश्चन्द्रः सद्वितीयवदिति।

प्रकटार्थविवरणम्

अतोऽभ्युपेतैवायथावस्तुख्यातिः। विवादाध्यासिताः प्रत्यया यथार्थाः; प्रत्ययत्वात्, संप्रतिपन्नप्रत्ययवदिति प्रयोगे 'अयथार्थप्रत्ययोऽस्ति' इत्यस्मदुपेतप्रत्ययेऽनेकान्तः[1]। 'व्यवहारमात्रस्य च संसृष्टप्रत्ययपूर्वकत्वनियमाभावे श्रोतुः प्रवृत्त्याऽपि संसृष्टप्रत्ययमनुमाय सङ्गतिसंवेदनासम्भवेन वेदप्रामाण्योच्छेदप्रसङ्गात्[3]। तस्मात् सर्वजनीनाध्यासलक्षणपरीक्षणे न मनः खेदनीयम्। लोकानुभवसंमतिमाह— **तथा चेति**। निरुपाधिकाहङ्काराद्यतद्रूपारोपस्य प्रथममुदाहरणम्; चरमं जीवेश्वरभेदारोपस्य।

[4]वत्करणेन चानिर्वाच्यतामाचचक्षे। सर्वथा वास्तवाकारेण निरूपणासहिष्णुता चानिर्वाच्यता। तथा हि—न तावद् यथावभासं सदेव रूप्यम्; अत्रसत्त्वप्रसङ्गात्। नापि तदन्यत्रसत्; अतिविप्रकर्षेणाक्षसन्निकर्षापकर्षेण[5] परोक्षतापातात्, चक्षुरुन्मीलनान्वय-व्यतिरेकयोश्चाधिष्ठानदर्शनोपक्षयात्। न च दोषोऽक्षसन्निकर्षनिरपेक्ष एवापरोक्ष्यहेतुः, दुष्टस्य सर्वापरोक्ष्यापातात्। संसर्गवदसत एवारोपकल्पनायां [6]दृष्टानुसारित्वात्। असन्नपि संसर्ग एवारोप्यो न संसर्गीति [7]कोशपानमेव शरणम्। पौरस्त्यवस्तुन एवायथाव्यवहारमात्रगोचरत्वकल्पने सुतरां लाघवम्। तस्मात् सदारोपणनिरूपणभाषणं नादरणीयम्। नाप्यत्यन्तासदादरणीयम्,

भाष्यभावप्रकाशिका

न च तदसत्त्वम्; अपरोक्षत्वात्, नापि विरोधादेकस्य सदसत्त्वम्। अतोऽनिर्वाच्यतेति भावः। न केवलं वादिनामेवायमध्यासः संमतः, अपि तु लौकिकानामपीत्याह—**तथाचेति**। [8]नयनोपहितेदमंशे रजतादिसंस्कारसहिताविद्यया रजताद्यध्यासवत् पूर्वाहङ्कारा-दिवासनोपहितानाद्यविद्यया चिदात्मन्यनुभूयतेऽहङ्काराध्यास इति निरुपाधिकाध्यासे दृष्टान्तमाह— **शुक्तिकेति**। सम्यग्धीसिद्धा-धिष्ठानरूपाभिप्रायेण शुक्तिकाग्रहणम्। संप्रयुक्तस्य मिथ्यारजतत्वभानधीबोधनाय वत्करणम्। अनुभवप्रसिद्ध्यर्थो हिशब्दः। बिम्ब-प्रतिबिम्बयोः, प्रतिबिम्बानां च मिथो भेदधीवद् जीव-ब्रह्मणोर्जीवानां च भेदधियः सोपाधिकभ्रमस्य दृष्टान्तमाह— **एक इति**। एकत्वग्रहणवतिग्रहणे पूर्ववत्। लक्षणप्रकरणमुपसंहर्तुमितिशब्दः।

न्यायनिर्णयः

सदसत्त्वम्। अतोऽनिर्वाच्यतेति भावः। न केवलं वादिनामेवायमध्यासः संमतः, अपि तु लौकिकानामपीत्याह— **तथाचेति**। अनुपहितेदमंशे रजतादिसंस्कारसहिताविद्यया रजताद्यध्यासवत्, पूर्वपूर्वाहंकारादिवासितानाद्यविद्यया चिदात्मन्यनुपहिते भवत्य-हंकाराद्यध्यास इति निरुपाधिकाहंकाराद्यध्यासे दृष्टान्तमाह— **शुक्तिकेति**। सम्यग्धीसिद्धाधिष्ठानरूपाभिप्रायेण शुक्तिकाग्रहणम्। [9]संप्रयुक्तस्य मिथ्यारजतत्वभानधिया वत्करणम्। अनुभवप्रसिद्ध्यर्थो[10] हिशब्दः। बिम्बप्रतिबिम्बयोः, प्रतिबिम्बानां च मिथो भेदधीवत् जीवब्रह्मणोर्जीवानां च भेदधियः सोपाधिकभ्रमस्य दृष्टान्तमाह— **एक इति**। एकत्वग्रहो वद्ग्रहश्च पूर्ववत्। लक्षणप्रकरणमुपसंहर्तुमितिशब्दः।

---

१. 'अयथार्थप्रत्ययोऽस्ति' इत्यस्माकं प्रत्ययो यथार्थोऽयथार्थो वा? आद्ये तद्विषयस्यायथार्थज्ञानस्य सिद्धिः। द्वितीये प्रत्ययत्वहेतोस्तत्र व्यभिचारः।

२. व्यवहारमात्रस्य=तत्सामान्यस्य। ३. व्युत्पित्सुर्हि बालो 'गामानय' इत्यादिवाक्यश्रवणोत्तरं शिष्यादेर्गवानयनं दृष्ट्वा, तेन तत्कारणप्रवृत्तिमनुमाय, तत्कारणत्वेन च तस्य ज्ञानमनुमाय, तस्य चान्वयव्यतिरेकाभ्यां तद्वाक्यजन्यत्वं निश्चित्य तत आवापोद्वापाभ्यां पदानां तत्तदर्थे शक्तिं गृह्णाति। तत्र यदि चेतनप्रवृत्तेर्ज्ञानपूर्वकत्वनियमो न स्यात्, तदा तयोक्तरीत्या ज्ञानानुमानानुपपत्त्या शब्दस्य शक्तिग्रह एव दुर्लभ इति तन्मूलकस्य वाक्यार्थबोधस्यासंभवात् वेदस्याबोधकत्वलक्षणमप्रामाण्यं प्रसज्येतेत्यर्थः। ४. वत्करणेन मिथ्यात्वलाभप्रकारः परिमले द्रष्टव्यः। पृ. ३४

५. इन्द्रियसंनिकर्षाभावेनेत्यर्थः।

६. दोषस्यासंनिकृष्टार्थसाक्षात्कारहेतुत्वमन्यत्रादृष्टं कल्प्यम्। ततो वरमसत एव रूप्यादेरपरोक्षत्वकल्पनम्। असत एव रूप्यतादात्म्यस्यापरोक्षत्वाङ्गीकारेण तत्कल्पनस्य दृष्टानुसारित्वादित्यर्थः। ७. दिव्यपरीक्षाप्रकारविशेषोऽयम्। यथा— "देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाहरेत्। संस्नाव्य पाययेत् तस्माज्जलं तु प्रसृतित्रयम्।। अर्वाक् चतुर्दशादह्नो यस्य नो राजदैविकम्। व्यसनं जायते घोरं स शुद्धः स्यान्न संशयः" इति। (द्र. याज्ञ. व्यवहार. श्लो. ११२-११३) प्रकृते चासन् संसर्ग एवारोप्यो, न संसर्गीत्यत्र नियामकाभावात् कोशपानमेव निर्णायकं स्यादित्युपहासः। 'शपथनिर्णयम्' इत्यपि अस्मिन्नेवार्थे प्रयुज्यते। ८. चक्षुःसंयुक्तेत्यर्थः। ९. अधिष्ठानांशस्य। १०. प्रसिद्ध्यर्थः= प्रसिद्धिद्योतकः।

प्रकटार्थविवरणम्

'प्रतिभासभेदप्रवृत्त्योरनुपपत्तेः। नेदं रूप्यमित्यनेनापि सिद्धाभावबोधने कथङ्कारं बाधकत्वं स्यात्। असत्त्वा [सत्त्वा] पादनपूर्वके त्वभावबोधे नात्यन्तमसत्त्वम्; सत्त्वाश्रयणात्। नापि सदसदात्मकम् विरोधात् कार्त्स्न्येन। अंशाभ्यां तदात्मकत्वे, न भ्रान्तिबाधव्यवस्था' आस्थापदं प्राञ्चति, पूर्वोत्तरयोरेकैकांशे यथार्थत्वात्। नाप्युभयवैलक्षण्यात्मता तत्त्वतो जाघटीति; विरोध-गन्धधूपितत्वात्, प्रतीतिपराहतेश्च। क्वचिद् वैलक्षण्यवाचोयुक्तिरपि तत्तद्रूपनिरूपणासहिष्णुत्वप्रकटनार्था। तस्मादनिर्वाच्यमेव तदाश्रयणीयम्।

नन्वनिर्वाच्यत्वे प्रवृत्तिरनुपपन्ना। न हि पुरुषो मिथ्यारजतं वाञ्छति। यदि मिथ्यात्वाग्रहात्, सत्यत्वारोपाद्वा प्रवृत्तिः, तर्ह्यायातोऽख्यात्यन्यथाख्यातिमतापातो भवताम्। न; रजतत्वाध्यवसायात् समीहितसाधनतानुमानेन प्रवृत्तिसम्भवात्। न खल्वनलीकत्वं तत्कल्पकम्,' केवलव्यतिरेकवैकल्यादन्योन्याश्रयापाताच्च, अन्यथाऽख्यात्यादिमतेऽप्यप्रवृत्त्यापातात्। औत्सर्गिको व्यवहारो, बाधाद् व्यावृत्तिरित्यपि तुल्यम्।

यच्च **माधवेन** वर्णयांबभूवे— 'यदि प्रसिद्धरजतत्वावगत्या प्रवृत्तिरुपपाद्येत, अस्तु तर्हि जातिमात्रसमारोपो लाघवात्; व्यर्थं मिथ्याव्यक्तिकल्पनम्' इति; तत्रोच्यते— सर्वत्र 'जातिसाक्षात्कारस्य व्यक्तिपारतन्त्र्यदर्शनात् तत्सिद्ध्यर्थमेव तद्व्यक्तिमचीक्लृपम्। यदि दोषबलात् पौरस्त्यवस्तुन एव तद्व्यक्तितेति; तत्रैतदेव वाच्यम्। न व्यक्तिता [तद्व्यक्तिता] सत्या असत्या वा? अग्रे 'दोषविरहेऽपि तज्जातिसाक्षात्कारप्रसरः कथङ्कारं वार्येत? निमित्तलयेऽपि नैमित्तिकोपलम्भसौलभ्यात्। 'शेषे तु सन्तोषमेव सेवामहे। तस्माद् यथावभासं रूप्यजातीया 'व्यक्तिनिरूपणव्यङ्ग्यानिर्वचनीयस्वभावा पराचीनबाधकपरास्या समाश्रयणीया।

यत्पुनरत्र **ब्रह्मप्रकाशिकाकारो** ववल्ग— "भ्रान्त्यैवार्थं साधयन्नेष वादी लोकोत्तीर्णः" इत्यादि; तत्रासौ प्रद्वेषप्रकर्षात् सुगतमतापातमचेतयमानो वृथैव प्रागल्भ्याद् ववल्ग। तथा हि— क्वचित् प्रत्ययस्य यथावभासमर्थवत्तानभ्युपगमे तदवष्टम्भतः सर्वावभासानां तथात्वानुमानाशनेः को नाम निवारयिता? अथ सर्वेषां यथावभासमर्थसद्भावे भ्रान्त्यभ्रान्तिविभागविलयस्य वा को वारयिता? नायं दोषः; 'अन्यावच्छिन्नचैतन्याज्ञानजविषयस्य भ्रान्तित्वं, केवलचैतन्याज्ञानजविषयस्याभ्रान्तित्वमिति विभागोपपत्तेः। सति प्रमातरि बाधभावाभावकृतो वा भ्रान्त्यभ्रान्तिविभागः।

---

१. प्रतिभासविशेषेत्यर्थः। अपरोक्षप्रतिभासेति यावत्। अन्यथाऽसतः प्रतीतिमात्रनिषेधे प्रतियोगिज्ञानाभावेनासद्वैलक्षण्यज्ञानाद्यनुपपत्तेः। उक्तं हि— 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि' इति। इदं चास्त्यादिपदासमभिव्याहृत- 'शशशृङ्गमसत्' इत्यादिवाक्यपरम्। 'शशशृङ्गमस्ति' इत्यादि-प्रतारकवाक्यजन्यज्ञाने तु अनिर्वाच्यमेव विषय इति व्यक्तमद्वैतसिद्ध्यादौ। (द्र. अ. सि. पृ. ६३२, परिमले. पृ. २४) एतच्च विकल्पाख्यवृत्तेः ज्ञानत्वमङ्गीकृत्योक्तम्। तदनङ्गीकारे तु प्रतिभाससामान्यनिषेधोऽपि युक्त एव। विकल्पवृत्त्यैव च असद्वैलक्षण्यज्ञानादिकं निर्वाह्यम्, तत्प्रकारश्च लघुचन्द्रिकायां द्रष्टव्यः। पृ. ६३१. 'अत्यन्तासत्यपि' इति श्लोके चात्यन्तासत्पदं बाधितसदर्थकम्। अतो न तद्विरोध इति।

२. आरोप्यस्य सदसद्रूपत्वे 'इदं रजतम्' 'नेदं रजतम्' इति ज्ञानद्वयमपि एकैकांशग्राहि प्रमैव स्यात्। यदि चोभयात्मके वस्तुनि एकांशग्राहित्वाद् भ्रमत्वं, तर्हि उभयोरपि भ्रमत्वप्रसङ्ग इत्यर्थः।

३. अन्वयव्यतिरेकाभ्यां हि कार्यकारणभावसिद्धिः। तदिह रजतज्ञाने सत्यपि तत्र सत्यत्वज्ञानाभावापराधेन रजतार्थिनः प्रवृत्त्यभावो यदि दृष्टः स्यात्, तदा सत्यत्वमपि प्रवृत्तौ प्रयोजकं स्वीक्रियेत। न त्वेवमस्ति। तथा तन्मते प्रवृत्तौ सत्यां तत्संवादेन रजतस्य सत्यत्वं निर्णेयम्, निर्णीते च तस्मिन् प्रवृत्तिरिति अन्योन्याश्रयश्चाधिक इति भावः। अत्र सत्यरजतार्थिनोऽपि पुरोवर्तिनि प्रवृत्तिः सत्यरजततादात्म्येन प्रातीतिकरजतप्रतीतेरुपपन्ना। व्यावहारिकप्रातीतिकसाधारणरजतत्वादिस्वीकारे तु तदवगत्यैव प्रवृत्तिरित्यद्वैतसिद्धिलघुचन्द्रिकयोर्विस्तरः। द्र. १२४-१२६ पृ.।

४. जातिसाक्षात्कारस्य व्यक्तिविषयकत्वनियमात्, देशान्तरीयव्यक्तेश्च भानस्य निराकृतत्वात् 'रजतं पश्यामि' इति प्रतीतिनिर्वाहार्थं जातिविशिष्टव्यक्तेरेव उत्पत्तिः स्वीकार्येति भावः। ५. दोषविरहेऽपि= काचादिदोषाभावदशायामपि। ६. शेषे= असत्येति द्वितीयपक्षे।

७. 'व्यक्तिः' इति पाठः संभाव्यते। 'रूप्यजातीया व्यक्तिः, निरूपणेन= उक्तरीत्या विचारेण, व्यङ्ग्यः= ज्ञेयः, अनिर्वचनस्वभावः= अनिर्वचनीयत्वं यस्याः तादृशी पराचीनबाधकपरास्या समाश्रयणीया' इति व्याख्यातुं शक्यत्वात्।

८. यथा भ्रमस्थले शुक्त्यवच्छिन्नचैतन्यविषयकाविद्यापरिणामो रजतमिति तज्ज्ञानं भ्रमः। प्रमास्थले रजतस्य चैतन्यनिष्ठनिरवच्छिन्नविषयताकाज्ञानपरिणामत्वात् तज्ज्ञानं प्रमा। अथवा सति प्रमातरि बाध्यविषयकं ज्ञानं भ्रमः, अबाध्यविषयकं च प्रमेति लौकिकभ्रमप्रमाविभाग उपपद्यत इति भावः।

प्रकटार्थविवरणम्

यच्च जजल्प— "यद्यज्ञानजं रजतं बाध्यते तदा 'अभूद् रजतं, नेदानीमस्ति' इति कालभेदेन निषेधः स्यात्। न तथाऽनुबभूवुर्भ्रान्ताः" इति, तदेतद् बाधवृत्तान्तबोधविरहविजृम्भितम्। [1]यत् तावत् तात्त्विकरजताभावावलम्बनेनाऽऽप्त-वाक्याज्जायमानं ज्ञानं सामर्थ्यादध्यस्तं विलापयद् बाधकत्वप्रसिद्धिं लभते, तदवच्छिन्नश्चानुभवः स्वाध्यस्तं तदभावं साधयति, न तु पूर्वोत्तरकालीनभावाभावयोर्व्यावर्त्ति। अत एव प्रतिपन्नं मिथ्येति परामृश्यते 'मिथ्यैव रजतमभात्' इति। यदा तु शुक्तिप्रत्यक्षं बाधकं तदा सविलासाज्ञाननिवृत्तिर्बाधः। [2]साक्षिसिद्धश्च तदभावोऽनूद्यते 'नेदं रजतम्' इति। ततो न लोकानुभवविरोधः।

तूलाज्ञानानां [3]यावज्ज्ञानमभ्युपगमात्, प्रत्यक्षस्य वा कालान्तरीयशुक्तिरूपानवभासकत्वात्, कालान्तरेऽपि भ्रमः सम्बोभवीति। यच्च प्रत्यक्षस्य कालान्तरीयासाधकत्वे "अद्येदं रजतं श्वोऽश्वो गर्दभो वेति किन्नु धीः" इति भण्डवद् बबन्धे तत् लोकायतमतापातमप्यपश्यन् वृथैव विललाप। तथा हि— प्रत्यक्षेणैव कालान्तरीयप्रमितौ प्रमाणान्तरं दत्तजलाञ्जलि प्रसज्येत। तज्जातीयस्य तद्भावाव्यभिचारस्य बहुशो दर्शनात् कालान्तरेऽपि तद्भावसम्भावना क्वचित्; दुग्धादेर्दध्यादिभावस्यापि दर्शनात्।

यच्चान्यद् बभाषे— शुक्तित्वस्य रूप्यविरोधित्वादविरोधित्वेऽनिवृत्तिप्रसङ्गान्न तत्तादात्म्यं रूप्यव्यक्तेरिति; तत्र तात्त्विकता-दात्म्यनिषेधे न प्रतिषेधः। प्रातीतिकनिषेधे प्रतीतिपराहतिः, सिद्धान्तव्यासेधश्च प्रसज्येत। अज्ञानं च दोषाधिष्ठानावभासादिसहकृतं शुक्तित्वावरणेन रजताकारेण तज्ज्ञानाभासाकारेण च विपरिणमते। यथा च मम ज्ञानप्रकाशिताऽपि शुक्तिः पार्श्वस्थस्य न प्रकाशीभवति तथा ममाज्ञानावृताऽपि तस्यानावृतेति किमनुपपन्नमनिर्वाच्याज्ञानजरूप्याभ्युपगमे?

प्रमाणं च— विमतमनिर्वाच्यं बाध्यत्वात्; न यदेवं न तदेवम्; यथा सम्मतं वस्तु। न चाप्रसिद्धविशेषणता; तर्कतः सम्भावितत्वात्। अप्रमितिस्तु भूषणमेव। अन्यथा केवलव्यतिरेकिताव्याघातात्।

[4]ये तु केवलव्यतिरेकिणं न मेनिरे तान् प्रत्यर्थापत्त्या प्रत्यवस्थातव्यम्। नन्वर्थापत्तिः संविद्द्वयविरोधे। यथा जीवति देवदत्तो, गृहे च नास्तीति भावाभावसंविद्विरोधे बहिःसद्भावकल्पनम्? सत्यम्; इहापि बाध्यत्वादसत्, [5]ख्यायमानं नासदित्य-सत्तन्निषेधसंविद्द्वयविरोधपरिहाराय तत्तद्रूपनिरूपणासहिष्णुत्वं कल्प्यते। यच्च विमतं नानिर्वचनीयं [6]व्यवहारपदत्वात्,

१. अत्रेदं बोध्यम्। प्रतीतिसमये रजतसत्त्वाभ्युपगमे 'नेदं रजतम्' इति कालविशेषमनन्तर्भाव्य निषेधोऽनुपपन्न इत्याक्षेपस्य समाधानं विवरणादौ तादृशनिषेधस्य व्यावहारिकरजतविषयकत्वं स्वीकृत्य क्रियते। तस्य चोक्तस्थले कालत्रयेऽप्यसत्त्वात् कालविशेषमनन्तर्भाव्योक्तनिषेधो नानुपपन्नः। प्रतीतरजतस्य च व्यावहारिकत्वे उक्तरीत्या तन्निषेधो नोपपद्यत इति अर्थात् तस्य मिथ्यात्वं सिध्यति। अयमेव विवरणग्रन्थस्य यथाश्रुतार्थः तत्त्वदीपनादिष्वभिहितः। आनन्दबोधाचार्यानुसारिणां प्रकटार्थकृतामपि इदमेवात्र विवक्षितम्। (द्र. न्या. म. पृ. ११९) परन्तु लेखकप्रमादात् पङ्क्तौ अशुद्धिर्लक्ष्यते। अभिप्रायमवगम्य यथामतं पाठशुद्धिः वेदितव्या विद्वज्जनैः। वाक्यान्ते 'व्यावर्त्ति' इति पदं तु अत्यन्तमनन्वितं भाति। ग्रन्थकृतां यङ्यङ्लुगन्तप्रियत्वात् 'व्यावरीवर्त्ति' इति स्यात्। 'व्यावर्त्यं' इति वा स्यात्।

अद्वैतसिद्ध्यादौ तु— 'नेदं रजत' मिति निषेधस्य व्यावहारिकरजतविषयकत्वे भ्रमबाधयोः भिन्नविषयकत्वापत्तेः, उक्तप्रतीत्या प्रतीतरजते प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्वानवगाहनात् तत्परविवरणग्रन्थविरोधाच्च 'नेदं रजत'मिति इदंपदार्थे प्रातीतिकरजते व्यावहारिकरजतभेदविषयकः प्रत्ययः विवरणकृतामभिप्रेतः। 'नात्र रजत' मिति प्रत्ययस्तु प्रतीतरजतस्यैव त्रैकालिकमत्यन्ताभावं विषयीकरोति इति तेनोक्तरूपमिथ्यात्वावगाहनात् न पूर्वोत्तरविवरणग्रन्थविरोध इति— प्रतिपादितम्। उक्तनिषेधविषयश्च प्रातीतिकरजतात्यन्ताभावः व्यावहारिकः भ्रमकालेऽप्यस्तीति कालविशेषमनन्तर्भाव्य तत्प्रतीतिर्नानुपपन्ना। भ्रमकाले च दृढरजतसंस्कारसहितः रजतसत्त्वारोप एव तदभावप्रत्यक्षे दोषविधया प्रतिबन्धक इति न तत्प्रतीतिः।

नन्वेवमपि शुक्तिप्रत्यक्षोत्तरं 'पूर्वमिह रजतमभूत्' इति स्मरणं कथं वारणीयमिति चेत्? इत्थम्। शुक्तिप्रत्यक्षेण रजतभ्रमजनितस्य रजतस्मरणानुकूलस्य संस्कारस्यापि नाशात् तत्स्मरणाभावः। अत एव तत्र रजतभ्रमस्यैव स्मरणमनुभवसिद्धम्— 'मम रजतभ्रमः अभूत्' इति। द्र. अ. सि. पृ. ८६२. इदमेवाभिप्रेत्योक्तं प्रकटार्थकृता— सविलासाज्ञाननिवृत्तिरिति। 'उत्पन्नं रजतमिदानीं नष्ट'मिति बाधोत्तरं प्रतीतिस्तु तदत्यन्ताभावग्रहस्य तन्नाशादिग्रह-प्रतिबन्धकत्वात् न भवतीति ध्येयम्। द्र. अ. सि. पृ. ६४८। २. अनुपलब्धिसहकृतसाक्षिप्रत्यक्षसिद्ध इति भावः।

३. यावज्ज्ञानम्= यावत्तत्त्वसाक्षात्कारम्। ४. मीमांसकाः केवलव्यतिरेक्यनुमानं न स्वीकुर्वन्तीति बोध्यम्। ५. ख्यायमानं= प्रतीयमानम्।

६. व्यवहारपदत्वात्= व्यवहारविषयत्वात्।

कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणाम्? सर्वो हि पुरोऽवस्थिते विषये

प्रकटार्थविवरणम्

असद्विलक्षणत्वाद्वा आत्मवदित्यनुमानम्; तत्र वादिनोऽप्रसिद्धविशेषणत्वम्[१]; प्रमितस्यैवाभावः प्रमीयत इति हि तार्किकाः। प्रतियोगिनि चानेकान्तः[२], परभ्रमोऽपि तव सत्ख्यातिरिति क्वचिदनिर्वचनीयं वाच्यम्। प्रतीतिमात्रेण विशेषणत्ववत् विपक्षत्वस्यापि संभवात्। प्रमितत्वविशेषणञ्चासमर्थम्।

पक्षान्तरेषु सर्वेषु बहु कल्प्यमसङ्गतम्। लाघवानुभवाभ्यां च सत्त्वस्यानुपपत्तितः ।।
रूप्यस्यान्यत्र सद्भावो न हि बाधात्प्रसिध्यति। विलापयन्निहैवासौ यस्मादुदेति रूप्यकम् ।।
भेदासिद्धेर्विवेकेनात्राभानाद् वृक्षयोरिव[३]। दृष्टे च गौरवाभावाद् रूप्यस्यापि विलापनम् ।।
शून्यमपि हि तादात्म्यं भाति चेद् दोषतस्तव। कोऽपराधोऽस्य रूप्यस्य येनान्यत्र प्रकल्प्यते ।।
तस्य चान्यत्र सद्भावो नात्र ख्यातिं प्रसाधयेत्। [४]नभःकमलसत्ताऽपि भायात्सकमलात् सतः ।।
न [५]बाधानुपपत्त्याऽपि ह्यन्यथाप्युपपत्तितः। अन्यत्र तु तथाभावः संसर्गवदसक्तितः ।।
शुक्तिसत्तैव भात्यत्र यथेदन्ताऽवभासते। अथ वा त्रिविधं सत्त्वं वैतथ्यं तथ्यभेदतः ।।
देशान्तरादिसत्त्वे च प्रतिभासेत तत्तदा [था]। परिशेषादिना रूप्यमनिर्वाच्यमिति स्थितम् ।।

यद्यप्येवंलक्षणोऽध्यासो लोके; तथापि नात्मनि सम्भवतीत्याह— **कथं पुनरिति**। परत्रपदोपात्तमधिष्ठानं लोके विषयभूतं पुरोऽवस्थितं च दृष्टम्। प्रत्यगात्मनस्त्वात्मत्वादेवाविषयत्वादपुरोऽवस्थितत्वाच्चाधिष्ठानत्वायोग्यत्वात् परत्रेति लक्षणांशो न

भाष्यभावप्रकाशिका

लक्षितरजताध्यासस्य लोकवादिसिद्धत्वेऽपि नात्मन्यनात्माध्यासः स्यादिति विशेषाक्षेपमुत्थापयति—**कथमिति**। प्रतीचि पूर्णे स्फुरणत्वेनाननुभाव्ये परेषां [पराचां] परिच्छिन्नानामनुभाव्यानां बुद्ध्यादीनां तद्धर्माणां च नाध्यासः; मिथोविरुद्धानामधिष्ठानाधिष्ठेयत्वासंभवादित्यर्थः। विरुद्धानामैक्यप्र(ती)मित्ययोगेऽपि तदध्यासयोग्यतया कल्प्यतामधिष्ठानाधिष्ठेयत्वमित्याशङ्क्याह— **सर्वो हीति**। आरोप्येण तुल्येन्द्रियग्राह्यत्वमधिष्ठानस्य दृष्टम्, इह तदभावान्नाध्यास इत्यर्थः। तर्हि प्रत्यगात्मन्य-

न्यायनिर्णयः

लक्षितरजताध्यासस्य लोकवादिसिद्धत्वेऽपि नाऽऽत्मन्यनात्माध्यासः स्यादिति विशेषाक्षेपमुत्थापयति— **कथमिति**। प्रतीचि पूर्णे स्फुरणत्वेनाननुभाव्ये, पराचां परिच्छिन्नानामनुभाव्यानां बुद्ध्यादीनां तद्धर्माणां च नाध्यासः। मिथो विरुद्धानामधिष्ठानाधिष्ठेयत्वासम्भवादित्यर्थः। विरुद्धानामैक्यतादात्म्यप्रमित्ययोगेऽपि तदध्यासयोग्यतया कल्प्यतामधिष्ठानाधिष्ठेयत्वमित्याशङ्क्याह— **सर्वो हीति**। आरोप्येण सह तुल्येन्द्रियग्राह्यत्वमधिष्ठानस्य दृष्टम्,इह तदभावान्नाध्यास इत्यर्थः। तर्हि

---

१. तन्मतेऽनिर्वाच्यस्याप्रसिद्ध्या तत्प्रतियोगिकभेदाप्रसिद्धेः। साध्याप्रमितौ चान्वयदृष्टान्तालाभेन व्याप्तिग्रहासंभव इति भावः।

२. अनिर्वचनीयाद्भेदः साध्यतया निर्दिष्टः। तत्प्रतियोगि अनिर्वचनीयं किञ्चिदस्तीति स्वीकार्यम्। तथा च तत्रैवोक्तसाध्यस्याभावात्, हेतोश्च सत्त्वात् व्यभिचारः। यदि परकीयभ्रमविषयभेद एव सिषाधयिषित इति नानिर्वचनीयस्य सत्त्वावश्यकतेत्युच्यते, तदाऽप्याह— परेति। सत्ख्यातिरिति। अन्यथाख्यातिवादिनाऽन्यत्र सत एव भ्रमे भानाङ्गीकारादिति भावः।

३. दूरस्थवृक्षयोर्भेदाग्रहादेकत्वव्यवहारवत् पुरोवर्ति-रजतयोरपीति स्वीकारे यथा तत्र विवेके सति वृक्षयोः पृथग् भानं तथाऽत्रापि बाधोत्तरं शुक्तिरजतयोः पृथक् प्रतीतिप्रसङ्गः। न च तथा भवति। ४. 'नभः कमलसत्त्वाद्धि भायात् सकमलं यतः' इति पूर्वमुद्रितपुस्तके संपादकैरभ्यूहितः पाठः।

५. पुरोवर्तिनि रजतस्य निषेधात् तस्यान्यत्र सद्भावः कल्प्यत इत्यत आह— न बाधेति। इहासत्त्वमात्रेण निषेधोपपत्तेः तस्यान्यत्र सद्भावकल्पनेऽसामर्थ्यात्। नन्विहैव तन्निषेधानुपपत्त्या ऽन्यत्र तत्सत्ता कल्प्यते; अन्यथा ऽन्यत्रापि तन्निषेधः प्रतीयेतेत्यर्थापत्त्यन्तरं निराचष्टे— अन्यत्रेति। तथाभावः= तन्निषेधाभावः। असक्तितः= अप्रसक्तेः। शुक्तिरजततादात्म्यस्येवेति दृष्टान्तः। (द्र. प्रमाणमाला पृ. ५९, त. प्रदी. पृ. १२३)

विषयान्तरमध्यस्यति, युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि। उच्यते— न तावदयमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात्, अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः।

प्रकटार्थविवरणम्

सम्भवतीत्यर्थः। विषयत्वस्याधिष्ठानत्वे प्रयोजकत्वमङ्गीकृत्य तावदुत्तरमुच्यते— **न तावदिति**। अस्मच्छब्दोल्लिखितः प्रत्ययो नाम जीवाकाराहंवृत्तिः। अहंवृत्त्याकारपरिणतं हि अन्तःकरणं जीवाभिव्यञ्जकमिष्यते। अन्यथा सदा'अहमह'मिति जीवावभासप्रसङ्गात्। तस्याः स्वरूपेणाविषयोऽपि अध्यस्ताहङ्कर्तृत्वादिविशिष्टरूपेण विषयो भवतीत्यधिष्ठानत्वयोग्यो भवतीत्यर्थः। बीजाङ्कुरवदनादित्वाच्चाध्यासपरम्पराया नेतरेतराश्रयत्वम्[1]। किञ्च प्रकाशमात्रेणाधिष्ठानत्वम्, न विषयत्वेन; केवलव्यतिरेकाभावात्। सामान्यादेरग्निपैङ्गल्यवद्[2] बहिरङ्गत्वात्। स्वतश्चित्स्फुरणस्य सामान्यग्रहणस्य वेदान्तोत्थज्ञानेन, स्वाभाविकानवच्छेदास्फुरणस्य विशेषाग्रहणस्य च सम्भवात्। अतः स्वप्रकाशत्वेनापरोक्षत्वात् घटते स्वोपाध्यज्ञानमौढ्याध्यास इत्याह— **अपरोक्षत्वादिति**। यद्यपि स्वप्रकाशे तत्त्वतो मौढ्यं न घटते, तथापि मूढोऽस्मीत्याद्यनुभवस्य सार्वजनीनत्वाद्भानौ तमोऽध्यासवत्, संविदि जाड्याध्यासवच्चाध्यासिकं सम्भवति। स्वप्रकाशत्वमेव कुतः सिद्धमित्याशङ्क्याह— **प्रत्यगात्मप्रसिद्धेरिति**। अस्ति तावत् प्रत्यगात्मप्रसिद्धिः 'मयेदं विदित'मिति। इतरथा स्वपरसंवेद्ययोरविशेषापत्तेः। स[3] चात्मात्मनः न स्वगोचरः, संविदो वैरूप्यापातात्। प्रयोगोऽपि— नात्मा स्वाश्रयप्रकाशप्रकाश्यः प्रकाशकत्वात्; प्रदीपवत्। नापि विषय-

भाष्यभावप्रकाशिका

ध्यासदृष्टेर्विषयत्वमपीष्टमित्याशङ्क्याह— **युष्मदिति**। प्रत्यक्त्वादात्मत्वाच्चास्याविषयत्वम्; अन्यथेदंप्रत्ययविषयत्वापातात्, **अपसिद्धान्ताच्च**। तस्मात् तस्मिन्नध्यासो दृष्टोऽपि श्लिष्टो न भवतीत्यर्थः। अनात्मविशेषारोपे तद्विशेषान्तरस्याधिष्ठानत्वेऽपि **तन्मात्रारोपे** चिदात्मैवाधिष्ठानमित्याह— **उच्यत इति**। विरुद्धयोर्वस्तुनोरधिष्ठानाधिष्ठेयत्वायोगेऽपि कल्पनया तत्सिद्धिरिति भावः। **यत्त्वेकज्ञानाविषयत्वान्नाधिष्ठानाधिष्ठेयतेति**, तत्राह— **न तावदिति**। एकस्मिन्विज्ञाने तयोर्भानमात्रमारोपेऽपेक्ष्यते, विषयतया **भाने** केवलव्यतिरेकाभावात्, आत्मनः स्वप्रकाशत्वादनात्मनस्तद्विषयत्वाद् द्वयोरपि तयोर्मनुष्योऽहमित्यादिधीवशादन्योन्याध्यासः सिद्ध्यतीत्यर्थः। नियमेनाविषयत्वाभावे कुतः स्वप्रकाशत्वम्? तत्राह— **अस्मदिति**। अस्मदर्थश्चिदात्मा साक्षितया प्रतीयते प्रतिबिम्बतेऽस्मिन्नित्यस्मत्प्रत्ययः अहङ्कारः, तत्सम्बन्धाल्लब्धपरिच्छेदः सन्नात्मा स्वरूपस्फुरणेन स्फुरन्नपि तद्विषयो निरुच्यते। ततोऽस्य शून्यवदत्यन्ताविषयत्वाभावेऽपि नास्वप्रकाशतेत्यर्थः। सति अध्यासेऽस्मत्प्रत्ययविषयत्वम्, सति

न्यायनिर्णयः

प्रत्यगात्मन्यध्यासदृष्टेर्विषयत्वमपीष्टमित्याशङ्क्याह— **युष्मदिति**। प्रत्यक्त्वादात्मत्वाच्चास्याविषयत्वम्। अन्यथेदंप्रत्ययविषयत्वापातात्, अपराद्धान्तापाताच्च। तस्मात् तस्मिन्नध्यासो दृष्टोऽपि श्लिष्टो नेत्यर्थः। अनात्मविशेषारोपे तद्विशेषान्तरस्याधिष्ठानत्वेऽपि तन्मात्रारोपे चिदात्मैवाधिष्ठानमित्याह— **उच्यत इति**। विरुद्धयोर्वस्तुतोऽधिष्ठानाधिष्ठेयत्वायोगेऽपि कल्पनया तत्सिद्धिरिति भावः। यत्त्वेकज्ञानाविषयत्वान्नाधिष्ठानाधिष्ठेयतेति; तत्राह— **न तावदिति**। एकस्मिन्विज्ञाने तयोर्भानमात्रमारोपेऽपेक्ष्यते, न विषयतया भानं, केवलव्यतिरेकाभावात्। आत्मनः स्वप्रकाशत्वादनात्मनस्तद्विषयत्वात्, द्वयोरपि

१. अहंकाराद्यध्याससिद्धौ तद्विशिष्टस्यात्मनो विषयत्वसिद्धिः, तत्सिद्धौ चाहंकाराद्यध्याससिद्धिरित्यन्योन्याश्रयः बीजाङ्कुरवत् प्रवाहानादित्वस्वीकारात् नेत्यर्थः। वस्तुतस्तु विषयत्वं नाधिष्ठानत्वे प्रयोजकमित्याह-किञ्चेति।

२. अग्ने रूपं दाहे न प्रयोजकमिति भावः। सामान्यांशग्रहणं, विशेषांशाग्रहणं चोपपादयति-स्वत इत्यादिना।

३. आत्मा मानसप्रत्यक्षगम्य इति तार्किकाः। तान् निराचष्टे-स चेति। संविदाश्रयतयाऽऽत्मनः प्रकाश इति प्राभाकराः। तान् निराकरोति-नापीति। नित्यानुमेय आत्मेति साङ्ख्याः। तान् निरस्यन् 'अस्तु तर्हि मयेदं विदितमिति प्रत्यये आत्मप्रकाशो भ्रमः' इति शङ्कामप्यपाकरोति-नाप्यनुमानप्रमाण्यामिति।

प्रकटार्थविवरणम्

संविद्बलात्; तदन्तरेणापि स्फुरणात्। प्रयोगोऽपि— नात्मा स्वातिरेकिसंविदधीनसिद्धिः, संवित्कर्मतामन्तरेणापरोक्षत्वात्, संवेदनवत्। नाप्यनुमानभ्रमाभ्यासः [भ्याम्] अबाधितापरोक्षप्रतिभासत्वात्। परिशेषात् स्वतःसिद्धिरित्यर्थः। तथा च प्रयोगः— आत्मा स्वप्रकाशः; ततोऽन्यथाऽनुपपद्यमानत्वे सति प्रकाशमानत्वात्, न य एवं न स एवं, यथा कुम्भ इति। स्वप्रकाशत्वञ्च स्व[स्वान्य] संविन्नैरपेक्ष्येण स्फुरणम्।

ननु तत्प्रमाणस्याऽऽत्मा विषयो, नो वा? आद्ये व्याघातः। अन्त्येऽसाधकत्वम्[1]। न तावद् व्याघातः, अनुमानगोचरस्य तदगोचरत्वाप्रसाधनात्। न च प्रमाणविषयत्वमात्रेण दृश्यता। सा हि स्वातिरेकिसंविदपेक्षानियतिः। न साऽऽत्मनोऽस्ति, [2]सुषुप्तेऽपि सिद्धेः।

अपरे पुनरेवमूचिरे— अविषयेऽपि शशविषाणे विषयत्वनिषेधवदविषयेऽपि स्वातिरेकिसंविदपेक्षावारणात् [3]साधकत्वमिति। सर्वथाऽप्यात्मनः प्रकाशमानत्वात् सम्भाव्यतेऽध्यास इति।

भाष्यभावप्रकाशिका

तस्मिन्नध्यास इत्यन्योन्याश्रयत्वमाशङ्क्यानादित्वेन परिहारसम्भवेऽपि परिहारान्तरमाह— **अपरोक्षत्वाच्चेति**। अस्मत्प्रत्ययाविषयत्वेऽप्यपरोक्षत्वादेकान्तेनाविषयत्वाभावात् तस्मिन्नहङ्काराध्यास इत्यर्थः। अपरोक्षत्वमपि कैश्चिदात्मनो नेष्टमित्याशङ्क्याह— **प्रत्यगात्मेति**। अथवा प्रत्यगात्मनः प्रसिद्धिः प्रथनम्, तस्यापरोक्षत्वादित्यर्थः।

अस्यार्थः— अस्ति तावद् 'मयेदं विदित'मिति विशिष्टधीः, सा च न विशेषणदर्शनादृते युक्ता। न च ज्ञानान्तरादस्य स्फुरणम्; युगपद् ज्ञानद्वयाभावात्। विमतम्, नैतद्विषयम्, एतन्निष्ठसाक्षात्कारत्वात्; घटसाक्षात्कारवत्, इत्यनुमानात्। न च संवेद्य-घटादिज्ञानाश्रयतयाऽऽत्मसिद्धिः; तस्य तदधीनप्रकाशत्वेन वेद्यत्वापातात्, अकर्मकारकस्यात्मनस्संवेद्यघटादिविज्ञान-विषयत्वायोगाच्च। न च ज्ञानान्तरेण भिन्नकालेन पूर्वसंवेदनविशिष्टात्मसिद्धिः; तदा पूर्वज्ञानस्याभावात्। अथ पूर्वज्ञानस्य विनश्यदवस्थायामुत्पन्नज्ञानेन पूर्वसंवेदनविशिष्टात्मसिद्धिरिति मतम्, तदाऽपि वक्तव्यम्— यत् पूर्वसंवेदने विनश्यत्क्षणोत्पन्नस्य ज्ञानान्तरस्य यदिदं विषयित्वम्, तदागन्तुकम्? अनागन्तुकं वेति? यद्यागन्तुकम्, तर्हि तस्य ज्ञानकार्यत्वात् तदुत्पत्त्यनन्तरक्षण एव संभवात् तदा च पूर्वज्ञानस्य नाशात् तद्ग्रहणायोगः। न हि विषयि स्वाधर्मं प्रकाशयितुमीष्टे; सर्वप्रकाशकत्वप्रसङ्गात्। अथ

न्यायनिर्णयः

भासतोर्मनुष्योऽहमित्यादिधीवशादन्योन्याध्यासः सिध्यतीत्यर्थः। नियमेनाविषयत्वाभावे कुतः स्वप्रकाशत्वं? तत्राह— **अस्मदिति**। अस्मदर्थश्चिदात्मा साक्षितया प्रतीयते प्रतिबिम्बतेऽस्मिन्नित्यस्मत्प्रत्ययोऽहंकारः। तत्सम्बन्धाल्लब्धपरिच्छेदः सन्नात्मा स्वरूपस्फुरणेन स्फुरन्नपि तद्विषयो निरुच्यते। ततोऽस्य शून्यवदत्यन्ताविषयत्वाभावेऽपि नास्वप्रकाशतेत्यर्थः। अध्यासे सत्यस्मत्प्रत्ययविषयत्वम्, सति तस्मिन्नध्यास इत्यन्योन्याश्रयत्वमाशङ्क्यानादित्वेन परिहारेऽपि परिहारान्तरमाह— **अपरोक्षत्वाच्चेति**। अस्मत्प्रत्ययाविषयत्वेऽप्यपरोक्षत्वात्, एकान्तेनाविषयत्वाभावात्, तस्मिन्नहंकाराध्यास इत्यर्थः। अपरोक्षत्वमपि [4]कैश्चिदात्मनो नेष्टमित्याशङ्क्याह— **प्रत्यगात्मेति**।

अस्यार्थः— अस्ति तावद् ममेदं विदितमिति विशिष्टधीः। न च सा विशेषण[5]दर्शनादृते युक्ता। न च ज्ञानान्तरादस्य स्फुरणम्; विमतं [6]नैतद्विषयमेतन्निष्ठसाक्षात्कारत्वात्, तादृग्घटसाक्षात्कारवदित्यनुमानात्। न च घटादिज्ञानाश्रतयाऽऽत्मसिद्धिः, तस्य तदधीनप्रकाशत्वे वेद्यत्वापातात्। तस्माद् यस्मिन्नात्मनि विशेषणत्वं कल्पितं तस्य संविद्रूपत्वेनैव स्फुरणादपरोक्षत्वम्।

---

१. उक्तानुमानस्य स्वाविषये आत्मनि स्वप्रकाशत्वासाधकत्वम्।

२. सुषुप्तौ हि सुखानुभवादस्ति आत्मस्फुरणम्। अथ च तदा ज्ञानसाधनाभावात् नास्ति स्वरूपातिरिक्तं ज्ञानम्। अत आत्मनः स्फुरणे स्वातिरिक्तसंविदपेक्षानियमाभावात् न दृश्यत्वापत्तिरिति भावः। ३. साधकत्वम् = स्वप्रकाशत्वसाधकत्वम्। तच्चात्मनि स्वप्रकाशत्वसंशयाद्यभावप्रयोजकत्वम्। ४. कैश्चित्= नित्यानुमेयात्मवादिभिः। ५. विशेषणम्= आत्मा। ६. नैतद्विषयम्= नात्मविषयकम्।

न चायमस्ति नियमः पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति। अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति। एवमविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यासः।

प्रकटार्थविवरणम्

यच्चावोचि पुरोऽवस्थितमधिष्ठानमिति; तत्राह— **न चायमिति**। सर्वगतत्वेन पुरोदेशानवच्छिन्नेऽप्याकाशे छत्राद्याकारारोपदर्शनादित्यर्थः। चाक्षुषत्वात् पुरोदेशावस्थानं कल्पितमस्तीति न वाच्यमित्याह— **अप्रत्यक्षेऽपीति**। आकाशोऽचाक्षुषः, सर्वगतद्रव्यत्वात्, नीरूपद्रव्यत्वाद्वा; आत्मवत्। [1]अपरथा स्पार्शनत्वमपि स्यात्। न चान्वयव्यतिरेकौ; द्वारादिप्रदेशेष्वन्धादीनामावरणाभावज्ञानदर्शनात्। नाप्यनुमेयता, अन्तरेणापि लिङ्गदर्शनं प्रदेशसंवित्तेः, तस्मान्नित्यानुभवानुभवनीयं नभ इति। तस्मात्परत्रेति लक्षणांशः सम्भवतीत्याह— **एवमविरुद्ध इति**।

भाष्यभावप्रकाशिका

ज्ञानत्वसमवायभावो विषयित्वम्, अतोऽनागन्तुकमिति मतम्, तदपि न, ज्ञानमागन्तुकम्, तस्य घटादिविषयित्वं पुनः सदातनमिति वक्तुमयुक्तत्वात्। अथ ज्ञानत्वं समवायाविशेषितं विषयित्वम्, तर्हि तस्याप्यागन्तुकत्वम् अनागन्तुकत्वं वा? उभयथा पूर्वोक्तदोषप्रसङ्गः। एवं तन्निरूप्यत्वादिष्वपि द्रष्टव्यम्। किं बहुना? ज्ञानमात्रस्य सर्वान् प्रत्यविशिष्टत्वाद् विशिष्टविषयकत्वायोगात् सम्बन्धाभिलक्षणविशेषेण नियतविषयकत्वं वक्तव्यम्। तथा सत्यागन्तुकत्वानागन्तुकत्वयोः पूर्वोक्तदोषप्रसङ्गः। न च धर्मधर्मिणोर्युगपदुद्भवस्संभवति, अभ्युपगम्यते वा परैः। किंचानुव्यवसायस्यानियतत्वात् स्वविदितेऽपि 'मयाऽन्येन वा विदितोऽय'मिति क्वचित् सन्देहःस्यात्। तस्माद् यस्मिन्नात्मनि विशेषणत्वं कल्पितम्, तस्य संविद्रूपत्वेनैव स्फुरणादपरोक्षत्वम्। देवदत्तस्वापकालः, देवदत्तात्माऽस्तीतिव्यवहारहेतुसाक्षात्कारवान्, कालत्वात्; इतरकालवदिति चानुमानात्। न च स्वापेऽहंवृत्तिः; तद्व्याघातात्। न च पुरुषान्तरं तत्साक्षात्कर्तुमलम्। ईश्वराद्यस्तित्वे च साक्षात्कारस्यास्मद्विशेषणमादेयमिति।

अपरोक्षाध्यासो नापरोक्षमात्रे क्वचिदपि युक्तः; संप्रयुक्ततया पुरोऽवस्थित एवापरोक्षे तद्दृष्टेरित्याशङ्क्याह— **न चेति**। तत्र हेतुः **अप्रत्यक्षेऽपीति**। साक्षिवेद्यतया संप्रयोगमन्तरेणापरोक्षेऽपीति यावत्। न हि नभो द्रव्यत्वे सत्यस्पर्शत्वात् बाह्येन्द्रियग्राह्यम्। नापि मनसोऽसहायस्य बाह्ये वृत्तिः। तेन प्रसिद्धप्रत्यक्षत्वहीनेऽपि नभसि, अविवेकिनः, तलम् इन्द्रनीलकटाहकल्पम्, मलिनतां धूम्रतामन्यच्च पीताद्यध्यस्यन्ति। तथाचाधिष्ठानारोप्ययोर्नैकेन्द्रियग्राह्यत्वनियतिरिति भावः। दार्ष्टान्तिकं ब्रुवाणः संभावनां निगमयति— **एवमिति**। आत्मानात्मनोः चिदचित्त्वेन वास्तवाभेदासिद्धौ सामानाधिकरण्यात् तदभेदधीरध्याससंभावनां गमयतीति भावः।

न्यायनिर्णयः

देवदत्तस्वापकालः, देवदत्तात्मास्तीति व्यवहारहेतुसाक्षात्कारवान् कालत्वात् इतरकालवदित्यनुमानात्। न च स्वापेऽहंवृत्तिः, तद्व्याघातात्। न च पुरुषान्तरं तत् साक्षात्कर्तुमलम्। ईश्वरास्तित्वे च साक्षात्कारस्यास्मद्विशेषणमादेयमिति।

अपरोक्षाध्यासो नापरोक्षमात्रे क्वचिदपि युक्तः, संप्रयुक्ततया पुरःस्थितापरोक्ष्ये तद्दृष्टेरित्याशङ्क्याह— **न चेति**। तत्र हेतुरप्रत्यक्ष इति। साक्षिवेद्यतया सम्प्रयोगमन्तरेणापरोक्षेऽपीति यावत्। न हि नभो द्रव्यत्वे सत्यरूपस्पर्शित्वाद् बाह्येन्द्रियग्राह्यम्। नापि मनसोऽसहायस्य बाह्ये वृत्तिः। तेन प्रसिद्धप्रत्यक्षत्वहीनेऽपि नभस्यविवेकिनस्तलम् इन्द्रनीलकटाहकल्पं, मलिनतां धूम्रतामन्यच्च पीताद्यध्यस्यन्ति। तथा चाधिष्ठानारोप्ययोरेकेन्द्रियग्राह्यत्वानियतिरिति भावः। दार्ष्टान्तिकं ब्रुवाणः सम्भावनां निगमयति— **एवमिति**। आत्मानात्मनोश्चिदचित्त्वेन वास्तवाभेदासिद्धौ, सामानाधिकरण्यात् तदभेदधीः अध्याससम्भावनां गमयतीति भावः।

---

१. रूपं विनापि चाक्षुषत्वे स्पर्शं विना स्पार्शनत्वमपि स्यात्। व्यतिरेकाविति। चाक्षुषत्वसाधकाविति शेषः। नभश्चाक्षुषमति भट्टमतम्। द्र. मा. मे. पृ. १७९. स्वमते तु तत् साक्षिवेद्यम्।

तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते। तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः। तत्रैवं सति यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वाऽणुमात्रेणापि स न संबध्यते।

प्रकटार्थविवरणम्

एवं तावदधिष्ठानायोग्यत्वनिरासेनासम्भवाशङ्का निरासि। तर्ह्यधिष्ठानत्वेऽध्यस्तसंबद्धतया तदसङ्गताव्याघातापातात् नाध्याससम्भव इत्याशङ्क्याह— **तमेतमेवमिति**। अविद्याकार्यत्वादध्यासमविद्यां मन्यन्ते। अतोऽविद्याद्वारकमेवाधिष्ठानत्वमित्यर्थः। परमार्थस्वरूपावधारणे पुनः नाधिष्ठानत्वमपीत्याह— **तद्विवेकेन चेति**। तस्याः अविद्याया **विवेकेन** परित्यागेन शुद्धब्रह्मस्वरूपावधारणं जीवस्य **विद्यामाहुः**। एवंभूतविद्यायाञ्च सत्यां **यत्र** जीवे यस्य मौढ्यादेरध्यासः **तत्कृतेन** मौढ्यादिदोषेण पाण्डित्यादिगुणेन चाणुमात्रेणापि स जीवो न संस्पृश्यते। अतोऽसङ्गत्वव्याघातभीत्याऽपि [1]नासम्भवाशङ्केत्यर्थः।

भाष्यभावप्रकाशिका

ननु ब्रह्मविद्यापोद्यत्वेन सूत्रितामविद्यां हित्वा किमित्यध्यासो वर्ण्यते? तत्राह— **तमेतमिति**। आक्षिप्तत्वं समाहितत्वं लक्षितत्वं च विशेषणार्थः। "अध्यासः" इत्यनुभवानुसारिण्यनर्थतोक्ता। "पण्डिता मन्यन्त" इति पृथग्जनागोचरत्वेनैतदविद्यात्वस्य व्युत्पाद्यत्वमुक्तम्। प्रतिपन्नोपाधौ निषेध्यस्याविद्यान्वयव्यतिरेकित्वादविद्यात्वमस्येति वक्तुमविद्याग्रहणम्; अतो न सूत्रिताऽविद्योपेक्षिता; तस्या एव वर्ण्यमानत्वादित्यर्थः। न केवलमन्वयादिनाऽस्याविद्यात्वम्; विद्यापोद्यत्वेन तद्विरोधित्वाच्चेत्याह— **तद्विवेकेनेति**। अथवा केनोपायेन तन्निवृत्तिरित्याकाङ्क्षायां तन्निवृत्त्युपायमाह— **तद्विवेकेनेति**। तस्याध्यस्तस्य बुद्ध्यादेः, विवेको विलापनम्, तेन रूपेण। आत्मनोऽसाधारणरूपस्येदमित्थमित्यवधारणं विद्या। तद्विरोधित्वादिना सिद्धेऽध्यासस्याविद्यात्वे सैवोच्यत इत्यर्थः। तथाऽपि कारणाविद्यां त्यक्त्वा कार्याविद्योक्तिरयुक्तेत्याशङ्क्याह— **तत्रेति**। तस्मिन्नध्यासे दर्शन[दर्शित]रीत्याऽविद्यात्मके सत्याच्छादकाविद्यायाः स्वापादौ स्वतोऽनर्थत्वादर्शनात् कर्तृत्वा[द्य]ध्यासात्मना तस्या जागरादौ तथात्वात् कार्याविद्यावर्णने यत्रात्मनि, बुद्ध्यादौ वा यस्य बुद्ध्यादेरात्मनो वाऽध्यासः, तेन बुद्ध्यादिना वाऽऽत्मना वा कृतेनाशनायादिदोषेण चैतन्यगुणेन वाऽऽत्माऽनात्मा वा वस्तुतो न स्वल्पेनापि युज्यत इत्यतो विद्यया तन्निवृत्तिरित्यर्थः।

न्यायनिर्णयः

ननु ब्रह्मविद्यापोद्यत्वेन सूत्रितामविद्यां हित्वा किमित्यध्यासो वर्ण्यते? तत्राह—**तमेतमिति**। आक्षिप्तत्वं, समाहितत्वं, लक्षितत्वं च [2]विशेषणार्थः। अध्यासमित्यनुभवानुसारिण्यनर्थतोक्ता। 'पण्डिता मन्यन्त' इति पृथग्जनागोचरत्वेनैतदविद्यात्वस्य व्युत्पाद्यत्वमुक्तम्। प्रतिपन्नोपाधौ निषेध्यस्याविद्यान्वयव्यतिरेकित्वात् अविद्यात्वमस्येति वक्तुमविद्याग्रहणम्। अतो न सूत्रिताऽविद्योपेक्षिता। तस्या एव वर्ण्यमानत्वादित्यर्थः। न केवलमन्वयादिनाऽस्याविद्यात्वं, विद्यापोद्यत्वेन तद्विरोधित्वाच्चेत्याह— **तद्विवेकेनेति**। तस्याध्यस्तस्य बुद्ध्यादेर्विवेको विलापनं, तेन रूपेण, आत्मनोऽसाधारणरूपस्येदमित्थमेवेत्यवधारणं विद्या। तेन तद्विरोधित्वादिना सिद्धेऽध्यासस्याविद्यात्वे सैवोच्यत इत्यर्थः। तथापि कारणाविद्यां त्यक्त्वा कार्याविद्योक्तिरयुक्तेत्याशङ्क्याह— **तत्रेति**। तस्मिन्नध्यासे उक्तरीत्याऽविद्यात्मके सत्याच्छादकाविद्यायाः स्वापादौ स्वतोऽनर्थत्वादर्शनात् कर्तृत्वाद्यध्यासात्मना तस्या जागरादौ [3]तथात्वात् कार्याविद्या वर्ण्यते। यत्रात्मनि, बुद्ध्यादौ वा यस्य बुद्ध्यादेरात्मनो वाऽध्यासः तेन बुद्ध्यादिनाऽऽत्मना वा कृतेनाशनायादिदोषेण चैतन्यगुणेन वाऽऽत्माऽनात्मा वा वस्तुतो न स्वल्पेनापि युज्यत इत्यतो विद्यया तन्निवृत्तिरित्यर्थः।

---

१. असंभवाशङ्का = आत्मनि अनात्माध्यासासंभवाशङ्का।

२. विशेषणार्थः=क्रमेण तम्, एतम्, एवंलक्षणमिति विशेषणत्रयार्थः।

३. तथात्वात् = अनर्थत्वात्।

तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः। सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि।

कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति।

प्रकटार्थविवरणम्

नन्वात्मनस्तात्त्विकमेव प्रमातृत्वादिकं पुरस्कृत्य प्रमाणादिप्रवृत्तिः, अविद्यामूलत्वे दुष्टकारणजन्यत्वेनाप्रामाण्यापातात्। अतो नाध्याससम्भव इत्याशङ्क्याह— **तमेतमविद्याख्यमिति।** सति पुष्कलकारणे प्रतिबन्धकतया जायमानो दोषोऽप्रामाण्यमावहति, न तु कारणत्वेन व्यवस्थितः। यथा अकारे [१]ह्रस्वाद्याकारारोपः, यथा च कामलादि स्वकारणानुमाने; तथाऽविद्याऽपि ब्रह्मावभासं प्रत्येव दोषो, न द्वैतावभासे; तत्कारणत्वात्। अतो नाप्रामाण्यशङ्कयाऽपि अध्यासासम्भवाशङ्का प्रसरीसर्तीति भावः।

तर्ह्यात्मनः प्रमातृत्वादि न पारमार्थिकम्, किन्त्वविद्यामूलैव प्रमाणादिप्रवृत्तिरित्यत्र प्रमाणं ब्रूहीत्याह— **कथं पुनरिति।** अविद्याप्रतिबिम्बितं चैतन्यं तत्कृतमौढ्याद्यध्यासास्पदमविद्यावदुच्यते। [२]तदाश्रयाणि प्रमाणानीति केन प्रमाणेनावगम्यत इत्यर्थः।

भाष्यभावप्रकाशिका

लक्षण-संभावने भेदेनोक्त्वा सद्भावं निर्णेतुमादौ प्रत्यक्षं दर्शयति— **तमिति।** अथवा लोकव्यवहार इति व्यपदेशलक्षणो यो व्यवहारस्तद्धेतुत्वं तस्यैव कण्ठोक्तम्, इदानीं [३]व्यवहारान्तरहेतुत्वमध्यासस्य दर्शयति— **तमिति।** आक्षेपसमाधिविषयत्वं [४]तदर्थः। लक्षितत्वमेतदर्थः। **अविद्याख्यमिति** सम्भावितत्वोक्तिः। **पुरस्कृत्येत्यध्यासस्य** व्यवहारहेतुतया स्वानुभवसिद्धत्वमुक्तम्। प्रमाण-प्रमेयग्रहणं प्रमात्रादेरुपलक्षणम्। अपौरुषेयत्वेन विशेषं मत्वा शास्त्राणां पृथग्ग्रहणम्। मोक्षपराणि = विधि-प्रतिषेधशून्यानि; वस्तुस्वरूपमात्रनिष्ठानीत्यर्थः।

[५]त्रिविधव्यवहारस्याध्यासिकत्वे प्रमाणान्तरजिज्ञासया पृच्छति— **कथमिति।** यद्यपि प्रत्यक्षादि सर्वमविद्योत्थाहंकार-विशिष्टात्माश्रयमिति स्वसाक्षिकम्; तथाऽपि केन मानान्तरेण तथा स्यात्? पुनःशब्दात् तन्मानान्तरविवक्षाधीः। यद्वा प्रमाता प्रमाणानामाश्रयो नाविद्यावान्; अनुपयोगादित्याक्षेपः। [अथवा] यद्येतानि प्रमाणानि, कथमविद्यावद्विषयाणीत्यन्वयः। यद्वा यद्येतान्यविद्यावद्विषयाणि, कथं प्रमाणानि? अविद्यावदाश्रयत्वे करणदोषादप्रामाण्यं स्यात्; "यस्य च दुष्टं करण"मित्यादि-

न्यायनिर्णयः

लक्षणसम्भावने भेदेनोक्त्वा सद्भावं निर्णेतुमादौ प्रत्यक्षं दर्शयति— **तमिति।** आक्षेपसमाधिविषयत्वं [४]तदर्थः। लक्ष्यत्वमेतदर्थः। अविद्याख्यमिति सम्भावितोक्तिः। पुरस्कृत्येत्यध्यासस्य व्यंवहारहेतुतया स्वानुभवसिद्धत्वमुक्तम्। प्रमाणप्रमेयग्रहणं प्रमात्रादेरुपलक्षणम्। अपौरुषेयत्वेन विशेषं मत्वा शास्त्राणां पृथग्ग्रहणम्। **मोक्षपराणि** विधिनिषेधशून्यानि वस्तुमात्रनिष्ठानीत्यर्थः।

[५]त्रिविधव्यवहारस्याध्यासिकत्वे प्रमाणान्तरजिज्ञासया पृच्छति— **कथमिति।** यद्यपि प्रत्यक्षादि सर्वमविद्योत्थाहंकारादि-विशिष्टात्माश्रयमिति स्वसाक्षिकं; तथापि केन मानान्तरेणं तथा स्यात्? पुनःशब्दान्मानान्तरविवक्षाधीः। यद्वा प्रमाता प्रमाणानामाश्रयो, नाविद्यावाननुपयोगादित्याक्षेपः। अथवा यद्येतानि प्रमाणानि कथमविद्यावद्विषयाणीत्यन्वयः। यद्वा

१. ध्वनिधर्मा हि ह्रस्वत्वादयो वर्णेष्वारोप्यन्ते। आरोपितेभ्योऽपि तेभ्योऽर्थविशेषस्य प्रमात्मिका प्रतिपत्तिर्भवति। यथा— 'नगस्तिष्ठति' 'नागो गच्छति' इत्यादौ। २. भाष्ये विषयपदमाश्रयार्थकमिति भावः। ३. व्यवहारान्तरम् = 'अहमिदं ममेदमिति लोकव्यवहारः' इति भाष्ये 'इति'शब्देन सूचितं प्रवृत्त्यादि । ४. भाष्ये 'तम्' इति तच्छब्दार्थः। एवम् 'एतदर्थं' इत्यपि।

५. त्रिविधेति। लौकिकः, कर्मशास्त्रीयः मोक्षशास्त्रीयश्चेति त्रिविधेत्यर्थः। प्रमातृप्रमाणप्रमेयादिरूपं व्यवहारत्रयमिति विवरणम्। पृ. २४५।

उच्यते– देहेन्द्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः। नहीन्द्रियाण्यनुपादाय

प्रकटार्थविवरणम्

अर्थापत्त्यनुमानाभ्यामित्याह— **उच्यत इत्यादिना।** देहेन्द्रियादिष्वहंममाध्यासशून्यस्य सुषुप्तस्य प्रमातृत्वाभावे प्रमाणप्रवृत्त्यदर्शनात् प्रमाणप्रवृत्तिः प्रमातृत्वं गमयन्ती तस्याध्यासपूर्वकत्वं गमयतीत्यर्थापत्तिः। अनुमानं च— प्रमातृत्वादि अध्यासमूलं, तदन्वयव्यतिरेकवत्त्वात्, न यदेवं न तदेवम्, यथा आत्मेति। ननु यथा योधेषु युध्यमानेषु सन्निधिमात्रेण राज्ञो योद्धृत्वं व्यवह्रियते; तथा चक्षुरादिषु व्याप्रियमाणेषु आत्मनः प्रमातृत्वम्; सुषुप्ते चेन्द्रियव्यापाराभावादेवाप्रमातृत्वम्; ततोऽन्यथाऽप्युपपत्तिरसिद्धिश्चेत्याशङ्क्याह— **न हीति।** सत्यमिन्द्रियव्यापारे सति प्रमातृत्वम्; तदेव तु न सन्निधिमात्रेण। न हीन्द्रियाण्यनुपादाय सम्बन्धविशेषेणापरिगृह्य प्रत्यक्षादिफल[2]मवकल्पते। गौणे प्रमातृत्वे तत्फलस्यापि गौणत्वमेव न्याय्यम्। न हि गौणेऽग्नित्वे मुख्यं कार्यं दृष्टचरम्। राज्ञोऽपि द्रव्यादिद्वारकसम्बन्धविशेषेणैव जयादिफलभागित्वमित्यर्थः। अस्त्विन्द्रियसम्बन्धः प्रमातृत्वोपयोगी;

भाष्यभावप्रकाशिका

भाष्यादित्याक्षेपः। व्यवहारहेतुमध्यासमनुमानादिना साधयितुमारभते— **उच्यत इति।** तत्रानुमाने व्यतिरेकव्याप्तिमाह— **देहेति।** सशिरस्कोऽवयवी त्वगिन्द्रियस्यानपेक्षाधारो देहः। तत्र मनुष्यत्वादिजातिविशिष्टेऽहमित्यभिमानः। इन्द्रियेषु एवमादिशब्दगृहीतदेहावयवेषु च ममाभिमानः; तेन हीनस्य सुषुप्तस्य प्रमातृत्वानुपपत्तौ सत्यां मानाप्रवृत्तेरध्यासः तद्धेतुरित्यर्थः। यत्र नाध्यासः, तत्र न व्यवहारः, यथा सुषुप्ताविति व्याप्तिः। देवदत्तस्य जागरादिकालः, तस्यैवाध्यासाधीनव्यवहारवान्, तस्यैव स्वापादिकालादन्यकालत्वात्; [व्यतिरेके] तस्यैव स्वापकालवदिति भावः। इन्द्रियादिषु ममत्वाभावेऽपि देहेऽहंभावमात्रात् प्रवृत्तिमाशङ्क्याह—**न हीति। अनुपादायेति।** ममत्वेनागृहीत्वेत्यर्थः। इन्द्रियग्रहणं लिङ्गादेरुपलक्षणम्; प्रत्यक्षादीत्यादिपदप्रयोगात्। व्यवहारस्य व्यवहर्तारं विनाऽयोगाद् अनुपादानस्य च व्यवहारस्य च कर्तृसाम्ये, तान्यनुपादाय यो व्यवहारः, स नेति योजना। यो द्रष्टृत्ववक्तृत्वादिरक्षमक्षं प्रति नियतो व्यवहारः, यश्च लिङ्गादिनाऽनुमातृत्वादिव्यवहारः, नासौ तानि ममत्वेनागृहीत्वा युक्तः, देहाध्यासेऽपि चक्षुराद्यनध्यासेऽन्धादेरदर्शनादित्यर्थः। इन्द्रियाध्यासे तेनैव व्यवहारादलं

न्यायनिर्णयः

यद्येतान्यविद्यावद्विषयाणि कथं प्रमाणानि? अविद्यावदाश्रयत्वे कारणदोषादप्रामाण्यात् 'यस्य च दुष्टं करणम्' [3]इत्यादिभाष्यादित्याक्षेपः। व्यवहारहेतुमध्यासमनुमानादिना[4] साधयितुमारभते— **उच्यत इति।** तत्रानुमानं वक्तुं व्यतिरेकव्याप्तिमाह— **देहेन्द्रियादिष्विति।** [5]सशिरस्कोऽवयवी त्वगिन्द्रियस्यानपेक्षाधारो देहः। तत्र मनुष्यत्वादिजातिमिति देहे अहमभिमानः, इन्द्रियेष्वादिशब्दगृहीतदेहावयवेषु च ममाभिमानः, तेन हीनस्य सुप्तस्य प्रमातृत्वानुपपत्तौ सत्यां मानाप्रवृत्तेरध्यासस्तद्धेतुरित्यर्थः। यत्र नाध्यासस्तत्र न व्यवहारः यथा सुषुप्ताविति व्याप्तिः। देवदत्तस्य[6] जागरादिकालः तस्यैवाध्यासाधीनव्यवहारवान्, तस्यैव स्वापादिकालादन्यकालत्वात्, व्यतिरेके तस्यैव स्वापादिकालवदिति भावः। इन्द्रियादिषु ममत्वाभावेऽपि देहेऽहंभावमात्रान्मानप्रवृत्तिमाशङ्क्याह— **न हीति।** इन्द्रियग्रहणं लिङ्गादेरुपलक्षणम्। प्रत्यक्षादीत्यादिपदप्रयोगात्। व्यवहारस्य व्यवहर्तारं विनाऽयोगात्, अनुपादानस्य व्यवहारस्य च [7]कर्तृसाम्ये तान्यनुपादाय यो व्यवहारः स नेति

---

१. अन्यथाऽप्युपपत्तिरर्थापत्तौ, असिद्धिरनुमाने।

२. भाष्ये-व्यवह्रियतेऽनेनेति व्यवहारः फलम्, प्रत्यक्षादीनां प्रमाणानां फलं = प्रमेत्यर्थः ग्रन्थकृतोऽभिप्रेतः। भामत्यामप्येवम्। द्र. पृ. ४१

३. 'यस्य च दुष्टं करणं, यत्र च मिथ्येति प्रत्ययः स एवासमीचीनः प्रत्ययो नान्यः' इति शा.भा.पृ. २८.　　४. आदिनाऽर्थापत्तिर्ग्राह्या।

५. 'त्वगिन्द्रियस्यानपेक्षाधारो देहः' इति शरीरात्मवादिसंमतं देहलक्षणम्। चक्षुर्गोलकादिषु अतिव्याप्तिवारणाय त्वगिति विशेषणम्। त्वगिन्द्रियस्य शरीरव्यापित्वात् तदाधारत्वं हस्तादिष्वतिव्याप्तम्, अतो निरपेक्षेत्युक्तम्। हस्तादीनामितरावयवसहितानामेव तदाधारत्वं, न केवलानामिति नातिव्याप्तिः। अवयवान्तरे छिद्यमानेऽपि प्रायेण त्वगिन्द्रियं तिष्ठति, तथा— सत्यपि हस्तादीनां देहान्तर्भावे अवयविन्येव शरीरव्यवहार इति वस्तुगतिमभिप्रेत्य सशिरस्कोऽवयवीत्युक्तम्। द्र.वि., तत्त्वदी. पृ. ४८३।　　६. द्र. तत्त्वदीपनम् पृ. २४८　　७. कर्तृसाम्येन ल्यप उपपत्तिः।

प्रत्यक्षादिव्यवहारः संभवति। न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यवहारः संभवति। न चानध्यस्तात्मभावेन देहेन कश्चिद् व्याप्रियते। न चैतस्मिन् सर्वस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते। न च प्रमातृत्वमन्तरेण

प्रकटार्थविवरणम्

तथापि नैतद्देहाभिमानस्तत्रोपयुज्यते; अन्तरेणाप्येनं स्वप्ने प्रमातृत्वादिव्यापारादित्याशङ्क्याह— **न चेति**। आश्रयमन्तरेण करण-व्यापारायोगात्, स्वप्नेऽपि पश्चादिदेहस्य विद्यत एव प्रमातृत्वोपयोग इत्यर्थः। उपयुज्यतां नाम देहद्वयसम्बन्धः; तथापि अध्यासेन कृतमत्याशङ्क्याह— **न चानध्यस्तेति**। कश्चिदपि देवो मानवो वा नानध्यस्तात्मभावेन देहेन व्याप्रियते। सर्वोऽपि 'देवोऽहं', 'मनुष्योऽह'मिति जातिविशेषैकाधिकरणचैतन्य एव प्रवरीवर्तीति स्वसंवेद्यमेतत्। न संयोगस्वस्वामिभावादिः प्रमातृत्वोपयोगी; सुषुप्तेऽपि भावात्, भृत्यदेहेनापि प्रमातृत्वादिप्रसङ्गाच्च। न च कर्मसम्बन्धोऽपि देहसम्बन्धमन्तरेणेति वक्ष्यते इत्यतः परिशेषादपि यथाऽवभासं मिथ्यातादात्म्यसम्बन्धोऽभ्युपेय इत्यर्थः। नन्वात्मनो ज्ञानक्रियाशक्तिवशेन प्रमातृत्वाद्युपपत्तौ नाध्यासकल्पनावकाश इत्याशङ्क्याह— **न चैतस्मिन्निति**। नाऽऽत्मा शक्तिमान्, निरंशत्वात्, विभुत्वाद्वा; गगनवत्। विकारित्वे चर्मवदनित्यत्वापाताच्च।

भाष्यभावप्रकाशिका

देहाध्यासेनेत्याशङ्क्याह— **न चेति**। अधिष्ठानमिन्द्रियाणां शरीरम्। इन्द्रियाणामधिष्ठानत्वेन देहे गृहीतेऽपि तस्मिन्नहंभावस्य न प्रवृत्त्युपयोगः, देहात्मनोरिच्छया नियोज्यनियोजकत्वलक्षणसम्बन्धान्तरादपि प्रवृत्त्युपपत्तेरित्याशङ्क्याह— **न चानध्यस्तेति**।

अस्यार्थः— अध्यासेतरो देहात्मयोगः देहस्यात्मेच्छयाऽनुविधीयमानत्वं वा? तदनुविधानयोग्यत्वं वा? तत्कर्मारभ्यत्वं वा? नाद्यः; तदभावेऽप्यातुरदेहे प्रमातृत्वादिदर्शनात्। न द्वितीयः, स्वापादावपि तत्प्रसङ्गात्, तद्योग्यताया यावद्द्रव्यभावित्वात्। न च— यावत्कार्यलयमशरीरमेवेति— वाच्यम्; स्वदृष्ट्या तदभावेऽपि परदृष्ट्या तद्भावात्, तस्य तस्मिन् प्रमातृत्वादिधीध्रौव्यात्। न तृतीयः; भृत्यादिदेहैरपि प्रमातृत्वादिप्रसङ्गात्, तेषां स्वामिकर्मारभ्यत्वात्। अतो देहस्यात्मनि सम्बन्धान्तरासिद्धेरध्यास इति।

ननु—आत्मा स्वतश्चेतनत्वान्मातृत्वादिशक्तिमानिन्द्रियाद्यव्यवधानेन जागरादौ मातृत्वादिकमश्नुते, स्वापादौ चक्षुराद्य-भावात् तदभावः, नाध्यासाभावात्; अतो व्यतिरेकिणि व्यतिरेकः सन्दिह्यते, तत्राह— **न चैतस्मिन्निति**। अस्यार्थः— प्रमातृत्वं

न्यायनिर्णयः

योजना। यो द्रष्टृत्ववक्तृत्वादिरक्षमक्षं प्रति नियतो व्यवहारः, यश्च लिङ्गादिनाऽनुमातृत्वादिव्यवहारो, नासौ तानि ममत्वेनागृहीत्वा युक्तः। देहाध्यासेऽपि चक्षुराद्यनध्यासेऽन्धादेरदर्शनादित्यर्थः। इन्द्रियाध्यासे तेनैव व्यवहारादलं देहाध्यासेनेत्याशङ्क्याह— **न चेति**। इन्द्रियाणामधिष्ठानत्वेन देहे गृहीतेऽपि तस्मिन्नहंभावस्य न प्रवृत्त्युपयोगः, देहात्मनोः सम्बन्धान्तरादपि प्रवृत्तेरित्याशङ्क्याह— **न चानध्यस्तेति**।

अस्यार्थः— अध्यासेतरो देहात्मयोगो[१] देहस्यात्मसंयोगो वाऽऽत्मेच्छयाऽनुविधीयमानत्वं वा तदनुविधानयोग्यत्वं वा तत्कर्मारभ्यत्वं वा। नाद्यः, आत्मसंयुक्तेन परदेहेनापि तत्प्रसङ्गात्। न द्वितीयः, तदभावेऽप्यातुरदेहे मातृत्वादिदर्शनात्। न तृतीयः, स्वापादावपि तत्प्रसङ्गात्, तद्योग्यताया यावद्द्रव्यभावित्वात्। न च तदा सर्वकार्यलयान्न शरीरमेवेति वाच्यम्, स्वदृष्ट्या तदभावेऽपि परदृष्ट्या तद्भावात् तस्य तस्मिन्मातृत्वादिधीध्रौव्यात्। न चतुर्थः, भृत्यादिदेहैरपि तत्प्रसङ्गात्, तेषां स्वामिकर्मारभ्यत्वात्[२]। अतो देहस्यात्मनि सम्बन्धान्तरासिद्धेरध्यास इति।

नन्वात्मा स्वतश्चेतनत्वान्मातृत्वादिशक्तिमानिन्द्रियाद्यवधाने जागरादौ मातृत्वादिकमश्नुते। स्वापादौ चक्षुराद्यभावात्तदभावो, नाध्यासाभावात्। अतो व्यतिरेकिणि व्यतिरेकः संदिह्यते; तत्राह— **न चैतस्मिन्निति**। प्रमातृत्वं प्रमां प्रति कर्तृत्वं, तच्च

---

१. योगः = सम्बन्धः।

२. भृत्यादिना स्वामिनः सुखदुःखदर्शनात् तन्निमित्तधर्माधर्मयोः स्वामिकृतत्वावश्यकत्वात् ताभ्यां स्वीयफलभोगसाधनतया भृत्यादिदेहानामारभ्यत्वम्।

प्रमाणप्रवृत्तिरस्ति। तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति।

पश्वादिभिश्चाविशेषात्। यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां सम्बन्धे सति शब्दादिविज्ञाने प्रतिकूले

प्रकटार्थविवरणम्

प्रतीतेश्च सत्यासत्यसाधारणायाः सत्यत्वासाधकत्वादध्यासमूल एवायं प्रमातृत्वादिव्यवहार इत्यर्थः।

भवत्वेवमविद्वद्व्यवहारोऽध्यासमूलः, न विद्वद्व्यवहार इत्याशङ्क्याह— **पश्वादिभिरिति।** यौक्तिकविवेकस्यापरोक्षभ्रमाविरोधात्, विरोधित्वेऽपि तदनुसन्धानविधुरतया व्यवहारे पश्वादिभिरविशेषात्, पण्डितव्यवहारोऽप्यध्यासमूल एवेत्यर्थः। सङ्ग्रहवाक्यं विवृणोति— **यथा हीत्यादिना।** पश्वादीनामविवेकपूर्वको व्यवहारः कुतः सिद्ध इत्याशङ्क्याह—**पश्वादीनाञ्चेति।**

भाष्यभावप्रकाशिका

प्रमां प्रति कर्तृत्वं स्वातन्त्र्यम्; तच्च कारकान्तराप्रयोज्यस्य समस्तकारकप्रयोक्तृत्वम्। न च कूटस्थस्यासङ्गस्य आत्मनः स्वतो व्यापारः। न चेच्छातिरेकेण प्रमाकरणप्रयोक्तृत्वम्। न चात्मन्यक्रियेऽगुणे च क्रियागुणवद्बुद्ध्या[द्य]ध्यासादृते सा युक्ता। तस्माद् बुद्ध्याद्यभेदाध्यासे तद्धर्माध्यासे वाऽसति स्वतोऽसङ्गस्य प्रमातृत्वायोगादध्यासस्तद्धेतुरित्यर्थः। तर्हि मा भूत् आत्मनोऽसङ्गस्य प्रमातृत्वम्, नेत्याह— **न चेति।** आत्मन्याध्यासिकप्रमातृत्वाभावे सर्वव्यवहारहानिरित्यर्थः। एवं व्यतिरेकिणि व्यतिरेकासन्देहात् तस्यादोषत्वादर्थापत्तेरपि तेनाविरोधात् प्रमाणान्तरप्रश्ने समाहितेऽपि कथमाक्षेपसमाधिः? तत्राह— **तस्मादिति।** प्रमाणस्य सत्त्वादिति यावत्।

अयं भावः— मातुरेव मानाश्रयत्वेऽपि तस्याध्यस्तत्वात् तेषामविद्यावदाश्रयत्वम्। न च कारणदोषादप्रामाण्यम्; सति प्रमाकारणे पश्चाद्भाविनो दोषस्यादोषत्वात्, अविद्यायास्तत्कारणनिविष्टत्वात्, "यस्य च दुष्टं करण"मिति चोक्तेरागन्तुकदोषविषयत्वात्, अध्यक्षादीनां च तात्त्विकप्रामाण्याभावस्येष्टत्वात्, व्यवहारे बाधाभावाद् व्यावहारिकप्रामाण्यसिद्धेरिति। न च तेषामतात्त्विके प्रामाण्ये तदन्तर्गतश्रुतेरपि तथात्वान्नेष्टसिद्धिः; श्रुत्यर्थस्य ब्रह्मणः "सत्यं ज्ञान"मित्यादिना तात्त्विकत्वदृष्टेस्तस्यास्तात्त्विकप्रामाण्यादिति।

ननु अविवेकिव्यवहारस्याध्यासिकत्वेऽपि नाविद्यावद्विषयाण्येव प्रमाणानि; विवेकिनामपि तद्व्यवहारात्, तत्राह— **पश्वादिभिश्चेति।** चशब्दः शङ्काव्यावृत्त्यर्थः। यौक्तिकविवेकस्याध्यक्षभ्रान्त्यविरोधित्वात्, विरोधित्वेऽपि तदननुसन्धाने

न्यायनिर्णयः

कारकान्तराप्रयोज्यस्य तत्प्रयोक्तृत्वम्। न च व्यापारमन्तरेण करणादिप्रयोक्तृत्वम्; न च कूटस्थासङ्गात्मनः स्वतो व्यापारः; न चेच्छातिरेकेण[1] प्रमाकरणप्रयोक्तृत्वम्; न चात्मन्यक्रियेऽगुणे क्रियागुणवद्बुद्ध्याद्यध्यासादृते सा युक्ता, तस्माद् बुद्ध्याद्यभेदाध्यासे तद्धर्माध्यासे चासति स्वतोऽसङ्गस्य मातृत्वायोगादध्यासस्तद्धेतुरित्यर्थः। तर्हि माभूदसङ्गस्यात्मनो मातृत्वम्, नेत्याह— **न चेति।** आत्मन्याध्यासिकमातृत्वाभावे सर्वव्यवहारहानिरित्यर्थः। एवं व्यतिरेकिणि व्यतिरेकासंदेहात् [2]तस्यादोषत्वादर्थापत्तेरपि तेनावरोधात्प्रमाणान्तरप्रश्ने समाहितेऽपि कथमाक्षेपसमाधिः, तत्राह— **तस्मादिति।** प्रमाणस्य सत्त्वादिति यावत्।

अयं भावः— मातुरेव मानाश्रयत्वेऽपि तस्याध्यस्तत्वात् तेषामविद्यावदाश्रयत्वम्। न च कारणदोषादप्रामाण्यं; सति प्रमाकरणे पश्चाद्भाविनो दोषस्य दोषत्वात्, अविद्यायास्तत्कारणनिविष्टत्वात्, 'यस्य च दुष्टं करण'मिति चोक्तेरागन्तुकदोषविषयत्वात्, अध्यक्षादीनां च तात्त्विकप्रामाण्याभावस्येष्टत्वात्, व्यवहारे बाधाभावाद् व्यावहारिकप्रामाण्यसिद्धेः। न च तेषामतात्त्विके प्रामाण्ये तदन्तर्गतश्रुतेरपि तथात्वान्नेष्टसिद्धिः, श्रुत्यर्थस्य ब्रह्मणः 'सत्यं ज्ञानम्' इत्यादिना तात्त्विकत्वदृष्टेस्तस्यास्तात्त्विकप्रामाण्यादिति।

नन्वविवेकिव्यवहारस्याध्यासिकत्वेऽपि नाविद्यावद्विषयाण्येव प्रमाणानि, विवेकिनामपि तद्व्यवहारात्; तत्राह— **पश्वादिभिश्चेति।** चशब्दः शङ्काव्यावृत्त्यर्थः। यौक्तिकविवेकस्याध्यक्षभ्रान्त्यविरोधित्वात्, विरोधित्वेऽपि तदननुसन्धाने

१. इच्छातिरेकेण = इच्छां विना।. २. तस्य = व्यतिरेकिणः।

जाते ततो निवर्तन्ते, अनुकूले च प्रवर्तन्ते। यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य मां हन्तुमयमिच्छतीति पलायितुमारभन्ते, हरिततृणपूर्णपाणिमुपलभ्य तं प्रत्यभिमुखीभवन्ति। एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान् बलवत उपलभ्य ततो निवर्तन्ते, तद्विपरीतान् प्रति प्रवर्तन्ते। अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः। पश्वादीनां च प्रसिद्धोऽविवेकपुरःसरः

प्रकटार्थविवरणम्

व्युत्पन्ना अपि न स्वयमेव व्यतिरिक्तमात्मानं विदन्ति; तदुपदेशाद्यानर्थक्यापातात्, किमु पश्वादय इति भावः। अतः पण्डितानामपि

भाष्यभावप्रकाशिका

विवेकिनामपि व्यवहारे पश्वादिभिरविशेषात् तद्व्यवहारोऽप्याध्यासिक एवेत्यर्थः। कथं व्यवहारकाले विवेकिनः पश्वादिव्यवहारमनुवर्तन्ते? तत्राह— **यथा हीति**। संगृहीतोऽर्थो यथा व्यज्यते, तथोच्यत इति यावत्। आदिशब्देन शकुन्तादिरुक्तः। अत्र च "शब्दादिभिः श्रोत्रादीनां सम्बन्धे सती"ति अर्थेन्द्रियसन्निकर्षात्मकमध्यक्षमुक्तम्, "शब्दादिविज्ञाने" इति तत्फलम्, "प्रतिकूले""अनुकूले" इत्यनुमानम्। ते हि शब्दाद्युपलभ्य तज्जातीयस्य प्रातिकूल्यमानुकूल्यं वाऽनुस्मृत्य, अस्यापि तज्जातीयत्वात् तथात्वमनुमिन्वन्ति; तत्र प्रतिकूलत्वानुमानफलं निवृत्तिः, अनुकूलत्वानुमानस्य तु प्रवृत्तिरिति विवेकः। उक्तमर्थमुदाहरति— **यथेति**। पुरुषविशेषं दृष्ट्वा तज्जातीयस्य हन्तृत्वमनुस्मृत्य, अस्यापि तज्जातीयत्वात् तदनुमाय निवृत्तिः, एवं तज्जातीयस्योपकर्तृत्वमनुस्मृत्य तज्जातीयत्वात्तदनुमाय तदाभिमुख्यमित्याह— **दण्डेति, हरितेति च**। दार्ष्टान्तिकं वदन् व्यवहारलिङ्गेनाध्यासमनुमातुं तस्य पक्षधर्मतामाह— **एवमिति**। पित्रादित्रितयशिक्षाजन्यपदवाक्याभिज्ञता **व्युत्पन्नचित्तता**। क्रूरदृष्ट्यादिविशिष्टान् पुरुषान् दृष्ट्वा तद्विधानां प्रातिकूल्यं स्मृत्वा, तथात्वेनैषामपि तदनुमाय, पश्वादिवद् विवेकिनोऽपि तेभ्यो विमुखीभवन्ति, तेभ्यो विपरीतान् प्रसन्नदृष्टित्वादिविशिष्टान् पुरुषविशेषानालक्ष्य, तादृशानामानुकूल्यं स्मृत्वा तथात्वादेषामपि तदनुमाय तेष्वभिमुखीभवन्तीत्यर्थः। पक्षधर्मतां निगमयति— **अत इति**। अनुभवार्थोऽतश्शब्दः। ननु 'अस्माकं प्रवृत्तिरध्यासा'दिति न पश्वादयो भणन्ति, नापि परेषामेतत् प्रत्यक्षम्; अतो दृष्टान्तस्य साध्यवैकल्यम्, तत्राह— **पश्वादीनां चेति**। अधिष्ठानारोप्यज्ञाने सति अध्यक्षानुमानागमैश्च सामानाधिकरण्यविरोधिविवेकाभावादध्यासवत्त्वं तेषां कल्प्यते, विनाऽपि मानैर्विवेके तदानर्थक्यम्, ततो

न्यायनिर्णयः

विवेकिनामपि व्यवहारे पश्वादिभिरविशेषात्, तद्व्यवहारोऽप्याध्यासिक एवेत्यर्थः। कथं व्यवहारकाले विवेकिनामपि पश्वादिभिरविशेषः, न हि ते निःशेषं पश्वादिव्यवहारमनुवर्तन्ते; तत्राह— **यथा हीति**। संगृहीतोऽर्थो यथा व्यज्यते तथोच्यत इति यावत्। आदिशब्देन शकुन्तादिरुक्तः। 'शब्दादिभिः श्रोत्रादीनां सम्बन्धे सती'त्यर्थेन्द्रियसंनिकर्षात्मकमध्यक्षमुक्तम्। 'शब्दादि-विज्ञान' इति तत्फलम्। 'प्रतिकूले''अनुकूल' इत्यनुमानम्। ते हि शब्दाद्युपलभ्य तज्जातीयस्य प्रातिकूल्यमानुकूल्यं वाऽनुस्मृत्यास्यापि तज्जातीयत्वात् तथात्वमनुमिन्वन्ति। तत्र प्रतिकूलत्वानुमानफलं निवृत्तिः, अनुकूलत्वानुमानफलं प्रवृत्तिरिति विवेकः। उक्तमर्थमुदाहरति— **यथेति**। पुरुषविशेषं दृष्ट्वा तज्जातीयस्य हन्तृत्वमनुस्मृत्यास्यापि तज्जातीयत्वात् तदनुमाय ततो वैमुख्यं भजन्तीत्यर्थः। प्रत्येकं पश्वादीनामाशयं दर्शयितुं 'मा'मित्युक्तम्। पुरुषान्तरं तु दृष्ट्वा तज्जातीयस्यानुकूल्यमनुस्मृत्य, अस्यापि तज्जातीयत्वात् तदनुमाय तदाभिमुख्यं भजन्तीत्याह—**हरितेति**। दार्ष्टान्तिकं वदन् व्यवहारलिङ्गेनाध्यासमनुमातुं तस्य पक्षधर्मतामाह— **एवमिति**। पित्रादित्रितयशिक्षाजन्यपदवाक्याभिज्ञता **व्युत्पन्नचित्तता**। क्रूरदृष्ट्यादिविशिष्टान् पुरुषान् दृष्ट्वा तद्विधानां प्रातिकूल्यं स्मृत्वा तथात्वेनैतेषामपि तदनुमाय पश्वादिवद् विवेकिनोऽपि तेभ्यो विमुखीभवन्ति। तेभ्यो विपरीतान् प्रसन्नदृष्टित्वादिविशिष्टान् पुरुषविशेषानालक्ष्य, तादृशानामानुकूल्यं स्मृत्वा तथात्वादेषामपि तदनुमाय तेष्वभिमुखीभवन्तीत्यर्थः। पक्षधर्मतां निगमयति— **अत इति**। अनुभवार्थोऽतःशब्दः। नन्वस्माकं प्रवृत्तिरध्यासादिति न पश्वादयो ब्रुवन्ति, नापि परेषामेतत् प्रत्यक्षम्। अतो दृष्टान्तस्य साध्यवैकल्यम्, तत्राह— **पश्वादीनां चेति**। अधिष्ठानारोप्यज्ञाने सति अध्यक्षादिभिः

प्रत्यक्षादिव्यवहारः। तत्सामान्यदर्शनाद् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तत्कालः समान इति निश्चीयते।

शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वाऽऽत्मनः परलोकसम्बन्धमधिक्रियते

प्रकटार्थविवरणम्

प्रमातृत्वादिव्यवहारोऽध्यासमूलः, प्रमातृत्वादिव्यवहारत्वात्; पश्वादिप्रमातृत्वादिव्यवहारवत् इत्यनुमातुं शक्यत इत्याह— **तत्सामान्येति**। तस्याध्यासस्य काल एव कालोऽस्येति विग्रहः।

ननु यद्यपि प्रत्यक्षादिव्यवहारोऽध्यासमूलः, तथापि न शास्त्रीयः; प्रमाणतो व्यतिरिक्तात्मानुसन्धानेनैव तत्राधिकारादित्याशङ्क्याह— **शास्त्रीये त्विति**। न वेदान्तवेद्यमात्मतत्त्वमधिकारेऽपेक्ष्यते अनुपयोगात्। अनुपयोगद्योतकानि विशेषणानि **अशनायाद्यतीतमित्यादीनि**। अशनायाद्युपप्लुतो ह्यन्नाद्यकामो "बैल्वमन्नाद्यकामस्य" इत्यादावधिक्रियते; ब्राह्मण्यादिजातिमांश्च

भाष्यभावप्रकाशिका

विना विवेकं पश्वादिषु व्यवहारदृष्टेस्तन्मूलाध्याससिद्धिरित्यर्थः। सम्प्रत्यनुमानमाह— **तत्सामान्येति**। तैः पश्वादिभिः सामान्यं व्यवहारवत्त्वम्, तस्य विवेकिषु भानादिति यावत्। अपरोक्षाध्यासस्य व्यवहारपुष्कलकारणत्वात् तस्याध्यासस्य काल एव कालो यस्य व्यवहारस्य, स तत्कालः। समानः पश्वादिभिरिति शेषः। विमतो व्यवहारः अध्यासकृतः, व्यवहारत्वात्; सम्मतवत्; विमताः अध्यासवन्तः, व्यवहारवत्त्वात्; पश्वादिवदिति वा प्रयोगः। मानयुक्तिभ्यां विवेकेऽप्यध्यासविरोधिप्रमित्यभावादध्यासवत्त्वमविरुद्धमिति मत्वा **व्युत्पत्तिमतामपि** इत्युक्तम्। नच व्यवहारत्वाद्यप्रयोजकम्; आत्मनो मातृत्वादिशक्तिमत्त्वे शक्तेः सन्निमित्तशक्याधीनतया मुक्तानामपि सन्निमित्त(शक्ति)-शक्यापादकत्वात्, तत्रापि मातृत्वादिप्रसक्त्या मुक्त्यभावापातस्य विपक्षे बाधकत्वात्, प्रमातृत्वादिलक्षणशक्याभावे च ग्राहकमानाभावेन शक्तिमत्त्वस्यापि दुर्वचत्वात्। न च सर्वो व्यवहारः, रजताध्यास(वत्, अध्यास)कृतः, व्यवहारत्वात् इत्याभासतुल्यता; विरोधादेव तस्यानुमानस्य, मनुष्योऽहमित्यध्यासस्य सर्वानुभवसिद्धतया तदभावादिति भावः।

विवेकिनामविवेकिनां च लौकिकव्यवहारस्याध्यासिकत्वेऽपि शास्त्रीयव्यवहारस्य प्रतिपन्नात्मविद्वद्विषयत्वाद् न तत्पूर्वतेति भागे बाधमाशङ्क्य, तस्यापि तत्पूर्वतार्थं देहेतरात्मज्ञानपूर्वकत्वमङ्गीकरोति— **शास्त्रीये त्विति**। तस्य तद्विषयत्वे

न्यायनिर्णयः

सामानाधिकरण्यविरोधिविवेकाभावात्, अध्यासवत्त्वं तेषां कल्प्यते; विनापि मानैर्विवेके तदानर्थक्यम्। अतो विना विवेकं पश्वादिषु व्यवहारदृष्टेः तन्मूलाध्याससिद्धिरित्यर्थः। सम्प्रत्यनुमानमाह— **तत्सामान्येति**। तैः पश्वादिभिः सामान्यं व्यवहारवत्त्वं, तस्य विवेकिषु भानादिति यावत्। अपरोक्षाध्यासस्य व्यवहारपुष्कलकारणत्वात् तस्याध्यासस्य काल एव कालो यस्य व्यवहारस्य स तत्कालः; **समानः** पश्वादिभिरिति शेषः। विमतो व्यवहारोऽध्यासकृतः; व्यवहारत्वात्; संमतवत्। विमता वाऽध्यासवन्तः; व्यवहारवत्त्वात्; पश्वादिवदिति प्रयोगः। मानयुक्तिभ्यां विवेकेऽप्यध्यासविरोधिप्रमित्यभावात् अध्यासवत्त्वमविरुद्धमिति मत्वा **व्युत्पत्तिमतामपीत्युक्तम्।** न च व्यवहारवत्त्वाद्यप्रयोजकम्; आत्मनो मातृत्वादिशक्तिमत्त्वे, शक्तेः सनिमित्तशक्याधीनतया मुक्तानामपि सनिमित्तशक्यापादकत्वात्, तत्रापि मातृत्वादिप्रसक्त्या मुक्त्यभावापातस्य विपक्षे बाधकत्वात्, प्रमातृत्वादिलक्षणशक्याभावे च ग्राहकमानाभावेन शक्तिमत्त्वस्यापि दुर्वचत्वात्। न च सर्वो व्यवहारो रजताध्यासकृतः, व्यवहारत्वात्, इत्याभासतुल्यता, बाधादेव तस्यानुत्थानात्। 'मनुष्योऽह'मित्यध्यासस्य सर्वानुभवसिद्धतया तदभावादिति भावः।

विवेकिनां [अविवेकिनां] च लौकिकव्यवहारस्याध्यासिकत्वेऽपि शास्त्रीयव्यवहारस्य विद्वद्विषयत्वात् न तत्पूर्वकतेति भागे बाधमाशङ्क्य तस्यापि तत्पूर्वकत्वार्थं देहेतरात्मधीपूर्वकत्वमङ्गीकरोति— **शास्त्रीये त्विति**। तस्य तद्विषयत्वे

तथापि न वेदान्तवेद्यमशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदमसंसार्यात्मतत्त्वमधिकारेऽपेक्ष्यते, अनुपयोगादधिकारविरोधाच्च। [1]प्राक् च तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्तते। तथाहि—'ब्राह्मणो यजेत' इत्यादीनि शास्त्राण्यात्मनि वर्णाश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्ते।

प्रकटार्थविवरणम्

[2]बृहस्पतिसवादौ; संसारी जीवनादिविशिष्टो जीवनादिनिमित्तकर्मसु। नैवं ब्रह्म; अतोऽनुपयोग इत्यर्थः। किञ्च नाहं कर्ता भोक्ता च; किं तु ब्रह्मैवेति विदन् कथंकारमनेकानर्थसङ्कीर्णे कर्मण्यधिक्रियेतेत्याह— **अधिकारविरोधाच्चेति**। भवतु शुद्धब्रह्मज्ञानस्याधिकारानुपयोगः, ततः किमित्यत आह— **प्राक् चेति**। अस्ति कश्चिद् देहादिव्यतिरिक्तः स्वर्गोपभोगसमर्थ आत्मेति। नैतावताऽध्यासो निवर्तते; [3]व्यतिरेकाज्ञानानुपादानत्वादिति भावः। अविद्वदाश्रयत्वं शास्त्रीयव्यवहारस्योदाहरणैः स्पष्टयति— **तथा हीत्यादिना**।

भाष्यभावप्रकाशिका

कथमध्यासाधीनतेत्याशङ्क्याह **तथाऽपीति**। किं तद् वेदान्तवेद्यम्? तदाह— **अशनायादीति**। कर्त्रन्वयाधिकारान्वयभोक्त्रन्वया विशेषणैर्व्यावर्त्यन्ते। आमुष्मिकफलकर्मसु देहेतरात्मज्ञानादेव प्रवृत्तावुक्तात्मज्ञानस्याकिञ्चित्करत्वादित्याह—**अनुपयोगादिति**। विविक्तात्मज्ञाने सर्वाभिमानभङ्गात् कर्मस्वप्रवृत्तिरेवेति कुतस्तदपेक्षेत्याह—**अधिकारेति**। तथाऽपि कथं शास्त्रीयप्रवृत्तेराध्यासिकत्वम्? न हिं देहादिव्यतिरिक्तात्मज्ञाने बाधके तदध्यासानुवृत्तिरित्याशङ्क्य, तस्य पारोक्ष्यादपरोक्षाध्यासाविरोधे तत्पूर्विकैव शास्त्रीयप्रवृत्तिरित्याह— **प्राक्त्विति**। अथवा कर्म-ज्ञानकाण्डयोः कर्त्रकर्त्रात्मविषयत्वात् परस्परविगीतार्थत्वादप्रामाण्यं स्यादित्याशङ्क्य, विद्याऽविद्यावत्पुरुषभेदेन व्यवस्थोपपत्तेर्न विरोध इत्याह— **प्राक्त्विति**। न केवलमुक्तप्रमाणैरेवाध्याससिद्धिः, किन्त्वागमोऽपि विधेर्बोद्धारमधिकारिणं ब्राह्मणादिशब्दैरुपंदिशंश्चेतनाचेतनयोरैक्याभासं दर्शयतीत्याह— **तथा हीति**। तत्र वर्णवयोऽध्यासः— "अष्टवर्षं ब्राह्मणमुपनयीत" इत्यादिः; आश्रमाध्यासः— "न ह वै स्नात्वा भिक्षेते"त्यादिः; अवस्थाध्यासः— "ज्योगामयावी यजेत्" इति; ज्योगामयः उज्ज्वलामयवानित्यर्थः। [आदिपदेन] "यावज्जीवं जुहुयात्" इति जीवनाध्यासो गृह्यते।

न्यायनिर्णयः

कथमध्यासाधीनतेत्याशङ्क्याह— **तथापीति**। किं तद् वेदान्तवेद्यं, तदाह— **अशनायादीति**। [4]कर्त्रन्वयाधिकारान्वयभोक्त्रन्वया विशेषणैर्व्यावर्त्यन्ते। आमुष्मिकफलकर्मसु देहेतरात्मज्ञानादेव प्रवृत्तौ उक्तात्मज्ञानस्याकिंचित्करत्वादित्याह— **अनुपयोगादिति**। किंचोक्तात्मज्ञाने सर्वाभिमानभङ्गात् कर्मस्वप्रवृत्तिरेवेति कुतस्तदपेक्षेत्याह— **अधिकारेति**। तथापि कथं शास्त्रीयप्रवृत्तेराध्यासिकत्वं, न हि देहातिरिक्तात्मज्ञाने बाधके तदध्यासानुवृत्तिरित्याशङ्क्य, तस्य पारोक्ष्यात् अपरोक्षाध्यासाविरोधे तत्पूर्विकैव शास्त्रीयप्रवृत्तिरित्याह— **प्राक् चेति**। यथा यथोक्तान्यध्यक्षादीन्यध्यासं साधयन्ति तथाऽऽगमोऽपि विधेर्बोद्धारमधिकारिणं ब्राह्मणादिशब्दैरनुवदन् देहात्मनोरन्योन्याध्यासं साधयतीत्याह— **तथा हीति**। तत्र 'अष्टवर्षं ब्राह्मणमुपनयीत' इत्यादिर्वर्णवयोविशेषस्य; 'न ह वै स्नात्वा भिक्षेत' इत्यादिराश्रमविशेषस्य, 'जातपुत्रः कृष्णकेशोऽग्नीनादधीत' इत्यादिरवस्थाविशेषस्याध्यासः। आदिशब्दात्, 'जीवञ्जुहुयात्' इति जीवनस्य, 'स्वर्गकामो यजेत' इति कामित्वस्य, 'गृहदाहवान् यजेत' इति निमित्तविशेषस्य, महापातकित्वादेश्चाध्यासो गृह्यते।

---

१. 'प्राक् तु' इति भाष्यभावप्रकाशिकाधृतः पाठः। २. 'ब्राह्मणो ब्रह्मवर्चसकामो बृहस्पतिसवेन यजेत' इत्यादिश्रुतेः।

३. व्यतिरेकः = भेदः, तदज्ञानेत्यर्थः। आत्माज्ञानं ह्यध्यासोपादानम्, न त्वात्मनो देहादिभेदाज्ञानम्। अतः देहादिभेदज्ञानेन न निवर्तते, ज्ञानाज्ञानयोः समानाश्रयविषयकत्वेन निवर्त्यनिवर्तकभावादिति भावः। विवरणे त्वस्य विवेकस्य परोक्षत्वान्नापरोक्षाध्यासनिवर्तकत्वमित्युक्तम्। द्र.पृ. २६१।

४. ममेदमनुष्ठेयमिति बुद्धिः कर्त्रन्वयः, मदभिलषितसाधनमिदमित्यन्वयोऽधिकारान्वयः, ममायं नियोगः इति स्वामित्वेनान्वयो भोक्तृत्वान्वयः। तत्त्वदी. पृ. ३६१

अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम। तद्यथा पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यति। तथा देहधर्मान्- स्थूलोऽहं, कृशोऽहं, गौरोऽहं,

प्रकटार्थविवरणम्

तदेवं प्रमाणतोऽध्याससद्भावं प्रसाध्य धर्ममात्रस्य क्वाध्यासः, क्व वा धर्मिणः इत्युदाहरणतः स्फुटीकर्तुं पूर्वोक्तमेव लक्षणमनुवदति— **अध्यासो नामेति**। हर्षशोकादिमिथ्याभिमानकार्यदर्शनात् बाह्यपुत्रादिसाकल्यवैकल्यधर्मसदृशान् धर्मानात्मनि देहादिविशिष्टेऽध्यस्यति, अन्यथा अन्यथाख्यात्यापातात्। आत्माविद्या हि साकल्यादिदर्शनलक्षणनिमित्तसन्निधानात् मिथ्यार्थाकारेण विपरिणमत इति रहस्यम्।

ननु तर्हि देहधर्मस्याऽऽत्मन्यध्यासे स्यादन्यथाख्यातिः। अथ तस्याज्ञानजत्वान्न स्यात्; अन्यत्र सतोऽन्यत्र संसर्गावभासोऽन्यथाख्यातिः; तर्हि उत्क्रान्तेऽज्ञे देहस्य हिगुरुफलम् [हिरुगुपलम्भो] भूतेषु लयश्च न स्यात्, उपादानादन्यत्र कार्यायोगात्।

उच्यते—[1]मायामयैर्महाभूतैरदृष्टानुसारिपरमेश्वराधिष्ठितैरारभ्यमाणो देहो जीवोपार्जितकर्मसहकृतादज्ञानाद् जीवसंसृष्टतयैवाऽऽरभ्यते; अतो जीवसंसृष्टरूपेण देहस्याज्ञानात्मकत्वात् तद्धर्मारोपे नान्यथाख्यातिः[2]। सहकारिकर्मोपरमे च तन्तुसंयोगापाये पटापायवत् जीवसंसृष्टत्वापायात् स्वरूपस्य भूतेषु लय उपलम्भोऽप्यवकल्पते। लिङ्गदेहस्याप्यज्ञानकार्यभूतसूक्ष्मपरिणामस्य महाभूतावष्टब्धस्य कर्मनिमित्तव्यक्तिशालिनः सदाऽज्ञानप्रतिबिम्बितचित्संसृष्टतयैवाध्यासात् तद्धर्माध्यासोऽपि तत्रैव पदं प्राश्नुते। तदेतदाह— **तथा देहधर्मानित्यादिना**। एवं तावदहङ्कारपर्यन्तस्य सकलाहङ्कारविकारकामादिसाक्षिणि प्रत्यगात्मन्यध्यासमुक्त्वा

भाष्यभावप्रकाशिका

कस्य युष्मदर्थस्य कस्मिन्नस्मदर्थे, तद्विपर्ययेण वाऽध्यास इति विशेषतः प्रदर्शयितुमुपपादितस्याध्यासस्य लक्षणं परामृशति— **अध्यासो नामेति**। अध्यासस्यानर्थहेतुतां दर्शयितुमध्यासविशेषानुदाहरति— **तद्यथेति**। प्रसिद्धव्यतिरेकयोरपि पुत्रादिगतसाकल्य-वैकल्ययोरनुभवत एव मुख्याध्याससिद्धावप्रसिद्धव्यतिरेकाणां कृशत्वादीनां मुख्याध्यासः स्यादिति किमु वक्तव्यमित्यभिप्रेत्याह— **पुत्र-भार्येति**। बाह्यधर्माः, ये वैकल्यादयः, तत्स्वाम्यनिमित्तस्वशरीरे तानध्यस्यतीत्यर्थः। इदानीमप्रसिद्धव्यतिरेकाणां सुतरामध्यास इत्याह— **तथा देहधर्मानिति**। अत्र चाहंप्रत्ययसंभिन्नचैतन्यस्याधिष्ठानता, न पुनरहङ्काराध्यास इव शुद्धस्य। "देहधर्मानि"ति [3]धर्मिणोऽपि ग्रहणम्। धर्मशब्दस्तु मनुष्यत्वादिधर्मविशिष्टस्यैवाध्यासात्,

न्यायनिर्णयः

उक्तप्रमाणैः सिद्धेऽप्यध्यासे कस्य युष्मदर्थस्य कस्मिन्नस्मदर्थे, वैपरीत्येन वाऽध्यास इति विशेषबुभुत्सायां तदर्थमध्यासलक्षणं परामृशति— **अध्यासो नामेति**। अध्यासस्यानर्थहेतुतां दर्शयितुं तद्विशेषानुदाहरति— **तद्यथेति**। प्रसिद्धातिरेकयोरपि पुत्रादिसाकल्यवैकल्ययोरनुभवेनैव मुख्याध्याससिद्धावप्रसिद्धातिरेकाणां कृशत्वादीनां तथा स्यादिति किं वक्तव्यमित्याशयेनाह— **पुत्रेति**। बाह्याः स्वदेहापेक्षया पुत्रादयः, तद्धर्मा वैकल्यादयः। स्वस्वाम्यनिमित्तमात्मनि स्वदेहे तानारोपयतीत्यर्थः। प्रसिद्धभेदानामपि स्वदेहद्वाराऽऽत्मनि मुख्याध्यासे सति अप्रसिद्धभेदानां सुतरां तत्र मुख्याध्यासः स्यादित्याह— **तथेति**। वैकल्यादीनां स्वदेहद्वाराऽऽत्मन्यध्यासवदिति यावत्। देहश्च तद्धर्माश्च देहतद्धर्मास्तानात्मन्यध्यस्यतीति सम्बन्धः। अत्र

---

१. देहादिः स्वरूपेण मायाकार्यैर्महाभूतैरारभ्यते; जीवसंसृष्टरूपेण च कर्मसहकृताज्ञानेन। अतस्तत्रोभयोरुपादानत्वम्। सहकारिभूतकर्मणः क्षये देहादेः संसृष्टरूपेण नाश एव। अत उत्क्रान्ते जीवे देहस्य स्वरूपेणैवोपलम्भः, न तु जीवसंसृष्टतया। जीवसंसृष्टतयैव तस्याज्ञानात्मकत्वं, न स्वरूपेणेति भावः।

२. विवरणे तु—देहादिधर्माणामात्मनि संसर्गमात्रमध्यस्यते। तस्य चानिर्वचनीयत्वात् अनिर्वचनीयख्यातिरुपपन्ना। द्र. पृ. २६३, अथवाऽऽत्मनि देहादिधर्मः अनिर्वचनीय एवोत्पद्यते। शुक्तिरूप्यादिभ्रमसाम्यात्। कर्तृत्वादिद्वयसत्त्वेऽपि तद्धर्मिणोरैक्याध्यासात् तदभेदावभासः इत्युक्तम्। द्र. पृ. १८०। ३. धर्मिणः = देहस्य।

तिष्ठामि, गच्छामि, लङ्घयामि चेति। तथेन्द्रियधर्मान्– मूकः, काणः, क्लीबः, बधिरः, अन्धोऽहमिति। तथाऽन्तःकरणधर्मान् कामसंकल्पविचिकित्साध्यवसायादीन्। एवमहंप्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य, तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यति।

प्रकटार्थविवरणम्

आत्मनोऽप्यहङ्कारादौ अध्यासमाह— **एवमहंप्रत्ययिनमिति।** देहादेश्चित्तन्त्रतावत् चितोऽपि देहादितन्त्रतासिद्ध्यन्यथानुपपत्त्या अध्यासो गम्यते। [१]तथा च **बार्हस्पत्याः** 'संविद् देहधर्मः' इत्याहुः; 'बुद्धिधर्मः' इति **बौद्धाः**; 'अहङ्कारधर्मः' इति **भाट्टप्रभृतयः**। स्वाज्ञानविवर्तेऽन्तःकरणादौ दर्पणस्थानीये चितः प्रतिबिम्बितत्वेन तत्संसर्गाध्यासात् नोभयोरपि मिथ्यात्वप्रसङ्गः, नाप्यधिष्ठानाभावप्रसङ्ग इति।

भाष्यभावप्रकाशिका

तथाभूतस्यैव विधि-प्रतिषेधशास्त्रगोचरत्वाच्च धर्मप्राधान्यात्। इदानीमस्मादप्यन्तरङ्गेन्द्रियधर्माध्यासमाह— **तथेन्द्रियधर्मानिति।** अत्र धर्माणामेव ग्रहणम्; धर्मिणां नित्यानुमेयतया परोक्षाध्यासयोग्यत्वात्। सम्बन्धित्वेन कामादिधर्माध्यासमुक्त्वा धर्म्यध्यासमाह— **एवमहंप्रत्ययिनमिति।** स्वप्रचाराः = कामादयः। **प्रत्यगात्मनीति।** देहादिषु विवेकाद् बहिर्भावमापद्यमानेषु प्रातिलोम्येन अन्तः अञ्चति गच्छतीति प्रत्यक्,आत्मा; निरुपचरितस्वरूपत्वात्, तस्मिन्नित्यर्थः। आत्मन एवाधिष्ठानत्वे चैतन्यविशेषस्यानवभासः स्यात्, एवमहंकारादेरप्यधिष्ठानत्वे तद्विशेषावभासो न स्यात्। इह च द्वयोर्विशेषावभासः परस्पराध्यासं गमयति; अध्यासे विशेषावभासस्याध्यस्यमानताप्रयुक्तत्वादित्यभिप्रेत्यात्मनोऽप्यनात्मन्यध्यासमाह— **तं चेति।** द्वयोर्विशेषावभासेऽप्यधिष्ठानत्वं न विहन्यते; स्वगततया विशेषानवभासात्, परगततयैव प्रतीतेरिति भावः। एवमात्मन्यहंकाराध्यासकथनेन तस्य कर्तृत्वभोक्तृत्वे उपपादिते। अहङ्कारादिष्वात्माध्यासकथनेन चाहंकारादिषु चैतन्यमुपपादितम्।

न्यायनिर्णयः

चाहंकारद्वाराऽऽत्माऽधिष्ठानम्। उक्ताध्यासादप्यन्तरङ्गमध्यासं कथयति— **तथेन्द्रियेति।** यथा देहं तद्धर्मांश्चात्मन्यध्यस्यति तथेन्द्रियाणि तद्धर्मांश्चाध्यस्यतीत्येतत्। देहस्य चक्षुरादिद्वारा साक्षिवेद्यत्ववदिन्द्रियाणामपि लिङ्गादिद्वारा तद्भावात् देहवदिहग्रहणं; पृथगध्यासनिर्देशाच्च। न चैवं नित्यानुमेयत्वव्याघातः, तेषां लिङ्गादिव्यवधानेन साक्षिवेद्यत्वात्। अधिष्ठानं तु पूर्ववदिति भावः। यथा देहेन्द्रियधर्मानात्मन्यध्यस्यति तथाऽन्तःकरणधर्मानपि कामादीनात्मनि सम्बन्धित्वेनारोपयतीत्याह— **तथान्तःकरणेति।** धर्माणामेवाध्यासमुक्त्वा देहादिवद्धर्म्यध्यासमाह— **एवमिति।** बुद्धिविशिष्टे तद्धर्माध्यासवत्, तदध्यासे किमधिष्ठानं, तदाह— **अशेषेति।** स्वस्याहंकारस्य प्रचाराः कामादयः, तेषां साधिकरणानां साक्षादेव साधके **प्रत्यगात्मनि** देहादिषु विवेकाद् बहिर्नीतेषु प्रातिलोम्येनान्तरञ्चतीवेति प्रत्यगुच्यते; स चात्मा; निरुपचरितस्वरूपत्वात् तस्मिन्नज्ञानवतीत्यर्थः। आत्मन्यनात्मतद्धर्माध्यासे सिद्धे तस्याधिष्ठानत्वनियमे तद्विशेषचैतन्याभानात्[२] जगदान्ध्यमित्याशङ्क्य तस्यापि संसृष्टत्वेनाध्यासमाह— **तं चेति।** तद्विपर्ययस्तेषामन्तःकरणादीनां विपर्ययश्चेतनत्वम्। तदात्मनेति यावत्। न च तेषामधिष्ठानत्वमेव, तद्विशेषादृष्ट्या व्यवहारविरहात्। अतो द्वयोर्विशेषदृष्टेरन्योन्याध्यासधीः, अध्यासे विशेषदृष्टेरध्यस्यमानताकृतत्वात्। न च द्वयोर्विशेषदृष्टौ नाधिष्ठानत्वम्, स्वनिष्ठत्वेन तदभानात्। न चोभयोरध्यासे बाध्यतया शून्यता; [३]द्विधाऽध्यस्तानात्मनः सर्वथा बाधेऽपि संसृष्टरूपेणैवाध्यस्तात्मनस्तन्मात्रबाधेऽपि स्वरूपशेषादिति भावः। आत्मनि बुद्ध्याद्यध्यासोक्त्या कर्तृत्वभोक्तृत्वे तस्योक्ते। तेष्वात्माध्यासोक्त्या बुद्ध्यादिषु चैतन्यमुक्तम्।

---

१. परस्पराध्यासे चार्वाकादिव्यवहारं प्रमाणयति— तथा चेति।

२. अभानादिति। अधिष्ठानविशेषांशस्य भ्रमकालेऽभाननियमादिति भावः।

३. द्विधा = स्वरूपेण संसृष्टरूपेण च।

एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः। अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते। यथा चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः।

वेदान्तमीमांसाशास्त्रस्य[1] व्याचिख्यासितस्येदमादिमं सूत्रम्-

प्रकटार्थविवरणम्

तदेवं लक्षणादिभिराविष्कृतमध्यासं निगमयति— **एवमयमिति**। एवं तावद् विषय-प्रयोजनसम्भावनानिमित्तमध्यासं प्रसाध्य,अधुना विषयप्रयोजनसम्भवाद्वेदान्तानामुपादेयतामाह— **अस्यानर्थहेतोरिति**। सनिदानानर्थप्रहाणमेव वेदान्तानां प्रयोजनम्; ब्रह्मात्मैकत्वविद्या चोत्पाद्यतया[2] विषयः; ते एव तद्विचारस्यापि विषयप्रयोजने इति भावः। ननु वेदान्ते क्वचिदुपासनादिविधिदर्शनान्नात्मैकत्वमेव सर्ववेदान्तार्थ इत्याशङ्क्याह— **यथा चायमर्थ इति**।

भाष्यभावप्रकाशिका

अध्यासमुक्तप्रमाणविशिष्टं निगमयति— **एवमिति**। अनादिः प्रवाहरूपेण। अनन्त इति विद्याऽनुदये। मिथ्याप्रत्ययरूप इति रूपग्रहणं लक्षणतस्तथा रूप्यते, न प्रतीतित इति दर्शयितुम्। अथवा मिथ्याप्रत्ययानां रूपमनिर्वचनीयं लक्षणतः, तथोक्तोऽनिर्वचनीय इत्यर्थः। तस्यानर्थहेतुतां दर्शयति— **कर्तृत्वेति**। प्रमाणं निगमयति— **सर्वलोकेति**। प्रत्यक्षप्रमाण-मुक्तप्रमाणोपलक्षणार्थम्। अध्यासप्रतिपादनस्य प्रयोजनं निर्दिशति— **अस्यानर्थहेतोरिति**। विषयं निर्दिशति— **आत्मैकत्वेति**। अथवा कुतोऽस्य प्रहाणमित्यत उक्तम्— **आत्मैकत्वेति**। प्रतिपत्तिरप्रतिबन्धतया प्राप्तिः। एवं "युष्मदस्मदि" त्यादिना भाष्येण प्रथमसूत्रेणार्थादुपात्तविषय-प्रयोजनसिद्धिहेतुमध्यासमुपपाद्येदानीमनेन सूत्रेण विषयप्रयोजनयोरुपादाने निमित्तमाह— **वेदान्ता इति**। ननु प्राणाद्युपासनाद्यपि वेदान्तेषु बहुलमुपलभ्यते, तत् कथं सर्वेषां वेदान्तानामात्मैकत्वप्रतिपादनसामर्थ्यमिति? अत आह—**यथा चायमर्थ इति**। शरीरमेव शरीरकम्, तन्निवासी शारीरको जीवः, तस्य परमात्मरूपताप्रतिपादिका मीमांसा शारीरकमीमांसा।। इत्यध्यासभाष्यम्।।

न्यायनिर्णयः

सम्प्रत्यध्यासं सप्रमाणं निगमयति— **एवमिति**। पूर्वबुद्ध्याद्यध्यासात् संस्काराद्यध्यासः, ततस्तादृगुत्तरबुद्ध्याद्यध्यास इति प्रवाहात्मना, प्रवाह्युपादानजाड्यात्मना वाऽनादित्वम्। तत्त्वधियं विना सर्वात्मना नाशहानेरानन्त्यम्। उपादानस्य मायाशक्तितया जडस्य प्रत्यक्चैतन्यसत्त्वानुबन्धित्वात्, अधिष्ठानधीबाध्यत्वं सिद्धवत्कृत्योक्तम्— **नैसर्गिक इति**। मिथ्याधीहेतुत्वेन तादात्म्यमाह— **मिथ्येति**। कारणाध्यासो हि कार्याध्यासस्य हेतुरित्यध्यासस्य मिथ्याप्रत्ययत्वमित्यर्थः। लक्षणतस्तथा रूप्यते, न प्रतीयत इति रूपग्रहणम्। अथवा मिथ्याप्रत्ययानां रूपमनिर्वाच्यत्वं यस्य स तथेत्यनिर्वाच्यत्वं वोच्यते। यद्वा मिथ्याभूताऽखण्ड-जडशक्तिस्तन्मात्रत्वेनाध्यासप्रत्ययो रूप्यते। न हि कारणादृते कार्यस्य रूपमस्ति। तस्यानर्थहेतुतामाह—**कर्तृत्वेति**। प्रमाणं निगमयति— **सर्वेति**। प्रत्यक्षपदमुक्तप्रमाणोपलक्षणम्। विषयादिसम्भावनाहेतुमध्यासं प्रसाध्य विषयप्रयोजने निर्दिशन्, वेदान्तानामादेयत्वात्, तदीयविचारशास्त्रस्यापि तथात्वमाह— **अस्येति**। कर्तृत्वादिरनर्थः, तस्य हेतुरुक्तोऽध्यासः, तस्य प्रकर्षेण हानं सोपादानस्य निवृत्तिः, तदर्थमिति यावत्। कुतोऽस्य प्रहाणं, तत्राह— **आत्मेति**। आत्मनस्त्वमर्थस्य तदर्थेन ब्रह्मणा यदेकत्वं वाक्यार्थः, तद्विषया विद्या साक्षात्कारो बुद्धिवृत्तिः, तस्याः प्रतिपत्तिरप्रतिबद्धतया प्राप्तिः, तदर्थमिति यावत्। कुतः पुनरेषा विद्योत्पद्यते, तत्राह— **सर्व इति**। द्विविधवाक्यसंग्रहार्थः सर्वशब्दः। आरम्भो विचारः। विचारितेभ्यो यथोक्तविद्योत्थानमित्यर्थः। वेदान्तेषु प्राणाद्युपास्तीनामपि भानात्, कथमात्मैक्यमेवार्थस्तेषामित्याशङ्क्याह— **यथा चेति**। शरीरमेव शरीरकं कुत्सितत्वात्, तन्निवासी शारीरको जीवः, तस्य ब्रह्मतावेदिका विचारात्मिका मीमांसा, तस्यामिति यावत्।इति प्रथमवर्णकम्।

---

१. पूजितविचारवचनो मीमांसाशब्दः। तेन च विचारोपयोगिन्यायकलापो लक्ष्यते। तत्प्रतिपादकं शास्त्रं मीमांसाशास्त्रम्।

२. विषयो द्विविधः उत्पाद्यो ज्ञाप्यश्च। उत्पाद्यतया विषयो ज्ञानम्, ज्ञाप्यतया तु ब्रह्मात्मैकत्वम्।

प्रकाशात्मयतिविरचितः शारीरकन्यायसङ्ग्रहः

प्रणम्य प्रणतार्तीनां हन्तारं विष्णुमव्ययम्। शारीरकस्य संक्षेपात् क्रियते न्यायसङ्ग्रहः।।

जिज्ञासाधिकरणम्

अथातो ब्रह्मजिज्ञासा।।१.१.१।।

अत्र विधिः खलु सर्वत्र विशिष्टाधिकार्यन्यतोऽप्राप्तविषयतत्साध्यफलानुबन्धत्रयमपेक्ष्य प्रवृत्तिपर्यन्तो भवति, "यजेत" इत्यादिविधिवत् इति न्यायेन [1]बन्धविश्लेषनिमित्तब्रह्मात्मानुभवस्य केवलदृष्टसाधनसाध्यत्वाभावस्य वक्ष्यमाणत्वात्, तत्साधनवेदान्तवाक्यविचारविधौ अनुबन्धस्त्रिविधो वक्तव्यः। तत्र कर्तृत्वभोक्तृत्वतच्छक्तिलक्षणस्यात्मनि बन्धस्य परमार्थसत्यतया ब्रह्मात्मानुभवनिरस्यत्वासंभवेन फलानुबन्धाभावात्, नित्यानित्यवस्तुविवेकाद्यधिकारिविशेषणचतुष्टयस्यात्यन्तासंभवात्, तत्संभवेऽपि चातुर्मास्यादिकर्मफलस्य नित्यतया ब्रह्मात्मभावानुपपत्त्या च कर्माधिकारिविलक्षणाधिकार्यनुबन्धाभावात्, वेदान्तानां विधिपदरहितत्वात्, अर्थवादवाक्यवत् कर्मविचारेण विचारितत्वात्, अप्राप्तविषयानुबन्धाभावात् विधिरहिततया शास्त्रस्यानारम्भे प्राप्ते—

"तद्विजिज्ञासस्व" "सोऽन्वेष्टव्यः" "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" "आत्मानं पश्येत्" इत्यादिविचारविधीनां [2]सर्वशाखाप्रत्ययन्यायेनैकत्वमङ्गीकृत्य तत्प्रकरणपठितानाम् "भृगुर्वै वारुणिः[3]" "परीक्ष्य लोकान्" "तद्यथेह कर्मजितो लोकः क्षीयते" "आत्मनस्तु कामाय सर्वं प्रियं भवति" "शान्तो दान्तः" "तरति शोकमात्मवित्" "ब्रह्म वेद ब्रह्मैव भवति" [4]इत्यादिवाक्यानां संभूय ब्रह्मण्येव प्रवृत्तिनिमित्तसाधनचतुष्टयविशिष्टाधिकारिसमर्पकत्वोपपादनेन, वेदान्तानां कर्तृस्तावकत्वे तत्प्रतिपादने वा कर्मप्रवृत्तिविरोधितया स्वातन्त्र्येण स्वार्थपराणां विचारं विधिविषयमन्यतोऽप्राप्तमुपवर्ण्य तत्साध्यं च फलानुबन्धं बन्धस्य मिथ्यात्वप्रदर्शनेनोपपाद्य साधनचतुष्टयसंपन्नस्याधिकारिणो बन्धविश्लेषायानुभवफलपर्यन्ते वेदान्तवाक्यविचारे अनुबन्धत्रयविशिष्टविधिसमर्थनेन शास्त्रारम्भो दर्शितः।।

प्रकटार्थविवरणम्

एवं तावद् व्याख्येयत्वमुपपाद्य प्रतिपदं व्याख्यातुकाम आद्यं सूत्रमुपादत्ते— **वेदान्तेति**। आदित्वादस्य न पूर्वाधिकरणेन सम्बन्धः। किन्तु नित्याध्ययनविधिग्राहितापातप्रतिपन्नानुबन्धत्रयविशिष्टः 'श्रोतव्य' [5]इति विधिः स्वापेक्षिताधिकारिविषयफलानुबन्धत्रयं न्यायेन निर्णेतुं प्रथमसूत्रं प्रयुङ्क्त इति तेनास्य सम्बन्धः। शास्त्रान्तर्भूतश्चेदम्; समन्वयाद्यशेषविचारहेतुत्वात्; ब्रह्मज्ञानाय वेदान्तविचारकर्तव्यतानिर्णयद्वारेण वेदान्तानां ब्रह्मणि समन्वयसूचकत्वात् समन्वये चास्य सम्बन्धो बोद्धव्यः।

भाष्यभावप्रकाशिका

व्याचिख्यासितस्येति धर्ममीमांसयाऽगतार्थत्वं सूचयति। आदित्वात्सूत्रत्वाच्च श्रोतृप्रवृत्तिसिद्धये विषयादेर्ग्रहणमनेन कृतमिति दर्शयति— **इदमादिमं सूत्रमिति**। बाह्यप्रवृत्तिकमथशब्दोपात्तमधिकारिणमुद्दिश्य ब्रह्मज्ञानाय विचारविधानाद् विचारसाध्यब्रह्मज्ञानाद् बन्धनिवृत्तिः प्रयोजनं सूचितम्। तत्कामिनस्तदनुपाये नियोगायोगात्, तथा जीवगतबन्धाध्यासस्यान्यतत्त्वज्ञानान्निवृत्त्ययोगाद् ब्रह्मज्ञानमपि जीवतत्त्वविषयम् इति तयोरैक्यं विषयोऽप्यर्थात् सूचित इति भावः।।

---

१. ननु ब्रह्मात्मानुभवस्य श्रवणादिना दृष्टविधयैवोत्पत्त्या ऽवघातादिवत् नियमादृष्टसाध्यस्याभावात् न श्रवणादौ नियमविधिसम्भवः। अपूर्वपरिसंख्याविधित्वे सिद्धान्तिनोऽप्यसंमते। तथा च तत्र विधिर्न संभवतीति अनुबन्धत्रयं न वक्तव्यमित्याशङ्क्य नियमविधित्वं संभावयन्नाह— बन्धेत्यादि। वक्ष्यमाणत्वादिति। 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' (ब्र. सू. ३-४-२६) इत्यत्रेति शेषः।

२. 'सर्ववेदान्तप्रत्ययन्यायेन' इति पाठान्तरम्। ३. 'वरुणं पितरमुपससार' इत्यग्रिमवाक्यम्। अनेन गुरूपसदनं दर्शितम्। ४. इमाश्च फलश्रुतयः कामनोत्पादनद्वारेण मुमुक्षोरधिकारप्रदर्शनार्थाः।

५. भामतीरीत्या तु 'स्वाध्यायोऽध्येतव्य' इत्यध्ययनविधिरेव शास्त्रारम्भको द्रष्टव्यः।

अथातो ब्रह्मजिज्ञासा।।१।।

[1]तत्राथशब्द आनन्तर्यार्थः परिगृह्यते,

प्रकटार्थविवरणम्

अथातो ब्रह्मजिज्ञासा। "श्रोतव्यः" इति वेदान्तवाक्यविचारो विषयः। स किमनारम्भणीयः उतारम्भणीयः इति संशयः। बन्धसत्यत्वादिहेतुना विध्यपेक्षितानुबन्धत्रयासम्भवान्नारम्भणीय इति पूर्वः पक्षः। बन्धमिथ्यात्वेन श्रुत्युपपत्तिभ्यामनुबन्धत्रय-सम्भवादारम्भणीय इति सिद्धान्तः। तदेतद् भाष्यतात्पर्यपर्यालोचनातो निश्चेतव्यम्।

इदानीं प्रतिपदं व्याख्याति— **अत्राथशब्द** इत्यादिना। अधिकृतिरधिकारः प्रारम्भः। तदर्थोऽयमथशब्दो न भवति, **'अथ**

भाष्यभावप्रकाशिका

अथवा "अथातो ब्रह्मजिज्ञासा" इति जिज्ञासापदेन संदेहप्रयोजने सूत्रयति। तत्र साक्षादिच्छाव्याप्यत्वात् ब्रह्मज्ञानं कण्ठोक्तं प्रयोजनम्। तस्य परमानन्दसाक्षात्कारगोचरस्य प्रेक्षावत्प्रतिपत्तिविषयतोपपत्तेः। जिज्ञासा तु संशयस्य कार्यमिति स्वकारणं संशयं सूचयति। संशयश्च शास्त्रारम्भं प्रयोजयति। तदेवं शास्त्रे प्रेक्षावत्प्रवृत्तिहेतुसंशयप्रयोजनसूचनायोक्तमस्य शास्त्रादित्वमित्याह— **वेदान्तमीमांसेति।** वेदान्तमीमांसेति परमपुरुषार्थसाधनसूक्ष्मार्थनिर्णयफलो विचारः कथ्यते। तस्याः मीमांसायाः शास्त्रम्, शास्यतेऽनेन शिष्येभ्यो यथावत् प्रतिपाद्यते इति। सूत्रमिति च बह्वर्थसूचनसामर्थ्यं दर्शयति। यथाहुः— "लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च। सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः" इति।

तदेवं सूत्रतात्पर्यं व्याख्याय तत्र सूत्रसामर्थ्यं दर्शयितुं प्रतिपदं व्याख्यामारभते— **तत्राथेत्यादिना।** तत्र सूत्रपदेषु मध्ये योऽयं प्रथमोऽथशब्दः, स आनन्तर्यार्थ इति योजना। अथवा यद्यपि लोकेऽथशब्दस्य चत्वारोऽर्थाः प्रसिद्धाः— आनन्तर्यम्, अधिकारः, मङ्गलम्, प्रकृतादर्थादर्थान्तरं चेति; तथाऽप्यत्रानन्तर्यमेवोपादीयते, नान्यदिति प्रतिपादयति— "**तत्रे**"त्यादिना "**सति चानन्तर्ये**"त्यतः प्राक्तनभाष्येण। ननु अधिकारार्थोऽप्यथशब्दो वेदे लोके च "अथैष ज्योतिः" "अथ योगानुशासन"मित्यादौ

न्यायनिर्णयः

प्रथमवर्णके विचारविधेर्ज्ञानव्यवधानेन विषयो ब्रह्मात्मैक्यं, बन्धध्वस्तिश्च फलम्, इत्यध्यासोक्त्या साधितम्। इदानीं पूर्वमीमांसया वेदार्थमात्रोपाधौ प्रवृत्तया गतत्वात्, नैतद्विचारकर्तव्यतेत्याशङ्क्याह— **वेदान्तेति।** तेषां मीमांसा विचारः, मीमांसाशब्दस्य परमपुरुषार्थहेतुसूक्ष्मार्थनिर्णयार्थविचारवाचित्वात्। तस्याः शास्त्रं सूत्रसन्दर्भः, शास्यते शिष्येभ्योऽनेन प्रतिपाद्यते तत्त्वमिति व्युत्पत्तेः। तच्चेदानीमेव व्याख्यातुमिष्टम्। 'अथातो धर्मजिज्ञासा' इति वेदार्थैकदेशे धर्मोपाधौ विचारकार्यताप्रतिज्ञानात्, चोदनासूत्रे च तस्यैव लक्षणप्रमाणयोः श्रुत्यर्थाभ्यामुपन्यासात्, उत्तरत्रापि तस्यैव विचारितत्वात्, वेदान्तविचारशास्त्रस्येदमादिमं सूत्रम्। आदिमत्वादनेन श्रोतृप्रवृत्तये विषयादि सूच्यते। सूत्रत्वाच्चास्यानेकार्थसूचकत्वम्। उक्तं हि— 'लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च। सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः॥' 'अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम्। अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥' इति। तथा च विशिष्टविषयादिमदिदं शास्त्रमारभ्यमिति भावः। इति द्वितीयवर्णकम्।

वर्णकद्वयेन सूत्रतात्पर्यमुक्त्वा तत्रावतारितसूत्रस्य सामर्थ्यं दर्शयितुं प्रतिपदं व्याख्यास्यन्नथशब्दस्य वृद्धप्रयोगेऽर्थचतुष्टयसाधारणत्वादभीष्टमर्थमाह— **तत्रेति।** तेषु सूत्रपदेषु मध्ये योऽथशब्दः स आनन्तर्यार्थ इति योजना। लोकेऽथशब्दस्यार्थचतुष्टये निवेशेऽपि तदर्थोऽत्रानन्तर्यमेव; अर्थान्तरस्य वक्ष्यमाणरीत्याऽत्रायोगादित्यर्थः। नन्वथशब्दोऽधिकारार्थोऽपि लोकवेदयोर्दृष्टः **'अथैष**

---

१. भाष्ये 'अत्राथशब्दः' इति प्रकटार्थधृतः पाठः।

नाधिकारार्थः; ब्रह्मजिज्ञासाया अनधिकार्यत्वात्। मङ्गलस्य च वाक्यार्थे समन्वयाभावात्।

प्रकटार्थविवरणम्

योगानुशासनम्' इतिवद् ब्रह्मज्ञानेच्छाया अनारभ्यत्वात्; न तावत् सोत्पाद्यतया प्रारब्धा, 'तद्विजिज्ञासोरत्राधिकारात्। नापि प्रतिपाद्यतया, प्रत्यधिकरणमप्रतिपाद्यत्वादिति भावः। ननु जिज्ञासापदोपलक्षितविचारविधिपरं सूत्रम्, ततो विचार-प्रारम्भार्थोऽथशब्दः। सत्यम्, तथाप्यानन्तर्याभिधानमुखेन विधेः प्रथमापेक्षिताधिकारिसमर्पणमेव युक्तम्, 'नाधिकारार्थत्वम्।

"ओङ्कारश्चाथशब्दश्च" इत्यादिपुराणात् मङ्गलार्थत्वं तर्हि भवत्वित्याशङ्क्याह— **मङ्गलस्य चेति**। पदार्थौ हि वाक्यार्थे

भाष्यभावप्रकाशिका

दृश्यते, कथं तद्वदत्राप्यधिकारार्थो न स्यादिति? तत्राह— **नाधिकारार्थ इति**। कुत इति? तत्राह— **ब्रह्मजिज्ञासाया अनधिकार्यत्वादिति**। अयं भावः— जिज्ञासापदस्य ज्ञानेच्छावाचकत्वादिच्छावाच्यमीमांसाप्रतिज्ञायास्तत्प्रवृत्तित्वानुपपत्तेः[1] प्रारम्भायोगात्, प्रत्यधिकरणं च तस्या अप्रतिपाद्यमानत्वात्, जिज्ञासाशब्दस्य लक्षणया विचारपरत्वेऽपि साधनचतुष्टय-संपन्नाधिकारिणोऽथशब्देनानन्तर्याभिधानमुखेन समर्पणाभावे साधनचतुष्टयसंपत्तिविरहिणां ब्रह्मज्ञान-तद्विचारेष्वनर्थित्वान्निर-धिकारतया विचारस्याननुष्ठेयत्वप्रसङ्गात्, विचारविधिसामर्थ्यादधिकारः कल्प्यते; विध्यपेक्षितोपाधित्वाच्चाधिकारस्य प्रारम्भ-स्याथशब्दार्थत्वकल्पनातो विधेयैक्यैन तदर्थत्वकल्पनाया युक्तत्वात्, जिज्ञासाविशेषणब्रह्मज्ञानस्यानन्दसाक्षात्कार-तयाऽधिकार्यत्वेऽपि तस्याप्राधान्यादथशब्देन सम्बन्धायोगाद् न प्रारम्भकल्पनस्यापि तुल्यतेति।

अस्तु तर्हि मङ्गलार्थ इत्यत आह— **मङ्गलस्य चेति। वाक्यार्थे समन्वयाभावादिति**। जिज्ञासायाः कर्तृ-करणभावेन वाक्यार्थेऽन्वयासम्भवात्, कारकान्तराणां चाप्रसिद्धत्वात्, 'जिज्ञासा मङ्गल'मिति सामानाधिकरण्येऽपि प्रशंसापरतया सूत्रस्यार्थवादत्वप्रसङ्गात्, जिज्ञासाया मङ्गलत्वस्य च लोकेऽप्रसिद्धत्वादथशब्दस्य न मङ्गलार्थतेत्यर्थः। अथवा पदार्थस्यैव वाक्यार्थे

न्यायनिर्णयः

ज्योतिः' 'अथ योगानुशासनम्' इति; तथेहापीत्याशङ्क्याह— **नाधिकारार्थ इति**। तत्र हेतुः— **ब्रह्मेति**। अस्यार्थः— किमयमथशब्दो ब्रह्मज्ञानेच्छायाः, किं वा तन्निर्णीत[अन्तर्णीत]विचारस्य, अथवेच्छाविशेषणस्य ज्ञानस्यारम्भार्थः? नाद्यः, तस्या मीमांसाप्रवर्तिकायास्तदप्रवर्त्यत्वादनारभ्यत्वात्, तस्या[2]श्चोत्तरत्र प्रत्यधिकरणमप्रतिपादनात्। न द्वितीयः, अथशब्देनानन्तर्योक्तिद्वारा विशिष्टाधिकार्यसमर्पणे साधनचतुष्टयासम्पन्नानां ब्रह्मधीतद्विचारयोरनर्थित्वाद् विचारानारम्भात्। न च विचारविधिवशादधिकारी कल्प्यः; प्रारम्भस्यापि तुल्यत्वात्[4], अधिकारिणश्च विध्यपेक्षितोपाधित्वात्। न तृतीयः, ब्रह्मज्ञानस्यानन्दसाक्षात्कारत्वे-नाधिकार्यत्वेऽप्यप्राधान्यात्[5] अथशब्दासम्बन्धात्। तस्मान्नारम्भार्थतेति।

अस्तु तर्हि मङ्गलार्थत्वं, नेत्याह— **मङ्गलस्येति**। न तावद् ब्रह्मजिज्ञासा कर्तव्येति वाक्यार्थे मङ्गलस्य कर्त्रादिभावेनान्वयः;

---

१. तथा च ब्रह्मज्ञानेच्छा शास्त्रारम्भात् पूर्वमेव सिद्धेति भावः।

२. अधिक्रियत इत्यधिकार्यः ब्रह्मजिज्ञासयाऽधिकर्तुं योग्यः। तत्राधिकारीति यावत्। 'ब्राह्मविद्यां देवादीनधिकरोति,' 'तया देवादयोऽधिक्रियन्ते' इति प्रामाणिकप्रयोगदर्शनात्। न विद्यतेऽधिकार्यो यस्य तत् अनधिकार्यम्। तस्य भावस्तत्त्वम्, तस्मात्। सामान्ये नपुंसकम्। 'शरदः कृतार्थता' इतिवत्। अनधिकार्यत्वात् = अनधिकार्यत्वप्रसङ्गात्। 'जीवमुख्य' [ब्र.सू. १-१-३१] इति सूत्रे 'उपासात्रैविध्यात् =उपासात्रैविध्यप्रसङ्गात्' इतिवत्। एवं च 'सूत्रेणाधिकार्यलाभप्रसङ्गात् नाथशब्दः प्रारम्भार्थकः' इत्यर्थे भाष्यं पर्यवसन्नम्। यद्यपि क्लिष्टेयं गतिः, तथापि क्लेशेनाप्ययमर्थः भाष्यादेव निस्सारयितुं शक्य इति प्रदर्शनायेदमुक्तम्।

३. चकारो भिन्नक्रमः। अप्रतिपादनाच्चेत्यन्वयः।

४. विचारविधिः अधिकारिविशेषं विनाऽनुपपन्नः तमाक्षिपतीति न तल्लाभार्थमथशब्दस्यानन्तर्यार्थत्वं स्वीकार्यमिति चेत्, तर्हि विधिना विचारस्य कर्तव्यत्वावगमादेव तदारम्भसिद्धौ नार्थलभ्यप्रारम्भार्थकत्वमपि स्वीकार्यमिति तुल्यमित्यर्थः। उभयोरर्थलभ्यत्वे तुल्ये ऽधिकारिणो विध्यपेक्षितत्वेन विशेषात् तत्समर्पणायानन्तर्यार्थकत्वमेवाथशब्दस्य युक्तमित्यभिप्रेत्याह— अधिकारिणश्चेति।

५. सन्वाच्येच्छायां विशेषणत्वेनोपस्थितत्वादिति भावः।

६. 'इच्छायाश्च मीमांसाप्रवर्तिकायास्तत्प्रवर्त्यत्वानुपपत्तेः' इति पाठःस्यात्।

अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति। पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकात्।

प्रकटार्थविवरणम्

समन्वेति। मङ्गलं च नाथपदार्थः[1], किन्तु प्रयोजनमिति भावः। ननु पूर्वप्रकृतापेक्षोऽप्यथशब्दो दरीदृश्यते। यथाऽर्थान्तरेऽभिहितेऽर्थान्तरविवक्षया ब्रवीति— 'अथैवं मन्यसे' इति। तद्वदिहापि भवत्वित्याशङ्क्याह— **पूर्वप्रकृतापेक्षायाश्चेति।** हेतुफलभावेनाऽऽनन्तर्ये प्रतिपादिते पूर्वप्रकृतत्वमपि तत्रान्तर्भवति। पूर्वप्रकृताभिधाने तु नानन्तर्यं तत्रान्तर्भवति; अहेतुफलयोरानन्तर्यव्यभिचारस्यापि सम्भवात्। अतोऽनन्यलभ्यत्वादानन्तर्यमेवाथशब्दार्थ इत्यर्थः।

भाष्यभावप्रकाशिका

समन्वयाद् मङ्गलस्य चाथशब्दवाच्यतया लक्ष्यतया वा पदार्थत्वाभावाद् न वाक्यार्थेऽन्वय इत्यर्थः।

ननु विघ्नोपशान्तये शिष्टाचारपरिपालनाय च शास्त्रारम्भे मङ्गलाचरणमनुष्ठेयम्, भवति च मङ्गलार्थोऽथशब्दः— "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ।।" इति स्मृतेरित्याशङ्क्याह— **अर्थान्तरप्रयुक्त इति।** अर्थान्तरेष्वानन्तर्यादिषु प्रयुक्तोऽथशब्दः श्रुत्या = श्रवणमात्रेण वीणादिध्वनिवद् मङ्गलं कुर्वन् मङ्गलप्रयोजनो भवति; अन्यार्थं नीयमानोदकुम्भदर्शनवत्। अतो न स्मृतिविरोध इत्यर्थः। अस्तु तर्हि प्रकृतादर्थादर्थान्तरपरोऽथशब्दः— "अथैवं मन्यसे" इत्यादाविवेति; तत्राह— **पूर्वप्रकृतेति।** हेतु-फलभावेनानन्तर्याभिधाने प्रकृतादर्थान्तरत्वमन्तर्णीततया सिद्ध्यति, तेन न पृथग् वक्तव्यम्, अहेतुभूतपूर्वप्रकृतार्थापेक्षयाऽथशब्दप्रयोगे त्वनुवादादृष्टार्थत्वयोरन्यतरप्रसङ्गः, अतो हेतुभूतपूर्वप्रकृतापेक्षयाऽऽनन्तर्यमेव फलति; हेतु-फलयोरेवाव्यभिचार्य[रि]त्वेनानन्तर्यस्य मुख्यत्वात्, तस्य च हेतुभूतस्याधिकारिविशेषणत्वेन फलपर्यन्तेच्छाविचारादिप्रवृत्तौ प्रतिपत्त्यपेक्षाकल्पनापेक्षयाऽधिकारिविशेषणसाधनचतुष्टयलक्षणपुष्कलकारणानन्तर्यप्रतिपत्त्यर्थ एवाथशब्द इति भावः।

न्यायनिर्णयः

तस्य तथात्वाप्रसिद्धेः, कारकान्तराणां च [2]प्रसिद्धेः। न च ब्रह्मजिज्ञासा मङ्गलमिति सामानाधिकरण्यं; प्रशंसात्वेन सूत्रस्यार्थवादत्वापत्तेः, तन्माङ्गल्यस्य च प्रसिद्धत्वात्। न च तदनूद्य तत्कर्तव्यतापरं सूत्रम्। तस्या मङ्गलत्वे कर्तव्यत्वस्यार्थिकत्वात्। अतो न मङ्गलार्थः। ननु विघ्नोपशान्तये शिष्टाचाररक्षायै च शास्त्रारम्भे मङ्गलमाचरणीयम्, 'ओंकारश्चाथशब्दश्च' इत्यादिस्मृतेर्मङ्गलार्थश्चाथशब्दः; तत्राह— **अर्थान्तरेति।** आनन्तर्यमर्थान्तरम्। तस्मिन्नेव प्रयुक्तोऽथशब्दः श्रवणमात्रेण वीणाध्वनिवन्मङ्गलहेतुस्तत्फलो भवति, अन्यार्थं नीयमानोदकुम्भोपलम्भवत्। उक्तस्मृतिस्तु मङ्गलफलत्वविषयेत्यर्थः। उक्तदृष्टान्तार्थो हिशब्दः। 'अथैतन्मत'मितिवत्प्रकृतादर्थादर्थान्तरार्थोऽथशब्दः; तत्राह—**पूर्वेति।** यत्किंचित् प्रकृतमपेक्ष्य भाविन्यां जिज्ञासायामथप्रयोगेऽनुवादादृष्टार्थत्वयोरन्यतरत्वम्। अवश्यं हि पुमान् किंचित् कृत्वा किंचित् करोति। फलत्वेनावस्थितजिज्ञासाहेतुत्वेन प्रकृतापेक्षया भाविन्यामस्यामथशब्दे प्रकृतापेक्षावशाद्यदस्यार्थान्तरं तदानन्तर्यान्नातिरिच्यते, हेतुफलयोरव्यभिचारेणानन्तर्यस्यैव मुख्यत्वात्, तथा चार्थान्तरं न पृथग्वाच्यम्। अतो हेतुभूतार्थस्याधिकारिविशेषणत्वेन फलपर्यन्तेच्छाविचारादिप्रवृत्तौ प्रतिपत्त्यपेक्षत्वात्, प्रवृत्त्यङ्गशास्त्रीयाधिकारिविशेषणसाधनचतुष्टयपुष्कलहेत्वानन्तर्यार्थोऽथशब्द इति भावः।

---

१. इदं च भामतीरीत्या। मङ्गलस्य 'अथ' शब्दार्थत्वेऽपि न प्रकृते तद्विवक्षा, अन्वयासम्भवादिति विवरणमतं तु न्यायनिर्णये स्पष्टम्। आवश्यकं चैतत्। 'यथाकुलाचारमथावनीन्द्रजां पुरन्ध्रिवर्गः स्नपयांबभूव ताम्' (नै. १५-१९) इति लक्ष्यानुरोधात्। अथ स्नपयांबभूव =मङ्गलस्नानं कारयामास इति हि तदर्थः। एवं च 'मङ्गलानन्तरारम्भ—' इति कोशोऽपि समञ्जसः। अत्र च चादिगणे पठितोऽथशब्दः स्वरूपेण मङ्गलः, स्वरादिपठितश्च मङ्गलार्थकः इत्यपि विशेषः प्रौढमनोरमायामुक्तः। (द्र. अव्ययप्र.)

२. ब्रह्मजिज्ञासायां मुमुक्षुः कर्ता, तर्कसहकृतवेदान्तवाक्यं करणमित्येवंरीत्या कारकान्तराणां प्रसिद्धत्वात् न मङ्गलस्य तथात्वेनान्वयाकाङ्क्षेति भावः। द्र. तत्त्वदी. पृ. ४००

सति चानन्तर्यार्थत्वे यथा धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं नियमेनापेक्षते, एवं ब्रह्मजिज्ञासाऽपि यत् पूर्ववृत्तं नियमेनापेक्षते, तद् वक्तव्यम्। स्वाध्यायानन्तर्यं तु समानम्।

नन्विह कर्मावबोधानन्तर्यं विशेषः। न; धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः।

प्रकटार्थविवरणम्

ननु कारणात् कार्यस्यानन्तर्यस्यापि सिद्धत्वात् तदपि नाथशब्देन वक्तव्यमित्याशङ्क्याह— **सति चेति**। आनन्तर्याभिधानमुखेन जिज्ञासोः प्रवृत्त्युपयोग्यधिकारिविशेषणमेवाथशब्देन तात्पर्येण समर्पणीयमित्यर्थः। ननु तर्हि यथाऽधीतवेदो धर्मविचारेऽधिक्रियते, तथा ब्रह्मविचारेऽपि स एवाधिक्रियत इति तदानन्तर्यार्थोऽथशब्दो भवत्वित्याशङ्क्याह— **स्वाध्यायेति**। स्वाध्यायानन्तर्यं तु **समानं** साधारणं धर्मब्रह्मजिज्ञासयोः। अतोऽसाधारणं किमपि वक्तव्यम्; विलक्षणस्य कार्यस्य विलक्षणसामग्रीनियमादिति भावः। तर्हि श्रुतपूर्वमीमांसाशास्त्रस्यैवात्राधिकार इति विशेषं शङ्कते— **नन्विहेति**। यस्मिन् सत्येव प्रवर्तते, यस्मिन् सति च प्रवर्तत एव, तदेवाधिकारिविशेषणं ब्रह्मजिज्ञासायाः पुष्कलकारणमानन्तर्याभिधानेनाथशब्देनावद्योत्यत इति वाच्यम्; न तथा धर्मविचार इत्याह— **नेति**। न तावद्धर्मविचारे पूर्ववृत्ते सत्येव ब्रह्मजिज्ञासायां प्रवर्तते। जन्मान्तरे

भाष्यभावप्रकाशिका

भवत्वानन्तर्यार्थः, किमेवं सति? इत्याह— **सति चेति**। ननूक्तमेव "अथातो धर्मजिज्ञासे"ति सूत्रे पूर्ववृत्तमित्यत आह— **स्वाध्यायेति**। अत्र च स्वाध्यायपदेन तद्विषयमध्ययनं लक्षयति। समानम् = समानो हेतुर्धर्म-ब्रह्मजिज्ञासयोः। अतो न पृथगिह वक्तव्यम्। अथवा समानम् = नात्यन्तमनपेक्षितम्, नापि स्वयमेव प्रयोजकम्; अतः समानम् = न पुष्कलकारणमित्यर्थः। धर्म-ब्रह्मजिज्ञासयोरन्योन्योपकारकभावेनैकफलशेषत्वादुपकारकत्वाच्च धर्मावबोधानन्तर्यं ब्रह्मावबोधस्योच्यत इति चोदयति— **नन्विहेति**। विशेषो धर्मजिज्ञासातो ब्रह्मजिज्ञासायाः। धर्मब्रह्मजिज्ञासयोरुपकार्योपकारकत्वासंभवान्नैवमित्याह— **न धर्मजिज्ञासाया इति**। वेदान्ताध्ययनमपि न केवलं पुष्कलं कारणम्; तथाऽपि न तेन विना ब्रह्मजिज्ञासोपपद्यते। धर्मजिज्ञासायास्तु तस्यामनुपयोगः। तथाहि— धर्मजिज्ञासायां न्यायसमूहः, तन्निबन्धनश्च वाक्यार्थनिर्णयः, वाक्यार्थश्चाग्निहोत्रादिकं कर्मेति त्रयं वृत्तम्। तत्र स्वाध्यायस्यार्थावबोधोपयोगे तत्त्वेन स्वतःप्रामाण्यसिद्धौ च न्यायोऽपेक्षितोऽपि स्वाध्यायवदेव न पुष्कलकारणं ब्रह्मजिज्ञासायाम्; यतः पुनरर्थनिर्णयः, सोऽप्यन्यविषयत्वान्नात्र प्रवृत्तौ हेतुः। नापि प्रतिपत्तौ, धर्मब्रह्मणोः सम्बन्धानिरूपणात्। नापि कर्मणामुपयोगः, अधिकारपरम्परया सञ्चितपापविलयेन वोपयोगासम्भवात्, प्रमाणाभावाच्च, ऋणापाकरणद्वारेण

न्यायनिर्णयः

तस्यानन्तर्यार्थत्वेऽपि कथं ब्रह्मजिज्ञासायाः साधनचतुष्टयादेवानन्तर्यमित्याशङ्क्याह— **सति चेति**। दृष्टान्ते, दार्ष्टान्तिके च नियमेन पूर्ववृत्तमिति सम्बन्धः। ननु धर्मजिज्ञासासूत्रे पूर्ववृत्तस्योक्तत्वान्नात्र वक्तव्यं शिष्यते, तत्राह— **स्वाध्यायेति**। विध्यधीनसाङ्गाध्ययनलब्धस्वाध्यायादानन्तर्यं धर्मब्रह्मजिज्ञासयोः साधारणम्। अतो नात्र पृथक्कथनीयम्। यद्वा **समानं** नात्यन्तमनपेक्षितं, नापि स्वयमेव प्रयोजकम्। अतस्तत्र शास्त्रारम्भे पुष्कलकारणमित्यर्थः।

ननु धर्मजिज्ञासायां वेदाध्ययनादेवानन्तर्यम्। यथाहुः— 'तादृशीं तु धर्मजिज्ञासामधिकृत्याथशब्दं प्रयुक्तवानाचार्यः, या वेदाध्ययनमन्तरेण न सम्भवति' इति। ब्रह्मजिज्ञासायां तु कर्मावबोधादानन्तर्यमथशब्दार्थः। युक्तं हि विचारयोरन्योन्यमुपकार्योपकारकत्वात्, उपकार्यब्रह्मावबोधस्योपकारककर्मावबोधादानन्तर्यम्। अतो धर्मजिज्ञासातो ब्रह्मजिज्ञासाया हेतुभेदोऽस्तीति शङ्कते— **नन्विति**। विचारयोरुपकार्योपकारकत्वस्यासिद्धेर्नैवमिति समाधत्ते— **नेत्यादिना**। यद्यपि वेदान्ताध्ययनं ब्रह्मजिज्ञासायां न पुष्कलो हेतुः, तथापि तेन विना न सा युक्ता। युक्ता त्वधीतवेदान्तस्य विनापि धर्मजिज्ञासया; तस्यास्तस्यामनुपयोगात्। अतो न ब्रह्मजिज्ञासाया धर्मजिज्ञासानन्तर्यमित्यक्षरार्थः। अयं भावः— प्राच्यां मीमांसायां न्यायसहस्रं, तद्गतवाक्यार्थधीः, वाक्यार्थश्चाग्निहोत्रादिकर्मेति त्रयं वृत्तम्। तत्र न तावदस्या न्यायसहस्रानन्तर्यम्, तस्य

यथा च हृदयाद्यवदानानामानन्तर्यनियमः, क्रमस्य विवक्षितत्वात्, न तथेह क्रमो विवक्षितः, शेषशेषित्वेऽधिकृताधिकारे वा प्रमाणाभावाद् धर्मब्रह्मजिज्ञासयोः।

प्रकटार्थविवरणम्

परमेश्वराराधनबुद्ध्याऽनुष्ठितकर्मभिः शुद्धसत्त्वस्य विरक्तस्य वृद्धव्यवहारत एव विदितपदपदार्थसङ्गतेः वेदान्ताध्ययनेन चापातावगतश्रोतव्यविधिकस्य अन्तरेणैव धर्मविचारं ब्रह्मविचारे प्रवृत्त्युपपत्तेः। नापि धर्मविचारे सति प्रवर्तत एव; कृतधर्मविचारस्य वेदान्तानां कार्यशेषताग्रहगृहीतस्य ब्रह्मजिज्ञासायां पराङ्मुखत्वात्। अतो न धर्मविचारानन्तर्यार्थोऽथशब्द इत्यर्थः।

ननु तर्हि यथा 'हृदयस्याग्रेऽवद्यति[1], अथ जिह्वायाः, अथ वक्षसः' इति क्रमविशेषनियमार्थोऽथशब्दः, तथाऽयमपि भवतु। तथा च स्मृतिः— "अधीत्य विधिवद् वेदान् पुत्रांश्चोत्पाद्य धर्मतः। इष्ट्वा च शक्तितो यज्ञैः मनो मोक्षे निवेशयेत्॥" इति; तत्राह— **यथा चेति**। अनुष्ठेयानां बहुत्वादनुष्ठातुश्चैकत्वाद् युगपदनुष्ठानायोगादवश्याश्रयणीये क्रमे ब्रूयात् तन्नियममथशब्दः। धर्मब्रह्मविचारयोस्त्वनुष्ठात्रैक्याभावान्न क्रमाकाङ्क्षा। यत्र ह्यङ्गाङ्गिभावो यथा प्रयाजदर्शादिषु, यत्र वाऽधिकृताधिकारः तत्रैवानुष्ठात्रैक्यम्। न च तथात्वे धर्मब्रह्मविचारयोः प्रमाणमित्यर्थः। स्मृतिस्त्वविरक्तस्याश्रमक्रमाभिधानेन यज्ञाद्यनुष्ठानानन्तरं मुमुक्षामाह। न तु ब्रह्मविचारस्य धर्मविचारानन्तर्यप्रतिपादकः कश्चिच्छब्दः तत्रोपलभ्यते। अतो न कर्मानुष्ठानानन्तर्यं परस्याभिप्रेतम्। तथा च [2]**भास्करो**ऽरोदीत् "कर्मविचारो वृत्तः। अनन्तरं ब्रह्मजिज्ञासा प्रारभ्यते" इति।

भाष्यभावप्रकाशिका

वोपयोगसम्भवेऽपि समानजन्मानुष्ठितानामेवोपयोग इति नियन्तुमशक्यत्वात्, ऋणापाकरणस्य "यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजे"दित्यादिश्रुतिविरोधादेतज्जन्मन्येवानुष्ठेयत्वकथनासंभवाज्जन्मान्तरानुष्ठितानामपि कर्मणामुपकारित्वसंभवात्, नैयोगिके फले कालनियमाभावात्। अतो ज्ञाताज्ञातानेकजन्मव्यवहितफलहेतुषु कर्मसु फलप्रवृत्तिसमकालप्रतिपत्त्यनपेक्षेषु ब्रह्मज्ञानफलकविचारप्रवृत्त्यधिकारोपाधितया पूर्वक्षणेऽपि प्रतिपत्तव्याधिकारिविशेषणत्वायोगाच्च न तत्प्रतिपत्त्यर्थोऽथशब्द इति भावः।

ननु तर्ह्यानन्तर्याभिधानमुखेन क्रमप्रतिपत्त्यर्थो भवत्वित्याशङ्क्याह— **यथेति**। "हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः" इत्यथाग्रेशब्दाभ्यां क्रमस्य विवक्षितत्वादित्यर्थः। **न तथेति**। एककर्तृकाणां युगपदनुष्ठानासम्भवे क्रमो भवति, एककर्तृत्वं त्वङ्गाङ्गिनोरङ्गानां च बहूनामेकाङ्गिसम्बन्धिनामधिकारान्तरप्रयुक्त्युपजीविनां च भवति। न चात्रान्यतमसत्त्वे श्रुत्यादिप्रमाणमस्तीत्यर्थः।

न्यायनिर्णयः

तत्तदर्थभेदज्ञानोपयोगिनोऽस्यामनुपयोगात्। स्वाध्यायस्यार्थज्ञानोपयोगेऽनपेक्षत्वेन, स्वतोमानत्वेन च न्यायद्वयमिहोपयुक्तमपि स्वाध्यायाध्ययनवन्न पुष्कलकारणमिति न तदानन्तर्यमस्या युक्तम्। नापि वाक्यार्थज्ञानादत्रानन्तर्यम्। तद्धि नात्र प्रवर्तकमन्यार्थत्वात्; नापि प्रत्यायकं; धर्मब्रह्मणोरसम्बन्धात्। न च ज्ञाताद्वाक्यार्थदत्रानन्तर्यं, अज्ञानत्वेन [अज्ञातत्वेन] व्यवहितफलहेतुकर्मसु फलप्रवृत्तिकालज्ञानानपेक्षेषु ब्रह्मज्ञानफलविचाराधिकारोपाधितया पूर्वक्षणे ज्ञातव्याधिकारिविशेषणत्वायोगात्, तस्मान्न कर्मतज्ज्ञानविचारानन्तर्यमथशब्दार्थ इति।

ननु धर्मजिज्ञासाया ब्रह्मजिज्ञासायां सामग्रीत्वाभावेऽप्यानन्तर्योक्तिद्वारा तत्क्रमज्ञानार्थोऽथशब्दः; 'हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः' इत्यवदानक्रमज्ञानार्थाथशब्दवत्। 'अधीत्य विधिवद्वेदान् पुत्रांश्चोत्पाद्य धर्मतः। इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्॥' इति स्मृतेः। न तु पुष्कलहेतुज्ञानार्थताऽस्येति; तत्राह— **यथेति**। अनुष्ठेयावदानानां बहुत्वात्, अनुष्ठातुश्चैक्यात् अयौगपद्यात्, क्रमध्रौव्यात् तन्नियममथशब्दो ब्रूयात्। इह तु विचारयोरनुष्ठातृभेदान्न क्रमो विवक्षितः। यत्राङ्गाङ्गित्वं प्रयाजदर्शादिषु, यत्र चाधिकृताधिकारो गोदोहनादिषु तत्रैव कर्त्रैक्यम्। न प्रस्तुतविचारयोस्तथात्वे मानम्। अतोऽत्र कर्तृभेदान्न क्रमविवक्षा।

---

१. अवदानम् = आहुत्यर्थं हविषः हस्तादिनाऽवखण्डनम्। तच्च हृदयादीनां हविष्ट्वसम्पादकः संस्कारः। अत्र च पाठप्राप्तक्रमस्यानुवादमात्रं 'मग्राथ' शब्दाभ्यामिति भाट्टदीपिकादिषु स्थितम्। द्र. १०.७.२ २. द्र. ब्र. सू. भास्करभाष्यम् पृ. १

फलजिज्ञास्यभेदाच्च। अभ्युदयफलं धर्मज्ञानं, तच्चानुष्ठानापेक्षम्। निःश्रेयसफलं तु ब्रह्मज्ञानं, न चानुष्ठानान्तरापेक्षम्। भव्यश्च धर्मो जिज्ञास्यो न ज्ञानकालेऽस्ति, पुरुषव्यापारतन्त्रत्वात्। इह तु भूतं ब्रह्म जिज्ञास्यं नित्यत्वान्न पुरुषव्यापारतन्त्रम्।

चोदनाप्रवृत्तिभेदाच्च। या हि चोदना धर्मस्य लक्षणं सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति।

प्रकटार्थविवरणम्

ननु यथाऽऽग्नेयादीनां षण्णामेकं फलं स्वर्गः, तथा धर्मब्रह्मविचारयोस्तत्त्वज्ञानजननेन कैवल्यमेवैकं फलम्, जिज्ञास्यं चैकमेव[1]; अतः कर्त्रैक्ये क्रमाकाङ्क्षा। तत्राह— **फलजिज्ञास्यभेदाच्चेति**। भेदमुपपादयति— **अभ्युदयफलं हीत्यादिना**। इतश्च जिज्ञास्यभेद इत्याह— **चोदनेति**। वेदवाची चोदनाशब्दः। यो वैदिको लिङादिः धर्मे प्रमाणम्, स स्वविषये धात्वर्थकरण-कपुरुषार्थभाव्यनिष्ठार्थभावनालक्षणे प्रेरयन्नेव पुरुषं बोधयति; ब्रह्मप्रमाणं तु बोधयत्येव; अतो वेदप्रवृत्तिवैलक्षण्यादपि प्रमेयवैलक्षण्यम्। विधिविचारो हि पूर्वतन्त्रे प्रवृत्तः, नासौ न्यायः सिद्धवस्तुनिर्णय उपयुज्यते; अतो न क्रमाकाङ्क्षेति भावः।

भाष्यभावप्रकाशिका

ननु मा भूदेकविधिप्रयुक्त्यनुष्ठेयतया क्रमस्य विवक्षा, किंत्वेकफलप्रयुक्त्या, एकप्रमेयजिज्ञासाप्रयुक्त्या वा सा भवतु, अनुष्ठेये साधनतया फलैक्यादाग्नेयादाविव, द्वादशलक्षण्यामिव च क्रमापेक्षणादित्याशङ्क्याह— **फल-जिज्ञास्यभेदाच्चेति**। धर्म-ब्रह्मजिज्ञासयोरिति सम्बन्धः। तत्र फलभेदं कथयति— **अभ्युदयेति**। **धर्मज्ञानम्** धर्मजिज्ञासा। तस्याभ्युदयः फलमिति भावः। न केवलं स्वरूपतः फलभेदः, किन्तु तदुत्पादनप्रकारभेदादपि तद्भेद इत्याह— **तच्चेति**। **न चानुष्ठानान्तरापेक्षमिति**। ज्ञाननिष्ठा स्वव्यतिरिक्तानुष्ठानं नापेक्षत इत्यर्थः। जिज्ञास्यभेदमात्यन्तिकमाह— **भव्यश्चेति**।

न्यायनिर्णयः

स्मृतिस्त्ववविरक्तस्याश्रमक्रमोक्त्या यज्ञाद्यनुष्ठानानन्तरं शुद्धबुद्धेर्मुमुक्षां दर्शयति; न ब्रह्मविचारस्य धर्मविचारानन्तर्यम्। तत्र तद्वाचिशब्दाभावाद्, ब्रह्मचर्यादेव संन्यासविधानाच्च। तस्मादनेककर्तृकत्वाद् विचारयोर्न क्रमार्थोऽथशब्द इत्यर्थः।

नन्वाग्नेयादीनामेकस्वर्गफलानामध्यायानां च द्वादशानामेकधर्मार्थानां क्रमदर्शनादनयोरपि विचारयोरलौकिकसुखफलयोरेक-वेदार्थविषययोरपेक्षिते क्रमे तदर्थोऽथशब्दो भविष्यति; नेत्याह— **फलेति**। नोक्तरीत्या क्रमापेक्षेति शेषः। अलौकिकसुखफलत्वे तुल्ये कथं भिन्नफलतेत्याशङ्क्य धर्मजिज्ञासाफलमाह— **अभ्युदयेति**। ज्ञानेन जिज्ञासा लक्षिता, प्रकृतत्वात्। तस्या धर्मज्ञानानुष्ठानद्वारा देहाद्यवच्छिन्नत्वेनाभितो जातः स्वर्गादिसुखविशेषः फलमित्यर्थः। न केवलं स्वरूपतः फलभेदः; किंतूत्पादनप्रकारभेदादपीत्याह— **तच्चेति**। वैदिकधीत्वाद् ब्रह्मधीरपि धर्मधीवदभ्युदयफलेत्याशङ्क्याह— **निःश्रेयसेति**। अभ्युदयफलव्यावृत्तये तुशब्दः। पूर्ववत् ज्ञानशब्दो जिज्ञासामधिकारात् लक्षयति। उपास्तिवद् धर्मज्ञानवद्वा स्वगतमर्थगतं वा ब्रह्मधीरप्यनुष्ठानमपेक्षतामित्याशङ्क्याह— **न चेति**। 'ब्रह्मसंस्थोऽमृतत्वमेति' इति श्रुतेर्ब्रह्मधीरोङ्कारनिष्ठाव्यतिरिक्ता[2]-नुष्ठानानपेक्षेत्यर्थः। फलभेदमुक्त्वा जिज्ञास्यभेदमाह— **भव्यश्चेति**। भवत्यसाविति भव्यो भविता, भव्यगेयादिशब्दानां विकल्पेन कर्तरि निपातनात्। उक्तं हि— 'भव्यादयः शब्दाः कर्तरि निपात्यन्ते' इति। धर्मस्य भव्यत्वं साध्यैकस्वभावत्वम्। तदुपपादयति— **न ज्ञानेति**। तत्काले सत्त्वाभावे तुच्छत्वमाशङ्क्याह— **पुरुषेति**। असतोऽपि तत्काले क्रियासाध्यत्वादतुच्छतेत्यर्थः। धर्मवद् ब्रह्मणोऽपि वेदार्थतया साध्यत्वमाशङ्क्योक्तम्— **इह त्विति**। भूतमित्यतीतत्वं व्यावर्तयति— **नित्यत्वादिति**। कालत्रयासंस्पर्शादशून्यत्वाच्च धर्मवत् कृतिसाध्यत्वमाशङ्क्य कालादिकल्पनासाक्षित्वान्नेत्याह— **न पुरुषेति**।

---

१. वेदार्थरूपमिति शेषः।

२. 'अनुष्ठानान्तरे'त्यन्तरपदलभ्यमिदम्। भामत्यां तु शाब्दज्ञानाभ्यासातिरिक्तानुष्ठानानपेक्षेत्यर्थ उक्तः।

ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलम्, अवबोधस्य चोदनाजन्यत्वान्न पुरुषोऽवबोधे नियुज्यते।

प्रकटार्थविवरणम्

यच्चात्र **ब्रह्मप्रकाशिकाकारो** रुरोद "अध्ययनविधिप्रयुक्तत्वे वेदान्तविचारस्याधीतवेदेन कृत्स्न एव वेदार्थो विचारयितव्यः। तत्र सत्यपि हेतुहेतुमद्भावेनाविशेषे पाठक्रममुल्लङ्घ्य त्वरया ब्रह्मविचारस्य प्रथमकरणे किं निमित्तम्" इति। तत्रेदमश्रुमार्जनमुज्जृम्भते। विचारो नाध्ययनविधिप्रयोज्यः, तदनुपयोगित्वात्, अग्निहोत्रवत्। अक्षरस्वीकारपर्यन्तवाङ्मनः-कायव्यापारस्याध्ययनशब्दवाच्यत्वात् आवृत्तिरपि विषयतयैवोपयुज्यत इति नानैकान्तिकता। ननु यथा अवघातविधिः फलपर्यन्ततया आवृत्तिं प्रयोजयति, तथाऽध्ययनविधेरप्यर्थावबोधफलत्वात्, तस्य च विचारं विनाऽनुपपत्तेः तत्प्रयोजकत्वम्; न, अध्ययनविधेरर्थावबोधफलत्वासिद्धेः। तथा हि— विधीयमानक्रियासाध्यं विधेः फलमुच्यते। तत्र न तावदर्थावबोधो-ऽध्ययनक्रियाया अन्वयव्यतिरेकसिद्धं फलं सहं [उक्तिसहं] वेदाध्येतृणामर्थनिश्चयादर्शनात्; विचारस्यापि अङ्गत्वे सत्युपनिषद्विचारेण निस्सन्दिग्धाविक्रियात्मज्ञानोदये कर्मानारम्भप्रसङ्गः, इतरथा साङ्गाध्ययनाभावापातात्; विधिं विनापि शाखान्तरीयवाक्येभ्यः पौरुषेयवाक्येभ्यश्चार्थावगतिदर्शनात्; आपातदर्शनस्य च विचारनिरपेक्षत्वात्। नाप्युद्देश्यतया वैधं फलम्; स्वर्गकामादिपदवदर्थावबोधकामपदस्य 'विध्युद्देशे[1]ऽश्रवणात्; न च विश्वजिन्न्यायेनार्थावबोधकामः, उपनीतस्य प्रकरणाद-धिकारावगमात्, "योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्। स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥" इत्यादिनिन्दावचनेन नित्यत्वावगमाच्च[2]। ननु "स्वाध्यायोऽध्येतव्यः" इति तव्यप्रत्ययव्यापारः शब्दभावना अर्थभावनां सम्पादयन्ती तस्यास्त्र्यंशायाः

भाष्यभावप्रकाशिका

प्रमाणद्वाराऽपि जिज्ञास्यभेदमाह— **चोदनेति**। चोदनेति वैदिकशब्दमाह; विशेषेण सामान्यस्य लक्षणात्। प्रवृत्तिभेदमाह— **या हीति**। "यजेते"त्यादयः शब्दा अंशत्रयविशिष्टामर्थभावनां कुर्वन्तस्तदनवबोधे पुरुषस्य प्रवृत्त्ययोगाद् अर्थभावनामपि प्रतिपादयन्तीत्यर्थः। ननु "आत्मा ज्ञातव्यः" इत्यादिविधिपरैर्वेदान्तैर्ब्रह्मावबोध्यते, तेन ब्रह्मावबोधे भाव्ये पुरुषं प्रेरयन्तो वेदान्ता ब्रह्मावबोधव्यावृत्तां भावनां प्रतिपादयन्ति; "ज्ञातव्यः" इत्यादिविधिवाक्यैः सत्यादिवाक्यानामेकवाक्यत्वादित्याशङ्क्याह— **न पुरुष इति**। अयं भावः— न तावद् ब्रह्मापरोक्षे नियोगः; तस्य सुखसाक्षात्कारतया फलस्याविधिगोचरत्वात्। नाप्युपासनायाम्; तस्या अपि ज्ञानप्रकर्षहेतुत्वस्यान्वयव्यतिरेकसिद्धतयाऽविधेयत्वात्। नापि शाब्दज्ञाने, तस्यापि साङ्गाध्ययनवतः स्वयमेवोत्पत्तेः, ज्ञानस्य चेच्छाप्रयत्नानधीनत्वात्, प्रमाणवस्तुपरतन्त्रत्वादनिच्छतोऽप्रयतमानस्यापि दुर्गन्धादिज्ञानदर्शनादिति। तदेवं जिज्ञास्यैक्य-

न्यायनिर्णयः

रूपतो जिज्ञास्यभेदमुक्त्वा मानतोऽप्याह— **चोदनेति**। वैदिकशब्दमात्रं चोदना, विशेषेण सामान्यलक्षणात्। शक्तितात्पर्याभ्यामर्थज्ञापकत्वे तुल्ये कथं तत्प्रवृत्तिभेदस्तत्राह— **या हीति**। वैदिको लिङादिर्धर्मे मानं, ('यजेत') 'चोदना-लक्षणोऽर्थो धर्मः' इत्युक्तत्वात्। स स्वविषये धात्वर्थकरणकपुरुषार्थभाव्यार्थभावनारूपे प्रेरयन्नेव पुरुषं बोधयति। 'यजेत' इत्यादिर्हि शब्दःअंशत्रयविशिष्टामर्थभावनां विदधत्तदनवबोधे पुरुषाप्रवृत्तेस्तामपि बोधयतीत्यर्थः। ब्रह्मचोदनाऽपि चोदनात्वादितरवत् प्रवृत्तिनिष्ठेत्याशङ्क्याह— **ब्रह्मेति**। ब्रह्मणि प्रतीचि स्थितं 'अयमात्मा ब्रह्म' इत्यादिवाक्यं त्वंपदलक्ष्यं पुरुषं केवलमप्रपञ्चं ब्रह्म बोधयत्येव; न प्रवर्तयतीत्यत्र हेतुमाह— **अवबोधस्येति**। ननु 'आत्मा ज्ञातव्यः' इत्यादिवाक्यैर्ब्रह्म बोध्यते। तेन ब्रह्मबोधे भाव्ये पुरुषं प्रेरयन्तो वेदान्तास्तद्व्यावृत्तां भावनां बोधयन्ति, सत्यादिवाक्यानां 'भूतं भव्यायोपदिश्यते' इति न्यायात् विधिवाक्यैरैक्यात्; तत्राह— **न पुरुष इति**। ज्ञानस्येच्छाप्रयत्नानधीनत्वात्, मानवस्तुतन्त्रत्वात्, अनिच्छतोऽयतमानस्यापि दुर्गन्धादिज्ञानात् न तस्मिन् विधिः। न च त्रिविधेऽपि ज्ञाने विधिः शक्यो निरूपयितुम्। न च चोदना साध्यमेव बोधयति; किंतु भूतादावपि 'चोदना हि भूतम्'

---

१. विध्युद्देशः = विधिवाक्यम्। अर्थावबोधकाम इत्यनन्तरं कल्प्यत इति शेषः।

२. तथा च प्रत्यवायाभावमात्रबोधनेन विधेश्चरितार्थत्वात् नार्थावबोधफलकल्पनावकाश इति भावः।

प्रकटार्थविवरणम्

समानपदोपात्तमध्ययनमपुरुषार्थं भाव्यं विहाय फलवदर्थावबोधं भाव्यं कल्पयति। ततश्च सक्तुन्यायेन[१] स्वाध्यायेनार्थावबोधं भावयेदिति संपद्यते। न, कर्माभिधायितव्यप्रत्ययात् स्वाध्यायस्य भाव्यताश्रुतेर्नार्थावबोधस्य भाव्यता कल्पनीया, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्; न च साक्षात् पुरुषार्थताऽभावात् स्वाध्यायस्याभाव्यता, परंपरया पुरुषार्थसाधनानामपि पश्वन्नाद्यादीनां भाव्यतोपलम्भात्; अर्थावबोधेऽपि समानत्वात्[२]। सक्तूनां तु होमेन भस्मीभावात् संस्कारकर्मतानुपपत्तेः होमस्यार्थकर्मताश्रयणं विभक्तिविपरिणामेन युक्तम्। उक्तं हि— "भूतभाव्युपयोगे हि द्रव्यं संस्कार्यमिष्यते। सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ते क्वचित्" इति।।

स्वाध्यायस्य तु संस्कृतस्य क्रतुषूपादानप्रमाणाद्विनियोगसम्भवान्न सक्तुन्यायावतारः। एतेनेदं निरस्तम्— "न क्रियास्वरूपप्रयुक्तफले कर्मणि स्वाध्यायविधेरर्थवत्ता, अन्तरेणापि विधिं ज्ञायत एवाध्ययनेन स्वाध्यायो गृह्यत" इति। अवघातादि-विधेरपि निराकरणप्रसङ्गादर्थावबोधेऽपि समानत्वाच्च। तात्पर्यं तु न विध्यधीनम्, किन्तु तदर्थप्रमितिशेषता स्वाभाविकीति वक्ष्यति[५]। न चैवं विचारानारम्भप्रसङ्गः; अधीतवेदेनाधिगताधिकारा उत्तरविधय एव स्वविषयसन्देहव्युदासाय विचारमारप्स्यन्ते। यच्चावोचि— बुद्धिमात्रपर्यवसायिनो हि ते। तस्य तु विनैव वेदार्थविचारायासेनोपदेशादपि सम्भवान्नोत्तरविधयस्सुकरमुपायमुपदेशं परित्यज्य विषमं विचारमाक्षिपेयुरिति, तदसत्; निस्संदिग्धज्ञानस्योत्तरविधिभिः स्वविषयानुष्ठानसिद्धयेऽपेक्षितत्वात्। न च न्याय-परिज्ञानमन्तरेण मुहुर्मुहुरभिनवानां संशयानां निराससम्भव इति सुकरमुपदेशं परित्यज्य विषममपि विचारमाक्षिपन्ति। स्वाध्यायविधेरप्यनाक्षेपकत्वसाम्यापाताच्च। न च लाघवात् स्वाध्यायविधेरेव विचाराक्षेपकत्वम्, क्रतुप्रवृत्तेरपि तत एव प्रसङ्गात्[६]। तस्मान्न विचारः स्वाध्यायविधिप्रयुक्तः; किन्तु श्रोतव्याद्युत्तरविधिप्रयुक्त इति सिद्धम्।

पाठक्रमेणैव च विचारे पूर्वतन्त्रेऽपि प्रथमं मन्त्राणामेव "इषे त्वा" इत्यादीनां विचारः प्रसज्येत। अथ विधेः प्राधान्यात् प्रथमं विधिविचारः प्रवृत्तः, अग्निहोत्रहोमयवागूपाकयोरिवार्थक्रमेण। [७]श्रुत्यर्थाविरुद्धो हि पाठक्रमोऽनुष्ठानक्रमे प्रमाणम्, यथा समिदादिषु। तर्हीहापि कर्मस्वनित्यफलेषु विरक्तस्य मुमुक्षोः मोक्षसाधनब्रह्मात्मैकत्वज्ञानाय विचार एवाभ्यर्हितेति प्रवृत्तिर्युक्ता। न च कर्मसमुच्चितं ज्ञानं मोक्षसाधनमिति स्वावसर एव वक्ष्यामः। यच्चाभाणि— किं त्वरयेति, तत्र सोपहासमाह स्मेतिहासः—

"मृत्युना ह्याहते लोके जरया परिवारिते। व्याधिभिर्ग्रस्यमाने च किं स्वस्थ इव भाषसे।।

सर्वोपायैर्यदा नास्ति मर्तव्यस्य प्रतिक्रिया। सोऽहं कथं प्रतीक्षेय जालेनेवावृतश्चिरम्।।

रात्र्यां रात्र्यां व्यतीतायामायुरल्पतरं यदा। स्वल्पोदके मत्स्य इव धृतिं विन्देत कस्तदा।।" इति।

भगवता व्यासेनाप्युपन्यासि—

---

१. सक्तूनां भावनायां भाव्यत्वस्य वक्ष्यमाणरीत्याऽसम्भवात् द्वितीयया करणत्वं लक्ष्यते। तद्वदत्र स्वाध्यायपदोत्तरं द्वितीयाऽश्रवणेऽपि तव्यप्रत्ययेन तस्य कर्मत्वप्रतीतेः, भावनायां च तस्य अपुरुषार्थत्वेन भाव्यत्वानुपपत्त्या लक्षणया करणत्वं स्वीकार्यमिति भावः।

२. साक्षादपुरुषार्थत्वस्येति शेषः। ३. आरादुपकारककर्मेत्यर्थः।

४. विधिना स्वविधेयसिद्ध्यर्थं यदपेक्षितं तदपि स्वयमाक्षिप्य विधीयते। सोऽयं विध्याक्षेपः उपादानप्रमाणमित्युच्यते। स च शब्दप्रमाणान्तर्भूत एवेति प्राभाकराः। (द्र. परिमले पृ. ११०) श्रुतार्थापत्तिरित्यन्ये। प्रकृते च अध्ययनसंस्कृतस्वाध्यायस्योपयोगाकाङ्क्षायां स एव विधिः— 'अधीतेन स्वाध्यायेन क्रतून् भावयेत्' इति विनियोगविधिं कल्पयतीति भावः।

५. 'तात्पर्यं नाम तदर्थप्रमितिशेषता शब्दधर्मः' इति विवरणम्। (पृ. ५७३) 'प्रतीयमानो योऽर्थः तत्प्रमितिजननसामर्थ्यं तात्पर्यम्, तस्य शब्दधर्मत्वमुचितमित्यर्थः' इति तत्र तत्त्वदीपनम्। अध्ययनविधेरर्थावबोधफलकत्वाभावेऽपि उत्तरक्रतुविधिभिः कर्मविचारारम्भमुपपादयति— न चैवमित्यादिना।

६. निर्युक्तिकलाघवाङ्गीकारे तत्तत्कर्मविधीनामपि विधित्वं न स्यात्। यथा हि अध्ययनविधिः स्वफलस्यार्थज्ञानस्य विचारं विनाऽसम्भवात् तमाक्षिपति, तथैवार्थज्ञानस्यापि स्वतोऽपुरुषार्थत्वात् कर्मानुष्ठानद्वारा तत्साध्यफलस्य कर्मसु प्रवृत्तिमन्तरेणानुपपत्तेः तत्तत्कर्माण्यपि स एवाक्षिप्य विदध्यादिति।

७. श्रौतेनाऽऽर्थेन च क्रमेणाविरुद्ध इत्यर्थः।

यथाऽक्षार्थसंनिकर्षेणार्थावबोधे, तद्वत्। तस्मात् किमपि वक्तव्यं यदनन्तरं ब्रह्मजिज्ञासोपदिश्यत इति।

उच्यते– नित्यानित्यवस्तुविवेकः[१], इहामुत्रार्थभोगविरागः, शमदमादिसाधनसंपत्, मुमुक्षुत्वं च। तेषु

प्रकटार्थविवरणम्

"महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया। तावदुत्तर दुःखाब्धिं यावदेषा न शीर्यते"।।इति।

यथाऽतिरात्रे षोडश्यग्रहणाधिकारिणां न षोडशिग्रहणविध्यतिक्रमदूषणम्, यथा च सूतकिनां सन्ध्यामन्त्रोच्चारणेऽनधिकारिणां न मन्त्रवत्सन्ध्याकरणविध्यतिक्रमदूषणम्, तथा विरक्तानाम् "ब्रह्मचर्यादेव प्रव्रजेत्" इत्यादिविध्यधिकारिणां न क्रमविध्यतिक्रमदूषणम्। ऋणापाकरणविषया श्रुतिः, स्मृतिर्वाऽर्थवादरूपा साक्षाद्विधिविरोधे बाध्यत **इत्याचार्या**[२] आचचक्षिरे। तस्माद् यावन्न निपतति शरीरं, यावच्च कैल्यं[३] तावदतित्वरया विचारे प्रवर्तितव्यम्।

ननु त्वरया प्रवृत्तेनापि पूर्वतन्त्रन्यायपरिज्ञानं विना तत्सिद्धवेदप्रामाण्यावधारणमन्तरेण च विचारणा कथङ्कारं क्रियेत? तथा च गुणोपसंहारे बहुशस्ते परिजरीगृह्यन्ते। न, तत्रापि रहस्यसामान्योपनिषद्व्रतोपासनाख्यमानसकर्मविचारे अपेक्षा, न तु सिद्धविचारे। तथापि [४]नाग्रे तच्छ्रवणमवश्यम्भावि, स्वाधिकारनिष्पत्तये प्रवृत्तस्योपदेशतोऽपि तत्परिचयोपपत्तेः, [५]प्रयोग इव शाखान्तरीयोपसङ्ग्रहे; अन्यथा [६]तन्त्रान्तराधिगतेरपि प्रसङ्गात्। तस्याप्येतत्तन्त्रसिद्धशरीरव्यतिरिक्तात्मोपजीवकत्वेनैतत्पूर्वकत्वप्रसङ्गाच्च। यथा चादावेव तदुपयोगिन्यायपरिज्ञानमन्तरेणापि तच्छ्रवणे प्रवृत्तिः, प्रवृत्तस्य च तदभिज्ञाचार्यानुग्रहादेव सर्वोपसङ्ग्रहः, तथाऽत्रापीति पूर्वं पूर्वतन्त्रश्रवणस्यानावश्यकत्वान्न तदानन्तर्यार्थोऽथशब्दः। कर्मणां च नैयोगिककालनियमाभावेन कदाचिदज्ञातानामेव फलजनकत्वेन प्रवृत्तिकाले प्रवृत्य [प्रतीत्य] नपेक्षत्वात् न तदानन्तर्यप्रतिपत्त्यर्थोऽप्यथशब्दः। तस्मादन्यदेव वक्तव्यमित्युपसंहरति— **तस्मादिति।**

इदानीं श्रौतस्य विचारविधेः [७]श्रौतान्येवाधिकारिविशेषणान्याह— **उच्यत इत्यादिना।** तत्र नित्यानित्यवस्तुविवेको नाम आत्मव्यतिरिक्तं सर्वं कार्यत्वादनित्यम्, नित्य आत्मैव कृतकत्वाभावादित्याद्यवधारणम्। इहामुत्रार्थभोगविरागो नाम वर्तमानशरीरस्थितिहेतुभूताप्रतिषिद्धान्नपानव्यतिरिक्तविषयप्रवृत्तिकारणेच्छाविरुद्धो निश्चलश्चेतोवृत्तिविशेषः। शमो नाम अन्तःकरण-

भाष्यभावप्रकाशिका

निबन्धनतयाऽपि क्रमापेक्षाभावात् तत्त्वद्वयस्य, न तदर्थोऽथशब्दः। अत उपसंहरति— **तस्मादिति।**

शास्त्रीयस्य विधेः शास्त्रीयमेवाधिकारनिमित्तं वक्तव्यमित्यभिप्रेत्याह— **उच्यते-नित्यानित्यवस्तुविवेक इति।** साधन-

न्यायनिर्णयः

इत्याद्युक्त्या तत्प्रवृत्तेः। न च तस्य विधिशेषत्वेनैव धीः, समन्वयसूत्रविरोधादिति भावः। पुंसो बोधे नियोगाभावं दृष्टान्तेन स्पष्टयति— **यथेति।** आनन्तर्यवाचिनोऽथशब्दस्याक्रमार्थत्वे पुष्कलहेतुज्ञानार्थत्वमेवेत्युपसंहरति— **तस्मादिति।**

अध्ययनादेर्ब्रह्मजिज्ञासायामसामग्रीत्वात् तथाभूतमन्यदेव वाच्यमित्याह— **उच्यत इति।** शास्त्रीयविधेस्तादृगेवाधिकारनिमित्तमिति मत्वाऽऽह— **नित्येति।** आत्मातिरिक्तं सर्वं कार्यत्वाद् घटवदनित्यं, आत्मैव नित्योऽकृतकभावत्वादिति निश्चयो

---

१. नित्यानित्यवस्तुविवेकः = सत्यसत्यवस्तुविवेक इति भामती। द्र. पृ. ७१. विवेकचूडामणावपि तथैवोक्तम्— 'ब्रह्म सत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः। सोऽयं नित्यानित्यवस्तुविवेकः परिकीर्तितः' इति। श्लो. २०-२१.

२. आचार्याः = विवरणाचार्याः। द्र. पं. वि. पृ. ४१८-४१९

३. कल्यं = नीरोगम्। ४. अग्रे = पूर्वम्, तच्छ्रवणं = पूर्वतन्त्रश्रवणम्।

५. अत एव प्रयोगकारा आपस्तम्बादयः यत्र शाखान्तरीयमन्त्रादिपरिग्रहः, तत्र पूर्णतया तन्मन्त्रादिकं लिखन्ति, अन्यत्र तु तत्प्रतीकमात्रम्।

६. साङ्ख्यबौद्धादितन्त्रेत्यर्थः। तन्मतपरिज्ञानमन्तरेण तन्निराकरणासम्भवादिति भावः। तस्यापि = पूर्वतन्त्रस्यापि।

७. एतेन परोक्ताधिकारिविशेषणानामश्रौतत्वं ध्वनितम्।

हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च, न विपर्यये। तस्मादथशब्देन यथोक्तसाधनसंपत्त्यानन्तर्यमुपदिश्यते।

प्रकटार्थविवरणम्

व्यापाराणां प्रतिषिद्धानामप्रतिषिद्धानामपि लौकिकानां स्वाधिकारनिष्पत्त्यनुपयोगिनां निष्फलत्वावधारणपूर्वकः परित्यागः। दमो नाम बहिष्करणव्यापाराणामुक्तलक्षणानां परित्यागः। उपरतिरिति कृतप्रयोजनकृष्णविषाणस्येव सत्त्वशुद्धिसिद्धौ नित्यानामपि विधित एव परित्यागः[१]। तितिक्षुत्वं नाम शीतोष्णादिद्वन्द्वानां स्वाधिकारनिर्वृत्त्यपेक्षितजीवनविच्छेदहेतुव्यतिरिक्तानां सहिष्णुता। समाधानं नाम विधित्सितश्रवणादिप्रतिकूलनिद्रालस्यादिविरोधेन चेतसोऽवस्थानम्। एतैः सम्पन्नत्वं शमदमादिसाधनसम्पत्। चितोऽज्ञानतत्कार्यावच्छेदो बन्धः, तद्वियोगो मोक्षः, तद्विषयेच्छा मुमुक्षुत्वम्। एतेषां पूर्वस्य पूर्वस्योत्तरोत्तरहेतुतया मुमुक्षाहेतुत्वान्मुमुक्षाया एव[२] ब्रह्मजिज्ञासाहेतुत्वाद्युक्तमानन्तर्याभिधानम्। एतेषां साक्षात्पारम्पर्याभ्यां जिज्ञासाहेतुत्वे प्रमाणमाह— **तेषु हि सत्स्विति**। यस्मादन्वयव्यतिरेकाभ्यां, "शान्तो दान्तः" इत्यादिशास्त्राच्च साधनकलापो ब्रह्मजिज्ञासायाः पुष्कलकारणं तस्मादित्युपसंहारः।

यदत्र **ब्रह्मप्रकाशिकाकारो**ऽप्राक्षीत् "किं सन्निधानात्साधनकलापानन्तर्यम्; किं वाऽर्थाक्षेपात्" इति, तत्रोभयत्रापि ब्रूमः। तथा हि— "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इति गुरुपादोपसर्पणपूर्वकं विचारयेदित्यस्य विधेः सन्निधाने "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्" इति नित्यानित्यवस्तुविवेकेहामुत्रार्थभोगविरागौ दृश्येते। "शान्तो दान्त उपरतस्तितिक्षुः समाहितः श्रद्धावित्तो भूत्वा आत्मन्येवात्मानं पश्येत्" इति दर्शनस्याविधेयत्वात् दर्शनोपलक्षिततत्साधनविचारविधिसन्निधाने शमादयो दृश्यन्ते। "येनाहं नामृता स्याम्" इति मुमुक्षुत्वं दृश्यते। अतः श्रौतं विचारविधिं सूत्रयन् तत्सन्निहितमेव साधनसमूहं सूत्रयामास। रागाद्याक्षिप्तचित्तस्य च तत्त्वज्ञानफले विचारे प्रवृत्त्ययोगादर्थाक्षेपोऽपि वेविद्यते। धर्मविचारस्तु न सन्निहितो, नार्थाक्षिप्त इति तदानन्तर्यं जल्पन् कथं सज्जनसमाजे न लालजीति।

भाष्यभावप्रकाशिका

चतुष्टयस्य ब्रह्मविचारादिसाधने प्रवृत्तौ दृष्टहेतुतामन्वयतः साधयति— **तेष्विति**। व्यतिरेकमाह— **न विपर्यय इति**। कथंचित् कुतूहलादिना ब्रह्मजिज्ञासायां प्रवृत्तस्यापि फलपर्यन्तज्ञानानुदयाद् न विपर्यय इत्युक्तम्।

न्यायनिर्णयः

नित्यानित्यवस्तुविवेकः। वर्तमानदेहस्थितिहेत्वनिषिद्धान्नाद्यतिरिक्तार्थेच्छाविरुद्धा दृढा चेतोवृत्तिरि**हामुत्रार्थभोगविरागः**। लौकिकसर्वबुद्धिव्यापाराणां स्वाधिकारानुपयुक्तानामफलत्वज्ञानपूर्वकस्त्यागः **शमः**। तथारूपबाह्यकरणव्यापारत्यागो **दमः**। सत्त्वशुद्धौ नित्यानामपि विधित एव त्याग **उपरतिः**। शीतोष्णादिद्वन्द्वानां स्वाधिकारापेक्षितजीवनविच्छेदकातिरिक्तानां सहिष्णुता **तितिक्षा**। सर्वास्तिकता **श्रद्धा**। विधित्सितश्रवणादिविरोधिनिद्रादिनिरोधेन चेतसोऽवस्थानं **समाधानम्**। एतेषां सम्पत्तिः **शमदमादिसम्पत्**। आत्मनोऽज्ञानतत्कार्यसम्बन्धो बन्धः। तद्विच्छेदो मोक्षः। तदिच्छावत्त्वं **मुमुक्षुत्वम्**। एतेषां पूर्वस्य पूर्वस्योत्तरोत्तरहेतुतया मुमुक्षावसानात्, तस्या एव ब्रह्मजिज्ञासाहेतुत्वात्, युक्तममुष्यास्तदानन्तर्यम्, तेषां साक्षात्पारम्पर्याभ्यां तद्धेतुत्वादित्यर्थः। साधनचतुष्टयस्य ब्रह्मविचारादिप्रवृत्तौ दृष्टहेतुत्वमन्वयेनान्वाचष्टे— **तेष्विति**। तत्रैव व्यतिरेकमाह— **नेति**। कथंचित्कुतूहलितया ब्रह्मजिज्ञासायां प्रवृत्तस्यापि फलपर्यन्तज्ञानानुदयाद् व्यतिरेकसिद्धिः। अन्वयव्यतिरेकसिद्धमर्थमुपजीव्याथशब्दव्याख्यामुपसंहरति— **तस्मादिति**। अथशब्दादानन्तर्यमात्रं शक्त्या दृष्टोऽर्थः। साधनचतुष्टयस्य ब्रह्मजिज्ञासादिप्रवृत्तौ दृष्टहेतुत्वेन जिज्ञासासामग्रीत्वं तेन द्योत्योऽर्थ इति भेदः।

१. संन्यास इत्यर्थः। २. यद्यपि मुमुक्षामात्रमधिकारिविशेषणं वक्तुमुचितम्, तथापि मुमुक्षामात्रस्य सर्वसाधारणत्वेनोत्कटमुमुक्षाया एवाधिकारिविशेषणत्वेन वक्तव्यत्वात् तस्याश्चोक्तविवेकादिक्रमेणैव लभ्यत्वात्, श्रवणविधिसमभिव्याहृतश्रुतिषु चतुर्णामप्युपलब्धेश्च तच्चतुष्टयानन्तर्योक्तिरिति ध्येयम्।

अतःशब्दो हेत्वर्थः। यस्माद् वेद एवाग्निहोत्रादीनां श्रेयःसाधनानामनित्यफलतां दर्शयति— 'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते' (छा. ८।१।६) इत्यादिः। तथा

प्रकटार्थविवरणम्

इदानीमतःशब्दार्थमाह— **अतःशब्दो हेत्वर्थ इति**। अस्यायमर्थः— अथेति मुमुक्षुत्वानन्तरं ब्रह्मजिज्ञासा कर्तव्येति प्रवृत्तिसिद्ध्येऽनुवादपरिहाराय च कर्तव्यपदाध्याहारेण तावदन्वयः। तत्र ब्रह्मजिज्ञासैव मुमुक्षुणा किमिति कर्तव्या, आवृत्त्या कर्म कस्मान्न क्रियत इति हेत्वाकाङ्क्षायामाह[१]— अतो लोकवेदप्रसिद्धाद्धेतोरिति। तमेव हेतुं स्फुटयति— **यस्मादित्यादिना**।

यदत्र **भास्करेण** रुरुदे— "अतःशब्दो वृत्तस्यापदेशको हेत्वर्थतया" इति। तदपरेणाविश्वक्रे। कथम्? "अतःशब्देन [इदंशब्देन] प्रकृतिभूतेनासन्निहिततयाऽनभिहितस्य कर्मज्ञानफलयोः क्षयाभि [क्षयाक्षयाभि] धानस्य कथमिव पञ्चम्या हेतुत्वमभिधीयते" इति। तदुभयोरभिधानानभिज्ञत्वं विभावयति। यतः सर्वनाम स्वमहिम्ना प्रसिद्धमात्राभिधायकम्; कारणान्तरात्तु [२]सन्निहिताद्यवलम्बते। कथमन्यथा सर्वज्ञः सूत्रकारोऽस्येत्यसूसुचत् प्रपञ्चति च यत् [प्रपञ्चम्।] किञ्च पूर्ववृत्तस्य हेतुत्वाभिधाने पौनरुक्त्यं स्यात्, आनन्तर्याभिधानेन हेतुत्वे तात्पर्यात्, अन्यथा वैयर्थ्यात् अथशब्दस्य। अतो लोकवेदप्रसिद्धः कर्मसाध्यस्य क्षयिष्णुत्वादिति हेतुः सूत्रित इति समञ्जसम्।

भाष्यभावप्रकाशिका

क्रमप्राप्तमतश्शब्दं व्याचष्टे— **अतश्शब्द इति**। यद्यप्यथशब्देनानन्तर्याभिधानमुखेन पूर्वनिर्वृत्तं पुष्कलकारणं तात्पर्यतः प्रतिपादितम्; तथाऽपि तस्यैव हेत्वन्तरेणापवादशङ्कायां तन्निराकरणेन हेतुत्वं पुनरथशब्दोक्तहेत्वभिधायिनाऽतःशब्देन स्थाप्यते।

तथाहि— नित्यानित्यवस्तुविवेको न सम्भवति; कृतकत्व-परिच्छिन्नत्वादीनामनित्यत्वसाधकतया विवक्षितानां पाकजरूप-परमाण्वादिष्वनैकान्तिकत्वेनानित्यत्वानुमापनायोगात्, "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इत्यादिश्रुतिविरोधेन कालात्ययापदिष्टत्वाच्च। अत एवेहामुत्रार्थभोगविरागानुपपत्तेः शम-दमाद्यसंभवाद् मोक्षे चार्थितानुपपत्तिरित्याशङ्कायां तन्निराकरणेन साधनचतुष्टयमुपपाद्य तस्य हेतुत्वं प्रतिपादयत्यतःशब्दः। ततो न पौनरुक्त्यमिति भावः। कथं तर्हि तन्निराकरणम्? इति शङ्कायामतःशब्दस्य हेतुरूपमर्थमाह— **यस्माद्वेद एवेति**। यद्यपि पुण्यस्याक्षय्यफलत्वमपि श्रुतम्; तथाऽपि वस्तुबल-प्रवृत्तानुमानविरोधेऽन्यपरस्य वाक्यस्य तत्र प्रामाण्यायोगात्, परमाण्वादीनां च नित्यत्वासंप्रतिपत्तेः, कृतकत्वादिहेतोः कालात्ययापदिष्टत्वव्यभिचारित्वयोरभावान्नित्यानित्यवस्तुविवेकोपपत्तेः, अत एवेतरसाधनानामपि संभवाद् हेतुत्वमुपपन्नमिति

न्यायनिर्णयः

क्रमप्राप्तमतःशब्दं व्याकरोति— **अतःशब्द इति**। अथशब्देन हेतोरुक्तत्वादतःशब्देनापि तस्यैवोक्तौ पुनरुक्तिरित्याशङ्क्य हेतुरूपमर्थमेवाह— **यस्मादिति**। तस्मादित्युत्तरेण सम्बन्धः। अस्यार्थः— अथशब्देनानन्तर्योक्तिद्वारा पूर्वनिर्वृत्ते ब्रह्मजिज्ञासा-पुष्कलहेतुचतुष्टये विवक्षितेऽपि तदपवादे शङ्किते तन्निरासेन तद्धेतुत्वमतःशब्देनाथशब्दोक्तहेतुवाचिना व्यवस्थाप्यते। तथाहि— कृतकत्वादेर्ध्वंसादौ व्यभिचारात्, 'अक्षय्यम्' इत्यादिश्रुत्या च विरोधात् अनित्यत्वासाधकत्वात्, अकृतकत्वस्य प्रागभावे व्यभिचारात् नित्यत्वाहेतुत्वात्, भावत्वविशेषणे चाण्वादौ भावात् आत्ममात्रनित्यत्वासिद्धेः, अपरिच्छिन्नत्वस्य प्रतिदेहं भिन्नेष्वात्मस्वभावात्, विभुत्वविवक्षायामाकाशादिषु भावात्, उक्तदोषान्नित्यानित्यविवेकायोगात्, वैराग्यादेरपि तदभावेऽभावात्, विशिष्टाधिकार्यभावात्, अनारम्भः शास्त्रस्येत्याशङ्क्य तन्निरासेन हेतुचतुष्टयमुपपाद्य तद्धेतुत्वमतःशब्दः साधयति। न हि ध्वंसादौ नित्यत्वं, प्रागभावादावकृतकत्वम्, आत्मनो वा परिच्छिन्नत्वम्; 'यावद्विकारं तु विभागः' इति न्यायात्। पुण्यस्याक्षय्यफलत्वश्रुतिस्तु वस्तुबलप्रवृत्तानुमानानुगृहीतश्रुतिविरोधे न स्वार्थे मानम्। अतो विवेकद्वारा वैराग्यादिभावात्, विशिष्टाधिकारिलाभादारभ्यं शास्त्रमिति। आदिशब्दात् 'अतोऽन्यदार्तम्' इत्यादिवाक्यं गृह्यते। मुमुक्षुत्वस्य हेत्वन्तरमाह—

---

१. अथशब्दोक्तविवेकाद्यसम्भवशङ्कानिरासेन तद्धेतुत्वप्रतिष्ठापनार्थतया 'अतः' इति पदं व्याख्यातं भामत्यां, विवरणे च। प्रकटार्थकृतस्तु साधनचतुष्टयसम्पन्नस्य ब्रह्मजिज्ञासायां पाक्षिकाप्रवृत्तिनिरासकतया सूत्रस्थातःपदं व्याख्यान्ति। 'अथशब्देन विवेकादित्रयानन्तर्यमुच्यते। अत इत्यत्रेदमा मुमुक्षा परामृश्यते। ल्यब्लोपे पञ्चमी। मुमुक्षां प्राप्येत्यर्थः' इति वेदान्तसूत्रमुक्तावल्यामुक्तम्।

२. अत्र संनिहितत्वमपि ब्रह्मपदेनोपपादितं भामत्याम्। पृ. ७४।

ब्रह्मविज्ञानादपि परं पुरुषार्थं दर्शयति– 'ब्रह्मविदाप्नोति परम्' (तै. २।१) इत्यादिः। तस्माद् यथोक्त-साधनसंपत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्या।

ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा। ब्रह्म च वक्ष्यमाणलक्षणं 'जन्माद्यस्य यतः' इति। अत एव न

प्रकटार्थविवरणम्

यच्चावादि "तद्यथेह कर्मजितः" इति केवलकर्मणः क्षयिष्णुत्वमुच्यते, न ज्ञानसहकारिणः; "स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते" इति श्रुतेरिति, तत्र कर्मण[1] एवाक्षयत्वं श्रूयते, न तु ज्ञानसहितकर्मसाध्यस्य। तद्विषय [यत्व] कल्पना तु न्यायानुगृहीतश्रुतिविरुद्धा। किञ्चोपासनेन चित्तैकाग्र्ये सति साक्षात्कारोदयादक्षयाविद्यानिवृत्तिफलसम्भवादुपासनाख्य-कर्मस्तुतिरुपपद्यते। यच्चानेवंविदः कर्मक्षयश्रवणादेवंविदाऽनुष्ठितं कर्माक्षयफलमिति कल्पनम्, तल्लिङ्गं साक्षाच्छ्रुतिविरोधे बाध्यते। तस्मान्मुमुक्षुणा ब्रह्मात्मत्वज्ञानायैव प्रयतितव्यमित्याह— **तस्मादिति**।

अथातःशब्दौ व्याख्यायोत्तरस्य विग्रहमाह— **ब्रह्मण इति**। तर्हि किं तद् ब्रह्म यस्य जिज्ञासेत्यत आह— **ब्रह्मेति**। यतो ब्रह्मजिज्ञासां प्रतिज्ञाय स्वयमाचार्यो ब्रह्मलक्षणं वक्ष्यति, अत एव[2]— ब्रह्महत्येति जातिवचनो ब्रह्मशब्दो दृष्टः, तथा ब्रह्मोज्झमिति

भाष्यभावप्रकाशिका

भावः। मुमुक्षुत्वस्योपपत्त्यन्तरमाह— **तथा ब्रह्मविज्ञानादपीति**। **परमपुरुषार्थमिति**। निरस्तसमस्तदुःखं निरतिशयानन्दं नित्यमित्यर्थः। उपसंहरति— **तस्मादिति**। परिपूर्णो हेतुरवश्यं कार्यमुत्पादयतीति भावः।

ब्रह्मजिज्ञासेतिपदस्य समासं दर्शयति— **ब्रह्मण इति**। अवयवार्थभूतेच्छायाः कर्मप्रयोजनयोरैक्यात् कर्मणश्च स्वरूपसिद्धिहेतुतया प्राधान्यात्, न तु चतुर्थीसमासः; विचारप्राधान्ये तु धर्मजिज्ञासेत्यादौ कर्म-प्रयोजनभेदात् चतुर्थीसमासोऽपि स्यात्। अतो ज्ञातुमिच्छा जिज्ञासेत्यवयवार्थाङ्गीकारे षष्ठीसमासो युक्त इति भावः। अथवा "तादर्थ्यसमासे प्रकृति-विकृतिग्रहणं कर्तव्य"मिति कात्यायनीयवचनेन यूपदार्वादिष्वेव प्रकृति-विकारभूतेषु चतुर्थीसमासनियमात्, इह च तथाभावाभावात्, षष्ठीसमासेऽपि ब्रह्मणः प्राधान्योपपत्तेर्न वृत्त्यन्तराभिमतचतुर्थीसमास इति भावः।

ननु किं तद् ब्रह्म, यद् जिज्ञासायाः प्रयोजनतयैकत्वेन च विवक्ष्यत इति? अत आह— **ब्रह्मेति**। एवं च सति यत् अन्यैर्वार्तिककारैर्जाति-जीव-कमलासन-शब्दराशिविषयत्वं ब्रह्मशब्दस्याशङ्क्य(ते, तत्) तेषां (ब्रह्म)जिज्ञासां प्रति कर्तृत्वेन कर्मत्वेन वा प्रतिपादनायोगाद् न तदर्थतेति निराकृतं [तत्] न युक्तमित्याह— **अत एवेति**। वृत्त्यन्तरे शेषलक्षणा षष्ठी व्याख्याता,

न्यायनिर्णयः

तथेति। यथा कर्मणामनित्यफलत्वं वेदो दर्शयति तथेति यावत्। परमपुरुषार्थं निरस्तसमस्तदुःखं निरतिशयानन्दमित्यर्थः। अत्राप्यादिशब्देन 'तरति शोकमात्मवित्' इत्याद्युच्यते। हेतुचतुष्टयस्य ब्रह्मजिज्ञासासामग्रीत्वे स्थिते परिपूर्णो हेतुरवश्यं कार्यमुत्पादयतीति फलितमुपसंहरति— **तस्मादिति**।

अथातःपदे व्याख्याय ब्रह्मजिज्ञासापदस्य **वृत्तिकाराभीष्टचतुर्थीसमासनिरासेन** षष्ठीसमासमाह— **ब्रह्मण इति**। अवयवार्थस्येच्छायाः कर्मप्रयोजनयोरैक्यात् कर्मणः स्वरूपसाधकत्वेन प्राधान्यात् कर्मणिषष्ठीसमासः। तादर्थ्यसमासे प्रकृतिविकृतिग्रहणस्य कर्तव्यत्वात्, तथाभूतयूपदार्वादौ तद्दृष्टेः, अश्वघासादौ षष्ठीसमासाङ्गीकारात्। न च धर्माय जिज्ञासेतिवदिहापीति वाच्यम्। षष्ठीसमासस्यैव तत्रापीष्टत्वात्। उक्तं हि— 'सा हि तस्य ज्ञातुमिच्छा' इति। न चात्र प्रकृतिविकृतित्वम्। षष्ठीसमासेऽपि ब्रह्मप्राधान्यमार्थिकम्। तस्मादवयवार्थे षष्ठीसमासो युक्त इति भावः। किं तद् ब्रह्म यत् कर्मत्वेन फलत्वेन च जिज्ञासाया विवक्षितं; तदाह— **ब्रह्मेति**। यतो ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मलक्षणं वक्ष्यत्यतो **वृत्तिकारप्रयासो** वृथेत्याह— **अत एवेति**। आदिशब्देन जीवकमलासनशब्दराशीनां ग्रहणम्। **वृत्त्यन्तरे** शेषे षष्ठी व्याख्याता; तत्राह— **ब्रह्मण**

१. कर्मण एवाभावात् 'न क्षीयत' इति नित्यानुवाद इति बृहदारण्यकोपनिषद्भाष्ये उक्तम्। पृ. १०९ २. अत एव नाशङ्कनीयमित्यन्वयः।

ब्रह्मशब्दस्य जात्याद्यर्थान्तरमाशङ्कितव्यम्। ब्रह्मण इति कर्मणि षष्ठी, न शेषे, जिज्ञास्यापेक्षत्वाज्जिज्ञासायाः, जिज्ञास्यान्तरानिर्देशाच्च।

ननु शेषषष्ठीपरिग्रहेऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते, सम्बन्धसामान्यस्य विशेषनिष्ठत्वात्। एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्वमुत्सृज्य सामान्यद्वारेण परोक्षं कर्मत्वं कल्पयतो व्यर्थः

प्रकटार्थविवरणम्

वेदवचनः, "यो ब्रह्माणं विदधाति पूर्वम्" इति हिरण्यगर्भवचनः, तथेहापि स्यादिति नाशङ्कनीयमित्यर्थः। प्रातिपदिकार्थाभिधानमुपेक्ष्य विभक्त्यर्थमाह— **ब्रह्मण इतीति**। जिज्ञासा तावद् ज्ञानमपेक्षते। ज्ञानं च ज्ञेयापेक्षम्। ज्ञेयान्तरं च न निर्दिष्टम्। ततो ब्रह्मस्वरूपविषयेयं जिज्ञासेत्यर्थः। शेष इति संबन्धसामान्यमुच्यते। सामान्यं च विशेषापेक्षं भवति। जिज्ञासया च 'ब्रह्मणोऽन्यस्य स्वस्वाम्यादिसम्बन्धविशेषस्यासम्भवाद्विषयत्वेनैव सम्बन्धो भविष्यतीत्याह— **ननु शेषेति**। "कर्तृ-कर्मणोः कृति" इति कृदन्तप्रयोगेऽपि विशेषविधानात्साक्षात्प्रतीतं कर्मत्वं विहाय संबन्धसामान्यबलेन कर्मत्वकल्पनं व्यर्थमित्याह— **एवमपीति**। कर्मणि षष्ठीपरिग्रहे ब्रह्मस्वरूपविचार एवैकः प्रतिज्ञातः स्यात्, न प्रमाणयुक्तिसाधनफलानाम्; शेषषष्ठीपरिग्रहे तु

भाष्यभावप्रकाशिका

तन्निरासायाऽऽह— **ब्रह्मण इति**। तत्र हेतुमाह— **जिज्ञास्यापेक्षत्वादिति**। इच्छायाः प्रतिपत्त्यनुबन्धो ज्ञानम्, ज्ञानस्य च ज्ञेयं ब्रह्म, ज्ञेयं विना ज्ञानस्यानिरूपणात्, ज्ञानं विना च जिज्ञासाया अनिरूपणात्। अतः प्रतिपत्त्यनुबन्धत्वात् प्रथमं जिज्ञासा कर्मैवापेक्षते, न सम्बन्धिमात्रम्? तेन कर्मणि षष्ठीत्यर्थः। ननु— जिज्ञासायाः जिज्ञास्यमन्तरेणानुपपन्ननिरूपणत्वेऽपि जिज्ञास्यान्तरं भविष्यति, ब्रह्म तु शेषितया सम्बध्यतामित्यत्राह—**जिज्ञास्यान्तरेति**। शेषषष्ठीवादी निगूढाशयश्चोदयति— **ननु शेषषष्ठीति**। यद्यपि "षष्ठी शेषे"इति सम्बन्धमात्रे षष्ठी; तथाऽपि व्यवहारस्य व्यवहार्यविशेषालम्बनत्वात् सकर्मिकायां क्रियायां कर्मकारकस्याभ्यर्हितत्वात् कर्मत्वं ब्रह्मणो न विरुध्यते। तेन जिज्ञासायाः निरूपणमप्युपपद्यत इत्यर्थः। एवमपि साधारणशब्देऽभिप्रेतमर्थं विहायार्थान्तरं परिगृह्य पुनस्तद्द्वारेणाभिप्रेतमर्थं प्रतिपद्यमानस्य व्यर्थः प्रयासः स्यादिति परिहरति—

न्यायनिर्णयः

इतीति। जिज्ञासापदस्याकारप्रत्ययान्तत्वेन कृद्योगात् 'कर्तृकर्मणोः कृति' इतिसूत्रात् कर्मण्येषा षष्ठी। न च 'कर्मणि च' इति सूत्रे षष्ठ्याः समासनिषेधात् ब्रह्मजिज्ञासेति समासासिद्धिः, 'उभयप्राप्तौ कर्मणि' इति सूत्राद् या षष्ठी कर्तृकर्मणोरुभयोरपि सामर्थ्यादुपादानप्राप्तौ कर्मण्येवेति नियमिता, तस्या एव समासनिषेधात्। यथाह— 'उभयप्राप्तौ कर्मणि' इत्यस्याः षष्ठ्या इदं ग्रहणमिति। प्रकृते नोभयप्राप्तिः, ब्रह्मणः कर्मत्वस्यैवेष्टत्वात्, कर्तृस्थातिशयस्याविवक्षितत्वात्। तस्मात् 'कर्तृकर्मणोः कृति' इत्येवात्र षष्ठीति ब्रह्मजिज्ञासेति समाससिद्धिरिति भावः। परपक्षनिषेधमुक्त्वा हेतुमाह— **नेत्यादिना**। कर्मादिभ्योऽन्यः प्रातिपदिकार्थातिरिक्तः स्वस्वामिसम्बन्धादिः शेषः। तत्र नैषा षष्ठी, किंतु कर्मण्येव; जिज्ञासाया जिज्ञास्यापेक्षत्वात्। ज्ञानं हीच्छायाः प्रतिपत्त्यनुबन्धः; तदभावे जिज्ञासाऽनिरूपणात्। ज्ञानस्य ज्ञेयं ब्रह्म; तद्विना ज्ञानायोगात्। अतः प्रतिपत्त्यनुबन्धत्वात् आदौ जिज्ञासा कर्मैवापेक्षते, न सम्बन्धमात्रम्। तेनैषा कर्मण्येव षष्ठीत्यर्थः। जिज्ञासाया जिज्ञास्यापेक्षित्वेऽपि प्रमाणादि जिज्ञास्यमस्तु, ब्रह्म तु शेषितया सम्बध्यतामित्याशङ्क्याह— **जिज्ञास्यान्तरेति**। श्रुतकर्मलाभे नाश्रुतकल्पनेति भावः। प्रमाणादिप्रतिज्ञानां श्रौतत्वमभिप्रेत्य शङ्कते— **नन्विति**। 'षष्ठी शेषे' इति सम्बन्धमात्रे तद्विधानेऽपि व्यवहारस्य विशेषनिष्ठत्वात्, सकर्मकक्रियायां कर्मणोऽन्तरङ्गत्वात्, ब्रह्मणा कर्मणा जिज्ञासानिरूपणं सिध्यतीत्यर्थः। एकस्यापि प्रधानस्य श्रौतत्वं, न बहूनामपि गुणानामिति समाधत्ते— **एवमपीति**। प्रत्यक्षं शब्दवाच्यं, प्रथमापेक्षितं वा। परोक्षमार्थिकं, जघन्यं वा। शेषषष्ठीवादी स्वाभिप्रायमाह—

---

१. ब्रह्मण इत्यस्य सम्बन्ध इत्यनेनान्वयः।

प्रयासः स्यात्। न व्यर्थः, ब्रह्माश्रिताशेषविचारप्रतिज्ञानार्थत्वादिति चेन्न, प्रधानपरिग्रहे तदपेक्षितानामर्थाक्षिप्तत्वात्। ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात् प्रधानम्। तस्मिन् प्रधाने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति तान्यर्थाक्षिप्तान्येवेति न पृथक् सूत्रयितव्यानि। यथा राजाऽसौ गच्छतीत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति, तद्वत्। श्रुत्यनुगमाच्च। 'यतो वा इमानि भूतानि जायन्ते' (तै. ३।१) इत्याद्याः श्रुतयः, 'तद्विजिज्ञासस्व। तद् ब्रह्म' इति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं दर्शयन्ति। तच्च कर्मणि षष्ठीपरिग्रहे सूत्रेणानुगतं भवति। तस्माद् ब्रह्मण इति कर्मणि षष्ठी।

ज्ञातुमिच्छा जिज्ञासा। अवगतिपर्यन्तं ज्ञानं सन्वाच्याया इच्छायाः कर्म, फलविषयत्वादिच्छायाः।

प्रकटार्थविवरणम्

सर्वोऽपि ब्रह्मसम्बन्धिनी जिज्ञासा सूत्रिता भवतीति न मामकीनः प्रयासो व्यर्थ इत्याह— **न व्यर्थ इति**। अप्रधानविचारं मुखतः प्रतिज्ञाय प्रधानस्याऽऽक्षेपकल्पनात् वरं प्रधानविचारं मुखतः प्रतिज्ञाय तदपेक्षितानामर्थाक्षेपकल्पनम्, ततो नायं लाभ इत्याह— **न प्रधानेति**। नन्विष्यमाणं ज्ञानम्, न ब्रह्म; ततः कथं प्रधानब्रह्मविचारपरिग्रहे प्रमाणादीनामर्थाक्षिप्तत्वमित्याशङ्क्याह— **ब्रह्म हीति**। श्रुत्यनुसाराच्च कर्मणिषष्ठीपरिग्रहो युक्त इत्याह— **श्रुत्यनुसाराच्चेति**।

जिज्ञासाशब्दस्यावयवार्थमाह— **ज्ञातुमिति**। ननु किमिदं ज्ञानं नाम? संविज्जनकः प्रमातृव्यापारः फललिङ्गानुमेय इति **भाट्टा**

भाष्यभावप्रकाशिका

एवमपीति। प्रत्यक्षं वाच्यम्, परोक्षमार्थिकम्। अथवा प्रत्यक्षं प्रथमापेक्षाजं, परोक्षमन्त्यम्। इदानीं शेषवादी स्वाभिप्रायमाह— **ब्रह्माश्रितेति**। शेषषष्ठीपरिग्रहे सामान्येन यत्किंचिद् ब्रह्मसम्बन्धि प्रमाण-युक्तिसाधनादि, येन येन जिज्ञासितेन विना ब्रह्म जिज्ञासितं न भवति, तत् सर्वं जिज्ञास्यत्वेन प्रतिज्ञातं स्यात्। प्रतिज्ञातव्यं चैतत्; अप्रतिज्ञातस्याविचार्यत्वात्, अतो न विशिष्ट एव सम्बन्धी विवक्ष्यते; सामान्ये तस्यानन्तर्भावादिति भावः। सिद्धान्ती स्वाभिसन्धिमुद्घाटयति— **प्रधानेति**। तदेव प्रपञ्चयति— **ब्रह्म हीति**। अप्रधानविचाराणां मुख्यया वृत्त्या शब्देनोपादानम्, प्रधानविचारस्य चार्थाक्षेपकल्पनं न युक्तिमिति भावः। प्रतिपादके वाक्ये ब्रह्मणः कर्मकारकत्वनिर्देशात् सूत्रस्य च तदेकार्थत्वात् सूत्रेऽपि ब्रह्मणः कर्मत्वमेव ग्राह्यमित्याह— **श्रुत्यनुगमादिति**। तदेव दर्शयति— **यतो वेति**।

जिज्ञासापदस्यार्थं कथयति—**ज्ञातुमिति**। ततश्चेच्छायाः फलविषयत्वाद् ज्ञानस्यावगतिः फलपर्यन्ता सूत्रिता भवतीत्याह—

न्यायनिर्णयः

नेत्यादिना। शेषषष्ठीपक्षे सामान्येन यत्किंचिद् ब्रह्मयोगि मानयुक्त्यादि तत्सर्वं जिज्ञास्यत्वेनोक्तं स्यात्, प्रतिज्ञातव्यं चैतत्, अन्यथा विचार्यत्वायोगात्, अतः सम्बन्धमात्रमेवात्रेष्टम्। सामान्ये विशेषान्तर्भावादित्यर्थः। सिद्धान्ती स्वाभिसंधिमाह— **न, प्रधानेति**। मानादीनामपि स्वविचारेषु तुल्यं प्राधान्यं; नेत्याह— **ब्रह्मेति**। तथापि ब्रह्मोपास्यमित्युक्ते मानाद्यजिज्ञासावत्प्रकृतेऽपीत्याशङ्क्याह— **तस्मिन्निति**। अप्रधानानां मुख्यवृत्त्या शब्दोपादानं प्रधानस्यार्थाक्षेपश्चोचितोक्तिसम्भवो नेति भावः। उक्तमर्थं दृष्टान्तेन स्फुटयति— **यथेति**। कर्मणि षष्ठीत्यत्र युक्त्यन्तरमाह— **श्रुतीति**। एतत्सूत्रमूलश्रुतौ ब्रह्मणः कर्मत्वदृष्टेः, सूत्रेऽपि षष्ठ्या तदेव ग्राह्यमिति भावः। कथं कूटस्थस्य ब्रह्मणः श्रुतौ कर्मत्वमुक्तं, तत्राह— **यत इति**। प्रत्यक्षमिति स्फुटत्वोक्तिः। अविद्याद्वारा तत्कर्मत्वश्रुतिरिति भावः। श्रौतेऽपि कर्मत्वे ब्रह्मणः सौत्रं शेषत्वमेव किं न स्यात्? तत्राह— **तच्चेति**। न हि श्रुतिसूत्रयोर्मूलमूलिनोर्विप्रतिपत्तिर्युक्तेति भावः। षष्ठ्यर्थमुपसंहरति— **तस्मादिति**।

जिज्ञासापदस्यावयवार्थमाह— **ज्ञातुमिति**। ब्रह्मणि ज्ञाते तज्ज्ञानस्याप्तत्वात् तदिच्छाऽयोगात्, अज्ञाते विशेषणाज्ञानात्

प्रकटार्थविवरणम्

बम्भणन्ति। तत्र फलं [लत्वं] नाम साधनत्वम् [साध्यत्वम्]; तन्न कर्तृव्यापारानुमापकं[1] कर्तृव्यापार एव व्यभिचारात्। कर्तृव्यापारव्याप्यत्वं चेत्फलत्वं साध्यसिद्धवत्कारः। क्रियान्यत्वे सति साध्यत्वं चेत् अङ्कुरादौ व्यभिचारः। यतश्च व्यापारजन्म तत एव संविज्जन्मसंभवात् विपक्षबाधकाभावात् अप्रयोजकता वाच्या। **नैयायिकवैशेषिकप्राभाकराणां** तु आत्मसमवायी विषयप्रकाशो ज्ञानं संवेदनं गुणभूतं प्रत्यक्षमेव; तदा घटोऽपरोक्ष इति घटसामानाधिकरण्यमापरोक्ष्यं [क्ष्यस्य] न स्यात्। ननु ज्ञानस्य तदाकारत्वात्तदुपपत्तिः; न तावद्विषय एवाकारो ज्ञानस्य, प्रकाशाप्रकाशयोरैक्यायोगात्; नापि विषयवत्[2], मूर्तत्वाद्यनिष्टधर्मप्रसङ्गात्; नापि तद्व्यापकत्वं प्रदीपवत् असंसर्गात्; न ज्ञाने प्रतिबिम्बितत्वं मूर्तस्य मूर्ते [अमूर्ते] प्रतिबिम्बादर्शनात्, देहादिव्यवधानाच्च; तस्मादाकारानिरूपणात् न ज्ञानाकारतयाऽपरोक्षव्यवहारो विषये भ्रान्त्या, ज्ञानेऽपि प्रसङ्गात्। न च तत्र जातिसमवायात्, मैत्रस्यापरोक्षज्ञाने चैत्रस्यापरोक्ष्यासंभव[3]प्रसङ्गात्; नेन्द्रियजन्यतया, परेषामीश्वरज्ञानस्य, सौषुप्तस्य चापरोक्ष्यासंभवप्रसङ्गात्; तस्मात् स्वतोऽपरोक्षचित्संभेदादेव ज्ञानार्थयोरापरोक्ष्यमास्थेयम्; ततो ज्ञानवद्विषयस्यापरोक्ष्यासंभवप्रसङ्गात् नात्मगतैव संवित्; गुणत्वे च न स्वाश्रयोपाधौ जन्म, सवित्रादौ प्रकाशगुणस्य [4]स्वाश्रयोपाधौ जन्मादर्शनात्; न च ज्ञानान्तरेण प्रत्यक्षता। तथा हि— संवित् स्वावान्तरजातीयाप्रकाश्या प्रकाशकत्वात् प्रदीपवत्। अथवा संवित् स्वप्रकाशा संवित्त्वात्, विपक्षबाधके सत्यपरोक्षत्वाद्वा; न यदेवं न तदेवं यथा वस्त्रम्; विपक्षबाधकश्च घटावच्छिन्नवर्तमानसंविदोऽस्फुरणप्रसङ्गात् पूर्वसंयोगे [संवेदन] निवृत्तेः भावे वा युगपदनन्तसंवित्प्रसङ्गः। संवित्समवाय्यात्ममनःसंयोगो हि संविदः सामग्री; सा चान्यत्राप्यविशिष्टा इति। "संवेदनं क्रियारूपमेव ज्ञानम्" इति **भास्करो** रोरवीति। तदप्यसङ्गतम्। निरवयवस्यात्मनः क्रियाऽयोगात्, प्रथमपरिणाम एव कृत्स्नस्योपयोगाद् द्वितीयकार्याभावप्रसङ्गाच्च। परिशेषात् मनःपरिणामः संविद्व्यञ्जको ज्ञानम्। "धीर्ह्रीर्भीरित्येतत्सर्वं मन एव" इति च श्रुतिः धीशब्दवाच्यज्ञानपरिणामवन्मनोऽन्वाह। संवेदनं च विषयावच्छिन्नं चैतन्यमेव। तथा हि— प्रकाशनशक्तिमत् सत्त्वप्रधानं मनः अदृष्टादिसहकृतं दीर्घप्रभाकारेण स्वकर्मदेशं सरीसर्ति। तत्संसृष्टे विषये चैतन्यं प्रतिबिम्बिते[म्बते] तद्विषयसंवेदनम्; तच्च व्यञ्जकोदयव्ययाभ्यामुदयव्ययवद्भिन्नं च चकास्ति। स्वरूपेण च प्रतिबिम्बं बिम्बमेवेत्यात्मैक्याभिधानं नानुपपन्नम्। तस्मात्— 'क्षणिकमिदं रूप्यादिज्ञानम्; नित्यमात्मचैतन्यम्; कथं नित्यानित्ययोरैक्यम्'— इत्यादि पररहस्यानध्यवसायविलसितमेव। अनुमानादौ चोपलब्धसंबन्धार्थाकारेण परिणतं मनोऽनवभासव्यावृत्तिमात्रफलम्, न तु संविद्व्यञ्जकम्, लिङ्गादिसंविद्व्यवधानप्रतिबन्धादित्यलम्।

ननु भवत्वेवं ज्ञानसंविद्विभागः, तथापि प्रतिपन्ने ब्रह्मणि न ज्ञानेच्छा, सिद्धत्वाद् ज्ञानस्य; नाप्यप्रतिपन्ने, अनवगतविषयेच्छाऽयोगात् इत्याशङ्क्याह— **अवगतिपर्यन्तमिति**। आचार्येण 'त्वं ब्रह्मासि' इत्युपदिष्टे 'अहं ब्रह्मास्मीत्याचार्यो मामुपदिदेश, न ममावगतिरायाति' इति पारोक्ष्यमेव मन्यते। ततोऽसाववगतिपर्यन्तं ज्ञानमिच्छति, सुखसाक्षात्कारतयाऽवगतेः फलत्वात्। तं च जिज्ञासुं पुरुषमुद्दिश्य श्रवणादीनि साधनानि विधीयन्ते। तैश्च श्रवणादिभिः प्रमाणप्रमेयचित्तगतसकलदोषाणां पारोक्ष्यभ्रमकारणानां निरासे कदाचिदनुस्मर्यमाणशब्दादेवावगतिफलकं ज्ञानमुपजायते; चित्रायागवत्[5] श्रवणादीनामनियतफलत्वादिति भावः। यदापि वस्तुनोऽपरोक्षत्वात् प्रथममपरोक्षमेव ज्ञानमुत्पद्यते तदाप्यापातज्ञानस्य संशयशिरस्कत्वात्

भाष्यभावप्रकाशिका

अवगतिपर्यन्तमिति। अत एव ब्रह्मण्यवगते तज्ज्ञानस्य प्राप्तत्वादेव तदिच्छानुपपत्तेः, अनवगते च विशेषणापरिज्ञानात् तद्विशेषितज्ञाने वाञ्छानुपपत्तेर्जिज्ञासा नोत्पद्यत इति शङ्का निराकरणीयेति भावः। अवगतिरिति साक्षादनुभव उच्यते। ज्ञानमेवावगतिः, तत्

---

१. विमतं कर्तृव्यापारपूर्वकं फलत्वात्, ग्रामप्राप्तिवदिति प्रयोगः। व्यापारश्चात्र परिणामपरिस्पन्दान्यतरो बोध्यः। भाट्टमते चात्मनः ज्ञानरूपपरिणामाङ्गीकारात् न बाधः। द्र. न्यायरत्नावली पृ. ४९।

२. विषयवदिति। आकार इति शेषः। ३. 'पारोक्ष्यासंभव' इति पाठः स्यात्। ४. स्वाश्रयरूपे उपाधौ इत्यर्थः।

५. व्यक्तीभविष्यति चेदमैहिकाधिकरणे। ब्र. सू. ३-४-५१।

ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म। ब्रह्मावगतिर्हि पुरुषार्थः, निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात्। तस्माद् ब्रह्म जिज्ञासितव्यम्।

तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात्। यदि प्रसिद्धं न जिज्ञासितव्यम्। अथाप्रसिद्धं नैव शक्यं

प्रकटार्थविवरणम्

अन्यत्प्रमाणज्ञानमेष्टव्यमित्याह— **ज्ञानेन हीति**। किमिति साक्षात्कर्तुमिष्टं ब्रह्मेत्यत आह— **ब्रह्मावगतिर्हीति**। जीवगत-सकलसंसारस्य बीजं या जीवोपाधिरविद्या तदादेस्तत्कार्यस्य प्रमातृत्वप्रमुखस्यानर्थस्यावगत्या विनाशादवगतिः पुरुषार्थ इत्यर्थः। निश्शेषदुःखनिवृत्तिः, निरतिशयानन्दावाप्तिश्च परमपुरुषार्थः। दुःखप्राप्तिरानन्दाप्राप्तिश्च जीवस्याविद्याधीनैवेति अविद्यास्तमयः पुरुषार्थः। तत्साधनत्वादवगतिरपि पुरुषार्थः कथ्यत इति भावः। एवं सूत्रस्य पदानि व्याख्याय इष्यमाणज्ञानाविनाभूतं विचारं जिज्ञासापदलक्ष्यमुपादाय वाक्यार्थमाह— **तस्मादिति**। यस्माद् ब्रह्मज्ञानाधीनः परमः पुरुषार्थः तस्मात् मुमुक्षुणा ब्रह्मज्ञानाय विचारः कर्तव्य इत्यर्थः।

इदानीं प्रसिद्धाप्रसिद्धविकल्पेन ब्रह्मज्ञानविचारारम्भमाक्षिपति— **तत्पुनरिति**। यद्यन्यतः प्रतिपन्नं ब्रह्म तदा विचारो व्यर्थः; [१]निष्पादितक्रिये कर्मण्यविशेषाधायिनः साधनस्य साधनन्यायातिपातात्। अथान्यतोऽप्रतिपन्नम्, तदोद्देशनासंभवादशक्यो विचार

भाष्यभावप्रकाशिका

कथं भेदनिर्देशः? इति शङ्कां निराकुर्वन्नेतदेव प्रपञ्चयति— **ज्ञानेन हीत्यादिना**। ज्ञानावगतिशब्दाभ्यां साधन-फलयोरभिधानान्न दोष इति भावः। ननु ब्रह्मावगतेरपि सुखावाप्तिदुःखपरिहारतदुपायरूपताऽभावान्नेच्छागोचरत्वमित्यत आह— **ब्रह्मावगतिर्हीति**। उपसंहरति— **तस्माद् ब्रह्म जिज्ञासितव्यमिति**। ब्रह्मज्ञानकामेन ब्रह्म विचारयितव्यम्। इदं शास्त्रं श्रोतव्यमित्यर्थः।

इदानीं प्रकारान्तरेण प्रयोजन-विषय-सम्बन्धानाक्षिपति— **तत्पुनरित्यादिना**। प्रसिद्धमिति प्रतिपन्नमुच्यते। तद्यदि जिज्ञासातः प्रागेव केनचित् प्रतिपन्नम्, तदैतच्छास्त्राप्रतिपाद्यतया नास्य विषयः स्यात्, अतोऽनेन नियतमनवगमान्नास्य प्रयोजनमपि ब्रह्मावगतिः स्यात्, इति विषय-प्रयोजनयोराक्षेपः। **अथाप्रसिद्धमिति**। यत्र कदाचिदपि बुद्धौ समारूढविशेषम्, तस्य प्रतिपाद्यत्वासम्भवाच्छक्यप्रतिपाद्यतया शास्त्रेण सम्बन्धो न स्यात्; अप्रतिपाद्यत्वेन प्रयोजनमपि शास्त्रस्य तदवगतिर्न स्यादित्यर्थः। जिज्ञासायाः पूर्वं वेदान्तेभ्यः प्रसिद्धम्, अप्रसिद्धम् वा स्यादिति विकल्प्यत इति केचित्। "अविज्ञाते तत्त्वे

न्यायनिर्णयः

तज्ज्ञानेच्छाऽसिद्धेर्न जिज्ञासेत्याशङ्क्याह— **अवगतीति**। ज्ञानावगत्योरैक्यात्कथं भेदकथेत्याशङ्क्य हेतुफलभावेनेत्याह— **ज्ञानेनेति**। ब्रह्मावगतेरपीष्टानिष्टप्राप्तिहानितद्धेतुत्वाभावात् नेष्टत्वमित्याशङ्क्योक्तम्— **ब्रह्मेति**। पुमर्थत्वे तस्या हेतुं हिशब्दसूचितं विशदयति— **निःशेषेति**। समस्तसंसारबीजमनादिरविद्या तस्याः, तामादित्वेनादाय प्रवृत्तानर्थस्य च तस्यैव संसारस्योक्तावगत्या ध्वस्तेरिति यावत्। सूत्राक्षरव्याख्यामुपसंहरति— **तस्मादिति**। विशिष्टाधिकारिसत्त्वं तदर्थः। ब्रह्म ज्ञातुकामेन ब्रह्म विचारयितव्यम्। इदं शास्त्रं श्रोतव्यमित्यर्थः।इति तृतीयं वर्णकम्।

बन्धमिथ्यात्वेन सिद्धेऽपि विषयादौ विधान्तरेण तदाक्षिप्य समाधातुं वर्णकान्तरमवतारयन्नादावाक्षिपति— **तदिति**। प्रागेव जिज्ञासायास्तद् ब्रह्म कुतश्चिज्ज्ञातमज्ञातं वेति विकल्पार्थः। आद्ये शास्त्राप्रतिपाद्यतया नास्य ब्रह्म विषयः, अनन्यलभ्यत्वाभावात्। अतोऽनेनानवगमात् नास्य फलमपि तदवगतिरिति विषयाद्यसिद्धिरित्याह— **यदीति**। यत्र कदाचिदपि केनचिदाकारेण बुद्धावारोहति तस्य प्रतिपाद्यत्वेऽशक्यप्रतिपाद्यतया न शास्त्रेण सम्बन्धः, अप्रतिपाद्यत्वे तदवगतिर्न फलमपीति सम्बन्धाद्यसिद्ध्या द्वितीयं दूषयति— **अथेत्यादिना**। ब्रह्मणः सामान्यतो ज्ञातस्य विशेषतो विना विचारमज्ञानाद् विचारयोग्यतेति त्रितयमपि

१. निष्पादिता प्रमितिलक्षणा क्रिया यस्य तादृशे कर्मणि = विषये। (द्र. कल्पतरु. ७९) अविशेषाधायिनः = विशेषमनादधतः। साधनेति। नैष्फल्येनासाधनत्वादित्यर्थः।

जिज्ञासितुमिति। उच्यते– अस्ति तावद् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं, सर्वज्ञं, सर्वशक्तिसमन्वितम्। ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते, 'बृंहतेर्धातोरर्थानुगमात्। सर्वस्यात्मत्वाच्च

प्रकटार्थविवरणम्

इत्यर्थः। सामान्यतः प्रतिपन्नं विशेषतो विप्रतिपन्नं जिज्ञास्यं दृष्टम्; अन्यथा परस्याक्षेपरूपविचारानुपपत्तेः। ब्रह्मापि पदव्युत्पत्तिबलेनापातप्रतिपन्नं भवतीति तज्जिज्ञासोल्लसतीत्याह— **उच्यत इत्यादिना।** "बृह बृहि वृद्धौ" इति धातू महत्त्वे वर्तेते। तच्च सङ्कोचाभावे [चकाभावे] देशतः कालतो वस्तुतश्चापरिच्छिन्नत्वम्। तत्र कालतोऽनवच्छेदात् **नित्यम्;** वस्तुतोऽनवच्छेदाच्छुद्धम्; महत्वादेव बुद्धं मुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितं च, अन्यथा हि परिच्छिन्नतापातात्। एवं बृहत्त्वाद् ब्रह्मेति व्युत्पत्त्या बृहतेर्धातोरर्थानुसारादापातप्रतिपन्नं ब्रह्मेति विचारारम्भः संभाव्यत इति भावः। अत्र चान्यापोहेनोप-

भाष्यभावप्रकाशिका

कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः"इति न्यायसूत्रवचनात् सामान्यतः प्रतिपन्नस्य विशेषतोऽप्यापातदर्शनेन प्रतिपन्न-स्यानिर्णीतस्य वा निर्णयाय तर्क इत्यवगमाद् ब्रह्मणोऽप्यनिर्णीततया विशेषप्रतिभासागोचरत्वाद् विचारयोग्यत्वं युक्तमिति मन्वानः, त्रितयमपि समाधातुं प्रसिद्धत्वप्रदर्शनेन शक्यप्रतिपाद्यतया सम्बन्धं समर्थयते— **अस्ति तावदिति। अस्तीति।** प्रसिद्धमित्यर्थः। कीदृशं तदिति? तदाह— **नित्यशुद्धेति।** निरुपाधिकं ब्रह्मरूपमभिधाय सोपाधिकं रूपमाह— **सर्वज्ञं सर्वशक्तिसमन्वितमिति।**

ननु न ब्रह्म सामान्येनापि लोके प्रतिपन्नम्; प्रत्यक्षाद्यगोचरत्वात्, नाप्यागमवाक्यात्; वाक्ये प्रयुज्यमान-ब्रह्मशब्दस्यागृहीतसम्बन्धत्वात्। अत एव न पदमात्रादपि तत्सिद्धिः; जात्याद्यर्थान्तरेषु तस्य प्रसिद्धत्वादित्याशङ्क्य, श्रुति-सूत्रयोर्ब्रह्मशब्दप्रयोगोऽन्यथाऽनुपपद्यमानो निगमाद्यनुगृहीतः फलपर्यन्तवाक्यार्थान्वयिपदार्थाकाङ्क्षानुगृहीतस्य नियतपदार्थो-पादानहेतुतया विशिष्टे ब्रह्मणि सम्भावनाबुद्धिहेतुर्भवति, इति प्रसिद्धत्वं युक्तमित्याह— **ब्रह्मशब्दस्य हीति।** प्रकरणोपपदयोः सङ्कोचकयोरभावे वृद्धिकर्मणो बृहतेर्निरङ्कुशमहत्त्वबोधसामर्थ्याद् देशतः कालतो वस्तुतश्चानवच्छेदेन सिद्धो नित्यः; नित्यपदस्यावच्छेदत्रयशून्यतापरत्वात्, दोषभूयिष्ठे गुणहीने लोकेऽल्पताबुद्धिदर्शनादशुद्धत्वम्, ब्रह्मणि तु दोषदवीयस्त्वा-च्छुद्धत्वम्। अत एव जाड्यरहिततया बुद्धत्वम्। अत एवाविद्या-काम-कर्मपारतन्त्र्यरहिततया मुक्तत्वम्, क्वचिदप्यव्यावृत्तज्ञानशक्तित्वं सर्वज्ञत्वं, सर्वशक्तित्वं च ब्रह्मणः सिध्यति; अनेवंभूतेऽल्पताबुद्धिदर्शनादिति भावः। तदेवं

न्यायनिर्णयः

समाधत्ते— **उच्यत इति।** तत्र प्रसिद्धत्वोक्त्या ब्रह्मणः शक्यप्रतिपाद्यतया सम्बन्धं साधयति— **अस्तीति।** प्रसिद्धत्वमस्तित्वम्, प्रसिद्धमप्रसिद्धं वेत्यधिकारात्। ब्रह्मणो निरुपाधिकं रूपमाह— **नित्येति।** कार्यैक्यव्यावृत्त्यै नित्यपदम्। तत्तादात्म्यं व्यासेद्धुम्— **शुद्धेति।** अखण्डजाड्यस्वाभाव्यं व्यावर्तयति— **बुद्धेति।** तादृग्जाड्यैक्याभासेनाध्यस्तचैतन्यं व्युदस्यति— **मुक्तेति।** मोक्षावस्थायामेव नित्यत्वादीत्याशङ्क्याह— **स्वभावमिति।** भानाभानकृता मुक्तिबन्धयोर्भेदबुद्धिरिति भावः। सोपाधिकं ब्रह्मरूपमाह— **सर्वज्ञमिति।** ननु न सामान्येनापि लोके ब्रह्म ज्ञातं, तस्योक्तरूपस्याध्यक्षाद्यगम्यत्वात्। नापि श्रुत्या तद्धीः, तद्गतब्रह्मशब्दस्याज्ञातसंगतित्वात्, अत एव न पदमात्रादपि तद्धीः, तत्राह— **ब्रह्मेति।** श्रुतिसूत्रयोर्ब्रह्मशब्दोऽन्यथानुपपन्नो निगमाद्यनुगृहीतो विशिष्टवाक्यार्थान्वयिपदार्थाकाङ्क्षानुगृहीतश्च नियतपदार्थधीहेतुतया विशिष्टेऽपि ब्रह्मणि सम्भावनाहेतुरिति युक्ता तस्य प्रसिद्धिरित्यर्थः। बृंहतिधात्वालोचनायामपि तत्प्रसिद्धिरित्याह— **बृंहतेरिति।** संकोचकप्रकरणोपपदाभावे वृद्धिकर्मणो बृंहतिधातोर्निरङ्कुशमहत्त्वबोधित्वात्, अवच्छेदत्रयशून्यत्वसिद्धेर्नित्यपदस्य तत्परत्वात्, दोषभूयिष्ठत्वाद्यभावेन शुद्धत्वात्, अजडत्वेन बुद्धत्वात्, अविद्याद्यपरतन्त्रतया मुक्तत्वात्, कुतश्चिदप्यव्यावृत्तज्ञानशक्तितया सर्वज्ञतादिसिद्धेः, धात्वर्थानुरोधादेवोक्तब्रह्मसिद्धिः, नित्यत्वादिशून्ये निरङ्कुशमहत्त्वायोगात्। तथाच पदशक्तेरेव प्रसिद्धं ब्रह्मेत्यर्थः। तत्पदार्थस्य

१. 'बृहतेः' इति निरनुस्वारपाठस्य बहुत्रोपलम्भेऽपि न्यायनिर्णये सानुस्वारप्रतीकधारणात्, 'बृंहेर्नोऽच्च (उ.सू. ५८५) इति व्याकरणानुरोधाच्च सानुस्वारपाठ एव मूले स्थापितः।

ब्रह्मास्तित्वप्रसिद्धिः। सर्वो ह्यात्मास्तित्वं प्रत्येति, न नाहमस्मीति। यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्, सर्वो लोको नाहमस्मीति प्रतीयात्। आत्मा च ब्रह्म।

यदि तर्हि लोके ब्रह्माऽऽत्मत्वेन प्रसिद्धमस्ति ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नम्। न; तद्विशेषं प्रति विप्रतिपत्तेः। देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लोकायतिकाश्च प्रतिपन्नाः।

प्रकटार्थविवरणम्

दिश्यमाना नित्यत्वादयो निरुपाधिकधर्माः; सं[स्व]भावेनोपदिश्यमानाश्च सर्वज्ञत्वादयः सोपाधिकधर्माः, ते च शब्दशक्तिगोचरतया वेदान्तवेद्याः, तदभिधानमुखेन तु स्वप्रकाशसुखव्यक्तावेकस्यां तात्पर्यमित्यखण्डनिष्ठा वेदान्ता वक्ष्यन्ते। प्रसिद्धत्वे हेत्वन्तरमाह— **सर्वस्येति**। नन्वस्तु प्रसिद्धिरात्मनः; तावता ब्रह्मणि किमायातमित्यत आह— **आत्मा च ब्रह्मेति**। "अयमात्मा ब्रह्म" इति शास्त्रादित्यर्थः। आत्मत्वेन लोके प्रसिद्धमस्ति यद्वस्तु तत् श्रुतेः ब्रह्म चेत् तर्हि श्रुतेरेव तद् ज्ञातमिति व्यर्थो विचार इत्याह— **यदि तर्हीति**। विप्रतिपत्तिनिराकरणेन विचारोऽर्थवानित्याह— **तद्विशेषं प्रतीति**। विप्रतिपत्तीः दर्शयति— **देहमात्रमित्यादिना**।

भाष्यभावप्रकाशिका

तत्पदार्थस्य नित्यशुद्धत्वादिरूपेण प्रसिद्धिमभिधाय त्वंपदार्थरूपेणाप्यस्य प्रसिद्धिमाह— **सर्वस्यात्मत्वाच्चेति**। ननु आत्माऽपि न प्रसिद्धः; प्रत्यक्षाद्यगोचरत्वात्, इत्याशङ्क्याह— **सर्वो हीति**। उक्तमेवार्थमात्मनोऽप्रतीतिनिराकरणेन द्रढयति— **न नेति**। न न जानात्यहमस्मीति, किन्तु जानात्येवेति योजना।। ननु शून्य एवात्मा प्रतिभासते, न तस्यास्तित्वमिति शून्यवादमाशङ्क्याह— **यदीति। नाहमस्मीति**। अहमस्मीति न प्रतीयादित्यर्थः। भवतु, तथाऽपि ब्रह्मणः कथं सिद्धिरिति? अत आह— **आत्मा चेति**।

एवं तर्हि प्रत्यक्षगोचरत्वादात्मनः शास्त्रैकसमधिगम्यताऽभावाच्छास्त्रविषयत्वं न स्यादित्याक्षिपति— **यदीति**। समाधत्ते— **न तद्विशेषमिति**। यद्यप्यहमित्यात्मा सिद्धः; तथाऽपि तद्विशेषेषु विप्रतिपत्तेः, तस्याश्च वस्तुतो ब्रह्मविषयत्वात्, सामान्यतः प्रसिद्धत्वेऽपि विशेषतोऽसिद्धत्वात्, विशेषसिद्धिहेतोः शास्त्रस्य भवति विषयः। सामान्यतः सिद्धत्वाच्च शक्यते विशेषतः प्रतिपादयितुमिति सम्बन्धोऽपि सम्भवतीति भावः। विप्रतिपत्तिं दर्शयति— **देहमात्रमित्यादिना**। मात्रशब्देन देहातिरिक्तं चैतन्यं स्वतन्त्रमन्यविशेषणं वा नास्ति, किन्तु किण्वादिषु मदशक्तिवद् देहाकारपरिणतभूतचतुष्टयान्तर्भूतमेवेति दर्शयति। **आत्मेति**।

न्यायनिर्णयः

नित्यत्वादिना प्रसिद्धिमुक्त्वा त्वंपदार्थात्मनाऽपि प्रसिद्धिमाह— **सर्वस्येति**। आत्माऽपि प्रत्यक्षाद्यगोचरत्वात् प्रसिद्धो नेत्याशङ्क्याह— **सर्वो हीति**। प्रमाणाप्रमाणसाधारणीं प्रतीतिमप्रतीतिनिरासेन स्फोरयति— **न नेति**। अहमस्मीति न न प्रत्येति; किं तु प्रत्येत्येवेति योजना। आत्मनः शून्यस्यैव प्रतीतेर्नास्तित्वप्रसिद्धिरिति शून्यवादमाशङ्क्याह— **यदीति**। आत्मनः शून्यस्य प्रतीतावहं नास्मीति प्रतीतिः स्यात्, सर्वश्च लोकोऽहमस्मीति प्रत्येति, अतस्तदस्तित्वधीरित्यर्थः। आत्मप्रसिद्धावपि कथं ब्रह्मप्रसिद्धिस्तत्राह— **आत्मा चेति**। चैतन्याविशेषात्, 'अयमात्मा ब्रह्म' इत्यादिश्रुतेश्च ब्रह्मात्मनोरैक्यमित्यर्थः।

प्रसिद्धत्वोक्त्या सम्बन्धादौ सिद्धे तत्पक्षोक्तं दोषं स्मारयति पूर्वपक्षी— **यदीति**। व्यवहारभूमौ विना विचारमात्मत्वेन ब्रह्म यदि प्रसिद्धमस्ति, तर्हि ततो लोकादेव ज्ञातं ब्रह्मेत्यनन्यालभ्यत्वेन शास्त्राविषयत्वात्, तदवगतेश्चाफलत्वात्, पुनरपि प्राप्तमजिज्ञास्यत्वमिति योजना। 'धर्मं प्रति विप्रतिपन्ना बहुविदः' इति न्यायेन परिहरति— **नेत्यादिना**। आत्मनः अहमिति प्रत्यात्मं प्रसिद्धत्वेऽपि तद्विशेषे विप्रतिपत्तेः, तस्या वस्तुतो ब्रह्मविषयतया सामान्येन सिद्धमपि तद् विशेषतोऽसिद्धेः तद्धेतोः शास्त्रस्य भवति विषयः, भवति च तदवगतिस्तत्फलम्। सामान्यतः सिद्धत्वाच्च विशेषतः शक्यं प्रतिपादयितुमिति सम्बन्धसिद्धिरिति युक्ता ब्रह्मणो जिज्ञास्यतेति भावः। विप्रतिपत्तीरेव दर्शयन्नादौ स्थूलदृशां मतमाह— **देहेति**। देहातिरिक्तं चैतन्यं स्वतन्त्रमस्वतन्त्रं वा नास्ति। देहाकारपरिणतभूतचतुष्टयान्तर्भूतमेव तदिति मात्रचो ग्रहणम्। मृतदेहव्यावृत्त्यर्थं चैतन्यविशिष्टमित्युक्तम्।

इन्द्रियाण्येव चेतनान्यात्मेत्यपरे। मन इत्यन्ये। विज्ञानमात्रं क्षणिकमित्येके। शून्यमित्यपरे। अस्ति देहादिव्यतिरिक्तः संसारी, कर्ता, भोक्तेत्यपरे। भोक्तैव केवलं न कर्तेत्येके।

भाष्यभावप्रकाशिका

अहंप्रत्ययालम्बनमित्यर्थः। **प्राकृता इति** शास्त्रोपदेशासंस्कृतमतयो दृष्टमात्राविकल्पितव्यवहारिण उच्यन्ते। **लोकायतिका इति** भूतचतुष्टयवादिनः। तत्र देहशब्देन त्वगिन्द्रियस्य निरपेक्षाधारः शरीरमुच्यते। तत्र 'अहं मनुष्यः' इत्यनुभव एव प्रमाणमिति। **तेषामेव** पक्षान्तरमाह— **इन्द्रियाण्येवेति**। सतीन्द्रिये 'अहं रूपं पश्यामी'ति रूपादिविज्ञानानां जागरे भावात्, सूक्ष्मशरीरे चक्षुरादौ चासति सुषुप्त्यादौ रूपादिविज्ञानानामभावात् तेषामिन्द्रियान्वय-व्यतिरेकानुविधायित्वादिन्द्रियाणामेव चेतनत्वावगमात्, वरगोष्ठीवदितरेतरगुणभावेन च तेषां क्रमेण भोगोपपत्तेः, एकदेहाश्रितत्वेनैकत्वाभावेऽपि 'य एवाद्राक्षं स एव शृणोमि' इत्यादिप्रत्यभिज्ञानसम्भवात्, 'अहं शृणोमी'तीन्द्रियेष्वहंबुद्धिदर्शनाद् युक्तं तेषामात्मत्वमिति भावः। पक्षान्तरमाह—**मनइति**। **सुप्ते** चक्षुराद्यभावेऽपि केवले मनसि विज्ञानदर्शनात् अहंप्रत्ययाविकलतयोपलब्धेः चक्षुराद्यन्वयव्यतिरेकयोश्च रूपादिविज्ञानानां तद्धर्मताऽभावेऽपि [तत्करणत्वादुपपत्तेः,] तेषामेकशरीराश्रयत्वेन प्रत्यभिज्ञायामेककुञ्जरारूढानामपि तत्रसङ्गाद् युक्तं मनस एवात्मत्वमिति भावः। योगाचारस्य मतमाह— **विज्ञानमात्रमिति**। मात्रशब्देनाश्रयमात्मानं व्यावर्तयति। अयं भावः— शरीरादेर्विज्ञेयत्वाद् घटादिवदात्मत्वायोगात्, मानसस्य समनन्तरप्रत्ययव्यतिरेकेणाभावात्, आश्रयान्तरस्यादर्शनात्, क्षणिकविज्ञानेष्वपि सादृश्यात् प्रत्यभिज्ञानोपपत्तेः, बन्ध-मोक्षयोरपि सन्तानाश्रयत्वोपपत्तेश्च युक्तं विज्ञानस्यात्मत्वमिति। माध्यमिकस्य मतमाह— **शून्यमिति**। सुषुप्ते विज्ञानस्याप्यभावादकस्मादेवाऽहमिति प्रत्ययस्य समुदयादसदवभास एवायमहंप्रत्यय इति भावः।

नैयायिकादिमतमाह— **अस्तीति**। शून्यव्यतिरिक्त इत्यर्थः। 'अहमस्मी'त्यनुभवादहंप्रत्ययालम्बनस्यैव चात्मत्वात्, तस्य प्रत्यभिज्ञायाः स्थायित्वावगमात्, निर्विकारस्य च क्रियाफलाश्रयत्वात्, क्रियाविशेषात्मत्वाच्च कर्तृत्वस्य, एवमात्मत्वाच्च संसारस्य, युक्तमेवंरूपत्वमात्मन इति भावः। तदेवं त्वंपदार्थविप्रतिपत्तिद्वारा तत्पदार्थे विप्रतिपत्तिं सूचयित्वा साक्षात् तद्विषयामपि

न्यायनिर्णयः

आत्मेत्यहमालम्बनमुच्यते। **प्राकृताः** शास्त्रासंस्कृतधियो दृष्टमात्राविकल्पितप्रवृत्तयो जना जन्ममरणमात्रधर्माणः। **लोकायतिका** भूतचतुष्टयतत्त्ववादिनः। देहस्त्वगिन्द्रियस्यानपेक्षमधिकरणम्। तत्र मनुष्योऽहमिति बुद्धेरात्मतेत्यर्थः। सत्यपि देहे, नेत्रादौ चासति स्वापादौ स्वरूपाद्यज्ञानात्, तेषामिन्द्रियानुविधानात्, चैतन्यदृष्टेस्तेषु चाहंबुद्धेस्तेषामेवात्मतेति पक्षान्तरमाह— **इन्द्रियाणीति**। न च तेष्वनेकेषु भोगायोगः, वरगोष्ठीवन्मिथो गुणप्राधान्यात् क्रमेण तद्योगात्। न च नानात्वे प्रत्यभिज्ञानुपपत्तिः। एकदेहाश्रितत्वेनोपपत्तेरिति भावः। स्वप्ने नेत्राद्यभावेऽपि केवले मनसि ज्ञानदृष्टेः, अहंधियश्च तस्मिन्नवैकल्यात्, इन्द्रियानुविधानस्य च रूपादिधियां तदधर्मत्वेऽपि तत्करणत्वादुपपत्तेः, एकदेहस्थत्वेन प्रत्यभिज्ञायामेकप्रासादस्थानामपि तत्रसङ्गात् मन एवात्मेति मतान्तरमाह— **मन इति**। लोकायतमतभेदानुक्त्वा योगाचारमतमाह— **विज्ञानेति**। आश्रयं व्यावर्तयितुं मात्रपदम्। सिद्धान्ताद्विशेषार्थं क्षणिकमिति। देहादेर्ज्ञेयत्वाद् घटतुल्यत्वात्, मनसोऽनन्तरबुद्ध्यनतिरेकात्, आश्रयान्तरस्यादृष्टत्वात्, क्षणिकज्ञानेष्वपि सादृश्यात् प्रत्यभिज्ञानात्, बन्धमोक्षयोः सन्तानाश्रयत्वात्, युक्तं योगाचारमतमित्यर्थः। माध्यमिकमतमाह— **शून्यमिति**। स्वापे धियोऽप्यभावात्, अकस्मात्पुनरहमित्युदयात्, असदालम्बनाऽहंधीरित्यर्थः। तार्किकादिमतमाह— **अस्तीति**। शून्यातिरिक्तत्वमस्तित्वम्। अहमस्मीत्यनुभवात्, तदालम्बनस्यात्मत्वात्, तस्य प्रत्यभिज्ञया स्थायित्वात्, तस्याश्चाभ्रान्तितया सादृश्यानधीनत्वात्, अविकारस्य क्रियाफलत्वायोगात्, क्रियावेशात्मत्वात्कर्तृत्वस्यैवमात्मत्वाच्च संसारस्यात्मनो युक्तैवंरूपतेत्यर्थः। सांख्यमतमाह— **भोक्तेति**। करोमि, जानामीति धियोऽहंकारानुगमात्, केवलात्मायोगात्, भोगस्य

अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित्। आत्मा स भोक्तुरित्यपरे।

एवं बहवो विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयाः सन्तः। तत्राविचार्य यत्किंचित् प्रतिपद्यमानो निःश्रेयसात् प्रतिहन्येत, अनर्थं चेयात्। तस्माद् ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते।।१।।

।।इति प्रथमं जिज्ञासाधिकरणम्।।

प्रकटार्थविवरणम्

ननु निर्मूलविवादनिराकरणाय न विचारारम्भो युक्त इत्याशङ्क्याह— **एवं बहव इति**। युक्तिवाक्यसमाश्रयाः सन्तः अन्त्यं पक्षं प्रतिपन्नाः, तदाभाससमाश्रयास्सन्तः इतरेषु पक्षेषु व्यवस्थिताः। तदाभासत्वं च स्वावसर एव वक्ष्यामः। ननु सन्तु विप्रतिपत्तयः; पक्षान्तरपरिग्रहेणापि तन्निराकरणात् समीहितसिद्धेः किं वेदान्तविचारारम्भेणेत्याशङ्क्याह— **तत्राविचार्येति**। औपनिषदपुरुषज्ञानाधीनत्वान्निःश्रेयसस्य पक्षान्तरपरिग्रहे च तदभावात् न निःश्रेयसं प्राप्नोति, किन्त्वनर्थमेवेयात्, 'अन्धं तमः प्रविशन्ति'' "ये के चात्महनो जनाः'' इति श्रुतेरित्यर्थः। यस्माद्वेदान्तवाक्यान्यविचार्य निःश्रेयसं न लभते तस्मात् निःश्रेयसकामस्येयं मीमांसा आचार्येण प्रारभ्यत इत्युपसंहरति।

।।इति प्रथमं जिज्ञासाधिकरणम्।।

भाष्यभावप्रकाशिका

विप्रतिपत्तिमाह— **अस्ति तद्व्यतिरिक्त इति**। देहादिव्यतिरिक्ताद् भोक्तुरपि व्यतिरिक्त इत्यर्थः। स्वमतमाह— **आत्मा स इति**। भोक्तुर्जीवात्मनस्त्वंपदार्थस्याहंप्रत्ययगोचरस्य स तत्पदार्थ आत्मा स्वरूपम्; बृंहत्यर्थानुगमेन वस्तुनोऽनवच्छिन्नस्य दर्शितत्वात् त्रिविधभेदासम्भवात्, "तत्त्वमसी''त्यादिश्रुतेश्चेति भावः।

विप्रतिपत्तीरुपसंहरति— **एवं बहव इति**। ननु न विप्रतिपत्तिमात्रात् पूर्वपक्षता, किन्तु प्रमाणयुक्तिमूलतयेत्याशङ्क्याह— **युक्तिवाक्येति**। [अन्त्यपक्षवादिनो] युक्तिवाक्याश्रयाः [अन्ये तदाभासाश्रया] इति विभागः।

ननु एवमपि किं विचारारम्भेण? यस्य यस्मिन् पक्षेऽभिरुचिः, स तमाश्रित्य पुरुषार्थं साधयेदित्यत्राह— **तत्राविचार्येति**। अन्योन्यविरुद्धार्थज्ञानेषु कस्यचिदेव तत्त्वदर्शनवत्त्वात् तस्य च विचारसाध्यत्वात्, तद्दर्शनरहितस्य तत्त्वदर्शनविकलत्वाद् न मुच्यत इत्यर्थः। अपि चातत्त्वज्ञानान्नास्तिक्ये सत्यनर्थं प्राप्नुयादित्याह— **अनर्थं चेयादिति**। सूत्रतात्पर्यमुपसंहरति— **तस्मादिति**। ब्रह्मजिज्ञासोपन्यासमुखेनेच्छाप्रदर्शनव्याजेन विचारपरं सूत्रमित्यर्थः। अथवा जिज्ञासा कर्तव्येत्युक्ते ज्ञानस्येष्यमाणस्य

न्यायनिर्णयः

चिदवसानत्वात्, तद्रूपात्मनो युक्ता यथोक्तरूपतेत्यर्थः। त्वमर्थे विवादद्वारा तदर्थे तं सूचयित्वा साक्षादेव तत्र विवादमाह— **अस्तीति**। देहाद्यतिरिक्ताद्भोक्तुरप्यतिरिक्तत्वं तद्व्यतिरिक्तत्वं, तत्समर्थनार्थं सर्वज्ञ इत्यादिविशेषणम्। स्वपक्षमाह— **आत्मेति**। स हीश्वरो भोक्तुः स्वरूपम्। बृंहत्यर्थान्वयेन स्वतोऽनवच्छिन्नत्वस्योक्तत्वात्, चैतन्ये भेदायोगात्, ऐक्यश्रुतेश्चेश्वरस्याताटस्थ्यादिति भावः।

विप्रतिपत्तीरुपसंहरति— **एवमिति**। मानयुक्ती विना विवादमात्रान्न पूर्वपक्षतेत्याशङ्क्याह— **युक्तीति**। अन्त्यपक्षवादिनो युक्तिवाक्याश्रयाः, अन्ये तदाभासाश्रया इत्युत्तराधिकरणेषु व्यक्तीभविष्यति। तथापि यस्य यस्मिन्पक्षे श्रद्धा स तमाश्रित्य स्वार्थं साधयिष्यति; किं विचारेणेति; तत्राह— **तत्रेति**। विवादः सप्तम्यर्थः। मिथो विरुद्धधीषु कस्याश्चित् तत्त्वधीत्वात्, तस्या विचारसाध्यत्वात् तद्धीनस्तत्त्वधीवैधुर्यान्न पुमर्थभागित्यर्थः। किंचाविचारे तत्त्वाज्ञानात् नास्तिकत्वे 'ये के चात्महनो जनाः' इति श्रुतेः श्रुत्यर्थबहिर्मुखोऽनर्थं गच्छेदित्याह— **अनर्थं त्वेयादिति**। सूत्रतात्पर्यमुपसंहरति— **तस्मादिति** । विषयादिसत्त्वं तदर्थः। ब्रह्मजिज्ञासोपन्यासमुखेन विशिष्टा मीमांसा प्रस्तूयत इति सम्बन्धः। विशिष्टज्ञानेच्छोक्तिव्याजेन विचारारम्भपरं सूत्रम्। न हीच्छा

शारीरकन्यायसंग्रहः

जन्माद्यधिकरणम्

[1]जन्माद्यस्य यतः।।१.१.२।।

जगज्जन्मस्थितिभङ्गस्य ब्रह्मस्वरूपलक्षणत्वायोगात्[2], उपलक्षणत्वे[3] च स्वरूपानवगमात्[4], सत्यज्ञानानन्दादिस्वरूपलक्षणोपादाने अद्वितीयानन्तब्रह्मशब्दसमर्पितस्वरूपलक्षणस्योपलक्षणेन विरोधात्, तस्य मायात्मकत्वे तेन ब्रह्मोपलक्षणायोगात्, मायाविशिष्टस्य कारणतया तथैव ब्रह्मत्वप्रसङ्गात्, न मुमुक्षुणा जिज्ञास्यं विशुद्धं ब्रह्म लक्षणतः प्रतिपत्तुं शक्यत इति प्राप्तम्।

तत्र यथा 'यत्र शाखाग्रं स चन्द्रः' 'प्रकृष्टप्रकाशः चन्द्रः' इत्युपलक्षणस्वरूपलक्षणाभ्यां विशिष्टश्चन्द्रः प्रतीयते, एवं [5]वक्ष्यमाणं जगन्निमित्तोपादानकारणत्वं सिद्धवत्कृत्य यज्जगतो जन्माद्युपादाननिमित्तकारणं तद् ब्रह्म इति मिथ्याभूतेनापि प्रपञ्चजन्मादिकारणत्वेन[6] 'यद्रजतमित्यभात् सा शुक्तिः' इतिवत्; ब्रह्माद्वितीयानन्तशब्दानां च स्वार्थप्रक्षेपेण अद्वितीयं जगत्कारणं ब्रह्म इत्युपलक्ष्य पुनस्तस्य मायाविशिष्टस्य कारणत्वात् तथैव ब्रह्मत्वे प्राप्ते सत्यानन्दादिविशेषलक्षणोपादानेन विशुद्धं ब्रह्म लक्ष्यते इत्युभयविधलक्षणेन[7] जिज्ञास्यब्रह्मनिर्णयो दर्शितः। तदुक्तं भाष्ये "तस्य च निर्णयवाक्यम्— आनन्दाद्ध्येव"इति।।

भाष्यभावप्रकाशिका

कर्तव्यताकथनात् तदुपायविचारः कर्तव्य इत्युक्तं भवतीत्यर्थः। किमुपकरणा किंप्रयोजना चेति? अत आह— **तदविरोधीति**। वेदान्तवाक्याविरोधीत्यर्थः। यद्यपि वेदान्तमीमांसाऽपि तर्क एव; तथापि कर्ममीमांसान्यायेषु वेदप्रत्यक्षादि-प्रमाणपरिशोधनादिषु ये न्यायास्तदुपकरणं यस्याः सा तथोक्ता। **निःश्रेयसप्रयोजनेति**। निःश्रेयससाधनब्रह्मज्ञानप्रयोजनेत्यर्थः।।१।।**इति प्रथमं जिज्ञासाधिकरणम्।।**

न्यायनिर्णयः

ज्ञानं वा साक्षात्कर्तव्यम्। तथा चेष्यमाणज्ञानोपायविचारकार्यतार्थं सूत्रमित्यर्थः। किमुपकरणा सेति? तत्राह— **तदविरोधीति**। तेषां वेदान्तानामविरोधिनस्तर्का मीमांसायां न्याये च वेदप्रामाण्यशुद्ध्याद्युपयोगिनो यस्या उपकरणं सा तथा। मीमांसायास्तर्कत्वेऽपि तर्कान्तराणामुपकरणतेति भावः। किंप्रयोजना सेत्यत आह— **निःश्रेयसेति**। ब्रह्मज्ञानद्वारेति शेषः॥१॥ **इति प्रथमं जिज्ञासाधिकरणम्।**

---

१. जगतः 'अस्य' इति इदन्तया निर्देशः परिदृश्यमानविविधवैचित्र्यज्ञापनार्थः। तज्ज्ञापनफलं च ईदृशस्य जगतः अल्पज्ञात् अल्पशक्तेर्जीवात् उत्पत्त्यादि सम्भावयितुमप्यशक्यमिति सूचनम्। अत एवाग्रे प्रधानादेरिव जीवस्य जगत्कारणत्वशङ्कानिरासो न करिष्यते सूत्रकृता। मूलभूतश्रुतौ 'इमानि' इति बहुवचने सत्यपि सूत्रे 'अस्य' इत्येकवचनप्रयोगः कृत्स्नस्य कार्यवर्गस्यैककार्यवत् एकेन कर्त्राऽनायासेन संकल्पमात्रेण निर्मितत्वज्ञापनार्थः। तस्यापि अल्पशक्तिसंसारिव्यावृत्तिसूचनमेव फलम्।
केचित् सूत्रे 'आद्यस्य' इति पदच्छेदेन— 'आद्यस्य = हिरण्यगर्भस्य जन्म यतः' इति योजयन्ति। सोऽप्यर्थः— सूत्रमूलभूतं श्रुतिवाक्यं हिरण्यगर्भपरमिति शङ्कानिरासार्थत्वेन सूत्रावृत्त्या विवक्षितुं शक्यः इति नोपेक्षणीयः - इति न्यायरक्षामणिः।

२. जन्मस्थितिभङ्गानां जगद्धर्मतया ब्रह्मावृत्तित्वेन तल्लक्षणत्वायोगात्, जगत्कारणत्वस्य च तद्वृत्तित्वेऽपि जगत्सापेक्षत्वेन निरपेक्षब्रह्मस्वरूपत्वायोगादिति भावः। ३. उपलक्षणत्वे = तटस्थलक्षणत्वे।

४. स्वरूपलक्षणं विना धर्मिस्वरूपानगमात्। ननु जगत्कारणत्वमुपलक्षणमस्तु, स्वरूपं तु सत्यादिपदैर्गंस्यते इत्याशङ्कायां स्वरूपतटस्थलक्षणयोर्विरोधं दोषमाह— सत्येति। अद्वितीयादिपदैः स्वरूपस्य त्रिविधपरिच्छेदराहित्यमुक्तम्। तच्च जगत्कारणत्वेन विरुध्यते। स्वरूपभिन्नतत्सद्भावे सद्वितीयतापत्तेः। ननु तस्य मिथ्यात्वात् न तेन सद्वितीयत्वमिति चेत्, तर्हि मिथ्याभूतस्य सत्यब्रह्मलक्षणत्वं न युक्तमित्याह— तस्येति।

५. प्रकृत्यधिकरणे इति शेषः। ६. 'ब्रह्मोपलक्ष्यते' इति पूरणीयम्।

७. उभयविधलक्षणेन =स्वरूपलक्षणेन, तटस्थलक्षणेन च। 'उभयलक्षणेन' इति पाठान्तरम्।

२।।जन्माद्यधिकरणम्।।सू.२।।

ब्रह्म जिज्ञासितव्यमित्युक्तम्। किंलक्षणं पुनस्तद् ब्रह्मेत्यत आह भगवान् सूत्रकारः-

जन्माद्यस्य यतः।।२।।

प्रकटार्थविवरणम्

पूर्वाधिकरणेन सङ्गतिमाह— **ब्रह्मेति**। यद्यपि ब्रह्मणो जिज्ञास्यत्वप्रतिज्ञावचनेनार्थात् प्रमाणादिविचाराः प्रतिज्ञाताः, तथापि ब्रह्मप्रमाणं, ब्रह्मयुक्तिरित्यादिविशिष्टविचाराणां विशेषणभूतब्रह्मप्रतिपत्तिसापेक्षत्वात् प्रथमं स्वरूपं वक्तव्यमित्याह— **किंलक्षणं पुनरिति**। श्रौतस्य ब्रह्मणः श्रौतलक्षणसमर्पकमेव सूत्रमवतारयति— **अत आहेति**।

अत्र च "यतो वा इमानि भूतानि जायन्ते" इत्यादिवाक्यं विषयः। तत् किं ब्रह्म न लक्षयति, उत लक्षयतीति संशयः। आगमस्यानुमानानुगुणत्वात् एकस्योभयकारणत्वस्य[1] दृष्टान्ताभावेनानुमातुमशक्यत्वात्, एककारणत्वस्य च लक्षणत्वे वस्तुतःपरिच्छेदात् लक्ष्यस्य ब्रह्मत्वायोगात् न लक्षयतीति पूर्वः पक्षः। सिद्धान्तस्तु— पौरुषेयतया शङ्कितदोषानुमानस्यापौरुषेयतयाऽनाशङ्कितदोषागमानुग्राहकतर्कविशेषत्वात् अतीन्द्रिये स्वातन्त्र्येण प्रमाणत्वायोगात्, आगमप्रतिपन्नोभयकारणत्वे सुखादिदृष्टान्तेन संभावनाबुद्धिमात्रहेतुत्वात्, वस्तुतःपरिच्छेदाभावेन लक्ष्यस्य ब्रह्मत्वसंभवात्, जगज्जन्मादिनिमित्तोपादानं ब्रह्म लक्षयतीति। तदेतदाह— **जन्माद्यस्य यतः** इति। प्रयोजनं च तत्र तत्र पुरुषप्रयत्नकरणं सर्वत्र द्रष्टव्यम्; यतो विषयसंशयपूर्वपक्षसिद्धान्तफलात्मको हि पञ्चावयवो विचारः अधिकरणम्।

भाष्यभावप्रकाशिका

तदेवं प्रथमसूत्रेण वेदान्तमीमांसारम्भमुपपाद्य तामारभते— **जन्माद्यस्य यत इति**। एतत्सूत्रस्य पातनिकामाह— **ब्रह्मेति**। ब्रह्मज्ञानकामेनेदं शास्त्रं श्रोतव्यमित्युक्तम्, जिज्ञासापदस्यान्तर्णीतविचारोपलक्षकत्वं ज्ञानेच्छोपक्षेपेण स्वार्थापरित्यागेनाङ्गीकृत्येति भावः। यद्यपि प्रधानस्य जिज्ञास्यत्वेन प्रतिज्ञया तदङ्गान्यपि प्रमाणादीनि प्रतिज्ञातानि; तथाऽपि स्वरूपस्य प्राधान्यात् तदेव प्रथमं विचार्यमित्यभिप्रेत्याह— **किंलक्षणमिति**। पदच्छेदः पदार्थकथनं पदविग्रह इति व्याख्यानाङ्गं त्रितयमपि सम्पादयति—

न्यायनिर्णयः

प्रथमसूत्रेण शास्त्रारम्भमुपपाद्य तदारभमाणो जन्मादिसूत्रस्य पातनिकामाह— **ब्रह्मेति**। जिज्ञासापदस्यावयवार्थ[3]-त्यागेनान्तर्णीतविचारार्थत्वमुपेत्य ब्रह्म ज्ञातुकामेनेदं शास्त्रं ज्ञातव्यमित्युक्तमित्यर्थः। ब्रह्मणो जिज्ञास्यत्वोक्त्याऽर्थात् प्रमाणादिविचाराणां प्रतिज्ञातत्वेऽपि ब्रह्मप्रमाणं ब्रह्मयुक्तिरित्यादिविशिष्टविचाराणां विशेषणमित्यपेक्षत्वादादौ ब्रह्मस्वरूपं वाच्यमित्याह— **किंलक्षणमिति**। श्रौतस्य ब्रह्मणः श्रौतलक्षणद्वयावेदकं सूत्रं सूत्रकारं पूजयन्नवतारयति— **अत इति**। 'यतो वा इमानि' इत्यादिवाक्यं ब्रह्म न लक्षयति, लक्षयति वेत्येकस्योभयहेतुत्वासम्भवसम्भवाभ्यां संदेहे, श्रुतेरनुमानानुगुण्यादेकस्योभयहेतुत्वे दृष्टान्ताभावेनाशक्यानुमानत्वात्, एकतरहेतुत्वस्य लक्षणत्वे वस्तुपरिच्छेदात् लक्ष्यस्याब्रह्मत्वान्न लक्षयतीति प्राप्ते, पुरुषमतिप्रभवत्वेनानुमानस्य सम्भावितदोषस्य अपौरुषेयत्वेनापास्तदोषागमानुग्राहकतर्कत्वात्, अतीन्द्रियेऽर्थे स्वतोऽप्रामाण्यात्, आगमिकोभयहेतुत्वे सुखादिदृष्टान्तेन सम्भावनामात्रहेतुत्वात्, वस्तुतोऽपरिच्छेदाल्लक्ष्यस्य ब्रह्मत्वसिद्धेर्जगन्निमित्तोपादानं सच्चिदानन्दं ब्रह्मेति लक्षयतीति सिद्धान्तमाह— **जन्मादीति**। पूर्वाधिकरणेनास्योत्थाप्योत्थापकत्वं संगतिरुक्ता। अधीतिविध्युपादापितोपनिषद्वाक्यस्य स्पष्टब्रह्मलिङ्गस्य लक्षणद्वयवति ब्रह्मणि समन्वयोक्तेः श्रुतिशास्त्राध्यायपादसंगतयः। पूर्वाधिकरणस्थब्रह्मलक्षणपरीक्षणात् तत्फलमेव पूर्वोत्तरपक्षयोरत्र फलम्। पदच्छेदः, पदार्थोक्तिः, पदविग्रह इति त्रयं

---

१. उभयकारणत्वम्=उभयविधकारणत्वम्— उपादानत्वं, निमित्तत्वं च। २. ब्रह्मपदेन त्रिविधपरिच्छेदराहित्यस्य पूर्वं लम्भितत्वादिति भावः।

३. 'ज्ञातुमिच्छा जिज्ञासा' इति भाष्येण सौत्रजिज्ञासापदस्यावयवार्थ एव स्वीकृतः। इच्छाविषयत्वेन ब्रह्मज्ञानस्य प्रयोजनत्वसूचनायावयवार्थोऽवश्यं विवक्षणीयः। 'ब्रह्मजिज्ञासा कर्तव्या' इति कर्तव्यत्वान्वयाय जिज्ञासापदेन विचारलक्षणायामपि जिज्ञासाप्रयोज्यविचार एव लक्षणया तस्यार्थः इति नावयवार्थपरित्यागः। उक्तं च पञ्चपादिकायाम्— "नायं जिज्ञासाशब्दः परित्यक्तावयवार्थः केवलमीमांसापर्यायः प्रयुज्यमानो दृश्यते...अन्तर्णीतविचारार्थत्वात् जिज्ञासाशब्दस्य" इति। द्र. पञ्च. पृ. ३५९-३६१।

जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः। जन्मस्थितिभङ्गं समासार्थः। जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं, वस्तुवृत्तापेक्षं च। श्रुतिनिर्देशस्तावत्- 'यतो वा इमानि भूतानि जायन्ते' (तै. ३।१) इत्यस्मिन् वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात्। वस्तुवृत्तमपि, जन्मना लब्धसत्ताकस्य धर्मिणः स्थितिप्रलयसंभवात्। अस्येति प्रत्यक्षादिसंनिधापितस्य धर्मिण इदमा निर्देशः। षष्ठी जन्मादि-

प्रकटार्थविवरणम्

पदच्छेद: पदार्थोक्तिः विग्रहश्चेत्येतत्त्रयं व्याख्यानाङ्गं दर्शयति— **जन्मोत्पत्तिरिति**। 'अन्यपदार्थो[1] बहुव्रीहिसमासः। तत्र प्रधानस्यैवैकदेशो यत्र विशेषणतया ज्ञायते स तद्गुणसंविज्ञानः, यथा लम्बकर्ण इति। इहापि जन्म आदिरस्य जन्मादेरिति विशेष्यस्य जन्मादेरेवैकदेशभूतं जन्म विशेषणमित्यर्थः। तद्गुणसंविज्ञाने लाभमाह— **जन्मेति**। जन्म आदिरस्य स्थित्यादेरित्यतद्गुणसंविज्ञाने स्थितिभङ्गमात्रं जन्मादिशब्दार्थः स्यादित्यर्थः। एकैकं ब्रह्मोपलक्षणं न भवतीति समाहाराभिप्रायः। ननु जन्मन आदित्वे प्रमाणाभावात् कथमादित्वेनोपादानमित्याशङ्क्याह— **जन्मनश्चेति**। इदंप्रातिपदिकस्य षष्ठ्याश्च विभागेनार्थमाह— **अस्येत्येवमादिना**।

भाष्यभावप्रकाशिका

जन्मोत्पत्तिरिति। तद्गुणसंविज्ञान इति। विशेष्यैकदेशमेव विशेषणं कृत्वा समास इत्यर्थः। तद्गुणसंविज्ञाने प्रयोजनमाह— **जन्मस्थितिभङ्गमिति**। नपुंसकलिङ्गनिर्देशात् संहार-स्थितिप्रधानं [संहतिप्रधानं] धर्मजातं विवक्षितमिति द्रष्टव्यम्।

ननु आदौ [अनादौ संसारे] कथं जन्मन आदित्वमिति? अत आह— **जन्मनश्चेति**। एतत्सूत्रलक्षितवाक्ये जन्माऽऽदौ निर्दिष्टं यस्मात्, यस्माच्च वस्तुनो वृत्तं स्वभावोऽपि जनित्वा स्थित्वा प्रलीयत इत्येवंभूतः, अलब्धात्मकस्य जन्मना स्थिति-प्रलययोरसम्भवात्, अतो जन्मन आदित्वमित्यर्थः। "अस्ये'ति सूत्रपदस्य प्रातिपदिकार्थं निर्दिशति— **अस्येति**। सङ्कोचकारणाभावात्प्रत्यक्षादिसन्निधापितं समस्तं गृह्यत इत्यर्थः। ननु जन्मादीनां जगतश्च कः सम्बन्धः? इत्यपेक्षायां सर्व एव सम्बन्धः सम्भवतीत्याह— **षष्ठीति**। ननु जन्मादि लक्ष्यासम्बन्धितया लक्षणं न भवति; जगदाश्रयत्वात्तेषाम् इत्याशङ्क्य, कारणसम्बन्धित्वाद् लक्षणमित्याह—**यत इति**। [2]प्रकृतौ पञ्चमीविधानाद् "यतः" इति [3]प्रकृतिग्रहणमिति भावः। ननु प्रधान-काल-लोकपाल-यदृच्छा-स्वभावादिषु जगत्कारणेषु सम्भाव्यमानेषु जगज्जन्मादिकारणं ब्रह्मेति कथं संभाव्यते इत्याशङ्क्य

न्यायनिर्णयः

व्याख्याङ्गं दर्शयति— **जन्मेति**। जन्मस्थितिभङ्गं षष्ठ्योच्यते। तद्गुणसंविज्ञान इत्यत्र, [4]तदा बहुव्रीह्यर्थो गृह्यते। तस्य गुणत्वेन संविज्ञानं यत्र समासे स तथा। सर्वस्य विशेषणत्वे समासायोगात्तदर्थैकदेशस्तथा। तेन विशेष्यैकदेशं विशेषणं कृत्वा समास इत्यर्थः। तत्र फलमाह— **जन्मस्थितीति**। जन्म आदिरस्य स्थित्यादेरित्यतद्गुणसंविज्ञाने स्थितिभङ्गमात्रं जन्मादिशब्दार्थः स्यात्। ततश्चोभयकारणत्वालाभान्नोपलक्षणत्वं सिध्येत्। न च स्थितिलयमात्रहेतुत्वं तथा, जन्महेतोरन्यत्वे लक्ष्यस्य परिच्छेदादब्रह्मत्वात्। अतो जन्मनोऽपि विशेष्यान्तर्भावाद् धर्मजातस्य संहतिप्रधानस्य हेतुर्ब्रह्मेत्युपलक्षणसिद्धिरित्यर्थः। तादृग्धर्मजातं गृहीत्वा नपुंसकप्रयोगः। नन्वनादौ संसारे कथमादित्वं जन्मनो गृह्यते, तत्राह— **जन्मनश्चेति**। एतत्सूत्रलक्षितश्रुतौ जन्माऽऽदावुच्यते। तदपेक्षं सूत्रेऽपि तस्यादित्वमित्यर्थः। श्रुत्याऽपि कथमयुक्तमुक्तमित्याशङ्क्याह— **वस्त्विति**। वस्तुनो वृत्तं जनित्वा, स्थित्वा, लीयत इति स्वभावः, जन्मना लब्धात्मकस्य स्थित्यादियोगात्। अतो नानादेः संसारस्यादिर्जन्म, किंतु प्रतिवस्तु तस्यादित्वमिति, तदपेक्षं श्रुतिसूत्रयोस्तदादित्वमित्यर्थः। श्रुतिनिर्देशं विशदयति— **श्रुतीति**। अनुकूलो जन्मादित्वस्येति शेषः। तत्र हेतुर्यत इति। वस्तुवृत्तं विभजते— **वस्त्विति**। जन्मादित्वस्यानुगुणं वस्तुवृत्तमिति विवक्षित्वा हेतुमाह-— **जन्मनेति**। इदमः संनिहितवाचित्वात् प्रत्यक्षमात्रपरामर्शित्वमाशङ्क्य प्रतीतिमात्रं संनिधिरिति गृहीत्वा प्रातिपदिकार्थमाह— **अस्येति**। सर्वस्य जगतो न जन्मास्ति, वियदादेरनादित्वात्, इत्याशङ्क्य वियदधिकरणन्यायेन विभक्त्यर्थमाह— **षष्ठीति**। जगतो जन्मादेर्वा ब्रह्मासंबन्धात् न

---

१. 'अन्यपदार्थप्रधानः' इति पाठो युक्तः।
२. 'जनिकर्तुः प्रकृतिः' इति सूत्रेणेति भावः।
३. निमित्तत्वस्याप्युपलक्षणमेतत्। द्र. विवरणम्, पृ. ५१९
४. तदा=तच्छब्देन।

धर्मसंबन्धार्था। यत इति कारणनिर्देशः। अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाऽप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात्

प्रकटार्थविवरणम्

पञ्चम्यर्थमाह— **यत इतीति**। पदार्थानभिधाय वाक्यार्थमाकाङ्क्षितपदपूरणेनाह— **अस्य जगत इत्यादिना**। जगत्कारणस्य श्रुतिप्रसिद्धसर्वज्ञत्वादिसंभावनाय जगतो विशेषणानि। यथा कुम्भं चिकीर्षुः कुम्भकारः कुम्भशब्दविकल्पितं पृथुबुध्नोदराकाररूपितं च बुद्धावालिख्य यथाविर्भूतमेव व्याकरोति, तथा आदिकारणमपि नाम्ना रूपेण च रूपितं व्याकरोदिति तदभिज्ञत्वं संभावयति। संसारिविलक्षणस्येश्वरस्य कारणत्वं श्रुत्योक्तं संभावयति— **अनेककर्तृभोक्तृसंयुक्तस्येति**। प्रतिनियतानि देशकालनिमित्तानि येषां क्रियाफलानां तदाश्रयस्येत्यनेन श्रुत्युक्तं कारणं संभावयति। शरीरादिपरिच्छिन्नशक्तिभिर्मनसाऽप्यचिन्त्यं रचनारूपमस्येति

भाष्यभावप्रकाशिका

जगत्कारणत्वमुपलक्षणमुपपादयन् स्वरूपलक्षणं कथयति— **अस्य जगत इति**। कार्यप्रपञ्चस्य बाह्याभ्यन्तरादिभेदेनानेकधा विकल्पितत्वात् श्रुतिसिद्धं स्वसिद्धान्तं द्वैराश्यं कृत्वाऽऽह— **नाम-रूपाभ्यामिति**। इत्थंभावे तृतीया। घटादौ स्वनामरूपगर्भविकल्पपूर्विका व्याक्रिया स्वसंवेद्या; अतो जगत्कार्यस्यापि तथाभावादचेतनाभावकर्तृकत्वं न संभवतीति भावः। तर्हि चेतना भावरूपाश्च ग्रहा लोकपाला अन्येऽपि वा जीवा नाम-रूपे बुद्धावालिख्य जगज्जनयिष्यन्ति, किं ब्रह्मणेति? अत आह— **अनेककर्तृ-भोक्तृ-संयुक्तस्येति**। केचित्कर्तारोऽपि सूदर्त्विगादयो न भोक्तारः, केचिद्भोक्तारोऽपि श्रोत्रियाः श्राद्धादौ, वैश्वानरीयेष्ट्यादौ च पुत्रादयो न कर्तारः, तस्मादुभयग्रहणम्। तदेवं कर्तृत्व-भोक्तृत्वमपि नाम-रूपात्मकत्वात् कार्यप्रपञ्चान्तर्गतमिति जीवकर्तृकत्वमपि निरस्तम्। व्यवहितफलत्वात् कर्मफलस्यैश्वर्यप्रदातृतानुमानात् [ईश्वरप्रदातृकतानुमानात्] कर्मफलात्मकं जन्म [जगत्] नाकस्मिकम्, न वा स्वभावस्य कर्तृत्वमित्याह— **प्रतिनियतेति**। प्रतिनियतानि देश-काल-निमित्तानि यस्य क्रियाफलस्य तदाश्रयस्य। तथाहि— प्रतिनियतो देशः स्वर्गफलस्य कर्मणो मेरुपृष्ठम्, ग्रामादिफलस्य भूमण्डलम्। कालोऽपि स्वर्गफलस्य देहपातादूर्ध्वम्, पुत्रफलस्य बालभावात्। प्रतिनियतं निमित्तम्— उत्तरायणमरणादि स्वर्गादिफलस्य।

अथवा देश-काल-निमित्त-क्रिया-फलानीतीतरेतरद्वन्द्वः। देशादीनि च तानि प्रतिनियतानि च (तानि देशादीनि च) विग्रहः,

न्यायनिर्णयः

लक्षणतेत्याशङ्क्याह— **यत इति**। न जगत्, जन्मादि वा ब्रह्मलक्षणम्; किन्तु तत्कारणत्वम्। तच्चाज्ञाते ब्रह्मणि संभावितमित्यर्थः। सूत्रपदान्येवं व्याख्याय पूर्वसूत्राद् ब्रह्मपदानुषङ्गेण तच्छब्दाध्याहारेण च वाक्यार्थमाह— **अस्येत्यादिना**। प्रधानादिहेतुत्वनिरासेन ब्रह्महेतुत्वं संभावयितुं कार्यप्रपञ्चं श्रुतिसिद्धं द्वैराश्येन विशिनष्टि— **नामेति**। तृतीयेत्थंभावे। घटादौ स्वनामरूपगर्भविकल्पपूर्वकव्याक्रियादृष्टेः जगतोऽपि तथात्वानुमानादचेतनाभावकर्तृकत्वमयुक्तम्। विमतं चेतनभावकर्तृकं, नामरूपात्मकत्वात्, घटादिवदित्यर्थः। तर्हि चेतना भावाश्च जीवभेदा नामरूपे बुद्धावालिख्य जगज्जनयिष्यन्ति; किं ब्रह्मणेत्याशङ्क्याह— **अनेकेति**। न [1]'चान्यतरस्यार्थिकत्वादुभयग्रहणानर्थक्यम्, ऋत्विगादीनां कर्तृत्वेऽप्यभोक्तृत्वात्, पित्रादीनां च श्राद्धादौ भोक्तृत्वेऽप्यकर्तृत्वात्। तथा च जीवानामपि स्रष्टव्यकोटिनिवेशाज्जगत्कर्तृत्वायोग्यतेत्यर्थः। सेवादिफलवद् व्यवहितफलत्वात् कर्मफलस्येश्वरप्रदातृकत्वानुमानात् तदात्मकं जगदीश्वरकर्तृकमित्याह— **प्रतिनियतेति**। प्रतिनियतानि देशकालनिमित्तानि येषां क्रियाफलानां तदाश्रयो जगत् तस्येति विग्रहः। प्रतिनियतो देशः स्वर्गफलस्य मेरुपृष्ठम्, ग्रामादेर्भूमण्डलम्। कालोऽपि स्वर्गस्य प्रतिनियतो देहपातादूर्ध्वं, पुत्रफलस्य बाल्यादूर्ध्वम्। निमित्तमपि प्रतिनियत-मुत्तरायणमरणादि स्वर्गादेः, ग्रामादेस्तु राजप्रसादादि। न चेदमीदृशं जगदसर्वज्ञो निर्मातुमर्हतीत्यर्थः। विचित्रकार्यत्वाच्च जगतो विशिष्टबुद्धिमत्कर्तृकत्वं प्रासादादिवदनुमेयमित्याह— **मनसेति**। एतेन कर्तुः सर्वशक्तित्वं संभावितम्। कल्पितकारणत्वेन

१. कर्तरि उक्ते भोक्तृत्वम्, भोक्तरि चोक्ते कर्तृत्वमार्थिकम्, कर्तुरिव फलभाक्त्वादिति भावः।

सर्वशक्तेः कारणाद् भवति तद् ब्रह्मेति वाक्यशेषः।

अन्येषामपि भावविकाराणां त्रिष्वेवान्तर्भाव इति जन्मस्थितिनाशानामिह ग्रहणम्। यास्कपरिपठितानां

प्रकटार्थविवरणम्

सर्वशक्तित्वं संभावयति। 'यथा 'यत्र काकस्तिष्ठति, अदो देवदत्तगृहम्' इति काकाधारेण देवदत्तगृहमुपलक्ष्यते, तथा यतः कारणाज्जगतो जन्मादि भवति तद् ब्रह्मेति जगत्कारणेन ब्रह्मोपलक्ष्यते। मायाप्रतिबिम्बितं हि चैतन्यं सर्वज्ञं सर्वशक्तिसमन्वितं जगत्कारणं महावाक्ये तत्पदवाच्यम्। तेन विशिष्टपदार्थेन तत्स्वरूपं बिम्बस्थानीयं ब्रह्मोपलक्ष्यते यदवगतिः जीवस्य पुरुषार्थ इति अथशब्दोपात्तं मुमुक्षुं सामान्यतः प्रतिपन्नं विशेषतो विप्रतिपन्नमुद्दिश्य यत्स्वरूपावगतये विचारः प्रवृत्तः। स्वरूपेण च विशिष्टपदार्थस्य तादात्म्यात् जगत्कारणं ब्रह्मेति सामानाधिकरण्यं न विरुध्यते, काकाधिकरणं गृहमितिवत्। न हि काकाधिकरणत्वं गृहस्वरूपम्; तद्विगमे तद्भङ्गप्रसङ्गादिति द्रष्टव्यम्।

ननु परिणामादयोऽपि भावविकाराः सन्ति; किमिति ते न गृह्यन्त इत्याशङ्क्याह— **अन्येषामपीति**। न ह्यजातस्यास्थितस्याविनष्टस्य वा कश्चिद्विकारस्संभवतीति तदधीनत्वात् तद्ग्रहणेन तेऽपि गृहीता एवेत्यर्थः। ननु निरुक्तकारस्य यास्कस्य "जायतेऽस्ति विपरिणमते विवर्धते परिक्षीयते विनश्यति" इति सूत्रं मूलीकृत्य जन्मादिशब्देन तेषां ग्रहणे अन्तर्भावोक्तिप्रयासः परिहृतो भविष्यतीत्याशङ्क्याह— **यास्केति**। यास्कवचनस्य हि पौरुषेयस्य मूलं तदीयं प्रत्यक्षमेव वक्तव्यम्। तच्च

भाष्यभावप्रकाशिका

तदाश्रयो जगत्, तस्य। तथाहि— प्रतिनियतदेशजन्मानः कृष्णमृगादयः; प्रतिनियतकालोत्पादाः कोकिलारावादयः; प्रतिनियतनिमित्ताः नवाम्बुदनादसंभवा बलाकागर्भवत्त्वादयः, प्रतिनियतक्रियाः ब्राह्मणानां याजनादयः, प्रतिनियतफलम् ब्रह्मलोके सुखम्, नरके दुःखमिति। तदित्थंरूपस्य जगत आकस्मिकत्वं स्वाभाविकत्वं वा जीवकर्तृकत्वं वा न युक्तमिति भावः।

विचित्रकार्यत्वाच्च जगतो विशिष्टविज्ञानवत्कर्तृकत्वं चित्रादिवदनुमातुं शक्यमित्याह— **मनसाऽपीति**। एकस्यापि शरीरस्य रचनाया विविधसिराजालादिसन्निवेशविशिष्टतया रूपं मनसा न शक्यं चिन्तयितुम्, दूरे जगद्रचनायाः; तत् कथमसर्वज्ञः कुर्यादित्यर्थः। **सर्वज्ञादित्यादिना** स्वरूपलक्षणमाह। सूत्रवाक्यं पूरयति— **तद् ब्रह्मेति**।

ननु अन्येऽपि परिणामादयो भावविकाराः सन्ति, ते किमित्यादिग्रहणेन न गृह्यन्त इति, अत्राह— **अन्येषामपीति**। वस्त्ववस्थाविशेषाणामपि जन्मादिव्यतिरेकानिरूपणानां त्रिष्वेवान्तर्भाव[2] इत्यर्थः। यद्यपि वृद्ध्यादयो जन्मादिषु नान्तर्भवन्ति; तथाऽपि जन्म-स्थिति-भङ्गमेवोपादातव्यम्, तथा सति तत्प्रतिपादके "यतो वा इमानि भूतानि" इति वेदान्तवाक्ये बुद्धिस्थे कृते, जगज्जन्म-स्थिति-भङ्गकारणतया ब्रह्म लक्षितं भवति; अन्यथा तु 'जायते' इत्यादीनां ग्रहणे निरुक्तवाक्यमेव बुद्धिस्थं भवेत्। तच्च न मूलकारणप्रतिपादनपरम्; महाभूतसर्गादूर्ध्वं स्थितिकाले तद्वाक्योक्तानां "जायतेऽस्ती"त्यादीनां भावविकाराणामुपपत्तेः। अत उक्तशङ्कानिराकरणार्थं वेदोक्तानां जन्मादीनामेव ग्रहणमित्याह— **यास्केति**। अथवा पौरुषेयवाक्यस्य मूलप्रमाणापेक्षत्वात्,

न्यायनिर्णयः

सजातीयप्रधानादेर्विजातीयाच्च कार्याद् ब्रह्मव्यवच्छेदकतया जगद्धेतुत्वे तटस्थलक्षणे स्थिते ब्रह्मणः स्वरूपलक्षणं विवक्षन् विशिनष्टि— **सर्वज्ञादिति**। अद्वितीयत्वं, सत्यचिदात्मत्वं, स्वतन्त्रतया निरतिशयसुखत्वं च विशेषणाभ्यां विवक्षितम्।

नन्वन्येऽपि परिणामादयो विकारा जन्मादीत्यादिग्रहणेन किं न गृह्यन्ते? तत्राह— **अन्येषामिति**। अजातस्यास्थितस्यानष्टस्य च परिणामाद्ययोगात्, तेषां तदधीनत्वात् तद्ग्रहणेनैव ग्रहात्, जन्मस्थितिनाशानामेवात्रोपादानमित्यर्थः। ननु निरुक्तकारस्य 'जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यति' इति सूत्रं मूलीकृत्य जन्मादिशब्देन षण्णामपि विकाराणां ग्रहणे नान्तर्भावोक्तिक्लेशस्तत्राह— **यास्केति**। जन्मादिसूत्रस्य नैरुक्तोक्तिमूलतयाऽनेन तदुक्तविकारग्रहे तद्वाक्यस्य पौरुषेयत्वान्मूल-

---

१. जगज्जन्मादिकारणत्वस्य तटस्थलक्षणत्वमुपपादयति— यथेति। सूत्रे 'यत' इति यच्छब्देन स्वरूपलक्षणं संगृहीतमिति ज्ञेयम्।

२. तेषां त्रिष्वेवान्तर्भावो भामत्यां स्पष्टः। पृ. ८७.

तु 'जायतेऽस्ति' इत्यादीनां ग्रहणे तेषां जगतः स्थितिकाले संभाव्यमानत्वात् मूलकारणादुत्पत्तिस्थितिनाशा जगतो न गृहीताः स्युरित्याशङ्क्येत, तन्मा शङ्कीति योत्पत्तिर्ब्रह्मणस्तत्रैव स्थितिः प्रलयश्च त एव गृह्यन्ते। न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वाऽन्यतः प्रधानादचेतनादणुभ्यो-

प्रकटार्थविवरणम्

महाभूतसृष्ट्युत्तरकालं भौतिकानां षड्भावविकारगोचरम्; ततस्तन्मूलत्वे सूत्रस्य भूतपञ्चकं ब्रह्मेति लक्षितं स्यादिति; तस्माच्छ्रुतिसिद्धाविशेषितजन्माद्युपादानेन लक्षणसूत्रं प्रवृत्तमित्यर्थः। युक्तिमन्तरेण लक्षणस्यातिव्याप्तिपरिहारासंभवात् साऽप्यर्थादनेन सूत्रितेत्यभिप्रेत्य तामाह— **न यथोक्तेत्यादिना**। अस्य च प्रपञ्चो द्वितीये[1] भविष्यति। "स्वभावादेव विचित्रं जगत्"

भाष्यभावप्रकाशिका

अनुमानादेस्तन्मूलत्वेनास्यास्माकमपि प्रवृत्तेस्तद्वाक्यानपेक्षणात्, प्रत्यक्षमूलताङ्गीकारे भौतिकधर्मविकाराणामेव प्रत्यक्षेणावगन्तुं शक्यत्वात्, आकाशादिमहाभूतस्य समस्तस्य ब्रह्मकर्तृकस्य प्रत्यक्षेण श्रुतिं विना ग्रहीतुमशक्यत्वात्, भौतिकविकारकारणे महाभूतपञ्चक एव ब्रह्मबुद्धिः स्यात्; अतः श्रुतिनिर्दिष्टा एव जन्मादयो गृह्यन्त इत्याह— **यास्केति**। ननु एवमप्युत्पत्तिरेव सूच्यताम्, तन्नान्तरीयकतया तत्स्थिति-भङ्गं ज्ञास्यत इत्यत आह— **योत्पत्तिरित्यादि**। उत्पत्तिमात्रं निमित्तकारणादपि संभवति, ततस्त्रिभिरस्योपादानत्वं सूच्यते; अनुपादाने स्थिति-लयासंभवादिति भावः। कारणत्वे या युक्तिरनेन सूत्रेण सूत्रिता, तामाह— **न यथोक्तेति**। "नाम-रूपाभ्यां व्याकृतस्ये" त्याद्यभिहितविशेषणचतुष्टयस्येत्यर्थः। **यथोक्तविशेषणमिति**। सर्वज्ञं सर्वशक्तिक-मित्यर्थः। **प्रधानादिति**। सर्वे विकाराः, सुखदुःखमोहसामान्यप्रकृतिकाः, तदन्वितस्वभावत्वात्, ये विकारा यदन्वितस्वभावास्ते तत्प्रकृतिका दृष्टाः, यथा मार्तिकाः शरावादयः। तथा— सर्वे विकाराः अविभक्तैकप्रकृतिकाः, परिमितत्वात्, अनेकत्वात्, विकारत्वाच्च; शरावादिवदिति सांख्याः प्रधानमनुमिमते। अणुवादिनश्च— सर्वं कार्यं द्रव्यम्, स्वपरिमाणादणुतरपरिमाण-संयोगसचिव-समानजातीयानेकद्रव्यारब्धम्, कार्यद्रव्यत्वात्; घटादिवदिति, निरवयवपरमाणुपर्यन्तमनुमानप्रवृत्तेः परमाणवो

न्यायनिर्णयः

मानापेक्षत्वात्, आगमस्य तन्मूलत्वे सूत्रस्यैव तत्सिद्धौ नैरुक्तोक्तिमूलतानर्थक्यादध्यक्षं तदुक्तिमूलं वाच्यम्; तच्च महाभूतसर्गादूर्ध्वं संभावितं भौतिकविकारगोचरम्; ततो यथोक्ताध्यक्षाधीननैरुक्तोक्तिमूलत्वे सूत्रस्य, जन्मादिषट्कं जगतो यतः तद् ब्रह्मेत्युक्ते भूतपञ्चकस्य भौतिकविकारहेतुत्वात् तदेव ब्रह्मेति लक्ष्येत; न भूतपञ्चकस्य जन्मादयो मूलकारणाद् ब्रह्मणो गृह्येरन्, एतत्सूत्रमूलभूतनैरुक्तसूत्रस्य तदगोचरत्वात्। तस्मान्मूलकारणं ब्रह्म न लक्षितमित्याशङ्कां निरसितुं ब्रह्मणः सकाशादुत्पत्तिर्या जगतः श्रुता, यौ च तस्मिन्नेव तस्य स्थितिलयौ श्रुतौ, ते जन्मादिशब्देन गृह्यन्ते। तेन तद्विषये 'यतो वा' इत्यादिवाक्ये बुद्धिस्थे जगज्जन्मादिकारणं ब्रह्म लक्षितं भवतीत्यर्थः। न चैवमपि जन्मैव सूत्र्यताम्, तन्नान्तरीयकतया स्थितिभङ्गं सेत्स्यतीति युक्तम्; जन्ममात्रस्य निमित्तादपि संभवात्, त्रिभिरस्योपादानतासूचनात्, अन्यत्र स्थितिलयायोगात्। न च लयाधारत्वादेवोपादानत्वे जन्मस्थितिवचनानर्थक्यं, प्रकृतिविकाराभेदेनाद्वैतसिद्धये त्रयाणामादेयत्वात्। अन्यथा ब्रह्मणो जगदुपादानत्वे तदुत्पत्तिस्थित्योर-न्योऽधिष्ठाता, कुम्भोद्भवे कुम्भकारवत्, राज्यस्थेम्नि राजवच्चेत्याशङ्क्येत, तन्मा शङ्कीति त्रयाणां ग्रहणमिति भावः। युक्तिं विना लक्षणस्यातिव्याप्त्यसमाधेरर्थादनेन साऽपि सूत्रितेति तामुपन्यस्यति— **नेत्यादिना**। नामरूपाभ्यामित्यादिनोक्तविशेषण-चतुष्टयविशिष्टस्येत्याह— **यथोक्तेति**। सर्वज्ञं सर्वशक्तिसमन्वितमित्युक्तं स्मारयति—**यथोक्तविशेषणमिति**। उक्तस्य जगतो नोक्तमीश्वरं मुक्त्वाऽन्यस्मादुत्पत्त्यादि संभावयितुं शक्यमिति संबन्धः। ननु सर्वे विकाराः सुखदुःखमोहसामान्यप्रकृतिकाः, तदन्वितस्वभावत्वात्। ये यदन्वितस्वभावास्ते तत्प्रकृतिकाः यथा मृदन्वितस्वभावाः शरावादयो मृत्प्रकृतिका इत्यनुमानात्, प्रधानाज्जगज्जन्मादि स्यादित्याशङ्क्याह— **न प्रधानादिति**। तद्ध्यचेतनं जगदनभिज्ञं न तस्योत्पत्त्यादि कर्तुमीष्टे। अन्तर्बहिर्भावेन सुखादीनां पटादीनां चाध्यक्षेण भेदग्रहात्, एकार्थज्ञाने चैकस्यैव ज्ञातुः सुखाद्यात्मत्वेन युगपत् तद्ग्रहापाताद्द्वैत्वसिद्धेर्न प्रधानकारणता। रचनानुपपत्त्यधिकरणे चैतद् वक्ष्यतीति भावः। सर्वं कार्यद्रव्यं, स्वपरिमाणादणुतरपरिमाण-

१. द्वितीये=द्वितायाध्याये।

ऽभावात् संसारिणो वा उत्पत्त्यादि संभावयितुं शक्यम्। न च स्वभावतः, विशिष्टदेशकाल-निमित्तानामिहोपादानात्।

प्रकटार्थविवरणम्

इति लोकायतः। तं प्रत्याह— **न च स्वभावत इति**। अन्वयव्यतिरेकाभ्यां कार्यस्य लोके कारणापेक्षानियमदर्शनात् तदपलापोऽशक्यकरणः। तर्कतो निरूपणासहत्वं त्वस्माकं भूषणमेव, 'यद् रजतमभात् सा शुक्तिः' इति मिथ्याभूतस्यापि लक्षणत्वदर्शनादिति।

ननु वैशेषिकादयोऽनुमानत एव जगत्कारणं सर्वज्ञमीश्वरं व्यवस्थापयन्ति। किमागमानुगुणयुक्तिसूत्रणेनेत्याशङ्क्याह—

भाष्यभावप्रकाशिका

मूलकारणमिति— कल्पयन्ति। शून्यवादिनश्च— सर्वं कार्यम्, अभावपुरस्सरम्, योग्यत्वे सत्यनुपलभ्यमानपूर्वावस्थत्वात्; यदेवं न भवति, न तदेवम्, यथा परकल्पित आत्मेति— मन्यन्ते। योगिनश्च हिरण्यगर्भं संसारिणमागमसामर्थ्याद् जगत्कारणं कल्पयन्ति। तान् व्यावर्तयति— **संभावयितुमिति**। अयं भावः— अन्तर्बहिर्भावभेदेन सुख-दुःख- मोहानां घटादिविकाराणां च प्रत्यक्षेण भेदग्रहणादेरेकपदार्थोपलम्भे चैकस्यैव सुखाद्यात्मत्वेन युगपद् ग्रहणप्रसङ्गात् अदृष्टेन च वस्तुसामर्थ्यनियमायोगादसिद्धः सांख्यानां हेतुः, अनैकान्तिकश्च; शौक्ल्यादिगुणैर्घटादीनां परापरसामान्यैश्च द्रव्याणामप्रकृतिभिरप्यनुमानात्। परिमितत्वस्य च न हेतुत्वम्; वस्तुतः परिमितत्वाङ्गीकारे पुरुषेष्वनेकान्तः। देश-कालाभ्यां परिमितत्वाङ्गीकारे च करकादिषु प्रत्यक्षदृष्टभिन्नप्रकृतिष्वनेकान्तः। अनेकत्वहेतुश्च पुरुषेष्वनेकान्तः। अथानेकत्वसंख्यागुणत्वं हेतुः, अथापि सत्त्वाभावेऽनेकान्तः। विकारत्वहेतुरपि घट-करकादिष्वनेकान्तः। अणुवादिनोऽपि दीर्घविस्तीर्णोर्णादुकूलैः क्रियमाणरज्जुद्रव्यस्य ह्रस्वस्यापि कार्यत्वदर्शनादनेकान्तो हेतुः। शून्यवादिनोऽपि घटस्य पूर्वावस्था मृत् प्रत्यक्षोपलब्धेत्यसिद्धो हेतुः। आगमस्तु हैरण्यगर्भादीनां वेदविरोधादप्रमाणमिति। स्वभाववादिमतं व्यावर्तयति— **न च स्वभावत इति**। अयं भावः— स्वभावादुत्पद्यत इति किं स्वयमेव स्वस्य निमित्तमित्युच्यते? किं वा निर्निमित्तमुत्पद्यत इति? आद्ये आत्माश्रयता, द्वितीये पटस्य भावाभावौ निर्निमित्तत्वाविशेषाद् युगपत् स्याताम्। स्वतस्सिद्धसामर्थ्यानां च भावानां परस्परोपकार्योपकारकभावस्य प्रत्यक्षसिद्धत्वादन्यनिरपेक्षस्वभावस्य न कारणत्वमिति।

तदनेन प्रबन्धेन जगत्कारणे ब्रह्मणि संभावना, उत्तरत्र प्रमाणमुक्तम्। यथाहुः— "संभावितः प्रतिज्ञायां पक्षः साध्येत हेतुना। न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः" इति। इदानीमिममेव संभावनाहेतुमन्येऽनुमानरूपतया निश्चयहेतुं मन्यन्त इति

न्यायनिर्णयः

संयोगसचिवसमानजातीयानेकद्रव्यारब्धं, कार्यद्रव्यत्वात्, घटवदित्यनुमानात् अणुभ्यो जगज्जन्मादि संभावितमित्याशङ्क्याह— **नाणुभ्य इति**। दीर्घविस्तीर्णदुकूलारब्धरज्जुद्रव्यस्य ह्रस्वस्यापि कार्यद्रव्यत्वेनानैकान्त्यात्, वैशेषिकाधिकरणे चाणुकारण-तानिराकरणात् न तेभ्यो जगज्जन्मादीत्यर्थः। शून्यवादिनस्तु— सर्वं कार्यम्, अभावपूर्वकं, योग्यत्वे सत्यदृष्टपूर्वावस्थत्वात्, परकीयात्मवदिति व्यतिरेकिणा शून्यस्य जगद्धेतुतामाहुः; तान् प्रत्याह— **नाभावादिति**। घटस्य पूर्वावस्था मृदध्यक्षेति हेत्वसिद्धेर्न शून्यस्य जगद्धेतुतेत्यर्थः। केचित्तु हिरण्यगर्भं संसारिणमेव आगमाज्जगद्धेतुमाचक्षते; तान् प्रत्युक्तम्— **न संसारिणो वेति**। आगमस्य वेदविरुद्धत्वे प्रामाण्यायोगान्नासौ जगद्धेतुरित्यर्थः। स्वभाववादं व्युदस्यति— **न चेति**। उत्पत्त्यादि जगतः संभावयितुं न शक्यमिति संबन्धः। स्वभावादुत्पद्यत इति स्वयमेव स्वस्य निमित्तमिति वा निमित्तानपेक्षमिति वा विवक्षितम्? नाद्यः, '[1]स्वाश्रयत्वात्। न द्वितीयः, भावाभावयोरनिमित्तत्वे यौगपद्यापातात्। स्वतःसिद्धसामर्थ्यानां चार्थानामन्योन्योपकार्योपकारकत्वस्याध्यक्षत्वादित्यर्थः।

उक्तलक्षणव्यतिरेक्यनुमानादेवोक्तयुक्तिसहिताद् ब्रह्मणोऽस्तित्वादिसिद्धेः शास्त्रयोनित्वाद्यधिकरणवैयर्थ्यमित्याशङ्क्याह—

१. स्वाश्रयत्वात्=आत्माश्रयात्।

एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्त ईश्वरकारणिनः।

प्रकटार्थविवरणम्

एतदेवेति। येयं युक्तिरुक्ता— सर्वज्ञमीश्वरं विहाय नामरूपाभ्यां व्याकृतस्येत्यद्यभिहितविशेषणस्य जगतो जन्मादि प्रधानादेः संभावयितुं न शक्यते, अचेतनत्वेन वैचित्र्यसम्पादनाशक्तेः इति— एतदेवानुमानं निश्चायकमिति भ्रमादेव[१] मन्यन्त इत्यर्थः।

यथा हि धूमजातीयमग्निजातीयेनाविनाभूतं भूयोदर्शनसंस्कारसध्रीचीनाक्षसंप्रयोगेण गृहीतमिति पर्वतेऽपि धूमजातीयो दृष्टः स्वव्यापकसम्बन्धं पर्वतस्य गमयति पक्षधर्मताबलात्, न तथा कार्यमात्रस्य, तद्विशेषस्य वा सर्वज्ञाशरीरकर्त्रा व्याप्तिः क्वाप्युपलब्धा। अतः पक्षधर्मताबलादपि पृथिव्यादेः कार्यता कथङ्कारं सर्वज्ञाशरीरकर्तृकत्वं साधयेत्? विमतं सकर्तृकम्, कार्यत्वात् कुम्भवदिति सिद्धसाधनम्[२]। यथाशब्दं ह्यनुमाने साधनदूषणे[३], नाभिप्रायवशात्; अन्यथा प्रसिद्धिध्वंसात्। कर्तृजन्यताऽपि तथा; अदृष्टद्वारेण जीवजन्यत्वात्। कार्यत्वं [४]सप्रतियोगिकं तन्निश्चयं विना न निश्चीयते भेद इव प्रत्यक्षेण; अतः सन्दिग्धासिद्धो हेतुः। [५]कारणान्तरेण नैराकाङ्क्ष्ये चाप्रयोजकत्वम्। सावयवत्वं द्रव्यान्तरसमवेतत्वं कारणे सन्दिग्धे सन्दिग्धमिति न कार्यत्वसाधकम्; मध्यमपरिमाणवत्त्वं च। विचारासहमेव चेत् साधनम्; अपसिद्धान्तः; तत्सहं चेत्, तर्हि सिद्धं सम्बध्येत असिद्धं वा? नोभयथाऽपि। धूमवत्त्वमपि नो[६] विचारासहमेवेति न साम्यम्। कार्यत्वं च प्रागसतः सत्तासमवायादिलक्षणं तदितरेतराश्रयात् न निश्चेतुं शक्यम्। न चौपनिषदं प्रति विद्युदादिप्रतिबन्दिग्रहः। तस्मादयुक्तं कार्यानुमानम्।

यच्चावाचि— कर्तृमात्रमनुमानात् सिद्ध्यति, सर्वज्ञत्वादिसिद्धिरनुपपत्त्या इति; तन्न, [७]कतिपयपरिचयमात्रेणापि कर्तृत्वोपलम्भात्। न हि कुम्भकारोऽदृष्टं तन्निमित्तं ज्ञातुमीष्टे; नापि मधुधारणादिप्रयोजनविशेषम्; नापि क्रेतृपुरुषविशेषम्। नाप्येकत्वम्, बहुकर्तृकस्यैव प्रासादादेरुपलम्भात् महतः[८] कल्पनालाघवानवतारात्। एकस्य शरीरादिरहितस्य नित्या ज्ञानेच्छाप्रयत्ना इति परस्यैव गरीयसी कल्पना। किञ्च यथा पचियोगात् पक्ता, तथा कृतियोगात् कर्ता; अतः पक्षधर्मताबलेन कृतिमत्सम्बन्धे सिद्धेऽपि प्रमातृसम्बन्धः कथं सिद्ध्यति, [९]भ्रान्त्युत्प्रेक्षापूर्वकृतिमत्त्वस्य कुलालादावेव बहुलमुपलम्भात्। अथ उपादानसाक्षात्काराधीन-

भाष्यभावप्रकाशिका

संभावनाहेतुतां दर्शयितुमाह— **एतदेवेति।** येयं युक्तिरभिहिता, "न यथोक्तविशेषणस्ये"त्यादि, एतदेव स्वतन्त्रमनुमानम्, जगत्कारणपरवेदवाक्यानि च परार्थानुमानसमानीति मन्यन्ते, तदनुपपन्नम्; संभावनामात्रबुद्धिहेतुत्वाद् निश्चायकत्वानुपपत्तेः। उदाहरणदर्शनं युक्तिः, अव्यभिचारिणी च व्याप्तिरनुमानमिति विभागात्, अत्र च व्याप्तेरभावादिति भावः।

न्यायनिर्णयः

एतदेवेति। युक्तिमदुक्तलक्षणमेव स्वतन्त्रमनुमानं सद् विशिष्टेश्वरनिश्चायकमिति यद्वैशेषिकादिमतं, तदयुक्तम्। लक्षणं हि युक्तिमदपि सिद्धस्य ब्रह्मणः सजातीयादिव्यावर्तकम्, न तु तदीदृशमिति तत्स्वरूपनिश्चायकम्। कार्यलिङ्गकानुमानं च कारणसत्तामात्रे पर्यवस्यत्तदेकत्वादौ तटस्थम्। न च तदैक्यासिद्धौ तदीयं सर्वज्ञत्वादि ज्ञातुं शक्यम्। सोऽयं जगद्धेतौ नानात्वैकत्वस्पर्शी संशयो लाघवादुत्कटैककोटितां नीतो मूलकारणे विशिष्टे ब्रह्मणि संभावनेत्युच्यते। संभाविते तस्मिन् प्रमाणावकाशात् उत्तराधिकरणार्थवत्तेति भावः।

---

१. लक्षणेन संभाविते ऽर्थे प्रमाणकथनस्यावसरात् पूर्वसूत्रे ब्रह्मशब्दोक्तनिरतिशयबृहत्त्ववद्वस्तुसंभावनार्थमेतल्लक्षणसूत्रणम्। संभावनाया दृढीकरणार्थमेव च तार्किकभ्रमोपन्यासो भाष्य इति भामती। पृ. ८८.

२. यत्किञ्चित्कर्तृसहितत्वस्य सिद्धत्वादिति भावः। द्र. तत्त्व चि. ईश्वरानुमानप्रकरणे।

३. साधनं च दूषणं चेति द्वन्द्वः। तथा=सिद्धसाधनग्रस्ता। ४. सप्रतियोगिकम्=निरूपकसहितम्। कारणनिरूप्यमिति यावत्। तथा च कारणनिरूपणं विना कार्यत्वमेव न निश्चीयत इति भावः। ५. कारणान्तरेण=विमतं, कार्यं, सावयवत्वात् इत्याद्यनुमानेन, नैराकाङ्क्ष्ये=कार्यत्वस्य निश्चये।

६. नः=वेदान्तिनाम्। ७. तथा च न सर्वज्ञत्वं विनाऽनुपपत्तिरिति भावः।

८. महतः प्रासादादेः बहुकर्तृकस्यैवोपलम्भात् कल्पनालाघवानवतारादिति योजना। ९. तथा चेश्वरीयज्ञानस्य प्रमात्मकत्वं न सिध्येदिति भावः।

१०. साक्षात्कारोऽत्र प्रमात्मको विवक्षितः।

प्रकटार्थविवरणम्

कृतिमत्त्वं कर्तृत्वम्, तर्हि शब्दोपादानसाक्षात्कारानभ्युपगमादस्माकमनैकान्त्यम्[१]। न च तस्यापि पक्षता[२], अनादिप्रसिद्धकर्तृकादन्यत्[३] सकर्तृकमिति उदयनोद्गारात्। [४]तत्राप्युक्तविधकर्तृकत्वसाधने प्रत्यक्षविरोधोऽनुपलब्धिविरोधो वा। यथा विमतं शिरः शृङ्गि, शिरस्त्वात्, संप्रतिपन्नवत् इति। [५]अत्र अयोग्यत्वादनुपलम्भः स्यादिति सदनुमानतापातः। शृङ्गत्वाद् योग्यत्वे कर्तृत्वादित्येवोत्तरम्। न च कर्ता प्रत्यक्षागोचरः, व्याप्तिग्रहणाभावप्रसङ्गात्।

ननु पर्वते वह्निसाधनमप्यनुपलब्धिबाधितं स्यात्; न, प्रत्यक्षोपलब्ध्यभावेऽपि कार्यस्य निष्कारणकत्व-प्रसङ्गतर्कप्रसूतोपलब्धिसंभवात्। नेह तर्कस्याप्यवसरः, परिदृष्टेनेव कर्त्रा नैराकाङ्क्ष्यात्। किञ्च भवदुक्तकर्तृलक्षणे प्रलयस्य कुम्भादिध्वंसस्य चाकर्तृकत्वप्रसङ्गः[६]।

अथ भावकार्यस्योक्तविधकर्तृत्वोपलम्भात् क्षित्यादेरपि तदनुमानम्। तर्हि शरीरिपूर्वकत्वस्याप्युपलम्भात् तदपि किं नानुमीयते? न चैतत् सावयवत्वमपि स्यादितिवत् [७]जातिमात्रम्, [८]सर्वत्राव्यभिचारात्। सावयवत्वं तु क्रियादौ व्यभिचरतीत्यसदुत्तरम्। तस्मादतीन्द्रियेऽपि त्वद्दृष्टं किञ्चिदेवानुमातव्यम्, न मद्दृष्टमिति नियामकाभावात् नानुमानात् सर्वज्ञकर्तृकत्वनिश्चयः।

अयं घट एतज्जनकानित्येतरज्ञानजन्यः[९], कार्यत्वात् पटवत् इत्यत्र विपक्षबाधकाभावात्, [१०]अयं घट एतज्जनकागर्दभेतरजन्यः, कार्यत्वात् पटवदित्यतिप्रसङ्गलक्षणप्रतिकूलतर्कपराहतत्वाच्चाप्रयोजकता।

यश्चायं व्यतिरेकी— क्षित्यादि सर्वज्ञकर्तृकं, कार्यत्वात्, न यदेवं न तदेवं यथा नभ इति; तत्र सर्वज्ञकर्तृकत्वाभावप्रमितेः सर्वज्ञमितिसापेक्षत्वादितरेतराश्रयपाशवारितत्वेन [११]व्यतिरेकानवधारणमिति सन्दिग्धानैकान्तिकम्। न ह्यस्माकमिव तार्किकाणां प्रसिद्धिमात्राद् व्याप्त्यध्यवसायः। किञ्चाप्रसिद्धविशेषणः[१२] पक्षः, अन्यथा शशविषाणकर्तृकत्वप्रसाधनेऽपि व्यतिरेकिणो निवारकानुपलम्भात् नायमपि निश्चायक इत्यलम्।

---

१. अस्ति ह्यस्मासु शब्दकर्तृत्वम्। न च तदुपादानाकाशसाक्षात्कारोऽस्ति। तस्य तद्वीत्याऽतीन्द्रियत्वात्। तथा च यत् कार्यं तत् तदुपादानसाक्षात्काराधीन-कृतिजन्यमिति व्याप्तेः शब्दे व्यभिचारः। न चेश्वरीयसाक्षात्कारमादाय परिहारः, तस्येदानीमेव साध्यमानत्वात्।

२. शब्दस्य पक्षान्तर्गतत्वे तत्रेश्वरीयतादृशकृतिजन्यत्वस्य संदिह्यमानत्वात् न व्यभिचारनिश्चयः। पक्षीयव्यभिचारसंशयस्तु न दोष इति पूर्वपक्षाशयः।

३. अनादिप्रसिद्धकर्तृकान्यत् सकर्तृकम्, कार्यत्वात्, घटवत्। आकाशादौ बाधवारणायानादिभिन्नत्वदलम्। घटादौ सिद्धसाधनवारणाय प्रसिद्धकर्तृकभिन्नत्वम्। शब्दस्य च प्रसिद्धकर्तृकत्वात् न पक्षान्तर्भावसंभव इति भावः। इदमनुमानं न्यायरत्नदीपावल्यादावपि अनूद्य दूषितम्।

४. ननु त्यज्यतां प्रसिद्धकर्तृकान्यत्वदलम्। पक्षतावच्छेदकावच्छेदेन च साध्यानुमितौ घटादावंशतः सिद्धिर्न दोषः। तथा च शब्दस्य पक्षान्तर्गतत्वं युक्तमित्याशङ्क्य तथाप्यनुपलब्धिबाधितमनुमानमित्याह— तत्रापीति। अभावप्रत्यक्षमतानुसारेण प्रत्यक्षेत्युक्तम्।

५. ईश्वरस्यातीन्द्रियत्वात् न योग्यानुपलब्धिसंभव इत्याशङ्क्य प्रतिबन्दीमाह— अत्रेति। अत्र='विमतं शिरः शृङ्गि' इत्यत्रापि।

६. ध्वंसस्योपादानाभावादिति भावः। ७. जातिः = असदुत्तरम्। 'शब्दः अनित्यः कृतकत्वात्, घटवत्' इति प्रयोगे 'यदि कृतकत्वाद् घटवदनित्यः शब्दः, तर्हि तेनैव हेतुना घटवदेव सावयवोऽपि स्यात्'—इत्यापादनमुत्कर्षसमा जातिः। तथा पूर्वोक्तानुमाने 'यदि भावकार्यत्वाद् घटवत् क्षित्यादेः उपादानसाक्षात्कारवत्कर्तृकत्वम्, तर्हि तद्वदेव शरीरिकर्तृकत्वमपि स्यादित्यापादनं जात्युत्तरमिति शङ्काऽभिप्रायः।

८. वैषम्येण परिहरति—सर्वत्रेति। कृतकत्वेन सावयवत्वापादनमयुक्तम्; क्रियादौ कृतकत्वे सत्यपि सावयवत्वाभावेन व्यभिचारात्। भावकार्यत्वं तु संप्रतिपन्नस्थले शरीरिकर्तृकत्वाव्यभिचारीति भावः।

९. एतच्च महाविद्यानुमानमित्युच्यते। 'केवलान्वयिनि व्यापके प्रवर्तमानो हेतुः पक्षे व्यापकप्रतीत्यपर्यवसानबलादन्वयव्यतिरेकिसाध्यविशेषं वाद्यभिमतं साधयन् हि महाविद्या' इति नयनप्रसादिनी। (पृ. ३९५) प्रकृते च एतद्घटजनकानित्यज्ञानं कुलालस्य मृदादिविषयज्ञानम्, तदन्यज्ञानं तन्तुवायस्य तन्त्वादिज्ञानम्, तज्जन्यत्वं पटे इति दृष्टान्ते समन्वयः। पक्षे तु एतज्जनकानित्येतरनित्यज्ञानजन्यत्वमादाय साध्यपर्यवसानम्। तादृशनित्यज्ञानाश्रयतया चेश्वरसिद्धिरिति भावः।

१०. आभाससाम्येन दूषयति— अयं घट इत्यादिना। ईदृश्येव पङ्क्तिः पदार्थतत्त्वनिर्णयाख्ये ग्रन्थे मानमनोहरकारं प्रत्युपलभ्यते। (द्र. पृ. ३९)

११. कार्यत्वाभावसर्वज्ञकर्तृकत्वाभावयोः खल्वत्र व्याप्तिरास्थेया। न च प्रमितस्यैवाभावस्वीकर्तुः सर्वज्ञकर्तृकत्वाभावः सिध्यति। सर्वज्ञप्रमाऽभावेन तत्कर्तृकत्वस्यैवाप्रमितत्वादिति भावः।

१२. अप्रसिद्धविशेषणत्वं=साध्याप्रसिद्धिः। ननु व्यतिरेकिणि साध्यप्रसिद्धिर्नाङ्गमित्याशङ्क्य निराचष्टे— अन्यथेति।

नन्विहापि तदेवोपन्यस्तं जन्मादिसूत्रे। न; वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्। वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते। वाक्यार्थविचारणाऽध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, नानुमानादिप्रमाणान्तरनिर्वृत्ता। सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवन्न निवार्यते, श्रुत्यैव च सहायत्वेन तर्कस्याभ्युपेतत्वात्। तथाहि— 'श्रोतव्यो

प्रकटार्थविवरणम्

ननु भवदीयसूत्रकारेणाप्यनुमानमेवोपन्यस्तम्; तत् कथमनिश्चायकमुच्यत इत्याह— **नन्विति**। ब्रह्मावगतये हि शारीरकप्रणयनम्; सा च वाक्यार्थान्वयिपदार्थविचारणासमुत्थलक्ष्यवस्त्वध्यवसाननिर्वृत्तेति न प्रमाणान्तरं सूत्रयाम्बभूवेत्याह— **न; वेदान्तेति**। किमत्यन्तानपेक्षितमेव मानान्तरमिति? नेत्याह— **सत्स्विति**। यथा— विमतम् अभिन्ननिमित्तोपादानम्, कार्यत्वात् सुखादिवदिति मीमांसकं प्रति, तार्किकाणां चेश्वरस्य निमित्तत्वे सिद्धे विमतं चेतनप्रकृतिकम्, कार्यत्वात् सुखादिवदिति प्रयोक्तव्यम्— "तदात्मानं स्वयमकुरुत" इति श्रुतिसिद्धाभिन्ननिमित्तोपादानत्वसम्भावनाय। किञ्च मननशब्दाभिधेययुक्त्यनुसन्धानं विदधती श्रुतिरेव तर्कापेक्षां दर्शयतीत्याह— **श्रोतव्य इति**। अन्याऽपि श्रुतिः स्वस्य पुरुषबुद्ध्यपेक्षां दर्शयतीत्याह— **पण्डित**

भाष्यभावप्रकाशिका

ननु सूत्रेऽप्यनुमानमेवोपन्यस्तम्, तत् कथमाह— मानानुगुणभूतेयं युक्तिः? इति चोदयति— **नन्विहापीति**। परिहरति— **न; वेदान्तेति**। विचारस्याध्यवसानं नाम शब्दज्ञानानुसारिभिर्न्यायैर्ब्रह्मणि वेदान्तानां तात्पर्यनिश्चयः। तन्निर्वृत्ता ब्रह्मावगतिः, ब्रह्मसाक्षात्कार इत्यर्थः। एतदुक्तं भवति— अनुमानमात्रात् कारणसद्भावमात्रं सिध्यति, न तु सत्य-ज्ञानादिलक्षणं ब्रह्म। न च कारणस्यैकत्वम्। तदवगतिश्चेह विवक्षिता नागमं विना सिध्यतीति।

ननु तर्हि शब्दादेव ब्रह्मावगतेर्मननविधानं युक्तिसूत्रं वाऽनर्थकं स्यादित्यत आह— **सत्स्विति। श्रुत्यैव तर्कस्य स्वसहायत्वेन स्वीकृतत्वात्**। तथाहि— कुतः तर्कोऽपेक्ष्यते? इत्यत्राह— **श्रोतव्य इति। आत्मनः स्वस्या इत्यर्थः**। युक्तिसाहाय्यापेक्षणे

न्यायनिर्णयः

अथेदं सूत्रमुक्तब्रह्मनिश्चायकं न वा? न चेदप्रामाण्यात् तदुक्तलक्षणेऽपि विश्वासो न स्यात्। आद्ये व्यतिरेकिणो लक्षणस्य सूत्रोक्तकार्यलिङ्गकानुमानवन्नानिश्चायकतेति चोदयति—**नन्विति**। तदेवेत्येवकारेणागमो वा तदनुगुणयुक्तिर्वा न सूत्रितेत्युच्यते। प्रस्तुतानुमानं तदर्थः। 'नावेदविन्मनुते' 'नैषा तर्केण' इत्यादिश्रुतेर्वैदिकं ब्रह्मेत्युक्तयुक्त्यनुगृहीतलक्षणाख्यव्यतिरेक्यात्मकागमोक्तिपरं सूत्रमिति परिहरति— **नेत्यादिना**। कार्यानुमानस्य 'यतः' इत्यादिश्रुत्युक्तत्वेऽपि नानुमानात्मना निश्चायकत्वम्; तेन संभावनामात्राभिधानात्। आगमात्मना तु निश्चायकत्वमिति भावः। उत्तरसूत्रेष्वपि तुल्यमागमप्राधान्यमिति वक्तुं सूत्राणामित्युक्तम्। सूत्रेषु कुसुमग्रथनवन्न वाक्यग्रथनं मुख्यमित्याशङ्क्याह— **वेदान्तेति**। तेषामपौरुषेयत्वेन निर्दोषाणां स्वत एव स्वार्थनिश्चायकत्वात् विचारानर्थक्यमित्याशङ्क्याह— **वाक्यार्थेति**। वाक्यस्य तदर्थस्य च तात्पर्यनिश्चयार्थं संभावनार्थं च विचारणा, तस्याश्चाध्यवसानं तदुभयनिश्चयः, तेन निर्वृत्तो ब्रह्मसाक्षात्कारः, तस्माद् विचारोऽर्थवानित्यर्थः। विचारावधारितशक्तितात्पर्याभ्यां प्रमापकं शब्दं हित्वा शक्तिमात्रेण प्रमापकं प्रमाणान्तरं ब्रह्मणि लाघवादादेयमित्याशङ्क्याह— **नेति**। ब्रह्मणस्तदगोचरत्वादित्यर्थः। तर्हि शब्दादेव ब्रह्मसिद्धेर्मननविधिर्युक्तिसूत्रणं च कथमित्याशङ्क्याह— **सत्स्विति**। विमतमभिन्नोपादानाधिष्ठातृकं, कार्यत्वात्, सुखादिवत्। विमतं चेतनप्रकृतिकं, कार्यत्वात्, तद्वदित्याह— **अनुमानमपीति**। तेषु सत्सु तदपि प्रमाणं भवन्न निवार्यत इति संबन्धः। विचारसंस्कृतवेदान्तानां स्वार्थबोधित्वसिद्धौ किं तेनेत्याशङ्क्याह— **तदर्थेति**। तेषामर्थो जगतोऽभिन्ननिमित्तोपादानत्वम्, तस्य ग्रहणं स्वीकारः, तस्य दार्ढ्यम् तदुपयोगिसंभावनात्मा निश्चयः, स्तदर्थमनुमानमित्यर्थः। विमतं भिन्नोपादानाधिष्ठातृकं, कार्यद्रव्यत्वात्, घटवदित्यनुमानबाध इति चेन्नेत्याह— **वेदान्तेति**। जगतश्चेतनोपादानतानिमित्तत्ववादिवेदविरोधान्न तेऽनुमानम्। मन्मते तदविरोधात्तदर्थे संभावनाहेतुरित्यर्थः। जगद्धेतुर्न तर्कगम्यः, वैदिकत्वात्, परिशुद्धवस्तुवदित्याशङ्क्याह— **श्रुत्येति**। तर्कस्य वस्तुनिश्चयाय श्रुत्यैवेष्टतया साध्यविकलतेत्यर्थः। काऽसौ

मन्तव्यः' (बृ० २।४।५) इति श्रुतिः, 'पण्डितो मेधावी गन्धारानेवोपसंपद्येतैवमेवेहाचार्यवान् पुरुषो वेद' (छान्दो. ६।१४।२) इति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति।

न धर्मजिज्ञासायामिव [1]श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्। किंतु श्रुत्यादयोऽनुभवादयश्च

प्रकटार्थविवरणम्

इति। यथा कश्चिद् बुद्धिमान् तर्ककुशलः चोरैश्चक्षुषी बद्ध्वा गान्धारदेशाद् दूरतरारण्ये निहितोऽपि वनेचरादिप्रश्नपरम्परया स्वदेशमेव प्राप्नोति, तथा अविद्याकामादिचोरैः स्वदृष्टिमपहृत्य संसारारण्ये निहितः पुरुषः कारुणिकेनाचार्येण "तत्त्वमसि" इति श्रावितः बुद्धिमांश्चेत् पुनःपुनः परिप्रश्नेन तां तामाशङ्कां निरस्य स्वरूपमध्यवस्यति। मन्दबुद्धिश्चेत् असंभाव्यमानतया श्रुतिं हित्वा अन्यदेव जिज्ञासते। ततः पुरुषकौशलमपि श्रुत्याऽवगतिसिद्धयेऽपेक्ष्यत इति भावः।

ननु यथा धर्मजिज्ञासायां यत् श्रुत्यादिभिर्विनियुक्तं तदेवानुष्ठीयते, न पुरुषकौशलमप्यपेक्षते, तथा वेदार्थत्वाविशेषात् न ब्रह्मजिज्ञासायामप्यन्यापेक्षा युक्तेत्याशङ्क्याह— **न धर्मजिज्ञासायामिवेति।** श्रुतिः पदान्तरनिरपेक्षः शब्दः। [2]तद् विनियोगे मानम्, यथा प्रकरणाम्नानादपूर्वार्थत्वे मन्त्राणां सिद्धे "कदाचन स्तरीरसि" इत्यस्या ऋचो गार्हपत्योपस्थाने विशेषविनियोगः "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इति श्रुत्या। श्रुतसामर्थ्यं लिङ्गम्। तदपि विनियोजकम्, यथा "बर्हिर्देवसदनं दामि" इत्यस्य बर्हिर्लवनप्रकाशनसामर्थ्यात् तत्र विनियोगः। अनेकपदसामर्थ्यं वाक्यम्। यथा "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" [3]इति। वाक्यद्वयसामर्थ्यम् आरभ्याधीतविषयं प्रकरणम्। यथा साधिकारस्य कर्तव्यस्येतिकर्तव्याकाङ्क्षया

भाष्यभावप्रकाशिका

कारणमाह— **न धर्मजिज्ञासायामिवेति।** "श्रुत्यादयः"इत्यादिग्रहणेन लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्या गृह्यन्ते। श्रुतिः पदान्तरनिरपेक्षः शब्दः। लिङ्गम् श्रुतस्यार्थान्तराविनाभावः। अन्योन्याकाङ्क्षा-सन्निधि-योग्यतावन्ति पदानि वाक्यम्। वाक्यद्वयसामर्थ्यमारभ्याधीतविषयं प्रकरणम्। क्रमवर्तिनां पदार्थानां क्रमवर्तिभिः पदार्थैर्यथाक्रमं संबन्धः स्थानम्। संज्ञासाम्यम् समाख्या।

अपरे तु "श्रुत्यादयः" इति श्रुतीतिहास-पुराण-स्मृतयो गृह्यन्त इत्याचक्षते। अनुभवोऽन्तःकरणवृत्तिभेदो ब्रह्मसाक्षात्कारः

न्यायनिर्णयः

श्रुतिरित्युक्ते श्रवणातिरेकेण मननं युक्त्यनुसंधानं विधदतीं श्रुतिमाह— **श्रोतव्य इति।** न केवलं श्रौतस्तर्कोऽत्रोपयुज्यते, किंतु प्रतिबन्धनिवर्तकत्वेन लौकिकोऽपीत्यत्र श्रुतिमाह— **पण्डित इति।** उक्तार्थधीसामर्थ्यं पाण्डित्यम्। अनुक्तेऽपि प्रयोजकशिक्षयोत्प्रेक्षाशक्तिर्मेधावित्वम्। यथा कश्चिद् गन्धारदेशेभ्यः समानीय चौरैररण्ये बद्धचक्षुर्निक्षिप्तो देशिकोपदेशतस्तदुक्तस्य साकल्येन ज्ञाता पण्डितः स्वयमूहापोहक्षमो मेधावी गन्धारानेव प्राप्नोति, एवं ब्रह्मणः सकाशादाच्छिद्य विवेकदृशं निरुध्याविद्यादिभिः संसारारण्ये निहितो जन्तुरतिकारुणिकगुरूपदेशतः स्वस्वभावं प्रतिपद्यत इत्यर्थः। श्रुतितात्पर्यमाह— **पुरुषेति। आत्मनः** श्रुतेरित्यर्थः।

ननु धर्मवदविशेषाद् ब्रह्मापि श्रुत्याद्येवापेक्षते। तत् कथं तत्र श्रुतिस्तर्कं सहायीकरोति? तत्राह— **नेत्यादिना।** दृष्टान्ते जिज्ञास्यो धर्मो, दार्ष्टान्तिके तादृग् ब्रह्म ग्राह्यम्। श्रुत्यादय इत्यादिशब्देन लिङ्गवाक्यप्रकरणस्थानसमाख्या गृह्यन्ते। तत्र पदान्तरनिरपेक्षः शब्दः श्रुतिः। श्रुतस्यार्थस्यार्थान्तरेणाविनाभावो लिङ्गम्। अन्योन्याकाङ्क्षासंनिधियोग्यतावन्ति पदानि वाक्यम्। वाक्यद्वयसामर्थ्यमारभ्याधीतविषयं प्रकरणम्। क्रमवर्तिनां पदार्थानां क्रमवर्तिभिरर्थैर्यथाक्रमं संबन्धः स्थानम्। संज्ञासाम्यं समाख्या। गुणोपसंहारे चैषामुदाहरणानि वक्ष्यन्ते। किं तर्हि जिज्ञास्ये ब्रह्मणि प्रमाणान्तरमिति प्रश्नपूर्वकमाह— **किं त्विति।** अनुभवो

---

१. श्रुत्यादयः=श्रुतीतिहासपुराणस्मृतय इति व्याख्यातं भामत्याम्। विवरणे मीमांसाशास्त्रोक्ताः श्रुतिलिङ्गादयः संगृहीताः; विचारशास्त्रे तेषामावश्यकत्वात्।

२. तत्=श्रुतिः। सामान्ये नपुंसकम्।

३. इदं च श्रुतेरेवोदाहरणं प्रसिद्धं पूर्वतन्त्रे। द्वितीयाश्रुत्या तत्र विनियोगोक्तेः। तथापि इतिकरणस्थले वाक्यीयो विनियोग इति केषां चित् मतानुसारेणोपपादनीयम्। द्र. प्रभावली - पृ. ३३, २८९.

यथासंभवमिह प्रमाणम्, 'अनुभवावसानत्वाद् भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य। कर्तव्ये हि विषये नानुभवापेक्षाऽस्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात्, पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य। कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म, यथाऽश्वेन गच्छति, पद्भ्यामन्यथा वा, न वा गच्छतीति। तथा 'अतिरात्रे षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं गृह्णाति' 'उदिते जुहोति' 'अनुदिते जुहोति' इति।

प्रकटार्थविवरणम्

निरधिकारस्येतिकर्तव्यस्याधिकाराकाङ्क्षया परस्परसंबन्धः प्रयाजादेः दर्शादिभिः। क्रमपठितानां क्रमपठितैर्यथाक्रमं संबन्धः स्थानम्। यथा— क्रमेण दशेष्टयः पठिताः "ऐन्द्राग्नमेकादशकपालम्" इत्याद्याः, दश मन्त्राश्च "इन्द्राग्नी रोचना दिवः" इत्यादयः। तत्र प्रथमस्थानपठितेन कर्मणा संबन्धो द्वितीयस्थानपठितेन नेत्येवम्। संज्ञासाम्यं समाख्या[२]। यथा— आध्वर्यवसंज्ञकानां मन्त्राणामाध्वर्यवसंज्ञके कर्मणि संज्ञासाम्येन विनियोगः। एतेषां च विरोधे पूर्वं बलवत्। एते श्रुत्यादय एव यथा धर्मजिज्ञासायां प्रमाणम्, न तथा ब्रह्मजिज्ञासायाम्; किन्तु विद्वदनुभवानुमानादयोऽपि। तत्र हेतुरनुभवावसानत्वादिति। येन विना साक्षात्कारो न सिध्यति तत् सर्वमागमानुगुणमपेक्षत इत्यर्थः। [३]अन्यस्य सम्भावनाऽप्यस्तीत्याह— **भूतवस्त्विति**। तर्हि ब्रह्मणीव वेदार्थत्वाद् धर्मेऽप्यनुभवापेक्षायामस्या [मन्यस्या]नुप्रवेशो भवत्वित्याशङ्क्याह— **कर्तव्ये हीति**। परोक्षनिश्चयमात्रेणानुष्ठान-संभवात्र कर्तव्येऽनुभवापेक्षा; ब्रह्मसाक्षात्कारायत्तत्वात् तु अध्यासध्वंसस्यास्त्येवानुभवापेक्षा; वेदार्थत्वं त्वप्रयोजकमिति भावः। अन्यथा वेदार्थत्वाविशेषात् पुरुषेच्छावशनिष्पाद्यत्वमपि स्यादित्यभिप्रेत्याह— **पुरुषेति**। 'यजेत' 'न भक्षये'दितिवद्

भाष्यभावप्रकाशिका

फलतः, तत्र हेतुमाह— **अनुभवावसानत्वादिति**। अनुभवं विनाऽकाङ्क्षाया अनिवृत्तेरित्यर्थः। न चैतदशक्यानुष्ठान-विषयमित्याह— **भूतवस्तुविषयत्वादिति**। ननु अनुभवनिरपेक्षफलपर्यन्तज्ञानजनकत्वदर्शनात् कर्मवाक्यानाम्, ब्रह्मवाक्या-नामपि तथाभूतज्ञानजनकत्वं वेदप्रमाणत्वाविशेषात् स्यात्, इत्याशङ्क्य विशेषमाह— **कर्तव्ये हीति**। धर्मस्याननुभवो-ऽयोग्यत्वात् तदनुष्ठानस्य च विनाऽप्यनुभवं शाब्दज्ञानमात्रादेव सिद्धेर्नास्त्यनुभवापेक्षेति भावः। अनवस्थितस्वभाव-त्वाच्चानुभवायोग्यं कर्मेत्याह— **पुरुषाधीनेति**। पुरुषाधीनत्वमेव लौकिक-वैदिककर्मणामाह— **कर्तुमकर्तुमिति**। तत्र लौकिकमुदाहरति— **यथाऽश्वेनेति**। लौकिकेनोदाहरणेन सह वैदिकमुदाहरणं समुच्चिनोति— **तथाऽतिरात्र इति**। कर्तुम-कर्तुमित्यस्योदाहरणमुक्तम्। कर्तुमन्यथा वा कर्तुमित्यस्योदाहरणमाह— **उदित इति**। अयं व्यवस्थितविकल्पः। व्रीहिभिर्वा यवैर्वा

न्यायनिर्णयः

ब्रह्मसाक्षात्कारो विद्वदनुभवः। आदिपदमनुमानादिसंग्रहार्थम्। श्रुत्यादीनामनुमानादीनां च शब्दशक्तितात्पर्यावधृतिद्वाराऽनुभवमुत्पाद्य ब्रह्मणि प्रामाण्यम्, अनुभवस्य साक्षादेव तदविद्याध्वंसित्वेनेति मत्वोक्तम्— **यथासंभवमिति**। वेदार्थत्वाद्धर्मवद् ब्रह्मण्यपि नानुभवः संभवतीत्याशङ्क्य तदयोग्यत्वमुपाधिरित्याह— **अनुभवेति**। न हि ज्ञातेऽपि ब्रह्मण्यनुभवं विना नैराकाङ्क्ष्यम्। अतस्तज्ज्ञानस्यानुभवान्तत्वात् तस्मिन्नसावस्तीत्यर्थः। साधनव्याप्तिमाशङ्क्याह— **भूतेति**। चकारः शङ्कानिरासी। ननु कर्म-वाक्यानामनुभवानपेक्षफलवदर्थज्ञानजनकत्वात्, ब्रह्मवाक्यानामपि वेदप्रमाणत्वात् तादृग्धीजनकत्वम्, नेत्याह— **कर्तव्य इति**। धर्मस्यानुभवायोग्यत्वात्, तदनुष्ठानस्य च शाब्दधीमात्रादेव सिद्धेः, धर्मवाक्यानां युक्तमुक्तधीजनकत्वम्। ब्रह्मणि त्वनुभवयोग्ये तद्वाक्यानां नैवमित्यर्थः। धर्मस्यापि ब्रह्मवदनुभवयोग्यत्वं, वेदार्थत्वात् इत्याशङ्क्याकार्यत्वमुपाधिरित्याह— **पुरुषेति**। चकारोऽत्रापि शङ्कानिरासी। कर्तव्येऽपि तुल्यमसाध्यत्वमित्याशङ्क्य लौकिके वैदिके च कर्मणि साध्यत्वमाह—**कर्तुमिति**। तत्र लौकिकमुदाहरति— **यथेति**। तेन सह वैदिकं दृष्टान्तं समुच्चिनोति— **तथेति**। कर्तुमकर्तुमित्यस्य दृष्टान्तमुक्त्वा कर्तुमन्यथा

---

१. 'ब्रह्मजिज्ञासायाः' इति षष्ठ्यन्ततया विपरिणमय्यानुषञ्जनीयम्। तथाऽग्रे भूतशब्दः परमार्थवचनः। द्र. कल्प. पृ. ९०.

२. समाख्या यौगिकः शब्द इति मीमांसकाः। अत्र तु विवरणाचार्योक्तमनुसृतम्। विशेषोऽत्र परिमले द्रष्टव्यः। पृ. ७८५. एतल्लक्षणखण्डनं शम्भुभट्टेन कृतम्। द्र. प्रभावली पृ. २८६. परं तत् न प्रेक्षावतां संमतिमावहतीति परे।

३. अन्यस्य= श्रुत्यादिभ्योऽन्यस्य।

विधिप्रतिषेधाश्चात्रार्थवन्तः स्युः, विकल्पोत्सर्गापवादाश्च। न तु वस्तु 'एवम्, नैवम्' 'अस्ति, नास्ति' इति वा विकल्प्यते। विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः। न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम्। किं तर्हि? वस्तुतन्त्रमेव तत्। न हि स्थाणावेकस्मिन् स्थाणुर्वा पुरुषोऽन्यो वेति तत्त्वज्ञानं भवति। तत्र पुरुषोऽन्यो वेति मिथ्याज्ञानम्। स्थाणुरेवेति तत्त्वज्ञानम्, वस्तुतन्त्रत्वात्। एवं भूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम्। तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव, भूतवस्तुविषयत्वात्।

प्रकटार्थविवरणम्

ब्रह्मण्यपि स्यादित्याह— **विधीति**। "व्रीहिभिर्यजेत, यवैर्वा" इति विकल्पः। "न हिंस्यात् सर्वा भूतानि" इत्युत्सर्गः। "अग्नीषोमीयं पशुमालभेत" इत्यपवादः। एतेऽपि धर्मसाम्ये सति प्रसज्यन्त इत्यर्थः। अस्तु तथेति न वाच्यमित्याह— **न तु वस्त्वेवमिति**। न हि घटः कस्यचिदिच्छया पटोऽपीति दृष्टचरम्। ननु स्थाणुर्वा पुरुषो वाऽन्यो वेति वस्तुन्यपि विकल्पा दृश्यन्त इत्याशङ्क्याह— **विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः**। न वस्तुस्पर्शिन्यो बाधादित्यर्थः। ननु किं विशेषणेन, सम्यग्ज्ञानमपि पुरुषबुद्ध्यपेक्षमेवेत्याशङ्क्याह— **न वस्तुयाथात्म्यज्ञानमिति**। प्रत्यक्षस्य कर्मजन्यत्वाद् यथावस्त्वेव मनोव्यापारः सम्यग्ज्ञानम्, न तु यथा यथा मनो व्यापिपर्ति तत्तत् सम्यग्ज्ञानमिति भावः। विकल्पनानां मनःस्पन्दितमात्रत्वमज्ञानमयत्वं, सम्यग्ज्ञानस्य च वस्त्वधीनत्वं विवृणोति— **न हीत्यादिना**। प्रकृते योजयति— **तत्रैवमिति**। अतो ज्ञानं, ब्रह्म वा विधिजन्यपुरुषेच्छावशनिष्पाद्यं न भवतीति धर्माद् वैलक्षण्यं सिद्धम्। तर्हि धर्माद् विलक्षणत्वात्प्रत्यक्षादिगोचरत्वमपि स्यात्। अत एव

भाष्यभावप्रकाशिका

इति इच्छाविकल्पः। अस्त्वेवं धर्मसाम्यं ब्रह्मण इति, नेत्याह— **न त्विति**। ननु दृश्यन्ते वस्तुन्यपि विकल्पाः इति, तत्राह— **विकल्पना इति**। ननु सम्यग्ज्ञानाधीनत्वात् वस्तुनः तस्य च पुरुषाधीनत्वात् वस्त्वपि पुरुषाधीनमिति, नेत्याह— **न वस्त्विति**। तदेव दृष्टान्तेन प्रपञ्चयति— **न हीति**। उक्तन्यायं सर्वत्र प्रसारयति— **एवमिति**। दार्ष्टान्तिकं निगमयति— **तत्रेति**। अतोऽनुभवापेक्षा

न्यायनिर्णयः

वा कर्तुमित्यस्य दृष्टान्तमाह— **उदित इति**। इतोऽपि कर्मणो नानुभवयोग्यतेत्याह— **विधीति**। 'यजेत' इत्यादयो विधयो, 'न हन्यात्' इत्यादयो निषेधाश्च कर्मणि सावकाशाः। तेन साध्यत्वादनुभवायोग्यतेत्यर्थः। तत्रैव हेत्वन्तरमाह— **विकल्पेति**। उदितानुदितहोमार्थौ व्यवस्थितो विकल्पः। ग्रहणाग्रहणार्थस्त्वैच्छिकः। 'न हिंस्यात्सर्वा भूतानि' इत्युत्सर्गः। 'अग्नीषोमीयं पशुमालभेत' इत्यपवादः। ते च कर्मणि सावकाशाः। तथा चाव्यवस्थितं कर्मानुभवायोग्यमित्यर्थः। ब्रह्मण्यपि तुल्यत्वादव्यवस्थितत्वस्योक्तोपाध्यसिद्धिरित्याशङ्क्याह— **न त्विति**। प्रकारविकल्पवत् प्रकारिविकल्पं निरस्यति— **अस्तीति**। वस्तुन्यपि विकल्पा दृष्टा वादिनामित्याशङ्क्याह— **विकल्पनास्त्विति**। सम्यग्ज्ञानाधीनत्वाद् वस्तुनः, तस्य च पुरुषाधीनत्वात्, वस्त्वपि तथेत्याशङ्क्याह— **न वस्त्विति**। कथं तर्हि तदुत्पत्तिरित्याशङ्क्याह— **किं तर्हीति**। पुरुषतन्त्रत्वं निषेद्धुमेवकारः; न मानाधीनत्वं निषिध्यते। विकल्पनानां मनःस्पन्दितमात्रत्वेनासम्यग्धीत्वं, सम्यग्धियश्च वस्त्वधीनतेत्यत्र दृष्टान्तमाह— **न हीति**। आद्यो वाशब्दोऽवधारणे। पुरोवर्तिनि स्थाणावेकस्मिन्नेव स्थाणुरेवेत्यदुष्टकरणस्य धीः, इतरस्य तत्रैव पुरुषो वा स्थाणुर्वेति संशयः। न हि तदुभयमपि सम्यग्ज्ञानम्, एकस्योभयत्वायोगादित्यर्थः। कथं तर्हि विभागधीस्तत्राह— **तत्रेति**। स्थाणुः सप्तम्यर्थः। उक्तन्यायं संचारयति— **एवमिति**। दार्ष्टान्तिकमाह— **तत्रेति**। विकल्पनानां बुद्धिजन्यत्वेनावस्त्वनुसारिणीनामसम्यग्धीत्वे, सम्यग्धियश्च वस्त्वनुसारित्वे पूर्वोक्तन्यायेन स्थिते सतीति यावत्। न पुरुषतन्त्रमित्येवकारार्थः। ततो न धीद्वारा वस्तुनोऽपि तदधीनतेति शेषः। ब्रह्मज्ञानस्य वस्त्वधीनत्वेन सम्यग्धीत्वे हेतुमाह— **भूतेति**। परमार्थवस्त्ववगाहित्वादित्यर्थः।

ब्रह्मणः सिद्धत्वेनासाध्यतया धर्मवैधर्म्यादनुभवयोग्यत्वात् तत्रानुभवापेक्षा युक्त्यनुप्रवेशश्चेत्युक्तम्।

ननु भूतवस्तुत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणाऽनर्थिकैव प्राप्ता। न; इन्द्रियाविषयत्वेन संबन्धाग्रहणात्। स्वभावतो विषयविषयाणीन्द्रियाणि, न ब्रह्मविषयाणि। सति हीन्द्रियविषयत्वे ब्रह्मणः, इदं ब्रह्मणा संबद्धं कार्यमिति गृह्येत। कार्यमात्रमेव तु गृह्यमाणं किं ब्रह्मणा संबद्धं, किमन्येन केनचिद्वा संबद्धमिति न शक्यं निश्चेतुम्। तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थम्। किं तर्हि? वेदान्तवाक्यप्रदर्शनार्थम्।

किं पुनस्तद् वेदान्तवाक्यं यत् सूत्रेणेह लिलक्षयिषितम्?

'भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति' इत्युपक्रम्याह— 'यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद् ब्रह्मेति' (तै० ३।१)।

प्रकटार्थविवरणम्

जन्मादिसूत्रमनुमानोपन्यासार्थं भविष्यतीत्याह— **नन्विति**। रूपादिकं, रूपादिमत्, 'तद्विशेषणं[1] चेन्द्रियाणि गृह्णन्ति, न तथा ब्रह्म। अतः प्रत्यक्षाविषयत्वादविनाभावाग्रहणात् न स्वातन्त्र्येण मानान्तरगोचरो ब्रह्मेत्याह— **न, इन्द्रियाविषयत्वेनेति**। यस्मादागमप्रतिपन्नेऽर्थे सामान्यद्वारेण संभावनामात्रनिमित्तं मानान्तरं, तस्मादित्युपसंहारः। उदाहरणवाक्यं पृच्छति— **किं पुनरिति**। विशिष्टस्याधिकारिणो ब्रह्मज्ञानाय प्रवृत्तस्य ब्रह्मप्रतिपादनपरं जगत्कारणानुवादेन वाक्यम्; अर्थात् तदेव लक्षणमित्यभिप्रेत्य सोपक्रमं वाक्यमुदाहरति— **"भृगुर्वै वारुणिः"** इति।

भाष्यभावप्रकाशिका

युक्त्यनुप्रवेशश्च सिद्ध इति भावः। कथं न प्रत्यक्षगम्यमिति? अत्राह— **इन्द्रियेति**। नानुमानादिगम्यतेत्याह— **संबन्धेति**। तत् प्रपञ्चयति— **स्वभावत इति**। मा भूदेवं प्रत्यक्षता, अनुमेयता तु किं न स्यादिति? अत आह— **सति हीति**। ननु किं ब्रह्मसंबन्धमिदं कार्यमिति ग्रहणेन? कार्यमेव परिदृश्यमानं ब्रह्मावगमयिष्यतीति, नेत्याह— **कार्यमात्रमिति**।

भृगुर्वै वारुणिरिति। यद्यपि "भृगुर्वै वारुणि"रिति वाक्यं पूर्वसूत्रस्यैवोदाहरणम्। तथाप्येतत्सूत्रोदाहरणवाक्यादौ

न्यायनिर्णयः

इदानीं ब्रह्मणि प्रमाणान्तरप्रवेशे जन्मादिसूत्रमनुमानोपन्यासार्थमित्यनुमतमिति शङ्कते— **नन्विति**। सिद्धत्वाद् ब्रह्मणो धर्मवैजात्येऽपि मानान्तरगम्यतेत्यनुमानादिविचारं हित्वा वाक्यमात्रविचारोऽयुक्तः, ब्रह्मण्युभयप्रवेशाविशेषात्। अतः सूत्राणां वेदान्तवाक्यग्रथनार्थत्वमसिद्धमित्यर्थः। ब्रह्मणि संभावनाहेतुश्रुत्यनुगुणानुमानादिप्रवेशात्, गुणतया तद्विचारस्यापीष्टत्वात्, प्राधान्येन वेदान्तवाक्यग्रथनार्थता सूत्राणामिति समाधत्ते— **नेत्यादिना**। मानान्तरमपि करणमेव ब्रह्मप्रमिताविति पक्षे प्रत्यक्षमनुमानादि वा तदिति विकल्प्य दूषयति— **इन्द्रियेति**। ब्रह्मणि करणत्वेन मानान्तराप्रवेशादिति शेषः। 'पराञ्चि' इत्यादिश्रुत्या प्रत्यक्षाविषयत्वं ब्रह्मणो विवृणोति— **स्वभावत इति**। संबन्धाग्रहणादित्युक्तं व्यनक्ति— **सति हीति**। ननु ब्रह्मसंबद्धमिदं कार्यमिति धिया किं स्यात्? कार्यमेव गृह्यमाणं ब्रह्म ज्ञापयिष्यति, नेत्याह— **कार्येति**। तन्मात्राद्धेतुमात्रं सिध्यति; न सत्यज्ञानादिरूपं ब्रह्म। तत्तु आगमादेव ज्ञेयमित्यर्थः। श्रौतार्थे सामान्यद्वारा संभावनाहेतुर्मानान्तरमिति युक्ता सूत्राणां वेदान्तग्रथनार्थतेत्युपसंहरति— **तस्मादिति**।

बहुत्वाद्वेदान्तानामेतदधिकरणविषयबुभुत्सया पृच्छति— **किं पुनरिति**। जिज्ञास्यं लक्षितं ब्रह्म सप्तम्यर्थः। विशिष्टाधिकारिणो ब्रह्म ज्ञातुकामस्य जगत्कारणत्वोपलक्षणानुवादेन ब्रह्मप्रतिपादकं वाक्यं सोपक्रममाह— **भृगुरिति**।

१. तद्विशेषणं=रूपत्वादिजातिः।

तस्य च निर्णयवाक्यम्- 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति' (तै.उ. ३।६)। अन्यान्यप्येवंजातीयकानि वाक्यानि नित्यशुद्ध-बुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि।।२।।

।।इति द्वितीयं जन्माद्यधिकरणम्।।

प्रकटार्थविवरणम्

'ननूपलक्षितस्य स्वलक्षणं वाच्यम्। न हि 'प्रकृष्टप्रकाशश्चन्द्रः' इति स्वलक्षणकथनमन्तरेण 'यत्र शाखाग्रं स चन्द्रः' इत्युपलक्षणमात्रात् चन्द्रलक्षणावगतिर्दृष्टेत्यत आह— **तस्य चेति**। उपलक्षितस्य ब्रह्मणः स्वरूपनिर्णायकं वाक्यम् "आनन्दो ब्रह्मेति व्यजानात्" इत्यादि विद्यत एव। तत्पर्यालोचनया, शाखान्तरीय- "विज्ञानमानन्दं ब्रह्म" इति वाक्यपर्यालोचनया च स्वप्रकाशानन्दो ब्रह्मलक्षणमिति भावः।

।।इति द्वितीयं जन्माद्यधिकरणम्।।

भाष्यभावप्रकाशिका

पाठादत्रैवोदाहरत्। "इत्युपक्रम्याहे"ति च पृथक् कुर्वतैतदेव सूचितम्। ब्रह्मस्वरूपलक्षणपरं वाक्यमाह— **तस्य चेति**। एवमन्यत्रापि जगत्कारणानुवादेन सर्वज्ञमानन्दरूपं ब्रह्म प्रतिपाद्यत इत्याह— **अन्यान्यपीति**।।

इति पूज्यश्रीचित्सुखमुनिकृतौ शारीरकमीमांसाभाष्यव्याख्यायां भाष्यभावप्रकाशिकायां जन्माद्यधिकरणं सम्पूर्णम्।।

न्यायनिर्णयः

ननु प्रकृष्टप्रकाशश्चन्द्र इति स्वरूपलक्षणादृते यत्र शाखाग्रं स चन्द्र इत्युपलक्षणमात्राच्चन्द्रस्वरूपादृष्टेः, उपलक्षितस्य स्वरूपलक्षणं वाच्यं, तत्राह— **तस्येति**। ब्रह्मणो जगद्धेतुत्वानुवादेन स्वरूपनिर्णायकमानन्दत्वविधायि वाक्यम्। ततः सत्यादिवाक्याच्च स्वप्रकाशानतिशयानन्दलक्षणं ब्रह्मेति निर्णेतुं शक्यमित्यर्थः। तैत्तिरीयश्रुताविव श्रुत्यन्तरेऽपि ब्रह्मणो लक्षणद्वयवादीनि वाक्यानि 'यः सर्वज्ञः सर्ववित्' 'विज्ञानमानन्दम्' इत्यादीनि सन्ति, तान्यपीहोदाहरणत्वेन द्रष्टव्यानीत्याह— **अन्यान्यपीति**। एवंजातीयकत्वमेवाह—**नित्येति**। तदेवं सर्वासु शाखासु लक्षणद्वयवादिवेदान्तवाक्यानि जिज्ञास्ये ब्रह्मणि समन्वितानीति तद्धिया मुक्तिरयत्नलभ्येत्यर्थः।।२।।

।।इति द्वितीयं जन्माद्यधिकरणम्।।

---

१. सूत्रस्य स्वरूपलक्षणपरत्वं दर्शयितुं 'तस्य च' इत्यादिभाष्यमवतारयति— नन्विति। ननु सूत्रे स्वरूपलक्षणमेव वाच्यम्। किमर्थं तटस्थलक्षणसूत्रणमिति चेद्? उच्यते। पूर्वसूत्रे ब्रह्मशब्देनैवोक्तस्य स्वरूपलक्षणस्याध्यारोपापवादन्यायेनोपपादनार्थम्। एतेन सृष्टिश्रुतेरपि तात्पर्यं विवृतं भवति। अस्मन्मते सर्वस्यापि लक्षणवाक्यस्य स्वरूपमात्रपरत्वात् तदपि सूत्रेणैवोक्तं भवति। विशेषः कल्पतरुपरिमलयोर्द्रष्टव्यः। पृ. ९३-९५.

शारीरकन्यायसंग्रहः

शास्त्रयोनित्वाधिकरणम्

शास्त्रयोनित्वात्।।१.१.३।।

प्रमाणान्तरेणार्थमुपलभ्य तत्र वाक्यरचनायां वेदस्य पौरुषेयत्वापातात्, "[1]अनित्येष्टसाधनज्ञानजन्यानित्यरागकार्यतया तद्रागलक्षणविधिविषयस्य शब्दस्य लोके पौरुषेयतयाऽप्रामाण्यम्; ब्रह्मणस्तु कृत्स्नवेदार्थलक्षणेष्टसाधनज्ञानस्य नित्यत्वात् इष्टसाधनविषयरागस्यापि नित्यतया तत्कार्यस्य शब्दस्य नित्यरागलक्षणविधिविषयस्य सत्यपि पौरुषेयत्वे प्रामाण्यमेवे'ति विभागकरणे प्रमाणाभावात्, कृत्स्नेष्टसाधनविषयनित्यज्ञानस्यासिद्धेः सर्वज्ञस्यासिद्धत्वात्, 'रागो नित्य' इति [2]विप्रतिषेधाच्च; "[3]रागतात्पर्यस्य शब्दस्य पौरुषेयतयाऽप्रामाण्यम्; वेदस्तु विधितात्पर्यवत्तया पूर्वसिद्धो ब्रह्मणाऽभिव्यज्यते, पूर्वसिद्धवक्तृरागतात्पर्यवतो महाभारतस्य वाचकवत्' इति विभागकरणेऽपि प्रमाणान्तरेण वेदार्थमुपलभ्य रचनायां विधिरागतात्पर्य-विभागासिद्धेः, उपाध्यायवद् रचनायां तु सर्वज्ञत्वासिद्धेः, शास्त्रजन्यज्ञानविशिष्टसंवेदनानां ब्रह्मचैतन्यतया सर्वज्ञत्वे प्रमाणान्तरजन्यसंवेदनेष्वप्यविशेषात्; शब्दोपादानकारणत्वमात्रेण सर्वज्ञत्वासिद्धेः न ब्रह्म शास्त्रयोनित्वात् सर्वज्ञमिति प्राप्तम्।

तत्र यथा प्रदीपस्य प्रकाशनसामर्थ्यं तदुपादानकारणस्याग्रेऽपि तथाविधसामर्थ्यपूर्वकं दृष्टम्, एवं सर्वशब्दानां सर्वार्थप्रतिपादनसामर्थ्यं तदुपादानस्य ब्रह्मणोऽपि सर्वार्थप्रकाशनसामर्थ्यपूर्वकमित्यनुमाय तच्चार्थप्रकाशनसामर्थ्यं प्रकाशद्रव्यस्य साधनान्तरनिरपेक्षस्य स्वसन्निहितार्थप्रकाशवत्तयैव व्याप्तं प्रदीपादिष्विति निदर्शनेन ब्रह्मणोऽपि सर्वार्थप्रकाशसमर्थस्य पूर्वाधिकरणसिद्धज्ञानस्वलक्षणतया प्रकाशद्रव्यस्य अत एव साधनान्तरनिरपेक्षतया स्वसंनिहितार्थप्रकाशनसमर्थस्य सर्वगततया स्वसंनिहितसर्ववस्तुप्रकाशवत्ताऽपि नित्यमेव भवतीत्यनुमानेन सर्वार्थप्रकाशनसमर्थशब्दोपादानस्य ब्रह्मणः सर्वज्ञत्वं समर्थ्यते। तदुक्तम्—"तस्यैव ज्ञानशक्तिविवर्तत्वात् [शक्तिविवर्तात्मकत्वात्]" इति।

---

१. वेदस्य बुद्धिपूर्वकृतत्वमङ्गीकृत्यापि अनपेक्षत्वेन प्रामाण्यं केचित् मन्यन्ते। तन्मतमनूद्य निरस्यति—अनित्येति। अनित्येति ज्ञानविशेषणम्। प्रमाणान्तरेणार्थमवगम्य परं प्रति तद्बोधनेच्छया शब्दः प्रयुज्यते। एवं च वक्त्रभिप्रायविशेषरूपो राग एव शब्दगम्यः। स च रागो नित्योऽनित्यश्चेति द्विविधः। अनीश्वरपुरुषाणां रागः अनित्यज्ञानकार्यतयाऽनित्यः। तद्बोधकवचनानां तन्मूलज्ञानप्रामाण्याधीनं प्रामाण्यमिति सापेक्षत्वम्। ईश्वरस्य ज्ञानम्, उक्तरूपो रागश्चेति द्वयमपि नित्यम्। नित्ये च ज्ञाने कारणदोषासम्भवेनाप्रामाण्यकारणाभावात् स्वतः प्रामाण्यात् तन्मूलकशब्दस्य पौरुषेयत्वेऽपि न सापेक्षत्वमिति भावः।

२. रागो नित्य इति व्याहन्यते, लोके रागस्यानित्यत्वनियमादित्यर्थः। द्र. तत्त्वदी. पृ. ५५२।

३. लौकिकं वाक्यं रागे तात्पर्यवत्। वेदस्तु अर्थं ज्ञात्वा कृतोऽपि न रागतात्पर्यकः। अध्ययनविधिना विधौ स्वाभाविकतात्पर्यावगमात्। तथा च पूर्वसिद्धतात्पर्यवतामेव वेदानां सृष्टिकाले समुच्चारणमात्रमीश्वरस्य वेदप्रणयनं नाम। अतो रागतात्पर्याभावात् न तदप्रामाण्यमिति मतान्तरमुत्थाप्य निराचष्टे—रागेति।

३।।शास्त्रयोनित्वाधिकरणम्।।सू. ३।।

जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्। तदेव द्रढयन्नाह–

शास्त्रयोनित्वात्।।३।।

महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः

प्रकटार्थविवरणम्

वृत्तसङ्कीर्तनपूर्वकं संबन्धमाह—**जगत्कारणत्वेति**। जगज्जन्मादिकारणत्वं ब्रह्मलक्षणं सूत्रयता प्रधानादावतिव्याप्तिवारणाय कारणत्वानुपपत्तिसिद्धं सर्वज्ञत्वमर्थात् सूत्रयाञ्चक्रे। तदेव [1]हेत्वन्तरेण दृढीक्रियत इत्यर्थः।

अत्र च "अस्य महतो भूतस्य" इत्यादिवाक्यं विषयः। तत् किं ब्रह्मणो वेदकारणत्वाभिधानेन सर्वज्ञत्वं न साधयति, उत साधयतीति सन्देहः। पाणिन्यादिवदर्थमुपलभ्य कर्तृत्वे वेदस्य पौरुषेयत्वप्रसङ्गात् न साधयतीति पूर्वः पक्षः। सिद्धान्तस्तु रज्जुसर्पवच्छब्दराशेः ब्रह्मविवर्ततया ब्रह्मणो वेदकारणत्वात्, तेन चाविषयीकृतस्य सद्भावे प्रमाणाभावात्, कारणसामर्थ्यस्यैव च कार्येऽप्याविर्भावदर्शनात्, प्रदीपस्यावभासत्वेऽपि स्वसंयुक्ताशेषवस्तुप्रकाशकत्वात् एवं सर्वावभाससमर्थसर्वशब्दोपादानतया[2] स्वसंयुक्ताशेषप्रकाशनशक्तिमत्त्वेन सर्वज्ञत्वं साधयति[इति]। तदेतदाह—**शास्त्रयोनित्वात्** इति।

सूत्रं योजयति—**महत इत्यादिना**। ग्रन्थभूयस्त्वान्महद्भिर्मन्वादिभिः परिगृहीतत्वाद्वा महतः, श्रुतिनिर्देशादृग्वेदादेः, शासनाच्छास्त्रस्य; शास्त्रशब्दस्य सर्वशब्दोपलक्षणत्वाद् व्याकरणाद्यङ्गकस्य; अव्यपदेश्यस्य वस्तुनोऽभावात् प्रदीपवत्

भाष्यभावप्रकाशिका

सूत्रान्तरमवतारयन् पूर्वसूत्रसङ्गतिमाह—**जगत्कारणत्वेति**। न केवलं जगत्कर्तृत्वाद् ब्रह्मणः सर्वज्ञत्वम्, किन्तु शास्त्रयोनित्वादपीति दृढीक्रियते सर्वज्ञत्वं युक्त्यन्तरेणेत्यर्थः। शास्त्रयोनित्वस्य सर्वज्ञतासाधनत्वं समर्थयितुं शास्त्रं विशिनष्टि—**महत इत्यादिना**। महाविषयत्वादृग्वेदादि शास्त्रं महत्, न केवलं महाविषयत्वेनास्य महत्त्वम्, अपि त्वनेकाङ्गोपाङ्गोपकरणतयाऽपीत्याह—**अनेकविद्येति**। पुराण-न्याय-मीमांसादयो दश विद्यास्थानानि, तैस्तया तया द्वारोपकृतस्येत्यर्थः। तदनेन

न्यायनिर्णयः

सूत्रान्तरमवतारयन् पूर्वसूत्रसंगतिमाह—**जगदिति**। सर्वकारणत्वं ब्रह्मलक्षणं सूत्रयता प्रधानादावतिव्याप्तिनिरासाय तद्बललब्धं सर्वज्ञत्वमर्थादुक्तम्। तदेवात्र साध्यते, तथा चार्थिकप्रतिज्ञयाऽस्य संगतिरित्यर्थः। वेदानां नित्यत्वात्, तदकर्तृत्वे विश्वकर्तृत्वायोगात् न तेनास्य सर्वज्ञतेत्याशङ्क्य श्रौतप्रतिज्ञयैव संगतिमाह—**तदेवेति**। वेदानां नित्यत्वेऽपि ब्रह्मणस्तत्कर्तृत्वसंभवोक्त्यां तदेव जगद्धेतुत्वकृतं सर्वज्ञत्वमत्र दृढीक्रियते। तेन हेतुसाधनद्वारा तदीयसाध्यसाधनाद् युक्ताऽस्य श्रौत्या प्रतिज्ञया संगतिरिति भावः। 'अस्य महतः' इत्यादिवाक्यं ब्रह्मणो वेदकर्तृत्वेन सार्वज्ञ्यं न साधयति, उत साधयतीति वेदस्य सापेक्षत्वप्रसङ्गाप्रसङ्गाभ्यां संदेहे, पाणिन्यादिवदर्थं दृष्ट्वा कर्तृत्वे वेदस्य पौरुषेयत्वेन सापेक्षत्वापातात् न साधयतीति प्राप्ते सिद्धान्तमाह—**शास्त्रेति**। न केवलं जगद्योनित्वादस्य सार्वज्ञ्यं, किंतु शास्त्रयोनित्वादपीति योजना। अत्र च वेदकर्तृत्वोक्तेः, एतदुक्तमानमेयाङ्गीकारेण शास्त्रप्रवृत्तेः, अस्येत्यादिस्पष्टब्रह्मलिङ्गवाक्यस्य सर्वज्ञे ब्रह्मणि समन्वयोक्तेश्च श्रुत्यादिसंगतयः। फलं तु पूर्वपक्षे ब्रह्मणः सर्वज्ञत्वानिर्धारणमुत्तरत्र तन्निर्धारणमिति द्रष्टव्यम्।

शास्त्रयोनित्वस्य सर्वज्ञताहेतुत्वं वक्तुं शास्त्रं विशिनष्टि—**महत इत्यादिना**। चातुर्वर्ण्यचातुराश्रम्यादिमहाविषयत्वान्महदृग्वेदादिशास्त्रम्। न केवलं महाविषयत्वेनास्य महत्त्वम्, किंत्वनेकाङ्गोपाङ्गोपकरणतयाऽपीत्याह—**अनेकेति**। पुराण-

---

१. पूर्वाधिकरणसूचितसर्वज्ञत्वे हेत्वन्तरसमर्पकतया तदुपयोगित्वेऽपि अस्य शास्त्रयोनित्वहेतोः इहैव साधनीयतया ऽधिकरणान्तरत्वम्। सर्वज्ञत्वदृढीकरणफलं तु असर्वज्ञजीवव्यावर्तनमेव। सर्वशक्तित्वस्य दृढीकरणेऽपि तत् निर्वहतीति चेत्, निःश्वसितश्रुत्युदाहरणेन तदपि दृढीकृतमेव। द्र. परि. पृ. ९५-९६।

२. यथा चैवं सति असदर्थार्थवादादिविषयज्ञानवत्त्वेऽपि ईश्वरस्य न भ्रान्तत्वापत्तिः, तथा निरूपितं परिमले। (पृ. ९७)

कारणं ब्रह्म। न हीदृशस्य शास्त्रस्यर्ग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोऽस्ति। यद्यद् विस्तरार्थं शास्त्रं यस्मात् पुरुषविशेषात् संभवति, यथा व्याकरणादि पाणिन्यादेर्ज्ञेयैकदेशार्थमपि स ततोऽप्यधिकतरविज्ञान इति प्रसिद्धं लोके। किमु वक्तव्यमनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्य-

प्रकटार्थविवरणम्

स्वसंबद्धसर्वावभासकस्यावबोद्धृत्वाभावात् सर्वज्ञकल्पस्योपादानकारणं ब्रह्म; अतस्तदपि सर्वज्ञमित्यर्थः। तदेवाह—**न हीति**। वेदः स्वविषयादधिकविज्ञानवत्प्रसूतः शास्त्रत्वात् व्याकरणवदिति वदितुं लोकसिद्धां व्याप्तिमाह—**यद्यदिति**। किपुनर्न्यायेन

भाष्यभावप्रकाशिका

विशिष्टजनपरिग्रहेणाप्रामाण्यशङ्काऽप्यर्थादपाकृता; पुराणादिप्रणेतृभिर्महर्षिभिस्तथा तथा वेदान् व्याचक्षाणैस्तदर्थं चादरेणानुतिष्ठद्भिः परिगृहीतो वेद इति। अबोधकत्वास्पष्टबोधकत्वयोरभावादपि नाप्रमाणं वेद इत्याह—**प्रदीपवदिति**। अत एव सर्वज्ञकल्पस्य=सर्वज्ञसदृशस्य [सर्वज्ञज्ञानस्य] सर्वविषयत्ववच्छास्त्रस्याप्यभिधानं सर्वविषयमिति। व्यतिरेकमाह—**न हीदृशस्येति**। सर्वज्ञस्य गुणः सर्वविषयज्ञता, तदन्वितं शास्त्रम्; अस्यापि सर्वविषयत्वात्। इदानीं प्रमाणं रचयति—**यद्यद्विस्तरार्थमिति**। अथवा पूर्वं व्यतिरेकमभिधायाऽन्वयव्याप्तिमभिधत्ते—**यद्यदिति**। **अधिकतरविज्ञान इति**। इक्षु-क्षीर-गुडादिमधुरस्य तद्भेदस्य च वचनागोचरस्याप्यनुभवगोचरत्वाद् वाक्याद् ज्ञानमधिकविषयमित्यर्थः। इदानीमनुमिनोति—**किमु वक्तव्यमिति**। अयं प्रयोगः—वेदः, स्वविषयादधिकतरविषयविज्ञानवत उत्पन्नः, वाक्यप्रमाणत्वात्; पाणिन्यादिवाक्यवत् इति।

न्यायनिर्णयः

न्यायमीमांसाधर्मशास्त्राणि व्याकरणादिषडङ्गानि च दश विद्यास्थानानि। तैस्तत्तद्द्वारोपकृतस्येति यावत्। एतेन शिष्टसंग्रहादप्रामाण्यशङ्काऽपि शास्त्रस्यार्थादपास्ता। पुराणादिप्रणेतारो महर्षयस्तथा तथा वेदान् व्याचक्षाणास्तदर्थं चादरेणानुतिष्ठन्तो वेदानादृतवन्तः, तत् कथं तदप्रामाण्यमिति भावः। अबोधित्वास्पष्टबोधित्वयोरभावादपि वेदानां प्रामाण्यमित्याह—**प्रदीपवदिति**। उक्तमुपजीव्य सर्वज्ञत्वोपयुक्तं विशेषणान्तरमाह—**सर्वज्ञेति**। तत्सदृशस्येति यावत्। सादृश्यं च सर्वज्ञज्ञानस्य सर्वविषयत्ववदुक्तेरपि शास्त्रीयायास्तथात्वम्। कल्पप्रत्ययोऽचेतनत्वात्। उक्तविशेषणस्य वेदस्य निःश्वसितश्रुत्या विभक्तत्वहेतूपकृतया ब्रह्मकार्यतेत्याह—**योनिरिति**। व्यतिरेकमुखेनोक्तं व्यक्तीकुर्वाणः सर्वज्ञत्वं प्रतिजानीते—**न हीति**। महत्वादिविशेषणवत्त्वमीदृशत्वम्। तस्य सर्वज्ञादन्यतोऽसंभवे हेतुं सूचयति—**सर्वज्ञेति**। तस्य गुणः सर्वार्थज्ञानवत्त्वं, तेनान्वितमिदं शास्त्रं, सर्वार्थत्वात्, अतस्तस्योत्पत्तिः सर्वज्ञादेवेत्यर्थः। उक्तमनुमानीकर्तुं व्याप्तिमाह—**यदिति**। महाविषयत्वाद् वेदस्य ब्रह्मज्ञानेन तुल्यार्थत्वभ्रान्तिनिवृत्त्यर्थं विस्तरार्थमित्युक्तम्। यच्छब्दत्रयस्य स ततोऽपीत्युत्तरेण संबन्धः[१]। शास्त्रप्रणेतुराप्तत्वार्थं पुरुषविशेषपदम्। यो यद्वाक्यप्रमाणप्रणेता स तद्विषयादधिकार्थज्ञानवानिति व्याप्तिभूमिमाह—**यथेति**। ब्रह्मणः शास्त्रकर्तृत्वेऽपि पाणिन्यादिवदसर्वज्ञत्वं शङ्कित्वोक्तम्—**ज्ञेयेति**। तस्य ज्ञेयैकदेशविषयत्वं तत्कर्तुरसार्वज्ञ्ये हेतुरित्यर्थः। अपिस्तथात्वसंभावनार्थः। [२]यद् यस्मात् पाणिन्यादेः संभवति स तस्मादधिकार्थज्ञानवानिष्टः। शब्दस्य [३]ज्ञानान्न्यूनार्थत्वात् यथेदं तथाऽन्यदपि मानभूतं शास्त्रं यस्मादभियुक्तादुत्पद्यते स तस्मादधिकार्थज्ञानवानित्यर्थः। उक्तेर्ज्ञानान्न्यूनार्थत्वमिक्षुक्षीरादिमाधुर्यस्यावान्तरवैषम्येऽपि तदाख्यातुं सुशिक्षितोऽपि न शक्ष्यतीति न्यायसिद्धमित्याह—**इति प्रसिद्धमिति**। व्याप्तिमुक्त्वा विवक्षितमनुमानमाह—**किम्विति**। शास्त्रस्योक्तविशेषणवतो यस्माद् महतो भूताद् योनेः संभवस्तस्य सर्वज्ञत्वाद्यनतिशयमिति किमु वक्तव्यमिति संबन्धः। ब्रह्म वेदार्थादधिकार्थज्ञानवत्, तत्कर्तृत्वात्, यो यद्वाक्यप्रमाणकर्ता स तदर्थादधिकार्थज्ञानवान्, यथा पाणिनिः। यद्वा वेदः स्वार्थादधिकार्थज्ञानवज्जन्यः, वाक्यप्रमाणत्वात्, पाणिन्यादिवाक्यवदित्यर्थः। शास्त्रहेतोर्ब्रह्मणः सर्वज्ञता पक्षधर्मताबलादिति वक्तुं शास्त्रस्य ग्रन्थतो महत्त्वमाह—**अनेकेति**। महाविषयत्वेनोक्तं महत्त्वं व्यनक्ति—**देवेति**। आदिशब्देन वर्णाश्रमधर्मा गृह्यन्ते।

---

१. तत्रापि 'यद्यद्' इत्यस्य 'ततः' इत्यनेन, 'यस्मादि'त्यस्य 'स' इत्यनेन च सम्बन्धः।

२. यत् = शास्त्रम्। ३. ज्ञानात् = स्वजनकज्ञानात्।

वर्णाश्रमादिप्रविभागहेतोर्ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्याप्रयत्नेनैव लीलान्यायेन पुरुषनिःश्वासवद् यस्मान्महतो भूताद् योनेः संभवः, 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' (बृ.उ. २।४।१०) इत्यादिश्रुतेः; तस्य महतो भूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेति।

प्रकटार्थविवरणम्

दार्ष्टान्तिकमाह—**किमु वक्तव्यमिति**। ऋग्वेदाद्याख्यस्य शास्त्रस्य यस्मात् महतो भूताद् योनेः संभवः, तस्य सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेति किमु वक्तव्यमित्यन्वयः। संभवे प्रमाणमाह—**अस्येति**। मुख्यलक्षणादिद्वारेण सर्वावभासनसमर्थस्य महत्त्वद्योतनायानेकशाखेत्यादिविशेषणानि तन्महत्त्वेन तत्कारणस्य निरतिशयसर्वज्ञत्वं दर्शयितुम्। स्वातन्त्र्येणार्थमुपलभ्योच्चार्यमाणत्वं पौरुषेयत्वं व्यावर्तयति—**अप्रयत्नेनैवेति**। वेदः अपौरुषेयः, अनपेक्षप्रमाणत्वात्, प्रत्यक्षवदिति प्रयोगः। न चाप्तप्रणीतत्वेनैव प्रामाण्यमित्यसिद्धो हेतुरिति मन्तव्यम्, चक्रकापत्तेः। आप्तप्रणीतत्वेन प्रामाण्यावगमात् प्रवृत्तिः, प्रवृत्तस्य च फलदर्शनेनाप्तत्वावधारणम्, ततः प्रामाण्यावगतिरिति। वेदः आप्तप्रणीतत्वानपेक्षप्रामाण्यः प्रमाणत्वात् प्रत्यक्षवदिति प्रयोगः। आप्तवाक्यस्य तु पौरुषेयत्वे सति अनाप्तत्वाशङ्कापकरणायाप्तप्रणीतत्वमपेक्ष्यते, न प्रामाण्ये। शब्दानामर्थपरिच्छेदसामग्र्यस्य[1] प्रामाण्यस्य स्वारसिकत्वात्। एतेनैतत् प्रत्युक्तम्—वैदिकं प्रामाण्यं वक्तृगुणाधीनं वाक्यप्रामाण्यत्वात्, आप्तवाक्य प्रामाण्यवदिति। हेतोश्च [2]पक्षधर्मत्वाभावादसिद्धिः।

यश्च वेदः पौरुषेयः, वाक्यत्वात्, कालिदासादिवाक्यवत् इत्युद्घुष्यते, तत्र विपक्षबाधकाभावादप्रयोजकता;

भाष्यभावप्रकाशिका

एवंविधस्य वेदस्य यस्मान्महतो भूताद् योनेः संभवः, तस्य महतो भूतस्य ब्रह्मणो निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं च किमु वक्तव्यमिति योजनात् पक्षधर्मताबलात् शास्त्रकारणस्य ब्रह्मणः सर्वज्ञता सिध्यतीति भावः। अन्ये तु—'**अनेकशाखाभेदभिन्नस्य वेदस्ये**'त्यादि '**संभवः**' इत्यन्तमुपनयः, '**तस्ये**'त्यादि ''**सर्वशक्तित्वं चे**''त्यन्तं निगमनमिति—वर्णयन्ति। ग्रन्थतो महत्त्वमाह—**अनेकशाखेति**। अर्थतो महत्त्वमाह—**देव-तिर्यगादीति**। अत एव **ज्ञानाकरस्येत्युक्तम्**। इदानीं पौरुषेयत्वाशङ्कां व्यावर्तयति—**अप्रयत्नेनेति**।

प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वाभावात् तदुपादानत्वेऽपि वेदस्य नापौरुषेयता, पूर्व-पूर्वसदृशोत्तरोत्तरक्रमविशिष्टस्यैव ब्रह्मोपादानतया प्रवाहरूपेण नित्यत्वम्, सर्वार्थप्रकाशनसमर्थतया स्वोपादानगतसर्वार्थप्रकाशनसामर्थ्यानुमापकता न विरुध्यते; प्रदीपादिगतप्रकाशनशक्तेः स्वकारणाग्निशक्त्यनुमापकतादर्शनादिति भावः।इति प्रथमवर्णकम्।।

न्यायनिर्णयः

'प्रदीपवत्सर्वार्थविद्योतिन' इत्युक्तं प्रकृतोपयोगित्वेनार्थतोऽनुवदति—**सर्वेति**। यथोक्तं शास्त्रं ब्रह्मणो जायते चेत् तस्य पौरुषेयत्वेनानपेक्षत्वप्रामाण्यहानिरित्याशङ्क्याह—**अप्रयत्नेनेति**। पौरुषेयत्वं पुरुषनिर्वर्त्यत्वमात्रं वा नूतनानुपूर्वीरचनं वा मानान्तरदृष्टार्थोक्तिरचनं वा। नाद्यः, तवापि पदवाक्यादिषु तुल्यत्वात्। द्वितीये नूतनत्वं क्रमान्यत्वमात्रं वा विसदृशक्रमत्वं वा। नाद्यः, त्वयाऽपि प्रतिपुरुषमुपाधिभेदादुपहितक्रमान्यत्वमात्रस्येष्टत्वात्। न द्वितीयः, मयाऽपि क्रमवैसादृश्यस्यानिष्टत्वात्। न तृतीयः, अनङ्गीकारात्। अतो न पौरुषेयतया सापेक्षतेति भावः। अयत्नेन ब्रह्मणो वेदोत्पत्तौ मानमाह—**अस्येति**। ब्रह्मणोऽनतिशयं महत्त्वं तात्त्विकं च सर्वज्ञतासाधकं, तद्रहिते तदनुपलम्भादिति मत्वा महतो भूतस्येति पुनरुक्तम्। यथा दीपादिभासनशक्तेः स्वहेतुवह्निशक्त्यनुमापकत्वं तथा वेदगतसर्वार्थभासनशक्तेरपि स्वाश्रयोपादानस्थसर्वार्थभासनशक्त्यनुमापकतेति समुदायार्थः।

---

१. 'सामर्थ्यस्य' इत्यर्थः। तथैव वा पाठःस्यात्। द्र. वे. तत्त्वा. पृ. ३। 'प्रामाण्यमर्थपरिच्छेदसामर्थ्यम्' (पृ. २८३) इति, 'शब्दानां तावत् संसृष्टार्थावबोधनसामर्थ्यं स्वारसिकमेव' इति च विवरणम्। पृ. ५५८।

२. 'परेषां च प्रामाण्यस्य सामान्यरूपतया तत्र प्रामाण्यान्तरावृत्तेः अपक्ष [धर्म] तया हेतोरसिद्धिः। साध्यविधुरं चोदाहरणम्' इति वेदान्ततत्त्वालोके दृश्यते। पृ. ३।

अथवा यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत् स्वरूपाधिगमे। शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः। शास्त्रमुदाहृतं पूर्वसूत्रे—'यतो वा इमानि भूतानि जायन्ते' इत्यादि। किमर्थं तर्हीदं सूत्रं, यावता पूर्वसूत्र एवैवंजातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितम्। उच्यते—तत्र पूर्वसूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानाज्जन्मादि केवलमनुमानमुपन्यस्तमित्याशङ्क्येत; तामाशङ्कां निवर्तयितुमिदं सूत्रं प्रववृते—शास्त्रयोनित्वादिति[1]।।३।।

इति तृतीयं शास्त्रयोनित्वाधिकरणम्।।

प्रकटार्थविवरणम्

स्वाभाविकशक्तिवशात् संसर्गपरत्वेन वाक्यत्वं न पौरुषेयत्वाधीनम्, अन्यथा आत्मादिरनित्यः; अर्थत्वात्, घटवत् इत्यप्युद्घुष्यताम्। यदि तत्र कार्यत्वमुपाधिरित्यभिदधीत [2]तर्ह्यसर्वज्ञवचनत्वमुपाधिरित्यभिदधीय।

किञ्च पौरुषेयत्वं पुरुषनिर्वर्त्यतामात्रं चेत्, सिद्धसाधनम्। क्रमविशिष्टानां वर्णानां वेदशब्दवाच्यत्वात् क्रमस्य चोच्चारणोपलब्ध्यन्यतरधर्मस्य क्षणिकतया तद्विशिष्टानामपि जन्यत्वात्। क्रमसादृश्यपरम्परायाश्चेदंप्रथमताऽभावेनानादि[3]-त्वाभिधानम्। यदि प्रमाणेनार्थमुपलभ्योच्चार्यमाणत्वं पौरुषेयत्वम्, तदा कालिदासादिवाक्यस्यापि कस्य चिदुत्प्रेक्षापूर्वकत्वात् [4]तत्रानैकान्तिको हेतुः। अथ ज्ञानमात्रसमुत्थत्वम्, तदा प्रामाण्यप्रसिद्ध्यनुपपत्तिबाधः। पुरुषान्तरोच्चारणनिरपेक्षत्वं नाम पुरुषस्य स्वातन्त्र्यं यत्र तत् पौरुषेयमिति अनुवादेऽनेकान्त इति कृतमतिविस्तरेण।

वर्णकान्तरमाह—**अथवेत्यादिना**। अस्मिन् पक्षे पृथगारम्भमाक्षिपति—**किमर्थमिति**। जन्मादिलिङ्गकस्वतन्त्रानुमानोपन्यासशङ्कानिरासायेत्याह—**उच्यत इति**। इति तृतीयं शास्त्रयोनित्वाधिकरणम्।।

भाष्यभावप्रकाशिका

इदानीं वर्णकान्तरे सूत्रस्य प्रमाणप्रतिज्ञालक्षणमर्थान्तरमाह—**अथवेति**। अस्मिन् व्याख्याने पूर्वसूत्रशेषस्याप्यस्य सूत्रस्य

न्यायनिर्णयः

शास्त्रं शास्त्रकर्तृत्वे सत्यसर्वज्ञत्वानधिकरणकर्तृकं, कार्यत्वात्, घटवदित्यनुमानाद् वेदस्य सर्वज्ञकर्तृकतेत्युक्तम्। इदानीं जगद्धेतुत्वेन लक्षिते ब्रह्मणि मानविशेषचिन्तायै वर्णकान्तरमवतारयति—**अथवेति**। 'तं त्वौपनिषदम्' इत्यादि ब्रह्मणः शास्त्रैकगम्यत्वं समर्थयेत्, न वेति कार्यलिङ्गस्य हेतुविशेषावसानानवसानाभ्यां संशये, विमतं सकर्तृकं, कार्यत्वात्, घटवदिति सिद्धे कर्तरि, तदेकत्वानेकत्वसंदेहे लाघवात् तदैक्यम्, स च ज्ञात्वैव सर्वं करोतीति सर्वज्ञः, सर्वशक्तिश्चेत्यनुमानमेव विचार्यमिति प्राप्ते प्रत्याह—**यथोक्तमिति**। नित्यसिद्धस्य ब्रह्मणः शास्त्रं कारणमित्ययुक्तम् इत्याशङ्क्याह—**प्रमाणमिति**। अनुमानादपि लाघवानुगृहीताद् ब्रह्मस्वरूपधीसंभवात् न तत्र शास्त्रमेव मानमित्याशङ्क्याह—**शास्त्रादिति**। न तावदप्रत्यक्षं ब्रह्म वह्निवद् विशेषतोऽनुमेयं, कार्यमात्रस्य कर्तृमात्रगमकत्वात्। न च लाघवात् तदैक्यधीः, विचित्रप्रासादादेरनेककर्तृकस्यापि दृष्टत्वेनानिर्णयात्। तथा च कर्तुर्न सर्वज्ञत्वादि अनुमानलभ्यम्। शास्त्रे तु 'यतः' इत्येकवचनात् कर्त्रैक्यसिद्धौ सर्वज्ञत्वादिसिद्धेः

१. ब्रह्म वेदान्तप्रतिपाद्यम्, शास्त्रयोनित्वात् =शास्त्रप्रमाणकत्वात् इति द्वितीयवर्णके सूत्रयोजना। न च हेतोः साध्यावैशिष्ट्यम्। अवधारणगर्भतया शास्त्रैकप्रमाणकत्वादित्यस्य प्रमाणान्तरागम्यत्वादित्यर्थे पर्यवसानात् इति न्या. र.म.। ब्रह्म शास्त्रप्रमाणकम्, शास्त्रैकगम्यत्वात् इति ब्र. वि.। ब्रह्म वेदान्तैर्जिज्ञास्यमेव, वेदैकगम्यत्वात् इति वे. सू. मु.।

२. यत्र पौरुषेयत्वं तत्रासर्वज्ञवचनत्वं कालिदासवाक्यादाविति साध्यव्यापकत्वम्। पक्षे वाक्यत्वमस्ति, असर्वज्ञवचनत्वं नास्ति, कर्तुरीश्वरस्य सर्वज्ञत्वाभ्युपगमात्। अतः साधनाव्यापकत्वमित्युपाधित्वम्। एवं जन्यप्रमामूलकत्वादिकमपि बोध्यम्।

३. नित्यानां विभूनां च वर्णानां कालतो देशतो वा क्रमासम्भवात् तदभिव्यञ्जकोच्चारणगतः, तज्ज्ञानगतो वा क्रमस्तत्र वक्तव्यः। स च घकारोच्चारणोत्तरोच्चार्यमाणटकारत्वादिरूपः, घज्ञानोत्तरज्ञेयटत्वादिरूपो वा। तत्रोच्चारणज्ञानयोरनित्यत्वात् तद्विशिष्टपदादीनामनित्यत्वम्। वेदस्य स्वरूपेणानित्यत्वेऽपि कालत्वव्यापकस्वसजातीयानुपूर्वीकत्वरूपं प्रवाहनित्यत्वमादाय 'वाचा विरूप नित्यया' 'अत एव च नित्यत्वम्' इति श्रुतिसूत्रयोरुपपत्तिः। मीमांसकैरपीदृशमेव नित्यत्वं वेदस्यागत्या स्वीकार्यम्। (द्र. प्रभावली पृ. ८) सर्गप्रलयाङ्गीकर्तृभिश्चोक्तप्रवाहनित्यत्वलक्षणे आनुपूर्वी-तत्संस्कारान्यतरत् निवेशनीयम्। प्रलये तदानुपूर्व्यभावेऽपि तत्संस्कारसत्त्वात् न दोषः।

४. स्वकल्पितार्थके कविवाक्ये वाक्यत्वरूपहेतुसत्त्वात्, प्रमाणेनार्थमुपलभ्य रचितत्वरूपसाध्याभावाद् व्यभिचार इति भावः।

शारीरकन्यायसंग्रहः

समन्वयाधिकरणम्

तत्तु समन्वयात्।।१.१.४।।

यद्यपि प्रमाणान्तरानुरोधित्वाल्लौकिकस्य शब्दस्य भूतेऽप्यर्थे प्रयोगतात्पर्यं संभवति, तथापि वैदिकस्य वाक्यस्य भूतार्थे तात्पर्याभावात्, भूतार्थस्य प्रमाणान्तरयोग्यतया तत्संवादविसंवादाभ्यां समन्वयस्य भूतेऽर्थे प्रामाण्यायोगात्, विधिव्यवधानेनैव भूतस्याप्यर्थस्य यूपाहवनीयादिवत् सिद्धेः, कार्यान्वितस्वार्थे शब्दसामर्थ्याच्च न ब्रह्मणि कार्यनिरपेक्षे वेदान्ताः प्रमाणमिति प्राप्तम्।

तत्र—उपक्रमोपसंहारयोः अनुसन्धानम्, मध्येऽप्यभ्यस्यमानता, मानान्तरेणानधिगतार्थत्वम्, विशिष्टफलसंबन्धः, अर्थवादोपादानम्, उक्तार्थस्य युक्तिभिरुपपादनम्— इति षड्विधानि तात्पर्यलिङ्गानि यस्य वाक्यस्य यस्मिन्नर्थे प्रतीयन्ते तद् वाक्यं तदर्थप्रमितिशेषं लौकिकं वैदिकं च, विधिवाक्येषु तथा दर्शनात्— इति न्यायेन वेदान्तानामपि षड्विधतात्पर्यलिङ्गवतां ब्रह्मप्रमितिशेषत्वं साध्यते।

अधिकरणे पुनस्तादर्थ्येन ब्रह्मणः प्रमाणान्तरायोग्यत्वात् समन्वयस्य प्रमाणान्तरसंवादविसंवादाशङ्काम्, प्रमाणान्तरयोग्यस्य च तदनुत्पादे विषयाभावात् समन्वयस्य मिथ्यात्वशङ्कां च निराकृत्य ब्रह्मण्यनपेक्षं प्रामाण्यं समन्वयस्य दर्शितं प्रथमेन वर्णकेन।

द्वितीयेन तु वर्णकेन विधेयाभावात्, कर्तरि वा जीवे, कर्मणि वा ब्रह्मणि विधेयक्रियाफलस्यातिशयस्य अनित्यस्य मोक्षस्यानुपपत्तेः, ब्रह्मणि च प्रमाणाभावप्रसङ्गात्—इत्येवमादिभिः हेतुभिः समन्वयस्य विधिव्यवधानमन्तरेण प्रामाण्यमुक्तम्।

पुनश्च वर्णकद्वयार्थसिद्ध्यर्थं पदानां गवादिस्वरूपमात्रनिष्ठत्वे, पदार्थानामेव परस्परसंसर्गप्रतिपादनसामर्थ्ये च कल्पनागौरवात्, पदानामेव संसर्गप्रतिपादनसामर्थ्ये कल्पनालाघवात्, संसर्गविषयप्रवृत्त्या च शब्दस्य संसर्गविषयज्ञानसामर्थ्यानुमानात्, आवापोद्वापयोरपि अन्वितस्वार्थस्याव्यभिचारात्, 'देवदत्तः काष्ठैः स्थाल्यामोदनं पचति' इत्याद्यतीतानागतवर्तमानार्थवाक्येषु निगमनिरुक्तनिघण्टुव्याकरणोपदेशेषु च कार्यप्रत्ययशून्येषु प्रसिद्धार्थपदसमभिव्याहारेण परिशेषात् अप्रसिद्धार्थपदपदार्थसंबन्धग्रहणात्, तत्राप्यन्वितस्वार्थाव्यभिचारात्, 'कार्यान्वितस्वार्थे' इति विशेषणादन्वितस्वार्थग्रहणस्य लाघवात्, कार्यस्य कार्यान्तराभावात्, भावार्थकार्यत्वस्य नियोगान्विताभिधाननिमित्तत्वात्, स्वरूपेण भूतत्वात् गुणद्रव्यादिपदार्थानां च कार्येण क्रियाकारकान्वययोग्यत्वाभावात्, शेषशेष्यन्वये स्वर्गादिफलेनैव शेषिणा सर्वपदार्थानामन्वयप्रसङ्गात्, लौकिकव्यवहाराविसंवादिभूतनिष्ठवाक्यानामप्रामाण्यस्य कार्यपदाध्याहारस्य वा प्रतिवाक्यं पुरुषबुद्धिनिष्ठत्वे चार्थे सामर्थ्याभावस्य वा प्रसङ्गात्, अव्यभिचारात्, कार्यान्वयनियमे प्रमाणान्तरप्रमितकार्यान्वयप्रसङ्गात्, "आग्नेयोऽष्टाकपालः" इत्यादिषु संसर्गप्रमित्या नियोगाध्याहाराभावप्रसङ्गाच्च पदानामन्वितस्वार्थे सामर्थ्यमित्युक्तम्।

भाष्यभावप्रकाशिका

पृथक्करणं वर्णकान्तरेण प्रपञ्चान्तःपातिशास्त्रस्यापि हेतुत्वेन सर्वज्ञत्वमुपपादयितुं शक्यमिति दर्शयितुम्, तदैव द्वितीयसूत्रेण ब्रह्मस्वरूपलक्षणासंभवाशङ्कां व्युदस्य लक्षणसंभव उक्तः। तस्यैव तु लक्षणस्यानुमानत्वाशङ्कामपाकृत्यागमिकत्वोपदर्शनेन ब्रह्मणि शास्त्रं प्रमाणमुक्तम्—**शास्त्रयोनित्वादिति**। इति तृतीयं शास्त्रयोनित्वाधिकरणम्।

इति पूज्यश्रीचित्सुखमुनिकृतौ शारीरकमीमांसाभाष्यव्याख्यायां भाष्यभावप्रकाशिकायां शास्त्रयोनित्वाधिकरणं संपूर्णम्।।

न्यायनिर्णयः

शास्त्रैकगम्यं ब्रह्मेति भावः। किं तद् ब्रह्मणि प्रमाणं शास्त्रं? तदाह—**शास्त्रमिति**। पूर्वसूत्रे शास्त्रस्योक्तत्वे शास्त्रयोनित्वं पृथङ् न वाच्यमिति शङ्कते—**किमर्थमिति**। एतत्सूत्रार्थवत्त्वं प्रतिजानीते—**उच्यत इति**। तत्र शास्त्रस्योक्तत्वेऽपि सूत्रे तद्वाचकाभावाज्जन्मादिलिङ्गकं स्वतन्त्रमनुमानमुक्तमिति शङ्कां निरसितुमिदं सूत्रमिति तदर्थवत्तां समर्थयते—**तत्रेति**। न च तर्हीदं पूर्वशेषतया तदन्तर्गमात् न पृथक्करणीयम्। तच्छेषत्वेऽपि सर्वज्ञत्वे शास्त्रकर्तृत्वहेतुसमर्थनन्यायभेदादधिकरणान्तरत्वसिद्धेरिति।।३।।इति तृतीयं शास्त्रयोनित्वाधिकरणम्।।

४।।समन्वयाधिकरणम्।।सू. ४।।

कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते, यावता 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै. सू. १।२।१) इति क्रियापरत्वं शास्त्रस्य प्रदर्शितम्। अतो वेदान्तानामानर्थक्यम्, अक्रियार्थत्वात्। कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वम्,

प्रकटार्थविवरणम्

एवं जगतो जन्मादिकारणं सर्वज्ञं ज्ञानानन्दात्मकं ब्रह्म शास्त्रप्रमाणकमित्युपचिक्षेप। तत्र संशयः—किं भूतार्थे शास्त्रं प्रमाणं न वेति। नेति तावदाहुर्जैमिनीयाः—**कथं पुनरिति।**'अक्रियार्थानामानर्थक्यम्' इति सूत्रकारवचनात् नास्ति वेदान्ता-

भाष्यभावप्रकाशिका

तदिदं प्रतिज्ञातं शास्त्रप्रमाणकत्वं सूत्रेणोपपादयितुमुत्सूत्रं पूर्वपक्षयति भाष्यकारः—**कथं पुनरिति।** काऽनुपपत्तिरिति? अत आह—**यावतेति।** अध्ययनविधिपरिगृहीतानामानर्थक्यमयुक्तमित्यत आह—**कर्त्रिति।** अतत्प्रकरणपठितानां कथं तच्छेषतेति?

न्यायनिर्णयः

वेदान्ता यथोक्ते ब्रह्मणि प्रमाणं न वेति सिद्धार्थज्ञानात् फलभावाभावाभ्यां, सिद्धमर्थं रूपादिहीनं बोधयतो वाक्यस्य सापेक्षत्वानपेक्षत्वाभ्यां वा संशये पूर्वाधिकरणद्वितीयवर्णकेनाक्षेपलक्षणां संगतिं विवक्षन्नुत्तरसूत्रव्यावर्त्यपक्षमाह—**कथमिति।** 'सदेव' इत्यादितत्तदाम्नायाधीतसर्वोपनिषदां स्फुटब्रह्मलिङ्गानां ब्रह्मणि समन्वयसाधनादत्र श्रुत्यादिसंगतयः। फलं तु पूर्वपक्षे परिशुद्धब्रह्मबुद्ध्यभावात् तदर्थिनामुपनिषत्स्वप्रवृत्तिः; सिद्धान्ते शुद्धब्रह्मबुद्धिसिद्धौ मुमुक्षूणामुपनिषत्सु यत्नाधिक्यमिति विवेक्तव्यम्। कथमित्याक्षेपे हेतुर्यावतेति। 'वायुर्वै क्षेपिष्ठा देवता' इत्यादयोऽर्थवादा विध्युद्देशार्थवादयोर्मिथोऽपेक्षणाद् विध्युद्देशेनैकवाक्यतया धर्मे प्रमाणं न वेति संशये पूर्वपक्षयति—**आम्नायस्येति।** सर्वस्य वेदस्य विधिनिषेधार्थवादमन्त्रनामधेयात्मकस्य कार्यतच्छेषार्थताध्रौव्यात्, यानि वाक्यानि कार्यं वा तच्छेषं वा नाचक्षीरन्, किंतु शुद्धं सिद्धमर्थमभिदधीरन्, अतदर्थानां तेषामानर्थक्यं फलवदभिधेयवैधुर्यमतोऽनित्यमनियतं सापेक्षमेवोच्यते वेदस्य प्रामाण्यमित्युक्तत्वात्, यथाश्रुतिगृहीतानामर्थवादानां सन्तमसन्तं वा भूतमर्थं वदतां तदुक्त्यैव नैराकाङ्क्ष्यात् कार्याध्याहारासिद्धेः, 'स एवैनं भूतिं गमयति' इति विशिष्टार्थवेदनेनैवावसानात्, 'वायव्यं श्वेतमालभेत' इत्यनेनैकवाक्यत्वाभावात्, मुख्यार्थसंभवे प्राशस्त्यलक्षणाऽयोगात्, आख्यायिकात्मनामपि लोके शब्दानां दर्शनात् तेषां फलवदर्थावबोधानियमात्, अध्ययनविधेरक्षरावाप्त्या दृष्टार्थत्वात्, विध्युद्देशस्यापि विशिष्टार्थविधिना चरितार्थत्वात्, मिथोऽपेक्षाभावादर्थवादानर्थक्यात्, तत्तुल्यमन्त्रादेरपि तथात्वात्, एषां धर्माप्रमापकत्वात्, एतद्युक्तचोदनानामप्रामाण्यात्, अप्रमाणं सर्वो वेद इति प्राप्ते—'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' इति सूत्रेण सिद्धान्तमाह—**क्रियेति।** 'वायव्यं श्वेतमालभेत भूतिकामः' इत्येवमन्तेन विध्युद्देशेन सह 'वायुर्वै क्षेपिष्ठा' इत्याद्यर्थवादानां क्षिप्रदेवतासाध्यं कर्म क्षिप्रमेव फलं दास्यतीति प्राशस्त्यार्थेनैकवाक्यत्वात् तत्र प्रकृतविध्यपेक्षतमर्थं वदन्तोऽर्थवादादयोऽर्थवन्तः स्युरित्युक्तेः, अध्ययनविधेर्दृष्टार्थत्वात्, अक्षरावाप्तेरफलत्वात्, फलवदर्थावसायिताया वेदमात्रस्य वाच्यत्वात्, अर्थवादानां च भूतार्थवेदने फलानवसायात्, आख्यायिकात्मकलौकिकशब्दानामफलत्वस्यानिष्टत्वात्, विध्याकाङ्क्षितप्राशस्त्यलक्षणया तदेकवाक्यत्वात्, विधेरेव प्रवृत्तौ प्राधान्येऽपि तदनुग्राहकतया स्तुत्यपेक्षणात् तदेकवाक्यानामर्थवादानां तथैव प्रामाण्यात्, मन्त्रादेरपि स्वाध्यायविधिना फलवत्त्वसिद्धेः, विशिष्टार्थबोधिप्रधानवाक्यार्थे प्रामाण्यात्, तद्युक्तचोदनानामपि 'तद्भावात्, युक्तं सर्वस्यैवाम्नायस्य क्रियातच्छेषविषयत्वेन प्रामाण्यम्। तदेवं पूर्वोत्तरपक्षाभ्यां शास्त्रमात्रस्य कार्यपरत्वं प्रमाणलक्षणे स्थितमित्यर्थः।

तथापि वेदान्तेषु किं जातमित्याशङ्क्य यावतेत्यस्यापेक्षितमाह—**अत इति।** अर्थमात्रदृष्टेरानर्थक्यं फलवदभिधेयराहित्यम्। **अक्रियार्थत्वात्** कार्यतच्छेषवाचित्वाभावादित्यर्थः। अध्ययनविधिविरोधादानर्थक्यमयुक्तमित्याशङ्क्याह—**कर्त्रिति।** फलसंग्रहार्थ-

१. तद्भावात् = प्रामाण्यसत्त्वात्। ४. परिनिष्ठितम् = सिद्धं वस्तु। [पृ. ७९]

उपासनादिक्रियान्तरविधानार्थत्वं वा। न हि [१]परिनिष्ठितवस्तुप्रतिपादनं संभवति, प्रत्यक्षादिविषयत्वात् परिनिष्ठितवस्तुनः। तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात्। अत एव 'सोऽरोदीत्' इत्येवमादीनामानर्थक्यं मा भूदिति 'विधिना त्वेकवाक्यत्वात् [१]स्तुत्यर्थेन विधीनां स्युः' (जै. सू. १।२।७) इति स्तावकत्वेनार्थवत्त्वमुक्तम्। मन्त्राणां च 'इषे त्वा' इत्यादीनां क्रियातत्साधनाभिधायित्वेन [२]कर्मसमवायित्वमुक्तम्।

प्रकटार्थविवरणम्

नामर्थवत्त्वमित्यर्थः। कथमध्ययनविधिपरिगृहीतानां वैयर्थ्यमेवेत्याशङ्क्याह—**कर्तृदेवतादीति**। कर्मप्रकरणादपि व्युत्थितानां कथं तच्छेषत्वमित्याशङ्क्याह—**उपासनादीति**। "आत्मेत्येवोपासीत" "निदिध्यासितव्यः"इत्यादिना जीवे अपहतपाप्मादिधर्म-समारोपेण उपासना ध्यानं च विधीयते; तच्छेषत्वं वा भविष्यतीत्यर्थः। ननु जीवस्य ब्रह्मात्मत्वोपदेशेन भूत एव प्रामाण्यं कि न सूत्रकृतोऽभिमतमित्याशङ्क्याह—**न हीति**। जीवस्य संसारित्वग्राहकप्रत्यक्षादिविरोधात् न ब्रह्मात्मत्वप्रतिपादनं संभवतीत्यर्थः। सुखदुःखप्राप्तिपरिहारयोः प्रवृत्तिनिवृत्तिसाध्यत्वात् न भूत..तिपादने प्रयोजनमप्यस्तीत्याह—**तत्प्रतिपादने चेति**। यतो न भूतवस्तुज्ञाने प्रयोजनम्, विध्युपात्तस्य च प्रयोजनपर्यन्तता वक्तव्या, अत एवार्थवादानां **जैमिनिना** द्रव्यदेवतास्ताव-कत्वेनार्थवत्त्वमुक्तमित्यन्वयः। तथा हि—प्रथमे पादे वेदस्यापौरुषेयत्वेन प्रयोजनवत्कार्यार्थत्वेन च विधीनां प्रामाण्यं प्रतिपाद्य अर्थवादानां तदभावात् "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते" इत्यप्रामाण्यमाशङ्क्य सिद्धान्त-ममिदधौ—"विधिना तु" इति। विधीनां प्रवर्तकत्वनिवर्तकत्वाकाङ्क्षितद्रव्यदेवतास्तुतिनिन्दाद्वारेण संनिहितविधिनिषेधैक-वाक्यत्वादर्थवादा अर्थवन्तः स्युरित्यर्थः। अनन्तरं च अथेदानीं किं विवक्षितवचनाः मन्त्राः उताविवक्षितवचना इति प्रक्रम्य "इषेत्वेति शाखां छिनत्ति" इत्यादिविनियोगबलादुच्चारणमात्रेणोपकुर्वन्ति मन्त्रा इति पूर्वपक्षयित्वा सिद्धान्तमुपचक्रमे "अविशिष्टस्तु वाक्यार्थ" इति। लौकिकानां पदानां वेदे प्रयुज्यमानानामविशिष्ट एवार्थ इति प्रयोग-विध्याक्षिप्तानुष्ठेयपदार्थस्मारकतया विनियुक्तानां मन्त्राणां क्रियाङ्गत्वम्। तदेतदाह—**मन्त्राणां चेति**।

भाष्यभावप्रकाशिका

अत्राह—**उपासनेति**। ननु वेदान्तानां क्रियापरत्वमुपक्रमादिलिङ्गावगतेन सिद्धवस्तुबोधनतात्पर्येण विरुद्धमिति, तत्राह—**न हीति**। प्रत्यक्षादिसंवादेऽनुवादकतया, तद्विसंवादे चित्र-निम्नोन्नतादिविषयचाक्षुषज्ञानस्येव स्पार्शनज्ञानविरोधे प्रामाण्यायोगादिति भावः। किं च प्रयोजनशून्यतया तात्पर्यायोगादवस्तु(योगादवस्तु)निष्ठतेत्याह—**अत एवेति**। ननु विधिस्तावकत्वमन्तरेणापि प्रामाण्यं मन्त्राणामिव स्यादित्यत आह—**मन्त्राणामिति**। कर्मकाण्डपठितानां विधिशेषत्वेन प्रामाण्येऽपि वेदान्तवाक्यानां स्वार्थबोधकत्वेन

न्यायनिर्णयः

मादिपदम्। उक्तं हि—'क्रत्वर्थकर्तृप्रतिपादनेनोपनिषदां नैराकाङ्क्ष्यम्' इति। कर्मप्रकरणोत्तीर्णोपनिषदां कुतस्तद्विधिशेष-तेत्याशङ्क्याह—**उपासनादीति**। आदिशब्देन श्रवणादयो गृह्यन्ते। ननु वेदान्तानां न क्रियाविधिशेषत्वम्, उपक्रमोपसंहारैक-रूप्यादिलिङ्गैर्ब्रह्मणि तात्पर्यसिद्धेस्तत्राह—**न हीति**। मानान्तरयोग्ये ब्रह्मणि वेदान्तानां न तात्पर्यम्। तत्संवादेऽनुवादितया, तद्विसंवादे च स्पार्शनधीविरोधिचित्रनिम्नोन्नतचाक्षुषधीवद् विरोधादेव तेषामतद्बोधित्वादित्यर्थः। परिनिष्ठितेऽर्थे वेदान्ताप्रामाण्ये हेत्वन्तरमाह—**तदिति**। न हि भूतार्थप्रतिपादने क्वचिद्धानमुपादानं वा, तयोः प्रवृत्तिनिवृत्त्यायत्तत्वात्, [३]तयोश्च विधिनिषेधा-धीनत्वात्, तयोरपि कार्यविषययोः सिद्धेऽर्थेऽसंभवात्। अतस्तद्वादस्याफलत्वात् फलाधीनतात्पर्याभावान्न वेदान्ता भूतेऽर्थे मानम्। न च क्रियानपेक्षं भूतं वस्तु फलं, तद्धेतुर्वा, सुखदुःखाप्तिहानितद्धेतुत्वादृष्टेरित्यर्थः। मानान्तरसिद्धसिद्धार्थबोधित्वायोगात् तद्बोधस्य चाफलत्वात् न चेद् वेदान्तास्तत्र प्रमाणम्, कथं तर्हि तेषामर्थवत्तेत्याशङ्क्यार्थवादाधिकरणसिद्धान्तं स्मारयति—**अत एवेति**। वेदान्तानां मन्त्रवत् पृथगर्थसंभवात् किमित्यर्थवादवद् विधिना पदैकवाक्यतेत्याशङ्क्य मन्त्रवदेव तर्हि विधिभिर्वाक्यैकवाक्यता तेषामित्याह—**मन्त्राणां चेति**। अर्थवादाधिकरणं परिसमाप्य मन्त्रेषु चिन्ताऽवतारिता प्रमाणलक्षणे—

१. स्तुतिरत्र निन्दाया अप्युपलक्षणम्। २. कर्मसमवायित्वं कर्माङ्गत्वम्। ३. तयोः = प्रवृत्तिनिवृत्त्योः। तयोः = विधिनिषेधयोः।

न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टोपपन्ना वा। न च परिनिष्ठिते वस्तुस्वरूपे विधिः संभवति, क्रियाविषयत्वाद् विधेः। तस्मात् कर्मापेक्षितकर्तृस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानाम्। अथ प्रकरणान्तरभयान्नैतदभ्युपगम्यते, तथापि स्ववाक्यगतोपासनादिकर्मपरत्वम्। तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्ते उच्यते–

प्रकटार्थविवरणम्

ननु क्रियाप्रकरणपठितानां भवतु क्रियाशेषत्वेनार्थवत्त्वं, न सर्वत्रेत्याशङ्क्याह—**न क्वचिदपीति**। विमतं वेदवाक्यं विधिसंस्पर्शेनैव[नैवार्थवत्]भूतार्थवेदत्वात् "सोऽरोदीत्" इत्यादिवदित्यर्थः[1]। तर्हि वेदान्तानां स्वार्थ एव विधिं परिकल्प्यार्थवत्त्वमस्तु, किं कर्मविधिशेषत्वेनेत्याशङ्क्याह—**न चेति**। "दध्ना जुहोति" इत्यादेरपि गुणावच्छिन्नभावार्थविषयत्वात् साधनविधायकत्वाच्च नित्यशुद्धसिद्धस्य न विधिविषयत्वमित्यर्थः। भट्टदृष्टिं निगमयति—**तस्मादिति**। यदुक्तं **गुरुमतानुसारेण** उपासनादिक्रियान्तरविधानार्थत्वं वेति तद् विवृणोति—**अथेत्यादिना**। सर्वथाऽपि न शास्त्रप्रमाणकमद्वितीयं ब्रह्मेत्युपसंहरति—**तस्मादिति**।

भाष्यभावप्रकाशिका

प्रामाण्यं स्यादित्यत आह—**न क्वचिदिति**। कल्प्यतां तर्हि विधिः "पूषा प्रपिष्टभागः" इत्यादिष्विवेत्याशङ्क्याह—**न चेति**। उपसंहरति—**तस्मादिति**। अत्रारुचिकारणमुक्त्वा पक्षान्तरमुपसंहरति—**तस्मान्नेति**। सूत्रेण सिद्धान्तयति—**एवं प्राप्ते उच्यते–**

न्यायनिर्णयः

'इषे त्वा' इत्यत्र 'छिनद्मि' इत्यध्याहारेण शाखाच्छेदप्रतीतेः, 'अग्निर्मूर्धा' इत्यादौ च तद्धेतुदेवतादिदृष्टेः, 'इषे त्वा' इत्यादयो मन्त्राः श्रुत्यादिना क्रतौ विनियुक्ता विषयाः। ते किमुच्चारणमात्रेणादृष्टं कुर्वन्तस्तत्रोपकुर्वन्ति, आहोस्विद् दृष्टेनैवार्थप्रकाशनेनेति संशये मन्त्राणां दृष्टार्थत्वे स्वाध्यायकालसिद्धतदर्थस्य चिन्तादिना स्मृतिसंभवात्, तावन्मात्रार्थवतां तेषां नित्यवदाम्नानानर्थक्यात्, मन्त्रैरेवार्थप्रत्यायननियमाददृष्टकल्पने तदुच्चारणादेव पुरुषव्यापारगोचरात् तन्नियोगविषयात् तत्कल्पनस्य युक्तत्वात् उच्चारणमात्रेणादृष्टं कुर्वन्तोऽमी क्रतावुपकुर्वन्तीति पूर्वपक्षमाह—'तदर्थशास्त्रादिति'। 'इषे त्वेति छिनत्ति' इत्यध्याहारात् क्रियोक्तिसमर्थो मन्त्रः। तत्रैवैनं मन्त्रम् 'इषे त्वेति शाखामाच्छिनत्ति' इति शास्त्रं निबध्नाति। अर्थोक्त्या क्रतूपकारे तदर्थशास्त्रानर्थक्यात्। तस्मात् तदुच्चारणमात्रेणैव क्रतावुपकारिताऽस्येत्यर्थः। 'मन्त्रैरेव देवतादि स्मर्तव्यम्' इति नियमस्य दृष्टार्थाभावात् अदृष्टार्थकल्पनेऽपि मन्त्रोच्चारणस्य तदर्थस्मारकत्वेन दृष्टार्थत्वात्, अर्थस्मृतेश्च प्रयोगार्थत्वात्, प्रयोगाच्च फलोदयात्, दृष्टे सत्यदृष्टकल्पनायोगात्, तदर्थशास्त्रस्य च परिसंख्यार्थत्वात्, दृष्टेनैवार्थप्रकाशनेन मन्त्राणां क्रतूपकारितेति सिद्धान्तमाह—'अविशिष्टस्तु वाक्यार्थः' इति। लोकवेदयोः शब्दानामर्थाविशेषात्, लोके फलवदुच्चारणदृष्टेः वेदेऽपि मन्त्रोच्चारणस्य तथात्वात्, अप्रकाशिते यज्ञे तदङ्गे च यागासिद्धेः, तदर्थं यज्ञादिप्रकाशनेन कर्मण्युपकारो मन्त्राणामित्यर्थः। तदेवं वेदान्तानामपि मन्त्रवत् कर्मतद्धेतुवादित्वेन विधिभिर्वाक्यैकवाक्यतया कर्मसमवायित्वं सिद्धवत्कृत्य मन्त्राधिकरणं प्रवृत्तमिति भाष्यार्थः। कर्मकाण्डीयमन्त्राणां विधिभिर्वाक्यैकवाक्यत्वेऽपि प्रकरणान्तरस्थवेदान्तानां स्वार्थनिष्ठत्वेनैव प्रामाण्यमित्याशङ्क्याह—**नेति**। विधिनिषेधार्थवादमन्त्रनामधेयाधिकारान् ग्रहीतुं क्वचिदपीत्युक्तम्। अदृष्टाऽपि युक्तिवशादेष्टुं शक्येत्याशङ्क्य 'न हि परिनिष्ठिते'त्यादिनोक्तं मत्वाऽऽह—**उपपन्ना वेति**। 'पूषा प्रपिष्टभागः' इत्यत्र यागाविनाभूतद्रव्यदेवताबुद्ध्या यागविधिकल्पनावद् वेदान्तानामपि स्वार्थे विधिं परिकल्प्यार्थवत्त्वसंभवे किं कर्मविधिशेषत्वेनेत्याशङ्क्याह—**न चेति**। 'दध्ना जुहोति' इत्यादाविव सिद्धेऽप्यर्थे विधिः स्यादित्याशङ्क्याह—**क्रियेति**। तत्र भावार्थस्यान्यतो लब्धत्वात् तदनुवादेन विधेः[2]संक्रान्तत्वात्, विना भावार्थं शुद्धस्य सिद्धस्य विध्यविषयतेति भावः। **वार्तिककारमतमुपसंहरति—तस्मादिति**। तत्रारुचिं सूचयित्वा मतान्तरं निगमयति—**अथेत्यादिना**। मतद्वयेऽपि संमतमर्थमुपसंहरति—**तस्मान्नेति**। पूर्वपक्षमनूद्य सिद्धान्तसूत्रमवतारयति—**इति प्राप्त इति**।

---

१. 'इति चेत्, तर्हि' इति पाठान्तरम्।　　२. संक्रान्तत्वादिति। गुणे दध्यादाविति शेषः।

तत्तु समन्वयात्।।४।।

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। तद् ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेवावगम्यते। कथम्? समन्वयात्। सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा.उ. ६।२।१) 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ.उ. १।१।१) तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः' (बृ.उ. २।५।१९)

प्रकटार्थविवरणम्

तत्तु समन्वयात्। सिद्धान्तसूत्रमवतार्य व्याचष्टे—**तुशब्द** इति। प्रतिज्ञातार्थे हेतुं पृच्छति—**कथमिति।** हेतुमाह—**समन्वयादिति।** सम्यक् तात्पर्येण ब्रह्मप्रतिपादने वेदान्तपदानामन्वयदर्शनमिति हेत्वर्थमाह[1]—**सर्वेषु हीति।** अयमाशयः—येषां पदानां यस्मिन्नर्थे शक्तितात्पर्ये तेषां तत्र प्रामाण्यं न त्वविधि[तद्विधि] संस्पर्शकृतम् "जर्तिलयवाग्वा वा जुहुयात्"[2] इत्यादेरपि स्वार्थे प्रामाण्यापातात्। अतो वेदान्ताः स्वार्थे प्रमाणम्, तत्परत्वात्, अग्निहोत्रादिवाक्यवत्। नासिद्धो हेतुः, तात्पर्यलिङ्गानामवगमात्। तथाहि—छान्दोग्ये षष्ठे प्रपाठके "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्यद्वितीयेनोपक्रम्य "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि" इत्यद्वितीयेनैवोपसंहारात्, मध्ये च 'तत्त्वमसि" इति नवकृत्वोऽभ्यासात्, मानान्तरानधिगतस्य चाद्वितीयात्मनः प्रतिपादनात्, "आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति फलसङ्कीर्तनात्, तथा सृष्टिस्थितिप्रलयाद्यर्थवादोपादानात्, तथा मृदादिदृष्टान्तैरद्वितीयस्यात्मनो युक्तिभिरुपपादनात् तस्य तावदद्वितीयात्मन्येव

भाष्यभावप्रकाशिका

तत्तु समन्वयादिति। तदेतद् व्याचष्टे—**तुशब्द इति।** तदित्युत्तरपक्षप्रतिज्ञां विभजते—**तद् ब्रह्मेति।** पूर्वपक्षी दुष्टाभिसन्धिः पृच्छति—**कथमिति।** कुतः प्रकारादित्यर्थः। सिद्धान्ती स्वपक्षहेतुं प्रकारभेदमाह—**समन्वयादिति।** सम्यगन्वयः समन्वयः, तस्मात्। सम्यक्त्वं चापुनरुक्तानेकशब्दानामखण्डैकरसार्थपर्यवसायित्वम्। तदेव दर्शयति—**सर्वेषु हीति।** वेदान्तानामेकान्ततो ब्रह्मपरत्वं दर्शयितुं बहूनि वाक्यान्युदाहरन्ति—**सदेवेत्यादिना।** ननु तेषामपि द्रव्यादिप्रकाशनेन विधिशेषत्वमेव; विधिव्यतिरेकेण

न्यायनिर्णयः

तत्र पूर्वपक्षप्रतिक्षेपप्रतिज्ञां व्याचष्टे—**तुशब्द इति।** तत्पदोपात्तां सिद्धान्तप्रतिज्ञां विभजते—**तद् ब्रह्मेति।** पूर्वसूत्रयोरुक्तं मेयभूतं ब्रह्म स्मारयितुं विशेषणानि। ननु वेदान्तवाक्यस्य लौकिकवाक्यवत् वाक्यत्वादेव संसृष्टार्थत्वात् अखण्डैकरसे ब्रह्मणि कथं प्रथाहेतुतेति पृच्छति—**कथमिति।** अपर्यायानेकशब्दानामखण्डार्थत्वस्य प्रकृष्टप्रकाशादिवाक्ये दृष्टत्वात्, अस्यापि ब्रह्मस्वरूपमात्रबोधनप्रवृत्तस्य तद्धीहेतुता युक्तेति हेतुमादत्ते—**समन्वयादिति।** हेतुं विवृणोति—**सर्वेष्विति।** वेदान्तानामैकान्तिकीं ब्रह्मपरतां वक्तुं बहूनि वाक्यान्युदाहरति—**सदेवेत्यादिना।** सदित्यस्तितामात्रम्। एवेत्यवधारणे। किं तदवध्रियते? तदाह—**इदमिति।** यदिदं व्याकृतं जगत् तदग्रे प्रागुत्पत्तेः व्याकृतरूपत्यागेन सदेवासीत् हे सोम्य प्रियदर्शन, इति पित्रा पुत्रः संबोध्यते। कार्यं स्थूलं पृथिव्यादीदंबुद्धिबोध्यं प्रागुत्पत्तेर्मा भूत्, अन्यत् तु महदादिसूक्ष्ममासीदेवेति; नेत्याह—**एकमिति।** कार्यं सतोऽन्यन्नासीदेवेत्यर्थः। तथापि मृदो घटाकारपरिणामयितृकुलालवज्जगन्निमित्तं सतोऽन्यदासीदित्याशङ्क्याह—**अद्वितीयमिति।** सतोऽपि चित्त्वं विना प्रधानवन्न हेतुतेत्याशङ्क्य श्रुत्यन्तरमाह—**आत्मेति।** आप्नोतीत्यात्मा मूलकारणम्। वैशब्देन प्रागवस्था स्मर्यते। इदमित्याद्युक्तार्थम्। तस्य निर्विशेषत्वार्थं श्रुत्यन्तरं पठति—**तदेतदिति।** तच्छब्देन 'इन्द्रो मायाभिः' इति प्रकृतात्मोक्तिः।

---

१. 'अन्वयदर्शनादिति हेत्वर्थमाह' इति पाठः 'इति' पदस्वारस्यादूह्यते।

२. सार्थवादविधिसरूपतया भासमानमपीदं वाक्यमग्रे 'पयसाऽग्निहोत्रं जुहुयात्' इति पयोविधिदर्शनेन वाक्यगतिपर्यालोचनया पयःस्तुतिपरमिति निर्णीतम्। द्र. पू. मी. १०-८-७. अत्र जर्तिलाः = कृष्णतिलाः, गवीधुकाः = तृणतण्डुलाः इति भट्टभास्करः। अरण्यतिलाः, अरण्यगोधूमा इति सायणः। द्र. तै. सं. ५-४-३.

'ब्रह्मैवेदममृतं पुरस्तात्' (मु. उ. २।२।११) इत्यादीनि। न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमानेऽर्थान्तरकल्पना युक्ता, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। न च तेषां कर्तृस्वरूपप्रतिपादनपरताऽवसीयते, 'तत्केन कं पश्येत्' (बृ.उ. २।४।१३) इत्यादिक्रियाकारकफलनिराकरणश्रुतेः। न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः, 'तत्त्वमसि' (छा. उ. ६।८।७) इति

प्रकटार्थविवरणम्

तात्पर्यमवधार्यते। तथा वेदान्तान्तरेष्वपि उपक्रमोपसंहारैकरूप्याभ्यासापूर्वताफलवत्ताऽर्थवादयुक्त्युपपादनानि [१]षड्विधतात्पर्यलिङ्गानि विकल्पेन समुच्चयेन वा द्रष्टव्यानि। तस्मात् सिद्धं शास्त्रप्रामाण्यमिति।

ननु यद्यपि वेदान्तगतानां पदार्थानां विशेषणविशेष्यभावेन सम्बन्धो लिलक्षयिषिताद्वितीयब्रह्मस्वरूपपर एव तात्पर्यलिङ्गेभ्यो निश्चितः, तथापि जैमिनिवचनादेवार्थान्तरपरत्वं कल्प्यत इत्याशङ्क्याह—**न च तद्गतानामिति**। किञ्च जैमिनीयसूत्राच्चेदर्थान्तरपरत्वकल्पना, बादरायणसूत्रात् स्वार्थपरतैव किं न स्यात्। वक्ष्यति च तस्यापि गतिम्।

यदभाणि कर्मविधिशेषत्वं कर्तृसमर्पणेन, तत्राह—**न च तेषामिति**। यच्चावाचि—प्रमाणान्तरविरोधात् न जीवस्य ब्रह्मताप्रतिपादनमिति, तत्राह—**न च परिनिष्ठितेति**। परिनिष्ठितत्वमात्रेण प्रमाणान्तरविषयत्वे वस्तुत्वात् तुच्छव्यावृत्तत्वाद्वा धर्मस्यापि प्रमाणान्तरविषयत्वप्रसङ्गादिति भावः। तद्विषयत्वेऽप्येवं प्रयोक्तव्यम्—वैदिकं ज्ञानं स्वविपरीतसकलपूर्वप्रत्ययबाधकम्,

भाष्यभावप्रकाशिका

प्रामाण्यायोगात्, इत्यत आह— **न चेति**। ननु विधिशेषत्वेऽपि सोऽरोदीदित्यादीनामिव श्रुतहानाश्रुतकल्पने न भवत इत्याशङ्क्याह—**न च तेषामिति**। सापेक्षत्वेनाप्रामाण्यं पूर्वपक्षोक्तमनूद्य दूषयति—**न च परिनिष्ठितेति**। अयं भावः—

न्यायनिर्णयः

विधेयं ब्रह्मापेक्ष्य नपुंसकम्। तदेतदेव यद् ब्रह्म। तद्वा किंलक्षणम्? तत्राह—**अपूर्वमिति**। नास्य पूर्वं कारणमित्यपूर्वमकार्यमित्यर्थः। नास्यापरं कार्यं वास्तवमस्तीत्यनपरमकारणमित्यर्थः। नास्यान्तरं जात्यन्तरमन्तरालेऽस्तीत्यनन्तरमेकरसमित्यर्थः। तथाविधमन्यदपि तटस्थमस्तीति; नेत्याह—**अबाह्यमिति**। बाह्यमस्मादनात्मभूतं नास्तीत्यबाह्यमद्वितीयमित्यर्थः। तस्यापरोक्षत्वमाह—**अयमिति**। तत्सिद्ध्यर्थं चित्स्वभावत्वमाह—**सर्वेति**। ब्रह्मात्मा सर्वमनुभवति चेदनुभाव्यस्य पृथक्त्वान्नाद्वैतमित्याशङ्क्याह—**ब्रह्मेति**। यत् पुरस्तात् पूर्वस्यां दिश्यब्रह्मेवाविदुषां भाति तत् सर्वमिदममृतं ब्रह्मैव वस्तुत इत्यर्थः। आदिपदेन सत्यज्ञानादिवाक्यानि गृह्यन्ते। नन्वेषां वाक्यानामर्थवादाधिकरणन्यायेन कर्मापेक्षितकर्त्रादिप्रकाशनेन क्रियाविधिशेषतेत्युक्तम्; तत्राह—**न चेति**। 'वायुर्वै क्षेपिष्ठा' इत्यादीनामिव क्रियाविधिशेषत्वेऽपि तेषां न श्रुतहानिरश्रुतकल्पना वेत्याशङ्क्याह—**न चेति**। युक्तमर्थवादानां स्वार्थे पुमर्थहीनानामध्ययनविधेर्विध्यपेक्षितप्राशस्त्यद्वारा तच्छेषत्वम्। यथाहुः—'स्वाध्यायविधिना वेदः पुरुषार्थाय नीयते। तद्वशेनार्थवादानां प्राशस्त्येन प्रमाणता' इति। वेदान्तानां तु कर्मापेक्षितकर्त्राद्यबोधित्वान्न तद्विधिशेषतेत्यर्थः। ननु पर्णताया जुहूद्वारा क्रतुशेषतावदात्मनोऽपि ज्ञानद्वारा कर्मशेषत्वात्, तदर्था वेदान्तास्तद्विधिशेषा भविष्यन्ति; नेत्याह—**तदिति**। तत् तत्र विद्यादशायां केन करणेन कं विषयं को वा कर्ता पश्येदित्यादिवाक्येनात्मविद्यया क्रियादिनिरासश्रुतेर्नासौ कर्माङ्गम्। ततो धीद्वारा आत्मनस्तद्विध्यशेषत्वात् तदर्थवेदान्तानां न तच्छेषतेत्यर्थः। यत्तु न परिनिष्ठितवस्तुप्रतिपादनं, तस्याध्यक्षादियोग्यत्वादिति; तत्राह—**न चेति**। 'तत्त्वमसि' इति शास्त्रमन्तरेणेति संबन्धः। वेदान्तवेद्यस्य सिद्धत्वेऽपि मानान्तरायोग्यत्वात् तत्संवाद-

---

१. अत्र-अपूर्वता अज्ञातता, फलवत्ता, उपपत्तिः अबाधितत्वमित्येतत् त्रयं प्रामाण्यशरीरघटकम्; अज्ञाताबाधितफलवदर्थबोधकत्वस्य प्रामाण्यस्वरूपत्वात्। उपक्रमोपसंहारैकरूप्यम्, अनन्यपरपुनःश्रवणरूपोऽभ्यासः, स्तुत्यादिबोधकोऽर्थवादश्चेत्येतत् त्रयं शब्दघटितत्वात् शब्दनिष्ठं सत् विचार्यवाक्यस्य तात्पर्यनिर्णायकम्। विशेषस्तु अद्वैतसिद्धि-लघुचन्द्रिकयोर्द्रष्टव्यः। पृ. ४२५-४२६।

ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वात्। यत्तु हेयोपादेयरहितत्वादुपदेशानर्थक्यमिति; नैष दोषः, हेयोपादेयशून्यब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात् पुरुषार्थसिद्धेः। देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद् विरोधः। न तु तथा ब्रह्मण उपासनाविधिशेषत्वं संभवति, एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः। न ह्येकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य

प्रकटार्थविवरणम्

तद्विषये तद्विपरीताकारत्वे तन्निरपेक्षत्वे च सति 'उत्तरप्रमाणत्वात्, 'नायं सर्पः' इत्याप्तवाक्योत्थज्ञानवदिति'[१]। यद्वा आत्मनि सर्वो भेदावभासः उत्तरप्रमाणबाध्यः, तद्विषये तद्विपरीतावभासत्वात्, य एवं स एवं यथा रजतप्रत्यय इति। न च "आदित्यो यूपः" इत्यादौ व्यभिचारः, तस्यातत्परत्वेन तत्राप्रामाण्यात्।

यदरुददत्र **केशवः**—"नासंभावितदोषस्य प्रत्यक्षादेर्दिङ्मोहवदागमबाध्यत्वम्" इति, तद् व्यर्थमरोदीत्। यतः आगमावबाधितविषयतयैव बाह्यदोषादर्शनेऽप्यान्तरदोषसंभावनोल्लासो 'मनुष्योऽहम्' इत्यादाविव। आगमस्य चापौरुषेयतया निर्दिष्टस्य[निर्दुष्टस्य]अनपेक्षस्य तत्परस्य स्वत एव स्वविपरीतावबाधने सामर्थ्यात् न इतरेतराश्रयत्वम्। तस्माद् यत्किञ्चिदेतत्। यत्तु इत्यादिना परोक्तमनूद्य दूषयति। यच्चावादि—स्ववाक्यगतोपासनादिविधानार्थत्वं भूतार्थानां वेदान्तानामिति; तत्र भागेऽनुमतिरित्याह—**देवतादीति**। उपासनाप्रकरणस्थप्राणादिदेवता-देवासुरसङ्ग्रामादिप्रतिपादनस्य भवतु उपासनाशेषत्वमित्यर्थः। उपासनाप्रकरणादपि व्युत्थितानां न तच्छेषत्वम् स्वरूपमात्रपर्यवसानादित्यभिप्रेत्याह—**न तु तथेति**। ननु 'अयमात्मा ब्रह्म इत्युपासीत' इति विध्यध्याहारेण तच्छेषत्वं भवतु। तर्हि अवगते ब्रह्मात्मैकत्वे विधानं वक्तव्यम्। तत्र संभवतीत्याह—**एकत्व इति**। आत्मनो ब्रह्मत्वं नाम देशतः कालतो वस्तुतश्चानवच्छिन्नत्वम्; तच्चेदवगतं तदोपास्योपासकादिभेदबुद्ध्यभावान्न विधानं संभवतीत्यर्थः। संस्कारबलात् पुनरुदये विधानमिति; नेत्याह—**न हीति**। विध्यधिकारनिमित्तस्य द्वैतविज्ञानस्य न पुनस्संभव

भाष्यभावप्रकाशिका

भूतार्थत्वेऽपि वेदान्तानां प्रत्यक्षादीनामिवानपेक्षत्वोपपत्तेः पुंवाक्यवत् पुरुषबुद्धिप्रभवत्वाभावाद् मूलप्रमाणानपेक्षत्वात्, परिनिष्ठितविषयत्वेऽपि न संवादविसंवादाभ्यामप्रामाण्यमिति। द्वितीयं पूर्वपक्षबीजमनुभाष्य दूषयति—**यत्त्विति**। यच्चोपासनाविधिशेषत्वं वेदान्तानामुक्तम्, तत् किं कतिपयानाम्? उत सर्वेषाम्? यद्याद्यस्तावदङ्गीक्रियते इत्याह—**नेति**। द्वितीयस्तु न संभवतीत्याह—**न त्विति**। अस्तु तर्हि तथाभूतविज्ञानोत्तरकालमुपासनमिति, तत्राह—**न ह्येकत्वेति**। ननु वेदान्ताः स्वार्थेऽप्रमाणम्,

न्यायनिर्णयः

विसंवादाभावाद् युक्तं तत्रानपेक्षं तत्प्रामाण्यमित्यर्थः। 'तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावादि'त्यत्रोक्तमनुवदति—**यत्त्विति**। पुरस्तात् पञ्चम्या वस्तुन इत्यध्याहार्यम्। आनर्थक्यं हेयादिहीनार्थत्वं वा विफलत्वं वा? तत्राद्यमुपेत्य द्वितीयं दूषयति—**नेति**। यत्तु स्ववाक्यगतोपासनादिपरत्वं वेदान्तानां तत् किं कतिपयानामुत सर्वेषाम्? आद्यमङ्गीकरोति—**देवतादीति**। आदिशब्देन देवासुरसङ्ग्रामो गुणजातं फलविशेषश्चोच्यते। तस्य तत्प्रकरणस्थोपास्तिशेषत्वं प्रकरणादिष्टमेवेत्यर्थः। नेतरः, सर्वेषां वेदान्तानां तच्छेषत्वे मानाभावात्। तदर्थस्य च ब्रह्मणस्तच्छेषत्वं ज्ञानात् प्रागूर्ध्वं वा? आद्येऽध्यस्तगुणवतस्तस्य तच्छेषत्वेऽपि न द्वितीय इत्याह—**न त्विति**। देवतादिप्रतिपादनं दृष्टान्तयितुं तथेत्युक्तम्। तत्र हेतुः—**एकत्व इति**। ज्ञाते सतीति शेषः। हेयोपादेयशून्यतयेत्यत्र ब्रह्मणो ज्ञातस्याद्वितीयस्येत्यध्याहार्यम्। उपास्योपासकादिभेदबुद्ध्यभावादुपास्तिविध्ययोगान्न ब्रह्मणो ज्ञातस्य तच्छेषतेत्यर्थः। संस्कारात् पुनर्द्वैतज्ञानोदये विध्यादि सर्वमविरुद्धमित्याशङ्क्याह—**न हीति**। संस्कारोत्थस्याभासत्वाद्

---

१. अनेन उत्तरप्रमाणप्राबल्ये ऽपच्छेदन्यायः सूचितः। स च न्यायः पूर्वमीमांसायाम् ६-५-१९ अधिकरणे द्रष्टव्यः।

२. "तत्परत्वात् परत्वाच्च निर्दोषत्वाच्च वैदिकम्। पूर्वस्य बाधकं, 'नायं सर्प' इत्याप्तवाक्यवत्" इत्यानन्दबोधाचार्याः।

पुनः संभवोऽस्ति, येनोपासनाविधिशेषत्वं ब्रह्मणः प्रतिपाद्येत।[१]

यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टम्, तथाप्यात्मविज्ञानस्य फलपर्यन्तत्वान्न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम्। न चानुमानगम्यं शास्त्रप्रामाण्यम्, येनान्यत्र दृष्टं निदर्शनमपेक्षेत। तस्मात् सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वम्।

प्रकटार्थविवरणम्

इत्यर्थः। अथ परोक्षमेवात्मनो ब्रह्मत्वमवगतम्, न तेन भेदबुद्ध्युपमर्दः; तर्हि किमापरोक्ष्यायोपासनविधानमपवर्गाय वा? नाद्यः विधिशतेनाप्यापरोक्ष्यासंभवात्, परमानन्दापरोक्ष्ये स्वयं प्रवृत्तेश्च। द्वितीयं विस्तरेण पराकरिष्यति। यच्चोक्तम्, 'न क्वचिद्वेदवाक्यानां विधिमन्तरेणार्थवत्ता' इति, तत्राह—**यद्यप्यन्यत्रेति**। ''सोऽरोदीत्'' इत्यादीनां स्वार्थे फलाभावाद् युक्ता विधिस्पर्शेनार्थवत्ता, न भूतार्थत्वादिति भावः। ननु भूतार्थत्वेऽपि फलवत्त्वात् स्वार्थे प्रामाण्यं क्व दृष्टमित्याशङ्क्याह—**न चानुमानगम्यमिति**। अन्यथा विधिनिष्ठं वेदवाक्यं सफलमित्यन्यत्रादर्शनात्, तस्यापि स्वार्थे प्रामाण्यं न स्यादित्यर्थः। यस्माद् विधिवाक्येन वेदान्तानां समानयोगक्षेमत्वं प्रामाण्ये तस्मादित्युपसंहारः।

भाष्यभावप्रकाशिका

विधिरहितवाक्यत्वात्; ''सोऽरोदीत्''इत्यादिवाक्यवदित्याशङ्क्य स्वार्थे फलशून्यत्वं तत्रोपाधिरित्याह—**यद्यपीति**। ननु वेदान्ताः सिद्ध[विधि]बोधकाः, प्रमाणभूतवेदवाक्यत्वात्, संप्रतिपन्नवाक्यवदित्याशङ्क्याह—**न चानुमानेति**। अबाधितानधिगतासन्दिग्ध-बोधजनकत्वं प्रमाणत्वम्, न तु विधिबोधकत्वमिति भावः। इति प्रथमं वर्णकम्॥

न्यायनिर्णयः

विध्यनिमित्तत्वान्न ब्रह्मणस्तच्छेषतेत्यर्थः। वेदान्ताः स्वार्थे न मानं, विधिशून्यवाक्यत्वात्, संमतवदित्यनुमानात् तेषां विधिशेषतेत्याशङ्क्य स्वार्थे फलराहित्यमुपाधिरित्याह—**यद्यपीति**। **अन्यत्रेति** कर्मकाण्डोक्तिः। **वेदवाक्यानां** 'सोऽरोदीत्' इत्यादीनामिति यावत्। तथापि स्वार्थे वैफल्यं तेषां विधिस्पर्शमन्तरेणाप्रामाण्ये हेतुरिति शेषः। साधनव्याप्तिं प्रत्याह—**आत्मेति**। **तद्विषयस्येति**। आत्मज्ञानं तच्छब्दार्थः। **शास्त्रस्य** स्वार्थे फलवत्त्वात् तत्रैवेति शेषः। एतेन 'न क्वचिदपी'त्यादि व्याख्यातम्। अर्थवादाधिकरणस्य विषयभेदं वक्ष्यति। न च मन्त्रवद् वेदान्तानां विधिभिर्वाक्यैकवाक्यत्वं, तेषां दृष्टद्वारा क्रतूपकारित्ववदेषां तदयोगात्, एतदुत्थात्मज्ञानस्य कर्माधिकारविरोधित्वादिति द्रष्टव्यम्। ननु वेदान्ता विधिबोधिनः, मानत्वे सति वेदवाक्यत्वात्, संमतवत्; नेत्याह—**न चेति**। वक्ष्यमाणन्यायेन निषेधवाक्ये व्यभिचारात्, अबाधितानधिगतासंदिग्धबोधित्वात् युक्तं विधिस्पर्शं विना स्वार्थे वेदान्तप्रामाण्यमित्यर्थः। विध्यसंस्पर्शिनो वेदवाक्यस्य स्वार्थे प्रामाण्यमन्यत्रादृष्टं, निषेधवाक्येऽपि विप्रतिपत्तेरित्याशङ्क्याह—**येनेति**। शास्त्रप्रामाण्यस्यानुमानगम्यत्वेनेति यावत्। **अपेक्षेत**। शास्त्रप्रामाण्यमिति शेषः। न तथा तदनुमानगम्यं, स्वारसिकत्वात्। उत्पन्नायां हि प्रमायां शास्त्रस्य तल्लिङ्गेन तज्जनकत्वमनुमेयं, ततस्तदुत्पत्तिरिति स्वीकारे परस्पराश्रयत्वम्। [२]तस्मादनुमानेन ज्ञेयमपि शास्त्रप्रामाण्यं न तद्गम्यत्वेन भवतीति नास्ति दृष्टान्तापेक्षेत्यर्थः।वर्णकार्थमुपसंहरति—**तस्मादिति**। वेदान्तानां प्रामाण्ये विधितुल्यत्वं तच्छब्दार्थः।

लौकिकोक्तीनां मानान्तरायत्तानां सिद्धेऽर्थे प्रामाण्यमुपेत्य वेदान्तेषु विना कार्यार्थतामनपेक्षत्वं वा फलवत्त्वं वा न लभ्यमिति मतं, ब्रह्मात्मनो मानान्तरायोग्यत्वेन तद्धीमात्रात् फललाभेन च परास्तम्। सम्प्रति कार्यान्विते शब्दशक्तिनियमान्न सिद्धं वस्तु शाब्दमिति वदतामुपास्तिविधिनिष्ठान् वेदान्तानिच्छतां मतं निरसितुं वर्णकान्तरमारभ्यते। यद्वा, आरोपितब्रह्मत्वस्य

१. 'प्रतिपद्येत' इति पाठान्तरम्।

२. 'शास्त्रप्रामाण्यमनुमानेन न भवति इति भाष्यार्थः, न पुनरनुमानेन न ज्ञेयमिति' इति कल्पतरुः पृ. १०८

अत्रापरे प्रत्यवतिष्ठन्ते– यद्यपि शास्त्रप्रमाणकं ब्रह्म, तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते। यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिशेषतया शास्त्रेण समर्प्यन्ते, तद्वत्। कुत एतत्? प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य। तथाहि शास्त्रतात्पर्यविद आहुः–'दृष्टो हि तस्यार्थः

प्रकटार्थविवरणम्

इदानीं मोक्षकामस्य प्रतिपत्तिनियोगशेषत्वेन शास्त्रेण ब्रह्म प्रतिपाद्यते, न स्वातन्त्र्येणेति[1] प्राचां वृत्तिकृतां मतमाह—**अत्रापर इत्यादिना**। ननु नियोगस्तावदलौकिकः; कथं तच्छेषतया शास्त्रेणालौकिकं ब्रह्म समर्प्यत इत्याशङ्क्याह—**यथेति**। ननु ब्रह्मणि तात्पर्यलिङ्गानां दर्शितत्वात् किमिति नियोगशेषत्वमित्याशङ्क्याह—**कुत एतदिति**। वृद्धव्यवहारानुसारेण हि शास्त्रतात्पर्यमवधारणीयम्; वृद्धव्यवहारे च श्रोतुः प्रवृत्तिनिवृत्तिप्रयोजनोद्देशेनाप्तस्य प्रयोगो दृश्यते; ते एव शास्त्रस्यापि प्रयोजने; ते च नियोगाधीने; अतो नियोगपरमेव शास्त्रमित्याह—**प्रवृत्तीति**। नियोगनिष्ठत्वे शास्त्रस्य शबरस्वामिप्रभृतीनां सम्मतिमाह—**तथा**

भाष्यभावप्रकाशिका

पूर्वं सिद्धार्थे शब्दानां प्रामाण्यं न संभवतीति ये मन्यन्ते, तन्मतं निरस्तम्। इदानीं कार्यान्वित एव स्वार्थे पदानां सङ्गतिग्रहात् शास्त्रप्रमाणकमपि ब्रह्म कार्यशेषतयैव प्रामाणिकमिति मतान्तरमुत्थापयति—**अत्रापर इति**। ननु विधिपरत्वे न ब्रह्मपरता स्याद् वेदे; वाक्यभेदप्रसङ्गादित्यत आह—**यथा यूपेति**। "यूपे पशुं बध्नाति" इति बन्धनाय विनियुक्ते यूपे तस्यालौकिकत्वात् 'कोऽसौ यूपः?' इत्याकाङ्क्षायां "खादिरो यूपो भवति""यूपं तक्षति" "यूपमष्टाश्रीकरोति" इत्यादिभिर्वाक्यैस्तक्षणादिविधिपरैरपि संस्काराविष्टसंस्थानं दारु यूप इति गम्यते, एवं यज्जुहोति, तदाहवनीये जुहोतीत्यादिवाक्यैर्विधिपरैराहवनीयादयोऽप्यवगम्यन्ते, तद्वद् विधिपरैरपि विशिष्टं ब्रह्मावबोध्यत इत्यर्थः। ननु "निधिमानेष भूभागः" इत्यादिवाक्येषु विधिं विनाऽपि प्रयोग-प्रत्ययौ दृष्टौ, तद्वदिहापि स्यादित्याक्षिपति—**कुत इति**। "प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते।"

न्यायनिर्णयः

जीवस्योपास्तिपरा वेदान्ता न ब्रह्मात्मत्वे मानमिति पक्षं प्रतिक्षिप्य तेषां वस्तुनि मानत्वेऽपि विधिद्वारेति विशेषमाशङ्क्य वर्णकान्तरम्। तत्र 'सदेव' इत्यादिवेदान्ता विधेयधीविषयत्वेन ब्रह्मार्पयन्ति, उत साक्षादिति सिद्धे व्युत्पत्त्यभावभावाभ्यां संशये पूर्वपक्षयति—**अत्रेति**। ब्रह्म कार्यस्पृष्टमेव शास्त्रगम्यम्, केवलमपीत्युभयत्र फलभेदः। [2]सप्तम्या ब्रह्मणः शास्त्रप्रमाणकत्वमुक्तम्। तदेव वदन्नुक्तमङ्गीकृत्यानिष्टं प्रसञ्जयति—**यद्यपीति**। **प्रतिपत्तिविधिविषयतया**। तद्विषयप्रतिपत्तिविषयतयेति यावत्। वस्तुमात्रनिष्ठत्वे ब्रह्मधियो हानाद्यर्थत्वाभावादानर्थक्यमेवेत्यर्थः। कथं कार्यपरवेदान्तेभ्यो वस्तुधीः, वाक्यभेदादित्याशङ्क्याह—**यथेति**। 'यूपे पशुं बध्नाति' इति पशुबन्धनाय विनियुक्ते यूपे तस्यालौकिकत्वात् कोऽसावित्याकाङ्क्षिते 'खादिरो यूपो भवति' 'यूपं तक्षति' 'यूपमष्टाश्रीकरोति' इत्यादिभिस्तक्षणादिविधिपरैरपि वाक्यैर्विशिष्टसंस्कारसंस्थानं दारु यूप इति गम्यते। 'यदाहवनीये जुहोति' इति होमाधारत्वेनोक्ताहवनीयस्यालौकिकत्वात् कोऽसाविति वीक्षायां 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्यादितद्विधिपरैरेव वाक्यैः 'संस्कृतोऽग्निरसा'विति भाति। तथा देवतास्वर्गाद्यपि विधिपरेणैव शास्त्रेणोच्यते। तथाऽन्यपरेणापि तेन विध्याक्षेपादुपादानाद् विशिष्टं ब्रह्म सुबोधमित्यर्थः। ननु फलिनो द्रुमाः, भूभागो निधिमानित्यादिषु विनाऽपि विधिं प्रयोगधीदृष्टेः, शास्त्रेणापि विध्यनपेक्षेण ब्रह्मणोऽर्पणमिति शङ्कते—**कुत इति**। दृष्टान्तेऽपि कार्याध्याहाराद्यभिप्रेत्याह—**प्रवृत्तीति**। 'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येते तच्छास्त्रमभिधीयते' इति न्यायात्, वेदान्तानामपि शास्त्रत्वादन्यतरनियमाद् विधिनिष्ठताध्रौव्यमित्यर्थः। प्रवृत्त्यादिपरस्यैव शास्त्रत्वं, शब्दशक्तिश्च कार्यान्वयिन्येवेत्यत्र वृद्धसंमतिमाह—**तथा हीति**।

---

१. अत्र प्रथमे वर्णके भट्टमतं, गुरुमतं च निरस्यते; द्वितीयवर्णके च 'अत्रापरे' इत्यादिना वृत्तिकारमतम्, पुनः 'यदपि केचिदाहुः' इत्यादिना गुरुमतं च निरस्यत इति प्रकटार्थकाराः स्पष्टमुल्लिखन्ति। रत्नप्रभायामप्येवम्। न्यायनिर्णयस्तु वृत्तिमतं गुरुमतं च नोल्लिखति। परन्तु अत्र पूर्वपक्षिणा स्वाभिमतसिद्ध्यर्थं या प्रक्रियाऽऽश्रिता, सा प्राभाकरीयेति स्पष्टं तत् परामृशताम्। सम्भाव्यते प्राचां केषां चिद् वृत्तिकृतामपीदृशी प्रक्रियाऽभिमता स्यादिति।

२. सप्तम्या ='अत्र' इत्यनेन।

कर्मावबोधनम्'(शाबरभा. १-१-१) इति, 'चोदनेति क्रियायाः प्रवर्तकं वचनम्' (शाबरभा. १-१-२), 'तस्य ज्ञानमुपदेशः–' (जै. सू. १।१।५) 'तद्भूतानां क्रियार्थेन समाम्नायः–' (जै. सू. १।१।२५)

प्रकटार्थविवरणम्

हीत्यादिना। तस्य वेदस्य दृष्टोऽर्थः दृष्टं प्रयोजनं नियुक्तकर्मावबोधनं नियोगज्ञानमित्यर्थः। क्रियायाः नियोगस्य समर्पकं वचनं चोदनेत्याहुरिति द्वितीयभाष्यार्थः। औत्पत्तिकसूत्रावयवं [१]'पठति—**तस्य धर्मस्येति।** नियोगाख्यस्य ज्ञानसाधनम् उपदेशो विधिवाक्यमित्यर्थः। तत् तत्र वेदे भूतानां सिद्धार्थवाचिनां पदानां क्रियार्थेन नियोगवाचिना पदेन समाम्नायः सम्बन्धो

भाष्यभावप्रकाशिका

इति वचनाद् वेदान्तानां शास्त्रवाचक[शास्त्रत्वाद् विधि]निष्ठत्वमङ्गीकर्तव्यमिति परिहरति—**प्रवृत्तीति। तस्य ज्ञानमुपदेश इति।** तस्य धर्मस्य, ज्ञायतेऽनेनेति ज्ञानम्, प्रमाणम्, उपदेशः उपदिश्यतेऽनेनेति व्युत्पत्त्या विधिवाक्यम्। **तद्भूतानामिति।** तस्माद् भूतानामपरिनिष्ठितानामर्थानामित्यर्थः।

न्यायनिर्णयः

'वेदमधीत्य स्नायात्' इत्यध्ययनस्नानयोरव्यवधानाधिगमात्, अधीत्य स्नानमकृत्वा धर्मं जिज्ञासमानो वेदमिममतिक्रामेत्; अनतिक्रमितव्यश्चासाविति चोदिते भाष्यकृतोक्तम्—'अतिक्रमिष्याम इममाम्नायम्, अनतिक्रामन्तो वेदमर्थवन्तं सन्तमनर्थकमवकल्पयेम' इति। कस्तर्हि वेदस्यार्थस्तत्राह—**दृष्टो हीति। तस्य** वेदस्य **कर्मावबोधनं** नियोगज्ञानं **दृष्टोऽर्थो** दृष्टं फलम्। नियोगश्च साध्यत्वात् प्रवृत्त्याद्यपेक्षः। तस्मात् प्रवृत्त्यादिपरं शास्त्रमित्यर्थः। धर्मजिज्ञासासूत्रस्थं भाष्यमुक्त्वा तत्रैव चोदनासूत्रस्थं भाष्यमाह—**चोदनेतीति।** चोदनासूत्रे हि **चोदने**त्यनेन शब्देन **क्रियाया** नियोगस्य **प्रवर्तक**मनुष्ठापकं वचनमाहुर्वेदविदः। तेन शास्त्रं प्रवर्तकमित्यर्थः। प्रवृत्त्यादिपरं शास्त्रमित्यत्रैव सूत्रकारं संवादयन्नौत्पत्तिकसूत्रावयवमादत्ते—**तस्येति।** अध्यक्षाद्यभावात् मानागम्यस्य धर्मस्य कथं धीरिति वीक्षायामुक्तम्—'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' इति। **उत्पत्तिर्भावः**; शब्दस्य वाचकस्यार्थेन वाच्येन शक्तिसंबन्धस्तयोर्भावेनावियुक्तो नित्यः, न तूत्पन्नयोरुत्तरभावी। तथापि धर्मे किं मानम्? चोदनैवेत्याह—**तस्येति।** अग्निहोत्रादिधर्मस्याध्यक्षाद्यसिद्धस्य ज्ञायतेऽनेनेति ज्ञानं तन्निमित्तं मान**मुपदेश** उपदिश्यतेऽनेनेति विधिवाक्यम्। **अव्यतिरेकश्च** शब्दोत्थस्य ज्ञानस्यार्थे व्यभिचाराभावः। न ह्यपौरुषेयोक्तिजन्यं ज्ञानं जातु विपर्येति। तस्मादन्यतोऽनुपलब्धेऽर्थे धर्माख्ये तदेवोपदेशशब्दितं विधिवाक्यं मानं, ज्ञानान्तरे पुरुषान्तरे वा तस्यानपेक्षत्वात्। **बादरायणस्यापि** भगवतः संमतमेतदित्याचार्यं पूजयितुं बादरायणोक्तिरित्यक्षरार्थः। तत्र लोके शब्दस्य मानान्तरवेद्यत्वोपहितस्वार्थे शक्तिनियमात्, देवदत्तादिपदे च सङ्केतादर्थधीदृष्टेः सर्वशब्दानां तथैवार्थबोधित्वात्, अवेद्ये सङ्केतायोगात्, नास्य वेदार्थतेत्यभावो वेदार्थस्येत्याशङ्क्य कार्यबोधाधीनव्यवहारकृतशक्तौ मानान्तरानिवेशात्, कार्यान्वितस्वार्थमात्रे शक्तेरवधृतत्वात्, वृद्धव्यवहारान्निश्चित-शक्तेर्गवादिशब्दादर्थधीदृष्टेः देवदत्तादिपदे दृष्टसङ्केतानुमानायोगात्, प्रसिद्धार्थपदसमभिव्याहाराद् व्युत्पत्त्युपगमादपूर्वकार्यार्थता लिङादेः। शब्दान्तराणां तदन्वितस्वार्थव्युत्पत्तेर्मानान्तरानपेक्षार्थत्वं स्वाभाविकसंबन्धादपौरुषेयवचसामिति चिन्तितम्। तथा चौत्पत्तिकसूत्रादपि शास्त्रं प्रवृत्त्यादिपरमेवेत्यर्थः। कार्यान्विते पदशक्तिरित्यत्रैव सूत्रं पठति—**तद्भूतानामिति।** समाम्नायोऽर्थस्य तन्निमित्तत्वादिति सूत्रशेषः। वेदवाक्यानि मानान्तरसापेक्षाणि, तन्निरपेक्षाणि वेति संशये वृद्धव्यवहारे वाक्यात् तदर्थज्ञानेऽपि वेदवाक्यस्य समुदायान्तरत्वादर्थेनाज्ञातसंबन्धत्वात्, तत्कल्पने सङ्केतापातात्, वेदवाक्यानां सापेक्षत्वादप्रामाण्यमिति प्राप्ते, लोकवेदयोः शब्दार्थाभेदात्, वैदिकवाक्यार्थधियो लोकव्युत्पत्तिमूलत्वात्, कार्यान्विते ज्ञातशक्तीनामेव शब्दानां विशिष्टार्थावच्छेदकानां वाक्यत्वात्, वैदिकवाक्यानां सङ्केतानपेक्षाणां स्वार्थधीहेतुत्वादपौरुषेयाणां तेषामनपेक्षं प्रामाण्यमिति राद्धान्तितम्। तेषु पदार्थेषु **भूतानां** वर्तमानानां पदानां कार्येण वाक्यार्थेन तत्प्रतिपत्त्यर्थत्वेन **समाम्नायः** संभूय वाक्यत्वेनोच्चारणम्।

---

१. 'पठति—तस्येति। तस्य धर्मस्य नियोगाख्यस्य ज्ञानं ज्ञानसाधनम्' इत्यादिः पाठः संभाव्यते।

'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्–' (जै. सू. १।२।१) इति च। अतः पुरुषं क्वचिद् विषयविशेषे प्रवर्तयत् कुतश्चिद् विषयविशेषान्निवर्तयच्चार्थवच्छास्त्रम्। तच्छेषतया चान्यदुपयुक्तम्। तत्सामान्याद् वेदान्तानामपि तथैवार्थवत्त्वं स्यात्। सति च विधिपरत्वे यथा स्वर्गादिकामस्याग्निहोत्रादि साधनं विधीयत एवममृतत्वकामस्य ब्रह्मज्ञानं विधीयत इति युक्तम्।

नन्विह जिज्ञास्यवैलक्षण्यमुक्तम्-कर्मकाण्डे भव्यो धर्मो जिज्ञास्यः, इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यमिति। तत्र धर्मज्ञानफलादनुष्ठानापेक्षाद् विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति।

नार्हत्येवं भवितुम्। कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात्। 'आत्मा वा अरे द्रष्टव्यः'

प्रकटार्थविवरणम्

लोकानुसारादित्यर्थः। यत एवं शास्त्रतात्पर्यविदो वदन्ति तस्मात् कर्मकाण्डं तावत् नियोगनिष्ठमित्याह—**अतः पुरुषमिति**। साक्षान्नियोगोपदेशेन पुरुषस्य यत्प्रवृत्तिफलं तदेव शास्त्रम्। मन्त्रार्थवादादिकं तु तच्छेषत्वेनोपक्षीणमित्यर्थः। तथा च वेदान्ता नियोगपराः, शास्त्रत्वात्, संप्रतिपन्नवदित्याह—**तत्सामान्यादिति**। नियोज्यवत्त्वमुपाधिरित्याशङ्क्य साधनव्यापकत्वमाह—**सति चेति**। तर्हि ब्रह्मणो जिज्ञासाकर्मत्वाभिधायिसूत्रविरोध इत्याह—**नन्विहेति**। नियोगशेषब्रह्मजिज्ञासैव सूत्रकृतोऽप्यभिप्रेता, अतो न तद्विरोध इत्यभिप्रेत्याह—**नार्हत्येवमिति**। नन्वस्तु शास्त्रत्वम्, कर्तव्यरूपनियोगपरत्वं मा भूत्; तथा च विपक्ष-

भाष्यभावप्रकाशिका

ननु भवत्वेवं कर्मकाण्डगतानाम्, वेदान्तवाक्यानां तु किमायातमिति? अत आह—**तत्सामान्यादिति**। ननु विधेयभावार्थाभावाद् नियोज्याभावाच्च कथं विधिरिति? अत आह—**सति चेति**।

ब्रह्मज्ञानस्य नित्यसिद्धविषयतयाऽसाध्यफलत्वादग्निहोत्रादिवन्न विधेयत्वमिति शङ्कते—**नन्विति**। स्वरूपेणासाध्यत्वेऽपि विधेयक्रियोपकारकतया ब्रह्मणोऽपि साध्यत्वाद् मैवमिति परिहरति—**नार्हतीति**। कार्यविधिःकृतियोग्यभावार्थनियोगः। ननु

न्यायनिर्णयः

एकैकपदस्मृतार्थस्य मिलितार्थस्य वाक्यार्थधीनिमित्तत्वात्, पदार्थप्रतिपत्त्यवान्तरव्यापाराणि हि पदानि वाक्यार्थं बोधयन्तीति सूत्रार्थः। भूतार्थपरस्य न शास्त्रतेत्यत्रापि सूत्रकारानुमतिमाह—**आम्नायस्येति**। अभियुक्तोक्त्या फलितमाह—**अत इति**। इष्टोपायो यागादिर्विषयविशेषः, अनिष्टोपायो हननादिर्द्वितीयो विषयविशेषः। विधिनिषेधकाण्डस्यैवमर्थवत्त्वेऽपि कथमर्थवादादिषु तथेत्याशङ्क्याह—**तच्छेषतयेति**। तथापि वेदान्तानां किमायातं, तदाह—**तत्सामान्यादिति**। कर्मशास्त्रेण सामान्यं शास्त्रत्वम्, **तथैव** प्रवर्तकत्वेन, निवर्तकत्वेन, तच्छेषत्वेन वेत्यर्थः। ननु वेदान्तेषु 'प्रतिष्ठाकामो रात्रिसत्रेण यजेत' इत्यादिवद् विधेयाभावान्नियोज्याभावाच्च विध्ययोगान्न प्रवृत्त्यादिपरत्वम्, तत्राह—**सतीति**। शास्त्रत्वात् तेषामपि विधिपरत्वध्रौव्ये रात्रिसत्रन्यायेन नियोज्यविशेषलाभात्, आत्मधियश्चाग्निहोत्रादिवद् विधेयत्वात् विधिद्वारा वेदान्तानां प्रवृत्त्यादिपरतेत्यर्थः।

उक्तं स्मारयन् ब्रह्मधियो विधेयत्वमाक्षिपति—**नन्विति**। इहेति काण्डद्वयस्याद्यसूत्रस्य चोक्तिः। भूतशब्दस्यार्थान्तरं निरसितुं विशिनष्टि—**नित्येति**। धीकर्मणोर्विषयवैषम्येऽपि विधेयत्वे किं जातम्? तत्राह—**तत्रेति**। ब्रह्मधियोऽसाध्यफलत्वान्न कर्मवद् विधेयतेत्येतद् दूषयति—**नेति**। कृतियोग्यभावार्थविषयो नियोगोऽत्र **कार्यविधिः**, तदपेक्षितस्यैव ब्रह्मणो वेदान्तेषु प्रतिपादनात्, तस्य स्वतोऽसाध्यत्वेऽपि विधेयक्रियाद्वारा साध्यत्वात् कर्मफलवद् धीफलस्यापि नैयोगिकत्वात् फलाद्वैलक्षण्यात्[1], उभयोर्विधेयता तुल्येत्यर्थः। वेदान्तेषु विध्यश्रवणान्न तच्छेषतया ब्रह्मोक्तिरित्याशङ्क्याह—**आत्मेति**। 'ब्रह्म वेद' इत्यत्र रात्रिसत्रवद् विधिः।

---

१. 'फलावैलक्षण्यात्' इति पाठः स्यात्।

(बृ.उ. २।४।५) 'य आत्माऽपहतपाप्मा...सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छा.उ. ८।७।१)। 'आत्मेत्येवोपासीत' (बृ.उ. १।४।७) 'आत्मानमेव लोकमुपासीत' (बृ.उ.१।४।१५)। 'ब्रह्म वेद ब्रह्मैव भवति' (मु.उ. ३।२।९) इत्यादिविधानेषु संत्सु-कोऽसावात्मा? किं तद् ब्रह्म? इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः- नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमानन्दं ब्रह्म इत्येवमादयः। तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यतीति। कर्तव्यविध्यननुप्रवेशे वस्तुमात्रकथने हानोपादानासंभवात् 'सप्तद्वीपा वसुमती' 'राजाऽसौ गच्छती'त्यादि-वाक्यवद् वेदान्तवाक्यानामानर्थक्यमेव स्यात्।

ननु वस्तुमात्रकथनेऽपि 'रज्जुरियं, नायं सर्प'इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टम्, तथेहाप्यसंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात्।

स्यादेतदेवम्, यदि रज्जुस्वरूपश्रवण इव सर्पभ्रान्तिः, संसारित्वभ्रान्तिर्ब्रह्मस्वरूपश्रवणमात्रेण निवर्तेत। न तु निवर्तते, श्रुतब्रह्मणोऽपि यथापूर्वं सुखदुःखादिसंसारिधर्मदर्शनात्, 'श्रोतव्यो मन्तव्यो निदिध्या-

प्रकटार्थविवरणम्

बाधकाभावादप्रयोजक इत्याशङ्क्याह—**कर्तव्यविध्यननुप्रवेश** इति। निष्प्रयोजनत्वप्रसङ्गो न बाधकः, सिद्धवस्तुज्ञानादपि प्रयोजनदर्शनादित्याह—**नन्विति**। दृष्टान्तदार्ष्टान्तिकयोर्वैलक्षण्येन परिहरन् बाधकं समर्थयते—**स्यादेतदेवमिति**। इतश्च न शाब्दसिद्धवस्तुज्ञानमात्रात् पुरुषार्थसिद्धिरित्याह—**श्रोतव्य** इति। यस्मान्नियोगानुप्रवेशेनैव सप्रयोजनत्वं तस्मादित्युपसंहारः।

भाष्यभावप्रकाशिका

विधिरेव वेदान्तेषु न श्रूयते, कथं तच्छेषतया ब्रह्मसिद्धिरिति? अत आह— **आत्मेति**। स्वरूपप्रतिपादकानां सत्यादिवाक्यानां कथमन्वय इति? अत आह— **कोऽसाविति**। ननु तत्फलं दृष्टम्? अदृष्टं वा? दृष्टं चेत्, विधिरनर्थकः, अदृष्टं चेत्, किं तत्र प्रमाणमिति? तत्राह—**तदुपासनादिति**। विपक्षे दोषमाह—**कर्तव्येति**। श्रवणोत्तरकालं मनननिदिध्यासनयोर्विधानान्यथानुप-

न्यायनिर्णयः

आदिपदाद् 'ब्रह्मविदाप्नोति' इत्यादि गृह्यते। तथापि सत्यादिवाक्यानि वाक्यभेदेन विध्यस्पृष्टब्रह्माभिदधीरन्नित्याशङ्क्य वाक्यैक्ययोगे न तद्भेदकल्पनेत्याह—**कोऽसाविति**। तानेव वेदान्तानाह—**नित्य इत्यादिना**। क्षणिकबुद्धेर्देहाच्चात्मानं व्यावर्तयितुं नित्यपदम्। 'पश्यंश्चक्षुः' इत्यादिश्रुतेश्चक्षुरादिमात्रावच्छिन्नं रूपादिज्ञानवत्त्वं व्यावर्त्य सर्वत्राप्रतिबद्धज्ञानवत्त्वमाह—**सर्वज्ञ इति**। दिगम्बरेष्टं सर्वज्ञं पराचष्टे—**सर्वेति**। सांख्यं प्रत्याह—**नित्येति**। जडविशेषैरैक्यतादात्म्ये व्यासेद्धुम्—**नित्यशुद्धेति**। अखण्डजाड्यव्यावृत्त्यर्थम्—**बुद्धेति**। विवर्तहीनाखण्डजडशक्त्यैक्याध्यस्तशबलचैतन्यं निषेद्धुम्—**मुक्तेत्यादि**। एतानि विशेषणानि तत्तद्वाक्यस्थान्यत्र तत्तद्वाक्योपलक्षणत्वेनोक्तानि। अपरोक्षत्वमाह—**विज्ञानमिति**। परमपुरुषार्थत्वमाह—**आनन्दमिति**। आदिशब्दः सत्यं ज्ञानमित्यादिसंग्रहार्थः। ननूक्तविधिफलं दृष्टमदृष्टं वा? नाद्यः, विध्यानर्थक्यात्। न चावघातादिवत्तदर्थत्वम्, दृष्टमात्रफलवत्त्वविरोधात्, तेषु नियमादृष्टस्येष्टत्वात्। न द्वितीयः, मानाभावात्। तत्राह—**तदुपासनाच्चेति**। प्रत्यग्ब्रह्म तच्छब्दार्थः। शास्त्रं 'ब्रह्म वेद' इत्यादि। अन्वयव्यतिरेकासिद्धत्वमदृष्टत्वम्। ब्रह्मणो विध्यनुप्रवेशमुक्त्वा विपक्षं प्रत्याह—**कर्तव्येति**। ब्रह्मणो विधेयधीविषयत्वाभावे विध्यस्पृष्टस्यैवोक्तौ तत्र हानाद्ययोगाल्लौकिकोक्तिवदानर्थक्यमेव वेदान्तानामित्यर्थः। वस्तुमात्रोक्तावपि नानर्थक्यमिति दृष्टान्तेन शङ्कते—**नन्विति**। वैषम्योक्त्या प्रत्याह—**स्यादिति**। वाक्योत्थज्ञानादेवाकृतकृत्यत्वे हेत्वन्तरमाह—

सितव्यः' (बृ.उ. २।४।५) इति च श्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्विधिदर्शनात्। तस्मात् प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमिति।

अत्राभिधीयते– न, कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्। शारीरं वाचिकं मानसं च कर्म श्रुतिस्मृतिसिद्धं धर्माख्यं, यद्विषया जिज्ञासा 'अथातो धर्मजिज्ञासा' (जै.सू. १।१।१) इति सूत्रिता; अधर्मोऽपि हिंसादिः प्रतिषेधचोदनालक्षणत्वाज्जिज्ञास्यः परिहाराय। तयोश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोः फले प्रत्यक्षे

प्रकटार्थविवरणम्

वेदान्ता न नियोगपराः, फलवत्त्वे सति नियोज्यविधुरत्वात्, 'नायं सर्पः' इति वाक्यवदित्याह—**अत्राभिधीयत इति**। ननूक्तं मोक्षकामो नियोज्य इति; तत्राह—**नेति**। मोक्षो नियोगसाध्यो न भवति, कर्मफलाद् वैलक्षण्याभावप्रसङ्गात्; विद्यते च वैलक्षण्यमित्यर्थः। कर्मफलाद् वैलक्षण्यं दर्शयितुं कर्म तावदाह—**शारीरमिति**। न केवलं धर्माख्यं कर्म, किन्त्वधर्मोऽपीत्याह—**अधर्मोऽपीति**। कर्मोक्त्वा तत्फलमाह—**तयोरित्यादिना**। सुख-दुःखयोर्विशेषणानि 'शरीरवाङ्मनोभिरेवोपभुज्यमाने' इत्यादीनि

भाष्यभावप्रकाशिका

पत्तिरपि न वाक्यार्थज्ञानमात्रात् कृतकृत्यतेति गमयतीत्याह—**श्रोतव्य इति**। अयं भावः—अज्ञातसङ्गतित्वेन शास्त्रत्वेनार्थवत्तया। मननादिप्रतीत्या च कार्यार्थाद् ब्रह्मनिश्चयः—इति। उपसंहरति—**तस्मात्प्रतिपत्तीति**।

तदेतदेकदेशिमतं दूषयति—**अत्राभिधीयत इति**। नेत्युक्तस्य निषेधः। तत्र हेतुः—**कर्म-ब्रह्मविद्याफलयोर्वैलक्षण्यादिति**। फलवैलक्षण्यं दर्शयितुं कर्मणः स्वरूपमाह—**शारीरमिति**। उपासनमपि कर्मेत्याह—**मानसमिति**। 'उपासनातत्फलयोरपि वेदान्तेषु प्राधान्येन विचार्यत्वं धर्ममीमांसयैवार्थाद् विचारितत्वादित्यभिप्रेत्याह—**यद्विषयेति**। अप्रतिज्ञातत्वादुपासनस्यापि जिज्ञास्यत्वमित्याशङ्कामनुवदति'[1]—**अधर्मोऽपीति**। अथवा धर्मस्वरूपनिर्णये कारणमभिधायाधर्म-

न्यायनिर्णयः

श्रोतव्य इति। पूर्वपक्षमुपसंहरति—**तस्मादिति**। सिद्धेऽर्थे शब्दानामज्ञातशक्तित्वं, वेदान्तानां शास्त्रत्वम्, अर्थवत्त्वं, श्रवणादूर्ध्वं मननादिविधिश्च तच्छब्दार्थः। **प्रतिपत्तीत्यादि**। प्रतिपत्तेर्विधिर्नियोगस्तस्य विषयभूतां प्रतिपत्तिं प्रत्यवच्छेदकत्वेन विषयतयेत्यर्थः।

प्राप्तं पक्षमनूद्य सिद्धान्तयति—**अत्रेति**। परमतनिरासं प्रतिजानीते—**नेति**। न कर्मवद् विधेया धीरित्युक्तनिषेधे हेतुमाह—**कर्मेति**। तदेव वक्तुं कर्म भिनत्ति—**शारीरमिति**। तत्तत्कर्मभेदे देहादेः सर्वस्योपयोगेऽपि क्वचित् कस्यचित् प्राधान्यात् त्रैविध्यम्। तत्र प्रमाणमाह—**श्रुतीति**। 'अग्निहोत्रं जुहुयात्' 'ब्रह्मयज्ञेन यक्ष्यमाणः' 'संध्यां मनसा ध्यायेत्' इत्याद्या श्रुतिः। 'शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः' इत्याद्या स्मृतिः। लोकेऽपि तत् प्रसिद्धं मत्वोक्तम्—**धर्माख्यमिति**। न्यायसिद्धं चैतदित्याह—**यद्विषयेति**। स्वाध्यायाध्ययनानन्तरं तस्य धर्मजिज्ञासाफलहेतुत्वात् तन्निर्णयार्थं वेदवाक्यानि विचारयितव्यानीति वदता धर्मस्यैव विचारितत्वात् तस्य न्यायसिद्धत्वेऽपि कथमधर्मस्य तद्विषयतेत्याशङ्क्य धर्मशब्दस्योपलक्षणत्वमाह—**अधर्मोऽपीति**। हिंसादिरित्यादिपदमभक्ष्यभक्षणादिसंग्रहार्थम्। चोदनालक्षणत्वाद् धर्मस्य जिज्ञास्यत्वेऽपि कुतोऽधर्मस्य तथात्वमित्याशङ्क्याह—**प्रतिषेधेति**। धर्मो हि पुरुषं निःश्रेयसेन संयुनक्तीति तज्जिज्ञासा स्यात्, अधर्मजिज्ञासा तु विफलेत्याशङ्क्याह—**परिहारायेति**। उक्तं कर्मरूपमनूद्य तत्फलरूपमाह—**तयोरिति**। सर्वलोकप्रसिद्धत्वेन विद्वन्मात्रसिद्धविद्याफलाद् भेदं सूचयति—

---

१. भाष्ये उपासनात्मकमानसकर्मजिज्ञासाऽपि धर्मजिज्ञासासूत्रे सूत्रितेत्युक्तिः कथम्? पूर्वमीमांसायामुपासनाविचारादर्शनात्, उत्तरमीमांसायां तु तद्दर्शनादित्याशङ्कां परिहर्तुमाह—उपासनेति। न्यायसाम्याद् उपासनमपि तत्रार्थाद् विचारितमेवेति वेदान्तेषु तस्य न प्राधान्येन विचार्यत्वमिति भावः। 'वेदान्तेषु न प्राधान्येन विचार्यत्वम्' इति पाठः स्यादिति भाति। २. 'अपनुदति' इति पाठः स्यात्।

सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिषु स्थावरान्तेषु प्रसिद्धे। मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु सुखतारतम्यमनुश्रूयते। ततश्च तद्धेतोर्धर्मस्य तारतम्यं गम्यते। धर्मतारतम्यादधिकारितारतम्यम्। प्रसिद्धं चार्थित्वसामर्थ्यादिकृतमधिकारितारतम्यम्। तथा च यागाद्यनुष्ठायिनामेव विद्यासमाधिविशेषादुत्तरेण पथा गमनं, केवलैरिष्टापूर्तदत्तसाधनैर्धूमादिक्रमेण दक्षिणेन पथा

प्रकटार्थविवरणम्

विद्याफलवैलक्षण्यज्ञापनाय। तथा हि—मोक्षो न नैयोगिकः शरीराद्यनुपभोग्यत्वात्, विषयेन्द्रियसंयोगाजन्यत्वात्, संसारमण्डलानन्तर्भूतत्वात्, यन्नैयोगिकं, न तत्तथा, यथा कर्मफलमिति। किञ्च मोक्षो न नैयोगिकः निरतिशयत्वात्; यन्नैयोगिकं तत्सातिशयं, यथा धर्मफलमित्यभिप्रेत्याह—**मनुष्यत्वादारभ्येति**। "स एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः। स एको मनुष्यगन्धर्वाणामानन्दः" इत्यादि श्रूयते। किञ्च मोक्षो न नैयोगिकः एकरूपसाधनाधिकारिमत्त्वात्; यन्नैयोगिकं न तत्तथा, यथा कर्मफलमित्यभिप्रेत्याह—**ततश्चेति**। किञ्च कैवल्यं नादृष्टं[ष्टजं] गमनाद्यनायत्तत्वात्, न यदेवं न तदेवं, यथा संप्रतिपन्नमित्याह—**तथा चेति**। "तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहः" इत्याद्यनुक्रान्तेनोत्तरेण पथा।

अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम्। आतिथ्यं वैश्वदेवं चापीष्टमित्यभिधीयते॥
वापीकूपतटाकादि देवतायतनानि च। अन्नप्रदानमारामः पूर्तमित्यभिधीयते॥
शरणागतसंत्राणं भूतानां चाप्यहिंसनम्। बहिर्वेदि च यद् दानं दत्तमित्यभिधीयते॥

"ते धूममभिसंभवन्ति। धूमाद् रात्रिम्" इत्यनुक्रान्तेन दक्षिणेन पथा चन्द्रलोकगतानामपि न निरतिशयं सुखमित्याह—**तत्रापीति**।

भाष्यभावप्रकाशिका

स्वरूपनिर्णयेऽपि कारणमाह—**अधर्मोऽपीति**। कर्मफलस्वरूपमाह—**तयोरिति**। अत्र विशेषणैर्ब्रह्मविद्याफलत्वात्[1] कर्मफलस्य वैलक्षण्यं प्रदर्श्य, तरतमभावादपि विलक्षणमित्याह—**मनुष्यत्वादिति**। साधनतोऽपि वैलक्षण्यमाह—**ततश्चेति**। अधिकारितोऽपि वैलक्षण्यमाह—**धर्मेति**। न केवलं प्रसिद्धत्वादधिकारितारतम्यम्, किन्तु दक्षिणोत्तरमार्गगमनश्रवणानुपपत्त्याऽपीत्याह—**तथा**

न्यायनिर्णयः

प्रत्यक्षे इति। सुखमात्रं विद्याफलम्, इदं दुःखमपीति भेदान्तरमाह—**सुखेत्यादिना**। अकार्यकरणस्य विद्याफलं लभ्यं, कर्मफलं त्वन्यथेति विशेषान्तरमाह—**शरीरेति**। नित्यसिद्धं विद्याफलमविद्यापिधानभङ्गमात्रापेक्षं, कर्मफलमन्यथेत्यपरं विशेषमाह—**विषयेति**। अज्ञेष्वपि सत्त्वाच्च कर्मफलं विद्याफलविलक्षणमित्याह—**ब्रह्मादिष्विति**। तारतम्यभाक्त्वादपि कर्मफलस्य विद्याफलादनतिशयाद् भिन्नतेत्याह—**मनुष्यत्वादिति**। श्रुतेरुक्तार्थानुसारित्वमनुशब्दार्थः। 'स एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः' इत्याद्या श्रुतिः। फलवैलक्षण्यमुपलक्षणं कृत्वा साधनवैलक्षण्यमाह—**ततश्चेति**। फले तारतम्यस्य श्रुतत्वादिति यावत्। हेतुवैचित्र्यं विना कार्यवैचित्र्यस्याकस्मिकत्वापत्तेः। मोक्षे विद्यारूपं साधनमेकरूपमिति व्यक्तं विद्याकर्मणोः स्वरूपवैचित्र्यम्। किंच विद्यायामेकरूपः साधनचतुष्टयविशिष्टोऽधिकारी, नानारूपस्तु कर्मणीत्यधिकारिभेदमाह—**धर्मेति**। कर्माधिकारितारतम्ये हेत्वन्तरमाह—**प्रसिद्धं चेति**। आदिपदमपर्युदाससंग्रहार्थम्। न केवलं प्रसिद्धत्वादधिकारितारतम्यं, किंतु दक्षिणोत्तरगतिश्रुतेरपीत्यधिकारितारतम्ये श्रुतार्थापत्तिमाह—**तथा चेति**। **विद्येत्युपासनोक्ता**, समाधिरुपास्येऽर्थे मनसः स्थिरीभावः, तयोर्विशेषो नाम प्रकर्षः। समुच्चयानुष्ठायिनामर्चिराद्युपलक्षितं देवयानं पन्थानमुक्त्वा कर्ममात्रनिष्ठानां पथ्यन्तरमाह—**केवलैरिति**। इष्टम्—'अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम्। आतिथ्यं वैश्वदेवम्—' इत्येवंविधं कर्म। पूर्तं वापीकूपतडागादिदेवतायतनान्नप्रदानारामादिरूपं स्मार्तं कर्म। दत्तं शरणागतत्राणमहिंसा बहिर्वेदिदानं च। धूमाद्युपलक्षितेन

---

१. 'फलात्' इति पाठः स्यात्

गमनं, तत्रापि सुखतारतम्यं तत्साधनतारतम्यं च शास्त्रात् 'यावत्संपातमुषित्वा' (छा.उ. ५।१०।५) इत्यस्माद् गम्यते। तथा मनुष्यादिषु नारकस्थावरान्तेषु सुखलवश्चोदनालक्षणधर्मसाध्य एवेति गम्यते तारतम्येन वर्तमानः। तथोर्ध्वगतेष्वधोगतेषु च देहवत्सु दुःखतारतम्यदर्शनात् तद्धेतोरधर्मस्य प्रतिषेधचोदनालक्षणस्य, तदनुष्ठायिनां च तारतम्यं गम्यते। एवमविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखदुःखतारतम्यमनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धम्। तथा च श्रुतिः– 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति यथावर्णितं संसाररूपमनुवदति। 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छा.उ. ८।१२।१) इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते। धर्मकार्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्यते।

प्रकटार्थविवरणम्

संपतत्यनेनास्माल्लोकादमुं लोकमिति सम्पातः कर्माशयः; तत्र यावद्भोक्तव्यं स्थित्वा "अथैतमेवाध्वानं पुनर्निवर्तन्ते" इति इयत्ताकरणात् सातिशयत्वं गम्यत इत्यर्थः। मनुष्यत्वादूर्ध्वगतेषु धर्मकार्यस्य सुखस्य सातिशयत्वमुक्तम्। इदानीं ततोऽधोगतेषु तदाह मोक्षवैलक्षण्यसिद्धये—**तथेत्यादिना**। इदानीमधर्मफलं प्रपञ्चयति—**तथोर्ध्वगतेष्विति**। उभयविधकर्मफलं निगमयति मोक्षफलविलक्षणत्वाय—**एवमिति**। किञ्च मोक्षो न नैयोगिकः, प्रतिषिद्धप्रियाप्रियस्पर्शत्वात्, न यदेवं न तदेवं, यथा धर्मकार्य-मित्याह—**अशरीरं वावेति**। कर्मणां विचित्रफलदाने शक्तत्वात् प्रसिद्धकर्मफलविलक्षणमपि मोक्षाख्यमशरीरत्वं धर्मकार्यं भविष्य-

भाष्यभावप्रकाशिका

चेति। संपत्यनेनास्माल्लोकादमुं लोकमिति संपातः=कर्म। एवं सुखस्योत्कर्षात् तारतम्यमभिधायापकर्षतारतम्यमाह—**तथेति**। इदानीं दुःखतत्साधनतदनुष्ठातॄणां तारतम्यमाह—**तथोर्ध्वगतेष्विति**। कर्मफलं ब्रह्मविद्याफलवैलक्षण्याय प्रपञ्चितमुपसंहरति—**एवमिति**। "शरीरजैः कर्मदोषै"रित्याद्या स्मृतिः। न्यायश्च दृष्टहेतुसाम्येऽपि सुखदुःखादिफलवैचित्र्यं कार्यं तथाभूतमेवालौकिकं हेतुं कल्पयति। विद्याफलं दर्शयति—**अशरीरमिति**। कथम्? अनुपपत्त्येत्याह—**धर्मकार्यत्व इति**। कर्मणो विचित्रपश्वादि-

न्यायनिर्णयः

दक्षिणेन पथा चन्द्रलोकं गतेषु सुखैकरूप्यात् तद्धेतोरपि तथात्वादन्यत्रापि तत्तारतम्यासिद्धिरित्याशङ्क्याह—**तत्रापीति**। संपतति अनेनास्माल्लोकादमुं लोकमिति कर्माशयः संपातः। तत्र यावद्भोक्तव्यं स्थित्वा 'अथैतमेवाध्वानं पुनर्निवर्तन्ते' इतीयत्ताकरणात् सातिशयत्वं सुखतद्धेत्वोर्भातीत्यर्थः। मनुष्यत्वादारभ्योर्ध्वगतेषु सुखतद्धेत्वोरुत्कर्षमुक्त्वा तद्दृष्टान्तेन तस्मादारभ्याधोगतेषु तयोरपकर्षतारतम्यमाह—**तथेति**। सुखतद्धेतुतदनुष्ठायिनामुत्कर्षापकर्षतारतम्यवद् दुःखतद्धेतुतदनुष्ठायिनामपि तदुभय-मस्तीत्याह—**तथोर्ध्वेति**। मनुष्यत्वादूर्ध्वगतेषु दुःखापकर्षतारतम्यं, तस्मादधोगतेषु च तदुत्कर्षतारतम्यमिति भेदः। कर्मफलं विद्याफलाद् भेत्तुं प्रपञ्चितमुपसंहरति—**एवमिति**। अविद्यादीत्यादिपदेनास्मितारागद्वेषाभिनिवेशा गृह्यन्ते। सुखदुःखपरिणामद्वारं दर्शयति—**शरीरेति**। **तस्योपादानं** तस्मिन् द्विविधोऽभिमानः। तस्यानर्थतया हेयत्वमाह—**संसारेति**। अनित्यमित्यपि तदर्थमेव। मेयमुपसंहृत्य मानमुपसंहरति—**श्रुतीति**। 'शरीरजैः कर्मदोषैर्याति स्थावरतां नरः। वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्।' इत्याद्या स्मृतिः। दृष्टहेतुसाम्येऽपि दृष्टं सुखादिवैचित्र्यं तथाभूतमेवालौकिकं हेतुं कल्पयतीति न्यायः। श्रुतिमाह—**तथा चेति**। निपाताववधारणे। श्रुतेस्तात्पर्यमाह—**यथेति**। नास्याः संसाररूपावेदने तात्पर्यं, तदनुवादेन मुक्तिपरत्वादित्याह—**अनुवदतीति**। विद्याफलमाह—**अशरीरमिति**। तत्त्वतो विदेहं सन्तमात्मानं वैषयिके सुखदुःखे नैव स्पृशतः वावेत्यवधारणादित्यर्थः। श्रुतितात्पर्यमाह—**चोदनेति**। तत्र गमकमाह—**प्रियेति**। गमकत्वमस्य व्यतिरेकेण स्फोरयति—**धर्मेति**। तत्कार्ये तद्दृष्टेरित्यर्थः।

अशरीरत्वमेव धर्मकार्यमिति चेन्न, तस्य स्वाभाविकत्वात्; 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति' (क.उ. १।२।२१) 'अप्राणो ह्यमनाःशुभ्रः' (मु.उ. २।१।२). 'असङ्गो ह्ययं पुरुषः' (बृ.उ. ४।३।१५) इत्यादिश्रुतिभ्यः। अत एवानुष्ठेयकर्मफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धम्।

तत्र किंचित् परिणामिनित्यम्, यस्मिन् विक्रियमाणेऽपि तदेवेदमिति बुद्धिर्न विहन्यते। यथा पृथिव्यादि जगन्नित्यत्ववादिनाम्। यथा च सांख्यानां गुणाः। इदं तु पारमार्थिकं, कूटस्थनित्यं, व्योमवत्सर्वव्यापि,

प्रकटार्थविवरणम्

तीति शङ्कार्थः[१]। आत्मनः सर्ववास्तवशरीरसंबन्धवैधुर्यमशरीरत्वम्। तस्य चानादित्वात् न धर्मकार्यत्वमित्याह—**न; तस्येति**। अनादिभावत्वान्मोक्षस्य नित्यत्वमपि सिद्धमित्याह—**अत एवेति**। ननु नित्यत्वेऽपि नियोगतोऽन्यथा परिणंस्यत इत्याशङ्क्याह—**तत्र किञ्चिदिति**। परिणामिनित्यं यत्किञ्चिद्वस्तु तत्र भवेन्न कर्मणाऽन्यथाभावः[२]। इदं तु कैवल्यं न तथेत्यर्थः। कैवल्यं न नैयोगिकं

भाष्यभावप्रकाशिका

फलत्वदर्शनाद् अशरीरत्वमपि धर्मकार्यं किं न स्यादिति शङ्कते—**अशरीरत्वमिति**। मिथ्याज्ञानलक्षणत्वात् शरीरित्वस्य तन्निवृत्तिर्न धर्मकार्यम्; विद्यामात्रसाध्यत्वात्, पारमार्थिकस्तु शरीरसंबन्धाभावः स्वभावत एव सिद्धत्वादसाध्य इत्याह—**न; तस्येति**। स्थूलशरीराभावे प्रमाणमाह—**अशरीरमिति**। सूक्ष्मशरीराभावे प्रमाणमाह—**अप्राण इति**।फलितमाह—**अत इति**।

नित्यत्वेऽपि विक्रियावत्त्वाद् विधेयक्रियानुप्रवेश इत्याशङ्क्य [अ] परिणामिनित्यतां दर्शयितुमाह—**तत्र किञ्चिदिति**। परिस्पन्दक्रियाऽभावमाह—**व्योमवदिति**। फलार्था विक्रिया न कल्प्या; तृप्तिफलस्य सदा भावादित्याह—**नित्यतृप्तमिति**।

न्यायनिर्णयः

धर्मस्य विचित्रफलत्वाददेहत्वमपि तत्कार्यमेवेति शङ्कते—**अशरीरत्वमिति**। वस्तुतो देहासंबन्धोऽशरीरत्वं, तस्य नित्यत्वात् तिरोधायकाज्ञानस्य ज्ञानमात्रापोह्यत्वान्न धर्मकार्यतेत्याह—**नेति**। तत्र मानमाह—**अशरीरमिति**। शरीरं स्थूलं वस्तुतो नास्यास्तीति यावत्। तत्र हेतुः—**शरीरेष्विति**। अनवस्थेष्वनित्येष्ववस्थितम्। नित्यमित्यर्थः। तत्रैव हेत्वन्तरमाह—**महान्तमिति**। आपेक्षिकत्वं वारयति—**विभुमिति**। मन्तृमन्तव्यभेदं प्रत्याह—**आत्मानमिति**। ईदृशमात्मानं मत्वा धीरो भवति। न हि तन्मतिं विना धीरत्वं संभवति। स च धीरः शोकोपलक्षितं संसारं नानुभवतीत्यर्थः। सूक्ष्मदेहाभावे मानान्तरमाह—**अप्राण इति**। क्रियाशक्तिमान् प्राणोऽस्य वस्तुतो नास्तीति तन्निषेधात् तत्प्रधानानि सार्थानि[३] कर्मेन्द्रियाणि निषिद्धानि। तदभिप्रायेण हिशब्दः। ज्ञानशक्तिमन्मनोऽस्य वस्तुतो नेति तन्निषेधात् तत्प्रधानज्ञानेन्द्रियाणि सार्थानि निषिद्धानि। अत एव शुभ्रः। शुद्ध इत्यर्थः। देहद्वयाभावे श्रुत्यन्तरमाह—**असङ्गो हीति**। 'स यत् तत्र' इत्यादौ स्वप्नादिकृतकर्मस्वकर्ताऽऽत्मेत्युक्तेऽर्थे हेतुरनेनोच्यते। मूर्तं मूर्तान्तरेण युज्यमानं स्पन्दते, आत्मा तु पूर्णत्वादमूर्तो न केनचिद् युज्यते। तेनाकर्तेत्यर्थः। 'अकायमव्रणम्' इत्यादिसंग्रहार्थमादिपदम्। अशरीरत्वस्य स्वाभाविकत्वे फलितमाह—**अत इति**। तद्वैलक्षण्ये किं स्यात्? तदाह—**नित्यमिति**।

तथापि परिणामित्वाद् विधेयक्रियानुप्रवेशमाशङ्क्यापरिणामिनित्यतां वक्तुं परिणामिनित्यं पृथक्करोति—**तत्रेति**। प्रकृतं नित्यं सप्तम्यर्थः। परिणामित्वनित्यत्वयोर्विरोधं प्रत्यभिज्ञया प्रत्याह—**यस्मिन्निति**। तत्र **मीमांसकादिसंमतं** दृष्टान्तमाह—**यथेति**। तथाऽन्यदपि विक्रियमाणं प्रत्यभिज्ञातो नित्यं स्यादिति शेषः। सांख्यीयदृष्टान्तमाह—**यथा चेति**। तन्मते सत्त्वरजस्तमांसि गुणा विक्रियमाणा एव प्रत्यभिज्ञया नित्यास्तथाऽन्यदपि परिणामि नित्यमित्यर्थः। तादृङ्नित्याददेहत्वे मोक्षे विशेषमाह—**इदं त्विति**।

१. शङ्कार्थः=भाष्ये 'अशरीरत्वमेव धर्मकार्यमिति चेत्' इति शङ्कार्थः। सर्वेति। वास्तवो यः शरीरसंबन्धः तद्वैधुर्यमित्यर्थः।

२. "भवेन्नाम कर्मणाऽन्यथाभावः" इति पाठः स्यात्।

३. सार्थानि=सविषयाणि।

सर्वविक्रियारहितं, नित्यतृप्तं, निरवयवं, स्वयंज्योतिःस्वभावम्। यत्र धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तेते। तदेतदशरीरत्वं मोक्षाख्यम्। 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्। अन्यत्र भूताच्च भव्याच्च' (क.उ. १।२।१४) इत्यादिश्रुतिभ्यः। अतस्तद् ब्रह्म यस्येयं जिज्ञासा प्रस्तुता, तद् यदि कर्तव्यशेषत्वेनोपदिश्येत, तेन च कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत, अनित्य एव स्यात्। तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयो मोक्ष इति प्रसज्येत। नित्यश्च मोक्षः

प्रकटार्थविवरणम्

नित्यत्वात्, व्यापित्वात्, अविक्रियत्वात्, नित्यतृप्तत्वात्, निरवयवत्वात्, स्वयंज्योतिष्ट्वात्, धर्माद्यनवच्छेद्यत्वात्, कालत्रयापरिच्छेद्यत्वात्, न यदेवं न तदेवम्, यथा कर्मफलमिति भावः। धर्माद्यनवच्छेद्यत्वे प्रमाणमाह—**अन्यत्र धर्मादिति**। ननूदाहृताः श्रुतयो न मोक्षविषयाः, किन्तु ब्रह्मविषया इत्याशङ्क्याह—**अतस्तद् ब्रह्मेति**। उक्तकर्मफलवैलक्षण्यात् तत् कैवल्यं ब्रह्मेत्यर्थः। ततः किमित्यत आह—**तद् यदीति**। इतश्च मोक्षो न नैयोगिकः, साक्षात्कारनिरन्तरत्वात्, रज्ज्वविद्यास्तमय-

भाष्यभावप्रकाशिका

परिणामायोग्यतामाह—**निरवयवमिति**। प्रकाशार्थाऽपि विक्रिया नास्तीत्याह—**स्वयंज्योतिः**। अथवा **कूटस्थनित्यमिति** निर्वर्त्यकर्मतामपाकरोति। **सर्वव्यापीति** प्राप्तकर्मताम्। **सर्वविक्रियारहितमिति** विकार्यताम्। निरवयवमिति संस्कार्यकर्मताम्। क्रियासाध्यः संस्कारो यत इति। नित्यतृप्तमिति दुःखरहितं सुखमुपलक्षयति पुरुषार्थत्वं दर्शयितुम्। दुःखनिवृत्तिसहिते सुखे तृप्तिशब्दप्रयोगात्। सुखं चाप्रतीयमानं न पुरुषार्थ इत्यत आह—**स्वयंज्योतिरिति**। धर्माधर्मयोः सकार्ययोः ब्रह्मधर्मतानिषेधादपि न धर्मकार्यत्वं मुक्तेरित्याह—**यत्रेति**।

ननु ब्रह्मणि क्रियानुप्रवेशाभावेऽपि जीवस्य विकारित्वात् तस्यानन्दविर्भावलक्षणे मोक्षे क्रियानुप्रवेशः किं न स्यादिति? अत आह—**तद् ब्रह्मेति**। ननु कर्मणां विविधसस्यादिफलत्वदर्शनान्निःश्रेयसमपि कर्मफलं किं न स्यादिति? अत आह—**तद्यदीति**। भवत्वनित्यता, अनित्यस्यापि स्वर्गादेः पुरुषार्थत्वदर्शनादित्यत आह—**तत्रेति**। भवत्वेवमपीति चेत्; तत्राह—**नित्य इति**। ब्रह्मविद्या-तत्फलयोः समकालीनत्वस्य श्रूयमाणत्वं नैयोगिकज्ञानापूर्वजन्यत्वे न संभवति; नैयोगिकफलस्य समकालीन-

न्यायनिर्णयः

तत् खल्वतात्त्विकं, परिणामस्य कार्त्स्न्यैकदेशाभ्यां भेदाभेदाभ्यां च दुर्वचत्वात्[1]। मोक्षाख्यमदेहत्वं स्वाभाविकमकल्पितमिति विशेषमाह—**पारमार्थिकमिति**। तत्र हेतुमाह—**कूटस्थेति**। तदर्थं सर्वगतत्वेन परिस्पन्दपरिणामराहित्यमाह—**व्योमवदिति**। फलार्थाऽपि [वि] क्रिया तत्र न कल्प्या, तृप्तेः सदातनत्वादित्याह— **नित्येति**। परिणामाभावे हेत्वन्तरम्—**निरवयवमिति**। प्रकाशार्था विक्रिया न तत्रेत्याह—**स्वयमिति**। उक्तविशेषणवशान्मुक्तौ क्रियाऽननुप्रवेशात्र सा कर्मकार्येत्युक्तम्, इदानीं धर्माधर्मयोः सकार्ययोर्ब्रह्मसंबन्धनिषेधादपि तत्प्राप्तिर्मुक्तिर्न कर्मकार्येत्याह—**यत्रेति**। कालानवच्छिन्नत्वाच्च मुक्तिरकर्मसाध्येत्याह—**कालेति**। ब्रह्मणो धर्माद्यनवच्छेद[द्य]त्वे मानमाह—**अन्यत्रेति**। धर्मात् तत्फलाच्च सुखात्, अधर्मात् तत्फलाच्च दुःखात्, कृतात् कार्यात्, अकृताच्च कारणात्, भूतादिकालत्रयाच्च पृथग्भूतं तेनानवच्छेद्यं यत्पश्यसि तद् वदेति मृत्युं प्रति नचिकेतसो वचनम्। आदिशब्देन 'नैनं सेतुम्' इत्याद्या श्रुतिर्गृह्यते। पृथग् जिज्ञासाविषयत्वाच्च धर्माद्यस्पृष्टत्वं ब्रह्मणो युक्तमित्याह—**तदिति**। अतःशब्दपाठे धर्माद्यस्पर्शे कर्मफलवैलक्षण्यं हेतूकृतम्। कर्तव्यधीशेषत्वेन ब्रह्मोपदेशात् तत्प्राप्तेर्मुक्तेर्वैधधीफलत्वमित्याशङ्क्याह—**तद्यदीति**। धर्माद्यस्पर्शे ... **यथोक्तेति**। अनित्यत्वेऽपि स्वर्गादिवत्पुमर्थतेत्याशङ्क्याह—**तत्रेति**। तस्मिन् मोक्षे विधेयक्रियासाध्यत्वेनानित्ये सतीत्यर्थः। 'तयोश्चोदनालक्षणयो'रित्यादाविति शेषः। स्वर्गादिदृष्टान्तादित्यर्थः। इष्टापत्तिं प्रत्याह—**नित्यश्चेति**। ब्रह्माप्तेर्मुक्तेरवैधफलत्वे

---

१. 'दुर्वचनत्वात्' इति पाठान्तरम्।

२. भाष्ये, 'तत्र' इत्यस्यार्थः।

सर्वैर्मोक्षवादिभिरभ्युपगम्यते, अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः। अपि च 'ब्रह्म वेद ब्रह्मैव भवति' (मु.उ. ३।२।९) 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' (मु.उ. २।२।८)। 'आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चन' (तै.उ. २।९) 'अभयं वै जनक प्राप्तोऽसि' (बृ.उ. ४।२।४)। 'तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्' (बृ.उ. १।४।१०) 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ई.उ. ७) इत्येवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति। तथा 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च' (बृ.उ. १।४।१०) इति ब्रह्मदर्शनसर्वात्मभावयोर्मध्ये कर्तव्यान्तरवारणायोदाहार्यम्। यथा तिष्ठन् गायतीति तिष्ठतिगायत्योर्मध्ये

प्रकटार्थविवरणम्

वदित्याह—**अपि चेत्यादिना**। परं बिम्बरूपेण, अपरं[1] च प्रतिबिम्बितत्वेनेति परापरं ब्रह्म। तस्मिन् दृष्टे साक्षात्कृते अस्य विदुषः प्रारब्धव्यतिरिक्तानि कर्माणि क्षीयन्त इति नैरन्तर्यम्। तद् ब्रह्मात्मानमेवावेदजानात् "अहं ब्रह्मास्मि" इति; ततो ज्ञानात् तद् ब्रह्म सर्वं परिपूर्णमभवत्। अज्ञानकृतः परिच्छेदभ्रमो व्यावर्तिष्टेत्यर्थः। इतश्च मोक्षो न नैयोगिकः, दर्शनफलत्वात्, रज्ज्वविद्यास्तमयवदित्यभिप्रेत्याह—**तथा तद्धैतदिति**। तदेतद् बिम्बभूतं ब्रह्म पश्यन् वामदेवः "अहं मनुरभवं सूर्यश्च" इति मेने। दृष्टस्यैव तत्त्वस्य सर्वत्र प्रतिबिम्बितत्वादित्यर्थः। 'तिष्ठन् गायति' इत्युक्ते शब्दतस्तत्कर्तृकं क्रियान्तरं न भवतीत्येतावतोदाहरणम्।

भाष्यभावप्रकाशिका

ताऽसंभवात्। अतो ब्रह्मज्ञानमविधेयम्, तत्फलं च दृष्टमेव मोक्षाख्यमशरीरत्वम्; **ब्रह्मदर्शन-सर्वात्मभावयोर्मध्य इति**। क्रियाहेतुभूतार्थाद् धातोः शतृप्रत्ययस्य स्मरणादव्यवहिते च हेतुमति क्रियाहेतुत्वात् पश्यन्निति शतृप्रत्ययः कालान्तरभावित्वं सर्वात्मभावस्य वारयतीत्यर्थः। यद्यपि न स्थितिक्रियासामर्थ्याद् गीतिक्रिया, किन्तु प्रयत्नान्तरात् [तथापि तयोः] मध्ये शब्दतः क्रियान्तरं न प्रतीयत इत्याह—**तिष्ठन् गायतीति**। किंच ब्रह्मविद्यायामविद्यानिवृत्तिफलत्वश्रवणादुपासनात्मकत्वे चाप्रमाणतया

न्यायनिर्णयः

फलितमाह—**अत इति**। मुक्तेरवैधफलत्वे हेत्वन्तरमाह—**अपि चेति**। यो ब्रह्म प्रत्यक्त्वेन साक्षात्करोति स तदेव वेद्यं ब्रह्म भवति, तत्क्रतुन्यायात्। तस्मिन् परात्मनि परं कारणमवरं कार्यं तद्रूपे तदधिष्ठाने प्रत्यक्त्वेन साक्षात्कृते सत्यस्य विदुषोऽनारब्धानि कर्माणि क्षीणानि भवन्ति। ब्रह्मणो रूपमानन्दं विद्वान् भयहेत्वभावान्निर्भयो भवति। श्रुताविविशब्दः श्लोकसमाप्त्यर्थः। हे जनक, त्वमभयं ब्रह्म प्राप्तोऽसि, तत्साक्षात्कारवत्त्वात्। यदस्मिन्देहे जलसूर्यवत्प्रविष्टं ब्रह्म जीवाख्यं तदाचार्येण बोधितमात्मानमेव सर्वकल्पनातीतमवेद् विदितवत्, कथम्? अहं ब्रह्माद्वितीयमस्मीति, तस्मादेव ज्ञानादज्ञानकृतासर्वत्वनिवृत्त्या तद् ब्रह्म पूर्णात्मना स्थितमासीत्। 'यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः' इति यः सर्वात्मभावो विद्याव्यङ्ग्यत्वेनोक्तस्तत्रात्मनि तद्धीकाले वा तदात्मैक्यमुपदेशेन पश्यतः शोकाद्युपलक्षितः संसारो नेति श्रुतीनामर्थः। आदिशब्देन 'ब्रह्मविदाप्नोति' इत्याद्या गृह्यन्ते। तासां तात्पर्यमाह—**ब्रह्मेति**। विद्यातत्फलयोरेककालत्वश्रुतेर्वैधज्ञानापूर्वजन्यत्वे मुक्तेस्तदयोगात्, वैधफलस्य कालान्तरभावित्वात्, ब्रह्मधीर्न विधेया, तत्फलं च दृष्टमेवेति भावः। इतश्च मोक्षो वैधो नेत्याह—**तथेति**। तत्पदलक्ष्यं ब्रह्मैतदात्मत्वेन स्थितमस्मीति पश्यन्नस्मादेव दर्शनादृषिर्वामदेवनामा परं ब्रह्माविद्याध्वस्त्या प्रतिपन्नवान् किलेति हशब्दो व्यवधानेन संबध्यते। स चास्मिन् दर्शने स्थितः सर्वात्मत्वप्रकाशकान् मन्त्रानहमित्यादीन् दृष्टवानिति श्रुत्यर्थः। तस्यास्तात्पर्यमाह—**ब्रह्मेति**। 'लक्षणहेत्वोः क्रियायाः' इत्यत्र येन लक्ष्यते तल्लक्षणं, जनको हेतुः, तौ लक्षणहेतू क्रियाविषयौ चेद्भवतस्तदा क्रियात्मके तस्या लक्षणे, तस्या हेतौ चार्थे वर्तमानाद् धातोः परस्य लटः शतृशानचावादेशौ भवत इत्युक्तम्। यथा तिष्ठन्मूत्रयति, शयानो भुङ्क्ते, अधीयानो वसतीति।

१. अवरमिति पाठः स्यात्। 'परापरे' इति वा श्रुतौ पाठः ग्रन्थकृदभिप्रेतः स्यात्।

तत्कर्तृकं कार्यान्तरं नास्तीति गम्यते। 'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि' (प्र.उ. ६।८) 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयतु' (छा.उ. ७।१।३) 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः' (छा.उ. ७।२६।२) इति चैवमाद्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति। तथा चाचार्यप्रणीतं न्यायोपबृंहितं सूत्रम्–'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायाद-

प्रकटार्थविवरणम्

इतश्च मोक्षो न नैयोगिकः, अविद्यास्तमयत्वात्, रज्ज्वविद्यास्तमयवदित्याह—**त्वं हि नः पितेति**। अविद्यां निवर्तयसि ज्ञानोपदेशेनेत्यर्थः। तस्मै नारदाय ध्वस्तदोषाय तमसोऽज्ञानस्य पारं दर्शयतीत्यज्ञानासंसृष्टवस्तुप्रदर्शनेनाज्ञानात् निवर्तितवानित्यर्थः। मिथ्याज्ञाननिवृत्तौ मोक्षे अक्षपादस्यापि संमतिरित्याह—**तथा चेति**। पाठक्रमेणोत्तरोत्तरापाये तदनन्तराभावादपवर्गः। तथा हि—मिथ्याज्ञानापाये रागादिदोषानुदयः, तदभावे धर्माधर्मप्रवृत्त्यभावः, तदभावे च शरीरग्रहणाभावः,

भाष्यभावप्रकाशिका

तदयोगात् प्रमाणज्ञानमेव ब्रह्मविद्या वेदान्तवाक्येभ्यो जायत इत्याह—**त्वं हीत्यादिना**।

एतावता श्रुत्यनुसारेणाविद्यानिवृत्तिफलत्वात् तत्त्वज्ञानं ब्रह्मविद्येत्युक्तम्, इदानीं तर्कशास्त्रानुसारेणापि तथैवाभ्युपेयमित्याह—**तथा चेति**। ननु तर्कशास्त्रानुसारेण भेददर्शनमेव मिथ्याज्ञाननिवर्तकम्, न तत्त्वज्ञानमित्यत आह—**मिथ्याज्ञानेति**।

न्यायनिर्णयः

तथाऽत्रापि प्रतिपत्तिक्रियाहेतौ क्रियायां दर्शने पश्यन्निति शतुर्दर्शनात्, अव्यवहिते च हेतुमति क्रियाया हेतुत्वात्, एष शतृप्रत्ययः सर्वात्मत्वस्य कालान्तरत्वं वारयति। अतोऽस्य न वैधतेत्यर्थः। यद्यपि न स्थितिक्रियासामर्थ्याद् गीतिक्रिया; किंतु यत्नान्तरात्, तथापि तयोर्मध्ये क्रियान्तरं शब्दतो न भातीत्येतावतोदाहरति—**यथेति**। इतश्च ब्रह्मधीर्न विधेया, तत्फलं च न वैधमित्याह—**त्वं हीति**। भरद्वाजादयः षड् ऋषयः परविद्याप्रदं पिप्पलादं गुरुं विद्यानिष्क्रियार्थमन्यदनुरूपमपश्यन्तः पादयोः प्रणम्योचिरे। त्वं खल्वस्माकं पिता, ब्रह्मदेहस्याजरामरस्य विद्यया जनयितृत्वात्। इतरौ पितरौ देहमेव जनयतः। जनयितृत्वमपि सिद्धस्यैवाविद्यानिरासादित्याह—यस्त्वमस्मानविद्यामहोदधेः परमपुनरावृत्तिरूपं पारं तारयसि प्रापयसि विद्याप्लवेनेति। प्रश्नोपनिषदमुक्त्वा सनत्कुमारनारदसंवादात्मिकां छान्दोग्योपनिषदं पठति—**श्रुतं हीति**। तत्र 'तारयतु' इत्यन्तमुपक्रमस्थं, शेषमुपसंहारस्थमिति भेदः। मम भगवत्तुल्येभ्यः श्रुतमेवेदं यत्तरति शोकं मनस्तापमकृतार्थबुद्धिमात्मविदिति। सोऽहमनात्मवित्त्वाच्छोचामि। अतस्तं मां शोचन्तं शोकसागरस्य पारमन्तं तारयतु भगवानात्मज्ञानोडुपेनेति नारदेन प्रेरितः सनत्कुमारस्तस्मै वैराग्यादिना निरस्तसमस्तदोषाय योग्याय तमसोऽविद्याख्यस्य पारं परमार्थतत्त्वं दर्शितवानित्यर्थः। आदिशब्देन 'यो वेद निहितं गुहायाम्' इत्याद्याः श्रुतयो गृहीतास्तासां तात्पर्यमाह—**मोक्षेति**। विद्याफलमविद्याध्वस्तिः श्रुता। न चामानात् तद्ध्वस्तिः। तथा चोपास्तेरन्या मानमेव ब्रह्मधीर्न विधेया, तत्फलं च मुक्तिर्न वैधीत्यर्थः। श्रुत्यनुसारेणाविद्याध्वस्तिफलत्वाद् ब्रह्मधीस्तत्त्वधीरित्युक्तम्। इदानीं तर्कशास्त्रानुसारेणापि तथैवेत्याह—**तथा चेति**। दुःखं प्रतिकूलवेदनीयं, बाधा, पीडा, ताप इत्यनेकविधम्। जन्म देहेन्द्रियबुद्धीनां निकायविशिष्टः प्रादुर्भावः। हिंसास्तेयादिरूपा पापिका प्रवृत्तिरधर्मं प्रसूते। दानत्राणादिरूपा प्रवृत्तिर्धर्मं जनयति। तावेतौ धर्माधर्मौ प्रवृत्तिसाध्यौ तच्छब्दौ। रागद्वेषेर्ष्यासूयामानलोभादयो दोषाः। मिथ्याज्ञानमतस्मिंस्तज्ज्ञानम्, आत्मा नास्तीत्यादि। तेषां पाठक्रमादुत्तरोत्तरस्यापाये तदनन्तरस्य पूर्वपूर्वस्यापायादपवर्गो निःश्रेयसम्। मिथ्याज्ञानादयो दुःखान्ता धर्मा विच्छेदादृते वर्तमानाः संसारः। तथा च यदा तत्त्वज्ञानान्मिथ्याज्ञानमपैति तदा हेत्वभावे फलाभावाद् दोषापायः, तदपाये च प्रवृत्तिसाध्यधर्माधर्मापायाज्जन्मापायद्वारा दुःखमपगच्छति, ततश्चात्यन्तिकं निःश्रेयसं सिध्यति। तदेवं तत्त्वज्ञानान्मिथ्याज्ञानध्वस्त्या

पवर्गः' (न्या.सू. १।१।२) इति। मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद् भवति।

न चेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपम्; यथा–'अनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति' (बृ.उ. ३।१।९) इति। न चाध्यासरूपम्; यथा–'मनो ब्रह्मेत्युपासीत' (छा.उ. ३।१८।१) 'आदित्यो ब्रह्मेत्यादेशः' (छा.उ. ३।१९।१) इति च मनआदित्यादिषु ब्रह्मदृष्ट्यध्यासः। नापि विशिष्टक्रियायोगनिमित्तम्, 'वायुर्वाव संवर्गः' 'प्राणो वाव संवर्गः' (छा.उ. ४।३।१,३) इतिवत्।

प्रकटार्थविवरणम्

तदभावे दुःखोपरम आत्यन्तिक इत्यर्थः। तर्हि मिथ्याज्ञाननिवृत्तिरपि नियोगादेवास्त्विति न वाच्यमित्याह—**मिथ्याज्ञानेति।** सर्वत्राज्ञानव्यावृत्तेर्ज्ञानमात्रतन्त्रतादर्शनादित्यर्थः। ननु ब्रह्मात्मैकत्वज्ञानमपि संपद्रूपम्; यथा मनोवृत्तिष्वानन्त्यसाम्येनानन्तविश्वेदेवसंपादनं विधितःतत्फलप्राप्तिश्च; तथा चेतनत्वसाम्येन जीवे ब्रह्मत्वं संपाद्य विधितः तत्फलं प्राप्यते। अथवाऽऽलम्बनप्रधानाध्यासरूपं मनआदिषु ब्रह्मत्वदृष्टिवत्। अथवा यथा अग्न्यादीनां संहारक्रियायोगात् वायोः संवर्गत्वेनोपासनम्, प्राणस्य च वागादिसंवरणात्, उत्क्रमणकाले संहरणाच्च संवर्गत्वेनोपासनं विधितः, तथा वृद्धिक्रियायोगाज्जीवस्य ब्रह्मत्वेनोपासनं कर्म स्यात्; कर्तुः संस्काररूपं वाऽऽज्यावेक्षणवद् विधेयमेवेत्याशङ्क्याह—**न चेदमित्यादिना।** प्रतिज्ञाचतुष्टये हेतुमाह—**संपदादिरूपे हीति।**

भाष्यभावप्रकाशिका

भेददर्शनस्याज्ञानविलसितत्वेन तत्प्रतिपक्षत्वाभावादद्वितीयब्रह्मात्मदर्शनमेव तन्निवर्तकमिति भावः। ननु—एकत्वविज्ञानमपि न प्रमाणजन्यम्; वेदान्तानां तत्र प्रमाणान्तरविरुद्धे तात्पर्यासंभवात्, किन्तु संपदादिरूपमित्याशङ्क्याह—**न चेति।** संपन्नाम अल्पे वस्तुन्यालम्बने महावस्तुदर्शनम्, यथा मनसोऽनन्तत्वसामान्येन विश्वदेवत्वदर्शनम्, एवं जीवस्यापि चिद्रूपसामान्येन ब्रह्मरूपतासंपादनम्। [संपदि सम्पाद्यमानस्य प्राधान्येनानुध्यानम्] अध्यासे त्वालम्बनस्यैवेति विशेषः। **न विशिष्टेति।** अग्न्यादीनां संहरणाद् वायोः संवर्गत्वम्, वागादीनां च संहरणात् प्राणस्य संवर्गत्वम्; एवं जीवात्मनि बृंहणक्रियाया ब्रह्मदृष्टिरित्यर्थः।

न्यायनिर्णयः

मोक्ष इत्यक्षपादस्यापि विवक्षितमित्यर्थः। ननु भेदधीरेव मिथ्याधीविरुद्धा तत्त्वधीस्तर्कशास्त्रेऽभीष्टा, 'तत्त्वज्ञानं तु मिथ्याज्ञानविपर्ययेण व्याख्यातम्' इत्युपक्रम्य 'आत्मनि तावदस्तीत्यनात्मन्यात्मेति दुःखेऽनित्येऽत्राणे सभये जुगुप्सिते हातव्ये यथाविषयं वेदितव्यम्' इत्यादिन्यायभाष्यदर्शनात्। तत् कथं बह्मात्मैक्यज्ञानान्मिथ्याधीध्वस्तिरित्यत्र न्यायशास्त्रानुगुण्यम्, तत्राह—**मिथ्येति।** भेददृष्टेरज्ञानविलासत्वान्मिथ्याज्ञानाप्रतिपक्षत्वात्, अद्वयब्रह्मात्मधीरेव तन्निवर्तिकेत्यावश्यकमित्यर्थः।

अथैक्यज्ञानमपि संपदादिरूपत्वाद् भेदधीतुल्यं न मिथ्याधीविरुद्धम्; नेत्याह—**न चेति।** संपन्नामाल्पे वस्तुन्यालम्बने सामान्येन केनचिन्महतो वस्तुनः संपादनम्। तत्रोदाहरणम्—**यथेति।** मनस्यनन्तवृत्तिमत्यालम्बनेऽल्पपरिणामे विश्वेषां देवानामनन्तानां महतामनन्तत्वसामान्येन संपादनम्। तेनानन्तफलाप्तिर्यथा श्रुता, तथा जीवस्यापि चैतन्यसामान्याद् ब्रह्मतासंपादनममृतत्वफलं विधेयमित्ययुक्तमित्यर्थः। अध्यासपक्षं निषेधति—**न चेति।** अध्यासः शास्त्रतोऽतस्मिंस्तद्धीः। संपदि संपाद्यमानस्य प्राधान्येनानुध्यानं, अध्यासे त्वालम्बनस्येति विशेषं मत्वा दृष्टान्तमाह—**यथेति।** आदिशब्दादाकाशाद्युक्तम्। आदित्यादौ यथा ब्रह्मधीरारोप्यते तथा जीवे तद्धीरारोप्येत्यध्यासरूपमिदमैक्यज्ञानमित्यपि नेत्यर्थः। पक्षान्तरं दूषयति—**नापीति।** संवर्गविद्यायां श्रुतम्—'वायुर्वाव संवर्गो यदा वा अग्निरुद्वायत्युपशाम्यति वायुमेवाप्येति विलीयते यदा सूर्योऽस्तमेति वायुमेवाप्येति यदा चन्द्रोऽस्तमेति वायुमेवाप्येति यदाऽऽप उच्छुष्यन्ति वायुमेवापियन्ति वायुर्ह्येवैतान्सर्वान्संवृङ्क्त इत्यधिदैवतमथाध्यात्मं प्राणो वाव संवर्गो यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः' इति। तत्र यथा संहरणक्रियायोगाद्वायोः प्राणस्य च संवर्गत्वं, तथा जीवब्रह्मणोर्बृंहणक्रियायोगादैक्यज्ञानमित्यपि नेत्यर्थः। आदिशब्दात् 'प्राणो वा

नाप्याज्यावेक्षणादिकर्मवत् कर्माङ्गसंस्काररूपम्। संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने 'तत्त्वमसि' (छा.उ. ६।८।७) 'अहं ब्रह्मास्मि' (बृ.उ. १।४।१०) 'अयमात्मा ब्रह्म' (बृ.उ. २।५।१९) इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत। 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते

प्रकटार्थविवरणम्

अबाधिततत्परमुख्यसामानाधिकरण्यविरोधान्नेयं कल्पनाऽवकल्पत इत्यर्थः। किञ्च सम्पदादेरयथावस्तुत्वान्नाविद्यानिवृत्तिर्ब्रह्मात्मभावो वा स्यादित्याह—भिद्यत इत्यादिना। उक्तप्रकारेण मोक्षरूपब्रह्मपर्यालोचनया च न नियोगानुप्रवेशावकाश

भाष्यभावप्रकाशिका

नाप्याज्यावेक्षणेति। यथा दर्शपूर्णमासप्रकरणे "पत्न्यवेक्षितमाज्यं भवति" इति सामाम्नातं प्रकरणिना च गृहीतमुपांशुयाजाङ्गभूताज्यद्रव्यसंस्कारतयाऽवेक्षणं गुणकर्म विधीयते, एवं कर्तृत्वेन क्रत्वङ्गभूत आत्मनि "आत्मा वा अरे द्रष्टव्यः" इति दर्शनं गुणकर्म विधीयत इत्यर्थः।

अत्र किं प्रमाणान्तरविरोधात् संपदादिपरत्वं कल्प्यते? किं वा वेदान्तानां स्वार्थे तात्पर्याभावात्? न तावदाद्यः; जीव-ब्रह्मणोः प्रमाणान्तरागोचरतया तद्भेदस्यापि प्रमाणान्तरागोचरत्वात्। बिम्बप्रतिबिम्बयोरिव भेदावभाससंभवात्। अथ तात्पर्याभावात्, अत्राह—संपदादीति। "तत्त्वमसी"ति नवकृत्वोऽभ्यासात् "अनेन जीवेने"ति चार्थवादोपादानात् "अथ येऽन्यथा ते विदु"रिति भेददर्शननिन्दनात्, अन्यत्रापि "अहं ब्रह्मास्मि" "स एष इह प्रविष्टः" "योऽन्यां देवता"मित्यादिश्रवणाद् एकत्वे वेदान्तानां तात्पर्यमवगम्यत इत्यर्थः। किंच विद्याया अविद्यानिवृत्तिब्रह्मात्मभावफलकत्वश्रवणाद् न संपदादिरूपा ब्रह्मविद्येत्याह—भिद्यत

न्यायनिर्णयः

उक्थम्' इत्यादि गृहीतम्। मतान्तरं प्रत्याह—नापीति। यथा दर्शपूर्णमासाधिकारे—'पत्न्यवेक्षितमाज्यं भवति' इत्याम्नातमवेक्षणमुपांशुयाजाङ्गभूताज्यसंस्कारो गुणकर्म विधीयते तथा कर्तृत्वेनाङ्गे क्रतावात्मनि द्रष्टव्यादिवाक्येन दृष्टेर्गुणकर्मणो विधानात् कर्माङ्गात्मसंस्काररूपमैक्यज्ञानमित्यपि नेत्यर्थः। आदिशब्देन प्रोक्षणादि गृह्यते। संपदध्यासक्रियायोगसंस्काराणां न प्रतिज्ञामात्रादयोगः, अतिप्रसङ्गादित्याशङ्क्य वेदान्तानां स्वार्थे मानान्तरविरोधाद्वा तात्पर्याभावाद्वा संपदादिपरतेति विकल्प्य जीवब्रह्मणोर्मानान्तरागोचरत्वात् तद्भेदस्यापि तथात्वात्, भेददृष्टेश्च बिम्बप्रतिबिम्बवदविरोधादाद्यो नेति मत्वा द्वितीयं प्रत्याह—संपदादीति। 'सदेव सोम्येदम्' 'एकमेव' इत्युपक्रमात् 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा' इत्युपसंहारात्, 'तत्त्वमसि' इत्यभ्यासाद्, ब्रह्मात्मनो मानान्तरावेद्यत्वेनापूर्वत्वात्, तज्ज्ञानस्य 'आचार्यवान्' इत्यादिना फलश्रुतेः, 'अनेन जीवेन' इत्यर्थवादात्, 'अथ येऽन्यथा' इत्यादिभेददर्शननिन्दनात्, उपपत्तेश्च मृदादिदृष्टान्तस्य दृष्टत्वात्। बृहदारण्यकेऽपि—'ब्रह्म वा इदम्' इत्युपक्रमात् 'अयमात्मा ब्रह्म' इति परामर्शात् 'पूर्णमदः पूर्णमिदम्' इत्युपसंहारात्, 'स एष नेति नेत्यात्मा' इत्यभ्यासादप्रपञ्चब्रह्मात्मनोऽपूर्वत्वात्, 'तस्मात्तत्सर्वमभवत्' इत्यादिफलश्रुतेः 'स एष इह प्रविष्टः' 'अथ योऽन्यां देवताम्' इत्याद्यर्थवादाद, दुन्दुभ्यादिदृष्टान्तोपपत्तेः। ऐतरेयके च—'आत्मा वा इदमेक एव' इत्युपक्रम्य 'स एतमेव पुरुषं ब्रह्म ततममपश्यत्' इति परामृश्य 'प्रज्ञानं ब्रह्म' इत्युपसंहारात्। आथर्वणे च—'कस्मिन् नु भगवो विज्ञाते सर्वमिदं विज्ञातम्' इत्युपक्रम्य 'ब्रह्मैवेदम्' इति निगमनात्। तैत्तिरीयके च 'ब्रह्मविदाप्नोति परम्' 'सत्यं ज्ञानमनन्तं ब्रह्म' 'यो वेद निहितं गुहायाम्' इत्युपक्रम्य 'स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः' इति परामृश्य 'आनन्दो ब्रह्मेति व्यजानात्' इत्यादिनोपसंहारात्, तस्यैव ब्रह्मात्मनोऽभ्यासात्, तदपूर्वता स्यात्, 'सोऽश्नुते सर्वान्कामान्' 'आनन्दं ब्रह्मणो विद्वान्न बिभेति' इत्यादिना फलाभिलापात्, 'तदात्मानं स्वयमकुरुत' इत्यर्थवादात् 'को ह्येवान्यात्' इत्याद्युपपत्तेः एकत्वे वेदान्तानामेकान्तेन तात्पर्यमवधार्यते। तथा चायुक्ता तेषां स्वार्थे तात्पर्याभावकृता संपदादिपरतेति भावः। किंच ज्ञानस्याज्ञानध्वस्तिफलत्वश्रुतेर्न संपदादिरूपमैक्यज्ञानमित्याह—भिद्यत इति। हृदयमन्तःकरणम्, तस्य ग्रन्थी रागादिः, स तस्मिन्दृष्टे भिद्यते विदीर्यते। सर्वे च संशयाः संसारहेतवश्छिद्यन्ते छिन्ना भवन्तीत्यर्थः। आदिशब्दात् 'तरति शाकमात्मवित्' इत्यादि

सर्वसंशयाः' (मु.उ. २।२।८) इति चैवमादीन्यविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन्। 'ब्रह्म वेद ब्रह्मैव भवति' (मु.उ. ३।२।९) इति चैवमादीनि तद्भावापत्तिवचनानि संपदादिपक्षे न सामञ्जस्येनोपपद्येरन्। तस्मान्न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानम्। अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या। किं तर्हि? प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद् वस्तुतन्त्रा।

एवंभूतस्य ब्रह्मणस्तज्ज्ञानस्य च न कयाचिद् युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुम्। न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः, 'अन्यदेव तद् विदितादथो अविदितादधि' (के.उ. १।३) इति विदिक्रियाकर्मत्वप्रतिषेधात्, 'येनेदं सर्वं विजानाति तं केन विजानीयात् (बृ.उ. २।४।१३) इति च। तथोपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति–'यद् वाचाऽनभ्युदितं येन वागभ्युद्यते' इत्यविषयत्वं ब्रह्मण उपन्यस्य 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' (के.उ. १।४) इति।

प्रकटार्थविवरणम्

इत्याह— **एवंभूतस्य चेति**। अवेक्षणकर्मण आज्यस्य नियोगशेषत्ववद् विधीयमानशाब्दविदिक्रियाकर्मत्वेन वा ब्रह्मणो विनियोगशेषत्वं[नियोगशेषत्वं] भविष्यतीत्याशङ्क्याह—**न च विदीति**। शाब्दस्यापि वेदनस्याविषयत्वे शास्त्रप्रमाणत्वमपि न

भाष्यभावप्रकाशिका

इति। संपदादिरूपविज्ञानस्याप्रमाणत्वादविद्यानिवर्तकताऽयोगात् परमार्थतो भिन्नस्यात्मनो ब्रह्मात्मताऽसंभवात् तस्य नष्टस्य परमात्मताऽयोगाच्चेति भावः। यतो न संपदादिरूपा, अतो न पुरुषतन्त्रेत्याह—**अत इति**। ननु प्रयोजनाभावादविधिसंबन्धः? किं वा ब्रह्मकारकत्वाभावात्? न तावद् विधिसंबन्धे प्रयोजनाभावः; मोक्षफलश्रवणात्, नापि कारकत्वाभावः; विदिक्रियायाः कर्मकारकत्वादित्याह—**न च विदिक्रियेति**। मा भूद् विदिक्रियाकर्मत्वम्, उपास्तिक्रियाकर्मत्वं तु भविष्यतीत्यत आह—**तथोपास्तिक्रियेति**।

न्यायनिर्णयः

गृह्यते। तेषां तात्पर्यमाह—**अविद्येति**। संपदादिज्ञानस्याप्रमात्वादज्ञानानिवर्तकत्वादित्यर्थः। ब्रह्मविद्याया ब्रह्मभावफलश्रुतेरपि न संपदादिरूपतेत्याह—**ब्रह्मेति**। आदिपदं 'ब्रह्मविदाप्नोति' इत्यादि ग्रहीतुम्। तेषां तात्पर्यमाह—**तद्भावेति**। आत्मनो वस्तुतो भिन्नस्याब्रह्मत्वादन्यस्य स्थितस्य नष्टस्य वाऽन्यत्वासिद्धेः संदादिपक्षे तद्भाववाक्यानां न मुख्यार्थतेत्यर्थः। उक्तहेतुभ्यः सिद्धं निगमयति—**तस्मादिति**। प्रमितित्वं, तमोध्वस्तितद्भावापत्तिफलत्वं च तच्छब्दार्थः। संपदादिरूपत्वाभावेऽपि कथमविधेयत्वं तदाह—**अत इति**। तदतन्त्रत्वे नित्यत्वमाशङ्क्याह—**किं तर्हीति**।

तस्या वस्तुतन्त्रत्वे फलितमाह—**एवमिति**। एवंभूतस्याद्वयप्रत्यङ्मात्रतया स्थितस्येत्यर्थः। कृतिसाध्यस्यैव नियोगविषयत्वाद् ब्रह्मणस्तज्ज्ञानस्य वा तदसाध्यत्वादित्यर्थः। कथमवैधं ब्रह्म, वैफल्यादकारकत्वाद्वा? नाद्यः, मुक्तिश्रुतेः। नेतरः, ब्रह्मणः कर्मत्वादित्याशङ्क्य विदिक्रियायामुपास्तिक्रियायां वा तस्य कर्मतेति विकल्प्याऽऽद्यं दूषयति—**न चेति**। तद् ब्रह्म विदितात् कार्यादन्यदेव,अथो कारणादप्यविदितादध्युपरिष्टादन्यदित्यर्थः। येन प्रमात्रेदं सर्वं वस्तु लोको जानाति तं केन करणेन जानीयात्, करणस्य ज्ञेयविषयत्वाज्ज्ञातर्यप्रवृत्तेः। तन्न ज्ञाता ज्ञेयः, किंतु साक्षीत्यर्थः। द्वितीयं प्रत्याह—**तथेति**। 'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते' इत्यविषयत्वमुक्त्वा 'तदेव' इति मातृत्वादिकल्पनामपोह्यात्मभूतं ब्रह्म महत्तममिति त्वं विद्धि। यदुपाधिविशिष्टं देवतादीदमित्युपासते जनाः, नेदं त्वं ब्रह्म विद्धीत्यर्थः।

अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेत्? न; अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य। न हि शास्त्रमिदन्तया विषयभूतं ब्रह्म प्रतिपिपादयिषति। किं तर्हि? प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति। तथा च शास्त्रम्–'यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्' (के.उ. २।३) 'न दृष्टेर्द्रष्टारं पश्येः' 'न विज्ञातेर्विज्ञातारं विजानीयाः' (बृ.उ. ३।४।२) इति चैवमादि। अतोऽविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः।

प्रकटार्थविवरणम्

सिध्यति, यदर्थोऽयमुद्यम इत्याह—**अविषयत्व इति**। परिहरति—**नेति**। कर्मत्वाभावमात्रेण नाप्रमाणकत्वम्, अनुमानादौ कर्मत्वाभावेऽपि तदनवभासमात्रव्यावर्तकत्वेन प्रामाण्योपलम्भात्। तथेहापि प्रतीच आत्मत्वेनाकर्मतया अहं ब्रह्मास्मीति प्रतिपादयत् शास्त्रमविद्याकल्पितवेद्यवेदनादिभेदविलापनेन प्रमाणं[1] भविष्यतीत्यर्थः। ब्रह्मणः स्वप्रकाशत्वात् प्रमातृव्यापाराधेय-प्रकाशातिशयवत्त्वं कर्मत्वं नास्तीत्यत्र प्रमाणमाह—**तथा च शास्त्रमिति**। यस्य ज्ञानिनो ब्रह्म अहमिति कर्तृत्वेनामतम्; ब्रह्मास्मीत्येवानुभवः तस्य मतं सम्यग्दर्शनम्। मतं कर्मतया यस्य, न वेद सः ऐक्ये कर्मत्वायोगात्। अविज्ञातम् अकर्मतया भवति तत्त्वं विजानताम्। विज्ञातमविदुषाम् इत्यनुवादः। तर्हि तवापि ध्वस्ताविद्यस्वरूपस्य शास्त्रेण सम्पाद्यत्वादनित्यत्वप्रसङ्ग इत्याशङ्क्याह—**अत इति**। यथा जलपात्रपातनेन तद्गतादित्यस्य स्वाभाविकी बिम्बात्मता समर्प्यते, तथा तत्त्वमस्यादिवाक्योत्थेन प्रमातृव्यापारेण ब्रह्मात्मैक्याकारेणाज्ञानध्वंसोचिता स्वाभाविकी ब्रह्मात्मता व्यवतिष्ठत इति नानित्यतादोषः। स्वपक्षेऽनित्यत्वदोषं

भाष्यभावप्रकाशिका

निवृत्तिपरत्वमेव प्रपञ्चयति—**न हीति**। अत्रैवार्थे श्रुतीरुदाहरति—**तथाच शास्त्रमिति**। एवं सत्यस्मन्मत एव ब्रह्मणः शास्त्रप्रमाणकत्वम्, मोक्षस्य च नित्यत्वमुपपन्नमिति। प्रकृतमुपसंहरति—**अतोऽविद्येति**।

न्यायनिर्णयः

शास्त्रोत्थज्ञानाविषयत्वे ब्रह्मणि तत्प्रामाण्यप्रतिज्ञाहानिरिति चोदयति—**अविषयत्व इति**। शास्त्रीयज्ञानाधीनस्फुरणवत्त्वरूप-कर्मत्वाभावेऽप्यविद्याध्वस्त्यतिशयवत्त्वाद् ब्रह्मणः शास्त्रीयत्वान्न प्रतिज्ञाहानिरित्याह—**नेति**। शास्त्रीयधीकृताविद्याध्वस्तिमत्त्वेन तत्कृतस्फुरणवत्त्वमपि घटादिवदित्याशङ्क्य तथैवेदंधीविषयत्वापत्तेर्मैवमित्याह—**न हीति**। तर्हीदंप्रत्ययाविषयत्वादविद्या-ध्वस्तिमत्त्वमपि शून्यवन्नास्तीति नास्य शास्त्रीयतेत्याशङ्क्य अहमादिसाक्षिमात्रत्वेन ब्रह्मास्मीति बुद्धावाविर्भावयदविद्यामपनयति शास्त्रमिति तत्प्रामाण्यमित्याह—**किं तर्हीति**। तथापि कथमद्वयं ब्रह्म प्रतिपाद्यं, वेद्यादिभेदादित्याशङ्क्याह—**वेद्येति**। तत्र श्रुतीरुदाहरति—**तथा चेति**। यस्य ब्रह्मामतमविषय इति निश्चयस्तस्य तन्मतं सम्यग्ज्ञातम्। यस्य तु मतं विषयतया ज्ञातं ब्रह्मेति धीर्नासौ तद्वेद, भेदधीमत्त्वात्। एवमेवेति नियमार्थमुक्तौ विद्वदविद्वत्पक्षावनुवदति—**अविज्ञातमिति**। विषयत्वेनाज्ञातमेव ब्रह्म सम्यग्जानतां, ज्ञातमेव विषयतया यथावदजानतामित्यर्थः। दृष्टेश्चक्षुर्जन्यायाः कर्मभूताया द्रष्टारं स्वभावभूतया नित्यदृष्ट्या व्याप्तारं दृश्यया तया दृष्ट्या न पश्येः, विज्ञातेर्बुद्धिधर्मस्य निश्चयस्य विज्ञातारं साक्षिणं तयैव वेद्यया विज्ञात्या न विजानीया इति श्रुत्यन्तरमाह—**न दृष्टेरिति**। आदिपदेन 'अदृश्येऽनात्म्ये' 'यत्तदद्रेश्यम्' इत्यादि गृहीतम्। ननु यद्यैक्यधीः शास्त्रोत्था स्फूर्तिमनुत्पाद्याविद्याबाधया तज्जं ज्ञात्राद्यपि बाधित्वा ब्रह्मात्मन्यमेये स्वाभाविकापरोक्षव्यञ्जनेन निवर्तकतया स्थितेति ब्रह्मणि शास्त्रं प्रमाणं, तर्हि ध्वस्ताविद्यातज्जब्रह्मरूपस्याऽऽगन्तुकत्वान्न तदाप्तेर्मुक्तेर्नित्यतेत्याशङ्क्याह—**अत इति**। शास्त्रोत्थज्ञानादिति यावत्।

---

१. कर्मत्वं फलव्याप्यत्वम्। फलं च विषयगतं वृत्त्यभिव्यक्तं ब्रह्मचैतन्यमेव। तथा चोक्तम्—"फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम्। ब्रह्मण्यज्ञाननाशार्थं वृत्तिव्याप्यत्वमिष्यते" इति।

यस्य तूत्पाद्यो मोक्षस्तस्य मानसं, वाचिकं, कायिकं वा कार्यमपेक्षत इति युक्तम्। तथा विकार्यत्वे च। तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम्। न हि दध्यादि विकार्यम्, उत्पाद्यं वा घटादि, नित्यं दृष्टं लोके। न चाप्यत्वेनापि कार्यापेक्षा, स्वात्मरूपत्वे सत्यनाप्यत्वात्। स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वं, सर्वगतत्वेन नित्याप्तस्वरूपत्वात् सर्वेण ब्रह्मणः, आकाशस्येव।

नापि संस्कार्यो मोक्षः, येन व्यापारमपेक्षेत। संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्याद् दोषापनयनेन वा। न तावद् गुणाधानेन संभवति; अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य। नापि दोषापनयनेन, नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य। स्वात्मधर्म एव संस्तिरोभूतो मोक्षः क्रिययाऽऽत्मनि

प्रकटार्थविवरणम्

परिहृत्य परपक्षे क्रियानुप्रवेशसंभवेऽप्यनित्यत्वं दुर्निवारमित्याह—**यस्य त्वित्यादिना**। तर्हि नित्यसिद्धस्यैव क्रिययाऽऽप्यत्वं भवतु अनित्यतापरिहारायेत्याशङ्क्याह—**न चाप्यत्वेनापीति**। तत् किं जीवस्य स्वरूपम्, उत व्यतिरिक्तम्? उभयथाऽपि क्रियया नाप्यत्वमित्यर्थः। इदानीं संस्कारद्वारेण क्रियानुप्रवेशं वारयति—**नापीत्यादिना**। यथाऽऽदर्शस्य स्वतो भास्वरत्वेऽपि परोपाधिकं मलिनत्वं तथा स्वतः शुद्धस्वभावत्वेऽपि परोपाधिकमलिनत्वसंभवात् मलापकर्षः संभाव्यत इत्याह—**स्वात्मधर्म एव सन्निति**।

भाष्यभावप्रकाशिका

अविद्यानिवृत्तिलक्षणं मोक्षं विना क्रियासाध्यो मोक्ष इत्यभ्युपगच्छतः क्रियायास्तत्र फलाभावादन्वयो न संभवतीत्येतदाह—**यस्य त्विति**। तर्हि क्रियानुप्रवेशायोगादुत्पाद्यत्वं विकार्यत्वं वा मोक्षस्य गमिष्यतीत्यत आह—**तयोः पक्षयोरिति**। दृष्टान्तमाह—**न हीति**।अथानित्यत्वपरिहाराय पूर्वसिद्धस्यैव ब्रह्मणः प्राप्यत्वं ग्रामादेरिव स्यादित्याशङ्क्याह—**न चेति**। तत्र वक्तव्यम्—किं ब्रह्म प्रत्यगात्मभूतम्? अन्यद्वा? आद्यपक्षे दूषणमाह—**स्वात्मेति**। द्वितीये सर्वगतम्? परिच्छिन्नं वा? इति विकल्प्य, सर्वगतत्वपक्षे तत्प्राप्तिः संयोगः? तादात्म्यं वा? इति पुनर्विकल्प्य, संयोगपक्षे दूषणमाह—**सर्वगतत्वेनेति**। तादात्म्यपक्षस्तु बहिरेव दूषणीयः। स्थितस्य नष्टस्य वाऽन्यस्यान्यतादात्म्यं न संभवति, इत्यविकृतप्रदेशप्रतिपत्तितयाऽपरिच्छिन्नत्वेऽपि ब्रह्मणः संयोगलक्षणं चेत्, तर्हि तत्प्राप्तेरनित्यत्वमित्यत आह—**नापीति**।

संस्कारस्यासंभवं दर्शयितुं तस्य द्वैविध्यमाह—**संस्कारो हीति**। इह द्विविधोऽपि संस्कारो न संभवतीत्याह—**न तावदिति**। ननु यद्यप्यागन्तुको गुणो दोषो वा न संभवति, तथाऽपि स्वाभाविकाविद्यादोषापनयो भविष्यतीति शङ्कते—**स्वात्मेति**।

न्यायनिर्णयः

स्वपक्षे ब्रह्मणः शास्त्रीयत्वं, मोक्षस्य नित्यत्वं चोक्त्वा परपक्षे तदनित्यत्वं वक्तुं तस्योत्पाद्यत्वं, विकार्यत्वं, प्राप्यत्वं, संस्कार्यत्वं वेति विकल्प्य कल्पद्वये कार्यानुप्रवेशमङ्गीकरोति—**यस्येति**। **तथेति**। मुक्तेर्विकार्यत्वे सत्युत्पाद्यत्ववत् कार्यापेक्षा युक्तेत्यर्थः। तर्हि कार्यानुप्रवेशायन्यतरपरिग्रहः स्यादित्याशङ्क्याह—**तयोरिति**। तदेव व्यतिरेकेण व्यनक्ति—**न हीति**। अनित्यत्वनिवृत्तये पूर्वसिद्धस्यैव ब्रह्मणो ग्रामादिवदाप्यतेति तृतीयमाशङ्क्याह—**न चेति**। ब्रह्म प्रत्यगन्यद् वा? प्रथमं प्रत्याह—**स्वात्मेति**। द्वितीयेऽपि ब्रह्म सर्वगतं परिच्छिन्नं वा? सर्वगतत्वेऽपि तत्प्राप्तिः संयोगस्तादात्म्यं वा? तत्राद्यं दूषयति—**स्वरूपेति**। तादात्म्यपक्षस्तु स्थितस्य नष्टस्य वाऽन्यस्यान्यत्वायोगादुपेक्षितः। अविकृतदेशतया परिच्छिन्नत्वेऽपि ब्रह्मणः संयोगाख्या तत्प्राप्तिरनित्यत्वादयुक्ता। तादात्म्यं तूक्तन्यायनिरस्तम्।

पक्षान्तरं निराह—**नापीति**। तदभावं वक्तुं संस्कारद्वैविध्यमाह—**संस्कारो हीति**। प्रकारप्रकारिप्रसिद्ध्यर्थौ निपातौ। गुणाधानेन मुक्तेर्न संस्कार्यतेत्याह—**नेति**। दोषनिरासेनापि न तस्याः संस्कार्यतेत्याह—**नापीति**। आगन्तुकगुणदोषयोरभावेऽपि नैसर्गिकाविद्यादोषात् तन्निवृत्त्या मुक्तेः संस्कार्यतेति शङ्कते—**स्वात्मेति**। वस्तुतः स्वात्मैव प्रतीत्या धर्मः सन्निति यावत्।

संस्क्रियमाणेऽभिव्यज्यते, यथाऽऽदर्शे निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वं धर्म इति चेन्न, क्रियाश्रयत्वानुपपत्तेरात्मनः। यदाश्रया क्रिया तमविकुर्वती नैवात्मानं लभते। यद्यात्मा क्रियया विक्रियेतानित्यत्वमात्मनः प्रसज्येत। 'अविकार्योऽयमुच्यते' (भ.गी. २।२५) इति चैवमादीनि वाक्यानि बाध्येरन्। तच्चानिष्टम्। तस्मान्न स्वाश्रया क्रियाऽऽत्मनः संभवति। अन्याश्रयायास्तु क्रियाया अविषयत्वान्न तयाऽऽत्मा संस्क्रियते।

ननु देहाश्रयया स्नानाचमनयज्ञोपवीतादिकया क्रियया देही संस्क्रियमाणो दृष्टः। न; देहादिसंहतस्यैवाविद्यागृहीतस्यात्मनः संस्क्रियमाणत्वात्। प्रत्यक्षं हि स्नानाचमनादेर्देहसमवायित्वम्। तया

प्रकटार्थविवरणम्

किमसौ मलस्तात्त्विकोऽतात्त्विको वा; यद्यतात्त्विकः, तर्हि ज्ञानमात्रापोद्यत्वात् न नियोगापेक्षा। यदि तात्त्विकः, तात्त्विक्यैव तर्हि क्रियया तन्निवृत्तिस्तात्त्विकी वाच्या। सा च तात्त्विकी क्रिया किमात्माश्रया उतान्याश्रया? नाद्य इत्याह—**न क्रियाश्रयत्वेति**। तदेव कथमित्यत आह—**यदाश्रयेति**। द्वितीयं दूषयति—**अन्याश्रयायास्त्विति**। क्रियावद्द्रव्यसंयोग्येव दर्पणाद्यन्योन्या[द्यन्या] श्रयक्रियया संस्क्रियते। न चात्मनो निरंशस्य क्रियावद्द्रव्यैः संस्पर्शोऽस्ति, नभोवत्। अतोऽसंस्कार्य इत्यर्थः। जाह्नवीजलाप्लवनादिना शुद्धोऽभूवमित्यादिप्रत्ययविरोधमाह—**ननु देहाश्रययेति**। न तत्राप्यन्याश्रयक्रिययाऽऽत्मनः परमार्थतः संस्क्रियमाणत्वं, किंतूदकचलनेन प्रतिबिम्बचलनवत् अविद्याप्रतिबिम्बितस्य चिद्धातोः [1]तदुत्थदेहादिसंसृष्टस्यानिर्वाच्यमेव तत्संस्कारेण संस्क्रियमाणत्वमित्याह—**न; देहादिसंहतस्यैवेति**। कश्चिदित्यनिर्धारितविशेषरूपः। परलोकफलभोक्ता

भाष्यभावप्रकाशिका

स्वाभाविकस्यापि तस्य क्रियाभिव्यक्तौ दृष्टान्तमाह—**यथेति**। किं स्वाश्रयक्रियया संस्कारः? किं वाऽन्याश्रययेति विकल्प्य, न तावदाद्यः; निरवयवस्य सर्वगतस्य च ब्रह्मणः परिणामपरिस्पन्दयोरसंभवादित्याह—**तच्चेति**। भवतु तर्ह्यन्तःकरणाश्रयया संस्कार इति, तत्राह—**अन्येति**। स्वाश्रयद्रव्येण संयुक्ते क्रियया संस्कार्यत्वम्, अतोऽन्याश्रयक्रियाया अतिशयाधायकत्वाद् न ब्रह्मणस्संस्कार्यकर्मत्वम्; ब्रह्मणस्तत्संयोगायोगादिति भावः। अत्र व्यभिचारं चोदयति—**नन्विति**। परिहरति—**न देहेति**।

न्यायनिर्णयः

स्वाभाविकस्यापि तिरस्कृतस्य क्रियातोऽभिव्यक्तौ दृष्टान्तमाह—**यथेति**। किमात्मा स्वाश्रयक्रियया दोषापनुत्त्या संस्क्रियते, किं वाऽन्याश्रयक्रिययेति विकल्प्याद्यं निरस्यति—**नेति**। आत्मनोऽसङ्गत्वान्न क्रियाश्रयत्वयोग्यतेत्ययुक्तं, क्रियावत्त्वमिच्छतां तद्योग्यत्वादित्याशङ्क्याह—**यदाश्रयेति**। आत्मनोऽपि विकारित्वमाशङ्क्याह—**यदीति**। न केवलमात्मनो विकारित्वे युक्तिविरोधः, अपि त्वागमविरोधोऽपीत्याह—**अविकार्य इति**। 'निष्कलं निष्क्रियम्' इत्यादिश्रुतिसमुच्चयार्थश्चकारः। 'न जायते म्रियते वा' इत्यादिश्रुतिस्मृतिसंग्रहार्थमादिपदम्। **तच्चेति**। आगमबाधनमनिष्टम्। वैदिकानामिति शेषः। आद्यपक्षायोगं निगमयति—**तस्मान्नेति**। द्वितीयं निराह—**अन्येति**। क्रियायाः स्वाश्रये तद्युक्ते वाऽतिशयहेतुत्वात्, असङ्गस्यात्मनस्तदाश्रयबुद्ध्याद्यसंबन्धात्, न तन्निष्ठा क्रिया संस्कारमात्मन्याधातुमलमित्यर्थः।

नान्याश्रया क्रियाऽन्यं संस्करोतीत्यत्र व्यभिचारं शङ्कते—**नन्विति**। आदिपदं संध्यावन्दनादिसंग्रहार्थम्। आत्मनो देहाद्यतिरिक्तस्यापि देहादिष्वविद्ययाऽध्यासात् तदभिन्नस्यैव तत्क्रियया संस्कार्यत्वान्न व्यभिचार इत्याह—**न; देहेति। अविद्यागृहीतस्येति**। अविद्यया मनुष्योऽहमिति मिथ्याज्ञानदृष्टस्येत्यर्थः। देहाश्रयक्रियया देहसंहतस्य तदभिन्नस्यात्मनः

१. तदुत्थेति। अविद्याजन्येत्यर्थः।

देहाश्रयया तत्संहत एव कश्चिदविद्ययाऽऽत्मत्वेन परिगृहीतः संस्क्रियत इति युक्तम्। यथा देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलम्, 'अहमरोग' इति यत्र बुद्धिरुत्पद्यते; एवं स्नानाचमनयज्ञोपवीतादिना 'अहं शुद्धः, संस्कृत' इति यत्र बुद्धिरुत्पद्यते स संस्क्रियते। स च देहेन संहत एव। तेनैव ह्यहंकर्त्राऽहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते। तत्फलं च स एवाश्नाति, 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' (मु.उ. ३।१।१) इति मन्त्रवर्णात्, 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (क.उ. १।३।४) इति च। तथा च 'एको देवः सर्वभूतेषु गूढः

प्रकटार्थविवरणम्

कश्चिदस्तीत्येवं प्रतिपन्न इत्यर्थः। **अविद्ययेति**। वेदान्तार्थानभिज्ञतया[1]। **आत्मत्वेनेति**।ब्रह्मत्वेन परिगृहीतो **मीमांसकैः**—अहंप्रत्ययावसेय एव जीवो ब्रह्मशब्दाभिधेयः; तस्यालौकिकं बिम्बस्थानीयं ब्रह्मरूपं नास्तीत्येवं मन्यमानैरित्यर्थः। पिप्पलं कर्मफलम्; स्वादु मृष्टम्; अत्ति भक्षयतीत्यर्थः। आत्मेन्द्रियमनोयुक्तं देहेन्द्रयमनस्संबद्धं जीवं भोक्तेत्याहुः। एवं तावत् सोपाधिकस्य चिद्धातोर्मिथ्यासंस्कार्यत्वमुपपाद्य निरुपाधिकस्यासंस्कार्यत्वे प्रमाणमाह—**तथैको देव इत्यादिना**। एको देवश्चिदेकरसः सर्वभूतेषु

भाष्यभावप्रकाशिका

देहादिव्यतिरिक्तस्यात्मनोऽविद्यया देहादिष्वध्यासात् तदभिन्नस्यैव तद्गतक्रियया संस्कार्यत्वम्, अतो न व्यभिचार इत्यर्थः। (देहाश्रयक्रियया नान्यस्य संस्कार्यत्वम्, अतो न व्यभिचार इत्यर्थः।) देहाश्रयक्रियया तत्संहत एव परमार्थतोऽनात्माऽविद्ययाऽऽत्मत्वेन गृहीतः संस्क्रियते, नासंहत आत्मेत्युक्तम्।

इदानीं देहाश्रयैव क्रिया नासंहतात्माश्रयेत्यत्र प्रमाणमाह—**प्रत्यक्षं हीति**। उक्तमर्थं दृष्टान्तेनोपपादयितुमनुवदति—**तथेति**। दृष्टान्तमाह—**यथेति**। आरोग्यमप्यसंहतात्माश्रयं किं न स्यादित्याशङ्क्याह—**अहं शुद्ध इति**। कथं तर्हि स्नानादीनां कर्तृसंस्कारप्रसिद्धिरित्याशङ्क्य तथाभूतस्यैव कर्तृत्वादित्याह—**तेनैव हीति**।

ननु भोक्तुरात्मन एव कर्तृत्वम्; अकर्तुरभोगादित्याशङ्क्य, भोक्ताऽपि स एवेत्याह—**फलमिति**। असंहतस्याभोक्तृत्वे प्रमाणमाह—**तयोरन्य इति**। इदानीं संहतस्य भोक्तृत्वे प्रमाणमाह—**आत्मेन्द्रियेति**। अत्रात्मेति देह उच्यते। निर्गुणत्वान्निर्दोषत्वाच्च चतुर्विधोऽपि संस्कारोऽनुपपन्न इत्युक्तम्। इदानीं गुण-दोषयोरभावपरौ मन्त्रौ पठति—**एको देव इति**। स पर्यगात्=परितोऽगात्

न्यायनिर्णयः

संस्क्रियमाणत्वमुक्त्वा स्नानाचमनादिक्रियाया देहाश्रयत्वे मानमाह—**प्रत्यक्षं हीति**। असंहतात्मस्थक्रियया तस्यैव संस्कार्यत्वं किं न स्यादित्याशङ्क्याध्यक्षविरोधमाह—**तयेति** कश्चिदित्यनिर्धारितविशेषमामुष्मिकफलोपभोगशक्तमस्तीत्येवं प्रतिपन्नं निर्दिशति। दृष्टान्तेनोक्तं स्पष्टयति—**यथेत्यादिना**। देहसंहतिफलं तदभिमानिन इत्युक्तम्, आरोग्यमपि कस्मादसंहतात्मगतं न स्यादित्याशङ्क्यानुभवविरोधादित्याह—**अहमिति**। संस्कारफलं शुद्ध इत्युक्तम्। आत्मनो यथोक्तबुद्धिमतोऽसंहतत्वमनुभवेन वारयति—**स चेति**। कथं तर्हि स्नानादीनां कर्तृसंस्कारत्वप्रसिद्धिरित्याशङ्क्य संहतस्यैव कर्तृत्वादित्याह—**तेनेति**। प्रयतेऽहमिति कर्तृत्वमनुभवितुरपि तुल्यमित्याशङ्क्याह—**अहंप्रत्ययेति**। अनुभवितुर्नित्यप्रकाशस्य न तद्विषयतेत्यर्थः। न केवलमस्याहंधीमात्रे कर्तृत्वं, किंतु धीमात्र इत्याह—**प्रत्ययिनेति**। आत्मनो भोक्तुरेव कर्तृत्वमकर्तुर्भोगाभावादित्याशङ्क्याह—**तत्फलं चेति**। संहतस्य भोक्तृत्वे मानमाह—**तयोरिति**। जीवपरयोर्मध्ये जीवो नानारसं कर्मफलं भुङ्क्ते। असंहतस्याभोक्तृत्वे मानम्—**अनश्नन्निति**। परमात्मा स्वयमभुञ्जान एव पश्यन् वर्तते। संहतस्य भोक्तृत्वे वाक्यान्तरमाह—**आत्मेति**। आत्मीयं शरीरमात्मा। देहादिसंयुक्तमात्मानमित्यर्थः। यद्वाऽऽत्मा भोक्तेत्याहुरिति संबन्धः। इन्द्रियेत्यादि क्रियाविशेषणम्। निर्गुणत्वान्निर्दोषत्वाच्च ब्रह्मात्मनि द्विधाऽपि संस्कारो नेत्युक्तम्। इदानीं तस्मिन् गुणदोषयोरभावे मानमाह—**तथा चेति**। मूर्तित्रयात्मना भेदं प्रत्याह—**एक इति**। यथाऽऽहुः—'हरिर्ब्रह्मा पिनाकीति बहुधैकोऽपि गीयते' इति। अखण्डजाड्यं व्यावर्तयति—**देव इति**।

१. इदं च भाष्यार्थकथनमितरव्याख्यानविलक्षणम्।

सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' (श्वे.उ. ६।११) इति, 'स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्' (ई.उ. ८) इति च एतौ मन्त्रावनाधेयातिशयतां नित्यशुद्धतां च ब्रह्मणो दर्शयतः। ब्रह्मभावश्च मोक्षः। तस्मान्न संस्कार्योऽपि मोक्षः। अतोऽन्यन्मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनचिद् दर्शयितुम्। तस्माज्ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते।

प्रकटार्थविवरणम्

गूढ प्रतिबिम्बित इत्यर्थः। मायाप्रतिबिम्बिततत्वेन च कर्मफलदातृत्वं[दाता]पृथिव्यादिभूतानामुपादानं साक्षी च भवति। स एवाज्ञानप्रतिबिम्बिततया चेता द्रष्टा जीवः। स्वतः पुनः केवलोऽविद्यातत्कार्यासंस्पृष्टः निर्गुणः नाधेयातिशय इत्यर्थः। स आत्मा परि समन्तात् अगात् सर्वगत इत्यर्थः। शुक्रं दीप्यमानकायं लिङ्गरहितः। अव्रणमस्नाविरमित्याभ्यां स्थूलदेहप्रतिषेधः। अस्नाविरमिति[२] सिरारहितः। सर्वत्र पुँल्लिङ्गतया परिणामः। ननूक्तनीत्या संस्कारकतया नोपयोगश्चेत्, तर्हि ज्ञानेतिकर्तव्यतयोपयोक्ष्यते कर्मेत्याशङ्क्याह—**अतोऽन्यदिति**। चतुर्विधक्रियाफलव्यतिरेकेण ज्ञानेतिकर्तव्यत्वे कर्मणो न प्रमाणमिति वक्ष्यामः। तस्मात् इत्युपसंहारः।

भाष्यभावप्रकाशिका

सर्वत्र व्याप्त इत्यर्थः। शुक्रम्=दीप्तिमत्। अकायमिति। सूक्ष्मशरीररहितमित्यर्थः। अव्रणमस्नाविरमिति—द्वाभ्यां प्राणवतःसिराबहुलस्थूलशरीरस्य निषेधः। अत्र च शुक्रमकायमित्यादि प्रथमार्थे द्वितीया; "स पर्यगादि"ति पुंलिङ्गेनोपक्रम्य "कविर्मनीषी"त्यादिपुंलिङ्गेनोपसंहारात्। अव्रणम्=दुःखरहितम्। अस्नाविरम्=अविगलितम्; अविनाशीति वाऽर्थः। भवत्वेवंविधत्वं ब्रह्मणः, मोक्षस्य किमायातमिति? अत आह—**ब्रह्मेति**। ननु मा भूदुत्पत्त्यादिचतुर्विधकर्मफलान्तर्भावो मोक्षस्य, प्रकारान्तरेण तु कर्मसाध्यता स्यादित्यत आह—**अतोऽन्यदिति**। तथाविधस्य क्रियाफलस्य लोक-वेदयोरदृष्टत्वादित्यर्थः। ननु तर्हि मोक्षे क्रियानुप्रवेशाभावे तदर्थाः प्रवृत्तयोऽनर्थिकाः स्युरित्याशङ्क्योपसंहारांयाजेन परिहरति—**तस्माद् ज्ञानमेकमिति**।

न्यायनिर्णयः

आदित्यादिवैषम्यमाह—**सर्वेति**। तर्हि किमिति सर्वेषां न भाति, तत्राह—**गूढ इति**। तर्हि तत्तद्भूतावच्छिन्नत्वेन परिच्छिन्नत्वं, नेत्याह—**सर्वव्यापीति**। नभोवत् ताटस्थ्यं वारयति—**सर्वभूतेति**। सर्वेषु भूतेष्वन्तःस्थितस्य तत्तत्क्रियाकर्तृत्वं शङ्कित्वोक्तम्—**कर्मेति**। सर्वभूतेष्वित्यादिना भूतानां पृथगुक्तेः सद्वितीयत्वं, तत्राह—**सर्वेति**। सर्वेषां भूतानामधिवासोऽधिष्ठानम्। न च कल्पितमधिष्ठानादर्थान्तरमित्यर्थः। न परं कर्मणामेवाध्यक्षोऽपि तु तद्वतामपीत्याह—**साक्षीति**। तत्र चैतन्यस्वाभाव्यं हेतुमाह—**चेतेति**। केवलो दृश्यवर्जितोऽद्वितीयः। निर्गुणो ज्ञानादिगुणरहितः। चकारो दोषाभावसमुच्चयार्थः। ब्रह्मात्मनि गुणदोषाभावे मन्त्रान्तरमाह—**स इति**। स प्रकृतः 'यस्तु सर्वाणि भूतानि' इत्यादावात्मा परितः समन्तादगात् सर्वगतः। शुक्रमित्यादिशब्दाः पुंलिङ्गत्वेन नेयाः, 'स' इत्युपक्रमात्, 'कविर्मनीषी' इत्यादिना च पुंलिङ्गत्वेनोपसंहारात्। शुक्रो दीप्तिमान्, अकायो लिङ्गदेहहीनः, अव्रणोऽक्षतोऽस्राविरः शिरारहितस्ताभ्यां स्थूलदेहासत्त्वमुक्तम्। शुद्धो रागादिशून्यः। अपापविद्धो धर्माधर्मविधुरः। मन्त्रयोस्तात्पर्यमाह—**एताविति**। तथापि मोक्षस्य किमायातं, तदाह—**ब्रह्मेति**। मुक्तिब्रह्मणोरैक्यात्तत्र दोषाद्यभावात्र तस्याः संस्कार्यतेत्युपसंहरति—**तस्मादिति**। उत्पाद्यादिदृष्टान्तार्थोऽपिशब्दः। मुक्तेरुत्पत्त्यादिचतुष्टयं क्रियानुप्रवेशद्वारं मा भूत्, पञ्चमं तु किंचिद्भविष्यति नियमाभावात्, नेत्याह—**अत इति**। उत्पत्त्यादिचतुष्टयमतःशब्दार्थः। तस्यालोकवेदप्रसिद्धत्वादित्यर्थः। मोक्षे क्रियाया अननुप्रवेशे तदर्थप्रवृत्त्यानर्थक्यमित्याशङ्क्य ज्ञानार्थत्वान्मैवमित्याह—**तस्मादिति**। क्रियानुप्रवेशद्वाराभावस्तच्छब्दार्थः। उपास्तेरपि मोक्षे साक्षात्प्रवेशो नेति वक्तुं गन्धमात्रस्येत्युक्तम्। बाह्यक्रियायास्तत्राप्रवेशे कैमुतिकन्यायार्थोऽपिशब्दः।

---

१. 'शुक्रं दीप्यमानः, अकायं लिङ्गरहितः' इति पाठः स्यात्।

२. अस्नाविरम्=अविनाशीति भामती।

ननु ज्ञानं नाम मानसी क्रिया। न; वैलक्षण्यात्। क्रिया हि नाम सा यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते, पुरुषचित्तव्यापाराधीना च। यथा 'यस्यै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेद् वषट्करिष्यन्' इति 'संध्यां मनसा ध्यायेत्' (ऐ.ब्रा. ३।८।१) इति चैवमादिषु। ध्यानं चिन्तनं यद्यपि मानसम्, तथापि पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यम्, पुरुषतन्त्रत्वात्। ज्ञानं तु प्रमाणजन्यम्। प्रमाणं च यथाभूतवस्तुविषयम्। अतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यम्। केवलं वस्तुतन्त्रमेव तत्; न चोदनातन्त्रम्; नापि पुरुषतन्त्रम्। तस्मान्मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यम्। यथा च 'पुरुषो वाव गौतमाग्निः;' 'योषा वाव गौतमाग्निः' (छा.उ. ५।७,८।१) इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति। केवलचोदनाजन्यत्वात् क्रियैव सा पुरुषतन्त्रा च। या तु प्रसिद्धेऽग्नावग्निबुद्धिर्न सा चोदनातन्त्रा; नापि पुरुषतन्त्रा। किं तर्हि?

प्रकटार्थविवरणम्

ज्ञानस्यानुप्रवेशमङ्गीकुर्वता क्रियाया अनुप्रवेशोऽङ्गीकृत एवेत्याह—**ननु ज्ञानमिति**। क्रियात्वमसिद्धमित्याह—**नेति**। क्रिया हि नाम सा यत्र पुरुषश्चोद्यते, वस्तुस्वरूपापेक्षा च न भवति, पुरुषेच्छावचननिष्पाद्या च; तत्रैवोदाहरणमाह—**यथेति**। ध्याने विधिना प्रेर्यते पुरुषः, तच्च न वस्तुसापेक्षं, समारोपितरूपेणापि ध्यानदर्शनात्, पुरुषेच्छासंपाद्यं चेति। क्रियास्वरूपमुक्त्वाऽधुना तद्विलक्षण[णं]ज्ञानस्वरूपमित्याह—**ज्ञानं त्विति**। किञ्च न वस्तुनिश्चयहेतुः क्रिया; ज्ञानं तु यथास्थितवस्तुनिश्चायकमित्यपरं वैलक्षण्यमाह—**यथा चेत्यादिना**। प्रकृते योजयति—**तत्रैवं सतीति**। उक्तप्रकारेण क्रियावैलक्षण्यमात्रेण न ज्ञाने चोदना निवारयितुं

भाष्यभावप्रकाशिका

मानसमिति। मानसक्रियात्वेनाविशेषेऽपि ज्ञान-ध्यानयोर्गो-बलीवर्दन्यायेन भेद इत्यभिप्रायः। अत्रोदाहरणमाह—**यथेति**। अत्र पूर्वोदाहरणे देवताया वस्तुनोऽवगतिमात्रम्, योषिद्दृष्टौ तु वस्तुनो विपर्यय इति विशेषः। अत एव मानसत्वेऽपि न ज्ञानत्वमित्याह—**केवलेति**। क्रियैवेत्येवकारेण वस्तुतन्त्रत्वं निराकरोति। ज्ञानं पुनरनेवंभूतमित्याह—**या तु प्रसिद्ध इति। किं तर्हीति**। अतो वैलक्षण्यं युक्तमित्याह—**इति ज्ञानमेवैतद् न क्रियेति**। ननु भवत्वेवं प्रत्यक्षज्ञाने शब्दादिजन्यत्वाभावाद् वस्तुतन्त्रता, नैवं शब्दजन्यज्ञाने; ततश्चोदनादिजन्यत्वमित्याशङ्क्य तत्रापि विध्यधीनपुरुषेच्छा-प्रयत्ननिरपेक्षमेव लिङ्गादिजन्यं ज्ञानमित्याह—

न्यायनिर्णयः

मोक्षे ज्ञानप्रवेशे तस्य क्रियात्वादस्त्येव तत्प्रवेशस्तत्रेति शङ्कते—**नन्विति**। तस्य मानसव्यापारत्वेऽपि न वैधक्रियात्वम्। ततो जन्यफलादजन्यफलत्वेन विशेषादित्याह—**नेति**। वैधक्रिया यत्नेच्छासाध्या, ज्ञानं न तथेत्यपरं विशेषमाह—**क्रिया हीति**। यत्र विषये या वस्त्वनपेक्षा चोद्यते तत्र सा क्रिया हि नामेति योजना। क्रियातद्धर्मप्रसिद्धार्थौ [प्रसिद्ध्यर्थौ] निपातौ। वस्तु चेन्न कारणं किं तर्हि तथा? तदाह—**पुरुषेति**। वस्त्वनपेक्षा पुंस्तन्त्रा च क्रियेत्यत्र दृष्टान्तद्वयमाह—**यथेति**। गृहीतमध्वर्युणेति शेषः। वषट्करिष्यन्निति होतोक्तः। संध्यां तदभिमानिनीं देवतामित्यर्थः। 'नाम ब्रह्मेत्युपासीत' इत्यादि ग्रहीतुमादिपदम्। एवमादिषु वाक्येषु वस्त्वनपेक्षं पुंस्तन्त्रं च ध्यानं विधीयते तथा क्रियान्तरमपीत्यर्थः। ननु मानसत्वाविशेषाद् ध्यानमपि ज्ञानमेवेति नास्य क्रियादृष्टान्तत्वम्, तत्राह—**ध्यानमिति**। ज्ञानस्यापि तुल्यं पुंस्तन्त्रत्वं तदाश्रयत्वात्,तत्राह—**ज्ञानं त्विति**। प्रमाणद्वारा तस्य पुंस्तन्त्रत्वमाशङ्क्याह—**प्रमाणं चेति**। ज्ञानस्यापुंस्तन्त्रत्वे फलितमाह—**अत इति**। तर्हि ज्ञानस्य नित्यत्वं, नेत्याह—**केवलमिति**। विशेषणकृत्यमाह—**नेति**। एवकारव्यावर्त्यमाह—**नापीति**। ज्ञानध्यानयोर्मानसक्रियात्वेऽपि गोबलीवर्दवद्भेदं मत्वा वैशेष्यं निगमयति—**तस्मादिति**। तच्छब्दार्थोऽपुंस्तन्त्रत्वम्। ध्यानस्य वस्त्वनपेक्षत्वे दृष्टान्तावुक्त्वा तस्य तद्विरोधित्वे दृष्टान्तावाचष्टे—**यथा चेति**। साऽपि धीर्मानसत्वाज्ज्ञानमेवेत्याशङ्क्याह—**केवलेति**। न ज्ञानमिति तुशब्दार्थः। वस्त्वनधीनत्वं कैवल्यम्।

प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेवैतन्न क्रिया। एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम्। तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम्। तद्विषये लिङादयः श्रूयमाणा अप्यनियोज्यविषयत्वात् कुण्ठीभवन्त्युपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत्, अहेयानुपादेयवस्तुविषयत्वात्।

किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादीनि विधिच्छायानि वचनानि? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः। यो हि बहिर्मुखः प्रवर्तते पुरुषः-इष्टं मे भूयादनिष्टं मा भूदिति, न च तत्रात्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरण-

प्रकटार्थविवरणम्

शक्या, लिङादिनां श्रवणादित्याशङ्क्याह—**तद्विषय इति**। तस्मिन् ज्ञानलक्षणे विषये लिङादयः श्रूयमाणा अपि कुण्ठीभवन्ति, पुरुषं प्रेरयितुं न शक्नुवन्ति, ज्ञानस्य पुरुषेच्छानधीनविषयत्वादित्यर्थः। नापि ज्ञानस्य विषये पुरुषः प्रेरयितुं शक्य इत्याह—**अहेयेति**। यदि पाषाणादिप्रयुक्तक्षुरतैक्ष्ण्यादिवज्ज्ञाने तद्विषये वा कुण्ठीभावः, तर्हि वाक्यानां कोऽर्थ इत्याह—**किमर्थानीति**। 'आत्मा द्रष्टव्यः' इत्यात्मदर्शनोन्मुखं चेतःकार्यम्; नानात्माभिनिवेशः कार्य इत्येव वाक्यार्थ इत्याह—**स्वाभाविकेति**। ननु

भाष्यभावप्रकाशिका

एवं सर्वेति। दार्ष्टान्तिकं निगमयति—**तत्रैवमिति**। ननु "आत्मा वा अरे द्रष्टव्यः" इत्यादिविधिश्रवणाद् विधेयेनात्र भवितव्यम्; श्रूयमाणस्य विधेस्तर्केण निराकरणायोगादिति, तत्राह—**तद्विषय इति**। **कुण्ठीभवन्तीति**। "विष्णुरुपांशु यष्टव्यः" इत्यादिवत् स्तुत्यर्थवादतयाऽवतिष्ठन्त इत्यर्थः।

ननु अनुष्ठेयाभावाद्विधेरभावे स्तुतेरप्यसंभवाद्विधिशब्दवैयर्थ्यं स्यादिति शङ्कते—**किमर्थानीति**। उत्तरमाह—**स्वाभाविकेति**। एतदेव प्रपञ्चयति—**यो हीति**। इष्टानिष्टप्राप्तिपरिहारार्थं प्रवृत्तिनिरोधकत्वे तेषामनर्थकरत्वं स्यादित्याशङ्क्याह—**न च तत्रेति**। सर्वानपि पुरुषान् किमिति न प्रवर्तयतीति? तत्राह—**तमात्यन्तिकेति**। स्रोतस्तया=आभिमुख्येन। तदेवं

न्यायनिर्णयः

एवकारोऽयोगव्यवच्छेदकः। उक्तबुद्धेरुक्तक्रियात्वनियमे हेत्वन्तरमाह—**पुरुषेति**। यथैतौ दृष्टान्तौ तथा क्रियान्तरमपीति यथाशब्दो नेयः। ज्ञानमपि योषिदादावग्निधीतुल्यमिति, नेत्याह—**या त्विति**। तस्यास्तर्हि किं कारणं, तदाह—**किं तर्हीति**। प्रकृतदृष्टान्तमपेक्ष्य प्रत्यक्षविषयपदम्। तेन युक्तमेव वैषम्यं वैधक्रियाधियोरित्याह—**इति ज्ञानमिति**। अध्यक्षधियोऽर्थजन्यतया तत्तन्त्रत्वेऽपि शब्दाद्यर्थधियस्तदभावाच्चोदनादिजन्यतेत्याशङ्क्याह—**एवमिति**। अनुमानादावर्थाजन्यत्वेऽपि लिङ्गादिजन्यत्वान्न चोदनाद्यपेक्षेति भावः। लौकिकधियश्चोदनाद्यनपेक्षत्वेऽपि ब्रह्मधीरलौकिकत्वात् तदपेक्षत इत्याशङ्क्य दार्ष्टान्तिकं निगमयति—**तत्रेति**। पर्वोक्तरीत्या सम्यग्ज्ञाने वस्तुमात्रतन्त्रे सतीति यावत्। यथाभूतत्वं सदैकरूप्यम्। वैधक्रियातो वैशेष्योक्त्या ज्ञानस्याविधेयत्वमुक्तम्। तत्र [तन्त्र;] ज्ञाने लिङादिश्रुत्या दृष्टविधेस्तर्कानिरस्यत्वादित्याशङ्क्याह—**तद्विषय इति**। तदेव ज्ञानं विषयः। तत्र यद्यपि लिङादयः श्रुतास्तथापि स्तुत्यर्थवादतया 'विष्णुरुपांशु यष्टव्यः' इत्यादिवदवतिष्ठन्ते। अनियोज्यमपुंस्तन्त्रतया नियोगानर्हं नियोज्येन वा हीनं ज्ञानम्, तद्विषयत्वात्तेषामविधायकत्वादित्यर्थः। कुण्ठीभावे दृष्टान्तमाह—**उपलादिष्विति**। विधेयज्ञानस्य कर्मणि ब्रह्मण्यतिशयाजनकत्वाच्च न विधेयतेत्याह—**अहेयेति**।

अनुष्ठेयानुष्ठात्रोरभावाद् विध्यभावे स्तुतेरपि तदपेक्षत्वेनासंभवाद्विधिशब्दवैयर्थ्यमिति शङ्कते—**किमर्थानीति**। यो द्रष्टव्यः स आत्मैवेति तत्त्वप्रतिपादकानि तानीत्याशङ्क्याह—**विधीति**। तेषामर्थवत्त्वं ब्रुवाणः समाधत्ते—**स्वाभाविकेति**। संगृहीतं विभजते—**यो हीति**। बाहिर्मुख्यं शब्दादिप्रवणत्वम्। पुमर्थमुद्दिश्य प्रवृत्तेः श्रुत्या किमिति परावर्त्यते, श्रुतेरनर्थकरत्वापातात् तत्राह—**न चेति**। बाह्योऽर्थः सप्तम्यर्थः। किमिति तर्हि श्रुतिः सर्वानपि पुरुषान्नानुसरति, तत्राह—**तमिति**। अग्नेर्दाहप्रवृत्तिवदात्मनो

संघातप्रवृत्तिगोचराद् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि। तस्यात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चात्मतत्त्वमुपदिश्यते– 'इदं सर्वं यदयमात्मा' (बृ.उ. २।४।६) 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्...केन कं विजानीयात्... विज्ञातारमरे केन विजानीयात्' (बृ.उ. ४।५।१५) 'अयमात्मा ब्रह्म' (बृ.उ. २।५।१९) इत्यादिभिः।

यदप्यकर्तव्यप्रधानमात्मज्ञानं हानायोपादानाय वा न भवतीति, तत् तथैवेत्यभ्युपगम्यते। अलंकारो ह्ययमस्माकं यद् ब्रह्मात्मावगतौ सत्यां सर्वकर्तव्यताहानिः, कृतकृत्यता चेति। तथा च श्रुतिः–'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्' (बृ.उ. ४।४।१२) इति। 'एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत' (भ. गी. १५।२०) इति च स्मृतिः। तस्मान्न प्रतिपत्ति-

प्रकटार्थविवरणम्

द्रष्टव्यादिवाक्यैरात्मान्वेषणे प्रवर्तितस्यापि विधिगोचर एवात्मा शास्त्रेणोपदिश्यताम्; नेत्याह—**तस्यात्मान्वेषणायेति**। पूर्वोक्तमनूद्याङ्गीकरोति—**यदपीत्यादिना**। शरीरं तप्यमानमनु तापं कुर्यादज्ञवत्। किमिच्छन्? न किमपीति कृतकृत्यतां दर्शयति। यस्माद् ब्रह्मात्मावगतौ सत्यां न किञ्चिद्धेयमुपादेयं वा विद्यते कृतकृत्यता च भवति, तस्मात् **प्राचां वृत्तिकृतां**

भाष्यभावप्रकाशिका

फलभूतात्मदर्शनस्तावकतया तदुन्मुखीकरणायान्यतः प्राप्ता एव श्रवणादयो विधिसरूपैर्वाक्यैरनूद्यन्ते। अतो विधिकार्य-लेशाभावाद् विधिच्छायान्येतानीति भावः। प्रतिपाद्यमानवस्तुनो विध्ययोग्यत्वादपि विधेर्न संभव इत्याह—**तस्यात्मेति**।

इदानीं पूर्ववादिनोक्तमनुवदति—**यदपीति**। तत्र किं हानोपादानाभावः प्रसाध्यते? उत क्रियाप्रयोजनाभावः? आद्यस्त्वङ्गीक्रियत इत्याह—**तत्तथेति**। द्वितीयस्त्वसिद्ध इत्याह— **अलङ्कार इति**। अनुसंज्वरेत्=अनुतपेदित्यर्थः। अतः

न्यायनिर्णयः

विषयप्रवृत्तिरपि निरोद्धुमशक्येत्याशङ्क्याह—**कार्येति**। आत्मधियोऽनात्मदर्शने सत्यपि संभवात्किमिति ततो विमुखीकरणं, तत्राह—**प्रत्यगिति**। तत्र चेतसः स्रोतस्तदाभिमुख्यं तद्भावेनेति यावत्। सत्यनात्मदर्शने तत्प्रवणस्य चेतसो न प्रत्यगाभिमुख्यमित्यनात्मधीनिरासेन फलभूतात्मदृष्टिस्तावकतया तदाभिमुख्यायान्वयव्यतिरेकसिद्धा एव श्रवणादयो विधिसरूपैर्वाक्यैरनूद्यन्ते। तेन विधिकार्यलेशलाभाद् विधिच्छायान्येतानि, न विधय इत्यर्थः। अस्तु वा मुमुक्षुप्रवृत्तेर्वैधत्वाद्वाक्य-भेदेन श्रवणादिविधिः; तथापि वस्तुनो विध्ययोग्यत्वान्न तज्ज्ञाने विधिरित्याह—**तस्येति**। यदिदं ब्रह्मक्षत्रादि तत्सर्वमात्मैवेति बाधायां सामानाधिकरण्याद् द्वैताभावोक्त्याऽऽत्मनोऽद्वितीयत्वेन पूर्णत्वोक्तेर्न तत्र हेयत्वमादेयत्वं चेत्याह—**इदमिति**। अविद्यादशायामात्मनः सद्वितीयतया हेयत्वादिसिद्धिमाशङ्क्याङ्गीकुर्वन् विद्यावस्थायामात्मातिरिक्तक्रियाद्यभावान्न हेयत्वादीत्याह—**यत्रेति**। न केवलं विद्यावस्थायामेवात्मनि ज्ञात्रादिविभागाभावः, किंत्ववस्थान्तरेऽपीत्याह—**विज्ञातारमिति**। आत्मनः स्वविषये ज्ञेयत्वाभावेऽपि ब्रह्मणि तद्भावादादेयता तत्र स्यादित्याशङ्क्याह—**अयमिति**। आदिशब्द आत्मतत्त्ववादिसर्ववाक्यसंग्रहार्थः।

प्रतिपत्तिविधिशेषतयैव ब्रह्म शास्त्रीयमित्येतन्निराकृत्य तत्रैव सूचितं पूर्वपक्षमनुवदति—**यदपीति**। आत्मधियो हानाद्यनुपायत्वं, विफलत्वं वा। तत्राऽऽद्यमङ्गीकरोति—**तथेति**। द्वितीयं दूषयति—**अलंकारो हीति**। ब्रह्मात्मावगतेरुक्तफलत्वे मानं हिशब्दसूचितमाह—**तथा चेति**। अयं परमात्माऽहमस्मीत्यपरोक्षतया यदि कश्चित् पुरुषो जानीयात्। आत्मसाक्षात्कार-दौर्लभ्यद्योती चेच्छब्दः। स स्वातिरिक्तमात्मनः किं फलमिच्छन् कस्य वा पुत्रादेः फलाय तदलाभेन शरीरं तप्यमानमनु तदुपाधिः संज्वरेत् तप्येत। निरुपाध्यात्मविदो नान्यदस्ति फलं, नाप्यन्यः पुत्रादिरित्याक्षेपः। तत्रैव स्मृतिमाह—**एतदिति**। गुह्यतमं

विधिविषयतया ब्रह्मणः समर्पणम्।

यदपि केचिदाहुः–'प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण केवलवस्तुवादी वेदभागो नास्ति' इति; तन्न, औपनिषदस्य पुरुषस्यानन्यशेषत्वात्। योऽसावुपनिषत्स्वेवाधिगतः पुरुषोऽसंसारी ब्रह्म, उत्पाद्यादिचतुर्विधद्रव्यविलक्षणः स्वप्रकरणस्थोऽनन्यशेषः, नासौ नास्ति नाधिगम्यत इति वा शक्यं वदितुम्, 'स एष नेति नेत्यात्मा' (बृ.उ. ३।९।२६) इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुमशक्यत्वात्, य एव निराकर्ता तस्यैवात्मत्वात्।

प्रकटार्थविवरणम्

प्रतिपत्तिविधिवादोऽसङ्गत इत्याह—**तस्मादिति**।

इदानीं यदाह स्म **प्राभाकरः**—"नास्ति जीवातिरिक्तं ब्रह्म, किन्तु जीव एव वेदान्ते ब्रह्मशब्दाभिधेयः; तस्य चोपासानियोगशेषत्वेन वेदान्तैः प्रतिपादनम्" इति; तद् यद्यपि प्रागुक्तन्यायपरास्तम्; तथापि किञ्चिदधिकं वक्तुमुद्भावयति—**यदपीत्यादिना**। तत्र च वक्तव्यम्—किमनवगम्यमानत्वान्नास्ति ब्रह्मेत्युच्यते, किं वा अवगतस्यापि प्रमाणान्तरविरोधात्? नाद्य इत्याह—**तन्न;औपनिषदस्येति**। **अनन्यशेषत्वादिति**। स्वातन्त्र्येणैव वेदान्तपदसमन्वयावगम्यमानत्वान्नास्तीति न शक्यते वक्तुमित्यर्थः। किञ्च वेदान्तवेद्ये वस्तुन्यात्मशब्दप्रयोगोऽस्ति। तस्य च निराकरणमशक्यम्; निराकर्तुरेवात्मत्वप्रसक्तेरित्याह—**स**

भाष्यभावप्रकाशिका

प्रमाणाप्रमाणरूपप्रतिपत्तिविधिसंबन्धो ब्रह्मणो नास्तीत्युपसंहरति—**तस्मादिति**।

इदानीं प्रवृत्ति-निवृत्तिप्रयोजनत्वाच्छास्त्रस्येत्यत्र सूचितं पूर्वपक्षमनुवदति—**यदपीति**। किमिह वेदान्तवेद्यं वस्त्वेव नास्ति, तथाविधस्याप्रसिद्धत्वात् तदुद्दिश्य प्रतिपादनायोगादित्युच्यते? किं वा वेदान्तवेद्यवस्तुनः क्रियाशेषत्वम्? इति विकल्प्योभयमपि समाधत्ते—**तन्नेति**। तत्प्रपञ्चयति—**योऽसाविति**। तस्यापि चेतनत्वात् कर्तृत्वेन क्रियाविधिशेषत्वमिति शङ्कां निराचष्टे—**असंसारीति**। कर्तृत्वेन नान्वेतीति चेत्, तर्हि कर्मकारकत्वेनान्वयो भविष्यतीति, तत्राह—**उत्पाद्यादीति**। विनियोजक-प्रमाणाभावादपि नान्वय इत्याह—**स्वप्रकरणस्थ इति**। अस्तु तर्हि वाक्याद्विनियोगः पर्णमय्या इवेति, तत्राह—**अनन्येति**। जुह्वादिवदव्यभिचरितक्रतुसंबन्धिना[त्वा]भावादात्मन इति भावः। आत्मत्वात् तस्योद्देश्यत्वमपि न संभवतीत्याह—**स एष इति**।

न्यायनिर्णयः

शास्त्रमेतत्, तस्य बुद्धिः अर्थतः विधिशेषत्वेन ब्रह्मणो न शास्त्रगम्यतेत्युक्तमुपसंहरति—**तस्मादिति**। ज्ञानस्य विधेयत्वा-भावस्तथाविधफलत्वं च तच्छब्दार्थः। प्रमाऽप्रमारूपधीमात्रविषयः प्रतिपत्तिशब्दः। तद्विधिविषयतयेति पूर्ववत्।

यूपादिदृष्टान्तेन विधिशेषतया ब्रह्मणः शास्त्रगम्यत्वमुक्तं निरस्य प्रवृत्तिनिवृत्तीत्यादावुक्तमनुभाषते—**यदपीति**। किं वस्त्वेव नास्ति वेदान्तवेद्यं, तस्याप्रसिद्धत्वात् तदुद्दिश्य प्रतिपादनायोगात्, आहोस्वित् तस्य क्रियाशेषतेति विकल्प्याऽऽद्यं दूषयति—**तन्नेति**। औपनिषदस्य पुरुषस्येत्याद्यनिरासं सूचितं प्रपञ्चयति—**योऽसाविति**। तस्यापि चैतन्यात् कर्तृत्वेन क्रियाशेषत्वमाशङ्क्यानन्यशेषत्वादिति द्वितीयनिरासमुक्तं विवृणोति—**असंसारीति**। तत्र पूर्णत्वं हेतुमाह—**ब्रह्मेति**। कर्तृत्वेनानन्वयेऽपि क्रियायामात्मा कर्मत्वेनान्वेष्यतीत्याशङ्क्याह—**उत्पाद्यादीति**। विनियोजकमानाभावादपि नान्वयः। तद्धि प्रकरणं, वाक्यं वा। नाद्य इत्याह—**स्वप्रकरणस्थ इति**। पर्णतावद् वाक्यं विनियोजकमिति द्वितीयं दूषयति—**अनन्येति**। आत्मनो जुह्वादिवदव्यभिचरितक्रतुसंबन्धाभावादित्यर्थः। पक्षद्वयनिरासं निगमयति—**नासाविति**। तस्य न क्रियाशेषत्वमपीति विवक्षितम्। वेदान्तवेद्यवस्तुनो निरासायोगे हेत्वन्तरमाह—**स एष इति**। यः खल्वात्मा 'अथात आदेशो नेति नेति' इति

नन्वात्माऽहंप्रत्ययविषयत्वादुपनिषत्स्वेव विज्ञायत इत्यनुपपन्नम्। न; तत्साक्षित्वेन प्रत्युक्तत्वात्। न ह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः सम एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा। अतः स न केनचित् प्रत्याख्यातुं शक्यो, विधिशेषत्वं वा नेतुम्। आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः। सर्वं हि विनश्यद् विकारजातं पुरुषान्तं विनश्यति। पुरुषो

प्रकटार्थविवरणम्

एष इति। द्वितीयं शङ्कते—**नन्विति।** आत्मा नासंसाखिब्रह्मरूपेण प्रतिपादयितुं शक्यते, तस्याहंप्रत्ययविषयत्वात् तद्विरोधात्, अत एवौपनिषदत्वविशेषणं चानुपपन्नमित्यर्थः। न विशिष्टस्य ब्रह्मता शास्त्रेण प्रतिपाद्यते, किन्तु तत्परामर्शेन सोऽयमितिवत् स्वरूपैक्यं प्रतिपाद्यते। स्वरूपस्य चाहंप्रत्ययसाक्षित्वेन तद्विषयत्वाभावात् नास्ति विरोध इत्याह—**न तत्साक्षित्वेनेति।** अन्यतोऽसिद्धत्वादौपनिषदत्वमपि घटत इत्याह—**न ह्यहमिति।** नाधिगतश्चेत् केनापि, तर्हि नास्त्येवेइति न वाच्यमित्याह—**सर्वस्यात्मेति।** चक्षुर्व्यतिरेकेणान्यतोऽसिद्धमपि रूपं यथा न प्रत्याख्यातुं शक्यते तथा उपनिषद्व्यतिरेकेणान्यतोऽसिद्धोऽप्युपनिषद्भ्य एव सिध्यन् न प्रत्याख्यातुं शक्यते इत्यर्थः। ननु चेतनत्वाज्जीववत् तर्हि विधिशेष एवेत्याशङ्क्याह—**विधिशेषत्वं वा नेतुम्** न शक्यः शेषत्वे द्वाराभावात्, मानाभावाच्चेत्यर्थः। नन्वधिकारिभेदेनातिरात्रे षोडशिनो ग्रहणाग्रहणवत् मुमुक्षुभिः वेदान्ते श्रद्दधानैरेव तद्वेद्य आत्मोपादीयते, त्यज्यते त्वन्यैरित्याशङ्क्याह—**आत्मत्वादेव चेति।** ननु प्रसिद्ध एव

भाष्यभावप्रकाशिका

तथापि कर्मकाण्डे तर्कशास्त्रेषु च तस्य प्रसिद्धत्वात् कथमुपनिषत्स्वेव वेद्यत्वमिति? तत्राह—**न ह्यहमिति।** अहंकर्तुरिव तत्र प्रसिद्धत्वमित्यर्थः। अहंप्रत्ययस्य विषयोऽहंप्रत्ययविषयः, अहंप्रत्ययविषयश्चासौ कर्ता चेत्यात्मोच्यते। एवंभूतोऽपि साक्षी जैनदर्शने प्रसिद्ध इत्याशङ्क्याह—**सर्वभूतस्थ इति।** तेषामात्मा देहपरिमाणत्वात् न सर्वभूतस्थ इत्यर्थः। सर्वगतत्वेन सर्वभूतस्थो नैयायिकादिमते प्रसिद्ध इत्यत आह—**सम इति।** तर्हि सांख्यदर्शने सिद्ध इत्यत आह—**एक इति।** चेतनाचेतनसर्वप्रपञ्चतादात्म्यापन्न इत्यर्थः। तथाऽपि भर्तृप्रपञ्चादिभिरभ्युपगतत्वात्परिणामीत्यत आह—**कूटस्थेति।** कथं तर्हि तस्य जगत्कारणत्वमिति? तत्राह—**सर्वस्येति।** प्रपञ्चविभ्रमाधिष्ठानत्वात् कारणत्वव्यपदेशो रजतविग्रहाधिष्ठानभूतशुक्तेरिवेति भावः। फलितमाह—**अत इति।** हेयोपादेयविषयौ विधिनिषेधौ न तद्विपरीतमात्मतत्त्वं विषयीकुरुत इत्याह—**आत्मत्वादेव चेति।** ननु

न्यायनिर्णयः

विश्वदृश्यनिषेधेनोक्तः स एष पञ्चमेऽपि निरूप्यत इत्यत्र वस्तुन्यात्मशब्दात्, तस्य चात्मत्वादेवानिराकार्यत्वात्, तत्कर्तुरिवात्मत्वात् तत एव तस्योद्दिश्य प्रतिपाद्यत्वमपि सिध्यतीत्यर्थः।

औपनिषदत्वं पुरुषस्यामृष्यन्नाशङ्कते—**नन्विति।** अहंधीविषयत्वं दूषयन् विशेषणं समर्थयते—**नेत्यादिना।** संस्कार्यत्वनिरासे 'साक्षी चेता' इति मन्त्रेणाऽऽत्मनः सर्वसाक्षित्वमुक्तम्। तेनाहंधीविषयत्वस्य प्रत्युक्तत्वादविरुद्धमौपनिषदत्वमित्यर्थः। तथापि कर्मकाण्डे तर्कशास्त्रे च सिद्धत्वान्न तस्यौपनिषदत्वम्, तत्राह—**न हीति।** तत्साक्षीति विधिकाण्डागम्यत्वोक्तिः। बौद्धसिद्धान्तेऽनधिगतिमाह—**सर्वेति।** सर्वेषु नश्यत्सु भूतेषु स्थितो न नश्यतीत्यर्थः। नैयायिकादिमते तदनधिगतिमाह—**सम इति।** निर्विशेष इत्यर्थः। सांख्यसमयसिद्धत्वं निरस्यति—**एक इति।** चैतन्यान्तरशून्यत्वमैक्यम्। भर्तृप्रपञ्चादिमते प्रसिद्धिं प्रत्याह—**कूटस्थेति।** कौटस्थ्ये कथं कारणत्वम्, तत्राह—**सर्वस्येति।** सर्पाधिष्ठानरज्जोरिव ब्रह्मणोऽपि द्वैताधिष्ठानत्वात् कारणत्वमाविद्यकमिति भावः। अन्यतोऽनधिगतौ फलितमाह—**अत इति।** ज्ञाते हि बाधो नान्यथेत्यर्थः। विधिकाण्डानधिगतिफलमाह—**विधीति।** तत्र हेत्वन्तरमाह—**आत्मत्वादिति।** आत्मा सर्वशेषित्वान्नान्यशेषः; स कथं विधिशेषः स्यादित्यर्थः। विधिकाण्डाज्ञाततत्वमुक्तं समुच्चेतुं चशब्दः। किं च हेयोपादेयविषयौ विधिनिषेधौ नात्मनि विपरीते स्यातामित्याह—**नेति।** तस्यापि संसारिणो नाशितया हेयत्वमाशङ्क्योक्तम्—**सर्वं हीति।** निरवधिकनाशासिद्धेरित्यर्थः। संसारस्यैव नाशो न

विनाशहेत्वभावादविनाशी, विक्रियाहेत्वभावाच्च कूटस्थनित्यः, अत एव नित्यशुद्धबुद्धमुक्तस्वभावः। तस्मात् 'पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः' (क.उ. १।३।११)। 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ.उ. ३।९।२६) इति चौपनिषदत्वविशेषणं पुरुषस्योपनिषत्सु प्राधान्येन प्रकाश्यमानत्व उपपद्यते। अतो भूतवस्तुपरो वेदभागो नास्तीति वचनं साहसमात्रम्।

प्रकटार्थविवरणम्

नित्यात्मपरित्यागो बौद्धानाम्, विनाशोपगमात्; मीमांसकानां चापि अक्रियात्मत्यागो[1] विकाराङ्गीकारात्; साङ्ख्यानां च नित्यशुद्धो[द्धात्मो]पादानं प्रसिद्धमित्याशङ्क्याह—**सर्वं हीति।** न तावत् स्वत एव विनाशः, क्षणभङ्गस्य निराकरिष्यमाणत्वात्; नापि परतः, निरवयवत्वेन नभोवद् दाहादिविनाशहेतूपरागाभावात्; अतो व्यामोहमहिम्नैव नित्यात्मत्यागः। आकाशवन्निरवयवत्वाद् विक्रियाहेत्वभावाद् विकाराङ्गीकारो विभ्रमविलसित एव। यतो विनाशविकारयोर्हेतुर्नास्ति अत एव नित्यशुद्धबुद्धमुक्तस्वभावः साङ्ख्यैः भ्रान्त्या वस्तुतःपरिच्छिन्नोऽभ्युपगतः। परमार्थतस्तु तस्मात् पुरुषान्न परं किञ्चिद्वस्त्वस्ति; तत्र प्रमाणम् 'सा काष्ठा सा परा गतिः'' इति श्रुतिः। सर्वस्य विनश्यतश्चिदेव मर्यादाऽवधिः; सर्वस्य भेदभ्रमस्य सा चिदेव परा गतिरधिष्ठानम्; अतोऽहेयानुपादेयता सिद्धा। [2]तद्धितश्रुत्या चोपनिषदां तत्प्रतिपादने विनियोगादौपनिषदत्वं सिद्धमित्याह—**तं त्वौपनिषदमिति।**

भाष्यभावप्रकाशिका

पुरुषस्यापि विनाशित्वाद्धेयत्वमित्याशङ्क्याह—**सर्वं हीति।** अथवा सर्वस्य प्रपञ्चजातस्यात्मैव तत्त्वमित्युपपादयति—**सर्वं हीति।** शुक्त्यादितत्त्वान्तं विनाशभाजां रजतादीनां शुक्त्यादिरेव यथा तत्त्वम्, तथाऽऽत्मान्तं विनश्यतो विकारजातस्यात्मैव तत्त्वमित्यर्थः। ननु न तदन्तो विनाशः, तस्यापि विनाशित्वादित्यत आह—**पुरुष इति।** ननु पुरुषस्य स्वरूपाविनाशेऽपि तद्धर्मस्य विनाशित्वात् तद्विशिष्टस्यात्मनो हेयत्वमुपादेयत्वं च स्यादित्यत आह—**विक्रियाहेत्वभावादिति।** धर्मावस्था-परिणामाख्य-विक्रियाशून्य इत्यर्थः। ननु तथाप्यशुद्धत्वादिरूपभावेन शुद्धत्वादिरूप उपादेय इति, नेत्याह—**अत एवेति।** पुरुषावधिः सर्वस्य विनाश इत्युक्तम्, तत्र श्रुतिमाह—**पुरुषादिति।** पूर्वोक्तविशेषणादित्यर्थः। ''औपनिषदमि''ति तद्धितप्रत्ययोऽपि मानान्तरा-सिद्धत्वेनोपनिषत्प्रतिपाद्यत्वमात्मनो गमयतीत्याह—**तन्विति[तं त्वेति]।** उपनिषदामर्थवत्त्वमभियुक्तवाक्यविरुद्धमिति यदुक्तम्,

न्यायनिर्णयः

पुरुषस्येति वक्तुं विकारजातमित्युक्तम्। घटादेर्मृदादौ नाशात् कथं पुरुषावधिः सर्वस्य नाशः? तत्राह—**पुरुष इति।** कल्पितस्यानधिष्ठानत्वात्पुरुषो नित्यसत्स्वभावस्तदधिष्ठानत्वेन विश्वोदयव्ययहेतुरित्यर्थः। पुरुषस्य परिणामिनित्यत्वात् परिणामोदयव्ययाभ्यां हानादाने स्यातामित्याशङ्क्याह—**विक्रियेति।** सावयवत्वादिस्तद्धेतुः। अशुद्धत्वादित्यागेन शुद्धत्वादेरा-देयत्वं शङ्कित्वाऽऽह—**अत इति।** आत्मनि स्वतो धर्मतश्चानन्यथात्वमतःशब्दार्थः। पुरुषावधिर्नाशः सर्वस्येत्यत्र श्रुतिमाह—**तस्मादिति।** कल्पितस्याकल्पितमधिष्ठानमित्युक्तयुक्तिपरामर्शी तच्छब्दः। यथेन्द्रियादिभ्यो नैवं पुरुषादस्ति किंचित्परम्, सा पुरुषाख्या काष्ठा सूक्ष्मत्वमहत्त्वादेरवधिः, सैव परा गतिः परमपुरुषार्थ इत्यर्थः। निरतिशयस्वतन्त्रतया विध्यशेषत्वे श्रुतिरुक्ता। मानान्तरागम्यतया वेदान्तैकवेद्यत्वे श्रुतिमाह—**तं त्विति[तं त्वेति]।** यस्त्वदुक्तसविशेषब्रह्मणः 'पृथिव्येव यस्यायतनम्' इत्युपक्रम्योक्तमधिष्ठानं तमौपनिषदमुपनिषद्भिरेव ज्ञेयं पुरुषं त्वा त्वां पृच्छामि हे शाकल्येति याज्ञवल्क्यस्य प्रश्नः। विशेषणाभिप्रायं विवृणोति—**औपनिषदत्वेति।** औपनिषदत्वेऽनन्यशेषत्वे चात्मनः सिद्धे परस्य प्रतिज्ञा निर्मूलेत्याह—**अत इति।**

---

१. 'अविक्रियात्मत्यागः' इति पाठः स्यात्, 'विकाराङ्गीकारात्' इति हेत्वनुरोधात्। उक्तं च मीमांसकैः—''स तु (आत्मा) प्राच्यमौदासीन्यं हित्वा कर्तृत्वभोक्तृत्वाभ्यां विक्रियत एव। न त्वेवमनित्यः स्यात्। यदि विकारमात्रमनित्यत्वम्, तदस्तु। न हि विकारमात्रेण स्वरूपोच्छेदो भवति, प्रत्यभिज्ञानात्'' इति। द्र. श्लो.वा. आत्मवादे।

२. उपनिषदैव ज्ञायते औपनिषदः पुरुषः। शैषिकः अण्प्रत्ययस्तद्धितः। द्र.वि., पृ. २८७।

यदपि शास्त्रतात्पर्यविदामनुक्रमणम्–'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इत्येवमादि, तद् धर्मजिज्ञासाविषयत्वाद् विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम्।

प्रकटार्थविवरणम्

ननु न प्राभाकराणामेवैतत्साहसमात्रम्; दर्शितं हि शबरस्वामिप्रभृतीनां भाषणमपीत्याशङ्क्याह—**यदपीत्यादिना**। अयमर्थः—स्वाध्यायाध्ययनानन्तरं स्नानविधायकमाम्नायमुपलभ्य वेदस्यानर्थक्ये शङ्किते भाष्यकारेणार्थसद्भावमात्रं दर्शितम्। कर्मावबोधनमिति तु प्रकृतोपयोगादुक्तम्, नान्ययोगव्यवच्छेदाभिप्रायेणेति।

किञ्च [1]'सूत्रकारादिवचनं वृद्धव्यवहारमूलं, किं वा स्वोत्प्रेक्षामूलम्? यद्याद्यः, तर्हि वृद्धव्यवहारे पदानामन्विताभिधाने सामर्थ्यावधारणात् वेदेऽपि मुख्यवृत्त्या पदानामन्विताभिधायित्वात् न कार्यमात्रपरः सर्वो वेदः। तथा च—विमतो [2]मुख्यवृत्त्याऽपि शब्दप्रमेयः, प्रमेयत्वात्, पराभिमतकार्यवदिति प्रयोगः। अथ श्रोतुः प्रवृत्तिदर्शनेन कार्यज्ञानं प्रवृत्त्युपयोग्यनुमाय तत्रैव व्युत्पत्तिं प्रतिपद्यते, न; तटस्थकार्यमात्रज्ञानस्य प्रवर्तकत्वायोगात्। अन्वितकार्यज्ञानस्य प्रवर्तकत्वेऽपि लाघवाय अन्विते शक्तिरस्तु, अन्यथा प्रयत्नादावपि व्युत्पत्तिप्रसङ्गात्, [3]प्रयोजकद्वैविध्यप्रसङ्गाच्च। [4]कार्यान्वयिनि सामर्थ्यमिति च [5]बहुविशेषणप्रयोजकप्रसङ्गात्, कार्यान्वययोश्च [6]युगपद्विशेषणविशेष्यभावप्रसङ्गात्, तस्माल्लाघवाय उभयसंप्रतिपन्नान्वितमात्रे पदव्युत्पत्तिः।

न चात्यन्तलाघवाय पदार्थमात्रे शक्तिः, संसर्गबुद्धेरशाब्दत्वप्रसङ्गात्। शब्दावगतपदार्थनिबन्धनत्वाच्छाब्दत्वे लैङ्गिकस्यापि[7] प्रत्यक्षत्वप्रसङ्गात्। प्रथमावगतसंसर्गपरतायाः त्यागाप्रसङ्गात्, मध्ये च पदार्थशक्तिकल्पने गौरवात्, युगपत् सर्वप्रतीत्यादिदूषणस्य चेतरत्र समानत्वात्, सहकारिविशेषापेक्षायाश्च समानत्वात्, वाक्य[वाक्यार्थ]प्रतीतिनान्तरीयकत्वेन पदार्थान्वयव्यतिरेकयोरन्यथा-

भाष्यभावप्रकाशिका

तदनूद्य समाधत्ते—**यदपीत्यादिना**। ''दृष्टो हि तस्यार्थः प्रयोजनवदर्थावबोधनमि''ति वक्तव्ये धर्मजिज्ञासायाः प्रक्रान्तत्वात्, धर्मस्य च कर्मत्वात् कर्मावबोधनमित्युक्तम्। नैतावता सिद्धरूपब्रह्मात्मावबोधनं व्यावर्त्यत इति भावः।

न्यायनिर्णयः

तथा हीत्यादौ वेदान्तानामर्थवत्त्वमभियुक्तोक्तिविरुद्धमित्युक्तमनुवदति—**यदपीति**। तस्यान्यविषयत्वं वदन् प्रकृताविरोधित्वमाह—**तद् धर्मेति**। 'दृष्टो हि तस्यार्थः फलवदर्थबोधनम्' इति वक्तव्ये धर्मजिज्ञासाप्रक्रमाद् धर्मकर्मणोश्चैक्याद् यदुक्तं कर्माबोधनं तद् विधिनिषेधविवक्षयोक्तम्। यत्तु चोदनासूत्रे चोदनापदव्याख्यानं, तदप्रतिकूलं, पदार्थमात्रकथनात्। परीष्टिसूत्रप्रमुखमपि सूत्रजातं पूर्वसूत्राभ्यां तत्तद्भाष्यैश्च सह प्रक्रमवशात् कर्मकाण्डार्थमेव। अतो ब्रह्मबोधनमिति वेदैकदेशस्य फलमित्युपनिषदर्थवत्तेत्यर्थः।

---

१. सूत्रकारादिवचनम् 'आम्नायस्य क्रियार्थत्वात्' इत्यादि।

२. शक्त्येत्यर्थः। इदं च लक्षणया शब्दप्रमेयत्वमादाय सिद्धसाधनवारणाय। 'पुत्रस्ते जातः' इत्यादिसिद्धपरवाक्यानां शक्त्या कार्यपरत्वेऽपि लक्षणया सिद्धपरत्वमित्यपि प्राभाकरैरुपपादनात्। तदुक्तम्—''कार्यान्वयो हि परस्परान्वयाव्यभिचारीत्यविवक्षित्वा कार्यान्वयं परस्परपदार्थान्वय विवक्षयाऽपि लक्षणया लोकः शब्दं प्रयुङ्क्ते'' इति। (प्र.प.) १०. तटस्थेति। केवलेत्यर्थः।

३. कार्यपदातिरिक्तपदानां कार्यान्वितस्वार्थे शक्तिः। कार्यपदस्य तु कार्यस्य कार्यान्तराभावात् इतरान्वितस्वार्थे इत्येवं द्वैविध्यादिति भावः।

४. कार्यान्वयवतीत्यर्थः। अन्वयः=सम्बन्धः। कार्यसम्बन्धश्च यथा इतरपदार्थे तथा कार्येऽपि, सम्बन्धस्य द्विनिष्ठत्वात्। अतो न प्रयोजकद्वैविध्यापत्तिरित्याशयः।

५. कार्यविशिष्टो योऽन्वयः तद्विशिष्टे शक्तिर्भवता कल्प्यते। ततो वरमन्वयविशिष्टरूपेऽन्विते शक्तिकल्पनम्, लाघवादित्यर्थः। ६. कार्यादिपदेन कार्यान्वितस्वार्थोपस्थितौ कार्यस्यान्वयविशेषणतया तद्विशेष्यतया च युगपद्भानप्रसङ्गात्। एवमन्वयस्यापि। एकस्यैव कार्यस्य, अन्वयस्य चोभयथा भानादिति भावः।

७. अनुमितेरित्यर्थः। प्रत्यक्षावगतधूमादिलिङ्गनिबन्धनत्वादिति भावः।

प्रकटार्थविवरणम्

सिद्धत्वात्, "पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः। खुरनिष्पेषशब्दं च श्वेतोऽश्वो धावतीति धीः" इत्यत्रापि संसर्गबुद्धेरनुपपत्तिप्रसूतत्वात्[1]।

तस्मात् क्रमेणोच्चार्यमाणेषु पदेषु संस्कारभूयस्त्वादव्यभिचारिणः पदार्थाः प्रथमं प्रतीयन्ते; पश्चात् तान्येव स्मृत्यारूढानि तेषामेवान्वयं प्रतिपादयन्तीत्यन्विताभिधानमेव युक्तम्। प्रयोगोऽपि—विप्रतिपन्नः[2] शब्दव्युत्पत्तिगोचरः, प्रमेयत्वात्, उभयाभिमतप्रमेयवदिति। न च व्यवहारादेव सङ्गत्यधिगतिनियमः। 'पुत्रस्ते जातः' इत्यादौ वदनविकसनादिना हर्षाद्युत्पादानुमानेन सामान्येन तत्कारणप्रतीतिमात्रजनने सामर्थ्यमधिगम्य प्रयोगान्तरेष्वावापोद्धाराभ्यां विशेषेऽपि व्युत्पत्त्युपपत्तेः। [3]संशयस्य च व्यवहारेऽपि समानत्वात्—किमयं स्मृत्वा प्रवृत्तः, किं वा बुद्ध्वेति। न च व्यवहारोऽपि कार्यज्ञानात्, फलकार्यतायां व्यभिचारात्; किं त्वन्वयव्यतिरेकाभ्यां कृतियोग्येष्टसाधनज्ञानात्। न च पराभिमतं कार्यं तत्त्वतोऽस्ति, अनिरूपितप्रमाणकत्वात् नरविषाणवत्; न तावन्ममेदं कार्यमिति धीः, चिकीर्षामात्रोल्लेखात्; फले तत्साधने च चिकीर्षागोचरतातिरेकिणी [4]कृत्युद्देश्यता भातीत्यत्र तु कोशपानमेव शरणम्। न च वैदिको लिङादिः पराभिमतकार्यबोधकः, तत्रागृहीतसङ्गतित्वात् पदान्तरवत्। न च स्वर्गकामपदसमभिव्याहारात् प्रतीते सङ्गत्यधिगतिः[5], क्रियाया एवेश्वरद्वारेणावान्तरापूर्वद्वारेण वा कालान्तरीयफलसाधनत्वसंभवात्[6]। आग्नेयादीनां प्रधानापूर्वसाधनत्ववत्। [7]अनुपपत्तिगम्यत्वे चापूर्वत्वानुपपत्तिः। न च तदुत्थं ज्ञानं तर्कः, अबाधितासन्दिग्धाज्ञातार्थत्वात् पटज्ञानवत्; न चासिद्धत्वाद्भाविन्यपेक्षा चक्रकापत्तेश्च; यूपादिपदानामगतिकगतित्वात् लौकिकस्याप्यत्र संभवात्। अतो [8]लिङाद्यर्थः कृतियोग्यमिष्टसाधनमेव। न नियोगः, नापि भावनाद्वयम्, बालेनानाकलितत्वात्, दृष्टपरिहारेणादृष्टकल्पने कारणादर्शनात्, शब्दस्य च परिस्पन्दादिव्यापारानिरूपणात्, युगपत् क्रमेण वा उभयाभिधानायोगात्, प्रवर्तकत्वसामान्यस्याभिधाने परिशेषात् शब्दव्यापारस्याश्रयत्वकल्पने वैदिकस्यापि लिङादेरप्रामाण्यापातात्, शब्दव्यापारे प्रवर्तयत्यपि

---

१. अयमाशयः—पदैः पदार्था अभिधीयन्ते। अभिहितैरर्थैः आकाङ्क्षादिसहकृतैः वाक्यार्थबोधो जन्यत इत्ययमभिहितान्वयवादः **भट्टपादाभिमतः**। अत्र च साकाङ्क्षयोग्यासन्नार्थज्ञानमेव शाब्दबोधे करणम्, न पदज्ञानम्। अतः पदज्ञानाभावेऽपि श्वेतरूपदर्शनहेषाखुरनिक्षेपशब्दश्रवणाभ्यां श्वेतत्वादीनां मिथोऽन्वयं विनाऽनुपपन्नत्वज्ञानेन, तद्देशे श्वेतत्वाद्यन्वययोग्यवस्त्वन्तराभावज्ञानेन च सहकृताभ्यां 'श्वेतोऽश्वो धावती'ति शाब्दबोधो जायते। न चैवमूहादिस्थले पदाध्याहारनियमो न स्यादिति वाच्यम्। 'शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यते' इति न्यायेन तदुपपत्तेः। यत्र पदमेकमपि श्रूयते तत्र शाब्दाकाङ्क्षायाः पूरणाय शब्दस्यैवाध्याहारात्। यत्र तु पदं किमपि न श्रूयते तत्र पदाध्याहाराभावादिति।

प्रभाकराभिमतेऽन्विताभिधानवादे तु—पदान्येव स्वार्थस्मृतिद्वारा वाक्यार्थबोधं जनयन्ति। पूर्वोक्तस्थले 'श्वेतोऽश्वो धावती'ति बुद्धिश्च अर्थापत्तिरूपा, अनुमितिरूपा वा; न शाब्दी। तदिदमुक्तम्—अनुपपत्तिप्रसूतत्वादिति।

वेदान्तिष्वपि भामतीकाराः अभिहितान्वयवादिनः, विवरणकाराश्चान्विताभिधानवादिनः। प्रकटार्थकाराश्च विवरणानुसारित्वात् अन्विताभिधानमेव स्वीचक्रुरिति। २. विप्रतिपन्नः=सिद्धोऽर्थः।

३. सिद्धार्थे व्युत्पत्त्यसंभवे प्राभाकरोक्तां युक्तिं निराचष्टे—संशयस्येति।

४. इष्टसाधनता-चिकीर्षयोरन्तराले कार्यताज्ञानं स्वीक्रियते प्राभाकरैः। तदिह खण्डितम्। विशेषस्तु प्रकरणपञ्चिका-चित्सुखी-न्यायमकरन्दादिग्रन्थेभ्योऽवसेयः।

५. यद्यपि लोके 'आनये'त्यादौ कार्यमानयनादिक्रियारूपमेव, तथापि 'यजेत स्वर्गकामः' इत्यादौ वेदे स्वर्गकामादिनियोज्यवाचकपदसमभिव्याहारात् धात्वर्थादन्यदेव तद् गम्यते। तत्र हि लिङा कार्यमुच्यते। स्वर्गकामश्च नियोज्यः समभिव्याहारेणावगतः। 'ममेदं कार्य' मिति कार्यबोद्धा नियोज्यः। स्वर्गकामस्य स्वर्गासाधनत्वेन ज्ञाते कार्यत्वबुद्धिर्न भवति। यागस्य च प्रत्यक्षविनाशिनः कालान्तरभाविस्वर्गसाधनत्वयोग्यता नास्तीति न तत्र कार्यताबुद्धिः। अतो लिङा तदतिरिक्तमेव किञ्चित् अपूर्वापरपर्यायं स्वर्गादिसाधनं कार्यमभिधीयते। तस्मिंश्च कार्ये यूपाहवनीयादिपदवत् पदान्तरसमभिव्याहारवशादेव संगतिग्रहणमिति प्राभाकरप्रक्रिया।

६. अतो न क्रियातोऽतिरिक्तं कार्यं सिध्यतीति भावः।

७. नार्थापत्त्योक्तापूर्वं कल्प्यते, किन्तु 'यदि क्रियारूपमेव कार्यं लिङोच्येत तर्हि निर्नियोज्यत्वात् स्वरूपमेव हीयेत' इति तर्कसहकृतलिङा तत् प्रतिपाद्यत इत्युच्यते। तर्कश्च न प्रमाणमिति मानान्तरागम्यत्वरूपमपूर्वत्वं सुस्थिरमित्याशङ्कायामाह—न च तदुत्थमिति।

८. नियोगो लिङर्थ इति प्राभाकराः। शब्दनिष्ठः प्रवर्तनानिवर्तनात्मकः अलौकिकः कश्चन व्यापारः इति भाट्टाः। त्रैकाल्यानवच्छिन्नरूपेण बोधिताऽर्थभावनैवेति केचित्। ईश्वराज्ञैवेति उदयनाचार्यादयः। तान् निराकरोति—न नियोग इत्यादिना। (द्र. परिमलः पृ. १४७)

अपि च 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानर्थक्यप्रसङ्गः। प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण भूतं चेद् वस्तूपदिशति भव्यार्थत्वेन, कूटस्थनित्यं भूतं नोपदिशतीति को हेतुः? न हि भूतमुपदिश्यमानं क्रिया भवति। अक्रियात्वेऽपि भूतस्य

प्रकटार्थविवरणम्

समीहितसाधनतावगममन्तरेण बुद्धिपूर्वाधिकारिणामुपेक्षणीयवचनादिव प्रवृत्त्यनुपपत्तेरन्वयव्यतिरेकसिद्धं कृतियोग्येष्टसाधनस्यैव प्रवर्तकत्वम्। आज्ञादेरपीष्टसाधनत्वानुबन्धेनैव प्रवर्तकत्वं तदभावेऽभावात्। न च व्याकरणेनाऽऽज्ञादिव्यापारेषु लोके सङ्गतिः, वेदेऽपि प्रसङ्गात्; असंभवादनङ्गीकारे गौरवात् लोकेऽपि नादर्तव्यम्। लाक्षणिकार्थभेदपरं तु 'तत्सूत्रम्। वैदिका लिङादयो व्यापारबोधकाः, बोधकत्वात्, लौकिकलिङादिवदित्यप्यनुमाने साध्यवैकल्यात्। कारकत्वाद् व्यापारवत्त्वानुमाने व्यापकानुपलब्धिबाधः; स्वाधारज्ञानता[ज्ञातता]तिशयाङ्गीकारात् सिद्धसाधनम्; लिङ्गे च व्यभिचारः; प्रवृत्तिहेतुत्वात् तदनुकूलव्यापारवत्त्वानुमाने चासिद्धिः; अयस्कान्ते चानेकान्तः। काम्यनित्यभेदोऽपि साध्यासाध्याधिकारिविशेषणभेदादुपपन्नः। तदेवं वृद्धव्यवहारानुसारेण कर्मकाण्डमपि पराभिमतकार्यविपरीते सिद्धे प्रमाणम्, किं पुनर्ब्रह्मकाण्डे[ण्डम्]। प्रयोगोऽपि—वेदः सिद्ध एव प्रमाणं, प्रमाणत्वात् प्रत्यक्षवदिति।

यदि स्वोत्प्रेक्षामूलं सूत्रकारादीनां वचनम्, तदाऽपि किमालम्बनाभाव आनर्थक्यं, प्रयोजनाभावो वा? यद्याद्यस्तर्हि "सोमेन यजेत" इत्यादौ सोमादिपदानां निरालम्बनत्वप्रसङ्ग इत्याह—**अपि चाम्नायस्येत्यादिना**। अथ निरालम्बनत्वमानर्थक्यं नाङ्गीकरोषि क्रियासाधनोपदेशाभ्युपगमात्, तत्राह—**प्रवृत्तिनिवृत्तीति**। अथ क्रियाद्वारकत्वात्प्रयोजनस्य तच्छेषत्वेनैव भूतोपदेशोऽङ्गीक्रियते, न स्वातन्त्र्येणेत्याह—**अक्रियात्वेऽपीति**। भवति क्रियाद्वारकं प्रयोजनं केषांचित्; तथापि सप्रयोजनभूतोपदेशस्तदैव त्वयाऽङ्गीकृत

भाष्यभावप्रकाशिका

अपि चानर्थक्यं नामाभिधेयराहित्यम्? प्रयोजनशून्यत्वं वा? यद्याद्यः, तत्राह—**अपि चेति**। भूतोपदेशानां "वषट्कर्तुः प्रथमभक्षः" "देवदत्तो भुक्त्वा निर्गतः" इत्यादीनां द्रव्यादिवाचिनां शब्दानां संबन्धयोग्यताभिधायिविभक्तियुक्तानां साक्षात् कार्यार्थताभावात् तेनैव प्रयोजकेन सिद्धवस्तूपदेशोऽपि संभवतीत्यभिप्रेत्याह—**कूटस्थनित्यमिति**। भव्यम्। ननु किमपि भूतं नोपदिशति, सर्वस्य कार्यसंसृष्टतया कार्यत्वात् कार्यमेवोपदिशतीत्याशङ्क्याह—**न हीति**। क्रियाशब्देन कार्यमुच्यते। न तादात्म्यलक्षणः संसर्गः कार्येण द्रव्यादिपदार्थानाम्, किंतु प्रयोजन-प्रयोजकत्वलक्षणः। तद्विषयेण च भावार्थेन क्रियाकारकलक्षणः, न तु भूतानां कार्यत्वमित्यर्थः।

न्यायनिर्णयः

अर्थवादाधिकरणविरोधं विधान्तरेण निरस्यति—**अपि चेति**। तत्र खल्वक्रियार्थत्वे सत्यानर्थक्यं भूतोपदेशविशेषस्य वा, तन्मात्रस्य वा? तत्राद्यमुपेत्य द्वितीयं प्रत्याह—**आम्नायस्येति**। 'वषट्कर्तुः प्रथमभक्षः' 'देवदत्तो भुक्त्वा निर्गत' इत्यादिभूतोपदेशस्य संबन्धयोग्यतावाचिविभक्तियुक्तस्य द्रव्यादिवाचिनः साक्षात् कार्यार्थत्वाभावात् फलवदर्थराहित्यम्। अतोऽविशेषात् कार्योपदेशस्यापि तत्प्रसक्तिरित्यर्थः। उक्तभूतोपदेशेऽपि कर्तव्यादिपदाध्याहारात् कार्यशेषद्रव्याद्यर्थतया फलवदर्थसिद्धिरिति शङ्कते—**प्रवृत्तीति**। तत्साध्यातिरेकेण भूतमपि द्रव्यादिवस्तु वषट्कर्तुरित्यादिवाक्यमध्याहृतकार्यशेषत्वेनाभिदधाति, भूतभव्यन्यायात्। अतो भूतोपदेशस्यार्थवत्त्वान्नातिप्रसक्तिरित्यर्थः। कार्यान्वितस्वार्थाभिधानेऽपि योग्यान्विताभिधानात् तेनैव कार्यास्पृष्टवस्तूपदेशोऽपि स्यादित्याह—**कूटस्थेति**। ननु न तादृगस्ति वस्तु, सर्वस्योपदिश्यमानभूतस्य कार्यस्पर्शितया कार्यत्वात्, तत्राह—**न हीति। क्रिया** कार्यम्। भूतस्य तत्संसर्गस्तादात्म्यं फलफलिभावो वा। नाद्यः, क्रियाद्वारा हेतुहेतुमद्भावाभ्युपगमात्। द्वितीयेऽपि न तयोरैक्यं, फलफलित्वस्य भेदकत्वादित्यर्थः। भूतस्याकार्यत्वेऽपि तद्धेतुत्वात् तच्छेषत्वात्तदुपदेशोऽपि तच्छेष एव, गामानयेत्यादावाद्यव्युत्पत्तेः कार्यान्वितविषयत्वात्, अतो न कूटस्थोपदेशोऽस्तीति चोदयति—**अक्रियात्वेऽपीति**।

१. 'विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इति सूत्रम्।

क्रियासाधनत्वात् क्रियार्थ एव भूतोपदेश इति चेत्? नैष दोषः। क्रियार्थत्वेऽपि क्रियानिर्वर्तन-शक्तिमद्वस्तूपदिष्टमेव। क्रियार्थत्वं तु प्रयोजनं तस्य। न चैतावता वस्त्वनुपदिष्टं भवति। यदि नामोपदिष्टं किं तव तेन स्यादिति। उच्यते– अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति। तदवगत्या मिथ्याऽज्ञानस्य

प्रकटार्थविवरणम्

इत्याह—**नैष दोष इति**। तथापि सप्रयोजनता ममैव सिद्ध्यति, क्रियासद्भावात्, न तवेत्याह—**यदि नामेति**। क्रियाऽभावेऽप्यलौकिकात्मोपदेशः सप्रयोजन एव ममापीत्याह—**उच्यत इति**। इतश्चाक्रियार्थानामानर्थक्यं न शक्यते

भाष्यभावप्रकाशिका

ननु प्रवर्तकवचनश्रवणसमनन्तरं श्रोतुः प्रवृत्तिमुपलभ्य प्रवृत्तिलिङ्गेन प्रवृत्तिप्रत्यये पदसमुदायस्य सामान्यतः सामर्थ्यमधिगम्य पुनरावापोद्वापाभ्यां च प्रत्येकं कार्यान्विते पदानां सङ्गतिग्रहणादानयनादिलक्षणकार्यविशेषव्यभिचारेऽपि कार्यमात्रस्य सर्वत्रा-व्यभिचारात् तदन्वितस्वार्थेषु पदानां सामर्थ्यमिति कार्यशेषतयैव भूतानामभिधानमिति शङ्कायामाह—**अक्रियात्वेऽपीति**। कार्यस्य कार्यान्तराभावात् कार्यपदस्य तदन्वितस्वार्थाभिधायित्वासंभवाद् भावार्थकार्यान्वयस्य च कार्यान्वयोत्तरकालीनत्वादन्वित-स्वाभिधायित्वाभावाच्च कार्यपदस्य योग्येतरान्वितस्वार्थाभिधेयत्वमङ्गीकरणीयम्। तथा सत्येकप्रयोजकत्वाय सर्वत्र योग्येतरान्वय एव समर्थस्तत्रसादसामर्थ्यविषय इत्येवाभ्युपगन्तव्यम्। कार्यमात्रस्याव्यभिचारेऽपि सर्वत्र मानान्तर-तद्विषयशब्दयोरिव न शब्दार्थत्वम्; प्रयोगनिमित्ततया तयोरन्यथासिद्धिवत् प्रवृत्तिलिङ्गहेतुतयैव कार्यस्यान्वयनियमोपपत्तेरित्यभिप्रेत्य परिहरति—**नैष दोष इति**। **क्रियार्थत्वेऽपी**त्यपिशब्देनात्रारुचिं सूचयति। पुत्रस्ते जात इत्याद्यप्रवर्तकवाक्यादपि हर्षादिलिङ्गेन तद्धेतुप्रत्ययः; कार्यविषयेऽपि सामर्थ्यग्रहणादर्शनात्। ननु तथापि न स्वतन्त्रभूतोपदेशसंभवः; क्रियाशेषत्वेनैवान्यत्रोपदेशादित्यत आह—**क्रियार्थत्वमिति**। ननु कार्यशेषत्वाभावे प्रामाण्यमनुपपन्नमित्याशङ्क्यानधिगतार्थगन्तृत्वात् प्रामाण्यं प्रत्यक्षादिवदुपपन्नमित्याह—**न चैतावतेति**। ननु सर्वस्य प्रयोजनस्य क्रियाद्वारत्वात् प्रयोजनपर्यन्तत्वाच्च वाक्यप्रमाणस्य कार्यशेषत्वे शब्दस्याप्रामाण्यमनुपपन्नमिति शङ्कते—**यदि नामेति**। परिहरति—**उच्यत इत्यादिना**। **तथैवेति**। यथा क्रियासाधनवस्तूपदेशः प्रयोजनपर्यवसायितया प्रमाणम्, तथा वेदान्तवाक्यस्यापि प्रयोजनवद्वस्तूपदेशात् प्रयोजनवत्त्वमित्याह—**तदवगत्येति**। निगमयति—**इत्यविशिष्टमिति**।

न्यायनिर्णयः

कार्यस्याकार्यान्तरात्[1] कार्यपदस्य तदन्वितार्थवाचित्वाद् योग्येतरान्वयस्यैव सर्वपदशक्तिविषयत्वात् पुत्रजन्मादिवाक्ये चाद्यव्युत्पत्तेरकार्यार्थेऽपि दृष्टेर्भूतोक्तेरकार्यार्थत्वात् कूटस्थोक्तिः स्यादित्याह—**नैष इति**। उक्तरीत्या भूतोक्तेर्न कार्यार्थत्वम्। अस्तु वा तत्सापेक्षत्वाद् द्रव्यादेस्तदुक्तेस्तादर्थ्यम्, तथापि यत् कार्यनिर्वर्तनशक्तिमद् भूतं तदुक्तमेव। न च तत् कार्यं, तद्धेतुत्वात्। तस्य कार्यान्वयेऽपि न तदन्वयित्वं वाच्यत्वनिमित्तं; कार्यस्य तदभावेऽपि वाच्यत्वात्, अतो योग्यान्वितद्रव्यादेस्तच्छब्दवाच्यत्ववत् कार्याननन्वितस्यापि वस्तुनो वेदान्तार्थतेत्यर्थः। तथापि कार्यशेषत्वेनैवान्यत्र भूतोक्तेर्न स्वतन्त्रभूतोक्तिरित्याशङ्क्याह—**क्रियार्थत्वमिति**। भूतोपदेशस्य कार्यशेषत्वं फलवत्त्वायेष्टम्। न च कार्यस्य वाच्यकोटि-निवेशोऽस्तीत्यर्थः। कार्यार्थत्वेन भूतोक्तौ कार्याशेषेऽपि कथं सिद्धे शब्दप्रामाण्यम्? तत्राह—**न चेति**। भूतोपदेशस्य कार्यशेषत्वमात्रेण तदशेषभूतं भूतं नैवानुपदिष्टं, तदुपदेशस्याज्ञातार्थगन्तृत्वेनाध्यक्षादिवन्मानत्वादित्यर्थः। अज्ञातार्थोपदेशित्वेऽपि वेदान्तानामकार्यशेषत्वेन वैफल्यात्र प्रामाण्यं, वाक्यप्रामाण्यस्य फलाधीनत्वादिति शङ्कते—**यदीति**। भूतं यद्युपदिष्टमुपदिश्यतां नाम। तथापि किं तेनोपदिष्टेन तव श्रोतुर्वक्तुर्वा स्यादिति योजना। कार्योपदेशवदज्ञातात्मोपदेशात्मकं वेदान्तवाक्यमनन्यशेषत्वेऽपि फलवत्त्वेन मानमित्याह—**उच्यत इति**। कार्यशेषोपदेशस्य कार्यफलेन फलवत्त्वात् प्रामाण्येऽपि कथमात्मोपदेशस्य फलवत्त्वेन तथात्वमित्याशङ्क्याह—**तदवगत्येति**। मिथ्या च तदज्ञानं चेति विग्रहः। तस्य भ्रान्तित्वं व्यवच्छिनत्ति—**संसारेति**। वेदान्तप्रामाण्यं फलवत्त्वेन सदृष्टान्तमुक्तं निगमयति—

१. अकार्यान्तरात्=कार्यान्तराभावात्

संसारहेतोर्निवृत्तिः प्रयोजनं क्रियत इत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन।

अपि च 'ब्राह्मणो न हन्तव्यः' इत्येवमाद्या निवृत्तिरुपदिश्यते। न च सा क्रिया। नापि क्रियासाधनम्। अक्रियार्थानामुपदेशोऽनर्थकश्चेत् 'ब्राह्मणो न हन्तव्यः' इत्यादिनिवृत्त्युपदेशानामानर्थक्यं प्राप्तम्। तच्चानिष्टम्। न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रिया-

प्रकटार्थविवरणम्

वक्तुमित्याह—**ब्राह्मण इत्यादिना**। ननु स्वभावत एव शास्त्राद्युपदेशमन्तरेण प्राप्तो यो हन्तिधात्वर्थः, स यदा नञाऽनुरज्यते तदा भवत्यहननमिति। ततो हननविरोधिन्यहननक्रिया मानसि [मानसी] विधीयते अनेनेति विधिरेवायमित्याशङ्क्याह—**न च स्वभावप्राप्तेति**। हननक्रियाया निवृत्त्या यदौदासीन्यम्, तद्व्यतिरेकेण विधिपरत्वं कल्पयितुं [न] शक्यते, विधिनिषेधविभागस्य विलोपप्रसङ्गादिति भावः। किं च [1]यदा नञा न हन्त्यर्थः सम्बध्यते, तदा न भवत्यहननमिति, किन्तु हननप्रतिषेध एव, नञः

भाष्यभावप्रकाशिका

सकलस्याम्नायस्य क्रियापरत्वे निषेधवाक्यानि निरवकाशानि स्युः, अतः क्रियान्वयाभिधानवादिनाऽपि भूतेऽर्थे निषेधवाक्यसमन्वयः स्वीकर्तव्य इत्याह—**अपि च ब्राह्मण इति**। कृतेर्भावार्थविषयत्वादि-वदभावार्थभावात् कृतिनिवृत्तौ तदविनाभूतकार्यमपि निवर्तत इति भावः। ननु कस्मान्निवृत्तिरेव कार्यं न भवति? तत्साधनं वा? इत्यत आह—**न च सेति**। "प्राप्तक्रियानिवृत्तिरूपत्वादि"ति भाष्ये क्रियाशब्दः कार्यवचनः, ततः किमायातमिति? अत आह—**अक्रियार्थानामिति**। ननु अत्र हननं न कुर्यादिति वाक्यार्थो न भवति, किंत्वहननं कुर्यादिति। ततश्च हननविरोधिनी सङ्कल्पक्रिया हननं न कुर्यामित्येवंरूपा कर्तव्यताप्रत्ययेन विधीयत इत्याशङ्क्याह—**न च स्वभावेति। स्वभावप्राप्त इति**। शास्त्रमनपेक्ष्य रागत एव प्राप्त इत्यर्थः। एवंभूतहन्त्यर्थेन हननेन नञोऽनुरागो नञः संबन्धो यदा भवति, तदा भवत्यहननमिति, तत्कर्तव्यमित्युक्ते हननविरोधितयाऽ

न्यायनिर्णयः

इत्यविशिष्टमिति।

विधिवाक्यस्थद्रव्यादिशब्दानां शुद्धसिद्धार्थतामित्थमापाद्य तथैव ब्रह्म शाब्दमित्युक्तम्। इदानीं निषेधवाक्यवद् वेदान्तानां सिद्धार्थतेत्याह—**अपि चेति**। कृतेर्भावार्थविषयत्वान्निषेधेषु भावार्थाभावात् कृतिनिवृत्तौ तदविनाभूतं कार्यमपि निवर्तत इति मत्वाऽऽह—**ब्राह्मण इति**। निवृत्तिरेव कार्यं तद्धेतुर्वेति कुतो निषेधानामकार्यार्थतेत्याशङ्क्याह—**न चेति**। प्राप्तक्रिया-निवृत्तित्वात्तस्या नोभयथात्वम्। विमतं, न कार्यं, तद्धेतुर्वा, निवृत्तित्वात्, घटनिवृत्तिवदित्यर्थः। निवृत्तेरुभयभावाभावेऽपि किमायातं तदुपदेशानाम्, तदाह—**अक्रियेति**। अकार्यार्थानामिति यावत्। ननु 'न हन्तव्यः' इत्यत्र हननं न कुर्यादिति न वाक्यार्थः; किं त्वहननं कुर्यादिति। ततो हननविरोधिनी संकल्पक्रिया हननं न कुर्यामित्येवंरूपा कार्यतया विधीयते, तेन निषेधवाक्यमपि नियोगनिष्ठमेव, नेत्याह—**न चेति**। स्वभावतः शास्त्राद् ऋते रागादेव प्राप्तो यो हन्तेर्धातोरर्थो हननं तेन नञोऽनुरागः संबन्धो यदा तदा भवत्यहननमिति। तत् कार्यमित्युक्ते हननविरोधिनी संकल्पक्रिया, हननप्रवृत्तेर्विधारको यत्नो वा कार्यत्वेन विधीयते, विना विधिमप्राप्तत्वात्। तथा च तथाविधक्रियाविधिनिष्ठं निषेधवाक्यमिति कल्पयितुं नैव शक्यमित्यर्थः। क्व तर्हीदं वाक्यं त्वन्मते पर्यवसितम्? तदाह—**हननेति**। औदासीन्यं स्वास्थ्यादप्रच्युतिः स्वतोऽपि स्यादिति प्रसक्तक्रियानिवृत्त्योपलक्ष्यं विशिनष्टि—**हननेत्यादिना**। तस्मिन् पर्यवसितमस्मन्मते निषेधवाक्यम्। तद्व्यतिरेकेणार्थान्तरं तस्याशक्यं वक्तुमित्यर्थः। तत्र हेतुमाह—

१. 'यदा नञा हन्त्यर्थः सम्बध्यते' इति पाठः स्यात्। नञः धात्वर्थेन संबन्धं स्वीकृत्यैवैतद्ग्रन्थप्रवृत्तेः। प्रत्ययार्थेन तत्सम्बन्धस्याग्रे 'किं च' इत्यादिना वक्ष्यमाणत्वात्।

निवृत्त्यौदासीन्यव्यतिरेकेण। नञश्चैष स्वभावो यत् स्वसंबन्धिनोऽभावं बोधयतीति। अभावबुद्धिश्चौ-

प्रकटार्थविवरणम्

स्वसंबन्ध्युपमर्दरूपत्वादित्याह—**नञश्चैष इति**। किं च न धात्वर्थेन नञः संबन्धः, तस्यान्योपसर्जनत्वात्, किं तु प्रधानेन[1]। प्रत्ययार्थश्च इष्टसाधनत्वं प्रत्ययेनानूद्य निषिध्यते। तथा च ब्राह्मणहननमदृष्टाविरोधीष्टसाधनं न भवतीत्यर्थादनिष्टसाधनं भवतीति ज्ञात्वोदास्त इत्याह—**अभावबुद्धिश्चेति**। नन्वभावबुद्धौ सत्यां कथमौदासीन्यमित्याशङ्क्याह—**सा चेति**। उपसंहरति—

भाष्यभावप्रकाशिका

हननसङ्कल्पक्रिया, हननप्रवृत्तेर्विधारकः प्रयत्नो वा कर्तव्य इति विधीयते। विधिमन्तरेणाप्राप्तत्वादित्ययं पक्षोऽनुपपन्न इति भावः। तर्हि त्वत्पक्षे किंपर्यवसितमिदं वाक्यमिति? तदाह—**हननक्रियेति**। औदासीन्यं स्वभावतोऽप्यस्तीति प्रसक्तक्रियानिवृत्त्योपलक्ष्य विशिनष्टि—**हननक्रियानिवृत्त्यौदासीन्येति**। कुतो न शक्यमित्यत आह—**नञश्चेति**। चकारोऽवधारणार्थो भिन्नक्रमः—एष एवेति। न च तदन्यतद्विरोधिनोरपि मुख्ययैव वृत्त्या नञोऽभिधायकत्वादवधारणमयुक्तमिति वाच्यम्; अभावार्थत्वेऽपि नञः स्वेन संसृज्यमानादन्य-तद्विरोधिनोरभावसंबन्धिनोर्लक्षणयाऽपि वृत्तिसंभवे तत्रापि शक्तिकल्पनायां गौरवप्रसङ्गात्। अतोऽब्रह्मणाधर्मावन्यविरोधिनावित्यपि वाक्यस्य लक्षणयैवार्थान्तरे नञो वृत्तिप्रदर्शकत्वादिति भावः।

ननु तर्हि नञर्थे हननाभावे नियोगोऽस्तु, ततो नियोगनिष्ठमिदं वाक्यमिति, तत्राह—**अभावबुद्धिरिति**। भावार्थो दध्यादिगुणो वा नियोगविषयतया तन्निष्पत्तिहेतुः, नत्वभावः; अभावस्यानादिसिद्धत्वात्तद्विषयत्वे नियोगस्याननुष्ठेयत्वप्रसङ्गात्। न चास्य प्रागभावस्य परिपालनं कर्तव्यम्; स्वास्थ्यादप्रच्युतिलक्षणौदासीन्येनैव तत्परिपालनोपपत्तेरनुष्ठेयाभावादिति भावः। आस्ताम्, न प्रकृत्यर्थेन नञस्संबन्धः, किन्तु प्रत्ययार्थेन; प्रत्ययार्थस्यैव प्रधानत्वात्, प्रधानेनैवेतरेषामन्वयात्, प्रकृत्यर्थस्य चान्योपसर्जनत्वेनाप्रधानत्वात्; अतो हननक्रियाया यदिष्टसाधनत्वं प्रवर्तकम्, तदेव प्रत्ययेनानूद्य नञा प्रतिषिध्यते—ब्राह्मणहननमिष्टसाधनं न भवतीति। एतदाह—**अभावबुद्धिरिति**। का तर्हि हननक्रियानिवृत्तिरिति? तत्राह—**सा चेति**। प्रत्ययार्थभूतेष्टसाधनताया निषेधे प्रकृत्यर्थाद् हननात् स्वयमेव निवर्तते। आपाततोऽभिमतसाधनत्वबुद्ध्या प्रवृत्तस्य ततोऽधिकतरानर्थहेतुत्वावगमे पुंसः प्रवृत्त्ययोगादिति भावः।

एवं वा योजना—**न च हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण नञश्शक्यमप्राप्तक्रियार्थत्वं कल्पयितुम्**; कुतो न शक्यमिति? अत आह—**स्वभावप्राप्तहन्त्यर्थानुरागेण नञ इति**। अयमर्थः—हननपरोऽपि विधिप्रत्ययः प्रतीयमानो न तद्विधत्ते; तस्य रागतः प्राप्तत्वात्, न च नञः प्रसज्यप्रतिषेधो विधेयः; तस्याप्यौदासीन्यस्वरूपस्य सिद्धतया प्राप्तत्वात्। न च विधारकः प्रयत्नः; तस्याश्रुतत्वेन लक्ष्यमाणत्वात्, सति संभवे च लक्षणाया अन्याय्यत्वात्, विधिविभक्तेरप्राप्तविषयकत्वनियमेन रागतः प्राप्तप्रवृत्त्यनुवादकत्वेन विधिविषयत्वायोगात्। तस्माद् यद् हन्यादित्यनूद्य तन्नेति निषेधेन तदभावो ज्ञाप्यते, न तु नञर्थो विधीयत इति। ननु "न हन्तव्यः" इति नञर्थोऽभावः साध्यत्वेन प्रतीयमानत्वाद् विधिविषय इति, तत्राह—**नञश्चैष इति**। अयमर्थः—अभावः स्वविरोधिभावनिरूप्यतया भावानुकारित्वेन सिद्धे भावे सिद्धवत् साध्ये च साध्यवदवभासत इति साध्यविषयो नञर्थः साध्यवद् भासते। अतो नञर्थः कार्य इति भ्रमः, न तु तस्य कार्यतेति। ननु संबन्धिनोऽभावबोधनेऽपि हननोन्मुखानां मनो-वाग्-देहानां कुतोऽस्मान्निवृत्तिरिति? तत्राह—**अभावबुद्धिरिति**। औदासीन्यकारणम्=औदासीन्यपालनकारणमिति यावत्। अयं भावः

न्यायनिर्णयः

नञश्चेति। चकारोऽवधारणे। एष एव च नञः स्वभावो यत् प्रतियोगिनोऽभावबोधनम्। न च तदन्यतद्विरोधिनोरपि तदर्थत्वम्, अभावार्थस्यैव तस्य स्वार्थसंबन्धिन्यर्थान्तरे लाक्षणिकत्वे तत्रापि शक्तिकल्पनायां गौरवात्। 'नामधात्वर्थयोगी तु नैव नञ् प्रतिषेधकः। वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनौ' इत्यपि लक्षणयैवार्थान्तरे नञः प्रवृत्तिरुक्तेति भावः। तर्हि नञर्थे हननाभावे नियोगात् तन्निष्ठं वाक्यमित्याशङ्क्याह—**अभावेति**। भावार्थो दध्यादिर्वा नियोगविषयतया तन्निष्पत्तिहेतुर्नाभावः,

१. 'प्रत्ययार्थेन' इति शेषः।

दासीन्यकारणम्। सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति। तस्मात् प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव 'ब्राह्मणो न हन्तव्यः' इत्यादिषु प्रतिषेधार्थं मन्यामहे, अन्यत्र प्रजापतिव्रतादिभ्यः।

प्रकटार्थविवरणम्

तस्मादिति। ननु "नेक्षेतोद्यन्तमादित्यम्" इत्यादिष्वनीक्षणं कुर्यादिति तद्विरुद्धार्थत्वं दृष्टमित्याशङ्क्याह—**अन्यत्रेति**। अभाव एव नञो मुख्यार्थः। 'प्रजापतिव्रतादिषु तु "तस्य व्रतम्" इत्यनुष्ठेयाभिधायिव्रतशब्दविरोधाल्लक्षणयेक्षणविरोधिनि क्रियान्तरे वृत्तिरिति

भाष्यभावप्रकाशिका

—लोके प्रवृत्ति-निवृत्तिहेतुवाक्यश्रवणसमनन्तरं मध्यमवृद्धस्य प्रवृत्ति-निवृत्ती बालोऽनुमिमीते। इच्छाद्वेषहेतुके, अस्य प्रवृत्ति-निवृत्ती, स्वतन्त्रप्रवृत्तिनिवृत्तित्वात्; मदीयस्वतन्त्रप्रवृत्तिनिवृत्तिवदिति। अतस्तयोरिच्छाद्वेषयोः कर्तव्यतैकार्थसमवेतेष्टानिष्टसाधन-भावावगमपूर्वकतामध्यवस्यति, प्रवृत्तिनिवृत्तिहेतुभूतेच्छाद्वेषत्वाद् मत्प्रवृत्तिनिवृत्तिहेतुभूतेच्छाद्वेषवदिति, न जातु शब्दात्तद्व्यापार-पुरुषाशयत्रैकाल्यानवच्छिन्नभावनाऽपूर्वप्रत्ययपूर्वकताम्; स्वगतेच्छाद्वेषयोस्तत्प्रत्ययपूर्वकतानवगमात्। स चावगमः शब्दान्वय-व्यतिरेकानुविधायी शब्दजन्य इत्यध्यवस्यति। अतो लिङादिप्रत्ययानां कृतियोग्येष्टसाधनपरत्वादिष्टसाधनतां कर्तव्यतां च शब्दोऽवगमयति; अनन्यलभ्यत्वादुभयोः, अनन्यलभ्यस्य च शब्दार्थत्वात्। यत्र तु कर्तव्यताऽन्यत एव लभ्यते, यथा 'न हन्यात्' 'न पिबेत्' इत्यादौ; हननप्रवृत्ते रागत एव प्राप्तत्वात्, तत्र तदनुवादेन लिङ्विभक्तिर्नञन्विताऽन्यतोऽप्राप्तामनर्थहेतुतामवगमयति। अतो रागादिप्राप्तकर्तव्यतानुवादेनानर्थसाधनताबोधकमिदं वाक्यम्। निषेध्यस्य चानर्थसाधनताबुद्धिरेव निषेध्याभावबुद्धिः, प्रकृत्यर्थस्य हितसाधनत्वावगमेऽप्यधिकतरामनर्थहेतुतामालापयति, तत औदासीन्यमात्मनोऽवस्थापयतीति।

ननु अभावबुद्धिश्चेदौदासीन्यस्थापनकारणम्, तर्हि यावदौदासीन्यमनुवर्तेत, कारणाभावे कार्यावस्थानायोगात्, न चानुवर्तते; उदासीनस्यापि विषयान्तरव्यासक्तचित्तस्य तदभावादित्यत आह—**सा चेति**। एतदुक्तं भवति—न साक्षादौदासीन्यानवस्थान-कारणमभावबुद्धिः, अपित्वागन्तुकतद्विनाशहेतुनिरासेन, तेन स्तम्भादीनां प्रासादावस्थानकारणताऽभावात्, शस्त्रप्रहारनिरासेन राजजीवनावस्थानहेतुकवचादिवत् स्वावस्थानप्रतिबन्धकनिरासेनावस्थापनकारणत्वात् कवचापगमेऽसति च शस्त्रप्रहारे जीवना-वस्थानवदौदासीन्यावस्थानं न विरुध्यत इति। निषेधवाक्यानामर्थमित्थमुपपाद्य सिद्धवस्तुविषयत्वमित्युपसंहरति—**तस्मादिति**। ननु "नेक्षेतोद्यन्तमादित्यमि"त्यादावीक्षणविरोधिनी संकल्पक्रिया 'नेक्षे' इत्येवंरूपा विधीयते, तथाऽत्रापि हननक्रियाविरोधिनी 'न हन्यामि'ति सङ्कल्पक्रिया विधीयतामित्याशङ्क्याह—**अन्यत्र प्रजापतीति**। मुख्यवृत्त्या संसृज्यमानाभावप्रतिपादकस्य

न्यायनिर्णयः

तस्यानादित्वात्तद्विषयत्वे नियोगस्याननुष्ठेयत्वापातात्। न चैतत्प्रागभावपालनं कार्यं, स्वास्थ्यादप्रच्युतिरूपौदासीन्यादेव तत्सिद्धेः। नञोऽर्थो दृष्टः सन्नौदासीन्यं पुंसः स्थापयति। अतोऽनुष्ठेयाभावान्न नियोगनिष्ठं वाक्यमित्यर्थः। यद्वा न निषेधवाक्ये प्रकृत्यर्थेन नञः संबन्धः,अपि तु प्रत्ययार्थेन, तस्य प्राधान्यात् प्रकृत्यर्थस्यान्योपसर्जनत्वात्। अतो हननस्य यदिष्टोपायत्वं प्रवर्तकं तदेव प्रत्ययेनानूद्य नञा निषिध्यते, ब्रह्महननमिष्टोपायो नेति। तथा चौदासीन्ये पुरुषः स्थास्यति, तदाह—**अभावेति**। प्रत्ययार्थेन नञः संबन्धे कथं प्रकृत्यर्थस्य हननक्रियाया निवृत्तिः, तत्राह—**सा चेति**। प्रत्ययार्थेष्टोपायतानिषेधे प्रकृत्यर्थः स्वयमेव निवर्तते; आपाततो हितोपायत्वबुद्ध्या प्रवृत्तस्य ततोऽधिकतरानर्थहेतुत्वबुद्धौ प्रवृत्त्ययोगादित्यर्थः। निषेधवाक्यानामित्यमर्थमुक्त्वा सिद्धार्थत्वमुप-संहरति—**तस्मादिति**। भावार्थाभावे कृत्यभावात् तदविनाभूतकार्याभावस्तच्छब्दार्थः। प्रकृत्यर्थस्य हननादेरिष्टोपायत्वं भ्रान्तिप्राप्तं प्रत्ययेनानूद्य नञा तन्निषेधे तस्यानर्थहेतुत्वबोधिनिषेधवाक्यं तन्निवृत्त्युपलक्षितौदासीन्ये पर्यवस्यतीत्यर्थः। ननु 'नेक्षेतोद्यन्तमादित्यम्' इत्यादावीक्षणविरुद्धा संकल्पक्रिया 'नेक्ष' इत्येवंलक्षणा विधीयते, तथाऽत्रापि हननविरुद्धा 'न हन्या'मिति संकल्पक्रिया विधीयताम्, तत्कथं निषेधवाक्यस्योक्तार्थत्वं, तत्राह—**अन्यत्रेति**। तत्र हि 'तस्य ब्रह्मचारिणो व्रतम्'

---

१. द्र. पू.मी. ४.१.३ अधि.

तस्मात् पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यम्।

प्रकटार्थविवरणम्

भावः। 'तदेतदभिप्रेत्योक्तम्—'नामधात्वर्थयोगी तु नैव नञ् प्रतिषेधकृत्। वदन्त्यब्राह्मणाधर्मावन्यमात्रविरोधिनौ'''इति।

न च नास्त्येवाभावो नामेति वाच्यम्। अस्तितावत् नास्तिताया अप्यनुभवात्। न च भावान्तरमेवाभावः, प्रतियोगिसापेक्षत्वानपेक्षत्वलक्षणविरुद्धधर्माध्यासात्। न च यादृशं स्वरूपं तेऽभावाश्रयः, तादृशमभावव्यवहारगोचर इति चतुरश्रम्। यतो ममाभावविरोधिभावावरुद्धे नाभावो ज्ञायते, तव तु तदभावात् स्वरूपं चेदभावव्यवहारगोचरः, तर्हि सघटेऽप्यभावव्यवहारस्य को निवारयिता? यथा सत्यसति चाभावे नाभावं जन्म [अभावजन्म] किं तु सहानवस्थानम् प्रसिद्धमेव। तस्मात् 'निर्घटं भूतलम्' इति ज्ञानं विशेषणनिबन्धनं विशिष्टज्ञानत्वात्, 'सघटं भूतलम्' इति ज्ञानवत्। विशेषणं स्वरूपप्रतियोग्यतिरिक्तोऽभावः। स च योग्यानुपलब्धिगम्यः, उभयसंप्रतिपन्नानुपलब्धिसध्रीचीनेन मनसाऽभावग्रहणोपपत्तौ चक्षुषोऽसंप्रयुक्तप्रतीतिजनकताया अलौकिक्याः कल्पयितुमशक्यत्वात्, रूपे [अरूपे] च कल्पनीयत्वात्, कल्पनायाश्च गौरवदोषदुष्टत्वात्, प्राप्यकारित्वप्रमितिलिङ्गयोश्चाविशेषात्। न च गुणस्य गुणाश्रयत्वेऽनवस्था; द्रव्यस्य द्रव्याश्रयत्व-वदनपवादकत्वात्, स्वातन्त्र्योपलम्भमात्रेण द्रव्यव्यवहारात् न द्रव्यत्वप्रसङ्गः। तस्माद् योग्यताख्यसंयोगेनैव रूपग्रहणात् नासंयुक्तेऽभावे चक्षुषः प्रीति[प्रतीति]जनकता। अन्वयव्यतिरेकयोश्च धर्मिग्रहणोपक्षयादन्यथासिद्धेः। तस्मान्नाभावो-ऽक्षगम्योऽसंयुक्तत्वात् रसवत्। अनुपलब्धिस्तूपलब्धैवाभावज्ञानहेतुः, देवकुलादावनुपलब्धदेवदत्ताभावस्यापि स्मर्यमाणानुपलब्धेः मार्गेऽभावप्रतिपादनात्; न चानवस्था नित्यानुभवगम्यत्वादित्यलं प्रसङ्गागतेन। यस्मात् प्रतिषेधवाक्यानामक्रियार्थानामपि नानर्थक्यं तस्मादित्युपसंहारः।

भाष्यभावप्रकाशिका

नञ्शब्दस्यानुष्ठेयाभिधायिव्रतशब्दोपक्रमानुसारेण लक्षणया विरोधिक्रियान्तरे वृत्तिराश्रिता तत्र, अत्र तु न स हेतुः, तदापादका-भावात्, ततो विरोधिक्रियायां लक्षणावृत्तिमङ्गीकृत्यानुष्ठानपर्यवसायित्वं वाक्यस्य नाभ्युपगन्तव्यमिति भावः। तर्ह्यभियुक्तवचसां का गतिः? इत्याशङ्क्योपसंहारव्याजेन गतिं दर्शयति—**तस्मात् पुरुषार्थेति**। उपनिषदां तु पुरुषार्थब्रह्मरूपावगम-पर्यवसानमुक्तमिति भावः।

न्यायनिर्णयः

इत्यनुष्ठेयवाचिव्रतशब्दोपक्रमादेकस्मिन् वाक्ये प्रक्रमाधीनत्वादुपसंहारस्याऽऽख्यातान्वितेन नञा दृष्टोऽपि निषेधोऽननुष्ठे-यत्वादुपेक्ष्यते। धात्वर्थयोगेन च पर्युदासो लक्ष्यते। तथा चेक्षणविरुद्धा क्रिया सामान्येन प्राप्ता, तद्विशेषबुभुत्सायां सर्वक्रियाप्रत्यासन्नः संकल्प इत्यवगतम्। 'ईक्ष' इति तु संकल्पो नाद्रियते, तत्पर्युदासविरोधात्। अतोऽनीक्षणसंकल्पलक्षणया तद्विधिपरत्वं युक्तम्। नैवं निषेधेष्वपवादकमस्तीति विरोधिक्रियालक्षणया नानुष्ठाननिष्ठतेत्यर्थः। आदिपदं समस्तपर्युदासविषयसंग्रहार्थम्। हननादावुद्युक्तपरश्वादिपरावर्तनस्य तन्निवृत्तित्वात् तद्भावे हननादिप्रागभावपालनसंभवादुक्तनिवृत्तेश्च नञर्थधीफलत्वात् तदर्थो हननादिगतेष्टोपायत्वाभाव एवेति द्रष्टव्यम्। ननु निषेधवाक्यवदकार्यार्थत्वेऽपि वेदान्तानामर्थवत्त्वं चेदर्थवादाधिकरणं कथमित्याशङ्क्य क्रियासंनिहितार्थवादादिविषयं तदित्याह—**तस्मादिति**। उपनिषदामुक्तरीत्याऽर्थवत्त्वं तच्छब्दार्थः। उपाख्यानशब्दः सामान्यार्थः। आदिशब्दस्तद्विशेषार्थः। आम्नायस्य क्रियार्थत्वादिति हेतोस्तद्बलेनाक्रियार्थानाम-प्रामाण्यपूर्वपक्षस्य विध्येकवाक्यत्वेन प्रामाण्यसिद्धान्तस्य चोपलक्षणार्थमानर्थक्याभिधानमित्युक्तम्।

---

१. अनेकार्थत्वस्यान्याय्यत्वात्। तथा च 'तदन्यतद्विरुद्धतदभावेषु नञ्', 'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः' इत्यादिवचनं लक्ष्यार्थाभिप्रायमिति भावः। २. 'पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्' इति पर्युदासलक्षणम्। उत्तरपदमिति च क्रियावाचकप्रत्ययातिरिक्तपरम्। तथा च नामार्थेन, धात्वर्थेन च युक्तो नञ् न प्रतिषेधमभिधत्ते। यतः नञ् ब्राह्मणपदेन युक्तस्तदन्यमात्रं, धर्मपदेन युक्तः तद्विरोधिनं वदतीत्यर्थः। 'प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ्' इति प्रतिषेधलक्षणं बोध्यम्। क्रिया=आख्यातार्थभावना।

यदप्युक्तम्– कर्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमानमनर्थकं स्यात्, 'सप्तद्वीपा वसुमती'-त्यादिवदिति, तत् परिहृतम्। 'रज्जुरियं, नायं सर्प' इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात्। ननु श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम्। अत्रोच्यते- नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुं, वेदप्रमाणजनितब्रह्मात्मभावविरोधात्। न हि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति तस्यैव वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुम्। न हि धनिनो गृहस्थस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति। न च कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानरहितस्य तदेव कुण्डलित्वाभिमाननिमित्तं सुखं भवति। तदुक्तं श्रुत्या- 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छा.उ. ८।१२।१) इति।

शरीरे पतितेऽशरीरत्वं स्यात्, न जीवत इति चेन्न, सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्। न ह्यात्मनः

प्रकटार्थविवरणम्

पुनः परोक्तमनूद्य दूषयति—**यदप्युक्तमित्यादिना।** ब्रह्मात्मभावावगमात् प्राक् संसारित्वं नामागामिशरीरादिकारणवत्त्वम्, देहे चाग्रहग्रहः। न च तद् ब्रह्मात्मभावावगतावप्यस्ति, ज्ञानानलेन प्लुष्टत्वात्। कर्मशेषदोषवशात् प्रारब्धकार्यमात्रदर्शनं चाविरुद्धम्; यथाऽन्तःकीटदुष्टवटबीजे भाव्यङ्कुरादिजननशक्तिप्रतिहतावपि बाह्यबीजमात्रव्यवहारदर्शनम्, तद्वदित्याह—**नावगतब्रह्मात्मभावस्येत्यादिना।** उक्तमेव सदृष्टान्तं सप्रमाणं च प्रपञ्चयति—**न हीत्यादिना।** कर्मशेषसद्भावं दर्शयिष्यति स्वयमेव। अशरीरशब्दस्य व्युत्पत्तिबलेन विरोधमाह—**शरीरे पतित इति।** तत्र वक्तव्यम्—किं नैमित्तिकमशरीरत्वं शरीरे पतिते स्यात् उत स्वाभाविकम्? तत्रागामिसकलशरीरादिकारणाभाववत्त्वं नैमित्तिकमशरीरत्वं जीवतोऽप्यविरुद्धमित्याह—**न सशरीरत्वस्येति।** अभिमानोऽनेन

भाष्यभावप्रकाशिका

पूर्ववादिनोक्तमनुवदति—**यदप्युक्तमिति।** निगूढाभिसन्धिः पूर्वोक्तं परिहारं स्मारयति—**ननु श्रुतब्रह्मणोऽपीति।** श्रवणमात्रज्ञानोत्तरकालं संसारित्वमुच्यते? किं वा तत्त्वसाक्षात्कारज्ञानोत्तरकालम्? इति विकल्प्य, तत्राद्योऽङ्गीक्रियते, उत्तरपक्षस्तु न संभवतीत्याह—**नावगतेति।** तत् प्रपञ्चयति—**न हीति।** अत्रैव दुःखसुखानुत्पादे भेदेनोदाहरणद्वयमाह—**न हि धनिन इति।** अत्रैव श्रुतिमुदाहरति—**तदुक्तमिति।** जीवतोऽशरीरत्वमनुपपन्नमिति चोदयति—**शरीर इति।** परिहरति—**सशरीरत्वस्येति।** यदि

न्यायनिर्णयः

सर्वेषामेषामुक्तविषयत्वाविशेषादुपनिषदामपि पुरुषार्थानवसायित्वादर्थवादाधिकरणविषयतेत्याशङ्क्य पूर्वपक्षोक्तमनुवदति—**यदपीति।** तत्रोक्तं परिहारं स्मारयति—**तदिति।** उक्तं वैषम्यं शङ्कते—**नन्विति।** ज्ञानमात्रादूर्ध्वं वा संसारित्वं, तत्त्वसाक्षात्काराद्वा। तत्राद्यमङ्गीकुर्वन्नाह—**अत्रेति।** द्वितीयं निरस्यति—**नेत्यादिना।** तत् प्रपञ्चयति—**न हीति।** शाब्दज्ञानाभ्याससंस्कृतं चेतो ब्रह्मात्मसाक्षात्कारहेतुरिति पक्षं प्रतिक्षेप्तुं वेदेत्यादि पदम्। तत्त्वसाक्षात्कारवतो दुःखानुदये दृष्टान्तमाह—**न हीति।** तस्यैव सांसारिकसुखानुत्पादे दृष्टान्तमाह—**न चेति।** तत्त्वविदो देहाद्यभिमानहीनस्य सांसारिकसर्वधर्मास्पर्शे मानमाह—**तदुक्तमिति।**

जीवतोऽशरीरत्वं 'मम माता वन्ध्ये'तिवद् विरुद्धमिति शङ्कते—**शरीर इति।** आत्मनो देहसंगतेराविद्यकत्वात् तत्त्वज्ञानेन

शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वाऽन्यतः सशरीरत्वं शक्यं कल्पयितुम्। नित्यमशरीरत्वमकर्मनिमित्तत्वादित्यवोचाम। तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेन्न, शरीरसंबन्धस्यासिद्धत्वाद् धर्माधर्मयोरात्मकृतत्वासिद्धेः। शरीरसंबन्धस्य, धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गादन्धपरम्परैषाऽनादित्वकल्पना। क्रियासमवायाभावाच्चात्मनः कर्तृत्वानुपपत्तेः। संनिधानमात्रेण राजप्रभृतीनां

प्रकटार्थविवरणम्

लक्ष्यत इति लक्षणं कारणमित्यर्थः। स्वाभाविकमशरीरत्वं पूर्वमपि सिद्धमित्याह—**नित्यमिति**। सत्य एवात्मनः शरीरसंबन्धो न मिथ्याज्ञाननिमित्त इत्याह—**तत्कृतेति**। आत्मकृतधर्माधर्मनिमित्तं सशरीरत्वम्, आत्मनः सशरीरत्वे च सिद्धे धर्माधर्मयोः तत्कृतत्वमितीतरेतराश्रयप्रसङ्गेन परिहरति—**नेति**। ननु यद्येतच्छरीरकृतधर्माधर्मादिनिमित्त एतच्छरीरसंबन्धः, तदा भवेदन्योऽन्याश्रयत्वम्, न तु तथा; किं तु पूर्वपूर्वकर्मकृत उत्तरोत्तरशरीरसंबन्ध इति, बीजाङ्कुरवदनादित्वात् नानवस्थाऽपीत्याशङ्क्याह—**अन्धपरम्परैषेति**। इदानीं बीजाङ्कुरयोर्निमित्तनैमित्तिकभावदर्शनात् स पूर्वमप्येवमिति भवेद् विश्वासः। इह पुनः परमार्थशरीरसंबन्धस्य कर्मसंबन्धस्य चात्मनोऽदृष्टत्वात् प्रथमत एव कल्प्यमानत्वात् न तत्राप्यवस्थानमिति न तात्त्विकः शरीरसंबन्धः। स्वपक्षे पुनः कर्मशरीरयोर्निमित्तनैमित्तिकभावेन वर्तमानयोरनाद्यज्ञानोपादानत्वेनात्मसंबन्ध इति नानवस्था। इतश्च न तात्त्विक इत्याह—**क्रियेति**। पूर्वं निरस्तमपि मतं प्रसङ्गादुद्भाव्य दूषयति—"**सन्निधानमात्रेण**" इत्यारभ्य "**तथा च**

भाष्यभावप्रकाशिका

वास्तवं सशरीरत्वं भवेत्, न जीवतस्तन्निवर्तेत, मिथ्याज्ञाननिमित्तं तु तत्त्वतो जीवतोऽप्युत्पन्नतत्त्वज्ञानेन निवर्तयितुं शक्यमिति भावः। ततश्च सशरीरत्वमज्ञाननिमित्तमित्याह—**नित्यमिति**। कर्मनिमित्तः शरीरसंबन्धो न मिथ्याज्ञाननिमित्त इति शङ्कते—**तत्कृतेति**। ननु इदानीन्तनशरीरसंबन्धः, प्राक्तनकर्मनिबन्धनः, तच्च कर्म प्राक्तनशरीरसंबन्धात्, सोऽपि प्राक्तनकर्मवशात्, न चानवस्था दोषाय; बीजाङ्कुरवदनादित्वादिवत्, इत्याशङ्क्याह—**अन्धपरम्परेति**। कर्मसंबन्धस्य शरीरसंबन्धस्य वाऽऽत्मनि केनापि प्रमाणेनादृष्टत्वादिति भावः।

ननु आत्मनः स्वत एव कर्तृत्वाद् धर्माधर्मयोस्तत्कृतत्वसिद्धेर्नेतरेतराश्रयत्वादिदोष इति, तत्राह—**क्रियेति**। उपार्जनम्=स्वीकरणम्। इतरसंबन्धे यद्यपि प्रमाणाभावः; तथाऽपि त्वदभिमतसंबन्धो न सिध्येत्; तत्रापि प्रमाणाभावात्,

न्यायनिर्णयः

तद्ध्वस्तेर्जीवतोऽपि युक्तमशरीरत्वमित्याह—**नेत्यादिना**। तस्याविद्यकत्वमन्वयव्यतिरेकाभ्यां साधयति—**न हीति**। अशरीरत्वस्य स्वतस्त्वादपि जीवतस्तदविरुद्धमित्याह—**नित्यमिति**। आत्मनः सशरीरत्वमज्ञानादित्युक्तममृष्यन्नाशङ्कते—**तत्कृतेति**। 'न ह्यात्मन' इत्यत्र प्रकृतात्मा तच्छब्दार्थः। आत्मनो देहसंबन्धाद् धर्मादिकर्तृत्वं, स्वतो वा? आद्ये तस्य तद्योगः स्वतोऽन्यतो वा। नाद्यः, तत्कृतधर्मादिनिमित्तं सशरीरत्वमित्युक्तिविरोधात्। न द्वितीयः, तस्याविद्यामनिच्छता वस्तुत्वोपगमाद् धर्मादिकर्तृत्वादृते तस्यातन्निमित्तत्वाद् देहे धर्मादिकार्यदृष्टेस्तदसिद्धौ तद्द्वारा धर्मादेरात्मकृतत्वासिद्धेरित्याह—**नेत्यादिना**। स्यादात्मकृतधर्माद्यपेक्षया तस्य देहयोगे तद्द्वारा तयोरात्मकृतत्वमित्याशङ्क्याह—**शरीरेति**। ननु प्राक्तनकर्मनिमित्तं संप्रतितनं शरीरं, तच्च कर्म प्राक्तनदेहयोगाधीनं, सोऽपि प्राचीनकर्मणेति नेतरेतराश्रयत्वम्। न चानवस्था, बीजाङ्कुरवत् कर्मदेहयोगयोरनादित्वात्, तत्राह—**अन्धेति**। आत्मनि कर्मयोगस्य देहयोगस्य वाऽविद्यमानत्वादित्यर्थः। आत्मनः स्वतो धर्मादिकर्तृतेति पक्षं प्रत्याह—**क्रियेति**। कूटस्थानन्तचिद्धातोरक्रियत्वात् तस्य स्वतो धर्माद्यकर्तृत्वान्न तत्कृतकर्मकृतमात्मनः सशरीरत्वमित्यर्थः। स्वगतक्रियाऽभावेऽपि कारकेषु संनिधिमात्रेणास्य कर्तृतेति दृष्टान्तेन शङ्कते—**संनिधीति**। वैषम्योक्त्या प्रत्याह—**नेति**। उपार्जनं स्वीकरणम्। अस्तु प्रस्तुतेऽपि किंचिद् धनदानादितुल्यं संबन्धनिमित्तमित्याशङ्क्यासङ्गत्वादात्मनो वस्तुतस्तस्यायोगादवस्तुत्वे

दृष्टं कर्तृत्वमिति चेन्न, धनदानाद्युपार्जितभृत्यसंबन्धित्वात् तेषां कर्तृत्वोपपत्तेः। न त्वात्मनो धनदानादिवच्छरीरादिभिः स्वस्वामिसंबन्धनिमित्तं किंचिच्छक्यं कल्पयितुम्। मिथ्याभिमानस्तु प्रत्यक्षः संबन्धहेतुः। एतेन यजमानत्वमात्मनो व्याख्यातम्।

अत्राहुः– देहादिव्यतिरिक्तस्यात्मन आत्मीये देहादावभिमानो गौणो, न मिथ्येति (चेत्)। न; प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः। यस्य हि प्रसिद्धो वस्तुभेदः, यथा केसरादिमानाकृति-विशेषोऽन्वयव्यतिरेकाभ्यां सिंहशब्दप्रत्ययभाङ्मुख्योऽन्यः प्रसिद्धः, ततश्चान्यः पुरुषः प्रायिकैः क्रौर्यशौर्यादिभिः सिंहगुणैः संपन्नः सिद्धः, तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतो, नाप्रसिद्ध-वस्तुभेदस्य। तस्य त्वन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतो न गौणौ। यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायामकस्माद् रजतमिति

भाष्यभावप्रकाशिका

इत्याशङ्क्याह—**मिथ्येति**। ममेदमिति प्रतिपत्तिसमर्थमधिकारिणं कर्तारं चोद्दिश्य यागादिविधानाच्चेतनस्यैव कर्तृत्वमिति, तत्राह—**एतेनेति**। एतेन क्रियासमवायित्वनिराकरणेन 'यजमानत्वमप्यात्मा सक्रियत्वात्प्रपद्यते, न परिस्पन्द एवैकः क्रिया नः कणभोजिवत्', इति यदुच्यते, तन्निराकृतमित्यर्थः। अथवा शरीरसंबन्धस्य मिथ्याज्ञाननिमित्तत्वप्रदर्शनेन ब्राह्मण्यादिविशिष्टस्य यजमानत्वं परमार्थतो नास्तीति दर्शितमित्यर्थः। आत्मीयतयैव देहादावात्मसंबन्धो भवति, ततस्तस्यात्मीयदेहादौ क्षतेरिव राज्ञ आत्मबुद्धिः, ततः स्वकीयदेहादिनिबन्धनं कर्तृत्वं प्रमातृत्वं च पारमार्थिकमिति मन्वानः शङ्कते—**देहादीति**।

परिहरति—**न प्रसिद्धेति**। प्रसिद्धो वस्तुभेदो यस्य पुरुषस्य, स तथोक्तः। तदेव प्रपञ्चयति—**यस्य हीति**। **नाप्रसिद्धवस्तुभेदस्येति**। गौणत्वलक्षणाभावाद् न गौण इत्यर्थः। पूर्वं संशये समारोपितं निश्चितरूपमुदाहृत्य विपर्ययज्ञाने

न्यायनिर्णयः

त्वन्मतहानिरिति मत्वाऽऽह—**न त्विति**। स्वकृतधर्मादिकृताऽऽत्मनः सदेहतेत्येतदप्रामाणिकमित्युक्त्वा स्वपक्षे मानमाह—**मिथ्येति**। ननु ममेतिधीसक्तमधिकारिणं कर्तारं चोद्दिश्य यागादिविधेश्चेतनस्यैव कर्तृत्वम्। यथाहुः—'यजमानत्वमप्यात्मा सक्रियत्वात्प्रपद्यते। न परिस्पन्द एवैकः क्रिया नः कणभोजिवत्।।' इति, तत्राह—**एतेनेति**। क्रियाधारत्वनिरासेनेत्यर्थः।

देहादावात्मधीर्मिथ्येत्यत्र मीमांसकश्चोदयति—**अत्रेति**। आत्मनः स्वकीये देहादावात्मधी राज्ञो भृत्यादाविव गौणी। ततः स्वीयदेहादिनिमित्तं तस्य कर्तृत्वादि वास्तवमित्यर्थः। नात्मनो देहादावात्मधीर्गौणी, तद्व्यापकाभावादित्याह—**नेति**। प्रसिद्धो वस्तुभेदो यस्य पुंसस्तस्येति यावत्। उक्तमेव व्यनक्ति—**यस्येति**। तस्यान्यत्रान्यशब्दप्रत्ययौ गौणाविति संबन्धः। तत्रोदाहरणम्—**यथेति**। तत्रैव सिंहशब्दस्तद्धीश्च, नान्यत्रेत्यन्वयव्यतिरेकौ। **अन्यः** पुरुषादिति शेषः। **ततश्च** सिंहादित्येतत्। यः सिंहपुरुषयोरुक्तरीत्या भेदं वेत्ति तस्येति षष्ठी नेया। यथा सिंहः पुमानित्युदाहरणं तथाऽग्निर्माणवक इत्यादि ग्राह्यमिति यथाशब्दो योज्यः। शब्दधियोरगौणत्वविषयमाह—**नेति**। न प्रसिद्धो भेदो यस्य तस्य पुंसोऽन्यत्रान्यशब्दप्रत्ययौ न गौणौ चेत् कथं तर्हि तस्यान्यत्रान्यशब्दप्रत्ययावित्याशङ्क्याह—**तस्य त्विति**। तत्र संशये समारोपितांशगतौ शब्दप्रत्ययावुदाहरति—**यथेति**। पुरोवर्तिनः स्थाणुत्वेऽपि स्थाणुरयमित्यगृह्यमाणविशेषत्वे हेतुमाह—**मन्देति**। तत्र पुरुषशब्दप्रत्ययौ पाक्षिकाविति शेषः। वस्तुतः स्थाणुविषयत्वं, न प्रतीतितः; प्रतीतितस्त्वारोपितविषयत्वम्। संशये समारोपितगतौ पाक्षिकौ शब्दप्रत्ययावुदाहृत्य विपर्यये तथाविधौ निश्चितावुदाहरति—**यथा वेति**। शुक्तिकायामिति वस्तुप्रवृत्त्योक्तम्। संशये विपर्यये च दृष्टहेतुसाधारणधर्मदर्शनादेः

निश्चितौ शब्दप्रत्ययौ, तद्वद् देहादिसंघातेऽहमिति निरुपचारेण शब्दप्रत्ययावात्मानात्माविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम्। आत्मानात्मविवेकिनामपि पण्डितानामजाविपालानामिवाविविक्तौ शब्दप्रत्ययौ भवतः। तस्माद् देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैव, न गौणः। तस्मान्मिथ्या-प्रत्ययनिमित्तत्वात् सशरीरत्वस्य, सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम्। तथा च ब्रह्मविद्विषया श्रुतिः–'तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते। अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' (बृ.उ. ४।४।७) इति। 'सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इव' इति च। स्मृतिरपि च–'स्थितप्रज्ञस्य का भाषा' (भ.गी. २।५४) इत्याद्या स्थितप्रज्ञलक्षणान्याचक्षाणा विदुषः सर्वप्रवृत्त्यसंबन्धं दर्शयति। तस्मान्नावगतब्रह्मात्मभावस्य यथापूर्वं

प्रकटार्थविवरणम्

ब्रह्मविद्विषया'' इत्यतः प्राक्तनेन। विदुषोऽपि शरीराद्याभासानुवृत्तौ प्रमाणमाह—**तथा चे**त्यादिना। अहिनिर्ल्वयनी सर्पत्वक्। प्राणोपलक्षितो जीवो जीवन्नपि ब्रह्मैव। अपतितेऽपि देहे तेज एव परमात्मैव भवति। अचक्षुरपि सचक्षुरिवेति विपरीतोऽन्वयः। सर्वाः प्रवृत्तीः शरीरगता एव मन्यते अविक्रियब्रह्मात्मतां मन्यमान इति प्रवृत्त्यसंबन्ध इत्यर्थः। उक्तनीत्या सिद्धवस्तुज्ञानस्यापि सप्रयोजनत्वात् 'वेदान्ता नियोगपराः, शास्त्रत्वात्' इत्यस्याप्रयोजकत्वं सिद्धम्।

भाष्यभावप्रकाशिका

निश्चितमुदाहरति—**यथा वेति। अकस्मादिति।** संशये विपर्यये च दृष्टस्य हेतोः साधारणधर्मदर्शनसंस्कारोद्बोधहेतुसादृश्यादेः समानत्वेऽप्यदृष्टवशाद् विपर्ययो जायत इत्यर्थः। ननु विवेकिनोऽप्यहंशब्दप्रत्ययदर्शनादज्ञाननिमित्तत्वाभावे गौणोऽयमित्या-शङ्क्याह—**आत्मानात्मविवेकिनामिति।** आत्मीयेऽपि देहादावात्मबुद्ध्यैवात्मीयत्वं तिरोहितं भवति। सर्पबुद्धाविव रज्जुत्वमित्यर्थः। परमप्रकृतमुपसंहरति—**तस्मान्मिथ्येति।** न केवलं यौक्तिकोऽयमर्थः, श्रुतिस्मृतिप्रतिपन्नोऽपीति दर्शयति—**तथा चेति।** निर्ल्वयनी=निर्मोकः। अचक्षुस्सचक्षुरिवेत्यादि योजना।

न्यायनिर्णयः

समत्वाद् विपर्ययस्यैवोत्पत्तौ को हेतुरित्याशङ्क्याह—**अकस्मादिति।** दृष्टहेत्वविशेषेऽप्यदृष्टवशादित्यर्थः। दृष्टान्तमिथुनस्य दार्ष्टान्तिकमाह—**तद्वदिति।** अविवेकिनां देहादावहंधीशब्दयोर्मिथ्यात्वेऽपि विवेकिनां तत्र तौ गौणावित्याशङ्क्याह—**आत्मेति। अविविक्तावविवेकोत्थभ्रान्तिकृताविति** यावत्। आत्मीयेऽपि देहादावात्मबुद्धावात्मीयत्वं तिरोहितं, सर्पबुद्धाविव रज्जुत्वमिति मत्वा परमतनिरासमुपसंहरति—**तस्मादिति।** तत्राहंधियो मिथ्यात्वेऽपि किं सिध्यति, तदाह—**तस्मान्मिथ्येति।** न केवलं विदुषो जीवतोऽप्यशरीरत्वं यौक्तिकम्, किंतु श्रौतं चेत्याह—**तथा चेति।** 'अत्र ब्रह्म समश्नुते' इति पूर्ववाक्ये जीवन्मुक्तिरुक्ता, स जीवन्मुक्तो देहस्थोऽपि पूर्ववन्न संसारीत्यत्र दृष्टान्तमाह—**तद्यथेति।** तत् तत्र जीवन्मुक्तदेहे जीवन्मुक्ते च दृष्टान्तः। यथा लोकेऽहिनिर्ल्वयनी सर्पनिर्मोकस्तदीया देहत्वग् वल्मीकादौ प्रत्यस्ता मृता पूर्वमिवाहिनाऽऽत्मत्वेनानिष्टा वर्तेत, तथैवेदं विदुषः शरीरं मुक्तेन प्रागिवाऽऽत्मत्वेनानिष्टं तिष्ठतीत्यर्थः। सर्पदृष्टान्तस्य दार्ष्टान्तिकमाह—**अथेति।** तथार्थोऽथशब्दः। यथा प्रत्यस्तया त्वचा मुक्तोऽपि तामहमिति नाहिरभिमन्यते, तथाऽयं जीवन्मुक्तो देहस्थोऽपि न तत्राहंधियमादधाति। अत एवामृतः। देहाभिमानवतो हि मृतिः। निरुपाधिः सन् प्राणिति जीवतीति प्राणः साक्षी। स च बह्मैव। तच्च तेजो विज्ञानं ज्योतिरेवेत्यर्थः। तत्रैव श्रुत्यन्तरमाह—**सचक्षुरिति।** वस्तुतोऽचक्षुरपि बाधितानुवृत्त्या सचक्षुरिवेत्यादि योज्यम्। श्रौतेऽर्थे स्मृतिमपि संवादयति—**स्मृतिरपीति।** विदुषो

संसारित्वम्। यस्य तु यथापूर्वं संसारित्वं नासाववगतब्रह्मात्मभाव इत्यनवद्यम्।

यत्पुनरुक्तं श्रवणात् पराचीनयोर्मनननिदिध्यासनयोर्दर्शनाद् विधिशेषत्वं ब्रह्मणो न स्वरूपपर्यवसायित्वमिति। न; अवगत्यर्थत्वान्मनननिदिध्यासनयोः। यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत, भवेत् तदा विधिशेषत्वम्। न तु तदस्ति। मनननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात्। तस्मान्न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवतीत्यतः स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं वेदान्तवाक्यसमन्वयादिति सिद्धम्।

प्रकटार्थविवरणम्

पुनः परोक्तमनुभाषते—**यत्पुनरिति**। दूषयति—**नेति**। श्रवणवन्मनननिदिध्यासनयोरप्यवगत्यर्थत्वात्, स्वातन्त्र्येणावगतिजननसमर्थमहावाक्यशेषभूतार्थवादत्वात्, न मननाद्यवष्टम्भेन वेदान्तानां नियोगनिष्ठताकल्पना। कल्पिते महावाक्यशेषभूतार्थवादत्वे श्रवणादिवाक्यानां श्रवणादिविधानं प्रथमसूत्रसूत्रितं परित्यक्तं स्यादिति चेत्? न; ब्रह्मसाक्षात्कारेण श्रवणादीनां साध्यसाधनभावस्यापूर्वत्वात्,[1] क्रियारूपतया च विधिजन्यपुरुषेच्छाप्रयत्नसाध्यत्वात्, अवान्तरतात्पर्येण श्रवणादिविधानसंभवात् यथा[2] दर्शपूर्णमासविधिशेषेण "न मलवद्वाससा विसंवदेत् [संवदेत]" "नास्या अन्नमद्यात्" इत्यनेन तदभिगमनप्रतिषेधो विधीयते। तदुक्तं "प्रागवरोधान्मलवद्वाससः" इति। यस्मात् प्रतिपत्तिनियोगवाद्युद्भावितः सकलोऽप्यवकरोऽपाकृतः तस्मादित्युपसंहारः।

भाष्यभावप्रकाशिका

ननु ब्रह्मात्मत्वावगमः संसारिणामस्माकमसिद्ध इति, तत्राह—**यस्य त्विति**।

श्रुतस्य ब्रह्मणोऽनेन निदिध्यासनकर्तव्यशेषत्वेन समर्पणाद्विधिशेषत्वमुक्तमनूद्य दूषयति—**यत्पुनरिति**। एतदेव स्पष्टयति—**यदीति**। श्रुतमात्रस्य मननादिसंबन्धः नावगतस्येति भावः। उक्तेऽर्थे सूत्रं योजयति—**अत इति**। "तत्तु समन्वयात्" अस्त्येवेति

न्यायनिर्णयः

जीवन्मुक्तौ प्रमितायां फलितमाह—**तस्मान्नेति**। प्रमितं जीवन्मुक्तिसत्त्वं तच्छब्दार्थः। प्रतीतिमात्रशरीरं संसारित्वमनुजानाति—**यथेति**। ननु ब्रह्मविदामेवास्माकं संसारित्वमबाधितमनुभूयते, नेत्याह—**यस्येति**। साक्षात्कृतसत्तत्त्वस्य पूर्वमिव संसारित्वायोगाद् युक्ता वस्तुमात्रोक्ते रज्जुस्वरूपोक्तिवदर्थवत्तेत्युपसंहरति—**अनवद्यमिति**।

वेदान्तेषु नास्ति वस्तुमात्रोक्तिः, मननादिविधिशेषत्वेन ब्रह्मोक्तेरित्याशङ्क्योक्तमनुवदति—**यत्पुनरिति**। श्रुतमात्रस्य मननादियोगो, नावगतस्येत्याह—**नेत्यादिना**। वेदान्तानामेकरसे ब्रह्मणि शक्तितात्पर्यनिश्चयः श्रवणम्। तस्मिन्नेव श्रुत्यनुसारिण्या युक्त्या संभावनाधानं मननम्। श्रुते मते च बुद्धेः स्थैर्यं निदिध्यासनम्। तेषामैक्यापरोक्षप्रतीतिव्यञ्जकत्वे तच्छेषत्वान्नावगतमन्यत्र विनियुक्तमित्यर्थः। अवगतस्यान्यत्राविनियोगेऽपि ब्रह्मणो विधिशेषत्वं किं न स्यात्, तत्राह—**यदीति**। ब्रह्मणि मितेऽमिते वा तद्धियो विध्यसिद्धेरापातदृष्टेः साक्षात्कारार्थं श्रवणादिषु विहितेषु तेभ्यस्तद्भावान्न तस्य विधिशेषतेत्युपसंहरति—**तस्मान्नेति**। न च वस्तुप्रकरणे श्रवणादिविध्ययोगः, वाक्यभेदोपगमात्। न च 'तद्विषये लिङादयः' इत्यादिभाष्यविरोधः, तस्य ज्ञानविधिनिरासार्थत्वात्। अत एवात्र प्रतिपत्तिशब्दः। न चैवं वेदान्तानां श्रवणादिविधिपरत्वं, वाक्यभेदस्योक्तत्वात्। न चान्वयादिसिद्धहेतुभावेषु तेषु न विधिः, अवघातेऽपि तदभावापातात्। नियमादृष्टस्योभयत्र तुल्यत्वात्, सर्वापेक्षाधिकरणात् तस्य ज्ञानोत्पत्त्युपयोगादिति भावः। उक्तेऽर्थे सूत्रं संयोजयति—**अत इति**। विधिशेषत्वेन शास्त्रप्रमाणकत्वासिद्धिरित्यतःशब्दार्थः।

---

१. लोकतोऽज्ञातत्वादित्यर्थः।

२. द्र.पू.मी. ३-४-२४. अत्र दर्शपूर्णमासप्रकरणे पठितस्यापि उक्तनिषेधस्य 'तामपरुध्य यजेत' इति वचनात् क्रतौ संवादाप्रसक्तेः प्रकरणबाधेन पुरुषार्थत्वमुक्तम्। अत्र च 'तिस्रो रात्रीर्व्रतं चरेत्' इति मलवद्वाससो व्रतविधानमपि दृष्टान्तः। सति चैवं ब्रह्मप्रकरणे तदवगत्यर्थं श्रवणादिविधानं सुतरामुपपन्नम्।

एवं च सति 'अथातो ब्रह्मजिज्ञासा' इति तद्विषयः पृथक्शास्त्रारम्भ उपपद्यते। प्रतिपत्तिविधिपरत्वे हि 'अथातो धर्मजिज्ञासा' इत्येवारब्धत्वान्न पृथक्शास्त्रमारभ्येत। आरभ्यमाणं चैवमारभ्येत-'अथातः परिशिष्टधर्मजिज्ञासा' इति, 'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' (जै.सू. ४।१।१) इतिवत्। ब्रह्मात्मैक्यावगतिस्त्वप्रतिज्ञातेति तदर्थो युक्तः शास्त्रारम्भः-'अथातो ब्रह्मजिज्ञासा' इति। तस्मादहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः, सर्वाणि चेतराणि प्रमाणानि। न ह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाण्यप्रमातृकाणि च प्रमाणानि भवितुमर्हन्तीति।

प्रकटार्थविवरणम्

स्वातन्त्र्येणैव शास्त्रप्रमाणकं ब्रह्मेत्येतस्मिन्नेव मते पृथक्शास्त्रारम्भोऽप्युपपद्यत इत्याह—**एवं च सतीति**। ननु मानसव्यापारमात्रसाध्यनियोगनिरूपणाय पुनरारम्भो भविष्यतीत्याशङ्क्याह—**आरभ्यमाणं चेति**। यथा तृतीये श्रुत्यादिभिः शेषशेषिभावमभिधायानन्तरं किं क्रतुशेषभूतं किं वा पुरुषशेषभूतमिति वीक्षायां चतुर्थमारभमाणोऽभ्यधात् "अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा" इतिवदभि[तद्वदभि]दध्यात्। न चाभ्यधादित्यर्थः। इदानीं स्वमते सूत्रसामञ्जस्यमाह—**ब्रह्मात्मैक्येति**। ननु यदि स्वातन्त्र्येण ब्रह्मात्मैकत्वनिष्ठा वेदान्ताः, तर्हि तदेव परमार्थवस्त्विति कथं द्वैतालम्बनस्य विधिकाण्डस्य, प्रत्यक्षादेश्च प्रामाण्यमित्याशङ्क्याह—**तस्मादिति**। प्रमातृव्यापारसंसृष्टो हि घटादिश्चितो विषयतामियर्त्ति।' न तु स्वत एवासङ्गायाश्चितो विषयसङ्गः। तस्माद् ब्रह्मात्मैक्यावगतेः प्रागेव प्रमाणादिव्यवहार इत्यर्थः।

भाष्यभावप्रकाशिका

प्रथमवर्णके योजना। समन्वयादेवेति द्वितीये।

शास्त्रारम्भभेदोऽपि विधिनिरपेक्षभूतवस्तुप्रतिपादकत्वं वेदान्तानां गमयतीत्याह—**एवं चेति**। अन्यथानुपपत्तिमाह—**प्रतिपत्तिविधीति**। ननु शरीरादिनिर्वर्त्यो विधिभेदः कर्मकाण्डे निरूपितः, इह तु केवलं मनस्साध्यो निरूपित इत्यत आह—**आरभ्यमाणं चेति**। त्वन्मतेऽपि मतं पृथगारम्भ इति शङ्कायां सङ्कर्षकाण्डस्य क्रियाखिलन्यायनिरूपणस्य फलैक्येऽपि प्रमेयभेदादिष्टः पृथगारम्भः, इह तु प्रमेयफलभेदात् सुतरामारम्भे भेदासिद्धिरित्याह—**ब्रह्मेति**। न केवलं सिद्धरूपत्वाद् ब्रह्मात्मैक्यस्य धर्मादन्यत्वम्, अपि तु तद्विरोधादपीत्युपसंहारव्याजेनाह—**तस्मादहमिति**। इतिकरणेन ज्ञानं परामृशति। अद्वैतज्ञानस्य भेदाधिष्ठानकर्मविरोधित्वादित्यर्थः। न केवलं विधीनामियं गतिः, अपि तु सर्वेषां प्रमाणानामित्याह—**सर्वाणि चेति**। तदेतदुपपादयति—**न हीति**। प्रमातृ-विषययोरभावादित्यर्थः।

न्यायनिर्णयः

वेदान्तानां विध्यनपेक्षसिद्धबोधित्वे शास्त्रारम्भभेदं प्रमाणयति—**एवं चेति**। विधिशेषत्वेन ब्रह्मार्पणेऽपि शास्त्रं पृथगारभ्येतेत्याशङ्क्याह—**प्रतिपत्तीति**। नन्वाद्ये काण्डे बाह्यक्रियाविधिरधिगतः, मानसज्ञानविधिविचाराय काण्डान्तरमारभ्यते, नेत्याह—**आरभ्यमाणं चेति**। देहादिसाध्यकर्मविचारानन्तर्यमथेत्युक्तम्। तस्यैव चित्तशुद्धिद्वारा ज्ञानविधि-विचारोपयोगिताऽतःशब्दार्थः। तत्र चातुर्थिकमुदाहरणमाह—**अथात इति**। तृतीये श्रुत्यादिभिः शेषशेषित्वे सिद्धे सत्यनन्तरं शेषिणैव शेषस्य प्रयुक्तिसंभवात् को नाम क्रतवे प्रकुरुते, को वा पुरुषार्थायेति क्रत्वर्थपुरुषार्थयोर्जिज्ञासा ज्ञातुमिच्छा प्रवृत्तेति चतुर्थादौ प्रतिज्ञासूत्रवदिदमपि ब्रूयात्। न चैवं ब्रवीति। तस्मान्नोक्तविभागधीरित्यर्थः। त्वन्मतेऽपि कथं पृथगारम्भः शास्त्रस्येत्याशङ्क्य मेयफलभेदादित्याह—**ब्रह्मेति**। स्वातन्त्र्येण ब्रह्मात्मैक्यनिष्ठत्वे वेदान्तानां तदेव तात्त्विकमिति कथं द्वैतालम्बनस्य विधिकाण्डस्याध्यक्षादेश्च मानतेत्याशङ्क्योपसंहरन् परिहरति—**तस्मादिति**। अद्वैतधियो भेदाधिष्ठानमानविरोधित्वं तच्छब्दार्थः। इतिना ज्ञानं परामृष्टम्। तस्मादित्युक्तं हेतुं व्यनक्ति—**न हीति**। तत्त्वसाक्षात्कारे तदज्ञानध्वस्तौ तदुत्थमात्रादि-सर्वभेदध्वस्तेरविद्यावस्थायामेवाशेषो व्यवहार इत्यर्थः। कार्यास्पृष्टे सिद्धे ब्रह्मण्यद्वये सिद्धा वेदान्तमानतेत्युपसंहर्तुमितिशब्दः।

अपि चाहुः–'गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्। सद्ब्रह्मात्माऽहमित्येवं बोधे कार्यं कथं भवेत्। अन्वेष्टव्यात्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः। अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्जितः। देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः। लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात्' इति।।४।।

।। इति चतुर्थं समन्वयाधिकरणम् ।।

प्रकटार्थविवरणम्

अयमर्थोऽन्येषामपि **'ब्रह्मविदां** संमत इत्याह—**अपि चाहुरिति।** सद्ब्रह्मात्माऽहमित्येवं बोधे जाते पुत्रदेहादेः सत्ताबाधनात् मायामात्रत्वावगमात् 'अयं पुत्रोऽहमेव' 'मनुष्योऽहम्' इति गौणमिथ्यारूपस्य प्रत्ययस्यासत्त्वे जाते कार्यं कथं भवेत्? निमित्ताभावाद् विधिविधेयादिव्यवहारो न कथञ्चिद् भवेदित्यर्थः।

ननु यद्यात्मा ब्रह्मैव, कस्तर्हि प्रमाता? यद्ययमेव, कथं तर्हि ब्रह्मताऽस्येत्याशङ्क्याह—**अन्वेष्टव्येति।** ननु यद्यन्वयव्यतिरेकाभ्यां प्रमातृत्वमप्यज्ञानकृतम्; कथं तर्हि तदाश्रयाणां प्रामाण्यमित्याशङ्क्याह—**देहात्मप्रत्यय इति।** प्रमातृत्वस्य सदातनत्वाभावेऽप्यात्मनिश्चयादर्वाग् देहात्मप्रत्ययवद् व्यावहारिकं प्रत्यक्षादेः प्रामाण्यम्, विषयस्य तत्त्वांशप्रतिषेधेऽप्यर्थक्रियासामर्थ्यानपहारात्; आगमस्य तु तत्त्वावेदनलक्षणं प्रामाण्यमत्यन्ताबाध्यार्थविषयत्वादिति भावः।

भाष्यभावप्रकाशिका

उक्तन्यायमभियुक्तोक्तिभिः संगृह्णाति—**अपि चाहुरिति।** प्रसिद्धभेदत्वाद् गौणोऽहंभावः पुत्रादौ, अतः स गौणात्मा, देहादावप्रसिद्धभेदेऽहंभावो मिथ्या; अनात्मन्यात्माभिमानत्वात्, अतः स मिथ्यात्मा; तयोर्मुख्यपरमार्थात्मावगमे तदाधारपुत्रदेहादिबाधनादसत्त्वे तन्निमित्तं नियोज्यत्वं न भवतीत्यर्थः। तत्त्वज्ञानात्प्रागेव कर्तव्यशेषानुवृत्तिः, नोत्तरकालमित्येतत्कथमित्याशङ्क्य, तत्त्वज्ञानस्य प्रमातृत्वादिनिवर्तकत्वादित्याह—**अन्वेष्टव्येति।** "य आत्मा अपहतपाप्मे"त्यादिश्रुतिप्रतिपादित आत्माऽन्वेष्टव्य:' "सोऽन्वेष्टव्यः" इति श्रुतेः, यदि प्रमातृत्वादिव्यवहारः कल्पितः, कथं तर्हि प्रत्यक्षादीनां प्रामाण्यम्? आत्मावबोधजनकत्वं च श्रुतेरिति? तत्राह—**देहात्मेति।** यथा कल्पितोऽपि देहात्मभावो लोकव्यवहाराङ्गतया प्रमाणमिव भाति, अर्थक्रियाकारी च; तथा व्यवहाराङ्गत्वाद् व्यवहारे बाधाभावाच्च तत्त्वावेदकप्रामाण्याभावेऽपि प्रत्यक्षादीनां व्यावहारिकप्रामाण्यम्, आत्मबोधजनकत्वं च श्रुतेः सिध्यतीत्यर्थः।

।। इति चतुर्थं समन्वयाधिकरणम् ।।

न्यायनिर्णयः

न केवलमस्माभिरयमर्थोऽभ्युपगतः, किं त्वन्यैरपि **ब्रह्मविद्भिरित्याह—अपि चेति।** सत्पारमार्थिकमबाधितं ब्रह्माहमित्येवं बोधे जाते पुत्रदेहादेः सत्ताबाधनान्मायामात्रत्वावगमादयमहमेवेति पुत्रादावहमभिमानस्य गौणात्मनो, मनुष्योऽहमिति देहादावहमभिमानस्य च मिथ्यात्मनोऽसत्त्वे कार्यं कथं भवेत्? तन्निमित्ताभावाद् विधिविधेयादिव्यवहारो न कथंचिदित्यर्थः। यद्यात्मा सद्ब्रह्मैव कस्तर्हि प्रमाता? यद्ययमेव, कथं तर्हि ब्रह्मताऽस्येत्याशङ्क्याह—**अन्वेष्टव्येति।** 'य आत्माऽपहतपाप्मा' इत्यादिश्रुतिसिद्ध आत्माऽन्वेष्टव्यः, 'सोऽन्वेष्टव्य:' इति श्रुतेः। तद्विज्ञानात् पूर्वमात्मनो मातृत्वम्, प्रमातैवान्विष्टः सन्निर्दोषः परमात्मा स्यात्। अतोऽन्वयव्यतिरेकाभ्यामात्मनो मातृत्वमाविद्यकमित्यर्थः। तस्याविद्यकत्वे कथमध्यक्षादीनां श्रुतेश्च मानता, कारणदोषादित्याशङ्क्याह—**देहेति।** यथा देहातिरिक्तात्मवादे कल्पिताऽपि देहात्मत्वधीर्व्यवहाराङ्गतया मानमिष्यते, तथा तत्त्वसाक्षात्कारपर्यन्तं व्यवहाराङ्गत्वाद् व्यवहारे बाधाभावाच्चाध्यक्षाद्यतत्त्वावेदकमपि व्यावहारिकं मानम्। श्रुतेस्तु वर्णदैर्घ्यादिवदात्मधीहेतोस्तात्त्विक्येव मानतेत्यर्थः।।४।। **इति चतुर्थं समन्वयाधिकरणम् ।। चतुःसूत्री समाप्ता ।**

---

१. इदं च श्लोकत्रयमाचार्यसुन्दरपाण्ड्यकृतत्वेन निर्दिष्टं सूतसंहिताव्याख्यायाम्। एतत्कृताः अन्येऽपि श्लोकाः उद्धृताः कल्पतरौ। द्र.पृ. ७९५।

५।।ईक्षत्यधिकरणम्।।सू.५–११।।

एवं तावद् वेदान्तवाक्यानां ब्रह्मात्मावगतिप्रयोजनानां ब्रह्मात्मनि तात्पर्येण समन्वितानामन्तरेणापि कार्यानुप्रवेशं ब्रह्मणि पर्यवसानमुक्तम्। ब्रह्म च सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिनाशकारणमित्युक्तम्। सांख्यादयस्तु परिनिष्ठितं वस्तु प्रमाणान्तरगम्यमेवेति मन्यमानाः प्रधानादीनि कारणान्तराण्यनु-

शारीरकन्यायसंग्रहः

ईक्षतेर्नाशब्दम्।।५।। गौणश्चेन्नात्मशब्दात्।।६।। तन्निष्ठस्य मोक्षोपदेशात्।।७।। हेयत्वावचनाच्च।।८।। स्वाप्ययात्।।९।। गतिसामान्यात्।।१०।। श्रुतत्वाच्च।।११।। अत्र शब्दस्य गौणमुख्यार्थप्रत्यययोः मुख्यार्थप्रत्ययो युक्तः, बुद्धिलाघवात्—इति न्यायेन ईक्षत्यात्मसर्वज्ञादिशब्दानां जगत्कारणविषयाणामनुमानादिप्रमाणान्तरानुसारेण प्रधानादौ गौणीं वृत्तिमपबाध्य मुख्यार्थोपादानेन चेतने ब्रह्मण्येव जगत्कारणे समन्वयः, न प्रधानादावित्युक्तम्।

पुनस्तत्सिद्ध्यर्थं प्रकृतिप्रत्ययार्थयोर्विरोधे प्रत्ययार्थस्य प्रकृत्यर्थसापेक्षस्यैव परित्यागेन निरपेक्षप्रकृत्यर्थोपादानं युक्तम्, प्रत्ययलाघवात्— इति न्यायेन "तदैक्षत" "यः सर्वज्ञ" इत्यादिकमुपचरितार्थं कर्तृप्रत्ययमुपादाय चित्तवृत्तिविशेषितस्य उपलक्षितस्य वा स्वभावसिद्धचैतन्यप्रकाशस्य जानातिधात्वर्थत्वेन चित्प्रकाशं ब्रह्म सर्वज्ञादिशब्दैः दर्शितमित्युक्तम्। अथवा धात्वर्थाश्रयत्वमेव तिङ्प्रत्ययार्थः, न तन्निर्वर्तकत्वम्, 'सविता प्रकाशते' इत्यादिदर्शनात्—इति न्यायेन जानात्यर्थचित्प्रकाशाश्रयं ब्रह्म कारणमिति दर्शितम्, चित्तवृत्तेः जडत्वेन अर्थप्रकाशज्ञानत्वाभावात्।

प्रकटार्थविवरणम्

यदत्र **केशवोऽध्यगीष्ट**— "बाधितस्य प्रमाणत्वं वदता बौद्धवेदयोः। सम्यक् संपादितं साम्यं शास्त्रयोः किमतः परम्।।" इति; तद् दुरध्यगीष्ट। यतो वेदबौद्धयोर्मायामयत्वाविशेषेऽपि बाधिताबाधितविषयत्वेन पौरुषेयत्वापौरुषेयत्वेन च वैषम्यमित्युक्तम्। अन्यथा तस्यापि स्वरूपसत्त्वाविशेषे साम्यस्य किं व्यासेधकम्? यच्च "भिन्नाभिन्नं ब्रह्म जगतः कारणम्, तत्कार्यस्य च प्रपञ्चस्य न मिथ्यात्वम्" इत्यादि फल्गुवल्गितम्, तदारम्भणाधिकरणे पर्यहार्षीदाचार्य इति मयाऽपि तत्रैव परिजेह्रीयिष्यत इत्युपरम्यते।

।।इति चतुर्थं समन्वयाधिकरणम्।।

पूर्वोत्तरग्रन्थयोः संबन्धाभिधित्सया वृत्तं सङ्कीर्तयति—**एवं वेदान्तवाक्यानामित्यादिना**। प्रथमसूत्रेण ब्रह्मजिज्ञासां प्रतिज्ञाय द्वितीयेन च तल्लक्षणमुक्त्वा तृतीयेन तत्र वेदान्तानां प्रामाण्यमुपचिक्षेप। चतुर्थे च जैमिनीयपादोपजीविनां मतापाकरणेन तदेव

भाष्यभावप्रकाशिका

वर्तिष्यमाणाधिकरणानामपुनरुक्तार्थतां दर्शयितुं वृत्तं कीर्तयति—**एवमिति**। उक्तस्यैव लक्षणस्यातिव्याप्त्याशङ्कायामुत्तरत्र तन्निरासो युक्त इत्यङ्गीकृत्य ब्रह्मणो लक्षणमप्युक्तमित्याह—**ब्रह्म चेति**। ननु एवंविधे ब्रह्मणि समन्वयो दर्शितश्चेत् समन्वयाध्यायस्य

न्यायनिर्णयः

शास्त्रार्थं चतुर्भिः सूत्रैः संक्षिप्य वक्ष्यमाणाधिकरणानामपुनरुक्तमर्थं वक्तुं वृत्तं संकीर्तयति—**एवमिति**। तेषां तत्फलत्वे हेतुः—**तात्पर्येणेति**। कार्यान्विते ब्रह्मणि तात्पर्यं तेषामित्याशङ्क्याह—**अन्तरेणेति**। समन्वयसूत्रार्थमनूद्यातीतसूत्रत्रयार्थमनुवदति—**ब्रह्म चेति**। उक्ते लक्षणे तदतिव्याप्तिशङ्कायां निरासस्य सावकाशत्वाद् ब्रह्मणो जिज्ञास्यस्य लक्षणमपि शास्त्रीयस्योक्तमित्यर्थः। तस्मिन् ब्रह्मणि सिद्धे समन्वये समन्वयाध्यायसमाप्तेरुत्तरसंदर्भानर्थक्यमित्याशङ्क्याह—**सांख्यादयस्त्विति**। सिद्धेऽर्थे मानत्वविरोधिकार्यानुप्रवेशे प्रत्युक्तेऽपि ब्रह्मण्येव समन्वयो नान्यत्रेत्यनिर्धारणाद् ब्रह्मकारणताविरोधिप्रधानादिवादनिरासायोत्तरसंदर्भ इत्यर्थः। परिनिष्ठितस्य मानान्तरगम्यत्वे तत्संवादादिना तत्र वेदान्ताप्रामाण्यात् न ततो

मिमानास्तत्परतयैव वेदान्तवाक्यानि योजयन्ति। सर्वेष्वेव वेदान्तवाक्येषु सृष्टिविषयेष्वनुमानेनैव कार्येण कारणं लिलक्षयिषितम्। प्रधानपुरुषसंयोगा नित्यानुमेया इति सांख्या मन्यन्ते। काणादास्त्वेतेभ्य एव

प्रकटार्थविवरणम्

प्रामाण्यं प्रत्यतिष्ठिपत्। पुनश्च साङ्ख्यादिपक्षप्रतिक्षेपेण तेषां वाक्यानां ब्रह्मण्येव प्रामाण्यप्रतिष्ठापनाय परं सन्दर्भं सूत्रयामासेत्यभिप्रेत्य साङ्ख्याद्यभिप्रायमाह—**साङ्ख्यादयस्त्विति**। वृद्धव्यवहारे सिद्धार्थव्युत्पत्तिमाश्रित्य जैमिनीयमतं प्रत्यक्षेपि। तत्र च प्रमाणान्तरगोचर एवार्थे व्युत्पत्तिसंभवात् प्रधानादीनामेव प्रमाणान्तरगोचरत्वात् तेष्वेव वेदान्तानां तात्पर्यं वृद्धव्यवहारानुसारेण कल्पनीयमिति भावः। किञ्च "तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ" इत्याद्याः श्रुतयः शुङ्गेनेति कार्येण लिङ्गेन सतो मूलस्यान्वेषणं दर्शयन्त्यः प्रमाणान्तरसिद्धमेव जगत्कारणं दर्शयन्तीत्याह—**सर्वेष्विति**। ननु धूमस्याध्यक्षसिद्धेनैव धूमध्वजेन क्वचिदविनाभावमनुभूय प्रदेशान्तरे तदनुमोदयमासादयति, न तथा प्रधानादि क्वचिदध्यक्षसिद्धम्, कथं तदनुमानस्य गोचर इत्याशङ्क्याह—**प्रधानेति**। यथाऽतीन्द्रियमपि विद्युदादिकारणं सामान्यतोदृष्टलिङ्गगम्ये[गम्येमेवमि]त्यर्थः। विमतमचेतनप्रकृतिकं [कार्यत्वात्] तदन्वितत्वाद्वा संप्रतिपन्नवत्, तथाऽन्तःकरणे चित्प्रतिबिम्बं बिम्बसन्निधानाधीनं प्रतिबिम्बत्वात् संप्रतिपन्नप्रतिबिम्बवत्; तथा विमतं [२]चेतनाधिष्ठिताचेतनप्रकृतिकं कार्यत्वात् पटवदिति प्रयोगः[१]। आदिशब्द-सूचितं मतान्तरमाह—**काणादास्त्विति**। "यतो वा इमानि भूतानि" इत्यादिवाक्येभ्यो यच्छब्दोपबन्धनेन सिद्धवज्जगत्कारणपरामर्शावगमात् कार्यं बुद्धिमत्कर्तृकमिति सामान्यतोदृष्टेन ईश्वरमनुमिमत इत्यर्थः। पटादिकार्यं स्वपरिमाणादल्पपरिमाणारब्धं दृष्ट्वा अन्यदपि कार्यं तथैवेति परमाणून् समवायिकारणत्वेन कल्पयन्तीत्यर्थः। "असद्वा इदमग्र आसीत्" इत्यादिवाक्याभासावष्टम्भाः प्रदीपादेर्निरन्वयविनाशदर्शनात् पृथिव्यादिकार्यस्यापि शून्यतापर्यन्तं नष्टस्यासत एव

भाष्यभावप्रकाशिका

परिसमाप्तत्वादुत्तरसूत्रसन्दर्भारम्भः किमर्थ इति? तत्राह—**साङ्ख्यादय इति**। सिद्धार्थे प्रामाण्यविरोधिनः कार्यानुप्रवेशस्य निराकरणेऽपि ब्रह्मण्येव समन्वयो वेदान्तानामित्यस्यार्थस्याद्याप्यसिद्धत्वाद् ब्रह्मकारणवादविरोधिप्रधानादिकारणवादानां निराकरणायोत्तरसूत्रसन्दर्भारम्भ इत्यर्थः। ननु हेत्वाद्यनुपन्यासात् परार्थानुमानता वेदान्तानां न प्रतीयत इति, तत्राह—**सर्वेष्विति**। "तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छे"त्यादिष्वनुमानरूपता प्रतीयत इति भावः। ननु कार्यलिङ्गेन ब्रह्मैवानुमीयतामिति, तत्राह—**प्रधानेति**। सुखदुःखमोहात्मकं कार्यं तथाविधमेव कारणं गमयतीत्यर्थः। ननु अचेतनस्य स्वार्थासंभवात् पुरुषार्थतया प्रवृत्तिर्वक्तव्या, ततस्तस्मिन् पुरुषे किं प्रमाणमिति? तत्राह—**पुरुषेति**। ननु सम्बन्धाभावे तादर्थ्याभावात् सम्बन्धेऽपि प्रमाणं वाच्यमिति, अत आह—**संयोगा इति**। ईश्वराधिष्ठितचतुर्विधपरमाणून् जगदुपादानकारणतयाऽनुमितानुवदन्ति वेदान्ता इति काणादा मन्यन्त

न्यायनिर्णयः

जगद्धेतुर्ब्रह्म सिध्यतीति चेत् तर्हि केन मानेन तद्धेतुधीरित्याशङ्क्योक्तम्—**प्रधानादीनीति**। का तर्हि वेदान्तानां गतिः? परार्थानुमानतेत्याह—**तत्परतयेति**। हेत्वाद्यनुक्तेस्तेषां न परार्थानुमानतेत्याशङ्क्याह—**सर्वेष्विति**। 'तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ' इत्यादिष्वनुमानता भातीत्यर्थः। कार्यलिङ्गकमनुमानं ब्रह्मैव गमयिष्यतीत्याशङ्क्य सुखदुःखमोहात्मकं कार्यं तादृगेव कारणमनुमापयतीत्याह—**प्रधानेति**। तस्याचेतनस्य स्वार्थाभावात् पुमर्थप्रवृत्तौ पुंसि मानं वाच्यमिति मत्वाऽऽह—**पुरुषेति**। बुद्धौ यः प्रतिबिम्बः, स तादृशबिम्बपूर्वकः, प्रतिबिम्बत्वात्, दर्पणे मुखाभासवदित्यर्थः। संबन्धाभावे तादर्थ्यायोगात् तत्रापि मानाकाङ्क्षायां, विमतं चेतनसंयुक्तम्, अचेतनत्वात्, द्रव्यादिवदिति बुद्ध्या संयोगग्रहणम्। मतान्तरमाह—**काणादास्त्विति**। 'यतो वा इमानि' इत्यादिवाक्येभ्यो यच्छब्दोपबन्धेन सिद्धवज्जगद्धेतुपरामर्शात्, यत् कार्यं तद् बुद्धिमत्कर्तृकमिति सामान्यतोदृष्टादीश्वरं कल्पयन्तीत्यर्थः। स्वपरिमाणादल्पपरिमाणारब्धं पटादि दृष्ट्वाऽऽद्यमपि कार्यं तथेति समवायित्वेन

---

१. क्रमेण प्रधान-पुरुष-तत्संयोगसाधकानि अनुमानानि।

२. चेतनाधिष्ठितत्वं च तत्सम्बद्धत्वमात्रं विवक्षितम्, न तु तदधीनत्वम्। तेन स्वतन्त्रप्रधानकारणवादस्य न क्षतिः।

वाक्येभ्य ईश्वरं निमित्तकारणमनुमिमते, अणूंश्च समवायिकारणम्। एवमन्येऽपि तार्किका वाक्याभासयुक्त्याभासावष्टम्भाः पूर्वपक्षवादिन इहोत्तिष्ठन्ते[1]। तत्र [2]पदवाक्यप्रमाणज्ञेनाचार्येण वेदान्तवाक्यानां ब्रह्मा[त्मा]वगतिपरत्वदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियन्ते।

तत्र सांख्याः प्रधानं त्रिगुणमचेतनं जगतः कारणमिति मन्यमाना आहुः— यानि वेदान्तवाक्यानि सर्वज्ञस्य सर्वशक्तेर्ब्रह्मणो जगत्कारणत्वं दर्शयन्तीत्यवोचस्तानि प्रधानकारणपक्षेऽपि[3] योजयितुं शक्यन्ते।

प्रकटार्थविवरणम्

प्रादुर्भाव इत्यादियुक्त्याभासावष्टम्भाः सन्त इहाद्वैतवादे प्रतिपक्षिणो **माध्यमिकादयः** प्रत्यवतिष्ठन्त इत्याह—**एवमन्येऽपीति**। एवं सबीजविप्रतिपत्तीरुक्त्वा तन्निरासायोत्तरसन्दर्भारम्भ इत्याह—**तत्रेति**।

यद्यपि जन्मादिसूत्रे लक्षणनिर्णयायार्थात् प्रधानादिकारणत्वासंभवः सूत्रितः, तथापीह वेदान्तानां ब्रह्मण्येव प्रामाण्यप्रतितिष्ठापयिषया तेषां योजनाप्रकारभेदविभेदो[4] मुखतः सूत्रित इति।

साङ्ख्ययोजनाप्रकारं तावदाह—**तत्र साङ्ख्या इत्यादिना**। नन्वचेतनस्य मृदादेः स्वविकारगोचरमपि सर्वज्ञत्वं न दृष्टचरम्, कथङ्कारं प्रधानस्य तदङ्गीक्रियत इत्याह—**कथमिति**। सत्त्वपरिणामेन ज्ञानेन सर्वज्ञाः। न तु [ननु ब्रह्मापि स्यात् सर्वज्ञं] रजस्तमसी तिरस्कृत्योद्भूतसत्त्वधर्मेत्याशङ्क्याह—**न केवलस्येति**। ननु तथापि साम्यावत्थायां सत्त्वधर्मज्ञानासंभवात् कथं सर्वज्ञत्वमित्याशङ्क्याह—**त्रिगुणत्वात्त्विति**। सर्वज्ञानपरिणामशक्तिमत्सत्त्वसद्भावात् साम्यावस्थायामपि मन्मार्ग एवाश्रयणीय

भाष्यभावप्रकाशिका

इत्याह—**काणादा इति**। तस्मात् तन्निराकरणेन ब्रह्मपरताप्रतिपादनायोत्तरसूत्रसन्दर्भारम्भो युक्त इत्याह—**तत्र पदेति**।

एवं समुदायतात्पर्यमभिधायास्याधिकरणस्य साङ्ख्यादिनिराकरणपरस्य पूर्वपक्षं दर्शयति—**तत्र साङ्ख्या इति**। ननु

न्यायनिर्णयः

चतुर्विधानणून् कल्पयन्तीत्याह—**अणूंश्चेति**। 'असद्वा इदमग्र आसीत्' इत्यादिवाक्याभासात्, दीपादेर्निरन्वयना-शदृष्ट्या पृथिव्यादेरपि तथा नष्टस्यासत एवोत्पत्तिरित्यादियुक्त्याभासाच्चाद्वैतवादे **माध्यमिकादयो** विरोधिनो भवन्तीत्याह—**एवमिति**। वादिविप्रतिपत्तीरुक्त्वा तन्निरासायोत्तरग्रन्थमवतारयति—**तत्रेति**। तत्र वादिषु भिन्नप्रस्थानेषु सत्स्विति यावत्। वाक्याभासेषु युक्त्याभासेषु च प्रतिपत्तिर्येषां ते तथा।

उत्तरग्रन्थतात्पर्यमुक्त्वा 'सदेव' इत्यादौ सच्छब्दितमीक्षितृ सर्वज्ञं जगदुपादानं, प्रधानं ब्रह्मैवेति [ब्रह्म वेति] वादिविवादाज्ज्ञातृत्वज्ञानाभ्यां संशय्यानन्तराधिकरणपूर्वपक्षमाह— **तत्रेति**। स्थितं समुदायतात्पर्यं सप्तम्यर्थः। सर्वज्ञे जगद्धेतौ समन्वयोक्त्या तच्चैतन्यमाक्षिप्य समर्थ्यत इत्यधिकरणसंगतिः। नानाशाखास्थस्फुटब्रह्मलिङ्गवाक्यानां ब्रह्मण्येव समन्वयोक्तेः श्रुत्यादिसंगतयः। 'तत्त्वमसि' इति तच्छब्दितप्रधानैक्यसंपत्तिः पूर्वपक्षे, सिद्धान्ते चिदात्मनो ब्रह्मैक्यं फलम्। प्रकर्षेण धीयते सर्वं जगदस्मिन्निति ब्रह्मापि प्रधानम्, ततो विशिनष्टि— **त्रिगुणमिति**। परिणामयोग्यत्वमाह— **अचेतनमिति**। सांख्यीयमतं श्रुतिविरोधात् त्याज्यमित्याशङ्क्याह— **यानीति**। जीवाख्यचित्प्रतिबिम्बानां स्वतो विभजननियमेनैकीकरणशक्तयो न प्रधानस्या-

---

१. उत्तिष्ठन्त इति। पूर्वपक्षकरणाय चेष्टन्त इत्यर्थः। अतः 'उदोऽनूर्ध्वकर्मणि' (पा.सू.१.३.२४) इति आत्मनेपदम्।

२. पदं व्याकरणशास्त्रम्, वाक्यं मीमांसाशास्त्रम्, प्रमाणं न्यायशास्त्रम्। व्याकरण-मीमांसा-न्यायनिधित्वात् पदवाक्यप्रमाणज्ञत्वम्। रत्नप्रभा. पृ.१०१

३. 'प्रधानकारणपक्षेऽपि' 'प्रधानस्यापि' इत्यपिशब्दौ एवकारार्थौ इति भामती। तेनानवधारणेनात्र पूर्वपक्षः इति केषां चिद् व्याख्यानं व्यावर्तितमिति कल्पतरुः। पृ. १६४
'प्रधानमेव कारण' मिति पक्षेऽपीत्यर्थः। यथा त्वया=सिद्धान्तिना सर्वज्ञत्वादिकं ब्रह्मणि क्लेशेनैव व्याख्येयम्, ज्ञानस्वरूपे तस्मिन् ज्ञातृत्वानुपपत्तेः, तथा मया प्रधानेऽपि तच्छक्यते व्याख्यातुमिति 'अपे' र्थः— इति ब्र. वि.।

४. योजनाप्रकारस्य भेदो विशेषः, तस्य विभेदो भङ्ग इत्यर्थः।

[1]सर्वशक्तित्वं तावत् प्रधानस्यापि स्वविकारविषयमुपपद्यते। एवं सर्वज्ञत्वमप्युपपद्यते। कथम्? यत्तु ज्ञानं मन्यसे स सत्त्वधर्मः, 'सत्त्वात्संजायते ज्ञानम्' (भ.गी. १४।१७) इति स्मृतेः। तेन च सत्त्वधर्मेण ज्ञानेन कार्यकरणवन्तः[2] पुरुषाः सर्वज्ञा योगिनः प्रसिद्धाः। सत्त्वस्य हि निरतिशयोत्कर्षे सर्वज्ञत्वं प्रसिद्धम्। न केवलस्याकार्यकरणस्य पुरुषस्योपलब्धिमात्रस्य सर्वज्ञत्वं किंचिज्ज्ञत्वं वा कल्पयितुं शक्यम्। त्रिगुणत्वात्तु प्रधानस्य सर्वज्ञानकारणभूतं सत्त्वं प्रधानावस्थायामपि विद्यत इति प्रधानस्याचेतनस्यैव सतः सर्वज्ञत्वमुपचर्यते वेदान्तवाक्येषु। अवश्यं च त्वयाऽपि सर्वज्ञं ब्रह्माभ्युपगच्छता सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वमभ्युपगन्तव्यम्। न हि सर्वदा सर्वविषयं ज्ञानं कुर्वदेव ब्रह्म वर्तते। तथाहि—ज्ञानस्य नित्यत्वे ज्ञानक्रियां प्रति स्वातन्त्र्यं ब्रह्मणो हीयेत। अथानित्यं तदिति, ज्ञानक्रियाया उपरमेतापि[3] ब्रह्म। तदा

प्रकटार्थविवरणम्

इत्यर्थः। इतोऽपि सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वं वाच्यमित्याह—**अपि चेति**। पराभिमतस्य कारणत्वमुपगम्य प्रधानपक्षेऽपि जगत्कारणवादिवाक्यं योजयितुं शक्यमित्युक्तम्। इदानीं ब्रह्मणः कारणत्वासंभवात् प्रधानवाद एव वाक्यानि सङ्गच्छन्त इत्याह—**अपि च प्रधानस्येति**।

भाष्यभावप्रकाशिका

ज्ञत्वमेव यस्य नास्ति, तस्य कुतस्सर्वज्ञत्वम्? इति शङ्कते—**कथमिति**। ननु चेतनस्यैव योगिनः सर्वज्ञत्वं प्रसिद्धम्, तत्कथमचेतनस्येति? तत्राह—**तेन चेति**। कार्यका[क]रणवन्त इत्यचेतनत्वमुक्तम्। ननु तत्रापि चेतनस्यैव सर्वज्ञत्वम्, सत्त्वस्य तत्सहकारितया सत्त्वोत्कर्षेणान्वयव्यतिरेकयोस्तत्रापि सम्भवेनान्यथासिद्धत्वादिति, तत्राह—**सत्त्वस्य हीति**। केवलव्यतिरेकाभावादित्यर्थः। ननु गुणसाम्येऽपि सत्त्वोत्कर्षोऽपि नास्तीति, अत आह—**त्रिगुणत्वादिति**। ननु उपचारान्मुख्यग्रहणं युक्तमिति, अत आह—**अवश्यमिति**। नित्यमनित्यं वा तस्य ज्ञानमिति विकल्प्य द्विधाऽप्यौपचारिकमेव सर्वज्ञत्वमिति साधयति—

न्यायनिर्णयः

चेतनस्येत्यन्यदेव सर्वशक्तिमदेष्टव्यमित्याशङ्क्य चित्प्रतिबिम्बानामनुत्पाद्यत्वादुत्पाद्यार्थशक्तिरस्यापि स्यादित्याह— **सर्वेति**। तथापि कुतोऽस्याचेतनत्वे सर्वज्ञता? तत्राह— **एवमिति**। यस्य न ज्ञत्वमेव, तस्य कुतः सर्वज्ञतेत्याह— **कथमिति**। प्रधाने ज्ञानकर्तृत्वं संभावयितुं ज्ञानस्वरूपमाह— **यदिति**। ननूक्तज्ञानेन चेतनानामेव योगिनां सर्वज्ञत्वात् तदचेतनं प्रधानं कथं तेन सर्वज्ञमुच्यते, तत्राह— **तेनेति**। **कार्यकरणवन्त** इत्यचैतन्यमुक्तम्। तत्रापि चेतनांशस्यैव सर्वज्ञत्वं, सत्त्वस्य सहायतया तदुत्कर्षान्वयव्यतिरेकयोरन्यथासिद्धेरित्याशङ्क्याह— **सत्त्वस्येति**। केवलव्यतिरेकाभावान्न चेतनांशस्यैव सर्वज्ञतेत्यर्थः। किंच तस्य सर्वज्ञत्वं दुर्ज्ञानं, चिन्मात्रस्य ज्ञानकर्तृत्वायोगादित्याह— **नेति**। कार्यकरणविरहितत्वाच्च नास्य ज्ञानकर्तृतेत्याह— **अकार्येति**। पूर्णत्वाच्च तथेत्याह— **पुरुषस्येति**। प्रधानावस्थायां गुणसाम्ये सत्त्वोत्कर्षायोगान्न तस्य तत्कृतं सार्वज्ञ्यमित्याशङ्क्याह— **त्रिगुणत्वादिति**। न च ज्ञानप्रतिबन्धकरजस्तमसोरपि तत्र भावान्न सार्वज्ञ्यं, वस्तुतस्तद्भावेऽपि माणवकस्याग्नित्ववत्तदुपचारात्; तदाह— **उपचर्यत इति**। गौणमुख्ययोर्मुख्ये संप्रत्ययान्मुख्यग्रहणमाशङ्क्याह— **अवश्यमिति**। तत्र हेतुमाह— **न हीति**। तथात्वे काऽनुपपत्तिरित्याशङ्क्य तज्ज्ञानं नित्यमनित्यं वेति विकल्पयति— **तथाहीति**। तत्राद्यं दूषयति— **ज्ञानेति**। द्वितीयमनूद्य स्वमतसिद्धान्तमाह— **अथेत्यादिना**। अनित्यज्ञानपक्षे ब्रह्मणः सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञतेत्यत्र

---

१. कार्यस्य सूक्ष्मावस्था शक्तिरित्युच्यते। प्रधानस्य तदाश्रयतया सर्वशक्तित्वम्। जन्यं ज्ञानं वृत्तिरूपम्। तच्च प्रधानपरिणामभूतान्तःकरणगतसत्त्वांशधर्मः। ततश्चान्तःकरणद्वारा प्रधानस्य सर्वविषयकज्ञानाश्रयत्वं संभवतीति ब्र. वि.। २. कार्यकरणवन्तः=शरीरेन्द्रियवन्तः।

३. 'विभाषाऽकर्मकात्' (पा.सू. १.३.८५) इति 'उप' पूर्वाद् रमतेः अकर्मकत्वे परस्मैपदस्य वैकल्पिकत्वात् आत्मनेपदम्।

सर्वज्ञानशक्तिमत्त्वेनैव सर्वज्ञत्वमापतति। अपि च प्रागुत्पत्तेः सर्वकारकशून्यं ब्रह्मेष्यते त्वया। न च ज्ञानसाधनानां शरीरेन्द्रियादीनामभावे ज्ञानोत्पत्तिः कस्यचिदुपपन्ना। अपि च प्रधानस्यानेकात्मकस्य परिणामसंभवात् कारणत्वोपपत्तिर्मृदादिवत्, नासंहतस्यैकात्मकस्य ब्रह्मण इत्येवं प्राप्त इदं सूत्रमारभ्यते–

ईक्षतेर्नाशब्दम्।।५।।

न सांख्यपरिकल्पितमचेतनं प्रधानं जगतः कारणं शक्यं वेदान्तेष्वाश्रयितुम्। 'अशब्दं हि तत्। कथमशब्दत्वम्? ईक्षतेः–' ईक्षितृत्वश्रवणात् कारणस्य। कथम्? एवं हि श्रूयते–'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा. उ. ६।२।१) इत्युपक्रम्य 'तदैक्षत बहु स्यां प्रजायेयेति, तत्तेजोऽसृजत'

प्रकटार्थविवरणम्

ईक्षतेर्नाशब्दम्। सूत्रमवतार्य नञोऽर्थमाह— **न साङ्ख्येति**। हेतुमाह— **अशब्दं हीति**। जगत्कारणवादिवाक्येषु प्रधानशब्दाभावात्, पदार्थस्यैव च पदार्थान्तरसंसृष्टतया वाक्यार्थत्वात् न प्रधानपरतया वाक्यानि योजयितुं शक्यन्त इत्यर्थः। प्रमाणान्तरवारणं च परस्तादवतरिष्यति। ननु "सदेव सोम्येदम्" इति सच्छब्द एव प्रधानाभिधायीत्याह— **कथमशब्दत्वमिति**। सच्छब्दवाच्यस्य कारणस्य चेतनत्वावगमात् न सच्छब्दः प्रधानाभिधायीत्यभिप्रेत्याह— **ईक्षतेरिति**। मिषत् निमेषोन्मेषधर्मकम्। लोकान् नु किलाहं सृजै इति पर्यालोचनं कृतवानित्यर्थः।

भाष्यभावप्रकाशिका

तथाहीति। करणरहितत्वादपि ब्रह्मणः सर्वज्ञत्वं न मुख्यं सम्भवतीत्याह—**अपि चेति**। ननु एवमुभयोः पक्षयोः साम्ये, कथमेकत्र पक्षपात इत्याशङ्क्य प्रधानपक्षे विशेषं दर्शयति—**अपि च प्रधानस्येति**। ननु एकस्यापि सामग्रीसंनिधानात् कार्योत्पादकत्वं स्यादिति, अत आह—**नासंहतस्येति**। असङ्गत्वादद्वैतत्वाच्चेत्यर्थः।

ईक्षतेर्नाशब्दमित्यत्र नञोऽर्थं दर्शयति—**न साङ्ख्येति**। ननु अनुमानसिद्धं प्रधानं विहायागमबलादीक्षितुः कथं कारणत्वमवसीयत इत्याक्षिपति—**कथमिति**। जगतः कार्यत्वेन कारणवत्त्वमात्रमेवानुमातुं शक्यते, न तु कारणविशेषः, तत्रागम एव प्रमाणमित्यभिप्रेत्याह—**सदेव सोम्येति**। एवं श्रुतिप्रमाणात् सदुपादानत्वे, तदचेतनं चेतनं वेति निर्णयायाह—**तदैक्षतेति**। तथापि ईक्षिता सच्छब्दवाच्य ईश्वरस्सद्वितीय एवेति यद् वदन्ति सेश्वरसाङ्ख्याः, तन्निराकरणायाह—**एकमेवेति**। श्रुत्यर्थमाह—

न्यायनिर्णयः

हेत्वन्तरमाह— **अपि चेति**। तथापि तस्य सर्वविषयं ज्ञानं किमिति नोत्पद्यते, तत्राह— **न चेति**। आदिपदेन ज्ञेयज्ञात्रादिसंग्रहः। उभयत्राप्यनुपपत्तिसाम्ये कथं पक्षविशेषपक्षपात इत्याशङ्क्य प्रधानपक्षे विशेषमाह— **अपि चेति**। एकस्यापि ब्रह्मणः सामग्रीसंनिधानात्कारणत्वमाशङ्क्य तस्यासङ्गत्वादद्वयत्वाच्च नैवमित्याह— **नेति**। जगदुपादानवादिवेदान्तानां प्रधानपरतेति पूर्वपक्षमनूद्य सूत्रेण सिद्धान्तयति— **एवमिति**।

सूत्रस्थं नञ्पदं व्याचष्टे— **नेति**। तत्र सौत्रमेव हेतुमाह— **अशब्दं हीति**। 'सदेव' इत्यत्र सच्छब्दस्य तच्छब्दत्वात्राशब्दत्वमित्याह— **कथमिति**। सौत्रं पदमवतार्य व्याकरोति— **ईक्षतेरिति**। अनुमेयं प्रधानं हित्वा तदनुवादिश्रुतिसिद्धस्य कथं कारणत्वमित्याह— **कथमिति**। कार्येण कारणमात्रमनुमातुं शक्यं, न तद्विशेषः; तत्र श्रुतिरेव मानमिति मत्वाऽऽह— **एवं हीति**। श्रुतोपादानस्य [२]चेतनार्थत्वमाह— **तदैक्षतेति**। केचिदीक्षितारमीश्वरं सद्वितीयं संगिरन्ते, तान् प्रत्याह— **एकमेवेति**। तस्योपादानार्थत्वमाह— **बहु स्यामिति**। ईक्षणफलमाह— **तदिति**। तदाकाशं वायुं च सृष्ट्वा तेजः सृष्टवदित्यर्थः।

---

१. 'प्रधानं न जगत्कारणम्, अशब्दत्वात्; जगत्कारणपरसदादिशब्दप्रतिपाद्यत्वाभावादित्यर्थः। सदादिशब्दप्रतिपाद्यं न प्रधानम्, ईक्षणात्' इति रीत्या सूत्रोक्तं हेतुद्वयं योजनीयम्। तेन न हेतुसाध्ययोर्वैयधिकरण्यम्।

२-३. 'उपादानत्वार्थम्' इति आनन्दाश्रमपुस्तके टिप्पण्यां निर्दिष्टं पाठान्तरम्। तदनुरोधेन 'चेतनत्वार्थम्' इति पाठः स्यात्।

(छा. उ. ६।२।३) इति। तत्रेदंशब्दवाच्यं नामरूपव्याकृतं जगत् प्रागुत्पत्तेः सदात्मनाऽवधार्य तस्यैव प्रकृतस्य सच्छब्दवाच्यस्येक्षणपूर्वकं तेजःप्रभृतेः स्रष्टृत्वं दर्शयति। तथाऽन्यत्र–'आत्मा वा इदमेक एवाग्र आसीत्। नान्यत् किंचन मिषत्। स ईक्षत लोकान्नु सृजा इति। स इमाँल्लोकानसृजत' (ऐ. उ. १।१।१) इतीक्षापूर्विकामेव सृष्टिमाचष्टे। क्वचिच्च षोडशकलं पुरुषं प्रस्तुत्याह–'स ईक्षांचक्रे। .....स प्राणमसृजत' (प्र. उ. ६।३) इति।

ईक्षतेरिति च धात्वर्थनिर्देशोऽभिप्रेतः, यजतेरितिवत्; न धातुनिर्देशः। तेन 'यः सर्वज्ञः सर्वविद् यस्य

प्रकटार्थविवरणम्

"कलाः षोडश भूतानि प्राणोऽक्षमण[क्षं] नाम कर्म च। श्रद्धा लोकाः तपो मन्त्रा मनो वीर्यं शरीरकर्म[कम्]।"[1]

जीवाभिन्नस्य परमात्मन इहेक्षणं विवक्षितम्।

ननु "इक्श्तिपौ धातुनिर्देशे" इति कात्यायनस्मरणात् सूत्रकारस्यापि धातुनिर्देशोऽभिप्रेतः। तत् कथं धात्वर्थोपादानेन व्याख्यायत इत्याशङ्क्याह— **ईक्षतेरिति चेति**। शितप्प्रत्ययान्तप्रयोगेण सूत्रकारस्य धात्वर्थनिर्देशो लक्षणयाऽभिप्रेतः। इतरथा अप्रस्तुताभिधानप्रसङ्गात्। तत्र जैमिनीयमुदाहरणमाह— **यजतेरितिवदिति**। "इतिकर्तव्यताऽविधेः यजतेः पूर्ववत्त्वम्" 'इत्यत्र जैमिनेर्याग एव[2] तिप्रत्ययान्तेन विवक्षितः; पाणिनेः "भवतेरः" इतिवत् न धातुनिर्देशोऽभिप्रेत इत्यर्थः। येनेक्षतिधात्वर्थालोचनं सूत्रितम्, न शब्दमात्रं, तेन वाक्यान्तराण्यप्युदाहरणीयानीति योजना। सामान्येन सर्वं जानातीति सर्वज्ञः। विशेषतः सर्वं वेत्तीति

भाष्यभावप्रकाशिका

तत्रेदमिति। क्वचिच्चेति। "स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु नाम चे"ति प्रस्तुतेषु निर्दिष्टाः षोडश कला द्रष्टव्याः।

ननु ईक्षतेरिति शितपा धातुस्वरूपकथनान्न तस्य चेतनोपादानत्वसाधनत्वं युक्तमिति, तत्राह—**ईक्षतेरिति चेति**। विषयिणा विषयलक्षणात्। प्रसिद्धा चेयमन्यत्रापि लक्षणेत्याह—**यजतेरितिवदिति**। 'वषट्कारप्रदाना यजतय' इति यागा इति वक्तव्ये लक्षणकारस्य प्रयोगो दृश्यते। ईक्षतेरित्यर्थपरत्वाद् व्यपदेशस्यान्यान्यपि तदर्थपराणि वाक्यान्युदाहरणीयानीत्याह—**तेन यः सर्वज्ञ**

न्यायनिर्णयः

श्रुतेरनुमितार्थानुवादित्वव्युदासार्थमर्थमाह— **तत्रेत्यादिना**। उक्तश्रुतिः सप्तम्यर्थः। छन्दोगश्रुतिवदैतरेयश्रुतिरपि प्रधानवाद-विरोधिनीत्याह— **तथेति**। मिषच्चलत्। सत्त्वाक्रान्तमिति यावत्। प्रश्नश्रुतिरपि प्रधानकारणतां वारयतीत्याह— **क्वचिच्चेति**। 'स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु नाम च' इत्युक्ताः षोडश कलाः।

'इक्श्तिपौ धातुनिर्देशे' इति स्मरणादीक्षतेरिति शितपा धातुस्वरूपकथनान्न तस्य चेतनोपादानत्वसाधनतेत्याशङ्क्याह— **ईक्षतेरितीति**। विषयिणा विषयस्य लक्षणादित्यर्थः। प्रसिद्धा चेयं लक्षणेत्याह— **यजतेरितिवदिति**। सप्तमे स्थितम्— 'इति-कर्तव्यताऽविधेर्यजतेः पूर्ववत्त्वम्'। इतिकर्तव्यतायाः सौर्यादिषु विकृतिष्वविधानादनितिकर्तव्यताकत्वे प्राप्ते प्रत्युच्यते— यथा लोके शाकादिषु सिद्धेषु वदन्त्योदनं पचेति, तथेह सिद्धवत्कृत्य सामान्येनेतिकर्तव्यतां करणं विहितम्। तस्याश्च विकृतिष्वविधेः सौर्यादीनां विकृतियागानां दर्शादिप्रकृतिविहितपूर्वेतिकर्तव्यतावत्त्वमिति। तत्र यथा यजतेरिति यागो गृहीतस्तथेहापीक्षतेरितीक्षण-मित्यर्थः। ईक्षतेरित्युक्तेरर्थपरत्वे वाक्यान्तराण्यपि प्रधानपक्षप्रतिक्षेपायात्र सूचितानि भवन्तीत्याह— **तेनेति**। सामान्यतः सर्वज्ञो,

---

१. श्लोकोऽयं कल्पतरावपि दृश्यते। (पृ. १६९)

२. द्र. पू.मी. ७.४.१ तथा च भाष्ये 'यजते' रिति एतत्सूत्रैकदेशग्रहणमिति भावः। ३. तिप्रत्ययान्तेन=शितप्रत्ययान्तेन।

ज्ञानमयं तपः। तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते' (मु.उ.१।१।९) इत्येवमादीन्यपि सर्वज्ञेश्वर-कारणपराणि वाक्यान्युदाहर्तव्यानि।

यत्तूक्तं सत्त्वधर्मेण ज्ञानेन सर्वज्ञं प्रधानं भविष्यतीति; तन्नोपपद्यते। न हि प्रधानावस्थायां गुणसाम्यात् सत्त्वधर्मो ज्ञानं संभवति। ननूक्तं सर्वज्ञानशक्तिमत्त्वेन सर्वज्ञं भविष्यतीति। तदपि नोपपद्यते। यदि गुणसाम्ये सति सत्त्वव्यपाश्रयां ज्ञानशक्तिमाश्रित्य सर्वज्ञं प्रधानमुच्येत, कामं 'रजस्तमोव्यपाश्रयामपि ज्ञानप्रतिबन्ध[२]'-शक्तिमाश्रित्य किंचिज्ज्ञमुच्येत।

अपि च नासाक्षिका सत्त्ववृत्तिर्जानातिनाऽभिधीयते। न चाचेतनस्य प्रधानस्य साक्षित्वमस्ति। तस्मादनुपपन्नं प्रधानस्य सर्वज्ञत्वम्। योगिनां तु चेतनत्वात् सत्त्वोत्कर्षनिमित्तं सर्वज्ञत्वमुपपन्न-

प्रकटार्थविवरणम्

सर्ववित्। तप आलोचनं स्वरूपज्ञानमयम्, नान्तःकरणाद्यधीनमित्यर्थः। ब्रह्म हिरण्यगर्भः।

पूर्वपक्षबीजं विभिनत्ति— **यत्तूक्तमित्यादिना**। पूर्वं केवलसत्त्ववृत्तेर्ज्ञानत्वमभ्युपगम्य न सत्त्वधर्मेण ज्ञानेन सर्वज्ञमित्युक्तम्। इदानीं नाद्रष्टृका सत्त्ववृत्तिर्ज्ञानम्, किन्तु अन्तःकरणवृत्त्यभिव्यक्तः चित्प्रकाशः, तथाविधज्ञानस्य [ज्ञानवत्त्वं प्रधानस्य] नास्तीत्याह— **अपि चेति**। पूर्वोक्तं दृष्टान्तं विघटयति— **योगिनां तु इति**। अचेतनस्यापि साक्षिचैतन्यव्याप्ततया

भाष्यभावप्रकाशिका

इति। सामान्यविशेषाभ्यां विश्वविदित्यर्थः। **ब्रह्मेति**। कार्यब्रह्म।

प्रधानस्यापि सर्वज्ञत्वादिकमुपपन्नमित्युक्तमनुवदति—**यत्त्विति**। सूक्ष्मरूपेण रजस्तमसोः प्रतिबन्धकत्वस्यापि सम्भव इत्याह—**काममिति**। किञ्च चैतन्यविशिष्टवृत्तिवचनो जानातिर्नाचेतनवृत्तिमात्रे वर्तत इत्याह—**अपि चेति**। प्रधानमेव तर्हि चिद्रूपेण परिणतं पश्चात्तदवच्छेदकवृत्त्यात्मना परिणतं स्यादित्याशङ्क्याह—**न चाचेतनस्येति**। सत्त्वोत्कर्षोऽपि चेतनस्योपकरोति,

न्यायनिर्णयः

विशेषतः सर्वविदिति भेदः। ज्ञानमयं ज्ञानात्मकं तपो न त्वायासरूपम्। एतद् ब्रह्म जायमानं हिरण्यगर्भाख्यं कार्यम्। नाम देवदत्तादि। रूपं नीलपीतादि। अन्नं व्रीहियवादि। आदिपदेन 'ज्ञः कालकालो गुणी सर्वविद्य' 'स कारणम्' इत्यादि गृहीतम्।

सिद्धान्तमुपपाद्य परोक्तमनुवदति— **यत्त्विति**। प्रधाने गुणानां तुल्यतया सत्त्वकार्यस्य ज्ञानस्यैवासंभवे सर्वज्ञत्वं दूरनिरस्तमित्याह— **तन्नेति**। औपचारिकं सर्वज्ञत्वमुक्तं स्मारयति— **नन्विति**। सत्त्वस्य सूक्ष्मरूपेण ज्ञानहेतुत्ववदितरयोरपि तेनात्मना तत्प्रतिबन्धकत्वान्न सर्वज्ञतेत्याह— **तदपीति**।

केवलसत्त्ववृत्तेर्ज्ञानत्वमुपेत्य सत्त्वधर्मेण तेन न सर्वज्ञतेत्युक्तम्। इदानीं न केवला सत्त्ववृत्तिर्ज्ञानम्, किंतु तदभिव्यक्तश्चित्प्रकाशः, तथाविधज्ञानवत्त्वं च न प्रधानस्येत्याह— **अपि चेति**। तर्हि प्रधानमेव चिदात्मना परिणतमवच्छेदकवृत्त्यात्मना विपरिणंस्यते, नेत्याह— **न चेति**। हेतुरचेतनस्येत्युक्तः। प्रधानस्यासर्वज्ञत्वमुक्तं निगमयति— **तस्मादिति**। अचेतनस्याज्ञातृत्वं तच्छब्दार्थः। परोक्तं दृष्टान्तं विघटयति— **योगिनां त्विति**। सत्त्वोत्कर्षोऽपि चेतनस्योपकरोति,

---

१. सांख्यमते त्रयाणां गुणानां मध्ये सत्त्वं लघु प्रकाशकार्यं च। चलो रजोगुणः प्रवृत्तिकार्यश्च। गुरुः तमोगुणः नियमनकार्यश्च। तत्र सत्त्वगुणस्य प्रकाशकत्वेऽपि चलस्वभावत्वाभावात् न स ज्ञानाकारेण परिणमते स्वतः। रजोगुणेन चलस्वभावेन प्रेरितः ज्ञानाकारेण परिणमते। स च परिणामः चलस्वभावेन रजसा यावत् सर्वत्र चालयितुमारभ्यते, तावदेव तमसा प्रतिबध्यत इति भोगप्रयोजककर्मानुसारेण विषयव्यवस्था भवति। ततश्च प्रतिबन्धशक्तेः तम एव यद्यप्याश्रयो भवति, तथापि प्रतिबन्धशक्त्या विषयतया रजोऽप्यपेक्षितमिति 'रजस्तमोव्यपाश्रया' मित्युक्तम्। ब्र. वि.।

२. 'प्रतिबन्धकशक्ति' इति पाठान्तरम्।

मित्यनुदाहरणम्। अथ पुनः साक्षिनिमित्तमीक्षितृत्वं प्रधानस्य कल्प्येत, यथाऽग्निनिमित्तमयःपिण्डादेर्दग्धृत्वम्। तथा सति यन्निमित्तमीक्षितृत्वं प्रधानस्य, तदेव सर्वज्ञं मुख्यं ब्रह्म जगतः कारणमिति युक्तम्।

यत्पुनरुक्तं ब्रह्मणोऽपि न मुख्यं सर्वज्ञत्वमुपपद्यते, नित्यज्ञानक्रियत्वे ज्ञानक्रियां प्रति स्वातन्त्र्यासंभवादिति। अत्रोच्यते– इदं तावद् भवान् प्रष्टव्यः, कथं नित्यज्ञानक्रियत्वे सर्वज्ञत्वहानिरिति। यस्य हि सर्वविषयावभासनक्षमं ज्ञानं नित्यमस्ति सोऽसर्वज्ञ इति विप्रतिषिद्धम्। अनित्यत्वे हि ज्ञानस्य कदाचिज्जानाति, कदाचिन्न जानातीत्यसर्वज्ञत्वमपि स्यात्। नासौ ज्ञाननित्यत्वे दोषोऽस्ति। ज्ञाननित्यत्वे ज्ञानविषयः स्वातन्त्र्यव्यपदेशो नोपपद्यत इति चेन्न, प्रततौष्ण्यप्रकाशेऽपि सवितरि दहति प्रकाशयतीति स्वातन्त्र्यव्यपदेशदर्शनात्। ननु सवितुर्दाह्यप्रकाश्यसंयोगे सति दहति प्रकाशयतीति व्यपदेशः स्यात्, न तु ब्रह्मणः प्रागुत्पत्तेर्ज्ञानकर्मसंयोगोऽस्तीति विषमो दृष्टान्तः। न, असत्यपि कर्मणि सविता प्रकाशत इति

प्रकटार्थविवरणम्

चिच्छायापत्त्येक्षणं भवतु इत्याह— **अथ पुनरिति**। सुदूरमपि गत्वा सर्वसाक्षी चिद्धातुः स्वीकृतश्चेत् किं प्रधानकल्पनयेत्याह— **तथा च सतीति**। पराभिप्रायमुद्भावयति— **यत्पुनरिति**। प्रकृत्यर्थस्य नित्यचित्प्रकाशस्य निरपेक्षत्वात्, प्रत्ययार्थस्य च कर्तृत्वस्य सापेक्षत्वात् सापेक्षत्वानपेक्षत्वयोर्विरोधे सापेक्षप्रत्ययार्थं विहाय निरपेक्षप्रकृत्यर्थोपादानेन नित्यचित्प्रकाशं ब्रह्म सर्वज्ञादिपदैः लक्ष्यत इति न प्रधाने समन्वय इत्यभिप्रेत्याह— **अत्रोच्यत इति**। किञ्च किं नित्यज्ञानेन सर्वज्ञत्वं न संभवति, आगन्तुकेनैव संभवतीत्यभिप्रायः, ततश्च [उत] कर्तृत्वव्यपदेशो न संभवति [तीति] इत्याह— **इदं तावदिति**। आद्यं प्रत्याह— **यस्य हीति**। द्वितीयं शङ्कते— **ज्ञाननित्यत्व इति**। व्यपदेशमात्रस्य नानुपपत्तिः, सततौष्ण्यप्रकाशेऽपि सवितरि कर्तृत्वव्यपदेशदर्शनादित्याह— **नेति**। तत्रापि विषयोपरक्तरूपेण प्रकाशस्य जन्यत्वाद् घटते कर्तृत्वव्यपदेश इत्याह— **नन्विति**। तर्हीहापि तथाऽस्त्विति, नेत्याह— **न ब्रह्मण इति**। तत्र किं ज्ञानस्य कर्मसंबन्धविवक्षा नास्ति, चित्प्रकाशस्याक्रियात्वात्, किं वा कर्मसंयोग एव नास्ति? प्रथमं

भाष्यभावप्रकाशिका

नाचेतनस्य प्रधानस्यान्धस्येवाऽऽदर्शोत्कर्ष इत्याह—**योगिनामिति**।

सेश्वरसाङ्ख्यमतमनूद्य दूषयति— **अथ पुनरिति**। प्रकृत्यर्थाभावात् सर्वज्ञत्वमनुपपन्नम्, किं वा प्रत्ययार्थाभावादिति विकल्प्य, न तावदाद्य इत्याह—**कथं नित्येति**। द्वितीयकल्पमवलम्बते—**ज्ञाननित्यत्व इति**। स्वरूपेण नित्यस्यापि तत्तद्विषयोपाधिकस्य कार्यत्वात् तत्र स्वातन्त्र्यं प्रत्ययार्थः परमेश्वरस्यापि युज्यत इत्यभिप्रेत्याह—**न प्रततौष्ण्येति**। वैषम्यमाशङ्कते—**ननु सवितुरिति**। यत्र यत्र स्वातन्त्र्यम्, तत्र तत्र धात्वर्थाश्रयत्वमेव सर्वत्र; अव्यभिचारात्, इहापि तथैवेत्यभ्युपगम्य परिहरति—**नासत्यपि कर्मणीति**।

न्यायनिर्णयः

नाचेतनस्य प्रधानस्य, अन्धस्येवादर्शोत्कर्ष इत्यर्थः। सेश्वरसांख्यमतमाह— **अथेति**। यस्य स्वतो नेक्षितृत्वम् तस्य कथं तदन्यकृतमपि स्यादित्याशङ्क्याह— **यथेति**। लाघवेन सिद्धान्तयति— **तथेति**।

सिद्धान्ते परोक्तामनुपपत्तिमनुभाषते— **यत्पुनरिति**। तस्य मुख्यं सर्वज्ञत्वं प्रतिजानीते– **अत्रेति**। तत्र परोक्त्य[क्ता] नुपपत्तिं निरसितुं पृच्छति— **इदमिति**। प्रकृत्यर्थाभावात् प्रत्ययार्थाभावाद्वा ब्रह्मणोऽसर्वज्ञतेति प्रश्नमेव प्रकटयति— **कथमिति**। प्रथमं प्रत्याह— **यस्येति**। उक्तं व्यतिरेकद्वारा विवृणोति— **अनित्यत्वे हीति**। द्वितीयं शङ्कते— **ज्ञानेति**। स्वतो नित्यस्यापि ज्ञानस्य तत्तदर्थावच्छिन्नस्य कार्यत्वात् तत्र स्वातन्त्र्यं प्रत्ययार्थो ब्रह्मणः सिध्यतीत्याह– **नेत्यादिना**। वैषम्यं शङ्कते— **नन्विति**। ब्रह्मणोऽपि

कर्तृत्वव्यपदेशदर्शनात्। एवमसत्यपि ज्ञानकर्मणि ब्रह्मणः 'तदैक्षत' इति कर्तृत्वव्यपदेशोपपत्तेर्न वैषम्यम्।

कर्मापेक्षायां तु ब्रह्मणीक्षितृत्वश्रुतयः सुतरामुपपन्नाः। किं पुनस्तत् कर्म, यत् प्रागुत्पत्तेरीश्वरज्ञानस्य विषयो भवतीति। तत्त्वान्यत्वाभ्यामनिर्वचनीये नामरूपे अव्याकृते व्याचिकीर्षिते इति ब्रूमः। यत्प्रसादाद्धि योगिनामप्यतीतानागतविषयं प्रत्यक्षं ज्ञानमिच्छन्ति योगशास्त्रविदः, किमु वक्तव्यं तस्य नित्यसिद्धस्येश्वरस्य सृष्टिस्थितिसंहृतिविषयं नित्यं ज्ञानं भवतीति।

प्रकटार्थविवरणम्

प्रत्याह— **न, असत्यपीति**। प्रकाशस्याक्रियात्वात् कर्मसंबन्धेऽविवक्षितेऽपि लोके सवितुः कर्तृव्यपदेशदर्शनात् सविता प्रकाशयतीति तथेहापि स्यादित्यर्थः। द्वितीयं प्रत्याह— **कर्मापेक्षायां त्विति**। यथा कुम्भकारस्य व्याचिकीर्षिताकारः स्वोपाध्यन्तःकरणपरिणाम ईक्षणम्; तथा ब्रह्मणोऽपि मायोपाधेरनादिप्रवृत्तसंस्काराया मायायाः प्रलयकारण-कर्मक्षयोत्थापितसंस्कारादिनिमित्तवशात् सर्गोन्मुखः परिणाम ईक्षणमित्यर्थः। अस्मिन् पक्षे कर्तृत्वस्य प्रत्ययार्थस्यापि बाधाभावात् **सुतरामित्युक्तम्**। आदिकर्ता स्वोपाधिपरिणामेक्षण ईक्षितृत्वात्,कुलालवत् इति। अतोऽन्यस्य मुख्यस्यासंभवात् इदमेव मुख्यमीक्षणम्। अद्वैतभङ्गं मत्वाऽऽह— **किं पुनरिति**। सकार्याया मायाया अनिर्वचनीयत्वात् नाद्वैतभङ्ग इत्याह— **तत्त्वेति**। किञ्च "भक्तिविशेषादावर्जित ईश्वरः समनुगृह्णाति ज्ञानवैराग्यादिना" इति योगशास्त्रभाष्यकृद्वचनात् यस्य भगवतः प्रसादाद् योगिनामपि

भाष्यभावप्रकाशिका

ननु प्रकाशतेर्निष्कर्मत्वात् तथा व्यपदेशेऽपि जानातेस्सकर्मकत्वात् तथा व्यपदेशो न युक्त इति शङ्कायामाह— '**कर्मापेक्षयेति**। अथवैवं योजना—किं वास्तवकर्माभावाद्वैषम्यम्, उत तद्विवक्षाऽभावात्। यदि तद्विवक्षाऽभावात्, तदा प्रकाशयतीत्यनेन साम्याभावेऽपि प्रकाशत इत्यनेनास्त्येव साम्यम्। अतः कर्मणोऽविवक्षितत्वेऽपि स्वातन्त्र्यव्यपदेशोऽस्तीति परिहरति—**नासत्यपीति**। अविवक्षितेऽपीति भावः। अथान्यः, तत्राह—**कर्मापेक्षयेति**। यासां सति कर्मण्यविवक्षितेऽपि श्रुतीनामुपपत्तिः, तासां सति कर्मणि विवक्षिते सुतरामित्यर्थः। ननु कर्म ब्रह्मणोऽन्यच्चेत्, अद्वैतविरोधः, अनन्यच्चेत्, सर्वज्ञताहानिरित्याक्षिपति—**किं पुनरिति**। सर्वस्य नामरूपात्मकत्वात् तयोश्च परमार्थतो ब्रह्मणो भेदाभावान्न कोऽपि दोष इति परिहरति—**तत्त्वेति**। सेश्वरसाङ्ख्यं प्रति च सर्वज्ञत्वं न साधनीयमित्यभिप्रेत्याह—**यत्प्रसादादिति**। वस्तुतो नित्यस्य

न्यायनिर्णयः

विषयसंबन्धे जानातीति स्यादित्याशङ्क्याह— **न त्विति**। यत्र स्वातन्त्र्यं तत्र क्रियाश्रयत्वमेवाव्यभिचारादिति दूषयति— **न, असत्यपीति**।

प्रकाशतेरकर्मकत्वात् तथाव्यपदेशेऽपि जानातेः सकर्मकत्वात् कर्माभावे तथाव्यपदेशो न स्यादित्याशङ्क्याह— **कर्मेति**। प्रकृत्यर्थवत् प्रत्ययार्थस्यापि बाधाभावात् सुतरामित्युक्तम्। यथा कुम्भकारस्य व्याचिकीर्षिताकारस्वोपाध्यन्तःकरणपरिणतिरीक्षणं तथा ब्रह्मणोऽप्यविद्यायाः स्वोपाधेरनादिप्रवृत्तसर्गसंस्कारायाः प्रलयहेतुकर्मक्षयोत्थापितसंस्कारादिनिमित्तवशेन सर्गोन्मुखा परिणतिरीक्षणम्। ततोऽन्यस्य मुख्यस्यासंभवादिदमेव मुख्यम्। तत्र चास्याऽऽदिकर्तुरस्ति कर्तृतेति भावः। नन्वपेक्षितं कर्म ब्रह्मणो भिन्नमभिन्नं वा? आद्ये तदद्वैतहानिः, द्वितीये सर्वज्ञत्वासिद्धिरित्याह— **किमिति**। 'तन्नामरूपाभ्यामेव' इत्यादिश्रुतेः सर्वस्य कार्यप्रपञ्चस्य नामरूपात्मकत्वात्तयोश्च ब्रह्मणो भेदाभेदाभ्यां दुर्भणत्वान्नैवमित्याह— **तत्त्वेति**। प्रागेव तयोः सत्त्वे सर्गासिद्धिमाशङ्क्याह— **अव्याकृते इति**। तयोस्तथास्वाभाव्ये कुतः सृष्टिरित्याशङ्क्योक्तम्— **व्याचिकीर्षिते इति**। निरीश्वरवादिनं प्रति ब्रह्मणः सर्वज्ञत्वमुक्त्वा सेश्वरवादिनं प्रत्याह— **यत्प्रसादादिति**। 'ततः प्रत्यक्चेतनाधिगमोऽन्तरायाभावश्च' इति योगसूत्रस्य, 'भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णाति ज्ञानवैराग्यादिना' इति तद्भाष्यस्य च दृष्टेर्योगशास्त्रविद इत्युक्तम्। अपिना सूचितं कैमुतिकं न्यायमाह— **किम्विति**। तथा च सेश्वरवादे ब्रह्मणः सार्वज्ञ्यमनायासलभ्यमिति शेषः।

१. इदं भाष्ये पाठान्तरमिति भाति।

यदप्युक्तं प्रागुत्पत्तेर्ब्रह्मणः शरीरादिसंबन्धमन्तरेणेक्षितृत्वमनुपपन्नमिति, न तच्चोद्यमवतरति, सवितृप्रकाशवद् ब्रह्मणो ज्ञानस्वरूपनित्यत्वे ज्ञानसाधनापेक्षानुपपत्तेः। अपि चाविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात्, न ज्ञानप्रतिबन्धकारणरहितस्येश्वरस्य। मन्त्रौ चेमावीश्वरस्य शरीराद्यनपेक्षतामनावरणज्ञानतां च दर्शयतः–'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' (श्वे.उ. ६।८) इति। 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्' (श्वे.उ. ३।१९) इति च।

प्रकटार्थविवरणम्

सर्वार्थदर्शित्वमिष्यते, किमु वक्तव्यं तस्य सर्वज्ञत्वमित्याह— **यत्प्रसादादिति।**

उक्तानुवादेन दूषयति— **यदप्युक्तमित्यादिना।** नित्यत्वात् न स्वरूपोत्पत्त्यर्था साधनापेक्षा; नाप्यभिव्यक्त्यर्था, प्रतिबन्धाभावादित्याह— **अपि चेति।** यथोक्तार्थे प्रमाणमाह— **मन्त्रौ चेमाविति।** विकारापेक्षया परा, [1]शक्तिर्माया। विविधा सर्वाघटमानघटनापटीयसी। ज्ञानस्य चैतन्यस्य बलं चिदाभासः, तस्य क्रिया नाम तज्जनकता ज्ञातृता, साऽपि नैसर्गिकी। मायापरिणामेषु हि प्रतिबिम्बिता चित् तत्र प्रकाशाभासोदयहेतुर्भवति। सूर्य इव जले प्रतिबिम्बितः, सैव ज्ञातृतेत्यर्थः।

भाष्यभावप्रकाशिका

का[क]रणानपेक्षतां स्वरूपेणोक्त्वा व्यतिरेकमुखेनाप्याह—**अपि चेति।** आदिशब्देन कामकर्मादयः संगृह्यन्ते।

ननु संसारिणामपि ज्ञानस्य नित्यत्वात् साधनापेक्षा न भवेत्, भवेच्चेदीश्वरस्यापि भवेदित्याशङ्क्य संसारिणां नित्यज्ञानत्वेऽप्यविद्यादयः प्रतिबन्धकाः सन्ति, न त्वीश्वरस्येति परिहरति—**न ज्ञानप्रतिबन्धेति।** ज्ञानबलेन क्रिया ज्ञानबलक्रिया, अपाणिर्ग्रहीता। अपादो जवनः=वेगवद्विहरणवान्।

न्यायनिर्णयः

जीवस्येवेश्वरस्यापि ज्ञानानुगुणहेत्वपेक्षामनुवदति— **यदपीति।** वस्तुतो नित्यस्य स्वतो हेत्वनपेक्षत्वान्नैवमित्याह— **न तदिति।** तदेव व्यतिरेकेण साधयति— **अपि चेति। अविद्या** मिथ्याज्ञानम्। आदिशब्देनास्मितादिरुक्तः। ननु संसारिणोऽपि ज्ञानस्य नित्यत्वात् न हेत्वपेक्षा, स्याच्चेदीश्वरस्यापि स्यादभेदादित्याशङ्क्याऽऽविद्यं भेदमादाय विशेषमाह— **न ज्ञानेति।** सोऽपि ज्ञानप्रतिबन्धकारणवानितरवच्चेतनत्वात्। अतस्तस्यापि देहाद्यपेक्षा ज्ञानोत्पत्तिरित्याशङ्क्य कालात्ययापदिष्टत्वमाह— **मन्त्रौ चेति।** चकारः शङ्कानिरासार्थः। कार्यं शरीरं, करणमिन्द्रियजातं, समः समानजातीयोऽभ्यधिको विजातीयो, दृश्यत इति नञाऽन्वितं [2]द्वयं मानाभावपरम्। सत्त्वासत्त्वादिनाऽनवगाह्यत्वं परत्वम्। शक्तिर्मूलकारणं माया, तस्या विविधत्वमाकाशाद्यशेषाकारत्वम्। ऐतिह्यमात्रसिद्धा सा, न प्रामाणिकीति वक्तुं 'श्रूयत' इत्युक्तम्। उक्तमायानुसारित्वं स्वाभाविकत्वं, ज्ञानमेव बलं, तेन क्रिया जगतः सर्गाद्या, सा च स्वाभाविकीति। अपाणिरपि ग्रहीता, अपादोऽपि जवनो वेगवद्विहरणवान्, अचक्षुरपि पश्यति, अकर्णोऽपि शृणोति। किं बहुना? सर्वमपि वेदनयोग्यं कार्यकरणानपेक्षो वेत्ति। पर्यवसितं तस्मिन् वेदितृत्वमतो न तस्यान्यो वेदिताऽस्ति, नित्यस्फुरणत्वाच्च। तं चादिकर्तारं महान्तमाचक्षते ब्रह्मविदः। न च तन्महत्त्वमापेक्षिकमिति पुरुषपदम्।

---

१. आत्मनः कारणत्वनिर्वाहकत्वात्, आत्मपरतन्त्रत्वाच्च मायाऽऽत्मनः शक्तिरित्युपचर्यते। द्र.पं.वि. पृ. ५३।

२. 'द्वये' इति पाठः स्यात्। 'न विद्यते' इत्यनुक्त्वा 'न दृश्यते' इत्युक्तेरभिप्रायमाह— द्वय इति। द्वये=समे, अभ्यधिके च।

ननु नास्ति 'तावज्ज्ञानप्रतिबन्धकारणवानीश्वरादन्यः संसारी, 'नान्योऽतोऽस्ति द्रष्टा.... नान्योऽतोऽस्ति विज्ञाता' (बृ.उ. ३।७।२३) इति श्रुतेः। तत्र किमिदमुच्यते संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिर्नेश्वरस्येति। अत्रोच्यते– सत्यम्, नेश्वरादन्यः संसारी। तथापि देहादिसंघातोपाधिसंबन्ध इष्यत एव, घटकरकगिरिगुहाद्युपाधिसंबन्ध इव व्योम्नः। तत्कृतश्च शब्दप्रत्ययव्यवहारो लोकस्य दृष्टो घटच्छिद्रं करकादिच्छिद्रमित्यादिराकाशाव्यतिरेकेऽपि। तत्कृता चाकाशे घटाकाशादिभेदमिथ्याबुद्धिर्दृष्टा। तथेहापि देहादिसंघातोपाधिसंबन्धाविवेककृतेश्वरसंसारिभेदमिथ्याबुद्धिः। दृश्यते चात्मन एव सतो देहादिसंघातेऽनात्मन्यात्मत्वाभिनिवेशो मिथ्याबुद्धिमात्रेण पूर्वपूर्वेण। सति चैवं संसारित्वे देहाद्यपेक्षमीक्षितृत्वमुपपन्नं संसारिणः।

प्रकटार्थविवरणम्

प्रासङ्गिकं चोद्यमुद्भावयति— **ननु नास्तीति**। य एव चिद्धातुर्मायाप्रतिबिम्बितत्वेनेश्वरः स एवाविद्याप्रतिबिम्बिततया संसारीति नास्त्येव स्वरूपभेदः; तथापि विशिष्टभेदोऽस्तीत्याह— **सत्यमित्यादिना**। स्वरूपाभेदेऽपि विशिष्टभेदकृतो व्यवहारासङ्करश्च दृष्ट इत्याह— **तत्कृतश्चेति**। देहादिसङ्घात एवोपाधिः; तत्संबन्धे हेतुरविवेकोऽनादिरविद्या, तत्कृता। ननु यदि जीवस्य ब्रह्मभावः स्वाभाविकः तर्हि सदा किं न प्रकाशेत? प्रकाशमाने वस्तुनि स्वरूपानवभासस्याविद्ययाऽप्यदर्शनादित्याशङ्क्याह— **दृश्यते चेति**। देहादिव्यतिरिक्तस्यैव सतो जीवस्य स्वभावभूतोऽपि व्यतिरेको नावभासते, विपरीतस्तु मिथ्याभिमानो दृश्यतेऽनिर्वाच्याविद्याप्रभावात्; तथा तस्यैव ब्रह्मता न व्यज्यते, विपरीतं तु प्रमातृत्वादि व्यज्यत इत्यर्थः।

भाष्यभावप्रकाशिका

ननु ब्रह्मांशभूतस्तद्विकारो वा जीवोऽन्योऽस्तीति, अत आह—**नान्योऽत इति**। यद्यपि परमार्थतो भिन्नो नास्ति; तथाप्युपाधिपरिकल्पितभेदोऽस्तीति परिहरति—**सत्यमिति**। परमार्थविभागाभावेऽपि कथं पुनरुक्तशब्दप्रत्ययगम्यत्वमिति नाशङ्कनीयमित्याह—**तत्कृतश्चेति**। ननु अनात्मनि भ्रमस्संभवति व्योमादौ, न त्वात्मनि स्वयंप्रकाश इत्याशङ्क्याह—**दृश्यते चेति**। अभिनिवेशोऽभिमानो मिथ्याबुद्धिमात्रेण पूर्वकालीनेन। मात्रेणेति विचारासहत्वमुक्तम्। अतः प्रकृते किमायातमिति? अत आह— **सति चैवमिति**।

न्यायनिर्णयः

अविद्यादिमतः संसारिणो देहाद्यपेक्षा ज्ञानोत्पत्तिर्नेश्वरस्येत्यत्रापसिद्धान्तं शङ्कते— **नन्विति**। न केवलमपराद्धान्तादीश्वरादन्यो न संसारी, किंतु श्रुतिविरोधादपीत्याह— **नेति**। व्यतिरिक्ते संसारिण्यसति विभागोक्तिरयुक्तेति फलितमाह— **तत्रेति**। स्वाभाविकमौपाधिकं वाऽन्यत्वं नास्तीति विकल्पयति– **अत्रेति**। तत्राद्यमङ्गीकरोति— **सत्यमिति**। द्वितीयं प्रत्याह— **तथापीति**। तत्कृतमन्यत्वं चेष्टमेवेति शेषः। अपरिच्छिन्नस्य परिच्छिन्नोपाधिसंबन्धे दृष्टान्तमाह— **घटेति**। विमतौ तत्त्वतो भिन्नौ, अपुनरुक्तशब्दधीगम्यत्वात्, घटादिवदित्याशङ्क्य व्यभिचारमाह— **तत्कृतश्चेति**। उपाधिसंबन्धस्तच्छब्दार्थः। हेतुमदाकाशे साध्यं व्यावर्तयति— **आकाशेति**। तस्य तत्त्वतो भेदाभावेऽपीति यावत्। परापरयोस्तात्त्विकभेदाभावे कथं तत्प्रथेत्याशङ्क्याह— **तत्कृतेति**। पूर्ववत्तच्छब्दः। दृष्टान्तस्थमर्थं दार्ष्टान्तिके योजयति— **तथेति**। चिदात्मा सप्तम्यर्थः। विशिष्टोपाधियोगादविवेकस्तेन कृतेत्येतत्। व्योमादावनात्मनि भ्रान्तिसंभवेऽपि कथमात्मनि स्वप्रकाशे स्यादित्याशङ्क्याह— **दृश्यते चेति**। तत्त्वतोऽतिरिक्तस्यैव सत आत्मन इति योजना। तत्र कारणमाह— **मिथ्येति**। पूर्वभ्रान्तेरेव संस्कारद्वारोत्तरभ्रान्तिकारणत्वमवधारयितुं तन्मात्रग्रहणं न, किंतु तद्धेतोर्विचारासहत्वं वक्तुम्, अतो हेत्वन्तरमविरुद्धम्। उपाधिद्वारा चिदात्मनि संसारित्वेऽपि प्रकृते किं जातं तदाह— **सति चेति**। ईश्वरस्यासंसारिणो महाकाशस्थानीयस्य तदनपेक्षमीक्षितृत्वमिति शेषः। प्रधानस्य परोक्तं सर्वज्ञत्वं निरस्य

१. 'नास्ति तव' इति पा.।

यदप्युक्तं प्रधानस्यानेकात्मकत्वान्मृदादिवत् कारणत्वोपपत्तिर्नासंहतस्य ब्रह्मण इति, तत् प्रधानस्याशब्दत्वेनैव प्रत्युक्तम्। यथा तु तर्केणापि ब्रह्मण एव कारणत्वं निर्वोढुं शक्यते, न प्रधानादीनां तथा प्रपञ्चयिष्यति–'न विलक्षणत्वादस्य' (ब्र.सू. २।१।४) इत्येवमादिना।।५।।

अत्राह– यदुक्तं नाचेतनं प्रधानं जगत्कारणमीक्षितृत्वश्रवणादिति, तदन्यथाऽप्युपपद्यते, अचेतनेऽपि चेतनवदुपचारदर्शनात्। यथा प्रत्यासन्नपतनतां नद्याः कूलस्यालक्ष्य कूलं पिपतिषतीत्यचेतनेऽपि कूले चेतनवदुपचारो दृष्टः, तद्वदचेतनेऽपि प्रधाने प्रत्यासन्नसर्गे चेतनवदुपचारो भविष्यति 'तदैक्षत' इति। यथा लोके कश्चिच्चेतनः स्नात्वा भुक्त्वा चापराह्णे ग्रामं रथेन गमिष्यामीतीक्षित्वाऽनन्तरं तथैव नियमेन प्रवर्तते, तथा प्रधानमपि महदाद्याकारेण नियमेन प्रवर्तते। तस्माच्चेतनवदुपचर्यते। कस्मात् पुनः कारणाद् विहाय मुख्यमीक्षितृत्वमौपचारिकं कल्प्यते? 'तत्तेज ऐक्षत' 'ता आप ऐक्षन्त' (छा.उ. ६।२।३,४) इति चाचेतनयोरप्यप्तेजसोश्चेतनवदुपचारदर्शनात्। तस्मात् सत्कर्तृकमपीक्षणमौपचारिकमिति गम्यते, उपचारप्राये वचनादिति। एवं प्राप्त इदं सूत्रमारभ्यते–

प्रकटार्थविवरणम्

प्रासङ्गिकं परिहृत्य पूर्ववाद्युक्तं पुनरुद्भावयति— **यदप्युक्तमिति**। सति प्रधाने प्रामाणिके कारणत्वसंभवचिन्तावतारः; न च तदस्तीत्याह— **तत् प्रधानस्येति**। ननु ब्रह्मणोऽपि कारणत्वं ततो न घटते, अचेतनस्य चेतनप्रकृतिकत्वादर्शनादित्याशङ्क्याह— **यथा त्विति**।

उत्तरसूत्रनिरास्यां शङ्कामाह— **अत्राहेत्यादिना**। ईक्षणे गौणे किं गुणसाम्यमित्याशङ्क्याह— **यथा लोक इति**। प्रतिनियतप्रवृत्तिशालित्वं चेतनसाम्यमित्यर्थः। मुख्यार्थपरिग्रहे प्रमाणान्तरविरोधे मुख्यार्थगुणयोगादर्थान्तरे वृत्तिर्गौणी। किमिह मुख्यार्थबाधकमित्याह— **कस्मात्पुनरिति**। उपचारप्रचुरे प्रकरणे समाम्नानं बाधकमित्याह— **तत्तेज इति**।

भाष्यभावप्रकाशिका

ननु प्रधानस्य शब्दबलात् कारणत्वं न कल्प्यते, किन्त्वनुमानैः, तत्र च वेदान्तानां समन्वय इति, अत आह—**यथा त्विति**।।५।।

न्यायनिर्णयः

ब्रह्मणस्तदुपपत्तिरुक्ता। सम्प्रति प्रधानस्यैव कारणत्वयोग्यतेत्युक्तमनुवदति— **यदपीति**। तस्य कारणत्वं शब्दतस्तर्कतो वा? नाद्य इत्याह— **तदिति**। द्वितीयं निरस्यति— **यथा त्विति**।।५।।

प्रधानस्य न कारणतेत्युक्ते सतीक्षितृत्वस्य चेतनकारणत्वहेतोर्व्यभिचारं चोदयति— **अत्रेति**। उक्तमनूद्य व्यभिचारं स्फोटयति— **यदुक्तमिति**। हेतुश्रवणं [१]तदा परामृष्टम्। **अन्यथाऽपि** जगत्कारणस्याचेतनत्वेऽपीत्यर्थः। कथमुपपत्तिः? न हि तत्र मुख्यमीक्षितृत्वं, तत्राह— **अचेतनेऽपीति**। तदेव दृष्टान्तेन व्याचष्टे— **प्रत्यासन्नेति**। तथापि कथं प्रधाने 'तदैक्षत' इति व्यपदेशः, तत्राह— **तद्वदिति**। उपचारे निमित्तम्— **प्रत्यासन्नेत्यादि**। तथाविधेऽपि प्रधाने सिसृक्षतीति स्यात्, कथमैक्षतेति तत्र— **चेतनवदिति**। त्रिरुक्तं दृष्टान्तं व्याकुर्वाणो लौकिकेक्षितृसाम्यान्नियतक्रियाकारित्वादित्थमुक्तिरित्याह— **यथेति**। **तस्मादिति** नियतप्रवृत्तिमत्त्वं हेतूकृतम्। मुख्यगौणयोर्मुख्यग्रहणं न्याय्यमिति सिद्धान्ती शङ्कते— **कस्मादिति**। गौणेक्षणसंनिधिना समाधत्ते— **तत्तेज इति**। **दर्शनादौपचारिकं सतोऽपीक्षितृत्वमिति** संबन्धः। संनिधिफलमाह— **तस्मादिति**। तच्छब्दार्थं व्याकरोति— **उपचारेति**। तत्प्राये तत्प्रकरणे। **इतिशब्दः** [२]शङ्कोपक्रमस्थक्रियापदसंबन्धी। व्यभिचारशङ्कामनूद्य सूत्रमुत्तरत्वेनावतारयति— **एवमिति**।

---

१. तदा=तच्छब्देन। २. 'आह' इति क्रियापदम्।

गौणश्चेन्नात्मशब्दात्।।६।।

यदुक्तं प्रधानमचेतनं सच्छब्दवाच्यं तस्मिन्नौपचारिक ईक्षतिः, अप्तेजसोरिवेति, तदसत्। कस्मात्? आत्मशब्दात्। 'सदेव सोम्येदमग्र आसीत्' इत्युपक्रम्य 'तदैक्षत' 'तत्तेजोऽसृजत' (छा.उ. ६।२।१,३) इति च तेजोऽबन्नानां सृष्टिमुक्त्वा तदेव प्रकृतं सदीक्षितृ, तानि च तेजोऽबन्नानि देवताशब्देन परामृश्याह— 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छा.उ. ६।३।२) इति। तत्र यदि प्रधानमचेतनं गुणवृत्त्येक्षितृ कल्प्येत, तदेव प्रकृतत्वात् सेयं देवतेति परामृश्येत। नं तदा देवता जीवमात्मशब्देनाभिदध्यात्। जीवो हि नाम चेतनः शरीराध्यक्षः प्राणानां धारयिता, तत्प्रसिद्धेर्निर्वचनाच्च। स कथमचेतनस्य प्रधानस्यात्मा भवेत्? आत्मा हि नाम स्वरूपम्। नाचेतनस्य प्रधानस्य चेतनो जीवः स्वरूपं भवितुमर्हति। अथ तु चेतनं ब्रह्म मुख्यमीक्षितृ परिगृह्यते, तस्य जीवविषय आत्मशब्दप्रयोग उपपद्यते।

प्रकटार्थविवरणम्

गौणश्चेन्नात्मशब्दात्। प्रकृतेनेक्षित्रा चेतने जीवे स्वरूपाभिधाय्यात्मशब्दप्रयोगात्, चेतनाचेतनयोश्च विरोधादेकत्वासंभवात् न प्रकृते सच्छब्दार्थे गौण ईक्षतिप्रयोग इति सूत्रार्थमाह— **यदुक्तमित्यादिना। निर्वचनाच्चेति।** "जीव प्राणधारणे" इति धात्वर्थानुसरणाच्चेत्यर्थः। ननु संसार्यसंसारिणोरपि परस्परविरोधात् कथं ब्रह्मणोऽपि जीवविषये आत्मशब्द इत्याशङ्क्याह— **अथ त्विति।** मलीमसेऽपि दर्पणे मदीयं मुखमिति प्रत्यभिज्ञावदित्यर्थः। चेतनस्य श्वेतकेतोरात्मत्वेनोपदेशादपि न प्रकृते गौण ईक्षतिरिति

भाष्यभावप्रकाशिका

गौणश्चेन्नात्मशब्दात्।।६।। ननु प्रत्यासन्नसर्गे सिसृक्षतीति प्रयोगः स्यात्, न पुनरैक्षतेति स्यादित्याशङ्क्य लोकसिद्धेक्षितृसाम्यान्नियतक्रियाकारित्वादुपपद्यत इत्याह—**यथेति।** मुख्ये संभवति न गौणकल्पना युक्तेति सिद्धान्ती शङ्कते— **कस्मादिति।** साङ्ख्यो ब्रूते—**तत्तेज इति।** उपचारप्राये=उपचारप्रकरण इत्यर्थः। साङ्ख्यमतं निराकर्तुं प्रकरणमनुसन्धत्ते— **सदेवेति।** ननु जीवस्यापि प्रमाणतया तत्कार्यत्वादात्मशब्दो युक्त इत्याशङ्क्य जीवस्वरूपं दर्शयति—**जीवो हीति।** आत्मशब्दार्थं दर्शयन्नसंभवमाह—**आत्मा हीति।** आत्मशब्दप्रयोगोपपत्तिं स्वमते दर्शयति—**अथ त्विति।** "आत्मशब्दादि"-

न्यायनिर्णयः

अनुवादभागं विभजते— **यदुक्तमिति।** परिहारभागं व्याकर्तुं नञर्थमुक्त्वा प्रश्नद्वारा हेतुमाह— **तदसदिति।** परमतं निरसितुं प्रकरणमनुसंदधानो हेतुं व्याचष्टे— **सदेवेति।** सेति प्रकृतसदात्मोक्तिः। **इयमिति** संनिहितेक्षितृत्वनिर्देशः। देवतेत्यलौकिकत्वमुक्तम्। ईक्षणमभिनयति— **हन्तेति।** सूक्ष्मभूतसर्गानन्तरं तावता व्यवहारायोगात् तदपेक्षायामित्यर्थः। सृष्टिवाक्येनोक्तानि तेजोऽबन्नानि निर्दिशति— **इमा इति।** सूक्ष्मभूतानां व्यवहाराङ्गत्वेनाप्रत्यक्षत्वात् तेषु देवताशब्दः। **अनेन** पूर्वसृष्ट्यनुभूतेन **जीवेन** प्राणधृतिहेतुनाऽऽत्मना सद्रूपेण यथोक्ता देवताः सर्गानन्तरं प्रविश्य नाम रूपं चेति विस्पष्टमासमन्तात्करवाणीति परा देवतेक्षितवतीत्यर्थः। ननु सा जीवमात्मशब्देनाभिधत्ताम्, तथापि प्रधानस्य गौणमीक्षितृत्वं किं न स्यात्, तत्राह— **तत्रेति।** ईक्षणवाक्यं सप्तम्यर्थः। जीवस्य चेतनत्वादचेतनप्रधानस्य तदात्मत्वायोगादित्यर्थः। तस्यापि प्राणात्मना प्रधानकार्यत्वात् तस्य तस्मिन्नात्मशब्दः स्यादित्याशङ्क्य जीवस्वरूपमाह— **जीवो हीति।** तस्य तदीयचैतन्यस्य च प्रसिद्ध्यर्थौ निपातौ। चेतनत्वे हेतुः— **शरीरेति।** तत्र जीवशब्दप्रवृत्तौ निमित्तमाह— **प्राणानामिति।** उक्तचेतनस्य जीवत्वे मानमाह— **प्रसिद्धेरिति।** प्राणविषयत्वेनापि लौकिकी प्रसिद्धिः स्यादित्याशङ्क्य 'जीव प्राणधारणे' इति धात्वर्थानुरोधादुक्तश्चेतनो जीव इत्याह— **निर्वचनाच्चेति।** सिद्धे जीवस्य चैतन्ये फलितमाह— **स कथमिति।** आत्मशब्दार्थं वदन्नसंभवं साधयति— **आत्मा हीति।** पूर्ववन्निपातौ। संसार्यसंसारिणोर्विरोधात् त्वन्मतेऽपि ब्रह्मणो जीवे कथमात्मपदं प्रयुक्तमित्याशङ्क्याह— **अथ त्विति।** तत्त्वतोऽविरोधाद् दृष्टितो विरोधस्य बिम्बप्रतिबिम्बयोर्व्यभिचाराज्जीवब्रह्मैक्याद् ब्रह्मणो जीवे युक्तमात्मपदमित्यर्थः।

तथा 'स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' (छा.उ. ६।१४।३) इत्यत्र 'स आत्मा' इति प्रकृतं सदणिमानमात्मानमात्मशब्देनोपदिश्य 'तत्त्वमसि श्वेतकेतो' इति चेतनस्य श्वेतकेतोरात्मत्वेनोपदिशति। अप्तेजसोस्तु विषयत्वादचेतनत्वं, नामरूपव्याकरणादौ च प्रयोज्यत्वेनैव निर्देशात्, न चात्मशब्दवत् किंचिन्मुख्यत्वे कारणमस्तीति युक्तं कूलवद् गौणत्वमीक्षितृत्वस्य। तयोरपि च सदधिष्ठितत्वापेक्षमेवेक्षितृत्वम्। सतस्त्वात्मशब्दान्न गौणमीक्षितृत्वमित्युक्तम्।।६।।

अथोच्येत- अचेतनेऽपि प्रधाने भवत्यात्मशब्दः, आत्मनः सर्वार्थकारित्वात्, यथा राज्ञः सर्वार्थकारिणि भृत्ये भवत्यात्मशब्दो 'ममात्मा भद्रसेन' इति। प्रधानं हि पुरुषस्यात्मनो भोगापवर्गौ

प्रकटार्थविवरणम्

प्रकारान्तरमाह— **तथेत्यादिना**। यदुक्तम् "उपचारप्राये वचनात्" इति; तदपाकरोति— **अप्तेजसोस्त्विति**। अचेतनत्वम्, चेतनव्यापारविषयत्वेनैव च निर्देशो मुख्यत्वे बाधकोऽस्ति; साधकं च किञ्चिन्नास्तीत्यप्तेजसोरीक्षितृत्वस्य युक्तं गौणत्वम्; न तु तत्सन्निधिमात्रेण[1], वह्नेरपि माणवकसन्निधानात् तीव्रत्वादेर्गौणत्वप्रसङ्गादिति भावः। किञ्चाप्तेजसोः सदधिष्ठितत्वात् तद्गतमेवेक्षणं कार्यगतं व्यपदिश्यते लक्षणयेत्याह— **तयोरपीति**। कुतस्तर्हि सतो मुख्यमीक्षितृत्वं सिद्धमित्याशङ्क्याह— **सतस्त्विति**।

आत्मशब्दप्रयोगोऽपि गौणो भविष्यतीत्याह— **अथोच्येतेत्यादिना**। ननु प्रधानस्य सर्वार्थकारित्वमसिद्धम्, पुरुषस्यौदा-

भाष्यभावप्रकाशिका

त्यस्यार्थान्तरमाह—**तथा स य इति**। अप्तेजसोस्तु युक्तं गौणत्वमीक्षितृत्वस्येत्यन्वयः। इतिशब्दो हेत्वर्थः। स च प्रत्येकं सम्बध्यते। तेनायमर्थः— यस्मादचेतनत्वम्, यस्मात् प्रयोज्यत्वेनैव विनिर्देशः, यस्मान्न मुख्यत्वे कारणमस्ति, तस्माद् युक्तं कूलवद् गौणत्वमीक्षितृत्वस्येति। तयोरपीक्षणं मुख्यम्, आश्रयत्वमेवौपचारिकमित्याह—**तयोरपीति**।।६।।

तन्निष्ठस्य मोक्षोपदेशात्।।७।। उत्तरसूत्रव्यावर्त्याशङ्कामाह—**अथोच्येतेति**। गौणमुख्ययोर्मुख्यस्य परिग्रहो युक्त इति

न्यायनिर्णयः

जीवे सत आत्मशब्दान्न तत् प्रधानमित्युक्त्वा विधान्तरेण हेतुं व्याचष्टे— **तथेति**। यः सदाख्यः स एषोऽणिमाऽणोर्भावो भावभवित्रोरभेदादणुरित्येतत्। ऐतदात्म्यमेतदात्मनो भावः। अयमपि प्रयोगो भवितृपरः। सर्वमिदं जगदेतदात्मकमिति यावत्। परमसूक्ष्मं सर्वात्मकं सदेव सत्यं पारमार्थिकं तत्त्वं, 'मृत्तिकेत्येव सत्यम्' इति दृष्टान्तस्थावधारणस्यात्रापि संबन्धात्। यच्च सत्यं स सर्वस्यात्मा निरुपचरितं रूपम्। हे श्वेतकेतो, त्वं च नासि संसारी किंतु तदेव ब्रह्मेत्यक्षरयोजना, तत्रापेक्षितं प्रतीकमादाय विवक्षितमाह— **इत्यत्रेति**। तथा च चेतनस्यात्मशब्दान्न तस्य प्रधानतेत्यर्थः। यत्पुनरुपचारप्रायपाठादीक्षितृत्वं सतोऽपि गौणमिति, तत्राह— **अप्तेजसोस्त्विति**। युक्तमीक्षितृत्वस्य गौणत्वमिति संबन्धः। तत्र हेतुरितिशब्दः, स च प्रत्येकं संबध्यते। यतश्चेतनव्यापारं प्रति विषयत्वेन निर्देशात् तयोरचेतनत्वम्। आदिपदेन प्रवेशनियमनादिसंग्रहः। यतश्च तत्र तत्र प्रयोज्यत्वेनैव तयोरुक्तिः, यस्माच्च सदीक्षितृत्वस्य मुख्यत्वहेत्वात्मशब्दवत् तयोरीक्षितृत्वस्य मुख्यत्वे हेतुर्न दृष्टः, तस्मात् कूलस्य गुणवृत्त्या पिपतिषावद् युक्तमप्तेजसोर्गौणमीक्षितृत्वमित्यर्थः। तर्हि प्रायपाठस्य का गतिरित्याशङ्क्य मुख्यत्वस्यौत्सर्गिकत्वाद् गौणेनातुल्यत्वाद् विशयानुदये प्रायवचनमकिंचित्करमित्यभिप्रेत्याप्तेजसोरपि मुख्यमेवेक्षणमाश्रयणीयं न गौणमित्याह— **तयोरपीति**। कारणेक्षणं कार्ये लक्षणयोच्यते चेत् तत्रापि कथं मुख्यतेत्याशङ्क्याह— **सतस्त्विति**।।६।।

आत्मशब्दोऽपि प्रधाने गौणः स्यादिति चोदयति— **अथेति**। गौणे प्रयोगे गुणयोगं दर्शयति— **आत्मन इति**। स्वर्गार्थस्यापि कर्मणः स्वर्गशब्दानर्हत्ववदात्मार्थमपि प्रधानं नात्मशब्दार्हमित्याशङ्क्याह— **यथेति**। प्रधानस्य भृत्यवच्चैतन्याभावादात्मार्थ-प्रवृत्त्ययोगान्नात्मार्थकारितेत्याशङ्क्याह— **प्रधानं हीति**। भृत्यस्य राज्ञि विवेकाविवेकाभ्यामभ्युदयाद्यहेतुत्वान्न दृष्टान्ततेत्या-

१. संनिधिमात्रेणेति। अस्याग्रे 'सतोऽपीक्षणं गौणं युक्तम्' इति पूरणीयम्।

कुर्वदुपकरोति, राज्ञ इव भृत्यः संधिविग्रहादिषु वर्तमानः। अथवैक एवात्मशब्दश्चेतनाचेतनविषयो भविष्यति, 'भूतात्मेन्द्रियात्मे'ति[१] च प्रयोगदर्शनात्। यथैक एव ज्योतिःशब्दः क्रतुज्वलनविषयः। तत्र कुत एतदात्मशब्दादीक्षतेरगौणत्वमिति। अत उत्तरं पठति—

तन्निष्ठस्य मोक्षोपदेशात्।।७।।

न प्रधानमचेतनमात्मशब्दालम्बनं भवितुमर्हति, 'स आत्मा' इति प्रकृतं सदणिमानमादाय 'तत्त्वमसि श्वेतकेतो' इति चेतनस्य श्वेतकेतोर्मोक्षयितव्यस्य तन्निष्ठामुपदिश्य 'आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' (छा.उ. ६।१४।२) इति मोक्षोपदेशात्। यदि ह्यचेतनं प्रधानं सच्छब्दवाच्यं तदसीति ग्राहयेन्मुमुक्षुं चेतनं सन्तमचेतनोऽसीति, तदा विपरीतवादि शास्त्रं पुरुषस्यानर्थायेत्यप्रमाणं स्यात्। न तु निर्दोषं शास्त्रमप्रमाणं कल्पयितुं युक्तम्। यदि चाज्ञस्य सतो मुमुक्षोरचेतनमनात्मानमात्मेत्युपदिशेत् प्रमाणभूतं शास्त्रं, स श्रद्दधानतयाऽन्धगोलाङ्गूलन्यायेन तदात्मदृष्टिं न

प्रकटार्थविवरणम्

सीन्यादित्यत आह— **प्रधानं हीति**। साधारणो वाऽऽत्मशब्दश्चेतनाचेतनयोरित्याह— **अथवेति**।

तन्निष्ठस्य मोक्षोपदेशात्। प्रकृतसद्वस्तुनिष्ठस्य तत्साक्षात्कारवतः श्रुत्या मोक्षोपदेशात् अनात्मज्ञानाच्च मोक्षानभ्युपगमात् न तत्रात्मशब्दो गौण इति नकारं पूर्वसूत्रादनुवर्त्य व्याचष्टे— **न प्रधानमित्यादिना**। किञ्च [किं] "तत्त्वमसि" इति साक्षात्सदात्मत्वोपदेशः, किं वा सम्पन्मात्रम्? प्रथमं प्रत्याह— **यदि ह्यचेतनमिति**। किञ्चास्मिन् पक्षे न पुरुषार्थोऽपीत्याह— **यदि**

भाष्यभावप्रकाशिका

न्यायमनुसन्दधानोऽपरितोषात् पक्षान्तरमाह— **अथवैक इति**। वृद्धव्यवहाराभावे कथं तदर्थत्वमिति? अत आह— **भूतात्मेति**। साङ्ख्यमत उपदेशानुपपत्तिमाह— **यदि हीति**। कथमनर्थाय स्यादिति? तत् प्रपञ्चयति— **यदि चेति**। आरोपित-

न्यायनिर्णयः

शङ्क्योपकारित्वमात्रं तुल्यमित्याह— **राज्ञ इति**। गौणत्वं निरसितुमुक्तात्मशब्दस्य न गौणतेत्यपरितुष्यन्नाह— **अथवेति**। प्रधानेऽपि शक्तिकल्पने गौरवमाशङ्क्य वृद्धप्रयोगादनेकत्र शक्तिसिद्धेर्नैवमित्याह— **भूतात्मेति**। प्रधानात्मा परमात्मा चेति चकारार्थः। तत्रात्मशब्दस्यात्मन्येव मुख्या वृत्तिः, प्रधानादौ गौणीत्याशङ्क्य भिन्नजातीययोरेकशब्दप्रयोगे शक्तिद्वयमेव कल्प्यमित्याह— **यथेति**। आत्मशब्दसाधारण्ये फलितमाह— **तत्रेति**। शङ्कोत्तरत्वेन सूत्रं पातयति— **अत इति**।

हेतुमात्रस्य सूत्रे भानात् पूर्वसूत्रस्थनञमाकृष्य प्रतिजानीते— **नेति**। तत्र हेतुं सूत्रं व्याचष्टे— **स इत्यादिना**। साक्षित्वेनाहंकाराद्यध्यासनिरासयोग्यतां वक्तुं **चेतनस्येत्युक्तम्**। ऐक्यापारोक्ष्यप्रमितिप्रतिबन्धनिवर्तकं सूचयति— **आचार्यवानिति**। उक्तप्रमित्या सर्वबन्धननिवृत्त्या देहादिदृष्टेरपि निवृत्तिप्राप्तौ प्रारब्धकर्मणा तद्दृष्ट्यनुवृत्तिमाचष्टे— **तस्येति**। कथं तर्हि प्रारब्धकर्मनिवृत्तिरित्याशङ्क्य भोगादिति मन्वानो ब्रूते— **यावदिति**। आरब्धकर्मध्वस्तावपि कथं देहादिधीध्वस्तिरित्याशङ्क्याप्रतिबन्धादित्याह— **अथेति**। उत्तमपुरुषस्तूभयत्र प्रथमपुरुषे, छान्दसत्वात्। सांख्यपक्षेऽपि मोक्षोपदेशोपपत्तिमाशङ्क्याह— **यदीति**। तदा चेतनं सन्तं मुमुक्षुमचेतनोऽसीति ब्रुवच्छास्त्रं विपरीतवादि भूत्वा पुंसोऽनर्थायेति कृत्वा स्यादप्रमाणमिति योजना। अस्तु शास्त्राप्रामाण्यं, नेत्याह— **न त्विति**। आत्मनो जडैक्यमपि सत्याद्यैक्यवदनवच्छिन्नतया शास्त्रप्रमेयमित्याशङ्क्याह— **यदि चेति**। शास्त्रोक्ते विश्वासबुद्धौ हेतुमाह— **श्रद्दधानतयेति**। अनात्मन्यात्मदृष्टिं नासौ त्यजेदित्यत्र लौकिकं दृष्टान्तमाह— **अन्धेति**। कश्चित् किल पश्चिमचेता गहनविपिनसमीपसंचारिपथि पतितमतिदुःखितं विनष्टदृष्टिद्वयमपि पुरुषापसदमवलोक्य

१. 'भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान्। आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः।' इति पूर्णःश्लोकः। (वि.पु. ५/१८/५०)।

परित्यजेत्, तद्व्यतिरिक्तं चात्मानं न प्रतिपद्येत। तथा सति पुरुषार्थाद् विहन्येतानर्थं च ऋच्छेत्। तस्माद् यथा स्वर्गाद्यर्थिनोऽग्निहोत्रादि साधनं यथाभूतमुपदिशति तथा मुमुक्षोरपि 'स आत्मा तत्त्वमसि श्वेतकेतो' इति यथाभूतमेवात्मानमुपदिशतीति युक्तम्।

एवं च सति तप्तपरशुग्रहणमोक्षदृष्टान्तेन सत्याभिसंधस्य मोक्षोपदेश उपपद्यते। अन्यथा ह्यमुख्ये सदात्मतत्त्वोपदेशे 'अहमुक्थमस्मीति विद्यात्' (ऐ. आ. २।१।२।६) इतिवत् संपन्मात्रमिदमनित्यफलं स्यात्। तत्र मोक्षोपदेशो नोपपद्येत। तस्मान्न सदणिमन्यात्मशब्दस्य गौणत्वम्। भृत्ये तु स्वामिभृत्यभेदस्य

प्रकटार्थविवरणम्

चेति। अतः सदात्मत्वोपदेशमङ्गीकुर्वता सतश्चेतनत्वमेव वक्तव्यमित्याह— **तस्मादिति।** चोरत्वेनाभिशस्तस्य कस्यचित् सत्यवादिनः तप्तपरशुग्रहणे बन्धनविमोक्षो भवतीत्यनेन दृष्टान्तेन सत्याद्वैतात्माभिमानवत एव मोक्ष उपदिश्यमान उपपन्नो भवति मुख्यात्मोपदेशपक्ष एवेत्याह— **एवं च सतीति।** द्वितीयं निरस्यति— **अन्यथा हीति।** उक्थं कर्माङ्गभूतं 'शस्त्रम्'[१]। यस्मात् सतोऽनात्मत्वे न मोक्षसिद्धिः तस्मादित्युपसंहारः। दृष्टान्ते गौणत्वमङ्गीकरोति— **भृत्ये त्विति।** किञ्च प्रमाणान्तरगोचरे भवेत्

भाष्यभावप्रकाशिका

रूपेणाप्युपासनोपदेशो दृश्यत इत्याशङ्क्य दृष्टान्तविशेषोपादानान्नैवमित्याह—**एवं चेति।** ननु "यस्य स्यादद्धा न विचिकित्साऽस्ती" त्युपासनावाक्येऽपि सत्यत्वाभिसन्धिर्दृश्यत इति, अत आह—**अन्यथेति।** किञ्च मुख्यार्थानुपपत्तिव्यतिरेकेण

न्यायनिर्णयः

तदन्तिकमुपसृत्य विप्रलब्धुमिच्छन् पृच्छति, किमिति भवताऽतिबहुतरगोगवयादिसंचारसंकीर्णे दुर्गे मार्गे प्रचुर-परिणततरक्षुरोषणादिपरिवृतकान्तारपरिसरे परिहाय सहायसंपदमास्यते। स च विवेकपरिचयविधुरो मधुरां गिरमुपश्रुत्य सहर्षं समभाषत। दैवोपहतः पिहितनयनयुगलो बताहं कयाऽपि विधया पन्थानमेनमासाद्य नानाविधबन्धुनिकरपरिपूरितमतिसविधमपि नगरं जिगमिषुरिहैवासमर्थो बहुतिथमत्यवाहयम्। सम्प्रति तु भवतो दिष्ट्या दृष्टिपथमवतीर्णं समासादितमनोरथं शोकसागरादुत्तीर्णमात्मानमालक्ष्य लब्धलक्ष्यो निर्वृतोऽस्मि। स च विप्रलिप्सुः शिक्षाविपक्षमुक्षाणमभ्याशदेशनिवासिनमुलपादि चरन्तमाकलय्यास्य तु पुच्छं गृहीत्वा गच्छतु भवान्, एष त्वाऽभिमतं नगरं नेष्यतीत्याभाष्य तदनुमोदनपुरःसरं पुरुषं पशुमानीय तदीयलाङ्गूलं ग्राहयामास। स च गृहीततदीयवालधिर्विविधा वेदनास्तदाहिता इतस्ततो नीयमानोऽनुभवन्नपि नगरजिगमिषया तदाप्त्यादेष्टुराप्ततादृष्ट्या च स्वयमुपात्तं प्रबलबलीवर्दयूनश्चरममङ्गं परित्यक्तुं नैव धियं दधार। स च भूयो भूयो भूयसीर्यातनाः प्रतिलभ्य प्रेप्सितमप्रतिपद्यैव महति मोहसागरे निपतितः। तेनैव न्यायेनायमपि श्रद्धालुत्वादनात्मनि शास्त्राहितामात्म-दृष्टिमत्यजन्ननर्थभागी भवेदित्यर्थः। आत्मा जडादर्थान्तरं, तत्साक्षित्वात्, घटसाक्षिवदित्यतिरिक्तात्मधिया पुरुषार्थभागी स्यादित्याशङ्क्यागमविरोधान्नैवमित्याह— **तद्व्यतिरिक्तं चेति।** आत्मज्ञानाभावे दोषमाह— **तथेति।** विहतिर्मुक्तिभाक्त्वाभावः। अनात्मनिष्ठत्वे दोषमाह— **अनर्थं चेति।** 'तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः' इति श्रुतेरित्यर्थः। परमते तन्निष्ठानुपपत्तेः सदात्मत्वोपदेशमिच्छता सतश्चेतनत्वमेष्टव्यमित्युपसंहरति— **तस्मादिति।**

नन्वारोपेणापि शास्त्रे ध्यानोपदेशात् कथं तद् यथाभूतमेवोपदिशतीति नियम्यतेऽत्राह— **एवं चेति।** कस्यचिदारोपित-चोरत्वस्य सत्येन तप्तं परशुं गृह्णतो मोक्षो दृष्टस्तेन दृष्टान्तेन सत्ये ब्रह्मण्यभिसंधिमतो मोक्षः 'तद्यथा परशुं तप्तं प्रतिगृह्णाति' इत्यत्रोक्तः। स च तत्त्वतो वस्तूपदेशे संभवतीत्यर्थः। सदात्मत्वोक्तेरारोपितार्थत्वेऽपि सत्याभिसंधिसिद्धिः, 'यस्य स्यादद्धा' इत्यादिध्यानवाक्ये तद्दृष्टेरित्याशङ्क्याह— **अन्यथेति।** उक्थं प्राणः। महावाक्योत्थं ज्ञानमिदमुच्यते। तस्य संपन्मात्रत्वेना-नित्यफलत्वे फलितमाह— **तत्रेति।** मोक्षस्य तद्वादिभिर्नित्यत्वोपगमादित्यर्थः। मोक्षोपदेशस्य परपक्षेऽप्यनुपपत्तिमुक्त्वोप-

१. शस्त्रम् अप्रगीतमन्त्रसाध्यस्तुतिविशेषः। उक्थं प्राण इति कल्पतर्वादौ।

प्रत्यक्षत्वादुपपन्नो गौण आत्मशब्दो 'ममात्मा भद्रसेन' इति। अपि च क्वचिद् गौणः शब्दो दृष्ट इति नैतावता शब्दप्रमाणकेऽर्थे गौणी कल्पना न्याय्या, सर्वत्रानाश्वासप्रसङ्गात्।

यत्तूक्तं चेतनाचेतनयोः साधारण आत्मशब्दः क्रतुज्वलनयोरिव ज्योतिःशब्द इति, तन्न, अनेकार्थत्वस्यान्याय्यत्वात्। तस्माच्चेतनविषय एव मुख्य आत्मशब्दश्चेतनत्वोपचाराद् भूतादिषु प्रयुज्यते भूतात्मेन्द्रियात्मेति च। साधारणत्वेऽप्यात्मशब्दस्य न प्रकरणमुपपदं वा किंचिन्निश्चायकमन्तरेणान्यतरवृत्तिता निर्धारयितुं शक्यते। न चात्राचेतनस्य निश्चायकं किंचित् कारणमस्ति। प्रकृतं तु सदीक्षितृ, संनिहितश्चेतनः श्वेतकेतुः। न हि चेतनस्य श्वेतकेतोरचेतन आत्मा संभवतीत्यवोचाम। तस्माच्चेतनविषय

प्रकटार्थविवरणम्

प्रमाणान्तरानुसारेण गौणत्वम्, न शब्दैकसमधिगम्य इत्याह— **अपि चेति**। इदानीं साधारणपक्षदूषणायाह— **यत्तूक्तमित्यादिना**। चेतने रूढस्यात्मशब्दस्यान्यत्र गौण्याऽपि प्रयोगोपपत्तौ न वाचकशक्तिकल्पनावकाशः, गौरवात्। "अनन्यलभ्यः शब्दार्थः" इति हि वृद्धाः। किञ्च साधारण्येऽपि प्रधानपक्षपातो निष्प्रमाणक इत्याह— **साधारणत्वेऽपीति**। स्वपक्षे पुनः प्रकरणमुपपदं चास्तीत्याह— **प्रकृतं त्विति**। ननु श्वेतकेतुसन्निधानं कथं निश्चायकं चेतनत्वस्येत्यतस्य आह— **न हीति**। "एनानि वाव तानि ज्योतींषि। य एतस्य स्तोमाः" इत्यर्थवादसिद्धेन ज्वलनसादृश्येन ज्योतिष्ट्वलक्षणेन गौण्या वृत्त्या क्रतौ प्रवृत्तो ज्योतिःशब्दः;

भाष्यभावप्रकाशिका

गौणकल्पनायामतिप्रसङ्गः स्यादित्याह—**अपि चेति**। एकत्र मुख्यस्य तत्संबन्धादर्थान्तरे वृत्तिसंभवे तत्रापि शक्तिकल्पनायां गौरवं स्यादित्याह—**तन्न; अनेकेति**। न च तर्हि गोशब्दस्याप्यनेकशक्तिकल्पनं न कार्यमिति वाच्यम्; तत्र गत्यन्तराभावात्, इतरेषां मुख्यार्थसम्बन्धकल्पनानुपपत्तेरिति भावः। चेतने प्रकरणमुपपदं च संपादयति—**प्रकृतं त्विति**। ननु दृष्टान्तो दर्शित इति, तत्राह—

न्यायनिर्णयः

संहरति— **तस्मादिति**। दृष्टान्ते गौणत्वमङ्गीकरोति— **भृत्ये[त्वि]ति**। इतश्चात्मशब्दस्य दृष्टान्तेन प्रधानविषयतया न गौणतेत्याह— **अपि चेति**। मुख्यार्थायोगो गुणयोगश्च गौणत्वे हेतुः। तदभावेऽपि तत्कल्पनाऽतिप्रसङ्गिनीति हेत्वन्तरमेव स्फोटयति— **क्वचिदिति**। अग्न्यादिशब्दानां माणवकादिषु गौणत्वदृष्ट्या दहनादिष्वपि तत्प्रसक्तेरित्याह— **सर्वत्रेति**।

गौणत्वं निरस्य साधारण्यं निरसितुमनुवदति— **यत्त्विति**। एकत्र मुख्यशब्दस्य तद्योगादन्यत्र वृत्तिसंभवे तत्रापि शक्तिकल्पने गौरवान्नैवमित्याह— **तन्नेति**। क्वचित्त्वगत्याऽनेकार्थतेत्यर्थः। प्रधानमात्मशब्दस्य मुख्योऽर्थः, तदविवेकादन्यत्र तच्छब्दतेत्याशङ्क्याप्त्यादिनिमित्तस्य चेतने मुख्यत्वात् तत्रैवात्मशब्दस्य मुख्यतेत्याह— **तस्मादिति**। कथं तर्हि भूतात्मेत्यादिवाक्यमित्याशङ्क्य जीवैक्याध्यासात् पञ्चकोशात्मभूतानामिन्द्रियाणां चात्मशब्दत्वं, परमात्मैक्यारोपात्प्रधानस्य प्रकृतेरित्याह— **चेतनत्वेति**। आप्त्याद्युपाधेरात्मशब्दस्य चेतने मुख्यत्वे प्रधानेऽपि तथैव तन्मुख्यत्वसिद्धेः साधारण्यमित्याशङ्क्याह— **साधारणत्वेऽपीति**। परमसूक्ष्मशक्त्यात्मकप्रकृत्यर्थाणिमशब्दात् तज्जाड्यसिद्धेस्तद्विषयत्वमात्मशब्दस्य शक्यं निश्चेतुमित्याशङ्क्य शक्तेरप्यन्तःस्थचिदात्मनि निरङ्कुशमणीयस्त्वमित्याह— **न चेति**। **अत्रेति** प्रकरणोक्तिः। **किंचित्** प्रकरणमुपपदं वेत्यर्थः। कथं तर्हि चेतनविषयतेत्याशङ्क्य क्रमेण प्रकरणोपपदे दर्शयति— **प्रकृतं त्विति**। चेतनसंनिधानेऽपि तस्य 'तत्त्वमसि' इत्यचेतनप्रधानतादात्म्योक्तेरहेतुः संनिधिरित्याशङ्क्याह— **न हीति**। चेतने प्रकरणादिभावे फलितमाह— **तस्मादिति**। 'जीवेनात्मना' 'स आत्मा' इति च वाक्यमिहेत्युक्तम्। आत्मशब्दसाधारण्ये दृष्टान्तितं ज्योतिःशब्दं विघटयति—

१. "यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह। यच्चास्य संततो भावस्तस्मादात्मेति गीयते" इति श्लोकोक्तव्याप्त्यादीत्यर्थः।

इहात्मशब्द इति निश्चीयते। ज्योतिःशब्दोऽपि लौकिकेन प्रयोगेण ज्वलन एव रूढोऽर्थवादकल्पितेन तु ज्वलनसादृश्येन क्रतौ प्रवृत्त इत्यदृष्टान्तः।

अथवा पूर्वसूत्र एवात्मशब्दं निरस्तसमस्तगौणत्वसाधारणत्वशङ्कतया व्याख्याय ततः स्वतन्त्र एव प्रधानकारणनिराकरणहेतुर्व्याख्येयः- 'तन्निष्ठस्य मोक्षोपदेशात्' इति। तस्मान्नाचेतनं प्रधानं सच्छब्दवाच्यम्।।७।।

कुतश्च न प्रधानं सच्छब्दवाच्यम्?

प्रकटार्थविवरणम्

तमःपरिपन्थिनि तु रूढ इति न साधारण्ये दृष्टान्त इत्याह— **ज्योतिश्शब्दोऽपीति**। ज्योतींषि स्तोमा अस्येति ज्योतिष्टोमः। त्रिवृत्पञ्चदशः त्रिवृत्सप्तदशः त्रिवृदेकविंशः [त्रिवृत् पञ्चदशः सप्तदशः एकविंशः] इत्येते स्तोमा ज्योतिश्शब्दवाच्या अर्थवादत एव; तत्र प्रकृते ज्योतिष्टोमे ज्योतिश्शब्दः प्रयुज्यते "वसन्ते वसन्ते ज्योतिषा यजेत" इत्यत्रेत्यर्थः।

पूर्वं शङ्कोत्तरत्वेन सूत्रं व्याख्याय इदानीम् इतश्च न प्रधानं सच्छब्दवाच्यमिति वा संबन्धो वक्तव्य इत्याह— **अथवेति**। निरस्ता गौणसाधारणत्वाशङ्का यस्य स तथोक्तः, तस्य भावः तत्ता, तया। नात्मशब्दोऽयं गौणः, गौणमुख्ययोर्मुख्ये संप्रत्ययात्, बाधकादर्शनाच्च। नापि साधारणः, अनेकशक्तिकल्पनाप्रसङ्गात् इत्येवं व्याख्यायेत्यर्थः।

हेयत्वावचनाच्च। कुतश्चेति। इतश्चेत्यस्मिन्नर्थे। मुख्यमात्मानमुपदिशता पित्रा सच्छब्दार्थस्य हेयत्वावचनात् नाचेतनं

भाष्यभावप्रकाशिका

ज्योतिःशब्दोऽपीति। ज्वलनसादृश्येनेति। द्योतनाद्वा ज्योतिष्मत्त्वाद्वा द्योतयति वा फलं कर्मेति यत्र वर्तते, तत्र स्तोमेषु ज्योतिश्शब्दोऽर्थवादात्, "कतमानी"त्युपक्रम्य "एतानि वाव तानि ज्योतींषि य एतस्य स्तोमा" इत्यर्थवादसमर्पित-ज्योतिश्शब्दाभिलभ्य[प्य]स्तोमसंयोगात् स्तोम[सोम]यागो ज्योतिष्टोमः। एवमेते यागा ज्योतिःशब्दवाच्या इति द्वितीयाध्याये चिन्तितमिति भावः।

अथवा ज्योतिःशब्देन ज्योतिष्टोमो गृह्यते, न ज्योतिर्यागः "अथैष ज्योति"रिति निर्दिष्टः; तत्रापि "वसन्ते ज्योतिषे"ति ज्योतिःपदप्रयोगात्, "अथ यदेनमूर्ध्वं सन्तो ज्योतिर्भूतमस्तुवंस्तस्माद् ज्योतिष्टोम" इत्यर्थवादश्रुतेश्चेति द्रष्टव्यम्। पूर्वं पूर्वसूत्रोक्तहेतुसमर्थनपरतया सूत्रं व्याख्यायेदानीं स्वतन्त्रहेतुपरतया व्याचष्टे—**अथवेति**।।७।।

हेयत्वावचनाच्च।।८।। ननु यथा कश्चिदरुन्धतीं च [प्र]दर्शयितुं निकटवर्तिनीं स्थूलां तारामियमरुन्धतीति दर्शयति, एवं

न्यायनिर्णयः

ज्योतिःशब्दोऽपीति। कथं तर्हि 'वसन्ते वसन्ते ज्योतिषा यजेत' इत्यत्र कालविधौ प्रकृतज्योतिष्टोमे ज्योतिःशब्दः, तत्राह— **अर्थवादेति**। 'कतमानि ज्योतींषि' इत्युक्त्वा 'एतानि वाव तानि ज्योतींषि य एतस्य स्तोमाः' इत्यर्थवादेन कल्पितं ज्वलनेन सादृश्यं त्रिवृदादिस्तोमानां फलप्रकाशकत्वम्। ततो ज्योतिष्ट्वेन निरूपितत्रिवृदादिस्तुतिसमुदायत्वाज्ज्योतिष्टोमे ज्योतिःशब्दः। तस्मादेकस्यात्मशब्दस्यानेकसाधारण्ये नेदमुदाहरणमित्यर्थः।

आत्मशब्दादिति पूर्वसूत्रोक्तहेतुसाधकतया तच्छेषत्वेन सूत्रं व्याख्यायाधुना स्वतन्त्रहेतुपरतया व्याकरोति— **अथवेति**। निरस्ता गौणत्वस्य साधारणत्वस्य च शङ्का यस्मात्स तथा तस्य भावस्तत्ता, तयाऽऽत्मशब्दं व्याख्यायेति संबन्धः। सतश्चेतनस्य च तादात्म्यवचनं पूर्वसूत्रोक्तो हेतुः। सदर्थनिष्ठस्य मुक्तिरूपपरानन्दैक्योक्तेश्च चितो न प्रधानैक्यमिति हेत्वन्तरमिहोच्यत इत्याह— **तत इति**। चेतनाचेतनयोरैक्यायोगादचेतननिष्ठतया चेतनस्य मोक्षोपदेशासिद्धेः सिद्धमुपसंहरति— **तस्मान्नेति**।।७।।

यथा कश्चिदरुन्धतीं दर्शयितुं निकटस्थां स्थूलां तारामियं सेति दर्शयति, एवं दुर्ज्ञेयत्वादात्मतत्त्वस्यादौ प्रधानात्मत्ववचनात्

हेयत्वावचनाच्च।।८।।

यद्यनात्मैव प्रधानं सच्छब्दवाच्यं 'स आत्मा तत्त्वमसि' इतीहोपदिष्टं स्यात्, स तदुपदेशश्रवणादनात्मज्ञतया तन्निष्ठो मा भूदिति मुख्यमात्मानमुपदिदिक्षुस्तस्य हेयत्वं ब्रूयात्। यथाऽरुन्धतीं दिदर्शयिषुस्तत्समीपस्थां स्थूलां ताराममुख्यां प्रथममरुन्धतीति ग्राहयित्वा तां प्रत्याख्याय पश्चादरुन्धतीमेव ग्राहयति, तद्वन्नायमात्मेति ब्रूयात्। न चैवमवोचत्। सन्मात्रात्मावगतिनिष्ठैव हि षष्ठप्रपाठकपरिसमाप्तिर्दृश्यते।

चशब्दः प्रतिज्ञाविरोधाभ्युच्चयप्रदर्शनार्थः। सत्यपि हेयत्ववचने प्रतिज्ञाविरोधः प्रसज्येत। कारणविज्ञानाद्धि सर्वं विज्ञातमिति प्रतिज्ञातम्, 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति, कथं नु भगवः स आदेशो भवतीति' 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्', 'एवं सोम्य स आदेशो भवति' (छा.उ. ६।१।३,४,६)

प्रकटार्थविवरणम्

सद्वस्त्वित्यर्थः। व्यतिरेकमुखेन व्याचष्टे— **यद्यनात्मैवेत्यादिना।** ब्रह्मप्रतिज्ञाविरोधाख्याधिकहेतुप्रदर्शनार्थः सूत्रे चकार इत्याह— **चशब्द इति।** तं विवृणोति— **सत्यपीत्यादिना।** काऽसौ प्रतिज्ञेत्यत आह— **कारणेति।** तत्र हेतुः— **वाक्योपक्रमे श्रवणादिति।** वेदानधीत्य समागतं स्तब्धं पुत्रमुपलभ्य पितोवाच— तमप्युपदेशं किं त्वमप्राक्षीः येनाश्रुतमपि श्रुतं भवति, सर्वज्ञता भवतीत्यर्थः। एवं पर्यनुयुक्ते श्वेतकेतुरुवाच— कथं खलु भगवन् स आदेशो भवति। न ह्यन्यज्ञानादन्यज्ञानं संभवति। पुनः पितोवाच— यथैकस्मिन् मृत्पिण्डे मृदात्मनाऽवधारिते अन्यदपि मृन्मयं मृदात्मकमेव, यश्च विकारो घटशरावादिविशेषः तद्वागिन्द्रियेणोच्चार्यमाणं नामधेयं निर्वस्तुकशब्दमात्रमनृतमिति भावः। सत्यं पुनर्मृन्मात्रमव्यभिचारात्। एवमुक्त आदेशो नाघटमानः। परमकारणे ज्ञाते सर्वस्य तदात्मकत्वात् सर्वं विज्ञातमेव भवति। प्रधानवादे तु पुरुषाणामप्रधानात्मकत्वान्न तज्ज्ञानेन सर्वज्ञानं घटत इति।

भाष्यभावप्रकाशिका

दुर्विज्ञानादात्मनः प्रधानात्मभावः प्रथममुपदिश्यत इत्याशङ्क्याह—**हेयत्वावचनाच्चेति।**।।८।।

न्यायनिर्णयः

तदेव सच्छब्दमिति शङ्कते— **कुतश्चेति।** सूत्रमुत्तरम्— **हेयत्वेति।** तद् व्याख्यातुं हेयत्वोक्तिं प्रतियोगिनीं प्रसञ्जयति— **यदीति।** ऐक्यमुक्त्वा तन्निराकरणं पङ्कप्रक्षालनमनुसरतीत्याशङ्क्य परोक्तं दृष्टान्तेन प्रत्याह— **यथेति।** प्रतियोगिप्राप्तिमुक्त्वा तन्निषेधसूत्रार्थमाह— **न चेति।** तत्र हेतुः— **सन्मात्रेति।** अनृतजडशक्तिशबले सति 'तत्सत्यम्' इति सत्यत्वविधानादसत्याकारं, 'स आत्मा' इति चिद्रूपत्वविधानाज्जडाकारं च बाधित्वा सत्यैकरसचिदात्माकारा याऽपरोक्षप्रमितिस्तन्निष्ठत्वेनैव छान्दोग्ये षष्ठसमाप्तिदर्शनात् प्रकृतसदात्मत्वाप्रत्याख्यानात् 'तत्त्वमसि' इत्यमुख्यात्मत्वोक्तिरयुक्तेत्यर्थः।

पूर्वोत्तरहेत्वोः संभूयाप्रमापकत्वे कृतं चकारेणेत्याशङ्क्याह— **चशब्द इति।** हेयत्वावचनादेव प्रधानस्य निरासे किं प्रतिज्ञाविरोधोक्त्येत्याशङ्क्य हेयत्वोक्तिमुपेत्य चकारार्थं स्फुटयति— **सत्यपीति।** प्रसङ्गं प्रकटयितुं प्रतिज्ञास्वरूपमाह— **कारणेति।** हे श्वेतकेतो, तमप्यादेशमादिश्यत इत्यादेशं शास्त्राचार्योक्तिगम्यं वस्त्वप्राक्ष्यः पृष्टवानसि त्वमाचार्यम्, येन श्रुतेन शास्त्रतोऽन्यदश्रुतमपि श्रुतं भवति, येन मतेन तर्कतोऽन्यदमतमपि मतम्, येन विज्ञातेनान्यदविज्ञातमपि विज्ञातम्, न तु श्रोतव्यादि शिष्टमिति पितृवाक्यस्यार्थः। अन्यज्ञानादन्यन्न ज्ञेयमिति पुत्रो ब्रूते— **कथं न्विति।** नान्यत्वं कार्यस्य कारणादित्याह— **यथेति।** ज्ञाते मृत्पिण्डे कुतस्तद्विकारधीरित्याशङ्क्याह— **वाचेति।** यो विकारः स **वागालम्बनम्** उच्यते परं, न वस्तुतोऽस्तीत्यर्थः। तत्र हेतुः— **नामधेयमिति।** नाममात्रं नार्थोऽस्ति चेत् तर्हि घटादिवदसत्यत्वसंभवात् कारणस्यापि कथं सत्यतेत्याशङ्क्याह—

इति वाक्योपक्रमे श्रवणात्। न च सच्छब्दवाच्ये प्रधाने भोग्यवर्गकारणे हेयत्वेनाहेयत्वेन वा विज्ञाते भोक्तृवर्गो विज्ञातो भवति, अप्रधानविकारत्वाद् भोक्तृवर्गस्य। तस्मान्न प्रधानं सच्छब्दवाच्यम्।।८।।

कुतश्च न प्रधानं सच्छब्दवाच्यम्?

स्वाप्ययात्।।९।।

तदेव सच्छब्दवाच्यं कारणं प्रकृत्य श्रूयते– 'यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति' (छा.उ. ६।८।१) इति। एषा श्रुतिः स्वपितीत्येतत् पुरुषस्य लोकप्रसिद्धं नाम निर्वक्ति। स्वशब्देनेहात्मोच्यते। यः प्रकृतः सच्छब्दवाच्यस्तमपीतो भवत्यपिगतो भवतीत्यर्थः। अपिपूर्वस्यैतेर्लयार्थत्वं प्रसिद्धं, प्रभवाप्ययावित्युत्पत्तिप्रलययोः प्रयोगदर्शनात्। मनःप्रचारोपाधिविशेषसंबन्धादिन्द्रियार्थान् गृह्णंस्तद्विशेषापन्नो जीवो जागर्ति। तद्वासनाविशिष्टः स्वप्नान् पश्यन् मनःशब्दवाच्यो भवति। स उपाधिद्वयोपरमे सुषुप्तावस्थायामुपाधिकृतविशेषाभावात् स्वात्मनि

प्रकटार्थविवरणम्

हेत्वन्तरमाह— **कुतश्चेति**। सुषुप्ते जीवस्य प्रकृते सच्छब्दवाच्ये स्वरूपभूतेऽप्ययश्रवणादचेतनस्य चेतनस्वरूपत्वायोगान्नाचेतनं सच्छब्दवाच्यमित्यर्थः।

स्वाप्ययात्। वाक्यपर्यालोचनेन विवेचयति— **तदेवेत्यादिना**। एतेर्धातोरपिपूर्वस्य लयार्थत्वं प्रसिद्धमित्येवं कथमनादिनिधनस्य जीवस्य लय उच्यत इत्याशङ्क्यौपाधिकत्वं वक्तुमुपाधिमाह— **मनःप्रचारेत्यादिना**। मनःपरिणामोपाधिभिर्विषय-

भाष्यभावप्रकाशिका

स्वाप्ययात्।।९।। अक्षरार्थमाह—**स्वशब्देनेति**। उपसर्गनिबन्धनमर्थमाह—**अपिपूर्वस्येति**। नित्यस्यात्मनो लयो नास्तीति शङ्कायामुपाधिकृतविशेषाभावादुपचाराल्लय इति वक्तुमुपाधिसम्बन्धं तावद् दर्शयति—**मनःप्रचारेति**। अवयवार्थाभावे कथं

न्यायनिर्णयः

मृत्तिकेति। उक्तदृष्टान्तादाकाशादेरपि मृषात्वात् कारणस्य सन्मात्रस्यैव सत्यत्वात् तज्ज्ञाने ज्ञातव्यशेषो नेति दार्ष्टान्तिकमाह— **एवमिति**। कार्यस्य कारणमात्रत्वोपगमात् परस्यापि प्रतिज्ञासिद्धिरित्याशङ्क्याह— **न चेति**। प्रतिज्ञाविरोधफलमाह— **तस्मादिति**।।८।।

तत्रैव प्रश्नपूर्वकं हेत्वन्तरमाह— **कुतश्चेति**। प्रधानं न सच्छब्दवाच्यमित्यत्र चित्प्रतिबिम्बानां चिदात्मनि बिम्बे लयादिति व्यधिकरणो हेतुरित्याशङ्क्य प्रकरणानुसंधानपूर्वकं सूत्रं व्याचष्टे— **तदेवेति**। यत्र सुप्तौ पुंसः स्वपितीत्येतन्नाम भवति तदा पुरुषः सता संपन्नस्तेनैकीभूत इति योजना। प्रकरणेनैक्यप्रमितेः सच्छब्दलक्ष्यस्यैव चिद्बिम्बत्वान्न व्यधिकरणतेति। सतश्चित्त्वं सूचयति— **स्वमिति**। तत्र लौकिकप्रसिद्धिमाह— **तस्मादिति**। तच्छब्दार्थं स्फुटयति— **स्वं हीति**। उक्तश्रुतेस्तात्पर्यमाह— **एषेति**। नामनिरुक्तिश्रुत्यक्षराणि व्याचष्टे— **स्वशब्देनेति**। कथं भिन्नविषया गतिरात्मानमेव विषयीकुर्यादित्याशङ्क्योपसर्गाल्लयधीरित्याह— **अपिपूर्वस्येति**। प्रसिद्धिमेव प्रकटयति— **प्रभवेति**। एतेर्धातोर्गत्यर्थस्यापिपूर्वस्य लयार्थत्वेऽपि कथमनाद्यनन्तस्य लयः स्यादित्याशङ्क्य तदीयलयस्यौपाधिकत्वं वक्तुं जागरितमनुवदति— **मन इति**। बुद्धिपरिणामा एवोपाधयस्तैरस्यार्थविशेषयोगाच्चक्षुरादीन्द्रियैस्तानेव स्थूलानर्थान् पश्यञ्जीवस्तद्विशेषेण स्थूलदेहेनैक्यारोपमापन्नो जागर्तीति व्यवह्रियत इत्यर्थः। स्वप्नमुपन्यस्यति— **तद्वासनेति**। जाग्रद्वासनाभिर्विचित्राभिर्विशिष्टो मनोमात्रोपाधिर्जीवः स्वप्नानुच्चावचान् वासनामात्रदेहाननुभवन् 'एवमेव खलु सोम्यैतन्मनः' इति मनःशब्दवाच्य इति मनोद्वारा लक्ष्यो भवतीत्यर्थः। तथापि कुतोऽस्य लयोक्तिरित्याशङ्क्याह— **स इति**। स्थूलं सूक्ष्मं चोपाधिद्वयं, तत्कृतो विशेषो गन्तृत्वद्रष्टृत्वादिः। स्वपितिनामनिरुक्तेरर्थवादत्वान्न

प्रलीन इवेति 'स्वं ह्यपीतो भवति' इत्युच्यते। यथा हृदयशब्दनिर्वचनं श्रुत्या दर्शितम्– 'स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृद्ययमिति तस्माद्धृदयमिति' (छा.उ. ८।३।३) इति; यथा वाऽशनायोदन्याशब्द-प्रवृत्तिमूलं दर्शयति श्रुतिः–'आप एव तदशितं नयन्ते' 'तेज एव तत्पीतं नयते' (छा.उ. ६।८।३,५) इति च; एवं स्वमात्मानं सच्छब्दवाच्यमपीतो भवतीतीममर्थं स्वपितिनामनिर्वचनेन दर्शयति। न च चेतन आत्माऽचेतनं प्रधानं स्वरूपत्वेन प्रतिपद्येत। यदि पुनः प्रधानमेवात्मीयत्वात् स्वशब्देनैवोच्येत, एवमपि चेतनोऽचेतनमप्येतीति विरुद्धमापद्येत। श्रुत्यन्तरं च– 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्' (बृ.उ. ४।३।२१) इति सुषुप्तावस्थायां चेतनेऽप्ययं दर्शयति। अतो यस्मिन्नप्ययः सर्वेषां चेतनानां तच्चेतनं सच्छब्दवाच्यं जगतः कारणं न प्रधानम्।।९।।

कुतश्च न प्रधानं जगतः कारणम्?

गतिसामान्यात्।।१०।।

प्रकटार्थविवरणम्

विशेषसंबन्धात् स्थूलदेहात्मतामापन्नो जागर्ति। ननु स्वपितिनामनिर्वचनस्यार्थवादत्वान्न यथाश्रुतार्थवत्त्वमित्याशङ्क्याह— **यथेत्यादिना**। तस्य हृदयशब्दस्य एतदेव निर्वचनम्। यद् हृद्ययमात्मा वर्तत इति, तत्स्थानं हृदयमुच्यते। अशितं नयन्ते जरयन्तीत्यशनाया आपः। पीतमुदकं नयते शोषयतीति तेज उदन्यमिति। यथेमामेवाप्तेजसोः शब्दप्रवृत्तिं निमित्तनिर्वचनेन दर्शयत्यर्थवादत्वेऽपि, एवमिहापीति भावः। तच्च प्रधानवादे न समञ्जसमित्याह— **न चेत्यादिना**।

गतिसामान्यात्। चेतनकारणावगतेः सर्वोपनिषत्स्वैकरूप्यादपि नाचेतनकारणपरतया वाक्यानि योजयितुं शक्यन्त

भाष्यभावप्रकाशिका

निर्वचनमिति? तत्राह—**यथा हृदयेति**। **एवमपीति**। मृदात्मकस्य घटस्य मृद्येव लयदर्शनादात्मीयेऽपि जलादौ लयादर्शनादित्यर्थः।।९।।

गतिसामान्यात्।।१०।। गतिः=अवगतिः। तार्किकाणां समयभेदेषु यथा परस्परविरुद्धार्थता, नैवमिहेत्याह—**यदीति**।

न्यायनिर्णयः

श्रुतार्थतेत्याशङ्क्य तद्याथार्थ्यार्थं दृष्टान्तद्वयमाह— **यथेत्यादिना**। तस्य हृदयशब्दस्यैतदेव निरुक्तं निर्वचनम्। 'अशनापिपासे मे सोम्य विजानीहि' इत्युपक्रम्याशितस्यान्नस्य द्रवीकरणेन नयनाज्जरणादापोऽशनायाः। छान्दसमेकवचनम्। एवमशनायाशब्दस्याप्सु प्रवृत्तौ मूलं दर्शयति— 'आप एव तदशितं नयन्ते' इति श्रुतिः। द्रावकोदकपाननयनात् तस्य शोषणादुदन्यं तेजः। आकारश्छान्दसः। एवमुदन्यशब्दस्य तेजसि प्रवृत्तौ निमित्तं 'तेज एव तत्पीतं नयते' इति श्रुतिर्दर्शयतीति योजना। दृष्टान्तयोरर्थं दार्ष्टान्तिके योजयति— **एवमिति**। प्रधानस्य व्यापित्वादव्यापिजीवलयस्थानत्व-योगादुक्तहेतोरन्यथासिद्धिमाशङ्क्य चितोऽचित्त्वापत्तिरयुक्तेत्याह— **न चेति**। स्वशब्दस्यात्मीयेऽपि शक्तत्वात् प्रधाने प्रवृत्तेरन्यथासिद्धितादवस्थ्यमाशङ्क्योक्तं स्फोरयति— **यदीति**। स्वशब्दस्यात्मा मुख्योऽर्थः,तत्संबन्धादात्मीयो लक्ष्य इति तद्-ग्रहस्यानौचित्यमेवमपीत्युक्तम्। मृदात्मनो घटस्य मृद्येव लयादात्मीये जलादावदृष्टेरित्यर्थः। स्वपितिनामनिरुक्तिश्रुत्यनुग्राहकत्वेन बृहदारण्यकश्रुतिं पठति— **श्रुत्यन्तरं चेति**। तस्य तात्पर्यमाह— **सुषुप्तेति**। हेतोरन्यथासिद्ध्यभावे फलितमाह— **अत इति**।।९।।

उपक्रमोपसंहारयोर्ब्रह्मण्येकवाक्यत्वं तात्पर्यलिङ्गमुक्त्वाऽभ्यासं लिङ्गान्तरं वक्तुं सूत्रान्तरं निक्षिपति— **कुतश्चेति**। कारणविषयत्वात् श्रुतिप्रामाण्यैक्यात् प्रत्युपनिषदमभ्यासेन चेतनकारणतावगतिरेकरूपेत्ययुक्तमनेकरूपत्वाप्रसङ्गादित्याशङ्क्य

यदि तार्किकसमय इव वेदान्तेष्वपि भिन्ना कारणावगतिरभविष्यत् क्वचिच्चेतनं ब्रह्म जगतः कारणम्, क्वचिदचेतनं प्रधानम्, क्वचिदन्यदेवेति, ततः कदाचित् प्रधानकारणवादानुरोधेनापीक्षत्यादि-श्रवणमकल्पयिष्यत्। न त्वेतदस्ति। समानैव हि सर्वेषु वेदान्तेषु चेतनकारणावगतिः। 'यथाऽग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः' (कौ.उ. ३।३) इति, 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' (तै.उ. २।१) इति, 'आत्मत एवेदं सर्वम्' (छा.उ. ७।२६।१) इति 'आत्मन एष प्राणो जायते' (प्र.उ. ३।३) इति चात्मनः कारणत्वं दर्शयन्ति सर्वे वेदान्ताः। आत्मशब्दश्च चेतनवचन इत्यवोचाम। महच्च प्रामाण्यकारणमेतद् यद् वेदान्तवाक्यानां चेतनकारणत्वे समानगतित्वं, चक्षुरादीनामिव रूपादिषु। अतो गतिसामान्यात् सर्वज्ञं ब्रह्म जगतः कारणम्।।१०।।

कुतश्च सर्वज्ञं ब्रह्म जगतः कारणम्?

प्रकटार्थविवरणम्

इत्याह— **गतिसामान्यादिति**। व्यतिरेकमुखेन व्याख्याति— **यदीति**। प्राणाः इन्द्रियाणि यथास्थानं प्रादुर्भवन्ति प्रथमम्; पश्चाद् देवाः सूर्यादयोऽधिष्ठातारः; ततोऽनन्तरं लोका विषयाः। अथवा गतिः प्रवृत्तिः। सर्वेषां वेदान्तानामेकरूपैव प्रवृत्तिश्चेतने दृश्यते। एकरूपप्रवृत्तिमत्त्वं च महत् प्रामाण्यकारणमित्याह— **महच्चेति**। यथा सर्वं चक्षू रूपमेव गोचरयति, सर्वं च श्रोत्रं शब्दं गोचरयतीत्येकरूपप्रवृत्तिदर्शनात्, [1]परस्पराहतेश्च रूपादिषु चक्षुरादीनां प्रामाण्यं तद्वदित्यर्थः।

भाष्यभावप्रकाशिका

गतिसामान्यं दर्शयति—**यथाऽग्नेरित्यादिना**। ननु स्वतः प्रामाण्यादेवास्यापि वाक्यस्य स्वार्थपरिच्छेदकत्वमस्ति, तत्रानुग्राहकवाक्यान्तरप्रदर्शनं किमर्थमिति? अत आह—**महच्चेति**। एकविषयत्वप्रदर्शनेन प्रत्ययदार्ढ्यायेत्यर्थः। **रूपादिष्विति**। सर्वेषां चक्षू रूपमेव ग्राहयति, न तु रसादिकम्, कस्य(कदा)चित्तु रूपमिति । एवं रसनादिष्वपि गतिसामान्यं दर्शनीयम्।।१०।।

न्यायनिर्णयः

तर्कजन्यधीवदतुल्यत्वप्रसक्तिं वक्ति— **यदीति**। वस्तुतश्चिदचिदात्मकमन्यदित्युक्तम्। विरुद्धार्थत्वात् तर्हि त्यागो वेदान्तानामित्याशङ्क्य तेषामेकार्थतया नयनादत्यागमाह— **तत इति**। अस्तु तर्हि तेष्वपि कारणावगतेरनेकरूपत्वं, नेत्याह— **न त्विति**। तर्हि जडाजडार्थवचसोः सालम्बनत्वाय द्व्यात्मके ब्रह्मण्येव गतिसामान्यमित्याशङ्क्य चिदेकरसे तस्याः सामान्यमाह— **समानेति**। विस्फुलिङ्गप्रसङ्गार्थं ज्वलत इत्युक्तम्। विप्रतिष्ठेरन् नानागतित्वेन दिशो दशापि प्रसृताः स्युरित्यर्थः। प्राणाश्चक्षुरादयो यथायतनं यथागोलकं विप्रतिष्ठन्ते। विविधमुद्गच्छन्तीति यावत्। प्राणेभ्योऽनन्तरमादित्यादयस्तदनुग्राहका देवाः, तेभ्योऽनन्तरं लोक्यन्त इति लोका विषया भवन्तीत्यर्थः। अनुक्तानामपि वेदान्तानामुक्तैः सहास्मिन्नर्थे तात्पर्यं सूचयति— **आत्मन इति**। जडाजडात्मकाखण्डरूपमात्मशब्दमिति कुतो विवक्षितधीरित्याशङ्क्य जडस्य स्वरूपाभासत्वादखण्डाजडचैतन्यमेवात्मेत्याह— **आत्मेति**। स्वतःप्रामाण्यादेकस्यापि वाक्यस्य स्वार्थधीहेतुत्वात् तत्रानुग्राहकवाक्यान्तरोक्तिरनर्थिकेत्याशङ्क्याह— **महच्चेति**। एकार्थत्वोक्त्या ज्ञानदार्ढ्याय वाक्यान्तरमित्यर्थः। वेदान्तानां चेतनकारणे तुल्यगतित्वे दृष्टान्तमाह— **चक्षुरादीनामिति**। सर्वेषां चक्षू रूपमेव ग्राहयति, न रसादि कस्यचिदिति रूपे चक्षुषो गतिसामान्यं दृष्टम्। रसनादीनामपि रसादिषु। तथा वेदान्तानामपि चेतनकारणत्वे तुल्यगतित्वमित्यर्थः। सूत्रार्थं निगमयति— **अत इति**।।१०।।

श्रुत्या स्फुटार्थतया ब्रह्मकारणत्वं वाच्यम्। तथा सत्यन्यासां तदैकार्थ्यनिर्णयादित्युत्तरसूत्राकाङ्क्षामाह— **कुतश्चेति**। 'तदैक्षत'

१. अहतेरिति च्छेदः। वेदान्तेषु परस्परविरुद्धजगत्कारणनिरूपणाभावेन परस्परव्याहत्यभावादित्यर्थः।

श्रुतत्वाच्च।।११।।

स्वशब्देनैव च सर्वज्ञ ईश्वरो जगतः कारणमिति श्रूयते श्वेताश्वतराणां मन्त्रोपनिषदि सर्वज्ञमीश्वरं प्रकृत्य 'स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः' (श्वे.उ. ६।९) इति। तस्मात् सर्वज्ञं ब्रह्म जगतः कारणम्, नाचेतनं प्रधानमन्यद् वेति सिद्धम्।।११।।

।।इति पञ्चममीक्षत्यधिकरणम्।।

शारीरकन्यायसंग्रहः

आनन्दमयाधिकरणम्

आनन्दमयोऽभ्यासात्।।१२।। विकारशब्दान्नेति चेन्न प्राचुर्यात्।।१३।। तद्धेतुव्यपदेशाच्च।।१४।। मान्त्रवर्णिकमेव च गीयते।।१५।। नेतरोऽनुपपत्तेः।।१६।। भेदव्यपदेशाच्च।।१७। कामाच्च नानुमानापेक्षा।।१८।। अस्मिन्नस्य च तद्योगं शास्ति।।१९।। अत्रैकस्मिन् वाक्ये प्रथमचरमश्रुतशब्दयोः परस्परविरुद्धार्थत्वे, तात्पर्ये च तुल्ये, प्रथमश्रुतानुसारेण चरमश्रुतं नेतव्यम्, प्रथमश्रुतस्यासञ्जातविरोधितया मुख्यार्थबुद्धिहेतुत्वात्, चरमश्रुतस्योत्पत्तिसमये बाध्यमानत्वात्—इति न्यायेन पुच्छशब्दानुसारेण कृत्स्नवाक्यस्यानन्दमयोपासनाशेषत्वं बाधित्वा स्वप्रधानमान्त्रवर्णिकब्रह्माभिधायिब्रह्मशब्दानुसारेण पुच्छशब्दमुपचरितार्थमादायानन्दमयवाक्यं पुच्छब्रह्मपरम्, न स्वप्रधानमित्युक्तम्।

पुनस्तत्सिद्ध्यर्थम् एकस्या अपि श्रुतेः श्रुतिलिङ्गप्रकरणानि बलवन्तीति न्यायेन "मयट् च[वा-]" इति सूत्रेण मयटो विकारेऽपि श्रुतत्वात्, विकारप्रकरणात्, उत्पद्यमानप्रियाद्यवयवै रूप्यमाणावयविन आनन्दमयस्य मयटो विकारार्थत्वे लिङ्गत्वात्— इति श्रुतिलिङ्गप्रकरणैः मयटः प्राचुर्यार्थत्वं निराकृतम्।

अत्रेदमुत्तरं सकलशास्त्रार्थन्यायावगत्यर्थमुच्यते—"श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थ-

प्रकटार्थविवरणम्

श्रुतत्वाच्च। पूर्वमीक्षणादिश्रवणलिङ्गैरचेतने समन्वयं निरस्य इदानीं श्रुत्या स्वमुखेनैव चेतनस्य कारणत्वाभिधानाद् ब्रह्मण्येव समन्वय इत्याह— **श्रुतत्वाच्चेति।** करणाधिपानां जीवानामधिपोऽध्यक्ष इत्यर्थः। अधिकरणार्थमुपसंहरति— **तस्मादिति।**

।। इति पञ्चममीक्षत्यधिकरणम् ।।

भाष्यभावप्रकाशिका

श्रुतत्वाच्च।।११।। "तदैक्षते"त्यत्र ईक्षणमात्रं कारणस्य श्रुतम्, न तु सर्वज्ञत्वम्, श्वेताश्वतराणां तूपनिषदि सर्वज्ञो जगत्कारणमिति साक्षादुक्तमिति विशेषः। **सर्वज्ञमिति।** "ज्ञः कालकालो गुणी सर्वविद्य" इति प्रकृतस्य "स कारणमि"ति तच्छब्देन परामर्शादित्यर्थः।।११।। इति पञ्चममीक्षत्यधिकरणम्।।

न्यायनिर्णयः

इत्यत्रेक्षणमात्रं कारणस्य श्रुतं, न सर्वज्ञत्वं, तस्य सर्वार्थत्वादार्थिकी तद्धीः। श्वेताश्वतरे तु सर्वज्ञो जगद्धेतुरिति साक्षादुक्तम्। अतः सर्वोपनिषदां तदेकवाक्यत्वधीरित्याह— **श्रुतत्वाच्चेति।** तद् व्याचष्टे— **स्वशब्देनेति।** सर्वज्ञस्य वाचकेन शब्देनेति यावत्। सर्वश्चासौ ज्ञश्चेति सर्वबाधशङ्कां वारयति— **ईश्वर इति।** वक्ष्यमाणमन्त्रस्थसशब्दार्थमाह— **सर्वज्ञमिति।** 'ज्ञः कालकालो गुणी सर्वविद् यः' इति प्रकृत्य 'स कारणम्' इति परामर्शाज्जगद्धेतोः सर्वज्ञतेत्यर्थः। तस्य सर्वेश्वरत्वमाह— **करणेति।** तेषामधिपाः स्वामिनो जीवास्तेषामधिपः परमेश्वरः। तस्य सर्वहेतुत्वार्थं विशेषणम्— **न चेति।** जीवान् प्रतीश्वरत्वं हिरण्यगर्भादेरपीत्याशङ्क्य नियन्त्रन्तरं निरस्यति— **न चेति।** महाप्रमेयमुपसंहरति— **तस्मादिति।** अन्यदित्युक्तार्थम्।।११।।

६।।आनन्दमयाधिकरणम्।।सू. १२-१९।।

'जन्माद्यस्य यतः' इत्यारभ्य 'श्रुतत्वाच्च' इत्येवमन्तैः सूत्रैर्यान्युदाहृतानि वेदान्तवाक्यानि तेषां सर्वज्ञः सर्वशक्तिरीश्वरो जगतो जन्मस्थितिलयकारणमित्येतस्यार्थस्य प्रतिपादकत्वं न्यायपूर्वकं प्रतिपादितम्। गतिसामान्योपन्यासेन च सर्वे वेदान्ताश्चेतनकारणवादिन इति व्याख्यातम्। अतः परस्य ग्रन्थस्य किमुत्थानमिति। उच्यते– द्विरूपं हि ब्रह्मावगम्यते–नामरूपविकारभेदोपाधिविशिष्टं, तद्विपरीतं च

शारीरकन्यायसंग्रहः

विप्रकर्षात्"। श्रुतिः पदान्तरनिरपेक्षः शब्दः। श्रुतसामर्थ्यमर्थान्तरेणाविनाभावलक्षणं लिङ्गम्; तच्च श्रुतिमपेक्षते अर्थनिर्णये। अनेकपदसामर्थ्यं वाक्यम्; तच्च श्रुत्यभिहितं श्रुतसामर्थ्यप्राप्तं चार्थमपेक्ष्य मुख्यलक्षणाभ्यां विशिष्टं संसर्गं प्रतिपादयतीति द्वयमपेक्षते। अन्यतराकाङ्क्षया इतरेतराकाङ्क्षया वा वाक्यद्वयसामर्थ्यमारभ्याधीतविषयं प्रकरणम्; तच्च वाक्यद्वयसामर्थ्यं श्रुतार्थं श्रुतसामर्थ्यप्राप्तं अनेकपदसामर्थ्यप्रमितं चापेक्ष्य महावाक्यार्थं प्रतिपादयति। क्रमसन्निविष्टानां क्रमसन्निविष्टैः यथाक्रमं संबन्धः स्थानम्; तच्च वाक्यद्वयसामर्थ्यं क्रमद्वयप्रतिपादकमपेक्षते संबन्धप्रतिपादने। वाक्यान्तरप्रतिपन्नस्य वाक्यान्तरप्रतिपन्नेनार्थेन संबन्धनिमित्तं संज्ञासाम्यं समाख्या; तच्च पूर्वं सर्वमपेक्षते। एतानि प्रमाणानि यथासंभवमुत्तरेषूदाहरणेष्ववगन्तव्यानि। न चैतेषां श्रुत्यादीनां प्रत्यक्षादिवत् स्वसत्तयैव प्रामाण्यमिष्यते, आगमभेदत्वात्, आगमप्रामाण्यस्य च तात्पर्याधीनत्वात्। अतः पूर्वस्मादपि प्रमाणादुत्तरं फलादिसंबन्धितया तात्पर्यवच्चेत्, उत्तरेण तात्पर्यवता पूर्वमपि तात्पर्यहीनं बाध्यत इति तत्र तत्रावगन्तव्यम्। न चेह ब्रह्मलिङ्गानां अर्थवादलिङ्गवत् न्यायान्तरसव्यपेक्षत्वम्, सर्वत्र ब्रह्मणः प्रतिपिपादयिषितत्वात् तल्लिङ्गानां तात्पर्यवत्त्वात् स्वातन्त्र्येण प्रामाण्योपपत्तेः। अर्थवादगतानां तु तात्पर्यहीनत्वात् न्यायान्तरसापेक्षत्वमिति विशेषः।

प्रकटार्थविवरणम्

उत्तरसूत्रसन्दर्भारम्भं संभावयति— **जन्माद्यस्येत्यादिना**। येषां वाक्यानां जैमिनिपादोपजीविमतापाकरणेन समन्वयसूत्रे प्रामाण्यं परिनिष्ठिते प्रत्यतिष्ठिपत् तेषामेव साङ्ख्यादिमतापाकरणेन ब्रह्मण्येव प्रामाण्यं पुनः प्रतिष्ठापयांबभूव। अतः समन्वयाध्यायार्थस्य समाप्तत्वात् परस्य ग्रन्थस्य किमारम्भकारणमित्यर्थः। सविशेषवस्तूपासनोपदेशकानामपि सर्ववाक्यानां निर्विशेषपरब्रह्मण्येव महातात्पर्यमिति समन्वयविशेषप्रतिपादनायोत्तरं सन्दर्भमारेभे भगवानित्याह— **उच्यत इति**। ननु नास्ति निर्विशेषं ब्रह्म यत्र महातात्पर्यम्; किं तु सविशेषमेवेत्याशङ्क्याह— **द्विरूपं हीति**। ननु रूपद्वयस्य परस्परविरोधान्नैकत्र युगपत्

भाष्यभावप्रकाशिका

आनन्दमयोऽभ्यासात्।।१२।। उत्तरसूत्रसन्दर्भमाक्षिपति—**जन्माद्यस्येति**। पूर्वमनुदाहृतानामपि तत्परत्वं सामान्यतो वक्तव्यमित्याह—**गतिसामान्येति। किमुत्थानमिति**। अप्रदर्शितसमन्वयाभावान्न किञ्चिदित्याक्षेपः।

उत्तरसूत्राणामनधिगतविषयं दर्शयितुं वेदान्तेषु प्रतीयमानमर्थं संक्षेपतो दर्शयति—**द्विरूपं हीत्यादिना**। द्विरूपविषयाणि

न्यायनिर्णयः

वृत्तमनूद्योत्तरसंदर्भमाक्षिपति— **जन्मादीति**। ब्रह्मजिज्ञासां प्रतिशयेति वक्तव्यम्। तेषामेतदर्थप्रतिपादनोपयुक्तन्याय-ग्रथनार्थमुत्तरः संदर्भोऽर्थवानित्याशङ्क्याह— **न्यायेति**। अनुक्तवाक्यानां तत्परत्वं वक्तुमुत्तरो ग्रन्थ इत्याशङ्क्याह— **गतीति**। अनुक्तसमन्वयाभावान्नोत्तरस्योत्थानमित्याह— **अत इति**। उत्तरसूत्राणामगतार्थत्वं वक्तुमारभते— **उच्यत इति**। तदर्थं वेदान्तेषु भासमानमर्थं संक्षिपति— **द्विरूपं हीति**। तत्र सोपाधिकविषयं वाक्यमुदाहरति— **यत्रेति**। यस्यां खल्वविद्यावस्थायामाभासभूतं द्वैतं सदिव भाति तत्रेतरः सन्नितरं पश्यतीति दृष्ट्यादिगोचरमुपाधिमद्वस्तु वदतीत्यर्थः। निरुपाधिकविषयं वाक्यं पठति—

सर्वोपाधिविवर्जितम्। 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' (बृ.उ. ४।५।१५) 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाऽथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं, यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्' (छा.उ.७।२४।१) 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते' (तै. आ. ३।१२।७) 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्। अमृतस्य परं सेतुं दग्धेन्धनमिवानलम्' (श्वे.उ. ६।१९) 'नेति नेति' (बृ.उ. २।३।६) इति 'अस्थूलमनणु' (बृ.उ. ३।८।८) 'न्यूनमन्यत्स्थानं संपूर्णमन्यत्' इति चैवं सहस्रशो विद्याऽविद्याविषयभेदेन ब्रह्मणो द्विरूपतां दर्शयन्ति वाक्यानि[१]। तत्राविद्यावस्थायां ब्रह्मण

प्रकटार्थविवरणम्

समावेश इत्याशङ्क्य यथा शुक्तेः स्वतोऽरूप्यात्मता, अविद्याध्यासाच्च रूप्यात्मता; तथा ब्रह्मणोऽपि स्वाभाविकी निष्प्रपञ्चता, मायोपाधिकस्य च सप्रपञ्चता इत्यविरोधं वक्तुं द्विरूपाणि वाक्यान्युदाहरति— **यत्र हीत्यादिना।** भवत्वेवं द्विरूपत्वं तथापि कथमुपासनपराणां निर्विशेषे समन्वय इत्याशङ्क्याह— **तत्राविद्यावस्थायामिति।** अध्यारोपापवादन्यायेन निर्विशेषप्रतिपत्त्यर्थं

भाष्यभावप्रकाशिका

वाक्यान्युदाहरति—**यत्र हीति।** ननु द्वैविध्य एकस्य न ब्रह्मत्वं स्यात्, एकस्य प्रपञ्चभावाभावयोर्युगपदाश्रयत्वविरोधादिति, तत्राह—**विद्याऽविद्येति।** ननु अद्वैतमेव पारमार्थिकं चेत्, उपास्योपासकादिविभागाभावादुपासनविधीनामानर्थक्यं स्यादिति, अत आह—**तत्राविद्येति।**

न्यायनिर्णयः

यत्र त्विति। यस्यां विद्यावस्थायामस्य विदुषः सर्वं कर्त्राद्यात्मातिरेकेणासदेवासीत्तत्र केन करणेन कं विषयं को वा कर्ता पश्येदित्याक्षेपादव्यवहार्यमनौपाधिकं तत्त्वमित्यर्थः। निरुपाधिके श्रुत्यन्तरमाह— **यत्रेति।** यस्मिन् भूम्नि स्थितो विद्वानन्यद् द्रष्टव्यं चक्षुषा न पश्यति, अन्यच्च श्रोतव्यं श्रोत्रेण न शृणोति, न चान्यन्मन्तव्यं ज्ञातव्यं वा मनसा बुद्ध्या वा मनुते जानाति वा, स भूमा दृष्ट्याद्यगोचरो निरतिशयमहत्त्वसंपन्नः परमात्मेत्यर्थः। तत्रैवावान्तरवाक्ये सोपाधिकमपि स्वरूपमुक्तमित्याह— **अथेति।** निरुपाधिकभूमोक्त्यनन्तरं सोपाधिकमपि रूपमुच्यते। यस्मिन् परिच्छिन्ने वस्तुनि निष्ठो योऽविद्वानन्यद् द्रष्टव्यादि चक्षुरादिनाऽनुसंधत्ते तदल्पं परिच्छिन्नमुपहितमित्यर्थः। भूम्नोऽल्पस्य च विशेषान्तरमाह— **यो वा इति।** अथेति द्योतितो विशेषो वाक्येन प्रकटितः। सोपाधिकेऽन्तर्यामिणि श्रुत्यन्तरमाह— **सर्वाणीति।** सर्वज्ञो हीश्वरो नामरूपादिकं विश्वं निर्माय तत्र प्रविश्याभिवदनादि कुर्वन् योऽवतिष्ठते तं विद्वानिहैवामृतो भवतीत्यर्थः। निरुपाधिके श्रुत्यन्तरमाह— **निष्कलमिति।** निष्कलं निरंशं, निरंशत्वादेव सर्वक्रियाशून्यं निष्क्रियं, तस्मादेव शान्तमपरिणामि, रागादिरहितं निरवद्यं, धर्माधर्माद्यसंबद्धं निरञ्जनम्। नभसोऽस्य विशेषमाह— **अमृतस्येति।** यथा मृद्दारुमयः सेतुर्नदीकुल्यादिपरकूलप्राप्तेरुपायस्तथा संसारसागरस्य परं पारं परं ब्रह्म तद्भावस्यामृतस्य वाक्योत्थबुद्धिवृत्त्यभिव्यक्तं तदेव साधनं सेतुवदवस्थितम्। तस्योपशान्तत्वे दृष्टान्तमाह— **दग्धेति।** यथा दग्धेन्धनोऽग्निः शाम्यति तथाऽज्ञानं तदुत्थं च दग्ध्वा स्थितं प्रशान्तं प्रसन्नं विद्यादित्यर्थः। इतिभ्यां विश्वं दृश्यमादाय नञ्भ्यां तन्निषेधादपि श्रुत्यन्तरं निरुपाधिकार्थमित्याह— **नेतीति।** द्रव्यगुणादिसर्वद्वैतनिषेधादपि वाक्यं तथेत्याह— **अस्थूलमिति।** रूपद्वये श्रुत्यन्तरमाह— **न्यूनमिति।** निष्प्रपञ्चादन्यदुपास्यं सप्रपञ्चस्थानं न्यूनं परिच्छिन्नम् ततोऽन्यत्, निष्प्रपञ्चं मुक्तोपसृप्यं त्रिधापरिच्छित्तिशून्यं सच्चिदानन्दात्मकमित्यर्थः। उक्तवाक्यानामुपलक्षणत्वं विवक्षित्वोक्तम्— **एवमिति।** ननु ब्रह्मणो न द्वैविध्यं, युगपदेकस्य तद्विरोधात्, तत्राह— **विद्येति।** अद्वैतमेव वास्तवं चेदुपास्योपासकादिभेदस्यावस्तुत्वादुपास्तिविध्यानर्थक्यमित्याशङ्क्याह— **तत्रेति।** उपास्तीनामपि मुक्त्यर्थत्वाद् विद्यावद् वस्तुगामितेत्याशङ्क्य साक्षान्न मोक्षार्थतेत्याह— **तत्रेति।**

---

१. वेदान्तवाक्यानि' पा.

उपास्योपासकादिलक्षणः सर्वो व्यवहारः। तत्र कानिचिद् ब्रह्मण उपासनान्यभ्युदयार्थानि, कानिचित् क्रममुक्त्यर्थानि, कानिचित् कर्मसमृद्ध्यर्थानि। तेषां गुणविशेषोपाधिभेदेन भेदः। एक एव तु परमात्मेश्वरस्तैस्तैर्गुणविशेषैर्विशिष्ट उपास्यो यद्यपि भवति तथापि यथागुणोपासनमेव फलानि भिद्यन्ते। 'तं यथा यथोपासते तदेव भवति'[१] इति श्रुतेः, 'यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति' (छा.उ. ३।१४।१) इति च। स्मृतेश्च–'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्। तं तमेवैति कौन्तेय सदा तद्भावभावितः।।' (भ.गी. ८।६) इति। यद्यप्येक आत्मा सर्वभूतेषु स्थावरजङ्गमेषु गूढस्तथापि चित्तोपाधिविशेषतारतम्यादात्मनः कूटस्थनित्यस्यैकरूपस्याप्युत्तरोत्तरमाविष्कृतस्य तारतम्यमैश्वर्यशक्ति-विशेषैः श्रूयते–'तस्य य आत्मानमाविस्तरां वेद' (ऐ. आ. २।३।२।१) इत्यत्र। स्मृतावपि–'यद्यद्

प्रकटार्थविवरणम्

सप्रपञ्चप्रतिपत्तिमाश्रित्य प्रासङ्गिकमुपासनं विधीयते, यथा दर्शपूर्णमासार्थाप्रणयनाश्रयेण गोदोहनं विधीयते पशुभ्यः। ततोऽवान्तरतात्पर्येऽपि स्वार्थे परमशेषिणि महातात्पर्यं न विरुध्यत इत्यर्थः। तर्हि निर्गुणविद्याधिकारिण एवात्राधिकारः स्यादित्याशङ्क्याह— **तत्रेति**। तत्तत्कामस्य स्यादधिकारः अनुष्ठानवत् प्रतिपत्तौ विशेषाभावादित्यर्थः। ननु ब्रह्मण एवोपास्यत्वे किञ्चिदपरब्रह्मोपासनं किञ्चित्सगुणब्रह्मोपासनमिति विभागः किन्निबन्धन इत्याशङ्क्याह— **तेषामिति**। यत्र सत्यकामादिगुणविशिष्टं स्वतन्त्रमेव ब्रह्मोपास्यत्वेनोपदिश्यते तत् सगुणोपासनम्, यथा शाण्डिल्यविद्यादिषु। यत्र तु विशेषानुगतं तदवच्छिन्नं तदात्मनैवोपास्यत्वेनोपदिश्यते यथा वैश्वानरविद्यायाम्, तदपरब्रह्मोपासनमिति भेदः। तर्ह्येकस्यैवोपास्यत्वात् न फलभेदः, एकग्रामप्राप्तिसाधनमार्गभेदवदित्याशङ्क्याह— **एक एव त्विति**। राजोपासनफलभेदवदित्यर्थः। क्रतुः सङ्कल्पः।

ननु यद्येक एवात्मा सर्वत्रानुगत उपास्यः, कथं तर्हि तस्य तारतम्यश्रुतयः? ततो न ब्रह्मोपास्यमित्याशङ्क्याह— **यद्यप्येक इति**। तस्यात्मनः तरामतिशयेनापि[२] प्रकटं रूपं यो वेदेत्यत्र तरप्प्रत्ययप्रयोगात् यत् तारतम्यं श्रूयते, तच्चित्तोपाधेः

भाष्यभावप्रकाशिका

ननु—मोक्षसाधनत्वादुपासनस्य विद्यावत् पारमार्थिकविषयत्वमित्याशङ्क्य साक्षान्मोक्षसाधनत्वमसिद्धमित्याह—**तत्र कानिचिदिति**। ननु उपास्यस्यैकत्वात्तत्प्राप्तेश्चोपासनाफलत्वात्कथमुपासनानां फलानां च भेद इति? अत आह—**तेषामिति**। ननु परस्य तत्तदुपाधिभेदविशिष्टस्याप्यभेदात् कथमुपासनादिभेद इत्याशङ्क्य स्वरूपाभेदेऽप्युपाध्युपहितभेदोऽस्तीत्याह—**एक एवेति**। क्रतुः=संकल्पः, ध्यानम्। ननु यद्येक आत्मा कूटस्थनित्यः सर्वभूतेषु, कथं तर्हि फलोपास्यतारतम्यं श्रूयते इति, तत्राह—

न्यायनिर्णयः

अभ्युदयार्थानि प्रतीकोपासनानि। क्रममुक्त्यर्थानि दहराद्युपासनानि। कर्मसमृद्ध्यर्थान्युद्गीथादिध्यानानि। यद्यपि विधेयत्वादेतानि कर्मकाण्डे युक्तानि तथापि मानसत्वेन विद्यासाम्यादिहोक्तानीत्यर्थः। उपास्यैक्यात् तत्प्राप्तेरुपास्तिफलत्वादुपास्तितत्फलभेदा-सिद्धिमाशङ्क्याह— **तेषामिति**। परस्य गुणभेदादुपास्तिभेदाच्च भेदेऽपि स्वरूपाभेदादुपास्त्यादिभेदायोगतादवस्थ्यमाशङ्क्य स्वरूपाभेदेऽप्युपहितभेदमाह— **एक इति**। उपास्तिप्रचयसंस्कारादुपास्यतद्गुणप्राप्तिरित्यत्र श्रुत्यन्तरमाह— **यथेति**। क्रतुः संकल्पो ध्यानम्। ध्यानसंस्कारप्रचयाद् ध्येयात्मतां ध्याता देहपाते प्रतिपद्यते किंवा तदापि पूर्ववद्ध्यातृत्वमेवेति संशये संस्कारप्रकर्षाद्देवतात्मत्वमेवाप्नोतीति निर्णेतुमाह— **स्मृतेश्चेति**। सर्वत्रात्मैक्यात् तस्य कौटस्थ्यात् तस्यैवोपास्यत्वात् कुतस्तत्तारतम्यश्रुतिरित्याशङ्क्य नीहाराद्यावरणभेदादादित्यवद् विद्यातारतम्यादात्मा वस्तुतो निरतिशयोऽपि सातिशयो भातीत्याह— **यद्यपीति**। यथोक्तस्याप्यात्मनः स्थावरादारभ्य ब्रह्मान्तेषु प्राणिषूत्तरोत्तरमाविष्टस्य बुद्ध्युपाधिशुद्ध्युत्कर्षतारतम्यात् प्रज्ञाधीनैश्वर्यशक्तिविशेषैस्तारतम्यम्। तस्योक्तोपाधिकस्य प्रकृतस्यात्मनो यो ध्याता स्वरूपमाविस्तरामतिशयेन

१. मुद्गलोपनिषत्, ३.३. २. 'आविः = प्रकटम्' इति पाठः स्यात्।

विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवम्।।' (भ.गी. १०।४१) इति यत्र यत्र विभूत्याद्यतिशयः स स ईश्वर इत्युपास्यतया चोद्यते। एवमिहाप्यादित्यमण्डले हिरण्मयः पुरुषः सर्वपाप्मोदयलिङ्गात् पर एवेति वक्ष्यति। एवम् 'आकाशस्तल्लिङ्गात्' (ब्र.सू. १।१।२२) इत्यादिषु द्रष्टव्यम्। एवं सद्योमुक्तिकारणमप्यात्मज्ञानमुपाधिविशेषद्वारेणोपदिश्यमानमप्यविवक्षितोपाधिसंबन्धविशेषं परापरविषयत्वेन संदिह्यमानं वाक्यगतिपर्यालोचनया निर्णेतव्यं भवति। यथेहैव तावत् 'आनन्दमयोऽभ्यासात्' इति। एवमेकमपि ब्रह्मापेक्षितोपाधिसंबन्धं निरस्तोपाधिसंबन्धं चोपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषूपदिश्यत इति प्रदर्शयितुं परो ग्रन्थ आरभ्यते। यच्च 'गतिसामान्यात्' इत्यचेतनकारणनिराकरणमुक्तं तदपि वाक्यान्तराणि ब्रह्मविषयाणि व्याचक्षाणेन ब्रह्मविपरीतकारणनिषेधेन प्रपञ्च्यते।

आनन्दमयोऽभ्यासात्।।१२।।

प्रकटार्थविवरणम्

शुद्धतालक्षणस्य विशेषस्य तारतम्यात्, न त्वब्रह्मत्वादित्यर्थः। न केवलं श्रुतिस्मृत्योरेवोपाधिविशेषावच्छिन्नोऽपीश्वर एवोपास्यत्वेनोपदिश्यते, सूत्रकारोऽपि वक्ष्यतीत्याह— **एवमिहापीति**। सर्वपापासंस्पर्शलिङ्गादित्यर्थः। तस्मादध्यारोपावस्थायां ब्रह्मण एव तत्र तत्रोपास्यत्वात् उपासनाभागोऽपि ब्रह्मण्येव प्रमाणमिति कथयितुमुत्तरग्रन्थारम्भ इति भावः। तथा क्वचिदुपाधिरुपदिष्टोऽप्यविवक्षित इत्यपि कथयितुमुत्तरारम्भ इत्याह— **एवं सद्य इति**। आरम्भं प्रसाध्योपसंहरति— **एवमित्यादिना**।

भाष्यभावप्रकाशिका

यद्यप्येक इति। निरतिशयोऽप्यात्मा विद्यातारतम्यवशादुत्कर्षवानिव लक्ष्यते, सवितेव नीहाराद्यावरणतारतम्यादिति भावः। नेदमुभयविधत्वकल्पनं स्वोत्प्रेक्षामात्रम्, अपि तु सूत्रकारस्यापि संमतमित्याह—**एवमिहेति**। उक्तन्यायं समानप्रदेशेषु प्रसारयति—**एवमाकाशेति**। सोपाधिकोपदेशप्रदेशान् प्रदर्श्य निरुपाधिकोपदेशं प्रदर्शयति—**एवं सद्य इति** ।

एवमुक्तद्विरूपब्रह्मपरतयोत्तरसूत्राणामारम्भं संभावयति—**एवमेकमिति**। अपेक्षितोपाधिसम्बन्धमुपास्यत्वेन, निरस्तोपाधिसम्बन्धं ज्ञेयत्वेनेत्यन्वयः। तस्याद्याप्यविवेचितत्वात् कस्मिन् वाक्ये उपाधिर्विवक्षितः, कस्मिन् वा नेति चिन्तनीयमिति भावः। गतिसामान्यस्यापि सिद्धवदुक्तस्य साधनायोत्तरग्रन्थारम्भ इत्याह—**यच्चेति**।

न्यायनिर्णयः

प्रकटमुपास्तिवशाद् बुध्यते सोऽश्नुते ह्याविर्भूयेत्यैतरेयके श्रुतम्। तथा चोपास्यतारतम्यं श्रौतमौपाधिकं युक्तमित्यर्थः। उपास्येश्वरतारतम्यं भगवद्गीतास्वपि सिद्धमित्याह— **स्मृताविति**। श्रुतिस्मृतितात्पर्यमाह— **यत्रेति**। न केवलं द्वैविध्यं ब्रह्मणः श्रुतिस्मृत्योरेव सिद्धं, किंतु सूत्रकृतोऽपि मतमित्याह— **एवमिति**। श्रुतिस्मृत्योरिव प्रकृतेऽपि शास्त्रे द्वैरूप्यं ब्रह्मणो भाति। तत्र सोपाधिकब्रह्मविषयमन्तस्तद्धर्माधिकरणमुदाहरति— **आदित्येति**। उक्तन्यायं तुल्यदेशेषु प्रसारयति— **एवमिति**। सोपाधिकोपदेशवन्निरुपाधिकोपदेशं दर्शयति— **एवमित्यादिना**। आत्मज्ञानं निर्णेतव्यमिति संबन्धः। निर्णेयप्रसङ्गमाह— **परेति**। अन्नमयाद्युपाधिद्वारोक्तस्य कथं परविषयत्वं, तत्राह— **उपाधीति**। निर्णयक्रममाह— **वाक्येति**। उक्तार्थमधिकरणं क्वास्तीत्याशङ्क्योक्तम्— **यथेति**। अस्मिन्नेवाधिकरणे यथा निरुपाधिकं ब्रह्मैवोच्यते तथा द्युभ्वाद्यायतनमित्यादिष्वपीत्यर्थः। श्रुतिस्मृतिसूत्रेषु दृष्टं ब्रह्मद्वैरूप्यं शिष्ट्वाऽनन्तरसंदर्भारम्भं संभावयति— **एवमिति**। अपेक्षितोपाधिसंबन्धमुपास्यत्वेन, निरस्तोपाधिसंबन्धं च ज्ञेयत्वेनेति संबन्धः। तस्याद्याप्यविवेकात् कुत्रोपाधिरिष्टः, कुत्र वा नेति निरूपयितुमुत्तरग्रन्थ इत्यर्थः। सिद्धवदुक्तगतिसामान्यस्यापि साधनायेत्युत्तरस्योपयोगान्तरमाह— **यच्चेति**। **वाक्यान्तराणि**। व्याख्याताततिरिक्तानीति यावत्।

वेदान्तानामविशेषेण निर्विशेषे ब्रह्मणि समन्वये सिद्धे क्वचित् तस्य हिरण्मयवाक्यादावपवादः, क्वचिदानन्दमयवाक्यादौ तदाभासे तदसत्त्वमुच्यत इत्यध्यायशेषारम्भे स्थिते निर्गुणविषयमेव तावदधिकरणं प्रस्तौति— **आनन्दमय इति**। तस्य

तैत्तिरीयके– अन्नमयं, प्राणमयं, मनोमयं, विज्ञानमयं चानुक्रम्याम्नायते–'तस्माद्वा एतस्माद् विज्ञानमयात्। अन्योऽन्तर आत्माऽऽनन्दमयः' (तै.उ. २।५) इति। तत्र संशयः– किमिहानन्दमयशब्देन परमेव ब्रह्मोच्यते यत् प्रकृतम् 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २।१) इति, किंवाऽन्नमयादिवद् ब्रह्मणोऽर्थान्तरमिति। किं तावत् प्राप्तम्? ब्रह्मणोऽर्थान्तरममुख्य आत्माऽऽनन्दमयः स्यात्। कस्मात्? अन्नमयाद्यमुख्यात्मप्रवाहपतितत्वात्। अथापि स्यात् सर्वान्तरत्वादानन्दमयो मुख्य एवात्मेति। न स्यात्, प्रियाद्यवयवयोगाच्छारीरत्वश्रवणाच्च। मुख्यश्चेदात्माऽऽनन्दमयः स्यान्न प्रियादिसंस्पर्शः स्यात्। इह तु 'तस्य प्रियमेव शिरः' इत्यादि श्रूयते। शारीरत्वं च श्रूयते–'तस्यैष एव शारीर आत्मा। यः पूर्वस्य' इति।

प्रकटार्थविवरणम्

आनन्दमयोऽभ्यासात् इति। एतदधिकरणं प्राचां वृत्तिकृतां मतेन व्याख्यातुं विषयवाक्यमाह— **तैत्तरीयक इति।** मयटः प्राचुर्ये विकारे च विशेषानुपलब्धेः संशयमाह— **तत्र संशय** इत्यादिना। किम् आनन्दप्रचुरं ब्रह्म आनन्दमय उच्यते, किं वा आनन्दविकारविशिष्टतया तद्विकारो जीव इत्यर्थः। प्रश्नपर्वकं पूर्वपक्षं रचयति— **किं तावदिति।** अन्नमयादेरनात्मत्वं युक्तम्, श्रुत्यैव चात्मान्तरकथनेनानात्मत्वाभिधानात्, न तथा आनन्दमयादन्योऽन्तर आत्मोपदिष्ट इत्याह— **अथापीति।** परिहरति— **न स्यादिति।** वस्तुसङ्ग्रहवाक्यद्वयं व्यतिरेकमुखेन विवृणोति— **मुख्यश्चेदिति।** चेतनाचेतनसाधारणस्यापि सच्छब्दस्येक्षणादिबहुचेतनलिङ्गाच्चेतनपरत्वं पूर्वत्रोक्तम्। एवं प्राचुर्यविकारसाधारणस्यापि मयटो विकारार्थतैव ग्राह्या सावयवत्वशारीरत्वप्रियादिसंस्पर्शित्वलिङ्गेभ्यः। ततो जीवोपासनपरं वाक्यमिति पूर्वः पक्षः।

भाष्यभावप्रकाशिका

एकदेशिमतेनाधिकरणं रचयति—**तैत्तिरीयक इत्यादिना।** "अनुक्रम्ये"ति संशयप्रदर्शनार्थमुक्तम्। अनात्मप्रवाहे पतितत्वात् पूर्वपक्षाशङ्का, सर्वान्तरत्वेन श्रवणात् सिद्धान्ताशङ्केति। **अन्नमयाद्यमुख्येति।** ततोऽन्यस्याप्रतिपाद्यतया मुख्यस्याप्यमुख्यात्मत्वम्; विकारार्थमयट्श्रवणादिति भावः। ननु अमुख्यात्मप्रवाहे पतितोऽपि सर्वान्तरत्वलिङ्गात् परमात्मेति शङ्कते—**अथापि स्यादिति।** शारीरत्वादिविरोधाच्चतुष्कोशान्तरत्वमेव, न सर्वान्तरत्वमिति परिहरति—**न स्यादिति।** तदेव प्रपञ्चयति—**मुख्यश्चेदिति।** न केवलं श्रवणात् प्रियादिस्पर्शः, शारीरत्वलिङ्गादपीत्याह—**न च सशरीरस्येति।** ननु आनन्दशब्दस्याभ्यासे कथमानन्दमयस्य

न्यायनिर्णयः

वृत्तिकारमतेन विषयमाह— **तैत्तिरीयक इति।** अन्नरसविकारो देहोऽन्नमयः, प्राणोपाधिरात्मा प्राणविकारः प्राणमयः, मनोमयस्तदुपाधिरात्मा तद्विकारः, विज्ञानमयो विज्ञानोपाधिरात्मा विज्ञानविकारः। यद्वा भृगुवल्ल्युक्ताधिदैविकान्नादीन् प्रत्याध्यात्मिकान्नादिकोशा विकाराः। तदेतच्चतुष्टयं ' स वा एषः' इत्यादिना क्रमेणोक्त्वाऽऽनन्दमय उक्तः। **तस्मात्** 'अन्योऽन्तर आत्मा विज्ञानमय' इति सूत्रितादित्येतत्। तस्यैव स्मृत्यर्थो **वै**शब्दः। **एतस्मात्** 'तस्य श्रद्धैव शिरः' इत्यादिना व्याख्यातात्। ततोऽन्यत्वं मनोमयस्यापीत्यत उक्तम्— **अन्तर इति।** तस्मादानन्दमयशब्दे मयटो विकारप्राचुर्यसाधारण्याद् विचारबीजं संशयमाह— **तत्रेति।** ईक्षत्यधिकरणे मुख्यसंभवे गौणस्यानवकाशत्वाद् विशयानुदये प्रायपाठस्याकिंचित्करत्वाद-मुख्येक्षणप्रवाहपातेऽपि जगत्कारणे मुख्यं तदित्युक्तम्। इह तु मयटो विकारप्राचुर्ययोर्मुख्यत्वे सति विशयोदये प्राचुर्यार्थात् प्रायदृष्टेर्व्यावर्तकत्वात् पूर्वाधिकरणसिद्धान्ताभावेन पूर्वपक्षोन्मेषात् प्रत्युदाहरणात्मिकां संगतिं विवक्षन्नाकाङ्क्षाद्वारा पूर्वपक्षयति— **किमिति।** श्रुत्यादिसंगतिचतुष्टयं फलं च वक्ष्यते। मयटः साधारण्येऽपि विशेषग्रहे हेतुर्नास्तीत्याह— **कस्मादिति।** विकारप्रायपाठं हेतुमाह— **अन्नेति।** प्रायपाठेऽपि प्रकरणाल्लिङ्गं बलवदित्याह— **अथापीति।** सावयवत्वशारीरत्वलिङ्गाभ्यां मयट्श्रुत्या चानुगृहीतं प्रकरणमेव प्रबलमित्याह— **न स्यादिति।** सावयवत्वस्यान्यथासिद्धिं प्रत्याह— **मुख्यश्चेदिति।** तस्य निष्कलत्वश्रुत्या निरंशत्वादित्यर्थः। आनन्दमयेऽपि कुतः सावयवत्वम्?, तत्राह— **इह त्विति।** लिङ्गान्तरं विभजते— **शारीरत्वं**

तस्य पूर्वस्य विज्ञानमयस्यैष एव शारीर आत्मा य एष आनन्दमय इत्यर्थः। न च सशरीरस्य सतः प्रियाप्रियसंस्पर्शो वारयितुं शक्यः। तस्मात् संसार्येवानन्दमय आत्मेत्येवं प्राप्त इदमुच्यते–

'आनन्दमयोऽभ्यासात्'। पर एवात्माऽऽनन्दमयो भवितुमहति। कुतः? अभ्यासात्। परस्मिन्नेव ह्यात्मन्यानन्दशब्दो बहुकृत्वोऽभ्यस्यते। आनन्दमयं प्रस्तुत्य 'रसो वै सः' इति तस्यैव रसत्वमुक्त्वोच्यते– 'रसँ ह्येवायं लब्ध्वाऽऽनन्दी भवति' इति। 'को ह्येवान्यात्कः प्राण्यात्। यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति' (तै.उ. २।७) 'सैषाऽऽनन्दस्य मीमाँसा भवति' 'एतमानन्दमयमात्मानमुपसंक्रामति'। 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' (तै. २।८,९) इति। 'आनन्दो ब्रह्मेति व्यजानात्' (तै.उ. ३।६) इति च। श्रुत्यन्तरे च 'विज्ञानमानन्दं ब्रह्म' (बृ.उ. ३।९।२८) इति ब्रह्मण्येवानन्दशब्दो दृष्टः। एवमानन्दशब्दस्य बहुकृत्वो ब्रह्मण्यभ्यासादानन्दमय आत्मा ब्रह्मेति गम्यते।

प्रकटार्थविवरणम्

सिद्धान्तत्वेन सूत्रमवतार्य व्याचष्टे— **पर एवेत्यादिना।** अन्यात् अपानव्यापारं कः कुर्यात्; प्राण्यात् प्राणनव्यापारं वा कः कुर्यात्, यद्येष आकाश आनन्दोऽधिष्ठाता न स्यात्। अभ्यासाख्यतात्पर्यलिङ्गदर्शनात् ब्रह्मप्रमितिपरं वाक्यं न

भाष्यभावप्रकाशिका

ब्रह्मत्वमित्याशङ्क्य ब्रह्मणि प्रयुक्तपूर्वस्यानन्दशब्दस्यानन्दमये प्रकृते प्रयोगादित्याह— **आनन्दमयमिति।** ज्योतिष्टोमाधिकारे ज्योतिःपदाभ्यासवदिति भावः। मयडन्तस्याप्यभ्यासमाह— **एतमानन्दमयमिति।** आनन्दशब्दस्य ब्रह्मणि प्रयुक्तत्वं दर्शयति— **श्रुत्यन्तर इति।** अरुन्धतीप्रदर्शनार्थममुख्यारुन्धतीप्रदर्शनप्रवाहे प्रदर्श्यमानाया अन्त्यताराया मुख्यारुन्धतीत्ववदानन्दमयस्य

न्यायनिर्णयः

चेति। 'व्यवहितान्वयेनाभीष्टार्थदृष्टौ व्याचष्टे— **तस्येति।** शारीरत्वेऽपि परमात्मत्वं किं न स्यात्, तत्राह— **न चेति।** प्रियादिस्पर्शित्वे च संसारित्वमित्यर्थः। का तर्हि सर्वान्तरत्वस्य गतिरित्याशङ्क्य चतुष्कोशान्तरत्वमेव, न सर्वान्तरत्वमित्याह— **तस्मादिति।** उक्तं प्रकरणादि तच्छब्दार्थः। आनन्दमये संसारिण्युपास्तिद्वारा दुःखरहितप्रियादियुक्तस्वरूपावस्थानं फलं वक्तुमितिशब्दः। पूर्वपक्षमनूद्य सिद्धान्तयति— **एवमिति।**

सौत्रीं प्रतिज्ञां विभजते— **पर एवेति।** प्रकरणादिना तस्य संसारित्वे प्रतिज्ञाऽनुपपत्तिरित्याह— **कुत इति।** हेतुमादाय व्याकरोति— **अभ्यासादिति।** आनन्दशब्दाभ्यासे कथमानन्दमयस्य ब्रह्मतेत्याशङ्क्य ब्रह्मणि प्रयुक्तपूर्वस्य तस्य प्रकरणादानन्दमये प्रयोगाज्ज्योतिष्टोमाधिकारे ज्योतिःशब्दाभ्यासवदानन्दमयाधिकारे तत्पदाभ्यासस्य तद्विषयत्वादित्याह— **आनन्दमयमिति। रसः** सारः अन्नमयादिकोशचतुष्टयान्तरत्वादानन्दमयोऽयम्। **लब्ध्वा** ध्यात्वा। पूर्णश्चेदानन्दः सर्वसाक्षी सर्वप्रेरको न स्यात् तदा प्राणादेरचेतनस्य चेष्टा न युक्तेत्याह— **को हीति।** सर्वानन्दयितृत्वादपि परानन्दत्वमस्येत्याह— **एष हीति।** 'युवा स्यात्' इत्यादिना सार्वभौममारभ्य ब्रह्मान्तमुत्तरोत्तरमुत्कृष्टानन्दस्य ब्रह्मणि समाप्तिफला मीमांसा 'सैषा' इत्युक्ता। मयडन्तस्याभ्यासमाह— **एतमिति।** उपसंक्रमणं प्राप्तिः। **ब्रह्मणः** स्वरूपमिति शेषः। गतिसामान्यार्थं ब्रह्मण्यानन्दशब्दस्यान्यत्रापि प्रयुक्तत्वमाह— **श्रुत्यन्तरे चेति।** तथापि कथमानन्दमयस्य ब्रह्मत्वमित्याशङ्क्य हेत्वर्थमुपसंहरति— **एवमिति। अभ्यासात्** तस्य चाधिकारादानन्दमयार्थत्वादिति शेषः।

यत्तूक्तमन्नमयाद्यमुख्यात्मप्रवाहपतितत्वादानन्दमयस्याप्यमुख्यत्वमिति, नासौ दोषः। आनन्दमयस्य सर्वान्तरत्वात्। मुख्यमेव ह्यात्मानमुपदिदिक्षु शास्त्रं लोकबुद्धिमनुसरत्, अन्नमयं शरीरमनात्मानमत्यन्त-मूढानामात्मत्वेन प्रसिद्धमनूद्य मूषानिषिक्तद्रुतताम्रादिप्रतिमावत् ततोऽन्तरं ततोऽन्तरमित्येवं पूर्वेण पूर्वेण समानमुत्तरमुत्तरमनात्मानमात्मेति ग्राहयत्, प्रतिपत्तिसौकर्यापेक्षया सर्वान्तरं मुख्यमानन्दमयमात्मानमु-पदिदेशेति श्लिष्टतरम्। यथाऽरुन्धतीनिदर्शने बह्वीष्वपि तारास्वमुख्यास्वरुन्धतीषु दर्शितासु याऽन्त्या प्रदर्श्यते सा मुख्यैवारुन्धती भवति, एवमिहाप्यानन्दमयस्य सर्वान्तरत्वान्मुख्यमात्मत्वम्। यत्तु ब्रूषे, प्रियादीनां शिरस्त्वादिकल्पनाऽनुपपन्ना मुख्यस्यात्मन इति; अतीतानन्तरोपाधिजनिता सा, न स्वाभाविकीत्यदोषः। शारीरत्वमप्यानन्दमयस्यान्नमयादिशरीरपरम्परया प्रदर्श्यमानत्वात्, न पुनः साक्षादेव शारीरत्वं संसारिवत्। तस्मादानन्दमयः पर एवात्मा।।१२।।

विकारशब्दान्नेति चेत्, न प्राचुर्यात्।।१३।।

प्रकटार्थविवरणम्

जीवोपासनपरमिति भावः। उक्तानुवादेन दोषाभिधानम्— **यत्तूक्तमित्यादिना**। शिलष्टतरं युक्ततरम्। आनन्दमयः परमात्मा, सर्वान्तरत्वात् तैत्तिरीयकपञ्चमपर्यायस्थत्वाद्वा भृगुवल्ल्युक्तानन्दवदिति भावः। ननु सावयवत्वप्रतिपत्तिबाध इत्याशङ्क्याह— **यत्तु प्रियादीनामिति**। अतीतानन्तरोपाधौ तावदस्त्यवयवकल्पना। तत्रायापत्त्या पुरुषविधत्वसंपादनार्थाऽवयवकल्पनाऽऽनन्दमयेऽपि, न स्वावयवसिद्ध्यर्था, अतो न बाध इत्यर्थः। शारीरत्वप्रतिपत्तिरपि न बाधिकेत्याह— **शारीरत्वमपीति**।

विकारार्थमयट्श्रुतिबाधमाशङ्क्य परिहरति— **विकारशब्दान्नेति चेन्न प्राचुर्यात्**। आनन्दप्राचुर्यादपि मयडुपपत्तौ न

भाष्यभावप्रकाशिका

मुख्यात्मत्वं वाक्यतात्पर्यादवगम्यत इत्याह—**मुख्यमेव हीति**।।१२।।

विकारशब्दान्नेति चेन्न प्राचुर्यात्।।१३।। ननु आनन्दप्राचुर्यस्य ब्रह्मणि निश्चितत्वात् तत्परः स्यादिति, तत्राह—**मयट**

न्यायनिर्णयः

लिङ्गात् तस्य ब्रह्मत्वमुक्त्वा तदब्रह्मत्वहेतुं प्रायपाठमनुवदति— **यत्त्विति**। लिङ्गबाध्यः संनिधिरित्याह— **नासाविति**। तस्य चतुष्कोशान्तरत्वमेव न सर्वान्तरत्वमित्युक्तमाशङ्क्य तात्पर्यमाह— **मुख्यमिति**। किमिति तर्हि प्रथममन्नमयादिचतुष्टयमादिष्टम्, तत्राह— **लोकेति**। कथं तर्हि देहे मनुष्योऽहमित्यात्मत्वधीरित्याशङ्क्याविवेकादित्याह— **अत्यन्तेति**। अन्नमयात्प्राणमयस्य ततो मनोमयस्य तस्मादपि विज्ञानमयस्य ततश्चानन्दमयस्यान्तरत्वे दृष्टान्तः— **मूषेति**। तर्हि प्राणमयादेरेवान्यतमस्यात्मत्वसंभवे किमानन्दमयेनेत्याशङ्क्याह— **पूर्वेणेति**। अनात्मत्वेन साम्ये तत्तज्ज्ञापनमकिंचित्करमित्याशङ्क्य लोकबुद्धिमनुसरदित्युक्तं स्मारयति— **प्रतिपत्तीति**। आनन्दमयादन्यस्यान्तरस्यानुक्तेरस्य निरङ्कुशमान्तरत्वमित्याह— **सर्वेति**। अमुख्यप्रवाहपातेऽपि मुख्यत्वे दृष्टान्तमाह— **यथेति**। **इहापीति** अमुख्यप्रवाहे पतितस्यापीति यावत्। लिङ्गेन संनिधिबाधेऽपि सावयवत्वलिङ्गानुगृहीतः स बलवानित्याशङ्क्योक्तमनुवदति— **यत्त्विति**। तस्य विज्ञानमयकोशोपाध्यधीनत्वेनान्यथासिद्धेर्न संनिधिसहायतेत्याह— **अतीतेति**। लिङ्गान्तरं संनिधिसहायत्वेनोक्तमनुवदति— **शारीरत्वमिति**। लिङ्गयोरन्यथासिद्धत्वे लिङ्गेन केवलसंनिधिबाधे फलितमाह— **तस्मादिति**।।१२।।

मयट्शब्दश्रुतिः संनिध्यनुग्रहिकेत्युक्तमनूद्य निरस्यति— **विकारेति**। तत्रानुवादं व्याख्याति— **अत्राहेति**। अभ्यासादिना तस्य परत्वे स्थिते कुतश्चोद्यमित्याह— **कस्मादिति**। बलवत्या श्रुत्योत्तरमाह— **विकारेति**। यथा 'विकारे च प्रकृतिशब्दः' इत्यत्र

अत्राह– नानन्दमयः पर आत्मा भवितुमर्हति। कस्मात्? विकारशब्दात्। प्रकृतिवचनादयमन्यः शब्दो विकारवचनः समधिगतः आनन्दमय इति, मयटो विकारार्थत्वात्। तस्मादन्नमयादिशब्दवद् विकारविषय एवानन्दमयशब्द इति चेत्, न; प्राचुर्यार्थेऽपि मयटः स्मरणात्। 'तत्प्रकृतवचने मयट्' (पा.सू. ५।४।२१) इति हि प्रचुरतायामपि मयट् स्मर्यते। यथा 'अन्नमयो यज्ञः' इत्यन्नप्रचुर उच्यते, एवमानन्दप्रचुरं ब्रह्मानन्दमय उच्यते। आनन्दप्रचुरत्वं च ब्रह्मणो मनुष्यत्वादारभ्योत्तरस्मिन्नुत्तरस्मिन् स्थाने शतगुण आनन्द इत्युक्त्वा ब्रह्मानन्दस्य निरतिशयत्वावधारणात्। तस्मात्प्राचुर्यार्थे मयट्।।१३।।

तद्धेतुव्यपदेशाच्च।।१४।।

इतश्च प्राचुर्यार्थे मयट्। यस्मादानन्दहेतुत्वं ब्रह्मणो व्यपदिशति श्रुतिः– 'एष ह्येवानन्दयाति' इति। आनन्दयतीत्यर्थः। यो ह्यन्यानानन्दयति स प्रचुरानन्द इति प्रसिद्धं भवति। यथा लोके योऽन्येषां धनिकत्वमापादयति स प्रचुरधन इति गम्यते, तद्वत्। तस्मात् प्राचुर्यार्थेऽपि मयटः संभवादानन्दमयः पर एवात्मा।।१४।।

प्रकटार्थविवरणम्

बाधकत्वसंभवः अनन्यथासिद्ध्यभावादिति भावः। 'तस्य विकारस्य प्रकृतिवचने हेत्वभिधाने गम्यमाने मयट्प्रत्ययो भवतीत्यनेन विकारापेक्षया प्रकृतेः प्राचुर्यात् प्राचुर्ये मयड् विहित इत्यर्थः। ब्रह्मण्यानन्दप्राचुर्यमेव कुतः सिद्धमित्यत आह— **आनन्दप्रचुरत्वं चेति**। "स एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः। स एको मनुष्यगन्धर्वाणामानन्दः" इत्युपक्रम्य देवगन्धर्वपितृलोकं................................. [तद्धेतुव्यपदेशाच्च।]

भाष्यभावप्रकाशिका

इति। विकारप्रकरणे पाठादित्यर्थः। वृद्धव्यवहाराभावे न शीघ्रं बुद्धिमारोहतीत्याशङ्क्याह—**यथाऽन्नमय इति**। ननु प्राचुर्यार्थत्वे सति तद्विपरीतस्य दुःखस्यापि लेशसंभवाद् दुःखित्वमपि स्यादिति, तत्राह—**आनन्दप्रचुरत्वमिति**। स्थानान्तरगतसुखाल्पत्वापेक्षं प्राचुर्यम्, न स्वगतदुःखाल्पत्वापेक्षमित्यर्थः।।१३।।

तद्धेतुव्यपदेशाच्च।।१४।। ननु मयटः प्रकरणाद्विकारार्थताऽवसीयते, सत्यम्; प्रमाणान्तरेणानन्दप्रचुरे वस्तुनि निश्चिते तत्परता मयटोऽङ्गीक्रियते, न विकारार्थता; मानान्तरेण तस्यासिद्धत्वादित्याह—**तस्मादिति**।।१४।।

न्यायनिर्णयः

शालिविकारं भुङ्क्ते मुद्गविकारेणेत्यस्मिन्नर्थे शालीन् भुङ्क्ते मुद्गैरिति प्रकृतिशब्दो विकारे प्रयुक्तः, तथा विकारशब्दोऽपि प्रकृतौ स्यादित्याशङ्क्य व्याचष्टे— **प्रकृतीति**। कः पुनरत्र विकारशब्द इत्युक्ते 'मयड् वा—' इति सूत्रान्मयट्शब्दस्य विकारवाचित्वान्ना-नन्दमयस्य मुख्यात्मतेत्याह— **आनन्देति**। श्रुतेर्विकारार्थत्वे तद्युक्तः संनिधिः संसारिणमेव गोचरयतीत्याह— **तस्मादिति**। मयटो विकारार्थत्वानियमात्र श्रुत्यनुग्रहः संनिधेरित्याह— **नेति**। तदेव स्फुटयति— **तत्प्रकृतेति**। प्राचुर्येण प्रस्तुतं प्रकृतं, तदुच्यते-ऽस्मिन्निति प्रकृतवचनमन्नादि तदिति प्रथमासमर्थाद् यथोक्तेऽभिधेये मयट्प्रत्ययो भवतीति प्रचुरतायुक्तेऽपि वस्तुनि विकार-वन्मयट्स्मरणान्न विकारार्थता नियतेत्यर्थः। प्राचुर्यार्थत्वं मयटो दृष्टान्तेन स्पष्टयति— **यथेति**। आनन्दमयशब्दस्या-नन्दप्राचुर्यार्थत्वे तद्विपरीतदुःखस्यापि लेशतो ब्रह्मणि प्राप्तिरित्याशङ्क्याह— **आनन्देति**। ब्रह्मानन्दस्य मनुष्यत्वावधिषु पूर्वस्थानेषु सुखाल्पत्वापेक्षं प्राचुर्यम्, न स्वगतदुःखलेशापेक्षम्। अतो ब्रह्मण्यानन्दैकरस्यं युक्तमित्यर्थः। श्रुतेर्न संनिधिसहायतेत्युपसंहरति— **तस्मादिति**।।१३।।

सूत्रस्थं चकारं व्याकरोति— **इतश्चेति**। अवशिष्टं व्याकुर्वन्नितःशब्दार्थं स्फुटयति— **यस्मादिति**। ब्रह्मणो नात्रानन्दहेतुत्वं भातीत्याशङ्क्याह— **आनन्दयतीत्यर्थ इति**। ब्रह्मणो लौकिकानन्दहेतुत्वेऽपि कथं प्राचुर्यार्थता मयटः स्यादित्याशङ्क्याह— **यो हीति**। तदेव दृष्टान्तेन स्फोरयति— **यथेति**। प्राचुर्यार्थत्वे मयटः स्थिते फलितमाह— **तस्मादिति**।।१४।।

१. 'तत्प्रकृतिवचने मयट्' इति सूत्रपाठं स्वीकृत्येदं व्याख्यानमिति भाति।

मान्त्रवर्णिकमेव च गीयते।।१५।।

इतश्चानन्दमयः पर एवात्मा। यस्मात् 'ब्रह्मविदाप्नोति परम्' इत्युपक्रम्य 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २।१) इत्यस्मिन् मन्त्रे यत् प्रकृतं ब्रह्म सत्यज्ञानानन्तविशेषणैर्निर्धारितं, यस्मादाकाशादिक्रमेण स्थावरजङ्गमानि भूतान्यजायन्त, यच्च भूतानि सृष्ट्वा तान्यनुप्रविश्य गुहायामवस्थितं, सर्वान्तरं, यस्य विज्ञानाय 'अन्योऽन्तर आत्माऽन्योऽन्तर आत्मा' इति प्रक्रान्तम्, तन्मान्त्रवर्णिकमेव ब्रह्मेह गीयते 'अन्योऽन्तर आत्माऽऽनन्दमयः' (तै.उ. २।५) इति। मन्त्रब्राह्मणयोश्चैकार्थत्वं युक्तम्, अविरोधात्। अन्यथा हि प्रकृतहानाप्रकृतप्रक्रिये स्याताम्। न चान्नमयादिभ्य इवानन्दमयादन्योऽन्तर आत्माऽभिधीयते। एतन्निष्ठैव च 'सैषा भार्गवी वारुणी विद्या' (तै.उ. ३।६)। तस्मादानन्दमयः पर एवात्मा।।१५।।

नेतरोऽनुपपत्तेः।।१६।।

इतश्चानन्दमयः पर एवात्मा, नेतरः। इतर ईश्वरादन्यः संसारी जीव इत्यर्थः। न जीव आनन्दमयशब्देनाभिधीयते। कस्मात्? अनुपपत्तेः। आनन्दमयं हि प्रकृत्य श्रूयते– 'सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इदँ सर्वमसृजत। यदिदं किंच' (तै.उ. २।६) इति। तत्र

प्रकटार्थविवरणम्

....................यद् ब्रह्म तदेव ब्राह्मणेनापि गीयते, प्रकृतत्वान्मन्त्रब्राह्मणयोश्च वैरूप्यायोगादित्याह—

मान्त्रवर्णिकमेव च गीयते। ननु तर्ह्यन्नमयादेरपि ब्रह्मत्वप्रसङ्गः, प्रक्रमाविशेषात् इत्याशङ्क्याह— **न चेति।** किं च भृगवे प्रोक्ता भार्गवी, वरुणेनोपदिष्टा वारुणी या विद्या साऽप्यानन्दमयब्रह्मनिष्ठैवेत्याह— **एतन्निष्ठैवेति।**

कामनापूर्वकसकलजगत्सृष्ट्याद्यनुपपत्तेर्न जीव आनन्दमय इत्याह— **नेतरोऽनुपपत्तेः इति।** सृज्यमानपदार्थालोचनं तपः। अतप्यत कृतवानित्यर्थः। श्रूयतां नाम, ततः किमित्यत आह— **तत्रेति।** "सोऽकामयत" इत्यभिध्यानम्; बहु स्यां भवेयम्

भाष्यभावप्रकाशिका

मान्त्रवर्णिकमेव च गीयते।।१५।। प्रकरणविच्छेदशङ्कानिरासाय पूर्वापरानुसन्धानं करोति— **यस्मादाकाशादीति।** यथाऽन्नमयादीनामनात्मत्वेऽपि न प्रक्रमविरोधः, एवमानन्दमयस्यापीत्याशङ्क्याह—**न चान्नमयादिभ्य इति।** ननु आन्तरत्वेनान्यस्यात्रानभिधानेऽपि भृगुवल्ल्यामभिधानमस्तीति, तत्राह—**एतन्निष्ठेति।** पञ्चमपर्यायेणोपसंहारादित्यर्थः।।१५।।

नेतरोऽनुपपत्तेः।।१६।। भवत्वेवम्, का नु पुनरनुपपत्तिरिति? तत्राह—**तत्र प्रागिति।**

न्यायनिर्णयः

चशब्दार्थमाह— **इतश्चेति।** तदेव हेत्वन्तरमाह— **यस्मादिति।** तस्मादिति व्यवहितेन संबन्धः। यन्निर्धारितं तदेवेह गीयत इति योजना। प्रकरणाविच्छेदार्थं तदनुसंधत्ते— **यस्मादिति।** भूतयोनेरेव सर्वप्रत्यक्तमत्वेन सर्वान्तरत्वमाह— **यच्चेति।** तस्यैव ज्ञेयत्वेन प्रकृतत्वमाह— **यस्येति।** तदेवात्रोच्यमानमिति कुतो गम्यते, तत्राह— **मन्त्रेति। अविरोधादिति।** एकार्थत्वे सत्युपायोपेयत्वयोगादित्यर्थः। तयोरनेकार्थत्वे दोषमाह— **अन्यथेति।** अन्नमयादीनामनात्मत्वेऽप्यविरोधवदिहापि स्यादित्याशङ्क्याह— **न चेति।** ब्रह्मणस्तदान्तरत्वं पुच्छश्रुतिहतमिति भावः। किंच भृगुवल्ल्यां प्रञ्चमपर्यायेणोपसंहारात् तस्य ब्रह्मार्थत्ववदत्रापि तस्य स्थानात् तदर्थतेत्याह— **एतन्निष्ठेति।** प्रकरणादिसिद्धमर्थमुपसंहरति— **तस्मादिति।।१५।।**

पूर्वसूत्रस्थं चकारमाकृष्य सूत्रस्य हेत्वन्तरपरत्वमाह— **इतश्चेति।** जीवस्य प्रतिपाद्यत्वाप्राप्त्या किं निषेध्यमित्याशङ्क्याऽऽनन्दमयशब्दवाच्यतेत्याह— **नेति।** तस्यापि वैषयिकविविधानन्दभाक्त्वात् तच्छब्दत्वं किं न स्यादित्याह— **कस्मादिति।** हेतुमादाय व्याकर्तुं भूमिकां करोति— **अनुपपत्तेरिति।** आलोचनं तपो नायासमयम्। अस्त्वेवं काऽनुपपत्तिः, तत्राह— **तत्रेति।।१६।।**

प्राक् शरीराद्युत्पत्तेरभिध्यानं, सृज्यमानानां च विकाराणां स्रष्टुरव्यतिरेकः, सर्वविकारसृष्टिश्च न परस्मादात्मनोऽन्यत्रोपपद्यते।।१६।।

भेदव्यपदेशाच्च।।१७।।

इतश्च नानन्दमयः संसारी। यस्मादानन्दमयाधिकारे–'रसो वै सः। रस ँ ह्येवायं लब्ध्वाऽऽनन्दी भवति' (तै.उ. २।७) इति जीवानन्दमयौ भेदेन व्यपदिशति। न हि लब्धैव लब्धव्यो भवति। कथं तर्हि 'आत्माऽन्वेष्टव्यः' (छा. ८-७-१) 'आत्मलाभान्न परं विद्यते' (आ.ध.सू.१.८.१.२) इति श्रुतिस्मृती, यावता न लब्धैव लब्धव्यो भवतीत्युक्तम्। बाढम्। तथाप्यात्मनोऽप्रच्युतात्मभावस्यैव सततस्तत्त्वानवबोधनिमित्तो देहादिष्वनात्मस्वात्मत्वनिश्चयो लौकिको दृष्टः। तेन देहादिभूतस्यात्मनोऽप्यात्माऽनन्विष्टोऽन्वेष्टव्योऽलब्धो लब्धव्योऽश्रुतः श्रोतव्योऽमतो मन्तव्योऽविज्ञातो विज्ञातव्य इत्यादिभेदव्यपदेश उपपद्यते। प्रतिषिध्यत एव

प्रकटार्थविवरणम्

'कार्यकरणे[1] चाहमेवोत्पद्येयेत्यव्यतिरेकः, "इदं सर्वमसृजत" इति सृष्टिश्च जीवे नानुपपत्तेः [नोपपद्यन्ते] परिच्छिन्न-शक्तित्वादित्यर्थः।

आनन्दमयप्रकरणे जीवेश्वरयोर्भेदव्यपदेशाच्च न जीव आनन्दमय इत्याह— **भेदव्यपदेशाच्च** इति। रसवद् रसः मोदनहेतुत्वादानन्दमयः। तत् प्राप्यायं जीवः सुखी भवतीत्येतावदुच्यते, न भेद इत्याशङ्क्याह— **न हि लब्धैवेति**। एकस्य कर्म-कर्तृत्वानुपपत्तेरार्थिकश्चेद् भेदव्यपदेशः, कथं तर्हि श्रुतिस्मृती आत्मन एव लाभविषये सङ्गच्छेते इत्याह— **कथं तर्हीति**। सत्यमात्मन एव लाभं दर्शयतः श्रुतिस्मृती; किन्तु मिथ्याभेदाङ्गीकारेणैवेत्याह— **बाढमिति**। अविद्याप्रतिबिम्बितस्य चिद्धातोरविद्याकार्यदेहाद्यात्माभिमानिनो बिम्बस्थानीयं ब्रह्म स्वरूपभूतमप्यन्वेष्टव्यं लभ्यं च भवतीति न कर्तृकर्मविरोध इति भावः। ननु यद्येकस्य कर्तृत्वकर्मत्वविरोधाद् भेदोऽङ्गीकृतः, तर्हि स तात्त्विक एवास्त्वित्याशङ्क्याह— **प्रतिषिध्यत एवेति**। यो

भाष्यभावप्रकाशिका

भेदव्यपदेशाच्च।।१७।। यदि न लब्धैव लब्धव्यः, तर्हि कथं जीवेन स्वाभिन्नः परमात्मा लभ्यत इति चोदयति—**कथं तर्हीति**। परमार्थतोऽभेदेऽपि काल्पनिकभेदादुपपन्नमेतदिति परिहरति—**बाढमिति**। आनन्दमयस्य जीवत्वे तु जीवस्याविद्ययाऽपि जीवाद् भेदाभावान्नायं व्यवहारस्सिध्येदिति भावः। ननु भेदश्रुत्यनुसारेण पारमार्थिको भेदोऽस्त्वित्याशङ्क्याह—**प्रतिषिध्यत इति**।

न्यायनिर्णयः

जीवस्यानन्दमयत्वनिषेधे हेत्वन्तरमाह— **भेदेति**। चकारार्थं प्रतिज्ञाय प्रकटयन् भेदव्यपदेशं विशदयति— **इतश्चेत्यादिना**। 'स' इत्यानन्दमयपरामर्श इति वक्तुमानन्दमयाधिकार इत्युक्तम्। श्रुतेरर्थमाह— **जीवेति**। कयाऽनुपपत्त्या भेदोक्तिः, तत्राह— **न हीति**। लब्धैव लब्धव्यो न चेत् तर्हि श्रुतिस्मृत्योरनुपपत्तिरिति शङ्कते— **कथमिति**। का तयोरनुपपत्तिः, तत्राह— **यावतेति**। किमेकत्र वस्तुतो न लब्धृलब्धव्यत्वं, किंवा कल्पनयाऽपि। तत्राद्यमङ्गीकरोति— **बाढमिति**। श्रुत्याद्युपपत्तये द्वितीयं प्रत्याह— **तथापीति**। **अप्रच्युतात्मभावो**ऽखण्डैकरस्यम्। **लौकिको** लोकादनपेतोऽप्रामाणिकः। तस्य फलवत्त्वमाह— **तेनेति**। अन्वेषणं विचारारम्भमात्रं, तत्फलाप्तिर्लाभः, श्रवणं शक्तितात्पर्यधीरिति भेदः। द्रष्टृद्रष्टव्यत्वादिसंग्रहार्थमादिपदम्। जीवत्वे त्वानन्दमयस्य जीवस्याविद्ययाऽपि जीवाद्भेदाभावान्न भेदव्यपदेशः स्यादिति भावः। किमिति कल्पितभेदेन लब्धृलब्धव्यत्वाद्युच्यते, श्रुत्यादिवशाद् वास्तवो भेदोऽस्त्वित्याशङ्क्याह— **प्रतिषिध्यत इति**। जीवश्चेन्नेश्वरादन्यस्तर्हि सोऽपि ततोऽन्यो नेति तस्यापि

१. 'कार्यकरणे' इत्यस्य स्थाने 'कार्याकारेण' इति पाठः स्यात्।

तु परमार्थतः सर्वज्ञात् परमेश्वरादन्यो द्रष्टा श्रोता वा, 'नान्योऽतोऽस्ति द्रष्टा' (बृ.उ. ३।७।२३) इत्यादिना। परमेश्वरस्त्वविद्याकल्पिताच्छारीरात् कर्तुर्भोक्तुर्विज्ञानात्माख्यादन्यः। यथा मायाविनश्चर्मखड्गधरात् सूत्रेणाकाशमधिरोहतः स एव मायावी परमार्थरूपो भूमिष्ठोऽन्यः। यथा वा घटाकाशादुपाधिपरिच्छिन्नादनुपाधिपरिच्छिन्न आकाशोऽन्यः। ईदृशं च विज्ञानात्मपरमात्मभेदमाश्रित्य 'नेतरोऽनुपपत्तेः' 'भेदव्यपदेशाच्च' इत्युक्तम्।।१७।।

कामाच्च नानुमानापेक्षा।।१८।।

आनन्दमयाधिकारे च 'सोऽकामयत, बहु स्यां प्रजायेय' (तै.उ. २।६) इति कामयितृत्वनिर्देशान्नानु-

प्रकटार्थविवरणम्

मायाप्रतिबिम्बितत्वेन सर्वज्ञादिशब्दवाच्यः चिद्धातुः तस्मात् परमार्थत एवान्यो द्रष्टा श्रोता वा प्रतिषिध्यत एव शास्त्रेण प्रतिपन्नभेदानुपमर्देनेति न तात्त्विको भेद आश्रीयत इत्यर्थः। नन्वेतदः[१] प्रसिद्धावद्योतकत्वात् लोकप्रसिद्धात् जीवाख्याद् द्रष्टुरन्य ईश्वरोऽनेन वाक्येन प्रतिषिध्यत इत्याशङ्क्याह— **परमेश्वरस्त्विति**। **अविद्याकल्पितादिति**। अविद्याप्रतिबिम्बिताच्चिद्धातोर्जीवाख्यादन्यः परेश्वरो न निषिध्यते। प्रसिद्धावद्योतकस्याप्येतदः प्रकरणानुगृहीतस्य प्रकृतान्तर्याम्यवलम्बित्वात्, नियम्यनियामकभावेन प्रसक्ततात्त्विकभेदशङ्कानिरासकत्वाद् वाक्यस्येत्यर्थः। प्रतिषिद्धे च प्रतिपन्नभेदस्य तत्त्वांशे मिथ्यात्वं व्यवतिष्ठते। तत्रोदाहरणमाह— **यथेति**। मायामहिम्ना देहं निर्माय स्वयं च तत्र प्रविश्याकाशमधिरोहति। विशिष्टयोरेव तत्रापि भेदः कल्पितः, स्वरूपं पुनरेकमेवेति भावः। ननु सूत्रकारेण तात्त्विक एव भेद उक्तः; कथं मिथ्याभेद उदाहृत इत्याशङ्क्याह— **ईदृशं चेति**। यदत्र[२] भास्करो विललाप 'यथासूत्रार्थसंभवे भङ्क्त्वा व्याख्यानस्याप्यन्याय्यत्वात्' इति; तदसौ स्वात्मानं ह्लेपयति स्म। न हि सूत्रे सत्यपदं समस्ति। न च कल्पयितुं शक्यम्, आत्मलाभश्रवणश्रमप्रसङ्गात्। साधारणे च भेदशब्दे सति सत्यताकल्पनायां तस्यैव सूत्रभङ्गप्रसङ्गादिति।

कामाच्च नानुमानापेक्षा। ननु तर्हि प्रधानमानन्दात्मकसत्त्वसंपन्नमानन्दमयशब्दाभिधेयमस्त्वित्याशङ्क्याह— **कामाच्चेति**।

भाष्यभावप्रकाशिका

ननु ईश्वरादन्यो जीवो नास्ति चेत्, ईश्वरोऽपि जीवादनन्य इति तस्याप्यविद्याकल्पितत्वं स्यादिति, तत्राह—**परमेश्वर इति**। कल्पितस्याधिष्ठानसत्ताप्रतीतिव्यतिरेकेण सत्ताप्रतीत्ययोग्यत्वाद् भेदेनाभावेऽपि ततो विलक्षणमेव त्वधिष्ठानम्; सत्ताप्रतीत्योस्तस्य स्वातन्त्र्यादित्यभिप्रेत्य दृष्टान्तमाह—**यथेति**। जीवस्य स्वरूपेणाकल्पितत्वान्नायमनुरूपो दृष्टान्त इत्यपरितोषाद् दृष्टान्तान्तरमाह—**यथा वेति**। ननु सूत्रद्वयसामर्थ्यात् पारमार्थिको भेद इति, तत्राह—**ईदृशं चेति**। अन्यथा पूर्वापरविरोधप्रसङ्गादित्यर्थः।

न्यायनिर्णयः

कल्पितत्वमित्याशङ्क्याह— **परमेश्वरस्त्विति**। कल्पितस्याधिष्ठानादृते सत्त्वाद्ययोगाद्, भेदेनासत्त्वेऽपि ततोऽन्यदेवाधिष्ठानं, सत्तास्फूर्त्योः स्वातन्त्र्यादिति मत्वा दृष्टान्तमाह— **यथेति**। सूत्रारूढः स्वतोऽपि मिथ्या, जीवे भेदमात्रं तथा, न स्वरूपमित्यपरितोषादुक्तम्— **यथा वेति**। तथापि सूत्रद्वयसामर्थ्यात् पारमार्थिकं भेदमाशङ्क्याह— **ईदृशं चेति**। अन्यथा श्रुतिसूत्रविरोध इति भावः।।१७।।

नन्वौपचारिकस्य कामयितृत्वस्य प्रधानेऽपि संभवात् तदेवानन्दमयत्वेन कारणत्वेन वाऽपेक्ष्यतां, न परमात्मेत्याशङ्क्याह— **कामाच्चेति**। तद् व्याख्याति— **आनन्देति**। ईक्षत्यधिकरणे प्रधानस्य निरस्तत्वादिहापि तन्निरासे पुनरुक्तिरित्याशङ्क्याह—

१. एतद इति। 'नान्योऽतोस्ति' इति श्रुतिगत 'अतः' शब्दप्रकृतिभूतैतच्छब्दस्येत्यर्थः।

२. द्र. ब्र.सू. भास्करभाष्यम्, पृ. २६।

मानिकमपि सांख्यपरिकल्पितमचेतनं प्रधानमानन्दमयत्वेन कारणत्वेन वाऽपेक्षितव्यम्। 'ईक्षतेर्नाशब्दम्' (ब्र.सू. १।१।५) इति निराकृतमपि प्रधानं पूर्वसूत्रोदाहृतां कामयितृत्वश्रुतिमाश्रित्य प्रसङ्गात् पुनर्निराक्रियते गतिसामान्यप्रपञ्चनाय।।१८।।

अस्मिन्नस्य च तद्योगं शास्ति।।१९।।

इतश्च न प्रधाने जीवे वाऽऽनन्दमयशब्दः। यस्मादस्मिन्नानन्दमये प्रकृत आत्मनि प्रतिबुद्धस्यास्य जीवस्य तद्योगं शास्ति। तदात्मना योगस्तद्योगः, तद्भावापत्तिः। मुक्तिरित्यर्थः। तद्योगं शास्ति शास्त्रम्- 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। अथ सोऽभयं गतो भवति। यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति' (तै.उ. २।७) इति। एतदुक्तं भवति- यदैतस्मिन्नानन्दमयेऽल्पमप्यन्तरमतादात्म्यरूपं पश्यति तदा संसारभयान्न निवर्तते। यदा त्वेतस्मिन्नानन्दमये निरन्तरं तादात्म्येन प्रतितिष्ठति तदा संसारभयान्निवर्तत इति। तच्च परमात्मपरिग्रहे घटते, न प्रधानपरिग्रहे जीवपरिग्रहे वा। तस्मादानन्दमयः परमात्मेति स्थितम्।

प्रकटार्थविवरणम्

अनुमानेन गम्यमानं प्रधानं तस्य नानन्दमयत्वेनापेक्षा, कामयितृत्वस्य चेतनधर्मस्य श्रवणादित्यर्थः। ननु न युक्ता प्रधानाशङ्का तस्याशब्दत्वोक्तेरित्याशङ्क्याह—**ईक्षतेरिति।**

अस्मिन्नस्य च तद्योगं शास्ति। प्रकृतानन्दमयप्रबोधवतो मोक्षशासनात् जीवप्रधानाच्च [प्रधानप्रबोधाच्च] तदसंभवात् न तयोरानन्दमयतेत्याह— **अस्मिन्निति।** अदृश्ये चक्षुराद्यगोचरे, अनात्म्ये असङ्गे, अनिरुक्ते शब्दशक्त्यगोचरे, अनिलयने स्वतन्त्रे, अभयं प्रतिष्ठां यदैवैष जीवो लभते अथ तदैव स मुक्तो भवतीत्यर्थः। उत् अपि; अरम् अल्पम्; अन्तरं भेदमित्यर्थः।

भाष्यभावप्रकाशिका

कामाच्च नानुमानापेक्षा।।१८।। अस्मिन्नस्य च तद्योगं शास्ति।।१९।। "यदा ह्येवैष" इत्यत्र देहेन्द्रियान्तःकरणाविद्याः क्रमेण विशेषणैर्निरस्यन्ते। **न प्रधान इति।** प्रधाननिष्ठस्य जीवनिष्ठस्य वा मुक्त्यसंभवादित्यर्थः।

न्यायनिर्णयः

ईक्षतेरिति। प्रासङ्गिकनिरासस्य प्रकृतोपयोगमाह— **गतीति**।।१८।।

आनन्दमयस्य प्रधानजीवयोरन्यतरत्वाभावे हेत्वन्तरं कामयितृत्वस्यागौणत्वं सूचयन्नाह— **अस्मिन्निति।** चशब्दार्थमाह— **इतश्चेति।** अस्मिन्नित्यादि व्याकुर्वन्नितःशब्दार्थं स्पष्टयति— **यस्मादिति।** प्रधानपक्षेऽपि तद्योगः स्यादित्याशङ्क्याह— **तदात्मनेति।** स्वतो भिन्नयोस्तादात्म्यसंबन्धं व्यावर्तयति— **तद्भावेति।** उक्तार्थं पदमनूद्य क्रियापदापेक्षितं पूरयति— **तद्योगमिति।** यस्यामैक्यज्ञानावस्थायां विद्वानेतस्मिन् ब्रह्मणि, पञ्चीकृतभूतपञ्चकेन, तत्कार्येण च समष्टिस्थूलदेहेन विराजा दृश्यशब्दितेनैक्यतादात्म्यशून्ये, स्वसंबन्धितयाऽध्यस्तेन्द्रियजातेनापञ्चीकृतभूतकार्येणाऽऽत्म्येन तादात्म्यादिहीने, निष्कृष्योच्यन्त इति निरुक्तानि भूतसूक्ष्माणि तैश्चाभेदवर्जिते, निःशेषलयस्थानं निलयनमिति मूलप्रकृतेरुक्तेस्तत्तादात्म्यादिरहिते, प्रकर्षेण स्थितिं पुनरावृत्तिरहितां लभते। अभयं यथा स्यादित्युक्तं व्यनक्ति— **अथेति।** ज्ञाने फलमुक्त्वा ज्ञानाभावे दोषमाह— **यदा हीति।** भेदस्यानादित्वात् 'तत्कारणाधीनदोषोक्तिरयुक्तेत्याशङ्क्याह— **एतदिति।** 'अभयं प्रतिष्ठाम्' इत्युक्त्वा पुनः 'अभयं गतो भवति' इत्युक्ते पुनरुक्तिरित्याशङ्क्याह— **यदा त्विति।** शास्त्रस्यान्यथासिद्धिं प्रत्याह— **तच्चेति। वृत्तिकृतां** मतमुपसंहरति— **तस्मादिति।** परस्य ज्ञेयत्वे कैवल्यं फलतीति मत्वाऽऽह— **इति स्थितमिति।** अत्र चानन्दमये परस्मिन्नात्मनि स्पष्टब्रह्मलिङ्गानां तैत्तिरीयकश्रुतीनां समन्वयादस्ति संगतिचतुष्टयमिति।

---

१. 'तत्करण' इति पाठः स्यात्।

इदं त्विह वक्तव्यम्– 'स वा एष पुरुषोऽन्नरसमयः' 'तस्माद्वा एतस्मादन्नरसमयात्। अन्योऽन्तर आत्मा प्राणमयः' तस्मात् 'अन्योऽन्तर आत्मा मनोमयः' तस्मात् 'अन्योऽन्तर आत्मा विज्ञानमयः' (तै.उ. २।१, २, ३, ४) इति च विकारार्थे मयट्प्रवाहे सत्यानन्दमय एवाकस्मादर्धजरतीयन्यायेन कथमिव मयटः प्राचुर्यार्थत्वं ब्रह्मविषयत्वं चाश्रीयत इति? मान्त्रवर्णिकब्रह्माधिकारादिति चेत्, न। अन्नमयादीनामपि तर्हि ब्रह्मत्वप्रसङ्गः।

प्रकटार्थविवरणम्

एवं वृत्तिकारमतेन व्याख्याय आक्षिपति स्वापेक्षितव्याख्यानाय— **इदं त्विह वक्तव्यमित्यादिना**। एतदुक्तं भवति— शब्दः किल शक्तिस्मृतिसापेक्षो बुद्धिमुत्पादयति। अन्नमयादिषु च मयटो विकाराभिधानशक्तेर्बुद्धिस्थत्वादानन्दमयेऽपि विकाराभिधानमेव युक्तम्, लाघवात्। अन्यथाकारं गौरवादिति।

यदत्र **भास्करो** रुरोद—''यद्यप्यन्नमये विकारार्थे मयट्प्रत्ययः, तथापि न प्राणमयादिषु विकारार्थः संभवति, पञ्चवृत्तेः प्राणस्यैकत्वात् प्रकृतिविकारभावासंभवात्। अतः तत्र स्वार्थे मयट्प्रत्ययो वृत्तिबाहुल्यविवक्षया वा 'ततः परेषु विवक्षा नास्तीत्यानन्दमयः प्रभूतानन्दो वा'' इति— तदज्ञत्वमेव प्रतिजज्ञे। तथा हि— ''स वा एष पुरुषोऽन्नरसमयः'' इत्यत्र तावत् प्रकृतं ब्रह्मात्मानं सशब्देनानुकृष्य भूतानि निर्माय देहमनुप्रविष्टं तमैवैषशब्देन परामृश्यान्नरसेनान्नकार्येण देहेनावच्छिन्नतया तद्विकारं तं निर्दिशति— **अन्नरसमय इति**। ततोऽनन्तरं प्राणेनावच्छिन्नतया तमेव तद्विकारमाह— **प्राणमय इति**। तस्य प्राणमयस्यैष एव प्रकृतश्चिद्धातुः प्राणे च प्रतिबिम्बितः शारीर आत्मा यः पूर्वस्यान्नमयस्येति प्रकृतस्यैव विशिष्टात्मनामात्मभूतस्यानुकर्षणात्। ततोऽनन्तरं संकल्पादिसमर्थमनोवच्छिन्नतया मनोमयम् अध्यवसायसमर्थविज्ञानविशिष्टतया विज्ञानमयम् आनन्दविशिष्टतया आनन्दमयं तमेवाह। त एते पञ्च विशिष्टा अज्ञानप्रतिबिम्बितचित्स्वरूपे समारोपिताः विशेषविकारत्वात् मयटोच्यन्ते।

ननु विशेषणविशेष्यसम्बन्धव्यतिरेकेण न निवि[विशि]ष्टोऽस्ति; न; संबन्धग्रहणोत्तरकालीनत्वात् विशिष्टबुद्धेरतिरिक्तविषयत्वात् अन्यथा पटस्याप्यपह्नवप्रसङ्गात्, तन्तुसंयोगमात्रं तत्रापि भातीति वक्तुं शक्यत्वात्। अतो यथा अन्वयव्यतिरेकाभ्यां तन्तुसंयोगारब्धः पटः, तथा विशेषणविशेष्यसंबन्धारब्धो विशिष्टोऽभ्युपेयः सर्वैः। रहस्यं तु विशेषणविशेष्ययोः परस्पराधीनसिद्धिकत्वात् वस्तुत्वायोगात् विशेषणयोगात् स्वरूपे समारोपितो विशिष्टो भातीति। 'सुरभि चन्दनम्' इत्यादावेकैकग्रहणसंस्कारसध्रीचीनेन मनसा विशिष्टाध्यवसाय इत्यनेन [इति] । तदेवं विकारार्थमयट्प्रवाहमुल्लङ्घ्य न प्राचुर्यार्थो मयडानन्दमये व्याख्यातुमुचितः, नापि स्वार्थः, पौनरुक्त्यापाताच्च ''आनन्द आत्मा'' इत्यनेन। किन्तु विकारार्थ एव।

आक्षिप्तमपि दु[पृ]ष्टमिति मत्वाऽऽह— **मान्त्रवर्णिकेति**। अतिप्रसङ्गेन परिहरति— **अन्नमयादीनामपीति**।

भाष्यभावप्रकाशिका

स्वमतपरिग्रहार्थमेकदेशिमतं दूषयति—**इदं त्विहेति**। ''मयट् चे''ति सूत्रान्मयटो विकारार्थे श्रुतत्वात् प्रियाद्यवयवत्वस्य च विकारार्थत्वे लिङ्गत्वात् विकारप्रकरणत्वाच्च विकारार्थत्वमेव युक्तमिति भावः। ननु आनन्दमयादपि पुच्छं ब्रह्मान्यदुच्यत इति,

न्यायनिर्णयः

स्वमतसंग्रहार्थं स्वयूथ्यमतं दूषयति— **इदं त्विति**। **इहेति** परस्य व्याख्योक्तिः। पर्यायचतुष्टये मयटो विकारार्थत्वात् पञ्चमे पर्याये तादर्थ्यमिति प्रकरणं दर्शयति— **स वा इति**। 'मयड् वा—' इति सूत्रान्मयट्शब्दो विकारे श्रुतिरिति वक्तुं विकारार्थे मयडित्युक्तम्। विकारप्रकरणं प्रकटयितुं प्रवाहपदम्। प्रियाद्यवयवत्वस्य विकारार्थे लिङ्गत्वात् प्राचुर्यार्थत्वे च हेत्वभावान्मयटो न तदर्थतेत्याह— **आनन्देति**। एकस्यैव मयटोऽर्थद्वयं नेत्यत्र दृष्टान्तमाह— **अर्धेति**। श्रुतिलिङ्गप्रकरणविरोधेन प्राचुर्यार्थत्वे मयटो दृष्टान्तोऽपि नास्तीत्याह— **कथमिति**। विकारार्थत्वे निश्चिते तद्वाक्यस्य न ब्रह्मार्थतेत्याह— **ब्रह्मेति**। कथंशब्दस्य प्रश्नार्थतामुपेत्य प्रकरणेन शङ्कते— **मान्त्रेति**। न प्रकरणमात्रं नियामकमतिप्रसक्तेरित्याह— **अन्नेति**।

---

१. ततः परेषु=मनोमयादिषु। 'आनन्द एवानन्दमयः, प्रभूतानन्दो वा' इति पाठः स्यात्। द्र. भास्कर. पृ. २७।

अत्राह—युक्तमन्नमयादीनामब्रह्मत्वं, तस्मात् तस्मादान्तरस्यान्तरस्यान्यस्यान्यस्यात्मन उच्यमानत्वात्, आनन्दमयात्तु न कश्चिदन्य आन्तर आत्मोच्यते, तेनानन्दमयस्य ब्रह्मत्वम्, अन्यथा प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गादिति। अत्रोच्यते— यद्यप्यन्नमयादिभ्य इवानन्दमयादन्योऽन्तर आत्मेति न श्रूयते, तथापि नानन्दमयस्य ब्रह्मत्वं, यत आनन्दमयं प्रकृत्य श्रूयते— 'तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा' (तै.उ. २।५) इति। तत्र यद् ब्रह्म मन्त्रवर्णे प्रकृतम्— 'सत्यं ज्ञानमनन्तं ब्रह्म' इति, तदिह 'ब्रह्म पुच्छं प्रतिष्ठा' इत्युच्यते। तद्विजिज्ञापयिषयैवान्नमयादय आनन्दमयपर्यन्ताः पञ्च कोशाः कल्प्यन्ते। तत्र कुतः प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गः?

नन्वानन्दमयस्यावयवत्वेन 'ब्रह्म पुच्छं प्रतिष्ठा' इत्युच्यते, अन्नमयादीनामिव 'इदं पुच्छं प्रतिष्ठा'

प्रकटार्थविवरणम्

पूर्वोक्तं पराभिप्रायमाह— **अत्राहेत्यादिना**। तत्र भवान् पृष्टो व्याचष्टाम्—किं तस्मादन्योऽन्तर इत्येवंकारमश्रवणादतिरिक्तानभिधानम्, किं वा प्रकारान्तरेणाप्यनभिधानमेवेति। आद्यमनुजानाति— **यद्यपीति**। तथापि नातिरिक्तानभिधानम्, नाप्यानन्दमयस्य ब्रह्मत्वमिति योजना। उभयत्र हेतुमाह— **यत इति**। ज्ञानकर्मफलभूतानन्दविशिष्टं भोक्तारं प्रक्रम्य प्रियाद्यवयवाभिधानाद् "आनन्द आत्मे"त्यज्ञानप्रतिबिम्बितस्य चिद्धातोर्विशिष्टानुयायिनो बिम्बभूतस्य च "ब्रह्म पुच्छं प्रतिष्ठा" इति पृथगभिधानादित्यर्थः। शुभकर्मोपस्थापितबाह्येष्टसन्दर्शने प्रतिबिम्बितमात्मचैतन्यं प्रियं सुखम्, तदनुस्मरणे प्रतिबिम्बितं मोदः, स एवाभ्यासात् प्रकृष्टः प्रमोदः। तच्च बिम्बभूतचैतन्यमानन्दप्रियादिविशिष्टस्याहङ्कर्तुरात्मेत्यर्थः। यच्चोवाच अन्यथा प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्ग इति तत्राह— **तत्र यत्तदिति**। अवयववाचिना पुच्छशब्देन समानाधिकृतस्य ब्रह्मशब्दस्य कथं

भाष्यभावप्रकाशिका

तत्राह—**आनन्दमयात्त्विति**। अत्र तु किमानन्दमयादान्तरत्वेनान्यस्योच्यमानत्वाभावादानन्दमयस्य ब्रह्मत्वम्, किं वाऽन्यस्यैवानभिधानादिति विकल्प्यान्तरस्यान्यस्याश्रवणमङ्गीकृत्य ब्रह्मत्वमानन्दमयस्य तथापि न सिध्यति; अन्यस्य पुच्छब्रह्मणोऽभिधानादित्याह—**यद्यपीति**। मन्त्रवर्णे प्रकृतं ब्रह्म "ब्रह्म पुच्छं प्रतिष्ठे"त्यत्र ब्रह्मशब्देन प्रत्यभिज्ञायते, आनन्दमयस्य तु ब्रह्मत्वे ब्रह्मपदस्यार्थान्तरे वृत्तिरानन्दमयशब्दस्य ब्रह्मण्यप्रयुक्तस्य ब्रह्मणि प्रवृत्तिश्च प्रसज्यत इत्यसामञ्जस्यं स्यादित्याह—**तत्र यदिति**। ननु आनन्दमयस्याब्रह्मत्वे तदुपन्यासो व्यर्थः स्यादित्याशङ्क्यान्नमयादीनामिव पुच्छब्रह्मज्ञापनार्थ उपन्यास इत्याह—**तद्विजिज्ञापयिषयैवेति**।

न्यायनिर्णयः

तेषामब्रह्मत्वं लिङ्गादिति शङ्कते— **अत्रेति**। आनन्दमयादपि पुच्छं ब्रह्मान्यदान्तरमुक्तमित्याशङ्क्याह— **आनन्देति**। ब्रह्मण्यान्तरत्वमश्रुतं, पुच्छत्वं तु श्रुतमित्यर्थः। तस्मादान्तरस्यानुक्तौ प्राकरणिकमर्थमाह— **तेनेति**। तस्याब्रह्मत्वे दोषमाह— **अन्यथेति**। किमानन्दमयादान्तरत्वेनान्यस्यानुक्तेस्तस्य ब्रह्मत्वं, किंवाऽन्यैस्यंवानुक्तेरिति विकल्पयति— **अत्रेति**। तत्रानन्दमयादान्त-रस्याश्रुतिमुपेत्य ब्रह्मत्वं प्रत्याह— **यद्यपीति**। अन्यस्य पुच्छब्रह्मणोऽभिधानादिति हेतुं ब्रुवन् द्वितीयं निराह— **यत इति**। इष्टार्थदृष्टौ व्यक्तं हर्षमात्रं प्रियम्। इष्टस्मृतौ हर्षो मोदः। स चाभ्यासात् प्रकृष्टः प्रमोदः। सुखमात्रमानन्दः। मन्त्रवर्णोक्तं ब्रह्म पुच्छवाक्ये ब्रह्मशब्दात् प्रत्यभिज्ञातम्। ब्रह्मत्वे त्वानन्दमयस्य ब्रह्मशब्दस्यान्यत्र वृत्तिः आनन्दमयशब्दस्य ब्रह्मण्यप्रयुक्तस्य तस्मिन्प्रयुक्तिश्चेत्ययुक्तं स्यादिति श्रुतितात्पर्यमाह— **तत्रेति**। आनन्दमयस्याब्रह्मत्वे तदुक्तिवैयर्थ्यमाशङ्क्यान्नमयादिवत् पुच्छब्रह्मज्ञापनार्था तदुक्तिरित्याह—**तदिति**। यदुक्तमानन्दमयस्याब्रह्मत्वे प्रकृतहानमप्रकृतप्रक्रिया चेति, तत्राह— **तत्रेति**। पुच्छब्रह्मवाक्यस्य स्वप्रधानब्रह्मार्थत्वे सतीति यावत्।

पुच्छश्रुतिविरोधान्न तस्य स्वप्रधानार्थतेति शङ्कते— **नन्विति**। पुच्छशब्दस्यात्रावयवार्थत्वाभावे प्रकरणविरोधमाह— **अत्रेति**।

इत्यादि। तत्र कथं ब्रह्मणः स्वप्रधानत्वं शक्यं विज्ञातुम्? प्रकृतत्वादिति ब्रूमः। नन्वानन्दमयावयवत्वेनापि ब्रह्मणि विज्ञायमाने न प्रकृतत्वं हीयते, आनन्दमयस्य ब्रह्मत्वादिति। अत्रोच्यते— तथा सति तदेव ब्रह्माऽऽनन्दमय आत्माऽवयवी, तदेव च ब्रह्म पुच्छं प्रतिष्ठाऽवयव इत्यसामञ्जस्यं स्यात्। अन्यतरपरिग्रहे तु युक्तं 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यत्रैव ब्रह्मनिर्देश आश्रयितुम्, ब्रह्मशब्दसंयोगात्; नानन्दमयवाक्ये, ब्रह्मशब्दसंयोगाभावादिति। अपि च 'ब्रह्म पुच्छं प्रतिष्ठा' इत्युक्त्वेदमुच्यते— 'तदप्येष श्लोको भवति। असन्नेव स भवति। असद् ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुः' (तै.उ. २।६) इति। अस्मिंश्च श्लोकेऽननुकृष्यानन्दमयं ब्रह्मण एव भावाभाववेदनयोर्गुणदोषाभिधानाद् गम्यते 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यत्र ब्रह्मण एव स्वप्रधानत्वमिति। न चानन्दमयस्यात्मनो भावाभावशङ्का युक्ता, प्रियमोदादिविशेषणंस्यानन्दमयस्य सर्वलोकप्रसिद्धत्वात्।

प्रकटार्थविवरणम्

स्वप्रधानब्रह्मवाचकत्वमित्याह— **नन्वानन्दमयस्येति**। परिहरति— **प्रकृतत्वादिति**। स्वप्रधानस्य ब्रह्मणः प्रकृतत्वाद् ब्रह्मशब्दात् तथैव प्रत्यभिज्ञायमानस्य पुच्छशब्दविरोधे सति एकस्मिन् वाक्ये प्रथमचरमश्रुतयोश्शब्दयोः प्रथमश्रुतस्यासंजातविरोधित्वेन [२]बलीयस्त्वात् पुच्छत्वेनोपसर्जनत्वबाधया प्रधानप्रमितिपरता कल्प्यत इति भावः। प्रकृतत्वमात्रमन्यथाऽपि संभवतीत्याह— **नन्विति**। तर्ह्येकस्यैव गुणत्वप्रधानत्वप्रसङ्ग इत्याह— **अत्रोच्यत इति**।

यदत्रोवाच **केशवः**— "न शब्देनेह पारमार्थिकोऽवयवावयविभावः। किन्तु कल्पनामात्रम्। तत्र सुखविशिष्टं ब्रह्मानन्दमयपदार्थः। तमेकं विग्रहं कृत्वा तदन्तर्गतं स्वरूपमवयवं कल्पयति" इति; तदपि मन्दम्। विशिष्टस्य कल्पितत्वोक्तेः आनन्दमयस्य मिथ्यात्वापातात्। न च भाष्यकारोऽप्यवयवावयविभावं तात्त्विकमवोचत्, येनायमुपालम्भो भवतीति।

तत्र गुणप्रधानभावविरोधपरिहारायान्यतरस्मिन् वाक्ये ब्रह्मप्रतिपादने वक्तव्ये किं युक्तमित्याशङ्क्याह— **अन्यतरेति**। निगमनश्लोकपर्यालोचनयाऽपि ब्रह्मैव स्वप्रधानं प्रतिपाद्यमित्याह— **अपि चेति**। ननु तत्र ब्रह्मशब्देनानन्दमय एवोच्यत इत्याशङ्क्याह— **न चानन्दमयस्येति**।

भाष्यभावप्रकाशिका

ननु आस्तां तर्हि, प्रकृतं ब्रह्म 'ब्रह्म पुच्छं प्रतिष्ठा' 'आनन्दमय' इति चोभयत्रोच्यते वाऽन्यतरत्रेति विकल्प्याद्ये दूषणमाह— **तथा सतीति**। स्वस्यैव स्वावयवत्वायोगादिति भावः। अथ द्वितीयः, तत्राह—**अन्यतरेति**। अन्यतरस्य ब्रह्मत्वम्, न तूभयोरिति परिग्रह इत्यर्थः। वाक्यशेषेऽपि प्रकृतस्य ब्रह्मशब्देनैव परामर्शात् पुच्छवाक्य एव स्वप्रधानं ब्रह्म निर्दिश्यत इत्याह—**अपि चेति**। ब्रह्मणः सदसत्त्वशङ्कास्पदत्वकीर्तनादानन्दमयस्य च तदयोग्यत्वान्न तद्ब्रह्मत्वमित्याह—**न चेति**। पुच्छवदित्यस्यायमर्थः—

न्यायनिर्णयः

पुच्छश्रुतेरवयवार्थत्वे फलितमाह— **तत्रेति**। स्वप्रधानब्रह्माधिकाराद् ब्रह्मशब्दात् तथैव तत्प्रत्यभिज्ञाने पुच्छशब्दविरोधे सत्येकस्मिन् वाक्ये प्रथमचरमश्रुतशब्दयोराद्यस्यानुपसंजातविरोधिनो बलीयस्त्वात् पुच्छत्वेन गुणत्वबाधया स्वप्रधानब्रह्मधीरित्याह— **प्रकृतत्वादिति**। अन्यथाऽपि प्रकृतत्वं स्यादत्याह— **नन्विति**। किं प्रकृतं ब्रह्मानन्दमयवाक्ये पुच्छवाक्ये चोच्यते, किंवैकत्रेति विकल्पयति— **अत्रेति**। प्रथमं प्रत्याह— **तथेति**। अवयवावयवित्वस्य कल्पितत्वेऽप्यन्नमयादिष्विवैकत्र गुणप्रधानत्वायोगात्। यदि द्वितीयः, तत्राह— **अन्यतरेति**। अन्यतरस्मिन् वाक्ये ब्रह्मोक्तिस्वीकारे सतीत्यर्थः। वाक्यशेषादपि पुच्छवाक्य एवोच्यते स्वप्रधानं ब्रह्मेत्याह— **अपि चेति**। श्लोकस्यानन्दमयार्थत्वमाशङ्क्य तात्पर्यमाह— **अस्मिंश्चेति**। प्रतिष्ठेत्यत्रैवेति संबन्धः। आनन्दमयस्यैव ब्रह्मणो भावाभावधियोर्गुणदोषोक्तिरित्याशङ्क्याह— **न चेति**।

---

१. 'विशेषस्य' 'विशिष्टस्य' पा.। २. उपक्रमाधिकरणन्यायसूचनमिदम्। द्र.पू.मी. ३.३.१।

कथं पुनः स्वप्रधानं सद् ब्रह्म, आनन्दमयस्य पुच्छत्वेन निर्दिश्यते– 'ब्रह्म पुच्छं प्रतिष्ठा' इति। नैष दोषः। पुच्छवत् पुच्छं, प्रतिष्ठा परायणमेकनीडं लौकिकस्यानन्दजातस्य ब्रह्मानन्द इत्येतदनेन विवक्ष्यते, नावयवत्वम्, 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ.उ. ४।३।३२) इति श्रुत्यन्तरात्। अपि च आनन्दमयस्य ब्रह्मत्वे प्रियाद्यवयवत्वेन सविशेषं ब्रह्माभ्युपगन्तव्यम्। निर्विशेषं तु ब्रह्म वाक्यशेषे श्रूयते, वाङ्मनसयोरगोचरत्वाभिधानात्– 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चन' इति (तै. २।९)। अपि च आनन्दप्रचुर इत्युक्ते दुःखास्तित्वमपि गम्यते प्राचुर्यस्य लोके प्रतियोग्यल्पत्वापेक्षत्वात्। तथा च सति, 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' (छा.उ. ७।२४।१) इति भूम्नि ब्रह्मणि तद्व्यतिरिक्ताभावश्रुतिरुपरुध्येत। प्रतिशरीरं च प्रियादिभेदादानन्द-

प्रकटार्थविवरणम्

किं तर्हि पुच्छशब्देन विवक्षितमित्यभिप्रेत्याह— **कथं पुनरिति**। प्रतिष्ठाशब्द-सामानाधिकरण्यादाधारत्वं विविक्षितमित्याह— **नैष दोष इति**।

ननु वृत्तिकारैरपि तैत्तिरीयकवाक्यं ब्रह्मण्येव समन्वितमङ्गीक्रियते। तत्र किमुदाहरणान्तरम्[१]..... "दृश्यते त्वग्र्यया बुद्ध्या" इत्यादिकमप्यपास्तम्, सविशेषस्य मिथ्यात्वोक्तेः। किं च अशुद्धयोर्वाङ्मनसयोरगोचरो ब्रह्मेति प्रतिपादनेऽप्राप्तप्रतिषेधः स्यात्, "अदृश्येऽनात्म्ये" इति प्रागेव प्रतिषेधाद् दृश्यतायाः। किं तु यत् सविशेषं तद् वाङ्मनसगोचरमिति व्याप्तेः व्यापकाभावाभिधानेन [२]व्याप्याभावे पर्यवस्यति। नापि श्रुत्यन्तरबलेन सविशेषत्वम्। तद्धि निदिध्यासनाद्यापन्नैकाग्रचित्तसहकारिणा निर्विशेषब्रह्मात्मैकत्वपरेण शब्देन जनितायां बुद्धौ स्वप्रकाशत्वात् स्वयं प्रतिबिम्बितं निर्विशेषमेव भातीत्येवंपरम्, न तस्य दृश्यतायां सविशेषतायां पर्यवस्यति, प्रधानविरोधात्। अतो निर्विशेषब्रह्मात्मैकत्वप्रमितये पुच्छवाक्यमुदाजहार भगवान् भाष्यकारः। इदानीं मयटः प्राचुर्यार्थत्वे दूषणान्तरमाह— **अपि चेत्यादिना**।

भाष्यभावप्रकाशिका

प्रथमश्रुतब्रह्मशब्दानुसारेण चरमश्रुतपुच्छशब्दो नेतव्य इति। **अपि चानन्दप्रचुर इतीति**। स्वप्रकृत्यर्थप्रतियोग्यल्पतां तत्रैवानपेक्ष्य स्थानान्तरगततत्सजातीयाल्पत्वापेक्षामात्रेण मयटः[टोऽ]प्रयोगादिति भावः। किञ्च प्रतिशरीरमुपचयापचयवत्तया विभिन्नादा-

न्यायनिर्णयः

पुच्छवाक्ये ब्रह्मशब्देन स्वप्रधानोक्तौ पुच्छशब्दस्य का गतिरिति पृच्छति— **कथमिति**। तस्य ब्रह्मणि वृत्तिमात्रं वाऽन्विष्यते, किं मुख्या वा वृत्तिः। आद्ये, पूर्वोक्तपृथिव्यादिपुच्छेष्वाधारत्वदृष्ट्या ब्रह्मण्यपि सर्वाधारे लक्षणया पुच्छपदमित्याह— **नेति**। न द्वितीयः, प्रतिष्ठाशब्दविरोधादित्याह— **प्रतिष्ठेति**। पुच्छत्वेऽपि परायणत्वं वारयति— **एकेति**। नीडत्वमाश्रितापेक्षं, तदाह— **लौकिकस्येति**। पूर्वस्योत्तरेण निर्णयान्नावयवार्थतेति फलितमाह— **अनेनेति**। उक्तेऽर्थे बृहदारण्यकं संवादयति— **एतस्येति**। ननु वृत्तिकारैरपि तैत्तिरीयकवाक्यं ब्रह्मण्येव समन्वितमिष्टं, तत्र किमुदाहरणभेदेनेत्याशङ्क्याह— **अपि चेति**। नन्विह सविशेषमेव ब्रह्मेष्टं, वाक्यशेषे रागादिमतोर्वाङ्मनसयोरगोचरो [३]ब्रह्म, शुद्धधियोस्तु गोचर इत्यभ्युपगमादित्याशङ्क्य सविशेषस्य मृषात्वादप्राप्तनिषेधापाताच्च मैवमित्याह– **निर्विशेषं त्विति**। अतोऽभीष्टनिर्विशेषब्रह्मसिद्धये पुच्छवाक्यमेवोदाहर्तव्यमिति भावः। मयटो विकारार्थत्वोक्त्या प्राचुर्यार्थत्वं निरस्यता पुच्छवाक्ये स्वप्रधानब्रह्मोक्तिरुक्ता। सम्प्रति प्राचुर्यार्थत्वे दोषान्तरमाह— **अपि चेति**। स्वप्रकृत्यर्थप्रतियोग्यल्पतामत्रैवानपेक्ष्य स्थानान्तरस्थतत्सजातीयाल्पत्वापेक्षामात्रेण मयटोऽप्रयोगादित्यर्थः। अतिमधुरे रुच्यर्थं रसान्तरानुवेधवदानन्दे प्रीत्युत्कर्षार्थमीषद्दुःखानुषक्तिरिष्टेत्याशङ्क्याह— **तथा चेति**। प्राचुर्यार्थताऽभावान्मयटो नानन्दमयो ब्रह्मेत्यत्रैव हेत्वन्तरमाह— **प्रतिशरीरं चेति**। प्रतिदेहं सातिशयत्वेन भिन्नादानन्दमयाद् ब्रह्म सर्वानुगतमन्यदेवेत्यर्थः। यत्त्वभ्यासात्

१. अत्र त्रुटितो ग्रन्थभागः कदा चिदेवं स्यात्— "किमुदाहरणान्तरेणेत्यत आह— अपि चेति। सविशेषमिति। ततश्च दृश्यत्वेन मिथ्यात्वापत्तिरित्यर्थः। एतेन यदुक्तम्— "यतो वाचो निवर्तन्ते" इति रागादिदोषदूषितयोः वाङ्मनसयोरगोचरं ब्रह्मेत्यर्थः। शुद्धयोस्तु पुनर्गोचर एव। तथा च श्रुत्यन्तरम्"—[द्र. ब्रह्मसूत्रभास्करभाष्यम्, पृ. २८] २. व्याप्याभावे=निर्विशेषत्वे। ३. 'शुद्धयोः' इति पाठः स्यात्

मयस्यापि भिन्नत्वम्। ब्रह्म तु न प्रतिशरीरं भिद्यते, 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २।१) इत्यानन्त्यश्रुतेः, 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा' (श्वे.उ. ६।११) इति च श्रुत्यन्तरात्। न चानन्दमयस्याभ्यासः श्रूयते। प्रातिपदिकार्थमात्रमेव हि सर्वत्राभ्यस्यते– 'रसो वै सः, रस ँ ह्येवायं लब्ध्वाऽऽनन्दी भवति, को ह्येवान्यात्कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्' 'सैषाऽऽनन्दस्य मीमांसा भवति'। 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति' (तै.उ. २।७,८,९) 'आनन्दो ब्रह्मेति व्यजानात्' (तै.उ. ३।६) इति च। यदि च आनन्दमयशब्दस्य ब्रह्मविषयत्वं निश्चितं भवेत्, तत उत्तरेष्वानन्दमात्रप्रयोगेष्वप्यानन्दमयाभ्यासः कल्प्येत। न त्वानन्दमयस्य ब्रह्मत्वमस्ति, प्रियशिरस्त्वादिभिर्हेतुभिरित्यवोचाम। तस्माच्छ्रुत्यन्तरे 'विज्ञानमानन्दं ब्रह्म' (बृ.उ. ३।९।२८) इत्यानन्दप्रातिपदिकस्य ब्रह्मणि प्रयोगदर्शनात्, 'यदेष आकाश आनन्दो न स्यात्' इत्यादिर्ब्रह्मविषयः प्रयोगो, न त्वानन्दमयाभ्यास

प्रकटार्थविवरणम्

यदत्र वल्गितम्— यथा 'प्रचुरप्रकाशः सविता' इति निकृष्टव्यावृत्तये प्रयुज्यते, न तु तत्र तमसोऽप्यल्पताभिप्रायेण; तथा संसारव्यावृत्तये ब्रह्माप्यानन्दप्रचुरमिति व्यपदिश्यते; अतो न दुःखाल्पतास्तित्वम् इति; तदसत्। आनन्देन प्राचुर्यस्य प्रत्ययार्थस्य विशेषितत्वात्।[1] येन च प्राचुर्यं विशेष्यते तत्प्रतियोगिनोऽल्पता प्रसिद्धा। यथा 'ब्राह्मणप्रचुरोऽयं ग्रामः' इत्युक्ते शूद्रस्याप्यल्पता गम्यते; सवितरि तु विपरीतं प्राचुर्यस्यैव प्रकाशविशेषणत्वात्। नेह प्राचुर्यमानन्दविशेषणं प्रत्ययार्थस्यैव प्राधान्यात् इति।

आनन्दमयस्य ब्रह्मत्वाभावे हेत्वन्तरमाह— **प्रतिशरीरं चेति**। अभ्यासादिति हेतुरप्यसिद्ध इत्याह— **न चेति**। नन्वानन्दमयं प्रकृत्य प्रातिपदिकाभ्यासोऽपि प्रकृतविषय एवेत्याशङ्क्याह— **यदि चेति**। आनन्दमयस्य ब्रह्मत्वे सिद्धे प्रातिपदिकमात्राभ्यासोऽपि प्रकृतानन्दमयविषयः सिध्यति, [2]ततश्च ब्रह्मतासिद्धिः इतीतरेतराश्रयमिति भावः। किंविषयस्तर्ह्यभ्यास इत्याशङ्क्य

भाष्यभावप्रकाशिका

नन्दमयात् सर्वानुगतं ब्रह्मान्यदेवेत्याह—**प्रतिशरीरं चेति**।

किञ्चाभ्यासोऽप्यसिद्धः। तथाहि—ब्रह्मणि प्रयुक्तपूर्वस्यानन्दशब्दस्याभ्यासः, किं वाऽऽनन्दमयशब्दस्य? न तावदुत्तर इत्याह—**न चानन्दमयस्याभ्यास इति**। अथानन्दमयं प्रस्तुत्य ब्रह्मणि प्रयुक्तपूर्वस्यानन्दशब्दस्याभ्यासात् तस्य ब्रह्मत्वमिति, तत्राह—**यदि चेति**। आनन्दशब्दाभ्यासस्य प्रस्तुतपुच्छब्रह्मविषयत्वोपपत्तेरिति भावः। ब्रह्मविषयत्वमप्यानन्दशब्दस्य कथमिति? तदाह—**तस्मादिति**। उपसङ्क्रमशब्देन प्राप्तिरभिधीयते, किं वाऽतिक्रमणम्? प्राप्तिश्चेत्, पुच्छब्रह्मप्राप्तिरर्थान्निर्दिष्टा भवति;

न्यायनिर्णयः

'आनन्दमयो ब्रह्म' इति, तत्र किमानन्दमयशब्दस्याभ्यासः किंवाऽऽनन्दशब्दस्येति विकल्प्याद्येऽसिद्धिमाह— **न चेति**। आनन्दमयं प्रकृत्य ब्रह्मणि प्रयुक्तपूर्वानन्दशब्दस्याभ्यासो हेतुरिति द्वितीयं निरस्यति— **यदि चेति**। आनन्दमयस्य ब्रह्मत्वे प्रातिपदिकमात्राभ्यासोऽपि प्रकृतानन्दमयार्थः, ततस्तस्य ब्रह्मताधीरित्यन्योन्याश्रयतेति भावः। आनन्दपदाभ्यासस्तर्हि किंविषयः? पुच्छवाक्योक्तब्रह्मविषयः इत्याह— **तस्मादिति**। आनन्दाभ्यासस्यानन्दमयार्थत्वायोगस्तच्छब्दार्थः। मयडन्तस्याप्यभ्यासात् कथं

---

१. प्राचुर्यस्य विशेष्यत्वे स्वसमानाधिकरणविजातीयाल्पतानिरूपकत्वस्य व्युत्पत्तिसिद्धत्वात्, क्वचिद् व्यधिकरण सजातीयाल्पत्वमपेक्ष्य मयटः प्रयोगोपलम्भेऽपि प्रकृते प्राणमयादौ समानाधिकरणविजातीयाल्पत्वापेक्षयैव तत्प्रयोगस्य स्वीकार्यतयाऽऽनन्दमयेऽपि तथात्वस्य स्वीकर्तुमुचितत्वात्। अधिकं परिमल-न्यायरक्षामण्यादौ द्रष्टव्यम्।

२. ततश्च = अभ्यासस्याऽऽनन्दमयविषयत्वसिद्धौ च।

इत्यवगन्तव्यम्। यस्त्वयं मयडन्तस्यैवानन्दशब्दस्याभ्यासः- 'एतमानन्दमयमात्मानमुपसंक्रामति' (तै.उ. २।८) इति न तस्य ब्रह्मविषयत्वमस्ति, विकारात्मनामेवान्नमयादीनामनात्मनामुपसंक्रमितव्यानां प्रवाहे पठितत्वात्।

नन्वानन्दमयस्योपसंक्रमितव्यस्यान्नमयादिवदब्रह्मत्वे सति नैव विदुषो ब्रह्मप्राप्तिफलं निर्दिष्टं भवेत्? नैष दोषः। आनन्दमयोपसंक्रमणनिर्देशेनैव पुच्छप्रतिष्ठाभूतब्रह्मप्राप्तेः फलस्य निर्दिष्टत्वात्। 'तदप्येष श्लोको भवति। यतो वाचो निवर्तन्ते' इत्यादिना च प्रपञ्च्यमानत्वात्। या त्वानन्दमयसंनिधाने 'सोऽकामयत, बहु स्यां प्रजायेये'तीयं श्रुतिरुदाहृता, सा 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यनेन संनिहिततरेण ब्रह्मणा संबध्यमाना नानन्दमयस्य ब्रह्मतां प्रतिबोधयति। तदपेक्षत्वाच्चोत्तरस्य ग्रन्थस्य 'रसो वै सः' इत्यादेर्नानन्दमयविषयता। ननु 'सोऽकामयत' इति ब्रह्मणि पुंलिङ्गनिर्देशो नोपपद्यते? नायं दोषः। 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इत्यत्र पुंलिङ्गेनाप्यात्मशब्देन ब्रह्मणः प्रकृतत्वात्। या तु भार्गवी वारुणी विद्या 'आनन्दो ब्रह्मेति व्यजानात्' इति, तस्यां मयडश्रवणात्, प्रियशिरस्त्वाद्यश्रवणाच्च युक्तमानन्दस्य

प्रकटार्थविवरणम्

पुच्छवाक्योक्तब्रह्मविषय इत्याह— **तस्मादिति**। ननु मयडन्तस्याप्यानन्दशब्दस्याभ्यासो दर्शित इत्याशङ्क्याह— **यस्त्वयमिति**। **उपसंक्रमितव्यानामिति**। विवेकेन त्याज्यानामित्यर्थः। विदुषः फलावाप्तयेऽयमुपक्रमः "एतमानन्दमयमात्मानमुपसंक्रामति" इत्यादिः। सा तर्हि नोक्तेत्याह— **नन्विति**। उत्तरोत्तरपरिग्रहेणेह पूर्वपूर्वपरित्यागस्य संक्रमणस्य विवक्षितत्वादानन्दमयपरित्यागाभिधानेन पुच्छप्रतिष्ठाभूतब्रह्मप्राप्तिरर्थादुक्तैवेत्याह— **नैष दोष इति**। मन्त्रेण प्रपञ्च्यमानत्वाच्च न ब्रह्मप्राप्तिरनुक्तैवेत्याह— **तदप्येष इति**। यानि च वाक्यान्यानन्दमयस्य ब्रह्मतासमर्पकतयोदाहृतानि तानि पुच्छवाक्योक्तब्रह्मपराणि इत्याह— **या त्वित्यादिना**। यच्चावादि आनन्दमयनिष्ठैव भार्गवी विद्येति; तत्राह— **या तु भार्गवीति**। पञ्चमपर्यायस्थत्वमप्रयोजकं केवलानन्दप्रातिपदिकार्थत्वमेव प्रयोजकमिति भावः। वृत्तिकारमतापाकरणमुपसंहरति— **तस्मादिति**। [1]तैत्तिरीयके नानन्दमयो ब्रह्म

भाव्यभावप्रकाशिका

अवयविप्राप्तावववयवप्राप्तेः; अथातिक्रमणम्, तथापि ब्रह्मप्राप्तिः सिध्यतीति, नद्यतिक्रमणस्य परकूलप्राप्तित्वमिव (वत्) कोशातिक्रमणस्य ब्रह्मप्राप्तिरूपत्वादित्याह—**आनन्दमयोपसंक्रमणेति**।

ननु उत्तरवल्ल्यां पञ्चमपर्यायस्य [ब्रह्मविषयत्वादिहापि] तद्विषयता युक्तेति, तत्राह—**या तु भार्गवीति**।

न्यायनिर्णयः

तदभ्यासासिद्धिः, तत्राह— **यस्त्वति**। **उपसंक्रमितव्यानां** विवेकेन त्याज्यानामित्यर्थः।

अन्नमयादावुपसंक्रमस्य विद्वत्फलाप्त्यर्थत्वादानन्दमयस्याब्रह्मत्वे ब्रह्माप्तेरनुक्तेः प्रक्रमभङ्ग इति शङ्कते— **नन्विति**। किमिहोपसंक्रमणं प्राप्तिः, अतिक्रमो वा। आद्ये, अवयविप्राप्त्याऽवयवप्राप्तेरार्थिकत्वात् पुच्छब्रह्माप्तिरुक्तैव। द्वितीये, न ह्यतिक्रमस्य [नद्यतिक्रमस्य] परतीराप्तित्ववत् कोशातिक्रमस्य ब्रह्माप्तित्वात् तत्राप्तिरर्थादुक्तेत्याह— **नैष इति**। ब्रह्माप्तेर्मन्त्रेण वक्ष्यमाणत्वाच्च तदनुक्तिरसिद्धेत्याह— **तदपीति**। यत्तु 'सोऽकामयत' इत्याद्यानन्दमयार्थं सत् तद्ब्रह्मत्वबोधीति, तत्राह— **या त्विति**। 'रसो वै सः' इत्यादेरुत्तरस्यानन्दमयार्थत्वमुक्तं प्रत्याह— **तदपेक्षत्वादिति**। 'सोऽकामयत' इत्यादि ब्रह्मण्ययुक्तं, नपुंसके पुंलिङ्गायोगादिति शङ्कते— **नन्विति**। प्रक्रमेण समाधत्ते— **नायमिति**। यत्तु भृगुवल्ल्यां पञ्चमपर्यायस्य ब्रह्मार्थत्वादिहापि तादर्थ्यं स्थानादिति, तत्राह— **या त्विति**। इह मयटो विकारार्थस्य प्रियशिरस्त्वादेश्च श्रुतेरानन्दमयस्याब्रह्मतेति शेषः। ब्रह्मणो निर्विशेषस्य

---

१. १५४ पृष्ठे उक्तस्यानुमानस्य प्रत्यनुमानमिदम्।

ब्रह्मत्वम्। तस्मादणुमात्रमपि विशेषमनाश्रित्य न स्वत एव प्रियशिरस्त्वादि ब्रह्मण उपपद्यते। न चेह सविशेषं ब्रह्म प्रतिपिपादयिषितं, वाङ्मनसगोचरातिक्रमश्रुतेः। तस्मादन्नमयादिष्विवानन्दमयेऽपि विकारार्थ एव मयड् विज्ञेयो, न प्राचुर्यार्थः।

सूत्राणि त्वेवं व्याख्येयानि– 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यत्र किमानन्दमयावयवत्वेन ब्रह्म विवक्ष्यत उत स्वप्रधानत्वेनेति। पुच्छशब्दादवयवत्वेनेति प्राप्त उच्यते– 'आनन्दमयोऽभ्यासात्'। आनन्दमय आत्मेत्यत्र 'ब्रह्म पुच्छं प्रतिष्ठा' इति स्वप्रधानमेव ब्रह्मोपदिश्यते, अभ्यासात्। 'असन्नेव स भवति' इत्यस्मिन् निगमनश्लोके ब्रह्मण एव केवलस्याभ्यस्यमानत्वात्। 'विकारशब्दान्नेति चेन्न प्राचुर्यात्'। विकार-शब्दोऽवयवशब्दोऽभिप्रेतः। पुच्छमित्यवयवशब्दान्न स्वप्रधानत्वं ब्रह्मण इति यदुक्तं, तस्य परिहारो वक्तव्यः। अत्रोच्यते– नायं दोषः, प्राचुर्यादप्यवयवशब्दोपपत्तेः। प्राचुर्यं प्रायापत्तिः, अवयवप्राये

प्रकटार्थविवरणम्

तद्गतमयडन्तवाच्यत्वात् नारायणोपनिषद्गतानन्दमयवदिति प्रयोगः। तत्र च "अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुध्यन्ताम्" इति शुद्धिप्रार्थनादब्रह्मत्वं सिद्धम्। न चात्यन्तमनुमानानपेक्षा, तद्व्यतिरेकेण संशयानपोहात्। न च गुणगुणिभावे प्रमाणमिति वर्णयिष्यामः।

एवं तावत् परमतं निराकृत्य स्वमतानुसारेण सूत्राणि योजयितुमुपक्रमते— **सूत्राणि त्वेवमिति।** पूर्वत्र ईक्षत्यादेः मुख्यत्वबलेन चेतने समन्वयं न्यरुरूपत्। तेनैव न्यायेन पुच्छशब्दस्यापि अवयवे मुख्यत्वात् आनन्दमयस्य प्रतिपाद्यस्योपसर्जनं ब्रह्मेति पूर्वः पक्षः। अभ्यासलक्षणतात्पर्यलिङ्गावगमात्, अप्रधानस्य श्लोकेन निगमनानुपपत्तेश्चासञ्जातविरोधितया प्रथमश्रुतस्य

भाष्यभावप्रकाशिका

सूत्राणि त्विति। वेदसूत्रयोर्विरोधे गुणे त्वन्याय्यकल्पनेति न्यायादिति भावः। आनन्दमयशब्देन तद्वाक्यस्थ "ब्रह्म पुच्छं प्रतिष्ठे"त्येतद्गतं ब्रह्मपदमुपलक्ष्यते। तत् स्वप्रधानमेवेति निर्णीयत इत्याह—**ब्रह्म पुच्छमिति।**

अवयवप्राये वचनमिति। अयमर्थः— ब्रह्माधिकरणमिति वक्तव्येऽपि पूर्वमवयवप्रधानप्रयोगात् तत्प्रयोगस्य बुद्धिस्थत्वात्

न्यायनिर्णयः

नानन्दमयतेत्युपसंहरति— **तस्मादिति।** इष्टदृष्टेः, तल्लाभात्, तत्स्मृतेश्चाभिव्यक्ताः सुखविशेषाः तन्मात्रं च प्रियादिशब्दार्थ इत्युक्तम्। सत्त्वोपसर्जनात्तमसस्तदुपसर्जनाद् रजसो द्वयोरुपसर्जनात्सत्त्वात्केवलाच्चाभिव्यक्तं सुखं तत्तच्छब्दवाच्यमित्याचार्याः। तेन विषयसंबन्धं सत्त्वादिसंबन्धं वा विशेषमीषन्मात्रमप्यनाश्रित्य ब्रह्मणः स्वतो न प्रियशिरस्त्वादि युक्तम्। तस्मादानन्दमयस्य सविशेषत्वात् प्रतिपाद्याद् ब्रह्मणोऽन्यतेत्यर्थः। इहापि सविशेषमेव प्रतिपाद्यमित्याशङ्क्योक्तं स्मारयति— **न चेति।** परमतनिरासमुपसंहरति— **तस्मादिति।**

स्वमते सूत्राणामननुगुणत्वमाशङ्क्य तानि योजयितुमुपक्रमते— **सूत्राणीति।** व्याख्यामेवाख्यातुं विषयमुक्त्वा पुच्छब्रह्मशब्दाभ्यां संशयमाह— **ब्रह्मेति। स्वप्रधानत्वेनेति।** संशये सतीति शेषः। पूर्वाधिकरणे मुख्येक्षणाद् ब्रह्मनिर्णये गौण-प्रायपाठो बाधितः। इह त्वाधारमात्रत्वेऽवयवमात्रत्वे च पुच्छशब्दस्य लाक्षणिकत्वसाम्येऽवयवप्रायदृष्टेरवयवार्थतेति संगत्या पूर्वपक्षयति— **पुच्छेति।** तैत्तिरीयोपनिषदः स्पष्टब्रह्मलिङ्गाया निर्गुणब्रह्मान्वयोक्तेः श्रुत्यादिसंगतयः। परपक्षे पूर्वोत्तरपक्षयो-रुपास्तिरेव फलम्। इह पूर्वपक्षे तथा, सिद्धान्ते प्रमितिः। पूर्वपक्षमनूद्य सिद्धान्तयति— **इति प्राप्त इति।** स्वयूथ्यव्याख्यां व्यावृत्य स्वाभिमतां व्याख्यामाह— **आनन्दमय इति।** आनन्दमयशब्देन पञ्चमपर्यायस्थपुच्छवाक्यस्थं ब्रह्मपदमुपलक्ष्य तेन स्वप्रधानमेव ब्रह्मोच्यत इति प्रतिज्ञायां हेतुं व्याख्याति— **असन्नेवेति।** पूर्वपक्षबीजमनुभाष्य दूषयति— **विकारेति।** वाचकत्वाभावादभिप्रेत इत्युक्तम्। परिहारभागमवतार्य व्याकरोति— **अत्रेत्यादिना।** ब्रह्माधिकरणमिति वाच्ये पूर्वत्रावयवप्रधानप्रयोगात् तस्य बुद्धिस्थ-

वचनमित्यर्थः। अन्नमयादीनां हि शिरआदिषु पुच्छान्तेष्ववयवेषूक्तेष्वानन्दमयस्यापि शिरआदीन्यवयवान्तराण्युक्त्वाऽवयवप्रायापत्त्या 'ब्रह्म पुच्छं प्रतिष्ठा' इत्याह, नावयवविवक्षया। यत्कारणम् अभ्यासादिति स्वप्रधानत्वं ब्रह्मणः समर्थितम्। 'तद्धेतुव्यपदेशाच्च'। सर्वस्य विकारजातस्य सानन्दमयस्य कारणत्वेन ब्रह्म व्यपदिश्यते– 'इदꣳ सर्वमसृजत। यदिदं किंच' (तै.उ. २।६) इति। न च कारणं सद् ब्रह्म स्वविकारस्यानन्दमयस्य मुख्यया वृत्त्याऽवयव उपपद्यते। अपराण्यपि सूत्राणि यथासंभवं पुच्छवाक्यनिर्दिष्टस्यैव ब्रह्मण उपपादकानि द्रष्टव्यानि।।१९।।

।।इति षष्ठमानन्दमयाधिकरणम्।।

प्रकटार्थविवरणम्

बलीयस्त्वाच्च प्रधाने ब्रह्मणि समन्वय इति सिद्धान्तः। न च नैवं सूत्रार्थ इति राज्ञामाज्ञा व्यज्ञायि वेदाज्ञा वा। न चान्यैरनुक्तत्वान्नायं सूत्रार्थ इति वाच्यम्; अन्योक्तस्याप्यास्माकीनैरनुक्तत्वादसूत्रार्थत्वप्रसङ्गात्; तस्मान्न्यायसहिष्णोरेवागमार्थस्य सूचकत्वात् सूत्राणाम्, अन्यथा विचारानारम्भप्रसङ्गात् अध्याहारेणापि व्याख्यानं समञ्जसम्[1]। **पराण्यपीति**। अस्यायमर्थः:— इतश्च नानन्दमयो वाक्यार्थः। [**''मान्त्रवर्णिकमेव च गीयते''**] यतो यन्मन्त्रवर्णेनोक्तं ब्रह्म तदानन्दमयशब्देन विशिष्टपरामर्शे[र्शके]न लक्ष्यमाणजीवचैतन्यस्य

भाष्यभावप्रकाशिका

तेनापि चाधिकरणलक्षणोपपत्तेः पुच्छमिति निर्देश इति। कुत एतदिति, तदाह—**यत्कारणमिति। अपराण्यपि सूत्राणीति।**

मान्त्रवर्णिकमिति। ''सत्यं ज्ञानमनन्त''मिति प्रकृतं ब्रह्मैव ''ब्रह्म पुच्छ''मिति स्वप्रधानं गीयत इति।। **नेतर इति।** ''इतश्चानन्दमय'' इति भाष्यस्य स्थाने इतश्च ब्रह्म पुच्छं प्रतिष्ठेति पठितव्यम्। **भेदव्यपदेशाच्चेति।** इतश्चानन्दमय इत्यस्यानन्दमयाधिकार इत्यस्य च भाष्यस्य स्थाने ब्रह्म पुच्छं प्रतिष्ठेति च ब्रह्मपुच्छाधिकार इति च पठितव्यम्। उत्तरसूत्रयोरपि तथा द्रष्टव्यम्।।१९।। इति षष्ठमानन्दमयाधिकरणम्।।

न्यायनिर्णयः

त्वात्तेनाप्यधिकरणलक्षणात् पुच्छोक्तिरिति तात्पर्यमाह— **अवयवेति।** तदेव प्रपञ्चयति— **अन्नेति।** तत्र गमकमाह— **यदिति।** इतश्च पुच्छवाक्ये पुच्छशब्देनावयवो नोच्यते, किंत्वाधारो लक्ष्यत इत्याह— **तद्धेत्विति।** तद् व्याचष्टे— **सर्वस्येति।** तथापि कस्मादानन्दमयावयवत्वं ब्रह्मणो नेष्यते, तत्राह— **न चेति।** इतश्च नानन्दमयः परमात्मा, यतः 'सत्यम्' इत्यादिमन्त्रवर्णेन यद् ब्रह्मोक्तम्, तदेवानन्दमयशब्देन विशिष्टद्वारा लक्ष्यमाणजीवचैतन्यस्य स्वरूपमिति पुच्छवाक्येन 'तत्त्वमसि' इतिवद् गीयते, 'ब्रह्मविदाप्नोति' इति ब्रह्मविदस्तत्प्राप्त्यभिधानेन ब्रह्मात्मनोरैक्योपक्रमात्। 'स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः' इत्यैक्योपसंहारात्। मध्येऽपि विशिष्टद्वारा स्वरूपैक्ये तात्पर्यस्य युक्तत्वादित्याह— **मान्त्रवर्णिकमिति।** इतश्च पुच्छवाक्यस्थं ब्रह्मैव स्वप्रधानं प्रतिपाद्यम्, इतरस्त्वानन्दमयो न प्रतिपाद्यः, वैषयिकप्रियादिमत्त्वेन तत्र मुख्यस्रष्टृत्वाद्यनुपपत्तेरित्याह— **नेतर इति।** इतश्च नानन्दमयोऽत्र प्रतिपाद्यते, ब्रह्मानन्दप्रतिबिम्बितं रसशब्दितं लब्ध्वाऽयमानन्दमयः स्वयमानन्दी भवतीति ब्रह्मणो भेदेन तस्योक्तेर्ब्रह्मत्वायोगादित्याह—**भेदेति।** ननु भृगुवल्ल्यामानन्दस्य ब्रह्मत्वादानन्दमयस्यापि ब्रह्मत्वं पञ्चमपर्यायस्थत्वादनुमीयते, तत्राह— **कामाच्चेति।** काम्यत इति काम आनन्दः, तस्य ब्रह्मत्वदृष्टेर्नानुमानेनानन्दमयस्यापि ब्रह्मत्वमपेक्षितव्यम्। विकारार्थमयड्विरोधादित्यर्थः। इतोऽपि नानन्दमयोऽत्र प्रतिपाद्यते, पुच्छवाक्योक्ते ब्रह्मणि प्रतिबुद्धस्यानन्दमयस्य 'यदा हि' इत्यादिना तत्प्राप्तिमोक्षाभिधानात्। तस्मादानन्दमयशब्दवाच्यस्याप्रतिपाद्यत्वात् तल्लक्ष्यस्य ब्रह्मणोऽव्यतिरेकात् पुच्छवाक्यस्थं ब्रह्मैवात्र स्वप्रधानं प्रतिपाद्यमिति तत्प्रमित्या कैवल्यं फलतीत्याह— **अस्मिन्निति।** तदेतदाह— **अपराण्यपीति।।११।।** इति षष्ठमानन्दमयाधिकरणम्।।

---

१. भामत्यां तु 'गुणे त्वन्याय्यकल्पना' इति न्यायेन श्रुत्यनुरोधेन सूत्राणां नेयत्वमुक्तम्। यथा च सूत्राणामपि भाष्यकारोक्त एवार्थे स्वारसिकत्वं तथा सुनिरूपितं न्यायरक्षामण्यादौ।

७।।अन्तस्तद्धर्माधिकरणम्।।सू. २०-२१।।

अन्तस्तद्धर्मोपदेशात्।।२०।।

इदमाम्नायते– 'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः' 'तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित

शारीरकन्यायसंग्रहः

अन्तस्तद्धर्मोपदेशात्।।२०।। भेदव्यपदेशाच्चान्यः।।२१।। अत्र प्रथमश्रुतादपि लिङ्गादविवक्षितात् चरमश्रुतमपि प्रयोजनवल्लिङ्गं बलीयः, तात्पर्याधीनत्वात् प्रामाण्यस्य—इति न्यायेन प्रयोजनवत्सर्वपाप्मोदयस्य ब्रह्माविनाभाविलिङ्गस्यानुसारेण सामान्यप्रवृत्तां कर्मनिमित्तशरीरग्रहणश्रुतिम् ईश्वरविषयेऽपबाध्य कर्माभावेऽपि रूपवत्त्वं ब्रह्मपरतया नीतम्।

प्रकटार्थविवरणम्

स्वरूपमिति गीयते "ब्रह्म पुच्छं प्रतिष्ठा" इत्यनेन "तत्त्वमसि" इतिवत्। कथमवगम्यते? "ब्रह्मविदाप्नोति परम्" इति ब्रह्मविदो ब्रह्मप्राप्त्यभिधानेन ब्रह्मात्मनोरैक्योपक्रमादन्यज्ञानादन्य-स्यान्यभावानुपपत्तेः। तथा 'स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः' इत्येकत्वोपसंहारात् मध्येऽपि विशिष्टपरामर्शेन स्वरूपैक्ये तात्पर्यमवसीयते।

[**"नेतरोऽनुपपत्तेः"**] इतश्च निर्विशेषब्रह्मात्मैक्यमेवात्र प्रतिपाद्यते, नेतर आनन्दमयः। कुतः? तस्मिन् सविशेषे प्रतिपाद्यमाने वाक्यशेषे "अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने" इति सकलविशेषप्रतिषेधपरामर्शानुपपत्तेः।

इतश्च निर्विशेषब्रह्मात्मैक्यपरमेव तैत्तिरीयकम्, **"भेदव्यपदेशाच्च"** इति। स्वल्पस्यापि भेदस्य निन्दाव्यपदेशात् "उदरमन्तरं कुरुते। अथ तस्य भयं भवति।" इति।

ननु भृगुवल्ल्यामानन्दस्य ब्रह्मत्वदर्शनादानन्दमयस्यापि ब्रह्मत्वमनुमीयत इत्याशङ्क्याह— **"कामाच्च नानुमानापेक्षा" इति**। काम्यत इति काम आनन्दः, तस्य ब्रह्मत्वदर्शनात्रानुमानेनानन्दमयस्यापि ब्रह्मत्ववाञ्छा कार्या विकारार्थमयड्विरोधादित्यर्थः।

ननु "आनन्दं ब्रह्मणो विद्वान्" इति भेदनिर्देशात् सविशेषं ब्रह्मावगम्यत इत्याशङ्क्याह— **"अस्मिन्नस्य च तद्योगं शास्ति"**। अस्मिन् प्रकरणवति प्रतिबुद्धस्यास्य जीवस्य मोक्षं शास्ति तच्छास्त्रम्; न च सविशेषज्ञानान्मिथ्यार्थावलम्बनान्मोक्ष उपपद्यते। तस्मात् 'राहोः शिरः' इतिवदौपचारिको भेदनिर्देश इति निर्विशेषब्रह्मात्मैकत्वपरमेव वाक्यमिति स्थितम्।।इति षष्ठमानन्दमयाधिकरणम्।।

अन्तस्तद्धर्मोपदेशात्। अस्य विषयवाक्यं छान्दोग्यगतं पठति— **इदमाम्नायत इति**। आदित्यमण्डलस्यान्तर्मध्ये हिरण्मय इति ज्योतिर्मयः पुरुषो दृश्यते समाहितचित्तैरित्यर्थः। हिरण्मयानि ज्योतिर्मयान्येवास्य श्मश्रूणि केशाश्चेति तथोक्तः। प्रणखो

न्यायनिर्णयः

समन्वयस्य सविशेषपरत्वमपोद्योत्सर्गः स्थापितः। अधुनाऽपवादार्थत्वेनाधिकरणमवतारयति— **अन्तरिति**। छान्दोग्यस्थं वाक्यमुदाहरति— **इदमिति**। ऋक्सामयोः पृथिव्यग्न्याद्यात्मत्वोक्त्यनन्तरमुपास्तिप्रस्तावार्थोऽथशब्दः। 'य एष' इति शास्त्रप्रसिद्धिः, संनिधिश्चोक्ता।[1] तस्योपास्त्यर्थमाधिदैविकं स्थानमाह— **अन्तरिति**। आदित्यमण्डलस्य मध्ये स्थित इति यावत्। ध्यानार्थमेव रूपविशेषमाह— **हिरण्मय इति**। ज्योतिर्मय इत्यर्थः। स्थानकृतं परिच्छेदं व्यवच्छिनत्ति— **पुरुष इति**। तत्रावहितधियामनुभवं प्रमाणयति— **दृश्यत इति**। तर्हि पुरुषत्वात् पूर्णस्य कथमुपास्तिः? तत्राह— **हिरण्येति**। तद्वज्ज्योतिर्मयान्येवास्य श्मश्रूणि केशाश्चेति तथोक्तः। किं बहुना आप्रणखात्, प्रणखो नखाग्रं, तेन सह सर्व एव सुवर्णो ज्योतिर्मयः। चक्षुषोर्विशेषमाह— **तस्येति**। कपेर्मर्कटस्यासः पृष्ठभागोऽत्यन्ततेजस्वी, तत्तुल्यं पुण्डरीकं यथाऽत्यन्तदीप्तिमत् तथाऽस्य देवस्याक्षिणी प्रकृष्टदीप्तिमती। ध्यानार्थमेव नाम करोति— **तस्येति**। कथं तस्योदितिनामत्वं, तदाह— **स इति**। उदित उद्गतः।

---

१. 'प्रसिद्धिरुक्ता, संनिधिश्चोक्तः' इति लिङ्गव्यत्ययेन योज्यम्।

उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद'''''इत्यधिदैवतम्'[1] (छा.उ. १।६।६,७,८) 'अथाध्यात्मम्'''''अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते' (छा.उ. १।७।१,५) इत्यादि। तत्र संशयः– किं विद्याकर्मातिशयवशात्प्राप्तोत्कर्षः कश्चित् संसारी सूर्यमण्डले चक्षुषि चोपास्यत्वेन श्रूयते, किंवा नित्यसिद्धः परमेश्वर इति। किं तावत् प्राप्तम्? संसारीति। कुतः? रूपवत्त्वश्रवणात्। आदित्यपुरुषे तावत् 'हिरण्यश्मश्रुः' इत्यादि रूपमुदाहृतम्। अक्षिपुरुषेऽपि तदेवातिदेशेन प्राप्यते– 'तस्यैतस्य तदेव रूपं यदमुष्य रूपम्' (छा.उ. १।७।५) इति। न च परमेश्वरस्य रूपवत्त्वं युक्तम्, 'अशब्दमस्पर्शमरूपमव्ययम्' (का.उ. १।३।१५) इति श्रुतेः। आधारश्रवणाच्च– 'य एषोऽन्तरादित्ये' 'य एषोऽन्तरक्षिणि' इति। न ह्यनाधारस्य स्वमहिमप्रतिष्ठस्य सर्वव्यापिनः परमेश्वरस्याधार उपदिश्येत। 'स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि' (छा.उ. ७।२४।१) इति, 'आकाशवत्सर्वगतश्च नित्यः' इति च श्रुती भवतः। ऐश्वर्यमर्यादाश्रुतेश्च। 'स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां च' (छा.उ. १।६।८)

प्रकटार्थविवरणम्

नखाग्रम्। तेन सह सर्व एव ज्योतिर्मयः। ज्योतिर्मयस्याप्यक्ष्णोर्विशेषः।[2] कपेर्मर्कटस्याऽऽसः पृष्ठभागोऽत्यन्ततेजस्वी तत्सदृशं पुण्डरीकं यथाऽयन्तदीप्तिमदेवमस्य पुरुषस्याक्षिणी अत्यन्तदीप्तिमती। कथं तस्योन्नामत्वमिति स्वयं निर्वक्ति— सर्वेभ्यः पाप्मभ्यः उत् इतः उद्गतः सकार्यसकलपाप्मासंस्पृष्ट इत्यर्थः। रूपवत्त्वश्रवणात् सर्वपापासंस्पर्शश्रवणाच्च संशयमाह— **तत्रेति**। पूर्वाधिकरणन्यायेन रूपवत्त्वस्य प्रथमश्रुतत्वाच्चरमश्रुतस्य पाप्मातिक्रमस्य देवतायाः कर्माधिकाराभावेनाप्युपपत्तेः आदित्यक्षेत्रज्ञ उपास्य इति पूर्वपक्षमाह— **किं तावदित्यादिना**। इतश्च नेश्वरपरिग्रह इत्याह— **आधारश्रवणाच्चेति**। स्वमहिमप्रतिष्ठत्वे स्वतन्त्रत्वे सर्वव्यापित्वे च प्रमाणमाह— **स भगव इति**। परमेश्वरापरिग्रहे हेत्वन्तरमाह— **ऐश्वर्यमर्यादेति**। अमुष्मादादित्यादूर्ध्वगता ये

भाष्यभावप्रकाशिका

अन्तस्तद्धर्मोपदेशात्।।२०।। परमेश्वरस्य कथमनाधारत्वमिति? तदुपपादयति—**स्वमहिमप्रतिष्ठस्येति**। हेत्वन्तरमाह—**सर्वव्यापिन इति**। एवंरूपत्वे प्रमाणमाह—**स भगव इति**। यस्मादेवं मर्यादाधाररूपाणि श्रूयन्ते,

न्यायनिर्णयः

सकार्यसर्वपापास्पृष्टइत्यर्थः। ध्यानफलमुदेतीति। आदिशब्दात् 'तस्यर्क् साम च गेष्णौ' इत्याद्युक्तमधिदैवतं च देवतामधिकृत्योपास्तिवाक्यमित्यर्थः। आधिदैवध्यानोक्त्यनन्तरमात्मानं देहमधिकृत्यापि तदुक्तिरित्याह— **अथेति**। ऋक्सामयोर्वाक्प्राणाद्यात्मत्वोक्त्यानन्तर्यमथेत्युक्तम्। आदिशब्दात् 'सैवर्क् तत्साम' इत्याद्युक्तम्। स्थानद्वयस्थं पुरुषं विषयीकृत्य रूपवत्त्वश्रुत्या सर्वपापास्पर्शश्रुत्या च संशयमाह— **तत्रेति**। कश्चिदित्यादित्यक्षेत्रज्ञ उक्तः। पूर्वसूत्रे ब्रह्मपदमानन्दमयपदमानन्दपदार्थाभ्यासश्चेति मुख्यत्रयार्थबहुप्रमाणवशान्निर्विशेषनिर्णयवद् रूपवत्त्वादिबहुप्रमाणात् संसारी हिरण्मयः पुरुष इति संगत्या पूर्वपक्षमाकाङ्क्षापूर्वकमाह— **किं तावदिति**। स्फुटब्रह्मलिङ्गोक्तश्रुतेः सगुणे ब्रह्मण्यन्वयोक्तेः श्रुत्यादिसंगतयः। पूर्वोत्तरपक्षयोरपरस्य परस्य चोपास्तिरेव फलम्। सर्वैरुपास्यत्वाय पर एव कस्मान्नेति पृष्ट्वा हेतुमाह— **कुत इति**। चाक्षुषे पुरुषे यथोक्तं रूपं न श्रुतमित्याशङ्क्याह— **अक्षीति**। परस्यैव स्थानभेदाद् रूपवत्त्वमुपदेशातिदेशाभ्यामिति चेत्, नेत्याह— **न चेति**। अनन्तशक्तित्वात्तस्याप्याधारश्रुतिरित्याशङ्क्याह— **न हीति**। परस्यानाधारत्वे परापरिग्रहे हेत्वन्तरमाह— **आधारेति**। तत्रैव हेत्वन्तरं सर्वव्यापित्वम्। तत्रापि मानमाह— **आकाशवदिति**। ईश्वराग्रहे स्वमहिमप्रतिष्ठत्वं हेतुः। तत्र मानं 'स भगवः' इति। 'स एषः' इत्याधिदैविकपुरुषोक्तिः। अमुष्मादादित्यादूर्ध्वगा ये लोकास्तेषामीशिता, ये च देवानां कामा हेत्वन्तरमाह— **ऐश्वर्येति**।

---

१. 'इत्याद्यधिदैवतम्' इति न्यायनिर्णयानुसारेण भाष्यपाठोऽवगम्यते।
२. अत्र कप्यासपदार्थमधिकृत्य कृतो विस्तृतो विचारो ब्रह्मविद्याभरणे द्रष्टव्यः।

इत्यादित्यपुरुषस्यैश्वर्यमर्यादा; 'स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां च' (छा.उ. १।७।६) इत्यक्षिपुरुषस्य। न च परमेश्वरस्य मर्यादावदैश्वर्यं युक्तम्, 'एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय' (बृ.उ. ४।४।२२) इत्यविशेषश्रुतेः। तस्मान्नाक्ष्यादित्ययोरन्तः परमेश्वर इत्येवं प्राप्ते ब्रूमः-

'अन्तस्तद्धर्मोपदेशात्' इति। 'य एषोऽन्तरादित्ये' 'य एषोऽन्तरक्षिणि' इति च श्रूयमाणः पुरुषः परमेश्वर एव, न संसारी। कुतः? तद्धर्मोपदेशात्। तस्य हि परमेश्वरस्य धर्मा इहोपदिष्टाः। तद्यथा- 'तस्योदिति नाम' इति श्रावयित्वा 'तस्यादित्यपुरुषस्य नाम 'स एष सर्वेभ्यः पाप्मभ्य उदितः' इति सर्वपाप्मापगमेन निर्वक्ति। तदेव च कृतनिर्वचनं नामाक्षिपुरुषस्याप्यतिदिशति-'यन्नाम तन्नाम' इति।

प्रकटार्थविवरणम्

लोका: तेषामीशिता भवति, देवानां ये कामा भोगा: तेषां चेत्यर्थ:। एतस्मादाध्यात्मिकात्। परमेश्वरस्याप्युपासनार्थं मर्यादावदैश्वर्यं किमिति न भवतीत्याशङ्क्याह— **न चेति**। "एष सर्वेश्वर:" इत्यविशेषश्रुतेरित्यन्वय:। कथमस्य सर्वेश्वरत्वमुच्यते, यतो भूतानां नियन्ता यमोऽस्ति, भूतपालश्च इन्द्रादिरित्याशङ्क्य सोऽप्ययमेवेत्युक्तम्। सेतुरिव विधारयिता, असंभेदाय असङ्करायेत्यर्थ:। पूर्वपक्षमुपसंहृत्य सिद्धान्तसूत्रमवतार्य व्याचष्टे— **तस्मादित्यादिना**।

प्रथमश्रुतस्यापि[२] रूपवत्त्वस्यापि सर्वपापातिक्रमस्य सप्रयोजनत्वात् प्राबल्यमित्यक्ष्यादित्ययोरन्त: परमेश्वर एवोपास्य:। [३]इहाधिकाराभावेऽपि

भाष्यभावप्रकाशिका

तस्मादित्युपसंहरति—**तस्मान्नाक्ष्यादित्ययोरिति**।

ननु पृथिव्याद्यात्मकयो: ऋक्साम्नोर्गेष्णत्वं, लौकिकगानेषु गीयमानत्वाज्जीवपरिग्रहे नोपपद्यते, सत्यम्; प्रथमश्रुतलिङ्गानुसारेण चरमश्रुतं नेतव्यम्; पूर्वाधिकरणन्यायादिति भाव:। गेष्णौ=पर्वणी। धनसनय:=धनलब्धार:।

न्यायनिर्णय:

भोगास्तेषां चेत्यर्थ:। 'स एष:' इत्याध्यात्मिकपुरुषोक्ति:। एतस्माच्चक्षुष: सकाशादर्वाग्गता ये लोकास्तेषामीशिता, ये च मनुष्याणां कामा भोगास्तेषां चेत्येतस्य मर्यादावदैश्वर्यमुक्तमित्यर्थ:। परस्यापि ध्यानार्थं तादृगैश्वर्यं स्यात्, नेत्याह— **न चेति**। 'एष सर्वेश्वर:' इत्यविशेषश्रुतेरिति संबन्ध:। कथमेतस्य सर्वेश्वरत्वं, यतो भूतानां नियन्ता यमोऽस्ति, नेत्याह— **एष इति**। कथं परो भूतानामधिष्ठाय पालयिता, पालयितुरिन्द्रादे: सत्त्वात्, तत्राह— **एष भूतेति**। तथापि ब्रह्मा मर्यादास्थापकोऽस्ति, कुतोऽस्य सर्वेश्वरत्वं, तत्राह— **एष इति**। यथा मृद्दारुमय: सेतुर्जलव्यूहस्य क्षेत्रसंपदामसंभेदाय धारयिता तथैषोऽपि सर्वेषां वर्णादीनामसंकराय धारयिता स्यादित्यर्थ:। मर्यादाधाररूपश्रुतेरादित्यक्षेत्रज्ञ एवात्रोपास्य इत्युपसंहरति— **तस्मादिति**। तस्य कर्मानधिकारात्सर्वपाप्मविगम:। सर्वात्मत्वमुपासनायै स्तुत्यर्थमनूद्यत इति भाव:। पूर्वपक्षमनूद्य सूत्रमवतार्य प्रतिज्ञां व्याकरोति— **एवमित्यादिना**।

प्रथमश्रुतरूपवत्त्वादिना चरमश्रुतसर्वपाप्मविगमादेर्नेयत्वान्न परस्य प्राप्तिरित्याह— **कुत इति**। फलवत्पाप्मविगमादिलिङ्गस्य चरमस्यापि तच्छून्यत्वेनाविवक्षितात्लिङ्गादाद्यादपि बलीयस्त्वात् तद्वशेनेतरन्नेयमित्याह— **तद्धर्मेति**। इहेति स्थानद्वयस्थपुरुषोक्ति:। आदित्यक्षेत्रज्ञस्यापि कर्मानधिकारात् पाप्मास्पर्शो युक्त:, 'न ह वै देवान्पापम्' इति श्रुतेरित्याशङ्क्याह— **सर्वेति**। देवादिषु पश्वादिवत् कर्मानधिकारेऽपि प्राचि भवे संचितपापयोगात् तदल्पत्वात् 'न ह वै देवान्' इत्युक्तेर्न जीव: सर्वपापास्पृष्ट:। प्रदेशान्तरे च तस्य परस्मिन्नेव श्रुतेरत्रापि तद्दृष्ट्या तत्रत्यभिज्ञानात् तस्यैवोपास्यतेति भाव:। सार्वात्म्यमपि श्रुतं न संसारिणि युक्तमित्याह- **तथेति**। तत्र तच्छब्दैश्चाक्षुषनरोक्ति:। ऋगादिविधेयापेक्षया विलक्षणलिङ्गोक्ति:। उक्थं शस्त्रविशेष:। तत्साहचर्यात्तत्साम

१. " अस्य इति पाठान्तरम्। २. 'प्रथमश्रुतस्यापि रूपवत्त्वस्य निष्प्रयोजनत्वात्, चरमश्रुतस्यापि सर्वपापातिक्रमस्य' इत्यादि: पाठ: अनुमीयते।
३. इह=अस्मिन् जन्मनि। देवत्वादिदशायामिति यावत्।

सर्वपाप्मापगमश्च परमात्मन एव श्रूयते–'य आत्माऽपहतपाप्मा' (छा.उ. ८।७।१) इत्यादौ। तथा चाक्षुषे पुरुषे 'सैवर्क् तत्साम तदुक्थं तद् यजुस्तद् ब्रह्म' इति ऋक्सामाद्यात्मकतां निर्धारयति। सा च परमेश्वरस्योपपद्यते, सर्वकारणत्वात् सर्वात्मकत्वोपपत्तेः। पृथिव्यग्न्याद्यात्मके चाधिदैवतम् ऋक्सामे, वाक्प्राणाद्यात्मके चाध्यात्ममनुक्रम्याह–'तस्यर्क्च साम च गेष्णौ' इत्यधिदैवतम्। तथाऽध्यात्ममपि– 'यावमुष्य गेष्णौ तौ गेष्णौ' इति। तच्च सर्वात्मन एवोपपद्यते। 'तद्य इमे वीणायां गायन्त्येतं ते गायन्ति तस्मात्ते धनसनयः' (छा.उ. १।७।६) इति च लौकिकेष्वपि गानेष्वस्यैव गीयमानत्वं दर्शयति। तच्च परमेश्वरपरिग्रहे घटते, 'यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवम्' (भ.गी.१०।४१) इति भगवद्गीतादर्शनात्। लोककामेशितृत्वमपि निरङ्कुशं श्रूयमाणं परमेश्वरं गमयति।

यत्तूक्तं हिरण्यश्मश्रुत्वादिरूपश्रवणं परमेश्वरे नोपपद्यत इति, अत्र ब्रूमः– स्यात् परमेश्वरस्यापीच्छा-

प्रकटार्थविवरणम्

जन्मान्तरसञ्चितपापसंभवात्, पश्वादीनामपि कर्माधिकाराभावाविशेषात् "न ह वै देवान् पापं गच्छति" इत्यस्य पापाल्पत्वाभिप्रायात् न संसारी सर्वपापासंस्पृष्ट इति भावः। किञ्च सर्वात्मत्वमपि श्रूयमाणं न संसारिपक्षे घटत इत्याह— **तथा चाक्षुष इति**। ऋगधिदैवं पृथिव्यन्तरिक्षद्युनक्षत्रात्मिका अध्यात्मं च वाक्चक्षुश्श्रोत्राक्ष्णःशुक्लंभालक्षणा। सैव पुरुष एवेत्यर्थः। तत्साम अधिदैवमग्निवाय्वादित्यचन्द्रलक्षणम् अध्यात्मं च प्राणच्छायात्ममनःपरःकृष्णात्मकं पुरुषः। एवमुक्थं स्तोत्रविशेषः, यजुः स्वाहास्वधावषडादि; ब्रह्म त्रयो वेदाः। इतश्चेश्वरपरिग्रह एव युक्त इत्याह— **पृथिव्यग्न्याद्यात्मके चेति**। "इयमेवर्गग्निः साम" इत्यादिनाऽध्यात्ममनुक्रम्य तथाविधे ऋक्सामे गेष्णौ पर्वणी इत्याह। किञ्च लौकिकेष्वपि गानेष्वक्ष्यादित्यपुरुषस्यैव गीयमानत्वं यद् दर्शयति तदपि सर्वात्मकेश्वरपरिग्रहे घटते इत्याह— **तद्य इत्यादिना**। धनसनयः धनलाभवन्तः। श्रीमत् शोभायुक्तम्। ऊर्जितं बलवत्। लोककामेशितृत्वमप्यनन्याधीनं न संसारिणो घटत इत्यर्थः। रूपविशेषश्रवणं च नैकान्ततो जीवलिङ्गमित्याह— **अत्र ब्रूम इति**।

भाष्यभावप्रकाशिका

कर्मनिबन्धनत्वाच्छरीरस्य परमेश्वरस्य कर्माभावाच्छरीरमनुपपन्नमिति, तत्राह—**स्यात्परमेश्वरस्येति**। अयमर्थः—प्रयोजन-

न्यायनिर्णयः

स्तोत्रम्, उक्थादन्यच्छस्त्रमृगुच्यते। ब्रह्म त्रयो वेदाः। ऋगाद्यात्मना चाक्षुषस्य संसारित्वेऽपि स्तुतिरुपास्त्यर्थमित्याशङ्क्य मुख्यसंभवे नामुख्यकल्पनेत्याह— **सा चेति**। तत्रैव हेत्वन्तरमाह— **पृथिवीति**। ऋगधिदैवतं पृथिव्यन्तरिक्षद्युनक्षत्रादित्यगतशुक्लभारूपा; साम चाग्निवाय्वादित्यचन्द्रादित्यगतपरःकृष्णाख्यातिकृष्णरूपम् 'इयमेवर्गग्निः साम' इत्यादिनोक्तम्। अध्यात्मं च वाक्चक्षुःश्रोत्राक्षिगतशुक्लभालक्षणा तावदृगुक्ता; साम च प्राणच्छायात्ममनोऽक्षिस्थकृष्णभारूपं 'वागेवर्क्प्राणः साम' इत्यादिनोक्तम्। एवमुभयत्रोक्तरूपे ऋक्सामे क्रमेणोक्त्वा पुरुषस्योक्तप्रकारा ऋक् चाभिहितप्रकारं साम चेत्येते द्वे गेष्णौ पादपर्वणी इति देवतायामुक्त्वाऽऽत्मन्यपि तयोर्ऋक्सामयोरतिदेशेन गेष्णत्वमुक्तमित्यर्थः। तदपि संसारिविषयं किं न स्यात्? नेत्याह— **तच्चेति**। तत्रैव हेत्वन्तरमाह— **तद्य इति**। व्यवहारभूमिस्तच्छब्दार्थः। धनसनयो धनस्य लब्धारः। विभूतिमन्त इत्यर्थः। राजादीनामपि श्रीमतां गीयमानत्वदृष्टेरन्यथासिद्धिमाशङ्क्याह— **तच्चेति**। उक्तेऽर्थे स्मृतिमनुकूलयति— **यद्यदिति**। धनादिसमृद्धिमत्त्वं विभूतिमत्त्वम्। कान्तिमत्त्वं श्रीमत्त्वम्। बलवत्त्वमौर्जित्यम्। ईश्वरपक्षे हेत्वन्तरमाह— **लोकेति**। निरङ्कुशमनन्याधीनम्।

सर्वपाप्मविरहादिना तस्यैवोपास्यतेत्युक्त्वा परोक्तमनुवदति— **यत्त्विति**। रूपवत्त्वं नावश्यं संसारिलिङ्गमित्याह— **अत्रेति**। तस्येच्छाऽपि मायामयस्यापि रूपस्य हिरण्यश्मश्रुत्वादिनियमे हेतुमाह— **इच्छेति**। तथाविधरूपोपयोगमाह— **साधकेति**।

वशान्मायामयं रूपं साधकानुग्रहार्थम्। 'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद। सर्वभूतगुणैर्युक्तं मैवं मां ज्ञातुमर्हसि' इति स्मरणात्। अपि च यत्र तु निरस्तसर्वविशेषं पारमेश्वरं रूपमुपदिश्यते, भवति तत्र शास्त्रम्– 'अशब्दमस्पर्शमरूपमव्ययम्' इत्यादि। सर्वकारणत्वात्तु विकारधर्मैरपि कैश्चिद् विशिष्टः परमेश्वर उपास्यत्वेन निर्दिश्यते– 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' (छा.उ. ३।१४।२) इत्यादिना। तथा हिरण्यश्मश्रुत्वादिनिर्देशोऽपि भविष्यति।

यदप्याधारश्रवणान्न परमेश्वर इति, अत्रोच्यते– स्वमहिमप्रतिष्ठस्याप्याधारविशेषोपदेश उपासनार्थो भविष्यति, सर्वगतत्वाद् ब्रह्मणो व्योमवत् सर्वान्तरत्वोपपत्तेः। ऐश्वर्यमर्यादाश्रवणमप्यध्यात्माधिदैवत-विभागापेक्षमुपासनार्थमेव। तस्मात् परमेश्वर एवाक्ष्यादित्ययोरन्तरुपदिश्यते।।२०।।

प्रकटार्थविवरणम्

यदत्र **भास्करो** व्याजहार— "पारमार्थिकमेवेदं यथाभूतार्थज्ञापकत्वाच्छास्त्रस्य" [1]इति; तत् शास्त्रार्थानभिज्ञानविजृम्भितम्, योषिदादेरग्न्यादिभावस्यापि तथात्वापातात्। स्वप्नसृष्टेरपि च पारमार्थिकत्वप्रसङ्गात्।

यदत्रामृतानन्दो जगाद "मायाऽपि सत्यैव" इति; तदप्यसत्। "नासदासीन्नो सदासीत्तम आसीत्" इति जगत्प्रागवस्थायां मायायाः [2]सदसद्वैलक्षण्येनानिर्वाच्यतावगमादिति।

यच्चोक्तं शास्त्रम् 'अशब्द'मित्यादि; तन्निर्विशेषपरमित्याह— **अपि चेति**। उपासनाभागेऽपि नात्यन्तासदारोप इत्याह— **सर्वकारणत्वात्त्विति**। ननूपासनार्थः किमित्याधारोपदेशः, साक्षादेव किं न भवतीत्याशङ्क्याह— **सर्वगतत्वादिति**। यदुक्तं मर्यादावदैश्वर्यमिति; तत्राह— **ऐश्वर्येति**। एकस्यैवेशंवरस्याध्यात्माधिदैवतावच्छेदेन यदैश्वर्यमर्यादाकरणं तत्पृथगनुचिन्तनार्थम्, न तु परिच्छेदप्राप्त्यर्थमित्यर्थः।

भाष्यभावप्रकाशिका

वत्सर्वपाप्मोदयलिङ्गस्य चरमश्रुतस्यापि प्रयोजनशून्यतयाऽविवक्षिताद् रूपवत्त्वलिङ्गात् प्रथमश्रुतादपि बलीयस्त्वात्तदनुसारेण सामान्यप्रवृत्तां कर्मनिमित्तशरीरग्रहणश्रुतिमीश्वरविशेषविषये बाधित्वा कर्माभावेऽपि रूपवत्त्वं परमेश्वरेऽङ्गीक्रियते। प्राणिकर्मवशाद्वेति।

ननु अशरीरश्रुतेः कथं सशरीरत्वमित्याशङ्क्य परमार्थविषयाऽशरीरश्रुतिरित्याह—**अपि च यत्रेति**। कथं तर्हि रूपादिमत्त्वव्यपदेश इति? तत्राह—**सर्वेति**। ननु सद्यो मुक्तये निर्विशेषं ब्रह्मैवात्र प्रतिपादनीयमिति, तत्राह—**तथा हिरण्येति**। उपासनावाक्यत्वादविरोध इति भावः।

न्यायनिर्णयः

मायामयीति मत्वाऽऽह— **मायेति**। यथादृष्टि देहादिवैशिष्ट्यमीश्वरस्य तात्त्विकमित्याशङ्क्याह— **सर्वेति**। अरूपश्रुतिविरुद्धं रूपवत्त्वमित्युक्तमाशङ्क्य विषयभेदमाह— **अपि चेति**। तात्त्विकमैश्वरं रूपमाश्रित्याशब्दादिशास्त्रे कथं तस्य रूपादिमत्त्वोक्तिः, तत्राह— **सर्वेति**। निर्विशेषमेव ब्रह्मात्र प्रतिपाद्यं, तज्ज्ञानादेव मुक्तिरित्याशङ्क्योपास्तिवाक्यत्वात् सविशेषोक्तिरित्याह— **तथेति**।

स्वमहिमप्रतिष्ठस्याऽऽधारायोगादत्र चाधारश्रुतेरीश्वरादर्थान्तरतेत्युक्तमनुवदति— **यदपीति**। आधारानपेक्षस्यापि फलवशात् तदुक्तेर्नानीश्वरतेत्याह— **अत्रेति**। किमित्युपासनायै तदुक्तिः, साक्षादेव किं न स्यात्, तत्राह— **सर्वगतत्वादिति**। मर्यादावदैश्वर्यमीश्वरस्य नेत्युक्तं प्रत्याह— **ऐश्वर्येति**। एकस्यैवेश्वरस्य स्थानभेदावच्छेदादैश्वर्यमर्यादाकरणं पृथगनुध्यानार्थम्, न परिच्छेदप्राप्त्यर्थमित्यर्थः। परोक्तलिङ्गानामन्यथात्वे फलितमाह— **तस्मादिति**।।२०।।

---

१. द्र. ब्र. सू. भास्कर भा. पृ. २९।

२. सृष्टिप्राक्काले तम आसीत्, तच्च नासदासीत्, न च सदासीत्, सदसद्विलक्षणा मायाऽऽसीदित्यर्थः। पाठक्रमादार्थक्रमस्य बलीयस्त्वात् 'तम आसीत्' इति पश्चाच्छ्रुतमपि पूर्वं द्रष्टव्यम्। अधिकं सिद्धान्तसिद्धाञ्जने चतुर्थभागे द्र. पृ. ७६-७७।

भेदव्यपदेशाच्चान्यः।।२१।।

अस्ति चादित्यादिशरीराभिमानिभ्यो जीवेभ्योऽन्य ईश्वरोऽन्तर्यामी, 'य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः' (बृ.उ. ३।७।९) इति श्रुत्यन्तरे भेदव्यपदेशात्। तत्र हि 'आदित्यादन्तरो यमादित्यो न वेद' इति वेदितुरादित्याद् विज्ञानात्मनोऽन्योऽन्तर्यामी स्पष्टं निर्दिश्यते। स एवेहाप्यन्तरादित्ये पुरुषो भवितुमर्हति, श्रुतिसामान्यात्। तस्मात् परमेश्वर एवेहोपदिश्यत इति सिद्धम्।।२१।।

।।इति सप्तममन्तरधिकरणम्।।

शारीरकन्यायसंग्रहः

आकाशस्तल्लिङ्गात्।।२२।। अत्र प्रथमश्रुताया अपि श्रुतेः चरमश्रुतमपि प्रतिपिपादयिषितं लिङ्गं तात्पर्यवत्त्वाद् बलीयः 'अग्निरधीतेऽनुवाकम्' इत्यत्र दर्शनात्—इति न्यायेन समस्तजगत्प्रकृतित्वावधारणाभ्यामुपबृंहितमन्तवत्त्वदोषपरिहारेण प्रतिपिपादयिषितम् "स एषोऽनन्तः" इति श्रुतमानन्त्यं स्वसामर्थ्यादविनाभावात् आकाशश्रुतिमपोह्य ब्रह्म आकाशशब्दार्थतया समर्पयतीत्युक्तम्। तत्सिद्ध्यर्थं च भूतशब्दस्य प्राणिनिकाये महाभूतेषु च रूढस्य अन्यतरोपादाने कारणशून्यस्य वाक्यार्थानिर्णायकत्वे प्राप्ते बालाक्यधिकरणन्यायेन भवन्तीति भूतानि इति वृत्त्यन्तरमाश्रित्य कार्यमात्रपरत्वमुक्तम्।

प्रकटार्थविवरणम्

भेदव्यपदेशाच्चान्यः। ननूपास्योद्देशेनोपासनविधानाद् विधीयमानक्रियाकर्मकारकस्य व्रीह्यादिवत् अन्यतः सद्भावसिद्धिः वक्तव्येत्याशङ्क्याह— **भेदव्यपदेशाच्चान्य इति।** आदित्यक्षेत्रज्ञादन्तर्यामिणः श्रुत्यन्तरे भेदव्यपदेशात् सिद्धोऽन्य ईश्वर इत्यर्थः। ननु तत्रादित्यशब्देन तन्मण्डलमुच्यते, न तन्नियन्ता क्षेत्रज्ञ एवेत्याशङ्क्याह— **तत्र हीति।** मण्डलस्याचेतनस्य वेदनप्राप्त्यभावात् प्रतिषेधायोगात्, प्राप्तवेदनात् जीवादन्य ईश्वरस्तत्रोच्यत इत्यर्थः। ननु तथापि प्रत्यभिज्ञापकाभावान्न तस्योपासनमिह विधातुं शक्यमित्याशङ्क्याह— **स एवेहापीति।** आदित्यान्तरत्वश्रुतिसाम्येन प्रत्यभिज्ञायमान ईश्वर उद्गीथ उपास्यत्वेनोपदिश्यत इत्युपसंहरति— **तस्मादिति।** इत्यन्तरधिकरणम्।

भाष्यभावप्रकाशिका

भेदव्यपदेशाच्चान्यः।।२१।। अन्यत्रादित्यान्तरवस्थितस्य ब्रह्मत्वनिश्चयात्तस्यैवेह प्रत्यभिज्ञायमानत्वादादित्यान्तः श्रूयमाणः परमेश्वर एवेत्याह—**अस्ति चेति।** ननु तत्राप्यसिद्धं परमेश्वरविषयत्वमित्याशङ्क्य तदुपपादयति—**तत्र हीति।।२१।।** इति सप्तममन्तरधिकरणम्।

न्यायनिर्णयः

उपास्योद्देशेनोपास्तिविधेर्विधेयक्रियाकर्मणो व्रीह्यादिवदन्यतः सिद्धिर्वाच्येत्याशङ्क्याह— **भेदेति।** आदित्यक्षेत्रज्ञादन्तर्यामिणः श्रुत्यन्तरे भेदोक्तेस्ततोऽन्य ईश्वरः सिद्ध इत्यक्षरार्थमाह— **अस्तीति।** आदित्यमण्डले स्थितेरश्मिपुञ्जस्यापि स्यादित्यत उक्तम्— **आदित्यादिति।** तज्जीवं व्युदस्यति— **यमिति।** तस्य देहित्वे जीवत्वम्, अदेहित्वे न नियन्तृतेत्याशङ्क्याह— **यस्येति।** इतश्चादित्यजीवादन्योऽसावित्याह— **य इति।** तस्य ताटस्थ्यं वारयति— **एष इति।** श्रुत्यन्तरस्याप्यनीश्वरविषयत्वमाशङ्क्याह— **तत्रेति।** तथापि प्रत्यभिज्ञापकाभावान्नेह तदुपास्तिरित्याशङ्क्याह— **स एवेति।** आदित्यान्तःस्थत्वश्रुतिसाम्यात् प्रत्यभिज्ञया पर एवोद्गीथे ध्येयत्वेनोपदिश्यत इत्युपसंहरति— **तस्मादिति।।२१।।** इति सप्तममन्तरधिकरणम्।।

३. 'स्थितिः रश्मि' इति पाठः स्यात्।

८।।आकाशाधिकरणम्।।सू. २२।।

आकाशस्तल्लिङ्गात्।।२२।।

इदमामनन्ति– 'अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्' (छा.उ. १।९।१) इति। तत्र संशयः– किमाकाशशब्देन परं ब्रह्माभिधीयत उत भूताकाशमिति। कुतः संशयः? उभयत्र प्रयोगदर्शनात्। भूतविशेषे तावत् सुप्रसिद्धो लोकवेदयोराकाशशब्दः। ब्रह्मण्यपि क्वचित् प्रयुज्यमानो दृश्यते यत्र वाक्यशेषवशादसाधारणगुणश्रवणाद्वा निर्धारितं ब्रह्म भवति, यथा– 'यदेष आकाश आनन्दो न स्यात्' (तै.उ. २।७) इति, 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म' (छा.उ. ८।१४।१) इति चैवमादौ। अतः संशयः।

किं पुनरत्र युक्तम्? भूताकाशमिति। कुतः? तद्धि प्रसिद्धतरेण प्रयोगेण शीघ्रं बुद्धिमारोहति। न

प्रकटार्थविवरणम्

आकाशस्तल्लिङ्गात्। छान्दोग्यगतमेव विषयवाक्यं पठति— **इदमामनन्तीत्यादिना।** संशयं तत्कारणं चाह— **तत्रेत्यादिना।** असाधारणेनानन्देन सामानाधिकरण्यादाकाशो ब्रह्मेत्यर्थः। ते नामरूपे यदन्तरा यस्य मध्ये वर्तते तन्नामरूपासंस्पृष्टं ब्रह्मेति वाक्यशेषात् अत्रापि ब्रह्माकाशशब्दमित्याह— **आकाशो वै नामेति।** प्रसिद्धावद्योतकौ निपातौ। संशयमुक्त्वा पूर्वपक्षं गृह्णाति—**किं पुनरत्रेति।** पूर्वत्र प्रथमश्रुताल्लिङ्गात् सप्रयोजनं चरमश्रुतं लिङ्गं बलीय इत्युक्तम्। इह त्वाकाश इति श्रुतिरियं प्रथमश्रुता चेत[्य] नयैव चरमश्रुतं ब्रह्मलिङ्गमवबाधनीयम्। अतो भूताकाशदृष्टिविशिष्टोद्गीथोपासनं विधीयत इति पूर्वः पक्षः।

भाष्यभावप्रकाशिका

आकाशस्तल्लिङ्गात्।।२२।। ननु तत्रापि सन्देह एवेत्याशङ्क्याह—**यत्र वाक्येति।** ननु गोशब्दस्यानेकार्थत्वं दृश्यते,

न्यायनिर्णयः

पूर्वत्राव्यभिचारिलिङ्गेन रूपवत्त्वाद्यन्यथा नीतम्। इह तु लिङ्गान्न श्रुतिरन्यथयितव्येति प्राप्ते प्रत्याह— **आकाश इति।** छान्दोग्यवाक्यमेवोदाहरति— **इदमिति।** 'हन्ताहमेतद्भगवत्तो वेदानि' इत्युपसन्नः शालावत्यः 'विद्धि' इति जैवलिनोक्ते पृच्छति— **अस्येति।** सर्वस्यैव प्रपञ्चस्य प्रतिष्ठाप्रश्ने प्रवाहणस्योत्तरमाह— **आकाश इति।** कथं भूताकाशः सर्वजगत्प्रतिष्ठा, तत्राह— **सर्वाणीति।** उपनिषदां तदभिज्ञानां च प्रसिद्धमेतदिति द्योतकौ निपातौ। निमित्तमात्रत्वं निराकर्तुं विशिनष्टि— **आकाशमिति।** भूताकाशव्यावृत्तये हेत्वन्तरमाह— **आकाशो हीति।** तत्रैव हेत्वन्तरं सूचयति— **आकाश इति।** विचारबीजं संशयमाह— **तत्रेति।** अनतिप्रसङ्गार्थं प्रश्नद्वारा निमित्तमाह— **कुत इति।** क्वचिदित्युक्तं स्पष्टयति— **यत्रेति।** असाधारणगुणश्रुतेराकाशशब्दस्य ब्रह्मार्थत्वे दृष्टान्तः— **यथेति।** असाधारणेनानन्देनान्यत्रासंभावितेन सामानाधिकरण्यादाकाशो ब्रह्मेत्यर्थः। वाक्यशेषादाकाशस्य ब्रह्मत्वे दृष्टान्तमाह— **आकाश इति।** निपातावाकाशस्य नामरूपोपलक्षितसर्वप्रपञ्चनिर्वाहकत्वप्रसिद्ध्यर्थौ। ते नामरूपे यदन्तरा यस्मादन्ये यस्य वा मध्ये स्तः, तन्नामरूपास्पृष्टं ब्रह्मेति वाक्यशेषादत्राकाशो ब्रह्मेत्यर्थः। 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते' इत्यादिवाक्यसंग्रहार्थमादिपदम्। यथैवमादावाकाशो ब्रह्म तथाऽत्रापीति योजना। रूढिनिरूढिभ्यां संशयमुपसंहरति— **अत इति।** विमृश्य पूर्वपक्षयति— **किं पुनरिति।** स्फुटब्रह्मलिङ्गोक्तश्रुतेरुद्गीथे संपाद्योपास्ये ब्रह्मणि समन्वयोक्तेः संगतयः। पूर्वपक्षे भूताकाशदृष्ट्योद्गीथोपास्तिः, सिद्धान्ते ब्रह्मदृष्ट्येति फलम्। वैदिकप्रयोगस्य तादृक्प्रयोगाद् ब्रह्मार्थत्वे सिद्धे कुतो भूताकाशार्थतेति शङ्कित्वा हेतुमाह— **कुत इति।** प्रथमश्रुताकाशश्रुत्या भूतार्थे 'रूढ्या चरमश्रुतब्रह्मलिङ्गबाधान्न श्रुत्यन्तरेण ब्रह्मार्थतेत्यर्थः। ब्रह्मण्यपि साधारणत्वान्नाकाशश्रुतिर्ब्रह्मलिङ्गबाधिकेत्याशङ्क्याह— **न चेति।** एकस्यापि गोशब्दस्यानेकार्थत्वमगत्याऽभीष्टम्, ब्रह्मणि

---

१. 'रूढया' इति पाठः स्यात्।

चायमाकाशशब्द उभयोः साधारणः शक्यो विज्ञातुम्, अनेकार्थत्वप्रसङ्गात्। तस्माद् ब्रह्मणि गौण आकाशशब्दो भवितुमर्हति। विभुत्वादिभिर्हि बहुभिर्धर्मैः सदृशमाकाशेन ब्रह्म भवति। न च मुख्यसंभवे गौणोऽर्थो ग्रहणमर्हति। संभवति चेह मुख्यस्यैवाकाशस्य ग्रहणम्। ननु भूताकाशपरिग्रहे वाक्यशेषो नोपपद्यते– 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' इत्यादिः। नैष दोषः। भूताकाशस्यापि वाय्वादिक्रमेण कारणत्वोपपत्तेः। विज्ञायते हि– 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः। आकाशाद्वायुः। वायोरग्निः' (तै.उ. २।१) इत्यादि। ज्यायस्त्वपरायणत्वे अपि भूतान्तरापेक्षयोपपद्येते भूताकाशस्यापि। तस्मादाकाशशब्देन भूताकाशस्य ग्रहणमित्येवं प्राप्ते ब्रूमः–

'आकाशस्तल्लिङ्गात्'। आकाशशब्देन ब्रह्मणो ग्रहणं युक्तम्। कुतः? तल्लिङ्गात्[१]। परस्य हि ब्रह्मण इदं लिङ्गम्– 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' इति। परस्माद्धि ब्रह्मणो भूतानामुत्पत्तिरिति वेदान्तेषु मर्यादा। ननु भूताकाशस्यापि वाय्वादिक्रमेण कारणत्वं दर्शितम्। सत्यं

प्रकटार्थविवरणम्

ननु नाकाशश्रुतिर्ब्रह्मलिङ्गबाधिका, ब्रह्मण्यपि साधारणत्वादाकाशशब्दस्येत्याशङ्क्याह— **न चायमिति।** एकस्यापि गोशब्दस्यानेकार्थत्वमनन्यथासिद्धप्रयोगप्रत्ययाभ्याम्। ब्रह्मणि 'नान्यथासिद्धिर्गौण्याऽपि[२] प्रयोगसंभवादित्याह— **तस्मादिति।** भवतु गौणः, ततः किमित्यत आह—**न चेति।** मुख्यासंभवमाशङ्क्य परिहरति— **ननु भूताकाशस्येत्यादिना।** तथापि "आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्" इति वाक्यशेषः कथं भूताकाशे घटत इत्याशङ्क्याह— **ज्यायस्त्वेति।** महत्त्वाश्रयत्वे वाय्वाद्यपेक्षया भूताकाशस्य सुप्रसिद्धे इत्यर्थः। यस्मात् मुख्ये बाधकं नास्ति तस्मादित्युपसंहारः।

सिद्धान्तत्वेन सूत्रं योजयति—**आकाशशब्देनेति।** जन्मादिसूत्रे जगज्जन्मादिकारणत्वस्य ब्रह्मलक्षणत्वेनावधारितत्वादिहापि तद्दर्शनादाकाशस्य ब्रह्मत्वनिश्चय इति भावः। अन्यथासिद्धिं स्मारयति— **नन्विति।** परिहरति— **सत्यमिति।** आकाशशब्देन त्वया

भाष्यभावप्रकाशिका

सत्यम्; तत्र गत्यभावात्, इह त्वेकत्र मुख्यस्य तत्संबन्धादितरत्र प्रयोगप्रत्ययोपपत्तिरित्याह—**तस्माद् ब्रह्मणीति।** गुणसाम्यमाह— **विभुत्वादिभिरिति।** ननु गुणवृत्तेरपि वृत्तित्वात्तया किमिति ब्रह्म न परिगृह्यत इति? तत्राह—**न च मुख्यसंभव इति।** ननु इह मुख्यं न संभवतीति, तत्राह—**संभवति चेति।** प्रथममाकाशशब्दस्य श्रुतत्वात् तस्यासञ्जातविरोधित्वात् तदनुरक्तायां बुद्धौ यद्यदेव तदेकवाक्य गतमुपनिपतति, तदुपजातविरोधत्वात्तदानुगुण्येन व्यवस्थापनीयमिति परिहरति—**भूताकाशस्यापीति।**

न्यायनिर्णयः

त्वाकाशशब्दो गौणत्वेनापि गच्छतीत्याह— **तस्मादिति।** गौणत्वार्थं गुणयोगमाह— **विभुत्वेति।** गुणवृत्तेरपि शब्दवृत्तित्वात्तया किं न ब्रह्म गृह्यते, तत्राह— **न चेति।** ननु नेह मुख्यं संभवति, तत्र सर्वकारणत्वायोगादतो मुख्यगौणयोर्मुख्ये संप्रत्ययन्यायस्यानवकाशत्वम्, तत्राह— **संभवतीति।** तदेव साधयितुं शङ्कयति— **नन्विति।** आकाशस्य प्रथमश्रुतत्वेनासंजातविरोधित्वात् तद्बुद्धौ तदेकवाक्यस्थमुपस्थितं सर्वमुपजातविरोधित्वात् तदानुगुण्येन नेयमित्याह— **नेति।** तत्रैव तैत्तिरीयकश्रुतिसंवादमाह— **विज्ञायते हीति।** तथापि कथं वाक्यशेषो भूताकाशे स्यात्, तत्राह— **ज्यायस्त्वेति।** भूताकाशेऽपि शेषोपपत्तौ फलितमाह— **तस्मादिति।** भूताकाशदृष्ट्योद्गीथोपास्तिरिति प्राप्तमनूद्य सिद्धान्तयति— **एवमिति।** रूढ्या प्रयोगबाहुल्याच्च सिद्धभूताकाशत्यागे न हेतुरिति शङ्कित्वा हेतुमादाय व्याचष्टे— **कुत इति।** ननु वादिनः सर्वयोनित्वं ब्रह्मणो नेच्छन्ति, तत्राह— **परस्माद्धीति।** तस्यान्यथासिद्धिं स्मारयति— **नन्विति।** उक्तमुपेत्य प्रत्याह— **सत्यमिति।** तत्र तत्र तेजःप्रभृतिषु वाय्वादेरपि

१. तस्यैव लिङ्गं तल्लिङ्गम्। अन्यत्रानुपपद्यमानमिति यावत्। अब्भक्ष इत्यादिवत् समासः। तथा च लिङ्गस्यानन्यथासिद्धत्वं लभ्यते। अनन्यथासिद्धं च लिङ्गं श्रुत्यपेक्षयाऽपि बलवत् इति 'अर्थाद्वा कल्पनैकदेशत्वात्' (पू.मी. १-४-३०) इत्यधिकरणे सिद्धम्। तथा च आकाशश्रुत्या पूर्वपक्षे लिङ्गात् सिद्धान्तः कथमिति शङ्कानवकाशः। २. 'नानन्यथासिद्धिः' इति पाठः स्यात्।

दर्शितम्। तथापि मूलकारणस्य ब्रह्मणोऽपरिग्रहादाकाशादेवेत्यवधारणं, सर्वाणीति च भूतविशेषणं नानुकूलं स्यात्। तथा 'आकाशं प्रत्यस्तं यन्ति' इति ब्रह्मलिङ्गम्, 'आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्' इति च ज्यायस्त्वपरायणत्वे। ज्यायस्त्वं ह्यनापेक्षिकं परमात्मन्येवैकस्मिन्नाम्नातम्- 'ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः' (छा.उ. ३।१४।३) इति। तथा परायणत्वमपि परमकारणत्वात् परमात्मन्येवोपपन्नतरम्। श्रुतिश्च भवति- 'विज्ञानमानन्दं ब्रह्म रातेर्दातुः परायणम्' (बृ.उ. ३।९।२८) इति।

अपि चान्तवत्त्वदोषेण शालावत्यस्य पक्षं निन्दित्वा, अनन्तं किंचिद् वक्तुकामेन जैवलिना आकाशः परिगृहीतः। तं चाकाशमुद्गीथे संपाद्योपसंहरति-'स एष परोवरीयानुद्गीथः स एषोऽनन्तः'

प्रकटार्थविवरणम्

'मूलकारणस्याङ्गीकृतत्वादवान्तरकारणत्वापेक्षयाऽवधारणं न संभवति, वाय्वादीनामप्यवान्तरकारणत्वात्,आकाशस्यापि सर्वभूतान्तर्गतत्वात् स्वयमेव स्वस्य कारणत्वानुपपत्तेः ततो व्यतिरिक्तानां ग्रहणे सर्वाणीति विशेषणं नानुकूलं स्यादित्यर्थः। तथा सर्वभूतप्रलयाधारत्वम्, निरतिशयमहत्त्वम्, स्थितावपि पराश्रयत्वमित्येतान्यपि ब्रह्मलिङ्गानि दृश्यन्त इत्याह— **तथाकाशमित्यादिना**। रातेः कर्मफलस्य दातुरीश्वरशब्दवाच्यस्य मायायां चित्प्रतिबिम्बस्य परायणं बिम्बस्थानीयं ब्रह्मेत्यर्थः। ब्रह्मणो लिङ्गान्तरमाह— **अपि चेति**। शिलकः शालावत्यः, चैकितायनो दाल्भ्यः, प्रवाहणो जैवलिः इत्येते त्रय उद्गीथविद्यायां निपुणा विचारमारेभिरे—किं परायणमुद्गीथस्य इति। तत्र स्वर्गलोक एव परायणमुद्गीथस्येति दाल्भ्यस्य पक्षं प्रतिक्षिप्य अयं लोकः परायणमिति पक्षं शालावत्यो जग्राह। तमुवाच प्रवाहणः— 'अन्तवद्वै किल ते शालावत्य साम' इति। प्रकृतत्वादुद्गीथः। तदेतदाह— **अन्तवत्त्वदोषेणेति**। परं परं परेभ्योऽतिशयेन वरः परोवरीयान् स एष आकाशाभिन्न उद्गीथ ओङ्कारः। 'स एषोऽनन्त'

भाष्यभावप्रकाशिका

ननु तार्किकास्सर्वभूतकारणत्वं ब्रह्मणो न मन्यन्त इति, सत्यम्; तथापि वेदान्तेषु प्रसिद्धमित्याह—**परस्माद्धीति। तथापि मूलकारणस्येति**। न खल्वाकाशमेवापां कारणम्, अपि तु तेजोऽपि, एवं पृथिव्या अपि नाकाशमेव कारणम्, अपि तु वाय्वादिरपि। तस्मादवधारणमनुपपन्नम्। मूलकारणविवक्षया त्ववधारणे ब्रह्मण्येवावधारणं समञ्जसमित्यर्थः। न केवलं युक्तिवशात् परायणत्वम्, श्रुतिरप्यस्तीत्याह—**श्रुतिश्चेति**। रातेः=धनस्य। रातिरिति पाठे बन्धुः। उपक्रमोपसंहाराभ्यां प्रतिपाद्यमानत्वेन तात्पर्यवदानन्त्यलिङ्गमाकाशशब्दस्य ब्रह्मपरत्वं गमयतीत्याह—**अपि चेति**। "अन्तवद्वै किल ते शालावत्य सामे"ति पृथिवीलोकस्यान्तवत्त्वात् तत्प्रतिष्ठत्वं साम्नोऽनुपपन्नमिति निन्दित्वा परिगृहीतमाकाशं नान्तवद् युक्तमित्यर्थः। ननु

न्यायनिर्णयः

कारणत्वादवधारणासिद्धिः, मूलकारणापेक्षायां ब्रह्मण्येव तद् युक्तम्। सर्वाणीति भूतविशेषणं च भूताकाशपक्षे वाय्वादौ संकुचितं स्यात्। तस्मान्नान्यथासिद्धिरित्यर्थः। सर्वभूतोत्पादकत्ववत् तल्लयाधारत्वमपि ब्रह्मलिङ्गमित्याह— **तथेति**। ब्रह्मणो लिङ्गद्वयमाह— **आकाशो हीति**। भूताकाशस्यापि ज्यायस्त्वादि सापेक्षमुक्तमित्याशङ्क्याह— **ज्यायस्त्वमिति**। नैरपेक्ष्यधिया तरपो वचनम्। न केवलं युक्त्याऽस्य परायणत्वं, श्रुतेरपीत्याह— **श्रुतिरिति**। रातेर्धनस्य दातुर्यजमानस्येति। रातिरिति पाठे बन्धुरित्यर्थः।

आकाशो ब्रह्मेत्यत्र लिङ्गान्तरमाह— **अपि चेति**। शालावत्यो दाल्भ्यो जैवलिरित्युद्गीथविद्याकुशलानां किं परायणमुद्गीथस्येति विचारे स्वर्गलोक एवेति दाल्भ्योक्तं निरस्यायं लोक इति शालावत्योक्तौ 'अन्तवद्वै किल ते शालावत्य साम' इति पृथिवीलोकस्यान्तवत्त्वात्प्रतिष्ठितत्वं निन्दित्वा जैवलिना सामप्रतिष्ठारूपमनन्तमेव विवक्षता गृहीतमाकाशं नान्तवद् युक्तम्, अतो ब्रह्मैवाकाशमित्यर्थः। नन्वनन्तमाकाशमिह नोपसंह्रियते, किंतूद्गीथः, तत्कथमानन्त्यादाकाशो ब्रह्म, तत्राह— **तं चेति**। 'स

१. 'मूलकारणस्यानङ्गीकृतत्वात्' इति पाठः स्यात्।

(छा.उ. १।९।२) इति। तच्चानन्त्यं ब्रह्मलिङ्गम्। यत्पुनरुक्तं भूताकाशं प्रसिद्धिबलेन प्रथमतरं प्रतीयत इति, अत्र ब्रूमः– प्रथमतरं प्रतीतमपि सद् वाक्यशेषगतान् ब्रह्मगुणान् दृष्ट्वा न परिगृह्यते। दर्शितश्च ब्रह्मण्यप्याकाशशब्दः–'आकाशो वै नाम नामरूपयोर्निर्वहिता' इत्यादौ। तथाऽऽकाशपर्यायवाचिनामपि ब्रह्मणि प्रयोगो दृश्यते–'ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधि विश्वे निषेदुः' (ऋ. सं. १।१६४।३९) 'सैषा भार्गवी वारुणी विद्या परमे व्योमन्प्रतिष्ठिता' (तै.उ. ३।६) 'ॐ 'कं ब्रह्म खं ब्रह्म' (छा.उ. ४।१०।५) 'खं पुराणम्' (बृ.उ. ५।१) इति चैवमादौ। वाक्योपक्रमेऽपि वर्तमानस्या-

प्रकटार्थविवरणम्

इत्यानन्त्यमेवोपसंहरति। तच्चानन्त्यं देशतः कालतो वस्तुतश्चानवच्छिन्नत्वं न ब्रह्मणोऽन्यस्योपपद्यते। अस्यायमाशयः— प्रथमश्रुतायाः श्रुतेरपि चरमश्रुतं प्रतिपिपादयिषितं लिङ्गं तात्पर्याद् बलीयो भवति। अतः समस्तजगत्प्रकृतित्वाव-धारणाभ्यामुपबृंहितमन्तवत्त्वदोषपरिजिहीर्षया प्रतिपिपादयिषितमानन्त्यमाकाशश्रुतिमपोद्य ब्रह्म समर्पयतीति। न्यायान्तरदि-दर्शयिया निरस्तमप्युद्भावयति— **यत्पुनरुक्तमिति**। "त्यजेदेकं कुलस्यार्थे"[२] इति न्यायेन भूयसीनां ब्रह्मलिङ्ग-समर्पकश्रुतीनामनुग्रहायाकाशश्रुतेरेकस्या भङ्गो युक्त इत्याह— **अत्र ब्रूम इति**। किं चाकाशशब्दस्य तत्पर्यायाणां च ब्रह्मणि प्रयोगप्राचुर्यदर्शनादत्यन्ताभ्यासेन गौणा[३] प्रथमप्रतिपत्तिर्न विरुध्यत इत्याह— **दर्शितश्चेत्यादिना**। **व्योमन्निति**। व्योम्नि परमेऽक्षरे ब्रह्मणि ऋचो वर्तन्ते। यस्मिन् अक्षरे विश्वे देवा अधि निषेदुः अधिश्रिता इत्यर्थः। किञ्च तत्रैव प्रथमानुगुण्येनोत्तरं नीयते यत्र

भाष्यभावप्रकाशिका

आनन्त्यमुक्तमत्राकाशं[शे] हि नोपसंह्रियते, किन्तूद्गीथ इति, अत आह—**तं चाकाशमिति**। ननु श्रुतेर्बाधो लिङ्गान्न क्वापि दृश्यत इति शङ्कामनुवदति—**यत्पुनरिति**। **प्रथमतरं प्रतीतमपीति**। ननु न क्वाप्याकाशशब्दस्य ब्रह्मविषयत्वमिति, अत आह— **तथाकाशेति**। तेनाकाशशब्दस्य ब्रह्मणि गौणत्वेऽप्यत्यन्ता(नन्तत्वा)भ्यासादस्यापि मुख्यवदविलम्बितप्रतिपत्तिहेतुत्वमिति भावः।

न्यायनिर्णयः

एषः' इत्याकाशात्मत्वोक्तिः। देशतोऽनन्तत्वं परत्वम्। गुणत उत्कृष्टत्वं वरीयस्त्वम्। कालतो वस्तुतश्चापरिच्छिन्नत्वमानन्त्यम्। परेभ्यः स्वरादिभ्योऽतिशयेन श्रैष्ठ्यं वा परोवरीयस्त्वम्। तथापि कथमाकाशो ब्रह्म, तत्राह— **तच्चेति**। नाब्रह्मणस्त्रिधाऽऽनन्त्यं, तेनोपक्रमोपसंहारप्रतिपाद्यतात्पर्यवदानन्त्यमाकाशस्य ब्रह्मत्वबोधीत्यर्थः। श्रुतिबाधो लिङ्गान्न दृष्ट इत्युक्तमनुवदति— **यदिति**। 'त्यजेदेकं कुलस्यार्थे' इति न्यायाद् भूयसीनां ब्रह्मलिङ्गश्रुतीनामनुग्रहायाकाशश्रुतेरेकस्या बाध इत्याह— **अत्रेति**। किंचाकाशशब्दस्य ब्रह्मणि प्रयोगप्राचुर्यादत्यन्ताभ्यासेन गौणादपि तस्मादाद्या धीः स्यादित्याह— **दर्शितश्चेति**। नाकाशशब्दस्यैव ब्रह्मणि बहुकृत्वः प्रयोगः, तत्पर्यायाणां चेत्याह— **तथेति**। व्योमन् व्योम्नि, परमे प्रकृष्टे, अक्षरे कूटस्थे ब्रह्मणि, ऋगुपलक्षिताः सर्वे वेदा ज्ञापकाः सन्ति, यस्मिन्नक्षरे विश्वे देवा अधि निषेदुरधिष्ठिताः, स्वरूपत्वेन प्रविष्टा इत्यर्थः। भार्गवी भृगुणा प्राप्ता। वारुणी वरुणेनोक्ता। सैषा विद्या 'आनन्दो ब्रह्मेति व्यजानात्' इति प्रकृता परस्मिन् ब्रह्मणि व्योम्नि स्थितेत्यर्थः। ॐकारस्य प्रतीकत्वेन वाचकत्वेन लक्षकत्वेन वा ब्रह्मत्वमुक्तम्— **ओमिति**। कं सुखम् तस्यार्थेन्द्रिययोगजत्वं वारयतुम्— **खमिति**। तस्य भूताकाशत्वं व्यासेद्धुम्— **पुराणम्** इत्युक्तम्। किंच तत्रैव प्रथमानुगुण्येनोत्तरं नीयते, यत्र तन्नेतुं शक्यम्; यत्र त्वशक्यं तत्रोत्तरानुगुण्येनेतरन्नेयमित्याह—

---

१. यद्यपि 'कं ब्रह्म खं ब्रह्म' (छा. उ. ४.१०.५) 'ओं खं ब्रह्म खं पुराणम्' (बृ.उ. ५.१.) इत्येव श्रुतिपाठानुसारी भाष्ये शुद्धः पाठः, पुरस्कृतश्चायमेव पाठो ब्रह्मविद्याभरणेनापि; तथापि न्यायनिर्णये ओं-कं-खं-पुराणमिति शब्दानां क्रमेण व्याख्यानदर्शनात्, यथावस्थितभाष्यपाठस्यैव तत्र व्याख्यातत्वावगमात् प्रायेण मुद्रितपुस्तकेषूपलभ्यमानः स एव पाठो मूले स्थापितः। परन्तु न्यायनिर्णयानुसारेण ओमित्यादि पुराणमित्यन्तमेकमेव श्रुतिवाक्यमिति भाति। रत्नप्रभायां तु 'खं पुराण' मिति श्रुत्यन्तरत्वेन गृहीतम्।

२. 'त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्' इति समग्रः श्लोकः। ३. गौणार्थस्येति पाठः स्यात्।

काशशब्दस्य वाक्यशेषवशाद् युक्ता ब्रह्मविषयत्वावधारणा। 'अग्निरधीतेऽनुवाकम्' इति हि वाक्योपक्रमगतोऽप्यग्निशब्दो माणवकविषयो दृश्यते। तस्मादाकाशशब्दं ब्रह्मेति सिद्धम्।।२२।।

।।इत्यष्टममाकाशाधिकरणम्।।

९।।प्राणाधिकरणम्।।सू. २३।।

अत एव प्राणः।।२३।।

उद्गीथे– 'प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता' इत्युपक्रम्य श्रूयते– 'कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता' (छा.उ. १।११।४,५) इति। तत्र संशयनिर्णयौ पूर्ववदेव द्रष्टव्यौ। 'प्राणबन्धनं हि सोम्य मनः' (छा.उ. ६।८।२)

शारीरकन्यायसंग्रहः

अत एव प्राणः।।२३।। अत्र च तेनैव न्यायेन जगत्प्रकृतित्वावधारणोपबृंहितं प्रतिपिपादयिषितं देवताशब्दाभिहितं चेतनत्वं स्वाविनाभूतं ब्रह्म प्राणशब्दाभिधेयतया समर्पयतीति समर्थितम्।

प्रकटार्थविवरणम्

तदन्यथा कर्तुं शक्यम्। यत्र तु न शक्यं तत्रोत्तरानुगुण्येनैव प्रथमं नीयत इत्याह— **वाक्योपक्रमेऽपीति**। यस्मादाकाशश्रुतिर्गौणी तस्मादित्युपसंहारः। इति अष्टममाकाशाधिकरणम्।

अत एव प्राणः। उद्गीथोपासनप्रसङ्गेन प्रस्तावदेवताया उपासनमुक्तमिति वीक्षयाऽऽह— **उद्गीथ इति**। उद्गीथप्रकरणे श्रूयत इत्यन्वयः। प्रस्तावं सामभक्तिविशेषमन्वायत्ता अनुगतेत्यर्थः। प्राणमभ्याश्रित्योज्जिहते उद्गच्छन्तीत्यर्थः। अतिदेशाधिकरणत्वात्

भाष्यभावप्रकाशिका

प्रथमश्रुतानुगुण्येन तत्रैव चरमश्रुतं नेतव्यम्, यत्र तदन्यथा कर्तुं शक्यम्; यत्र तु न शक्यम्, तत्रोत्तरानुगुण्येनैव प्रथमं नेयमित्याह— **वाक्योपक्रमेऽपीति**।।२२।। इत्यष्टममाकाशाधिकरणम्।

अत एव प्राणः।।२३।।उद्गीथ इति। तत्प्रकरण इत्यर्थः। ननु उभयत्र प्राणशब्दप्रयोगाभावेऽपि कथं संशय इति? अत आह—**प्राणबन्धनमिति**। न केवलं श्रुत्युक्तत्वात्, उपपन्नत्वादपीत्याह—**प्रत्यक्षमिति**। ननु भूतानामुत्पत्तिर्वाक्यशेषे श्रूयते, (यतो)

न्यायनिर्णयः

वाक्येति। तत्र दृष्टान्तः— **अग्निरिति**। आकाशश्रुतेर्गौणत्वे फलितमुपसंहरति— **तस्मादिति**।।२२।। इत्यष्टममाकाशाधिकरणम्।।

आकाशवाक्योक्तमनन्तरवाक्येऽतिदिशति– **अत एवेति**। तत्रोदाहरणम्— **उद्गीथ इति**। 'परोवरीयांसमुद्गीथमुपास्ते' इत्युक्तत्वात्, 'अथातः शौव उद्गीथः' इति च वक्ष्यमाणत्वादुद्गीथाधिकारे प्रासङ्गिकं प्रस्तावध्यानमिति वक्तु**मुद्गीथ** इत्युक्तम्। कश्चिदृषिश्चाक्रायणो नाम धनार्थं राज्ञो यज्ञं गत्वा ज्ञानवैभवं स्वस्य प्रकटयन् प्रस्तोतारमुवाच— हे प्रस्तोतः, या देवता प्रस्तावं सामभक्तिविशेषमन्वायत्ता तां चेदविद्वान् मम विदुषः संनिधौ प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति। स भीतः सन् पप्रच्छ— **कतमा** इत्यादिना। प्रतिवचनम्— **प्राण इति**। मुख्यप्राणं व्यावर्तयति— **सर्वाणीति**। प्राणमभिलक्ष्य लयकाले संविशन्ति, जन्मकाले तमेवाभिलक्ष्योज्जिहत उद्गच्छन्ति, सैषा परा देवता प्रस्तावं भक्तिविशेषमनुगतेत्यर्थः। अतिदेशकृतमर्थमाह— **तत्रेति**। आकाशशब्दस्योभयत्र प्रयुक्तेः संशयेऽपि प्राणशब्दस्य नैवमिति कुतः संशयादिः, तत्राह— **प्राणेति**। मनःशब्दलक्ष्यं तत्साक्षिचैतन्यं प्राणे परस्मिन्नैक्येन स्थितमित्यर्थः। ये प्राणस्य पञ्चवृत्तेर्वायुविकारस्य प्राणं सत्तास्फूर्तिदमात्मानं विदुस्ते ब्रह्म

'प्राणस्य प्राणम्' (बृ.उ. ४।४।१८) इति चैवमादौ ब्रह्मविषयः प्राणशब्दो दृश्यते। वायुविकारे तु प्रसिद्धतरो लोकवेदयोः। अत इह प्राणशब्देन कतरस्योपादानं युक्तमिति भवति संशयः। किं पुनरत्र युक्तम्? वायुविकारस्य पञ्चवृत्तेः प्राणस्योपादानं युक्तम्। तत्र हि प्रसिद्धतरः प्राणशब्द इत्यवोचाम। ननु पूर्ववदिहापि तल्लिङ्गाद् ब्रह्मण एव ग्रहणं युक्तम्। इहापि वाक्यशेषे भूतानां संवेशनोद्गमनं पारमेश्वरं कर्म प्रतीयते। न; मुख्येऽपि प्राणे भूतसंवेशनोद्गमनस्य दर्शनात्। एवं ह्याम्नायते– 'यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः स यदा प्रबुध्यते प्राणादेवाधि पुनर्जायन्ते' (श. ब्रा. १०।३।३।६) इति। प्रत्यक्षं चैतत् स्वापकाले प्राणवृत्तावपरिलुप्यमानायामिन्द्रियवृत्तयः परिलुप्यन्ते, प्रबोधकाले च प्रादुर्भवन्तीति। इन्द्रियसारत्वाच्च भूतानामविरुद्धो मुख्ये प्राणेऽपि भूतसंवेशनोद्गमनवादी वाक्यशेषः। अपि चादित्योऽन्नं चोद्गीथप्रतिहारयोर्देवते प्रस्तावदेवतायाः प्राणस्यानन्तरं निर्दिश्येते। न च

प्रकटार्थविवरणम्

पूर्वाधिकरणवत् संशयनिर्णयौ। तर्हि पूर्वेणैव गतत्वान्न पृथगारम्भ इत्याह— **ननु पूर्ववदिति**। अधिकाशङ्कानिरासाय पृथगारम्भ इत्यभिप्रेत्याधिकाशङ्कामाह—**न मुख्येऽपीति**। ननु तत्रेन्द्रियाणामेव लयोदयौ प्राणे श्रूयेते। अतो भूतानां लयोदयविषयो वाक्यशेषः प्राणे न घटत इत्याशङ्क्याह—**इन्द्रियसारत्वाच्चेति**। भूतेष्विन्द्रियाणि साराणि सूक्ष्मतया भोक्तृसामीप्येन च, अतस्तेषां लयोदयाभिधानेनैव इतरेषां लयोदयौ प्रसिद्धावित्यर्थः। अब्रह्मसाहचर्याच्च प्राणो न ब्रह्मेत्याह— **अपि चेति**। कतमा सा देवता उद्गीथमन्वायत्ता इत्युद्गात्रा पृष्टः चाक्रायण आदित्य इति होवाच; प्रतिहर्त्रा पृष्टः अन्नमिति होवाच इत्यादिना सामभक्तिविशेषयोर्देवते निर्दिश्येते। अब्रह्मरूपान्नादित्यसान्निध्यानु गृहीतप्रथमश्रुतप्राणश्रुत्या वायुविकारः प्राण इति वायुविकारप्राणदृष्टिविशिष्ट-प्रस्तावोपासनं विधेयमित्यधिकाशङ्कानिरासाय प्रववृते सूत्रकार इत्याह— **एवं प्राप्त इत्यादिना**।

भाष्यभावप्रकाशिका

भूतशब्दश्च प्राणिनिकायपरिग्रहे महाभूतपरिग्रहे वा युक्तो नेन्द्रियमात्रपरिग्रह इति, तत्राह—**इन्द्रियसारत्वादिति**। अतिदेशाधिकरणस्याभ्यधिकाशङ्कां दर्शयति—**अपि चेति**। वाक्यशेषे श्रूयमाणभूतशब्देन प्राणिनिकायः कथ्यते, किं वा

न्यायनिर्णयः

जानन्तीत्याह— **प्राणस्येति**। 'अमृतः प्राणो ब्रह्मैवे'त्यादिसंग्रहार्थमादिपदम्। तथापि कुतः संशयः, तत्राह— **वाय्विति**। हेतुमुक्त्वा फलमाह— **अत इति**। इहेति प्रस्ताववाक्योक्तिः। अनन्तार्थपरोपक्रमोपसंहाराभ्यामाकाशस्य ब्रह्मत्वेऽप्यत्र ब्रह्मासाधारणधर्मोपक्रमाद्यदृष्टेर्न ब्रह्मतेति धिया विमृश्य पूर्वपक्षयति— **किमिति**। प्रस्तावश्रुतेः स्पष्टब्रह्मलिङ्गाया ब्रह्मणि प्रस्तावेऽध्यस्य ध्येये समन्वयोक्तेः संगतयः। पूर्वपक्षे प्राणदृष्ट्या प्रस्तावोपास्तिः, सिद्धान्ते ब्रह्मदृष्ट्येति फलम्। वैदिकप्राणशब्दस्य तादृक्प्रयुक्तिसिद्धे ब्रह्मणि वाचकत्वमाशङ्क्याह— **तत्रेति**। तात्पर्यरहितलौकिकवैदिकप्रयोगत्यागात् तात्पर्यवदनेकलिङ्गात् पूर्वन्यायेन ब्रह्म ग्राह्यमिति शङ्कते— **नन्विति**। ज्यायस्त्वादि लिङ्गमत्र नास्तीत्याशङ्क्याह— **इहेति**। 'अन्यथासिद्धेर्न श्रुतिबाधकतेत्याह— **नेति**। तदेवं वैदिकं दर्शनमाह— **एवं हीति**। तर्हि तस्यामवस्थायामिति यावत्। वाक् अनुक्तकर्मेन्द्रियोपलक्षणम्। चक्षुःश्रोत्रे तादृग्बुद्धीन्द्रियाणाम्। बुद्धिरपि मनसा लक्ष्यते। प्राणस्यापि स्वापे बुद्ध्यादिवल्लयात्र लयस्थानतेत्याशङ्क्याह— **प्रत्यक्षं चेति**। ननु भूतानामुत्पत्त्यादि वाक्यशेषे श्रुतम्; भूतशब्दश्च प्राणिसमूहस्य महाभूतानां च वाचको, नेन्द्रियमात्रस्य; तत्र प्राणे वाक्यशेषः सिद्धः, तत्राह— **इन्द्रियेति**। भूतेष्विन्द्रियाणि सूक्ष्मत्वाद्भोक्तृसामीप्याच्च साराणि, अतस्तेषां लयोदयोक्त्येतरेषामपि तत्सिद्धेः शेषघटनेत्यर्थः। अब्रह्मसाहचर्याच्च प्राणो न ब्रह्मेत्याह— **अपि चेति**। उद्गात्रा कतमा सा देवतोद्गीथमन्वायत्तेति पृष्टश्चाक्रायणः प्रत्युवाच— आदित्य इति। प्रतिहर्त्रा च कतमा सा देवता प्रतिहारमन्वायत्तेति पृष्टोऽन्नमित्युवाचेत्यादिना भक्तिदेवते कार्यकरणवत्त्यावादित्यान्ने उक्ते। तयोरब्रह्मणोः संनिधानात् प्राणस्यापि भक्तिदेवतात्वाद-

---

१. 'लिङ्गस्य' इति आदिः।

तयोर्ब्रह्मत्वमस्ति; तत्सामान्याच्च प्राणस्यापि न ब्रह्मत्वमित्येवं प्राप्ते सूत्रकार आह–

'अत एव प्राणः' इति। 'तल्लिङ्गात्' इति पूर्वसूत्रे निर्दिष्टम्। अत एव तल्लिङ्गात् प्राणशब्दमपि परं ब्रह्म भवितुमर्हति। प्राणस्यापि हि ब्रह्मलिङ्गसंबन्धः श्रूयते– 'सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते' (छा.उ. १।११।५) इति। प्राणनिमित्तौ सर्वेषां भूतानामुत्पत्ति-प्रलयावुच्यमानौ प्राणस्य ब्रह्मतां गमयतः। ननूक्तं मुख्यप्राणपरिग्रहेऽपि संवेशनोद्गमनदर्शनमविरुद्धं, स्वापप्रबोधयोर्दर्शनादिति। अत्रोच्यते– स्वापप्रबोधयोरिन्द्रियाणामेव केवलानां प्राणाश्रयं संवेशनोद्गमनं दृश्यते, न सर्वेषां भूतानाम्। इह तु सेन्द्रियाणां सशरीराणां च जीवाविष्टानां भूतानाम्, 'सर्वाणि ह वा इमानि भूतानि' इति श्रुतेः। यदाऽपि भूतश्रुतिर्महाभूतविषया परिगृह्यते तदाऽपि ब्रह्मलिङ्गत्वमविरुद्धम्। ननु सहापि विषयैरिन्द्रियाणां स्वापप्रबोधयोः प्राणेऽप्ययं प्राणाच्च प्रभवं शृणुमः– 'यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति' (कौ.उ. ३।३) इति। तत्रापि तल्लिङ्गात् प्राणशब्दं ब्रह्मैव। यत्पुनरन्नादित्यसंनिधानात् प्राणस्याब्रह्मत्वमिति, तदयुक्तम्।

प्रकटार्थविवरणम्

भवन्ति इति भूतानीति यौगिकवृत्त्या यत्किञ्चिद् भवनधर्मवत् तस्य सर्वस्य संवेशनोद्गमनं न मुख्ये प्राण उपपद्यत इत्युक्तम्। इदानीं प्रसिद्धिबलेन महाभूतपरिग्रहेऽपि न विरोध इत्याह— **यदापीति**। प्राणस्य भौतिकत्वादेव महाभूतकारणत्वं न संभवतीत्यर्थः। केवलानामिन्द्रियाणां प्राणाधीनत्वमुक्तम्। तत्र विशेषं शङ्कते— **ननु सहापीति**। वायुविकारः प्राणः तत्र नोच्यत इत्याह— **तत्रापीति**।

भाष्यभावप्रकाशिका

महाभूतानि, उत विकारजातम्, सर्वथाऽपि प्राणस्य भूतकारणत्वं श्रूयमाणमनुपपन्नमित्याह—**अत्रोच्यते स्वापेति**। ननु भूतशब्देन विकारजातपरिग्रहेऽपि प्राणे लयः प्राणादुद्गमनं च संभवतीति शङ्कते—**ननु सहापीति**। **संनिधानस्याकिञ्चित्करत्वादिति**। वाक्यात् संनिधानं दुर्बलमित्यर्थः।

न्यायनिर्णयः

ब्रह्मतेत्यर्थः। संनिध्यनुगृहीतप्रथमश्रुतप्राणश्रुत्या वायुविकारसिद्धौ तद्दृष्ट्या प्रस्तावोपास्तिरित्युपसंहर्तुमितिशब्दः। पूर्वपक्षमनूद्य सिद्धान्तयति— **एवमिति**। ज्यायस्त्वादिवन्नात्र लिङ्गं भातीत्याशङ्क्याह— **प्राणस्येति**। ब्रह्मलिङ्गं स्फोरयितुं श्रुतेरर्थमाह— **प्राणेति**। वाक्यशेषस्यान्यथासिद्धिं स्मारयति— **नन्विति**। स्वापाद्युक्तेः संवर्गविद्याधिकारात् प्रकृतोक्तेश्चोद्गीथसंबन्धान्नानयोरेकवाक्य-तेत्याह— **अत्रेति**। किंच वाक्यशेषस्थो भूतशब्दो योगाद्विकारजातं ब्रूयात्, रूढ्या वा महाभूतानि। आद्ये, प्रकृतवाक्यस्य न स्वापादिवाक्येन तुल्यार्थतेत्याह— **स्वापेति**। प्रकृतश्रुतेर्विकारमात्रलयाद्यर्थत्वे सर्वशब्दश्रुतिमनुकूलयति— **सर्वाणीति**। तथा च प्राणार्थत्वेऽपि स्वापोक्तेर्नास्यास्तादर्थ्यम्। न हि विकारमात्रसंवेशनादि परस्मादन्यत्र लभ्यमित्यर्थः। कल्पान्तरं प्रत्याह— **यदेति**। प्राणस्य भौतिकत्वान्न महाभूतयोनितेत्यर्थः। भूतशब्देन विकारजातग्रहेऽपि न मुख्यप्राणप्रत्युक्तिरिति शङ्कते— **नन्विति**। प्राणशब्दलक्ष्ये चिदात्मनि जीवैक्यापत्तौ भेदकवागाद्युपाधीनां जडं प्राणमुद्दिश्य लयः स्यादित्याह— **तदेति**। जीवेनैकतया प्राप्यत्वलिङ्गादशेषविकारलयस्थानत्वलिङ्गाच्च न मुख्यप्राणार्थत्वं तस्यापीत्याह— **तत्रेति**। संनिधेरधिकाशङ्कामुक्तामनुभाषते— **यदिति**। लिङ्गेन बाध्यः संनिधिरित्याह— **तदिति**। एकवाक्यत्वं वाक्यशेषस्तद्बलं तद्गतं लिङ्गं, तेन ब्रह्मता प्राणस्य स्थिता,

वाक्यशेषबलेन प्राणशब्दस्य ब्रह्मविषयतायां प्रतीयमानायां संनिधानस्याकिंचित्करत्वात्। यत्पुनः प्राणशब्दस्य पञ्चवृत्तौ प्रसिद्धतरत्वं, तदाकाशशब्दस्येव प्रतिविधेयम्। तस्मात् सिद्धं प्रस्तावदेवतायाः प्राणस्य ब्रह्मत्वम्।

अत्र केचिदुदाहरन्ति– 'प्राणस्य प्राणम्' 'प्राणबन्धनं हि सोम्य मनः' इति च। तदयुक्तम्। शब्दभेदात्, प्रकरणाच्च संशयानुपपत्तेः। यथा पितुः पितेति प्रयोगेऽन्यः पिता षष्ठीनिर्दिष्टोऽन्यः प्रथमानिर्दिष्टः पितुः पितेति गम्यते, तद्वत् 'प्राणस्य प्राणम्' इति शब्दभेदात् प्रसिद्धात्प्राणादन्यः प्राणस्य प्राण इति निश्चीयते। न हि स एव तस्येति भेदनिर्देशार्हो भवति। यस्य च प्रकरणे यो निर्दिश्यते नामान्तरेणापि स एव तत्र प्रकरणी निर्दिष्ट इति गम्यते। यथा ज्योतिष्टोमाधिकारे– 'वसन्ते वसन्ते ज्योतिषा यजेत' इत्यत्र ज्योतिःशब्दो ज्योतिष्टोमविषयो भवति, तथा परस्य ब्रह्मणः प्रकरणे 'प्राणबन्धनं हि सोम्य मनः' इति श्रुतः प्राणशब्दो वायुविकारमात्रं कथमवगमयेत्? अतः संशयाविषयत्वान्नैतदुदाहरणं युक्तम्। प्रस्तावदेवतायां तु प्राणे संशयपूर्वपक्षनिर्णया उपपादिताः।।२३।।

।।इति नवमं प्राणाधिकरणम्।।

प्रकटार्थविवरणम्

सन्निधेः स्ववाक्यगतं ब्रह्मलिङ्गं बलीय इत्याह— **अकिञ्चित्करत्वादिति**। जगत्प्रकृतित्वावधारणोपबृंहितं प्रति[प्रतिपर्यायं] देवताशब्दाभिहितं चेतनत्वं प्राणश्रुतिमपबाध्य ब्रह्म लक्षयतीत्याह— **तदाकाशशब्दस्येवेति**। यस्मात् प्राणकारणं ब्रह्म प्राणशब्देन लक्ष्यते तस्मात् सर्वजगत्कारणब्रह्मदृष्ट्या प्रस्तावोपासनं सिद्धमित्याह— **तस्मादिति**।

वृत्तिकृतामुदाहरणमनूद्य दूषयति— **अत्र केचिदिति**। संशयविषयभूतं हि वाक्यं सर्वत्रोदाहृत्य निर्णीयते। संशयाविषयत्वान्नेदमुदाहरणमित्यर्थः। प्राणस्य पञ्चधा व्यापारहेतुः तत्साक्षी तस्य प्राण इत्युच्यते। शब्दभेदः प्रपञ्चितः; प्रकरणमिदानीं प्रपञ्चयति— **यस्य चेत्यादिना**। प्राणः परमात्मा बन्धनमाश्रयो यस्येति विग्रहः।। इति प्राणाधिकरणम्।।

भाष्यभावप्रकाशिका

शब्दभेदं प्रकरणं च क्रमेण दर्शयति—**यथा पितुः पितेत्यादिना**। ननु त्वन्मतेऽपि संशयोऽनुपपन्नः; वाक्यशेषविरोधात्, इत्याशङ्क्य प्रथमश्रुतप्राणशब्दश्रुत्यवष्टम्भेन संशयः स्यादित्याह—**प्रस्तावेति**।।२३।। इति नवमं प्राणाधिकरणम्।

न्यायनिर्णयः

स्ववाक्यस्थलिङ्गस्य वाक्यान्तरस्थसंनिधेर्बलीयस्त्वात्, अतो नास्याब्रह्मतेत्यर्थः। संनिधेरब्रह्मताऽभावेऽपि प्राणस्य श्रुतेरब्रह्मतेत्याशङ्क्याह— **यदिति**। जगत्प्रकृतित्वावधारणोपबृंहितं प्रतिपिपादयिषितं देवताशब्दितं चेतनत्वं प्राणश्रुतिं बाधित्वा ब्रह्म लक्षयतीत्याह— **तदिति**। प्राणशब्देन कारणब्रह्मलक्षणात् तद्दृष्ट्या प्रस्तावोपास्तिमुपसंहरति— **तस्मादिति**।

वृत्तिकृतामुदाहरणमाह— **अत्रेति**। सर्वत्र संदिग्धं वाक्यमुदाहृत्य निर्णीयते, इदं त्वसंदेहान्नैवमिति दूषयति— **तदिति**। शब्दभेदं विवृणोति— **यथेति**। प्राणस्य पञ्चधा वृत्तिहेतुस्तत्साक्षी तस्य प्राण इत्युच्यते। राहोः शिर इतिवद् व्यपदेशमाशङ्क्य घटो घटस्येत्यदृष्टेर्नैवमित्याह— **न हीति**। प्रकरणं प्रपञ्चयति— **यस्येति**। तदेव दृष्टान्तेन स्पष्टयति— **यथेति**। प्राणः परमात्मा बन्धनमाश्रयः स्वरूपं यस्येति विग्रहः। वाक्ययोर्निश्चितार्थत्वे फलितमाह— **अत इति**। त्वदुदाहरणेऽपि वाक्यशेषविरोधात् तुल्यम-संदिग्धत्वमित्याशङ्क्याह— **प्रस्तावेति**।।२३।। इति नवमं प्राणाधिकरणम्।।

१०।।ज्योतिश्चरणाधिकरणम्।।सू. २४-२७।।

ज्योतिश्चरणाभिधानात्।।२४।।

इदमामनन्ति– 'अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः[1]पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद् यदिदमस्मिन्नन्तः पुरुषे ज्योतिः' (छा.उ. ३।१३।७) इति। तत्र संशयः– किमिह

शारीरकन्यायसंग्रहः

ज्योतिश्चरणाभिधानात्।।२४।। अत्र यच्छब्दस्य द्युसंबन्धलिङ्गोपस्थापितं प्रकृतं ब्रह्म अभिधेयत्वेन समर्प्यताम्, किं वा ज्योतिश्श्रुत्यु पस्थापितज्योतिरेवाभिधेयत्वेन—इति विशये यद्यपि ज्योतिश्शब्दस्य श्रुतित्वात् तदुपस्थापितं ज्योतिर्बलीयः लिङ्गसमर्पितात् प्रकृताद् ब्रह्मणः, तथापि ज्योतिषि यच्छब्दार्थे प्रमाणान्तरमन्वेषणीयम्; ब्रह्म तु त्रिपात् श्रुतिप्रमाणेनैव प्रकृतम्, उपासनायां विनियोगसाकाङ्क्षं च। अतश्च श्रुत्युपस्थापित-विजातीयप्रमाणसाकाङ्क्षज्योतिरभिधानाद् वरं लिङ्गोपस्थापित-सन्निहिततरश्रुतिप्रमाणसिद्धैकवाक्यतासाकाङ्क्षब्रह्माभिधानम्, यच्छब्दस्य बुद्धिस्थाक्षेप लाघवादेकवाक्यतासापेक्षत्वादागमस्य—इति न्यायेन यच्छब्दस्य ब्रह्म अभिधेयमित्युक्तम्। पुनश्च प्रमाणान्तरेण निश्चितेऽर्थे बुद्धौ संनिहिते अर्थान्तराभिधानमपि तत्र प्रयुज्यमानं तत्परतयैव प्रयुज्यते, यथा ज्योतिष्टोमे प्रकृते बुद्धौ सन्निहिते "वसन्ते वसन्ते ज्योतिषा यजेत" इति ज्योतिशशब्दवदिति न्यायेन याच्छब्देन सन्निहिते ब्रह्मणि प्रयुज्यमानो ज्योतिश्शब्दो ब्रह्मपर इति न्यायद्वयमत्र दर्शितम्।

[2]**छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात् तथा हि दर्शनम्।।२५।। भूतादिपादव्यपदेशोपपत्तेश्चैवम्।।२६।। उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्।।२७।।** अत्र श्रुत्यादिषु प्रथमैकप्रमाणात् उत्तरानेकप्रमाणं बलवत्, प्रत्ययसंवादस्य तात्पर्यनिमित्तत्वात्—इति न्यायेन भूतादिपादलिङ्गात्, "तावानस्य" इति मन्त्रलिङ्गात्, "यद्वै तद् ब्रह्मेति इदं वाव तत्" इति वाक्याच्च गायत्री ब्रह्म इति निर्णीतम्।

प्रकटार्थविवरणम्

ज्योतिश्चरणाभिधानात्। छान्दोग्यगतं विषयवाक्यं पठति— इदमामनन्तीति। अतो दिवो द्युलोकात्परतः यज्ज्योतिर्दीप्यते प्रकाशते[3]तदिति जाठरेऽध्यस्यते। विश्वतः पृष्ठेष्विति प्राणिनिकायादुपरि, सर्वतः पृष्ठेष्विति भूरादिलोकादुपरि, उत्तमा न विद्यन्ते येभ्यस्तेऽनुत्तमाः तेषु; तथापि तेषामुत्तमत्वं न सिद्ध्यतीत्यत आह— **उत्तमेष्विति।** ज्योतिशशब्दस्य लोके

भाष्यभावप्रकाशिका

ज्योतिश्चरणाभिधानात्।।२४।। विश्वतःपृष्ठेषु=विश्वेषामुपरितनेष्वप्यनवयवेन वर्तत इत्याह—**सर्वत** इति। नास्त्येतेभ्योऽन्यदुत्तममित्यनुत्तमाः, तेन सर्वोत्तममुक्तम्। ननु अधिकरणस्य संशयो नोपपद्यते; पूर्वाधिकरणन्यायेनैव

न्यायनिर्णयः

आकाशवायुवाक्ययोर्ब्रह्मार्थत्वोक्त्या तेजोवाक्यस्यापि तदर्थत्वमाह— ज्योतिरिति। छान्दोग्यवाक्यं पठति— **इदमिति। गायत्र्युपाधिब्रह्मोपास्त्यनन्तरमुपास्त्यन्तरोक्त्यर्थोऽथशब्दः।** अतो दिवो द्युलोकात्परः परस्ताद् यज्ज्योतिर्दीप्यते तदिदमिति जाठरे **ज्योतिष्यध्यस्यते।** कुत्र तद्दीप्यते, तत्राह— **लोकेष्विति।** तेऽपि क्व सन्ति, तत्राह— **विश्वत इति।** विश्वस्मात्प्राणिवर्गादु- **परिष्टादित्यर्थः। तेषां** प्रसिद्धलोकप्रवेशमाशङ्क्याह— **सर्वत इति।** सर्वस्माद्भूरादिलोकादुपरीत्यर्थः। उत्तमा न विद्यन्ते **येभ्यस्तेऽनुत्तमास्तेषु।** तथापि कथं तेषामुत्कर्षः, तत्राह— **उत्तमेष्विति।** इदंशब्दार्थं स्फुटयति— **यदीति।** ज्योतिःशब्दस्य लोके

---

१. **'विश्वतः पृष्ठेषु' इत्यत्र विश्वशब्दस्य सङ्कुचद्वृत्तित्वव्यावृत्तये** 'सर्वतः' इति तस्य व्याख्यानमिति भामती।

२. **ज्योतिश्चरणाधिकरणे गायत्रीविद्यारूपसगुणब्रह्मविद्यानिर्णयार्थं** 'छन्दोऽभिधाना'दित्यादि **सूत्रद्वयमन्तरागर्भिताधिकरणत्वेन न्यायसंग्रहकृतामभिप्रेतम्। दृश्यन्ते चेदृशान्यधिकरणानि पूर्वमीमांसायामपि।** ३. 'तदिदमिति' इति पाठः स्यात्।

ज्योतिःशब्देनादित्यादि ज्योतिरभिधीयते, किंवा परमात्मेति। अर्थान्तरविषयस्यापि शब्दस्य तल्लिङ्गाद् ब्रह्मविषयत्वमुक्तम्। इह तु तल्लिङ्गमेवास्ति नास्तीति विचार्यते। किं तावत् प्राप्तम्? आदित्यादिकमेव ज्योतिःशब्देन परिगृह्यत इति। कुतः? प्रसिद्धेः। तमो ज्योतिरिति हीमौ शब्दौ परस्परप्रतिद्वन्द्विविषयौ प्रसिद्धौ। चक्षुर्वृत्तेर्निरोधकं शार्वरादिकं तम उच्यते। तस्या एवानुग्राहकमादित्यादिकं ज्योतिः। तथा

प्रकटार्थविवरणम्

जाठरज्योतिषि (?)प्रयोगात् "आत्मैवास्य ज्योतिः" इति चात्मनि प्रयोगात् संशयमाह— **तत्रेति**। नन्वाकाशशब्दस्यार्थान्तरे रूढस्यापि ब्रह्मविषयत्वं निरणायि; तेनैवैतद्गतमिति न पृथगारम्भणीयमित्याशङ्क्याह— **अर्थान्तरेति**। स्ववाक्ये ज्योतिषो ब्रह्मलिङ्गाभावात् पूर्वन्यायाविषयत्वात् पृथगारम्भणीयमित्यर्थः। अधिकरणारम्भमुपपाद्य पूर्वपक्षमाह— **किं प्राप्तमित्यादिना**। चक्षुर्वृत्तेर्निरोधकमिति भावरूपत्वमाह। तमो भावः, आवरणत्वात्, कुड्यवदिति प्रयोगः। शार्वरादीति पूर्व[रूप]विशेषं लक्षयति। तमो द्रव्यम्, रूपवत्त्वात्, मेघवदिति। न च तमसोऽप्रामाणिकत्वादाश्रयासिद्धिः, विप्रतिपत्त्यालम्बना[म्बनत्वादा]श्रयत्वोपपत्तौ प्रमाणविशेषवैयर्थ्यात्। तमसश्च रूपवत्त्वेन नित्यानुभवसिद्धत्वात् न स्वरूपासिद्धिः। हेतुत्वं च व्याप्तत्वेन, न तु प्रामाणिकत्वेन; अन्यथा कनकेनापि वह्न्यनुमानप्रसङ्गात्।

अन्ये त्वाहुः— चक्षुषो रूपग्रहणशक्तिरौत्सर्गिकी; तमःप्रतिबन्धात्तु क्वचित् कार्यानुदयः; तत्र प्रतिबन्धध्वंसायाऽऽलोकापेक्षाऽस्तु यत्र प्रतिबन्धो विद्यते; तमसस्तु विनाऽप्यालोकमालोकस्येवालोचनं चक्षुः; अतः प्रामाणिकत्वान्नाश्रयासिद्ध्याद्याशङ्का इति।

न चान्वयव्यतिरेकाभ्यां[१] तमसोऽभावत्वावगमात् कालात्ययापदिष्टतेति वाच्यम्। एकाश्रयत्वविरोधेनाप्यन्वयव्यतिरेकोपपत्तौ प्रकृताप्रतिपक्षत्वात्; अन्यथा प्रकाशोऽपि तमोऽभाव इत्यापद्येत। किं च प्रकाशविशेषस्य तमोविरोधित्वेऽपि मन्दप्रदीपे वेश्मन्यस्पष्टरूपदर्शनानुपपत्त्या तमसोऽप्यनुवृत्तिदर्शनाद् व्यतिरेकासिद्धिः। न च तत्र प्रकाशान्तराभावादस्पष्टरूपदर्शनम्, बहुलालोकविततेऽपि प्रसङ्गात्, अतो नान्वयव्यतिरेकबाधः। तमो न रूपवत् स्पर्शहीनत्वात्, आत्मवदित्यनुमानबाध इति चेन्न, अम्भस्सम्भारगम्भीरप्रावृडम्भोदस्येव रूपवत्त्वोपलम्भविरोधात्; तमसोऽप्यनुद्भूतस्पर्शत्वाभ्युपगमेन हेत्वसिद्धेः। महत्त्वे सति

भाष्यभावप्रकाशिका

गतार्थत्वादित्यत आह—**अर्थान्तरेति**। ननु अवभासनमात्रे ज्योतिःशब्दः प्रयुज्यत इति, तत्राह—**तमो ज्योतिरिति**। ननु अज्ञानतमोविरोधित्वेन ब्रह्मापि ज्योतिःशब्दमिति, तत्राह—**चक्षुर्वृत्तेरिति**। अर्थावारकत्वेन निरोधकत्वम्। एवं प्रतिपक्षनिर्णयेन प्रतिपक्षान्तरं निर्णीयत इत्याह—**तस्या एवेति। न हि रूपादिहीनमिति**। रूपवतस्सावयवस्यैव दीप्तिसंभवादित्यर्थः। ज्योतिषो

न्यायनिर्णयः

तेजसि रूढेः, श्रुतौ चात्मनि निरूढेर्विचारबीजं संशयमाह— **तत्रेति**। आकाशादिशब्दस्यार्थान्तरे रूढस्यापि ब्रह्मार्थत्वसिद्धेस्तेनैतद्गतमित्यसंशयान्न पृथगारभ्यमित्याशङ्क्याह— **अर्थान्तरेति**। स्ववाक्ये ज्योतिषो ब्रह्मलिङ्गाभावादुक्तन्यायानवताराद-गतार्थतेत्यर्थः। वाक्यशेषस्थब्रह्मलिङ्गात् प्राणादिशब्दस्य गौणतोक्ता। प्रकृते ब्रह्मलिङ्गादृष्टेस्तेजोलिङ्गस्यैव दृष्टेरौत्सर्गिकमुख्यसंप्रत्ययस्य नापवाद इत्याकाङ्क्षाद्वारा पूर्वपक्षयति— **किं तावदिति**। कौक्षेये ज्योतिष्यारोप्योपास्ये परस्मिन् ब्रह्मण्युक्तश्रुतेः समन्वयोक्तेः श्रुत्यादिसंगतयः। स्ववाक्ये स्पष्टब्रह्मलिङ्गाभावेऽपि ब्रह्मप्रत्यभिज्ञापकलिङ्गस्यैव तथात्वात् पादसंगतिः। फलं पूर्वपक्षे कौक्षेये ज्योतिष्यादित्यादिदृष्ट्योपास्तिः, सिद्धान्ते ब्रह्मदृष्ट्येति। ज्योतिःशब्दस्य प्रकाशवाचित्वाच्चित्प्रकाशं हित्वा किमिति लौकिकप्रकाशार्थतेति शङ्कते— **कुत इति**। तमोविरोधिनि ज्योतिःशब्दस्य रूढेस्तेजसस्तथात्वात् तदेवात्र ज्योतिरित्याह— **प्रसिद्धेरिति**। तामेव स्फोरयति— **तम इति**। अज्ञानतमोविरोधि ब्रह्मापि तर्हि ज्योतिरिति, तत्राह— **चक्षुरिति**। अर्थावरकत्वेन निरोधकत्वोक्त्या भावत्वमपि द्योतितम्। रूपित्वेनापि तद् वक्तुं विशिनष्टि— **शार्वरादिकमिति**। एवमपि कुतो ज्योतिर्निश्चितमित्याशङ्क्य प्रतिपक्षनिर्णयादित्याह— **तस्या इति**। ज्योतिःश्रुत्या तेजो ज्योतिरित्युक्त्वा तत्रैव लिङ्गमाह— **तथेति**। ब्रह्मण्यपि

१. आलोकाभावे सति तमसो भावात्, तदभावे चाभावादिति भावः। अभावत्वेति। आलोकाभावरूपत्वेत्यर्थः।

'दीप्यते' इतीयमपि श्रुतिरादित्यादिविषया प्रसिद्धा। न हि 'रूपादिहीनं ब्रह्म 'दीप्यते' इति मुख्यां श्रुतिमर्हति। द्युमर्यादत्वश्रुतेश्च। न हि चराचरबीजस्य ब्रह्मणः सर्वात्मकस्य द्यौर्मर्यादा युक्ता। कार्यस्य तु ज्योतिषः परिच्छिन्नस्य द्यौर्मर्यादा स्यात्। 'परो दिवो ज्योतिः' इति च ब्राह्मणम्। ननु कार्यस्यापि ज्योतिषः सर्वत्र गम्यमानत्वाद् द्युमर्यादावत्त्वमसमञ्जसम्। अस्तु तर्ह्यत्रिवृत्कृतं तेजः प्रथमजम्। न; अत्रिवृत्कृतस्य तेजसः प्रयोजनाभावादिति। इदमेव प्रयोजनं यदुपास्यत्वमिति चेत्? न; प्रयोजनान्तरप्रयुक्तस्यैवादित्या-

प्रकटार्थविवरणम्

स्पर्शोपलम्भशून्यत्वेनारूपत्वसाधने रश्मिजालगततत्रसरेणुषु[2] व्यभिचारः। तत्र कार्यवशादनुमेयः स्पर्श इति चेत्, इहापि प्रत्यक्षोपलब्धरूपत्वादनुमेयो[3] भविष्यति। ननु कार्यद्रव्यं अनेकद्रव्यारब्धं दृष्टम्; इह तदनुपलम्भाद् व्यापकानुपलब्धिबाधान्न द्रव्यं तमः। तन्न; कार्यदर्शनादेव विद्युदादिकारणवत् तत्सिद्धेः। '[4]सूक्ष्मतेजोऽवयवद्वारको मूलकारणस्यैव विवर्त इति रहस्यम्। प्रभावच्चाप्रतिघातः, विनाशादूर्ध्वं च लब्धावयव्युपलम्भः। तस्माद् व्यापकानुपलब्धिबाधाभावात् न द्रव्यं तमः।

किं च सर्वप्रकाशप्रागभावत्वे सर्वप्रकाशोदये निवर्तेत। एकप्रागभावत्वे सवितृकिरणसन्ततेऽपि देशे प्रदीपप्रागभावात् तमोभावबुद्धिप्रसङ्गः। प्रध्वंसत्वे च नित्यत्वप्रसङ्गः। संसर्गाभावत्वे किम् इह प्रकाशो नास्तीति बुद्धिगोचरोऽगोचरो वा? नाद्यः, प्रकाशाभावे सति इह प्रकाशो नास्तीति बुद्धेरेवासंभवात्[5], संयुक्तविशेषणविशेष्यभावेनाभावः प्रत्यक्ष इति तार्किकस्थितेः। विरोधिदर्शनोत्थेन तु तमसा[6] संविदगोचरत्वे कुतः संसर्गाभावत्वसिद्धिः? तस्माद् यत्किञ्चिदेतदित्यलं प्रसङ्गेनागतेन।

बहुतरब्रह्मलिङ्गावगमेन पूर्वमाकाशादिश्रुतिः स्वार्थात् प्राच्यावि। अत्र त्वब्रह्मलिङ्गान्येव बहूनि विद्यन्ते इत्याह— **द्युमर्यादत्वेत्यादिना।** ननु द्यौर्मर्यादा न घटते चेद्, मा घटिष्ट; ततः किमित्याशङ्क्याह— **परो दिव इति।** यथा ब्रह्मणो मर्यादा न घटते तथा कार्यस्यापि न घटत इत्यनर्थकमेवेदं वाक्यमिति "[7]कश्चिदाक्षिपति— **नन्विति।** एकदेशी समाधत्ते— **अस्तु तर्हीति।** यद्यपि त्रिवृत्कृतं ज्योतिर्दिवोऽर्वागपि विद्यते, तथाप्यबन्नास्पृष्टं यत्तेजस्तद् दिवः परस्ताद् भविष्यत्यदोषस्य वेदस्यानर्थक्यायोगादित्यर्थः। अध्ययनविधिपरिगृहीतस्य सप्रयोजने प्रामाण्यं वक्तव्यम्, न चेदानीमत्रिवृत्कृतस्य तस्मिन्(?) प्रयोजनमस्तीत्याह— **नेति।** एकदेशी प्रयोजनमाह— **इदमेवेति।** निष्प्रयोजनस्योपासनाऽपि न संभवतीत्याह— **नेति।** अत्रिवृत्कृतं

भाष्यभावप्रकाशिका

मर्यादावत्त्वे प्रमाणमाह—**परो दिवो ज्योतिरिति।** आक्षेप्ताऽऽह—**ननु कार्यस्यापीति।** एकदेशी परिहरति-—**अस्तु तर्हीति।** अबन्नाभ्यामसंयुक्तमत्रिवृत्कृतं तेज उच्यते। आक्षेप्ता दूषयति—**नात्रिवृदिति।** सर्वास्वर्थक्रियासु त्रिवृत्कृतस्यैवोपयोगादित्यर्थः। एकदेशी शङ्कते—**इदमेवेति।** आक्षेप्ता निराकरोति—**न प्रयोजनान्तरेति।** किञ्चात्रिवृत्कृतं तेज एव नास्ति, "तासां त्रिवृतं

न्यायनिर्णयः

युक्ता दीप्तिरित्यन्यथासिद्धिं वारयति— **न हीति।** रूपादिमतः सावयवस्यैव दीप्तियोगादित्यर्थः। कार्ये ज्योतिषि लिङ्गान्तरमाह— **द्युमर्यादत्वेति।** अन्यथासिद्धिं निरस्यति— **न हीति।** असिद्धिं प्रत्याह— **कार्यस्येति।** ज्योतिषो द्युमर्यादत्वश्रुतिरेव कीदृशी? तत्राह— **पर इति।** ब्रह्मवत् कार्यस्यापि मर्यादाऽयोगादनर्थकं ब्राह्मणमित्याक्षिपति— **नन्विति।** चोदकैकदेशी परिहरति— **अस्त्विति।** त्रिवृत्कृतं तेजो दिवोऽर्वागपि गम्यते, तथापीतरत् ततः परस्ताद्भविष्यति, वेदस्यादुष्टत्वेनानर्थक्यायोगादित्यर्थः। त्रिवृत्कृतस्यैवार्थक्रियावत्त्वादफलेऽन्यस्मिन्न वाक्यप्रामाण्यमित्याक्षेप्ता ब्रूते— **नेति।** पूर्ववादिदेशीयः शङ्कते— **इदमेवेति।**

---

१. भाष्ये-न हि रूपादिहीनमिति। भास्वररूपमेव दीप्तिशब्दार्थ इति अनेन सूच्यते। द्र. ब्र. वि. २. त्रसरेणोः रूपं विनाऽन्ये गुणा न प्रत्यक्षा इत्यङ्गीकारात् तत्र स्पर्शोपलम्भशून्यत्वमस्ति, अरूपत्वं च नास्ति इति व्यभिचारः। ३. शीतस्पर्शा चूतच्छाया, उष्णस्पर्शा वटच्छायेति प्रतीतिरपि तमसि स्पर्शवत्त्वमुपोद्बलयति। छाया च तम एव। ४. 'सूक्ष्मतमोऽवयवद्वारक' इति पाठः स्यादिति भाति। ५. 'न चान्धकारावष्टब्धे देशेऽक्षसंयोगः संभवी' इति वेदान्ततत्त्वालोकः। तथा च धर्मिज्ञानाभावादुक्तबुद्ध्यसंभव इति भावः। ६. 'मम सा' इति टिप्पण्यामुल्लिखितः पाठो युक्त इति भाति। तत्रायमर्थः— ननु तर्हि प्रकाशाभावबुद्धिस्तव कथं स्यादिति पृष्ट आह—विरोधीति। विरोधि=तमः। तद्दर्शनेन प्रकाशाभावो ऽनुमीयत इति भावः। सा=प्रकाशाभावबुद्धिः। द्वितीयकल्पं निरचष्टे—संविदि। 'सा संवित्' इति वा ग्रन्थच्छेदः। द्वितीयकल्पनिरासः- 'अगोचरत्वे' इत्यादिना। 'बुद्धिगोचरोऽगोचरो वा' इत्युपक्रमानरोधात्। 'आलोकाभावप्रतीतिस्त्वस्माकं परोक्षैव' इति न्यायरत्नदीपावलिः। पृ. २२२। ७. अयं सिद्धान्त्येव पूर्वपक्षाक्षेप्तेति कल्पतरुः।

देरुपास्यत्वदर्शनात्। 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' (छा.उ. ६।३।३) इति चाविशेषश्रुतेः। न चात्रिवृत्कृतस्यापि तेजसो द्युमर्यादत्वं प्रसिद्धम्। अस्तु तर्हि त्रिवृत्कृतमेव तत्तेजो ज्योतिःशब्दम्। ननूक्तमर्वागपि दिवोऽवगम्यतेऽग्न्यादिकं ज्योतिरिति। नैष दोषः। सर्वत्रापि गम्यमानस्य ज्योतिषः 'परो दिवः' इत्युपासनार्थः प्रदेशविशेषपरिग्रहो न विरुध्यते। न तु निष्प्रदेशस्यापि ब्रह्मणः प्रदेशविशेषकल्पना भागिनी। 'सर्वतःपृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु' इति चाधारबहुत्वश्रुतिः कार्ये ज्योतिष्युपपद्यतेतराम्। 'इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः' (छा.उ. ३।१३।७) इति च कौक्षेये ज्योतिषि परं ज्योतिरध्यस्यमानं दृश्यते। सारूप्यनिमित्ताश्चाध्यासा भवन्ति। यथा- 'तस्य भूरिति शिर एकं शिर एकमेतदक्षरम्' (बृ.उ. ५।५।३) इति। कौक्षेयस्य तु ज्योतिषः प्रसिद्धमब्रह्मत्वम्। 'तस्यैषा दृष्टिः' 'तस्यैषा श्रुतिः' (छा.उ.

प्रकटार्थविवरणम्

तेजोऽभ्युपगम्य निष्प्रयोजनत्वमुक्तम्। इदानीं तदेव नास्तीत्याह— **तासामिति**। तासां देवतानां तेजोऽबन्नलक्षणानामेकैकां देवतां द्विधा विभज्य पुनश्चैकैकं भागं द्विधा कृत्वा तदितरयोः निक्षिप्य त्रिगुणरज्जुवत् तां त्रिवृतं करवाणीत्यविशेषश्रुतेः नास्त्यत्रिवृत्कृतं तेज इत्यर्थः। किञ्च यच्छब्दोपबन्धात्सिद्धवत्परामर्शनादन्यतः सिद्धिर्वक्तव्या; सा च नास्तीत्याह—**न चेति**। एकदेशिमतेऽपाकृते साक्षात्पूर्ववाद्याह— **अस्तु तर्हीति**। तर्हि ब्रह्मण एवोपासनार्थः प्रदेशविशेषपरग्रहोऽस्त्वित्याशङ्क्याह— **न तु निष्प्रदेशस्येति**। प्रदेशं परिकल्प्योपाध्यवच्छेदकल्पनायां गौरवप्रसङ्गान्न सा कल्पना **भागिनी** युक्तेत्यर्थः। यद्यप्यवच्छेदकल्पनया ब्रह्मणोऽप्याधारश्रुतिः कथञ्चिद् घटते, तथापि न मुख्येत्यभिप्रेत्याह— **सर्वत इति**। अब्रह्मत्वसारूप्येणाध्यासाच्च दिवःपरं ज्योतिरब्रह्मेत्याह—**इदं वाव तदित्यादिना**। एकत्वसाम्येन भूरित्येतस्मिन्नक्षरे प्रजापतेः शिरोदृष्टिर्यथेत्यर्थः। तस्यैषा दृष्टिर्यदेतत् संस्पर्शेनोष्णिमानं विजानाति।

भाष्यभावप्रकाशिका

त्रिवृतमेकैकामकरोदि''ति श्रुतेस्सङ्कोचानुपपत्तेरित्याह—**तासां त्रिवृतमिति**। एवमेकदेशिनि दूषिते परमसमाधाता पूर्वपक्षी ब्रूते—**अस्तु तर्हीति**। भागिनी=युक्ता। औपाधिकम् आधारबहुत्वश्रवणं यद्यपि ब्रह्मण्युपपद्यते; तथापि कार्यज्योतिषि स्वत एव घटत इत्यतिशयमाह—**उपपद्यतेतरामिति**। भवत्वध्यासः, तथापि ज्योतिःशब्दं ब्रह्म किं तत् [न] स्यादिति? तत्राह—**सारूप्यनिमित्ता इति**। तत्र प्रमाणमाह—**यथेति**। ननु कौक्षेयज्योतिरपि चैतन्यमेव, ततो नात्राध्यासः, किं तर्हि? तादात्म्योपदेश इति, तत्राह—**कौक्षेयस्य त्विति**। शब्दस्पर्शवत्त्वाभ्यामप्यब्रह्मत्वमित्याह—**तस्यैषेति**। त्वग्ग्राह्येण शारीरेणोष्मणा श्रोत्रग्राह्येण च घोषेणानुमीयते।

न्यायनिर्णयः

निष्फलस्योपास्यताऽपि नेत्याक्षेप्ताऽऽह— **नेति**। अत्रिवृत्कृतं तेजोऽङ्गीकृत्याफलत्वमुक्त्वा तदेव नेत्याह— **तासामिति**। देवतानां तेजोऽबन्नानामेकैकां देवतां द्विधा विभज्य पुनरकैकं भागं तथा कृत्वा तदितरयोर्निक्षिप्य त्रिगुणरज्जुवत् त्रिवृतं करवाणीत्यविशेषोक्तेर्नात्रिवृत्कृतं तेजोऽस्तीत्यर्थः। तदस्तित्वेऽपि यच्छब्दोपबन्धात् सिद्धवत्परामर्शादन्यतस्तस्य द्युमर्यादत्वं वाच्यं, तन्नास्तीत्याह— **न चेति**। पूर्वपक्षैकदेशिनि परेण परास्ते परमपूर्ववाद्याह— **अस्त्विति**। तत्राक्षेप्ता स्वोक्तं स्मारयति—**नन्विति**। पूर्ववाद्याह— **नेति**। तर्हि ब्रह्मण एव ध्यानार्थो देशविशेषः स्यात्, नेत्याह— **न त्विति**। अप्रदेशस्य प्रदेशकल्पना गौरवाद-युक्तेत्यर्थः। इतश्च कार्यमेव ज्योतिरत्रोपास्यमित्याह— **सर्वत इति**। ब्रह्मण्यवच्छेदकल्पनयाऽऽधारबहुत्वयोगेऽपि कार्ये ज्योतिषि स्वतस्तत्सिद्धिरित्यतिशयमाह— **तरामिति**। उपास्यज्योतिषो ब्रह्मत्वाभावे हेत्वन्तरमाह— **इदमिति**। अध्यासेऽपि ज्योतिर्ब्रह्मास्तु, नेत्याह— **सारूप्येति**। तत्र मानमाह— **यथेति**। एकत्वसाम्याद् भूरित्यस्मिन्नक्षरे प्रजापतेः शिरोदृष्टिरुक्ता, तथाऽत्रापि सारूप्यं वाच्यम्, अन्यथाऽध्यासासिद्धेरित्यर्थः। कौक्षेयमपि ज्योतिश्चैतन्यमेवेत्यनध्यासात् तादात्म्योक्तिरेषेत्याशङ्क्याह— **कौक्षेयस्येति**। शब्दस्पर्शवत्त्वाभ्यामपि तदब्रह्मेत्याह— **तस्येति**। एषा दृष्टिर्यदेतदुष्णिमानं स्पर्शेन विजानाति। एषा श्रुतिर्यत् कर्णावपिधाय निनदमिव शृणोतीति शेषः। दृष्टश्रुतिलिङ्गत्वान्न ज्योतिषोऽपि तदुच्यते। तच्चाविवक्षितमित्याशङ्क्योपास्यत्वश्रुतेर्नैवमित्याह—

३।१३।७) इति चौष्ण्यघोषविशिष्टत्वस्य श्रवणात्। 'तदेतद् दृष्टं च श्रुतं चेत्युपासीत' इति च श्रुतेः। 'चक्षुष्यः श्रुतो भवति य एवं वेद' (छा.उ. ३।१३।८) इति चाल्पफलश्रवणादब्रह्मत्वम्। महते हि फलाय ब्रह्मोपासनमिष्यते। न चान्यदपि किंचित् स्ववाक्ये प्राणाकाशवज्ज्योतिषोऽस्ति ब्रह्मलिङ्गम्। न च पूर्वस्मिन्नपि वाक्ये ब्रह्म निर्दिष्टमस्ति, 'गायत्री वा इदँ सर्वं भूतम्' इति छन्दोनिर्देशात्। अथापि कथंचित् पूर्वस्मिन् वाक्ये ब्रह्म निर्दिष्टं स्यादेवमपि न तस्येह प्रत्यभिज्ञानमस्ति। तत्र हि 'त्रिपादस्यामृतं दिवि' (छा.उ. ३।१२।६) इति द्यौरधिकरणत्वेन श्रूयते। अत्र पुनः 'परो दिवो ज्योतिः' इति द्यौर्मर्यादात्वेन। तस्मात् प्राकृतं ज्योतिरिह ग्राह्यमित्येवं प्राप्ते ब्रूमः-

ज्योतिरिह ब्रह्म ग्राह्यम्। कुतः? चरणाभिधानात्। पादाभिधानादित्यर्थः। पूर्वस्मिन् हि वाक्ये चतुष्पाद् ब्रह्म निर्दिष्टम्- 'तावानस्य महिमा ततो ज्यायाँश्च पूरुषः। पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि'

प्रकटार्थविवरणम्

तस्यैषा श्रुतिः यत्कर्णावपिगृह्य निनदमिव शृणोति। **चक्षुष्यः** दर्शनीयः,**श्रुतो** विख्यातः। एवं बहून्यब्रह्मलिङ्गान्युक्त्वा इदानीं ब्रह्मलिङ्गं किमपि नास्तीत्याह—**न चान्यदपीति**। ननु स्ववाक्ये ब्रह्मलिङ्गाभावेऽपि पूर्वत्र ब्रह्मणः प्रस्तुतत्वात् प्रकृतं ब्रह्म ज्योतिश्शब्देनाभिधीयत इत्याशङ्क्याह—**न च पूर्वस्मिन्नपीति**। ननु "तावानस्य महिमा" इति ब्रह्मविषयस्य मन्त्रस्य पूर्वत्रोदाहृतत्वात् प्रकृतं ब्रह्मेत्याशङ्क्याह—**अथापि कथञ्चिदिति**। सप्तम्यन्तपञ्चम्यन्तनिर्देशवैलक्षण्यान्न तत्रत्यभिज्ञोदेतीत्यर्थः। प्रकृतेर्जातं प्राकृतं कार्यमित्यर्थः।

भाष्यभावप्रकाशिका

तस्य शारीरस्येष [स्योष्म]णस्त्वया[चा] दर्शनं दृष्टिः, घोषस्य श्रवणं श्रुतिः। दृष्टश्रुतलिङ्गकत्वाज्ज्योतिषोऽपि दृष्टत्वं श्रुतत्वं च दर्शितमित्यर्थः। उपास्यत्वश्रवणाच्च तयोर्न विवक्षितत्वमित्याह—**तदेतदिति**। ननु "त्रिपादस्यामृतं दिवि" इति पूर्वस्मिन्वाक्ये यन्निर्दिष्टं ब्रह्म, तदेवेदं द्युसम्बन्धात्प्रत्यभिज्ञायते। ततस्तस्मिन्नेव यच्छब्दपरामृष्टे ज्योतिःशब्दोऽपि वर्तत इति, तत्राह—**न च पूर्वस्मिन्निति**। ननु सर्वात्मभूतादिपादत्वलिङ्गाभ्यां "तदेतद् ब्रह्मे"ति वाक्याच्च पूर्वस्मिन्नपि वाक्ये ब्रह्म निर्दिष्टमिति, अत आह—**अथापीति**। उपदेशभेदादित्यर्थः। **तस्मात्प्राकृतमिति**। अयमाशयः—द्युसम्बन्धलिङ्गस्य प्रत्यभिज्ञापकत्वेऽपि लिङ्गोपस्थापिताद्

न्यायनिर्णयः

तदेतदिति। तदब्रह्मत्वे हेत्वन्तरमाह— **चक्षुष्य इति**। चक्षुष्यो दर्शनीयः। श्रुतो विश्रुतः। ब्रह्मोपास्तिफलमल्पमपि किं न स्यात्, तत्राह— **महते हीति**। मुक्तिफला ब्रह्मोपास्तिर्नाल्पफला युक्तेत्यर्थः। बहून्यब्रह्मलिङ्गानि स्ववाक्यस्थान्युक्त्वा ब्रह्मलिङ्गं किमपि तत्र नास्तीत्याह— **न चेति**। ज्योतिषो ब्रह्मलिङ्गमपि किंचिदन्यन्नास्तीति संबन्धः। ननु पूर्ववाक्ये 'त्रिपादस्यामृतं दिवि' इत्युक्तं ब्रह्मैवात्र द्युसंबन्धात् प्रत्यभिज्ञायते, तत्र यच्छब्दपरामृष्टे ज्योतिःशब्दो वर्तते, नेत्याह— **न चेति**। सर्वात्मत्वभूतादिपादत्वाभ्यां तदेतद् ब्रह्मेति वाक्याच्चोक्तमेव पूर्ववाक्ये ब्रह्मेत्याशङ्क्याह— **अथापीति**। सप्तमीपञ्चमीभ्यामुक्तिभेदान्न तत्रत्यभिज्ञेति साधयति— **तत्रेति**। ब्रह्मलिङ्गाभावात् तजोलिङ्गभावात् तदेव कौक्षेयज्योतिष्यारोप्योपास्यमित्युपसंहरति— **तस्मादिति**। प्राकृतं प्रकृतेर्जातं, कार्यमित्यर्थः। पूर्वपक्षानुवादेन सूत्रमवतार्य प्रतिज्ञार्थमाह— **एवमिति**। निश्चितब्रह्मलिङ्गं विना नास्य ब्रह्मतेति शङ्कित्वा हेतुमाह— **कुत इति**। 'रमणीयचरणाः' इत्यादौ चरणशब्दस्य चारित्रार्थत्वादत्रापि तथेत्यसांगत्यमाशङ्क्याह— **पादेति**। पादवाचिपदमस्मिन् वाक्ये न दृष्टमिति चेत्, तत्राह— **पूर्वस्मिन्निति**। 'गायत्री वा इदं सर्व भूतम्' इत्यादिना भूतपृथिवीशरीरहृदयवाक्प्राणैः षड्विधा चतुष्पदा गायत्रीत्युक्तम्। एतदनुगतब्रह्मणस्तावान्महिमा विभूतिर्यावानयं प्रपञ्चः। वस्तुतस्त्वयं पुरुषस्ततो ज्यायान्महत्तरः। तदेव स्फुटयति— **पादोऽस्येति**। सर्वाणि भूतान्यस्य ब्रह्मण एकः पादः। अस्यैव त्रिपादमृतं दिवि द्योतनवति स्वात्मनि स्थितम्। यथा

(छा.उ. ३।१२।६) इत्यनेन मन्त्रेण। तत्र यच्चतुष्पदो ब्रह्मणस्त्रिपादमृतं द्युसंबन्धि रूपं निर्दिष्टं तदेवेह द्युसंबन्धान्निर्दिष्टमिति प्रत्यभिज्ञायते। तत्परित्यज्य प्राकृतं ज्योतिः कल्पयतः प्रकृतहानाप्रकृतप्रक्रिये प्रसज्येयाताम्। न केवलं पूर्ववाक्याज्ज्योतिर्वाक्य एव ब्रह्मानुवृत्तिः, परस्यामपि शाण्डिल्यविद्याया-मनुवर्तिष्यते ब्रह्म। तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यम्।

यत्तूक्तम्–'ज्योतिः' 'दीप्यते' इति चैतौ शब्दौ कार्ये ज्योतिषि प्रसिद्धाविति। नायं दोषः। प्रकरणाद्

प्रकटार्थविवरणम्

तावान् तत्परिमाणः पूर्वं व्याख्यातो भूतपृथिव्यादिः अस्य प्रकृतस्य गायत्र्याख्यस्य ब्रह्मणो महिमा विभूतिमात्रम्। ततो ज्यायान् पुरुष एव ब्रह्मैव महत्तरमित्यर्थः। तदेवाह—पाद एव सर्वाणि भूतानि। यथा पादचतुष्टयापेक्षया चतुर्थो भागोऽल्पः, तथा सर्वो विकारो वाचारम्भणत्वादत्यल्पः। त्रिपादिवापरिमितं रूपम् अमृतं दिवि सूर्यमण्डले वर्तत इत्युपासनायोपदेशः। पूर्वत्र ब्रह्मणः प्रकृतत्वात् प्रकृतविषय एवायं ज्योतिश्शब्दो ज्योतिष्टोम इवेत्युक्तम्। इदानीम् "सर्वं खल्विदं ब्रह्म" इत्युपरितनेऽपि वाक्ये ब्रह्मणोऽनुवृत्तिदर्शनाद् मध्यगतमपि ज्योतिर्वाक्यं ब्रह्मपरमेवेत्याह— **न केवलमिति**। 'ज्योतिः दीप्यते' इत्यनयोः

भाष्यभावप्रकाशिका

ब्रह्मणो ज्योतिःश्रुत्युपस्थापितस्य कार्यज्योतिषो बलीयस्त्वाद् यच्छब्देन तत्परिग्रहो युक्त इति। प्राकृतम् प्रकृतेर्जातम्, कार्यमिति यावत्।

तदेवाह—**द्युसम्बन्धादिति**।[३] अयं भावः— लिङ्गोपस्थापिताच्छ्रुत्युपस्थापितस्य बलीयस्त्वेऽपि ज्योतिषि यच्छब्दार्थे प्रमाणान्तरमन्वेषणीयम्, ब्रह्म तु त्रिपाच्छुतिप्रमाणेनैव प्रकृतम्, उपासनायां विनियोगसाकाङ्क्षं च। ततश्च विजातीयप्रमाणसाकाङ्क्षश्रुतिसमर्पित ज्योतिरभिधानाल्लिङ्गोपस्थापितसंनिहिततरश्रुतिप्रमाणसिद्धैकवाक्यतासाकाङ्क्ष-ब्रह्माभिधानम् यच्छब्दस्य बुद्ध्याक्षेपलाघवात् एकवाक्यतासापेक्षत्वाच्च आगमस्येति न्यायाद्युक्ततरमिति। **प्रकृतहानाप्रकृतप्रक्रिये इति**। यच्छब्दस्य प्रसिद्धपरामर्शकत्वात्प्रसिद्ध्यपेक्षायां यच्छब्दार्थस्य पूर्ववाक्यगतं संनिहितं प्रसिद्धम्, अप्रसिद्धं तु कल्प्यम्। अतः अप्रकृतम्। अतो न तद्विषयो यच्छब्द इत्यर्थः। संदंशन्यायमाह— **न केवलमिति**। प्रमाणान्तरेण निश्चितार्थे बुद्धौ संनिहितेऽर्थान्तराभिधानमपि तत्परमेव भवति; ज्योतिष्टोमे प्रकृते "वसन्ते ज्योतिषा यजेते" ति ज्योतिःशब्दवदिति न्यायाद्यच्छब्देन

न्यायनिर्णयः

महान्, एवं पुरुषो वास्तवोऽवास्तवात् प्रपञ्चान्महानित्यर्थः। पूर्वं ब्रह्मोक्तावपि कार्षापणश्चतुर्धा विभक्तः पादादेकस्मात्पादत्रयीकृतो महान्, एवं पुरुषो वास्तवोऽवास्तवात् प्रपञ्चान्महानित्यर्थः। पूर्वं ब्रह्मोक्तावपि कथमुक्तहेतुना ज्योतिषो ब्रह्मतेत्याशङ्क्याह—**तत्रेति**। लिङ्गोपस्थापिताद् ब्रह्मणः श्रुत्युपस्थापिततेजसो बलीयस्त्वेऽपि यच्छब्दार्थे ज्योतिषि संनिधापकमानापेक्षायां त्रिपाद्ब्रह्मणो ध्याने विनियोगाकाङ्क्षस्यानन्तरवाक्ये श्रुत्युक्तेर्विजातीयमानाकाङ्क्षश्रुत्युक्तते-जोऽभिधानाल्लिङ्गोपनीताततिसंनिहितसजातीयश्रुतिसिद्धैकवाक्यता-काङ्क्षब्रह्मोक्तिर्यच्छब्दस्य युक्ता। तस्माद् यच्छब्दार्थे प्रयुक्तो ज्योतिःशब्दो ब्रह्मार्थ इति भावः। यच्छब्दस्य ब्रह्मार्थत्वं हित्वा तेजोवाचित्वे बुद्धिगौरवमुक्त्वा दोषान्तरमाह— **तदिति**। पूर्ववाक्यस्थे ब्रह्मणि द्युसंबन्धाज्ज्योतिर्वाक्येऽपि प्रत्यभिज्ञाते यच्छब्दार्थे तत्समानाधिकृतज्योतिःशब्दप्रवृत्तिरित्युक्तम्। सम्प्रति 'सर्वं खल्विदं ब्रह्म' इत्युत्तरवाक्येऽपि ब्रह्मानुवृत्तेर्मध्यस्थमपि ज्योतिर्वाक्यं तत्परमेवेति संदंशन्यायमाह— **नेति**। प्रकरणलिङ्ग-श्रुतिसिद्धमर्थमुपसंहरति— **तस्मादिति**। श्रुतिलिङ्गाभ्यामुक्तमनुवदति— **यत्त्विति**। मानत्रयान्मानद्वयं दुर्बलमिति दूषयति— **नायमिति**। प्रकरणं श्रुतिलिङ्गयोरुपलक्षणम्। ब्रह्मणो व्यवच्छिद्य तेजःसमर्पकत्वं विशेषकत्वं, तदभावोऽविशेषकत्वम्। ब्रह्मणि

१. 'वसन्ते वसन्ते ज्योतषा यजेत' इति शेषः। 'यदतः' इति स्ववाक्ये यच्छब्दस्य सर्वनाम्नः प्रकृतपरामर्शित्वात् पूर्ववाक्ये प्रकृतं त्रिपाद् ब्रह्म परामृश्यत इति भामती।

२. संदंशन्यायोऽयम्। ३. 'तदेवेह द्युसंबन्धादिति।' इत्येवं भाष्य प्रतीकग्रहणमिदं स्यात्।

ब्रह्मावगमे सत्यनयोः शब्दयोरविशेषकत्वात्। दीप्यमानकार्यज्योतिरुपलक्षिते ब्रह्मण्यपि प्रयोगसंभवात्। 'येन सूर्यस्तपति तेजसेद्धः' (तै. ब्रा. ३।१२।९।७) इति च मन्त्रवर्णात्। यद्वा नायं ज्योतिः-शब्दश्चक्षुर्वृत्तेरेवानुग्राहके तेजसि वर्तते, अन्यत्रापि प्रयोगदर्शनात् 'वाचैवायं ज्योतिषाऽऽस्ते' (बृ.उ. ४।३।५) 'मनो ज्योतिर्जुषताम्' (तै. ब्रा. १।६।३।३) इति च। तस्माद् यद्यत् कस्यचिदवभासकं तत्तज्ज्योतिःशब्देनाभिधीयते। तथा सति ब्रह्मणोऽपि चैतन्यरूपस्य समस्तजगदवभासहेतुत्वादुपपन्नो ज्योतिःशब्दः। 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' (क.उ. २।२।१५)। 'तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्' (बृ.उ. ४।४।१६) इत्यादिश्रुतिभ्यश्च।

प्रकटार्थविवरणम्

शब्दयोर्ब्रह्मनिवर्तकत्वं न संभाव्यते, ब्रह्मप्रकरणे समाम्नातत्वेन तदानुगुण्यादित्याह— **अविशेषकृतत्वा[कत्वा]दिति**। कया तर्हि वृत्त्या ब्रह्मणि ज्योतिश्शब्दः प्रयुज्यत इत्याशङ्क्याह— **दीप्यमानेति**। कार्ये रूढिमभ्युपगम्य तत्कारणे लक्षणया वर्तत इत्युक्तम्। इदानीं ब्रह्मण्यपि मुख्य एवेत्याह— **यद्वेत्यादिना**। यानि चाब्रह्मलिङ्गान्युद्भावितानि, ब्रह्मपक्षेऽपि तानि योजयितुं शक्यन्त इत्याह—

भाष्यभावप्रकाशिका

संनिधापिते ब्रह्मणि प्रयुज्यमानो ज्योतिःशब्दो ब्रह्मपर इति परिहरति— **प्रकरणादिति**। ननु ब्रह्मणि प्रवृत्त्यनुपपत्तौ कथमविशेषकत्वमिति? तत्राह— **दीप्यमानेति**। ननु कार्यवाचकेन कारणं लक्ष्यते चेत्, सर्वशब्दैरपि ब्रह्मलक्षणाप्रसङ्ग इति, अत आह— **येन सूर्य इति**। सूर्यादिज्योतिषा विशेषसम्बन्धोऽस्तीत्यर्थः। इदानीं ज्योतिःशब्दस्य साधारणत्वं दर्शयति— **यद्वेति**। ननु एकस्य शब्दस्यानेकार्थत्वमयुक्तमित्याशङ्क्यैकेनैव निमित्तेनानेकत्र वर्तमानतया शक्तेरेकत्वाद् न दोष इति परिहरति— **तस्मादिति**। अवभासकत्वं सर्वत्र प्रवृत्तौ निमित्त(त्व)मित्यर्थः। अवभासकत्वे प्रमाणमाह— **तमेव भान्तमिति**। न केवलमवभासकत्वाद्; ब्रह्मणि प्रयुक्तपूर्वत्वाच्चायं ज्योतिःशब्दो ब्रह्मणि वर्तत इत्याह— **तद्देवा इति**।

न्यायनिर्णयः

यथोक्तशब्दानुपपत्तौ कथं तयोरविशेषकत्वं, तत्राह— **दीप्यमानेति**। कार्यवाचिशब्दाभ्यां कारणलक्षणे सर्वैरपि शब्दैर्ब्रह्मणो लक्षणा स्यादित्याशङ्क्य सूर्यादिज्योतिषो विशेषयोगे मानमाह— **येनेति**। येन तेजसा चैतन्यज्योतिषेद्धो दीप्तः सूर्यः सर्वमपि जगत् तपति प्रकाशयति तज्ज्योतिरात्मानं बृहन्तमनतिशयमहत्त्ववन्तमवेदविन्न मनुत इति योजना। कार्ये रूढिमुपेत्य कारणे लाक्षणिको ज्योतिःशब्द इत्युक्तम्। इदानीं कारणेऽपि ब्रह्मणि मुख्य एवेत्याह— **यद्वेति**। शान्ते सूर्यादौ तिमिरावृते जगति वाचैव ज्योतिषाऽयं कार्यकरणात्मा पुरुषो व्यवहारमासनादिकं करोतीत्यर्थः। मनो भासकत्वाज्ज्योतिस्तच्चाज्यं जुषतां सेवतां 'तेन वाक्येन[१] चक्षुर्द्वारा विषयीकृतेनादुष्टतया दृष्टेन यज्ञमिमं केनापि हेतुना विच्छिन्नमप्राप्तानुष्ठानं संदधात्वक्षतं कुर्यादित्यर्थः। एकस्य शब्दस्य कथमनेकार्थतेत्याशङ्क्य 'निमित्तभेदेनानेकत्र[२] वृत्तेः शक्त्यैक्यान्नैवमित्याह— **तस्मादिति**। भासकत्वमेकं निमित्तीकृत्यानेकत्र ज्योतिःशब्देऽपि कथमसौ ब्रह्मणि स्यादित्याशङ्क्याह— **तथेति**। तस्य सर्वजगद्भासकत्वे मानमाह— **तमेवेति**। पूर्वार्धे विषयसप्तम्या परामृष्टस्तच्छब्दार्थः। गच्छन्तमनुगच्छतीत्युक्ते स्वगतगतिवदनुभानेऽपि स्वगतभानमाशङ्क्याह— **तस्येति**। न केवलं भासकत्वाद् ब्रह्मणि ज्योतिःशब्दः, तस्मिन् प्रयुक्तत्वाच्चेत्याह— **तदिति**। यस्मादर्वागेव संवत्सरोऽहोभिः परिवर्तते तं परमात्मानमिन्द्रादयो देवा ज्योतिषामादित्यादीनां ज्योतिर्भासकं जगतो जीवनं कूटस्थमिति च ध्यायन्तीत्यर्थः। 'अत्रायं पुरुषः स्वयंज्योतिः' इत्यादिवाक्यमादिशब्दार्थः। 'ज्योतिषामपि तज्ज्योतिः' इत्यादिस्मृतिसंग्रहार्थश्चकारः। ज्योतिःश्रुतेर्दीप्तिलिङ्गस्य

---

१. 'तेन चाज्येन' इति पाठः स्यात्।

२. 'निमित्ताभेदेन' इति पाठः स्यात्।

यदप्युक्तं द्युमर्यादत्वं सर्वगतस्य ब्रह्मणो नोपपद्यत इति। अत्रोच्यते– सर्वगतस्यापि ब्रह्मण उपासनार्थः प्रदेशविशेषपरिग्रहो न विरुध्यते। ननूक्तं निष्प्रदेशस्य ब्रह्मणः प्रदेशविशेषकल्पना नोपपद्यत इति। नायं दोषः। निष्प्रदेशस्यापि ब्रह्मण उपाधिविशेषसंबन्धात् प्रदेशविशेषकल्पनोपपत्तेः। तथाहि– आदित्ये, चक्षुषि, हृदय इति प्रदेशविशेषसंबन्धानि ब्रह्मण उपासनानि श्रूयन्ते। एतेन 'विश्वतः पृष्ठेषु' इत्याधार-बहुत्वमुपपादितम्। यदप्येतदुक्तम्, औष्ण्यघोषानुमिते कौक्षेये कार्ये ज्योतिष्यध्यस्यमानत्वात् परमपि दिवः कार्यं ज्योतिरेवेति तदप्ययुक्तम्। परस्यापि ब्रह्मणो नामादिप्रतीकत्ववत् कौक्षेयज्योतिष्प्रतीक-त्वोपपत्तेः। 'दृष्टं च श्रुतं चेत्युपासीत' इति तु प्रतीकद्वारकं दृष्टत्वं श्रुतत्वं च भविष्यति। यदप्यल्पफल-श्रवणान्न ब्रह्मेति, तदप्यनुपपन्नम्। न हीयते फलाय ब्रह्माश्रयणीयम्, इयते नेति नियमहेतुरस्ति। यत्र हि निरस्तसर्वविशेषसंबन्धं परं ब्रह्मात्मत्वेनोपदिश्यते, तत्रैकरूपमेव फलं मोक्ष इत्यवगम्यते। यत्र तु गुणविशेषसंबन्धं प्रतीकविशेषसंबन्धं वा ब्रह्मोपदिश्यते, तत्र संसारगोचराण्येवोच्चावचानि फलानि दृश्यन्ते– 'अन्नादो वसुदानो विन्दते वसु य एवं वेद' (बृ.उ. ४।४।२४) इत्याद्यासु श्रुतिषु। यद्यपि न

प्रकटार्थविवरणम्

यदप्युक्तमित्यादिना। सादृश्यमन्तरेणाप्यध्यासो दृष्ट इत्याह— नामादिप्रतीकत्ववदिति। प्रतीकं प्रतिमा उपासनस्थानं जाठरं ज्योतिः, तस्य दृष्टत्वश्रुतत्वनिबन्धनं तत्रोपास्यस्य ब्रह्मणोऽपि दृष्टत्वं श्रुतत्वं च भविष्यतीत्यर्थः। "तं यथा यथोपासते तदेव भवति" इति वाजिनामग्निरहस्ये श्रवणात् नैकरूपं फलमित्याह— न हीयत इति। इयते एतावत्परिमाणाय। अन्नादो जीवरूपेण;

भाष्यभावप्रकाशिका

न चापूर्वमिदं कल्प्यते; अन्यत्राप्येवंविधकल्पनादर्शनात्, इत्याह—**तथा ह्यादित्य इति। नामादिप्रतीकत्ववदिति।** जीवभावेनानुप्रविष्टस्य परमात्मनः कौक्षेयज्योतिर्विकारः; जीवाभावे देहस्य शैत्याज्जीवस्य चौष्ण्येन ज्ञानात्। तस्मात्तद्विकारप्रतीकस्योपासनमित्यर्थः।

ननु ब्रह्मज्ञानस्य मोक्षफलत्वात्तस्य चैकरूपत्वादल्पफलत्वमनुपपन्नमिति, तत्राह—**यत्र हीति।** ननु अस्यापि ब्रह्मोपदेशत्वान्मोक्षफलत्वमित्याशङ्क्याह—**यत्र त्विति।** यदुक्तम्—न चान्यदपि किञ्चित् स्ववाक्ये ब्रह्मत्वे ज्योतिषो

न्यायनिर्णयः

चान्यथासिद्धत्वेऽपि द्युमर्यादत्वमनन्यथासिद्धमित्याशङ्क्याह— **यदपीति।** प्रमित्यर्थत्वेन, उपास्त्यर्थत्वेन वा मर्यादावत्त्वं नोपपद्यते? तत्राद्यमङ्गीकरोति— **अत्रेति।** द्वितीयं प्रत्याह— **सर्वेति।** योषितोऽग्नित्ववद् ब्रह्मणोऽपि द्युमर्यादावत्त्वमारोप्योपास्तिरविरुद्धेत्यर्थः। अप्रदेशस्य प्रदेशकल्पने गौरवमुक्तं स्मारयति— **नन्विति।** स्वतो वा? तत्कल्पनानुपपत्तिः, उपाधितो वा। तत्राद्यमुपेत्यान्त्यं प्रत्याह— **नायमिति।** न चेदमपूर्वं कल्प्यते, तादृक्कल्पनानामन्यत्रापि दृष्टेरित्याह— **तथेति।** ब्रह्मणि कथमाधारबहुत्वं, तत्राह— **एतेनेति।** द्युमर्यादत्ववदाध्यानार्थत्वेनेत्यर्थः। अध्यासस्य सारूप्यकृतत्वादब्रह्मण्यध्यस्यमानमपि ज्योतिरब्रह्मेत्युक्तमनुभाषते— **यदपीति।** आरोपस्य सारूप्याधीनत्वं व्यभिचारयति— **तदपीति।** उपास्तिस्थानत्वमत्र प्रतीकत्वम्। आरोप्यज्योतिषो दृष्टत्वादिश्रुतेर्ब्रह्मणस्तदयोगादब्रह्मतेत्याशङ्क्याह— **दृष्टं चेति।** जाठरज्योतिषो दृष्टत्वादिकृतं तत्रोपास्यब्रह्मणो दृष्टत्वादीत्यर्थः। लिङ्गान्तरमनूद्य प्रत्याह— **यदपीति।** वाजिनामग्निरहस्यगतां 'तं यथा यथा' इत्यादिश्रुतिमाश्रित्यानुपपत्तिं स्फोरयति— **न हीति।** ब्रह्मधियो मुक्तिफलत्वात् तदैकरूप्यादल्पफलत्वं न तदुपास्तेरित्याशङ्क्याह— **यत्रेति।** ब्रह्मविषयत्वात् प्रस्तुतोपास्तेपि मुक्तिफलतेत्याशङ्क्याह— **यत्र त्विति।** 'स वा एष महानज आत्मा' इत्युक्तः जीवात्मनाऽन्नादः, वसु धनं कर्मफलं तद्दाता पररूपेणेत्युक्त्वा यः कश्चिदुक्तगुणमात्मानमुपास्ते स धनं लभते, दीप्ताग्निश्च भवतीत्याह— **अन्नाद इति।** आदिपदेन 'परोवरीय एव हास्यास्मिँल्लोके जीवनम्' इत्यादि गृहीतम्। यदुक्तं न स्ववाक्ये

स्ववाक्ये किंचिज्ज्योतिषो ब्रह्मलिङ्गमस्ति तथापि पूर्वस्मिन् वाक्ये दृश्यमानं ग्रहीतव्यं भवति। तदुक्तं सूत्रकारेण- 'ज्योतिश्चरणाभिधानात्' इति। कथं पुनर्वाक्यान्तरगतेन ब्रह्मसंनिधानेन ज्योतिःश्रुतिः स्वविषयाच्छक्या प्रच्यावयितुम्? नैष दोषः। 'यदतः परो दिवो ज्योतिः' इति प्रथमतरपठितेन यच्छब्देन सर्वनाम्ना, द्युसंबन्धात्प्रत्यभिज्ञायमाने पूर्ववाक्यनिर्दिष्टे ब्रह्मणि स्वसामर्थ्येन परामृष्टे सत्यर्थाज्ज्योतिः-शब्दस्यापि ब्रह्मविषयत्वोपपत्तेः। तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यम्।।२४।।

छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात् तथाहि दर्शनम्।।२५।।

अथ यदुक्तं पूर्वस्मिन्नपि वाक्ये न ब्रह्माभिहितमस्ति, 'गायत्री वा इदं सर्वं भूतं यदिदं किंच' (छा.उ. ३।१२।१) इति गायत्र्याख्यस्य छन्दसोऽभिहितत्वादिति, तत् परिहर्तव्यम्। कथं पुनश्छन्दोऽभिधानान्न ब्रह्माभिहितमिति शक्यते वक्तुम्, यावता 'तावानस्य महिमा' इत्येतस्यामृचि चतुष्पाद् ब्रह्म दर्शितम्।

प्रकटार्थविवरणम्

वसु हिरण्यम्, कर्मफलमित्यर्थः। यच्चोक्तं स्ववाक्ये ज्योतिषो न ब्रह्मलिङ्गं किञ्चिदस्तीति; तत्राह— **यद्यपीति।** सन्निधानाच्छुतेर्बलीयस्त्वं मत्वा आह— **कथं पुनरिति।** न वयमपि सन्निधानात् श्रुतेः भङ्गं ब्रूमः; किन्तु प्रकृतप्रत्यभिज्ञानात्, ब्रह्मपरा मर्शियच्छुतिसामानाधिकरण्याज्ज्योतिश्श्रुतिरपि तद्विषयैवेति ब्रूम इत्याह—**नैष दोष इति।** यच्छब्देन परामृष्टे सतीत्यन्वयः।

छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम्। पूर्वोक्तमनुभाषते— **अथ यदुक्तमिति।** नेदं परिहारयोग्यं चोद्यम्, किन्तूपेक्षणीयमेव, छन्दोऽभिधानादिति हेतोरसिद्धत्वादित्याह— **कथं पुनरिति।** हेतुं साधयति— **नैतदित्यादिना।**

भाष्यभावप्रकाशिका

लिङ्गमस्तीति, तत्राह—**यद्यपीति।** प्रकरणबलाच्छुतेर्न बाधो (न) युक्त इति शङ्कते—**कथं पुनरिति।** न प्रकरणाच्छ्रुतेर्बाधः, किं तु लिङ्गानुगृहीतप्रथमश्रुतयच्छब्दश्रुत्येत्याह—**नैष इति। द्युसम्बन्धादिति।** प्रधानस्य द्युसम्बन्धस्य प्रातिपदिकार्थस्य तथात्वेन प्रत्यभिज्ञाने तद्विशेषणस्य मर्यादाधाररूपविभक्त्यर्थस्यान्यतामात्रेणान्यत्वं न युक्तमिति भावः॥२५॥

छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथाहि दर्शनम्।।२५।। छन्दोऽभिधानादिति। छन्दोऽभिधान-मन्याभिधानं वा भवतु, सर्वथा ब्रह्माभिधानमस्त्येवेति सिद्धान्त्येकदेशी शङ्कते—**कथं पुनरिति।** ब्राह्मणोक्त(रता)

न्यायनिर्णयः

ज्योतिषो ब्रह्मलिङ्गमिति, तत्राह— **यद्यपीति।** उक्तेऽर्थे सूत्रानुगुण्यमाह— **तदुक्तमिति।** प्रकरणेन श्रुतिरबाध्येत्याह— **कथमिति।** न प्रकरणादेव श्रुतिर्बाध्या, प्रकरणलिङ्गानुगृहीतप्रथमश्रुतयच्छब्दश्रुत्येत्याह— **नेत्यादिना। द्युसंबन्धादिति।** प्रधानस्य द्युसंबन्धस्य प्रातिपदिकार्थस्यैक्येन प्रत्यभिज्ञानात् तद्विशेषणस्य मर्यादाऽऽधारविभक्त्यर्थस्यान्यत्वमात्रेण नान्यतेत्यर्थः। यच्छब्देन परामृष्टे सतीति संबन्धः। **स्वसामर्थ्येन** सर्वनाम्नः संनिहितपरामर्शित्ववशेनेत्यर्थः। **अर्थाद्** यच्छब्दसामानाधिकरण्यबलादित्यर्थः। मानमुक्त्वा मेयमुपसंहरति— **तस्मादिति।**।२४।।

पूर्ववाक्यस्य छन्दोविषयत्वान्न ब्रह्म प्रकृतमित्युक्तमनूद्य निराकरोति— **छन्दोभिधानादिति।** तत्रानुवादभागं व्याख्याय चोद्यस्य समाधियोग्यतामाह— **अथेत्यादिना।** पूर्ववाक्ये छन्दसोऽन्यस्य वाऽभिधानेऽपि ब्रह्मोक्तमेवेत्येकदेशी शङ्कते— **कथमिति।** मन्त्रस्य ब्राह्मणोक्तार्थत्वाद् ब्रह्मणे गायत्रीकथनान्मन्त्रेऽपि न ब्रह्म प्रकाश्यत इति सौत्रं हेतुं साधयन् पूर्ववाद्याह—

नैतदस्ति। 'गायत्री वा इदं सर्वम्' इति गायत्रीमुपक्रम्य तामेव भूतपृथिवीशरीरहृदयवाक्प्राण-प्रभेदैर्व्याख्याय 'सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाऽभ्यनूक्तं तावानस्य महिमा' इति तस्यामेव व्याख्यातरूपायां गायत्र्यामुदाहृतो मन्त्रः कथमकस्माद् ब्रह्म चतुष्पादभिदध्यात्? योऽपि तत्र 'यद्वै तद् ब्रह्म' (छा.उ. ३।१२।५।,६) इति ब्रह्मशब्दः सोऽपि, छन्दसः प्रकृतत्वाच्छन्दोविषय एव। 'य एतामेवं ब्रह्मोपनिषदं वेद' (छा.उ. ३।११।३) इत्यत्र हि वेदोपनिषदमिति व्याचक्षते। तस्माच्छन्दोऽभिधानान्न ब्रह्मणः प्रकृतत्वमिति चेत्? नैष दोषः, 'तथा चेतोऽर्पणनिगदात्' तथा गायत्र्याख्यच्छन्दोद्वारेण तदनुगते ब्रह्मणि चेतसोऽर्पणं चित्तसमाधानमनेन ब्राह्मणवाक्येन निगद्यते– 'गायत्री वा इदं सर्वम्' इति। न ह्यक्षरसंनिवेशमात्राया गायत्र्याः सर्वात्मकत्वं संभवति। तस्माद् यद् गायत्र्याख्यविकारेऽनुगतं जगत्कारणं ब्रह्म तदिह सर्वमित्युच्यते। यथा 'सर्वं खल्विदं ब्रह्म' (छा.उ. ३।१४।१) इति। कार्यं च

प्रकटार्थविवरणम्

"गायत्री वा इदं सर्वं भूतम्" इत्युपक्रम्य "वागेव गायत्री वाग्वा इदं सर्वं भूतं गायति च त्रायते च" इत्यादिना सैषा षडक्षरैः पादैः चतुष्पदा सती छन्दोरूपा गायत्री वाग्भूतपृथिवीशरीरप्राणहृदयभेदैः षट्प्रकारा भवतीत्युपसंहृत्य तस्यामेवावतारितो मन्त्रः कथं ब्रह्माभिदध्यात्? न कथञ्चित्; अतो नासिद्धो हेतुरित्यर्थः। ननु मन्त्रानन्तरमेव "यद्वै तद् ब्रह्म" इति ब्रह्मपरामर्शान्मिन्त्रेऽपि ब्रह्मोक्तमित्याशङ्क्याह— **योऽपि तत्रेति**। ननूपनिषदि ब्रह्मशब्दः सर्वत्र परमात्मपर एवेत्याशङ्क्याह— **य एतामेवमिति**। यस्माद् गायत्र्याख्यस्य छन्दसो भूताद्यध्यासेनोपास्यस्य निर्देशको मन्त्रः तस्मादित्युपसंहारः। सिद्धान्तत्वेन सूत्रभागमवतारयति— **नैष दोष इत्यादिना**। गायत्रीशब्देन छन्दोमात्राभिधाने सर्वभूतादिरूपत्वस्यासदारोपत्वप्रसङ्गात्, ब्रह्मपरिग्रहे तु कार्यकारणयोः तादात्म्येन

भाष्यभावप्रकाशिका

र्थस्यानुवादपरत्वान्मन्त्रस्य ब्राह्मणे च गायत्र्याः प्रतिपादनान्मन्त्रेऽपि न ब्रह्म प्रतिपाद्यत इति पूर्ववादी परिहरति—**नैतदस्तीति**।

ननु गायत्र्यामप्रसिद्धस्य ब्रह्मशब्दस्य तद्विषयत्वमयुक्तमित्याशङ्क्य वेदे ब्रह्मशब्दस्य प्रयुक्तत्वात् तदेकदेशभूतायां गायत्र्यामपि ब्रह्मशब्दवाच्यत्वं युक्तमित्याह—**य एतामिति**। ननु मुख्यत्वात् गायत्रीमात्रमेव कस्मात् न गृह्यत इति? तत्राह—**न ह्यक्षरेति**। ननु ब्रह्मणोऽपि गायत्रीविकारोपाधिनो न सर्वत्वम्, उपाधेरवच्छिन्नत्वान्नभस इव घटावच्छिन्नस्यानवच्छिन्नत्वमित्याशङ्क्य गायत्र्या

न्यायनिर्णयः

नैतदिति। 'गायत्री वा इदं सर्वं भूतं यदिदं किंच' इति सर्वात्मिकां गायत्रीमुक्त्वा 'वाग्वै गायत्री वाग्वा इदं सर्वं भूतं गायति च त्रायते च' इति तस्याः सर्वभूतमय्या वागात्मत्वमाख्याय 'या वै सा गायत्रीयं वाव सा येयं पृथिवी, या वै सा पृथिवीयं वाव सा यदिदं शरीरमस्मिन् हीमे प्राणाः प्रतिष्ठिताः, यद् वै शरीरमिदं तद्धृदयमस्मिन् हीमे प्राणाः प्रतिष्ठिताः' इति पृथिव्या भूताधारत्वात्सर्वभूतमयगायत्रीत्वं शरीरहृदययोर्भूतात्मकप्राणाश्रयत्वादिति प्रकृतां गायत्रीं भूतादिप्रकारैरुक्त्वा सैषा षडक्षरैः पादैश्चतुष्पदा सती छन्दोरूपा गायत्री वाग्भूतपृथिवीशरीरप्राणहृदयभेदैः षट्प्रकारेत्युपसंहृत्य तस्यां श्रुतो मन्त्रो न शक्तो ब्रह्म वक्तुमिति हेतुसिद्धिरित्यर्थः। मन्त्रानन्तरं 'यद्वै तद् ब्रह्म' इति ब्रह्मशब्दान्मन्त्रेऽपि ब्रह्मोक्तमित्याशङ्क्याह— **योऽपीति**। न प्रकरणाद् ब्रह्मशब्दस्य छन्दोवाचित्वं, तस्य सर्वोपनिषदि परमात्मार्थत्वप्रसिद्धेरित्याशङ्क्य वेदविषये प्रयोगात् तदेकदेशगायत्र्यामपि तस्योपपत्तिरित्याह— **य इति**। यः कश्चिद् ध्यातैतां प्रकृतां ब्रह्मोपनिषदं वेदरहस्यं मधुविद्यारूपं वेद तस्मै विदुषे नोदेति नास्तमेति सविता, सदैवाहर्भवत्यतो विद्वानुदयास्तमयापरिच्छेद्यं नित्यं ब्रह्मैव भवतीति ब्रह्मपदं वेदे प्रयुक्तमित्यर्थः। मन्त्रब्राह्मणयोरैकार्थ्याद् ब्रह्मशब्दस्य प्रकृतच्छन्दोगामित्वाद्भूताद्यध्यासेन ध्येयगायत्रीछन्दोवाचित्वे मन्त्रस्य स्थिते फलितमाह— **तस्मादिति**। सिद्धान्तभागे नञर्थमुक्त्वा हेतुमादाय व्याचष्टे— **नेत्यादिना**। गायत्रीशब्दस्य मुख्यार्थसिद्ध्यर्थं गायत्रीमात्रमेव गृह्यतामित्याशङ्क्याह— **न हीति**। नभसो घटावच्छिन्नस्यानवच्छिन्नत्वायोगवद् ब्रह्मणो गायत्रीविशिष्टस्य न सर्वत्वमित्याशङ्क्य गायत्र्युपलक्षितब्रह्मणः सर्वत्वमित्याह— **तस्मादिति**। गायत्रीशब्देन छन्दोमात्रोक्तौ सर्वभूतादिरूपत्वस्यासदारोपत्वापाताद् ब्रह्मोक्तौ कार्यकारण-योस्तादात्म्ये सदारोपात् तच्छब्देन तदनुगतं ब्रह्मोपलक्ष्य तदुपास्तिर्विधेयेत्यर्थः। कार्यकारणयोरभेदोक्तिरन्यत्रापि दृष्टेत्याह—

कारणादव्यतिरिक्तमिति वक्ष्यामः–'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र.सू. २।१।१४) इत्यत्र। तथाऽन्यत्रापि विकारद्वारेण ब्रह्मण उपासनं दृश्यते–'एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्यव एतं महाव्रते छन्दोगाः' (ऐ. आ. ३।२।३।१२) इति। तस्मादस्ति छन्दोऽभिधानेऽपि पूर्वस्मिन् वाक्ये चतुष्पाद् ब्रह्म निर्दिष्टम्। तदेव ज्योतिर्वाक्येऽपि परामृश्यत उपासनान्तरविधानाय।

अपर आह– साक्षादेव गायत्रीशब्देन ब्रह्म प्रतिपाद्यते, संख्यासामान्यात्। यथा गायत्री चतुष्पदा षडक्षरैः पादैस्तथा ब्रह्म चतुष्पात्। तथाऽन्यत्रापि छन्दोभिधायी शब्दोऽर्थान्तरे संख्यासामान्यात्प्रयुज्यमानो

प्रकटार्थविवरणम्

सदारोपसंभवाद् गायत्रीशब्देन तदनुगतं ब्रह्मोपलक्ष्य तदुपासनं विधीयत इति भावः। ननु कार्यकारणयोरत्यन्तभेदात् तवाप्यसदारोपः समान इत्याशङ्क्याह—**कार्यं चेति**। "तथा हि दर्शनम्" इत्यस्यार्थमाह— **तथान्यत्रापीति**। एतं परमात्मानं बह्वृचा ऋग्वेदिनो महति प्रधाने महाव्रताख्ये क्रतौ उक्थे शस्त्रे अनुगतमुपासते, अग्निरहस्ये यजुर्वेदिनः इत्यैतरेयके दृश्यत इत्यर्थः।

सिद्धान्तभागं प्रकारान्तरेण व्याचष्टे—**अपर आहेति**। ब्रह्मणि चेतः समर्प्यत येन गायत्रीशब्देन स चेतोऽर्पणः तेन, तथेति गायत्रीवच्चतुष्पात्त्वसाम्येन ब्रह्मण एव निगदादभिधानान्न पूर्वत्र छन्दः प्रकृतमित्यर्थः। **साक्षादिति** विकारानवच्छेदेनेत्यर्थः। पूर्वव्याख्याने कार्योपासनम्; अत्र सगुणब्रह्मोपासनमिति विभागः। "तथा हि दर्शनम्" इत्यस्यार्थमाह—

भाष्यभावप्रकाशिका

विशेषणत्वानङ्गीकारात् तदुपलक्षितस्य सर्वात्मत्वोपपत्तिरित्याह—**तस्माद्ब्रह्मायत्र्यामिति**। अन्यत्रापि कार्यकारणयोरभेदेनाभिधानं दृष्टमित्याह—**यथा सर्वमिति**। कथं भिन्नयोरभेदोपदेश इति? तत्राह—**कार्यं चेति**। 'तथाहि दर्शन'मिति सूत्रावयवस्यार्थमाह— **तथाऽन्यत्रापीति**।

तदेवं गायत्रीशब्दस्यामुख्यार्थत्वेऽपि गायत्र्या ब्रह्मोपलक्ष्यत इत्युक्तम्, इदानीं तु गायत्रीशब्दः सङ्ख्यासामान्याद् ब्रह्मणि गुणवृत्त्या वर्तत इति सूत्रस्य व्याख्यान्तरमाह—**अपर आहेति**। गायत्र्याश्चतुष्पात्त्वमुपपादयति—**षडक्षरैरिति। तथा ब्रह्म चतुष्पादिति**। स्थावरजङ्गमानि विश्वानि भूतान्यस्यैकः पादः। दिवि द्योतनवति चैतन्यरूपे स्वात्मनि, प्रसिद्धायां वा दिवि त्रिपात्=त्रयः पादाः अस्येति, अस्यामपि व्याख्यायां **तथाहि दर्शन**मित्यस्य सूत्रावयवस्यार्थमाह—**तथाऽन्यत्रेति**। संवर्गविद्यायां

न्यायनिर्णयः

यथेति। त्वन्मतेऽपि कार्यकारणयोरत्यन्तभेदादसदारोपापत्तिरित्याशङ्क्याह— **कार्यं चेति**। 'सर्वं खलु' इत्यत्र कार्यमात्रवाचिसर्वशब्देन कारणब्रह्मणो लक्ष्यत्वेऽपि कार्यैकदेशार्थगायत्रीशब्देन कुतो लक्ष्यतेत्याशङ्क्य 'तथाहि दर्शनम्' इत्यस्यार्थमाह— **तथेति**। एतमेव परमात्मानमृग्वेदिनो महति कस्मिंश्चिदुक्थाख्ये शस्त्रे तदनुगतमुपासते। अध्वर्यवो यजुर्वेदिनोऽग्नौ क्रतौ तदनुश्रितमेतमनुसंदधते। सामवेदिनो महाव्रते क्रतावेतमनुसंदधतीत्यैतरेयके दृष्टमित्यर्थः। हेतुमुपेत्य तस्यासाधकत्वमुपसंहरति— **तस्मादिति**। तथापि ज्योतिर्वाक्ये किं जातमित्याशङ्क्य प्रकृतपरामर्शियच्छब्दमाश्रित्याह— **तदेवेति**। परामर्शफलमाह— **उपासनान्तरेति**।

गायत्रीपदं ब्रह्मणि लाक्षणिकमित्युक्त्वा तस्य गौणत्वं ब्रुवाणः सिद्धान्तभागं विधान्तरेण व्याकरोति— **अपर इति। साक्षाद्** विकारानवच्छेदेनेत्यर्थः। तथा = गायत्रीवच्चतुष्पात्त्वसाम्येन ब्रह्मणि येन गायत्रीशब्देन चेतः समर्प्यते तेन ब्रह्मण एव निगदान्न पूर्वं छन्दः प्रकृतमित्यर्थः। संख्यासाम्यं साधयति— **यथेति**। तस्याश्चतुष्पात्त्वं व्यनक्ति— **षडिति**। स्थावरजङ्गमानि सर्वाणि भूतान्यस्यैकः पादः। दिवि द्योतनवति चिदात्मनि, प्रसिद्धायां वा दिवि त्रयः पादा अस्येति ब्रह्मणश्चतुष्पात्त्वमाह— **तथेति**। चतुष्पात्त्वसाम्याद् ब्रह्मणि गायत्रीपदप्रयोगेऽतिप्रसक्तिमाशङ्क्य श्रौतप्रयोगान्नियतार्थत्वे दृष्टान्तमाह—

दृश्यते। तद्यथा–'ते वा एते पञ्चान्ये पञ्चान्ये दश सन्तस्तत्कृतम्' इत्युपक्रम्याह 'सैषा विराडन्नादी' (छा.उ. ४।३।८) इति। अस्मिन् पक्षे ब्रह्मैवाभिहितमिति न छन्दोऽभिधानम्। सर्वथाऽप्यस्ति पूर्वस्मिन् वाक्ये प्रकृतं ब्रह्म।।२५।।

भूतादिपादव्यपदेशोपपत्तेश्चैवम्।।२६।।

इतश्चैवमभ्युपगन्तव्यमस्ति पूर्वस्मिन् वाक्ये प्रकृतं ब्रह्मेति। यतो भूतादीन् पादान् व्यपदिशति। भूतपृथिवीशरीरहृदयानि हि निर्दिश्याह– 'सैषा चतुष्पदा षड्विधा गायत्री' इति। न हि ब्रह्मानाश्रयणे

प्रकटार्थविवरणम्

तथान्यत्रापीति। पञ्चान्ये अधिदैवं वायुरग्निः सूर्यश्चन्द्रमा आप इति। पञ्चान्ये त्वध्यात्मं प्राणो वाक् चक्षुः श्रोत्रं मन इति। ते वा एते दशसङ्ख्यावच्छिन्नाः सन्तः तत्कृतं द्यूतम्। चतुरयके हि द्यूते कश्चिदयश्चतुरङ्कः कश्चित् त्र्यङ्कः कश्चिद् द्व्यङ्कः कश्चिदेकाङ्कः। एवं दशसङ्ख्यावत्त्वात्कृतस्य संवर्गविद्यायां कृतत्वं सम्पादितम्; तत्सम्पादनेन चान्नादित्वं सम्पादितम्; कृतस्यान्नादित्वेन प्रसिद्धेरित्यन्नादित्वं प्रक्रम्याह— **सैषान्नादनी विराट्छब्दवाच्या।** सैषेति विधेयलिङ्गभजनम्। ते दश पदार्थाः कृतत्वेनान्नादित्वविशिष्टाः सङ्ख्यासामान्यात् विराट्छब्दवाच्याः। दशाक्षरा हि विराट् प्रसिद्धेति भावः। द्वितीयं व्याख्यानमनुजानाति—**अस्मिन्पक्ष इति।**

भूतादिपादव्यपदेशोपपत्तेश्चैवम्। श्रुत्यादिषु प्रथमैकप्रमाणादुत्तरानेकप्रमाणं बलवत्, प्रत्ययसंवादस्य तात्पर्यनिमित्तत्वात् इति न्यायेनापि गायत्रीशब्दो ब्रह्मपर इत्याह—**इतश्चैवमित्यादिना।** न केवलम् "पादोऽस्य सर्वा भूतानि" इत्युक्तस्य सर्वात्मत्वस्य

भाष्यभावप्रकाशिका

हि वायुं प्राणं चाधिदैवताध्यात्मविभागेनाग्निसूर्यचन्द्राम्भसां चतुर्णां वाक्चक्षुश्रोत्रमनसां च संवर्गत्वेनाभिधाय पुनर्वायुप्राणाभ्यां सहाग्न्यादयो वागादयश्च गृह्यन्ते—**पञ्चान्ये पञ्चान्य इति।** तत्र दशसङ्ख्याकत्वाद् दशाक्षरा विराट्संपत्तिः 'अन्नं विराडि'ति च श्रुतेरन्नादित्युक्तम्। अस्य पक्षस्य पूर्वस्माद्विशेषमाह—**अस्मिन् पक्ष इति।** कस्तर्हि पक्षःश्रेयानित्याकाङ्क्षायामाह—**सर्वथापीति।**

भूतादिपादव्यपदेशोपपत्तेश्चैवम्।।२६।। षड्विधेति। भूतपृथिवीशरीरहृदयवाक्प्राणैः षट्प्रकारेत्यर्थः। चकारात्

न्यायनिर्णयः

तथेति। तदेवोदाहरति— **तद्यथेति।** संवर्गविद्यायामधिदैवमग्निसूर्यचन्द्राम्भांसि वायौ लीयन्ते, अध्यात्मं प्राणे वाक्चक्षुःश्रोत्रमनांसीत्युक्तम्। ते वायुना सह पञ्चाऽऽध्यात्मिकेभ्योऽन्य एते प्राणेन सहाधिदैविकेभ्योऽन्ये पञ्च, ते सर्वे दश सन्तस्तत्कृतं कृतायोपलक्षितं द्यूतं भवति। अत्र हि चतुरङ्कायद्यूतगतचतुरङ्कवच्चत्वारः पदार्थाः सन्ति। त्र्यङ्कायवत् त्रयः। द्व्यङ्कायवद् द्वौ। एकाङ्कायवदेकश्च। द्यूते च चतुरङ्कायः कृतसंज्ञकः। स च दशात्मकः, चतुर्ष्वङ्केषु त्रयाणां, त्रिषु द्वयोस्तयोरेकस्य चान्तर्भावात्, वायुप्रभृतयोऽपि दश। तस्मात् तेऽपि कृतमित्युपक्रम्याह– **सैषेति।** विधेयाभिप्रायः स्त्रीलिङ्गनिर्देशः। दशसंख्यात्वाद् विराडन्नं, 'दशाक्षरा विराडन्नं विराड्' इति श्रुतेः। कृतत्वाच्च साऽन्नादिनी। कृते खल्वन्नभूता दशसंख्याऽन्तर्भवति, अतस्तामत्तीवेत्यन्नादिनी विराडित्युच्यते। तथा चान्नादत्वेनापि गुणेन वाय्वादीनामुपास्यता। तत्र यथा संख्यासाम्याद् विराट्शब्दो वाय्वादिषु, तथा गायत्रीशब्दोऽपि चतुष्पात्त्वसाम्याद् ब्रह्मणीत्यर्थः। तथाहीत्यादि व्याख्यायास्य पूर्वस्माद् विशेषमाह— **अस्मिन्निति। अभिहितं** तात्पर्यगम्यमिति यावत्। **न छन्दोभिधानं** न तत्र तात्पर्यमित्यर्थः। यद्यपि पूर्वं विकारस्थं ब्रह्म गायत्रीपदाल्लक्षणया तात्पर्यतोऽभिहितं तथापि गौणप्रयोगे 'वाक्यस्थो गुणस्तात्पर्याल्लभ्यते। लक्षणायां तु वाच्यसंबन्धादर्थान्तरे तात्पर्यमिति भेदः। लाक्षणिकत्वं गौणत्वं वा कतरत् तर्हीष्टम्, तदाह— **सर्वथेति।**।२५।।

श्रुत्यादिष्वाद्यैकमानादुत्तरानेकमानं बलवद् धीसंवादस्य तात्पर्यहेतुत्वादिति न्यायेनापि गायत्रीशब्दं ब्रह्मेत्याह— **भूतादीति।** श्रुत्यादिष्वाद्यैकमानादुत्तरानेकमानं — **व्यपदिशति।** 'गायत्री वा' इत्यादिश्रुतिरिति शेषः। चशब्दमेवंशब्दं च व्याकरोति— **इतश्चेति।** तदेव स्फुटयति— **यत इति।**

१. 'वाच्यस्थो' इति पाठः स्यात्।

केवलस्य छन्दसो भूतादयः पादा उपपद्यन्ते। अपि च ब्रह्मानाश्रयणे नेयमृक् संबध्यते– 'तावानस्य' इति। अनया हि ऋचा स्वरसेन ब्रह्मैवाभिधीयते, 'पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि' (छा. ३।१२।५) इति सर्वात्मत्वोपपत्तेः। पुरुषसूक्तेऽपीयमृग् ब्रह्मपरतयैव समाम्नायते। स्मृतिश्च ब्रह्मण एवंरूपतां दर्शयति– 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' (भ.गी. १०।४२) इति। 'यद्वै तद् ब्रह्म' (छा. ३।१२।७) इति च निर्देश एवं सति मुख्यार्थ उपपद्यते। 'पञ्च ब्रह्मपुरुषाः' (छा. ३।१३।६) इति च हृदयसुषिषु ब्रह्मपुरुषश्रुतिर्ब्रह्मसंबन्धितायां विवक्षितायां संभवति। तस्मादस्ति पूर्वस्मिन् वाक्ये ब्रह्म प्रकृतम्। तदेव ब्रह्म ज्योतिर्वाक्ये द्युसंबन्धात् प्रत्यभिज्ञायमानं परामृश्यत इति स्थितम्।।२६।।

उपदेशभेदान्नेति चेत् नोभयस्मिन्नप्यविरोधात्।।२७।।

प्रकटार्थविवरणम्

ब्रह्मण्येवोपपत्तेः ब्रह्मपरत्वम्, शाखान्तरे ब्रह्मविषयत्वेन प्रसिद्धत्वाच्चेत्याह—**पुरुषसूक्तेऽपीति**। यच्चोक्तं ब्रह्मशब्दः छन्दोविषय इति; तत्राह—**यद्वै तदिति**। "तस्य ह वा एतस्य हृदयस्य पञ्च देवसुषयः स योऽस्य प्राङ् सुषिः स प्राणः" इत्युपक्रम्य "ते वा एते पञ्च ब्रह्मपुरुषाः" इति प्राच्यादिहृदयच्छिद्रेषु ब्रह्मणो हार्दस्य संबन्धाद् ब्रह्मपुरुषश्रुतिः।

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्। अप्रत्यभिज्ञाकारणमुद्भाव्य दूषयति— **उपदेशेति**। [1]औपश्लेषाधिकरणं

भाष्यभावप्रकाशिका

सूचितोपपत्त्यन्तराण्याह—**अपि चेति**। ब्रह्मप्रकरणोत्पन्नत्वादपि ब्रह्मपरेयमृगित्याह—**पुरुषेति**। स्मृत्युक्तस्यार्थस्येह वा प्रत्यभिज्ञानादपि अस्य वाक्यस्य ब्रह्मपरत्वमित्याह— **स्मृतिश्चेति**। तस्य ह वाएतस्य हृदयस्य पञ्च देवसुषय इति प्रागादिदिक्षूर्ध्वं च हृदयस्योपास्यायतनस्य पञ्च च्छिद्राण्यभिधीयन्ते। तेषां ब्रह्मसम्बन्धिताभिधानादुपास्यं ब्रह्मेति निश्चीयत इत्यर्थः।

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्।।२७।। यदाऽऽधारत्वं मुख्यं दिवस्तदा कथञ्चिन्मर्यादा व्याख्येया। यो हि

न्यायनिर्णयः

भूतादीन्येवोच्यन्ते, न तेषां पादत्वमित्याशङ्क्याह— **भूतेति**। पादैः षडक्षरैश्चतुष्पात्त्वेऽप्यनन्तरोक्तभूतादीनां पादत्वं 'सैषा' इत्यादिशास्त्रादित्यर्थः। तत्रान्यार्थत्वेनोक्तावपि वाक्प्राणावुपेत्य षड्विधत्वम्। भूतादिपादत्वस्यान्यथासिद्धिं प्रत्याह— **न हीति**। चकारसूचितं युक्त्यन्तरमाह— **अपि चेति**। छन्दोऽङ्गीकारे कथमृचोऽसंगतिः, तत्राह— **अनयेति**। उत्तरार्धेन पूर्वार्धविवरणेनोच्यमानसार्वात्म्यस्य सर्वकारणे ब्रह्मण्युपपत्तेरिति स्वारस्यमेव दर्शयन्नुक्तेऽर्थे हिशब्दसूचितं हेतुमाह— **पादोऽस्येति**। [2]ब्रह्माधिकारोत्पत्तेरपि तत्परत्वमृचो वाच्यमित्याह— **पुरुषेति**। ब्रह्मविषयस्मृत्यर्थस्यात्र प्रत्यभिज्ञानाच्च तथेत्याह— **स्मृतिश्चेति**। यत्तु मन्त्रानन्तरभाविब्रह्मशब्दस्य छन्दोविषयत्वं, तद् दूषयति— **यदिति**। **एवं सति** पूर्ववाक्ये ब्रह्मोपगमे सतीत्यर्थः। इतोऽपि पूर्वं ब्रह्मोक्तमित्याह— **पञ्चेति**। गायत्र्याख्यब्रह्मणो हार्दस्योपास्त्यङ्गत्वेन द्वारपालादिगुणविध्यर्थं 'तस्य ह वा एतस्य हृदयस्य पञ्च देवसुषयः' इत्यादिवाक्यम्। तत्र च 'ते वा एते पञ्च ब्रह्मपुरुषाः' इति प्राच्यादिहृदयच्छिद्रेषु हार्दब्रह्मसंबन्धाद् ब्रह्मपुरुषश्रुतिः। अतोऽप्यस्ति पूर्वं ब्रह्मोक्तमित्यर्थः। गायत्रीवाक्यस्य छन्दोमात्रार्थत्वाभावे फलितमाह— **तस्मादिति**। **परामृश्यते** यच्छब्देनेति शेषः।।२६।।

---

१. औपश्लेषिको वैषयिकोऽभिव्यापकश्चेति आधारस्त्रिधा। 'कटे आस्ते' 'मोक्षे इच्छाऽस्ति' 'तिलेषु तैलम्' इति क्रमेणोदाहरणम्। 'नद्यामास्ते' इत्याद्यर्थं सामीपिकमधिकरणं चतुर्थमपि के चिदिच्छन्ति। द्र. तत्त्वबो. १५७।

२. ब्रह्मप्रकरणपठितत्वादपीति यावत्।

यदप्येतदुक्तं पूर्वत्र 'त्रिपादस्यामृतं दिवि' इति सप्तम्या द्यौराधारत्वेनोपदिष्टा; इह पुनः 'अथ यदतः परो दिवः' इति पञ्चम्या मर्यादात्वेन, तस्मादुपदेशभेदान्न तस्येह प्रत्यभिज्ञानमस्तीतिः तत् परिहर्तव्यम्। अत्रोच्यते— नायं दोषः, उभयस्मिन्नप्यविरोधात्। उभयस्मिन्नपि सप्तम्यन्ते पञ्चम्यन्ते चोपदेशे न प्रत्यभिज्ञानं विरुध्यते। यथा लोके वृक्षाग्रसंबद्धोऽपि श्येन उभयथोपदिश्यमानो दृश्यते, वृक्षाग्रे श्येनो वृक्षाग्रात् परतः श्येन इति च। एवं दिव्येव सद् ब्रह्म दिवः परमित्युपदिश्यते।

अपर आह— यथा लोके वृक्षाग्रेणासंबद्धोऽपि श्येन उभयथोपदिश्यमानो दृश्यते, वृक्षाग्रे श्येनो वृक्षाग्रात्परतः श्येन इति च। एवं (च) दिवः परमपि सद् ब्रह्म दिवीत्युपदिश्यते। तस्मादस्ति पूर्वनिर्दिष्टस्य ब्रह्मण इह प्रत्यभिज्ञानम्। अतः परमेव ब्रह्म ज्योतिःशब्दमिति सिद्धम्।।२७।।

।।इति दशमं ज्योतिश्चरणाधिकरणम्।।

प्रकटार्थविवरणम्

व्याख्याय सामीपिकाभिप्रायेण व्याचष्टे— 'अपर आहेति। यस्मात् गायत्रीवाक्ये ब्रह्म निर्दिष्टम्,[अ]प्रत्यभिज्ञायां च नास्ति कारणं तस्मादित्युपसंहारः। इति ज्योतिश्चरणाधिकरणम्।

भाष्यभावप्रकाशिका

श्येनो वृक्षाग्रे वर्तते, स ततः परतोऽप्यस्त्येव; अर्वाग्भागातिरिक्तमप्यपरभागस्थस्य तस्यैव वृक्षात्परतोऽवस्थानादित्यभिप्रेत्याह— यथा लोक इति।

यदा तु मर्यादैव प्राधान्येन विवक्षिता, तदा लक्षणयाऽऽधारत्वं व्याख्येयम् सामीप्यात्, यथा गङ्गायां घोष इति, तदेतदाह— अपर आहेति। एवमर्थभेदाभावादुपदेशभेदेऽप्यविरोध इत्यर्थः। तदेवं श्रुत्यादिषु प्रथमैकप्रमाणादुत्तरानेकप्रमाणानि बलवन्ति; प्रत्ययसंवादस्य तात्पर्यनिमित्तत्वादिति न्यायेन भूतादिपादलिङ्गात् "तावानस्ये"ति च मन्त्रलिङ्गात् "यद्वै तद् ब्रह्मे"ति च वाक्याद् गायत्रीशब्दं ब्रह्मेति सिध्यतीत्यङ्गीकृतो[त्यो]पसंहरति—तस्मादिति।।२७।। इति दशमं ज्योतिश्चरणाधिकरणम्।।

न्यायनिर्णयः

द्युसंबन्धात् प्रत्यभिज्ञेत्यत्रानुपपत्तिमुद्भाव्य दूषयति— उपदेशेति। अनुवादं विभजते— यदपीति। तस्य पूर्ववाक्यस्थस्य चतुष्पदो ब्रह्मण इति यावत्। चोद्यस्य समूलतया समाधियोग्यतामाह— तदिति। तत्र समाधिसत्त्वं ब्रुवाणः सूत्रावयवं पातयति— अत्रेति। उपदेशभेदो दोषो नेति नञर्थमुक्त्वा हेतुमाह— नायमिति। हेतुं व्याकरोति—उभयस्मिन्निति। यदाऽऽधारत्वं दिवो मुख्यं तदा कथंचिन्मर्यादा वाच्येति दृष्टान्तमाह— यथेति। श्येनो वृक्षाग्रे स्थितोऽपि परतोऽस्त्येव, अग्रलग्नभागातिरिक्तोपरिभागस्थस्य तस्यैवाग्रात्परतोऽवस्थानात्, अतो वृक्षाग्रस्य श्येनं प्रत्याधारत्वे मुख्ये तस्मात् परतः श्येनः इत्यत्र श्येनशब्दोऽग्रलग्नावयवादूर्ध्वावयवावच्छिन्नावयविलक्षक इत्यर्थः। ब्रह्मणः श्येनवदवयवाभावादाधारेऽमुख्ये मर्यादा भूताकाशापेक्षयेति दार्ष्टान्तिकमाह— एवमिति। दिवि द्योतनवति स्वे महिम्नि हार्दे वा नभसीत्यर्थः। दिवो भूताकाशाद् बाह्याद‌बाह्याद्वा तस्मादित्यर्थःह

यदाऽनौपाधिकं ब्रह्माऽऽकाशास्पृष्टं गृहीत्वा पञ्चम्येव मुख्या तदा सामीप्यं सप्तमी लक्षयतीत्याह— अपर इति। यदा भूतादिपादत्वलिङ्गात्, 'तावानस्य' इति मन्त्रलिङ्गात्, 'यद्वै तद् ब्रह्म' इति वाक्याद् गायत्रीशब्दस्य ब्रह्मार्थत्वादुपदेशभेदेऽप्यर्थैक्यादप्रत्यभिज्ञाऽयोगाद् युक्ताऽस्य प्रत्यभिज्ञेत्यवान्तरप्रकृतमुपसंहरति— तस्मादिति। प्रत्यभिज्ञातस्य यच्छब्दपरामर्शे तदेव ज्योतिरिति परमप्रकृतमुपसंहरति— अत इति।।२७।।इति दशमं ज्योतिश्चरणाधिकरणम्।।

---

१. सामीप्येऽधिकरणसप्तमी न मुख्या, किन्तु तत्राधारत्वारोपेण सप्तमीप्रयोगः। मुख्यसंभवे च गौणं न न्याय्यमित्यस्मिन् व्याख्यानेऽस्वरसः। सामीप्यमपि चास्मिन् पक्षे न संभवति इति व्यक्तं परिमलादौ।

११।।प्रतर्दनाधिकरणम्।।सू. २८-३१।।

प्राणस्तथाऽनुगमात्।।२८।।

अस्ति कौषीतकिब्राह्मणोपनिषदीन्द्रप्रतर्दनाख्यायिका- 'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च' इत्यारभ्याम्नाता। तस्यां श्रूयते- 'स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्व' इति। तथोत्तरत्रापि 'अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति' (कौ. ३।१,२,३) इति। तथा 'न वाचं विजिज्ञासीत वक्तारं विद्यात्' इत्यादि। अन्ते च 'स एष प्राण एव

शारीरकन्यायसंग्रह

प्राणस्तथानुगमात्।।२८।। न वक्तुरात्मोपदेशात् इति चेदध्यात्मसंबन्धभूमा ह्यस्मिन्।।२९।। शास्त्रदृष्ट्या तूपदेशो वामदेववत्।।३०।। जीवमुख्यप्राणालिङ्गान्नेति चेत् नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्।।३१।। अत्रैकस्मिन्नर्थप्रतिपादनपरे वाक्ये ब्रह्माब्रह्मलिङ्गेषु संनिहितेषु अब्रह्मलिङ्गानि ब्रह्मपरतया निर्णेतव्यानि, न तु ब्रह्मलिङ्गानि अब्रह्मपरतया; कारणस्य कार्याकारेण व्यवस्थितस्य कार्यधर्मेणापि संबन्धात्, कार्यस्य परिच्छिन्नस्य कार्यान्तरेष्वपि वर्तमानेन कारणधर्मेण संबन्धाभावात्—इति न्यायेन प्राणजीवदेवतात्मलिङ्गानि ब्रह्मपरतया निर्णीतानि। अत्रेदवमगन्तव्यम्—यथा "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इति श्रुत्या मन्त्रस्य इन्द्रप्रतिपादनसामर्थ्यलक्षणं लिङ्गं बाधित्वा गार्हपत्योपस्थानपरत्वमुपपाद्यते, न तथा इह श्रुत्यादीनामन्यतमेन प्रमाणेनान्यतमस्यात्यन्तबाधः क्रियते; किं तु कथंचित् स्वार्थमपरित्यज्यैव ब्रह्मपरतया तस्यापि वृत्तिराश्रीयते इति।

इति शारीरकन्यायसङ्ग्रहे भगवत्प्रकाशात्मविरचिते

प्रथमस्याध्यायस्य प्रथमः पादः

प्रकटार्थविवरणम्

प्राणस्तथानुगमात्। विषयं दर्शयितुमुपक्रममाह—**अस्तीत्यादिना।** दिवोदासस्यापत्यं दैवोदासिः; धाम गृहम्; उपगतो युद्धकरणेन पुरुषकारप्रदर्शनेन चेत्यर्थः। विषयं संशयं चाह—**तस्यामित्यादिना।**

भाष्यभावप्रकाशिका

प्राणस्तथानुगमात्।।२८।। पक्षान्तरेषु संशयप्रदर्शनार्थं वाक्यान्तराण्युदाहरति—**तथेत्यादिना।** ननु ब्रह्मलिङ्गाद् ब्रह्मणि

न्यायनिर्णयः

अनन्यथासिद्धतात्पर्यवद्ब्रह्मलिङ्गादुक्तवाक्यानां ब्रह्मपरत्वेऽपि प्रातर्दने वाक्ये पदार्थानामनेकेषामनेकलिङ्गदृष्ट्या कस्यानुसरात् किं नेयमित्याकाङ्क्षायामाह— **प्राण इति।** विषयं वक्तुमुपक्रममनुक्रामति— **अस्तीति।** प्रतर्दनस्य राज्ञो लोकप्रसिद्ध्यर्थौ निपातौ। दिवोदासस्यापत्यं दैवोदासिस्तत्प्रियं प्रेमास्पदं, धाम गृहं, तद्गतौ हेतुः—**युद्धेनेति।** तत्करणेन पुरुषकारप्रदर्शनेन चेत्यर्थः। **आम्नातेति।** 'तं हेन्द्र उवाच प्रतर्दन वरं ते ददानीति स होवाच प्रतर्दनस्त्वमेव मे वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे' इत्याद्याख्यायिका श्रुतेत्यर्थः। मुख्यप्राणव्यावृत्त्यर्थम्— **प्रज्ञात्मेति।** निर्विशेषं चिन्मात्रं व्यावर्तयति— **तं मामिति।** देवतासंभावनायै वाक्यमुक्त्वा प्राणसंभावनार्थमाह— **तथेति।** देहधारणं न वागादिकृतमित्युक्त्यनन्तरमित्यथशब्दार्थः। प्राणस्य तत्कार्यं प्रसिद्धमिति खल्वित्युक्तम्। जीवं संभावयितुमाह— **तथेति।** परमात्मानं संभावयति— **अन्ते चेति।** आदिपदेन 'स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्' इत्याद्युक्तम्। विषयमुक्त्वाऽनेकलिङ्गदृष्ट्या

प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः' (कौ. ३।८) इत्यादि। तत्र संशयः– किमिह प्राणशब्देन वायुमात्रमभिधीयत उत देवतात्मोत जीवोऽथवा परं ब्रह्मेति।

ननु 'अत एव प्राणः' इत्यत्र वर्णितं प्राणशब्दस्य ब्रह्मपरत्वम्। इहापि च ब्रह्मलिङ्गमस्ति– 'आनन्दोऽजरोऽमृतः' इत्यादि। कथमिह पुनः संशयः संभवति? अनेकलिङ्गदर्शनादिति ब्रूमः। न केवलमिह ब्रह्मलिङ्गमेवोपलभ्यते। सन्ति हीतरलिङ्गान्यपि। 'मामेव विजानीहि' (कौ. ३।१) इतीन्द्रस्य वचनं देवतात्मलिङ्गम्। 'इदं शरीरं परिगृह्योत्थापयति' इति प्राणलिङ्गम्। 'न वाचं विजिज्ञासीत वक्तारं विद्यात्' इत्यादि जीवलिङ्गम्। अत उपपन्नः संशयः।

तत्र प्रसिद्धेर्वायुः प्राण इति प्राप्त उच्यते– प्राणशब्दं ब्रह्म विज्ञेयम्। कुतः? तथाऽनुगमात्। तथाहि– पौर्वापर्येण पर्यालोच्यमाने वाक्ये 'पदानां समन्वयो ब्रह्मप्रतिपादनपर उपलभ्यते। उपक्रमे तावद् 'वरं वृणीष्व' इतीन्द्रेणोक्तः प्रतर्दनः परमं पुरुषार्थं वरमुपचिक्षेप– 'त्वमेव मे वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे' इति। तस्मै हिततमत्वेनोपदिश्यमानः प्राणः कथं परमात्मा न स्यात्; न ह्यन्यत्र

प्रकटार्थविवरणम्

पूर्वन्यायेन गतत्वात् संशयो नोपपद्यत इत्याह—**ननु अत एवेति**। समाधत्ते—**अनेकेति**। अनेकलिङ्गदर्शने हि कतमत् लिङ्गं तदाभासं वा कतमदिति भवति संशयः। तदपाकरणाय युक्तः पृथगारम्भ इत्यर्थः। पूर्वत्र त्रिपात्प्रकृतब्रह्मपरामर्शकयच्छब्दसामानाधिकरण्याज्ज्योतिःश्रुतिरपि तद्विषयैवेति प्रत्यपादि। नेह तथाविधं किञ्चिदसाधारणं प्राणस्य ब्रह्मत्वे दृश्यते। ततः प्रसिद्ध्यतिक्रमे कारणाभावात् वायुरेव प्राण इत्याह—**तत्र प्रसिद्धेरिति**।

तथेति। ब्रह्मप्रतिपादनपरत्वेनैवानुगमात् पदानामन्वयदर्शनादित्यर्थः। यमर्थं त्वं मनुष्यायातिशयेन हितं मन्यसे तं परमाभिलषितं मह्यं त्वमेव प्रयच्छेति प्रतर्दनेनोक्ते कथं तस्मै वायुरुपदिश्येत? विकारज्ञानात् परमश्रेयोऽनुपपत्तेरित्यर्थः।

भाष्यभावप्रकाशिका

वृत्तिरुक्ता, अत्र तु कथमिति? तत्राह—**इहापीति**। **अनेकलिङ्गदर्शनादिति**। अयमर्थः— कस्य लिङ्गस्य लिङ्गानुसारेण नेतव्यमिति(?) विचार्यत इति।

न्यायनिर्णयः

संशयमाह— **तत्रेति**। गतार्थत्वेन तमाक्षिपति— **नन्विति**। ब्रह्मलिङ्गात् प्राणशब्दस्य ब्रह्मणि वृत्तिरुक्ता। प्रकृते कथमित्याशङ्क्याह— **इहापीति**। 'एष लोकाधिपतिः' इत्यादिसंग्रहायादिपदम्। अनेकेषु लिङ्गेषु दृष्टेषु कतमल्लिङ्गं, लिङ्गाभासं वा कतमदिति संशयं निरसितुमधिकरणमित्याह— **अनेकेति**। तदेव विवृणोति— **नेत्यादिना**। 'न गन्धं विजिज्ञासीत घ्रातारं विद्यात्' इत्यादिपदेनोक्तम्। अनेकलिङ्गानि दर्शयित्वा तत्कार्यमाह— **अत इति**। पूर्वत्र प्रकृतत्रिपाद्ब्रह्मपरामर्शियच्छब्दसमानाधिकृता ज्योतिःश्रुतिस्तदर्थेत्युक्तम्। इह न तथाविधमसाधारणं किंचिदस्ति प्राणस्य ब्रह्मत्वे मानमिति प्रसिद्ध्यनतिक्रमात्प्राणो वायुरेवेत्याह— **तत्रेति**। स्फुटब्रह्मलिङ्गानां कौषीतकिश्रुतीनां ब्रह्मण्यन्वयोक्तेः श्रुत्यादिसंगतयः। पूर्वपक्षे प्राणदेवताजीवानामन्यतमोपास्तिः फलं, सिद्धान्ते ब्रह्मोपास्तिः।

मुख्यप्राणपक्षमनूद्य सूत्रमादाय प्रतिज्ञां विभजते— **इति प्राप्त इति**। लिङ्गान्तरेषु सत्सु कुतोऽस्य ब्रह्मार्थतेत्याह— **कुत इति**। तेषां वक्ष्यमाणान्यथासिद्धिं मत्वा हेतुमाह— **तथेति**। ब्रह्मप्रतिपादनपरत्वेनैव पदानामन्वयदृष्टेरित्यर्थः। हेत्वर्थं प्रपञ्चयति— **तथाहीति**। तत्रादावुपक्रमे पदानां ब्रह्मण्यन्वयमाह— **उपक्रम इति**। यं त्वं मनुष्यायातिशयेन हितं मन्यसे तं वरमभिलषितं मह्यं त्वमेव वृणीष्व प्रयच्छेति प्रतर्दनेनोक्ते 'मामेव' इत्यादिना प्राणस्योच्यमानस्य न युक्ता वायुविकारतेत्याह— **तस्मा इति**।

१. 'पदार्थानाम्' इति पाठान्तरम्।

परमात्मज्ञानाद्धिततमप्राप्तिरस्ति; 'तमेव विदित्वाऽति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे.उ. ३।८) इत्यादिश्रुतिभ्यः। तथा 'स यो मां वेद न ह वै तस्य केनचन कर्मणा लोको मीयते···· न स्तेयेन न भ्रूणहत्यया' (कौ.उ. ३।१) इत्यादि च ब्रह्मपरिग्रहे घटते। ब्रह्मविज्ञानेन हि सर्वकर्मक्षयः प्रसिद्धः- 'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' (मु.उ. २।२।८) इत्याद्यासु श्रुतिषु। प्रज्ञात्मत्वं च ब्रह्मपक्ष एवोपपद्यते। न ह्यचेतनस्य वायोः प्रज्ञात्मत्वं संभवति। तथोपसंहारेऽपि- 'आनन्दोऽजरोऽमृतः' इत्यानन्दत्वादीनि न ब्रह्मणोऽन्यत्र सम्यक् संभवन्ति। 'स न साधुना कर्मणा भूयान् भवति नो एवासाधुना कर्मणा कनीयानेष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते। एष उ एवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषते' इति, 'एष लोकाधिपतिरेष लोकेशः' (कौ.उ. ३।८) इति च। सर्वमेतत् परस्मिन् ब्रह्मण्याश्रीयमाणेऽनुगन्तुं शक्यते, न मुख्ये प्राणे। तस्मात् प्राणो ब्रह्म।।२८।।

न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन्।।२९।।

यदुक्तं प्राणो ब्रह्मेति, तदाक्षिप्यते। न परं ब्रह्म प्राणशब्दम्। कस्मात्? वक्तुरात्मोपदेशात्। वक्ता हीन्द्रो

प्रकटार्थविवरणम्

सर्वकर्मप्रदाहोऽपि ब्रह्मपरिग्रहेऽनुगुणो भवतीत्याह—**तथा स यो मामिति**। स यो मां ब्रह्मरूपं वेद साक्षादनुभवति, तस्य विदुषो लोकः फलभूतो मोक्षः केनापि कर्मणा महापातकेनापि न मीयते, न हिंस्यते, न प्रतिबध्यते; ज्ञानमाहात्म्येन सर्वं दग्धं भवतीत्यर्थः। चेतनत्वमपि क्रियाशक्तिमति प्राणे न संभवतीत्याह—**प्रज्ञात्मत्वं चेति**। लिङ्गान्तराण्याह—**तथेत्यादिना**। साधुना कर्मणाऽग्निहोत्रादिना, भूयान् बहुतरः, पुण्याद्यसंस्पृष्ट इत्यर्थः।

न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् यद्यप्युक्तरीत्या न वायुः प्राणः, तथापि न ब्रह्मेत्याह—

भाष्यभावप्रकाशिका

एवकारार्थमेव दर्शयति—**नान्यः पन्था इति**। ननु दुःखाभावस्याप्यानन्दत्वादशरीरस्याप्राणस्य च जरामरणयोरप्यभावात् प्राणपरिग्रहेऽप्यानन्दत्वादि संभवतीति, तत्राह—**सम्यगिति**।

[न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन्।।२९।।] इन्द्रोऽपि ब्रह्मभूतःसन्नुपदिशति, ततः

न्यायनिर्णयः

उपास्तेरचिन्त्यशक्तित्वात्प्राणोपास्तिरेव मोक्षहेतुरलं ब्रह्मधियेत्याशङ्क्याह— **न हीति**। एवकारार्थमाह— **नान्य इति**। आदिशब्देन 'तमेवं विद्वान्' इत्याद्या श्रुतिरुक्ता। उपक्रमवन्मध्येऽपि पदानां ब्रह्मण्यन्वयमाह— **तथेति**। स यः कश्चिदधिकृतो मां ब्रह्मरूपं साक्षादनुभवति, तस्य विदुषो लोको मोक्षो महताऽपि पातकेन न मीयते, न हिंस्यते, न प्रतिबध्यते, ज्ञानमाहात्म्येन सर्वस्यापि पापस्य दग्धत्वादित्याह— **स य इति**। केन चन कर्मणेत्युक्तं स्पष्टयति— **नेत्यादिना**। 'न मातृवधेन न पितृवधेन' इत्यादि वक्तुमादिपदम्। श्रुतस्य सर्वपापदाहस्यान्यथासिद्धिं प्रत्याह— **ब्रह्मेति**। 'एवं न हास्य' इत्यादिश्रुतिसंग्रहार्थम् 'एवमाद्यासु'[1] इत्युक्तम्। इतश्च ब्रह्मैव प्राणशब्दमित्याह— **प्रज्ञेति**। अन्ययोगव्यावृत्तिमाह— **न हीति**। प्रक्रमादिवदुपसंहारेऽपि पदानां ब्रह्मार्थत्वमाह— **तथेति**। आनन्दस्य दुःखाभावत्वान्मुख्येऽपि प्राणे योगाददेहस्य जरामरणयोरभावादजरत्वादेरपि तत्रोपपत्तेर्नोपसंहारस्य ब्रह्मार्थतेत्या-शङ्क्याह— **आनन्दत्वादीनीति**। प्राणशब्दं ब्रह्मेत्यत्र लिङ्गान्तराण्याह— **स नेत्यादिना**। धर्माद्यस्पृष्टत्वं, तत्कारयितृत्वं, तदीशितृत्वं च सर्वमुक्तम्। उक्तलिङ्गफलमाह— **तस्मादिति**।।२८।।

---

१. इदं भाष्ये पाठान्तरमिति भाति।

नाम कश्चिद् विग्रहवान् देवताविशेषः स्वमात्मानं प्रतर्दनायाऽऽचचक्षे- 'मामेव विजानीहि' इत्युपक्रम्य 'प्राणोऽस्मि प्रज्ञात्मा' इत्यहंकारवादेन। स एष वक्तुरात्मत्वेनोपदिश्यमानः प्राणः कथं ब्रह्म स्यात्? न हि ब्रह्मणो वक्तृत्वं संभवति, 'अवागमनः' (बृ.उ. ३।८।८) इत्यादिश्रुतिभ्यः। तथा विग्रहसंबन्धिभिरेव ब्रह्मण्यसंभवद्भिर्धर्मैरात्मानं तुष्टाव- 'त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान् यतीञ्शालावृकेभ्यः प्रायच्छम्' इत्येवमादिभिः। प्राणत्वं चेन्द्रस्य बलवत्त्वादुपपद्यते। 'प्राणो वै बलम्' इति हि विज्ञायते। बलस्य चेन्द्रो देवता प्रसिद्धा। 'या च काचिद् बलकृतिरिन्द्रकर्मैव तद्'(नि.७.१०.२)इति हि वदन्ति। प्रज्ञात्मत्वमप्य-प्रतिहतज्ञानत्वाद् देवतात्मनः संभवति। 'अप्रतिहतज्ञाना देवता' इति हि वदन्ति। निश्चिते चैवं देवतात्मोपदेशे हिततमत्वादिवचनानि यथासंभवं तद्विषयाण्येव योजयितव्यानि। तस्माद् वक्तुरिन्द्रस्यात्मोपदेशान्न प्राणो

प्रकटार्थविवरणम्

यदुक्तमित्यादिना। ब्रह्मणो वक्तृत्वाभावात्, इह च वक्त्रा स्वस्यैव ज्ञेयत्वेनोपदिष्टत्वादिन्द्रोपसनापरमिदं वाक्यमित्यर्थः। किञ्चेन्द्रस्य स्तूयमानत्वात् तस्यैवोपास्यत्वमित्याह—**तथा विग्रहेति।** त्रीणि शीर्षाणि यस्य स त्रिशीर्षा; तं त्वष्टुरपत्यं वृत्रं हतवानस्मि। रौति यथार्थं शब्दयतीति रुत् वेदवाक्यम्; तत्र मुखं येषां ते रुन्मुखाः। ततोऽन्ये अरुन्मुखाः वेदोक्ताननुष्ठायिन इत्यर्थः। सालावृकेभ्योऽरण्यश्वभ्यः प्रत्तवानस्मि। तर्हीन्द्रे प्राणशब्दः कथमित्याशङ्क्याह— **प्राणत्वं चेति।** बलवाचिना प्राणशब्देन बलवानिन्द्रो लक्ष्यत इत्यर्थः। बलदैवतत्वाद्वा तत्र प्राणशब्द उपचर्यत इत्याह— **बलस्य चेति।** कथं तर्हि प्रज्ञात्मशब्द इत्याशङ्क्याह— **प्रज्ञात्मत्वमपीति।** तथापि हिततमादिवचनं नेन्द्रे संभवतीत्याशङ्क्याह— **निश्चिते चैवमपीति।**[1] "विद्यया देवलोकः" इति श्रुतेः इन्द्रोपासनात् स्वर्गो भवतीति हिततमत्वाभिधानम्। अजरामृतत्वादिकं त्वापेक्षिकम्, "आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते" इति भावः। तत्र इन्द्रशब्देन सहस्राक्षाद्युपलक्षितश्चिद्धातुरभिप्रेतः, किं वा सचितिकः सहस्राक्षत्वादिविशिष्टो देहः? प्रथमे ब्रह्मण्येव समन्वयः। चरमं प्रत्याह—**अध्यात्मसंबन्धेति।** अस्तित्वे प्राणस्थितौ स्थितिरिति।

भाष्यभावप्रकाशिका

काऽनुपपत्तिरित्याह—**न हि ब्रह्मण इति।** प्राणप्रज्ञात्मत्वादिशब्दानामिन्द्रक्षेत्रज्ञे वृत्तिमाह—**प्राणत्वं चेति।** ननु बलवत्त्वाद्बलशब्द उपचरितुं शक्यते, प्राणशब्दस्य कथं वृत्तिरित्याशङ्क्याह—**प्राणो वै बलमिति।** बलवत्त्वं कथमिति? तत्राह—**बलस्येति।** प्रसिद्धिं दर्शयति—**या काचिदिति।** सामर्थ्यातिशयाद्धिततमपुरुषार्थहेतुत्वम्, कर्मानधिकाराद् भ्रूणहत्यादिपापापरामर्शः, लोक-पालत्वाल्लोकाधिपत्यम्, आनन्दत्वं स्वर्गत्वात्,[स्वर्गस्य] आनन्दत्वात्, अमृतत्वमाभूतसंप्लवनस्थानादुपपन्नमित्याह—**निश्चित**

न्यायनिर्णयः

देवतापक्षमुत्थाप्य प्रत्याह— **नेत्यादिना।** चोद्यतात्पर्यमाह— **यदुक्तमिति।** तत्र नञर्थमाह— **नेति।** उक्तहेतुषु सत्सु निषेधासिद्धिरित्याह— **कस्मादिति।** हेतुमादाय व्याचष्टे— **वक्तुरिति।** अहंकारवादेनेति क्रियापदेन संबध्यते। कथमिति सूचितानुपपत्तिं स्फुटयति— **न हीति।** 'अवाक्यनादरः' इत्यादिश्रुतिरादिशब्दार्थः। ब्रह्मणो वक्तृत्वाभावादत्र वक्त्रा स्वस्यैव ज्ञेयत्वोक्तेरिन्द्रोपास्तिपरं वाक्यमिति। अत्रैव हेत्वन्तरमाह— **तथेति।** त्रीणि शीर्षाणि शिरांसि यस्य स त्रिशीर्षा विश्वरूपः, स च त्वाष्ट्रस्त्वष्टुरपत्यं, तमहनं हतवानस्मि। रौति यथार्थं शब्दयतीति रुत् वेदान्तवाक्यं, तत्र मुखं येषां ते रुन्मुखास्ततोऽन्ये चारुन्मुखास्तान् वेदान्तबहिर्मुखानित्यर्थः। शालावृका वन्यश्वानः। 'बह्वीः संध्या [संधा] अतिक्रम्य दिवि प्रह्लादिनमतृण-मित्यादिरादिशब्दार्थः। तथापि प्राणशब्दान्नेन्द्रस्योपास्यतेत्याशङ्क्याह— **प्राणत्वं चेति।** बलवत्त्वाद् बलशब्दोपचारेऽपि कथं प्राणशब्दत्वमस्येत्याशङ्क्याह— **प्राण इति।** बलवत्त्वमेवेन्द्रस्य कथम्, तत्राह— **बलस्येति।** प्रसिद्धिं लौकिकत्वेन प्रकटयति— **येति।** तथापि प्रज्ञात्मत्वविरोधादनुपास्यता, नेत्याह— **प्रज्ञेति।** कथमप्रतिहतज्ञानत्वम्? लोकवेदप्रसिद्धेरित्याह— **अप्रतिहतेति।** तथापि हिततमपुरुषार्थहेतुत्वाद्युक्तिविरोधे कुतोऽस्योपास्यता, तत्राह— **निश्चिते चेति।** शक्त्यतिशयादुक्तपुमर्थहेतुत्वं, कर्मानधिकाराद् भ्रूणहत्याद्यपरामृष्टत्वं, लोकपालत्वाल्लोकाधिपत्यं, स्वर्गस्यानन्दत्वादानन्दत्वम्, अमृतत्वाजरत्वे चाभूतसंप्लवं स्थितेरिति भावः। आक्षेपमुसंहरति— **तस्मादिति।** तमनूद्य समाधिमवतारयति— **इत्याक्षिप्येति।** तस्यार्थमाह— **अध्यात्मेति।**

१. इदं भाष्ये पाठान्तरमिति भाति।

ब्रह्मेत्याक्षिप्य प्रतिसमाधीयते– 'अध्यात्मसंबन्धभूमा ह्यस्मिन्' इति। अध्यात्मसंबन्धः प्रत्यगात्मसंबन्धस्तस्य भूमा बाहुल्यमस्मिन्नध्याय उपलभ्यते। 'यावद्ध्यस्मिञ्शरीरे प्राणो वसति तावदायुः' इति प्राणस्यैव प्रज्ञात्मनः प्रत्यग्भूतस्यायुष्प्रदानोपसंहारयोः स्वातन्त्र्यं दर्शयति, न देवताविशेषस्य पराचीनस्य। तथा 'अस्तित्वे च प्राणानां निःश्रेयसम्' इत्यध्यात्ममेवेन्द्रियाश्रयं प्राणं दर्शयति। तथा 'प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति' (कौ. ३।३) इति, 'न वाचं विजिज्ञासीत वक्तारं विद्यात्' इति चोपक्रम्य 'तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः' इति विषयेन्द्रियव्यवहारारनाभिभूतं प्रत्यगात्मानमेवोपसंहरति। 'स म आत्मेति विद्यात्' इति चोपसंहारः प्रत्यगात्मपरिग्रहे साधुर्न पराचीनपरिग्रहे। 'अयमात्मा ब्रह्म सर्वानुभूः' (बृ. उ. २।५।१९) इति च श्रुत्यन्तरम्। तस्मादध्यात्मसंबन्धबाहुल्याद् ब्रह्मोपदेश एवायं न देवतात्मोपदेशः।।२९।।

कथं तर्हि वक्तुरात्मोपदेशः?

प्रकटार्थविवरणम्

"अथातो निःश्रेयसदानम्" इत्याद्यर्थतो गृहीत्वा तदर्थमाह—**अस्तित्व इति**। प्राणानामिन्द्रियाणामस्तित्वे आश्रये संप्रतिष्ठितमित्यर्थः। नेमिः चक्रोपान्तः। नाभिश्चक्रपिण्डिका। भूतान्येव मीयन्त इति मात्राः। प्रज्ञामात्राः स्वस्वविषयेषु चार्पिताः तदधीनत्वाद् विषयव्यवहारस्य। प्राणे ब्रह्मणि। स च प्राणो ब्रह्म तल्लिङ्गात् इत्याह—**स इति**। वाक्यता[त्पर्यमाह—**विषयेति**।] स प्राणः 'ममात्मा' इत्यात्मशब्दसामानाधिकरण्याच्च न बाह्यदेवतापरत्वमित्याह—**स म आत्मेति**।

भाष्यभावप्रकाशिका

इति। बाहुल्यमेव दर्शयति—**यावद्धीत्यादिना**। **अस्तित्वे** प्राणानाम् अवस्थाने प्राणानामिन्द्रियाणां निःश्रेयसावस्थानमित्यर्थः। इन्द्रपरिग्रहेऽपि "न वाचं विजिज्ञासीत वक्तारं विद्यादि"त्युपपद्यत इत्याशङ्क्याह— **उपक्रम्य तद्यथेति**। एवं तर्हि न ब्रह्मणि समन्वयः; प्रत्यगात्मनि समन्वयादिति, तत्राह—**अयमात्मेति**।।२९।।

शास्त्रदृष्ट्या तूपदेशो वामदेववत्।।३०।। उत्तरसूत्रमवतारयति—**कथं तर्हीति**। गुर्वाद्यभावे कथं तस्य दर्शनमिति?

न्यायनिर्णयः

अस्मिन्नध्याये। यत्र 'मामेव विजानीहि' इत्यादि श्रूयते तत्रेति यावत्। बाहुल्यमेवाह— **यावद्धीति**। तस्यार्थमाह— **प्राणस्येति**। एवकारार्थमाह— **नेति**। **तथेति**। आयुष्प्रदानोपसंहारयोः स्वातन्त्र्यवदित्यर्थः। अस्तित्वे प्राणस्थितौ प्राणानामिन्द्रियाणां स्थितिरिति 'अथातो निःश्रेयसादानम्' इत्याद्यर्थतो गृहीत्वा तदर्थमाह— **अस्तित्वे चेति**। इन्द्रियाणां प्राणाश्रयत्ववदिति **तथार्थः**। इति अध्यात्ममेव प्राणस्य देहधारयितृत्वमाहेति शेषः। इतश्च देवता न प्राण इत्याह— **नेति**। **इति च** प्रत्यगात्मन एव वक्तृत्वमुक्तमिति शेषः। देवतात्मनोऽपि वक्तृत्वात् ' न वाचम्' इत्याद्यविरुद्धमित्याशङ्क्याह— **उपक्रम्येति**। तत्र च प्रज्ञामात्राणां भूतमात्राणां च नानात्वं नेत्यत्र दृष्टान्तः— **यथेति**। यथा लोके प्रसिद्धस्य रथस्यारेषु मध्यवर्तिशलाकासु चक्रोपान्तनेमिरर्पितश्चक्रपिण्डिकायां च नाभावराः, तथा भूतान्येव पृथिव्यादीनि शब्दादयश्च विषया मीयन्त इति मात्राः प्रज्ञामात्रासु स्वविषयज्ञानेष्विन्द्रियेषु चार्पिताः, तदधीनत्वात् तद्व्यवहारस्य। ताश्च प्रज्ञामात्राः प्राणे परस्मिन्नर्पिताः। स च प्राणः परमात्मा, तल्लिङ्गादित्याह— **स इति**। वाक्यतात्पर्यमाह— **विषयेति**। स प्राणो ममात्मेत्यात्मशब्दसामानाधिकरण्याच्च प्राणशब्दस्य न देवतार्थतेत्याह— **स म इति**। तर्हि प्रत्यगात्मनि समन्वयो, न ब्रह्मणि, तत्राह— **अयमिति**। सूत्रार्थमुपसंहरति— **तस्मादिति**।।२९।।

अनन्यथासिद्धलिङ्गैः श्रुतितात्पर्याच्च प्राणस्य ब्रह्मत्वे देवतालिङ्गानां गतिर्वाच्येति पृच्छति— **कथमिति**। **सूत्रमुत्तरम्**। तद्

शास्त्रदृष्ट्या तूपदेशो वामदेववत्।।३०।।

इन्द्रो नाम देवतात्मा स्वमात्मानं परमात्मत्वेन 'अहमेव परं ब्रह्म' इत्यार्षेण दर्शनेन यथाशास्त्रं पश्यन्नुपदिशति स्म– 'मामेव विजानीहि' इति। यथा 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च' इति, तद्वत्। 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' (बृ. उ. १।४।१०) इति श्रुतेः।

यत्पुनरुक्तं 'मामेव विजानीहि' इत्युक्त्वा विग्रहधर्मैरिन्द्र आत्मानं तुष्टाव त्वाष्ट्रवधादिभिरिति, तत् परिहर्तव्यम्। अत्रोच्यते– न त्वाष्ट्रवधादीनां विज्ञेयेन्द्रस्तुत्यर्थत्वेनोपन्यासो यस्मादेवंकर्माऽहं तस्मान्मां विजानीहीति। कथं तर्हि? विज्ञानस्तुत्यर्थत्वेन। यत्कारणं त्वाष्ट्रवधादीनि साहसान्युपन्यस्य परेण विज्ञानस्तुतिमनुसंदधाति– 'तस्य मे तत्र लोम च न मीयते स यो मां वेद न ह वै तस्य केन च कर्मणा लोको मीयते' इत्यादिना। एतदुक्तं भवति– यस्मादीदृशान्यपि क्रूराणि कर्माणि कृतवतो मम ब्रह्मभूतस्य लोमापि न हिंस्यते, स योऽन्योऽपि मां वेद न तस्य केनचिदपि कर्मणा लोको हिंस्यत इति। विज्ञेयं तु ब्रह्मैव 'प्राणोऽस्मि प्रज्ञात्मा' इति वक्ष्यमाणम्। तस्माद् ब्रह्मवाक्यमेतत्।।३०।।

प्रकटार्थविवरणम्

शास्त्रदृष्ट्या तूपदेशो वामदेववत्। अस्तु प्रत्यगात्मसंस्पर्शो वाक्ये; तथापि ब्रह्मणि समन्वयस्य किमायातमित्याशङ्क्याह— **तद्यो य इति।** पूर्वपक्षबीजान्तरमुद्भाव्य पराकरोति—**यत्पुनरुक्तमित्यादिना।** अस्तु विज्ञानस्तुतिः। तेन विज्ञानेन ज्ञेयं देवतातत्त्वमेवेत्याशङ्क्याह—**विज्ञेयं तु ब्रह्मैवेति।**

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्। प्रकारान्तरेण ब्रह्मपरतामाक्षिप्य समाधत्ते—

भाष्यभावप्रकाशिका

तत्राह—**आर्षेणेति।** प्रतिभामात्रनिवृत्त्यर्थमाह— **यथाशास्त्रमिति।** ननु श्रवणाद्यभावे ब्रह्मात्मत्वावगतिर्न युक्ता; श्रवणादिविधिविरोधादिति, तत्राह—**यथा तद्धैतदिति।** जन्मान्तरानुष्ठितश्रवणादिवशाद् ज्ञानोत्पत्तेरविरोध इत्यर्थः।

ननु वेदाध्ययनाभावे कथं यथाशास्त्रमेकत्वदर्शनमिति? अत आह— **तद्यो यो देवानामिति।** देवताधिकरणे वक्ष्यमाणन्यायेनेति भावः। ब्रह्मरूपेणेन्द्र उपदिशति चेत्, कथं त्वाष्ट्रवधादिना स्तव इत्युक्त(मित्यर्थ)मनुभाषते—**यत्पुनरुक्तमिति।** ननु विज्ञानस्य विज्ञेयाकाङ्क्षायामिन्द्र एव विज्ञेयत्वेन सम्बध्यत इति, तत्राह—**विज्ञेयं त्विति।।३०।।**

न्यायनिर्णयः

व्याख्याति— **इन्द्र इति।** कथं तस्य गुर्वाद्यभावे ज्ञानं, तत्राह— **आर्षेणेति।** तस्य तर्हि प्रतिभात्वेनामानत्वं, नेत्याह— **यथेति।** श्रवणाद्यभावे कुतो ब्रह्मास्मीति धीः, तद्विधिविरोधात्, तत्राह- **यथेति।** जन्मान्तरीयश्रवणादेराधुनिकधीरविरुद्धेति भावः। अध्ययनाभावे कथं यथाशास्त्रमैक्यधीरित्याशङ्क्य देवताधिकरणन्यायेनाह— **तदिति।** इन्द्रश्चेद् ब्रह्मात्मना स्वात्मानमुपदिशति, कथं त्वाष्ट्रवधादिना स्तुतिः, तत्राह— **यदिति।** नेयं विज्ञेयस्तुतिः, अपितु विज्ञानस्तुतिरित्याह— **अत्रेति।** तत्र गमकमाह— **यदिति।** त्वदीय-तत्र क्रूरकर्मणि निमित्ते सतीत्यर्थः। कथमत्र ज्ञानस्तुतिः, तत्राह— **एतदिति।** तस्मान्महाभागधेयं ज्ञानमिति शेषः। ज्ञानस्यैवंरूपत्वेऽपि किमधिकृतस्य स्यात्, तदाह— **स य इति।** ननु स्तूयमानज्ञानस्य ज्ञेयाकाङ्क्षायामिन्द्र एव संबध्यते, नेत्याह—**विज्ञेयं त्विति।** अध्यात्मबाहुल्यात् पराचीनदेवतोक्त्ययोगात्, प्राणोऽस्मीत्यादि ब्रह्मार्थमेवेत्युपसंहरति— **तस्मादिति।।३०।।**

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्।।३१।।

यद्यप्यध्यात्मसंबन्धभूमदर्शनान्न पराचीनस्य देवतात्मन उपदेशः, तथापि न ब्रह्मवाक्यं भवितुमर्हति। कुतः? जीवलिङ्गान्मुख्यप्राणलिङ्गाच्च। जीवस्य तावदस्मिन् वाक्ये विस्पष्टं लिङ्गमुपलभ्यते 'न वाचं विजिज्ञासीत वक्तारं विद्यात्' इत्यादि। अत्र हि वागादिभिः करणैर्व्यापृतस्य कार्यकरणाध्यक्षस्य जीवस्य विज्ञेयत्वमभिधीयते। तथा मुख्यप्राणलिङ्गमपि– 'अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति' इति। शरीरधारणं च मुख्यप्राणस्य धर्मः, प्राणसंवादे वागादीन्प्राणान् प्रकृत्य– 'तान् वरिष्ठः प्राण उवाच मा मोहमापद्यथाहमेवैतत्पञ्चधाऽऽत्मानं प्रविभज्यैतद् बाणमवष्टभ्य विधारयामि' (प्र. उ. २।३) इति श्रवणात्। ये तु 'इमं शरीरं परिगृह्य' इति पठन्ति तेषामिमं जीवमिन्द्रियग्रामं वा परिगृह्य शरीरमुत्थापयतीति व्याख्येयम्। प्रज्ञात्मत्वमपि जीवे तावच्चेतनत्वादुपपन्नम्। मुख्येऽपि प्राणे प्रज्ञासाधन-प्राणान्तराश्रयत्वादुपपन्नमेव। जीवमुख्यप्राणपरिग्रहे च प्राणप्रज्ञात्मनोः सहवृत्तित्वेनाभेदनिर्देशः, स्वरूपेण

प्रकटार्थविवरणम्

जीवमुख्यप्राणेत्यादिना। ननु शरीरोत्थापनमपि जीवलिङ्गं किं न स्यादित्याशङ्क्याह—**शरीरधारणं चेति।** सर्वे किल प्राणाः स्वस्य श्रेष्ठतां मन्यमानाः तन्निर्दिधारयिषया प्रजापतिमुपजग्मुः। प्रजापतिना च यस्मिन्नुत्क्रान्ते शरीरं पापिष्ठतरमिव भवति स वः श्रेष्ठ इत्युक्ते क्रमेण वागादिषूत्क्रान्तेष्वपि मूकादिभावेन स्वस्थमस्थाच्छरीरम्; मुख्यस्य तु प्राणस्योच्चिक्रमिषामात्रेण सर्वेषां व्याकुलत्व-प्रसङ्गे तान् प्रति श्रेष्ठः प्राण उवाच 'मा मोहमापद्यध्वम्, यतोऽहमेवैतत्करोमि'। किम्? पञ्चधा प्राणापानादिभेदेनात्मानं प्रविभज्यैतद् बाणं शरीरम् अवष्टभ्य विधारयामीति श्रवणादित्यर्थः। पाठान्तरस्याप्यर्थमाह—**ये त्विममिति।** प्रज्ञासाधनानामिन्द्रिया-णामाश्रयत्वान्मुख्येऽपि प्राणे प्रज्ञात्मत्वमुपचारादुपपन्नमित्यर्थः। जीवमुख्यप्राणपरिग्रहे लाभान्तरमाह—**जीवमुख्यप्राणेति।** "यो वै प्राणः सा प्रज्ञा" इत्यभेदनिर्देशः सहवर्तमानत्वादुपचर्यते। सहोक्त्या च भेदनिर्देशः स्वरूपभेदादेवोपपद्यते। निर्भेदे तु नैष उपपद्यत

भाष्यभावप्रकाशिका

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रित्वादिह तद्योगात्।।३१।। वक्तृस्वरूपं दर्शयति—**अत्र हीति।** एतदिति क्रियाविशेषणम्। बाणं शरीरम्। क्वचिदिममिति पुंलिङ्गनिर्देशाच्छरीरधारणं न निर्दिश्यत इति, तत्राह—[1]**ये त्विदमिति।** द्विवचनसहभावोत्क्रमणश्रवणादपि न ब्रह्म परिग्रहीतव्यमित्याह—**जीवमुख्यप्राणपरिग्रहे चेति।** यथासंभवं

न्यायनिर्णयः

प्रकारान्तरेण ब्रह्मपरत्वमाक्षिप्य समाधत्ते— **जीवेति।** 'प्राणोऽस्मि' इत्यादि देवतापरं नेत्युक्तमङ्गीकरोति— **यद्यपीति।** तर्हि ब्रह्मपक्ष एवायं परिशिष्यते, नेत्याह—**तथापीति।** पूर्वोत्तरपक्षयोरनुपपत्तिरयुक्तेत्याह— **कुत इति।** देवतापक्षस्यातिफल्गुतया निरासेऽपि पक्षान्तरसद्भावान्नैवमित्याह— **जीवेति।** तत्राद्यं व्यनक्ति— **जीवस्येति।** वक्तुरेवात्र वेद्यता भाति, न किंचिज्जीव-लिङ्गमित्याशङ्क्याह—**अत्रेति।** द्वितीयं विवृणोति— **तथेति।** वक्तृत्वाद्युपदेशानन्तर्यमथशब्दार्थः। देहोत्थापनमपि जीवलिङ्गं किं न स्यात्, तत्राह— **शरीरेति।** वागादयः सर्वे प्रत्येकं श्रेष्ठत्वमात्मनो मन्यमानास्तन्निर्दिधारयिषया प्रजापतिमुपजग्मुः। स च तानुवाच, यस्मिन्नुत्क्रान्ते शरीरं पापिष्ठतरमिव भवति स वः श्रेष्ठ इति। तस्मिन्नेवमुक्तवति क्रमेण वागादिषूत्क्रान्तेष्वपि मूकादिभावेन शरीरं स्वस्थमस्थात्। मुख्यस्य प्राणस्योच्चिक्रमिषायां सर्वेषां व्याकुलत्वाप्तौ तान्प्रति प्राणो व्याहृतवान्, मा मोहमापद्यथ यतोऽहमेवैतत्करोमि। किं तत्, पञ्चधा प्राणादिभेदेनात्मानं विभज्यैतद् बाणं वाति गच्छतीति वानं तदेव बाणमस्थिरं शरीरमवष्टभ्य विधारयामीत्युक्तेर्न देहधारणमन्यस्येत्यर्थः। क्वचिदिममित्युक्तेर्न देहधारणमिष्टमित्याशङ्क्याह— **ये त्विति।** कथमुपहिते जीवात्मन्यचेतने च प्राणे प्रज्ञात्मत्वं, तत्राह— **प्रज्ञेति।** द्विवचनसहभावोत्क्रमणश्रवणादपि न ब्रह्म ग्राह्यमित्याह— **जीवेति।**

१. 'ये त्विममिति' इति भाव्यम्।

च भेदनिर्देश इत्युभयथा निर्देश उपपद्यते– 'यो वै प्राणः सा प्रज्ञा या वै प्रज्ञा स प्राणः सह ह्येतावस्मिञ्शरीरे वसतः सहोत्क्रामतः' इति। ब्रह्मपरिग्रहे तु किं कस्माद् भिद्येत? तस्मादिह जीवमुख्यप्राणयोरन्यतर उभौ वा प्रतीयेयातां, न ब्रह्मेति चेत्? नैतदेवम्, उपासात्रैविध्यात्। एवं सति त्रिविधमुपासनं प्रसज्येत जीवोपासनं मुख्यप्राणोपासनं ब्रह्मोपासनं चेति। न चैतदेकस्मिन्वाक्येऽभ्युपगन्तुं युक्तम्। उपक्रमोपसंहाराभ्यां हि वाक्यैकत्वमवगम्यते। 'मामेव विजानीहि' इत्युपक्रम्य 'प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्व' इत्युक्त्वाऽन्ते 'स एव प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः' इत्येकरूपावुपक्रमोपसंहारौ दृश्येते। तत्रार्थैकत्वं युक्तमाश्रयितुम्। न च ब्रह्मलिङ्गमन्यपरत्वेन परिणेतुं शक्यम्। दशानां भूतमात्राणां प्रज्ञामात्राणां च ब्रह्मणोऽन्यत्रार्पणानुपपत्तेः। आश्रितत्वाच्चान्यत्रापि ब्रह्मलिङ्गवशात् प्राणशब्दस्य ब्रह्मणि वृत्तेः। इहापि

प्रकटार्थविवरणम्

इति भावः। यस्माज्जीवमुख्यप्राणलिङ्गानि स्पष्टानि दृश्यन्ते, अतः तदनुसारेण ब्रह्मलिङ्गानि नेतुं शक्यन्ते। तस्मात् जीवाद्युपासनापरं वाक्यमित्याह—**तस्मादिहेति**। परिहारत्वेन सूत्रभागमवतारयति—**नैतदेवमित्यादिना**। यदि जीवमुख्यप्राणलिङ्गदर्शनात् तदुपासनमङ्गीक्रियते एवं सति ब्रह्मलिङ्गस्यापि दर्शनात् तस्यापि उपासनं वक्तव्यमिति त्रिविधमुपासनं प्रसज्येत; तच्चायुक्तम्, संभवत्येकवाक्यत्वे वाक्यभेदस्यान्याय्यत्वादित्यर्थः। यच्चोक्तं ब्रह्मलिङ्गानि जीवादिपक्षे योजयितुं शक्यन्त इति; तत्राह—**न च ब्रह्मलिङ्गमिति**। सूत्रावयवं विभजते—**आश्रितत्वाच्चेति**। अब्रह्मलिङ्गानि तु ब्रह्मपक्षं नेतुं शक्यन्ते सर्वात्मकत्वात्त-

भाष्यभावप्रकाशिका

योजनीयानीत्यभिप्रेत्योपसंहरति-**तस्मादिहेति**। जीवमुख्यप्राणयोरन्यतर इत्युपक्रममात्रम्, उभाविति तु पूर्वपक्षतत्त्वम्, ब्रह्म तु ध्रुवम्। **न ब्रह्मेति**। न ब्रह्मैवेत्यर्थः। अतः पूर्वत्रापि न ब्रह्मवाक्यमेव भवितुमर्हतीति योजनीयमिति केचित्। भवतु को दोष इति? अत आह—**न चैतदेकस्मिन्निति**। ननु अर्थभेदाद्युपगमाद्वाक्यभेदोऽप्यभ्युपगम्यत एव, ततः कथं सिद्धवदेकत्वमुच्यत इति? तत्राह—**उपक्रमोपसंहाराभ्यामिति**। ननु वाक्यस्यैकवाक्यत्वेऽप्यर्थभेदः किं न स्यादिति? तत्राह—**तत्रेति**।

ननु त्रैविध्यदोषपरिहाराय ब्रह्मलिङ्गमन्यथा नेयमित्याशङ्क्याह—**न च ब्रह्मलिङ्गमिति। दशानां भूतमात्राणामिति**। पञ्च शब्दादयः, पञ्च पृथिव्यादयो दश भूतमात्राः, पञ्च बुद्धीन्द्रियाणि पञ्च बुद्धय इति दश प्रज्ञामात्राः। अथवा—ज्ञानेन्द्रियविषयाः पञ्च, कर्मेन्द्रियविषयाः पञ्चेति दश भूतमात्राः। द्विविधानीन्द्रियाणि च दश प्रज्ञामात्राः। ननु प्राणशब्दस्य ब्रह्मणि वृत्त्यनुपपत्तेस्त्रैविध्यदोषो

न्यायनिर्णयः

अभेदनिर्देशमाह— **यो वा इति**। भेदनिर्देशमाह— **सहेति**। ब्रह्मपक्षेऽप्यभेदोपपत्तिमाशङ्क्याङ्गीकृत्य भेदानुपपत्तिमाह— **ब्रह्मेति**। अमृतत्वादीन्यपि यथायोग्यं नेयानीत्युपसंहरति— **तस्मादिति**। इहेति प्रकृतसंदर्भोक्तिः। **अन्यतर** इत्युपक्रममात्रम्, उभाविति तत्त्वम्। ब्रह्म त्वानन्दादिश्रुतेरावश्यकम्। **न ब्रह्मेति** तन्मात्रव्यावृत्तिः। तथा च जीवमुख्यप्राणब्रह्मणां यथायथमुपास्तिरिष्टा। न च 'प्राणोऽस्मि' इत्युपक्रमात्, 'स एष प्राण एव' इत्युपसंहाराच्च वाक्यैक्यावगतेरेकार्थत्वम्, वाक्यार्थावगमस्य पदार्थावगमजन्यत्वेनोपजीव्याद् दौर्बल्यात्। न चैवं सर्वत्र वाक्यार्थभङ्गः, गुणप्रधानभूतपदार्थधियो वाक्यार्थैक्याविरोधित्वात्। अत्र तु पदार्थानां [1]स्वातन्त्र्यं नैकवाक्यतेति भावः। परिहारमवतार्य व्याचष्टे— **नैतदिति**। अस्तूपास्तित्रैविध्यं, नेत्याह— **न चेति**। अर्थभेदे वाक्यभेदात्कथं सिद्धवदेकवाक्यत्वोक्तिः, तत्राह— **उपक्रमेति**। तदेव स्फुटयति— **मामेवेति**। वाक्यैक्येऽपि किमित्यर्थभेदो न स्यात्, तत्राह— **तत्रेति**। पदार्थधियो वाक्यार्थधीहेतुत्वेऽपि वाक्यार्थबोधस्योद्देश्यत्वेन प्राधान्यात् पदानां पदार्थबोधेऽफले पर्यवसानाभावात् तस्य नान्तरीयकत्वात् प्रधानीभूतवाक्यार्थस्योपक्रमोपसंहारैकरूप्यावगतस्य युक्तमैक्यमिति भावः। उपासनात्रैविध्यनिरासाय ब्रह्मलिङ्गं जीवादिविषयं नेयमित्याशङ्क्याह— **न चेति**। पञ्च शब्दादयः पञ्च पृथिव्यादयश्च दश भूतमात्राः। पञ्च बुद्धीन्द्रियाणि, पञ्च बुद्धय इति दश प्रज्ञामात्राः। यद्वा ज्ञानेन्द्रियार्थाः पञ्च, कर्मेन्द्रियार्थाश्च पञ्चेति दश भूतमात्राः, द्विविधानीन्द्रियाणि प्रज्ञामात्रा दशेति भावः। प्राणशब्दस्य ब्रह्मण्यवृत्तेस्त्रैविध्यं तवापि स्यादित्याशङ्क्याह— **आश्रितत्वाच्चेति**। तत्र

१. 'स्वातन्त्र्यात्' इति पाठः स्यात्।

च हिततमोपन्यासादिब्रह्मलिङ्गयोगाद् ब्रह्मोपदेश एवायमिति गम्यते।

यत्तु मुख्यप्राणलिङ्गं दर्शितम्– 'इदं शरीरं परिगृह्योत्थापयति' इति; तदसत्। प्राणव्यापारस्यापि परमात्मायत्तत्वात्परमात्मन्युपचरितुं शक्यत्वात्। 'न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ' (क.उ. २।५।५) इति श्रुतेः। यदपि 'न वाचं विजिज्ञासीत वक्तारं विद्यात्' इत्यादि जीवलिङ्गं दर्शितं, तदपि न ब्रह्मपक्षं निवारयति। न हि जीवो नामात्यन्तभिन्नो ब्रह्मणः, 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्यादिश्रुतिभ्यः। बुद्ध्याद्युपाधिकृतं तु विशेषमाश्रित्य ब्रह्मैव सञ्जीवः कर्ता भोक्ता चेत्युच्यते। तस्योपाधिकृतविशेषपरित्यागेन स्वरूपं ब्रह्म दर्शयितुं 'न वाचं विजिज्ञासीत वक्तारं विद्यात्' इत्यादिना प्रत्यगात्माभिमुखीकरणार्थ[1] उपदेशो न विरुध्यते। 'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।।' (के. उ. १।४) इत्यादि च श्रुत्यन्तरं वचनादिक्रियाव्यापृतस्यैवात्मनो ब्रह्मत्वं दर्शयति। यत्पुनरेतदुक्तम्– 'सह ह्येतावस्मिञ्शरीरे वसतः सहोत्क्रामतः' इति प्राणप्रज्ञात्मनोर्भेददर्शनं ब्रह्मवादे नोपपद्यत इति। नैष दोषः। ज्ञानक्रियाशक्तिद्वयाश्रययोर्बुद्धिप्राणयोः

प्रकटार्थविवरणम्

स्येत्यभिप्रेत्याह—**यत्तु इत्यादिना**। "वक्तारं विद्यात्" इत्यत्र न वक्तुर्ज्ञानं विधेयम्, तस्य प्रत्यक्षत्वात्; किन्तु प्रसिद्धोद्देशेनाप्रसिद्धब्रह्मभावो विधेयः। तदभिमुखीकरणार्थास्तु लिङ्गादय इत्युक्तम्। तत्रैव श्रुत्यन्तरं संवादकमाह—**यद्वाचेति**। येन चैतन्येन

भाष्यभावप्रकाशिका

भवतोऽपि समान इत्याशङ्क्य तदुत्तरत्वेन सूत्रैकदेशमवतारयति—**आश्रितत्वाच्चेति**। ननु तत्र ब्रह्मलिङ्गाद् ब्रह्मणि वृत्तिः आश्रिता, इह तु कथमिति? तत्राह—**इहापि चेति**। **प्राणव्यापारस्यापि परमात्मायत्तत्वादिति**। कारणस्य कार्याकारेण व्यवस्थितस्य कार्यधर्मेणापि सम्बन्धो घटते, कार्यस्य तु परिच्छिन्नस्य कार्यान्तरेष्वपि वर्तमानेन कारणधर्मेण सम्बन्धो न युज्यत इति प्राणजीवदेवतात्मलिङ्गानि ब्रह्मणि संभवन्ति, न तु ब्रह्मलिङ्गानि तेष्विति भावः। कथं तर्ह्यस्य संसारित्वमिति? अत आह—**बुद्ध्यादीति**। ननु जीवो ब्रह्मात्मना विवक्षितश्चेत्, तस्य कथं वक्तृत्वमुपदिश्यत इत्याशङ्क्याह—**तस्योपाधिकृतेति**। तस्योपलक्षणत्वाददोष इति भावः। **प्रत्यगात्मोपाधिभूतयोरिति**। उपाधिभेदात्तद्विशिष्टस्य भिन्नत्वमिति भावः। कथं तर्ह्यभेद इति?

न्यायनिर्णयः

ब्रह्मलिङ्गाद् ब्रह्मणि वृत्तिराश्रिता; प्रकृते कथमित्याशङ्क्याह— **इहापीति**। प्राणस्य ब्रह्मत्वे मुख्यप्राणलिङ्गं विरुध्येतेत्याशङ्क्याह— **यत्त्विति**। प्राणव्यापारस्य परमात्मायत्तत्वे मानमाह— **नेति**। कारणस्य कार्याकारेण स्थितस्य तद्धर्मेणापि संबन्धात् कार्यस्य व्यावृत्तस्य कार्यान्तरेष्वपि स्थितकारणधर्मेणासंबन्धात् प्राणादिलिङ्गानि ब्रह्मणि युज्यन्ते, न तल्लिङ्गानि तत्रेति भावः। जीवलिङ्गमपि ब्रह्मविरोधीत्यनुवादपूर्वकमाह— **यदपीति**। कथं तर्हि ब्रह्मण एव सतो जीवस्य संसारित्वं, तत्राह— **बुद्ध्यादीति**। जीवो ब्रह्मैव चेत्र तस्य वक्तृत्वं, तस्य ब्रह्मत्वविरोधित्वात्, तत्राह— **तस्येति**। 'वक्तारं विद्यात्' इति न विधिः, वक्तृत्वस्याध्यक्षत्वात्। किंतु तदुद्देशेनाप्रसिद्धं ब्रह्मत्वं विधित्सितमित्यर्थः। प्रत्यगात्माभिमुख्यार्थो लिङ्गादिरिति समन्वयसूत्रेऽपि दर्शितमित्याशयेनाह— **प्रत्यगिति**। तत्र तलवकारश्रुतिमाह— **यद्वाचेति**। येन चैतन्येन वागभ्युद्यते प्रेर्यते वदनसामर्थ्यमापाद्यते तदेव वागादेरगम्यं ब्रह्मेत्यर्थः। तस्य तात्पर्यमाह— **वचनादीति**। द्विवचनसहभावोत्क्रमणश्रवणं सिद्धान्ते दुर्योजमित्युक्तमनूद्य दूषयति— **यदित्यादिना**। उपाधिभेदात् तद्विशिष्टस्य भिन्नतेति विशिनष्टि— **प्रत्यगिति**। अभेदस्तर्हि कथं, तत्राह— **उपाधीति**।

---

१. 'रणार्थमुप' इति पाठान्तरम्।

२. 'नञ्' प्रमादात् त्रुटितः'।

प्रत्यगात्मोपाधिभूतयोर्भेदनिर्देशोपपत्तेः। उपाधिद्वयोपहितस्य तु प्रत्यगात्मनः स्वरूपेणाभेद इत्यतः प्राण एव प्रज्ञात्मेत्येकीकरणमविरुद्धम्।

अथवा 'नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्' इत्यस्यायमन्योऽर्थः:- न ब्रह्मवाक्येऽपि जीवमुख्यप्राणलिङ्गं विरुध्यते। कथम्? उपासात्रैविध्यात्। त्रिविधमिह ब्रह्मोपासनं विवक्षितं, प्राणधर्मेण प्रज्ञाधर्मेण स्वधर्मेण च। तत्र 'आयुरमृतमुपास्स्वायुः प्राणः' इति, 'इदं शरीरं परिगृह्योत्थापयति' इति, 'तस्मादेतदेवोक्थमुपासीत' इति च प्राणधर्मः। 'अथ यथाऽस्यै प्रज्ञायै सर्वाणि भूतान्येकीभवन्ति तद् व्याख्यास्यामः' इत्युपक्रम्य 'वागेवास्या एकमङ्गमदूदुहत् तस्यै नाम परस्तात्प्रतिविहिता भूतमात्रा, 'प्रज्ञया

प्रकटार्थविवरणम्

वागभ्युद्यते प्रेर्यते वदनव्यापारसमर्थापाद्यत इत्यर्थः। प्राणप्रज्ञाशब्दवाच्ययोर्भेदाद्भेदव्यपदेशः, उपलक्ष्यस्य तु स्वरूपस्यैक्या-देकत्वनिर्देशोऽप्यविरुद्ध इत्याह—**नैष दोष इत्यादिना**।

एवं स्वमतेन व्याख्याय वृत्तिकारमतेन व्याचष्टे—**अथवेत्यादिना**। स्वतन्त्राणां हि त्रयाणामुपासने वाक्यभेदः स्यात्, न त्वेकस्यैव ब्रह्मण इत्यभिप्रायः। एतदेव प्राणाख्यमुत्थापनादुक्थम्। आयुष्ट्वादिः प्राणधर्म इत्यर्थः। इदानीं प्रज्ञाधर्ममाह— **अथ यथेति**। बुद्धेः स्वरूपेण निष्पन्नाया अपि विषयित्वं नाम रूपं करणादिसमुदायसाध्यं भवति। तत्र कर्मेन्द्रियेषु मध्ये वागेवैतस्याः प्रज्ञाया एकमङ्गं शरीरादूर्ध्वमदूदुहत् पूरयामास। नामरूपात्मको हि प्रपञ्चो विषयः। तत्र नामप्रपञ्चे वाग्द्वारेण प्रविष्टा सती बुद्धिः तं प्रति विषयित्वं लिङ्गत [लभते]इत्यर्थः। तस्यै प्रज्ञायै नाम किल परस्तादपरस्मिन्भागे चक्षुरादिना प्रतिविहिता समुपस्थापिता भूतमात्रा रूपादिलक्षणा। चक्षुरादिना हि रूपादिसमर्पणेन बुद्धेरपरमङ्गं रूपप्रपञ्चं प्रति विषयित्वं निर्वर्त्यत इत्यर्थः। एवं विषयिण्या बुद्धेः जीवप्रमातृत्वे हेतुत्वमाह। प्रज्ञयोपाधिभूतया जीवो वाचं समारुह्य वक्ताऽस्मीत्यभिमानाद्वागिन्द्रियद्वारेण सर्वाणि नामानि वक्तव्यत्वेनाप्नोति, चक्षुषा सर्वाणि रूपाणि प्रतिपद्यत इत्येवं प्रमातृत्वमनुभवतीत्यर्थः। सर्वभूतशेषत्वं जीवगतप्रमातृत्वादिहेतुत्वं

भाष्यभावप्रकाशिका

तत्राह—**उपाधिद्वयेति**। उपलक्षितस्येत्यर्थः।

प्रकारान्तरेण सूत्रं व्याचष्टे—**अथवेति**। उक्तमेवार्थं विभज्य दर्शयति—**तत्रायुरित्यादिना**। अस्यै प्रज्ञायै=अस्यां प्रज्ञायामित्यर्थः। **एकमङ्गमदूदुहदिति**। एकमङ्गं स्वात्मनि कृतवतीत्यर्थः। तस्यै तस्याम्। नाम भूतमात्राः

न्यायनिर्णयः

उपहितद्वारोपलक्षितस्येत्यर्थः।

स्वमते सूत्रावयवं व्याख्याय वृत्तिकारमते व्याकरोति— **अथवेति**। तत्र नञर्थमाह— **नेति**। ब्रह्मवाक्यत्वे जीवप्राणयोरध्येयत्वात् तल्लिङ्गविरोधोऽस्त्येवेत्याह— **कथमिति**। हेतुमुक्त्वा व्याख्याति— **उपासेति**। स्वतन्त्राणां त्रयाणामुपास्तौ वाक्यभेदः, न त्वेकस्यैव ब्रह्मणस्तद्धर्मेणेत्यर्थः। उक्तमेव विभजते— **तत्रेति**। 'प्राणो हि भूतानामायुः' इति श्रुत्यन्तरेणाह— **आयुरिति**। तस्यायुष्ट्वं जीवनस्य तदधीनत्वात्। प्राणस्यैव देहाद्युत्थापकत्वं तस्मादित्युच्यते। उत्थापयति देहादीत्युक्थं प्राणः। सहवासः सहोत्क्रान्तिश्चेत्युक्त्यानन्तर्यमथशब्दार्थः। अस्या जीवाख्यप्रज्ञायाः संबन्धीनि भूत्वा सर्वाणि भूतानि तद्दृश्यत्वेन कल्पितानि वस्तुतो यथैकं भवन्ति तथा तद्वस्तु व्याख्यास्याम इत्युपक्रम्योक्तम्— 'वागेव' इत्यादि। बुद्धेः साभासायाः स्वरूपतो जातत्वेऽपि विषयित्वमिन्द्रियसाध्यम्। तत्र कर्मेन्द्रियेषु मध्ये वागेवास्याः प्रज्ञाया देहाद्धर्ममेकमङ्गमदूदुहद् रेचितवती पूरयामास। नामरूपात्मा प्रपञ्चो विषयस्तत्र नामप्रपञ्चे वाग्द्वारा प्रविष्टा धीस्तं प्रति विषयित्वमाप्नोतीत्यर्थः। तस्याः प्रज्ञायाः पुनर्नाम किल परस्तादपरभागे चक्षुरादिना प्रतिविहिता समुत्थापिता भूतमात्रा रूपादिरूपा चक्षुरादिना रूपाद्यर्पणेन बुद्धेरपरभागरूपं रूपप्रपञ्चं प्रति विषयित्वं निर्वर्त्यत इत्याह- **तस्या इति**। बुद्ध्युपहितचैतन्यद्वारा स्वरूपे द्रष्टृत्वाध्यासमाह— **प्रज्ञयेति**। तया द्वारा चिदात्मा

वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति' इत्यादिः प्रज्ञाधर्मः। 'ता वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतम्। यद्धि भूतमात्रा न स्युर्न प्रज्ञामात्राः स्युः। यद्धि प्रज्ञामात्रा न स्युर्न भूतमात्राः स्युः। न ह्यन्यतरतो रूपं किंचन सिध्येत्। नो एतन्नाना। तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मा' इत्यादिर्ब्रह्मधर्मः। तस्माद् ब्रह्मण एवैतदुपाधिद्वयधर्मेण स्वधर्मेण चैकमुपासनं त्रिविधं विवक्षितम्। अन्यत्रापि 'मनोमयः प्राणशरीरः' (छा. ३।१४।२) इत्यादावुपाधिधर्मेण ब्रह्मण उपासनमाश्रितम्। इहापि तद्युज्यते वाक्यस्योपक्रमोप संहाराभ्यामेकार्थत्वावगमात् प्राणप्रज्ञाब्रह्मलिङ्गावगमाच्च। तस्माद् ब्रह्मवाक्यमेतदिति सिद्धम्।।३१।।

।।इत्येकादशं प्रतर्दनाधिकरणम्।।

इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीशंकरभगवत्पादकृतौ प्रथमाध्यायस्य प्रथमः पादः।।१।।

प्रकटार्थविवरणम्

च जीवधर्म इत्यर्थः। सर्वाधारत्वानन्दाजरादिमत्वं ब्रह्मधर्ममाह—**ता वा एता इत्यादिना।** पृथिव्यादीनि पञ्च, शब्दस्पर्शादयः पञ्चेति दश भूतमात्राः। श्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि, तज्जनिताश्च पञ्च बुद्धय इति दश प्रज्ञामात्राः। विषयविषयिणोः परस्परसापेक्षत्वादन्योऽन्यमधिकृत्य वर्तनमुच्यत इत्याह—**यदि भूतमात्रा इति।** परस्परसापेक्षमप्येतद्विषयविषयिद्वयं न द्वैतपक्षवन्नाना परमार्थत एव भिन्नम्; किन्त्वेकस्मिन्नेव समारोपितमित्याह—**नो एतन्नानेति।** "आश्रितत्वादिह तद्योगात्" इति

भाष्यभावप्रकाशिका

पुरस्तात्प्रतिविहिताः=विषयशिरस्कत्वादिन्द्रियाणाम्। समारुह्य=प्राप्य। उक्तमर्थमुपपादयति—**यद्धि भूतमात्रेति।** तत्र युक्तिमाह—**न ह्यन्यतरत इति।** निरालम्बनज्ञानायोगादविज्ञातस्य च सत्ताऽयोगादित्यर्थः। किञ्चोक्तनानात्वमपि सिध्येत्, न चायं भेदो वास्तव इत्याह—**नो एतदिति।** अन्यधर्मेणान्यस्योपासनमयुक्तमित्याशङ्क्याह—**अन्यत्रापीति।** एवमाश्रितत्वादिति व्याख्यातम्। ननु तत्र मनोमयत्वादिविशिष्टस्य ब्रह्मण उपासनं युक्तं वाक्योपक्रमेऽधिगतत्वात्, इह तु कथमिति? अत आह—**इहापीति।** एवं तद्योगादिति व्याख्यातम्। कथं तर्ह्युपासनायां त्रैविध्यमिति? अत आह—**प्राणप्रज्ञेति।** ननु एवं सति वाक्यभेदः, मैवम्; ब्रह्मण

न्यायनिर्णयः

वाचं करणं प्रति कर्तेत्यध्यासमनुभूय वाचा करणेन सर्वाणि नामानि वक्तव्यत्वेनाप्नोति, चक्षुषा सर्वाणि रूपाणि पश्यतीत्येवं द्रष्टृत्वमनुभवतीत्यर्थः। सर्वभूतविषयित्वमात्मनि विशिष्टद्रष्टृत्वादिकरत्वं च बुद्धेर्धर्म इत्युक्तम्। सर्वाधारत्वानन्दत्वादि ब्रह्मधर्म इत्याह— **ता वा एता इति।** उक्ता भूतमात्राः प्रज्ञाशब्दितेन्द्रियाणि तदुत्थज्ञानानि चाधिकृत्य प्रवर्तन्ते। प्रज्ञामात्राश्चोक्ता भूतशब्दितानि पृथिव्यादीनि शब्दादीनि चाधिकृत्य भवन्ति। ग्राह्यग्राहकयोर्मिथः सापेक्षकत्वं साधयति— **यदिति।** तदेव स्पष्टयति— **न हीति।** अन्योन्यापेक्षमप्येतद् विषयविषयिद्वयं न द्वैतपक्षवन्नाना वस्तुतो भिन्नं, किंत्वेकस्मिन्नेवारोपितमित्याह— **नो इति।** तद्यथेत्यादि व्याख्यातम्। नोपासात्रैविध्यादित्यस्यार्थमुपसंहरति— **तस्मादिति।** अन्यधर्मेणान्यस्योपासनं कथमित्याशङ्क्याश्रितत्वादित्याह— **अन्यत्रापीति।** तत्रोपक्रमे ब्रह्मणः श्रुतत्वाद् युक्ता मनोमयत्वादिविशिष्टस्योपास्तिः, इह कथमित्याशङ्क्य तद्योगादित्याह— **इहापीति।** उपास्तेस्तर्हि कथं त्रैविध्यं, तत्राह— **प्राणेति।** वाक्यभेदस्तु ब्रह्मण एकस्यैवोपासात्रैविध्योक्त्या प्रत्युक्तः। किमत्रोपासात्रयविशिष्टं ब्रह्म विधेयमुत ब्रह्मविशिष्टमुपासात्रयं, किं वा तदनुवादेन तदाश्रित्योपासात्रयम्? नाद्यः, ब्रह्मणः सिद्धत्वाद् विध्यनर्हत्वात्। न द्वितीयः, वाक्यान्तरेभ्यो ब्रह्मणो ज्ञातत्वात्। न तृतीयः, ब्रह्मानुवादेनोपास्तिविधावेकविशेष्यावशीकारादुपास्तीनां मिथोऽसंबन्धात् प्रत्युपास्ति विध्यावृत्त्या वाक्यभेदा-दित्येकीयव्याख्यामुपेक्ष्य स्वपक्षमुपसंहरति— **तस्मादिति।**

प्रकटार्थविवरणम्

सूत्रावयवं वृत्तिकारमतेन व्याचष्टे—अन्यत्रापीत्यादिना।

तदेतद्[1] वाचस्पतेर्न रोचते। कथम्? "सोमेन यजेत" इत्यादौ युक्तं विशिष्टविधानमपूर्वार्थत्वात्। इह तु ब्रह्मणः सिद्धतया विधानानर्हत्वात्तदुद्देशेनोपासनत्रयं विधातव्यमिति स्फुटो वाक्यभेद इति। वार्तिककृताऽप्युक्तम्—

"प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः। अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ।"इति।

तस्माद् यथा जामित्वदोषोपक्रमादजामित्वोपसंहारादेकस्मिन्नुपांशुयाजपरे वाक्ये श्रूयमाणाः "विष्णुरुपांशु यष्टव्यः" इत्यादयो न विधयः, किं त्वर्थवादाः, तथेहापि श्रूयमाणा लिङ्गादयोऽर्थवादाः। तस्माद् वाक्यं ब्रह्मपरमेवेति सिद्धम्। इति प्रतर्दनाधिकरणम्।।

इति श्रीमच्छारीरकमीमांसाभाष्यविवरणे प्रकटार्थे

प्रथमाध्याये प्रथमः पादः

भाष्यभावप्रकाशिका

एकस्यैवोपासात्रयविशिष्टस्य विधानादिति—चेत्, न; "सोमेन यजेत"त्यादौ सोमादिगुणविशिष्टयागादिविधानं युज्यते; तत्तद्गुणविशिष्टस्यापूर्वस्य कर्मणोऽप्राप्तस्य विधिविषयत्वात्, इह त्वभावार्थत्वाद् ब्रह्मणो विधिविषयत्वायोगाद् वाक्यान्तरेभ्यश्च तदवगतेः प्राप्तत्वात्तदनूद्याप्राप्तोपासना भावार्थो विधेयः, तस्य च भेदाद् विध्यावृत्तिलक्षणो वाक्यभेदः स्यादेवेति चेत्, मैवम्, धर्मत्रयविशिष्टस्योपासनस्यारुणादिक्रयविशिष्टवदेकस्यैव विधेयत्वाद् वाक्यभेदाभावादिति भावः।।३१।। इत्येकादशं तथानुगमाधिकरणम्।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यश्रीचित्सुखमुनिविरचितायां भाष्यभावप्रकाशिकायां प्रथमाध्यायस्य प्रथमः पादः समाप्तः।।

न्यायनिर्णयः

प्राकरणिकत्वेऽपि ब्रह्मणोऽवान्तरवाक्यभेदेन श्रवणादिवद् विविदिषार्थं यज्ञादिवच्चोपास्तित्रयं विधेयं, विधेयत्रयधर्मवद्-ब्रह्मोपास्तिश्चैकेति कुतो वाक्यभेद इत्येके। तन्न। अन्तस्तद्धर्माधिकरणेन गतत्वात्। तत्र हि सार्वात्म्यसर्वदुरितविरहाभ्यां सर्वकारणे ब्रह्मणि सिद्धे रूपवत्त्वादिकार्यधर्मा नीतास्तथाऽत्रापि प्रागुक्तन्यायेन प्राणादिधर्माणां ब्रह्मणि संभवान्न पृथग्विचारावसरः। तस्माज्जीवप्राणब्रह्माणि सहोपास्यानि, ब्रह्मैव वा प्रतिपाद्यमिति पदार्थवाक्यार्थयोर्बलाबलज्ञानेन[2] संदिह्य दिवो दिवीत्यत्र प्रधानप्रकृत्यर्थाभेदेन गुणभूतप्रत्ययार्थभेदनयनवदत्रापि स्वतन्त्रप्राणादिपदार्थभेददृष्टौ तदपेक्षत्वेन गुणभूतवाक्यार्थ-दृष्टेरन्यथानयनात् पदार्थबुद्धेर्वाक्यार्थबुद्ध्योपजीव्यत्वेन स्वातन्त्र्याद् वाक्यैक्यं भङ्क्त्वा त्रीणि सहोपास्यानीति प्रापय्य पदानां वाक्यार्थबोधोद्देशेन प्रवृत्तत्वात् पदार्थबोधस्य नान्तरीयकत्वाद् वाक्यार्थबोधप्राधान्यादुपक्रमोपसंहारैकरूप्यसिद्धप्रधान-वाक्यार्थभङ्गायोगात्, प्राणादिलिङ्गानां च ब्रह्मणि नीतत्वात्, अनन्यथासिद्धब्रह्मलिङ्गाद् ब्रह्मैवात्र प्रतिपाद्यमिति सिद्धान्तयितव्यम्। सर्वथाऽपि प्रातर्दनं वाक्यं ब्रह्मणि ज्ञेये समन्वितमिति।।३१।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचिते शारीरकभाष्यनिर्णये प्रथमाध्यायस्य प्रथमः पादः।।१।।

।।इति प्रथमस्याध्यायस्य स्पष्टब्रह्मलिङ्गश्रुतिसमन्वयाख्यः प्रथमः पादः।।

---

१. वाचस्पतिमतमत्र प्रकटार्थकृता न खण्डितम्, अपि तु वार्तिकोपन्यासेन प्रतिष्ठापितम्। अत्र कल्पतरूक्तः सर्वोऽपि विषयः न्यायनिर्णये उपलभ्यते। तत्रैव द्रष्टव्यः।

२. 'बलाबलाज्ञानेन' इति पाठः स्यात्।

प्रथमाध्याये द्वितीयः पादः।

१।। सर्वत्र प्रसिद्ध्यधिकरणम्।।सू. १-८।।

प्रथमे पादे 'जन्माद्यस्य यतः' इत्याकाशादेः समस्तस्य जगतो जन्मादिकारणं ब्रह्मेत्युक्तम्। तस्य समस्तजगत्कारणस्य ब्रह्मणो व्यापित्वं, नित्यत्वं, सर्वज्ञत्वं, सर्वशक्तित्वं, सर्वात्मत्वमित्येवंजातीयका धर्मा उक्ता एव भवन्ति। अर्थान्तरप्रसिद्धानां च केषांचिच्छब्दानां ब्रह्मविषयत्वहेतुप्रतिपादनेन[1] कानिचिद् वाक्यानि

शारीरकन्यायसंग्रहः

सर्वत्र प्रसिद्धोपदेशात्।।१।। विवक्षितगुणोपपत्तेश्च।।२।। अनुपपत्तेस्तु न शारीरः।।३।। कर्मकर्तृव्यपदेशाच्च।।४।। शब्दविशेषात्।।५।। स्मृतेश्च।।६।। अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च।।७।। संभोगप्राप्तिरिति चेन्न वैशेष्यात्।।८।। प्रयोजनवदर्थशून्याल्लिङ्गात् प्रयोजनवत्प्रकरणमन्यतराकाङ्क्षया इतरेतराकाङ्क्षया चैकवाक्यतासमर्थं बलवत्, तात्पर्यवत्त्वात्—इति न्यायेन "मनोमयः प्राणशरीरः" इति वाक्येन विशेष्यसाकाङ्क्षेण शमविधिशेषतया निराकाङ्क्षमपि ब्रह्म सर्वैरुपास्यत्वेनाभिलषितप्रयोजनवत्तयाऽभिलषितत्वात् अन्यतराकाङ्क्षया संबध्यते मनोमयत्वादिलिङ्गोपस्थापितं प्रयोजनशून्यं जीवं बाधित्वा—इत्ययं न्यायः अस्मिन्नधिकरणे साध्यते। कथं पुनर्लिङ्गस्य प्रयोजनवदर्थशून्यत्वमिति? उच्यते। मनोमयप्राणशरीरधर्मांभ्यां न तावदुपासनार्थं जीवो लिङ्ग्यते, एकेनापि धर्मेण तत्सिद्धेः इतरवैयर्थ्यप्रसङ्गात्; नाप्यपूर्ववस्तुप्रतिपत्तये, प्रमाणान्तरेणैव तदुभयधर्मविशिष्टस्य जीवस्य नित्यमुपलभ्यमानत्वात् इति निष्प्रयोजनता जीवलिङ्गस्य।

अथवा "स क्रतुं कुर्वीत" इत्यस्य वाक्यशेषगतो जीवः सत्रन्यायेन कर्मत्वेनोपादीयतां किं वा विश्वजिन्न्यायेन सर्वाभिलषितं ब्रह्म कर्मत्वेनोपादीयतामिति विशये यद्यपि सत्रन्यायेन वाक्यशेषगतं वस्तुस्वरूपमुपजीव्य तस्य कर्मत्वमात्रमपूर्वमुपादीयत इति लघीयसी कल्पना, विश्वजिन्न्यायेन तु सर्वाभिलषितब्रह्मस्वरूपं तस्य साध्यता च इत्युभयमादेयमिति गरीयसी कल्पना, तथापि प्रयोजनशून्यात् सत्रन्यायात् प्रयोजनवान् विश्वजिन्न्यायो बलवान् तात्पर्यापेक्षत्वादागमस्य—इति न्यायेन सर्वाभिलषितं ब्रह्म विश्वजिन्न्यायेनोपादीयते—इति न्यायद्वयमुक्तम्।।

प्रकटार्थविवरणम्

प्रथमे पादे जगत्कारणत्वाभिधानेनार्थादुक्तं व्यापित्वादिधर्मजातमुपजीव्योत्तरं पादद्वयं प्रवर्तत इति हेतुहेतुमद्भावलक्षणं संबन्धमाह—**प्रथमे पाद** इति। कथं पादभेद इत्याशङ्क्याह—**अर्थान्तरेति**। भूताकाशादिषु प्रसिद्धानामाकाशादिशब्दानां ब्रह्मपरत्वे

भाष्यभावप्रकाशिका

सर्वत्र प्रसिद्धोपदेशात्।।१।। प्रथमपादोक्तार्थोपजीवनेनोत्तरस्य प्रवर्तनाद्धेतुहेतुमल्लक्षणःसम्बन्ध इति वक्तुं पूर्वोक्तमर्थं स्मारयति—**प्रथमे पाद इति**। ननु जगत्कारणत्वमात्रमिह नोपयुज्यते, किन्तु व्यापित्वादयोऽपि; सिद्धवद्धेतुतयोपादीयमानत्वात्, अतस्तेषामनिर्देशे कथं सम्बन्ध इति? अत आह—**तस्येति**। अर्थात् तेऽपि निर्दिष्टा इत्यर्थः। पादार्थविभागकथनाय पूर्ववृत्तमर्थान्तरं

न्यायनिर्णयः

पूर्वोपजीवनेनोत्तरोत्थानाद्धेतुहेतुमत्त्वं संबन्धं वक्तुं वृत्तमनुवदति—**प्रथम इति**। कारणत्वमात्रं नात्रोपयुक्तम्, व्यापित्वादेरपि सिद्धवद्धेतुतयोपादानात्, अतस्तदनुक्तौ कथं संगतिरित्याशङ्क्याह—**तस्येति**। उक्तमुपजीव्योत्तरप्रवृत्तौ कथं पादभेद

---

१. 'ब्रह्मविषयत्वे' इति पा.।

स्पष्टब्रह्मलिङ्गानि संदिह्यमानानि ब्रह्मपरतया निर्णीतानि। पुनरप्यन्यानि वाक्यान्यस्पष्टब्रह्मलिङ्गानि संदिह्यन्ते– किं परं ब्रह्म प्रतिपादयन्त्याहोस्विदर्थान्तरं किंचिदिति। तन्निर्णयाय द्वितीयतृतीयौ पादावारभ्येते।

सर्वत्र प्रसिद्धोपदेशात्।।१।।

इदमाम्नायते– 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत। अथ खलु क्रतुमयः पुरुषो

प्रकटार्थविवरणम्

तल्लिङ्गादिहेतूपन्यासेन स्पष्टब्रह्मलिङ्गानि वाक्यानि पूर्वत्र निर्णीतानि। [2]परत्र तु अस्पष्ट[ब्रह्म]लिङ्गानि वाक्यान्यर्थान्तरपरतया आशङ्क्यमानानि तत्तदाशङ्कानिराकरणेन ब्रह्मपरतयैव निर्णीयन्त इति पादभेदः। [तत्राप्यवान्तरभेदः] प्रायः [3]सविशेषनिर्विशेषपरतया, बहुलरूढि[योग]विषयतया वा द्रष्टव्यः।

सर्वत्र प्रसिद्धोपदेशात्। "सर्वं खल्विदं ब्रह्म" इति प्रतिजानीते। हेतुमाह—**तज्जलानिति।** तस्माज्जायत इति तज्जम्; तस्मिन् लीयत इति तल्लम्, तस्मिन्ननिति चेष्टत इति तदनम्। तज्जं च तत् तल्लं च तदनञ्च इति तज्जलान्। समानाधिकरणे

भाष्यभावप्रकाशिका

दर्शयति—**अर्थान्तरप्रसिद्धानामिति।** उत्तरपादद्वयस्यानधिगतार्थत्वमाह—**पुनरपीति।** तत्रान्यतरलिङ्गस्यास्पष्टत्वमेकत्र, अन्यत्रोभयलिङ्गयोरस्पष्टत्वमिति विशेषः। अथवा निर्विशेषसविशेषवाक्यप्राचुर्येण, अथवा रूढिबहुलानि द्वितीये, तृतीये योगबहुलानीति। अतस्तयोरपि पौर्वापर्यं संभवतीति भावः।

न्यायनिर्णयः

इत्याशङ्क्याह—**अर्थान्तरेति।** उत्तरपादद्वयस्यानधिगतमर्थमाह—**पुनरिति।** पूर्वं भूताकाशादिषु रूढाकाशादिशब्दानां ब्रह्मपरत्वे तल्लिङ्गादिति हेतूक्त्या स्पष्टब्रह्मलिङ्गानि नीतानि। अथास्पष्टब्रह्मलिङ्गवाक्यान्यर्थान्तरार्थतया शङ्क्यमानानि ब्रह्मणि नीयन्ते। तत्र द्वितीयतृतीयपादयोरवान्तरभेदस्तु प्रायशः सविशेषनिर्विशेषार्थतया रूढियोगबहुलतया वेति भावः। पूर्वं जीवलिङ्गबाधया ब्रह्मपरत्ववन्मनोमयादिवाक्येऽपि तद्बाधेन तत्परत्वमाह—**सर्वत्रेति।** छान्दोग्यवाक्यमुदाहरति—**इदमिति।** सर्वं जगद् ब्रह्मैवेत्यत्र हेतुमाह—**तज्जेति।** तस्माज्जायत इति तज्जं, तस्मिँल्लीयत इति तल्लं, तस्मिन्ननिति चेष्टत इति तदनं, तज्जं च तल्लं च तदनं च तदिति तज्जलान्। अवयवलोपश्छान्दसः। इति हेतौ। यस्मादेवं तस्माद् ब्रह्मैव सर्वं जगदित्यर्थः। अतो धियो रागादिविषयाभावादुपासीत स शान्तः स्यादित्याह—**शान्त इति।** गुणं विधाय गुणिविधित्सया पुंस्प्रयत्नस्य साफल्यमाह—**अथेति।** पुरुषोऽधिकृतः क्रतुमयः संकल्पप्रधानः। तत्र हेतुर्यथेति। ज्ञानं कर्म वा यथाऽस्मिन् देहे स्थितः संकल्पयते तथा तदनुसारेण

---

१. **अस्पष्टेति।** ब्रह्मलिङ्गानामस्पष्टत्वं च संभाव्यमानस्वारस्यकजीवादिलिङ्गाभिभूतत्वम्। तादृशजीवादिलिङ्गानभिभूतत्वं च स्पष्टत्वम्। जीवादिलिङ्गानां संभाव्यमानस्वारस्यकत्वं च निर्णेयतात्पर्यकवाक्योपक्रमगतब्रह्मलिङ्गासमभिव्याहृतत्वम्। एतदधिकरणविषयवाक्ये च वाक्योपक्रमे एव मनोमयत्वादेर्जीवलिङ्गस्य सत्त्वात् सत्यसंकल्पत्वादिब्रह्मलिङ्गानां च पश्चाद्भावित्वात् तादृशजीवलिङ्गाभिभूतत्वं ब्रह्मलिङ्गानाम्। न चोपक्रमे 'सर्वं खल्विदं ब्रह्म' इति श्रुत्यैवोपस्थितं ब्रह्मेति वाच्यम्। तथापि तद्वाक्यस्य शमविधिशेषतया पूर्वोत्तरपक्षिणोः संमतत्वेन निर्णेयतात्पर्यकत्वाभावात्। अधिकं शांकरपादभूषणे आनन्दमयाधिकरणे द्रष्टव्यम्।

२. **परत्र** = द्वितीयतृतीयपादयोः।

३. **सविशेषेति।** यद्यपि द्वितीयपादे प्रथमचतुर्थसप्तमानि उपास्यब्रह्मणि समन्वयप्रदर्शकत्वात् सविशेषपराणि। इतराणि चत्वार्यप्यधिकरणानि निर्विशेषपराणि। तथापि तृतीयपादे उपास्यब्रह्मपरस्याधिकरणद्वयस्यैव सत्त्वात् अत्र च तादृशाधिकरणत्रितयसत्त्वेनाधिक्यात्, आद्यान्त्याधिकरणयोः सविशेषपरतया वाऽयं पादः सविशेषप्रधान उच्यते इति ध्येयम्।
यद्वा 'मनोमयः, अत्ता, पाययिता, अक्षिपुरुषः, अन्तर्यामी, वैश्वानरः इत्येषां सविशेषत्वम्, अक्षरस्य निर्विशेषत्वम्' इति परिमलोक्तरीत्याऽत्त्रादीनामुपास्यत्वाभावेऽपि निर्विशेषोपलक्षकसविशेषपरत्वात् सविशेषप्रधानत्वं पादस्येति।

यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत' 'मनोमयः प्राणशरीरो भारूपः[1]' (छा.उ. ३।१४।१,२) इत्यादि। तत्र संशयः– किमिह मनोमयत्वादिभिर्धर्मैः शारीर आत्मोपास्यत्वेनोपदिश्यत आहोस्वित् परं ब्रह्मेति। किं तावत् प्राप्तम्? शारीर इति। कुतः? तस्य हि कार्यकरणाधिपतेः प्रसिद्धो मनआदिभिः संबन्धो, न परस्य ब्रह्मणः, 'अप्राणो ह्यमनाः शुभ्रः' (मु.उ. २।१।२) इत्यादिश्रुतिभ्यः। ननु 'सर्वं खल्विदं ब्रह्म' इति स्वशब्देनैव ब्रह्मोपात्तम्, कथमिह शारीर आत्मोपास्य आशङ्क्यते? नैष दोषः। नेदं वाक्यं ब्रह्मोपासनाविधिपरम्, किं तर्हि? शमविधिपरम्। यत्कारणं 'सर्वं

प्रकटार्थविवरणम्

शाकपार्थिवन्यायेन मध्यमपदलोपः[2], छान्दसो वावयवलोपः[3]। इतिशब्दो हेतौ[4]। यस्मात् तज्जलानत्वात् सर्वं जगद् ब्रह्मैव, अतः शान्तो भवेत्, रागादिविषयाभावादित्यर्थः। एवं 'शमगुणं[5] विधाय गुण्युपासनविधित्सया पुरुषप्रयत्नस्य तावत् साफल्यमाह—**अथ खल्विति**। पुरुषोऽधिकृतः क्रतुमयः [6]सङ्कल्पप्रधानो भवति। कथम्? यतो यथा ज्ञानं कर्म चानुष्ठेयं सङ्कल्पयतेऽस्मिँल्लोके तदनुसारमेव फलं परलोके प्रतिपद्यते, अतः सोऽधिकृतः क्रतुं ध्यानं कुर्वीत। किं ध्यायेदित्यपेक्षायां विभक्तिविपरिणामेन 'मनोमय' इत्यादि संबध्यते। मनोमयं प्राणशरीरं ध्यायेदित्यर्थः। अत्र ब्रह्मप्रकरणाज्जीवलिङ्गाच्च संशयमाह— **तत्रेति**। पूर्वत्रावगतयोः ब्रह्माब्रह्मलिङ्गयोः ब्रह्मलिङ्गानुसारेणाब्रह्मलिङ्गं निनाय। इह तु ब्रह्मविषयं प्रकरणम्; ततो जीवलिङ्गमेव बलीय इति जीव एव मनोमयत्वादिगुणविशिष्ट उपास्य इत्याह— **किं तावदित्यादिना**। उपास्यब्रह्माभिधायिनी श्रुतिरेवास्तीत्याह— **ननु सर्वमिति**। नात्र ब्रह्मोपास्यम्, येन श्रुत्या लिङ्गं बाध्येतेत्याह—**नैष दोष इति**। **यत्कारणं** यस्मात्कारणात्। यदेव शमविधिशेषभूतं ब्रह्म तदेव

भाष्यभावप्रकाशिका

[रात्रि]सत्रन्यायेनोपासनया "मनोमयः प्राणशरीर" इत्यत्र वाक्यशेषे श्रूयमाणो जीवःसम्बध्यत इत्याह—**शारीर इति**। विश्वजिन्न्यायेन सर्वाभिलषितं ब्रह्मोपासनया सम्बध्यते, "मनोमयः प्राणशरीर" इत्यत्र च विशेष्याकाङ्क्षया, अतस्तदेवोपास्यमिति चोदयति—**कुत इति**। विशेष्याकाङ्क्षायामपि जीवलिङ्गदर्शनात् स एव सम्बध्यत इत्याह—**तस्य हीति**। ननु प्रकरणप्रमाणेन ब्रह्म सम्बध्यत इति शङ्कते—**ननु सर्वमिति**। किं पूर्ववाक्ये ब्रह्मोपासनं विहितमित्युच्यते, किं वा ब्रह्म प्रकृतम्, तदेवोत्तरत्र सम्बध्यत इति? न तावदाद्यः कल्प इत्याह—**नेदमिति**। भवतु सर्वस्यैकात्मकत्वम्, तथापि शमविधिपरत्वं कथमिति? तत्राह—

न्यायनिर्णयः

फलं परत्र लभते। सोऽधिकृतः क्रतुं ध्यानं कुर्वीत। किं ध्यायेदित्याकाङ्क्षायामाह—**मनोमय इति**। विभक्तिव्यत्ययेन मनोमयं प्राणशरीरं ध्यायेदित्यर्थः। आदिशब्दाद् भारूपः सत्यसंकल्प इत्यादि गृहीतम्। मनोमयत्वादीनां प्रकृतब्रह्मानपेक्षत्वसापेक्षत्वाभ्यां संदेहमाह—**तत्रेति**। एकवाक्यस्थब्रह्माब्रह्मलिङ्गयोर्ब्रह्मलिङ्गवशादब्रह्मलिङ्गं नीतम्। इह ब्रह्माब्रह्मप्रकरणलिङ्गसंनिपाते किं युक्तमिति पृच्छति—**किमिति**। 'सर्वम्' इत्यादिश्रुतेः सविशेषार्थाया ध्येये ब्रह्मण्यन्वयोक्तेः श्रुत्यादिसंगतयः। पूर्वपक्षे जीवस्य, सिद्धान्ते परस्योपास्तिः फलम्। रात्रिसत्रन्यायेनोपास्त्या वाक्यशेषस्थो जीवः संबध्यत इति पूर्वपक्षयति—**शारीर इति**। विश्वजिन्न्यायेन सर्वाभीष्टं ब्रह्मैव मनोमयादौ विशेष्याकाङ्क्षायामुपास्तिसंबन्धीत्याह—**कुत इति**। विशेष्याकाङ्क्षायामपि जीव एव लिङ्गबलीयस्तया संबध्यत इत्याह—**तस्येति**। तदन्यथासिद्धिं प्रत्याह—**नेति**। आदिपदेन 'अवागमनः' इत्याद्या श्रुतिरुक्ता। श्रुत्या शङ्कते—**नन्विति**। न लिङ्गं श्रुत्या बाध्यमित्याह—**नैष इति**। किं पूर्ववाक्ये ब्रह्मोपास्तिर्विहितेत्युच्यते, किं वा प्रकृतं ब्रह्मैवोत्तरत्र संबद्धमिति? नाद्य इत्याह—**नेदमिति**। शमविधिपरत्वे हेतुः—**यदिति**। 'उपासीत' इत्युपास्तिविधौ श्रुते कथं गुणविधिः,

१. 'भारूपः' इति क्वचिन्नास्ति।

२. 'समानाधिकरणे शाकपार्थिवादीनां मध्यमपदलोपो वक्तव्यः' इति सारस्वतव्याकरणम्।

३. जायत इति जः। लीयत इति लः। 'अन्येष्वपि दृश्यते' इत्यत्र दृश्यपिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात् डः। अनितीति अन्। क्विप्। त्रयाणां कर्मधारयः तस्य ब्रह्मणो जलान् तज्जलान् इति शेषषष्ठ्यन्तेन समासे लोपाद्यावश्यकता नास्ति। तस्मिन् जलान् इति विग्रहः परिमलादौ। तत्र 'सप्तमी शौण्डैः' इत्यत्र सप्तमीति योगविभागात् समासः। योगविभागस्याप्रामाणिकत्वे पूर्वोक्त एव विग्रहः।

४. इतिशब्दोऽत्र पूर्ववाक्यार्थस्य हेतुत्वं द्योतयतीत्यर्थः। तदेवाह—यस्मादिति।

५. शमगुणम् = शमरूपमङ्गम्। गुणीति। अङ्गीत्यर्थः।

६. सङ्कल्पप्रधान इति। 'मयड् विकारप्राचुर्यप्राधान्यादिषु' इति केचन वैयाकरणाः पठन्तीति परिमले।

खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इत्याह। एतदुक्तं भवति– यस्मात् सर्वमिदं विकारजातं ब्रह्मैव, तज्जत्वात् तल्लत्वात् तदनत्वाच्च; न च सर्वस्यैकात्मत्वे रागादयः संभवन्ति, तस्माच्छान्त उपासीतेति। न च शमविधिपरत्वे सत्यनेन वाक्येन ब्रह्मोपासनं नियन्तुं शक्यते। उपासनं तु 'स क्रतुं कुर्वीत' इत्यनेन विधीयते। क्रतुः संकल्पो ध्यानमित्यर्थः। तस्य च विषयत्वेन श्रूयते–'मनोमयः प्राणशरीरः' इति जीवलिङ्गम्। अतो ब्रूमो जीवविषयमेतदुपासनमिति। 'सर्वकर्मा सर्वकामः' इत्याद्यपि श्रूयमाणं पर्यायेण जीवविषयमुपपद्यते। 'एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा' इति च हृदयायतनत्वमणीयस्त्वं चाराग्रमात्रस्य जीवस्यावकल्पते, नापरिच्छिन्नस्य ब्रह्मणः। ननु 'ज्यायान्पृथिव्याः' इत्याद्यपि न परिच्छिन्नेऽवकल्पत इति। अत्र ब्रूमः– न तावदणीयस्त्वं ज्यायस्त्वं चोभयमेकस्मिन् समाश्रयितुं शक्यं, विरोधात्। अन्यतराश्रयणे च प्रथमश्रुतत्वादणीयस्त्वं युक्तमाश्रयितुम्, ज्यायस्त्वं तु ब्रह्मभावापेक्षया भविष्यतीति। निश्चिते च जीवविषयत्वे यदन्ते ब्रह्मसंकीर्तनम्–'एतद् ब्रह्म' (छा.उ. ३।१४।४) इति, तदपि

प्रकटार्थविवरणम्

तर्ह्युपासनाविषयो भवत्वित्याशङ्क्याह—**तस्य च विषयत्वेनेति**। यथा 'राजपुरुषः समागतः, तं भोजय' इत्यत्र राजा पुरुषस्योपसर्जनीभूतो न भोजने संबध्यते, तथा शमविधिशेषभूतं ब्रह्म नोपासनसंबन्धमर्हतीति भावः। कथं तर्हि जीवे सर्वकामादिव्यपदेशः? क्रमेणेत्याह—**सर्वकर्मेति**। जीवलिङ्गान्तरमाह—**एष म आत्मेति**। जीवपक्षे ज्यायस्त्वमाक्षिप्य समाधत्ते—**नन्वित्यादिना**। कथं तर्ह्यन्ते ब्रह्मसंकीर्तनमित्याशङ्क्याह—**निश्चिते चेति**।[1]

भाष्यभावप्रकाशिका

न चेति। ननु उभयं विधीयतामिति, तत्राह—**न च शमेति**। वाक्यभेदप्रसङ्गादित्यर्थः। ननु वाक्यान्तरसिद्धमुपासनमनूद्य शमगुणो विधेयः, अन्यत्र "अग्निहोत्रं जुहोती"ति विहितहोमानुवादेन "दध्ना जुहोती"ति गुणविधानवदिति, तत्राह—**उपासनं त्विति**। ननु क्रतुरेव विधीयते, नोपासनमिति, अत आह—**क्रतुरिति**। द्वितीयकल्पमाशङ्क्याह—**तस्य चेति**। (स) स्ववाक्यस्थजीवेनैव सम्बन्धादुपासनया च [सनायाः न] ब्रह्मणा सम्बन्ध इत्यर्थः।

न्यायनिर्णयः

तत्राह—**एतदिति**। सर्वस्यैकात्मत्वेऽपि कथं शमविधिः, तत्राह—**न चेति**। तर्हि शमो ध्यानमित्युभयं विधीयताम्, नेत्याह—**न चेति**। वाक्यभेदापत्तेरिति भावः। 'दध्ना जुहोति' इति होमानुवादेन गुणविधिवदिहापि शमविधौ वाक्यान्तरसिद्धोपास्तिरनूद्यत इत्याह—**उपासनं त्विति**। क्रतुरेव तत्र विधीयते नोपास्तिरित्याशङ्क्योक्तम्—**क्रतुरिति**। द्वितीयं प्रत्याह—**तस्य चेति**। ब्रह्मैव मनोमयादिशब्दमित्याशङ्क्य मनआदियोगस्य जीवलिङ्गत्वान्नेत्याह—**जीवेति**। तस्योपास्यत्वे वाक्यशेषस्थं सर्वकर्मत्वादि कथमित्याशङ्क्य क्रमेणेत्याह—**सर्वेति**। जीवपक्षे लिङ्गद्वयमाह—**एष इति**। जीवे ज्यायस्त्वायोगं शङ्कते—**नन्विति**। किं ज्यायस्त्वमणीयस्त्वं चोभयं सत्यमन्यतरद्वेति विकल्पयति—**अत्रेति**। आद्यं दूषयति—**न तावदिति**। द्वितीयं निराह—**अन्यतरेति**। तच्चाराग्रमात्रस्य जीवस्य युक्तमिति तस्यैवोपास्यतेत्यर्थः। श्रुतज्यायस्त्वस्यात्यन्तबाधे श्रुतिबाधमाशङ्क्याह—**ज्यायस्त्वं त्विति**। जीवपक्षे कथमन्ते ब्रह्मपदं, तत्राह—**निश्चिते चेति**। जीवेऽपि देहादिबृंहणाज्ज्यायस्त्वन्यायाद्वा ब्रह्मतेत्यर्थः।

---

१. 'स क्रतुं कुर्वीत' इति उपासनं विधीयते। तस्य विषयोऽपेक्षितः। स च 'मनोमय—' इत्यादिना समर्प्यते। एतावत् पूर्वोत्तरपक्षयोः समानम्। तत्र पूर्वपक्षः-जीव उपास्यः, मनआदिसंबन्धेन तस्य प्रथमं बुद्धिस्थत्वात्। ननु ततोऽपि पूर्वं ब्रह्म श्रुत्यैवोपस्थितम्। न। एतद्वाक्यविहितोपासनानुवादेन गुणविधिर्हि तद्वाक्यम्। अत एतद्वाक्यार्थनिर्णयात् प्रागप्राप्तम् इति आर्थक्रमेण पाठक्रमबाधात् तद्वाक्यं चरमं द्रष्टव्यम्। ननु तर्हि वाक्यशेषे ब्रह्मोपन्यासो विफल इति चेत्? शमविधौ हेतुवन्निगदार्थवादोऽयम्, 'तेन ह्यन्न' मितिवत् इति। सिद्धान्तस्तु-प्राणः शरीरमस्येति सर्वनामार्थे समासः। स च संनिहितमर्थमपेक्षते। जीवश्च न संनिहितः। मनोमय इत्यत्र मयटो विकारार्थत्वानिर्णयेन जीवसंनिधेरनिश्चयात्। अतो वाक्यशेषगतमपि ब्रह्म श्रुत्योपस्थितमाकाङ्क्षावशात् प्रथमं संबध्यत इति ब्रह्मैवोपास्यमिति। द्र. भामती।

प्रकृतपरामर्शार्थत्वाज्जीवविषयमेव। तस्मान्मनोमयत्वादिभिर्धर्मैर्जीव उपास्य इत्येवं प्राप्ते ब्रूमः–

परमेव ब्रह्म मनोमयत्वादिभिर्धर्मैरुपास्यम्। कुतः? सर्वत्र प्रसिद्धोपदेशात्। यत् सर्वेषु वेदान्तेषु प्रसिद्धं ब्रह्मशब्दस्यालम्बनं जगत्कारणम्, इह च 'सर्वं खल्विदं ब्रह्म' इति वाक्योपक्रमे श्रुतम्, तदेव मनोमयत्वादिधर्मैर्विशिष्टमुपदिश्यत इति युक्तम्। एवं च प्रकृतहानाप्रकृतप्रक्रिये न भविष्यतः।

ननु वाक्योपक्रमे शमविधिविवक्षया ब्रह्म निर्दिष्टम्, न स्वविवक्षयेत्युक्तम्। अत्रोच्यते– यद्यपि

प्रकटार्थविवरणम्

सिद्धान्तत्वेन सूत्रमवतारयति—**परमेवेत्यादिना**। सर्वत्र प्रसिद्धस्य ब्रह्मणो वाक्योपक्रमे श्रवणादित्यर्थः। अस्तूपक्रमे श्रवणम्; किमित्येतावतोत्तरत्राप्युपास्यं तत्? एवं जीवलिङ्गात् स एवोपास्योऽस्त्वित्याशङ्क्याह—**यत् सर्वेष्विति**। निष्प्रयोजनाज्जीवलिङ्गात् प्रयोजनवत्प्रकरणमेकवाक्यतासमर्थं तात्पर्यवत्त्वाद् बलीय इति सर्वैरभिलषितत्वेन प्रयोजनवत् ब्रह्म मनोमयत्वादिविशिष्टमुपास्यमिति भावः। जीवलिङ्गं हि न जीवोपलक्षणत्वेन सप्रयोजनम्, एकेनोपलक्षिते अन्यस्य वैयर्थ्यात्; नापि धर्मद्वयविशिष्टस्योपासनाय, मानान्तरेणैव धर्मद्वयवतस्तस्य सिद्धत्वात् इति निष्प्रयोजनता द्रष्टव्या। पूर्ववादी स्वोक्तं स्मारयति—**नन्विति**। न तावदन्यशेषस्यान्यत्रासंबन्धः, यतः "स्योनं ते सदनं करोमि" इति संस्कारशेषस्यापि सदनस्य 'तस्मिन्सीद' इति संबन्धदर्शनादित्याह—**अत्रोच्यत इति**। यदि तच्छब्देन तत्र संबन्धः, तर्हि इहापि तद्धितादिनेत्याह—**यद्यपीति**। मन उपाधिरस्येति

भाष्यभावप्रकाशिका

ननु "एतमितः प्रेत्याभिसंभवितास्मी"ति कर्मकर्तृव्यपदेशात् समानप्रकरणे च "अन्तरात्मन्पुरुष" इति भेदनिर्देशान्न जीवस्योपास्यत्वमित्याशङ्क्य साधकफलावस्थापेक्षया कर्मकर्तृव्यपदेशस्येतरस्य च स्वे महिम्नीतिवदुपचारादुपपत्तेः जीवस्यैवोपास्यत्वमित्युपसंहरति—**तस्मादिति**। **यत्सर्वेष्विति**। अत्रायमाशयः— यद्यपि सत्रन्याये वाक्यशेषगतवस्तुनः कर्मत्वमात्रं कल्प्यम्, विश्वजिन्न्याये वस्तु, तत्कर्मत्वं चेत्युभयम्; तथापि विश्वजिन्न्यायेन सर्वाभिलषितं ब्रह्मोपासनाकर्मत्वेनोपादेयम्। जीवविषयतया प्रयोजनशून्यसत्रन्यायाद् ब्रह्मविषयत्वेन प्रयोजनवत्तया विश्वजिन्न्यायस्यागमतात्पर्यगमकस्य बलीयस्त्वादिति। मनोमयत्वादिलिङ्गोपस्थापितं प्रयोजनशून्यं जीवं बाधित्वा प्रयोजनवत्प्रकरणोपस्थापितं 'सर्वं खल्वि'ति वाक्ये प्रस्तुतं ब्रह्म "मनोमयः प्राणशरीर" इत्यत्र तद्धितेन प्राणःशरीर[म]स्येत्यत्र सर्वनाम्ना चोपादेयं शमविधिना निराकाङ्क्षमप्यन्यतराकाङ्क्षया विशेष्यत्वेनेति न्यायान्तरं दर्शयति—**इह चेति**। राजपुरुष आगतस्तं भोजयेदित्यादिवाक्य इवान्यशेषस्य तद्धितादिना परामर्शो न युक्त इति शङ्कते—**ननु शमेति**। "तस्मिन्सीदे"त्यादौ सदनस्येवोपसर्जनस्यापि

न्यायनिर्णयः

'एतमितः प्रेत्याभिसंभवितास्मि' इति कर्मकर्तृव्यपदेशात्, 'अन्तरात्मन्पुरुषः' इति च तुल्याधिकारे भेदोक्तेर्न जीवस्योपास्यतेत्याशङ्क्य साधनफलावस्थापेक्षया कर्मकर्तृत्वस्यान्यस्य च 'स्वे महिम्नि' इतिवदुपचाराज्जीवस्यैवोपास्यतेत्युपसंहरति—**तस्मादिति**। पूर्वपक्षमनूद्य सिद्धान्तयन् सूत्राद् बहिरेव प्रतिजानीते—**एवमिति**। मनोमयादिशब्दा ध्येये जीवे भान्ति, न ब्रह्म तथेत्याह—**कुत इति**। सूत्रमादाय व्याचष्टे—**सर्वत्रेति**। रात्रिसत्रन्यायस्य लघुत्वेऽपि जीवगामित्वेनाफलत्वाद् विश्वजिन्न्यायस्य गुरोरपि ब्रह्मगामित्वेन फलवतः श्रुतितात्पर्यगमकस्य बलीयस्त्वाद् ब्रह्मैवात्रोपास्यमिति भावः। किंच मनोमयत्वादिलिङ्गं बाधित्वा ब्रह्मश्रुत्या ब्रह्मैवोपास्यमित्याह—**इह चेति**। किंचाफललिङ्गोपनीतं जीवं हित्वा फलवत्प्रकरणप्राप्तं ब्रह्म ग्राह्यमित्याह—**एवमिति**। प्राणः शरीरमस्येति समासगतसर्वनाम्ना संनिहितार्थेन प्रकृतं ब्रह्म हित्वा जीवमप्रकृतमिच्छतः प्रकृतहानिरप्रकृतप्रक्रिया चेत्यर्थः। आगतो राजपुरुषस्तं भोजयेदितिवदन्यशेषस्य ब्रह्मणः सर्वनामादिना न परामर्शः स्यादित्याशङ्कते—**नन्विति**। 'तस्मिन्सीद' इत्यादौ सदनस्येवोपसर्जनस्यापि परामर्शमाह—**अत्रेति**। जीवस्यापि लिङ्गादस्ति

१. स्योनं ते सदनं करोमि, घृतस्य धारया सुशेवं कल्पयामि। तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः।। इति समग्रो मन्त्रः। अस्य मन्त्रस्य पूर्वार्धः सदनकरणे, उत्तरार्धश्च तत्प्रतिष्ठापने विनियुज्यत इति मीमांसकाः। सदनकरणं नाम पात्र्यां पुरोडाशस्थापनात् पूर्वं स्रुवेण घृतप्रक्षेपणम्। तत् कृत्वा तदुपरि पुरोडाशः स्थाप्यते।

शमविधिविवक्षया ब्रह्म निर्दिष्टम् तथापि[1] मनोमयत्वादिषूपदिश्यमानेषु तदेव ब्रह्म संनिहितं भवति। जीवस्तु न संनिहितो, न च स्वशब्देनोपात्त इति वैषम्यम्।।१।।

विवक्षितगुणोपपत्तेश्च।।२।।

वक्तुमिष्टा विवक्षिताः। यद्यप्यपौरुषेये वेदे वक्तुरभावान्नेच्छार्थः संभवति, तथाप्युपादानेन फलेनोपचर्यते। लोके[2] हि यच्छब्दाभिहितमुपादेयं भवति, तद् विवक्षितमित्युच्यते, यदनुपादेयं तदविवक्षितमिति। तद्वद् वेदेऽप्युपादेयत्वेनाभिहितं विवक्षितं भवति, इतरदविवक्षितम्। उपादानानुपादाने

प्रकटार्थविवरणम्

तद्धितः सन्निहितमवलम्बते, प्राणः शरीरमस्येति समासोऽपि सन्निहितावलम्बी, क्रियायाः कर्म चाकाङ्क्षितम्, योग्यं चोपासनायां ब्रह्म। अतः तदेव संबध्यत इत्यर्थः।

विवक्षितगुणोपपत्तेश्च। इतश्च ब्रह्मैवोपास्यमित्याह—**विवक्षितेति।** ननु नायं विग्रहो घटते, वक्तुरभावादित्याशङ्क्याह—**यद्यपीति।** यदाप्तेन विवक्षितम् एतदुपादेयं दृष्टम्; एते च गुणा उपासनायामुपादेयाः; अत उपचर्यते विवक्षेत्यर्थः। किञ्च लोके यद् ग्रहणयोग्यं तद् विवक्षितम्, तद्विपरीतं त्वविवक्षितमित्यपि प्रसिद्धिरस्तीत्याह—**लोके हीति।** तर्हीदं ग्राह्यमिदमग्राह्यमित्येतदेव कथं वेदे ज्ञायते इत्याशङ्क्याह—**उपादानानुपादाने त्विति।** यथा 'ग्रहं समार्ष्टि'[3] इति। अस्य ग्रहोद्देशेन संमार्जनविधाने तात्पर्यात्

भाष्यभावप्रकाशिका

परामर्शःसंभवतीत्याह—**यद्यपीति।** न **स्वशब्दोपात्त इति।** मनोमयादिशब्दानां तदवाचकत्वादित्यर्थः। न च लिङ्गोपस्थापितो जीवः, उपास्तिप्रतिपत्त्योर्विशेषणद्वयस्य वैयर्थ्याल्लिङ्गस्याविवक्षितत्वादिति च द्रष्टव्यम्॥१॥

विवक्षितगुणोपपत्तेश्च॥२। यद्यप्यपौरुषेय इति। शास्त्रयोनित्वेऽपि ईश्वरस्य रचनायामस्वतन्त्रत्वादपौरुषेयत्वम्। **उपादानेन फलेनेति।** विवक्षितस्योपादानसंभवादित्यर्थः। ननु एवंविधोपचारः क्वापि न दृष्ट इति, अत आह—**लोके हीति।** ननु उपादेयत्वमपि विवक्षाधीनमिति, तत्राह— **उपादानानुपादाने इति।** परिग्रहपरित्यागौ चोपादानानुपादाने, [न तु] उपादेयत्वानुपादेयत्वे; उद्देश्यतयाऽनुपादेयस्यापि ग्रहस्य विवक्षितत्वात् अन्यथा चमसादावपि संमार्जनप्रसङ्गात्।

न्यायनिर्णयः

संनिधिरित्याशङ्क्य तस्योपास्तिधियो विशेषणवैयर्थ्यादविवक्षितं लिङ्गमित्याह—**जीवस्त्विति।** तथापि मनोमयादिशब्दात् तदुक्तिः, नेत्याह—**न चेति।** तस्य तदवाचित्वादित्यर्थः। **वैषम्यं** जीवब्रह्मणोरिति शेषः॥१॥

इतश्च ब्रह्मैवात्रोपास्यमित्याह—**विवक्षितेति।** ननु शास्त्रयोनित्वेऽपीश्वरस्य रचनायामस्वातन्त्र्यादपौरुषेयत्वं वेदस्योक्तम्। तत्र वक्तुरभावादित्थं विवक्षितपदं कथं विगृह्यते? तत्राह—**यद्यपीति।** विवक्षितस्योपादानादुपास्तावुपादानस्य विवक्षाफलस्य सत्यसंकल्पादिगुणेषु दृष्टेर्विवक्षितत्वमुपचर्य विग्रह इत्यर्थः। उक्तोपचारस्यालौकिकत्वं प्रत्याह—**लोकेऽपीति।** विवक्षितत्वोपादेयत्वयोरन्योन्याश्रयत्वमाशङ्क्याह—**उपादानेति।** परिग्रहपरित्यागावुपादानानुपादाने। प्रसङ्गागतमुक्त्वा सूत्रं

---

१. भाष्ये यद्यपीत्यनेन ब्रह्मणः शमविधिशेषत्वमनभिमतमिति सूच्यते। तथाहि— 'सर्वं खल्विदं ब्रह्म' इति वाक्ये 'इद'मिति न सर्वविशेषणम्, वैयर्थ्यात्। किन्तु ब्रह्मविशेषणम्। ततश्च पूर्वं ज्योतिर्विद्यायां प्रकृतं ब्रह्म 'इदं ब्रह्म' इति परामृश्यते। एवं प्रयत्नेन तस्य परामर्शो वाक्यशेषस्थलिङ्गं बाधित्वोपास्यतया ब्रह्मसमर्पणार्थः। एवं च तस्य। प्राधान्यमेव। इदं च 'एवं च प्रकृतहानाप्रकृतप्रक्रिये न भविष्यतः' इति भाष्येण सूचितम्। अस्मिन् पक्षे- सर्वत्र ='सर्वं खल्विदं ब्रह्म' इति वाक्ये सर्वस्मिन्, प्रसिद्धस्य=प्रकृतस्य त्रिपाद्ब्रह्मणः, तादात्म्येनोपदेशात्-इति सूत्रार्थः। अधिकं न्यायरक्षामणौ द्रष्टव्यम्।

२. 'लोकेऽपि' इति पा.।

३. अत्र ग्रहशब्दः गृह्यते सोमरसोऽस्मिन् इति व्युत्पत्त्या सोमरसाधारभूतोलूखलाकारपात्रविशेषवाची। तत्र धारया सोमरसग्रहणकाले पात्रस्य बहिर्लग्नानां विप्रुषां प्रोञ्छनमनेन वाक्येन विधीयते। तत्र एकत्वस्याविवक्षितत्वात् सर्वेषामेव प्राकरणिकानां ग्रहाणां संमार्जनं भवति।

तु वेदवाक्यतात्पर्यातात्पर्याभ्यामवगम्येते। तदिह ये विवक्षिता गुणा उपासनायामुपादेयत्वेनोपदिष्टाः सत्यसंकल्पप्रभृतयस्ते परस्मिन् ब्रह्मण्युपपद्यन्ते। सत्यसंकल्पत्वं हि सृष्टिस्थितिसंहारेष्वप्रतिबद्धशक्तित्वात् परमात्मन एवावकल्पते। परमात्मगुणत्वेन च 'य आत्माऽपहतपाप्मा' (छा.उ. ८।७।१) इत्यत्र 'सत्यकामः सत्यसंकल्प' इति श्रुतम्। आकाशात्मेति च आकाशवदात्माऽस्येत्यर्थः। सर्वगतत्वादिभिर्धर्मैः संभवत्याकाशेन साम्यं ब्रह्मणः। 'ज्यायान्पृथिव्याः' इत्यादिना चैतदेव दर्शयति। यदाप्याकाश आत्मा यस्येति व्याख्यायते, तदापि संभवति सर्वजगत्कारणस्य सर्वात्मनो ब्रह्मण आकाशात्मत्वम्। अत एव 'सर्वकर्मा' इत्यादि। एवमिहोपास्यतया विवक्षिता गुणा ब्रह्मण्युपपद्यन्ते।

यत्तूक्तं 'मनोमयः प्राणशरीरः' इति जीवलिङ्गम्, न तद् ब्रह्मण्युपपद्यत इति; तदपि ब्रह्मण्युपपद्यत इति ब्रूमः। सर्वात्मत्वाद्धि ब्रह्मणो जीवसंबन्धीनि मनोमयत्वादीनि ब्रह्मसंबन्धीनि भवन्ति। तथा च ब्रह्मविषये श्रुतिस्मृती भवतः—'त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी। त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः' (श्वे.उ. ४।३) इति, 'सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम्। सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति' (भ.गी. १३।१३) इति च। 'अप्राणो ह्यमनाः शुभ्रः' इति श्रुतिः शुद्धब्रह्मविषया, इयं तु 'मनोमयः प्राणशरीरः इति सगुणब्रह्मविषयेति विशेषः। अतो विवक्षितगुणोपपत्तेः परमेव ब्रह्मेहोपास्यत्वेनोपदिष्टमिति गम्यते।।२।।

प्रकटार्थविवरणम्

प्रातिपदिकेनोद्देश्ये लब्धे यदधिकमेकत्वं तदविवक्षितमित्यर्थः। प्रकृतमाह—**तदिहेति**। सर्वात्मत्वे प्रमाणमाह—**तथा चेति**। जीर्णो यः स्थविरो दण्डेन साधनेन वञ्चति गच्छति सोऽपि त्वमेवेत्यर्थः। सर्वतः सर्वासु दिक्षु श्रुतयः श्रोत्राणि यानि तान्यस्यैवेति सर्वतःश्रुतिमत्। या तु श्रुतिरुदाहृता सा व्यवस्थितविषयेत्याह—**अप्राणो हीति**।

भाष्यभावप्रकाशिका

एवं प्रसङ्गागतं परिहृत्य सूत्रं व्याचष्टे—**तदिहेति**। सत्यसङ्कल्पत्वं तावदुपपादयति—**सत्यसङ्कल्पत्वमिति**। न केवलं युक्तितः, श्रुतितोऽपीत्याह—**परमात्मेति**। आकाशात्मत्वमुपपादयितुं तस्य निर्वचनमाह—**आकाशेति**। पूर्वं जीवस्यैवासाधारणंमनोमयत्वादीत्यभ्युपगम्य ब्रह्मणि तस्य वृत्तिरुक्ता, इदानीं साधारणमित्यत्र प्रमाणमाह—**तथा चेति**। श्रुत्यन्तरविरोधस्तर्हि

न्यायनिर्णयः

व्याचष्टे—**तदिहेति**। तच्छब्दो यथोक्तसमासोपपत्तिपरामर्शी। प्रकृतं प्रकरणमिहेत्युक्तम्। ब्रह्मण्येव सत्यसंकल्पत्वं साधयति—**सत्येति**। श्रुतिरपि युक्तिवदिहास्तीत्याह—**परमात्मेति**। आकाशात्मत्वं वक्तुं तन्निरुक्तिं करोति—**आकाशेति**। कथं जडाजडयोः साम्यं, तदाह—**सर्वेति**। ज्यायस्त्वं सर्वगतत्वसाधकमित्याह—**ज्यायानिति**। आकाशात्मत्वस्य निरुक्त्यन्तरमाशङ्क्याङ्गीकरोति—**यदेति**। सर्वात्मत्वमत एवेत्युक्तम्। आदिपदं सर्वकामादिसंग्रहार्थम्। उक्तामुपपत्तिमुपसंहरति—**एवमिति**। इहेति प्रकरणोक्तिः। तेन तदेवोपास्यमिति शेषः।

ध्येयस्यापि मनोमयत्वादेर्ब्रह्मणि नोपपत्तिरित्याशङ्क्याह—**यत्त्विति**। तस्यापि ब्रह्मण्युपपत्तिमाह—**तदपीति**। कथं जीवगामिनो ब्रह्मणि सिद्धिः, तत्राह—**सर्वेति**। जीवस्यैवासाधारणं मनोमयत्वादीत्युपेत्य ब्रह्मण्युपपत्तिमुक्त्वा तस्य साधारण्ये मानमाह—**तथाचेति**। जीर्णः स्थविरो भूत्वा यो दण्डेन वञ्चति गच्छति सोऽपि त्वमेव। सर्वतः सर्वासु दिक्षु श्रुतयः श्रोत्राण्यस्यैवेति सर्वतः श्रुतिमत्। ब्रह्मणि मनोमयत्वादि वदतः श्रुत्यन्तरविरोधमाशङ्क्याह—**अप्राणो हीति**। सूत्रार्थमुपसंहरति—**अत इति**।।२।।

---

१. 'आकाशात्मेत्यादिना' इति पा.।

अनुपपत्तेस्तु न शारीरः।।३।।

पूर्वेण सूत्रेण ब्रह्मणि विवक्षितानां गुणानामुपपत्तिरुक्ता। अनेन तु शारीरे तेषामनुपपत्तिरुच्यते। तुशब्दोऽवधारणार्थः। ब्रह्मोक्तेन न्यायेन मनोमयत्वादिगुणं, न तु शारीरो जीवो मनोमयत्वादिगुणः। यत्कारणं सत्यसंकल्पः, आकाशात्मा, अवाकी, अनादरः, ज्यायान्पृथिव्या इति चैवंजातीयका गुणा न शारीर आञ्जस्येनोपपद्यन्ते। शारीर इति शरीरे भव इत्यर्थः। नन्वीश्वरोऽपि शरीरे भवति। सत्यम्। शरीरे भवति, न तु शरीर एव भवति, 'ज्यायान्पृथिव्या ज्यायानन्तरिक्षात्' 'आकाशवत्सर्वगतश्च नित्यः' इति च व्यापित्वश्रवणात्। जीवस्तु शरीर एव भवति, तस्य भोगाधिष्ठानाच्छरीरादन्यत्र वृत्त्यभावात्।।३।।

कर्मकर्तृव्यपदेशाच्च।।४।।

इतश्च न शारीरो मनोमयत्वादिगुणः, यस्मात् कर्मकर्तृव्यपदेशो भवति 'एतमितः प्रेत्याभिसंभवितास्मि' (छा.उ. ३।१४।४) इति। एतमिति प्रकृतं मनोमयत्वादिगुणमुपास्यमात्मानं कर्मत्वेन प्राप्यत्वेन व्यपदिशति; अभिसंभवितास्मीति शारीरमुपासकं कर्तृत्वेन प्रापकत्वेन।

प्रकटार्थविवरणम्

अनुपपत्तेस्तु न शारीरः। यथा तर्हि जीवगतं मनोमयत्वादि ब्रह्मणो भवत्यभेदात्, एवं ब्रह्मगतं सत्यसङ्कल्पत्वादि जीवेऽप्यस्त्वित्याशङ्क्यां नुदन् सङ्गतिमाह—**पूर्वेणेति**। सत्यप्यभेदेऽनुपपत्तिरुच्यते, तस्य परिच्छिन्नत्वेनासदारोपप्रसङ्गादिति भावः। वागेव वाकः, वाकोऽस्यास्तीति वाकी, न वाकी अवाकी। आप्तकामत्वादेव कस्मिंश्चिदपि शोभने नास्त्यस्यादर इत्यर्थः।

कर्मकर्तृव्यपदेशाच्च। प्राप्यप्रापकभावेन कर्मकर्तृव्यपदेशो व्याख्यातः। इदानीं प्रकारान्तरेणाह—

भाष्यभावप्रकाशिक

स्यादिति, अत आह—**अप्राण इति**॥२॥

अनुपपत्तेस्तु न शारीरः॥३॥ ननु जीवब्रह्मणोरेकत्वाद् ब्रह्मणोऽपि जीवधर्म उपपद्यत इत्याशङ्क्य समारोप्यरूपेण विषयस्यैव रूपवत्त्वम्, न तु विषयस्य शुक्तिकादे रूपेण समारोप्यरजतादे रूपवत्त्वमित्यभिप्रायेण परिहरति—**पूर्वेणेति**। अन्ययोगव्यवच्छेदेन शरीरे जीवस्य वृत्तेः शारीरत्वं तस्यैव युक्तमित्याह—**जीवस्त्विति**॥३॥

न्यायनिर्णयः

ब्रह्मणि जीवगतं मनोमयत्वादीष्टं चेद् ब्रह्मगतमपि सत्यसंकल्पत्वाद्यभेदाज्जीवेऽस्तु, नेत्याह—**अनुपपत्तेस्त्विति**। सूत्रं व्याख्यातुं संगतिमाह—**पूर्वेणेति**। आरोप्यरूपेण विषयस्यैव रूपित्वम्, न विपरीतम्, न हि रज्ज्वा रूपेण सर्पो रूपवानित्यर्थः। अवधारणमेव स्फोरयन् नेत्यादि विभजते—**ब्रह्मेति**। सर्वात्मत्वादिरुक्तो न्यायः। अनुपपत्तेरिति व्याचष्टे—**यदिति**। वागेव वाकः सोऽस्यास्तीति वाकी, न वाक्यवाकी। वागादिसर्वेन्द्रियरहित इत्यर्थः। आप्तकामत्वान्न कुत्रचिदादरोऽस्तीत्यनादरः। शारीरत्वमीश्वरेऽपि व्यापिनि स्यादिति शङ्कते—**नन्विति**। अयोगव्यवच्छेदमङ्गीकृत्यान्ययोगव्यवच्छेदाभावान्नेत्याह—**सत्यमिति**। अन्ययोगाव्यवच्छेदे हेतुः—**ज्यायानिति**। जीवे वा कथं विशिष्टं शारीरत्वम्, तत्राह—**जीवस्त्विति**॥३॥

जीवस्य मनोमयत्वादिगुणत्वाभावे हेत्वन्तरम्—**कर्मेति**। पूर्वसूत्रान्नेत्याद्याकृष्य चशब्दार्थमाह—**इतश्चेति**। प्राप्यप्रापकत्वेन कर्मकर्तृव्यपदेशं विशदयति—**एतमिति**। वाक्यं व्याकरोति—**एतमित्यादिना**। प्रापकत्वेन व्यपदिशतीति संबन्धः। मामहं

अभिसंभवितास्मीति, प्राप्तास्मीत्यर्थः। न च सत्यां गतावेकस्य कर्मकर्तृव्यपदेशो युक्तः। तथोपास्योपासकभावोऽपि भेदाधिष्ठान एव। तस्मादपि न शारीरो मनोमयत्वादिविशिष्टः।।४।।

शब्दविशेषात्।।५।।

इतश्च शारीरादन्यो मनोमयत्वादिगुणः, यस्माच्छब्दविशेषो भवति समानप्रकरणे श्रुत्यन्तरे–'यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वैवमयमन्तरात्मन्पुरुषो हिरण्मयः' (शत. ब्रा. १०।६।३।२) इति। शारीरस्यात्मनो यः शब्दोऽभिधायकः सप्तम्यन्तोऽन्तरात्मन्निति, तस्माद् विशिष्टोऽन्यः प्रथमान्तः पुरुषशब्दो मनोमयत्वादिविशिष्टस्यात्मनोऽभिधायकः। तस्मात् तयोर्भेदोऽधिगम्यते।।५।।

स्मृतेश्च।।६।।

स्मृतिश्च शारीरपरमात्मनोर्भेदं दर्शयति–'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया' (भ.गी. १८।६१) इत्याद्या।

प्रकटार्थविवरणम्

उपास्योपासकभावोऽपीति।

शब्दविशेषात्। अन्तरात्मन्निति। विभक्तिलोपश्छान्दसः। देहाद्यन्तरात्मनीत्यर्थः।

स्मृतेश्च। [1]हृदिति। अस्य शारीराद् भेदोऽभिधीयते स्मृत्या। ततो मनोमयत्वादिविशिष्टोऽपि हृदि स्थितः शारीरादन्य इति

भाष्यभावप्रकाशिका

कर्मकर्तृव्यपदेशाच्च।।४।। शब्दविशेषात्।।५।। मां जानामीतिवत् स्यादिति अत आह—**न चेति**। "स क्रतुं कुर्वीत मनोमय" इत्ययमपि कर्मकर्तृव्यपदेशः सूत्रेणाभिप्रेत इति दर्शयति— **उपास्येति**।।४।।५।।

स्मृतेश्च।।६।। ननु आत्मान्तरवस्थितस्यान्यस्याभावात् "स्वे महिम्नी"ति या[वा]दुपचारादन्तरात्मनीति प्रयोग इत्याशङ्क्याह— **स्मृतेश्चेति**।

न्यायनिर्णयः

जानामीतिवद् व्यपदेशमाशङ्क्याह—**न चेति**। कर्मकर्तृव्यपदेशे सूत्राभिप्रेतं प्रकारान्तरमाह—**उपास्येति**। उक्तव्यपदेशफलमाह—**तस्मादिति**।।४।।

तत्रैव हेत्वन्तरमाह—**शब्देति**। सूत्रे हेत्वन्तरद्योतकाभावमाशङ्क्य पूर्वसूत्रस्थं चशब्दमाकृष्य व्याकरोति—**इतश्चेति**। समानप्रकरणत्वमेकविद्याविषयत्वम्। अन्तरात्मन्निति छान्दसो विभक्तिलोपः। शब्दभेदफलमाह—**तस्मादिति**।।५।।

आत्मान्तःस्थितस्यान्यस्यायोगे 'स्वे महिम्नि' इतिवदुपचारादेव शब्दभेदः स्यादित्युक्तमाशङ्क्याह—**स्मृतेश्चेति**। हृदि स्थितस्य शारीराद्भेदः स्मृत्योच्यते। ततो मनोमयत्वादिविशिष्टो हृदि स्थितोऽन्यः शारीरादिति नोपचारशङ्केति व्याचष्टे—**स्मृतिश्चेति**। 'तमेव शरणं गच्छ' इत्यादिवाक्यमादिशब्दार्थः।

---

१. 'हृदि स्थितस्य शारीराद्' इत्यादिः पाठः स्यात्। हृदीति। 'एष म आत्माऽन्तर्हृदय' इति श्रुतेः स्मृतौ 'हृद्देशे' इति पदेन प्रत्यभिज्ञानात्, स्मृतौ चेश्वरपदप्रयोगेण ब्रह्मत्वस्यावधृतत्वात् उपबृंहणानुसारेण ब्रह्मैवेह विवक्षितमिति भावः।

अत्राह– कः पुनरयं शारीरो नाम परमात्मनोऽन्यः, यः प्रतिषिध्यते 'अनुपपत्तेस्तु न शारीरः' इत्यादिना। श्रुतिस्तु– 'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता' (बृ.उ. ३।७।२३) इत्येवंजातीयका परमात्मनोऽन्यमात्मानं वारयति। तथा स्मृतिरपि–'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' (भ.गी. १३।२) इत्येवंजातीयकेति। अत्रोच्यते– सत्यमेवैतत्। पर एवात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो बालैः शारीर इत्युपचर्यते। यथा घटकरकाद्यु-पाधिवशादपरिच्छिन्नमपि नभः परिच्छिन्नवदवभासते, तद्वत्। तदपेक्षया च कर्मकर्तृत्वादिभेदव्यवहारो न विरुध्यते प्राक् 'तत्त्वमसि' इत्यात्मैकत्वोपदेशग्रहणात्। गृहीते त्वात्मैकत्वे बन्धमोक्षादिसर्व-व्यवहारपरिसमाप्तिरेव स्यात्।।६।।

अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च।।७।।

अर्भकमल्पम्, ओको नीडम्। 'एष म आत्माऽन्तर्हृदये' इति परिच्छिन्नायतनत्वात्, स्वशब्देन च 'अणीयान्व्रीहेर्वा यवाद्वा' इत्यणीयस्त्वव्यपदेशात्, शारीर एवाराग्रमात्रो जीव इहोपदिश्यते, न सर्वगतः

प्रकटार्थविवरणम्

भावः। कर्मकर्तृभावेन वास्तव एव भेदः सूत्रकृतोऽभिमत इति केषाञ्चिदभिमानापनयनाय निरस्तमप्युद्भावयति— **अत्राहेत्यादिना।**

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च। परिशिष्टं जीवलिङ्गान्तरमुद्भाव्यापाकरोति— **अर्भकेति।** अर्भकम् ओकः यस्य सोऽर्भकौकाः, तस्य भावः तत्त्वम्, तस्मात् अर्भकौकस्त्वादित्यर्थः। ज्यायस्त्वस्याप्युपदेशान्न

भाष्यभावप्रकाशिका

ननु कोऽन्यत्वमाहेति? तत्राह—**यः प्रतिषिध्यत इति।** प्रतिपाद्यत्वेन प्रतिषेधादित्यर्थः। ननु अंशो विकारो वा कश्चिदस्तीति; सत्यं त्वत्पक्षे न संभवतीत्याह—**श्रुतिर्हीति।** ननु श्रुतिसूत्रयोः कर्मकर्तृत्वादिव्यवहारात्पारमार्थिको भेद इति, अत आह—**तदपेक्षयेति।** ननु बाधाभावान्न मिथ्येति, तत्राह—**प्रागिति।** उपजीव्यभेदप्रपञ्चविषयप्रत्यक्षादिविरोधान्न श्रुतिरपि बाधिकेत्याशङ्क्य तद्गतपारमार्थिकत्वस्यानुपजीवनात् तदभावबोधने विरोधाभावाद् व्यावहारिकाभावस्य च ज्ञानोदयनान्तरीयकतया श्रुतिबोध्यत्वा-भावान्नोपजीव्यप्रत्यक्षादिविरोधादप्रामाण्यमेकत्वश्रुतेरित्याह— **गृहीते त्विति।।**६।।

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च।।७।। अणीयस्त्वमभ्युपगम्य ज्यायस्त्वं बाध्यत

न्यायनिर्णयः

ईक्षत्यधिकरणे निरस्तमपि चोद्यं प्रसङ्गादुद्भावयति—**अत्रेति।** श्रुतिस्मृतिभ्यां भेदवादः सप्तम्यर्थः। ननु नान्यत्वं साध्यते, किंत्वन्यस्य मनोमयत्वादि निषिध्यते, तत्राह—**य इति।** विवक्षितगुणवत्त्वेन जीवस्य ध्येयत्वनिषेधानुपपत्त्या तदन्यत्वधीरित्यर्थः। परस्यांशो विकारो वा जीवो नामेत्याशङ्क्य श्रुतिस्मृतिविरोधान्नैवमित्याह—**श्रुतिरिति।** न च भेदाभेदाभ्यां श्रुतिस्मृत्यविरोधः, तदयोगादिति। किं वस्तुतोऽन्यो जीवो नास्ति, किं वोपाधितोऽपीति विकल्पयति—**अत्रेति।** आद्यमङ्गीकरोति—**सत्यमिति।** द्वितीयं दूषयति—**पर इति।** अपरिच्छिन्नस्योपाधिना परिच्छिन्नत्वदृष्टिं दृष्टान्तेन स्पष्टयति—**यथेति।** श्रुतौ स्मृतौ च कर्मकर्तृत्वादिव्यवहारात्पारमार्थिक एव भेद इत्याशङ्क्याह—**तदिति।** अबाधाद्भेदव्यवहारस्य तात्त्विकत्वमाशङ्क्य प्रागूर्ध्वं वा बोधादबाध इति विकल्प्याद्यमनुजानाति—**प्रागिति।** द्वितीयं प्रत्याह—**गृहीते त्विति।।**६।।

जैवं लिङ्गद्वयं निरस्यति—**अर्भकेति।** अर्भकमोको यस्य सोऽर्भकौकाः, तस्य भावस्तत्त्वं, तस्मादिति यावत्। अर्भकशब्दस्य शिशुविषयत्वनिषेधार्थमल्पमिति पर्यायत्वोक्तिः। ओकःशब्दस्याप्रसिद्धार्थतां व्यवच्छिनत्ति—**नीडमिति।** वाक्यार्थं वदन्नाशङ्कां विवृणोति—**एष इति।** तत्र लिङ्गयोः संभावनार्थं विशिनष्टि—**आराग्रेति।** परत्र तदसंभावनार्थम्—**सर्वगत इति।**

परमात्मेति यदुक्तं तत् परिहर्तव्यम्। अत्रोच्यते— नायं दोषः। न तावत् परिच्छिन्नदेशस्य सर्वगतत्वव्यपदेशः कथमप्युपपद्यते। सर्वगतस्य तु सर्वदेशेषु विद्यमानत्वात् परिच्छिन्नदेशव्यपदेशोऽपि कयाचिदपेक्षया संभवति। यथा समस्तवसुधाधिपतिरपि हि सन्नयोध्याधिपतिरिति व्यपदिश्यते। कया पुनरपेक्षया सर्वगतः सन्नीश्वरोऽर्भकौका अणीयांश्च व्यपदिश्यत इति? निचाय्यत्वादेवमिति ब्रूमः। एवमणीयस्त्वादिगुणगणोपेत ईश्वरस्तत्र हृदयपुण्डरीके निचाय्यो द्रष्टव्य उपदिश्यते। यथा शालग्रामे हरिः। तत्रास्य बुद्धिविज्ञानं ग्राहकम्। सर्वगतोऽपीश्वरस्तत्रोपास्यमानः प्रसीदति। व्योमवच्चैतद् द्रष्टव्यम्। यथा सर्वगतमपि सद् व्योम सूचीपाशाद्यपेक्षयाऽर्भकौकोऽणीयश्च व्यपदिश्यते, एवं ब्रह्मापि। तदेवं निचाय्यत्वापेक्षं ब्रह्मणोऽर्भकौकस्त्वमणीयस्त्वं च, न पारमार्थिकम्। तत्र यदाशङ्क्यते, हृदयायतनत्वाद् ब्रह्मणो हृदयानां च प्रतिशरीरं भिन्नत्वाद् भिन्नायतनानां च शुकादीनामनेकत्वसावयवत्वानित्यत्वादिदोषदर्शनाद् ब्रह्मणोऽपि तत्प्रसङ्ग इति, तदपि परिहृतं भवति।।७।।

प्रकटार्थविवरण्

जीवलिङ्गमेवैकान्तिकमुपदिष्टमित्याह—**अत्रोच्यत इति**। ब्रह्मप्राप्त्यपेक्षं तद् भविष्यतीत्युक्तमित्याह पूर्ववादी—**नायं दोष इति**। अणुपरिमाणे स्थिते न जीवानां ब्रह्मभावो घटते, नष्टे वा नाब्रह्मभावोऽपि घटत इत्याह सिद्धान्ती—**न तावदिति**। तर्हि महत्परिमाणे स्थिते नष्टे वा सर्वगतस्यापि नाणुत्वं भवतीत्याशङ्क्याह—**सर्वगतस्य त्विति**। तत्त्वतोऽसंभवेऽपि परापेक्षया उपपद्यत इत्यर्थः। ननु विकारान्तराण्यनादृत्य हृदये किमित्युपदिश्यत इत्याशङ्क्याह—**तत्रेति**। तत्र हृदयेऽस्य परमात्मनो बुद्धिपरिणामरूपं विज्ञानं व्यञ्जकं भवति। अतः पराभिव्यक्तियोग्यस्थानत्वात् तत्रोपदिश्यत इत्यर्थः। ''व्योमवच्च' इति सूत्रभागं व्याचष्टे—**यथेति**। व्योमदृष्टान्तेन चोद्यान्तरं च चूर्णितमित्याह—**तत्र यदाशङ्क्यत इति**। व्योम्नः परोपाधिपरिच्छेदादिना स्वरूपानित्यताद्यदर्शनादिति भावः।

भाष्यभावप्रकाशिका

इत्युच्यते, किं वा कथञ्चिदनुगम्यत इति? न तावदाद्यः; श्रुतस्य बाधायोगात्, नाप्युत्तरः पक्षः संभवतीत्याह—**न तावदिति**। ननु तत्र संभवति पुरोवादसापेक्षतया, इह कथमिति पृच्छति—**कयेति** सर्वगतस्य कथमेकदेशे द्रष्टव्यत्वमिति? तदाह—**यथेति**। ननु तत्र शास्त्रप्रामाण्यादुपपन्नम्, अत्र कथमिति? तदाह—**तत्रास्येति**। **बुद्धिविज्ञानमिति**। अन्तःकरणस्य प्रमाणजा वृत्तिरित्यर्थः। पारमार्थिकत्वाभावादिदमपि परिहृतमित्याह—**तत्रेति**।।७।।

न्यायनिर्णयः

तस्यानुपेक्षणीयत्वमाह—**तदिति**। परिहारभागमवतारयति—**अत्रेति**। अणीयस्त्वमुपेत्य ज्यायस्त्वं वा बाध्यम्, तदपि वा कथंचिदनुगन्तव्यम्? नाद्यः, श्रुतस्य बाधायोगादित्याह—**नायमिति**। द्वितीयं प्रत्याह—**न तावदिति**। त्वयाऽपि ज्यायस्त्वमुपेत्याणीयस्त्वं बाध्यते, तदपि वा कथंचिदनुगम्यते? नाद्यः, श्रुतबाधायोगसाम्यात्। न द्वितीयः, ज्यायसोऽणीयस्त्वस्य सर्वथैवायुक्तत्वात्, तत्राह—**सर्वेति**। अपरिच्छिन्नस्य परिच्छिन्नदेशोक्तौ दृष्टान्तमाह—**समस्तेति**। तत्र पुरवासापेक्षया व्यपदेशेऽपि कथमिहेति पृच्छति—**कयेति**। सूत्रावयवमुत्तरमवतार्य व्याचष्टे—**निचाय्यत्वादिति**। सर्वगतस्य कथमेकदेशे द्रष्टव्यत्वम्, तत्राह—**यथेति**। तत्र शास्त्रप्रामाण्यत् तथाऽस्तु, प्रस्तुते कथं, तत्राह—**तत्रेति**। बुद्धिविज्ञानमित्यन्तःकरणस्य प्रमाणजा वृत्तिरुक्ता। सर्वगतस्य कुतो हृदय एव मानग्राह्यत्वम्, तत्राह—**सर्वेति**। अपरिच्छिन्नस्य परिच्छिन्नायतनत्वादिव्यपदेशं सौत्रोदाहरणेन साधयति—**व्योमवदिति**। ब्रह्मापि हृदयापेक्षया द्विधोक्तिभागिति शेषः। दार्ष्टान्तिकमुपसंहरति—**तदेवमिति**। हृदयायतन-स्यातात्त्विकत्वे चोद्यान्तरमपि निरस्तमित्याह—**तत्रेति**। न हि परोपाधिपरिच्छेदादनित्यत्वादि युक्तम्, व्योम्नोऽदृष्टेरिति भावः।।७।।

संभोगप्राप्तिरिति चेन्न वैशेष्यात्।।८।।

व्योमवत्सर्वगतस्य ब्रह्मणः सर्वप्राणिहृदयसंबन्धात्, चिद्रूपतया च शारीरादविशिष्टत्वात्, सुख-दुःखादिसंभोगोऽप्यविशिष्टः प्रसज्येत। एकत्वाच्च। न हि परस्मादात्मनोऽन्यःकश्चिदात्मा संसारी विद्यते, 'नान्योऽतोऽस्ति विज्ञाता' (बृ.उ. ३।७।२३) इत्यादिश्रुतिभ्यः। तस्मात् परस्यैव संसारसंभोगप्राप्तिरिति चेत्, न; वैशेष्यात्। न तावत् सर्वप्राणिहृदयसंबन्धाच्छारीरवद् ब्रह्मणः संभोगप्रसङ्गः, वैशेष्यात्। विशेषो हि भवति शारीरपरमेश्वरयोः। एकः कर्ता भोक्ता धर्माधर्मसाधनः सुखदुःखादिमांश्च। एकस्तद्विपरीतो-ऽपहतपाप्मत्वादिगुणः। एतस्मादनयोर्विशेषादेकस्य भोगो, नेतरस्य। यदि च संनिधानमात्रेण वस्तुशक्तिमनाश्रित्य कार्यसंबन्धोऽभ्युपगम्येत, आकाशादीनामपि दाहादिप्रसङ्गः। सर्वगतानेकात्म-वादिनामपि समावेतौ चोद्यपरिहारौ।

यदप्येकत्वाद् ब्रह्मण आत्मान्तराभावाच्छारीरस्य भोगेन ब्रह्मणो भोगप्रसङ्ग इति। अत्र वदामः– इदं

प्रकटार्थविवरणम्

संभोगप्राप्तिरिति चेन्न वैशेष्यात्। ब्रह्मणो हृदयायतनत्वेऽनिष्टसंभोगप्रसङ्गात् जीव एव हृदयायतन उपास्य इत्याह—व्योमवदिति। ब्रह्मापि भोक्तृ हृदयायतनत्वे सति चेतनत्वात् संसारिवदिति प्रयोगः। ब्रह्म भोक्तृ भोक्त्रभिन्नत्वात् जीववदिति प्रयोगान्तरमाह—एकत्वाच्चेति। प्रथमप्रयोगे तावदप्रयोजको हेतुः, धर्माधर्मवत्त्वस्यैव प्रयोजकत्वात् इत्यभिप्रेत्य वैलक्षण्यमाह—न वैशेष्यादिति। इतश्च न ब्रह्मणो भोग इत्याह—यदि चेति। किञ्च सर्वगता बहवो जीवा इति येषां मतम्, तेषामप्येकस्मिन्नेव देहदेशे सर्वेषां सन्निधानात् सम एव भोगः प्रसज्येत, न चेन्नैकस्यापि। यदि स्वकर्मोपार्जिते शरीरे भोग इत्यभिदध्युः, तथा वयमप्यभिदधीमहीत्याह—सर्वगतानेकेति। ब्रह्म भोक्तृ इति प्रतिज्ञैव नाङ्गं धारयत्यागमविरोधादिति मत्वाऽऽह—अत्र वदाम

भाष्यभावप्रकाशिका

संभोगप्राप्तिरिति चेन्न वैशेष्यात्।।८।। ननु यथाऽऽकाशस्य सर्वप्राणिहृदयसम्बन्धेऽपि न भोगः, तथा स्यादिति, तत्राह—चिद्रूपतयेति। ननु हृत्सम्बन्धेऽपि यस्य भोगसाधनसम्बन्धः, तस्यैव भोगो नेतरस्येत्याशङ्क्याह-एकत्वाच्चेति। एतत् प्रपञ्चयति—न हीति। एकत्वेन संसारित्वप्रसञ्जनं तावदास्ताम्, संनिधिमात्रात्तु संसारित्वापादनं नोपपद्यत इत्याह—न तावदिति। विशेषभावादिति व्याचष्टे—विशेषो हीति। अतिप्रसङ्गादपि न संभवतीत्याह—यदि चेति। किञ्च नैयायिकादीनामिदं चोद्यं न संभवतीत्याह—सर्वगतेति। द्वितीयपक्षे परिहारमाह—यदपीति। अज्ञात एकत्वे चोद्यासंभवात्। भवद्वचनादेकत्वावगमः, किं वा

न्यायनिर्णयः

हार्दत्वे ब्रह्मणोऽनिष्टप्रसङ्गाज्जीवस्यैव हार्दस्योपास्यतेति शङ्कित्वा समाधत्ते—संभोगेति। चोद्यं प्रपञ्चयति—व्योमवदिति। सर्वबुद्धिसंबन्धेऽपि नभोवदभोगमाशङ्क्योक्तम्—चिदिति। तथापि भोगहेतुसंबद्धस्यैव भोगो, नेतरस्येत्याशङ्क्याह—एकत्वाच्चेति। तत् प्रपञ्चयति—न हीति। अनिष्टप्रसङ्गं निगमयति—तस्मादिति। उत्तरमादत्ते—नेति। यत्तु बुद्धिस्थत्वे सति चैतन्याद् ब्रह्मणो भोक्तृत्वं जीववदिति, तत्राह—न तावदिति। हेतुं विवृणोति—विशेषो हीति। धर्माधर्मवत्त्वस्यैव भोगप्रयोजकत्वादप्रयोजको हेतुरित्यर्थः।[१] उक्तवैशेष्यफलमाह—एतस्मादिति। साधनव्याप्तिमाशङ्क्य 'अन्यत्र धर्मात्' इत्यादिश्रुतिविरोधान्नैवमित्याह—यदि चेति। किंच जीवा विभवो बहवश्चेति स्थितावेकस्मिन् देहदेशे सर्वसंनिध्यविशेषात् तुल्यो भोगः स्यात्, न चेन्नैकस्यापि। स्वकर्मार्जिते देहे भोगो नान्यत्रेति चेद्, वयमपि तथैवाभिदधीमहीत्याह—सर्वेति। ब्रह्मणो भोक्त्रभिन्नत्वाद्भोक्तृतेत्युक्तमनुभाषते—यदपीति। तत्र प्रतिज्ञैवायुक्तेत्याह—अत्रेति। तदयुक्तिं वक्तुं पृच्छति—इदमिति।

---

१. सिद्धान्तिभिरनिष्टो यः सुखदुःखसंभोगः तत्प्रसक्तेरित्यर्थः।

तावद् देवानांप्रियः प्रष्टव्यः– कथमयं त्वयाऽऽत्मान्तराभावोऽध्यवसित इति। 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'नान्योऽतोऽस्ति विज्ञाता' इत्यादिशास्त्रेभ्य इति चेत्, यथाशास्त्रं तर्हि शास्त्रीयोऽर्थः प्रतिपत्तव्यो, न तत्रार्धजरतीयं लभ्यम्। शास्त्रं च 'तत्त्वमसि' इत्यपहतपाप्मत्वादिविशेषणं ब्रह्म शारीरस्यात्मत्वेनोपदिशच्छारीरस्यैव तावदुपभोक्तृत्वं वारयति। कुतस्तदुपभोगेन ब्रह्मण उपभोगप्रसङ्गः? अथागृहीतं शारीरस्य ब्रह्मणैकत्वम्, तदा मिथ्याज्ञाननिमित्तः शारीरस्योपभोगः। न तेन परमार्थरूपस्य ब्रह्मणः संस्पर्शः। न हि बालैस्तलमलिनतादिभिर्व्योम्नि विकल्प्यमाने तलमलिनतादिविशिष्टमेव परमार्थतो व्योम भवति। तदाह– न, वैशेष्यादिति। नैकत्वेऽपि शारीरस्योपभोगेन ब्रह्मण उपभोगप्रसङ्गः, वैशेष्यात्। विशेषो हि भवति मिथ्याज्ञानसम्यग्ज्ञानयोः। मिथ्याज्ञानकल्पित उपभोगः, सम्यग्ज्ञानदृष्टमेकत्वम्। न च मिथ्याज्ञानकल्पितेनोपभोगेन सम्यग्ज्ञानदृष्टं वस्तु संस्पृश्यते। तस्मान्नोपभोगगन्धोऽपि शक्य ईश्वरस्य कल्पयितुम्।।८।।

।।इति प्रथमं सर्वत्रप्रसिद्ध्यधिकरणम्।।

प्रकटार्थविवरणम्

इत्यादिना। शास्त्रादेकत्वं नाद्यापि यदि बुद्धं त्वया तदा भेदप्रसिद्धिबाधिता[२] प्रतिज्ञा भविष्यतीत्याह—**अथागृहीतमित्यादिना**। तस्मादीश्वरस्य हृदयायतनत्वेऽप्युपभोगाप्राप्तेः मनोमयत्वादिविशिष्ट ईश्वर एवोपास्य इति स्थितम्। इति सर्वत्र प्रसिद्ध्यधिकरणम्।

भाष्यभावप्रकाशिका

शास्त्रप्रमाणादिति विकल्पयति— **कथमयमिति**। ननु शास्त्रमेकत्वमेव बोधयति, न संसाराभावमिति, तत्राह—**शास्त्रं चेति**। संसारिणः परमात्मैकत्वबोधनासंभवाद् जीवस्य संसारित्वनिराकरणेनैकत्वं बोधयति शास्त्रम्; अशोधितपदार्थस्य वाक्यार्थज्ञानाभावादित्यर्थः। ननु भवद्वचनादेकत्वमवगतम्, न प्रमाणादिति द्वितीयकल्पमाशङ्कते—**अथेति**। दृष्टान्तेनैतदुपपादयति—**तर्हीति**। द्वितीयपक्षे सूत्रं योजयति—**तदाहेति**।।८।। इति प्रथमं सर्वत्रप्रसिद्धाधिकरणम्।

न्यायनिर्णयः

किमेकत्वमज्ञातं ज्ञातं वा? आद्ये हेत्वसिद्धिः। द्वितीये तद्धीर्मदुक्तेः शास्त्राद्वेति प्रश्नमेव प्रकटयति—**कथमिति**। अन्त्यमादत्ते—**तत्त्वमिति**। शास्त्रानुसरणे तदतिक्रमणमयुक्तमित्याह-—**यथेति**। न हि कुक्कुटादेरेकदेशो भोगाय पच्यत एकदेशस्तु प्रसवाय कल्प्यते, विरोधादित्याह—**नेति**। ऐक्यं बोधयदपि शास्त्रं न संसारं वारयति। तत्कथमर्धजरतीयप्रसक्तिरित्याशङ्क्याह—**शास्त्रं चेति**। संसारिणो ब्रह्मणैक्यबोधनायोगाज्जीवस्य संसारित्वनिरासद्वारा शास्त्रमैक्यं बोधयति, अशोधितपदार्थस्य वाक्यार्थज्ञानाभावादित्यर्थः। त्वदुक्तेरैक्यं ज्ञातम्, न शास्त्रादिति द्वितीयमुत्थापयति—**अथेति**। तत्र वास्तवे भोक्तृत्वे साध्ये साध्यवैकल्यम्, अवास्तवे सिद्धसाध्यतेति मत्वाऽऽह—**तदेति**। तदेव दृष्टान्तेनाह—**न हीति**। तत्र सूत्रभागमवतार्य योजयति—**तदाहेति**। तयोर्विशेषेऽपि कथं ब्रह्मणि वस्तुतो भोगाभावः, तत्राह—**न चेति**। हेतुद्वयनिरासमुपसंहरति— **तस्मान्नेति**। मनोमयत्वादिविशिष्टस्यैवेश्वरस्य ध्यानार्थं हार्दत्वेऽपि निर्दोषत्वात् तस्मिन्नेव शाण्डिल्यविद्यावेद्ये 'सर्वम्' इत्यादिवाक्यं समन्वितमित्यर्थः।।८।।

---

१. सूत्रे विशेष एव वैशेष्यमिति स्वार्थे ष्यञ् प्रत्यय इति भावः। विशेषादिति वक्तव्ये वैशेष्यादित्यभिधानमात्यन्तिकं विशेषं द्योतयितुमिति भामती। प्रत्ययप्रयोगेणातिशयो विवक्षित इति तदाशयः।

२. बाधितेति। तथा च 'भोक्त्रभिन्नत्वात्' इति हेतुरसिद्ध इति भावः।

२।।अत्त्रधिकरणम्।।९-१०।।

अत्ता चराचरग्रहणात्।।९।।

कठवल्लीषु पठ्यते—'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः' (क.उ. १।२।२४) इति। अत्र कश्चिदोदनोपसेचनसूचितोऽत्ता प्रतीयते। तत्र किमग्निरत्ता स्यात्, उत जीवः, अथवा परमात्मेति संशयः; विशेषानवधारणात्, त्रयाणां चाग्निजीवपरमात्मनामस्मिन् ग्रन्थे प्रश्नोपन्यासोपलब्धेः। किं तावत् प्राप्तम्? अग्निरत्तेति। कुतः? 'अग्निरन्नादः' (बृ.उ. १।४।६) इति

शारीरकन्यायसंग्रहः

अत्ता चराचरग्रहणात्।।९।। प्रकरणाच्च।।१०।। अत्र प्रसिद्धादर्थादर्थान्तरे प्रसिद्धार्थगुणलेशेन प्रयुज्यमानः शब्दः संनिहितपदार्थानुसारेण गुणमादत्ते, तेन एकवाक्यतासामर्थ्यात्—इति न्यायेन ओदनशब्देन ब्रह्मक्षत्रयोः वर्तमानेन मृत्यूपसेचनसन्निधानात् प्रसिद्धौदनंगतो विनाश्यत्वगुणोऽवलम्ब्यते। तथा ब्रह्मक्षत्रशब्दाभ्यामपि तत्सन्निधानात् विनाश्यवस्तुमात्रं लक्ष्यत इति कृत्स्नस्य विनाशलिङ्गात् ब्रह्मात्र समर्थितम्।

प्रकटार्थविवरणम्

अत्ता चराचरग्रहणात्। यस्योभे ब्रह्मक्षत्रे ओदनो भवतः, मृत्युर्मारको यस्योपसेचनम् अन्नव्यापकमुपकरणं, क इत्थंभूतं वेद यत्र येन स्वरूपेण सोऽत्ता वर्तत इत्यर्थः। आपातप्रतिपन्नं संशयविषयमाह—**अत्र चेति।** सबीजं संशयमाह—**तत्र किमिति।** "स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तम्" इत्यग्निविषयः प्रश्नः। "येयं प्रेते विचिकित्सा" इति जीवविषयः प्रश्नः।

पूर्वाधिकरणान्ते परमात्मनो भोक्तृत्वप्रतिषेधादग्निर्जीवो वा स्यादिति पूर्वः पक्षः। यदि कर्मफलभोक्तृत्वमत्तृत्वं स्यात् तर्हि

भाष्यभावप्रकाशिका

अत्ता चराचरग्रहणात्।।९।। प्रकरणाच्च।।१०।। ननु सूत्रानुसारि नेदं वाक्यमिति, अत आह—**अत्र चेति।** त्रिष्वेव संशयः कथमिति, अत्राह—**त्रयाणामिति।** ननु अग्निप्रकरणस्यातिक्रान्तत्वादध्यात्माधिकारे तत्प्रतिपादनासंभवादोदनशब्दस्य भोज्यत्वगुणयोगेन ब्रह्मक्षत्रयोर्वर्तमानस्य भोक्तुरेवोपस्थापकत्वादग्नेश्च संहर्तृत्वेऽपि भोक्तृत्वाभावान्न तदुपपत्तिरित्यपरितोषात्

न्यायनिर्णयः

ईश्वरस्याभोक्तृत्वे नात्तृत्वमपीत्याशङ्क्याह—**अत्तेति।** उदाहरति—**कठेति।** यस्य परस्यात्मनो ब्रह्म च क्षत्रं चोभे जाती प्रसिद्धान्नवदोदनौ भवतः, यस्य मृत्युः सर्वमारकः सन्नुपसेचनमोदनमिश्रघृतवत् तिष्ठति, यत्र सोऽत्ता कारणात्मा वर्तते, तं निर्विशेषमात्मानं 'नाविरतो दुश्चरितात्' इति मन्त्रोक्तोपायवान् यथा वेदेत्थमन्यस्तद्रहितो न वेदेत्यर्थः[१]। अत्तुरत्राश्रवणात्र सूत्रानुसारितेत्याशङ्क्याह—**अत्रेति।** सिद्धेऽत्तरि विचारमूलं संशयमाह—**तत्रेति।** विशेषानवधारणोत्थः संशयस्त्रिष्वेव कथं नियम्यते, तत्राह—**त्रयाणामिति।** 'स त्वमग्निम्' इत्यादिरग्नेः, 'येयं प्रेते विचिकित्सा' इत्यादिर्जीवस्य, 'अन्यत्र धर्मात्' इत्यादिर्ब्रह्मणः प्रश्नः। प्रतिवचनमपि 'लोकादिमग्निम्' इत्याद्यग्नेः, 'हन्त त इदम्' इत्यादीतरयोरेवं त्रयाणामेव तयोरिहोपलब्धेस्त्रिष्वेव संशयः, विशेषानुपलब्धेरित्यर्थः। पठितकठश्रुतेर्निर्विशेषब्रह्मणि समन्वयोक्त्या श्रुत्यादिसंगतिं गृहीत्वा पूर्वपक्षयति—**किं तावदिति।** पूर्वपक्षेऽग्नेर्जीवस्य वोपास्तिः, सिद्धान्ते निर्विशेषवस्तुधीरिति फलम्। विशेषेऽनवधृते कुतोऽवधृतिरित्याह—**कुत इति।** 'अग्निरन्नादोऽन्नपतिः' इति श्रुतेः, अग्नेरन्नादत्वप्रसिद्धेश्च विशेषधीरित्याह—**अग्निरिति।**

---

१. 'क इत्था वेद' इत्यस्याऽऽवृत्त्या 'तमत्तारं को वेद,, यत्र च सोऽत्ता वर्तते तं शुद्धं को वेद' इति कल्पतरौ। अत एवोत्तरसूत्रे भाष्ये दुर्ज्ञानत्वमत्तुरुच्यमानं संगच्छते। न्यायनिर्णयस्याप्युक्तेऽर्थे तात्पर्यमवसेयम्।

श्रुतिप्रसिद्धिभ्याम्। जीवो वाऽत्ता स्यात्, 'तयोरन्यः पिप्पलं स्वाद्वत्ति' (मु.उ. ३।१।१) इति दर्शनात्। न परमात्मा, 'अनश्नन्नन्यो अभिचाकशीति' इति दर्शनादित्येवं प्राप्ते ब्रूमः-

अत्ताऽत्र परमात्मा भवितुमर्हति। कुतः? चराचरग्रहणात्। चराचरं हि स्थावरजङ्गमं मृत्यूपसेचनमिहाद्यत्वेन प्रतीयते, तादृशस्य चाद्यस्य न परमात्मनोऽन्यः कार्त्स्न्येनात्ता संभवति। परमात्मा तु विकारजातं संहरन् सर्वमत्तीत्युपपद्यते।

नन्विह चराचरग्रहणं नोपलभ्यते, कथं सिद्धवच्चराचरग्रहणं हेतुत्वेनोपादीयते? नैष दोषः। मृत्यूपसेचनत्वेन सर्वस्य प्राणिनिकायस्य प्रतीयमानत्वात्। ब्रह्मक्षत्रयोश्च प्राधान्यात् प्रदर्शनार्थत्वोपपत्तेः।

प्रकटार्थविवरणम्

तत् परमात्मनो न स्यात्; इह तु तद्ग्रहणकारणाभावात् सर्वोपसंहर्ता परमात्माऽत्ताऽभिधीयत इत्याह—**अत्ताऽत्र परमात्मेत्यादिना।** सर्वसंहर्तृग्रहणेऽपि कारणं नास्तीत्याह—**नन्विहेति।** यत्रार्थान्तरे प्रसिद्धः शब्दोऽर्थान्तरे गुणयोगात् प्रयुज्यते तत्र सन्निहितपदार्थानुसारेणैवेति मृत्युसन्निधानादन्नगतं विनाश्यत्वगुणमादाय ब्राह्मणादिजात्युपलक्षितं सर्वमेव

भाष्यभावप्रकाशिका

पक्षान्तरमाह—**जीवो वेति।** ओदनशब्देन कर्मफलाभिधानान्मृत्युशब्दस्य च तदनुगुणतया वृत्तेः 'न जायत' इत्यादेश्च जीवे संभवादिति भावः। ओदनशब्देन ब्रह्मक्षत्रयोर्वर्तमानेन मृत्यूपसेचनशब्दसंनिधानाद् विनाश्यत्वगुणः प्रसिद्धौदनगतः स्वीक्रियते। ब्रह्मक्षत्रशब्दाभ्यामपि जगदेव लक्ष्यते। अतस्तस्य विनाशकत्वलिङ्गाद् ब्रह्मात्र प्रतीयत इति परिहरति— **नैष दोष इति।**

न्यायनिर्णयः

अग्न्यधिकारमतिक्रम्याध्यात्माधिकारे तदुक्त्ययोगात्, ओदनशब्दस्य च भोग्यत्वगुणाद् ब्रह्मक्षत्रवृत्तेर्भोक्तृगमकत्वात्, अग्नेश्च संहर्तृत्वेऽपि भोक्तृत्वाभावान्नाग्न्युपास्तिरिहेत्यपरितोषादाह—**जीवो वेति।** ओदनशब्देन कर्मफलोक्तेर्मृत्युशब्दस्य तदनुगुणत्वात् 'न जायते' इत्यादेश्च जीवे योगात् तदुपास्तिरत्रेति भावः। ओदनशब्देन ब्रह्मक्षत्रवृत्तिना जगल्लक्षणात् तत्संहर्तृत्वस्य परस्मिन् प्रसिद्धेस्तद्धीरेवात्रेष्टेत्याशङ्क्याह—**नेति।** श्रुतिलक्षणाविशये श्रुतेर्न्याय्यत्वादोदनशब्दस्य भोग्यार्थत्वात्, ब्रह्मक्षत्रयोश्च भोग्यत्वात्, भोक्तृत्वस्य परस्मिन् वारितत्वान्न तत्परतेत्यर्थः। पूर्वपक्षमनूद्य सिद्धान्तयति—**एवमिति।** साधिते जीवपक्षे परस्मिन् को हेतुरिति पृच्छति—**कुत इति।** हेतुमुक्त्वा व्याचष्टे—**चरेति।** तदत्तृत्वस्यान्यथासिद्धिं निराह—**तादृशस्येति।** हेतोः पक्षधर्मतामाह—**परमेति।** ब्रह्मक्षत्रयोरेव मृत्यूपसेचनयोरत्र दृष्टेरसिद्धो हेतुरिति शङ्कते—**नन्विति।** ओदनशब्देन ब्रह्मक्षत्रवृत्तिना

१. 'ओदनस्यात्ता' इत्युक्तेऽत्तुर्भोक्तृत्वं भाति, 'ब्रह्मक्षत्रयोरत्ता' इत्युक्ते च तत्संहर्तृत्वम्। उभयं चेह श्रूयते। तेनात्तृत्वं किंरूपमिति संशयः। यदि तद् भोक्तृत्वं तर्ह्यत्ता जीवः, यदि च संहर्तृत्वं तदाऽग्निजीवब्रह्मणामन्यतमः, अविशेषादिति अत्ता कः इति संशयः। ओदनशब्दस्तावत् ब्रह्मक्षत्रयोः गुणवृत्त्या प्रयुक्त इत्यविवादम्। गौण्या च प्रयुज्यमानं पदं स्वशक्यगतं नात्यन्तमसाधारणं, न चातिसाधारणं गुणमादाय प्रवर्तते, किंतु मध्यविधं लोकप्रसिद्धम्। यथा 'अग्निर्माणवकः' इत्यग्निपदं माणवके नाग्नित्वं, नापि द्रव्यत्वादिकमादाय प्रयुज्यते, किन्तु तेजस्वित्वादिकम्। तदिहौदनपदं प्रसिद्धतद्गतभोग्यत्वगुणेन ब्रह्मत्रयोः प्रवृत्तम् प्रतिसम्बन्धिनोऽत्तुर्भोक्तृत्वम् गमयति। ततो जीव एव मन्त्रप्रतिपाद्यः। ब्रह्मक्षत्रयोर्भोग्यत्वं च स्त्रीभृत्यादिरूपेण। उपसेचनत्वं च मृत्योरबाधकत्वाभिप्रायम्। स्वरूपतो जीवस्य नित्यत्वेन मृत्युवश्यत्वाभावात् इत्येकःपक्षः। अत्तृत्वस्य संहर्तृत्वरूपत्वेऽपि अग्नेस्तत्संभवात् सोऽत्तेति अन्यःपक्षः। अयं चातिदुर्बलः संभवमात्रेण भाष्ये उपन्यस्त इति न्यायरक्षामणिः। सिद्धान्तस्तु—बुद्धिकल्पितगुणमपेक्ष्य एकवाक्यतापन्नपदान्तरोपस्थापितगुणग्रहणस्य न्याय्यत्वात्, मृत्युपदसंनिधानादोदनपदं विनाश्यत्वगुणमादाय ब्रह्मक्षत्रयोः प्रवृत्तमिति निर्णीयते। तेन चात्तृत्वं संहर्तृत्वरूपं लभ्यते। उपसेचनत्वं च दध्यादेः अन्यादनहेतुत्वे सति स्वयमद्यमानत्वं दृष्टम्। इह च मृत्योः ब्रह्मक्षत्रसंहारहेतुत्वे सति स्वयं संहार्यत्वमुपसेचनत्वमिति समृत्युकब्रह्मक्षत्रसंहर्तृत्वमत्तुः लभ्यते। तावन्मात्रसंहर्तृत्वप्रतिपादनं च निस्तात्पर्यकम्। न हीदमुपासनाप्रकरणं, येन तावन्मात्रमुपासनार्थं विवक्षितमिति वक्तुं शक्यम्। मृत्युनाश्यत्वं च सवत्रैव चराचरे समानमिति ब्रह्मक्षत्रपदाभ्यां मृत्युनाश्यत्वेन रूपेण सकलचराचरलक्षणात् सर्वजगत्संहर्तृत्वमत्तुः प्रतीयते। तच्च निरङ्कुशं परमेश्वरादन्यत्रानुपपद्यमानमत्तुः परमेश्वरत्वं साधयतीति भामत्यादिग्रन्थतात्पर्यम्।

यत्तु परमात्मनोऽपि नात्तृत्वं संभवति, 'अनश्नन्नन्यो अभिचाकशीति' इति दर्शनादिति; अत्रोच्यते-कर्मफलभोगस्य प्रतिषेधकमेतद्दर्शनम्, तस्य संनिहितत्वात्। न विकारसंहारस्य प्रतिषेधकम्, सर्ववेदान्तेषु सृष्टिस्थितिसंहारकारणत्वेन ब्रह्मणः प्रसिद्धत्वात्। तस्मात् परमात्मैवेहात्ता भवितुमर्हति।।९।।

प्रकरणाच्च।।१०।।

इतश्च परमात्मैवेहात्ता भवितुमर्हति, यत्कारणं प्रकरणमिदं परमात्मनः- 'न जायते म्रियते वा विपश्चित्' (क.उ. १।२।१८) इत्यादि। प्रकृतग्रहणं च न्याय्यम्। 'क इत्था वेद यत्र सः' इति च दुर्विज्ञानत्वं परमात्मलिङ्गम्।।१०।।

।।इति द्वितीयमत्त्रधिकरणम्।।

शारीकन्यायसंग्रहः

।।गुहाप्रविष्टाधिकरणम्।।

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्।।११।। विशेषणाच्च।।१२।। अत्र द्वित्वसंख्याश्रवणे सत्येकस्मिन् संप्रतिपन्ने द्वितीयाकाङ्क्षायां संप्रतिपन्नजातिमुपजीव्य विशेषपरिग्रहे बुद्धिलाघवात् विजातीये जातिव्यक्तिबुद्धिद्वयापेक्षत्वात् संप्रतिपन्नसमानजातीयाकाङ्क्षैव युक्ता, 'अस्य गोर्द्वितीयोऽन्वेष्टव्यः' इत्यादिषु दर्शनात्—इति न्यायेन बुद्धिजीवसामान्यस्य कारकत्वस्य बहिरङ्गत्वात् चेतनत्वस्य स्वभावतयाऽन्तरङ्गत्वात् संप्रतिपन्नजीवसजातीयः परमात्मा उपादीयत इत्युक्तम्।

प्रकटार्थविवरणम्

विनाश्यमोदनपदेनोपलक्ष्यते। अस्य सर्वस्य संहर्ता प्रतीयत इत्याह—**नैष दोष इति।** श्रुतेः गतिं वक्तुमुद्भावयति—**यत्त्विति।**

प्रकरणाच्च। लिङ्गात् परमात्मानमुपपाद्य इदानीं प्रकरणमाह—**प्रकरणाच्चेति। यत्कारणं** यस्मात्कारणादित्यर्थः। न जायते न म्रियते चेत्याद्यन्तयोः भावविकारयोः प्रतिषेधेन मध्यवर्तिनोऽपि भावविकाराः प्रतिषिद्धा भवन्ति। कूटस्थनित्य इत्यर्थः। **विपश्चित्** मेधावी सर्वज्ञ इत्यर्थः। किञ्च अग्निजीवयोः प्रत्यक्षत्वान्न दुर्ज्ञेयत्वं घटत इत्याह—**क इत्था वेदेति।** इति द्वितीयमत्त्रधिकरणम्।

भाष्यभावप्रकाशिका

तस्य संनिहितत्वादिति। "तयोरन्यः पिप्पलं स्वाद्वत्ती"ति समनन्तरं निर्दिष्टत्वादित्यर्थः। **सर्ववेदान्तेष्विति।** बहुवाक्यविरोधप्रसङ्गादित्यर्थः। इति द्वितीयमत्ताधिकरणम्।।९।।१०।।

न्यायनिर्णयः

मृत्यूपसेचनसंनिधानादोदनस्थं नाश्यत्वमाश्रित्य ब्रह्मक्षत्रशब्दाभ्यां जगल्लक्ष्यते, तेन तन्नाशकत्वलिङ्गाद् ब्रह्मात्र भातीत्याह—**नैष इति।** निषेधश्रुत्या परस्य नात्तृतेत्युक्तमनूद्य तस्य गतिमाह—**यत्त्विति।** तयोरित्यादिना कर्मफलभोगस्य पूर्वोक्तत्वं संनिहितत्वम्। अविशेषेण विकारसंहारस्यापि किमित्येतन्न निषेधकम्? सर्ववेदान्तविरोधादित्याह—**नेत्यादिना।** लैङ्गिकमर्थमुपसंहरति—**तस्मादिति।**।९।।

परमात्मैवात्तेत्यत्र मानान्तरमाह—**प्रकरणाच्चेति।** सूत्रं व्याचष्टे—**इतश्चेति।** प्रकृतत्वमप्रयोजकमित्याशङ्क्योक्तम्—**प्रकृतेति।** न्याय्यम्। अप्रकृतग्रहणादिति शेषः। इतश्च परमात्मैवात्तेत्याह—**क इति।** 'यस्य' इत्यादि वाक्यं ज्ञेये परमात्मनि मायाद्वारा सर्वसंहर्तर्यन्वितमित्यर्थः।।१०।।

३।।गुहाप्रविष्टाधिकरणम्।।सू. ११-१२।।

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्।।११।।

कठवल्लीष्वेव पठ्यते–'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः' (क.उ. १।३।१) इति। तत्र संशयः– किमिह बुद्धिजीवौ निर्दिष्टावुत जीवपरमात्मानाविति। यदि बुद्धिजीवौ, ततो बुद्धिप्रधानात् कार्यकरणसंघाताद् विलक्षणो जीवः प्रतिपादितो भवति। तदपीह प्रतिपादयितव्यम्, 'येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके। एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः' (क.उ. १।१।२०) इति पृष्टत्वात्। अथ जीवपरमात्मानौ ततो जीवाद्विलक्षणः परमात्मा प्रतिपादितो भवति। तदपीह प्रतिपादयितव्यम्, 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद् वद' (क.उ. १।२।१४) इति पृष्टत्वात्।

अत्राहाक्षेप्ता– उभावप्येतौ पक्षौ न संभवतः। कस्मात्? [१]ऋतपानं कर्मफलोपभोगः, 'सुकृतस्य लोके'

प्रकटार्थविवरण्

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्। ऋतं सत्यमवश्यंभावि कर्मफलम्; पिबन्तौ भुञ्जानौ सुकृतस्य लोके शरीरे परस्य ब्रह्मणोऽर्धं स्थानं परार्धम्; तस्मिन् परमे प्रकृष्टे हृदये; गुहां बुद्धिम्; प्रविष्टौ छायातपवद्विरुद्धौ ब्रह्मविदो वदन्ति। तथा पञ्चाग्निविदः। तथा त्रिर्नाचिकेतोऽग्निश्चितो यैस्ते त्रिणाचिकेताः। बुद्ध्यवच्छिन्नस्य जीवस्य परमात्मनश्च प्रकृतत्वात् संशयमाह—**तत्रेति**। संदिग्धं सप्रयोजनं च विचारमर्हतीत्युभयत्र प्रयोजनमाह—**यदीत्यादिना**। मनुष्ये प्रेते मृते येयं विचिकित्सा संशयः परलोकभोक्ताऽस्तीत्येके, नास्तीति चान्ये, त्वयोपदिष्टोऽहमेतद् विद्यां ज्ञातुमिच्छामीत्यर्थः। उभयोर्भोक्तृत्वासंभवेन कश्चित्

भाष्यभावप्रकाशिका

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्।।११।। ननु अर्थभेदेन वाक्यभेद इति, अत आह—**यदि बुद्धीति**। ननु प्रकृतस्य प्रतिपाद्यत्वात् संशयोऽनुपपन्न इति, अत आह—**तदपीति**। जीवोऽपि प्रकृत इत्यर्थः। एवं सिद्धान्तेऽपि योजना।

न्यायनिर्णयः

पूर्वोदाहृतानन्तरमन्त्रार्थनिर्णयार्थमाह—**गुहामिति**। संगतिं वदन् विषयमाह—**कठेति**। ऋतं सत्यमावश्यकं कर्मफलं पिबन्तौ भुञ्जानौ, सुकृतस्य लोके सम्यगर्जितस्यादृष्टस्य कार्ये देहे वर्तमानौ, परस्य ब्रह्मणोऽर्धं स्थानमर्हतीति परार्ध[र्ध्यं] हृदयं तस्मिन् परमे श्रेष्ठे या गुहा नभोलक्षणा तां प्रविश्य स्थितौ, छायातपवन्मिथो विरुद्धौ, तौ च ब्रह्मविदः कर्मिणश्च वदन्ति। त्रिर्नाचिकेतोऽग्निश्चितो यैस्ते त्रिणाचिकेताः, तेऽपि वदन्तीत्यर्थः। बुद्ध्यवच्छिन्नस्य जीवस्य परस्य च प्रकृतत्वादृतपानकर्तृत्वस्य जीवेन सह बुद्धेरिव परस्यापि छत्रिन्यायेन लाक्षणिकत्वाविशेषाच्च संशयमाह—**तत्रेति**। वाक्यभेदशङ्कां परिहरन् पूर्वपक्षे फलमाह—**यदीति**। प्रकृतं प्रतिपाद्यं, कुतो जीवस्तथेति, तत्राह—**तदपीति**। जीवतत्त्वं तदर्थः। प्रकरणं सप्तम्यर्थः। मनुष्ये प्रेते मृते सति येयं विचिकित्सा संशयः परलोकभोक्ताऽस्तीत्येके, नास्तीति चान्ये। त्वयोपदिष्टोऽहमेतत्तत्त्वं ज्ञातुमिच्छामीत्यर्थः। वराणां पितुः सौमनस्यमग्निविद्याऽऽत्मविद्येत्येतेषामिति निर्धारणे षष्ठी। सिद्धान्तेऽपि वाक्यभेदं वारयन् फलमाह—**अथेत्यादिना**। जीवविलक्षणस्य ब्रह्मणोऽप्रकृतत्वात् कथं प्रतिपाद्यतेत्याशङ्क्याह—**तदपीति**। परमात्मस्वरूपं तदित्युक्तम्। **अन्यत्रेति**। अन्यदिति यावत्। कृताकृतात् कारणात् कार्याच्चेत्यर्थः। चकाराभ्यां [२]भवतो ग्रहणम्।

उभयोर्भोक्तृत्वायोगेन संशयमाक्षिपति—**अत्रेति**। प्रकृतत्वात् तदुपपत्तौ तदसंभावना नास्तीत्याह—**कस्मादिति**।

---

१. 'ऋतपानं हि' इति पा.।

२. भवतः = वर्तमानस्य।

इति लिङ्गात्। तच्चेतनस्य क्षेत्रज्ञस्य संभवति, नाचेतनाया बुद्धेः। 'पिबन्तौ' इति च द्विवचनेन द्वयोः पानं दर्शयति श्रुतिः। अतो बुद्धिक्षेत्रज्ञपक्षस्तावन्न संभवति। अत एव क्षेत्रज्ञपरमात्मपक्षोऽपि न संभवति, चेतनेऽपि परमात्मनि ऋतपानासंभवात्। 'अनश्नन्नन्यो अभिचाकशीति' (मु.उ. ३।१।१) इति मन्त्रवर्णादिति।

अत्रोच्यते– नैष दोषः। 'छत्रिणो गच्छन्ती'त्येकेनापि छत्रिणा बहूनां छत्रित्वोपचारदर्शनात्। एवमेकेनापि पिबता द्वौ पिबन्तावुच्येते[1]। यद्वा[2] जीवस्तावत्पिबति, ईश्वरस्तु पाययति। पाययन्नपि पिबतीत्युच्यते। पाचयितर्यपि पक्तृत्वप्रसिद्धिदर्शनात्। बुद्धिक्षेत्रज्ञपरिग्रहोऽपि संभवति, करणे कर्तृत्वोपचारात्। 'एधांसि पचन्ती'ति प्रयोगदर्शनात्। न चाध्यात्माधिकारेऽन्यौ कौचिद् द्वावृतं पिबन्तौ

प्रकटार्थविवरणम्

संशयमाक्षिपति—**अत्राहेति**। मुख्यासंभवेऽप्येकस्यौपचारिकं भविष्यतीत्याह—**नैष दोष इति**। मुख्यसंभवे ह्युपचारकल्पना दोषः, न चेहान्यस्य मुख्यस्य संभव इत्याह—**न चाध्यात्मेति**। पूर्वाधिकरणे मृत्युसन्निधानादोदनशब्दो विनाश्ये वर्तत इत्युक्तम्।

भाष्यभावप्रकाशिका

संशयमाक्षिपति—**अत्राहेति**। असंभवं वक्तुमृतपानशब्दार्थमाह—**ऋतपानमिति**। अस्तु का क्षतिरिति, अत्राह—**पिबन्ताविति**। ननु अचेतनत्वात् तत्र पानानुपपत्ति; इह तु चेतनत्वादुपपन्नमिति, अत आह—**चेतन इति**।

पक्षद्वयं कथञ्चिदप्युपपादयितुं न शक्यमित्युच्यते, किं वा कथञ्चित् संभवेऽपि समीचीनं पक्षान्तरमस्तीति? न तावदाद्य इत्याह—**छत्रिण इति**। अस्तु वा मुख्यः, तथापि न दोष इत्याह—**यद्वेति**। ननु प्रधानकर्तरि व्यपदेशः कथं गुणकर्तरि संभवेदिति? तत्राह—**पाचयितर्यपीति**। यः कारयति, स करोत्येवेति न्यायादित्यर्थः। पक्षान्तरकल्पना तु नोपपद्यत इत्याह—**न चेति**। सूत्रभागं

न्यायनिर्णयः

पक्षयोरसंभावनां वक्तुमृतपानशब्दार्थमाह—**ऋतेति**। तत्कर्त्रोर्देहयोगदृष्टेरिति हेतुमाह—**सुकृतस्येति**। तथापि कथं पक्षयोरनुपपत्तिरित्याशङ्क्य पूर्वपक्षानुपपत्तिमाह—**तच्चेतनस्येति**। अस्तु जीवस्यैव चेतनत्वादृतपानम्, मा वाऽचेतनाया बुद्धेर्भूत्, तथापि का क्षतिः, तत्राह—**पिबन्ताविति**। जीवस्यैव पातृत्वं न बुद्धेरिति स्थिते फलितमाह—**अत इति**। द्वयोरुक्तं पानायोगं हेतूकृत्य सिद्धान्तयोगमाह—**अत एवेति**। बुद्धेरचैतन्यात् पानायोगेऽपि परस्य चैतन्यात् तद्योगमाशङ्क्याह—**चेतनेऽपीति**। संशयायोगादधिकरणाक्षेपमनूद्य परिहरति—**अत्रेति**। किं पक्षद्वयं कथंचिदपि नोपपद्यते, किंवा कथंचिद्योगेऽपि सम्यक्पक्षान्तरमस्ति? नाद्य इत्याह—**नैष इति**। सिद्धान्तोपपत्तिं विधान्तरेणाह—**यद्वेति**। तथापि कथं पिबन्ताविति द्विवचनम्, तत्राह—**पाययन्निति**। प्रधानकर्तरि प्रयोगो गुणकर्तरि कथमित्याशङ्क्याह—**पाचयितरीति**। यः कारयति स करोत्येवेति न्यायादित्यर्थः। पूर्वपक्षेऽपि द्विवचनोपपत्तिमाह—**बुद्धीति**। संभवति द्विवचनमिति शेषः। कर्तरि यो व्यपदेशः स कथं करणे स्यात्, तत्राह—**एधांसीति**।

---

१. 'उच्येयाताम्' इति पा.।

२. पिबच्छब्दः छत्रिन्यायेन पिबदपिबदुभयपर इत्युक्तम्। प्रकृतिप्रत्ययान्यतरलाक्षणिकत्वेनैवोपपत्तौ उभयलक्षणाया अयुक्तत्वमभिप्रेत्य यद्वेत्यादिभाष्यम्। तत्र बुद्धिजीवपक्षे शतृप्रत्ययेन कर्तृकरणसाधारणं कारकं लक्ष्यते। तेन भोगकर्तृजीवे, भोगसाधनबुद्धौ च पिबच्छब्दोपपत्तिः। जीवेश्वरपक्षे तु प्रत्ययेन कर्तृकारयितृसाधारणमनुकूलकृतिमत्त्वरूपकर्तृत्वं लक्ष्यते। तेन पातरि जीवे, पाययितरि ईश्वरे च तच्छब्दोपपत्तिरिति रत्नप्रभाद्याशयः। कल्पतरुकारास्तु—जीवेश्वरपक्षे प्रकृत्यैव पानं पायनं च लक्ष्यमिति भामत्याशयं विवृण्वन्ति।

विनैव लक्षणां भाष्यं, भामती च व्याख्यातुं शक्यते। 'तत्प्रयोजको हेतुश्च' इति चकारेण प्रयोजककर्तुरपि कर्तृसंज्ञालाभात्। करणे च कर्तृत्वविवक्षाया वैयाकरणैरपि 'कर्मवत् कर्मणा' इति सूत्रे उक्तत्वादिति परिमलकृतः।

ब्रह्मविद्याभरणकारास्तु-धातूनामनेकार्थत्वात् बुद्धेर्व्यापारो यदा धातुना विवक्ष्यते तदा तत्कर्तृत्वं बुद्धेर्मुख्यमेव संभवतीत्याहुः।

संभवतः। तस्माद् बुद्धिजीवौ स्यातां, जीवपरमात्मानौ वेति संशयः।

किं तावत्प्राप्तम्? बुद्धिक्षेत्रज्ञाविति। कुतः? 'गुहां प्रविष्टौ' इति विशेषणात्। यदि शरीरं गुहा, यदि वा हृदयम्, उभयथाऽपि बुद्धिक्षेत्रज्ञौ गुहां प्रविष्टावुपपद्येते। न च सति संभवे सर्वगतस्य ब्रह्मणो विशिष्टदेशत्वं युक्तं कल्पयितुम्। 'सुकृतस्य लोके' इति च कर्मगोचरानतिक्रमं दर्शयति। परमात्मा तु न सुकृतस्य वा दुष्कृतस्य वा गोचरे वर्तते, 'न कर्मणा वर्धते नो कनीयान्' (बृ.उ. ४।४।२३) इति श्रुतेः। 'छायातपौ' इति च चेतनाचेतनयोर्निर्देश उपपद्यते, छायातपवत् परस्परविलक्षणत्वात्। तस्माद् बुद्धिक्षेत्रज्ञाविहोच्येयातामित्येवं प्राप्ते ब्रूमः-

विज्ञानात्मपरमात्मानाविहोच्येयाताम्। कस्मात्? आत्मानौ हि तावुभावपि चेतनौ समानस्वभावौ। संख्याश्रवणे च समानस्वभावेष्वेव लोके प्रतीतिर्दृश्यते। 'अस्य गोर्द्वितीयोऽन्वेष्टव्य' इत्युक्ते गौरेव द्वितीयोऽन्विष्यते, नाश्वः पुरुषो वा। तदिह ऋतपानेन लिङ्गेन निश्चिते विज्ञानात्मनि द्वितीयान्वेषणायां

प्रकटार्थविवरणम्

एवमिहापि मुख्यगुहाप्रवेशसुकृतलोकवर्तनादिसन्निधानात् जीवस्य द्वितीय ऋतपाता बुद्ध्याख्य एवेत्याह—**किं तावदित्यादिना।**

सङ्ख्याश्रवणे लोके सजातीये प्रथमप्रतीतिदर्शनात्, बुद्धेश्च कारकत्वेन समानत्वेऽपि कारकत्वस्य बहिरङ्गत्वात्, चेतनत्वस्य स्वभावतयाऽन्तरङ्गत्वाच्चेतनः परमात्मैव द्वितीय इति तद्दर्शनादित्यस्यार्थमाह—**सङ्ख्याश्रवणे चेति।** प्रथमप्रतिपन्न-

भाष्यभावप्रकाशिका

पूर्वपक्षे योजयति—**गुहामिति।**

आत्मानाविति सूत्रपदं व्याचष्टे—**चेतनाविति।** न्यायप्रदर्शनाय विवक्षितार्थमाह—**समानेति।** हिशब्दो हेत्वर्थे। तद्दर्शनादित्येतद् व्याचष्टे—**सङ्ख्येति।** एकस्य चेतनत्वे सिद्धे द्वितीयस्यापि चेतनत्वं सिध्येत्, तदेवासिद्धमित्याशङ्क्याह—**तदिहेति।** संप्रतिपन्नजातिमुपजीव्य विशेषान्तरपरिग्रहे बुद्धिलाघवात्, विजातीयेषु बुद्धिद्वयापेक्षाप्रसङ्गात् परमात्मैव जीवद्वितीयः प्रत्येतव्य इत्याह—**समानेति।** ननु कारकत्वेन बुद्धेरपि जीवसाम्यमस्तीति, तन्नैवम्; तस्य बहिरङ्गत्वाच्चेतनत्वस्य

न्यायनिर्णयः

कथंचिदुपपत्तिं पक्षयोरुक्त्वा द्वितीयं निराह—**न चेति।** पक्षद्वयं संभाव्याधिकरणारम्भमुपसंहरति—**तस्मादिति।**

ब्रह्मक्षत्रशब्दस्य संनिहितमृत्युपदादनित्यवस्तुपरत्ववदिहापि पिबच्छब्दस्य संनिहितगुहाप्रवेशादिना बुद्धिक्षेत्रज्ञपरतेति विमृश्य पूर्वपक्षयति—**किं तावदिति।** ऋतमिति श्रुतेर्निर्विशेषे ब्रह्मण्यन्वयोक्तेः श्रुत्यादिसंगतयः। परस्यापि प्रकृतत्वाज्जीवाद् द्वितीयत्वं किं न स्यादित्याह—**कुत इति।** सूत्रावयवेनोत्तरम्—**गुहामिति।** हेतुमेव स्फुटयति—**यदीति।** जीवाद् द्वितीयं ब्रह्मैव गुहां प्रविष्टं 'यो वेद निहितं गुहायाम्' इति श्रुतेरित्याशङ्क्याह—**न चेति।** इतश्च न ब्रह्म गुहां प्रविष्टमित्याह—**सुकृतस्येति।** ब्रह्मणोऽपि सुकृतलोकवर्तित्वमाशङ्क्याह—**परमात्मेति।** पूर्वपक्षे हेत्वन्तरमाह—**छायेति।** बुद्धेर्द्वितीयजीवज्ञानार्थं वाक्यमित्युपसंहरति—**तस्मादिति।** सिद्धान्तसूत्रमादायात्मानाविति प्रतिज्ञां व्याकरोति—**एवमिति।** इहेति प्रकृतमन्त्रोक्तिः। पूर्णतया प्रवेशानर्हं ब्रह्म कुतो द्वितीयं जीवस्येत्याह—**कस्मादिति।** हीत्युक्तं हेतुमाह—**आत्मानौ हीति।** चेतनत्वेन समन्वयाज्जीवे पातरि सिद्धे द्वितीयत्वेन परस्यादानं युक्तमित्यर्थः। तत्र किं नियामकमित्याशङ्क्य तद्दर्शनादिति व्याचष्टे—**संख्येति।** लौकिकीं दृष्टिमेव दृष्टान्तेनाह—**अस्येति।** एकस्य चेतनत्वे द्वितीयस्यापि तद्धीः, तदेवासिद्धमित्याशङ्क्याह—**तदिति।** तत् तत्रेत्थं लौकिककदर्शने सतीति यावत्। इहेति वाक्योक्तिः। संप्रतिपन्नां जातिमुपजीव्य निर्वि[वि]शेषान्तरग्रहे बुद्धिलाघवाद् विजातीयग्रहे

समानस्वभावश्चेतनः परमात्मैव प्रतीयते।

ननूक्तं गुहाहितत्वदर्शनान्न परमात्मा प्रत्येतव्य इति। गुहाहितत्वदर्शनादेव परमात्मा प्रत्येतव्य इति वदामः। गुहाहितत्वं तु श्रुतिस्मृतिष्वसकृत् परमात्मन एव दृश्यते-'गुहाहितं गह्वरेष्ठं पुराणम्' (क.उ. १।२।१२) 'यो वेद निहितं गुहायां परमे व्योमन्' (तै.उ. २।१) 'आत्मानमन्विच्छ गुहां प्रविष्टम्' इत्याद्यासु। सर्वगतस्यापि ब्रह्मण उपलब्ध्यर्थो देशविशेषोपदेशो न विरुध्यत इत्येतदप्युक्तमेव। सुकृतलोकवर्तित्वं तु छत्रित्ववदेकस्मिन्नपि वर्तमानमुभयोरविरुद्धम्। छायातपावित्यप्यविरुद्धम्, छायातपवत् परस्परविलक्षणत्वात् संसारित्वासंसारित्वयोः। अविद्याकृतत्वात्संसारित्वस्य, पारमार्थिकत्वाच्चासंसारित्वस्य। तस्माद् विज्ञानात्मपरमात्मानौ गुहां प्रविष्टौ गृह्येते।।११।।

कुतश्च विज्ञानात्मपरमात्मानौ गृह्येते?

विशेषणाच्च।।१२।।

प्रकटार्थविवरणम्

चेतनत्वानुरोधेन चरमप्रतिपन्नं गुहाहितत्वं नेतव्यमित्यभिप्रेत्याह—**गुहाहितत्वदर्शनादेवेति**। गुहायां बुद्धौ, आहितं निक्षिप्तम्; गह्वरे हृदये स्थितम्; पुराणं चिरन्तनम्; परमे व्योमनि हृदयाधारभूताकाशे। सुकृतलोकवर्तित्वं स्वकर्मोपार्जितशरीरे वृत्तिलाभः। यदुक्तं जडाजडप्रकाशत्वेन बुद्धिजीवयोश्छायातपत्वमिति, तत्राह—**छायेति**।

विशेषणाच्च। किं च वाक्यशेषे गन्तव्येन ब्रह्मणा जीवो विशेषितो न बुद्ध्या। अतोऽपि पूर्वं बुद्धिजीवौ नोक्तावित्याह—**विशेषणाच्चेति**। अध्वनः संसारमार्गस्य पारं संसारधर्मास्पृष्टमित्यर्थः। किं च पूर्वतनवाक्यपर्यालोचनयाऽपि जीवेश्वरावेव

भाष्यभावप्रकाशिका

स्वभाववतयाऽन्तरङ्गत्वादित्याह—**चेतन इति**।

ननु बहिरङ्गत्वेऽपि तदेवाभ्युपगन्तुं युक्तम्, गुहाहितत्वलिङ्गादिति शङ्कते—**ननु उक्तमिति**। उत्तरत्वेन तद्दर्शनादिति सूत्रपदं योजयति—**गुहेति**। यदुक्तं विशिष्टदेशत्वमयुक्तमिति, अत्राह—**सर्वेति**।।११।।

न्यायनिर्णयः

तद्गौरवात् परमात्मैव द्वितीयो जीवस्येति सूचयति—**समानेति**। कारकत्वेन बुद्धेरपि जीवसाम्यमाशङ्क्य तस्य बहिरङ्गत्वाच्चेतनस्य स्वभावत्वेनान्तरङ्गत्वान्नैवमित्याह—**चेतन इति**। बहिरङ्गमपि कारकत्वमेव ग्राह्यं, गुहाहितत्वलिवदिति शङ्कते—**नन्विति**। तत्रापि तद्दर्शनादित्युत्तरमाह—**गुहेति**। तदेव स्फुटयति—**गुहेत्यादिना**। परस्मिन् गुहाहितत्वोक्तेस्तात्पर्यं वक्तुमसकृदित्युक्तम्। गुहायां बुद्धावाहितं निक्षिप्तं गह्वरे बहुविधानर्थसंकटे देहे स्थितं पुराणं चिरंतनं परं विदित्वा हर्षादि जहातीति संबन्धः। परमे बाह्याकाशापेक्षया प्रकृष्टे व्योमन्यन्तःकरणावच्छिन्ने भूताकाशे निहितं परं यो वेद सोऽश्नुते सर्वान् कामानिति संबन्धः। अन्विच्छ विचार्य निर्धारयेत्यर्थः। प्रवेशवाक्यसंग्रहार्थमादिपदम्। यत्तु सर्वगतस्य ब्रह्मणो न विशिष्टदेशतेति, तत्राह—**सर्वेति**। यत्तु परस्य न सुकृतलोकवर्तितेति, तत्राह—**सुकृतेति**। यदपि छायातपाविति चेतनाचेतनोक्तिरिति, तत्राह—**छायेति**। तद्वैलक्षण्ये तद्वतोरपि तत्सिद्धिरिति हेतुं साधयति—**अविद्येति**। प्रथमश्रुतचेतनत्ववशाच्चरमश्रुतं गुहाप्रवेशादि नेयमित्युपसंहरति—**तस्मादिति**।।११।।

धर्मविशिष्टतया विलक्षणग्रहे बुद्धिरेव स्वतो विलक्षणा ग्राह्येति मन्वानो हेत्वन्तरं पृच्छति—**कुतश्चेति**।

विशेषणं च विज्ञानात्मपरमात्मनोरेव भवति। 'आत्मानं रथिनं विद्धि शरीरं रथमेव तु' (क.उ. १।३।३) इत्यादिना परेण ग्रन्थेन रथिरथादिरूपककल्पनया विज्ञानात्मानं रथिनं संसारमोक्षयोर्गन्तारं कल्पयति, 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' (क.उ. १।३।९) इति च परमात्मानं गन्तव्यम्। तथा- 'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति' (क.उ. १।२।१२) इति पूर्वस्मिन्नपि ग्रन्थे मन्तृमन्तव्यत्वेनैतावेव विशेषितौ। प्रकरणं चेदं परमात्मनः। 'ब्रह्मविदो वदन्ति' इति च वक्तृविशेषोपादानं परमात्मपरिग्रहे घटते। तस्मादिह जीवपरमात्मानावुच्येयाताम्।

एष एव न्यायः 'द्वा सुपर्णा सयुजा सखाया' (मु.उ. ३।१।१) इत्येवमादिष्वपि। तत्रापि

प्रकटार्थविवरणम्

ऋतपावुक्तावित्याह—**तथा तमिति**। दुर्दर्शं सूक्ष्मत्वात् दुर्ज्ञानम्; तत एव गूढमनुप्रविष्टं गहनतां गतम्; अध्यात्मयोगः प्रत्यगात्मविषयश्चित्तनिरोधः, तत्सहकृताद् वाक्यादधिगमो ब्रह्मात्मैक्यव्यञ्जिका चित्तवृत्तिः। चकारसूचितमाह—**प्रकरणं चेदमित्यादिना**।

"ऋतं पिबन्तौ" इत्यत्र जीवानुवादेन ततोऽतिरिक्तः परमात्मा प्रतिपाद्यते वाक्यार्थान्वयितत्पदार्थपरिशोधना-येत्यधिकरणार्थमुपसंहृत्य तमेवान्यत्रातिदिशति—**एष एव न्याय इति**। द्वा द्वौ, छान्दसो द्विवचनस्याकारः; सुपर्णाविव सहैव युज्येते नियम्यनियामकभावेनेति सयुजौ; सखायौ चेतनत्वेन समानस्वभावौ। नियम्यत्वेन समानं तुल्यं वृक्षं परिषस्वजाते आश्रितौ।

भाष्यभावप्रकाशिका

विशेषणाच्च।।१२।। प्रकरणं चेदमिति। ननु जीवस्यापीदं प्रकरणम्, तस्यापि पृष्टत्वात् इति, नैवम्, ब्रह्मभावेन तस्यापि प्रतिपाद्यमानत्वाद् ब्रह्मप्रकरणमेवेति भावः।

न्यायनिर्णयः

परमात्मासाधारणलिङ्गपरं सूत्रं व्याचष्टे—**विशेषणं चेति**। न बुद्धिजीवयोरित्येवकारार्थः। जीवविशेषणं विशदयति—**संसारेति**। परस्य विशेषणमाह—**स इति**। जीवः सर्वनामार्थः। अध्वनः संसारमार्गस्य। पारमेव विशिनष्टि—**तदिति**। व्यापनशीलस्य ब्रह्मणः स्वरूपं तदित्यर्थः। परमं कार्यकारणातीतं पदं तदेव ज्ञेयं नान्यदित्यर्थः। किंचोत्तरवाक्यवत् पूर्वमपि जीवेश्वरयोरेव विशेषणादृतपानवाक्ये जीवद्वितीयत्वमीशस्यैवेत्याह—**तथेति**। दुर्दर्शं सूक्ष्मत्वाद्दुर्ज्ञानम् तत एव गूढमनुप्रविष्टं गहनतां गतमीश्वरम्, अध्यात्मयोगः प्रत्यगात्मन्येव चित्तसमाधानं तत्सहकृताद्वाक्यादधिगमो ब्रह्मात्मैक्यव्यञ्जकचित्तवृत्ति-विशेषस्तेनाहमेवेति निश्चित्य धीरो विद्वान् हर्षाद्युपलक्षितं संसारं त्यजतीत्यर्थः। चकारसूचितमर्थमाह—**प्रकरणं चेति**। न च पृष्टत्वाविशेषाज्जीवस्यापीदं प्रकरणं, तस्य ब्रह्मत्वेन प्रतिपाद्यत्वादविरोधादिति भावः। जीवद्वितीयत्वं परस्यैवेत्यत्र हेत्वन्तरमाह—**ब्रह्मेति**। ब्रह्मपक्षे हेतुबाहुल्यात् 'ऋतं पिबन्तौ' इत्यत्र जीवानुवादेन तदतिरिक्तो वाक्यार्थान्वयितदर्थशोधनाय परात्मा प्रतिपाद्यत इत्युपसंहरति—**तस्मादिति**।

उक्तन्यायमन्यत्र संचारयति—**एष इति**। 'द्वा सुपर्णा' इत्यादौ सर्वत्र द्विवचनस्याऽऽकारश्छान्दसः। द्वौ सुपर्णाविव सहैव युज्येते नियम्यनियामकत्वेनेति सयुजौ, सखायौ चेतनत्वेन समानस्वभावौ, समानं नियम्यत्वेन तुल्यं वृक्षं छेदनयोग्यं शरीरं, परिषस्वजाते समाश्रितावित्यर्थः। पक्षिणौ कौचिदत्र प्रतीयेते, न जीवेशौ, ततो नेदमुदाहरणम्, तत्राह—**तत्रेति**। तदनेन 'गुहां

ह्यध्यात्माधिकारान्न प्राकृतौ सुपर्णावुच्येते। 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इत्यदनलिङ्गाद्विज्ञानात्मा भवति। 'अनश्नन्नन्यो अभिचाकशीति' इत्यनशनचेतनत्वाभ्यां परमात्मा। अनन्तरे च मन्त्रे तावेव द्रष्टृद्रष्टव्यभावेन विशिनष्टि–'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' (मु.उ. ३।१।२) इति।

अपर आह–'द्वा सुपर्णा' इति नेयमृगस्याधिकरणस्य सिद्धान्तं भजते, पैङ्गिरहस्यब्राह्मणेनान्यथा व्याख्यातत्वात्। 'तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वमनश्नन्नन्योऽभिचाकशीतीत्यनश्नन्नन्योऽभिपश्यति ज्ञस्तावेतौ सत्त्वक्षेत्रज्ञौ' इति। सत्त्वशब्दो जीवः, क्षेत्रज्ञशब्दः परमात्मेति यदुच्यते, तन्न,

प्रकटार्थविवरणम्

ननु नेयमृगत्रोदाहरणीया, यतः सुपर्णौ कौचित् पक्षिणौ प्रतीयेते इत्याशङ्क्याह—**तत्रापीति**। आद्यसूत्रं योजयति—**तयोरन्य इति**। उभयलिङ्गदर्शनाद् देहं समाश्रितौ सुपर्णौ जीवपरमात्मानावित्यर्थः। "विशेषणाच्च" इति द्वितीयसूत्रं योजयति—**अनन्तरे चेति**। अनीशया अविद्यया स्वोपाधिभूतया मुह्यमानः तत्त्वमजानन् शोचति। विपरीतं संसारमनुभवतीत्यर्थः। जुष्टं ध्यानादिना सेवितं यदा पश्यत्यन्यं बिम्बभूतमीशं तत्पदलक्ष्यम्, तदाऽस्यात्मत्वेन दृष्टस्य महिमानं स्वरूपभूतम् एति[१] प्राप्नोति। वीतशोको विगतसंसारो भवति, आगामिसकलसंसारकारणस्याविद्यादेः ज्ञानेन दग्धत्वादित्यर्थः।

"द्वा सुपर्णा" इतीयमृक् मुण्डके परप्रकरणे पठिता; लिङ्गं च तत्रास्ति; अतो जीवानुवादेन तत्पदार्थं समर्पयतीत्युदाहृता अस्मिन्नधिकरणे न्यायसाम्यात्; न पैङ्गिरहस्यानुसारेण तूदाहर्तव्या, अस्य न्यायस्याविषयत्वादित्याह—**अपर आहेत्यादिना**।

भाष्यभावप्रकाशिका

उक्तन्यायं कृत्वाचिन्तयोदाहरणान्तरेऽतिदिशति—**एष इति**। अत्रापि गुहां प्रविष्टाविति सूत्रभागं योजयति—**अध्यात्मेति**। आत्मानाविति पदं व्याचष्टे—**तयोरित्यादिना**। अस्मिन् पक्षे **तद्दर्शनादिति** तल्लिङ्गदर्शनादित्यर्थः। विशेषणादिति सूत्रं व्याचष्टे—**अनन्तरेति**। ननु अत्र पूर्वपक्षो नोपपद्यते; वाक्यशेषानुपपत्तेः; तथाहि—अनश्नन्नित्यत्र जीवपरिग्रहेऽनशनमनुपपन्नं, बुद्धिपरिग्रहेऽभिचाकशीतीति, नैवम्, करणे कर्तृत्वोपचारादभिचाकशीतीति बुद्धावप्युपपत्तेः, जीवपरिग्रहे च चैतन्यमात्राभिप्रायेणानशनसंभवादिति भावः। न हि मुख्ये कर्तृत्वे संभवति करणे कर्तृत्वोपचारो युक्त इति सिद्धान्तहृदयम्।

इदानीं कृत्वाचिन्तामुद्घाटयति—**अपर आहेति**। सत्त्वम् बुद्धिः। शङ्कते सिद्धान्ती—**सत्त्वशब्द इति**। सिद्धान्तार्थं

न्यायनिर्णयः

प्रविष्टौ' इति व्याख्यातम्। 'आत्मानौ हि'ति व्याचष्टे—**तयोरिति**। 'तद्दर्शनादि'त्युभयोर्लिङ्गदर्शनादिति व्याख्येयम्। 'विशेषणाच्चे'ति व्याकरोति—**अनन्तरे चेति**। आत्मेश्वरयोस्तुल्यो वृक्षो देहः, तस्मिञ्जीवो मनुष्योऽहमित्यभिनिवेशवाननीशयाऽविद्यया मुह्यमानस्तत्त्वमजानन्ननिशं शोचति संसारमनुभवति। जुष्टं ध्यानादिना सेवितं यदा तत्प्रकर्षदशायामन्यं बिम्बभूतमीशशब्दलक्ष्यं प्रत्यक्त्वेन पश्यति तदाऽस्यैवात्मत्वेन दृष्टस्य महिमानं स्वरूपं प्राप्नोति। ततश्च वीतशोको विगतसंसारो भवति, तत्र हेतुरितिशब्देनोक्तः, बन्धहेत्वविद्यादेर्ज्ञानाग्निना दग्धत्वादित्यर्थः। न चात्र जीवोक्तौ 'अनश्नन्' इत्ययोगाद् बुद्धिग्रहे च 'अभिचाकशीति' इत्यसंभवात् पूर्वपक्षासिद्धिः, करणे कर्तृत्वोपचारादभिचाकशीतीति बुद्धावपि सिद्धत्वात्, जीवे चैतन्यमात्रादनशनसंभवात्। मुख्ये कर्तृत्वे संभवति कर्तृत्वोपचारो नेति सिद्धान्ताभिप्रायः।

कृत्वाचिन्तया 'द्वा सुपर्णा' इत्यादेरेतदधिकरणोदाहरणत्वमुक्त्वा कृत्वाचिन्तामुद्घाटयति—**अपर इति**। अन्यथा सिद्धान्ताननुगुणत्वेनेति यावत्। सत्त्वमिति बुद्धिरुक्ता। सिद्धान्तार्थं व्याचष्टे ब्राह्मणमिति शङ्कते—**सत्त्वेति**। प्रसिद्ध्या प्रत्याह—

१. 'अस्य महिमानमिति वीतशोकः' इत्यत्र 'इति' इत्येतत् क्रियापदम्। एतीति प्राप्ते गुणाभावश्छान्दस इति भावः।

सत्त्वक्षेत्रज्ञशब्दयोरन्तःकरणशारीरपरतया प्रसिद्धत्वात्। तत्रैव च व्याख्याततत्वात्– 'तदेतत् सत्त्वं येन स्वप्नं पश्यति, अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्त्वक्षेत्रज्ञौ' इति। नाप्यस्याधिकरणस्य पूर्वपक्षं भजते। न ह्यत्र शारीरः क्षेत्रज्ञः कर्तृत्वभोक्तृत्वादिना संसारधर्मेणोपेतो विवक्ष्यते। कथं तर्हि? सर्वसंसारधर्मातीतो ब्रह्मस्वभावश्चैतन्यमात्रस्वरूपः, 'अनश्नन्नन्योऽभिचाकशीतीत्यनश्नन्नन्योऽभिपश्यति ज्ञः' इति वचनात्। 'तत्त्वमसि' 'क्षेत्रज्ञं चापि मां विद्धि' (भ.गी. १३।२) इत्यादिश्रुतिस्मृतिभ्यश्च। तावता च विद्योपसंहारदर्शनमेवमेवावकल्पते, 'तावेतौ सत्त्वक्षेत्रज्ञौ न ह वा एवंविदि किंचन रज आध्वंसते' इत्यादि।

कथं पुनरस्मिन् पक्षे 'तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वम्' इत्यचेतने सत्त्वे भोक्तृत्ववचनमिति। उच्यते– नेयं श्रुतिरचेतनस्य सत्त्वस्य भोक्तृत्वं वक्ष्यामीति प्रवृत्ता। किं तर्हि? चेतनस्य क्षेत्रज्ञस्याभोक्तृत्वं

प्रकटार्थविवरणम्

तावेतौ सत्त्वक्षेत्रज्ञौ सुपर्णपदोक्ताविति। ब्राह्मणमप्येतदधिकरणानुसारेण व्याख्यायतामित्याह—**सत्त्वशब्दो जीव इति।** "सत्त्वात्संजायते ज्ञानम्" "क्षेत्रज्ञं चापि मां विद्धि" इत्यादौ बुद्धिजीवयोः प्रसिद्धत्वात्, ब्राह्मणविरोधाच्च नान्यथा व्याख्यातुं शक्यमित्याह—**तन्नेति।** ननु पूर्वपक्षोपयोगितया तर्ह्युदाह्रियतामित्याशङ्क्याह—**नाप्यस्येति।** अनश्नन् भोक्तृत्वाभिमानरहितः अन्यो लक्ष्यत्वम्पदार्थज्ञानात् बुद्ध्यादिभ्यो व्युत्थितस्सन्नभिपश्यति ब्रह्म ज्ञो विवेकीत्ययमर्थोऽत्र प्रतीयते; अतो न पूर्वपक्षेऽप्युपयुज्यत इत्यर्थः। न चायं वाक्यार्थोऽसंभाव्यः; सर्वत्र श्रुतिस्मृतिभ्यः प्रसिद्धत्वादित्याह—**तत्त्वमसीति।** इतश्च जीवस्य ब्रह्मात्मतादर्शनं विवक्षितमित्याह—**तावता चेति।** तत्र व्याख्यानमात्रेण विद्योपसंहारदर्शनं जीवस्य ब्रह्मात्मतोपदेश एव घटते, न सत्त्वक्षेत्रज्ञविवेकमात्रेण, भेदज्ञानस्य मिथ्याज्ञानत्वादिति भावः। अविद्यानिवृत्तिफलोपदेशोऽपि न ब्रह्मात्मताज्ञानं विनोपपद्यत इत्याह—**न ह वा एवंविदीति।** जीवस्य ब्रह्मात्मतोपदेशपरमिदं वाक्यम्। अस्मिन् पक्षे कथमन्तःकरणे भोक्तृत्वाभिधानमुपपद्यते, 'नासाक्षिका सत्त्ववृत्तिः जानातिनाऽभिधीयत' इति ईक्षत्यधिकरणे प्रतिपादनात्। भोक्तृत्वं नामोपलब्धृत्वम्, नाचेतने घटत इत्याह—**कथं पुनरिति।** बुद्धेर्भोक्तृत्वप्रतिपादने तात्पर्याभावान्न तत्रोपपत्त्यन्वेषणे मनः खेदनीयमित्याह—**उच्यत इत्यादिना।**

भाष्यभावप्रकाशिका

ब्राह्मणवाक्यं व्याचष्ट इत्यर्थः। निराकरोति—**तन्नेति।** न केवलं प्रसिद्धत्वादित्याह—**तत्रैव चेति।** येनेति करणमुपदिश्यते, कर्ता तु शारीरः उपद्रष्टेत्यर्थः। अस्तु तर्ह्यस्याधिकरणस्य पूर्वपक्ष एवात्र मन्त्रब्राह्मणार्थः, वचनविरोधे न्यायस्याभासत्वादिति, अत आह—**नाप्यस्येति।** द्वितीयस्य ब्रह्मरूपेणैव प्रतिपादनात्, जीवत्वेन पर्यवसानाभावादित्यर्थः। अन्यत्राप्येवं प्रतिपादनमस्तीत्याह—**तत्त्वमसीति। एवमेवेति।** वाक्यस्य फलवत्परमात्मविज्ञानपरत्व एवेत्यर्थः।

न्यायनिर्णयः

तन्नेति। ब्राह्मणविरोधाच्च न तदन्यथा व्याख्येयमित्याह—**तत्रैवेति।** प्रकृतं ब्राह्मणं सप्तम्यर्थः। सत्त्वव्याख्यानानन्तर्यमथशब्दार्थः। सत्त्वस्य करणत्वात् क्षेत्रज्ञस्य कर्तृत्वान्न तयोरैक्यमित्यर्थः। तावेतौ करणत्वेन कर्तृत्वेन च भिन्नावित्यर्थः। सिद्धान्ताभजनेऽपि पूर्वपक्षमृगेषा भजेतेत्याशङ्क्याह—**नापीति।** द्वितीयस्य ब्रह्मरूपेणैव प्रतिपादनादिति हेतुमाह—**न हीति।** अत्रेति मन्त्रब्राह्मणोक्तिः। न चायं वाक्यार्थो न युक्तः, श्रुतिस्मृतिसिद्धत्वादित्याह—**तत्त्वमिति।** इतश्च जीवस्य ब्रह्मत्वदृष्टिरत्रेष्टेत्याह—**तावतेति।** मन्त्रव्याख्यामात्रेण विद्योपसंहारदर्शनं जीवस्य ब्रह्मत्वोपदेशे घटते, न सत्त्वक्षेत्रज्ञविवेकमात्रेण, भेदधियो मिथ्याधीत्वादित्यर्थः। अविद्याध्वस्तिफलोक्तिरपि ब्रह्मात्मताज्ञानमिह गमयतीत्याह—**न हेति।**

जीवस्य ब्रह्मत्वोक्तिपरमिदं वाक्यमित्यत्र शङ्कते—**कथमिति।** बुद्धेर्भोक्तृत्वोक्तावतात्पर्यान्न तत्रोपपत्तिरन्वेष्येत्याह—**उच्यत**

ब्रह्मस्वभावतां च वक्ष्यामीति। तदर्थं सुखादिविक्रियावति सत्त्वे भोक्तृत्वमध्यारोपयति। इदं हि कर्तृत्वं भोक्तृत्वं च सत्त्वक्षेत्रज्ञयोरितरेतरस्वभावाविवेककृतं कल्प्यते। परमार्थतस्तु नान्यतरस्यापि संभवति; अचेतनत्वात् सत्त्वस्य; अविक्रियत्वाच्च क्षेत्रज्ञस्य। अविद्याप्रत्युपस्थापितस्वभावत्वाच्च सत्त्वस्य सुतरां न संभवति। तथा च श्रुतिः–'यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येत्' (बृ.उ. ४।३।३१) इत्यादिना स्वप्नदृष्टहस्त्यादिव्यवहारवदविद्याविषय एव कर्तृत्वादिव्यवहारं दर्शयति। 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' (बृ.उ. ४।५।१५) इत्यादिना च विवेकिनः कर्तृत्वादिव्यवहाराभावं दर्शयति[१]।।१३।।

।।इति तृतीयं गुहाधिकरणम्।।

प्रकटार्थविवरण्

जीवस्य ब्रह्मात्मतां वक्ष्यामीति प्रवृत्ता श्रुतिर्भोक्तृत्वादिप्रत्ययविरोधमाशङ्क्य तदपनीयोपाधिमस्तके निक्षिपतीति भावः। ननु जीवस्य तत्त्वतोऽभोक्तृत्वे कथं दृश्यमानं भोक्तृत्वं संगच्छत इत्याशङ्क्याह—**इदं हीति**। बुद्धिक्षेत्रज्ञयोरितरेतरतादात्म्याध्यासात् बुद्धिपरिणामे सुखे प्रतिबिम्बितं जीवचैतन्यं प्रकाशाभासोदयहेतुर्भवति। तदेतत् सुखोपलब्धृत्वं भोक्तृत्वमित्यर्थः। मिथ्याभोक्तृत्वे प्रमाणमाह—**तथा च श्रुतिरिति**। यत्र यस्यामविद्यावस्थायाम्; वै निश्चितमेतत्; अविद्याप्रतिबिम्बितचैतन्यं ब्रह्मणोऽन्यदिव मिथ्यैव भिन्नं स्यात् तत्राविद्याकृतान्तःकरणादिसंबन्धात् अन्योऽन्यत्पश्येत् इत्यादिर्व्यवहारः प्रवर्तत इत्यर्थः। यत्र तु विद्यावस्थायाम् अस्य विदुषः सर्वं परपूर्णं बिम्बस्थानीयं ब्रह्मात्मैवाभूत् अविद्याक्षये भेदभ्रमो व्यावृत्तः, तत् प्रारब्धकर्मदोषात् कार्यकारणसंघाते व्याप्रियमाणेऽपि स्वगतव्यापारानभिमानात् केन कं पश्येदित्यर्थः। तस्माज्जीवगतभोक्तृत्वस्य मिथ्यात्वात् तदपोहेन जीवस्य ब्रह्मतामुपदिशति पैङ्गिब्राह्मणंमिति तदभिप्रायेण नेयमृगत्रोदाहरणीयेति सूत्रकारः "गुहां प्रविष्टौ" इत्युदाहरणं जग्राह। इति गुहाप्रविष्टाधिकरणम्।

भाष्यभावप्रकाशिका

चिच्छायापन्ना बुद्धिःसुखाद्याकारेण परिणमते। तत्र पुरुषोऽपि भुङ्क्त इव, न तत्त्वत इत्यभिप्रेत्य बुद्धावारोपयतीत्याह—**तदर्थमिति**। कुत्र स्थितं भोक्तृत्वमध्यारोपयतीत्यत आह—**इदं हीति**। दण्डस्याप्सु वक्रतावद्भोक्तृत्वमित्यर्थः। उक्तेऽर्थे प्रमाणमाह—**तथा चेति**। कर्तृत्वादेर्मायामयत्वं दर्शयतीत्यर्थः।।१२।। इति तृतीयं गुहाधिकरणम्।

न्यायनिर्णयः

इति। क्व तर्हि श्रुतेस्तात्पर्यं, तत्राह—**किं तर्हीति**। इतिपदं प्रवृत्तेति पूर्वेण संबध्यते। का तर्हि बुद्धेर्भोक्तृत्वधियो गतिः, तत्राह—**तदर्थमिति**। जीवस्य ब्रह्मत्वसिद्ध्यर्थमिति यावत्। चैतन्यच्छायापन्ना धीः सुखादिना परिणमते, तत्र पुरुषोऽपि भोक्तृत्वमिवानुभवति, न तत्त्वत इति वक्तुमध्यारोपयतीत्युक्तम्। कुतस्त्यं भोक्तृत्वं बुद्धावारोप्यते तत्राह—**इदं हीति**। न हि भ्रान्तेरभ्रान्तिपूर्वकत्वं दण्डस्याप्सु वक्रतावदित्युक्तम्—**परमार्थतस्त्विति**। सत्त्वस्य वस्तुतो भोक्तृत्वाभावे हेत्वन्तरम्—**अविद्येति**। मिथ्याभोक्तृत्वे मानमाह—**तथा चेति**। यत्र यस्यामविद्यावस्थायाम्। वैशब्दो निश्चयार्थः। अन्यदिवाभासभूतं नानात्वं दृष्टं स्यात्, तत्र आविद्यकबुद्ध्यादिसंबन्धादन्यो भूत्वाऽन्यच्चक्षुषा पश्येदन्यच्च श्रोत्रेण शृणुयादित्यर्थः। उक्तवाक्यतात्पर्यमाह—**स्वप्नेति**। वस्तुतो भोक्तृत्वाभावे श्रुतिमाह—**यत्र त्विति**। यस्यां विद्यावस्थायामस्य विदुषः सर्वं पूर्णं ब्रह्मैवाभूत् तत्राविद्याक्षये भेदभ्रमाभावादारब्धकर्मणा कार्यकरणव्यापारेऽपि स्वगतव्यापारानभिमानात् केन करणेन कं विषयं कः कर्ता पश्येदित्याक्षेपः। अनेनापि वाक्येन श्रुत्युक्तमर्थमाह—**विवेकिन इति**। एवं जीवस्य भोक्तृत्वादेर्मिथ्यात्वात् तदपोहेन तस्य ब्रह्मतामाह पैङ्गिब्राह्मणमिति पूर्वोत्तरपक्षाननुगुणत्वादनुदाहरणत्वेऽपि कृत्वाचिन्तया 'द्वा सुपर्णा' इत्यादीहोदाहृतम्। तच्चाप्रपञ्चे प्रत्यग्ब्रह्मण्यन्वितम्। 'ऋतं पिबन्तौ' इति तु जीवद्वितीये परस्मिन्निति स्थितम्।।१२।। इति तृतीयं गुहाधिकरणम्।

---

१. 'व्यवहारं वारयति' इति पा।

४।।अन्तराधिकरणम्।।सू.१३-१७।।

अन्तर उपपत्तेः।।१३।।

'य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति तद् यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति' (छा.उ. ४।१५।१) इत्यादि श्रूयते। तत्र संशयः- किमयं प्रतिबिम्बात्माऽक्ष्यधिकरणो निर्दिश्यतेऽथवा विज्ञानात्मोत देवतात्मेन्द्रियस्याधिष्ठाताऽथवेश्वर इति। किं

शारीरकन्यायसंग्रहः

अन्तर उपपत्तेः।।१३।। स्थानादिव्यपदेशाच्च।।१४।। "एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्म" इति वाक्यमितिशब्दशिरस्कत्वात् "मनो ब्रह्म" इत्यादिवाक्यवत् अविवक्षितार्थमित्यङ्गीकृत्य न्यायः प्रदर्श्यते। वाक्योपक्रमगतादपि एकस्माल्लिङ्गाद् वाक्यशेषगतानि बहूनि लिङ्गानि बलवन्ति प्रत्ययसंवादस्य तात्पर्यनिमित्तत्वात्—इति न्यायेन वामनीत्वादिलिङ्गानुसारेण छायात्मलिङ्गमुन्नीतम्।

अथ वा इतिशब्दोऽपि क्वचिदर्थविवक्षां वाक्यस्य बाधित्वा प्रत्ययपरो भवति यत्र प्रत्ययो विवक्ष्यते "मनो ब्रह्म" इत्यादौ; क्वचिदर्थपरो भवत्युक्तार्थावच्छेदेन वचनसंबन्धे यथा 'इति ह स्मोपाध्यायः कथयति' इति। अत्र पुनः 'इति होवाच' इति वचनसंबन्धात् उक्तार्थावच्छेदेनार्थपरत्वमेव सिध्यतीति श्रुतिलिङ्गाभ्यां केवलस्य छायात्मलिङ्गस्य बाधो दर्शितः।।

सुखविशिष्टाभिधानादेव च।।१५।। श्रुतोपनिषत्कगत्यभिधानाच्च।।१६।। अनवस्थितेरसंभवाच्च नेतरः।।१७।। अत्र "य एषोऽक्षिणि" इति यच्छब्दस्य लिङ्गोपस्थापितच्छायात्माऽभिधेयः, किं वा प्रकरणोपस्थापितं ब्रह्म इति विशये यद्यपि लिङ्गोपस्थापितं बलीयः, तथापि गत्यभिधानपरिशेषात् पूर्वस्योत्तरेणैकवाक्यताकाङ्क्षायां सत्यां साकाङ्क्षं प्रकरणमेव बलवत् एकवाक्यत्वविच्छेदकाल्लिङ्गात् संभवत्येकवाक्यत्वे—इति न्यायेन प्रकृतं ब्रह्म यच्छब्दाभिधेयतया समर्थितम्।

प्रकटार्थविवरणम्

अन्तर उपपत्तेः। उपकोसलविद्यागतं वाक्यमाह—**य एष इति**। दर्शनस्य [१]लौकिकत्वशास्त्रीयत्वाभ्यां संशयमाह—**तत्रेति**। पूर्वाधिकरणे चेतनस्य जीवस्य द्वितीयान्वेषणे समानस्वभावे चेतने या प्रथमप्रतीतिः तदनुसारेण परं प्रतिपन्नम् गुहाप्रवेशादिकं गौणं निरणायि। तथेहापि 'दृश्यत इति' प्रसिद्धानुवादिप्रथमश्रुतबलेन छायात्मनि गृहीते चरमश्रुतममृताभयादि तत्रैवोपासनाय

न्यायनिर्णयः

'पिबन्तौ' इति द्वित्वश्रुत्या चेतनत्वेन तुल्यजीवपरदृष्ट्यनुसाराच्चरमश्रुता गुहाप्रवेशादयो नीताः। तर्हि 'दृश्यते' इति प्रत्यक्षत्वोक्त्या छायात्मगत्यनुरोधादमृतत्वादयः स्तुत्या कथंचिन्नेया इत्याशङ्क्याह—**अन्तर इति**। उपकोसलविद्या-वाक्यमुदाहरति—**य इति**। छायां निरसितुं विशिनष्टि—**एतदिति**। क्रियापदेनेतिपदं संबध्यते। स्थानस्य ब्रह्मानुरूप्यमाह—**तदिति**। वर्त्मनी पक्ष्मस्थाने। 'एतं संयद्वाम' इत्यादि ग्रहीतुमादिपदम्। दर्शनस्य लौकिकत्वशास्त्रीयत्वाभ्यां संशयमाह—**तत्रेति**। तदुक्तिसंभावनार्थं विशिनष्टि—**अक्षीति**। देवतां संभावयितुम्—**इन्द्रियस्येति**। आत्मशब्दात् पक्षद्वयमाह—**अथेत्यादिना**। प्रथमश्रुतवशाच्चरमश्रुतं नेयमिति पूर्वन्यायेन विमृश्य पूर्वपक्षमाह—**किमिति**। उक्तश्रुतेः सविशेषे ब्रह्मण्य-न्वयोक्तेः श्रुत्यादिसंगतयः। पूर्वपक्षे छायात्मोपास्तिः, ब्रह्मोपास्तिः सिद्धान्ते फलम्। अमृतत्वादेरयोगात्र छायात्मेति शङ्कते—

---

१. लौकिकत्वेति। एतेन 'अन्तस्तद्धर्मोपदेशात्' इत्यधिकरणेनागतार्थत्वं सूचितम्। तत्र हि आदित्ये प्रतिबिम्बादर्शनेन तथा पूर्वपक्षासंभवात् देवताविशेष इत्येव पूर्वपक्षः। तत्र लौकिकदर्शनस्याप्रसिद्ध्या शास्त्रीयमेव दर्शनं पूर्वोत्तरपक्षयोः सम्प्रतिपन्नम्। इह तु लौकिकदर्शनत्यागे कारणाभावात् तस्य च प्रतिबिम्बे प्रसिद्धेः प्रतिबिम्ब इत्येव पूर्वपक्ष इति।

तावत् प्राप्तम्? छायात्मा पुरुषप्रतिरूप इति। कुतः? तस्य दृश्यमानत्वप्रसिद्धेः, 'य एषोऽक्षिणि पुरुषो दृश्यते' इति च प्रसिद्धवदुपदेशात्। विज्ञानात्मनो वाऽयं निर्देश इति युक्तम्। स हि चक्षुषा रूपं पश्यंश्चक्षुषि संनिहितो भवति। आत्मशब्दश्चास्मिन् पक्षेऽनुकूलो भवति। आदित्यपुरुषो वा चक्षुषोऽनुग्राहकः प्रतीयते, 'रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः' (बृ.उ. ५।५।२) इति श्रुतेः। अमृतत्वादीनां च देवतात्मन्यपि कथंचित् संभवात्। नेश्वरः, स्थानविशेषनिर्देशादित्येवं प्राप्ते ब्रूमः-

परमेश्वर एवाक्षिण्यभ्यन्तरः पुरुष इहोपदिष्ट इति। कस्मात्? उपपत्तेः। उपपद्यते हि परमेश्वरे गुणजातमिहोपदिश्यमानम्। आत्मत्वं तावन्मुख्यया वृत्त्या परमेश्वर उपपद्यते। 'स आत्मा तत्त्वमसि' इति श्रुतेः। अमृतत्वाभयत्वे च तस्मिन्नसकृच्छ्रुतौ श्रूयेते। तथा परमेश्वरानुरूपमेतदक्षिस्थानम्। यथा हि

प्रकटार्थविवरणम्

भविष्यतीत्याह—**किं तावदित्यादिना।** संभावनामात्रेण पूर्वपक्षाभासमाह—**विज्ञानात्मनो वेति।** गत्यन्तरे संभवति न सर्वगतेश्वरस्य स्थाननियमः कल्पयितुं युक्त इत्याह—**नेश्वर इति।** चरमश्रुतबहुतरलिङ्गानुगृहीताभ्यामात्मब्रह्मश्रुतिभ्यां 'प्रथमप्रतिपन्नैका 'दृश्यत' इति [1]श्रुतिर्नेतव्येति सिद्धान्तयति—**परमेश्वर एवेत्यादिना।** तत्त्र लोके यद्यप्यस्मिन्नक्षिणि

भाष्यभावप्रकाशिका

अन्तर उपपत्तेः॥१३॥ वर्त्मनी पक्ष्मस्थाने। **प्रसिद्धवदुपदेशादिति।** दृश्यत इति चाक्षुषत्वव्यपदेशादित्यर्थः। ननु अमृतत्वादिकं छायात्मपरिग्रहेण [न] घटते, सत्यम्, इतिशब्दशिरस्कत्वाद् वाक्यस्याविवक्षितार्थत्वम्, मनो ब्रह्मेत्यादिवत्। ननु वामनीत्वादिकमप्यत्रानुपपन्नम्, सत्यम्, दृश्यत इति लिङ्गाच्छायात्मपरिग्रह उपक्रमानुसारेणोपसंहारस्य पूर्वाधिकरणवन्नेयत्वात् स्तुतिरित्याशयः। संभवमात्रेण जीवदेवते उपन्यस्यति, न तु साक्षात् पूर्वपक्षतया; दृश्यत्वानुभवाभावात्। **विज्ञानात्मनो वेति।**

तस्मिन्नसकृदिति। अयमाशयः—इति ह स्मोपाध्यायः कथयतीत्यादावितिशब्दस्यार्थावच्छेदेन वचनसम्बन्ध-

न्यायनिर्णयः

कुत इति। 'मनो ब्रह्म' इत्यादिवदितिशब्दशिरस्कत्वेन वाक्यस्याविवक्षितार्थत्वं मत्वाऽऽह—**तस्येति।** तथापि कथं छायात्मनि वामनीत्वादिकमित्याशङ्क्य चाक्षुषत्वस्यान्यत्रायोगादुपक्रमदृष्ट्या तदपि स्तुत्या नेयमित्याह—**य इति।** प्रसिद्धवदुपदेशश्चाक्षुषत्वोक्तिरेव। चकारः शङ्कानिरासी। संभावनामात्रेण पक्षान्तरमाह—**विज्ञानेति।** तस्य सर्वदेहसाधारण्यात् कुतोऽक्षिस्थानत्वं, तत्राह—**स हीति।** संनिधिमात्रस्यातिप्रसङ्गित्वमाशङ्क्य हेत्वन्तरमाह—**आत्मेति।** संभावितं पक्षान्तरमाह—**आदित्येति।** तस्य चक्षुषि विशेषसंनिधिं सूचयति—**चक्षुष इति।** तस्य तस्मिन्ननुग्राहकत्वेन संनिधौ मानमाह—**रश्मिभिरिति।** 'एतदमृतम्' इत्यादि कल्पद्वये कथम्, तदाह—**अमृतत्वेति।** जीवपक्षसंग्रहार्थोऽपिशब्दः। कथंचिदित्यौपचारिकोक्तिः। तेषां मुख्यत्वासंभवादीश्वरो गृह्यतामित्याङ्क्य प्रथमदृष्टलिङ्गविरोधान्नैवमित्याह—**नेति।** सुखविशिष्टब्रह्मप्रकरणं नास्तीति कृत्वाचिन्तया प्राप्तं पक्षमनुभाष्य सिद्धान्तमुत्थाप्य प्रतिज्ञार्थमाह—**एवमिति।** उक्तेषु पक्षान्तरेषु नियमासिद्धिरित्याह— **कस्मादिति।** हेतुमादाय व्याकरोति—**उपपत्तेरिति।** इहेत्यक्षिपुरुषोक्तिः। उपपत्तिमेव स्फोरयति—**आत्मत्वमिति।** गौणमुख्ययोर्मुख्ये संप्रत्ययन्यायं सूचयति—**मुख्ययेति।** तत्रात्मत्वस्य मुख्यत्वे गमकमाह—**स इति।** ईश्वरपक्षे हेत्वन्तरमाह—**अमृतत्वेति।** ईश्वरपक्षे हेत्वन्तरमाह—**तथेति।** अमृतत्वादिवदित्यर्थः। आनुकूल्यमेव स्फोरयति—**यथेति।** तत् तत्र लोके यद्यपि यदपि

१. **भामत्यां तु**— पूर्वपक्षोक्तं छायात्मलिङ्गस्य प्राथम्यं वस्तुतो नास्त्येव। यतः 'दृश्यत' इत्यस्मादपि पूर्वं श्रुते 'यः एषः' इति सर्वनामनी संनिहितं पुरुषपदार्थमादाय पर्यवसिताभिधाने भवतः। पुरुषपदं च चेतनमभिधत्ते इति पुरुषोपक्रमत्वमेव वाक्यस्येत्युक्तम्।

२. श्रुतिरिति। श्रुतिः 'दृश्यत' इति श्रुतिप्रतिपन्नं दर्शनविषयत्वं छायात्मलिङ्गम्।

परमेश्वरः सर्वदोषैरलिप्तः, अपहतपाप्मत्वादिश्रवणात्; तथाऽक्षिस्थानं सर्वलेपरहितमुपदिष्टम्, 'तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति' इति श्रुतेः। संयद्वामत्वादिगुणोपदेशश्च तस्मिन्नवकल्पते—'एतं संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभिसंयन्ति', 'एष उ एव वामनीरेष हि सर्वाणि वामानि नयति', 'एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति' (छा.उ. ४।१५।२,३,४) इति च। अत उपपत्तेरन्तरः परमेश्वरः।।१३।।

स्थानादिव्यपदेशाच्च।।१४।।

कथं पुनराकाशवत्सर्वगतस्य ब्रह्मणोऽक्ष्यल्पस्थानमुपपद्यत इति। अत्रोच्यते— भवेदेषाऽनवक्लृप्तिः, यद्येतदेवैकं स्थानमस्य निर्दिष्टं भवेत्। सन्ति ह्यन्यान्यपि पृथिव्यादीनि स्थानान्यस्य निर्दिष्टानि—'यः पृथिव्यां

प्रकटार्थविवरणम्

सर्पिर्घृतमुदकं वा सिञ्चति वर्त्मनी पक्ष्मस्थाने एव गच्छति। तेन लिप्यत चक्षुः इत्यर्थः। वामानि कर्मफलान्येतमक्षिपुरुषं कारणमाश्रित्याभिसंयन्ति उत्पद्यन्ते। सकलफलोदयहेतुरित्यर्थः। वामानि शोभनानि लोकं प्रापयतीत्यर्थः। भानं प्रकाशम्; सर्वत्र प्रतिबिम्बद्वारा प्रापयतीति भामनीः।

स्थानादिव्यपदेशाच्च। पूर्वपक्षोक्तं शङ्कते सूत्रेण निरासाय—**कथं पुनरित्यादिना।** अनवक्लृप्तिरघटमानता। ननु किमयमेव

भाष्यभावप्रकाशिक

स्वार्थपरत्वदर्शनादिति होवाचेत्यर्थावच्छेदेन वचनसम्बन्धादर्थपरत्वम्, अत्रापीति ब्रह्मात्मश्रुतिभ्याममृतत्वादिलिङ्गाच्च दृश्यत इति छायात्मलिङ्गं बाध्यते। उपक्रमगतैकलिङ्गाद् वाक्यशेषगतानेकलिङ्गानि बलवन्ति; प्रत्ययसंवादस्य तात्पर्यनिमित्तत्वादित्याह—**संयद्वामेति।** वामानि शोभनानि, तानि नयतीति वामनीः। भामानि भानानि नयतीति भामनीः।।१३।।

स्थानादिव्यपदेशाच्च।।१४।। सूत्रव्यावर्त्याशङ्कामाह—**कथमिति।** स्थानिनो हि स्थानं महद् दृष्टम्, यादसामम्भोधिर्यथेत्याशयः। स्थानान्यादयो येषां ते स्थानादयः, तेषाम् नामरूपादिप्रकाराणां व्यपदेशादिति सूत्रयोजना। **स्थानानीति।** [1]नभस

न्यायनिर्णयः

किंचिदस्मिन्नक्षिणि सर्पिर्घृतमुदकं वा सिञ्चति क्षिपति तत्सर्वं वर्त्मनी पक्ष्मस्थाने एव गच्छति, तेन न लिप्यते चक्षुरित्यर्थः। इति ह स्मोपाध्यायो वदतीत्यादावितिशब्दस्योक्तार्थावच्छेदेनोक्तियोगिनोऽर्थपरत्वदृष्टेः 'इति होवाच' इत्यत्रापीतिशब्दस्यार्थावच्छेदेनोक्तियोगादर्थपरत्वदृष्टेः, आत्मब्रह्मश्रुतिभ्याम्, अमृतत्वादिलिङ्गाच्च 'दृश्यत' इति छायात्मलिङ्गं बाध्यमित्यर्थः। किंचोपक्रमस्थैकलिङ्गाद् वाक्यशेषस्थानेकलिङ्गानि बलवन्ति, संवादस्य तात्पर्यहेतुत्वादित्याह—**संयदिति।** कुतोऽस्य संयद्वामत्वम्, तत्राह—**एतं हीति।** वामानि कर्मफलान्येतमक्षिपुरुषं हेतुमाश्रित्याभिसंयन्त्युत्पद्यन्ते, सर्वफलोदयहेतुरयमित्यर्थः। वामनीरप्ययमेव पुमानित्याह—**एष इति।** तदुपपादयति—**एष हीति।** वामानि शोभनानि लोकं प्रापयति। लोकस्य सर्वशुभप्रापकोऽयमित्यर्थः। भामनीरप्ययमेवेत्याह—**एष इति।** भामानि भानानि सर्वत्र नयतीति भामनीः। अयमेव प्रकाशकः सर्वत्रेत्यर्थः। तदेव स्फुटयति—**एष हीति।** प्रथमश्रुतस्यापि चरमश्रुतैरनेकैरन्यथयितव्यत्वमुपसंहरति—**अत इति।।१३।।**

पूर्वपक्षबीजं दूषयति—**स्थानादीति।** स्थानान्यादयो येषां नामरूपाणां तेषां व्यपदेशान्न परस्याक्षिस्थानत्वानुपपत्तिरिति योजना। यादसामम्भोधिरिव स्थानिनः स्थानं महद् दृष्टमिति शङ्कते—**कथमिति।** व्योम्नः सूचीपाशादिवदक्ष्यादिस्थानत्वं महतोऽपि परस्य स्यादित्याह—**अत्रेति।** एवंजातीयकशब्देन गुणजातं गृहीतम्। निर्गुणस्य गुणसंबन्धोक्तिरप्ययुक्ता, तत्कथमनेक-

१. सर्वगतस्य एकस्थाननियमो नावकल्पते, न तु नानास्थानत्वम्, नभस इव नानासूचीपाशादिस्थानत्वमिति भामती।

तिष्ठन्' (बृ.उ. ३।७।३) इत्यादिना। तेषु हि चक्षुरपि निर्दिष्टम्-'यश्चक्षुषि तिष्ठन्' इति। 'स्थानादिव्यपदेशात्' इत्यादिग्रहणेनैतद् दर्शयति- न केवलं स्थानमेवैकमनुचितं ब्रह्मणो निर्दिश्यमानं' दृश्यते। किं तर्हि? नाम रूपमित्येवंजातीयकमप्यनामरूपस्य ब्रह्मणोऽनुचितं निर्दिश्यमानं दृश्यते- 'तस्योदिति नाम' 'हिरण्यश्मश्रुः' (छा.उ. १।६।७,६) इत्यादि। निर्गुणमपि सद् ब्रह्म नामरूपगतैर्गुणैः सगुणमुपासनार्थं तत्र तत्रोपदिश्यत इत्येतदप्युक्तमेव। सर्वगतस्यापि ब्रह्मण उपलब्ध्यर्थं स्थानविशेषो न विरुध्यते, शालग्राम इव विष्णोरित्येतदप्युक्तमेव।।१४।।

सुखविशिष्टाभिधानादेव च।।१५।।

अपि च नैवात्र विवदितव्यं किं ब्रह्मास्मिन् वाक्येऽभिधीयते न वेति। सुखविशिष्टाभिधानादेव ब्रह्मत्वं सिद्धम्। सुखविशिष्टं हि ब्रह्म यद् वाक्योपक्रमे प्रक्रान्तं 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' (छा.उ. ४।१०।४) इति, तदेवेहाभिहितम्, प्रकृतपरिग्रहस्य न्याय्यत्वात्। 'आचार्यस्तु ते गतिं वक्ता' (छा.उ. ४।१४।१) इति च गतिमात्राभिधानप्रतिज्ञानात्।

प्रकटार्थविवरणम्

परिहारो यद् बहुतराघटमानप्रकटनमिति, नेत्याह—निर्गुणमपीति।

सुखविशिष्टाभिधानादेव च। इदानीं प्रकृतानुसारेणापि ब्रह्मोपदेश एवायमुपगन्तव्य इत्याह—सुखविशिष्टेति। ननु पूर्वमग्निभिरुपदिष्टं यद्यपि ब्रह्म तथाप्याचार्येणापि तदेवोपदिष्टमित्येतत् कुत इति आह—आचार्यस्त्विति। अग्नीनामेव वचनात् पूर्वोत्तरयोरेकवाक्यतेत्यर्थः।

भाष्यभावप्रकाशिक

इवानेकस्थानत्वं महतो न विरुध्यत इत्यर्थः। नामादिसम्बन्धः कथं निर्गुणस्येति? अत आह—निर्गुणमिति।।१४।।

सुखविशिष्टाभिधानादेव च।।१५।। प्रकरणादपि ब्रह्मैवात्र प्रत्येतव्यमित्याह—सुखेति। तदेवेहाभिहितमिति। यच्छब्देनेत्यर्थः। य एषोऽक्षिणीति यच्छब्दस्य दृश्यत इति लिङ्गोपस्थापितच्छायात्माभिधायकत्वे वाक्यभेदप्रसङ्गाच्च गत्यभिधानपरिशेषाच्च पूर्वस्योत्तरेणैकवाक्यताकाङ्क्षायां सत्यामेकवाक्यतापादकस्य प्रकरणस्य लिङ्गाद् बलीयस्त्वात् प्रकृतं ब्रह्मैवाभिधेयमित्याह—आचार्यस्त्विति।

न्यायनिर्णयः

दुर्घटप्रकटनमेव समाधिरित्याशङ्क्याह—निर्गुणमिति। चकारार्थमाह—सर्वेति।।१४।।

प्रकरणादपि ब्रह्मैवात्र ग्राह्यमित्याह—सुखेति। हेत्वन्तरपरं सूत्रमिति स्फोरयितुं चकारार्थमाह—अपि चेति। तदेव वक्तुं प्रतिजानीते—नैवेति। विवादस्याकार्यत्वे हेतुमाह—सुखेति। ब्रह्मणो विशिष्टस्योपक्रमस्थस्याक्षिवाक्येऽपि निर्देशादक्ष्याधारस्य पुंसो ब्रह्मतेत्युक्तमेव विवृणोति—सुखेत्यादिना। प्रक्रान्तत्वेऽपि ब्रह्मणोऽक्षिवाक्ये किं जातम्, तदाह—तदेवेति। प्रकृतपरिग्रहस्याक्षिवाक्ये यच्छब्देनेति शेषः। 'दृश्यत' इति लिङ्गोपनीतच्छायात्मार्थो यच्छब्दः; लिङ्गस्य प्रकरणाद्बलीयस्त्वादित्याशङ्क्य तथात्वे वाक्यभेदाद् गतिमात्रोक्तिशेषाच्चैकवाक्यत्वाकाङ्क्षायां तदापादकप्रकरणस्य लिङ्गात् प्राबल्यात् प्रकृतं ब्रह्मैव यच्छब्दोक्तमित्याह—आचार्यस्त्विति।

---

१. 'निर्दिश्यते' इति पा.।

कथं पुनर्वाक्योपक्रमे सुखविशिष्टं ब्रह्म विज्ञायत इति। उच्यते– 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' इत्येतदग्नीनां वचनं श्रुत्वोपकोसल उवाच–'विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामि' इति। तत्रेदं प्रतिवचनम्–'यद्वाव कं तदेव खं यदेव खं तदेव कम्' इति (छा. उ. ४।१०।५)। तत्र खंशब्दो भूताकाशे निरूढो लोके। यदि तस्य विशेषणत्वेन कंशब्दः सुखवाची नोपादीयेत, तथा सति केवले भूताकाशे ब्रह्मशब्दो नामादिष्विव प्रतीकाभिप्रायेण प्रयुक्त इति प्रतीतिः स्यात्। तथा कंशब्दस्य विषयेन्द्रियसंपर्कजनिते सामये सुखे प्रसिद्धत्वात्, यदि तस्य खंशब्दो विशेषणत्वेन नोपादीयेत, लौकिकं सुखं ब्रह्मेति प्रतीतिः स्यात्। इतरेतरविशेषितौ तु कंखंशब्दौ सुखात्मकं ब्रह्म गमयतः। तत्र द्वितीये

प्रकटार्थविवरणम्

प्राणः सूत्रात्मा बृहत्वाद् ब्रह्मेति जानाम्येवाहम्। कं विषयेन्द्रियसंयोगजं सुखम् तथा खं भूताकाशम् कथं ब्रह्मेति न जानामीति। कंखंशब्दयोरितरेतरविशेषणविशेष्यभावस्य साफल्यं व्यतिरेकिमुखेनाह—**तत्र खंशब्द इति**। खं कथंभूतं कं सुखम् इत्येवं सुखेनाकाशस्याविशेषितत्वे यथा "नाम ब्रह्मेत्युपासीत" इत्यादावब्रह्मणि ब्रह्मदृष्टिक्षेपः तथा स्यात् तदा चात्मविद्याप्रसिद्धिर्न स्यादित्यर्थः। आकाशस्य सुखेन विशेषितत्वाभावे दोषमुक्त्वा सुखस्याकाशेन विशेषितत्वाभावे दोषमाह—**तथा कंशब्दस्येति। सामये** क्षयिष्णुत्वसाधनपारतन्त्र्यादिदोषदुष्टे। एवमेकैकविशेषितत्वे दोषमुक्त्वा परस्परविशेषितत्वे तस्य लाभमाह—**हेतावतवेति [इतरेतरेति]**। नित्यत्वविभुत्वादिधर्मकाकाशपदार्थेन सुखस्य विशेषितत्वे तस्य साध्यतादिव्यावृत्तिः। परमाह्लादरूपेण सुखपदार्थेनाकाशस्य विशेषणे तस्य भूतत्वव्यावृत्तिरित्यर्थयोः विशेषणविशेष्यभावेन शब्दावपीतरेतरविशेषितौ सुखरूपं ब्रह्म गमयत इत्यर्थः। नन्वेकं चेद् ब्रह्म प्रतिपाद्यं किं द्वितीयेन ब्रह्मशब्देनेत्याशङ्क्याह—**तत्र द्वितीय इति**। खं ब्रह्मेत्युक्ते भूताकाशस्य

भाष्यभावप्रकाशिका

ननु प्रत्येकमजानत इतरेणेतरविशिष्टतयाऽभिधाने कथमवगम इति शङ्कायाम्, इतरेतरव्यभिचारप्रदर्शनेनार्थमाह—**तत्रेति**। आश्रयान्तरप्रत्ययस्याश्रयान्तरे क्षेपः प्रतीकः। आमयः क्षयिष्णुता, पारतन्त्र्यादि च। तदेवं व्यतिरेके दोषमुक्त्वोभयग्रहणे गुणमाह—**इतरेतरेति**। अर्थयोर्विशेषितत्वाच्छब्दावपि विशेषितावुच्येते। कंशब्देन विशेषितः खंशब्दो भूताकाशं त्यक्त्वा तद्गुणयोगेन ब्रह्मणि वर्तते, खंशब्देन च सुखमपि विशेष्यमाणं निरामयं भवतीत्यर्थः। ब्रह्मशब्दाभ्यासस्य प्रयोजनमाह—**तत्र द्वितीय इति**।

न्यायनिर्णयः

उक्तं व्यक्तीकर्तुं शङ्कते—**कथमिति**। तत्र ब्रह्मोक्तिं वक्तुमुपक्रमं दर्शयति—**उच्यत इति**। प्राणस्य सूत्रात्मनो बृहत्वाद् युक्तं ब्रह्मत्वम्, कथं पुनरर्थेन्द्रिययोगजं सुखम्, खं च भूताकाशं तद् ब्रह्मेति ज्ञातुं शक्यमित्याह—**एतदिति**। शङ्कायामुत्तरम्—**तत्रेति**। प्रत्येकं ब्रह्मत्वमजानतो मिथो वैशिष्ट्योक्तौ कथं धीरित्याशङ्क्य खंशब्दस्येतरव्यभिचारे दोषमाह—**तत्र खमिति**। प्रतीको नामाश्रयान्तरप्रत्ययस्याश्रयान्तरे क्षेपः। न चायं तदुपदेशः, 'अप्रतीकालम्बनान् नयति' इति न्यायेन वक्ष्यमाणगतिविरोधादिति भावः। कंशब्दस्यापीतरव्यभिचारे दोषमाह—**तथेति**। क्षयिता पारतन्त्र्यादि वाऽऽमयः। न च तस्मिन् ब्रह्मदृष्टिः, उक्तन्यायादित्यर्थः। व्यतिरेके दोषमुक्त्वोभयग्रहे गुणमाह—**इतरेतरेति**। अर्थयोर्विशेषितत्वेन शब्दावपि विशेषितावुक्तौ। कंशब्देन विशेषितो हि खंशब्दो भूताकाशं त्यक्त्वा तद्गुणयोगाद् ब्रह्मणि वर्तते। कमपि खेन विशेषितं निरामयं भवति। तथा च यथोक्तौ शब्दावनवच्छिन्नसुखगुणकं ब्रह्म गमयित्वा चरितार्थावित्यर्थः। एकस्यैव ब्रह्मणो ध्येयत्वाद् ब्रह्मपदाभ्यासो वृथेत्याशङ्क्याह—

---

१. विशेषणविशेष्यभावोऽर्थयोः, न तु शब्दयोः। अतः 'इतरेतरविशेषितौ तु कं खं शब्दौ' इति भाष्यानुपपत्तिमाशङ्क्य व्याचष्टे— **नित्यत्वेत्यादि**। सूत्रे सुखविशिष्टं सुखेन विशेषितं तादात्म्येन 'कं ब्रह्म' इति। सुखाभिन्नमिति यावत्। सुखात्मकत्वमपरिच्छिन्नत्वं चेत्युभयमिह ध्येयत्वेन विवक्षितम्। कं ब्रह्म, खं ब्रह्म' इत्यत्र वैषयिकसुखे, भूताकाशे च ब्रह्मदृष्टिविधानशङ्कानिरासोऽपि सूत्रात् लभ्यते। तथाहि— 'कं ब्रह्म' इति वाक्यनिर्दिष्टः परमात्मा, सुखविशिष्टाभिधानादेव=सुखेषु यद् विशिष्टमनवच्छिन्नं सुखं तस्य कंशब्देनाभिधानात्। 'यद्वाव कं तदेव खम्' इति विवरणानुसारेण खशब्दोक्तानवच्छिन्नत्वविशेषितसुखपरत्वादित्यर्थः। तथा 'खं ब्रह्म' इति वाक्यनिर्दिष्टः परमात्मा, सुखविशिष्टाभिधानादेव शोभनं सुखात्मकं यत् खं तस्य खशब्देनाभिधानात्, 'यदेव खं तदेव कम्' इति विवरणानुसारेण खशब्दस्य कंशब्दोक्तसुखविशेषितानवच्छिन्नस्वरूपपरत्वात्—इति सूत्रार्थः। अत एव 'प्रकरणात्' लघु सूत्रमकृत्वा गुरुसूत्रकरणमिति न्यायरक्षामणिः।

ब्रह्मशब्देऽनुपादीयमाने 'कं खं ब्रह्मे'त्येवोच्यमाने कंशब्दस्य विशेषणत्वेनैवोपयुक्तत्वात् सुखस्य गुणस्याध्येयत्वं स्यात्, तन्मा भूदित्युभयोः कंखंशब्दयोर्ब्रह्मशब्दशिरस्त्वं 'कं ब्रह्म खं ब्रह्म' इति। इष्टं हि सुखस्यापि गुणस्य गुणिवद् ध्येयत्वम्। तदेवं वाक्योपक्रमे सुखविशिष्टं ब्रह्मोपदिष्टम्।

प्रत्येकं च गार्हपत्यादयोऽग्नयः स्वं स्वं महिमानमुपदिश्य 'एषा सोम्य तेऽस्मद्विद्याऽऽत्मविद्या च' (छा.उ. ४।१४।१) इत्युपसंहरन्तः पूर्वत्र ब्रह्म निर्दिष्टमिति ज्ञापयन्ति। 'आचार्यस्तु ते गतिं वक्ता' इति च गतिमात्राभिधानप्रतिज्ञानमर्थान्तरविवक्षां वारयति। 'यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते' (छा.उ. ४।१४।३) इति चाक्षिस्थानं पुरुषं विजानतः पापेनानुपघातं

प्रकटार्थविवरणम्

ब्रह्मत्वप्रसङ्गे तन्निवारणाय कमिति विशेषणस्योपयोगात् सुखस्य ध्येयत्वतात्पर्याभावादध्येयत्वं प्रसज्येत; तत्परिहारायोभयत्र ब्रह्मशब्दप्रयोग इत्यर्थः। अध्येयत्वमेवास्तु को दोष इत्याशङ्क्याह—**इष्टं हीति**। मार्गोपदेशेन सगुणविद्यात्वावगमादित्यर्थः। फलितमाह—**तदेवमिति**। इतश्च ब्रह्मोपक्रान्तमित्याह—**प्रत्येकं चेति**। "अथ हैनं गार्हपत्योऽनुशशास पृथिव्यन्नमग्निरादित्यः" इत्यादिना पृथिव्यादिलक्षणं स्वकीयं विभूतिं विस्तारमुपदिश्यैषा सोम्य प्रिय ते तुभ्यं प्रत्येकमुपदिष्टाऽग्निविद्या पूर्वं च संभूय "प्राणो ब्रह्म" इत्यादिनाऽऽत्मविद्योपदिष्टाऽस्माभिरित्युपसंहरन्तो भूयो ब्रह्मोपक्रमं दर्शयन्तीत्यर्थः। ननु कुण्डपायिनामयने "मासमग्निहोत्रं जुहोति" इत्यत्रोपसत्सोमक्रयणादिप्रक्रियाभेदात् प्रसिद्धाग्निहोत्रात् 'कर्मान्तरत्वम् तथेहाप्यक्षिस्थानत्वादिविलक्षणप्रक्रियादर्शनाद् विद्यान्तरत्वमित्याशङ्क्याह—**आचार्यस्त्विति**। पूर्वतनविद्यानुवादेन तत्रैवाक्षिस्थानत्वादिविशेषविधानात् प्रक्रियाभेदोपपत्तौ न

भाष्यभावप्रकाशिका

उपरि प्रयोगाच्छिर इत्युच्यते। ब्रह्मपदं शिरः ययोस्ते ब्रह्मशिरसी, तयोर्भावः ब्रह्मशिरस्त्वम्। अस्तु; प्रस्तुते किमायातमिति? अत आह—**तदेवमिति**। उपसंहारसामर्थ्यादपि पूर्वस्मिन्वाक्ये ब्रह्म निर्दिष्टमित्याह—**प्रत्येकमिति**। ननु अग्निभिः पूर्वनिर्दिष्टं ब्रह्मास्तु नाम, तथाप्याचार्यवाक्ये तदेवानुवर्तनीयमिति कुत इति? अत आह—**आचार्यस्त्विति**। **अर्थान्तरेति**। वक्तृभेदेऽप्येकवाक्यता साकाङ्क्षत्वादिति भावः॥१५॥

न्यायनिर्णयः

तत्रेति। विशेषणत्वेन, आकाशविशेषणार्पकत्वेनेति यावत्। उपरि प्रयोगाद् ब्रह्मपदं शिरो ययोस्ते ब्रह्मशिरसी, तयोर्भावो ब्रह्मशिरस्त्वम्। सुखस्याध्येयत्वमेवास्तु, को दोष इत्याशङ्क्याह—**इष्टं हीति**। मार्गोक्त्या सगुणविद्यात्वदृष्टेरित्यर्थः। ब्रह्मणः प्रक्रान्तत्वमुक्त्वपोसंहरति—**तदेवमिति**। तत्रैव हेत्वन्तरमाह—**प्रत्येकं चेति**। उपकोसलं गार्हपत्योऽनुशशास, पृथिव्यग्निरन्नमादित्य इतीमा मे चतस्रस्तनवः 'य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि' इति। अन्वाहार्यपचनोऽपि तदनुशासनमकरोत्, आपो दिशो नक्षत्राणि चन्द्रमा इति मे तनवः 'य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि' इति। आहवनीयोऽपि तदनुशासनं कृतवान्, प्राण आकाशो द्यौर्विद्युदिति मम तनवः 'य एष विद्युति पुरुषः सोऽहमस्मि' इति। एवमेते प्रत्येकमग्नयः स्वं स्वं महिमानं विभूतिं पृथिव्यादिविस्तारमुक्त्वा एषा सोम्य ते तुभ्यं प्रत्येकमुक्ताऽस्मद्विद्याऽग्निविषया, पूर्वं च संभूय 'प्राणो ब्रह्म' इत्यादिनाऽऽत्मविद्योक्ताऽस्माभिरित्युपसंहरन्तो ब्रह्मोपक्रमं दर्शयन्तीत्यर्थः। अग्निवाक्ये ब्रह्मोक्तमपि किमित्याचार्यवाक्येऽनुवर्तते, वक्तृभेदादर्थभेदसिद्धेरित्याशङ्क्याह—**आचार्यस्त्विति**। वक्तृभेदेऽप्येकवाक्यता, साकाङ्क्षत्वात् पूर्वोत्तरवाक्ययोरेकार्थत्वं, वाक्यैक्यसंभवे तद्भेदस्यायोगादित्यर्थः। फलोक्तेरपि सिद्धमक्षिस्थस्य ब्रह्मत्वमित्याह—**यथेति**।

१. अनुपादेयगुणसहकृतानुपस्थितिरूपप्रकरणान्तरात् कुण्डपायिनामयननामकसत्रयागगताग्निहोत्रस्य नित्याग्निहोत्राद् भेदः। मासोऽत्रानुपादेयगुणः। अनुपादेयगुणयोगस्य स्ववृत्त्युपादेयत्वापनयद्वारा परिशेषाद् धात्वर्थवृत्त्युपादेयत्वापादनं व्यापारः। अनुपस्थितेश्च उपादेयत्वसामानाधिकरण्येन विधेयत्वाप्रतिबन्धः व्यापारः। द्र. भाट्टदीपिका २-३-११।

ब्रुवन्नक्षिस्थानस्य पुरुषस्य ब्रह्मत्वं दर्शयति। तस्मात् प्रकृतस्यैव ब्रह्मणोऽक्षिस्थानतां संयद्वामत्वादिगुणतां चोक्त्वाऽर्चिरादिकां तद्विदो गतिं वक्ष्यामीत्युपक्रमते– 'य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाच' (छा.उ. ४।१५।१) इति।।१५।।

श्रुतोपनिषत्कगत्यभिधानाच्च।।१६।।

इतश्चाक्षिस्थानः पुरुषः परमेश्वरः, यस्माच्छ्रुतोपनिषत्कस्य श्रुतरहस्यविज्ञानस्य ब्रह्मविदो या गतिर्देवयानाख्या प्रसिद्धा श्रुतौ–'अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्यादित्यमभिजयन्त एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तन्ते' (प्र.उ. १।१०) इति; स्मृतावपि–'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः' (भ.गी. ८।२४) इति; सैवेहाक्षिपुरुषविदोऽभिधीयमाना दृश्यते– 'अथ यदु

प्रकटार्थविवरणम्

स्वतन्त्रा विद्या कल्पयितुं शक्यते, अग्निवचनविरोधादिति भावः। फलवचनबलादप्यक्षिपुरुषस्य ब्रह्मत्वमित्याह—**यथेति**। यस्माद् वक्तृभेदेऽपि पूर्वापरानुसन्धानेनैकवाक्यतानिश्चयः तस्मादित्युपसंहारः।

श्रुतोपनिषत्कगत्यभिधानाच्च। श्रुता[1] संवृत्तोपनिषद् रहस्यविज्ञानं यस्य स श्रुतोपनिषत्कः। तस्य या देवयानाख्या गतिः श्रुतौ स्मृतौ च प्रसिद्धा सैवेहाक्षिपुरुषविदोऽभिधीयमाना दृश्यत इत्यन्वयः। उत्तरेण पथा तपआदिना साधनेनादित्योपलक्षितं हैरण्यगर्भं पदं प्राप्नुवन्ति। सकलप्राणकरणाधारमित्यर्थः। अस्मिन्नुपासके मृते यदि शव्यं शवसंबन्धि संस्कारादिकं कुर्वन्ति

भाष्यभावप्रकाशिका

श्रुतोपनिषत्कगत्यभिधानाच्च।।१६।। पूर्वं विद्यायाः सम्बन्ध उच्यते। मार्गमुपलक्षयति—**आदित्यमिति**। मार्गेऽपि प्राप्यं वस्तु दर्शयति—**एतद्वा इति**। शव्यम् शवसंस्कारः। देवैर्नेतृभिरुपलक्षितत्वाद् देवपथः। जन्मादेः पौनःपुन्यम् आवृत्तिः। तत्कर्ता

न्यायनिर्णयः

प्रकृतपुरुषविदो हि पापाद्यनुपहतत्त्वं फलमुक्तं, तच्च तदधिगमाधिकरणे ब्रह्मधियोऽभिधास्यते; तेनास्य ब्रह्मत्वमित्यर्थः। आचार्येण गतिमात्रे वाच्ये किमित्यधिकं सोऽभिदधीतेत्याशङ्क्यापेक्षितं पूरयित्वा गतिर्वाच्येत्युपसंहरन्नाह—**तस्मादिति**। पूर्वापरालोचनायामेकवाक्यत्वनिश्चयादित्यर्थः।।१५।।

प्रकरणादक्षिस्थस्य ब्रह्मत्वमुक्त्वा लिङ्गादपि तथेत्याह—**श्रुतेति**। श्रुता संवृत्तोपनिषद् रहस्यं ज्ञानं यस्य स तथा, तस्य या देवयानाख्या गतिरागमसिद्धा तस्याश्चाक्षुषपुरुषवेदिन्यभिधानात् तद्ब्रह्मतेत्यर्थः। चकारार्थमाह—**इतश्चेति**। अवशिष्टं व्याचष्टे—**यस्मादिति**। या गतिः श्रुतौ स्मृतौ च प्रसिद्धा सैवेहाभिधीयमानेति संबन्धः। श्रुतिमाह—**अथेति**। देहपातानन्तर्यमथशब्दार्थः। तपोब्रह्मचर्याद्युपायेनात्मानमनुसंधाय तद्विद्यया ध्यानाख्यया हेतुनोत्तरमार्गमर्चिराद्युपलक्षितं प्राप्य तेनादित्यद्वारा कार्यं ब्रह्माप्नुवन्तीत्यर्थः। ब्रह्म विशिनष्टि—**एतदिति**। व्यष्टिसमष्टिकरणात्मकं हैरण्यगर्भं पदमित्यर्थः। तस्यैव वास्तवं रूपमाह—**एतदिति**। उक्तविशेषणसिद्ध्यर्थं हेतुमाह—**एतस्मादिति**। गतिविषयां श्रुतिमुक्त्वा स्मृतिमाह—**अग्निरिति**। अग्न्यादिशब्दैरातिवाहिक्यो देवता गृह्यन्ते। पथ्यन्तरादत्र विशेषमाह—**तत्रेति**। पथो देवयानस्य प्रामाणिकत्वेऽपि प्रकृते किमायातमित्याशङ्क्योक्तम्—**सैवेति**। इहेत्युक्तां श्रुतिमाह—**अथेति**। देहपातानन्तर्यमेवाथेत्युक्तम्। अस्मिन्नुपासके

१. 'श्रुता संवृत्ता उपनिषद्' इति पाठः स्यात्।

चैवास्मिञ्छव्यं कुर्वन्ति यदि च नार्चिषमेवाभिसंभवन्ति' इत्युपक्रम्य 'आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते' (छा.उ. ४।१५।५) इति। तदिह ब्रह्मविद्विषयया प्रसिद्धया गत्याऽक्षिस्थानस्य ब्रह्मत्वं निश्चीयते।।१६।।

अनवस्थितेरसंभवाच्च नेतरः।।१७।।

यत्पुनरुक्तं छायात्मा, विज्ञानात्मा, देवतात्मा वा स्यादक्षिस्थान इति। अत्रोच्यते– न छायात्मादिरितर इह ग्रहणमर्हति। कस्मात्? अनवस्थितेः। न तावच्छायात्मनश्चक्षुषि नित्यमवस्थानं संभवति। यदैव हि कश्चित् पुरुषश्चक्षुरासीदति तदा चक्षुषि पुरुषच्छाया दृश्यते, अपगते तस्मिन् न दृश्यते। 'य एषोऽक्षिणि

प्रकटार्थविवरणम्

ज्ञातयो(यदि,)यदि वा न उभयथाऽप्यप्रतिहतज्ञानफलाः तेऽर्चिरभिमानिनीं देवतां प्राप्नुवन्ति। ततोऽहर्देवताम्, ततः शुक्लपक्षदेवताम्, ततः षण्मासोपलक्षितोत्तरायणदेवताम्, ततः संवत्सरदेवताम्, तत आदित्यम्, ततश्चन्द्रमसम्, ततो वैद्युतम्, तत् तत्र स्थितान् ब्रह्मलोकादवतीर्यामानवः पुरुष उपासकान् ब्रह्म गमयति। देवैरग्न्यादिभिरधिष्ठितः पन्था देवपथः। ब्रह्मणा गन्तव्येनोपलक्षितो ब्रह्मपथः। एतेन पथा ब्रह्म प्रतिपद्यमानाः इमं मनोस्सर्गं जन्मजरामरणावृत्तियुक्तं नावर्तन्ते न प्रविशन्तीत्यर्थः। भवत्वेवम् ततः किमित्याशङ्क्याह—**तदिहेति**। [1]उत्सर्गस्त्वयम्, पञ्चाग्निविदामपि प्रकरणादर्चिरादिगतेरिष्टत्वात्।

अनवस्थितेरसंभवाच्च नेतरः। एवं सिद्धान्तमुपपाद्य परोक्तिपराकरणाय परं सूत्रमवतारयति—**अनवस्थितेरिति**। अन्वयव्यतिरेकाभ्यां प्रतिबिम्बस्य बिम्बसद्भावाधीनसद्भावत्वात् सदाऽनवस्थानात्र सदाऽन्योपासनं सिध्यतीत्यर्थः। किञ्चाव्यवधानात् स्वचक्षुःस्थस्योपासनं वक्तव्यम्। न च तस्य स्वचक्षुषा दर्शनं सम्भवतीत्याह—**य एषोऽक्षिणीति**। तर्हि पुरुषान्तरं

भाष्यभावप्रकाशिका

आवर्तः। मानवो मनुसृष्टो लोकः, तं नावर्तन्ते नागच्छन्तीत्यर्थः।।१६।।

अनवस्थितेरसम्भवाच्च नेतरः।।१७।। ननु यत्र कुत्रचिच्छायात्मनःसंभवादुपास्यत्वमिति, अत आह— **य एष इति**।

न्यायनिर्णयः

प्रारब्धकर्मसमाप्त्या मृते यदि पुत्रा ज्ञातयो वा शव्यं शवसंबन्धि संस्कारादिकर्म कुर्वन्ति, यदि वा न, द्विधाऽप्यप्रतिहतधीफलास्तेऽर्चिरभिमानिनीं देवतां प्राप्नुवन्ति, तदाह—**यद्गु चेति**। अर्चिषोऽहर्देवतां ततः शुक्लपक्षदेवतां ततः षण्मासोपलक्षितोत्तरायणदेवतां ततः संवत्सराभिमानिनीं देवतां ततश्चादित्यं ततश्चन्द्रं ततो विद्युतमाप्नुवन्ति। तत्र स्थितानुपासकान् ब्रह्मलोकादागत्यामानवः पुरुषो गन्तव्यं ब्रह्म प्रापयतीत्याह—**इत्युपक्रम्येति**। देवैर्नेतृभिरधिष्ठितः पन्था देवपथः। ब्रह्मणा गन्तव्यत्वेनोपलक्षितो ब्रह्मपथः। एतेन पथा कार्यं ब्रह्म प्रतिपद्यमानाः पुनरिमं मनोः सर्गं जन्ममरणाद्यावृत्तियुक्तं नावर्तन्ते न प्रविशन्तीत्याह—**एष इति**। तथापि प्रकृते किं जातम्, तदाह—**तदिति**। प्रकरणमिहेत्युक्तम्।।१६।।

सिद्धान्तमुपपाद्य परोक्तं प्रत्याह—**अनवस्थितेरिति**। तद् व्याकर्तुं व्यावर्त्यमनुकीर्तयति—**यदिति**। सूत्रमुत्तरत्वेन योजयति—**अत्रेति**। इहेति स्थानं वाक्यं चोक्तम्। प्रश्नपूर्वकं हेतुं छायात्मनि व्याचष्टे—**कस्मादिति**। उत्क्रमन्वयव्यतिरेकाभ्यां व्यनक्ति—**यदेति**। स्वचक्षुषि नित्यं संनिध्यभावेऽपि यत्र क्वापि छायात्मनः संभवादुपास्यतेत्याशङ्क्याह—**य इति**। दृश्यत इत्युक्ते

---

१. उत्सर्ग इति। ब्रह्मप्रापकस्यार्चिरादिमार्गस्य ब्रह्मविद्यासम्बन्ध औत्सर्गिकः। पञ्चाग्निविद्यायां तु वचनबलादुत्सर्गः परित्यज्यते। इह च बाधकाभावात् ब्रह्मप्रापकगतिश्रवणं विद्याविषयस्य ब्रह्मत्वं गमयतीति भावः।

पुरुषः' इति च श्रुतिः संनिधानात् स्वचक्षुषि दृश्यमानं पुरुषमुपास्यत्वेनोपदिशति। न चोपासनाकाले छायाकरं कंचित् पुरुषं चक्षुःसमीपे संनिधाप्योपास्त इति युक्तं कल्पयितुम्। 'अस्यैव शरीरस्य नाशमन्वेष नश्यति' (छा.उ. ८।९।१) इति श्रुतिश्छायात्मनोऽप्यनवस्थितत्वं दर्शयति। असंभवाच्च तस्मिन्नमृतत्वादीनां गुणानां न छायात्मनि प्रतीतिः। तथा विज्ञानात्मनोऽपि साधारणे कृत्स्नशरीरेन्द्रियसंबन्धे सति चक्षुष्येवावस्थितत्वं वक्तुं न शक्यम्। ब्रह्मणस्तु व्यापिनोऽपि दृष्ट उपलब्ध्यर्थो हृदयादिदेशविशेषसंबन्धः। समानश्च विज्ञानात्मन्यप्यमृतत्वादीनां गुणानामसंबन्धः। यद्यपि विज्ञानात्मा परमात्मनोऽनन्य एव, तथाप्यविद्याकामकर्मकृतं तस्मिन् मर्त्यत्वमध्यारोपितं भयं चेत्यमृतत्वाभयत्वे नोपपद्येते। संयद्वामत्वादयश्चैतस्मिन्ननैश्वर्यादनुपपन्ना एव। देवतात्मनस्तु 'रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः' (बृ.उ. ५।५।२) इति श्रुतेर्यद्यपि चक्षुष्यवस्थानं स्यात्, तथाप्यात्मत्वं तावन्न संभवति, पराग्रूपत्वात्। अमृतत्वादयोऽपि न संभवन्ति, उत्पत्तिप्रलयश्रवणात्। अमरत्वमपि देवानां चिरकालावस्थानापेक्षम्।

प्रकटार्थविवरणम्

सन्निधाप्य तदभ्यातद्दृश्यास्योपासनं भविष्यतीत्याह—**न चेति**। कल्पनागौरवादित्यर्थः। अनवस्थितत्वे श्रुतिं प्रमाणयति—**अस्य चेति**। अस्यैव छायाकारस्य नाशमन्वानन्तरमेष छायात्मा नश्यतीत्यर्थः। "असंभवाच्च" इति सूत्रभागं व्याचष्टे—**असंभवाच्चेति**। जीवनिराकरणपरतया सूत्रं योजयति—**तथा विज्ञानात्मनोऽपीति**। नापि तस्य चक्षुष्येवाभिव्यक्तता येन तत्रोपासनमुपदिश्येत। स्थानविशेषं विनाऽप्यहमित्यभिव्यक्तिदर्शनादित्यर्थः। तर्हि ब्रह्मणोऽपि सर्वत्र विद्यमानत्वान्न चक्षुष्येवावस्थानमित्याशङ्क्याह—**ब्रह्मणस्त्विति**। ननु जीवो ब्रह्माभिन्न एव। कथं तत्र अमृतत्वाद्यसंभव इत्याशङ्क्याह—**यद्यपीति**। "असंभवाच्च" इति सूत्रभागं देवतापाकरणे योजयति—**देवतात्मनस्त्विति**। एष आत्मेत्युपकोसलं प्रत्यात्मत्वेनाक्षिपुरुषमुपदिदेशाचार्यः। तत्र संभवति देवतापक्ष इत्यर्थः। ननु देवेष्वमरत्वप्रसिद्धिबाधितं त्वद्वचनमित्याशङ्क्याह—**अमृतत्वमपीति**। संयद्वामत्वादिकमपि न

भाष्यभावप्रकाशिका

संनिधानादिति। दृश्यत इति स्वेनान्येनेति विशेषाभावाच्चरमश्रुतत्वाच्च तस्य प्रथमश्रुतमक्षि स्वकीयमेव युक्तम्, संनिधानस्य तस्मिन्नतिशयेन संभवादित्यर्थः। कल्पनागौरवं च भवेदित्याह—**न चेति**। युक्त्याऽनवस्थितत्वमुक्तम्, इदानीं श्रुतिमाह—**अस्यैवेति**। असंभवाच्चेति सूत्रपदं व्याचष्टे—**असम्भवादिति**। उपासनार्थत्वेन प्रदेशम्बन्धः श्रुतपूर्वो ब्रह्मणः, जीवे त्विदंप्रथमतया कल्प्यत इत्याह—**ब्रह्मण इति**।

न्यायनिर्णयः

स्वेनान्येन वेत्यविशेषाच्चरमश्रुतत्वाच्च प्रथमश्रुतमक्षि स्वकीयमेव युक्तं, सनिधेः स्वस्मिन्नतिशयादित्याह—**संनिधानादिति**। तर्हि पुरुषान्तरं संनिधाप्य स्वचक्षुषि तद्दृश्यस्योपास्यता स्यादित्याशङ्क्य गौरवान्नेत्याह—**न चेति**। युक्त्याऽनवस्थितत्वमुक्त्वा तत्रैव श्रुतिमाह—**अस्येति**। छायाकरस्येत्यर्थः। आनन्तर्यार्थोऽनुशब्दः। एषशब्दश्छायात्मार्थः। हेत्वन्तरमादाय व्याख्याति—**असंभवाच्चेति**। जीवनिरासेऽप्यनवस्थितिं व्याचष्टे—**तथेति**। छायात्मवदित्यर्थः। न हि तस्य चक्षुष्येव व्यक्तियोग्यता, येन तत्रोपास्तिः। विनाऽपि स्थानविशेषमहमिति व्यक्तेरित्यर्थः। तर्हि ब्रह्मणोऽपि सर्वत्र सत्त्वान्न चक्षुष्येव स्थितिः, तत्राह—**ब्रह्मणस्त्विति**। दृष्टः श्रुताविति शेषः। हेत्वन्तरं जीवेऽपि योजयति—**समानश्चेति**। जीवस्य ब्रह्माभेदात् तत्रामृतत्वादि स्यादित्याशङ्क्याह—**यद्यपीति**। अनवस्थितिर्देवतात्मन्यसिद्धेत्याशङ्क्य हेत्वन्तरेण निराह— **देवतेति**। देवेष्वमरत्वप्रसिद्धिबाधितं तदुत्पत्त्यादिवाक्यमित्याशङ्क्याह—**अमरत्वमिति**। संयद्वामत्वादिकमपि न तत्रेत्याह—**ऐश्वर्यमिति**। तस्येश्वरायत्तत्वे भयास्तित्वे

ऐश्वर्यमपि परमेश्वरायत्तं न स्वाभाविकम्। 'भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः। भीषाऽस्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चमः' (तै. उ. २।८) इति मन्त्रवर्णात्। तस्मात् परमेश्वर एवायमक्षिस्थानः प्रत्येतव्यः। अस्मिंश्च पक्षे 'दृश्यत' इति प्रसिद्धवदुपादानं शास्त्राद्यपेक्षं विद्वद्विषयं प्ररोचनार्थमिति व्याख्येयम्।।१७।।

।।इति चतुर्थमन्तराधिकरणम्।।

५।। अन्तर्याम्यधिकरणम्।।सू. १८-२०।।

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्।।१८।।

'य इमं च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयति' इत्युपक्रम्य श्रूयते-'यः पृथिव्यां

शारीरकन्यायसंग्रहः

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्।।१८।। न च स्मार्तमतद्धर्माभिलापात्।।१९।। शारीरश्चोभयेऽपि हि भेदेनैनमधीयते।।२०।। अस्मिन्नधिकरणे सर्वविषयनियन्तृत्वं वाक्योपक्रमोपसंहाराभ्याम् एकस्यैवेति स्थितम्। तच्च सर्वविषयनियन्तृत्वं दहराद्युपासनासिद्धस्याप्यस्तीत्यङ्गीकृत्य इदमुच्यते—क्वचिच्छ्रूयमाणेन धर्मेण धर्म्युपादाने यस्यासौ धर्मः साधनसाध्यः स उपादेयः, किं वा यस्यासौ नित्यसिद्धः स उपादेय इति विशये, यस्य साधनसाध्यः तस्योपादाने साधनान्तरप्रतिपत्तिपूर्वमेव स उपादेय इति बुद्धिगौरवं स्यात्, नित्यसिद्धस्योपादाने धर्मेण धर्मिमात्रप्रतिपत्तिरेव स्यात्, न साधनान्तरप्रतिपत्तिरिति, बुद्धिलाघवम्—इत्यनेन न्यायेन सर्वविषयनियन्तृत्वेन ब्रह्मैवोपादीयत इत्युक्तम्।

प्रकटार्थविवरणम्

संभवतीत्याह—**ऐश्वर्यमपीति**। भीषा भयेनास्मात् परमेश्वरात् पवते चलति वायुरित्यर्थः। ननु परमेश्वरपरिग्रहेऽपि 'दृश्यत' इति नोपपद्यत इत्याशङ्क्याह—**अस्मिंश्च पक्ष इति**। दर्शनशब्दोऽयमुपलब्धिपर्यायः। तत्र शास्त्रीयस्य दर्शनस्य शास्त्रमेव सन्निहितं करणमिति विद्वत्प्रसिद्धं शास्त्रीयमेव दर्शनं सिद्धवदनूद्यतेऽज्ञानामनुरागजननार्थमित्यर्थः।।इति चतुर्थमन्तराधिकरणम्।।

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्। अन्तर्यामिब्राह्मणं विषयवाक्यमाह—**य इमं चेति**। आपातप्रतिपन्नमर्थमाह—

भाष्यभावप्रकाशिका

ऐश्वर्यस्य परमेश्वरायत्तत्वे भयास्तित्वे च प्रमाणमाह—**भीषेति**। भीत्येत्यर्थः।।१७।। इति चतुर्थमन्तराधिकरणम्।।

न्यायनिर्णयः

च मानमाह—**भीषेति**। भयेनास्मादीश्वरात् पवते चलति वायुरित्यर्थः। पक्षत्रयायोगे फलितमाह—**तस्मादिति**। ईश्वरेऽपि 'दृश्यत' इत्ययुक्तं, तस्यादृश्यत्वादित्याशङ्क्याह—**अस्मिन्निति**। उपलब्धिर्दर्शनम्। तत्र शास्त्रीयदर्शनस्य शास्त्रमेव संनिहितं करणमिति विद्वत्प्रसिद्धं शास्त्रीयमेव दर्शनं सिद्धवदनूद्यते तत्राज्ञानामनुरागार्थमित्यर्थः। शास्त्रादीत्यादिपदं विद्वदनुभवार्थम्। तद्विषयदर्शनोक्तेरुपयोगमाह— **प्ररोचनेति**। उक्तं तत्त्वदर्शनमयोग्यमित्युक्ते न तद्दर्शने फलवति भवत्यभिरुचिरित्यर्थः। तदेवमुपकोसलवाक्यं सविशेषे ब्रह्मण्यन्वितमिति।।१७।। इति चतुर्थमन्तराधिकरणम्।।

स्थानादिव्यपदेशसूत्रे पृथिव्यादीनि ब्रह्मणः स्थानानीत्युक्तम्, तदसिद्धिमाशङ्क्याह—**अन्तर्यामीति**। अन्तर्यामिब्राह्मणमुदाहरति—**य इति**। मनुष्यादिभिर्देवादिभिश्चाधिष्ठितमिमममुं च लोकं योऽन्तरो यमयति, यश्च लोकद्वयवर्तीनि भूतान्यन्तरः

तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः' (बृ.उ. ३।७।१,३) इत्यादि। अत्राधिदैवतमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मं च कश्चिदन्तरवस्थितो यमयिताऽन्तर्यामीति श्रूयते। स किमधिदैवाद्यभिमानी देवतात्मा कश्चित्, किंवा प्राप्ताणिमाद्यैश्वर्यः कश्चिद् योगी, किंवा परमात्मा, किंवाऽर्थान्तरं किंचिदित्यपूर्वसंज्ञादर्शनात् संशयः। किं तावन्नः प्रतिभाति? संज्ञाया अप्रसिद्धत्वात् संज्ञिनाऽप्यप्रसिद्धेनार्थान्तरेण केनचिद् भवितव्यमिति। अथवा नानिरूपितरूपमर्थान्तरं शक्यमस्तीत्यभ्युपगन्तुम्। अन्तर्यामिशब्दश्चान्तर्यमनयोगेन प्रवृत्तो नात्यन्तमप्रसिद्धः। तस्मात् पृथिव्याद्यभिमानी कश्चिद् देवोऽन्तर्यामी स्यात्।

प्रकटार्थविवरणम्

अत्रेति। ''यः पृथिव्यां तिष्ठन्'' इत्यादिना देवताः पृथिव्यग्न्याद्याः अधिकृत्य कश्चिद् यमयिता श्रूयते। तथा यस्सर्वेषु लोकेषु इत्यधिलोकम्; यस्सर्वेषु वेदेष्वित्यधिवेदम्; यस्सर्वेषु भूतेष्वित्यधिभूतम्; तथा प्राणादि [यः प्राणे इत्यादि] यः आत्मनि तिष्ठन्नित्येतदन्तमध्यात्मम् प्राणादिपदार्थानधिकृत्य किंचिन्नियन्ता वा ततः प्रथते। तत्र संशयमाह—**स किमिति।**[1] पूर्वत्र 'दृश्यत' इति प्रसिद्धानुवादिनी श्रुतिः बहुतरश्रुतिलिङ्गाद्यनुरोधेनार्थविशेषपरतया निर्णीता। अत्र त्वयमन्तर्यामिशब्द एवाप्रसिद्धार्थः। अतो नास्यार्थो निर्णेतव्यो डित्थडपित्थादिशब्दार्थवदिति पूर्वपक्षाभासमाह—**किं तावदिति।** अध्ययनविध्युपात्तस्य पुरुषार्थान्वयो वाच्यः। अनिर्धारितस्य च तदसंभवादवश्यं निर्धारणमपेक्षितमित्यपरितोषादाह—**अथवेति।** न डित्थादिशब्दसाम्यमित्याह—**अन्तर्यामिशब्दश्चेति।** अग्निर्लोको भोग्यदेहः, मनो ज्योतिर्भासकं, मनसा हि देवता सर्वं वेत्तीत्यर्थः। तस्य

भाष्यभावप्रकाशिका

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्।।१८।। अर्थान्तरे संशयकारणमाह—**अपूर्वेति।** संज्ञाया इत्युपक्रममात्रम्, न साक्षात्पूर्वपक्षः, संज्ञायाः पदमात्रस्याप्रमाणत्वात्, संज्ञाया अप्रसिद्धत्वात् संज्ञिनाऽपि तथा भवितव्यम्; तथा व्याप्तेरिति चेत्,

न्यायनिर्णयः

सन् यमयति, तं किं वेत्थेत्यन्तर्यामिणमुपक्रम्य श्रुतमित्यर्थः। पृथिव्यां तिष्ठन्नन्तर्यामीत्युक्ते सर्वत्रापि चराचरे प्रसक्तावुक्तम्—**पृथिव्या इति।** तद्देवतां प्रत्याह— **यमिति।** ईश्वरस्याप्यकार्यकरणस्य न नियन्तृतेत्याशङ्क्याह—**यस्येति।** नियम्यकार्यकरणैरेव नियन्तृत्वम्। फलितमाह—**य इति।** तस्याताटस्थ्यमाह—**एष इति।** ते मम चेत्यर्थः। आदिपदं 'योऽप्सु तिष्ठन्' इत्यादिसंग्रहार्थम्। आपातिकं श्रुत्यर्थमाह— **अत्रेति।** 'यः पृथिव्याम्' इत्याद्यधिदैवतम्। 'यः सर्वेषु लोकेषु' इत्यधिलोकम्। 'यः सर्वेषु वेदेषु' इत्यधिवेदम्। 'यः सर्वेषु यज्ञेषु' इत्यधियज्ञम्। 'यः सर्वेषु भूतेषु' इत्यधिभूतम्। 'यः प्राणेषु' इत्यादि 'य आत्मनि' इत्यन्तमध्यात्ममिति भेदः। अदेहस्य नियन्तृत्वासंभवसंभवाभ्यां संशयमाह—**स किमिति।** अर्थान्तरे संदिह्यमाने हेतुमाह—**अपूर्वेति।** 'दृश्यत' इति श्रुतिर्बहुतरलिङ्गाद्यनुरोधेनार्थविशेषपरतया नीता, अत्र त्वन्तर्यामिशब्दस्याप्रसिद्धार्थत्वान्नार्थो निर्णीतो डित्थादिशब्दवदित्याह—**किं तावदिति।** अन्तर्यामिब्राह्मणस्य सविशेषे ब्रह्मण्यन्वयोक्तेः संगतयः। पूर्वपक्षे विशिष्टस्य योगिनोऽन्तर्यामिणः, सिद्धान्ते परस्यैव तस्योपास्तिरिति फलम्। तत्र पूर्वपक्षाभासमाह— **संज्ञाया इति।** अध्ययनविध्युपात्तस्य पुमर्थान्वयध्रौव्यादनिर्धारितस्य तदयोगादन्तर्यामिरूपं निर्धारणीयमिति पक्षान्तरमाह—**अथवेति।** अप्रसिद्धत्वात् संज्ञायाः संज्ञिनाऽपि तथा भाव्यं व्याप्तेरित्याशङ्क्याह—**अन्तर्यामीति।** अर्थान्तरायोगे फलितमाह—**तस्मादिति।** तत्र शाकल्यवाक्यं

---

१. पूर्वत्र 'य एषोऽक्षिणि' इति परमात्मनः स्थाननिर्देशोपपादनाय 'यश्चक्षुषि तिष्ठन्' इत्यादिस्तस्यैव स्थाननिर्देशो दृष्टान्तितः। स इहाक्षिप्यत इति कल्पतर्वादौ।

तथा च श्रूयते–'पृथिव्येव यस्यायतनमग्निर्लोको मनो ज्योतिः' (बृ.उ. ३।९।१०) इत्यादि। स च कार्यकरणवत्त्वात् पृथिव्यादीनन्तस्तिष्ठन् यमयतीति युक्तं देवतात्मनो यमयितृत्वम्। योगिनो वा कस्यचित् सिद्धस्य सर्वानुप्रवेशेन यमयितृत्वं स्यात्। न तु परमात्मा प्रतीयेत, अकार्यकरणत्वादित्येवं प्राप्त इदमुच्यते–

योऽन्तर्याम्यधिदैवादिषु श्रूयते स परमात्मैव स्यान्नान्य इति। कुतः? तद्धर्मव्यपदेशात्। तस्य हि परमात्मनो धर्मा इह निर्दिश्यमाना दृश्यन्ते। पृथिव्यादि तावदधिदैवादिभेदभिन्नं समस्तं विकारजातमन्तस्तिष्ठन् यमयतीति परमात्मनो यमयितृत्वं धर्म उपपद्यते, सर्वविकारकारणत्वे सति सर्वशक्त्युपपत्तेः। 'एष त आत्माऽन्तर्याम्यमृतः' इति चात्मत्वामृतत्वे मुख्ये परमात्मन उपपद्येते। 'यं पृथिवी न वेद' इति च पृथिवीदेवताया अविज्ञेयमन्तर्यामिणं ब्रुवन् देवतात्मनोऽन्यमन्तर्यामिणं दर्शयति।

प्रकटार्थविवरणम्

कार्यकरणवत्त्वादुपाध्यायवन्नियन्तृत्वमपि संभवतीत्याह—**स चेति**। पृथिव्यादिदेवतायास्तत्र तत्र प्रतिनियतत्वात् सर्वानुप्रवेशेन नियन्तृत्वानुपपत्तेरेकत्वायोगाच्चापरितोषादाह—**योगिनो वेति**। ननु यस्येश्वरस्यानुग्रहाद् योगिनोऽपि नियमनादिसामर्थ्यं स किमित्युपेक्षित इत्याशङ्क्याह—**न तु परमात्मेति**। योगिनि सृष्ट्युत्तरकालीनतया सकलजगन्नियन्तृत्वानुपपत्तेः, इह चैकस्य सकलजगन्नियन्तृत्वप्रतीतेः, यमयितृत्वधर्मेण च धर्मिग्रहणे साधनसाध्यधर्मिग्रहणाद्वरं नित्यसिद्धयमयितृत्वधर्मिग्रहणं कल्पनालाघवात्; अतोऽन्तर्यामिशब्दः साधारणोऽपि परमात्मन्येव समन्वित इत्यभिप्रेत्याह—**एवं प्राप्त इदमुच्यत इत्यादिना**।

देवतापक्षे दूषणान्तरमाह—**यं पृथिवीति**। किं च देवताया विग्रहवत्त्वाददृष्टत्वादिव्यपदेशोऽपि न मुख्य उपपद्यत इत्याह—

भाष्यभावप्रकाशिका

मैवमित्याह—**अन्तर्यामीति**। अवयववृत्त्या प्रसिद्ध एव वर्तत इत्यर्थः। ननु ईश्वरपरिग्रहेऽप्येतद् घटत इति, अत आह—**स चेति**। ननु उपक्रमोपसंहाराभ्यामेक एवान्तर्यामितयाऽवगतः, तत्र कथं पृथिव्याद्यनेकदेवतापरिग्रह इति, अत आह—**योगिन इति**।

सर्वशक्त्युपपत्तेरिति। साधनाधीनशक्त्या तद्वतोऽवगमे साधनप्रतिपत्तेरप्यपेक्षणाद् बुद्धिगौरवम्, नित्यसिद्धशक्त्या परमेश्वरावगमे लाघवमित्यर्थः। ननु स्वस्य कर्मकर्तृत्वायोगात् स्वयं पृथिव्यादिदेवता स्वात्मानं न जानीयात्, यद्यन्यतः, कथं

न्यायनिर्णयः

प्रमाणयति—**तथा चेति**। आयतनं शरीरं, लोको लोक्यतेऽनेनेत्यसाधारणं, ज्योतिः साधारणं करणम्। सशरीरा देवता चक्षुर्मनोभ्यां सर्वं वेत्तीत्यर्थः। 'यस्तं विद्यात्स एव वेदिता' इत्यादि ग्रहीतुमादिपदम्। ईश्वरेऽपि सर्वमिदं स्यादित्याशङ्क्याह— **स चेति**। सर्वं वेत्तीत्यर्थः... उपक्रमोपसंहाराभ्यामेकस्मिन्नन्तर्यामिणि सिद्धे कथं पृथिव्याद्यनेकदेवतोक्तिरित्याशङ्क्याह—**योगिनो वेति**। यदनुग्रहाद् योगिनो नियमनादिसामर्थ्यं स किमित्युपेक्ष्यते, तत्राह—**न त्विति**। विशिष्टस्य योगिनोऽन्तर्यामिणो ध्यानार्थं ब्राह्मणमित्युपसंहर्तुमितिशब्दः।

सिद्धान्तयति—**एवमिति**। प्रतिज्ञातेऽर्थे प्रश्नपूर्वकं हेतुमुपस्थाप्य व्याचष्टे—**कुत इति**। इहेत्यन्तर्यामिग्रहणम्। के ते परस्यासाधारणा धर्मा येऽन्तर्यामिणि व्यपदिश्यन्ते? तत्र सर्वनियन्तृत्वं तावदाह— **पृथिव्यादीति**। साधनाधीनशक्त्या तद्वतो ज्ञाने तद्धियोऽपेक्षणाद्धीगौरवात्, नित्यसिद्धशक्त्येश्वरग्रहे लाघवात् तस्यैव सर्वनियन्तृतेति भावः। परस्यैवासाधारणधर्मद्वयमाह—**एष इति**। देवपक्षे दोषान्तरमाह—**यमिति**। एकस्य कर्मकर्तृत्वायोगात् पृथिव्यपि देवता न स्वात्मानं जानीयादिति कुतस्ततोऽन्यत्वम्,

पृथिवी देवता ह्यहमस्मि पृथिवीत्यात्मानं विजानीयात्। तथा 'अदृष्टोऽश्रुतः' इत्यादिव्यपदेशो रूपादिविहीनत्वात् परमात्मन उपपद्यत इति। यत्त्वकार्यकरणस्य परमात्मनो यमयितृत्वं नोपपद्यत इति। नैष दोषः। [1]यान् नियच्छति तत्कार्यकरणैरेव तस्य कार्यकरणवत्त्वोपपत्तेः। तस्याप्यन्यो नियन्तेत्यनवस्थादोषश्च न संभवति भेदाभावात्। भेदे हि सत्यनवस्थादोषोपपत्तिः। तस्मात् परमात्मैवान्तर्यामी।।१८।।

न च स्मार्तमतद्धर्माभिलापात्।।१९।।

स्यादेतत्– अदृष्टत्वादयो धर्माः सांख्यस्मृतिकल्पितस्य प्रधानस्याप्युपपद्यन्ते, रूपादिहीनतया तस्य

प्रकटार्थविवरणम्

तथा अदृष्ट इति। नियन्तृत्वे न कार्यकरणवत्त्वं प्रयोजकम्, किन्तु चिच्छक्तिमत्त्वम्; तच्चेश्वरस्यानपेक्षागमादेव सिद्धम्; न चापह्नोतुं शक्यं लौकिकसामान्यतोदर्शनेन, अन्यथाऽतिप्रसङ्गादित्याह—**नैष दोष इति।** अथाप्येवं तवाग्रहः अवश्यं कार्यकरणवत्त्वेन भवितव्यम्, तर्हि यथोपाध्यायो देहान्तरासंयुक्तोऽपि स्वदेहं नियमयति, तथेश्वरोऽपि देहान्तरासंयुक्त एवेतरदेहादिनियामको भविष्यतीत्याह—**यन्नियच्छतीति।** ननु स्वदेहनियन्तुरपि जीवस्यान्यो नियन्ता चेत् तर्हि तस्याप्यन्यः स्यादविशेषादित्याशङ्क्याह—**तस्याप्यन्य इति।** निरङ्कुशं सर्वनियन्तृत्वं श्रुतिः प्रतिपादयति। तत्र तस्याप्यन्यश्चेन्नियन्ता स एव सर्वनियन्ता स्यात्, न पूर्वः, तस्मात् सर्वनियन्तरि भेदाभावादनुमानस्य चागमबाधितत्वान्नानवस्थेत्यर्थः।

न च स्मार्तमतद्धर्माभिलापात्। शङ्कोत्तरं सूत्रं व्याचष्टे—**स्यादेतदिति।** इत्थं महदादिरूपेण प्रधानं किमिति प्रवर्तते, अन्यथा

भाष्यभावप्रकाशिका

ततोऽन्यत्वसिद्धिरिति? अत आह—**पृथिवीति।** अहमित्यात्मानुभवः सर्वेषामनुभवसिद्ध इति भावः।

ननु कार्यकरणनियामकस्य जीवस्यापि नियामकोऽन्योऽस्ति चेत्, अनवस्था स्यादिति, अत आह—**तस्यापीति।** जीवपरयोर्भेदाभावादित्यर्थः। अथवा नियन्तृनियन्तव्यकार्यकरणसङ्घातयोर्भेदानङ्गीकारान्नियन्तुरपि कार्यकरणसङ्घातः कार्यकरणान्तर [व] ताऽन्येन [न] नियन्तव्यः स्यादित्यनवस्था न सम्भवतीत्यर्थः। योगिपक्षे तु प्रसज्यत इत्याह—**भेदे हीति।**

न्यायनिर्णयः

तत्राह— **पृथिवीति।** अहमित्यात्मधीः सर्वेषामनुभवसिद्धा देवतायामपि नापह्नोतुं शक्येत्यर्थः। इतोऽपि परमात्मैवान्तर्यामीत्याह—**तथेति।** अकार्यकरणत्वान्न परोऽन्तर्यामी घटवदित्युक्तमनुवदति—**यत्त्विति।** किमीश्वरस्य नियम्यातिरिक्तदेहादिराहित्यं वा देहाद्यसंबन्धो वा तत्राभोक्तृत्वं वा हेतूक्रियते? नाद्यः; तक्षादेः स्वदेहादिनियमने देहान्तराद्यभावेन व्यभिचारात्। द्वितीये स्वाविद्यार्जितदेहादेरीश्वरेण संबन्धादसिद्धिः। तृतीये त्वभोक्तृत्वादीश्वरो न नियन्तेत्यत्राचेतनत्वमुपाधिः। न च मुक्तात्मसु साध्याव्याप्तिः। तेषामीश्वराभेदेन पक्षत्वादिति विवक्षन्नाह—**नैष इति।** ईश्वरस्य नियन्तृत्वे कार्यकरणवत्त्वमपि शक्यमस्मदादिवदनुमातुमित्याशङ्क्य नियम्यकार्यकरणवत्त्वे सिद्धसाधनम्, अतिरिक्ततद्वत्त्वे श्रुतिविरुद्धतेत्याह—**यानिति।** स्वदेहादिनियन्तुरपि जीवस्यान्यो नियन्ता चेत् तस्याप्यन्यो नियन्ता स्यादविशेषादित्याशङ्क्याह—**तस्यापीति।** निरङ्कुशं सर्वनियन्तृत्वं श्रौतम्। न च तादृशि सर्वनियन्तरि भेदः। न चानुमानं श्रुतिबाधितमुत्तिष्ठति। तन्नानवस्थेत्यर्थः। योगिपक्षे तु स्यादनवस्थेत्याह—**भेदे हीति।** तत्रापि नियन्तृत्वं क्वापि तिष्ठति चेदिष्टसिद्धिरिति भावः। सूत्रार्थमुपसंहरति—**तस्मादिति।**।१८।।

सूत्रव्यावर्त्यां शङ्कामाह—**स्यादेतदिति।** यौक्तिकेऽर्थे स्मृतिमपि संवादयति—**अप्रतर्क्यमिति।** इत्थं महदादिरूपेण प्रधानं

---

१. सशरीरो नियन्तेति लोकदृष्टिमनुसृत्येदमुक्तम्। वस्तुतस्तु चेतनसांनिध्यात् जडस्य व्यापारो नियमनम्, तच्छक्तिमत्त्वं च नियन्तृत्वम्। तच्चाचिन्त्यमायाशक्तेः परमात्मनः शरीरं विनैवोपपन्नमिति रत्नप्रभा।

तैरभ्युपगमात्। 'अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः' (मनु. १।५) इति हि स्मरन्ति। तस्यापि नियन्तृत्वं सर्वविकारकारणत्वादुपपद्यते। तस्मात् प्रधानमन्तर्यामिशब्दं स्यात्। 'ईक्षतेर्नाशब्दम्' (ब्र.सू. १।१।५) इत्यत्र निराकृतमपि सत् प्रधानमिहादृष्टत्वादिव्यपदेशसंभवेन पुनराशङ्क्यते। अत उत्तरमुच्यते– न च स्मार्तं प्रधानमन्तर्यामिशब्दं भवितुमर्हति। कस्मात्? अतद्धर्माभिलापात्। यद्यप्यदृष्टत्वादिव्यपदेशः प्रधानस्य संभवति, तथापि न द्रष्टृत्वादिव्यपदेशः संभवति, प्रधानस्याचेतनत्वेन तैरभ्युपगमात्। 'अदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता' (बृ.उ. ३।७।२३) इति हि वाक्यशेष इह भवति। आत्मत्वमपि न प्रधानस्योपपद्यते।।१९।।

यदि प्रधानमात्मत्वद्रष्टृत्वाद्यसंभवान्नान्तर्याम्यभ्युपगम्यते, शारीरस्तर्ह्यन्तर्यामी भवतु। शारीरो हि चेतनत्वाद् द्रष्टा श्रोता मन्ता विज्ञाता च भवति, आत्मा च प्रत्यक्त्वात्। अमृतश्च, धर्माधर्मफलोपभोगोपपत्तेः। अदृष्टत्वादयश्च धर्माः शारीरे प्रसिद्धाः, दर्शनादिक्रियायाः कर्तरि

प्रकटार्थविवरणम्

कस्मान्न प्रवर्तते, इति तर्कस्य विषयो न भवति, मूढत्वादित्याह—**अप्रतर्क्यमिति**। रूपादिहीनतयाऽविज्ञेयं चक्षुराद्यग्राह्यम्। प्रसुप्तमिव सर्वतः सर्वासु दिक्षु; जडमित्यर्थः।

उत्तरसूत्रनिरस्यामाशङ्कामाह—**यदि प्रधानमित्यादिना**। अन्यथाऽकृताभ्यागमकृतविप्रणाशप्रसङ्गादमृत इत्यर्थः। क्रिया हि सर्वा कर्मकारकं व्याप्नोति, न स्वाश्रयम्; न ह्यसिधारया सैवासिधारा छिद्यत इत्याह—**कर्तरि प्रवृत्तिविरोधादिति**। लौकिक्या दृष्टेः द्रष्टारं तयैव दृष्ट्या त्वं न पश्येः न शक्नोषि द्रष्टुमित्यर्थः।

भाष्यभावप्रकाशिका

न च स्मार्तमतद्धर्माभिलापात्।।१९।। शारीरश्चोभयेऽपि हि भेदेनैनमधीयते।।२०।। कर्तर्यात्मन्यन्तर्यामित्वमप्युपपद्यत

न्यायनिर्णयः

किमिति प्रवर्तते, कस्मान्नान्यथेति तर्कस्याविषयो गूढत्वादित्यर्थः। रूपादिराहित्यादविज्ञेयं चक्षुराद्यग्राह्यम्, प्रसुप्तमिव सर्वतः सर्वासु दिक्षु जडिमव्याप्तमित्यर्थः। कथं तस्याचेतनस्यान्तर्यामित्वं, तत्राह—**तस्येति**। अदृष्टत्वादीनां प्रधाने संभवे फलितमाह—**तस्मादिति**। प्रागेव प्रत्युक्तं प्रधानं किमिति पुनः शङ्क्यते, तत्राह—**ईक्षतेरिति**। प्रासङ्गिकशङ्कोत्तरत्वेन सूत्रमादाय व्याकरोति—**अत इति**। अदृष्टत्वादिसंभवात् प्रधानस्यान्तर्यामित्वमुक्तमित्याशङ्क्य हेतुमाह—**कस्मादिति**। हेत्वसिद्धिं शङ्कित्वा तदर्थमाह—**यद्यपीति**। अन्तर्यामिणि द्रष्टृत्वादिव्यपदेशं दर्शयति—**अदृष्ट इति**। इहेति ब्राह्मणोक्तिः। प्रधानपक्षे दोषान्तरमाह—**आत्मत्वमिति**।।१९।।

उत्तरसूत्रव्यावर्त्यां शङ्कामाह—**यदीति**। द्रष्टृत्वाद्यसंभवस्य तत्रापि तुल्यत्वमाशङ्क्योक्तम्—**शारीरो हीति**। तथापि कथं तत्रामृतत्वम्, स हि देहापाये म्रियते, तत्राह—**अमृतश्चेति**। अन्यथाऽकृतागमादिप्रसङ्गात्, 'जीवापेतं वाव' इत्यादिश्रुतेश्चेत्यर्थः। तथापि कथमदृष्टत्वादीनां तत्रोपपत्तिः तस्याहंधीव्याप्यत्वात्, तत्राह—**अदृष्टत्वेति**। सकर्मिका क्रिया कर्म व्याप्नोति, न कर्तारम्; तेन कर्तर्यात्मनि दर्शनादिवृत्तौ कर्तृत्वेन गुणत्वं कर्मत्वेन प्राधान्यं चेत्येकस्यां क्रियायां युगपद्गुणप्रधानत्वविरोधादिति हेतुमाह—**दर्शनादीति**। जीवस्यादृष्टत्वादयो न केवलं यौक्तिकाः, किंतु श्रौताश्चेत्याह—**नेति**। लौकिक्या दृष्टेर्बुद्धिपरिणतेर्द्रष्टारमात्मानं तयैव

प्रवृत्तिविरोधात्। 'न दृष्टेर्द्रष्टारं पश्येः' (बृ. उ. ३।४।२) इत्यादिश्रुतिभ्यश्च। तस्य च कार्यकरणसंघातमन्तर्यमयितुं शीलम्, भोक्तृत्वात्। तस्माच्छारीरोऽन्तर्यामीत्यत उत्तरं पठति—

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते।।२०।।

नेति पूर्वसूत्रादनुवर्तते। शारीरश्च नान्तर्यामीष्यते। कस्मात्? यद्यपि द्रष्टृत्वादयो धर्मास्तस्य संभवन्ति तथापि घटाकाशवदुपाधिपरिच्छिन्नत्वान्न कात्स्न्र्येन पृथिव्यादिष्वन्तरवस्थातुं नियन्तुं च शक्नोति। अपि चोभयेऽपि हि शाखिनः काण्वा माध्यंदिनाश्चान्तर्यामिणो भेदेनैनं शारीरं पृथिव्यादिवदधिष्ठानत्वेन नियम्यत्वेन चाधीयते–'यो विज्ञाने तिष्ठन्' (बृ.उ. ३।७।२२) इति काण्वाः। 'य आत्मनि तिष्ठन्' इति माध्यंदिनाः। 'य आत्मनि तिष्ठन्' इत्यस्मिंस्तावत् पाठे भवत्यात्मशब्दः शारीरस्य वाचकः। 'यो विज्ञाने तिष्ठन्' इत्यस्मिन्नपि पाठे विज्ञानशब्देन शारीर उच्यते। विज्ञानमयो हि शारीरः। तस्माच्छारीरादन्य ईश्वरोऽन्तर्यामीति सिद्धम्।

कथं पुनरेकस्मिन् देहे द्वौ द्रष्टारावुपपद्येते, यश्चायमीश्वरोऽन्तर्यामी यश्चायमितरः शारीरः। का

प्रकटार्थविवरणम्

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते। अपिशब्दसूचितं हेतुं[1] व्याख्याय कण्ठोक्तं व्याचष्टे—**अपि चोभयेऽपीति।** आत्मविज्ञानशब्दाभ्यां बुद्धिरुच्यत इत्याशङ्क्याह—**यो विज्ञान इति।** आत्मनीत्यात्मशब्दस्य चेतने रूढत्वात् तदनुसारेण विज्ञानशब्देनापि बुद्ध्युपाधिक एवोच्यत इत्यर्थः। "भेदेनैनम्" इति सूत्रात् तात्त्विक एव भेदोऽत्र विवक्षित इति मन्दबुद्धेः कस्यचिदाशङ्का जायते, तन्निरासाय चोद्यमुद्भावयति—**कथं पुनरिति।** श्रुत्योक्तत्वान्नानुपपत्तिरित्याह—**का पुनरिति।** पूर्वमपि

भाष्यभावप्रकाशिका

इत्याह—**तस्य चेति।** सूत्राद् बहिरेव परिहारमाह—**यद्यपीति।**

न्यायनिर्णयः

दृष्ट्या त्वं न पश्येर्न शक्नोषि द्रष्टुमित्यर्थः। 'न श्रुतेः श्रोतारम्' इत्यादिसंग्रहार्थमादिपदम्। तथापि कथं तस्यान्तर्यामित्वम् नियम्यनिविष्टत्वात्, तत्राह—**तस्येति।** अन्तर्यामिधर्माणां शारीरे संभावनाफलमाह—**तस्मादिति।** सूत्रमवतारयति—**अत इति।** अपेक्षितं पूरयित्वा विभजते—**नेत्यादिना।** चकारादनुवृत्तिः। द्रष्टृत्वादिधर्माणां संभवात् तदन्तर्यामित्वं दुर्वारमिति शङ्कते—**कस्मादिति।** चशब्दसूचितं ब्रुवन् परिहरति—**यद्यपीति।** उभयेऽपीत्यादि व्याकरोति—**अपि चेति।** माध्यन्दिनपाठे भेदोक्तिं व्यनक्ति—**य आत्मनीति।** काण्वानां पाठे भेदोक्तिं व्यनक्ति—**यो विज्ञान इति।** काण्वपाठे शारीरवाचिपदाभावात् कुतो भेदोक्तिः, तत्राह—**विज्ञानेति।** विज्ञानशब्दस्य बुद्ध्यर्थस्य कथं शारीरे वृत्तिरित्याशङ्क्य रूढ्यभावेऽपि वृत्त्यन्तरमाह—**विज्ञानेति।** भेदोक्तिफलमाह—**तस्मादिति।**

भेदेनेत्यादिसूत्रात्तात्त्विकभेदाशङ्कां निरसितुं शङ्कते—**कथमिति।** द्रष्टृद्वयमेव विशिनष्टि—**यश्चेति।** न खल्वेकस्मिन् देहे द्रष्टृद्वयं युक्तम्, विरुद्धाभिप्रायानेकचेतनाधिष्ठितस्य देहस्याव्यवस्थिततत्त्वप्रसङ्गादित्यर्थः। कश्चित् कार्यकरणसंहतो भोक्ता,

---

१. हेतुम् = अतद्धर्माभिलापादिति हेतुम्। तदपि पूर्वसूत्रादनुवर्तत इति भावः।

अत्र सिद्धान्ते परमात्मनि द्रष्टृत्वादिव्यपदेशो जीवाभेदाभिप्रायकः। अदृष्टत्वादिव्यपदेशश्च लौकिकदर्शनादिपक्षे चाक्षुषादिवृत्त्यविषयत्वाभिप्रायः। शास्त्रीयदर्शनपक्षे वृत्त्यभिव्यक्तचैतन्याविषयत्वाभिप्रायः। द्र. ब्र. वि.

पुनरिहानुपपत्तिः? 'नान्योऽतोऽस्ति द्रष्टा' इत्यादि श्रुतिवचनं विरुध्येत। अत्र हि प्रकृतादन्तर्यामिणोऽन्यं द्रष्टारं, श्रोतारं, मन्तारं, विज्ञातारं चात्मानं प्रतिषेधति। नियन्त्रन्तरप्रतिषेधार्थमेतद्वचनमिति चेत्, न; नियन्त्रन्तराप्रसङ्गादविशेषश्रवणाच्च। अत्रोच्यते– अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्तोऽयं शारीरान्तर्यामिणोर्भेदव्यपदेशो न पारमार्थिकः। एको हि प्रत्यगात्मा भवति। न द्वौ प्रत्यगात्मानौ संभवतः। एकस्यैव तु भेदव्यवहार उपाधिकृतः, यथा घटाकाशो महाकाश इति। ततश्च ज्ञातृज्ञेयादिभेदश्रुतयः, प्रत्यक्षादीनि च प्रमाणानि, संसारानुभवो, विधिप्रतिषेधशास्त्रं चेति सर्वमेतदुपपद्यते। तथा च श्रुतिः–'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यविद्याविषये सर्वं व्यवहारं दर्शयति। 'यत्र त्वस्य

प्रकटार्थविवरणम्

श्रुत्या तात्त्विको भेदो नोक्त एव, वाक्यशेषविरोधादित्याह—**नान्योऽतोऽस्तीति**। गत्यन्तरं शङ्कते—**नियन्त्रन्तरेति**। तर्ह्यप्राप्तप्रतिषेधप्रसङ्ग इत्याह—**नेति**। किं चाविशेषेण द्रष्टृमात्रभेदनिरासाय प्रवृत्ता श्रुतिर्विशेषे व्यवस्थाप्यमाना पीडिता स्यादित्याह—**अविशेषेति**। तस्मात् तात्त्विकद्रष्टृभेदे प्रमाणाभावादेकस्मिन् देहे चैकस्यैव द्रष्टुः प्रसिद्धेः कथं द्वौ द्रष्टारावुच्येते इति सूक्तम्। सत्यम्, तात्त्विको द्रष्टृभेदो नास्त्येव। तथापि यथोदकाधारे निजाकाशे विद्यमानेऽपि तत्रैव प्रतिबिम्बाकाशो वर्तते, तथा मायोपाधिके नियन्तरीश्वरे विद्यमानेऽपि मायाप्रदेशरूपाज्ञानेषु प्रतिबिम्बितानां जीवानामप्यवस्थानं नियम्यानां न विरुध्यत इत्यभिप्रेत्याह—**अत्रोच्यत इति**। ननु नियम्यनियामकभावेन भेदश्चेत् तर्हि स्वरूपैक्ये किं प्रमाणमित्याशङ्क्याह—**एको हीति**। "एको देवस्सर्वभूतेषु गूढः" इत्यादिश्रुतेरेक एव चिद्धातुरुपाधिं प्रत्युपाधिं प्रत्यञ्चति प्रतिबिम्बित इति प्रत्यगात्मोच्यते। न द्वौ प्रत्यगात्मानौ संभवतः, प्रमाणाभावात्, वस्तुतः परिच्छिन्नतयाऽनात्मत्वप्रसङ्गाच्चेत्यर्थः। ननु स्वरूपैक्ये सति तस्य भेदायोगात् सकलव्यवहारविलोपः स्यादित्याशङ्क्याह—**एकस्य त्विति**। तस्मादविद्यासिद्धेनैव भेदेन नियम्यनियामकभाव इति सिद्धम्।

भाष्यभावप्रकाशिका

कश्चित् कार्यकरणसहितः पश्यति, अन्यस्तु तद्रहितः पश्यतीत्यभिप्रेत्याह—**का पुनरिति**। तत्तुल्यस्य द्रष्ट्रन्तरस्य निवारकमेतद्वचनम्, अस्मिन् ग्रामे देवदत्त एव पुरुष इत्यादिव्यपदेशवदिति शङ्कते—**नियन्त्रन्तरेति**। सर्वनियन्तुः स्वनियतेन नियन्तव्यत्वाशङ्काया असम्भवान्नान्योऽतोस्ति नियन्ता द्रष्टेति विशेषाश्रुतेश्च मैवमित्याह—**नेति**। "आत्मनि तिष्ठन्" इत्यौपाधिकविषयं वचनम्, "नान्योऽतोस्ती"ति पारमार्थिकविषयमित्याह—**एको हीति**। एकत्वमेव पारमार्थिकं चेत्, कथं तर्हि व्यवहार इति? अत आह—**एकस्यैवेति**। ननु कथं पारमार्थिकभेदमन्तरेण ज्ञातृज्ञेयादिभाव इत्याशङ्क्य, औपाधिकत्वेऽपि सर्वमुपपद्यत इत्याह—**ततश्चेति**। इति पञ्चममन्तर्याम्यधिकरणम्।

न्यायनिर्णयः

तद्रहितोऽन्योऽधिष्ठाता पश्यत्येवेति विभागे नावद्यमिति शङ्कते—**का पुनरिति**। अनुपपत्तिमाह—**नेति**। विरोधं स्फोरयितुं प्रतीतमर्थमाह—**अत्रेति**। अस्मिन् ग्रामे मैत्र एवाद्वितीय इतिवत् तत्तुल्यद्रष्ट्रन्तरनिवारकमेव तदिति शङ्कते—**नियन्त्रन्तरेति**। सर्वनियन्तुः स्वनियन्त्रा नियन्तव्यत्वशङ्काऽभावात्, नान्योऽतोऽस्ति नियन्ता द्रष्टेति विशेषाश्रुतेश्च नैवमित्याह—**नेति**। आत्मनि तिष्ठन्नित्यौपाधिकभेदार्थं वाक्यं, 'नान्योऽतोऽस्ति' इति तु तत्त्वविषयमिति परिहरति—**अत्रेति**। भेदोक्तेस्तत्त्वविषयत्वं, निषेधोक्तेश्चातत्त्वविषयतेति वैपरीत्यमाशङ्क्याह—**एको हीति**। प्रत्यक्त्वात्मत्वयोरेकत्रैव मुख्यत्वादित्यर्थः। एकत्वमेव तत्त्वं चेत् कुतो भेदोक्तिः, तत्राह—**एकस्येति**। औपाधिकभेदोक्तिमुदाहरति—**यथेति**। तात्त्विकभेदाभावे कथं श्रुत्याद्युपपत्तिः, तत्राह—**ततश्चेति**। प्राप्तृप्राप्तव्यादिसंग्रहार्थमादिपदम्। आविद्याद्भेदाद् व्यवहारमात्रसिद्धावन्वयव्यतिरेकश्रुतिमाह—**तथा चेति**। आविद्य-भेदानुवादेन नियन्तृनियम्यत्वम्, वस्तुतस्त्वद्वितीयः परमात्मा, तत्राविद्यया सर्वनियन्तर्यन्वितमन्तर्यामिब्राह्मणम्, तस्यानुध्यानादापरोक्ष्यान्मोक्ष इति भावः॥२०॥ इति पञ्चममन्तर्याम्यधिकरणम्॥

सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इति विद्याविषये सर्वं व्यवहारं वारयति।।२०।।

।।इति पञ्चममन्तर्याम्यधिकरणम्।।

६।। अदृश्यत्वाधिकरणम्।।सू. २१-२३।।

अदृश्यत्वादिगुणको धर्मोक्तेः।।२१।।

'अथ परा यया तदक्षरमधिगम्यते' 'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः' (मु.उ. १।१।५,६) इति श्रूयते। तत्र संशयः-

शारीरकन्यायसंग्रहः

अदृश्यत्वादिगुणको धर्मोक्तेः।।२१।। विशेषणभेदव्यपदेशाभ्यां च नेतरौ।।२२।। रूपोपन्यासाच्च।।२३।। द्वयोः साधारणस्य प्रमाणस्यान्यतरस्मिन् नियामकाकाङ्क्षायामविवक्षितश्रुतिप्रत्यभिज्ञानेनान्यतरस्मिन् नियमनाद् वरं विवक्षितलिङ्गप्रत्यभिज्ञानेनान्यतरस्मिन्नियमनम्, तात्पर्यवत्त्वात्—इति न्यायेन, भूतयोनिवाक्यगतस्य ब्रह्मप्रधानयोः साधारणलिङ्गस्य ''अक्षरात्परतः परः'' इति भूतयोन्यक्षरशब्दमात्रप्रत्यभिज्ञानेन ब्रह्मणोऽर्वाचीने प्रधाने नियमनं प्राप्तम्, तद् बाधित्वा एकविज्ञानेन सर्वविज्ञानाय प्रतिपिपादयिषितसर्वजगत्प्रकृतित्वप्रत्यभिज्ञानेन भूतयोनिगतम् अदृश्यत्वादिलिङ्गं सर्वज्ञब्रह्मपरतया नियमितम्।

अथ वा ''अक्षरात्परतः परः'' इति भूतयोनौ प्रधानेऽप्यक्षरशब्देन प्रत्यभिज्ञाऽस्ति; ''येनाक्षरं पुरुषं वेद सत्यम्'' इति चेतनगततयाऽक्षरशब्दः प्रत्यभिज्ञायते; द्वयोश्च शब्दप्रत्यभिज्ञयोः तुल्ययोः सर्वज्ञभूतयोन्येकत्वलिङ्गेन जगत्प्रकृतित्वप्रत्यभिज्ञानेन भूतयोनिर्ब्रह्म इति नियम्यते—इति न्यायद्वयमुक्तम्।।

प्रकटार्थविवरणम्

अदृश्यत्वादिगुणको धर्मोक्तेः। आथर्वणगतं विषयवाक्यं पठति—**अथ परेति।** अद्रेश्यमदृश्यं ज्ञानेन्द्रियाविषयः। कर्मेन्द्रियाविषयोऽग्राह्यम्; अगोत्रं वंशहीनम्; अवर्णं जातिहीनम्। न केवलमिन्द्रियाविषयः इन्द्रियहीनं चेत्याह—**अचक्षुःश्रोत्रम्** न विद्येते चक्षुःश्रोत्रे अस्येति, न विद्यते पाणिपादं यस्य तदपाणिपादम्; कर्मेन्द्रियोपलक्षणम्; नित्यं विनाशाभावोपलक्षितसत्ताकम्; विभुम् प्रभुं, सर्वगतं सर्वाव्यवधानात्, सूक्ष्मं दुर्ज्ञानत्वात्; तदव्ययमपक्षयाभावात्; यदक्षरं भूतयोनिं भूतकारणं धीराः परिपश्यन्ति तदक्षरम्, यया विद्ययाऽधिगम्यते सा परेत्यर्थः। अदृश्यत्वादिसाधारणधर्मनिर्देशात् संशयमाह—**तत्रेति।** पूर्वत्र

भाष्यभावप्रकाशिका

अदृश्यत्वादिगुणको धर्मोक्तेः॥२१॥ न दृश्यमदृश्यम् = ज्ञानेन्द्रियाविषयः। अग्राह्यम् = कर्मेन्द्रियाविषयः।

न्यायनिर्णयः

अदृष्टत्वादीनां प्रधानगामित्वेऽपि द्रष्टृत्वादीनां तत्रायोगात्र तदन्तर्यामीत्युक्तम्। तर्हि भूतयोनिवाक्ये द्रष्टृत्वादीनामनुक्तेरदृश्यत्वादिगुणको भूतयोनिः प्रधानमेवेत्याशङ्क्याह—**अदृश्यत्वादीति।** अथर्वणवाक्यमाह—**अथेति।** अपरविद्योक्त्य-नन्तरं या परा विद्योच्यते तां विशिनष्टि—**ययेति।** अक्षरं वर्णसमुदायाद् व्यवच्छिनत्ति—**यदिति।** अद्रेश्यमदृश्यं ज्ञानेन्द्रियाविषयः, अग्राह्यं कर्मेन्द्रियाविषयः, अगोत्रं वंशशून्यम्, अवर्णं जातिहीनम्। न केवलमिन्द्रियाविषयः, तद्धीनं चेत्याह—**अचक्षुरिति।** न विद्येते चक्षुःश्रोत्रे यस्य तत्तथा। चक्षुःश्रोत्रोक्तिरनुक्तज्ञानेन्द्रियोपलक्षणार्थम्। कर्मेन्द्रियराहित्यमाह—**अपाणीति।** पाणिश्च पादश्च पाणिपादं तत्रास्ति यस्य तत्तथा। उभयोक्तिरनुक्तकर्मेन्द्रियोपलक्षणम्। नित्यमनाशोपलक्षितसत्ताकम्, विभुं प्रभुम्, सर्वगतं सर्वकल्पनाधिष्ठानम्, सुसूक्ष्मं दुर्ज्ञानत्वात्, तदव्ययमपक्षयाभावात्, यथोक्तमक्षरं भूतयोनिं भूतकारणं धीराः पण्डिताः पश्यन्ति, तदक्षरं ययाऽधिगम्यते सा परा विद्येत्यर्थः। अदृश्यत्वादिसाधारणधर्मदृष्ट्या संशयमाह—**तत्रेति।** भूतयोनिः सप्तम्यर्थः।

किमयमद्रेश्यत्वादिगुणको भूतयोनिः प्रधानं स्यादुत शारीर आहोस्वित् परमेश्वर इति। तत्र प्रधानमचेतनं भूतयोनिरिति युक्तम्,[१] अचेतनानामेव तद्दृष्टान्तत्वेनोपादानात्- 'यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति। यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् संभवतीह विश्वम्' (मु.उ. १।१।७) इति। ननूर्णनाभिः पुरुषश्च चेतनाविह दृष्टान्तत्वेनोपात्तौ। नेति ब्रूमः। न हि केवलस्य चेतनस्य तत्र सूत्रयोनित्वं केशलोमयोनित्वं चास्ति। चेतनाधिष्ठितं ह्यचेतनमूर्णनाभिशरीरं सूत्रस्य योनिः, पुरुषशरीरं च केशलोम्नामिति प्रसिद्धम्। अपि च पूर्वत्राद्दृष्टत्वाद्यभिलापसंभवेऽपि द्रष्टृत्वाद्यभिलापासंभवान्न प्रधानमभ्युपगतम्। इह त्वदृश्यत्वादयो धर्माः प्रधाने संभवन्ति। न चात्र विरुध्यमानो धर्मः कश्चिदभिलप्यते। ननु 'यः सर्वज्ञः सर्ववित्' (मु.उ. १।१।९) इत्ययं वाक्यशेषोऽचेतने प्रधाने न संभवति, कथं प्रधानं भूतयोनिः प्रतिज्ञायत इति। अत्रोच्यते-'यया तदक्षरमधिगम्यते' 'यत्तदद्रेश्यम्'

प्रकटार्थविवरणम्

साधारणस्याप्यन्तर्यामिशब्दस्य लाघवतर्कसाहाय्यान्नित्यसिद्धनियन्तृत्वोपादानेनेश्वरपरत्वं प्रत्यपीपदत्। इहापि तर्हि साधारणस्य [अ]दृश्यत्वादिधर्मस्याचेतनानां दृष्टान्तत्वेनोपादानलक्षणतर्कबलात् प्रधाननिष्ठत्वमिति पूर्वपक्षमाह—**तत्र प्रधानमिति।** ऊर्णनाभिर्लूताकीटः स्वशरीराव्यतिरिक्तांस्तन्तून् सृजत्युपसंहरति चेत्यर्थः। नन्वित्यादिना दृष्टान्तमाक्षिप्य समाधत्ते। ननु पूर्वत्र निरस्तं प्रधानं कथं पुनरिहाशङ्क्यत इत्याशङ्क्याह—**अपि चेति।** यद्यपि स्ववाक्ये प्रधाने विरुध्यमानो धर्मो नास्ति, तथापि वाक्यशेषे श्रूयत इत्याह—**ननु य इति।** वाक्यशेषस्य जगन्निमित्तकारणेश्वरपरत्वान्न तेन विरोध इत्याह—**अत्रोच्यत इति।** पक्षान्तरमाह—

भाष्यभावप्रकाशिका

अचेतनानामिति सारूप्यं विवक्षितम्। ननु केवलाचेतनस्यापि न कारणत्वम्; शवशरीरेऽदर्शनादित्याशङ्क्याह—**चेतनेति।**

ननु पूर्वाधिकरणे प्रधानस्य निराकृतत्वात् किं पिष्टपेषणेनेति? अत आह—**अपि चेति। विरुध्यमान इति** द्रष्टृत्वादिरुच्यते। भूतयोनेरस्य पञ्चम्यन्ताक्षरशब्दश्रुत्या प्रत्यभिज्ञातत्वात् ततः परस्तात् प्रथमान्तेन परशब्देन निर्दिष्टस्य सर्वज्ञत्वमित्याह—**अत्रोच्यत**

न्यायनिर्णयः

साधारणस्याप्यन्तर्यामिशब्दस्य लाघवसाहाय्यान्नित्यसिद्धनियन्तृत्वादिनेश्वरपरत्वमुक्तम्। इहापि साधारणादृश्यत्वादिधर्मस्याचेतनदृष्टान्तोपादानबलात् प्रधाननिष्ठतेति पूर्वपक्षमाह—**तत्रेति।** भूतयोनिवाक्यस्य निर्विशेषे ब्रह्मण्यन्वयोक्तेः संगतयः। पूर्वपक्षे प्रधानस्य शारीरस्य वा ध्यानं, सिद्धान्ते निर्विशेषवस्तुधीरिति फलम्। दृष्टान्तदार्ष्टान्तिकयोस्तुल्यतानियमाद् दृष्टान्तस्याचेतनत्वाद् दार्ष्टान्तिकस्यापि भूतयोनेरचेतनत्वमिति हेतुमाह—**अचेतनानामिति।** ऊर्णनाभिर्लूताकीटः स्वदेहाव्यतिरेकिणस्तन्तून् सृजत्युप-संहरति चेत्यर्थः। सतो विद्यमानात्, जीवत इति यावत्। इहेति सर्गावस्थोक्तिः। दृष्टान्तमाक्षिप्य समाधत्ते—**नन्विति।** इहेति। अक्षराद्विश्वोत्पत्तावित्यर्थः। केवलचेतनस्य वा कारणत्वं, चेतनाधिष्ठिताचेतनस्य वा? तत्राद्यं प्रत्याह—**न हीति।** शरीरस्यापि तत्रान्वयव्यतिरेकित्वादित्यर्थः। द्वितीयमङ्गीकरोति—**चेतनेति।** दार्ष्टान्तिकेऽपि चेतनाधिष्ठितं प्रधानं जगद्धेतुरिति भावः। पूर्वं प्रधानस्य प्रत्युक्तत्वात् कथं पुनस्तदाशङ्का, तत्राह—**अपि चेति।** इहेति त्रेति च भूतयोनिवाक्योक्तिः। विरुध्यमानत्वम प्रधानविषयत्वम्। यद्वाऽत्रेति प्रधानमुक्तम्। विरुध्यमानत्वं धर्मस्य तस्मिन्नसंभवित्वम्। स्ववाक्ये प्रधाने विरुद्धधर्माभावेऽपि वाक्यशेषे सोऽस्तीति शङ्कते—**नन्विति।** भूतयोनेरक्षरस्य पञ्चम्यन्ताक्षरश्रुत्या प्रत्यभिज्ञानात् प्रथमान्तपरशब्दोक्तस्य सर्वज्ञत्वादीति

---

१. 'अचेतनानामेव तद्दृष्टान्तत्वेनोपादानात्' इति भाष्यं युक्तिद्वयपरम्— अचेतनदृष्टान्तप्रायदर्शनात् भूतयोनेरचेतनत्वमित्येका युक्तिः। दृष्टान्ते कार्यकारणयोरचेतनत्वेन सारूप्यदर्शनात् भूतयोनेरपि तथा कार्यसारूप्यमित्यन्या युक्तिः। इति भामत्याशयः कल्पतरौ।

इत्यक्षरशब्देनादृश्यत्वादिगुणकं भूतयोनिं श्रावयित्वा पुनरन्ते श्रावयिष्यति-- 'अक्षरात्परतः परः' (मु.उ. २।१।२) इति। तत्र यः परोऽक्षराच्छ्रुतः स सर्वज्ञः सर्ववित् संभविष्यति। प्रधानमेव त्वक्षरशब्दनिर्दिष्टं भूतयोनिः। यदा तु योनिशब्दो निमित्तवाची तदा शारीरोऽपि भूतयोनिः स्यात् धर्माधर्माभ्यां भूतजातस्योपार्जनादिति। एवं प्राप्तेऽभिधीयते--

योऽयमदृश्यत्वादिगुणको भूतयोनिः स परमेश्वर एव स्यान्नान्य इति। कथमेतदवगम्यते? धर्मोक्तेः। परमेश्वरस्य हि धर्म इहोच्यमानो दृश्यते-'यः सर्वज्ञः सर्ववित्' इति। न हि प्रधानस्याचेतनस्य, शारीरस्य

प्रकटार्थविवरणम्

यदा त्विति। प्राण्यदृष्टनिमित्ता हि सर्गादिसिद्धिः, सूर्यादिप्रवृत्तिनियतिश्चेत्यर्थः।

सिद्धान्तमवतारयति—**एवं प्राप्तेऽभिधीयत इति।** यदुपक्रमे संदिग्धं तद् वाक्यशेषवशान्निर्णीयते। यथा "अक्ताः शर्करा उपदधाति' इत्यत्र 'तेजो वै घृतम्' इति शेषवशान्निर्णयः। तथेहापि साधारणस्योपक्रमगतस्यादृश्यत्वादेः वाक्यशेषाद् ब्रह्मपरता

भाष्यभावप्रकाशिका

इत्यादिना। ननु लिङ्गप्रत्यभिज्ञानं दृश्यते—यस्मादक्षरस्य जगद्योनिभावमुक्त्वा तस्यानन्तरं "यःसर्वज्ञः" इत्यादिश्रुत्या सर्वज्ञस्य स उच्यते—"तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते" इति, मैवम्; अक्षरश्रुतिप्रत्यभिज्ञातो लिङ्गप्रत्यभिज्ञाया दुर्बलत्वात्। ननु "येनाक्षरं पुरुषं वेद सत्यम्" इति चेतनेऽपि भूतयोनौ श्रुत्या प्रत्यभिज्ञानं दृश्यते, ततश्च जगत्प्रकृतित्वलिङ्गानुगृहीतश्रुतिप्रत्यभिज्ञया केवलश्रुतिप्रत्यभिज्ञाया बाधः—इति, मैवम्; "तस्मादेतदि"ति निमित्तकारणेऽपि पञ्चमीसम्भवात्। ननु तथापि साम्यमेव प्रत्यभिज्ञायाः स्यात्, मैवम्; अचेतनदृष्टान्तानुगृहीतप्रत्यभिज्ञायाः प्राबल्यात् प्रधानमेव भूतयोनिरित्याह—**प्रधानमेवेति।** पूर्वपक्षान्तरं दर्शयति—**यदेति।**

न्यायनिर्णयः

वाक्यशेषस्याक्षरातिरिक्तं विषयं दर्शयन्नाह—**अत्रेति।** अक्षरस्य जगद्योनित्वमुक्त्वा 'यः सर्वज्ञः सर्ववित्' इति सर्वज्ञस्य तदुक्तेर्लिङ्गप्रत्यभिज्ञानादक्षरस्यैव सर्वज्ञत्वादीति चेत्, न, अक्षरश्रुतिप्रत्यभिज्ञातो लिङ्गप्रत्यभिज्ञाया दुर्बलत्वात्। 'येनाक्षरं पुरुषं वेद' इति चेतनेऽपि भूतयोनौ श्रुत्या प्रत्यभिज्ञानात्, जगत्प्रकृतित्वलिङ्गानुगृहीतश्रुतिप्रत्यभिज्ञया केवलश्रुतिप्रत्यभिज्ञा बाध्येति चेत्, न, तस्मादिति निमित्तेऽपि पञ्चमीसंभवात्। न चैवमपि प्रत्यभिज्ञायाः साम्यम्, अचेतनदृष्टान्तानुगृहीतप्रत्यभिज्ञाप्राबल्यात्। तस्मात् प्रधानमेव भूतयोनिरित्याह—**प्रधानमेवेति।** सर्वज्ञाद् विवेकायात्र प्रधानं ग्राह्यमित्युक्त्वा जीवो देहाद्यतिरिक्तोऽभ्युदयनिःश्रेयसाप्तये निरूप्यतेऽत्रेति पक्षान्तरमाह—**यदेति।** योनिशब्दस्य निमित्तार्थत्वे च प्रधानस्य सर्वज्ञाद् विविक्तस्य, जीवस्य वा देहाद्यतिरिक्तस्य द्विविधपुमर्थाप्तये ध्यानार्थमेतदित्युपसंहर्तुमितिशब्दः।

सिद्धान्तसूत्रमवतारयति—**एवमिति।** तत्र प्रतिज्ञां व्याचष्टे—**योऽयमिति।** प्रधानादौ संभवति नियमासिद्धिरित्याह—**कथमिति।** नियामकं हेतुमवतार्य व्याचष्टे—**धर्मेति।** भूतयोनिरिहेत्युक्तः। हेतोरन्यथासिद्धिं धुनीते—**न हीति।** 'अक्ताः शर्करा उपदधाति' इत्यत्र 'तेजो वै घृतम्' इति शेषान्निर्णयवदिहापि साधारणोपक्रमस्थस्यादृश्यत्वादेः शेषाद् ब्रह्मनिष्ठता निर्णेयेत्यर्थः।

---

१. योनिशब्दस्य निमित्तकारणवाचित्वे जीवस्यापि निमित्तत्वसंभवात् ब्रह्म वा जीवो वेति संशयेन पूर्वपक्ष इति भामती। 'अक्षरात् परतः परः' इत्यत्र ब्रह्मगतपरत्वावधित्वेन भूतयोन्यक्षरस्य निर्देशात् तस्य ब्रह्मण्यसंभवात् जीव एवेति निश्चयेन पूर्वपक्षः संभवतीति परिमलः।

२. अक्ता इत्यादि। चयनप्रकरणे श्रुतमिदं वाक्यम्। शर्करा मृत्तिकामिश्राः क्षुद्रपाषाणाः। तासामञ्जनं येन केनापि द्रव्येण विशेषाश्रवणादिति प्राप्ते वाक्यशेषे (अर्थवादे) घृतस्य स्तूयमानत्वेन तस्यैव अञ्जनसाधनत्वमिति निर्णीतं पूर्वमीमांसायाम्। द्र. १-४-१९अधि.।

वोपाधिपरिच्छिन्नदृष्टेः सर्वज्ञत्वं सर्ववित्त्वं वा संभवति। नन्वक्षरशब्दनिर्दिष्टाद् भूतयोनेः परस्यैव तत् सर्वज्ञत्वं सर्ववित्त्वं च, न भूतयोनिविषयमित्युक्तम्। अत्रोच्यते- नैवं संभवति। यत्कारणम्, 'अक्षरात्संभवतीह विश्वम्' इति प्रकृतं भूतयोनिमिह जायमानप्रकृतित्वेन निर्दिश्यानन्तरमपि जायमानप्रकृतित्वेनैव सर्वज्ञं निर्दिशति-'यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते' इति। तस्मान्निर्देशसाम्येन प्रत्यभिज्ञायमानत्वात् प्रकृतस्यैवाक्षरस्य भूतयोनेः सर्वज्ञत्वं सर्ववित्त्वं च धर्म उच्यत इति गम्यते। 'अक्षरात्परतः परः' इत्यत्रापि न प्रकृताद् भूतयोनेरक्षरात् परः कश्चिदभिधीयते। कथमेतदवगम्यते? 'येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' (मु.उ. १।२।१३) इति प्रकृत्य[1] तस्यैवाक्षरस्य भूतयोनेरदृश्यत्वादिगुणकस्य वक्तव्यत्वेन प्रतिज्ञातत्वात्। कथं तर्हि 'अक्षरात्परतः परः' इति व्यपदिश्यत इति? उत्तरसूत्रे तद् वक्ष्यामः।

अपि चात्र द्वे विद्ये वेदितव्ये उक्ते-'परा चैवापरा च' इति। तत्रापरामृग्वेदादिलक्षणां विद्यामुक्त्वा

प्रकटार्थविवरणम्

निर्णेतव्येत्यर्थः। परस्तत्रोक्तं स्मारयति—**नन्वक्षरेति**। "जनिकर्तुः प्रकृतिः" इति स्मरणात् अक्षरादिति पञ्चम्या जायमानप्रकृतित्वेन निर्दिष्टमक्षरं पुनः पञ्चम्यन्तप्रयोगादेव "तस्मादेतद् ब्रह्म" इति प्रत्यभिज्ञायते। अतो भूतयोनिविषय एव वाक्यशेष इत्याह—**अत्रोच्यत इति**। "अक्षरात्परतः परः" इत्युपरितनोऽपि वाक्यशेषः प्रकृतसर्वज्ञभूतयोनिपर एवेत्याह—**अक्षरात्परत इति**। येन ज्ञानेनाक्षरं प्रकृतं भूतयोनिं सर्वज्ञं पुरुषं सत्यं वेद तां ब्रह्मविद्यामुपसन्नाय शान्तायाऽऽचार्यः प्रोवाच प्रब्रूयादित्युपक्रम्य "अक्षरात्परतः परः" इत्युपदिश्यमानं कथमन्यपरं भवेदिति भावः। न प्रधानपरं वाक्यं चेत् कस्तर्ह्यर्थ इत्याशङ्क्याह—**कथं तर्हीति**।

भाष्यभावप्रकाशिका

ननु श्रुतिप्रत्यभिज्ञा दर्शिता, सा च त्वद्दर्शितलिङ्गप्रत्यभिज्ञातोऽपि बलीयसीति, नेत्याह—**अक्षरादिति**। पञ्चम्यन्ताक्षरपदं न प्रकृताक्षरपरमित्यर्थः। चेतनं भूतयोनि प्रथत एव श्रुतिप्रसिद्धप्रत्यभिज्ञानदर्शनादित्याह—**येनाक्षरमिति**। एवं च सति क्वचिज्जगत्प्रकृतित्वम्, क्वचिन्निमित्तत्वमिति वैषम्यं च न सिध्येदिति भावः। **कथं तर्हीति**। पञ्चम्यन्तमक्षरपदं किमभिधत्त इत्यर्थः।

न्यायनिर्णयः

वाक्यशेषो भूतयोनिविषयो नेत्युक्तं स्मारयति— **नन्विति**। 'जनिकर्तुः प्रकृतिः' इति स्मृतेरक्षरादिति पञ्चम्या जायमानप्रकृतित्वेनोक्तमक्षरं 'तस्मादेतद् ब्रह्म' इत्यत्रापि पञ्चम्या प्रत्यभिज्ञायते, तेन भूतयोन्यर्थ एव वाक्यशेष इत्याह—**अत्रेति**। तस्मादविशेषेण सर्वज्ञाद् विशेषेण सर्वविदो ज्ञानमयतपःसहितात् कार्यं ब्रह्म सूक्ष्मभूतात्मकं नाम रूपं च स्थूलभूतात्मकमन्नं च व्रीहियवादि सर्वं भौतिकं तद्द्वारा सत्तां प्राप्नोतीत्याह—**तस्मादिति**। लिङ्गप्रत्यभिज्ञाफलमाह—**तस्मादिति**। श्रुतिप्रत्यभिज्ञा लिङ्गप्रत्यभिज्ञातो बलवती दर्शितेत्याशङ्क्य पञ्चम्यन्ताक्षरपदं न प्रकृताक्षरगामीत्याह—**अक्षरादिति**। तत्र गमकं पृच्छति—**कथमिति**। चेतने भूतयोनौ प्रथममेव श्रुतिप्रत्यभिज्ञानादित्याह—**येनेति**। येन ज्ञानेनाक्षरं प्रकृतं भूतयोनिं सर्वज्ञं पुरुषं सत्यं वेद तां ब्रह्मविद्यामुपसन्नाय शान्तायाचार्यः प्रोवाच प्रब्रूयादित्युपक्रम्य 'अक्षरात्परतः परः' इत्युच्यमानः परो न भूतयोनेरतिरिच्यते। तथा च क्वचिज्जगत्प्रकृतित्वं क्वचित्तन्निमित्ततेति न वैषम्यमिति भावः। पञ्चम्यन्ताक्षरपदस्य भूतयोन्यर्थत्वाभावे तद्वाक्यं वाच्यमिति शङ्कते—**कथमिति**। तत्र भाविनं परिहारं सूचयति—**उत्तरेति**।

---

१. 'प्रकृतस्यैव' इति पा.।

ब्रवीति–'अथ परा यया तदक्षरमधिगम्यते' इत्यादि। तत्र परस्या विद्याया विषयत्वेनाक्षरं श्रुतम्। यदि पुनः परमेश्वरादन्यददृश्यत्वादिगुणकमक्षरं परिकल्प्येत, नेयं परा विद्या स्यात्। परापरविभागो ह्ययं विद्ययोरभ्युदयनिःश्रेयसफलतया परिकल्प्यते। न च प्रधानविद्या निःश्रेयसफला केनचिदभ्युपगम्यते। तिस्रश्च विद्याः प्रतिज्ञायेरन्, त्वत्पक्षेऽक्षराद् भूतयोनेः परस्य परमात्मनः प्रतिपाद्यमानत्वात्। द्वे एव तु विद्ये वेदितव्ये इह निर्दिष्टे। 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' (मु.उ. १।१।३) इति चैकविज्ञानेन सर्वविज्ञानापेक्षणं सर्वात्मके ब्रह्मणि विवक्ष्यमाणेऽवकल्पते, नाचेतनमात्रैकायतने प्रधाने, भोग्यव्यतिरिक्ते वा भोक्तरि। अपि च 'स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह' (मु.उ. १।१।१) इति ब्रह्मविद्यां प्राधान्येनोपक्रम्य परापरविभागेन परां विद्यामक्षराधिगमनीं दर्शयंस्तस्या ब्रह्मविद्यात्वं दर्शयति।

प्रकटार्थविवरणम्

परविद्याविषयत्वाच्च न भूतयोनिरब्रह्मेत्याह—**अपि चात्रेति**। किं च विद्याया द्विसंख्यायाः श्रवणमपि तव न स्यादित्याह—**तिस्रश्चेति**। इतश्च परं ब्रह्मैव भूतयोनिरित्याह—**कस्मिन्नु भगव इति**। अचेतनस्य भोग्यवर्गमात्रस्यैकमयनमाश्रयस्तस्मिन्नित्यर्थः। ब्रह्मविद्येति समाख्ययाऽपि भूतयोनेर्ब्रह्मत्वं सिद्धमित्याह—**अपि च स इति**। सर्वविद्यानां प्रतिष्ठा परिसमाप्तिः यस्यामुत्पन्नायां तत उत्कृष्टपुरुषार्थाभावात् तां ब्रह्मविद्यां ब्रह्मा प्राह स्मेत्यर्थः। यदि प्राधान्येन ब्रह्मविद्यैवोपक्रान्ता किमित्यृग्वेदादिलक्षणाऽत्रापरा

भाष्यभावप्रकाशिका

परा विद्येति संज्ञानादपीत्थं प्रतिपत्तव्यमित्याह—**अपि चेति**। भवतु, तथापि प्रधानं जीवो वा विद्याया विषयः किं न स्यादिति? अत आह—**यदि हीति**। ननु कार्यकारणविषयतया भोग्यभोक्तृविषतया वा परापरविभागः किं न स्यादिति? अत आह—**परापरेति**। भूतयोनिप्रधानविद्याऽपि परा विद्या चेत्, उत्तरत्राधीयमानसर्वज्ञविषयविद्याया अपि विवक्षितत्वाद् द्वे विद्ये इति विरोधः स्यादिति, अत आह—**तिस्रश्चेति**। लिङ्गान्तरमाह—**कस्मिन्निति**। मात्रशब्देनात्मभ्यो भेदं दर्शयति। जीवपक्षेऽपि समानं दूषणमित्याह—**भोग्येति**। समाख्यान्तरमाह—**अपि चेति**। ननु ब्रह्मविद्योपक्रमेऽप्यपरविद्यावदक्षरविद्याऽपि मा भूद् ब्रह्मविद्येति,

न्यायनिर्णयः

परा विद्येति समाख्यानादपि भूतयोनेरक्षरस्य ब्रह्मतेत्याह—**अपि चेति**। भूतयोनेरपरविद्यागम्यत्वं निराह—**तत्रेति**। उदाहृते वाक्ये प्रतीतमर्थमाह—**तत्रेति**। तथापि प्रधानं जीवो वा परविद्यागम्यमक्षरं स्यादित्याशङ्क्याह—**यदीति**। कार्यकारणविषयतया भोक्तृभोग्यविषयतया वा परापरविभागमाशङ्क्याह—**परेति**। प्रधानादिविद्या मुक्तिफलतया परा स्यादित्याशङ्क्याह—**न चेति**। जडमात्रस्य तद्युक्ताजडस्य वा धीर्न मुक्तिहेतुः, चिन्मात्रधियस्तद्भावादित्यर्थः। यदि प्रधानस्य जीवस्य वा भूतयोनित्वेन तद्विद्या परविद्या, तदोत्तरत्रोच्यमानसर्वविज्ञानस्यापीष्टत्वाद् द्वे विद्ये इति द्वित्वश्रवणं न स्यादित्याह—**तिस्रश्चेति**। इष्टापत्तिं प्रत्याचष्टे—**द्वे इति**। इहेत्युपक्रमोक्तिः। इतश्च भूतयोनिवाक्यं ब्रह्मनिष्ठमित्याह—**कस्मिन्निति**। एकविज्ञानेन सर्वविज्ञानं पक्षान्तरेऽपि स्यादित्याशङ्क्याह—**नेति**। अचेतनस्य भोग्यमात्रस्यैकमयनमाश्रयस्तस्मिन्नित्यर्थः। मात्रशब्देनात्मभ्यो भेदमाह। प्रधाने ज्ञाते भोग्यवर्गज्ञानेऽपि न भोक्तृज्ञानमित्यर्थः। जीवपक्षे तज्ज्ञाने भोग्यधीरपि नेत्याह—**भोग्येति**। ब्रह्मविद्येति समाख्ययाऽपि भूतयोनेर्ब्रह्मतेत्याह—**अपि चेति**। सर्वविद्यानां प्रतिष्ठा समाप्तिर्यस्यां ततो निरतिशयपुरुषार्थलाभात् तां ब्रह्मविद्यां सर्वविद्यावेद्यवस्त्वधिष्ठानविषयतया वा सर्वविद्याप्रतिष्ठामथर्वनाम्ने कुत्रचित्सृष्टावाद्याय पुत्राय स ब्रह्मोक्तवानित्यर्थः। 'ब्रह्मा देवानाम्' इति वक्ता तत्रोपक्रान्त एवेत्याशङ्क्याह—**प्राधान्येनेति**। तथापि कथमक्षरस्य ब्रह्मत्वं, तदाह—**सा चेति**।

---

१. "नाचेतनमात्रैकायने प्रधाने" इति भाष्यपाठः प्रकटार्थकृतां संमत इति ज्ञायते। न्यायनिर्णयेऽप्येवम्।

सा च ब्रह्मविद्यासमाख्या तदधिगम्यस्याक्षरस्याब्रह्मत्वे बाधिता स्यात्। अपरा ऋग्वेदादिलक्षणा कर्मविद्या ब्रह्मविद्योपक्रम उपन्यस्यते ब्रह्मविद्याप्रशंसायै; 'प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म। एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति' (मु.उ. १।२।७) इत्येवमादिनिन्दावचनात्। निन्दित्वा चापरां विद्यां ततो विरक्तस्य परविद्याधिकारं दर्शयति-'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' (मु.उ. १।२।१२) इति।

यत्तूक्तमचेतनानां पृथिव्यादीनां दृष्टान्तत्वेनोपादानाद् दार्ष्टान्तिकेनाप्यचेतनेन भूतयोनिना भवितव्यमिति। तदयुक्तम्। न हि दृष्टान्तदार्ष्टान्तिकयोरत्यन्तसाम्येन भवितव्यमिति नियमोऽस्ति। अपि च स्थूलाः पृथिव्यादयो दृष्टान्तत्वेनोपात्ता इति न स्थूल एव दार्ष्टान्तिको भूतयोनिरभ्युपगम्यते।

प्रकटार्थविवरणम्

विद्योच्यत इत्याशङ्क्याह—**अपरा ऋग्वेदादिलक्षणेति**। प्लवन्ते गच्छन्तीति प्लवा अस्थिराः, अत एवादृढाः। के ते? यज्ञरूपाः। यज्ञो रूपमुपाधिर्येषां ते यज्ञरूपाः, ऋत्विगादिव्यपदेशस्य यज्ञोपाधिकत्वात्, अष्टादश षोडशर्त्विजः पत्नी यजमानश्चेति। क्षयिष्णुफलत्वादपरं कर्म येषु यदाश्रयमुक्तं श्रुत्या विहितमित्यर्थः। एतदेव कर्म श्रेयस्साधनं न ब्रह्मज्ञानं नामास्तीति मत्वा ये हृष्यन्ति ते पुनःपुनर्जरामरणमेव प्राप्नुवन्तीत्यर्थः। इतश्च परविद्याशेषत्वेनैवापरविद्योपन्यास इत्याह—**निन्दित्वा चेति**। प्रत्यक्षत्वादिना कर्मसाध्यान् लोकाननित्यतया विज्ञाय निर्वेदं वैराग्यं प्रत्यायाद् गच्छेत्। कथम्? नास्त्यकृतो मोक्षः कृतेन कर्मणा, अहं च नित्यफलार्थी, अतः किं कर्मभिरिति विरक्तःसन् ब्रह्मणो विज्ञानार्थं गुरुमेवाभिगच्छेत्। गुरुपादोपसर्पणपूर्वकं मोक्षसाधनज्ञानाय श्रवणादिकं कुर्यादित्यर्थः। कारणादव्यतिरेकः कार्यस्यात्र विवक्षितः, न तु सर्वसाम्यमित्याह—**न हि दृष्टान्तेति**। सर्वसाम्याभ्युपगमे च सांख्यस्याप्यनिष्टापात इत्याह—**अपि चेति**।

भाष्यभावप्रकाशिका

अत आह—**अपरेति**। उपक्रान्ताया अन्यत्राकथने सत्यत्रापि कथनाभावे बाधप्रसङ्गादिति भावः। अपरविद्या तत्प्रशंसार्थेति कथमवगम्यत इति? तदाह—**प्लवा इति**। कर्मविद्यादिनिन्दापूर्वकं ततो विरक्तस्याधिकारप्रदर्शनादपि ब्रह्मविद्यैवेयमित्याह—**निन्दित्वा चेति**।।२१।।

न्यायनिर्णयः

ब्रह्मविद्योपक्रमेऽप्यपरविद्यावदक्षरविद्याऽपि ब्रह्मविद्या मा भूदित्याशङ्क्य प्रक्रान्ताया अन्यत्रानुक्तिवदत्राप्यनुक्तौ बाधादक्षरविद्या ब्रह्मविद्यैवेत्याह—**अपरेति**। तस्यास्तत्प्रशंसार्थत्वं कथम्, तत्राह—**प्लवा हीति**। प्लवन्ते गच्छन्तीति प्लवा विनाशिनः, तत्प्रसिद्धौ हिशब्दः। तदेवोत्पत्त्यादिमत्त्वेन साधयति—**अदृढा इति**। के ते? यज्ञरूपाः यज्ञो रूपमुपाधिर्येषां ते तथा, ऋत्विगादिशब्दस्य यज्ञोपाधिकत्वात्। अष्टादश षोडशर्त्विजः पत्नी यजमानश्च। क्षयिफलत्वादवरं कर्म येषु यदाश्रयमुक्तं श्रुत्या विहितम्, एतदेव कर्म श्रेयोहेतुर्न ब्रह्मधीरिति ये मूढा हृष्यन्ति ते पुनः पुनर्जरापूर्वं मरणमेवाप्नुवन्तीत्यर्थः। आदिपदं 'अविद्यायामन्तरे वर्तमानाः' इत्यादिसंग्रहार्थम्। इतश्च परविद्याशेषत्वेनैवापरविद्योक्तिरित्याह—**निन्दित्वेति**। प्रत्यक्षादिना कर्मसाध्याँल्लोकाननित्यतया ज्ञात्वा निर्वेदं वैराग्यमायाद् गच्छेत् कुर्यात्। कथम्, नास्त्यकृतो मोक्षः कृतेन कर्मणा, नित्यफलार्थी चाहम्, तस्मात् किं कर्मणेति विरक्तस्तस्य ब्रह्मणो विज्ञानार्थं गुरुमेवाभिगच्छेद् गुरुपादोपसर्पणं कृत्वा मुक्तिहेतुज्ञानाय श्रवणादि कुर्यादित्यर्थः। 'रिक्तहस्तस्तु नोपेयाद् राजानं दैवतं गुरुम्' इति न्यायेन समित्पाणिरित्युक्तम्। श्रोत्रियमित्यादिनाऽध्ययनहीनस्य वाऽकर्मिणो वा गुरुत्वं वार्यते। कर्मनिन्दया ततो विरक्तस्याधिकारोक्तेरक्षरविद्या ब्रह्मविद्यैवेति समुदायार्थः। पूर्वपक्षबीजमनुभाषते—**यत्त्विति**। सर्वथा वा साम्यम्, अंशेन वा? नाद्य इत्याह—**तदयुक्तमिति**। सर्वथा साम्ये परस्याप्यनिष्टापत्तिमाह—**अपि चेति**।

तस्माददृश्यत्वादिगुणको भूतयोनिः परमेश्वर एव।।२१।।

विशेषणभेदव्यपदेशाभ्यां च नेतरौ।।२२।।

इतश्च परमेश्वर एव भूतयोनिर्नेतरौ शारीरः प्रधानं वा। कस्मात्? 'विशेषणभेदव्यपदेशाभ्याम्। विशिनष्टि हि प्रकृतं भूतयोनिं शारीराद् विलक्षणत्वेन-'दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः। अप्राणो ह्यमनाः शुभ्रः' (मु.उ. २।१।२) इति। न ह्येतद् दिव्यत्वादिविशेषणमविद्याप्रत्युपस्थापितनामरूपपरिच्छेदाभिमानिनस्तद्धर्मान् स्वात्मनि कल्पयतः शारीरस्योपपद्यते। तस्मात् साक्षादौपनिषदः पुरुष इहोच्यते। तथा प्रधानादपि प्रकृतं भूतयोनिं भेदेन व्यपदिशति-'अक्षरात्परतः परः' इति। ²अक्षरमव्याकृतं नामरूपबीजशक्तिरूपं भूतसूक्ष्ममीश्वराश्रयं तस्यैवोपाधिभूतं सर्वस्माद् विकारात्परो योऽविकारस्त-

प्रकटार्थविवरणम्

विशेषणभेदव्यपदेशाभ्यां च नेतरौ। विशेषणादित्याद्यहेतुं जीवपक्षापाकरणपरतया योजयति—**विशिनष्टि हीति।** "भेदव्यपदेशाच्च" इति द्वितीयहेतुं प्रधानपक्षे योजयति—**तथा प्रधानादपीति।** अक्षरं स्वरूपेणाविनाशि, अव्याकृतम्

भाष्यभावप्रकाशिका

विशेषणभेदव्यपदेशाभ्यां च नेतरौ।।२२।। विशेषणान्न जीवः, भेदव्यपदेशान्न प्रधानमिति विभज्य हेतुं व्याचष्टे—**विशिनष्टीत्यादिना।** ननु नामरूपोपादानमव्याकृतं चेत्, कथं ब्रह्मण उपादानत्वमिति? अत आह—**तस्यैवोपाधीति।** तस्य

न्यायनिर्णयः

कार्यस्य कारणाव्यतिरेको विवक्षितोंऽशस्तेन साम्यमिष्टमेवेति मत्वोपसंहरति—**तस्मादिति।।२१।।**

भूतयोनेर्ब्रह्मत्वे हेत्वन्तरमाह—**विशेषणेति।** चकारार्थमाह—**इतश्चेति।** एवकारार्थमाह—**नेतराविति।** इतःशब्दार्थं स्फुटयन् प्रश्नपूर्वं हेतुद्वयमाह—**कस्मादिति।** विशेषणान्न जीवो, भेदोक्तेर्न प्रधानमिति विभज्य व्याकुर्वन्नाद्यं व्याचष्टे—**विशिनष्टीति।** दिव्यो द्योतनात्मकः स्वयंज्योतिः, तत्र श्रुत्यन्तरप्रसिद्ध्यर्थो हिशब्दः। अमूर्तत्वं पूर्णत्वम्। आकाशाद्विशेषमाह—**पुरुष इति।** कार्यकारणाभ्यां परिच्छेदमाशङ्क्याह—**सबाह्येति।** बाह्यं कार्यमभ्यन्तरं कारणम्, ताभ्यां कल्पिताभ्यां सहाधिष्ठानत्वेन तिष्ठति, तस्य सर्वकल्पनाधिष्ठानत्वे श्रुतिप्रसिद्ध्यर्थो हिशब्दः। जन्माद्यभावेन कौटस्थ्यमाह—**अज इति।** प्राणमनोभ्यां संसर्गभेदाभावात् परिशुद्धिमाह—**अप्राणो हीति।** शारीरस्यापि विशेषणं स्यादित्याशङ्क्याह—**न हीति।** तद्धर्मा नामरूपादिधर्मा दृश्यत्वादयः। विशेषणस्यानन्यथासिद्धिफलमाह—**तस्मादिति।** विशेषणस्य तुल्यत्वेऽपि द्वितीयं हेतुं प्रधानपक्षे योजयति—**तथेति।** भेदोक्तिं व्यनक्ति—**अक्षरमिति।** किं तदव्याकृतम्, तदाह—**नामेति।** तयोर्बीजस्येश्वरस्य शक्तिरूपं, तत्पारतन्त्र्यात्। भूतानां लीनानां सूक्ष्मं संस्काररूपं वर्ततेऽत्रेति भूतसूक्ष्मम्, ईश्वरपदलक्ष्यं स्वरूपमाश्रयोऽस्येति तथोक्तम्, अन्यस्य तत्कार्यत्वेन तदाश्रयत्वात्। तस्यैवेश्वरो

---

१. भाष्ये शारीरप्रधाननिराकरणपरतया क्रमेण हेतुद्वयं व्याख्यातम्। पुरुषशब्दस्य प्रधानव्यावर्त्तकत्वादाद्यहेतुरपि प्रधाननिरासार्थ इति भामती। हेतुद्वयमपि उभयत्र योजयितुं शक्यम्। 'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशम्' इत्यत्र शारीराद् भेदेन व्यपदेशात् इति न्यायरक्षामणिः। अधिकं तत्रैव द्र.।

२. अक्षरमित्यादि भाष्यं कल्पतरौ भामतीमतानुसारेण व्याख्यातम्। तथाहि—'शब्दार्थयोर्बीजमधिष्ठानमात्मा तस्य शक्तिः सहकारित्वात्। सा चेश्वरमाश्रयते विषयीकरोतीतीश्वराश्रया। तस्याधिष्ठानत्वे उपाधिभूता अवच्छेदिका, शुक्तेरिव तद्विषयमज्ञानम्'। अज्ञातस्य ब्रह्मणोऽधिष्ठानत्वात् एवं व्याख्याने फलमपि तत्रैवोक्तम्— 'अज्ञत्वभ्रान्ततादोषात् अरक्षत् परमेश्वरम्। एतद्भाष्यार्थतत्त्वज्ञो वाचस्पतिरगाधधीः' इति। एतच्च व्याख्यानं भाष्यबहिर्भूतम् आश्रयशब्दस्य यथाश्रुतार्थत्यागादिति रत्नप्रभादिः। ब्रह्मणो भ्रान्तत्वादिदोषवारणं तु प्रकटार्थकारैः अध्यासभाष्यावतारिकायामेव कृतं तत्रैव द्रष्टव्यमिति।

स्मात्परतः पर इति भेदेन व्यपदेशात्[1] परमात्मानमिह विवक्षितं दर्शयति। नात्र प्रधानं नाम किंचित् स्वतन्त्रं तत्त्वमभ्युपगम्य तस्माद्भेदव्यपदेश उच्यते। किं तर्हि? यदि प्रधानमपि कल्प्यमानं श्रुत्यविरोधेनाव्याकृतादिशब्दवाच्यं भूतसूक्ष्मं परिकल्प्येत, परिकल्प्यताम्। तस्माद् भेदव्यपदेशात्परमेश्वरो भूतयोनिरित्येतदिह प्रतिपाद्यते।।२२।।

कुतश्च परमेश्वरो भूतयोनिः?

रूपोपन्यासाच्च।।२३।।

अपि च 'अक्षरात्परतः परः' इत्यस्यानन्तरम् 'एतस्माज्जायते प्राणः' इति प्राणप्रभृतीनां पृथिवीपर्यन्तानां तत्त्वानां सर्गमुक्त्वा तस्यैव भूतयोनेः सर्वविकारात्मकं रूपमुपन्यस्यमानं पश्यामः— 'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः। वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी

प्रकटार्थविवरणम्

अनादिसिद्धम्; नामरूपयोर्बीजस्येश्वरस्य शक्तिरूपम्; तत्पारतन्त्र्यात्, भूतानां विलीनानां सूक्ष्मं संस्काररूपं वर्ततेऽत्रेति भूतसूक्ष्मम्; तत्पदलक्ष्यस्वरूपाश्रयं तस्यैव प्रतिबिम्बितस्योपाधिभूतं तस्मिन्नुपहिते विकारापादकत्वाद्वि(त्वादवि)कार इत्यर्थः। ननु प्रधानाद् ब्रह्मणो भेदं ब्रुवता तदिष्टं स्यादित्याशङ्क्याह—**नात्र प्रधानमिति**। तत्र मानाभावादित्यर्थः। तस्मादनाद्यनिर्वाच्यमायाख्यायां[ख्यात्] जगतस्तस्मिन् प्रधीयमानत्वेन प्रधानशब्दवाच्यादन्य ईश्वरोऽत्र प्रतिपिपादयिषितः।

रूपोपन्यासाच। **कुतश्चेति**। ततश्च परमेश्वरो भूतयोनिस्सिद्ध इत्यर्थः। वृत्तिकारमतेन तावदाक्षेपसमाधानपूर्वकं सूत्रं व्याचष्टे—**अपि चेत्यादिना**। अग्निर्द्युलोकः "असौ वाव लोको गौतमाग्निः" इति श्रुतेः। पद्भ्यामिति पादौ पृथिवी यस्यास्य

भाष्यभावप्रकाशिका

परत्वमुपपादयति—**सर्वस्मादिति**। ननु प्रधानाद्भेदव्यपदेशं वदन् सूत्रकारः प्रधानस्यापि शाब्दत्वमङ्गीकरोति, तत 'ईक्षतेर्नाशब्द'मिति प्रतिज्ञातमशब्दत्वं व्याहन्यत इति, तत्राह—**नात्रेति**। तथा सत्यद्वितीयश्रुतिविरोधादित्यर्थः। **तस्मादिति**। प्रधानशब्दवाच्यादक्षरादिति भावः।।२२।।

रूपोपन्यासाच्च।।२३।। एकदेशिमतानुसारेण सूत्रं व्याचष्टे दूषयितुम्—**अपि चेति**। एकदेशिमतं दूषयति—**अन्ये**

न्यायनिर्णयः

जीवो जगदिति बुद्धावुपाधित्वेन स्थितं, विकारहेतुत्वाद्विकारश्चेत्यर्थः। ननु नामरूपयोर्बीजं शक्तिरूपं चाव्याकृतम्। यद्वा नामरूपे एव बीजे तयोः शक्तिरूपं तदेव। तच्च भूतसूक्ष्मं तत्कारणत्वादीश्वराश्रयमित्याश्रयशब्दो विषयार्थः,तस्यैवेश्वरस्य जीवत्वं प्राप्तस्य बुद्ध्यादिद्वारा कर्तृत्वादावुपाधिभूतमिति व्याख्येयं भाष्यमिति चेत्। मैवम्। आश्रयशब्दस्य श्रुतार्थत्यागायोगाद, जीवत्वापत्तेश्चाव्याकृतसंबन्धकृतत्वात्, परिशुद्धे चिद्धातौ तत्संबन्धध्रौव्यात्। अतो भाष्यबहिर्भूतो नानाजीववादः। अक्षरशब्दार्थमुक्त्वा परिशिष्टं व्याचष्टे— **तस्मादिति**। इहेति प्रकृतवाक्योक्तिः। प्रधानाद् ब्रह्मणो भेदे प्रधानमिष्टमसतोऽप्रतियोगित्वादित्याशङ्क्याह—**नात्रेति**। प्रतियोग्यनङ्गीकारे कथं भेदोक्तिः, तत्राह—**किं तर्हीति**। भूतसूक्ष्मं भूतानां सूक्ष्मं कारणमित्यर्थः। इहेति श्रुतिसूत्रयोरुक्तिः।।२२।।

भूतयोनेरीश्वरत्वे हेत्वन्तरमाह—**कुतश्चेति**। रूपोपन्यासाच्च नेतरावित्यनुषङ्गः। वृत्तिकारमतेन व्याकरोति—**अपि चेति**। अग्निर्द्युलोकः, 'असौ वाव लोको गौतमाग्निः' इति श्रुतेः। पद्भ्यामिति प्रथमार्थे। पादौ पृथिवी यस्य, स एष सर्वभूतानामन्तश्चात्मा

१. 'व्यपदिशन्' इति पा.।

ह्येष सर्वभूतान्तरात्मा' (मु.उ. २।१।४) इति। तच्च परमेश्वरस्यैवोचितम्, सर्वविकारकारणत्वात्; न शारीरस्य तनुमहिम्नः। नापि प्रधानस्यायं रूपोपन्यासः संभवति, सर्वभूतान्तरात्मत्वासंभवात्। तस्मात् परमेश्वर एव भूतयोनिर्नेतराविति गम्यते।

कथं पुनर्भूतयोनेरयं रूपोपन्यास इति गम्यते? प्रकरणात्, 'एषः' इति च प्रकृतानुकर्षणात्। भूतयोनिं हि प्रकृत्य 'एतस्माज्जायते प्राणः' 'एष सर्वभूतान्तरात्मा' इति वचनं भूतयोनिविषयमेव भवति। यथोपाध्यायं प्रकृत्य 'एतस्मादधीष्वैष वेदवेदाङ्गपारग' इति वचनमुपाध्यायविषयं भवति, तद्वत्। कथं पुनरदृश्यत्वादिगुणकस्य भूतयोनेर्विग्रहवद्रूपं संभवति? सर्वात्मत्वविवक्षयेदमुच्यते; न तु विग्रहवत्त्वविवक्षयेत्यदोषः। 'अहमन्नम्' 'अहमन्नादः' (तै.उ. ३।१०।६) इत्यादिवत्।

अन्ये पुनर्मन्यन्ते– नायं भूतयोने रूपोपन्यासः, जायमानत्वेनोपन्यासात्। 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' (मु. उ.) इति हि पूर्वत्र प्राणादि पृथिव्यन्तं तत्त्वजातं जायमानत्वेन निरदिक्षत्। उत्तरत्रापि च 'तस्मादग्निः समिधो यस्य सूर्यः' इत्येवमादि 'अतश्च सर्वा

प्रकटार्थविवरणम्

एष सर्वभूतानामन्तरात्मेत्यर्थः। उपदिश्यतां नाम; ततः किमित्याशङ्क्याह—**तच्चेति**। तनुमहिम्नः परिच्छिन्नशक्तेरित्यर्थः। यथा कश्चित् ब्रह्मवित् सार्वात्म्यविवक्षया "अहमन्नम्" 'अहमन्नादः' इति साम गायति स्म, न त्वन्ना[न्ना]दाभिप्रायेण, अपुरुषार्थप्रसङ्गादित्यर्थः।

[1]स्वाभिप्रायेण व्याख्यातुं परव्याख्यामाक्षिपति—**अन्ये पुनर्मन्यन्त इति**। एष सर्वभूतान्तरात्माऽप्येतस्मादेव जायत इति पूर्वेणैव क्रियापदेनान्वयात् जायमानत्वेनास्य निर्देश इत्यर्थः। समिध इव द्युलोकाग्नेर्भासको यः सूर्यः सोऽपि तस्मादेव जायत

भाष्यभावप्रकाशिका

पुनरिति। ननु जायमानत्वेनोपन्यासोऽसिद्ध इत्याशङ्क्य पूर्वापरवाक्येषु जायमानत्वोपन्यास इत्याह—**एतस्मादिति**। ननु

न्यायनिर्णयः

चेत्यर्थः। एवं रूपोपन्यासेऽपि किं स्यात्, तदाह—**तच्चेति**। अन्यथासिद्धिं प्रत्याह—**नेति**। तनुमहिमत्वं परिच्छिन्नशक्तित्वम्। प्रधानविषयत्वं तस्य दूषयति—**नापीति**। अनन्यथासिद्धिफलमाह—**तस्मादिति**। मानाभावेन शङ्कते—**कथमिति**। मानं वदन्नुत्तरमाह—**प्रकरणादिति**। प्रकृतत्वेऽपि भूतयोनेः 'अग्निर्मूर्धा' इत्यादौ कथमनुवृत्तिः, तत्राह—**एष इति**। तदेव स्फुटयति—**भूतेति**। दृष्टान्तेनैतदेव स्फुटयति—**यथेति**। अदृश्यत्वादिधर्मकस्य विग्रहवद्रूपं कथमित्याक्षिपति—**कथमिति**। समाधत्ते—**सर्वेति**। यथा कश्चिद् ब्रह्मात्मविदात्मनः सर्वात्मत्वविवक्षया 'अहमन्नमहमन्नादः' इति साम गायति, न त्वन्नान्नादत्वमात्मनोऽभिप्रैति, तस्यापुमर्थत्वात्, तथेहापीत्याह—**अहमिति**।

एकदेशिनं दूषयति—**अन्ये पुनरिति**। हेत्वसिद्धिमाशङ्क्य पूर्वोत्तरवाक्येषु जायमानत्वेन तत्तदर्थोक्तेरिहापि जायमानत्वेनोक्तिरस्तीत्याह—**एतस्मादिति**। यश्च सूर्यो द्युलोकाग्नेः समिध इव भासकः सोऽपि तस्मादेव जायत इत्यर्थः। तथापि

---

१. स्वाभिप्रायेणेति। भामत्यामपि 'पुनः' शब्देनास्य पक्षस्य स्वाभिमतत्वं सूचितमिति व्याख्यातम्। परन्तु-अयं पक्षः न्यायविरुद्धः। द्युमूर्धत्वादेः परमात्मन्येव कल्पनस्य युक्ततायाः उत्तराधिकरणे वर्णनात्। सर्वभूतान्तरात्मत्वस्य, 'एष' श्रुतेः, सूत्रकारेणैव 'प्रकरणात् (१-३-६) इति वक्ष्यमाणस्य परमात्मप्रकरणस्य च दुर्बलेन संनिधिना बाधायोगात्। अतः 'अन्ये' इति अस्य पक्षस्य परकीयत्वेनास्वरस एव सूचितः। प्रथमोपन्यस्त एव पक्षः भाष्यकृदभिमत्त इति विस्तरेण निरूपितं परिमल-ब्रह्मविद्याभरण-न्यायरक्षामणिषु।

ओषधयो रसाश्च' इत्येवमन्तं जायमानत्वेनैव निर्देक्ष्यति। इहैव कथमकस्मादन्तराले भूतयोने रूपमुपन्यस्येत्? सर्वात्मत्वमपि सृष्टिं परिसमाप्योपदेक्ष्यति–'पुरुष एवेदं विश्वं कर्म' (मु.उ. २।१।१०) इत्यादिना। श्रुतिस्मृत्योश्च त्रैलोक्यशरीरस्य प्रजापतेर्जन्मादि निर्दिश्यमानमुपलभामहे–'हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम' (ऋ. सं. १०।१२१।१) इति। समवर्ततेत्यजायतेत्यर्थः। तथा– 'स वै शरीरी प्रथमः स वै पुरुष उच्यते। आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत' इति च। विकारपुरुषस्यापि सर्वभूतान्तरात्मत्वं संभवति, प्राणात्मना सर्वभूतानामध्यात्ममवस्थानात्। अस्मिन् पक्षे 'पुरुष एवेदं विश्वं कर्म' इत्यादिसर्वरूपोपन्यासः परमेश्वरप्रतिपत्तिहेतुरिति व्याख्येयम्।।२३।।

।।इति षष्ठमदृश्यत्वाधिकरणम्।।

प्रकटार्थविवरणम्

इत्यर्थः। यदुक्तं सर्वात्मत्वविवक्षयेदमुच्यत इति तत्राह—**सर्वात्मत्वमपीति**। नन्वीदृशस्यासंभाव्यमानं जन्म निर्दिश्यत इत्याशङ्क्याह—**श्रुतिस्मृत्योश्चेति**। कस्मै प्रजापतये, तस्मै विधेम परिचरेम। ननु हिरण्यगर्भः सृष्ट्यादाववर्तिष्टेत्येतावत् श्रूयते, न जन्मेत्याशङ्क्याह—**समवर्ततेति**। जातःसन् भूतग्रामस्येश्वराज्ञया पतिः बभूवेति शेषः। अस्तु श्रुतिस्मृतिप्रसिद्धं जन्म; तस्य सर्वभूतान्तरात्मत्वं कथमित्याशङ्क्याह—**विकारेति**। पूर्वकल्पे प्रकृष्टज्ञानकर्मानुष्ठाता कश्चिद् यजमानः कल्पादौ हिरण्यगर्भतया प्रादुर्भवति। तस्य च सकलप्राणाद्यधिष्ठातृत्वात् अधिष्ठात्रधिष्ठेययोश्चाभेदात् प्राणात्मना सर्वभूतानाम् अध्यात्मं शरीरे तस्यावस्थानं संभवतीत्यर्थः। तस्मादपञ्चीकृतभूताद्यभिमानिनो हिरण्यगर्भस्य विग्रहविशिष्टरूपेण तदधिष्ठेयप्राणादिजन्मानन्तरं जन्म निर्दिश्यत इति। कस्तर्हि सूत्रार्थ इत्याशङ्क्याह—**अस्मिन् पक्ष इति**। विश्वं समस्तं कर्म साध्यं तपो ज्ञानं च पुरुष एवेति सर्वात्मकत्वलक्षणरूपोपन्यासाद् भूतयोनिः परमात्मा प्रतिपत्तव्य इत्यर्थः। इति षष्ठमदृश्यत्वाधिकरणम्।

भाष्यभावप्रकाशिका

एक[विज्ञानेन सर्व]विज्ञानप्रतिज्ञानात् तत्सिद्ध्यर्थं सर्वात्मकत्वं वक्तव्यम्, तदेवेदमुपन्यस्तम्; अन्यत्राकथनादित्याह—**श्रुतिस्मृत्योरपीति**। जायमानत्वं नोक्तमिति, अत आह—**समवर्ततेति**। कथं तर्ह्येष सर्वभूतान्तरात्मेति श्रुतिरिति? अत्राह—**विकारेति**। त्वन्मते रूपोपन्यासः कथमिति? अत आह—**अस्मिन्निति**।।२३।। इति षष्ठमदृश्यत्वाधिकरणम्।

न्यायनिर्णयः

मध्ये परस्यैव रूपमुक्तमित्याशङ्क्य वाक्यभेदान्नेत्याह—**इहेति**। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानात् तदर्थं सार्वात्म्ये वक्तव्ये तदेवेदमुक्तमन्यत्रानुक्तेरित्याशङ्क्याह—**सर्वात्मत्वमिति**। उत्तरत्रोक्तावपि तस्यैवेदमपि सार्वात्म्यमन्यस्यायोगादित्याशङ्क्याह—**श्रुतीति**। कस्मै प्रजापतये विधेम परिचरेम। हिरण्यगर्भः सृष्ट्यादाववर्तिष्टेत्येतावदिहोक्तम्, न जन्मेत्याशङ्क्याह—**समवर्ततेति**। स जातः सन् भूतग्रामस्येश्वराज्ञया पतिर्बभूवेति शेषदर्शनादित्यर्थः। अस्तु श्रुत्यादसिद्धं जन्म, तस्य कथं सर्वभूतान्तरात्मत्वम्, तत्राह—**विकारेति**। पूर्वकल्पे प्रकृष्टधीकर्मानुष्ठाता कश्चिद्यजमानः कल्पादौ हिरण्यगर्भतया प्रादुर्बभूव, तस्य सर्वप्राणाद्यधिष्ठातृत्वादधिष्ठात्रधिष्ठेययोरभेदात् प्राणात्मना सर्वभूतानामध्यात्मं देहे स्थितेर्जायमानेऽपि सार्वात्म्यं सिद्धमित्यर्थः। नन्वपञ्चीकृतभूताद्यभिमानिनो हिरण्यगर्भस्य विग्रहविशिष्टरूपेण तदधिष्ठेयप्राणादिजन्मानन्तरं जन्मोच्यते चेत् कस्तर्हि सूत्रार्थः, तत्राह—**अस्मिन्निति**। विश्वं सर्वं कर्म ससाध्यं तपो ज्ञानं च पुरुष एवेति सार्वात्म्यरूपोपन्यासात् परमात्मैव भूतयोनिरित्यर्थः। 'न विलक्षणत्वात्' इत्यत्र परिणामस्य सारूप्यापेक्षाप्रतिक्षेपाद, विवर्तस्य च शङ्कपीतिमादौ विसदृशेऽपि दर्शनात् तदपेक्षाऽनियमाद्भूतयोनिवाक्यं निर्विशेषे ब्रह्मण्यन्वितमिति भावः।।२३।। इति षष्ठमदृश्यत्वाधिकरणम्।।

७।।वैश्वानराधिकरणम्।।सू. २४-३२।।

वैश्वानरः साधारणशब्दविशेषात्।।२४।।

'को न आत्मा किं ब्रह्म' इति, 'आत्मानमेवेमं वैश्वानरं सप्रत्यध्येषि तमेव नो ब्रूहि' (छा.उ. ५।११।१,६) इति चोपक्रम्य द्युसूर्यवाय्वाकाशवारिपृथिवीनां सुतेजस्त्वादिगुणयोगमेकैकोपासननिन्दया

शारीरकन्यायसंग्रहः

वैश्वानरः साधारणशब्दविशेषात्।।२४।। स्मर्यमाणमनुमानं स्यादिति।।२५।। शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथादृष्ट्युपदेशात् असंभवात् पुरुषमपि चैनमधीयते।।२६।। अत एव न देवता भूतं च।।२७।। साक्षादप्यविरोधं जैमिनिः।।२८।। अभिव्यक्तेरित्याश्मरथ्यः।।२९।। अनुस्मृतेर्बादरिः।।३०।। संपत्तेरिति जैमिनिस्तथा हि दर्शयति।।३१।। आमनन्ति चैनमस्मिन्।।३२।। वाक्योपक्रमगतेऽनेकार्थसाधारणे श्रुतिप्रमाणे वाक्यशेषगतेनासाधारणलिङ्गेनान्यतरस्मिन्नर्थे नियमः शक्यते कर्तुम्—इति न्यायेनात्मवैश्वानरशब्दयोः जाठरभूताग्निदेवताजीवपरमात्मवाचकतया तुल्यवृत्तित्वेनान्यतमार्थानिश्चायकयोराहवनीयहोमाधारत्वादिकल्पनामात्रलिङ्गाभासेनाग्नौ नियमनं बाधित्वा ब्रह्मासाधारणेन त्रैलोक्यात्मकशरीरलिङ्गेनात्मवैश्वानरशब्दौ ब्रह्मपरतया निर्णीतौ, विप्रतिपन्नयोः संप्रतिपन्नेन निर्णयो युक्त इति।

इति भगवत्प्रकाशात्मविरचिते शारीकमीमांसान्यायसङ्ग्रहे

प्रथमाध्यायस्य द्वितीयः पादः

प्रकटार्थविवरणम्

वैश्वानरः साधारणशब्दविशेषात्। विषयवाक्यं दर्शयितुमुपक्रममाह—**को न इति।** ''प्राचीनशाल औपमन्यवः सत्ययज्ञः पौलुषिः इन्द्रद्युम्नो भाल्लवेयः जनः शार्कराक्ष्यः बुडिल आश्वतराश्विः ते हैते महाशाला महाश्रोत्रियाः समेत्य मीमांसां चक्रुः को न आत्मा किं ब्रह्म'' इति। ते च निश्चयमलभमाना निश्चिकीषयोद्दालकमभ्याजग्मुः। सोऽपि न सम्यग्वेदेति सह तेन षडपि कैकेयं राजानमाजग्मुः। तं चोचुः।(नरः)आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि स्मरसि तमेव नो ब्रूहीति। स च तान् पप्रच्छ तेषां विपरीतज्ञाननिरासेन सम्यग्ज्ञानजिग्राहयिषया 'औपमन्यव कं त्वमात्मानम् उपास्से' इति। दिवमेवेति होवाच। अनन्तरं राजोवाच 'एष सुतेजा वैश्वानरः यं त्वमात्मानुपास्से मूर्धा त्वेष आत्मनो मूर्धा ते व्यपतिष्यत् यन्मां नागमिष्यः' इति। ततः सत्ययज्ञं पप्रच्छ।

भाष्यभावप्रकाशिका

वैश्वानरः साधारणशब्दविशेषात्।।२४।। अध्येषि स्मरसि। **निन्दयेति।** मूर्धपातान्धत्वप्राणोत्क्रमणसंदोह[देह]शीर्णता-

न्यायनिर्णयः

रूपोपन्यासप्रसङ्गात् त्रैलोक्यदेहो वैश्वानरः पर इत्याह—**वैश्वानर इति।** विषयं वक्तुं वाक्योपक्रममाह—**को न इति।** आत्मनोऽसंसारित्वार्थं ब्रह्मपदम्। तस्यापरोक्ष्यार्थमात्मपदम्। प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलाः समेत्येत्थं मीमांसां चक्रुः। ते च निश्चिचीषयोद्दालकमाजग्मुः। सोऽपि न वेद सम्यगिति सह तेन षडपि ते कैकेयराजमश्वपतिमागत्योचुः—'आत्मानमेव' इत्यादि। अध्येषि स्मरसि। स च तेषां विपरीतधीनिरासेन सम्यग्धीजिग्राहयिषया तानेव पप्रच्छ— 'औपमन्यव कं त्वमात्मानमुपास्से'। 'दिवमेवे' त्याहेतरः। राजा पुनरुवाच— 'एष सुतेजा वैश्वानरो यं त्वमात्मानमुपास्से। मूर्धा त्वयमात्मनो मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य' इति। ततः सत्ययज्ञमपृच्छत्। स चादित्यमूचे। ततश्चैष विश्वरूप आत्मा चक्षुस्त्वेदात्मन इत्यन्धोऽभविष्यो यन्मां नागमिष्य इति राजाऽभाषत। एवं क्रमेण द्युसूर्यादीनां सुतेजस्त्वविश्वरूपत्वपृथग्वर्त्मात्मत्वबहुलत्वरयित्वपादत्वगुणयोगं विधाय मूर्धपातान्धत्वप्राणोत्क्रमणदेहविशीर्णताबस्तिभेदपादशोषणैरेकैकोपास्तिनिन्दया च तेषां

च वैश्वानरं प्रत्येषां मूर्धादिभावमुपदिश्याम्नायते–'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति। तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः' (छा.उ. ५।१८।१, २) इत्यादि। तत्र संशयः– किं वैश्वानरशब्देन जाठरोऽग्निरुपदिश्यत उत भूताग्निरथ तदभिमानिनी देवता ऽथवा शारीर आहोस्वित् परमेश्वर इति। किं पुनरत्र संशयकारणम्? वैश्वानर इति जाठरभूताग्निदेवतानां साधारणशब्द-प्रयोगादात्मेति च शारीरपरमेश्वरयोः। तत्र कस्योपादानं न्याय्यं कस्य वा हानमिति भवति संशयः। किं तावत् प्राप्तम्? जाठरोऽग्निरिति। कुतः? तत्र हि विशेषेण क्वचित् प्रयोगो दृश्यते–'अयमग्निर्वैश्वानरो

प्रकटार्थविवरणम्

स चादित्यमित्युवाच। ततश्चैष वै विश्वरूप आत्मा चक्षुष्ट्वेतदात्मन इत्यन्धोऽभविष्यो यन्मां नागमिष्यः' इति। एवं क्रमेण द्युप्रभृतीनां सुतेजस्त्वादिगुणयोगं विधायैकैकोपासननिन्दया च द्युप्रभृतीनां वैश्वानरमूर्धादिभावमुपदिश्य परिपूर्णवैश्वानरोपासन-माम्नायते "यस्त्वेतम्" इत्यादिना। आभिमुख्येन विश्वं विमिमीते जानातीत्यभिविमानः। तं प्रादेशपरिमाणं य उपास्ते तस्य सर्व-लोकाश्रयं फलं भवतीत्यर्थः। ध्येयरूपमाह—**तस्य हेति**। पृथङ्नानागतं वर्त्म गमनं संचरणमात्मा स्वरूपमस्येति पृथग्वर्त्मात्मा वायुः। सन्देहो मध्यदेहः सर्वगतत्वाद् बहुलो विस्तीर्णः आकाशः। बस्तिः मूत्रस्थानम् रयिः आपः। अस्यैव होमाधिकरणत्व-संपादनाय उर एवेत्यादिः। सबीजं संशयमाह—**तत्रेत्यादिना**। पूर्वत्र वाक्योपक्रमगतस्यादृश्यत्वादेः साधारणस्य वाक्यशेषगतेन सर्वज्ञत्वाद्युपदेशेन ब्रह्मपरत्वमुक्तम्। तेन न्यायेनेहाप्युपक्रमगतस्य साधारणशब्दस्य वाक्यशेषगतेन होमाधिकरणत्वलिङ्गेन प्रसिद्ध्यनुगृहीतेन [नेयत्वात्] जाठर एवोपास्य इति पूर्वपक्षमाह—**किं तावदित्यादिना**। पक्षान्तरमाह—**अग्निमात्रं वेति**।

भाष्यभावप्रकाशिका

बस्तिभेदपादशोषणाद्युक्त्वेत्यर्थः। अन्नमत्ति सर्वसम्बन्धिफलमाप्नोति। पृथङ्नानाभूतं वर्त्म यस्य वायोः स तथा। स एवात्मा स्वाभावो यस्य पृथग्वर्त्मात्मा प्राणः। सन्दोहो[संदहो]देहस्य मध्यभागः। बहुलः आकाशः व्यापित्वात्। बस्तिः मूत्रस्थानम्। रयिः

न्यायनिर्णयः

वैश्वानरं प्रति मूर्धादिभावमुक्त्वा समस्तोपासनमाम्नातम्—'यस्त्वेतम्' इत्यादिना। आभिमुख्येन विश्वं मिमीते जानातीत्यभिविमानस्तं प्रादेशपरिमाणमुपास्ते यस्तस्य सर्वलोकाद्याश्रयं फलमित्यर्थः। लोका भोगभूमयः, भूतानि तत्तदुपाधयः, भोक्तारस्त्वात्मान इति भेदः। तत्तत्संबन्धिफलभाक्त्वमन्नमत्तीत्युच्यते। ध्यानफलमुक्त्वा ध्येयरूपमाह—**तस्येति**। सुतेजस्त्वगुणा द्यौर्वैश्वानरस्य मूर्धा। निपातावेतत्प्रसिद्ध्यर्थौ। विश्वरूपत्वगुणः सूर्यस्तस्य चक्षुः, 'एष शुक्ल एष नीलः' इत्यादिश्रुतेः। पृथङ्नाना वर्त्म गमनमात्मा स्वरूपमस्येति तथा नानागतित्वगुणो वायुरस्य प्राणः। बहुलत्वगुण आकाशः संदेहोऽस्य देहमध्यम्। रयिर्धनं तद्गुणा आपोऽस्य बस्तिस्थमुदकम्। पृथिव्यां वैश्वानरस्य प्रतिष्ठानात् तस्य पादौ पृथिव्येव। तस्य होमाधारत्वसंपादनायोक्तम्— उर एवेत्यादि। 'तद्यद्भक्तं प्रथममागच्छेत्' इत्यादिवाक्यमादिशब्दार्थः। तत्र श्रुतौ वैश्वानरोऽनात्माऽऽत्मा वेति संशयं हृदि निधायाद्ये पक्षत्रयं, द्वितीये पक्षद्वयमाह—**तत्रेति**। संशयहेतुं प्रश्नपूर्वकमाह—**किमिति**। सत्यां सामग्र्यां कार्यध्रौव्यं फलितमाह—**तत्रेति**। वाक्योपक्रमस्थादृश्यत्वादिसाधारणधर्मस्य वाक्यशेषस्थसर्वज्ञत्वाद्युक्त्या ब्रह्मविषयत्ववदिहाप्युपक्रमगतसाधारणशब्दस्य शेषस्थहोमाधारत्वलिङ्गेन प्रसिद्ध्यनुगृहीतेन जाठरार्थत्वसिद्धेस्तस्यैवोपास्यतेति विमृश्य पूर्वपक्षमाह—**किमिति**। साधारणे शब्दे कुतो वैश्वानरविद्याश्रुतेः सविशेषब्रह्मण्यन्वयोक्तेः संगतयः। पूर्वपक्षे जाठराग्नेः, सिद्धान्ते ब्रह्मणो ध्यानं फलम्। साधारणे शब्दे कुतो विशेषप्रतिज्ञेत्याह—**कुत इति**। प्रतिज्ञाविशेषे हेतुमाह—**तत्रेति**। योऽयं वैश्वानरोऽग्निः सोऽयं पुरुषाकारे देहेऽन्तरित्युक्त्वा तमेव

योऽयमन्तः पुरुषे येनेदमन्नं पच्यते यदिदमद्यते' (बृ.उ. ५।९) इत्यादौ। अग्निमात्रं वा स्यात् सामान्येनापि प्रयोगदर्शनात्–'विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्' (ऋ. सं. १०।८८।१२) इत्यादौ। अग्निशरीरा वा देवता स्यात्, तस्यामपि प्रयोगदर्शनात्। 'वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः' (ऋ.सं. १।९८।१) इत्येवमाद्यायाः श्रुतेर्देवतायामैश्वर्याद्युपेतायां संभवात्। अथात्मशब्दसामानाधिकरण्यादुपक्रमे च 'को न आत्मा किं ब्रह्म' इति केवलात्मशब्दप्रयोगादात्मशब्दवशेन वैश्वानरशब्दः परिणेय इत्युच्यते, तथापि शारीर आत्मा स्यात्, तस्य भोक्तृत्वेन वैश्वानरसंनिकर्षात्। प्रादेशमात्रमिति च विशेषणस्य तस्मिन्नुपाधिपरिच्छिन्ने संभवात्। तस्मान्नेश्वरो वैश्वानर इत्येवं प्राप्ते[1]।

प्रकटार्थविवरणम्

विश्वस्मै भुवनायाग्निं वैश्वानरमह्नां केतुं चिह्नम् सूर्यम्। सूर्योदये हि दिनव्यवहारः, अकृण्वन् कृतवन्त इत्यर्थः। पक्षान्तरमाह— **अग्निशरीरा वेति**। वैश्वानरस्य सुमतौ शोभनबुद्धौ वयं स्याम भवेम। तस्यास्मद्विषया सुमतिर्भवत्विति केचित् प्रार्थयन्ते। किमिति एवं प्रार्थना—राजा हि यस्मात् कं प्रजापतिः अभिमुखा श्रीरस्येत्यभिश्रीरश्च इत्यर्थः। पूर्वत्रापरितोषमुक्त्वा पक्षान्तरमादत्ते— **अथेत्यादिना**।

भाष्यभावप्रकाशिका

आपः रयिशब्दवाच्यधनहेतुत्वात्। देवताविषयत्वमस्य कथमिति? तदाह—**स्तुतेरिति**। ननु को न आत्मेत्युपक्रमात् सन्देहो नोपपद्यते; उपक्रमानुसारेणोपसंहारस्य नेतव्यत्वात्, मैवम्; समानप्रकरणे वाजसनेयकेऽग्निवैश्वानरशब्दाभ्यामुपक्रमादिति भावः। शारीराभ्युपगमे वैश्वानरशब्दप्रादेशमात्रत्वादीनि लक्षणादिना नेतुं शक्यानीत्यभिप्रेत्याह—**तथापि शारीर इति**।

न्यायनिर्णयः

विशिनष्टि—**येनेति**। पक्षान्तरमाह—**अग्नीति**। तन्मात्रग्रहे हेतुः—**सामान्येनेति**। विश्वस्मै भुवनाय वैश्वानरमग्निमह्नां केतुं चिह्नं सूर्यमकृण्वन् कृतवन्तो देवाः। तदुदये दिनव्यवहारादित्यर्थः। कल्पान्तरमाह—**अग्नीति**। तदभिमानिदेवताग्रहे हेतुः—**तस्यामिति**। वैश्वानरस्य देवस्य सुमतौ शोभनबुद्धौ वयं स्याम भवेम। तस्यास्मद्विषया सुमतिर्भवत्वित्यर्थः। तत्र हेतुः—**राजा हीति**। यस्माद्भुवनानामयं राजा, कं सुखं सुखहेतुः, अभिमुखा श्रीरस्येत्यभिश्रीरीश्वरस्तस्मात्तस्य सुमतौ स्यामेत्यर्थः। हिकमित्येकं पदमित्येके। तत्राप्ययमेवार्थः। प्रयोगत्रयेऽपि तुल्यप्रयोगग्रहार्थमादिपदम्। कथं देवतार्थत्वमस्य प्रयोगस्येति, तदाह—**एवमाद्याया इति**। ऐश्वर्यादीत्यादिपदं धर्मज्ञानवैराग्यादिसंग्रहार्थम्। पक्षत्रयेऽप्यपरितोषमाह—**अथेति**। वाजसनेयकेऽग्निवैश्वानरशब्दाभ्यामेवोपक्रमान्नेश्वरार्थतेति पक्षान्तरमाह—**तथापीति**। शारीरे लक्षणया वैश्वानरशब्दोपपत्तिमाह—**तस्येति**। तत्रैव हेत्वन्तरमाह—**प्रादेशेति**। भूताग्निदेवताजीवविषयं पक्षत्रयमुपक्रममात्रम्, प्राणाहुत्याधारत्वादेर्द्युमूर्धत्वादेश्चायोगात्। 'हृदयं गार्हपत्यः' इत्यादिना हि देहावयवाः संनिहितस्यौदर्यस्याग्नेर्गार्हपत्यादित्वेन कल्प्यन्ते। 'आस्यमाहवनीयः' 'तद्यद्भक्तं तद्धोमीयम्' इति च जाठरस्य मुखानुस्यूतस्य प्राणाहुत्याधारस्याऽऽहवनीयत्वेनाऽऽस्यं कल्प्यते। न च द्युमूर्धत्वादेस्तत्रासंभवः। 'स होवाच मूर्धानमुपदिशन्नेष वा अतिष्ठा वैश्वानरः' इत्यादिना मूर्धादीनां द्युलोकाद्यात्मना संपादनात् तैर्जाठरस्यापि द्युमूर्धत्वादिसिद्धेरारोपितद्युमूर्धत्वादिना बृहत्त्वात्तस्यैव ब्रह्मत्वमापनादात्मत्वम्। न च ब्रह्मण्यपि द्युमूर्धत्वादेरारोपः, तत्कल्पनायाः श्रौतत्वेन विशेषात्। अतो जाठरोपास्तिपरं वाक्यमित्युपसंहरति—**तस्मादिति**।

---

१. 'प्राप्तम्' इति पा.।

तत इदमुच्यते– वैश्वानरः परमात्मा भवितुमर्हतीति। कुतः? साधारणशब्दविशेषात्। साधारणशब्दयोर्विशेषः साधारणशब्दविशेषः। यद्यप्येतावुभावप्यात्मवैश्वानरशब्दौ साधारणशब्दौ, वैश्वानरशब्दस्तु त्रयस्य साधारणः, आत्मशब्दश्च द्वयस्य; तथापि विशेषो दृश्यते, येन परमेश्वरपरत्वं तयोरभ्युपगम्यते– 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाः' इत्यादिः। अत्र हि परमेश्वर एव द्युमूर्धत्वादिविशिष्टोऽवस्थान्तरगतः प्रत्यगात्मत्वेनोपन्यस्त आध्यानायेति गम्यते, कारणत्वात्। कारणस्य हि सर्वाभिः कार्यगताभिरवस्थाभिरवस्थावत्त्वाद् द्युलोकाद्यवयवत्वमुपपद्यते। 'स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति' इति च सर्वलोकाद्याश्रयं फलं श्रूयमाणं परमकारणपरिग्रहे संभवति। 'एवं हास्य सर्वे पाप्मानः प्रदूयन्ते' (छा. उ. ५।२४।३) इति च तद्विदः सर्वपाप्मप्रदाहश्रवणम्, 'को न आत्मा किं ब्रह्म' इति चात्मब्रह्मशब्दाभ्यामुपक्रम इत्येवमेतानि लिङ्गानि परमेश्वरमेवावगमयन्ति। तस्मात् परमेश्वर एव वैश्वानरः।।२४।।

स्मर्यमाणमनुमानं स्यादिति।।२५।।

इतश्च परमेश्वर एव वैश्वानरः, यस्मात् परमेश्वरस्यैवाग्निरास्यं द्यौर्मूर्धेतीदृशं त्रैलोक्यात्मकं रूपं स्मर्यते–'यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः। सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नमः।।'

प्रकटार्थविवरणम्

सिद्धान्तमवतारयति—**तत इदमुच्यत इत्यादिना**। ननु नायं विशेषः परमात्मगमकः, तस्य निर्विशेषस्य द्युमूर्धत्वाद्यसंभवादित्याशङ्क्याह—**अत्र हीति**। लिङ्गान्तराण्याह—**स सर्वेष्वित्यादिना**।

भाष्यभावप्रकाशिका

परस्य कथमवस्थान्तरभाक्त्वमिति? तदाह—**कारणत्वादिति**।।२४।।

न्यायनिर्णयः

सिद्धान्तयति—**तत इति**। हेतुं प्रश्नपूर्वकमादाय व्याचष्टे—**कुत इति**। कौ तौ साधारणौ शब्दौ, को वा तयोर्विशेषः, तत्राह—**यद्यपीति**। नायं परमात्मगमको विशेषः, तस्य निर्विशेषस्य द्युमूर्धत्वाद्ययोगादित्याशङ्क्याह—**अत्रेति**। अवस्थान्तरमध्यात्ममधिदैवमित्येवंरूपम्। तस्य तथैवोपन्यासफलमाह—**आध्यानायेति**। कथं परस्यावस्थान्तरभाक्त्वं, तदाह—**कारणत्वादिति**। तदेव स्फुटयति—**कारणस्येति**। एतेन जाठरे द्युमूर्धत्वादि प्रत्युक्तम्। वैश्वानरोपासकस्य सर्वलोकाद्याश्रयफलश्रुतेश्च वैश्वानरस्येश्वरत्वमित्याह—**स इति**। वैश्वानरविदः सर्वपाप्मदाहश्रुतेश्च तस्य परत्वम्, तद्विज्ञाने तद्दाहप्रसिद्धेरित्याह—**एवं हेति**। यथाऽग्नौ क्षिप्तमिषीकातूलं दह्यत एवमस्य विदुषः सर्वाणि कर्माण्यनर्थहेतवो दह्यन्त इत्यर्थः। उपक्रमादपि तस्य परमात्मता, तयोस्तत्रैव रूढेर्जाठरे त्वमुख्यत्वादित्याह—**को न इति**। उक्तलिङ्गानां फलमाह—**इत्येवमेतानीति**। श्रुतिलिङ्गसिद्धमुपसंहरति—**तस्मादिति**।।२४।।

स्मृत्या च श्रुत्यर्थः शक्यो निर्णेतुमित्याह—**स्मर्यमाणमिति**। तत्र प्रतिज्ञां पूरयति—**इतश्चेति**। सूत्रं व्याकुर्वन्नितःशब्दार्थमाह—**यस्मादिति**। स्मृतिमुदाहरति—**यस्येति**। तस्याः श्रुतिवन्मानत्वं व्युदस्य तद्द्वारा तदाह—**तदिति**।

इति। एतत् स्मर्यमाणं रूपं मूलभूतां श्रुतिमनुमापयदस्य वैश्वानरशब्दस्य परमेश्वरपरत्वेऽनुमानं लिङ्गं गमकं स्यादित्यर्थः। इतिशब्दो हेत्वर्थः। यस्मादिदं गमकं तस्मादपि वैश्वानरः परमात्मैवेत्यर्थः। यद्यपि स्तुतिरियं 'तस्मै लोकात्मने नमः' इति। 'स्तुतित्वमपि नासति मूलभूते वेदवाक्ये सम्यगीदृशेन रूपेण संभवति। 'द्यां मूर्धानं यस्य विप्रा वदन्ति खं वै नाभिं चन्द्रसूर्यौ च नेत्रे। दिशः श्रोत्रे विद्धि पादौ क्षितिं च सोऽचिन्त्यात्मा सर्वभूतप्रणेता।।' इत्येवंजातीयका च स्मृतिरिहोदाहर्तव्या।।२५।।

शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते।।२६।।

अत्राह– न परमेश्वरो वैश्वानरो भवितुमर्हति। कुतः? शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च। शब्दस्तावत्- वैश्वानरशब्दो न परमेश्वरे संभवति, अर्थान्तरे रूढत्वात्। तथाऽग्निशब्दः 'स एषोऽग्निर्वैश्वानरः' इति। आदिशब्दात् 'हृदयं गार्हपत्यः' (छा.उ. ५।१८।२) इत्याद्यग्नित्रेताप्रकल्पनम्, 'तद्यद्भक्तं प्रथममागच्छेत् तद्धोमीयम्' (छा.उ. ५।१९।१) इत्यादिना च प्राणाहुत्यधिकरणतासंकीर्तनम्। एतेभ्यो हेतुभ्यो जाठरो

प्रकटार्थविवरणम्

स्मर्यमाणमनुमानं स्यादिति। ननु स्मृतेः स्तुतिरूपत्वात् स्तुतेश्चासदारोपेणापि संभवात् न मूलापेक्षेत्याशङ्क्याह—**यद्यपि स्तुतिरियमिति।**

शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथादृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते। उक्तमपि सिद्धान्तं पुनराक्षिप्य समाधत्ते—**शब्दादिभ्य इति।** वाजसनेयके ह्यग्निरहस्ये वैश्वानरे अग्निशब्दप्रयोगात् तत्सामान्याच्छान्दोग्येऽपि वैश्वानरोऽग्निरेव, स च प्राणाहुत्यधिकरणतालिङ्गात् जाठर एवेति निश्चीयत इति भावः। जाठरपरिग्रहे लिङ्गान्तरमाह—

भाष्यभावप्रकाशिका

स्मर्यमाणमनुमानं स्यात्।।२५।। ननु स्तुतेरसदारोपेणापि सम्भवान्न मूलभूतश्रुत्यपेक्षेति, अत आह—**यद्यपीति।** औत्सर्गिकं सद्रूपेण स्तुतित्वमित्यर्थः। अस्तुतिभूतमाह।।२५।।

शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशात् पुरुषविधमपि चैनमधीयते (एके)।।२६।। एतेभ्य इति। उभयथाऽपीत्यनेकलिङ्गानुसारेणानन्यथासिद्धवैश्वानराग्निशब्दश्रुत्यनुसारेण चैकलिङ्गमुपनेयमित्यर्थः।

न्यायनिर्णयः

इतिशब्दस्य वाक्यसमाप्त्यर्थत्वं व्यावर्त्य हेत्वर्थत्वं व्यनक्ति—**यस्मादिति।** स्तुतेरसदारोपेऽपि संभवान्न मूलश्रुत्यपेक्षेत्याशङ्क्याह—**यद्यपीति।** सद्रूपेण स्तुतित्वमौत्सर्गिकमसति श्रुत्यपवादे दुर्वारमित्यर्थः। अस्तुतिरूपामपि स्मृतिमाह—**द्यामिति।** इहेति त्रैलोक्यदेहस्य वैश्वानरस्येश्वरतायामित्यर्थः।।२५।।

सिद्धान्तं विधान्तरेणाक्षिप्य समाधत्ते—**शब्दादिभ्य इति।** आक्षेपं विवृण्वन् नञर्थमाह—**अत्रेति।** स्थितः सिद्धान्तः सप्तम्यर्थः। श्रुत्यादिना वैश्वानरस्योक्तेश्वरत्वाक्षेपे प्रश्नद्वारा हेतुमादत्ते—**कुत इति।** तत्र शब्दं व्याचष्टे—**शब्द इति।** ईश्वरस्य विरोधीति शेषः। तदेव स्फोरयति—**वैश्वानरेति।** शब्दान्तरमाह—**तथेति।** सोऽपि श्रौतो वैश्वानरशब्दवदीश्वरे न संभवतीति योजना। आदिशब्दोपात्तं लिङ्गमाह—**आदीति।** बहूक्त्यर्थं लिङ्गान्तरमाह—**तद्यदिति।** अपेक्षितां प्रतिज्ञां पूरयति—**एतेभ्य इति।** वाजसनेयकेऽग्निरहस्ये वैश्वानरेऽग्निशब्दात् तस्य परस्मिन्नयोगात् तत्सामान्याच्छान्दोग्येऽपि वैश्वानरोऽग्निरेव, स

१. 'तथापि' इत्यधिकं क्वचित्।

वैश्वानरः प्रत्येतव्यः। तथाऽन्तःप्रतिष्ठानमपि श्रूयते–'पुरुषेऽन्तः प्रतिष्ठितं वेद' इति। तच्च जाठरे संभवति। यदप्युक्तम्– 'मूर्धैव सुतेजा' इत्यादेर्विशेषात् कारणात् परमात्मा वैश्वानर इति, अत्र ब्रूमः–[1] कुतो ह्येष निर्णयः, यदुभयथाऽपि विशेषप्रतिभाने सति परमेश्वरविषय एव विशेष आश्रयणीयो, न जाठरविषय इति। अथवा भूताग्नेरन्तर्बहिश्चावतिष्ठमानस्यैष निर्देशो भविष्यति। तस्यापि हि द्युलोकादिसंबन्धो [2]मन्त्रवर्णादवगम्यते–'यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अन्तरिक्षम्' (ऋ. सं. १०।८८।३) इत्यादौ। अथवा तच्छरीराया देवताया ऐश्वर्ययोगाद् द्युलोकाद्यवयवत्वं भविष्यति। तस्मान्न परमेश्वरो वैश्वानर इति।

अत्रोच्यते– न तथा दृष्ट्युपदेशादिति। न शब्दादिभ्यः कारणेभ्यः परमेश्वरस्य प्रत्याख्यानं युक्तम्। कुतः? तथा जाठरापरित्यागेन दृष्ट्युपदेशात्। परमेश्वरदृष्टिर्हि जाठरे वैश्वानर इहोपदिश्यते, 'मनो

प्रकटार्थविवरणम्

तथाऽन्तःप्रतिष्ठानमपीति। अग्निरहस्ये हि सप्रपञ्चं वैश्वानरविद्यामुक्त्वाऽऽह 'स यो ह वै तमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेद' इति। पुरुषेऽन्तःप्रतिष्ठितश्चाग्निः जाठर एव प्रसिद्ध इत्यर्थः। ननु वाजसनेयकेऽपि द्युमूर्धत्वादिश्रवणान्न जाठरपरिग्रह इत्याशङ्क्याह—**यदप्युक्तमिति।** द्युमूर्धत्वादिविशेषः परमात्मपक्षपाती प्रतिभाति, तथाऽन्तःप्रतिष्ठानादिलिङ्गसहकृतोऽग्न्यादिशब्दो जाठरपक्षपाती प्रतिभाति। एवं सति परमेश्वरोरीकरणं किंकृतम्? यद्यग्न्यादिशब्दः परमेश्वरे कथंचिन्नीयते तर्हि द्युमूर्धत्वादिकमेव जाठरोपासनार्थमास्थीयतामिति भावः। पक्षान्तरमाह—**अथवेति।** इमां पृथिवीम्, उत तथा द्यां द्युलोकम्, एते द्यावाभूमी एव रोदसीशब्दवाच्ये यो भानुरूपेणाऽऽततान अन्तरिक्षं च व्याप्तवानित्यर्थः।

परिहारभागमवतारयति—**अत्रोच्यत इति।** जाठरप्रतीकत्वाज्जाठरोपाधिकत्वाद्वा परमेश्वरेऽपि लक्षणयाऽग्न्यादिशब्दोपपत्तौ न तस्य परमेश्वरलिङ्गान्यथाकरणे सामर्थ्यमिति भावः। ननु मुख्ये किं बाधकमित्याशङ्क्य "असंभवात्" इति सूत्रभागमवतारयति—

न्यायनिर्णयः

चाहुत्याधारत्वादिलिङ्गाज्जाठर एवेति भावः। तत्रैव लिङ्गान्तरमाह—**तथेति।** यथोक्तहेतुभ्यो वैश्वानरो नेश्वरस्तथा वक्ष्यमाणहेतोरपीत्यर्थः। **अन्तःप्रतिष्ठानमपि** वैश्वानरस्येति शेषः। अग्निरहस्ये सप्रपञ्चां वैश्वानरविद्यामुक्त्वा स यो हैतमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद स सर्वलोकाद्याश्रयं फलमत्तीत्युक्तम्। पुरुषेऽन्तःप्रतिष्ठितश्चाग्निर्जाठर एव, प्रसिद्धेरित्यर्थः। तथापि वाजसनेयके द्युमूर्धत्वादिश्रवणान्न जाठरः स्यादित्युक्तमनुवदति—**यदपीति।** अनेकलिङ्गानुगृहीतानन्यथासिद्धवैश्वानराग्निश्रुतिभ्यामेकं लिङ्गं नेयमित्याह—**अत्रेति।** जाठरेऽपि द्युमूर्धत्वादि कथंचिन्नीतमिति भावः। न जाठरे मुख्यं द्युमूर्धत्वादीत्यपरितोषादाह—**अथवेति। एष निर्देशो** वैश्वानराग्निशब्दाभ्यामन्तःप्रतिष्ठानोक्त्या चेति शेषः। तत्रापि कुतो द्युमूर्धत्वादि सिद्धं, तत्राह—**तस्यापीति।** अपिरीश्वरदृष्टान्तार्थः। इमां पृथिवीमुत द्यामपि द्यावापृथिव्यावेव रोदसी यो भानुरूपेणाततान व्याप्तवान्, अन्तरिक्षं च तयोर्मध्यमाततान स देवो द्युलोकाद्यवयवो ध्येय इत्यर्थः। परिच्छिन्नभूताग्नेर्न द्युलोकाद्यवयवत्वमित्यरुच्या कल्पान्तरमाह—**अथवेति।** द्युमूर्धत्वादिविशेषस्यान्यथासिद्धत्वे फलितमाह—**तस्मादिति।**

परिहारमवतारयति—**अत्रेति।** तदक्षराणि व्याचष्टे—**नेत्यादिना।** दृष्ट्युपदेशं सदृष्टान्तं स्पष्टयति—**परमेति।** ब्रह्मप्रतीकस्य

१. 'कुतो न्वेष' इति पा.।
२. 'मन्त्रवर्णे' इति युक्तं पाठान्तरम्।

ब्रह्मेत्युपासीत' (छा. उ. ३।१८।१) इत्यादिवत्। अथवा जाठरवैश्वानरोपाधिः परमेश्वर इह द्रष्टव्यत्वेनोपदिश्यते, 'मनोमयः प्राणशरीरो भारूपः' (छा.उ. ३।१४।२) इत्यादिवत्। यदि चेह परमेश्वरो न विवक्ष्येत, केवल एव जाठरोऽग्निर्विवक्ष्येत, ततो 'मूर्धैव सुतेजा' इत्यादेर्विशेषस्यासंभव एव स्यात्। यथा तु देवताभूताग्निव्यपाश्रयेणाप्ययं विशेष उपपादयितुं न शक्यते तथोत्तरसूत्रे वक्ष्यामः। यदि च केवल एव जाठरो विवक्ष्येत, पुरुषेऽन्तःप्रतिष्ठितत्वं केवलं तस्य स्यान्न तु पुरुषत्वम्। 'पुरुषमपि चैनमधीयते वाजसनेयिनः—'स एषोऽग्निर्वैश्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद' (श.ब्रा. १०।६।१।११) इति। परमेश्वरस्य तु सर्वात्मत्वात् पुरुषत्वं पुरुषेऽन्तःप्रतिष्ठितत्वं चोभयमुपपद्यते। ये तु 'पुरुषविधमपि चैनमधीयते' इति सूत्रावयवं पठन्ति, तेषामेषोऽर्थः- केवलजाठरपरिग्रहे पुरुषेऽन्तःप्रतिष्ठितत्वं केवलं स्यान्न पुरुषविधत्वम्। पुरुषविधमपि चैनमधीयते

प्रकटार्थविवरणम्

यदि चेहेति। उपासनार्थत्वेऽपि जाठरे द्युमूर्धत्वादेरसत एवारोपः स्यान्न सति संभवे स युक्त इति भावः। "पुरुषमपि चैनमधीयते" इति सूत्रभागं व्याचष्टे—**यदि चेति।** ननु जाठरस्याप्यापादतलमस्तकव्यापित्वात् पुरुषविधत्वं घटत इत्याशङ्क्याह—**पुरुषविधत्वं**

भाष्यभावप्रकाशिका

जाठरपरिग्रहे द्युमूर्धत्वादेरत्यन्तबाधः स्यादित्यपरितोषादाह—**अथवेति।** द्युलोकादिसम्बन्धसम्भवात् तदुभयत्वादिति।(?) (तथा) [असंभवादिति] पदं व्याचष्टे—**यदि चेति।** पुरुष(विध)मपि चेत(चै)नमिति सूत्रावयवं व्याचष्टे—**यदि केवल इति।** केवलशब्देन ब्रह्मोपाधित्वतत्प्रतीकत्वयोरभ्युपगमः कथ्यते, न केवलमन्तः प्रतिष्ठितम्, तत्त्वमपीत्यर्थः। ननु परमेश्वरपरिग्रहेऽपि केवलं पुरुषस्तत्त्वम्, [कथं] पुरुषेऽन्तःप्रतिष्ठित्वमिति? अत आह—**परमेश्वरस्येति।** ननु परमेश्वरस्यापि पुरुषत्वमेव, न तु

न्यायनिर्णयः

जाठरस्योपास्यतेष्टेति शिष्ट्वा सूत्रावयवं तदुपाधिनो ब्रह्मण एवोपास्यतेति विधान्तरेण व्याकरोति—**अथवेति।** जाठरप्रतीकत्वात् तदुपाधित्वाद्वा परस्मिन्नपि लक्षणयाऽग्न्यादिशब्दसिद्धौ न तस्य तल्लिङ्गान्यथाकरणे शक्तिरिति भावः। असंभवादिति व्याचष्टे—**यदि चेति।** उपास्त्यर्थत्वेऽपि जाठरे द्युमूर्धत्वादेरसत एवारोपः स्यात्। न च सति संभवे स युक्त इत्यर्थः। अस्तु तर्हि देवतादिविषयत्वं विशेषस्येत्याशङ्क्याह—**यथेति।** पुरुषमपीत्यादि विभजते—**यदि चेति।** ब्रह्मोपाधित्वतत्प्रतीकत्वयोरसत्त्वं कैवल्यम्, तस्य सर्वलोकाद्याश्रयं फलमिति शेषः। पुरुषत्वेऽपि कथं ब्रह्मणस्तदन्तःप्रतिष्ठितत्वं, तत्राह—**परमेति।** पाठान्तरमादाय व्याचष्टे—**ये त्विति।** जाठरस्याचेतनत्वात् पुरुषत्ववन्न तद्विधत्वमपीत्यर्थः। ब्रह्मणोऽपि पुरुषत्वमेव, न तद्विधत्वमित्याशङ्क्याह—

---

१. पुरुषमपीति। 'स एषोऽग्निर्वैश्वानरो यत् पुरुषः' इति श्रुतौ 'यत् यः एषोऽग्निर्वैश्वानरः स पुरुषः'. इति वैश्वानरस्य पुरुषत्वं विधीयत इति भावः। अत्र पञ्चपादिकाकारैः यच्छब्दस्याव्यवहितेन पुरुषशब्देन सम्बन्धमाश्रित्य 'यः पुरुषः स वैश्वानरः' इति पुरुषमनूद्य वैश्वानरत्वं विधेयमिति व्याख्यातम्। तच्च 'पुरुषमपि चैनमधीयते' इति सूत्रगतापिशब्देन अन्तःप्रतिष्ठितत्वेन सह पुरुषत्वस्य विधेयत्वेन समुच्चयात् तद्विरोधात्, 'परमेश्वरदृष्टिर्हि जाठरे वैश्वानर इहोपदिश्यते' इति भाष्यविरोधात्, श्रुतावेवाग्रिमवाक्ये 'स यो हैतमेवमग्निं वैश्वानरं पुरुषं पुरुषेऽन्तः प्रतिष्ठितं वेद' इति वैश्वानरस्य पुरुषत्ववेदनानुवादात् तद्विरोधाच्चायुक्तमिति भामत्यां खण्डितम्।

कल्पतरुकारैश्च तत्खण्डनमेवमुद्धृतम्— 'पञ्चपाद्यां तु जाठरे ईश्वरदृष्टिपक्षमुक्त्वा योगादग्निवैश्वानरशब्दयोरीश्वरे वृत्तिरिति पक्षान्तरं वक्तुमयमुद्देश्यविधेयभावव्यत्यय आश्रितः इति चिन्त्यमिदं दूषणमिति।' पक्षान्तरं चेदं 'साक्षादप्यविरोधं जैमिनिः' इति सूत्रे स्पष्टम्। उद्देश्यविधेयभावव्यत्ययः प्रकटार्थे सम्पत्तेरिति सूत्रे स्पष्टः।

अद्यत्वे चतुस्सूत्रीपर्यन्तमेवोपलभ्यमानायाः पञ्चपादिकायाः अग्रेतनोऽपि ग्रन्थः भामतीकारकल्पतरुकाराभ्यामुपलब्ध इति अनेन संदर्भेण ज्ञायते।

वाजसनेयिनः-'पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद' इति। पुरुषविधत्वं च प्रकरणाद् यदधिदैवतं द्युमूर्धत्वादि पृथिवीप्रतिष्ठितत्वान्तं, यच्चाध्यात्मं प्रसिद्धमूर्धत्वादि चुबुकप्रतिष्ठितत्वान्तं तत् परिगृह्यते।।२६।।

अत एव न देवता भूतं च।।२७।।

यत्पुनरुक्तं भूताग्नेरपि मन्त्रवर्णे द्युलोकादिसंबन्धदर्शनान्मूर्धैव सुतेजा इत्याद्यवयवकल्पनं तस्यैव भविष्यतीति, तच्छरीराया देवताया वैश्वर्ययोगादिति, तत् परिहर्तव्यम्। अत्रोच्यते- अत एवोक्तेभ्यो हेतुभ्यो न देवता वैश्वानरः। तथा भूताग्निरपि न वैश्वानरः। न हि भूताग्नेरौष्ण्यप्रकाशमात्रात्मकस्य द्युमूर्धत्वादिकल्पनोपपद्यते, विकारस्य विकारान्तरात्मत्वासंभवात्। तथा देवतायाः सत्यप्यैश्वर्ययोगे न द्युमूर्धत्वादिकल्पना संभवति, अकारणत्वात् परमेश्वराधीनैश्वर्यत्वाच्च। आत्मशब्दासंभवश्च सर्वेष्वेषु पक्षेषु स्थित एव।।२७।।

साक्षादप्यविरोधं जैमिनिः।।२८।।

पूर्वं जाठराग्निप्रतीको जाठराग्न्युपाधिको वा परमेश्वर उपास्य इत्युक्तमन्तःप्रतिष्ठितत्वाद्यनुरोधेन।

प्रकटार्थविवरणम्

च प्रकरणादिति। नापादतलमस्तकव्यापित्वं पुरुषाकारत्वमित्यर्थः।

अत एव न देवता भूतं च। उक्तहेतून् स्मारयति—**न हि भूताग्नेरित्यादिना।**

साक्षादप्यविरोधं जैमिनिः। वाजसनेयके अग्निवाचकमभ्युपगम्य परमात्मनि च जाठरसंबद्धे लक्षणां स्वीकृत्य

भाष्यभावप्रकाशिका

पुरुषविधत्वमिति, अत आह—**पुरुषविधत्वं चेति**॥२६॥

अत एव न देवता भूतं च॥२७॥ अत एवेति। द्युमूर्धादिसम्बन्धसर्वलोकाश्रयफलभागित्वसर्वपाप्मप्रदाहात्मब्रह्मपदोपक्रमेभ्यो हेतुभ्य इत्यर्थः॥२७॥

न्यायनिर्णयः

पुरुषेति। तच्च ब्रह्मण्युपास्त्यर्थं स्यादिति भावः॥२६॥

द्युमूर्धत्वादिविशेषस्य जाठरविषयत्वं संदूष्य देवतादिविषयत्वं दूषयति—**अत एवेति।** सूत्रं व्याकर्तुं व्यावर्त्यं पक्षद्वयमनूद्य तस्य निरस्यत्वमाह—**यदिति।** सूत्रमुत्थाप्य व्याकरोति—**अत्रेति।** द्युमूर्धत्वादिसंबन्धसर्वलोकाद्याश्रयफलभाक्त्वसर्वपाप्मदाहात्मब्रह्मोपक्रमा उक्ता हेतवः। भूतदेवतयोरपि द्युमूर्धत्वादि सिध्यतीत्युक्तं प्रत्याह—**न हीति।** किंच न देवताया निरङ्कुशमैश्वर्यं किंत्वीश्वरायत्तम्, अतस्तस्यैव सर्वकारणस्य द्युमूर्धत्वादीत्याह—**परमेश्वरेति।** पक्षत्रयसाधारणं दोषमाह—**आत्मेति।** चकारो ब्रह्मशब्दायोगस्य सर्वपाप्मदाहायोगस्य च समुच्चयार्थः॥२७॥

वाजसनेयकेऽग्निशब्दं जाठरार्थमुपेत्य परस्मिन्नपि तत्संबन्धाल्लक्षणां स्वीकृत्य ब्रह्मोपास्तिरित्युक्तम्। इदानीमत्राप्यग्न्यादिशब्दो ब्रह्मार्थः; ततो यदधिदैवं द्युलोकादिपृथिव्यन्तं यच्चाध्यात्मं मूर्धादिचुबुकान्तं रूपं तदनुगतं ब्रह्मैवोपास्यं, न जाठरावच्छिन्नमित्याह—**साक्षादिति।** वृत्तमनूद्य सूत्रार्थं विवृणोति—**पूर्वमित्यादिना।** जाठरस्य प्रतीकादित्वेन ग्रहे हेतुं

इदानीं तु विनैव प्रतीकोपाधिकल्पनाभ्यां साक्षादपि परमेश्वरोपासनपरिग्रहे न कश्चिद् विरोध इति जैमिनिराचार्यो मन्यते। ननु जाठराग्न्यपरिग्रहेऽन्तःप्रतिष्ठितत्ववचनं, शब्दादीनि च कारणानि विरुध्येरन्निति। अत्रोच्यते– अन्तःप्रतिष्ठितत्ववचनं तावन्न विरुध्यते। न हीह 'पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद' इति जाठराग्न्यभिप्रायेणेदमुच्यते, तस्याप्रकृतत्वादसंशब्दितत्वाच्च। कथं तर्हि? यत् प्रकृतं मूर्धादिचुबुकान्तेषु पुरुषावयवेषु पुरुषविधत्वं कल्पितम्, तदभिप्रायेणेदमुच्यते–'पुरुषविधं पुरुषेऽन्तः-प्रतिष्ठितं वेद' इति। यथा वृक्षे शाखां प्रतिष्ठितां पश्यतीति, तद्वत्। अथवा यः प्रकृतः परमात्माऽध्यात्ममधिदैवतं च पुरुषविधत्वोपाधिस्तस्य यत् केवलं साक्षिरूपं तदभिप्रायेणेदमुच्यते– 'पुरुषेऽन्तःप्रतिष्ठितं वेद' इति। निश्चिते च पूर्वापरालोचनवशेन परमात्मपरिग्रहे तद्विषय एव वैश्वानरशब्दः केनचिद् योगेन वर्तिष्यते। विश्वश्चायं नरश्चेति, विश्वेषां वाऽयं नरः, विश्वे वा नरा अस्येति विश्वानरः

प्रकटार्थविवरणम्

परमात्मोपासनं तावन्न विरुध्यत इत्युक्तम्। इदानीं तु परमात्मवाचकोऽग्निरहस्येऽप्यग्न्यादिशब्दः, ततो यदधिदैवतं द्युलोकादिपृथिवीपर्यन्तं रूपं यच्च प्रसिद्धमूर्धादिचिबुकान्तमध्यात्मरूपं तदनुगतः परमेश्वर उपास्यो न जाठरावच्छिन्न इत्याह—**साक्षादपीति**। करशिरश्चरणादिसमुदायः पुरुषः। तदन्तर्वर्ति मूर्धादिचिबुकान्तरूपं समुदायान्तर्गतत्वान्मूर्धाद्यवयवानाम्, न तूदरान्तरवस्थानं विवक्षितमित्याह—**न हीह पुरुषविधमिति**। अथ वा जीवः पुरुषशब्देनोच्यते। तदन्तःप्रतिष्ठितोऽन्तर्यामी निर्दिश्यत इत्याह—**अथ वायं प्रकृत इति**। एवमन्तःप्रतिष्ठानं जाठरापरिग्रहे व्याख्याय शब्दादीनि जाठरपरिग्रहकारणानि परमात्मपक्षेऽप्यविरुद्धानीत्याह—**निश्चिते चेति**। विश्वेषां वाऽयं नरो नेता संहरन्। "नृ नय" इति धात्वर्थानुसारात्। सर्वे वा जीवा

भाष्यभावप्रकाशिका

साक्षादप्यविरोधं जैमिनिः॥२८॥ ननु पुरुषशब्देन करशिरआदिमानभिधीयते। ततः कथं पुरुषेऽन्तःप्रतिष्ठितत्वमिति? अत आह—**यथेति**। अत्र पुरुषावयवसम्पत्त्या पुरुषविधत्वम्, कार्यकरणसमुदायरूपे पुरुषे मूर्धादिचुबुकान्तावयवप्रतिष्ठानाच्च पुरुषेऽन्तःप्रतिष्ठितत्वम्, समुदायमध्यपातित्वात् समुदायिनां तदवयवानाम्; शाखानिदर्शनवदित्यर्थः। समाधानान्तरमाह—**अथवेति**। अन्तःप्रतिष्ठितत्वेन माध्यस्थ्येन साक्षित्वं लक्ष्यत इत्यर्थः। पूर्वपक्षिणः शङ्कामुन्मूलयति—**निश्चित इति**। कथञ्चिन्नयनासम्भवोऽसिद्धः, सर्वात्मत्वसर्वकारणत्वसर्वेश्वरत्वाभिप्रायेण वैश्वानरशब्दोपपत्तेरित्यर्थः। तथापि विश्वानर इति स्यात्,

न्यायनिर्णयः

सूचयति—**अन्तरिति**। साक्षादीश्वरोपास्तौ विरोधं शङ्कते—**नन्विति**। विरोधं व्युदस्यति—**अत्रेति**। अन्तःप्रतिष्ठित-त्वोक्तेर्जाठराग्रहेऽप्यविरोधं प्रतिज्ञाय हेतुमाह—**न हीति**। इहेति वाजसनेयकोक्तिः। अन्तःप्रतिष्ठितत्वमिदमा परामृष्टम्। प्रकरणोपपदयोरभावाज्जाठरानभिप्रायेऽपि पुरुषशब्देन करशिरश्चरणादिमतोऽभिधानात् कथं तद्विधत्वं तदन्तःप्रतिष्ठितत्वं वा परस्यापीत्याशङ्क्याह—**कथमिति**। पुरुषावयवसंपत्त्या तद्विधत्वं, कार्यकरणसमुदायात्मनि तस्मिन् मूर्धादिचुबुकान्तावयवस्थितेश्च पुरुषेऽन्तःप्रतिष्ठितत्वम्, समुदायिनां समुदायमध्यपातित्वादित्याह—**यथेति**। अन्तःप्रतिष्ठितत्वेन माध्यस्थ्येन साक्षीव लक्ष्यत इति पक्षान्तरमाह—**अथवेति**। अन्तःप्रतिष्ठितत्वोक्तेरविरोधमुक्त्वा वैश्वानरशब्दस्याविरोधमाह—**निश्चिते चेति**। तस्य तत्रारूढेर्न तद्विषयतेत्याशङ्क्याह—**केनेति**। सर्वात्मत्वमाश्रित्य योगवृत्तिमेव कथयति—**विश्वश्चेति**। सर्वकारणत्वेन योगवृत्तिमाह—**विश्वेषामिति**। सर्वेश्वरत्वेनापि तामाह—**विश्वे वेति**। सर्वात्मत्वं सर्वकारणत्वं सर्वेश्वरत्वोपलक्षणम्। तथापि विश्वनर इति स्यात्,

परमात्मा, सर्वात्मत्वात्। विश्वानर एव वैश्वानरः। तद्धितोऽनन्यार्थः, राक्षसवायसादिवत्। 'अग्निशब्दोऽप्यग्रणीत्वादियोगाश्रयणेन परमात्मविषय एव भविष्यति। गार्हपत्यादिकल्पनं प्राणाहुत्यधिकरणत्वं च परमात्मनोऽपि सर्वात्मत्वादुपपद्यते।।२८।।

कथं पुनः परमेश्वरपरिग्रहे प्रादेशमात्रश्रुतिरुपपद्यत इति? तां व्याख्यातुमारभते—

अभिव्यक्तेरित्याश्मरथ्यः।।२९।।

अतिमात्रस्यापि परमेश्वरस्य प्रादेशमात्रत्वमभिव्यक्तिनिमित्तं स्यात्। अभिव्यज्यते किल प्रादेशमात्रपरिमाणः परमेश्वर उपासकानां कृते। प्रदेशेषु वा हृदयादिषूपलब्धिस्थानेषु विशेषेणाभिव्यज्यते।

प्रकटार्थविवरणम्

अस्यैव प्रतिबिम्बभूताः। **अनन्यार्थ इति।** प्रकृत्यर्थातिरिक्तोऽत्र प्रत्ययार्थो न भवतीत्यर्थः। यथा रक्ष एव राक्षसः, वय एव वायसः इति स्वार्थेऽण्प्रत्ययः। अगधातोर्गत्यर्थस्य [2]नप्रत्ययान्तस्य रूपमग्निरित्यौणादिकम्, तत्राङ्गयति गमयति जगतोऽग्र्यजगत् अग्र्यजन्म प्रापयतीत्यग्निरग्रणीरित्यर्थः। अथवा अभितः सर्वत्र गत इत्यग्निः। अथवाऽङ्क्ते जानाति विश्वमित्यग्निः। समासादिनैकपद्यमापन्नस्यावयवशक्त्यनुसारेण विशिष्टेऽर्थे वृत्तिर्योगो मुख्यवृत्तिभेद एव। तदेवं वाजसनेयकेऽपि परमेश्वरोपासनसिद्धेः न तद्बलेनापि छान्दोग्यवाक्यं विघटनीयमिति फलितार्थः। यच्च छान्दोग्यगतमेव जाठरलिङ्गमुक्तम्, तत्राह—**गार्हपत्यादीति।**

अभिव्यक्तेरित्याश्मरथ्यः। मात्रां परिमाणमतिक्रान्तोऽतिमात्रः तस्येति। प्रदेशेषु वा मीयते व्यज्यत इति प्रादेशमात्र इत्याह—**प्रदेशेषु वेति।**

भाष्यभावप्रकाशिका

न वैश्वानर इति, तत्राह—**विश्वानर इति।।२८।।**

अभिव्यक्तेरित्याश्मरथ्यः।।२९।। अतिक्रान्ता मात्रा परिमाणं येन, सोऽतिमात्रः।।२९।।

न्यायनिर्णयः

कथं वैश्वानर इत्युच्यते, तत्राह—**विश्वेति।** 'नरे संज्ञायाम्' इति दीर्घता। अण्प्रत्ययस्तर्हि कथम्, तत्राह—**तद्धित इति।** अनन्यार्थत्वं प्रकृत्यर्थातिरिक्तार्थशून्यत्वम्। तथापि कथं परस्मिन्नग्निपदम्, तदाह—**अग्नीति।** अगेर्धातोर्गत्यर्थस्य निप्रत्ययान्तस्याग्निरिति रूपम्, तत्राङ्गयति गमयति जगतोऽग्रं जन्म प्रापयतीत्यग्निरग्रणीरुक्तः। आदिशब्दादभितोगतत्वं सर्वज्ञातृत्वं च गृहीतम्। एवं वाजिशाखायामपि परोपास्तिसिद्धौ न तद्बलाच्छान्दोग्यवाक्यं विघटनीयमित्युक्तम्। यत्तु छान्दोग्ये परस्मिन्नसंभवि लिङ्गमुक्तं, तत्राह—**गार्हपत्यादीति।।२८।।**

सूत्रत्रयमाकाङ्क्षाद्वाराऽऽदत्ते—**कथमिति।** मतभेदेन व्याख्यामेव दर्शयन्नादावाश्मरथ्यमतमाह—**अभिव्यक्तेरिति।** विभोरीश्वरस्यायुक्ता प्रादेशमात्रतेति शङ्कां निरस्यन् व्याकरोति—**अतिमात्रस्येति।** अतिक्रान्ता मात्राः परिमाणं येन तस्येति यावत्। अभिव्यक्तिनिमित्तं प्रादेशमात्रत्वमित्येतदेव व्यनक्ति—**अभिव्यज्यत इति।** स्वाभाविकाणिमाद्यैश्वर्यख्यापनार्थं महतोऽपीश्वरस्योपासकान् प्रति सूक्ष्मत्वेन व्यक्तिरिति द्योतयति—**किलेति।** नियमेन प्रादेशमात्रतया व्यक्तौ हेत्वभावान्नेयं व्याख्येत्याशङ्क्याह—**प्रदेशेष्विति।** अभिव्यक्तिफलमाह—**अत इति।।२९।।**

---

१. 'अग्निः कस्मात्? अग्रणीर्भवति, अग्रं यज्ञेषु नीयते' इति निरुक्तम्, (नि. ७-१४-३,४) "यस्माच्चायं नयत्यग्र्यां गतिं विप्रान् प्रपूजितः। तस्माच्च नयनाद् राजन् वेदेष्वग्निः प्रकीर्तितः" इति महाभारतं चानुसंधेयम्।

'सूत्रे जैमिनिग्रहणं स्वशिष्योपपादितप्रकारोऽयमिति तत्ख्यापनार्थम्। एवमुत्तरत्रापि' इति न्यायरक्षामणिः।

२. 'निप्रत्ययान्तस्य' इति स्यात्।

अतः परमेश्वरेऽपि प्रादेशमात्रश्रुतिरभिव्यक्तेरुपपद्यत इत्याश्मरथ्य आचार्यो मन्यते।।२९।।

अनुस्मृतेर्बादरिः।।३०।।

प्रादेशमात्रहृदयप्रतिष्ठेन वाऽयं मनसाऽनुस्मर्यते। तेन प्रादेशमात्र इत्युच्यते। यथा प्रस्थमिता यवाः प्रस्था इत्युच्यन्ते, तद्वत्। यद्यपि च यवेषु स्वगतमेव परिमाणं प्रस्थसंबन्धाद् व्यज्यते। न चेह परमेश्वरगतं किंचित्परिमाणमस्ति यद्धृदयसंबन्धाद् व्यज्येत। तथापि प्रयुक्तयाः प्रादेशमात्रश्रुतेः संभवति यथाकथंचिदनुस्मरणमालम्बनमित्युच्यते। प्रादेशमात्रत्वेन वाऽयमप्रादेशमात्रोऽप्यनुस्मरणीयः प्रादेशमात्र-श्रुत्यर्थवत्तायै। एवमनुस्मृतिनिमित्ता परमेश्वरे प्रादेशमात्रश्रुतिरिति बादरिराचार्यो मन्यते।।३०।।

संपत्तेरिति जैमिनिस्तथाहि दर्शयति।।३१।।

संपत्तिनिमित्ता वा स्यात् प्रादेशमात्रश्रुतिः। तथाहि- समानप्रकरणं वाजसनेयिब्राह्मणं द्युप्रभृतीन् पृथिवीपर्यन्तांस्त्रैलोक्यात्मनो वैश्वानरस्यावयवानध्यात्ममूर्धप्रभृतिषु चुबुकपर्यन्तेषु देहावयवेषु संपादयत् प्रादेशमात्रसंपत्तिं परमेश्वरस्य दर्शयति- 'प्रादेशमात्रमिव ह वै देवाः सुविदिता अभिसंपन्नास्तथा नु व एतान् वक्ष्यामि यथा प्रादेशमात्रमेवाभिसंपादयिष्यामीति। स होवाच मूर्धानमुपदिशन्नुवाचैष वा अतिष्ठा वैश्वानर

प्रकटार्थविवरणम्

अनुस्मृतेर्बादरिः। अत्रैव मतान्तरमाह—**अनुस्मृतेरिति।** स्वयमेव दृष्टान्तवैषम्यमाशङ्क्य परिहरति—**यद्यपीति।**

संपत्तेरिति जैमिनिस्तथा हि दर्शयति। प्रादेशमात्रश्रुतेर्यथाकथंचित् गतिमुक्त्वा अधुना साक्षाच्छ्रुत्युक्तामेव गतिमाह—**संपत्तेरिति।** अप्रादेशमात्रमपि परमेश्वरं संपादनेन प्रादेशमात्रमिव सुविदितवन्तो देवाः परमेश्वरमेवाभिसंपन्नाः पूर्वम्। अतो वो युष्मभ्यं तथा द्युप्रभृतीनेतानवयवान् वक्ष्यामि। यथा प्रादेशपरिमाणं वैश्वानरं संपादयिष्यामीत्यौपमन्यवप्रभृतीन् प्रति वक्तव्यत्वेन प्रतिज्ञाय स राजा कैकय उवाच—किं कुर्वन्? स्वस्य मूर्धानमुपदिशन् कराग्रेण दर्शयन्। एष वै भूरादीन् लोकानतीत्य

भाष्यभावप्रकाशिका

अनुस्मृतेर्बादरिः।।३०।। अनुस्मृतेरिति। सूत्रस्यार्थान्तरमाह—**प्रादेशमात्रत्वेन वेति।।३०।।**

सम्पत्तेरिति जैमिनिस्तथाहि दर्शयति।।३१।। ननु उपदेशभेदात् प्रत्यभिज्ञानाभावेनैकविद्यात्वमनुपपन्नम्; ततस्तदवष्टम्भेन

न्यायनिर्णयः

मतान्तरमाह—**अनुस्मृतेरिति।** व्याचष्टे—**प्रादेशेति।** पूर्वेण विकल्पार्थो वाशब्दः। अभिव्यञ्जकस्थं परिमाणमभिव्यङ्ग्ये भातीत्येतद् दृष्टान्तेनाह—**यथेति।** वैषम्यमाशङ्क्य प्रत्याह—**यद्यपीति।** हृदयस्थं परिमाणं मनःप्रभवस्मृतावारोपितं स्मृत्यैक्येनाध्यस्तस्मर्यमाणेश्वरेऽध्यस्तमालम्बनमिति यथाकथंचिदित्युक्तम्। स्मृतिगतपरिमाणस्य हृदयद्वाराऽऽरोपितस्य स्मर्यमाणे कथमारोपो विषयविषयित्वेन भेदादित्याशङ्क्य व्याख्यान्तरमाह—**प्रादेशेति।** उपसंहरति—**एवमिति।।३०।।**

प्रादेशमात्रश्रुतेर्विषयं कथंचिदुक्त्वा साक्षादेव श्रुत्युक्तं विषयमाह—**संपत्तेरिति।** प्रतिज्ञां विभजते—**संपत्तीति।** संपत्तिरत्राश्रुतेति पृच्छति—**कुत इति।** उत्तरम्—**तथाहीति।** तदेव ब्राह्मणमुदाहरति—**प्रादेशेति।** परमेश्वरमप्रादेशमात्रमपि संपादनेन प्रादेशमात्रमिव सम्यग्विदितवन्तो देवास्तमेवेश्वरं पूर्वमभिसंपन्नास्ततो वो युष्मभ्यं तथा द्युप्रभृतीनेतानवयवान् वक्ष्यामि यथा प्रादेशपरिमाणं वैश्वानरं संपादयिष्यामीत्यौपमन्यवप्रभृतीन् प्रति वक्तव्यत्वेन प्रतिज्ञायाश्वपती राजोवाच, किं कुर्वन्नित्युक्ते स्वस्य मूर्धानमुपदिशन् कराग्रेण दर्शयन्नेष वै लोकान् भूरादीनतीत्य तिष्ठतीत्यतिष्ठा द्यौर्वैश्वानरस्यावयव इति। प्रसिद्धे मूर्धनि

इति। चक्षुषी उपदिशन्नुवाचैष वै सुतेजा वैश्वानर इति। नासिके उपदिशन्नुवाचैष वै पृथग्वर्त्मात्मा वैश्वानर इति। मुख्यमाकाशमुपदिशन्नुवाचैष वै बहुलो वैश्वानर इति। मुख्या अप उपदिशन्नुवाचैष वै रयिर्वैश्वानर इति। चुबुकमुपदिशन्नुवाचैष वै प्रतिष्ठा वैश्वानर इति'। चुबुकमित्यधरं मुखफलकमुच्यते। यद्यपि वाजसनेयके द्यौरतिष्ठात्वगुणा समाम्नायत आदित्यश्च सुतेजस्त्वगुणः;. छान्दोग्ये पुनर्द्यौः सुतेजस्त्वगुणा समाम्नायत आदित्यश्च विश्वरूपत्वगुणः; तथापि नैतावता विशेषेण किंचिद्धीयते, प्रादेशमात्रश्रुतेरविशेषात्। सर्वशाखाप्रत्ययत्वाच्च। संपत्तिनिमित्तां प्रादेशमात्रश्रुतिं युक्ततरां जैमिनिराचार्यो मन्यते।।३१।।

प्रकटार्थविवरणम्

तिष्ठतीत्यतिष्ठा द्यौर्वैश्वानरस्यावयवः। प्रसिद्धे मूर्ध्नि वैश्वानरस्याधिदैवतं यो मूर्धा द्युलोकः तद्दृष्टिः कर्तव्येत्यर्थः। चक्षुषी प्रदर्शयन्नुवाच। "एष वै सुतेजा आदित्योऽधिदैवतं वैश्वानरस्य चक्षुः" इति। वैश्वानर इति सर्वत्र योजना। मुखेनावच्छिन्नं मुख्यम्। मुखे भवाः मुख्याः। ननु छान्दोग्यवाजसनेयकयोः नैका विद्या, गुणवैलक्षण्यात्। अतो न वाजसनेयाकानुसारेण छान्दोग्यगतप्रादेशमात्रश्रुतिर्व्याख्यातव्येत्याशङ्क्याह—**यद्यपीति**। बहुतरे साम्ये सति नाल्पेन वैलक्षण्येन विद्यैक्यप्रत्यभिज्ञायां किंचिद्धीयत इत्यर्थः। सर्वशाखाप्रत्ययन्यायस्य वक्ष्यमाणत्वाच्च वाजसनेयकगतोऽतिष्ठागुणश्छान्दोग्ये द्रष्टव्यः, छान्दोग्यगतश्च विश्वरूपत्वगुणो वाजसनेयके द्रष्टव्य इत्यर्थः। यच्चावाचि छान्दोग्यवत् "को न आत्मा किं ब्रह्म" इत्युपक्रमाभावात् विद्याभेद इति, तदसत्; "स एषोऽग्निर्वैश्वानरो यत्पुरुषः" इत्युपसंहारात् यस्मात्पूर्वं प्रयुज्यते यच्छब्दस्तेन संबध्यते 'स एष महाब्राह्मणो यश्चतुर्वेदाभिज्ञ' इतिवत् यः पुरुषः सोऽग्निर्वैश्वानर इति पुरुषोद्देशेनाग्रणीत्वादिगुणविधानात् स एवोपक्रान्त इति गम्यते। पुरुषशब्दश्च वेदान्ते प्रायेण परमात्मनि प्रयुज्यते—"पुरुष एवेदं विश्वम्" "पुरुषान्न परं किंचित्" "तं त्वौपनिषदं पुरुषम्" इत्यादौ। तस्माद् विद्यैक्यावगमात् वाजसनेयानुसारेण छान्दोग्येऽपि प्रादेशमात्रश्रुतिर्व्याख्येयेत्युपसंहरति—**संपत्तिनिमित्तामिति**।

भाष्यभावप्रकाशिका

कथं सम्पत्तिरिति? अत आह—**यद्यपीति**। अल्पवैषम्येऽपि बहुतररूपप्रत्यभिज्ञानादेकविद्यात्वोपपत्तेः। चुबुकान्तप्रदेशस्य च प्रादेशमात्रत्वात् तत्र सम्पाद्यमानस्त्रैलोक्यात्माऽपि वैश्वानरः प्रादेशमात्र इत्यर्थः। ननु तथापि प्रकरणभेदाद्विद्याभेद इति, अत आह—**सर्वेति**।।

न्यायनिर्णयः

वैश्वानरस्याधिदैवं यो मूर्धा द्युलोकस्तद्दृष्टिः कर्तव्येत्यर्थः। स्वकीये चक्षुषी दर्शयन्नुवाचैष वै सुतेजाः शोभनतेजःसहितः सूर्योऽधिदैवं वैश्वानरस्य चक्षुरिति। प्रसिद्धयोश्चक्षुषोर्वैश्वानरस्याधिदैवं यदादित्याख्यं चक्षुस्तद्दृष्टिरित्यर्थः। अध्यात्मप्रसिद्धयोर्नासिकयोर्वैश्वानरस्याधिदैवं यो वायुः प्राणस्तद्दृष्टिरित्याह—**नासिके इति**। अध्यात्ममुखावच्छिन्ने नभसि वैश्वानरस्य यदधिदैवं संदेहाख्यं नभस्तद्धीरित्याह—**मुख्यमिति**। मुखसंभवास्वप्सु वैश्वानरस्याधिदैवं या बस्तिस्थानीया आपस्तद्दृष्टिमाह—**मुख्या इति**। प्रसिद्धे चुबुके वैश्वानरस्य याऽधिदैवं पादाख्या पृथिवी तद्दृष्टिमाह—**चुबुकमिति**। ननु छान्दोग्यवाजसनेयकयोर्नैका विद्या, गुणवैषम्यात्; अतो न वाजसनेयकानुसारेण छान्दोग्ये प्रादेशमात्रश्रुतिर्नेतव्येति, तत्राह—**यद्यपीति**। अल्पवैषम्येऽपि बहुतररूपप्रत्यभिज्ञानाद्विद्यैक्यमित्यर्थः। विद्यैक्यं किंचिदित्युक्तम्। तथापि प्रकरणभेदाद्विद्याभेदमाशङ्क्याह—**सर्वेति**। न्यायस्य गुणोपसंहाराधिकारे वक्ष्यमाणत्वाद्वाजसनेयकस्यातिष्ठागुणश्छान्दोग्ये, तद्गतश्च विश्वरूपगुणोऽन्यत्र ज्ञेय इत्यर्थः। छान्दोग्यवदितरत्र 'को न आत्मा किं ब्रह्म' इत्युपक्रमाभावान्न विद्यैक्यमित्याशङ्क्य 'स एषोऽग्निर्वैश्वानरो यत्पुरुषः' इत्युपसंहारे पुरुषोद्देशेनाग्रणीत्वादिविधेरुपक्रमेऽपि तस्यैवावगमात् पुरुषस्य च परमात्मत्वादुभयत्र विद्यैक्याद्वाजसनेयकानुरोधाच्छान्दोग्ये येप्रादेशमात्रश्रुतिरित्युपसंहरति—**संपत्तीति**।।३१।।

आमनन्ति चैनमस्मिन्।।३२।।

आमनन्ति चैनं परमेश्वरमस्मिन् मूर्धचुबुकान्तराले जाबालाः-'य एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति। सोऽविमुक्तः कस्मिन्प्रतिष्ठित इति। वरणायां नास्यां च मध्ये प्रतिष्ठित इति। का वै वरणा का च नासीति'। तत्र चेमामेव नासिकां वरणानासीति निरुच्य या सर्वाणीन्द्रियकृतानि पापानि वारयतीति सा वरणा, सर्वाणीन्द्रियकृतानि पापानि नाशयतीति सा नासीति, पुनरामनन्ति-'कतमच्चास्य स्थानं भवतीति। भ्रुवोर्घ्राणस्य च यः सन्धिः स एष द्युलोकस्य परस्य च संधिर्भवति' (जाबा. २) इति। तस्मादुपपन्ना परमेश्वरे प्रादेशमात्रश्रुतिः। अभिविमानश्रुतिः प्रत्यगात्मत्वाभिप्राया। प्रत्यगात्मतया सर्वैः

प्रकटार्थविवरणम्

आमनन्ति चैनमस्मिन्। इतश्च संपत्तिनिमित्ता प्रादेशमात्रश्रुतिरित्याह—**आमनन्ति चेति।** य एष प्रसिद्ध आत्माऽनन्तः अन्तः नाशो नास्तीत्यनन्तः, यथास्वरूपेण न व्यज्यत इत्यव्यक्तः; सोऽविमुक्ते प्रतिष्ठितः। प्रतिबिम्बस्य बिम्बाधिष्ठानत्वात्। विद्यया बन्धाद्विमुक्तो न भवतीत्यविमुक्तः, सदा मुक्तः परमात्मा। स कस्मिन् प्रतिष्ठित इति। याज्ञवल्क्येन प्रत्युक्ते पुनरत्रिःपच्छ—"का वै वरणा का च नासी" इति। तत्रोवाच याज्ञवल्क्यः— सर्वाणीन्द्रियाणि वारयति, तेन वरणा भवति। सर्वाणीन्द्रियकृतानि पापानि नाशयति, तेन नासी भवतीति [३]तामेव प्रकृतामुपासनबुद्धिं सर्वनाशप्रापिकां वारकत्वोपाधौ वरणा नाशकत्वोपाधौ नासीति निर्वचनं कृत्वा पुनः कतमद्वास्योपासनस्थानं भवतीति पृष्टः प्राह—भ्रुवोर्नासिक्यप्राणस्य च यःसन्धिः तत्स्थानमिति। संपादनाभिप्रायेणैवाह स्म, यत आह—स एष [४]आत्मा द्योर्लोकस्य परस्य च लोकान्तरस्य च सन्धिः, सर्वं हि तेनैव सन्धीयते, अतः सन्धिः। न तस्य

भाष्यभावप्रकाशिका

आमनन्ति चैनमस्मिन्।।३२।। अत्र श्रुत्यन्तरसंवादमाह—**आमनन्तीति।** वरणा भ्रूः, मानं प्रमाणं परिमाणं वा तद्वियोगादित्यर्थः।।३२।। इति सप्तमं वैश्वानराधिकरणम्।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यश्रीचित्सुखमुनिविरचितायां भाष्यभावप्रकाशिकायां प्रथमाध्यायस्य द्वितीयः पादः समाप्तः।।

न्यायनिर्णयः

प्रादेशमात्रश्रुतिः संपत्तिनिमित्तेत्यत्र श्रुत्यन्तरमाह—**आमनन्तीति।** सूत्रं व्याकरोति—**आमनन्ति चेति।** य एष प्रसिद्धः परमात्मा नाशाभावादनन्तः, स्वरूपेणानभिव्यक्तेरव्यक्तः, तं कथं विजानीयामित्यत्रिप्रश्ने याज्ञवल्क्यस्योत्तरम्—**स इति।** स हि परमात्मा जीवात्मन्यविमुक्ते व्यवहारतः संसारिणि प्रतिष्ठितः, परस्यैव प्रत्यक्त्वादित्यर्थः। पुनरत्रिरपृच्छत्—**स इति।** तत्र याज्ञवल्क्यो ब्रूते—**वरणायामिति।** वरणा भ्रूः। प्रश्नान्तरं भूमिकापूर्वमादत्ते – **तत्र चेति।** प्रकृता श्रुतिः सप्तम्यर्थः। इमामेव प्रसिद्धां भ्रूसहितां नासिकां वारयति नाशयतीति वरणासहिता नासीति निश्चयेनोक्त्वेत्यर्थः। अविमुक्तस्य स्थानभूता 'का वै वरणा का च नासी' इति प्रश्नस्य प्रत्युक्तिः— सर्वानिन्द्रियवृत्तिकृतान् दोषान् वारयति तेन वरणेति; सर्वानिन्द्रियवृत्तिकृतान् पाप्मनो नाशयति तेन नासीति। नियम्यजीवाधिष्ठानत्वद्वारा नियन्तुरीश्वरस्याधिष्ठानत्वान्नासाभ्रुवोः पाप्मवारकत्वादिसिद्धिः। तयोर्मध्येऽपि स्थानविशेषगवेषणया पृच्छति—**कतमच्चेति।** याज्ञवल्क्यस्त्वाह—**भ्रुवोरिति।** प्राणो नासिक्यः, तयोर्मध्यं द्युलोकस्य स्वर्गस्य परस्य च ब्रह्मलोकस्य संधित्वेन ध्येयमित्याह—**स इति।** श्रुत्यन्तरसंवादफलमाह—**तस्मादिति।** विशेषणान्तरं घटयति—

---

१. 'या' इति नास्ति पाठान्तरे।

२. 'प्राणस्य' इति पा.।

३. उपासनाबुद्धिः वरणेति नासीति चोच्यत इति मतं खण्डितं कल्पतरौ। द्र.पृ. २६७।

४. आत्मेति। भ्रुवोर्घ्राणस्य च यः सन्धिः स स्वर्गस्य ब्रह्मलोकस्य च सन्धित्वेन ध्येय इति कल्पतर्वादौ दृश्यते। अत इदं व्याख्यानं विलक्षणं भाति भाष्ये 'इमामेव नासिका' मित्यत्र नासिका शब्देन भ्रूसहिता नासिकोपलक्ष्यते। तथाऽग्रे अभिविमिमीते निर्मिमीते इत्यर्थः।

प्राणिभिरभिविमीयत इत्यभिविमानः। अभिगतो वाऽयं प्रत्यगात्मत्वाद् विमानश्च मानवियोगादित्यभिविमानः। अभिविमिमीते वा सर्वं जगत् कारणत्वादित्यभिविमानः। तस्मात् परमेश्वरो वैश्वानर इति सिद्धम्।।३२।। इति श्रीमच्छंकरभगवत्पादकृतौ शारीरकमीमांसाभाष्ये प्रथमाध्यायस्य द्वितीयः पादः।।२।।

प्रकटार्थविवरणम्

संपत्तिमन्तरेण मुख्यं स्थानं संभवतीत्यर्थः। अभिविमानश्रुतिं व्याचष्टे—**अभिविमानेति**। मानं परिमाणम्। उपसंहरति—**तस्मादिति**।

इति श्रीमच्छारीरकमीमांसाभाष्यविवरणे प्रकटार्थे प्रथमस्याध्यास्य द्वितीयः पादः

न्यायनिर्णयः

अभिविमानेति। प्रत्यक्त्वेन सर्ववेद्यत्वं, सर्वात्मत्वे सत्यानन्त्यं, सर्वकारणत्वं वा निमित्तीकृत्याभिप्रायमेव प्रकटयति—**प्रत्यगिति**। परमेश्वरे साधकसत्त्वाज्जाठरादौ तदभावात् परोपास्तिपरं वैश्वानरवाक्यमित्युपसंहरति—**तस्मादिति**। सविशेषप्रचुराणां वा रूढिबहुलानां वाऽन्यतरत्रास्पष्टलिङ्गानां वा वाक्यानां ब्रह्मण्यन्वयः सिद्ध इति पादार्थं निगमयति—**इति सिद्धमिति**।।३२।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचिते शारीरकन्यायनिर्णये प्रथमाध्यायस्य द्वितीयः पादः।।२।।

।।इति प्रथमाध्यायस्य उपास्यब्रह्मवाचकास्पष्टश्रुतिसमन्वयाख्यो द्वितीयः पादः।।

प्रथमाध्याये तृतीयः पादः

१।।द्युभ्वाद्यधिकरणम्।।सू.१-७।।

द्युभ्वाद्यायतनं स्वशब्दात्।।१।।

इदं श्रूयते–'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः। तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः' (मु.उ.२।२।५) इति। अत्र यदेतद् द्युप्रभृतीनामोतत्ववचनादायतनं किंचिदवगम्यते, तत् किं परं ब्रह्म स्यादाहोस्विदर्थान्तरमिति संदिह्यते। तत्रार्थान्तरं किमप्यायतनं स्यादिति प्राप्तम्। कस्मात्? 'अमृतस्यैष सेतुः' इति श्रवणात्। पारवान् हि लोके सेतुः प्रख्यातः। न च परस्य

शारीरकन्यायसंग्रहः

द्युभ्वाद्यायतनं स्वशब्दात्।।१।। मुक्तोपसृप्यव्यपदेशात्।।२।। नानुमानमतच्छब्दात्।।३।।प्राणभृच्च।।४।। भेदव्यपदेशात्।।५।। प्रकरणात्।।६।। स्थित्यदनाभ्यां च।।७।। उपक्रमगतस्याप्यनेकार्थसाधारणलिङ्गस्यानिर्णायकत्वात् वाक्यशेषगतलिङ्गेनान्यतमनिर्णयं बाधित्वा विशेषश्रुत्याऽन्यतमनिर्णयो युक्तः— इति न्यायेन जगदाधारत्वस्य प्रधानब्रह्मादिसाधारणस्य सेतुशब्दलिङ्गात् प्रधानादौ नियमं बाधित्वाऽऽत्मश्रुत्या ब्रह्मपरतया नियमः कृतः। तथा सेतुशब्देन प्रसिद्धार्थादर्थान्तरे प्रयुज्यमानेन प्रसिद्धार्थगुणलेशेऽवलम्बितव्ये अन्तर्याम्यधिकरणन्यायेन नित्यसिद्धाविनाभूतपारवत्त्वमेवोपादेयम्, न कादाचित्कं विधरणत्वमिति प्राप्ते शब्दैकदेशार्थविधरणलक्षणैव न्याय्या, नात्यन्तबहिरर्थपारवत्त्वलक्षणा, एकदेशमुख्यार्थलाभेन बुद्धिसन्निकर्षात्— इति न्यायेन विधरणत्वमेवोपादाय ब्रह्मपरता निर्णीता।

प्रकटार्थविवरणम्

द्युभ्वाद्यायतनं स्वशब्दात्। मुण्डकगतं विषयवाक्यमाह—**इदं श्रूयत इति।** आयतनत्वस्य प्रधानादीनामपि साधारणत्वात् संशयमाह—**अत्रेति।** पूर्वत्र वाक्योपक्रमगतस्य साधारणस्य शब्दस्य वाक्यशेषगतेन द्युमूर्धत्वादिलिङ्गेनेश्वरपरतया नियमो दर्शितः। इहापि वाक्योपक्रमगतसाधारणद्युभ्वाद्यायतनत्वस्य वाक्यशेषगतसेतुत्वश्रवणेन वस्तुतःपरिच्छिन्ने सेतुशब्दार्हे व्यवस्थापनं युक्तमिति

भाष्यभावप्रकाशिका

द्युभ्वाद्यायतनं स्वशब्दात्।।१।। ननु सूत्रानुकारित्वाभावादिदं विषयवाक्यं न युक्तमिति, तत्राह—**अत्र यदेतदिति।** अमृतस्येति श्रवणात्, सेतुरिति च श्रवणादिति योजना। अत्रामृतस्येति षष्ठीप्रयोगाद् ब्रह्मणोऽन्यस्यामृतस्याभावात् 'तस्य सेतु' रिति च निर्देशायोगादमृतस्येति षष्ठ्यपि ब्रह्मपरिग्रहेऽनुपपन्ना; तथापि तदतिविशदमिति मत्वा सेतुशब्दाश्रयणेन पूर्वपक्षं दर्शयति—**पारवानिति।**

न्यायनिर्णयः

पूर्वस्मिन् पादे सविशेषवस्तुप्रचुराणां वाक्यानां ब्रह्मपरतोक्ता। सम्प्रति निर्विशेषब्रह्मप्रचुराणां तेषां तत्परतां वक्तुं पादान्तरमारभ्यते। तत्र पूर्वाधिकरणे त्रैलोक्यात्मा वैश्वानरः परमात्मेत्युक्तम्; तर्हि त्रैलोक्यायतनमन्यदित्याशङ्क्याह—**द्युभ्वादीति।** यद्वोपक्रमस्थश्रुतेर्वाक्यशेषस्थलिङ्गेनान्यपरत्वमुक्तम्, तत्प्रसङ्गेन जगदायतनत्वस्यानेकसाधारणस्य वाक्यशेषस्थात्मश्रुत्या ब्रह्मपरत्वमाह—**द्युभ्वादीति।** आथर्वणवाक्यमुदाहरति—**इदमिति।** लोकत्रयकल्पनाधिष्ठानत्वोक्त्या पञ्चीकृतभूतपञ्चकाधिष्ठानत्वमाह—**यस्मिन्निति।** कार्यब्रह्माख्यसमष्ट्यन्तःकरणस्य तत्रैव कल्पितत्वमाह—**मन इति।** इन्द्रियसमष्टिदेवतानां तत्रैव कल्पितत्वं सूचयति—**सहेति।** चकाराद्भूतसूक्ष्माव्याकृतेश्वरान्तर्यामिणामध्यस्तत्वं ध्वनितम्। मायाख्यां प्रकृतिं कल्पितकार्यपरम्परां च श्रुत्युदिततर्काग्निना विलाप्य तमेवाधिष्ठानभूतमद्वयमात्मानं जानथेति मुमुक्षून् प्रत्याह—**तमेवेति।** वाच्यवाचककल्पनानामैक्यापरोक्षप्रमित्या बाधमाह—**अन्या इति।** एष वाग्विमोकपूर्वकस्तत्त्वसाक्षात्कारः सोपादानसंसारनिवृत्तित्वेनामृतत्वस्य व्यवस्थापक इत्याह—**अमृतस्येति।** आयतनशब्दाश्रुतेर्नेदमुदाहरणमित्याशङ्क्याह—**अत्रेति।** आयतनत्वसाधारणधर्मदृष्ट्या संशयमाह—**तदिति।** अर्थान्तरं प्रधानम्। उपक्रमस्थस्य साधारणशब्दस्य वाक्यशेषगतद्युमूर्धत्वादिलिङ्गेनेश्वरार्थत्ववदिहाप्युपक्रमस्थसाधारणायतनत्वस्य वाक्यशेषगतसेतुश्रुत्या परिच्छिन्ने सेतुशब्दार्थे व्यवस्थेति पूर्वपक्षयति—**तत्रेति।** निर्विशेषे ब्रह्मण्युक्तश्रुत्यन्वयोक्तेः संगतयः। पूर्वपक्षे प्रधानोपास्तिः, सिद्धान्ते परमेश्वरधीरिति फलम्। आयतनत्वस्य ब्रह्मण्यपि योगान्नार्थान्तरमित्याशङ्क्य प्रत्याह—**कस्मादिति।** अमृतस्येति श्रवणादेष सेतुरिति च श्रवणादिति योजना। अमृतस्येति षष्ठीप्रयोगाद् ब्रह्मणः स्वयममृतत्वादन्यस्यामृतस्याभावात् तत्प्रयोगो

ब्रह्मणः पारवत्त्वं शक्यमभ्युपगन्तुम्, 'अनन्तमपारम्' (बृ. उ. २।४।१२) इति श्रवणात्। अर्थान्तरे चायतने परिगृह्यमाणे स्मृतिप्रसिद्धं प्रधानं परिग्रहीतव्यम्, तस्य कारणत्वादायतनत्वोपपत्तेः। श्रुतिप्रसिद्धो वा वायुः स्यात्, 'वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति' (बृ. उ. ३।७।२) इति वायोरपि विधारणत्वश्रवणात्। शारीरो वा स्यात्। तस्यापि भोक्तृत्वाद् भोग्यं प्रपञ्चं प्रत्यायतनत्वोपपत्तेरिति।

एवं प्राप्त इदमाह- द्युभ्वाद्यायतनमिति। द्यौश्च भूश्च द्युभुवौ, द्युभुवावादी यस्य तदिदं द्युभ्वादि।

प्रकटार्थविवरणम्

पूर्वपक्षमाह—**तत्रार्थान्तरमिति**। अथ प्रधानस्याशब्दत्वेनैवाग्रहः[1], तत्राह—**श्रुतिप्रसिद्धो वेति**। यथा सूत्रं मणिगणविधारकं लोके तथा भो गौतम वायुस्तत् सूत्रं येन सर्वाणि भूतानि संदृब्धानि दृढानि वर्तन्त इत्यर्थः। अथ वायौ नात्मशब्दो घटामटति तत्राह—**शारीरो वेति**।

द्युभ्वादेरायतनं द्युभ्वाद्यायतनमिति समासे [2]सत्यप्रत्ययान्तत्वात् पुंलिङ्गता, मध्याह्नादिशब्दवत्। अतस्तदायतनशब्दस्य नपुंसकत्वात् द्युभ्वाद्यायतनमिति पाठो युक्त इति स्वाज्ञानमेव **भास्करः** प्रकटीचकार।[3] यस्मिन्नायतने द्युपृथिव्यादिकं सर्वं जगदोतं सूत्रे मणिगणा इव ग्रथितं वर्तते। तत् शब्देन[4] परामृश्य भोः शिष्याः तं द्युभ्वाद्याधारमात्मत्वेन जानीत यूयमिति उपदेशात्

भाष्यभावप्रकाशिका

यद्यपि सेतुशब्दस्य मुख्यार्थत्वमुभयत्राप्यनुपपन्नम्; तथापि विधारणस्यागन्तुकत्वात्तदाश्रयणेन ब्रह्मपरिग्रहो न युक्तः, निजसिद्धपरिच्छिन्नत्वगुणाश्रयस्य युक्तत्वादिति भावः। ननु श्रुत्युक्तमायतनं श्रौतमेवाश्रयणीयम्, न स्मार्तं प्रधानमिति, अत आह—**श्रुतिप्रसिद्ध इति**। तस्यायतनत्वमुपपादयति—**वायुरिति**। ननु आयतन आत्मशब्दप्रयोगात् परमात्मा प्रत्येतव्यः, न वायुरिति शङ्कायामाह—**शारीरो वेति**। तस्यायतनत्वं कथयति—**भोक्तृत्वादिति**।

न्यायनिर्णयः

ब्रह्मणि नेति मत्वा सेतुश्रुतिं विशदयति—**पारवानिति**। तथापि कुतो न ब्रह्मणः सेतुत्वं, तत्राह—**न चेति**। आनन्त्यमनौपचारिकमित्यपारमित्युक्तम्। उभयत्रापि सेतुशब्दस्य मुख्यार्थत्वायोगेऽपि विधरणस्यागन्तुकस्याश्रयणान्निजसिद्धपरिच्छिन्नाश्रयणं युक्तमिति भावः। किं तदर्थान्तरं, तदाह—**अर्थान्तरे चेति**। श्रुत्युक्तमायतनं श्रौतमेवोचितं न स्मार्तमित्याशङ्क्याह—**श्रुतीति**। वायोरायतनत्वं साधयति—**वायुरिति**। सर्वगतस्य तन्त्वादिवत् कुतः सूत्रतेत्याशङ्क्य सूक्ष्मतया सूत्रवदवस्थानादित्याह—**वायुनेति**। आकाशस्यापि सूत्रवदन्तर्वर्तनमस्तीत्याशङ्क्यास्य सर्वं प्रत्येकस्वभावतया विधारकत्वमाह—**अयं चेति**। संदृब्धानि संग्रथितानि विधृतानीत्यर्थः। आयतनस्यात्मत्वश्रुतेर्नैवमित्याशङ्क्याह—**शारीरो वेति**। तस्य परिच्छिन्नत्वात्र सर्वविधारकतेत्याशङ्क्य कर्मोपास्त्यादिद्वारा सर्वस्थितिहेतुत्वमाह—**तस्येति**। विश्वायतनत्वेन प्रधानस्य वायोर्भोक्तुर्वा ध्यानार्थं वाक्यमित्युपसंहर्तुमितिशब्दः।

पूर्वपक्षमनूद्योत्तरपक्षप्रतिज्ञामादाय विगृहणाति—**एवमिति**। 'न भूसुधियोः' इति निषेधात् द्युभ्वादीति यणादेशासिद्धिरिति चेन्न। 'गतिकारकोपपदाभ्यामन्यपूर्वस्य नेष्यते' इति विशेषणात्, अस्य च कारकोपपदत्वात्। द्वन्द्वे द्वयोः समत्वादुपपदत्वं दिवो

---

१. 'अग्रहः' इति च्छेदः।

२. सूत्रे 'द्युभ्वाद्यायतनः स्वशब्दात्' इति पुंलिङ्गनिर्देशमभिप्रेत्येदं पुंलिङ्गत्वसमर्थनम्। सारस्वतव्याकरणे पठितेन 'टाडकाः' इति सूत्रेण समासे ट, अ, ड, क इत्येते प्रत्यया भवन्ति इत्यर्थकेनात्र 'अ'प्रत्ययः स्यादिति भाति। पाणिनीयव्याकरणानुसारेण तु 'अहन्' शब्दस्य नपुंसकलिङ्गत्वेऽपि 'मध्याह्नः' इत्यत्र 'रात्राह्नाहाः पुंसि' इति सूत्रेण पुंस्त्वम्। इह तु आयतनशब्दान्तसमासादप्रत्ययविधायकं न किमप्युपलभ्यत इति।

३. आयतनशब्दस्य नपुंसकलिङ्गत्वात् सूत्रे नपुंसकलिङ्गपाठस्य युक्तत्वं भास्करेणोक्तम्। [पृ. ५१] तेन तस्य पुंलिङ्गपाठ उपलब्ध इति ज्ञायते। अद्यत्वे सर्वत्र नपुंसकलिङ्गपाठ एवोपलभ्यते।

४. शब्देन = तच्छब्देन।

यदेतदस्मिन् वाक्ये द्यौः पृथिव्यन्तरिक्षं मनः प्राणा इत्येवमात्मकं जगदोतत्वेन निर्दिष्टं तस्यायतनं परं ब्रह्म भवितुमर्हति। कुतः? स्वशब्दादात्मशब्दादित्यर्थः। आत्मशब्दो हीह भवति– 'तमेवैकं जानथ आत्मानम्' इति। आत्मशब्दश्च परमात्मपरिग्रहे सम्यगवकल्पते, नार्थान्तरपरिग्रहे। क्वचिच्च स्वशब्देनैव ब्रह्मण आयतनत्वं श्रूयते– 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छा. उ. ६।८।४) इति। स्वशब्देनैव चेह पुरस्तादुपरिष्टाच्च ब्रह्म संकीर्त्यते–'पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्' (मु.उ. २।१।१०) इति। 'ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण' (मु. उ. २।२।११) इति

प्रकटार्थविवरणम्

प्रधानादीनां च चेतनान् प्रत्यात्मत्वेनोपदेशायोगाद् ब्रह्मैव द्युभ्वाद्यायतनमिति सिद्धान्ताशयः। स्वशब्दादित्यस्यार्थान्तरमाह—**क्वचिच्चेति**। सद् ब्रह्मायतनं यासां ताः सदायतना इति साक्षादेव ब्रह्मण आयतनत्वश्रवणादित्यर्थः। स्वशब्दमेव प्रकारान्तरेण व्याचष्टे—**स्वशब्देनैवेति**। "यस्मिन् द्यौः पृथिवी च" इत्यस्माद् वाक्यात् पूर्वोत्तरयोः वाक्ययोः ब्रह्मणो निर्देशान्मध्यस्थेऽपि वाक्ये ब्रह्मत्वमेव युक्तमाश्रयितुमित्यर्थः। पुरस्तात् पूर्वस्यां दिशि, पश्चात् प्रतीच्याम्, दक्षिणतः दक्षिणस्याम्, उत्तरेणेत्युत्तरस्यां दिशि यदिदं दृश्यते तद् ब्रह्मैवेत्यर्थः। एवं तावद् ब्रह्मपरत्वमुपपाद्य इदानीं न द्वितीयपादवत् सविशेषोपासनपरत्वम्, किं तु

भाष्यभावप्रकाशिका

स्वशब्दादित्यस्यार्थान्तरमाह—**क्वचिच्चेति**। पूर्वोत्तरवाक्ययोर्ब्रह्मसङ्कीर्तनान्मध्यवाक्येऽपि ब्रह्मैव प्रतीयत इति स्वशब्दस्यैवार्थान्तरमाह—**स्वशब्देनेति**। ननु कमलासनपरिग्रहेऽपि ब्रह्मशब्दस्य सङ्कीर्तनमात्मशब्दश्च युज्यते इत्याशङ्क्याह—**तत्रायतनेति**। अथवा भवतु ब्रह्मसङ्कीर्तनम्, तथापि तदनेकरसं विवक्षितमित्याशङ्क्याह—**तत्रेति**। द्युभ्वादिप्रपञ्चायतनत्वेन

न्यायनिर्णयः

नेति चेन्न। समत्वेऽपि प्रथमप्रयुक्ताया दिवश्चरमप्रयुक्तां भुवं प्रत्युपपदत्वमारोप्य समासे यणादेशसिद्धेः। न च द्वन्द्वे समस्यमानानां समत्वनियमः, राजपुरुषादिषु[1] व्यभिचारात्। तस्माद् वर्षाभ्वादिवद् द्युभ्वादीत्यविरुद्धम्[2]। द्वन्द्वे तद्गुणसंविज्ञाने[3] च कृते तस्यायतनमिति स्थिते प्रतिज्ञाया विवक्षितमर्थमाह—**यदिति**। जगदायतनत्वस्यान्यत्रापि योगे विशेषोक्तिरयुक्तेत्याह—**कुत इति**। तत्र हेतुमादाय योजयति—**स्वशब्दादिति**। आयतनशब्दसमानाधिकृतात्मशब्दस्यादृष्टिमाशङ्क्याह—**आत्मेति**। जीवादावपि तदुपपत्तिमाशङ्क्योक्तम्—**आत्मशब्दश्चेति**। पक्षान्तरे मुख्यमाप्त्याद्ययुक्तमित्यर्थः। स्वशब्देन ब्रह्मोक्त्वा तस्यासाधारण-सच्छब्देनायतनत्वोक्तिरिति योजनान्तरमाह—**क्वचिच्चेति**। स्वस्यायतनस्यासाधारणायतनशब्दादिति योजनान्तरं मत्वा श्रुतिमाह—**सदिति**। सतो निमित्तत्वेनैव मूलत्वं प्रत्याह—**सदायतना इति**। [4]असमवायिकारणस्यैव सतः स्थितिहेतुत्वमेवेत्याशङ्क्याह—**सत्प्रतिष्ठा इति**। स्वशब्देन ब्रह्मोक्त्वा तदसाधारणपुरुषशब्देन ब्रह्मशब्देन परशब्देनामृतशब्देन चोक्तेरित्यर्थान्तरमाह—**स्वशब्देनेति**। इहेति प्रकरणोक्तिः। 'यस्मिन् द्यौः' इत्यादिवाक्यात् पूर्वोत्तरवाक्ययोर्ब्रह्मोक्तेर्मध्येऽपि तदेव युक्तम्, आदिमध्यावसानानामैकार्थ्ये वाक्यैक्यादित्यर्थः। पुरस्ताद् ब्रह्मोक्तिमाह—**पुरुष इति**। परस्तादपि तदुक्तिमाह—**ब्रह्मैवेति**। पुरस्तात् पूर्वस्यां दिशि, पश्चात् पश्चिमायां, दक्षिणतो दक्षिणस्यामुत्तरेणोत्तरस्यां यदिदं तद् ब्रह्मैवेत्यर्थः। सर्वत्र ब्रह्मोक्तावपि तदनेकरसत्वमाशङ्क्याह—**तत्रेति**।

---

१. राजपुरुषादिषु = 'राजपुरुषौ' इत्यादिषु।

२. वस्तुतस्तु 'न भूसुधियोः' इति सूत्रे सुपीत्यनुवृत्तेः अजादौ सुप्येव यण्निषेधः इति द्युभ्वादीत्यत्र आदिशब्दे परतस्तस्य नास्ति प्रसक्तिः। तत्र सुपीत्यननुवृत्तावपि 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति न्यायेन 'एरनेकाचोऽसंयोगपूर्वस्य' 'ओः सुपि' इति सूत्रद्वयेन प्रापितस्यैव यणस्तेन निषेधः। अतः प्रकृते द्युभ्वादीत्यत्र 'इको यणची'ति यणादेशे न किमपि बाधकम्। 'गतिकारकोपपदाभ्यामन्यपूर्वस्य नेष्यते' इति वचनं तु यणो निषेधकम्, न तु 'न भूसुधियोः' इति निषेधस्य। तथा च यणादेशसमर्थनाय तदुपन्यासः, तन्निर्वाहाय च दिवः कारकत्वकथनम्, तत्रोपपदत्वारोपणं चेति सर्वमिदं चिन्त्यं भाति। ३. 'बहुव्रीहौ' इति शेषः। ४. 'असमवायिकारणस्येव' इति पाठः संभाव्यते।

च। 'तत्र त्वायतनायतनवद्भावश्रवणात्, सर्वं ब्रह्मेति च सामानाधिकरण्यात्, यथाऽनेकात्मको वृक्षः– शाखा स्कन्धो मूलं चेत्येवं नानारसो विचित्र आत्मेत्याशङ्का संभवति, तां निवर्तयितुं सावधारणमाह– 'तमेवैकं जानथ आत्मानम्' इति। एतदुक्तं भवति– न कार्यप्रपञ्चविशिष्टो विचित्र आत्मा विज्ञेयः। किं तर्हि? अविद्याकृतं कार्यप्रपञ्चं विद्यया प्रविलापयन्तस्तमेवैकमायतनभूतमात्मानं जानथैकरसमिति। यथा यस्मिन्नास्ते देवदत्तस्तदानयेत्युक्त आसनमेवानयति, न देवदत्तम्, तद्वदायतनभूतस्यैवैकरसस्यात्मनो विज्ञेयत्वमुपदिश्यते। विकारानृताभिसंधस्य चापवादः श्रूयते– 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (क. उ. २।४।१०) इति। सर्वं ब्रह्मेति तु सामानाधिकरण्यं प्रपञ्चप्रविलापनार्थम्, नानेकरसताप्रतिपादनार्थम्। 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा

प्रकटार्थविवरणम्

निर्विशेषब्रह्मात्मैकत्वपरत्वमिति विशेषमुपपादयति—**तत्रेत्यादिना**। विद्यया तत्त्वंपदार्थपरिशोधनेन कार्यं स्वकारणे **प्रविलापयन्तः** परिदृश्यमानं विशेषजातमविद्यामात्रमिति व्यवस्थापयन्त इत्यर्थः। एकशब्दैवकाराभ्यामायतनपदलक्ष्यमेकरसं ब्रह्मात्मत्वेनोपदिश्यत इत्युक्तम्। इदानीं तत्र हेत्वन्तरमाह—**विकारेति**। विकारेऽनृतेऽभिसन्धाऽभिमानो यस्य स विकारानृताभिसन्धः, तस्य निन्दाश्रवणादप्येकरसं ब्रह्मेत्यर्थः। ननु निर्विशेषं चेत् प्रतिपाद्यं कथं तर्हि "सर्वं ब्रह्म" इति सामानाधिकरण्यमित्याशङ्क्याह— **सर्वं ब्रह्मेति**। सर्वमिदं दृश्यमानं ब्रह्मैव, नातोऽतिरिक्तमस्तीति प्रपञ्चस्य सत्त्वप्रतिषेधार्थमिदं वचनम्; न ब्रह्मणः प्रपञ्चाभेदप्रतिपादनार्थम्, अप्रसिद्धानुवादेन प्रसिद्धविधानप्रसङ्गादिति भावः। इतश्चैकरसमेव प्रतिपाद्यमित्याह—**स यथेति**। यथा सैन्धवखिल्योऽन्तरेव बाह्य एवालवणरस[२] इति न, किन्तु कृत्स्नोऽपि रसघन एव; तथा आत्माऽपि कृत्स्नः प्रज्ञानमूर्तिरित्यर्थः। यस्मान्निर्विशेषं ब्रह्म प्रतिपाद्यम्,

भाष्यभावप्रकाशिका

प्रतीयमानस्य प्रपञ्चं विहाय कथमेकरसत्वेन ज्ञानमिति? तत्राह—**यथा यस्मिन्निति**। विकाररूपेऽनृतेऽनिर्वाच्येऽभिसन्धानं यस्य स तथोक्तः तस्य भेदप्रपञ्चं सत्यं मन्यमानस्येत्यर्थः। ननु सर्वं ब्रह्मेति सप्रपञ्चतावगमान्निष्प्रपञ्चत्वं श्रुत्यन्तरविरुद्धमिति, अत आह—**सर्वं ब्रह्मेतीति**। यत् सर्वमविद्यारोपितं तत् परमार्थतो ब्रह्म, न तु यद् ब्रह्म, तत् सर्वमित्यर्थः। **स यथेति**। अन्यथा

न्यायनिर्णयः

उक्तवाक्यं सप्तम्यर्थः। सामानाधिकरण्याद् विचित्र आत्मेत्याशङ्का संभवतीति संबन्धः। वैचित्र्यं दृष्टान्तेनाह—**यथेति**। कथं तर्हि तन्निरसनं, तदाह—**तामिति**। जगदायतनं ब्रह्म ज्ञेयमित्युक्ते कुतस्तदैकरस्यं, तत्राह—**एतदिति**। तथापि कथं प्रपञ्चायतनस्य निष्कृष्य ज्ञानं, तत्राह—**यथेति**। एकशब्दादेवकाराच्चायतनपदलक्ष्यमेकरसं ब्रह्मात्मत्वेन ज्ञेयमित्युक्त्वा तत्रैव हेत्वन्तरमाह— **विकारेति**। वाचारम्भणश्रुतेर्दृश्यत्वादियुक्तेश्च विकारो मिथ्या, तस्मिन्ननृतेऽनिर्वाच्येऽभिसंधाऽभिमानो यस्य तस्येति यावत्। द्वैतं सत्यं पश्यतो निन्दाश्रुतेरप्येकरसं ब्रह्मेत्यर्थः। ब्रह्मैकरस्यं सामानाधिकरण्यश्रुतिविरुद्धमित्याशङ्क्य पुरुषः स्थाणुरितिवज्जाड्यादिना विरुद्धस्य द्वैतस्य ब्रह्मणा सामानाधिकरण्यं [३]बाधार्थमित्याह—**सर्वमिति**। यदविद्यारोपितं तत् सर्वं वस्तुतो ब्रह्म, न तु यद् ब्रह्म तत्सर्वमतो न श्रुतिविरुद्धमित्यर्थः। ब्रह्मानूद्य सर्वत्वविधावप्रसिद्धानुवादेन प्रसिद्धविधिप्रसक्तिरित्यभिप्रेत्य ब्रह्मणो नानारसत्वे श्रुत्यन्तरविरोधमाह—**स यथेति**। सैन्धवखिल्योऽन्तर्बहिर्विभागहीनः सर्वात्मना लवणैकरसो यथा तथाऽऽत्माऽपि सर्वथा चिदेकरसमूर्तिरिति

---

१. भामत्यां तत्रेत्यादिभाष्यं हिरण्यगर्भपूर्वपक्षनिरासपरतया व्याख्यातम्। २. 'बाह्य एव वा लवणरस' इति पाठः स्यात्।

३. तथा च बाधायां सामानाधिकरण्यमिदम्। सामानाधिकरण्यं हि चतुर्विधम्— १. अध्यस्यमानतादात्म्यविशिष्टव्यक्तिपरसमानविभक्तिकनानापदत्वमध्यासे सामानाधिकरण्यम्। यथा— शुक्तौ इदं रजतमित्यत्र। २. बाध्यमानतादात्म्योपलक्षितव्यक्तिपरसमानविभक्तिकनानापदत्वं बाधायां सामानाधिकरण्यम्। यथा— यः स्थाणुः स पुमानित्यत्र। ३. उक्तोभयतादात्म्यातिरिक्ततादात्म्यविशिष्टव्यक्तिपरसमानविभक्तिकनानापदत्वं विशेषणविशेष्यभावे सामानाधिकरण्यम्। यथा— नीलो घटः इत्यादौ। ४. व्यक्तिमात्रबोधकसमानविभक्तिकनानापदत्वमेकत्वे सामानाधिकरण्यम्। यथा— सोऽयं देवदत्त इत्यादौ।

अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' (बृ. उ. ४।५।१३) इत्येकरसताश्रवणात्। तस्माद् द्युभ्वाद्यायतनं परं ब्रह्म।

यत्तूक्तं सेतुश्रुतेः सेतोश्च पारवत्त्वोपपत्तेर्ब्रह्मणोऽर्थान्तरेण द्युभ्वाद्यायतनेन भवितव्यमिति। अत्रोच्यते- 'विधारणत्वमात्रमत्र सेतुश्रुत्या विवक्ष्यते, न पारवत्त्वादि। न हि मृद्दारुमयो लोके सेतुर्दृष्ट इत्यत्रापि मृद्दारुमय एव सेतुरभ्युपगम्यते। सेतुशब्दार्थोऽपि 'विधारणत्वमात्रमेव, न पारवत्त्वादि, षिञो बन्धनकर्मणः सेतुशब्दव्युत्पत्तेः।

अपर आह- 'तमेवैकं जानथ आत्मानम्' इति यदेतत् संकीर्तितमात्मज्ञानं, यच्चैतत् 'अन्या वाचो विमुञ्चथ' इति वाग्विमोचनं, तदत्रामृतत्वसाधनत्वात् 'अमृतस्यैष सेतुः' इति सेतुश्रुत्या संकीर्त्यते, न तु द्युभ्वाद्यायतनम्। तत्र यदुक्तं सेतुश्रुतेर्ब्रह्मणोऽर्थान्तरेण द्युभ्वाद्यायतनेन भाव्यमिति, एतदयुक्तम्।।१।।

प्रकटार्थविवरणम्

प्रधानादिकं तु सविशेषं तस्मादित्युपसंहारः। सेतुश्रुतेः गतिं दर्शयितुमुद्भावयति—**यत्तूक्तमिति।** अमृतस्येति भावप्रधानो निर्देशः। यथा द्वित्वैकत्वयोरिति वक्तव्ये "द्व्येकयोः" इत्युवाच **पाणिनिः।** तथाऽमृतत्वस्यैष द्युभ्वाद्याधारः सेतुरिव विधारकः। एतत्प्रतिष्ठमेवामृतत्वमिति भावः। किं च साङ्ख्येनापि जगदाधारे न मुख्यः सेतुशब्दोऽभ्युपगम्यते, गौणत्वे च पारवत्त्वस्य शब्दार्थबाह्यत्वात् सिनोति बध्नाति धारयतीति व्युत्पत्त्या विधारकत्वस्य शब्दार्थसंस्पर्शित्वात् प्रसिद्धसेतुगतविधारकत्वगुणयोगादेव जगदाधारे सेतुशब्दः प्रयुक्त इत्याह—**न हि मृद्दारुमय इत्यादिना।**

पूर्वं सेतुशब्दो द्युभ्वाद्यायतने प्रयुक्त इत्यङ्गीकृत्य पर्यहार्षीत्; इदानीं न तद्विषय इत्याह—**अपर आहेत्यादिना।** [1]यदत्रावोचत् **भास्करः** "एष इत्यनन्तरवृत्तस्य प्रधानस्य निर्देशकं सर्वनाम नोपसर्जनस्य" इति, तत् प्रद्वेषमात्रम्, आत्मावगमस्यैवानन्तरवृत्तत्वात्।

भाष्यभावप्रकाशिका

श्रुत्यन्तरविरोधप्रसङ्गादित्यर्थः। अत्र वक्तव्यम्—सेतुशब्दार्थाविनाभूतत्वात्पारवत्त्वस्य तत्र बुद्धिः प्रथममुत्पद्यत इत्युच्यते, किं वा सेतुशब्देन पारवत्त्वमेव विवक्षितम्, न विधारणत्वम्; तस्यागन्तुकत्वात्, पारवत्त्वस्य निजसिद्धत्वादिति। आद्यपक्षे दूषणमाह—**न हि मृदिति।** उत्तरपक्षे दूषणमाह—**सेतुशब्दार्थ इति।** गुणवृत्त्याश्रयणेऽपि शब्दैकदेशार्थविधारणगुणस्वीकरणमेव न्याय्यम्, नात्यन्तबहिरर्थपारवत्त्वगुणालम्बनम्; मुख्यार्थैकदेशलाभेन बुद्धिसंनिधानात्। ननु सेतुशब्देन ब्रह्माभिधाने कथममृतस्येति षष्ठी? मैवम्; अमृतस्येति अमृतत्वस्येति भावार्थस्वीकरणात् "द्व्येकयोर्द्विवचनैकवचने" इतिवत्, अन्यथा हि तत्र द्व्येकेष्विति स्यात्; संख्येयबहुत्वादिति भावः।

पूर्वं सेतुशब्दप्रयोगं ब्रह्मण्युपगम्योक्तम्, इदानीमन्यविषयः सेतुशब्द इत्याह—**अपर आहेति।।१।।**

न्यायनिर्णयः

श्रुत्यर्थः। ब्रह्मणश्चिदेकरसस्य प्रतिपाद्यत्वे फलितमाह—**तस्मादिति।** तस्यैकरस्यात् प्रधानादेस्तद्विरहादित्यर्थः। सेतुश्रुतेर्गतिं वक्तुमुक्तमनुवदति—**यत्त्विति।** तस्या विवक्षितां गतिमाह—**अत्रेति।** अत्रेति[3] सप्तम्या भावप्रधानममृतं वाक्यं चोक्तम्। सावयवत्वाचेतनत्वादि वक्तुमादिपदम्। ननु सेतुनाऽविनाभूतत्वात् पारवत्त्वादेस्तत्र तच्छब्दाद् धीरिति चेन्नेत्याह—**न हीति।** अत्रापीति प्रकृतवाक्योक्तिः। अभ्युपगम्यते, परेणापीति शेषः। विधरणत्वस्यागन्तुकत्वात्पारवत्त्वादेः स्वाभाव्यात् तदेव सेतुश्रुत्या ग्राह्यमिति चेत्, तत्राह—**सेत्विति।** गुणवृत्त्याऽपि शब्दैकदेशार्थविधरणगुणस्वीकरणमेव युक्तं, न त्वत्यन्तबहिरर्थपारवत्त्वाद्यङ्गीकरणम् मुख्यार्थैकदेशलाभेन विधरणस्य बुद्धिस्थत्वात्, अमृतस्येति षष्ठी च ब्रह्मपक्षे भावार्थस्वीकारादिति भावः।

सेतुशब्दं ब्रह्मेत्युपेत्य सेतुश्रुतेर्गतिमुक्त्वा विषयान्तरोक्त्याऽपि तद्गतिमाह—**अपर इति।** सेतुशब्दस्य वाग्विमोकपूर्वकमात्मज्ञानमर्थो न ब्रह्मेति स्थिते फलितमाह—**तत्रेति।।१।।**

---

१. 'विधरण' इति पा. २. 'अपर आह' इति मतं भाष्यकारैरेवोपनिषद्भाष्ये आश्रितम्। तस्य खण्डनं भास्करेण कृतम्। तस्य समाधानमाह— यदत्रेति।

३. 'विधारणत्वमात्रमत्र' इति भाष्ये 'अत्र' इति पदेनेत्यर्थः।

मुक्तोपसृप्यव्यपदेशात्।।२।।

इतश्च परमेव ब्रह्म द्युभ्वाद्यायतनम्। यस्मान्मुक्तोपसृप्यताऽस्य व्यपदिश्यमाना दृश्यते। मुक्तैरुपसृप्यं मुक्तोपसृप्यम्। देहादिष्वनात्मस्वहमस्मीत्यात्मबुद्धिरविद्या, ततस्तत्पूजनादौ रागस्तत्परिभवादौ द्वेषस्तदुच्छेददर्शनाद् भयं मोहश्चेत्येवमयमनन्तभेदोऽनर्थव्रातः संततः सर्वेषां नः प्रत्यक्षः। तद्विपर्ययेणाविद्यारागद्वेषादिदोषमुक्तैरुपसृप्यं गम्यमेतदिति द्युभ्वाद्यायतनं प्रकृत्य व्यपदेशो भवति। कथम्? 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे (मु.उ. २।२।८) इत्युक्त्वा ब्रवीति–'तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्' (मु.उ. ३।२।८) इति। ब्रह्मणश्च मुक्तोपसृप्यत्वं प्रसिद्धं शास्त्रे–'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' (बृ. उ. ४।४।७) इत्येवमादौ। प्रधानादीनां तु न क्वचिन्मुक्तोपसृप्यत्वमस्ति प्रसिद्धम्।

प्रकटार्थविवरणम्

न च नियमेन प्रधानसमर्पकं सर्वनाम, "तस्मिन्सीद" इत्यादौ व्यभिचारात्। तस्मादात्मज्ञानमेव संपादनीयम्, आत्मप्रतिपादकोपनिषद्व्यतिरिक्ता वाचस्त्यक्तव्या इत्युक्ते कुत इत्येतदाकाङ्क्षायामाह—यतोऽमृतत्वस्यैष एवात्मावगमः प्राप्तिहेतुः सेतुरिव लङ्घ्या इति युक्तमेव व्याख्यानम्।

मृक्तोपसृप्यव्यपदेशात्। मुक्तैः प्राप्यत्वाच्च द्युभ्वाद्यायतनः परमात्मेत्याह—**मुक्तोपसृप्येति।** मुक्तोपसृप्यतां व्याख्यातुं बन्धशब्दार्थमाह—**देहादिष्विति।** [1]अविद्याकार्यत्वाद्विद्याहेयत्वाद्वाऽविद्या। मोहः शोकः। हृदयग्रन्थिः अहंकारः। वाग्विमोक्षपूर्वकं

भाष्यभावप्रकाशिका

मुक्तोपसृप्यव्यपदेशात्।।२।। मुक्तिशब्दार्थस्य बन्धविश्लेषरूपत्वात् तं दर्शयितुं बन्धशब्दार्थमाह—**देहादिष्विति।** इदानीं मुक्तिमाह—**तद्विपर्ययेणेति।** तत्र मुक्तौ श्रुतिं दर्शयति—**भिद्यत इति।** द्युभ्वाद्यायतनस्य मुक्तोपसृप्यत्वे प्रमाणमाह—**तथा विद्वानिति।**

न्यायनिर्णयः

द्युभ्वाद्यायतनं ब्रह्मेत्यत्र हेत्वन्तरमाह—**मुक्तेति।** तद् व्याख्यातुं प्रतिज्ञां पूरयति—**इतश्चेति।** इतःशब्दार्थं स्पष्टयति—**यस्मादिति।** मुक्तेन ब्रह्मणा कुतस्तदेवोपसृप्यमित्याशङ्क्याह—**मुक्तैरिति।** बन्धविश्लेषं मुक्तिशब्दार्थं वक्तुं बन्धमनुवदति—**देहादिष्विति।** अविद्याफलमाह—**तत इति।** अनर्थसमुदायस्य सम्यग्ज्ञानादृते विच्छेदाभावं सूचयति—**संतत इति।** तत्र स्वानुभवं प्रमाणयति—**सर्वेषामिति।** बन्धमनूद्य तद्विश्लेषं मोक्षमाचक्षाणः सूत्रं योजयति—**तदिति।** उक्तमुक्त्यनन्तरं प्राप्यं ब्रह्मेति श्रुतिरसिद्धेति शङ्कते—**कथमिति।** मुक्तौ श्रुतिमाह—**भिद्यत इति।** तथापि कथं द्युभ्वाद्यायतनस्य मुक्तोपसृप्यत्वम्, तत्रापि श्रुतिमाह—**इत्युक्त्वेति।** यथा नद्यो गङ्गाद्या नामरूपाभ्यां निर्मुक्ताः समुद्रं प्राप्य तदात्मनाऽवतिष्ठन्ते, तथा विद्वानपि साक्षात्कृतब्रह्मा तद्बलादेव नामरूपादविद्यातत्कार्यात्मनो विमुक्तः परादव्याकृतात् परमस्पृष्टानर्थं पुरुषं पूर्णमात्मानं दिव्यमखण्डं चिद्धातुमुपैत्यात्मत्वेनाप्नोतीत्यर्थः। प्रधानादीनामन्यतमस्यापि मुक्तोपसृप्यत्वसिद्धेरन्यथासिद्धिरित्याशङ्क्याह—**ब्रह्मणश्चेति।** ज्ञानावस्था यदेत्युक्ता। मुमुक्षुरस्येत्युक्तः। हृदीत्युक्त्या कामानामात्मनिष्ठता निरस्ता। प्रतिबन्धाभावावस्थां वक्तुमथेत्युक्तम्। अत्रेति जीवदवस्थोक्तिः। 'स यो ह वै तत्परमं ब्रह्मं वेद' इत्यादिसंग्रहार्थमादिपदम्। परपक्षव्यावृत्तिं स्फोरयति—**प्रधानादीनां त्विति।** क्वचिदिति

---

१. अविद्यारागद्वेषभयमोहाः श्रुतौ हृदयग्रन्थिशब्दार्थः। तेषां परोक्षात्मज्ञानात् शिथिलीभावः 'भिद्यते' इत्यनेन विवक्षितः। तद्वन्तः सूत्रे मुक्तपदेन विवक्षिताः। ज्ञानादज्ञाननिवृत्त्या प्राप्यत्वमुपसृप्यपदेनोक्तमिति भामती। जीवन्मुक्ता मुक्तपदेनोक्ता इति ब्रह्मविद्याभरणम्। भाष्यसूचितं सूत्रस्यार्थान्तरमपि न्यायरक्षामणौ द्रष्टव्यम्। २. भाष्ये देहादावात्मबुद्धेरविद्यापदेन व्यपदेशं समर्थयति— अविद्येति।

अपि च 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः' इति वाग्विमोकपूर्वकं विज्ञेयत्वमिह द्युभ्वाद्यायतनस्योच्यते। तच्च श्रुत्यन्तरे ब्रह्मणो दृष्टम्- 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्यायाद् बहूञ्शब्दान् वाचो विग्लापनं हि तत्' (बृ. उ. ४।४।२१) इति। तस्मादपि द्युभ्वाद्यायतनं परं ब्रह्म।।२।।

नानुमानमतच्छब्दात्।।३।।

यथा ब्रह्मणः प्रतिपादको वैशेषिको हेतुरुक्तो नैवमर्थान्तरस्य वैशेषिको हेतुः प्रतिपादकोऽस्तीत्याह। नानुमानिकं सांख्यस्मृतिपरिकल्पितं प्रधानमिह द्युभ्वाद्यायतनत्वेन प्रतिपत्तव्यम्। कस्मात्? अतच्छब्दात्। तस्याचेतनस्य प्रधानस्य प्रतिपादकः शब्दस्तच्छब्दः, न तच्छब्दोऽतच्छब्दः। न ह्यत्राचेतनस्य प्रधानस्य प्रतिपादकः कश्चिच्छब्दोऽस्ति, येनाचेतनं प्रधानं कारणत्वेनायतनत्वेन वाऽवगम्येत। तद्विपरीतस्य चेतनस्य

प्रकटार्थविवरणम्

विज्ञेयत्वमपि ब्रह्मलिङ्गमस्तीत्याह—**अपि च तमेवैकमिति**। यो विरजस्त्वादिलक्षणः[1] 'आत्मा तमेव विज्ञाय धीरो धीमान् भवति, नान्यथा। अतः प्रज्ञां प्रज्ञप्तिसाधनमात्मसाक्षात्कारोपायमेवानुतिष्ठेन्मुमुक्षुः, नात्मासंस्पर्शिबहुशब्दानुचिन्तनं कुर्यात्, यतो वाचः क्लेशापादनमात्रं तद् बहुशब्दचिन्तनमित्यर्थः।

नानुमानमतच्छब्दात्। सिद्धान्तमुपपाद्य पूर्वपक्षापाकरणाय प्रवर्तत इत्याह—**यथेत्यादिना**। विशेषे भवो वैशेषिकोऽसाधारण इत्यर्थः।

भाष्यभावप्रकाशिका

प्रधानादीनामप्यन्यतमस्य मुक्तोपसृप्यता स्यादिति, अत आह—**ब्रह्मणश्चेति**। वाग्विमुक्तैर्विज्ञेयत्वव्यपदेशादिति व्याख्यान्तरमाह—**अपि चेति**॥२॥

नानुमानमतच्छब्दात्॥३॥ ननु द्युभ्वाद्यायतनं ब्रह्मेति सिद्धम्, ततः किमुत्तरसूत्रसन्दर्भेणेति? सत्यम्; तथापि ब्रह्म-प्रतिपादकासाधारणशब्दवत् प्रधानप्रतिपादकशब्दाभावं दर्शयितुमित्याह—**यथेति**। अतच्छब्दादित्यस्यार्थान्तरमाह—**तद्विपरीतस्येति**।

न्यायनिर्णयः

श्रुतिस्मृतिलोकोक्तिः। वाग्विमुक्तैर्ज्ञेयत्वव्यपदेशादपि द्युभ्वाद्यायतनं ब्रह्मेति व्याख्यान्तरमाह—**अपि चेति**। इहेत्युदाहरणोक्तिः। वाग्विमोकद्वारा द्युभ्वाद्यायतनस्य ज्ञेयत्वोक्तावपि कुतस्तद् ब्रह्मैव, तत्राह—**तच्चेति**। धीरो विवेकज्ञानी, विज्ञानं पदार्थज्ञानं, प्रज्ञा वाक्यार्थधीः, ज्ञातपदार्थस्यैव हि वाक्यार्थधीः। ब्राह्मणपदमनुक्तद्विजोपलक्षणम्। वाक्यार्थधीहेतुत्वेन कर्मकाण्डवैमुख्यमधिकारिणा कार्यमित्याह—**नेति**। बहूनिति विशेषणादात्मार्थोपनिषदनुचिन्तनमनुज्ञातम्। अनात्मार्थशब्दानामननुसंधेयत्वे हेतुः—**वाच इति**। अष्टावपि स्थानानि वाक्शब्देनोक्तानि। ताल्वादिशोषणमेव बहुशब्दानुचिन्तनम्, न फलवदित्यर्थः। मुक्तोपसृप्यत्वोक्तिफलमाह—**तस्मादिति**॥२॥

सिद्धान्तमुक्त्वा प्रधानपक्षं निषेधति—**नेति**। सूत्रतात्पर्यमाह—**यथेति**। वैशेषिकत्वमसाधारणत्वम्। तदक्षराणि व्याचष्टे—**नेत्यादिना**। इहेति वाक्योक्तिः। प्रश्नपूर्वकं हेतुमुक्त्वा व्याचष्टे—**कस्मादित्यादिना**। प्रकरणमत्रेत्युक्तम्। प्रधानसाधकशब्दाभावे फलमाह—**येनेति**। प्रधानवाचिशब्दस्य सत्त्वेनेति यावत्। न तथा तद्वाचिशब्दोऽस्तीति शेषः। अतच्छब्दादित्यस्यार्थान्तरमाह—

---

१. "विरजः पर आकाशादज आत्मा महान् ध्रुवः" इति पूर्ववाक्यमनुसंधेयम्।

प्रतिपादकशब्दोऽत्रास्ति–'यः सर्वज्ञः सर्ववित्' (मु. उ. १।१।९) इत्यादिः। अत एव न वायुरपीह द्युभ्वाद्यायतनत्वेनाश्रीयते।।३।।

प्राणभृच्च।।४।।

यद्यपि प्राणभृतो विज्ञानात्मन आत्मत्वं चेतनत्वं च संभवति, तथाप्युपाधिपरिच्छिन्नज्ञानस्य सर्वज्ञत्वाद्यसंभवे सत्यस्मादेवातच्छब्दात् प्राणभृदपि न द्युभ्वाद्यायतनत्वेनाश्रयितव्यः। न चोपाधिपरिच्छिन्नस्याविभोः प्राणभृतो द्युभ्वाद्यायतनत्वमपि सम्यक् संभवति। पृथग्योगकरणमुत्तरार्थम्।।४।।

कुतश्च न प्राणभृद् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः?

भेदव्यपदेशात्।।५।।

भेदव्यपदेशश्चेह भवति–'तमेवैकं जानथ आत्मानम्' इति ज्ञेयज्ञातृभावेन। तत्र प्राणभृत् तावन्मुमुक्षुत्वा-

प्रकटार्थविवरणम्

प्राणभृच्च। चकारेण पूर्वसूत्रोक्तमतच्छब्दादिति हेतुमनुकृष्य जीवापाकरणमाह—**प्राणभृच्चेति।** किं च जीवस्यादृष्टद्वारेण द्युभ्वादिनिमित्तत्वेऽपि न साक्षात् आयतनत्वं संभवतीत्याह—**न चोपाधिपरिच्छिन्नस्येति।** ननु यदि पूर्वसूत्रोक्तेनैव हेतुना जीवापाकरणं तर्हि 'न जीवानुमाने अतच्छब्दात्' इत्येकमेव सूत्रमस्तु; किं पृथक्सूत्रकरणेनेत्याशङ्क्याह—**पृथग्योगेति।** युनक्त्यर्थं संबध्नातीति योगः सूत्रम्, तस्य पृथक्करणमुत्तरसूत्रेषु केवलजीवनिराकरणं प्रवर्तिष्यत इति ज्ञापनार्थमित्यर्थः।

भेदव्यपदेशात्। प्रकरणात्। तथैव संबन्धमाह—**कुतश्चेति।**

भाष्यभावप्रकाशिका

तर्हि सूत्रात्मा स्यादिति, अत आह—**अत एवेति**।।३।।

प्राणभृच्च।।४।। यदुक्तं भोग्यस्य भोक्तृशेषत्वाद् द्युभ्वाद्यायतनत्वं युक्तमिति, अत्राह—**न चोपाधिपरिच्छिन्नस्येति।** ननु अतच्छब्दादिति हेतोरत्राप्यनुकृष्टत्वाद् 'न प्राणभृदनुमाने अतच्छब्दादि'त्येक एव योगः कस्माद् न कृत इति? तत्राह—**पृथगिति।** "भेदव्यपदेशात्" इत्यादिसूत्रैः प्राणभृदेव निरस्यते, न प्रधानम्। अतश्चैकयोगकरणे दुर्विज्ञानं तत् स्यादित्यर्थः।।४।।

भेदव्यपदेशात्।।५।। **प्रकरणात्**।।६।। अस्तु तर्हि ज्ञेयत्वेनोपदिश्यमानमायतनं जीव एवेति, अत आह—**तत्रेति**।।५।।६।।

न्यायनिर्णयः

तदिति। सप्तमी पूर्ववत्। प्रधानस्य द्युभ्वाद्यायतनत्वाभावेऽपि सूत्रात्मनः स्यादित्याशङ्क्याह—**अत इति।** अतच्छब्दादित्यतःशब्दार्थः।।३।।

अस्तु तर्हि शारीरो द्युभ्वाद्यायतनं तस्मिन्नात्मत्वादियोगात्, तत्राह—**प्राणभृच्चेति।** तद् व्याचष्टे—**यद्यपीति।** भोग्यस्य भोक्तृशेषत्वात् तस्यायतनत्वमुक्तमाशङ्क्याह—**न चेति।** जीवस्यादृष्टद्वारा द्युभ्वादिनिमित्तत्वेऽपि न साक्षात् तदायतनत्वमौपाधिकत्वेनाविभुत्वादित्यर्थः। नन्वतच्छब्दादिति हेतुरिहापि चेदनुकृष्यते तर्हि 'न प्राणभृदनुमाने अतच्छब्दात्' इत्येकमेव सूत्रमस्तु, तत्राह—**पृथगिति।** उत्तरसूत्रैः प्राणभृदेव निरस्यते न प्रधानम्; तच्चैकसूत्रकरणे दुर्ज्ञानं, तेनोत्तरसूत्रेषु जीवमात्रनिरासज्ञापनार्थं पृथक्करणं सूत्रयोरित्यर्थः।।४।।

परिच्छेदस्याभासत्वाद् ब्रह्मैक्याभिप्रायेण सर्वज्ञत्वमायतनत्वं च जीवेऽपि स्यादिति मत्वा पृच्छति—**कुतश्चेति।** **सूत्रमुत्तरम्—भेदेति।** विभजते—**भेदेत्यादिना।** इहेत्युदाहरणोक्तिः। तथापि ज्ञेयमायतनं प्राणभृदस्तु, नेत्याह—**तत्रेति।** निर्धारणार्था सप्तमी।।५।।

ज्ञाता, परिशेषादात्मशब्दवाच्यं ब्रह्म ज्ञेयं द्युभ्वाद्यायतनमिति गम्यते, न प्राणभृत्।।५।।

कुतश्च न प्राणभृद् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः?

प्रकरणात्।।६।।

प्रकरणं चेदं परमात्मनः। 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' (मु.उ. १।१।३) इत्येकविज्ञानेन सर्वविज्ञानापेक्षणात्। परमात्मनि हि सर्वात्मके विज्ञाते सर्वमिदं विज्ञातं स्यान्न केवले प्राणभृति।।६।।

कुतश्च न प्राणभृद् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः?

स्थित्यदनाभ्यां च।।७।।

द्युभ्वाद्यायतनं च प्रकृत्य 'द्वा सुपर्णा सयुजा सखाया' (मु.उ. ३।१।१) इत्यत्र स्थित्यदने निर्दिश्येते- 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इति कर्मफलाशनम्, 'अनश्नन्नन्यो अभिचाकशीति' इत्यौदासीन्येनावस्थानं च। ताभ्यां च स्थित्यदनाभ्यामीश्वरक्षेत्रज्ञौ तत्र गृह्येते। यदि चेश्वरो द्युभ्वाद्यायतनत्वेन विवक्षितस्ततस्तस्य प्रकृतस्येश्वरस्य क्षेत्रज्ञात् पृथग्वचनमवकल्पते। अन्यथा ह्यप्रकृतवचनमाकस्मिकमसंबद्धं स्यात्। ननु तवापि क्षेत्रज्ञस्येश्वरात् पृथग्वचनमाकस्मिकमेव प्रसज्येत। न तस्याविवक्षितत्वात्। क्षेत्रज्ञो हि कर्तृत्वेन भोक्तृत्वेन

प्रकटार्थविवरणम्

स्थित्यदनाभ्यां च। भेदस्योभयधर्मत्वादेकस्य भेदप्रतिपादनेऽर्थादितरस्यापि भेदः प्रतिपादितो भवति। तत्र जीवस्येश्वराद्भेदप्रतिपादनं न स्यात्, द्युभ्वायतनत्वेन तस्याप्रक्रान्तत्वात् इत्याह—**ननु तवापीति।** नेश्वरादन्यत्वं जीवस्य विवक्षितम्, त्वंपदार्थानुवादेन तत्पदार्थनिरूपकत्वाद् वाक्यस्य इति परिहरति—**न तस्याविवक्षितत्वादिति।** ननु स्थित्यदनलिङ्गेन जीवेश्वरौ ग्रहीतुं न शक्येते,

भाष्यभावप्रकाशिका

स्थित्यदनाभ्यां च।।७।। एतावता कथमीश्वरस्य द्युभ्वाद्यायतनत्वमिति? अत आह—**यदि चेति।** ईश्वरेणैकत्वसिद्ध्यर्थमनुवचनमुपपद्यते; प्रकृतस्यापि जीवस्य लोकप्रसिद्धत्वात्, न तु ब्रह्मण इत्याह—**न तस्येति।** इतोऽपि क्षेत्रज्ञस्य प्रतिपाद्यत्वमयुक्तमित्याह—**क्षेत्रज्ञो हीति।**

न्यायनिर्णयः

भिन्नस्य ब्रह्मणो ज्ञेयत्वनिरासेन स्वात्मानमेव जानथेति वचनपर्यवसानाज्जीवस्यायतनत्वज्ञेयत्वनिरासे हेत्वन्तरं वाच्यमित्याह—**कुतश्चेति।** सूत्रमुत्तरमादाय व्याचष्टे—**प्रकरणं चेति।** तस्य परमात्मविषयत्वे हेतुमाह—**कस्मिन्निति।** प्राणभृति ज्ञातेऽपि तच्छेषत्वेन सर्वविज्ञानात् तद्विषयत्वं प्रकरणस्येत्याशङ्क्याह—**परमात्मनीति।।६।।**

जीवस्योपाध्यैक्येनाविवक्षितत्वात् तज्ज्ञानेऽपि सर्वज्ञानसिद्धेस्तस्यायतनत्वाद्यभावे हेत्वन्तरं वाच्यमित्याशङ्क्य सूत्रेण परिहरति—**कुतश्चेत्यादिना।** व्याचष्टे—**द्युभ्वादीति।** निर्देशमेव दर्शयति—**तयोरिति।** विभक्त्यर्थमाह—**ताभ्यां चेति।** स्थित्येश्वरस्यादनाज्जीवस्य संग्रहेऽपि कथमीश्वरस्यैव विश्वायतनत्वं, तदाह—**यदीति।** ईश्वरस्यायतनत्वेनाप्रकृतत्वे जीवात् पृथक्कथनानुपपत्तिरित्युक्तमेव व्यतिरेकद्वाराऽऽह—**अन्यथेति।** जीवस्याप्यायतनत्वेनाप्रकृतत्वे तुल्याऽनुपपत्तिरिति शङ्कते—**नन्विति।** तस्यैक्यार्थं लोकसिद्धस्यानुवादत्वान्नैवमित्याह—**नेति।** जीवस्यापूर्वत्वाभावेनाप्रतिपाद्यत्वमेव प्रकटयति—**क्षेत्रज्ञो हीति।** ईश्वरस्यापि

च प्रतिशरीरं बुद्ध्याद्युपाधिसंबद्धो लोकत एव प्रसिद्धो, नासौ श्रुत्या तात्पर्येण विवक्ष्यते। ईश्वरस्तु लोकतोऽप्रसिद्धत्वाच्छ्रुत्या तात्पर्येण विवक्ष्यत इति न तस्याकस्मिकं वचनं युक्तम्। 'गुहां प्रविष्टावात्मानौ हि' (ब्र. सू. १।२।११) इत्यत्राप्येतद् दर्शितम्–'द्वा सुपर्णा' इत्यस्यामृचीश्वरक्षेत्रज्ञावुच्येते इति। यदापि पैङ्ग्युपनिषत्कृतेन व्याख्यानेनास्यामृचि सत्त्वक्षेत्रज्ञावुच्येते, तदापि न विरोधः कश्चित्। कथम्? प्राणभृद्धीह घटादिच्छिद्रवत् सत्त्वाद्युपाध्यभिमानित्वेन प्रतिशरीरं गृह्यमाणो द्युभ्वाद्यायतनं न भवतीति निषिध्यते। यस्तु सर्वशरीरेषूपाधिभिर्विनोपलक्ष्यते परमात्मैव स भवति। यथा घटादिच्छिद्राणि घटादिभिरुपाधिभिर्विनोपलक्ष्यमाणानि महाकाश एव भवन्ति। तद्वत् प्राणभृतः परस्मादन्यत्वानुपपत्तेः प्रतिषेधो नोपपद्यते। तस्मात् सत्त्वाद्युपाध्यभिमानिन एव द्युभ्वाद्यायतनत्वप्रतिषेधः। तस्मात् परमेव ब्रह्म द्युभ्वाद्यायतनम्। तदेतत् 'अदृश्यत्वादिगुणको धर्मोक्तेः' (ब्र. सू. १।२।२१) इत्यनेनैव सिद्धम्। तस्यैव हि भूतयोनिवाक्यस्य मध्य इदं पठितम्–'यस्मिन् द्यौः पृथिवी चान्तरिक्षम्' इति। प्रपञ्चार्थं तु पुनरुपन्यस्तम्।।७।।

।।इति प्रथमं द्युभ्वाद्यधिकरणम्।।

प्रकटार्थविवरणम्

पैङ्ग्युपनिषद्यन्यथा व्याख्यातत्वादित्याशङ्क्याह—**यदापीति**। उपाध्यवच्छिन्नो जीवो द्युभ्वायतनो न भवतीति सूत्रकृतोऽभिप्रायः। पैङ्ग्युपनिषदि तु बिम्बभूतब्रह्मैक्यदर्शी जीवोऽभिप्रेतः, नासौ द्युभ्वायतनं निषिध्यत इति भावः। पौनरुक्त्यं शङ्कते—**तदेतदिति**। समाधत्ते—**प्रपञ्चार्थं त्विति**। भूतयोनेरेव निर्विशेषत्वप्रपञ्चनेन जीवात्मत्वप्रतिपादनायेदमधिकरणमित्यर्थः।इति प्रथमं द्युभ्वाद्यधिकरणम्।।

भाष्यभावप्रकाशिका

ननु तत्र बुद्धिक्षेत्रज्ञावुक्तौ, न जीवपरमेश्वराविति, अतः कथमिदं सूत्रमिति? अत आह—**गुहामिति**। ननु तत्रान्यदेव विषयवाक्यम्, नेदमिति, तत्राह—**यदापीति**। ननु इह तर्हि परमात्मा नोच्यते, किन्तु सत्त्वक्षेत्रज्ञौ, ततः कथं परमात्मनोऽभ्युपगम इति शङ्कते—**कथमिति**। जीवस्यापि परमात्मत्वेन विवक्षितत्वादुपाधिविवक्षाभावान्नैष दोष इत्याशङ्क्याह—**प्राणभृदिति**। ननु एकस्यैवोपाधिविशिष्टत्वाद्वि[त्वावि]शिष्टत्वेन भेदाभेदौ कथमिति? अत आह—**यथेति**। इह विवक्षितो जीवः परमात्मनोऽन्यो न भवतीत्याह—**प्राणभृत इति**। **प्रपञ्चार्थमिति**। तन्मध्ये न पठितमिति कृत्वाचिन्तयेदमधिकरणं प्रवृत्तमित्यर्थः।।७।। इति प्रथमं द्युभ्वाद्यधिकरणम्।

न्यायनिर्णयः

लोकवादिसिद्धत्वादप्रतिपाद्यतेत्याशङ्क्याह—**ईश्वरस्त्विति**। तयोरित्यादौ बुद्धिजीवयोरेवोक्तत्वात् कथमिदं सूत्रं, तत्राह—**गुहामिति**। गुहाधिकरणे नेदमुदाहरणम्, 'ऋतं पिबन्तौ' इत्युदाहृतत्वात्, तत्राह—**यदेति**। तर्हीह परानुक्तेर्बुद्धिजीवयोरेवोक्तत्वात् कथं परस्याधिगतिरित्याह—**कथमिति**। जीवस्यापि परात्मत्वेनात्रेष्टत्वादुपाध्यनादराद्पहितनिषेधेऽपि तदस्पृष्टस्य परस्यायतनत्वमित्याह—**प्राणेति**। कथमेकस्यैवोपाधिविशिष्टत्वाविशिष्टत्वेन भेदाभेदौ, तत्राह—**यथेति**। प्राणभृतः अनुपहितस्यात्रेष्टस्येति शेषः। तस्य चेदायतनत्वं न निषिध्यते, किंविषयस्तर्हि निषेधः, तत्राह—**तस्मादिति**। पक्षान्तरायोगे सिद्धान्तमुपसंहरति—**तस्मादिति**। इतश्चायतनवाक्यं ज्ञेयब्रह्मपरमित्याह—**तदिति**। तेनैव सिद्धत्वे हेतुमाह—**तस्येति**। तर्हि गतार्थमधिकरणमनर्थकमित्याशङ्क्य भूतयोनिवाक्यमध्यस्थं नैतदिति कृत्वाचिन्तयेदमधिकरणमित्याह—**प्रपञ्चार्थमिति**।।७।। इति प्रथमं द्युभ्वाद्यधिकरणम्।।

२।।भूमाधिकरणम्।।सू. ८-९।।

भूमा संप्रसादादध्युपदेशात्।।८।।

इदं समामनन्ति–'भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति। यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमाऽथ यत्रान्यत् पश्यत्यन्यच्छृणोत्यन्यद् विजानाति तदल्पम्' (छा. उ. ७।२३।२४) इत्यादि। तत्र संशयः–किं प्राणो भूमा स्यादाहोस्वित् परमात्मेति। कुतः संशयः? भूमेति तावद् बहुत्वमभिधीयते, 'बहोर्लोपो भू च बहोः' (पा. सू. ६।४।१५८) इति भूमशब्दस्य

शारीरकन्यायसंग्रहः

भूमा संप्रसादादध्युपदेशात्।।८।। धर्मोपपत्तेश्च।।९।। प्रकरणलिङ्गाभ्यां संभूय प्रतिपादकाभ्यां वाक्यश्रुती संभूय प्रतिपादिके बलीयस्यौ— इति न्यायेन प्राणस्य प्रकरणमतिवादित्वलिङ्गं भूयःप्रश्नप्रतिवचनाभावालिङ्गं च संभूय प्राणानुगमनप्रतिपादकं बाधित्वा "एष तु वा अतिवदति यः सत्येनातिवदति" इति वाक्यश्रुतिभ्यामतिवादित्वनिमित्तं सत्यशब्दवाच्यं प्रस्तावितम्। तस्मिन् प्रस्ताविते भूमशब्दस्य वैपुल्यवाचकस्य धर्म्याकाङ्क्षायां सत्यां ब्रह्म इति प्रकरणात् भूमेति निर्णीतम्। अथवा सन्निहितप्रकरणादपि निराकाङ्क्षाद् वाक्योपक्रमगतप्रकरणप्रतिज्ञातस्यात्मनः प्रतिपादनं सापेक्षमेकवाक्यतासामर्थ्याद् बलीयः— इति न्यायेन "तरति शोकमात्मवित्" इत्युपक्रान्तं ब्रह्म उपसंहारगतेन भूमशब्देन उपादीयत इति।

प्रकटार्थविवरणम्

भूमा संप्रसादादध्युपदेशात्। छान्दोग्यवाक्यं पठति—**इदमामनन्तीत्यादिना।** नाल्पे सुखमस्ति, भूमैव सुखम्; तस्मान्निरतिशयसुखैषिणा "भूमा त्वेव विजिज्ञासितव्यः" इति सनत्कुमारेणोक्ते नारदोऽब्रवीत्—भगवन् भूमानमहं विजिज्ञासे विज्ञातुमिच्छामि इत्युक्ते भूम्नो लक्षणमुवाचाचार्यः सनत्कुमारः—"यत्र नान्यदिति"। संशयबीजं वक्तुं भूमशब्दार्थं प्रथममाह—**भूमेति तावदित्यादिना।** बहोर्भावः

भाष्यभावप्रकाशिका

भूमा संप्रसादादध्युपदेशात्।।८।। संशयकारणं दर्शयितुं भूमशब्दस्यार्थं दर्शयति—**भूमेति तावदिति।** बहोः परस्येम[नि] च्प्रत्ययस्येकारस्य लोपो बहुशब्दस्य भ्वादेशश्च यदा, तदा भूमेति भवतीत्यर्थः। भावतद्वतोस्तादात्म्यविवक्षया सामानाधिकरण्यव्यपदेशो भाष्ये—प्राणो भूमा, परमात्मा भूमेति। ननु अन्यत्र भूयःप्रश्नप्रतिवचनाभावेऽप्यर्थभेदो दृष्टः, तद्वत् स्यादिति, सत्यम्; अत्र तु

न्यायनिर्णयः

आत्मशब्दाद् द्युभ्वाद्यायतनं ब्रह्मेत्युक्तम्, तत्रात्मशब्दः 'तरति शोकमात्मवित्' इत्यत्राब्रह्मणि प्राणे प्रयोगादनैकान्तिकः स्यादित्याशङ्क्याह—**भूमेति।** पूर्णसुखात्मनि निर्विशेषे ब्रह्मणि भूमविद्याश्रुतेरन्वयोक्तेः संगतिरिति मत्वा छान्दोग्यवाक्यं पठति—**इदमिति।** नाल्पे सुखमस्ति भूमैव सुखं, तस्मान्निरतिशयं सुखमिच्छता भूमैव विशेषेण ज्ञातुमेष्टव्यो न परिच्छिन्नमिति सनत्कुमारोक्तिमादत्ते—**भूमा त्विति।** तदुपश्रुत्य नारदो 'भगवन्, भूमानमेव विशेषेण ज्ञातुमिच्छामी'ति पृच्छति सनत्कुमारम्—**भूमानमिति।** भूम्नो लक्षणमाह—**यत्रेति।** व्यवहारातीतं पूर्णं वस्तु भूमेत्यर्थः। लक्षणं व्यतिरेकेण स्फोरयितुं परिच्छिन्नस्य लक्षणमाह—**अथेति।** अन्वयवद् व्यतिरेकस्यापीष्टसिद्धौ हेतुत्वद्योतकोऽथशब्दः। आदिपदं 'यो वै भूमा तदमृतम्' इत्यादिसंग्रहार्थम्। उक्ते वाक्ये भूम्नि संशयमाह—**तत्रेति।** निर्बीजे संशयेऽतिप्रसङ्गात् पृच्छति—**कुत इति।** तत्र हेतुं वक्तुं भूमशब्दार्थमाह—**भूमेतीति।** बहोर्भाव इति विग्रहे 'पृथ्वादिभ्य इमनिज्वा' इतीमन्प्रत्यये कृते 'बहोर्लोपो भू च बहोः' इति सूत्रेण बहोरुत्तरस्येमन्प्रत्ययस्येकारलोपे बहोः स्थाने भूशब्दादेशे च भूमन्निति प्रातिपदिकं सिध्यति। तस्य च भावार्थे विहितेमन्प्रत्ययान्तत्वाद् बहुत्ववाचितेत्यर्थः। तथापि

भावप्रत्ययान्ततास्मरणात्। किमात्मकं पुनस्तद् बहुत्वमिति विशेषाकाङ्क्षायां 'प्राणो वा आशाया भूयान्' (छा. उ. ७।१५।१) इति संनिधानात् प्राणो भूमेति प्रतिभाति। तथा 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवाञ्शोकस्य पारं तारयतु' (छा. उ. ७।१।३) इति प्रकरणोत्थानात् परमात्मा भूमेत्यपि प्रतिभाति। तत्र कस्योपादानं न्याय्यम्, कस्य वा हानमिति भवति संशयः। किं तावत् प्राप्तम्? प्राणो भूमेति। कस्मात्? भूयःप्रश्नप्रतिवचनादर्शनात्। यथा हि 'अस्ति भगवो नाम्नो भूयः' इति, 'वाग्वाव नाम्नो भूयसी' इति, तथा 'अस्ति भगवो वाचो भूयः' इति 'मनो वाव वाचो भूयः' इति च नामादिभ्यो ह्या प्राणाद् भूयःप्रश्नप्रतिवचनप्रवाहः प्रवृत्तः, नैवं प्राणात् परं भूयःप्रश्नप्रतिवचनं दृश्यते 'अस्ति भगवः प्राणाद्भूय' इति 'अदो वाव प्राणाद्भूय' इति। प्राणमेव तु नामादिभ्य आशान्तेभ्यो

प्रकटार्थविवरणम्

इति विग्रहे "पृथ्वादिभ्य इमनिच्" इतीमनिच्प्रत्यये च कृते पश्चात् 'बहोर्लोपो भू च बहोः' इति सूत्रेण बहोरुत्तरेषामिमनिजादीनामिकारस्य लोपो भवति, बहोः स्थाने भू चादेशः। एवं भूमन्प्रातिपदिकस्य भावेऽर्थे विहितेमनिच्प्रत्ययान्ततावगमात् बहुत्ववाचक[त्व]-मित्यर्थः।[१]अवान्तरमहाप्रकरणाभ्यां संशयं दर्शयितुमुपक्रमते—किमात्मकमित्यादिना।[२]पूर्वत्र साधारणस्य द्युभ्वाद्यायतनत्वस्यात्मश्रुत्या ब्रह्मण्येव नियमनमुक्तम्। इह श्रुत्यभावे प्रकरणानुगृहीतेन भूयःप्रश्नप्रतिवचनाभावलिङ्गेन साधारणस्य बहुत्वस्य प्राणे व्यवस्थापनमिति पूर्वपक्षमाह—**प्राणो भूमेति।**[३]भावभवित्रोरभेदेन निर्देशः।

ननु "एष तु वा अतिवदति" इत्यादि भिन्नमेव प्रकरणमित्याशङ्क्याह—**प्राणमेव त्विति।** प्रकृते प्राणविज्ञाने सत्यवदनसंसारयाथात्म्यविज्ञानश्रद्धादिगुणविधानान्न विच्छिन्नं प्राणप्रकरणमित्यर्थः। भूम्नो लक्षणवचनम्, सुखत्वम्, अमृतत्वम्,

भाष्यभावप्रकाशिका

प्रकरणे प्रश्नप्रतिवचनयोः सतोरेवार्थभेदो दृश्यते इत्याह—**यथा ह्यस्तीति।** ननु अत्रापि "एष तु वा अतिवदती" ति तुशब्देन प्राणदर्शिनोऽतिवादित्वं व्यावर्त्य "यः सत्येनातिवदती" ति सत्येनातिवदनात् कथं प्राणं भूमानं मन्यत इति? तत्राह—**प्राणमेव त्विति।** अतिवादित्वलिङ्गेन प्राणस्य प्रत्यभिज्ञायमानत्वात्, एष इति प्रकृतस्य परामृश्यमानतया प्रकरणाविच्छेदात्, सत्यशब्दोऽतिवादित्वे सत्यवदनगुणविधायकः, तुशब्दोऽपि नामाद्याशान्तवादिनोऽतिवादित्वव्यावर्तक इत्यर्थः। लोकप्रसिद्ध्या दर्शनाभावमुक्त्वा

न्यायनिर्णयः

संशये को हेतुरित्याशङ्क्यावान्तरप्रकरणं महाप्रकरणं चेत्याह— **किमित्यादिना।** तथा संनिधानात् प्राणभानवदित्यर्थः। भावभवित्रोस्तादात्म्यविवक्षया 'प्राणो भूमा' 'परमात्मा भूमे'ति सामानाधिकरण्यम्। सत्यां सामग्र्यां कार्यसिद्धिमाह— **तत्रेति।** आकाङ्क्षापूर्वकं पूर्वपक्षं गृह्णाति— **किमिति।** पूर्वपक्षे प्राणोपास्तिरुत्तरपक्षे परमात्मधीरिति फलम्। अवान्तरप्रकरणस्य संनिहितत्वेऽपि महाप्रकरणशेषत्वेन दुर्बलत्वान्न प्राणस्य प्रमेयतेत्याह— **कस्मादिति।** महाप्रकरणादवान्तरप्रकरणस्य प्राबल्यार्थं लिङ्गमाह— **भूय इति।** प्राणादूर्ध्वं महत्तरार्थविषयत्वेन प्रश्नस्य प्रतिवचनस्य वाऽदृष्टेरित्यर्थः। अन्यत्र तदभावेऽपि मेयभेदधीवदत्रापि स्यादित्याशङ्क्यास्मिन् प्रकरणे तयोः सतोरेवार्थभेदभानान्मैवमित्याह— **यथेति।** दृष्टिविषयत्वेन निषेध्यं प्रश्नादिकमभिनयति— **अस्तीति।** ननु 'एष तु वा अतिवदति' इति तुशब्देन प्राणविदोऽतिवादित्वं व्यावर्त्य, 'यः सत्येनातिवदति' इति सत्येनातिवदनं वदन् प्राणं भूमानं न मृष्यते, तत्राह— **प्राणमिति।** अतिवादित्वलिङ्गेन प्राणस्य प्रत्यभिज्ञानात्, एष इति प्रकृताकर्षणात् प्रकरणाविच्छेदात्, अतिवादित्वे सत्यशब्दस्य सत्यवदनगुणविधायकत्वात्, तुशब्दस्यापि नामाद्याशान्तवादिनोऽतिवादित्वव्यावर्तकत्वात्

---

१. संनिहितव्यवहितप्रकरणाभ्यामिति रत्नप्रभा। २. आक्षेपसंगतिरन्यत्र।

३. भावभवित्रोः = धर्मधर्मिणोः। बहुत्वतद्धर्मिप्राणयोरिति यावत्। 'स य एषोऽणिमा' इत्यादौ तथा दृष्टत्वादिति भावः।

भूयांसं 'प्राणो वा आशाया भूयान्' इत्यादिना सप्रपञ्चमुक्त्वा प्राणदर्शिनश्चातिवादित्वम् 'अतिवाद्यसीत्यतिवाद्यस्मीति ब्रूयान्नापह्नुवीत' (छा. उ. ७।१५।४) इत्यभ्यनुज्ञाय 'एष तु वा अतिवदति यः सत्येनातिवदति' (छा. उ. ७।१६।१) इति प्राणव्रतमतिवादित्वमनुकृष्यापरित्यज्यैव प्राणं सत्यादिपरम्परया भूमानमवतारयन् प्राणमेव भूमानं मन्यत इति गम्यते।

कथं पुनः प्राणो भूमेति व्याख्यायमाने 'यत्र नान्यत्पश्यति' इत्येतद् भूम्नो लक्षणपरं वचनं व्याख्यायेतेति? उच्यते–सुषुप्त्यवस्थायां प्राणग्रस्तेषु करणेषु दर्शनादिव्यवहारनिवृत्तिदर्शनात् संभवति प्राणस्यापि 'यत्र नान्यत्पश्यति' इत्येतल्लक्षणम्। तथा च श्रुतिः, 'न शृणोति न पश्यति' इत्यादिना सर्वकरणव्यापारप्रत्यस्तमयरूपां सुषुप्त्यवस्थामुक्त्वा 'प्राणाग्नय एवैतस्मिन् पुरे जाग्रति' (प्र. उ. ४।२,३) इति तस्यामेवावस्थायां पञ्चवृत्तेः प्राणस्य जागरणं ब्रुवती प्राणप्रधानां सुषुप्त्यवस्थां दर्शयति। यच्चैतद् भूम्नः सुखत्वं श्रुतम्–'यो वै भूमा तत्सुखम्' (छा. उ. ७।२३।१) इति, तदप्यविरुद्धम्। 'अत्रैष देवः स्वप्नान्न पश्यत्यथ तदेतस्मिञ्शरीरे सुखं भवति' (प्र. उ. ४।६) इति सुषुप्त्यवस्थायामेव सुखश्रवणात्। यच्च 'यो वै भूमा तदमृतम्' (छा. उ. ७।२४।१) इति, तदपि प्राणस्याविरुद्धम्, 'प्राणो वा अमृतम्' (बृ. उ. १।६।३) इति श्रुतेः।

कथं पुनः प्राणं भूमानं मन्यमानस्य 'तरति शोकमात्मवित्' इत्यात्मविविदिषया प्रकरणस्योत्थानमुपपद्यते? प्राण एवेहात्मा विवक्षित इति ब्रूमः। तथाहि–'प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मणः' (छा. उ. ७।१५।१) इति प्राणमेव सर्वात्मानं करोति। 'यथा वा अरा नाभौ

प्रकटार्थविवरणम्

आत्मविविदिषया प्रकरणस्योत्थानमित्येतत् सर्वं प्राणपक्षेऽपि योजयितुं शक्यमित्येतत् प्रश्नपूर्वकमुपपादयति—**कथं पुनरित्यादिना**।

भाष्यभावप्रकाशिका

श्रुतिप्रमाणेनाह—**तथा चेति**। सुषुप्त्यवस्थायां सुखसंभवात् तत् प्राण उपचर्यत इत्याह—**अत्रैष इति**। प्रकरणविरोधमाशङ्कते—**कथमिति**। उक्तहेतुभ्यः प्राण एवात्रात्मशब्देन निर्दिष्ट इत्याह—**प्राण एवेति**। सर्वात्मत्वप्रतिपादनादात्मशब्दस्तत्र मुख्यया वृत्त्या वर्तत इत्याह—**तथा हीति**। ननु परमेश्वर एव सर्वकारणत्वान्मुख्यो भूमा, न प्राण इति, अत आह—**सर्वात्मत्वेति**।

न्यायनिर्णयः

प्राणं गृहीत्वैव सत्यादिद्वारा भूम्नोऽवतारात् तस्यैव भूमतेत्यर्थः। प्राणपक्षे लक्षणविरोधं शङ्कते— **कथमिति**। अवस्थाविशेषमाश्रित्याह— **उच्यत इति**। लोकप्रसिद्ध्या संभावितं श्रुत्या स्पष्टयति— **तथा चेति**। 'गार्हपत्यो ह वा एषोऽपानः' इत्यादिनाऽग्नित्वेन निरूपितत्वात् प्राणा एवाग्नयः। ते च पुरे शरीरेऽभिमानतो गृहीते स्वापेऽपि व्यापारवन्तो भवन्तीत्यर्थः। यद्वा तत्राप्यात्मन्येव लक्षणं तस्यास्तत्प्राधान्यादित्याशङ्क्य **तथा चेत्यादि** योज्यम्। 'यो वै भूमा तत्सुखम्' इति प्राणपक्षे कथं निर्वक्ष्यते, तत्राह— **यच्चेति**। यस्यामवस्थायामेष देवो बुद्ध्याद्युपाधिको जीवः स्वप्नानुच्चावचान्नोपलभते, तदा यत्सुखं तदस्मिञ्शरीरे भवति, नोपायान्तरसाध्यमिति श्रुत्यर्थः। सुषुप्तेश्च प्राणप्राधान्यात् तस्यैव तत्सुखमिति शेषः। भूम्नोऽमृतत्वश्रुत्या प्राणादर्थान्तरत्वं, प्राणस्याल्पत्वेन मर्त्यत्वादित्याशङ्क्याह— **यच्चेति**। प्राणे भूम्नि प्रकरणविरोधं शङ्कते— **कथमिति**। प्राणस्यैवात्रात्मत्वान्न तद्विरोधोऽस्तीत्याह— **प्राण एवेति**। संभवति मुख्येऽर्थे किमित्यात्मशब्देन गौणार्थग्रहणमित्याशङ्क्य सार्वात्म्यादात्मशब्दस्तत्र मुख्य एवेत्याह— **तथा हीति**। प्राणस्य सर्वकल्पनाधिष्ठानत्वाच्च मुख्यात्मत्वमित्याह— **यथेति**। तथापि परमात्मैव सर्वकारणत्वान्मुख्यो भूमा,

समर्पिता एवमस्मिन् प्राणे सर्वं समर्पितम्' (छा. उ. ७।१५।१) इति च। सर्वात्मत्वारनाभिनिदर्शनाभ्यां च संभवति वैपुल्यात्मिका भूमरूपता प्राणस्य। तस्मात् प्राणो भूमेत्येवं प्राप्तम्।

तत इदमुच्यते– परमात्मैवेह भूमा भवितुमर्हति, न प्राणः। कस्मात्? संप्रसादादध्युपदेशात्। संप्रसाद इति सुषुप्तं स्थानमुच्यते, सम्यक् प्रसीदत्यस्मिन्निति निर्वचनात्, बृहदारण्यके च स्वप्नजागरितस्थानाभ्यां सह पाठात्। तस्यां च संप्रसादावस्थायां प्राणो जागर्तीति प्राणोऽत्र संप्रसादोऽभिप्रेयते। प्राणादूर्ध्वं भूम्न उपदिश्यमानत्वादित्यर्थः। प्राण एव चेद् भूमा स्यात् स एव तस्मादूर्ध्वमुपदिश्येतेत्यश्लिष्टमेवैतत् स्यात्। न हि नामैव नाम्नो भूय इति नाम्न ऊर्ध्वमुपदिष्टम्। किं तर्हि? नाम्नोऽन्यदर्थान्तरमुपदिष्टं वागाख्यम्– 'वाग्वाव नाम्नो भूयसी' इति। तथा वागादिभ्योऽप्या प्राणादर्थान्तरमेव तत्र तत्रोर्ध्वमुपदिष्टम्। तद्वत् प्राणादूर्ध्वमुपदिश्यमानो भूमा प्राणादर्थान्तरभूतो भवितुमर्हति।

प्रकटार्थविवरणम्

ननु तथापि परिच्छिन्ने प्राणे कथं निरतिशयमहत्त्वरूपा भूमरूपता घटत इत्याशङ्क्याह—**सर्वात्मत्वारनाभिनिदर्शनाभ्यां चेति।**

संप्रसादशब्देन प्राणं लक्षयितुं प्रथमं मुख्यमर्थमाह—**संप्रसाद इतीति।** विक्षेपाभावात् सुषुप्ते सम्यग् व्यज्यत' इति। 'स वा एष एतस्मिन् संप्रसाद'' इत्यादिः पाठः। अस्मिन् प्रकरणे यस्मादूर्ध्वं यो निर्दिष्टः स ततोऽतिरिक्तो दृष्टः, प्राणाच्चोपरिष्टात् निर्दिष्टो भूमेति सोऽपि ततोऽतिरिक्त एवेति भावः।

भाष्यभावप्रकाशिका

संप्रसादशब्दस्य सूत्रगतस्य विवक्षितमर्थं दर्शयितुं प्रसिद्धमर्थं दर्शयति—**संप्रसाद इति।** न केवलं निर्वचनात्, ''स एष संप्रसादे रत्वा चरित्वे''त्यादिश्रौतप्रयोगादपीत्याह—**तथा बृहदिति।** अत्र सूत्रे विवक्षितमर्थमाह—**तस्यां चेति। प्राणादूर्ध्वमिति।** भूम्नो धर्म इत्या[धर्म्या]काङ्क्षायां सत्यशब्दवाच्यस्य ब्रह्मणः प्रकृतत्वात् तदेव सम्बध्यत इत्यर्थः। प्राणपक्षे दूषणमाह—**प्राण इति।**

न्यायनिर्णयः

प्राणस्तु नैवमित्याशङ्क्याह— **सर्वेति।** प्राणस्य सिद्धे भूमत्वे तदुपास्तिपरं भूमवाक्यमित्युपसंहरति— **तस्मादिति।**

पूर्वपक्षमनूद्य सिद्धान्तयति— **एवमिति।** तत्र प्रतिज्ञां व्याकरोति— **परमात्मेति।** प्राणो भूमेत्युक्तत्वान्नेयं प्रतिज्ञेति शङ्कते— **कस्मादिति।** सौत्रं हेतुमादत्ते— **संप्रसादादिति।** 'एष संप्रसादः' इति संप्रसादशब्दस्य जीवार्थत्वादत्रापि तस्मात्परत्वोक्त्या न प्राणप्रत्युक्तिरित्याशङ्क्य संप्रसादशब्दस्य विवक्षितं वक्तुं प्रसिद्धमर्थमाह— **संप्रसाद इति।** जीवे सुप्तौ च शक्तिकल्पनायां गौरवं शङ्कित्वोक्तम्— **सम्यगिति।** न केवलं निरुक्त्या संप्रसादशब्दः स्वापविषयः, किन्तु 'स एष एतस्मिन् संप्रसादे रत्वा' इत्यादिप्रयोगादपीत्याह— **बृहदिति।** तर्हि स्वापादुपर्युपदेशस्ततोऽन्यस्य प्राणस्यापि स्यादित्याशङ्क्यावस्थावाचिशब्दस्य लक्षणया प्राणविषयत्वमाह— **तस्यां चेति।** संप्रसादशब्दस्य लाक्षणिकार्थग्रहे सिद्धं हेत्वर्थमाह— **प्राणादिति।** भूम्नो धर्म्याकाङ्क्षायां ब्रह्मणः सत्यस्याधिकारात् तदेव संबध्यत इति भावः। प्राणे हेतोरयोगमाह— **प्राण इति।** दृष्टान्तद्वारोक्तं व्यनक्ति— **न हीति।** अस्मिन्प्रकरणे यस्मादूर्ध्वं यो निर्दिश्यते स ततोऽतिरिच्यते, प्राणाच्चोपरिष्टादुपदिष्टो भूमेति सोऽपि ततोऽन्यः स्यादिति भावः। तत्र तत्रेति पर्यायभेदोक्तिः।

---

१. 'सम्यक् प्रसीदती'ति भाष्यविवरणमिदम्। व्यज्यत इत्यस्य आनन्द इति शेषः। स्वप्नजागरितस्थानाभ्यां सह पाठं विवृणोति—स वा इति।

नन्विह नास्ति प्रश्नः–अस्ति भगवः प्राणाद्भूय इति, नापि प्रतिवचनमस्ति–प्राणाद्वाव भूयोऽस्तीति; कथं प्राणादधि भूमोपदिश्यत इत्युच्यते। प्राणविषयमेव चातिवादित्वमुत्तरत्रानुकृष्यमाणं पश्यामः–'एष तु वा अतिवदति यः सत्येनातिवदति' इति। तस्मान्नास्ति प्राणादध्युपदेश इति। अत्रोच्यते–न तावत् प्राणविषयस्यैवातिवादित्वस्यैतदनुकर्षणमिति शक्यं वक्तुम्, विशेषवादात्–'यः सत्येनातिवदति' इति। ननु विशेषवादोऽप्ययं प्राणविषय एव भविष्यति। कथम्? यथा–एषोऽग्निहोत्री यः सत्यं वदतीत्युक्ते न सत्यवदनेनाग्निहोत्रित्वं, केन तर्हि? अग्निहोत्रेणैव। सत्यवदनं त्वग्निहोत्रिणो विशेष उच्यते। तथा 'एष तु वा अतिवदति यः सत्येनातिवदति' इत्युक्ते न सत्यवदनेनातिवादित्वम्। केन तर्हि? प्रकृतेन प्राणविज्ञानेनैव। सत्यवदनं तु प्राणविदो विशेषो विवक्ष्यत इति। नेति ब्रूमः। श्रुत्यर्थपरित्यागप्रसङ्गात्। श्रुत्या ह्यत्र सत्यवदनेनातिवादित्वं प्रतीयते–'यः सत्येनातिवदति सोऽतिवदति' इति। नात्र प्राणविज्ञानस्य संकीर्तनमस्ति। प्रकरणात्तु प्राणविज्ञानं संबध्येत। तत्र प्रकरणानुरोधेन श्रुतिः परित्यक्ता स्यात्। प्रकृतव्यावृत्त्यर्थश्च तुशब्दो न संगच्छेत[1] 'एष तु वा अतिवदति' इति। 'सत्यं त्वेव विजिज्ञासितव्यम्' (छा. उ. ७।१६) इति च

प्रकटार्थविवरणम्

पूर्वपक्षबीजमुद्भाव्य पराकरोति—**नन्विहेत्यादिना**। एषशब्दस्य यच्छब्दपरतन्त्रत्वान्न प्रकृतप्राणवित्परामर्शकत्वम्, ततः प्रकरणविच्छेद इत्युक्तम्। तत्र शङ्कते—**ननु विशेषवादोऽपीति**। सत्येनेति तृतीयाश्रुत्या करणत्वाभिधायिन्या सत्यज्ञानेनातिवादित्वान्तरमेव विधीयते। तस्य दुर्बलप्रकरणानुरोधेन परित्याग आपद्यत इत्याह—**नेति ब्रूम इत्यादिना**।

भाष्यभावप्रकाशिका

हेतोरसिद्धिमाशङ्कते—**नन्विहेति**। स्वपक्षे हेतुमाह पूर्ववादी—**प्राणविषयमिति**। स्वकीयहेतुं समर्थयितुं तदीयहेतुं तावद् दूषयति— **न तावदिति**।

ननु अतिवादित्वलिङ्गेन प्रत्यभिज्ञायमानत्वात् प्राण एवेह प्रतिपाद्यते, सत्यशब्दस्तु तस्य गुणविधायक इत्युक्तमिति, तत्राह—**नात्र प्राण इति**। **श्रुतिः परित्यक्तेति**। सत्येनेति तृतीयाश्रुत्या सत्यविज्ञानस्य साधनत्वमतिवादित्वे प्रतीयते। ततः प्रकरणं

न्यायनिर्णयः

हेत्वसिद्धिं शङ्कते— **नन्विति**। प्रतिवचनद्वारा प्रश्नकल्पनामाशङ्क्योक्तम्— **नापीति**। स्वपक्षे पूर्वपक्षी हेतोः सत्त्वमाह— **प्राणेति**। सिद्धान्ते हेत्वसिद्धिं निगमयति— **तस्मादिति**। सिद्धान्ती हेतुसमर्थनार्थमाह— **अत्रेति**। तत्र परकीयहेतुं निरस्यति— **न तावदिति**। एषशब्दस्य यच्छब्दपारतन्त्र्यान्न प्रकृतप्राणपरामर्शित्वमतोऽवान्तरप्रकरणं विच्छिन्नमित्युक्ते शङ्कते— **नन्विति**। सत्यस्य प्रधानत्वाद् विशेषवादस्य तद्विषयत्वमेव, न प्राणविषयतेत्याह— **कथमिति**। सत्यशब्दो यथार्थोक्ति-वाचीत्यङ्गीकृत्य दृष्टान्तेन प्रत्याह— **यथेति**। तृतीयाश्रुत्या साधकतमार्थया सत्यज्ञानेनातिवादित्वान्तरविधानात् प्रकरणेन श्रुत्यर्थपरित्यागासिद्धिरित्याह— **नेतीति**। श्रुत्यर्थमेव स्फुटयति— **श्रुत्येति**। वाक्यमत्रेत्युक्तम्। अतिवादित्वलिङ्गप्रत्यभिज्ञात-प्राणस्यैव प्रतिपाद्यत्वे सत्यशब्दस्तदीयगुणविधायकः स्यादित्युक्तमित्याशङ्क्याह— **नेति**। अतिवादित्ववाक्यं सप्तम्यर्थः। का तर्हि प्राणविज्ञानस्य प्रसक्तिः, तत्राह— **प्रकरणात्त्विति**। **संबध्येत** अतिवादित्वे हेतुत्वेनेति शेषः। प्रकरणस्य प्रमाणत्वात् तत्कृतोऽपि संबन्धोऽनुरोद्धव्य इत्याशङ्क्याह— **तत्रेति**। न परं प्रकरणानुरोधेन तृतीयाश्रुतिर्विरुध्येत, किंतु तुशब्दश्चेत्याह— **प्रकृतेति**। न च लिङ्गोपेतप्रकरणं श्रुतिमात्राद् बलीयः, लिङ्गस्यातद्विषयत्वोक्तेरिति भावः। यत्तु सत्यशब्दस्य गुणविधिपरत्वं, तन्न, वाक्यान्तरविरोधादित्याह—

१. 'संगच्छते' इति पा.

प्रयत्नान्तरकरणमर्थान्तरविवक्षां सूचयति। तस्माद् यथैकवेदप्रशंसायां प्रकृतायामेष तु महाब्राह्मणो यश्चतुरो वेदानधीत इत्येकवेदेभ्योऽर्थान्तरभूतश्चतुर्वेदः प्रशस्यते, तादृगेतद् द्रष्टव्यम्। न च प्रश्नप्रतिवचनरूपयैवार्थान्तरविवक्षया भवितव्यमिति नियमोऽस्ति; प्रकृतसंबन्धासंभवकारितत्वादर्थान्तरविवक्षायः। तत्र प्राणान्तमनुशासनं श्रुत्वा तूष्णींभूतं नारदं स्वयमेव सनत्कुमारो व्युत्पादयति-यत् प्राणविज्ञानेन विकारानृतविषयेणातिवादित्वमनतिवादित्वमेव तत्; 'एष तु वा अतिवदति यः सत्येनातिवदति' इति। तत्र सत्यमिति परं ब्रह्मोच्यते, परमार्थरूपत्वात्। 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. उ. २।१) इति च श्रुत्यन्तरात्। तथा व्युत्पादिताय नारदाय 'सोऽहं भगवः सत्येनातिवदानि' इत्येवं प्रवृत्ताय विज्ञानादिसाधनपरम्परया भूमानमुपदिशति। तत्र यत् प्राणादधि सत्यं वक्तव्यं प्रतिज्ञातं तदेवेह भूमेत्युच्यत इति गम्यते। तस्मादस्ति प्राणादधि भूम्न उपदेश इत्यतः प्राणादन्यः परमात्मा भूमा भवितुमर्हति। एवं

प्रकटार्थविवरणम्

इतश्च न प्राणप्रकरणानुवृत्तिरित्याह—**सत्यं त्वेवेति**। यच्चोक्तं प्रश्नप्रतिवचने न स्त इति, तत्राह— **न च प्रश्नेति**। ननु "प्राणा वै सत्यम्" इति श्रुत्यन्तरात् सत्यविज्ञानेनातिवादित्वं प्राणपक्षेऽपि न विरुध्यत इत्याशङ्क्याह—**तत्र सत्यमितीति**। प्राणादीनां व्यावहारिकमेव सत्यत्वम्, मुख्यं तु ब्रह्मण एव। अस्तु, तथापि भूम्नि किमायातमित्याशङ्क्याह—**तथा व्युत्पादितायेति**। लाभान्तरमाह—**एवं चात्मेति**।

भाष्यभावप्रकाशिका

श्रुत्या बाध्यते। सत्यशब्दस्य गुणविधिपरत्वे "सत्यं त्वेवे" ति वचनमनुपपन्नं स्यादित्याह—**सत्यं त्वेवेति। प्रकृतसम्बन्धासंभवे [ति]**। प्रश्नप्रकृत [प्रति]वचनयोरप्यर्थैक्यदर्शनात् तयोरभावेऽप्यर्थभेददर्शनाच्च तद्भेदोऽप्रयोजक इत्यर्थः। ननु प्रश्नाभावे कथं सनत्कुमारः प्रतिवक्ति? 'नापृष्टः कस्यचिद् ब्रूयादि' ति स्मृतिविरोधात्, मैवम्; अपृष्टेनापि शिष्यो जिज्ञासुश्चेद् बोधनीय इत्यभिप्रेत्याह—**तत्र प्राणान्तमिति**। ननु मा भूत् प्राणो भूमा, किन्तु सत्यशब्दवाच्यः, तथापि परमात्मा भूमेति कथं सिध्येदिति? तत्राह—**तत्र सत्यमिति**। ननु तथापि विज्ञानमननश्रद्धानिष्ठाकृतीनामन्यतम एव भूमा स्यात्, न सत्यमिति, अत आह—**तथा व्युत्पादितायेति**। तेषां साधनत्वादेव न फलभूतभूमरूपता संभवतीत्यर्थः।

न्यायनिर्णयः

सत्यं त्विति। तुशब्देनाङ्गविशेषविधिः सूच्यते, किंवा प्रकृतव्यावृत्तिरिति संदेहापोहार्थमाह— **तस्मादिति**। अवान्तराधिकारविच्छेदादिति हेत्वर्थः। प्राणादर्थान्तरं सत्यं प्रशंसितुं सत्यज्ञानेनातिवादित्वमुक्तमित्याह— **तादृगिति**। यत्तूक्तं प्राणादधि भूयःप्रश्नप्रत्युक्ती नेति, तत्राह— **न चेति**। किं तर्हि कारणमर्थान्तरविवक्षायामित्याशङ्क्याह— **प्रकृतेति**। असति प्रकृतसंबन्धायोगे सतोरपि प्रश्नप्रतिवचनयोरर्थैक्यस्य मैत्रेय्यादौ[1] दृष्टत्वात्, तदभावेऽपि प्रकृतसंबन्धायोगे तद्भेदस्य दर्शनात् प्रश्नादिसत्त्वमर्थान्तरत्वानिमित्तमिति भावः। 'नापृष्टः कस्यचिद् ब्रूयात्' इति स्मृतेरप्रश्ने प्रत्युक्तिरयुक्तेत्याशङ्क्यापृष्टेनापि बोधनीयः शिष्यो जिज्ञासुरिति मत्वाऽऽह— **तत्रेति**। सत्यामर्थान्तरविवक्षायामिति यावत्। तदेवाभिनयति— **यदिति**। सत्यशब्दार्थो भूमाऽपि परस्मादर्थान्तरमित्याशङ्क्याह— **तत्रेति**। वाक्यं सप्तम्यर्थः। परस्मिन् ब्रह्मणि सत्यशब्दस्य प्रयुक्तपूर्वकत्वाच्च तद्विषयतेत्याह— **सत्यमिति**। तथापि विज्ञानमननश्रद्धानिष्ठाकृतीनामन्यतमो भूमा, न सत्यं ब्रह्मेत्याशङ्क्याह— **तथेति**। तेषां साधनत्वादेव फलभूतभूमताऽसिद्धिरित्यर्थः। हेतूक्तिद्वारा भूमोपदेशे प्रस्तुते सतीत्यर्थः। इहेति वाक्योक्तिः। हेत्वसिद्धिमुद्धृत्य तथापि कथं सत्यस्यैव तथात्वमत आह— **तत्रेति**। यत्तु प्राणविषयत्वमात्मशब्दस्योक्तं फलितमाह— **तस्मादिति**। परात्मा भूमेत्यत्र महाप्रकरणमनुगृहीतमिति हेत्वन्तरमाह— **एवं चेति**।

---

१. प्रश्नभेदादर्थभेद इति न नियमः, एकस्यात्मनो मैत्रेय्या बहुशः पृष्टत्वात्, प्रश्नं विनोक्तचतुर्वेदस्य प्रकृतैकवेदाद् भिन्नत्वदर्शनाच्चेत्यर्थः। (रत्न.)

चेहात्मविविदिषया प्रकरणस्योत्थानमुपपन्नं भविष्यति। प्राण एवेहात्मा विवक्षित इत्येतदपि नोपपद्यते। न हि प्राणस्य मुख्यया वृत्त्याऽऽत्मत्वमस्ति। न चान्यत्र परमात्मज्ञानाच्छोकविनिवृत्तिरस्ति, 'नान्यः पन्था विद्यतेऽयनाय' (श्वे. उ. ६।१५) इति श्रुत्यन्तरात्। 'तं मा भगवाञ्शोकस्य पारं तारयतु' (छा. उ. ७।१।३) इति चोपक्रम्योपसंहरति–'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमारः' (छा. उ. ७।२६।२) इति। तम इति शोकादिकारणमविद्योच्यते। प्राणान्ते चानुशासने न प्राणस्यान्यायत्ततोच्येत। 'आत्मतः प्राणः' (छा. उ. ७।२६।१) इति च ब्राह्मणम्। प्रकरणान्ते परमात्मविवक्षा भविष्यति, भूमा तु प्राण एवेति चेत्, न; 'स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि' (छा.उ. ७।२४।१) इत्यादिना भूम्न एवाऽऽ प्रकरणसमाप्तेरनुकर्षणात्। वैपुल्यात्मिका च भूमरूपता सर्वकारणत्वात् परमात्मनः सुतरामुपपद्यते।।८।।

प्रकटार्थविवरणम्

गौण्याऽपि वृत्त्याऽऽत्मशब्देन प्राणो न वक्तव्य इत्याह—**न चान्यत्रेति**। मा भूत् प्राणविज्ञानाच्छोकनिवृत्तिः, को दोष इत्याशङ्क्याह—**तं मा भगवानिति**। उपक्रमोपसंहारपर्यालोचनया शोकतरणं[1] ज्ञानमिहं विवक्षितम्। न च विकारत्वादेव अनृतस्य प्राणस्य ज्ञानं तत्साधनमिति भावः। ननु नास्त्युपक्रमोपसंहारयोरैकरूप्यम्, तमस उपसंहारे श्रवणादित्याशङ्क्याह—**तम इतीति**। कारणनिवृत्त्या कार्यस्यात्यन्तिकी निवृत्तिरभिप्रेतेति भावः। इतश्च न प्राणो भूमेत्याह—**प्राणान्ते चेति**। "आत्मतः प्राणः" इत्यनेनाविरोधं शङ्कते—**प्रकरणान्त इति**। भूम्न एव तच्छब्देनानुकर्षणात् वाक्यशेषोऽपि भूमविषय एवेत्याह— **न, स भगव इति**। भूमरूपताऽपि नाङ्गस्येनोपपद्यत इत्याह—**वैपुल्यात्मिका चेति**।

भाष्यभावप्रकाशिका

विशिष्टफलश्रवणादपि परमात्मैव भूमेत्याह—**न चान्यत्रेति**। ननु न मुख्यमत्र शोकतरणं विवक्षितम्, किन्त्वौपचारिकमिति, नैवम्; उपक्रमोपसंहारयोरैकरूप्यावगमादित्याह—**तं मा भगवानिति**। तमोनिवृत्तिरेवोपसंह्रियते, न शोकतरणमिति, मैवम्; कारणनिवृत्त्या कार्यस्य निवृत्तेर्विवक्षितत्वादित्याह—**तम इति**। तस्मान्नेदं प्राणस्य प्रकरणम्, अपि तु यदायत्तः प्राणः, तस्यैवात्मनः प्रकरणमित्यर्थः। शङ्कते—**प्रकरणान्त इति**। प्राणप्रकरणसमाप्तावित्यर्थः। निराकरोति—**न स भगव इति**। सन्दंशन्यायेन भूम्न एतत् प्रकरणम्। तत्र प्राणस्य भूमरूपता युक्तेत्याशयः।।८।।

न्यायनिर्णयः

तदनूद्य दूषयति— **प्राण इति**। शोकनिवृत्तिवाक्यमिहेत्युक्तम्। विशिष्टफलदृष्टेरपि परात्मैवात्मशब्दार्थो न प्राण इत्याह— **न चेति**। नात्र मुख्यं शोकतरणं, किंत्वौपचारिकमित्याशङ्क्योपक्रमोपसंहारैकरूप्यान्मैवमित्याह— **तमिति**। उपक्रमे शोकस्योपसंहारे तमसो निवृत्तिवचनाद् विप्रतिपत्तिमाशङ्क्याह— **तम इतीति**। कारणनिवृत्त्या कार्यनिवृत्तिरुपसंहारे कार्यनिवृत्त्या कारणनिवृत्तिरुपक्रमे विवक्षितेत्यविप्रतिपत्तिरित्यर्थः। किंच प्राणो यदायत्तस्तस्येदं प्रकरणमित्यात्मैव प्रकरणी भूमेत्याह— **प्राणान्ते चेति**। प्राणस्यान्यायत्ततैव कुतोऽत्रोच्यते, तत्राह— **आत्मत इति**। प्राणाधिकारसमाप्तौ परात्मवचनात् पूर्वोक्तस्य भूम्नो न परमात्मतेति शङ्कते— **प्रकरणेति**। भूम्न एव सर्वनाम्नाऽनुकर्षणाद् वाक्यशेषस्यापि तदर्थत्वात् तस्यैवेदं प्रकरणमिति न प्राणस्य भूमतेत्याह— **नेत्यादिना**। क्विंच भूमरूपताऽपि प्राणे न मुख्येत्याह— **वैपुल्येति**। प्राणस्य स्वविकारापेक्षया भूमत्वेऽपि न मुख्यमिति वक्तुं सुतरामित्युक्तम्।।८।।

---

१. **शोकतरणं = शोकतरणसाधनम्।**

धर्मोपपत्तेश्च।।९।।

अपि च ये भूम्नि श्रूयन्ते धर्मास्ते परमात्मन्युपपद्यन्ते। 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' इति दर्शनादिव्यवहाराभावं भूमन्यवगमयति। परमात्मनि चायं दर्शनादिव्यवहाराभावोऽवगतः; 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' (बृ. उ. ४।५।१५) इत्यादिश्रुत्यन्तरात्। योऽप्यसौ सुषुप्तावस्थायां दर्शनादिव्यवहाराभाव उक्तः सोऽप्यात्मन एवासङ्गत्वविवक्षयोक्तो न प्राणस्वभावविवक्षया, परमात्मप्रकरणात्। यदपि तस्यामवस्थायां सुखमुक्तं, तदप्यात्मन एव सुखरूपत्वविवक्षयोक्तम्। यत आह– 'एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ. उ. ४।३।३२) इति। इहापि 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखम्' (छा. उ. ७।२३।१) इति सामयसुखनिराकरणेन ब्रह्मैव सुखं भूमानं दर्शयति। 'यो वै भूमा तदमृतम्' (छा.उ. ७।२४।१) इत्यमृतत्वमपीह श्रूयमाणं परमकारणं गमयति। विकाराणाममृतत्वस्यापेक्षिकत्वात्, 'अतोऽन्यदार्तम्' (बृ. उ. ३।४।२) इति च

प्रकटार्थविवरणम्

धर्मोपपत्तेश्च। परमात्मपरिग्रहे लिङ्गान्तरमाह—**धर्मोपपत्तेश्चेति**। यच्च पूर्ववादिना कथंचिल्लक्षणादिकं योजितं, प्राणे तत्सर्वं विघटयति—**योऽप्यसावित्यादिना**। स्वप्नजागरितयोः सति मनसि दर्शनादिव्यहारदर्शनात्, सुषुप्ते तदभावेऽदर्शनात्, अन्वयव्यतिरेकाभ्यां मनउपाधिकोऽयं दर्शनादिव्यवहारो नात्मस्वभावकृतः, आत्मा तु स्वतोऽसङ्ग इत्यभिप्रायेण "न शृणोति" इत्यादिना सुषुप्ते सकलव्यवहाराभाव उक्तः, न तु प्राणप्रतिपिपादयिषया, परमात्मप्रकरणविरोधादित्यर्थः। इतश्च न प्राणस्यामृतत्वमित्याह— **अतोऽन्यदार्तमिति**। विनश्वरमित्यर्थः। "स एवाधस्तात् स उपरिष्टात्" इत्यादिना सर्वगतत्वमुक्तम्। "स एवेदं सर्वम्" इति सर्वात्मकत्वमुक्तम्। इति द्वितीयं भूमाधिकरणम्।।

भाष्यभावप्रकाशिका

भूमा परमात्मा लिङ्गान्तरादपीत्याह सूत्रकारः—**धर्मोपपत्तेश्चेति**।।९।। ननु कथं तावता परमात्मावगम इति? व्याप्तत्वादित्याह— **परमात्मनि चेति**। ननु प्राणेऽपि प्रदर्शितमिति, अत्राह—**योऽप्यसाविति**। सुखरूपत्वे प्रमाणमाह—**यत आहेति**। इतोऽप्यात्मन एव सुखरूपत्वविवक्षयोक्तमित्याह—**इहापीति**। ननु प्राणस्याप्यमृतत्वमुक्तमिति, अत आह—**विकाराणामिति**। आर्तम्

न्यायनिर्णयः

परो भूमेत्यत्र लिङ्गान्तरमाह— **धर्मेति**। सूत्रं व्याकरोति— **अपि चेति**। उपपत्तिं दर्शयितुं भूम्नि दर्शनाद्यभावं दर्शयति— **यत्रेति**। कथमेतावता परात्मधीः, तत्राह— **परमात्मनीति**। प्राणेऽपि तदुपपत्तिरुक्तेत्याशङ्क्याह— **योऽपीति**। उक्तः 'न शृणोति' इत्यादिनेति शेषः। प्राणस्वभावविवक्षया तस्यानुक्तत्वे हेतुमाह— **परमात्मेति**। तत्प्रकरणे 'न शृणोति' इत्यादेरुक्तेरित्यर्थः। स्वप्नजागरितयोः सति मनसि दर्शनादिव्यवहारात् तदभावे स्वापे तदभावादन्वयव्यतिरेकाभ्यां मनोऽधीनो दर्शनादिर्नात्मकृतः। स तु स्वतोऽलिङ्ग इति मत्वा 'न शृणोति' इत्यादिना सर्वव्यवहाराभावः सुषुप्तावुक्तो, न प्राणविवक्षया परप्रकरणविरोधादित्यर्थः। इतश्चात्मन एव भूम्नः श्रुतं सुखत्वं प्राणेऽपि स्यादित्युक्तं प्रत्याह— **यदपीति**। तस्य सुखत्वे मानमाह— **यत इति**। आमयेन सुखत्वमित्याह— **इहापीति**। तस्यैव सुखत्वं प्रतियोगिप्रत्युक्त्या स्फुटयति— **नेति**। उक्तश्रुतेरर्थमाह— **सामयेति**। दुःखेन सहितं सामयम्। धर्मद्वयमुक्त्वा धर्मान्तरमाह— **यो वा इति**। प्राणस्यापि दर्शितममृतत्वमित्याशङ्क्याह— **विकाराणामिति**। इतश्च न प्राणस्य मुख्यममृतत्वमित्याह— **अत इति**। आर्तमार्तिग्रस्तं नाशीति यावत्। प्रकृतोपयुक्तानि धर्मान्तराण्याह—

श्रुत्यन्तरात्। तथा (च) सत्यत्वं स्वमहिमप्रतिष्ठितत्वं सर्वगतत्वं सर्वात्मत्वमिति चैते धर्माः श्रूयमाणाः परमात्मन्येवोपपद्यन्ते, नान्यत्र। तस्माद् भूमा परमात्मेति सिद्धम्।।९।।

।।इति द्वितीयं भूमाधिकरणम्।।

३।।अक्षराधिकरणम्।।सू. १०-१२।।

अक्षरमम्बरान्तधृतेः।।१०।।

'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति। स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनणु' (बृ.उ. ३।८।७,८) इत्यादि श्रूयते। तत्र संशयः-किमक्षरशब्देन वर्ण उच्यते, किं वा परमेश्वर इति।

शारीरकन्यायसंग्रहः

अक्षरमम्बरान्तधृतेः।।१०।। सा च प्रशासनात्।।११।। अन्यभावव्यावृत्तेश्च।।१२।। केवलाया रूढेः विवक्षितलिङ्गानुगृहीता योगवृत्तिः बलीयसी, तात्पर्यवत्त्वात्— इति न्यायेन प्रश्नप्रतिवचनाभ्यां प्रतिपादिताकाशान्तजगदाधारत्व-विवक्षितलिङ्गेन अक्षरशब्दस्य ब्रह्मणि योगवृत्तिराश्रिता। तथा 'साधारणेऽपि जगदाधारलिङ्गे[1] "सा च प्रशासनात्" इति विशेषलिङ्गेन ब्रह्मपरत्वमुन्नीतम्।

प्रकटार्थविवरणम्

अक्षरमम्बरान्तधृतेः। बृहदारण्यकगतं वाक्यं पठति—**कस्मिन्निति।** यदूर्ध्वं दिवो यदधस्तात् पृथिव्या ये उभे द्यावाभूमी यदन्तरिक्षं, यद्भूतं भवद् भविष्यच्च तत्सर्वं कस्मिन्नोतं च प्रोतं चेति प्रथमप्रश्ने याज्ञवल्क्येन आकाशे तदोतं च प्रोतं चेत्यपाकृते पुनरपि गार्गी पप्रच्छ—आकाशोऽव्याकृताख्यः कस्मिन्नोतप्रोतभावेन वर्तत इति। ततो याज्ञवल्क्य उवाच—भो गार्गि, यत्त्वया पृष्टमाकाशस्याधिकरणं तदेतदक्षरमस्थूलादिविशेषणं ब्रह्मविदो वदन्तीत्यर्थः। उभयत्राक्षरशब्दस्य प्रयोगदर्शनात् संशयमाह—**तत्रेति।** पूर्वत्र सत्यशब्दस्य ब्रह्मणि मुख्यत्वेन भूमा परमात्मेत्यभ्यधायि। तर्ह्यक्षरशब्दस्यापि वर्णे मुख्यत्वादोङ्कार इहोपदिश्यत

भाष्यभावप्रकाशिका

विनाशीत्यर्थः। धर्मान्तराण्याह—**तथेति**।।९।। इति द्वितीयं भूमाधिकरणम्।

न्यायनिर्णयः

तथेति। 'स एवाधस्तात् स उपरिष्टात्' इत्यादिना सर्वगतत्वं, 'स एवेदं सर्वम्' इति सर्वात्मत्वमुक्तम्। श्रुतिलिङ्गप्रकरणेभ्यो भूमा परमात्मेति तत्प्रतिपत्त्यर्थं भूमवाक्यमित्युपसंहरति— **तस्मादिति**।।९।। इति द्वितीयं भूमाधिकरणम्।।

भूम्नि श्रुतधर्माणां परत्रोपपत्त्या परो भूमेत्युक्तम्। अधुना तेनैव न्यायेनाक्षरे श्रुतजगद्विधारणस्य परस्मिन्नुपपत्तेरक्षरं परं ब्रह्मेत्याह— **अक्षरमिति।** बृहदारण्यकवाक्यं पठति— **कस्मिन्निति।** यदूर्ध्वं दिवो यदधस्तात्पृथिव्या ये चोभे द्यावापृथिव्यौ यदन्तरिक्षं यद्भूतं भवद्भविष्यच्च तत्सर्वं कस्मिन्नोतं प्रोतं चेति प्रश्ने याज्ञवल्क्येनाकाशे तदोतं च प्रोतं चेति निरस्ते, गार्गी पुनरपृच्छत्—आकाशोऽव्याकृताख्यः कस्मिन्नोतप्रोतत्वेन तिष्ठतीति। याज्ञवल्क्यस्त्वाह, हे गार्गि, यत्त्वया पृष्टमाकाशस्याधिकरणं तदेतदक्षरमस्थूलादिविशेषणं ब्रह्मविदो वदन्तीत्युदाहरणार्थः। उभयत्राक्षरशब्दप्रयोगप्रतीत्या संशयमाह— **तत्रेति।** सत्यशब्दस्य ब्रह्मणि मुख्यत्वात् परो भूमेत्युक्तत्वादत्राप्यक्षरशब्दस्य वर्णे मुख्यत्वादोंकार एवाक्षरमिति पूर्वपक्षयति— **तत्रेत्यादिना।** अक्षरब्राह्मणस्य निर्विशेषे ब्रह्मण्यन्वयोक्तेः संगतयः। ॐकारोपास्तिर्ब्रह्मधीरित्युभयत्र फलम्। न क्षरतीत्यक्षरमित्यवयवप्रसिद्ध्या

---

१. जगदाधारत्वस्य प्रधानपरमात्मसाधारण्यमग्रे शङ्किष्यमाणप्रकारेण बोध्यम्।

तत्राक्षरसमाम्नाय इत्यादावक्षरशब्दस्य वर्णे प्रसिद्धत्वात्, प्रसिद्ध्यतिक्रमस्य चायुक्तत्वात्, 'ओंकार एवेदं सर्वम्' (छा. उ. २।२३।३) इत्यादौ च श्रुत्यन्तरे वर्णस्याप्युपास्यत्वेन सर्वात्मकत्वावधारणाद् वर्ण एवाक्षरशब्द इति।

एवं प्राप्त उच्यते–पर एवात्माऽक्षरशब्दवाच्यः। कस्मात्? अम्बरान्तधृतेः पृथिव्यादेराकाशान्तस्य विकारजातस्य धारणात्। तत्र हि पृथिव्यादेः समस्तविकारजातस्य कालत्रयविभक्तस्य 'आकाश एव तदोतं च प्रोतं च' इत्याकाशे प्रतिष्ठितत्वमुक्त्वा 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च' इत्यनेन प्रश्नेनेदमक्षरमवतारितम्। तथा चोपसंहृतम्–'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' इति। न चेयमम्बरान्तधृतिर्ब्रह्मणोऽन्यत्र संभवति। यदपि 'ॐकार एवेदं सर्वम्' इति,

प्रकटार्थविवरणम्

इत्याह—**तत्राक्षरसमाम्नाय इति**। ब्रह्मण्यपि यौगिकोऽक्षरशब्दो घटत इत्याशङ्क्याह—**प्रसिद्ध्यतिक्रमस्येति**। योगाद् रूढिः बलीयसीति भावः। कथं तर्हि वर्णमात्रस्य सकलविधारकत्वादीति, तत्राह—**ओंकार एवेदमिति**।

यद्यपि योगाद् रूढिर्बलीयसी तथापि इह प्रश्नप्रतिवचनाभ्यां प्रतिपादिताकाशान्तसमस्तजगदाधारत्वलिङ्गेनानुगृहीता योगवृत्तिरेव समाश्रयणीयेति सिद्धान्तयति—**पर एवात्मेत्यादिना**।

भाष्यभावप्रकाशिका

अक्षरमम्बरान्तधृतेः॥१०॥ वर्णे प्रसिद्धत्वादिति। अक्षरशब्दसमुदायस्य वर्णेषु रूढत्वादित्यर्थः। ननु न क्षरतीत्यवयवप्रसिद्ध्या परमात्मन्यपि संभवतीति, अत आह—**प्रसिद्ध्यतिक्रमस्येति**। रूढेः प्राबल्यादित्यर्थः। ननु वर्णपरिग्रहे तस्याम्बरान्तधारणमनुपपन्नम्, अपुरुषार्थत्वाच्च तदभिधानमयुक्तमिति, तत्राह—**ओङ्कार इति**। उपासनाद्वारेण पुरुषार्थत्वं संभवति। तथा सर्वात्मत्वमपि[1] सर्वस्याभिधेयस्य 'गौरयम्' 'वृक्षोऽय'मिति शब्दसामानाधिरण्यात्, उपायोपेयमात्रेण च तदयोगात्, 'धूमोऽयमग्नि' रित्यदर्शनात्, अतदुपायेऽपि प्रत्यये लिङ्गेन्द्रियादिजन्ये 'घटोऽय'मिति नामसंभेदानुभवात्, नाम्नामप्योङ्कारमात्रत्वात् संभवतीत्यर्थः। ननु अस्मिन् प्रश्नवाक्य आकाशस्य (सा)धारणं दृष्टम्, न पृथिव्यादेरिति, तत्राह—**तत्र हीति**। ननु रूढिर्योगाद् बलीयसीत्युक्तम्, सत्यम्; तात्पर्यवदम्बरान्तधृतिलिङ्गसहकृता योगवृत्तिर्बलीयसी, तात्पर्यवत्त्वं चोपक्रमोपसंहारयोरेकरूपत्वावगमादित्याह—**तथा चोपसंहृतमिति**।

न्यायनिर्णयः

परस्मिन्नपि शब्दोपपत्तिमाशङ्क्य 'रूढिर्योगमपहरति' इति न्यायेनाह— **प्रसिद्धीति**। वर्णपक्षे तस्याम्बरान्तधारणायोगादपुमर्थत्वाच्च तद्ध्यानाद्[2] ब्रह्मैव ग्राह्यमित्याशङ्क्याह— **ॐकार इति**। उपास्तिद्वारा पुमर्थत्वे सिद्धे, अभिधेयस्य च गौरयं वृक्षोऽयमिति शब्दसामानाधिकरण्यात्, धूमाग्निवदुपायोपेयतामात्रेण तदयोगात्, अतदुपाये[3] लिङ्गाद्युत्थज्ञाने नामसंभेदादभिधानाभिधेययोरैक्यात्, ॐकारमात्रतायाश्च सर्वस्य श्रुतत्वात् तदुक्तिरित्यर्थः। रूढेरिदं ब्राह्मणमोंकारोपास्तिपरमित्युपसंहरति— **वर्ण इति**।

पूर्वपक्षमनूद्य सिद्धान्तमवतार्य प्रतिज्ञां व्याकरोति— **एवमिति**। रूढेरोंकारविषयत्वमक्षरशब्दस्योक्तं, तत्कथं प्रतिज्ञेत्याह— **कस्मादिति**। हेतुमुक्त्वा व्याकरोति— **अम्बरान्तेति**। आकाशस्यैव प्रश्ने श्रवणात् तदधिकरणं पृष्टं न पृथिव्यादेरित्याशङ्क्याह— **तत्रेति**। तथापि रूढिर्योगाद् बलीयसीत्युक्तमित्याशङ्क्य तात्पर्यवदम्बरान्तधृतिलिङ्गसंगतयोगवृत्तिर्बलीयसीत्युपेत्योपक्रमोपसंहारयोरैकरूप्यावगमात् तात्पर्यसिद्धिरित्याह— **तथा चेति**। लिङ्गस्यान्यथासिद्धिं प्रत्याह— **न चेति**। ॐकारस्य सर्वात्मत्वश्रुतेस्तत्र संभवति लिङ्गमित्याशङ्क्याह— **यदपीति**। स्वरूपभेदादुपायोपेयभेदादर्थक्रियाभेदाच्च शब्दार्थयोरभेदासिद्धिरित्यर्थः। प्रकृते

---

१. सर्वात्मत्वमपि संभवतीत्यग्रिमेणान्वयः। २. 'तद्धानात्' इति पाठः स्यात्। ३. अतदुपाये इति। सः शब्दः उपायो यस्य तत् तदुपायम्। न तदुपायम् अतदुपायम्, तस्मिन्। शब्दाजन्य इत्यर्थः।

तदपि ब्रह्मप्रतिपत्तिसाधनत्वात् स्तुत्यर्थं द्रष्टव्यम्। तस्मान्न क्षरत्यश्नुते चेति नित्यत्वव्यापित्वाभ्यामक्षरं परमेव ब्रह्म।।१०।।

[1]स्यादेतत्–कार्यस्य चेत् कारणाधीनत्वमम्बरान्तधृतिरभ्युपगम्यते, प्रधानकारणवादिनोऽपीयमुपपद्यते; कथमम्बरान्तधृतेर्ब्रह्मत्वप्रतिपत्तिरिति? अत उत्तरं पठति–

सा च प्रशासनात्।।११।।

सा चाम्बरान्तधृतिः परमेश्वरस्यैव कर्म। कस्मात्? प्रशासनात्। प्रशासनं हीह श्रूयते–'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' (बृ. उ. ३।८।९) इत्यादि। प्रशासनं च पारमेश्वरं कर्म। नाचेतनस्य प्रधानस्य प्रशासनं भवति। न ह्यचेतनानां घटादिकारणानां मृदादीनां घटादिविषयं प्रशासनमस्ति।।११।।

अन्यभावव्यावृत्तेश्च।।१२।।

अन्यभावव्यावृत्तेश्च कारणाद् ब्रह्मैवाक्षरशब्दवाच्यम्। तस्यैवाम्बरान्तधृतिः कर्म, नान्यस्य कस्यचित्।

प्रकटार्थविवरणम्

सा च प्रशासनात्। उत्तरसूत्रनिरस्याशङ्कामाह—**स्यादेतदिति।** चेतनस्यैव राजादेः प्रशासनकर्तृत्वदर्शनादचेतनस्य मृदादेः कारणत्वेऽ[2]प्यदर्शनान्नाचेतनमक्षरमित्याह—**सा चेति।**

अन्यभावव्यावृत्तेश्च। जीवप्रधानोङ्कारनिराकरणे साधारणं कारणमाह—**अन्यभावव्यावृत्तेश्चेति।** इति तृतीयमक्षराधिकरणम्॥

भाष्यभावप्रकाशिका

ननु ओङ्कारे संभवतीत्युक्तमिति, अत्राह—**यदपीति।** स्वरूपभेदादुपायोपेयभेदादर्थक्रियाभेदाच्च न शब्दार्थयोरभेद इत्यर्थः॥१०॥

सा च प्रशसनात्॥११॥ उत्तरसूत्रव्यावर्त्यशङ्कामाह—**स्यादेतदिति।** ननु कार्यविषयं प्रशासनं प्रधाने संभवतीति, तत आह—**न ह्यचेतनानामिति।** अतः प्रशासनस्याज्ञालक्षणस्य विशेषलिङ्गस्य भावान्न प्रधानमित्यर्थः॥११॥

न्यायनिर्णयः

रूढेर्योगस्य बलीयस्त्वे फलितमाह— **तस्मान्नेति॥१०॥**

उत्तरसूत्रापोह्यं चोद्यमाह— **स्यादिति।** केयमम्बरान्तधृतिः, तन्निमित्तत्वं तदुपादानत्वं वा? नाद्यः, घटकुलालवदाश्रयाश्रयित्वायोगात्। द्वितीये व्यभिचारादसाधकतेति मत्वा फलितमाह— **कथमिति।** सूत्रमवतारयति— **अत इति।** प्रतिज्ञां व्याचष्टे— **सा चेति।** प्रधानस्यापि तदुपपत्तेरुक्तत्वादवधारणासिद्धिरित्याह— **कस्मादिति।** हेतुमुत्थाप्य नियमं साधयति— **प्रशासनादिति।** अक्षरस्य सूर्यादौ प्रशासने श्रुतेऽपि कथमीश्वरत्वं, तत्राह— **प्रशासनं चेति।** तस्यान्यथासिद्धिं धुनीते— **नेति।** तस्यापि स्वकार्ये प्रशासनं सिध्यति, नेत्याह— **न हीति।** तथा चाऽऽज्ञाख्यप्रशासनलिङ्गान्न प्रधानमक्षरमित्यर्थः॥११॥

ॐकारादिनिरासेन ब्रह्मादाने हेत्वन्तरमाह— **अन्येति।** प्रतिज्ञाभ्यां सूत्रं योजयति— **अन्यभावेति।** हेत्वर्थं प्रश्नपूर्वकमाह—

---

१. आकाशो भूताकाश इति कृत्वा शङ्केयम्। अव्याकृताकाशस्याजन्यत्वेन शङ्कानुत्थानात्। सूत्रे चकारः आकाशस्य भूतत्वनिरासार्थः। भूताकाशस्य कार्यान्तःपातिनः श्रुतसर्वकार्याश्रयत्वायोगात् अव्याकृतमेवाज्ञानम् आकाशशब्दितमिति तदाश्रयत्वादक्षरं न प्रधानमित्यर्थः। रत्नप्रभा

२. प्रशासनकर्तृत्वादर्शनादित्यर्थः।

किमिदमन्यभावव्यावृत्तेरिति? अन्यस्य भावोऽन्यभावस्तस्माद् व्यावृत्तिरन्यभावव्यावृत्तिरिति। एतदुक्तं भवति–यदन्यद् ब्रह्मणोऽक्षरशब्दवाच्यमिहाशङ्क्यते, तद्भावादिदम्बरान्तविधारणमक्षरं व्यावर्तयति श्रुतिः– 'तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ' (बृ. उ. ३।८।११) इति। तत्रादृष्टत्वादिव्यपदेशः प्रधानस्यापि संभवति; द्रष्टृत्वादिव्यपदेशस्तु न संभवत्यचेतनत्वात्। तथा 'नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञातृ' (बृ. उ. ३।८।११) इत्यात्मभेदप्रतिषेधात् न शारीरस्याप्युपाधिमतोऽक्षरशब्दवाच्यत्वम्। 'अचक्षुष्कमश्रोत्रमवागमनः' (बृ. उ. ३।८।८) इति चोपाधिमत्ताप्रतिषेधात्। न हि निरुपाधिकः शारीरो नाम भवति। तस्मात् परमेव ब्रह्माक्षरमिति निश्चयः।।१२।।

।।इति तृतीयमक्षराधिकरणम्।।

शारीरकन्यायसंग्रहः

४।।ईक्षतिकर्माधिकरणम्।।सू. १३।।

ईक्षतिकर्मव्यपदेशात् सः।।१३।। यद्यपि लिङ्गात्प्रकरणानुगृहीताच्छ्रुतिप्रत्यभिज्ञा दुर्बला, प्रत्यभिज्ञायाश्च लिङ्गं बलवत्, बहुबुद्धिव्यपेक्षत्वात्, तथाप्युपसंहारेणैकवाक्यतासमर्थप्रकरणानुगृहीता श्रुतिप्रत्यभिज्ञा बलीयसी, बलवत्प्रमाणत्वात्— इति न्यायेनापरब्रह्मोपस्थापकं कार्यब्रह्मप्राप्तिफललिङ्गं तत्प्रकरणानुगृहीतं बाधित्वा परपुरुषशब्दप्रत्यभिज्ञानादेकवाक्यतासाकाङ्क्ष-परब्रह्मप्रकरणाच्च ध्यायतिकर्म परमात्मेति निर्णीतम्। अपरब्रह्म तु हेयतयोपन्यस्तमिति।

।।इति चतुर्थमीक्षतिकर्माधिकरणम्।।

भाष्यभावप्रकाशिका

अन्यभावव्यावृत्तेश्च।।१२।। अक्षरव्यतिरिक्तद्रष्ट्रन्तरप्रतिषेधाच्च न प्रधानमक्षरमित्याह—**तथा नान्यदित्यादिना प्रतिषेधादित्यन्तेन।** तेनैव च सूत्रेण जीवस्याप्यक्षरता निषिद्धेत्याह—**तथा नान्यदिति।** भिन्नानामेव जीवत्वादित्यर्थः। इतोऽपि जीवस्य नाक्षरशब्दतेत्याह—**अचक्षुष्कमिति।** अन्यस्य जीवस्योपाधिसन्बन्धाद् ये भावाः, तेषां व्यावृत्तेरित्यस्मिन् पक्षे सूत्रयोजना। ननु उपाधिसम्बन्धः प्रतिषिध्यते, नापाधिमान्, ततश्च शारीरस्याक्षरत्वमिति, अत आह—**न हीति।**।१२।। इति तृतीयमक्षराधिकरणम्।

न्यायनिर्णयः

किमित्यादिना। अन्यभावाद् व्यावृत्त्याऽक्षरस्याभावत्वं विधेयमिति भ्रमव्यावृत्त्यर्थमभिप्रेतमर्थमाह— **एतदिति।** प्रधानमन्यदित्युक्तम्। इहेति प्रकृतोदाहरणम्। प्रधानस्यापि रूपादिराहित्याददृष्टत्वादियोगादुक्तश्रुतौ कुतोऽक्षरस्य ततो व्यावृत्तिः, तत्राह— **तत्रेति।** एतेन सूत्रेणाक्षरत्वं जीवस्यापि निरस्तमित्याह— **तथेति।** अक्षरमतःशब्दार्थः। इतश्च जीवस्य नाक्षरशब्दतेत्याह—**अचक्षुष्कमिति।** उपाधिसंबन्धनिषेधेऽपि तद्वतो निषेधाभावाद् युक्तं तस्याक्षरत्वमित्याशङ्क्याह— **न हीति।** अनन्यथासिद्धलिङ्गसङ्गियोगवृत्त्या ज्ञेयब्रह्मपरमक्षरब्राह्मणमित्युपसंहरति— **तस्मादिति।**।१२।। इति तृतीयमक्षराधिकरणम्।।

४।।ईक्षतिकर्माधिकरणम्।।सू. १३।।

ईक्षतिकर्मव्यपदेशात् सः।।१३।।

'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्माद् विद्वानेतेनैवायतनेनैकतरमन्वेति' इति प्रकृत्य श्रूयते–'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत' (प्र. उ. ५।२,५) इति। किमस्मिन् वाक्ये परं ब्रह्माभिध्यातव्यमुपदिश्यत आहोस्विदपरमिति। एतेनैवायतनेन परमपरं चैकतरमन्वेतीति प्रकृतत्वात् संशयः। तत्रापरमिदं ब्रह्मेति प्राप्तम्। कस्मात्? 'स तेजसि सूर्ये संपन्नः' 'स सामभिरुन्नीयते ब्रह्मलोकम्' (प्र. उ. ५।५) इति च तद्विदो देशपरिच्छिन्नस्य फलस्योच्यमानत्वात्। न हि परब्रह्मविद् देशपरिच्छिन्नं फलमश्नुवीतेति युक्तम्, सर्वगतत्वात् परस्य ब्रह्मणः। नन्वपरब्रह्मपरिग्रहे परं पुरुषमिति विशेषणं नोपपद्यते। नैष दोषः। पिण्डापेक्षया प्राणस्य परत्वोपपत्तेः इति।

प्रकटार्थविवरणम्

ईक्षतिकर्मव्यपदेशात्सः। आथर्वणवाक्यमाह—**एतद्वा इति**। सत्यकामेन पृष्टः पिप्पलादः प्रोवाच—सत्यकाम, परं चापरं च 'ब्रह्म तद् य एष ओंकारः, तस्माद्विद्वानेतेनोङ्कारमार्गेण परापरब्रह्मणोरेकतरमन्वेति। परदृष्ट्या चेदोंकारमुपास्ते तदा परमाप्नोति, अपरदृष्ट्या चेदपरमित्यर्थः। मध्ये चैकमात्रद्विमात्रोपासनमुक्त्वाऽऽह—यः पुनरेतं प्रकृतं त्रिमात्रम्, विभक्तिपरिणामेन, 'ओम्' इत्येतदक्षरं परपुरुषदृष्ट्याऽभिध्यायीत "स सूर्ये तेजसि संपन्नः" इत्यादिना। उभयोरपि प्रकृतत्वात् संशयमाह—**किमस्मिन्निति**। पूर्वत्र वर्णे रूढस्याक्षरशब्दस्य समस्तजगदायतनत्वलिङ्गेन जघन्या योगवृत्तिराश्रिता; तथेहापि देशे[श] परिच्छिन्नफलश्रवणलिङ्गेन परशब्दस्यापेक्षिकपरत्वविशिष्टे हिरण्यगर्भे वृत्तिरिति पूर्वपक्षमाह—**तत्रापरमित्यादिना**।

भाष्यभावप्रकाशिका

ईक्षतिकर्मव्यपदेशात् सः।।१३।। संशयकारणमाह—**एतेनेति**। ननु परापरत्वेन ब्रह्म विभज्य "परं पुरुषमभिध्यायीते" ति कथने कथमाशङ्केति शङ्कते—**कस्मादिति**। परब्रह्मण्यसंभविफलस्य कथनादाशङ्का(न)वकाश इत्याह—**स तेजसीति**। कथमसंभव इति? तदाह—**न हीति**। परशब्दासंभवं शङ्कते—**नन्विति**। पिण्डः स्थूलशरीरम्। प्राणः सूत्रात्मा हिरण्यगर्भ इति यावत्।

न्यायनिर्णयः

ॐकारस्याक्षरत्वेन पूर्वपक्षे बुद्धिसांनिध्यात् तेन ध्यातव्यं पुरुषं निरूपयति— **ईक्षतीति**। आथर्वणवाक्यं पठति— **एतदिति**। पिप्पलादो नामाचार्यः सत्यकामेन पृष्टो व्याचष्टे। हे सत्यकाम, परं निर्विशेषमपरं च कार्यं यद् ब्रह्म तदेतदेव योऽयमोङ्कारः। स हि प्रतिमेव विष्णोस्तस्य प्रतीकः। तस्मात् प्रणवं ब्रह्मात्मना विद्वानेतेनोङ्कारध्यानेनायतनेन प्राप्तिसाधनेन परापरयोरेकतरं यथाध्यानमनुगच्छतीति प्रकृत्यैकमात्रद्विमात्रोपास्तिं दर्शयित्वा ब्रवीति— यः पुनरोमित्येतदक्षरं त्रिमात्रमिति त्रिमात्रेणेति तृतीया द्वितीयात्वेन नेया, ब्रह्मोङ्काराभेदोपक्रमात्। तथाविधमक्षरं सूर्यान्तस्थं परं ध्यायीत, स सूर्यं प्राप्तः सामभिर्ब्रह्मलोकं प्रति नीयत इत्युदाहरणार्थः। सनिमित्तं संशयमाह— **किमिति**। अक्षरशब्दस्य वर्णे रूढस्यापि जगदायतनत्वलिङ्गेन जघन्या योगवृत्तिराश्रिता; तथा देशपरिच्छिन्नफलश्रुतिलिङ्गेन परशब्दस्यापेक्षिकपरत्वविशिष्टे हिरण्यगर्भे वृत्तिरिति पूर्वक्षयति— **तत्रेति**। उक्तश्रुतेर्ध्येये ब्रह्मणि समन्वयोक्तेः संगतयः। अपरस्य परस्य वा ब्रह्मणो ध्यानं पूर्वोत्तरपक्षयोः फलम्। ननु परापरत्वेन ब्रह्म विभज्य परमभिध्यायीतेति विशेषोक्तौ कुतः शङ्केति शङ्कते— **कस्मादिति**। परायोगिफलोक्त्या शङ्कायाः सावकाशत्वमाह— **स इति**। उपासकः सर्वनामार्थः। कथं यथोक्तं फलं परस्मिन्नसंभावितं, तदाह— **न हीति**। तद्विदोऽपि [2]तथाभावादिति शेषः। विशेषणानुपपत्तिं शङ्कते— **नन्विति**। तदुपपत्तिमाह— **नेति**। पिण्डः स्थूलो देहः। प्राणः सूत्रात्मा। अपरब्रह्मोपास्तिपरं वाक्यमित्युपसंहर्तुमितिशब्दः।

---

१. 'ब्रह्मैतत्' इति पाठः स्यात्। २. तथाभावात् = ब्रह्मभावात्।

एवं प्राप्तेऽभिधीयते—परमेव ब्रह्मेहाभिध्यातव्यमुपदिश्यते। कस्मात्? ईक्षतिकर्मव्यपदेशात्। ईक्षतिर्दर्शनम्। दर्शनव्याप्यमीक्षतिकर्म। ईक्षतिकर्मत्वेनास्याभिध्यातव्यस्य पुरुषस्य वाक्यशेषे व्यपदेशो भवति—'स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते' (प्र. उ. ५।५) इति। तत्राभिध्यायतेरतथाभूतमपि वस्तु कर्म भवति। मनोरथकल्पितस्याप्यभिध्यायतिकर्मत्वात्। ईक्षतेस्तु तथाभूतमेव वस्तु लोके कर्म दृष्टमित्यतः परमात्मैवायं सम्यग्दर्शनविषयभूत ईक्षतिकर्मत्वेन व्यपदिष्ट इति गम्यते। स एव चेह परपुरुषशब्दाभ्यामभिध्यातव्यः प्रत्यभिज्ञायते। नन्वभिध्याने परः पुरुष उक्तः, ईक्षणे तु परात्परः, कथमितर इतरत्र प्रत्यभिज्ञायत इति। अत्रोच्यते— परपुरुषशब्दौ तावदुभयत्र साधारणौ। न चात्र जीवघनशब्देन प्रकृतोऽभिध्यातव्यः परः

प्रकटार्थविवरणम्

साध्याहारं सूत्रभागं योजयति—**परमेव ब्रह्मेत्यादिना**। अस्त्वीक्षणविषयत्वेन वाक्यशेषे निर्देशः, ततः किमित्याशङ्क्याह—**तत्राभिध्यायतेरिति**। ईक्षणं नाम युक्तितः पर्यालोचनं मुख्यम्; तच्च सत्यार्थं वक्ति, मिथ्यार्थस्य युक्त्यसहिष्णुत्वात्। सत्यश्च परमात्मैवेति वाक्यशेषः परमात्मविषय इत्यर्थः। तथाप्युपक्रमे किमायातमित्याशङ्क्य "सः" इति सूत्रभागं व्याचष्टे—**स एव चेहेति**। निर्देशवैषम्यादप्रत्यभिज्ञानं शङ्कते—**नन्वभिध्यान इति**। वैषम्यमङ्गीकृत्य प्रत्यभिज्ञाया अविरोधमाह—**अत्रोच्यत इति**। नन्वभिध्यातव्यविशेषणस्य परशब्दस्य जीवघनविशेषणत्वात् स एवाभिध्यातव्यः। परात्परः पुनरीश्वरोऽन्य एवेत्याशङ्क्याह—**न चात्रेति**। यो ध्यानस्य विषयः स एव तज्जनितसमद[सम्यग्द]र्शनस्येक्षणस्यापि विषय इति एकवाक्यतायां संभवन्त्यां

भाष्यभावप्रकाशिका

ननु परस्य ब्रह्मणो ध्यायतिकर्मत्वसंभवाभ्युपगमेनेक्षतिकर्मत्वाभिधानाद् ध्यातव्यपुरुषस्य परं ब्रह्मत्वं वर्णयतेक्षतिकर्मत्वमप्यपरस्य किं नाभ्युपगम्यत इति? तत्राह—**तत्राभिध्यायतेरिति**। ननु ईक्षतिकर्मणोऽन्य एवायमभिध्याविषय इति, तत्राह—**स एवेति**। ननु जीवघनात् परादिति पञ्चम्यन्तशब्देन ध्यायतिकर्मभूतः पुरुषः प्रत्यभिज्ञायते, तस्मादन्य ईक्षतिविषयः पुरुष इति शङ्कते—**नन्वभिध्यान इति**। प्रथमश्रुतत्वात् तेन प्रत्यभिज्ञायत इत्यर्थः। ननु एतच्छब्दस्य प्रकृतपरामर्शकत्वाद् ध्यायतिकर्मणश्च प्रकृतत्वात् स एवैतच्छब्दसमानाधिकृतेन परशब्देन पञ्चम्यन्तेन प्रत्यभिज्ञायत इति, तत्राह—**न चेति**। एतच्छब्दस्य संनिहितपरामर्शकत्वाज्जीवस्य

न्यायनिर्णयः

पूर्वपक्षनूद्य सिद्धान्तयति— **एवमिति**। तत्र प्रतिज्ञां पूरयति— **परमेवेति**। लिङ्गाद् ध्यायतेरपरविषयत्वोक्तेर्नियमासिद्धिरित्याह— **कस्मादिति**। सौत्रं हेतुमाह— **ईक्षतीति**। ईक्षतेर्धातोरीक्षणमेव कर्म तद्व्यपदेशात्रापेक्षितधीरित्याशङ्क्य व्याकरोति— **ईक्षतिरिति**। तथापि तदेव क्रियात्वात् कर्मेति भ्रान्तिं प्रत्याह— **दर्शनेति**। तस्य व्यपदेशादित्युक्ते पक्षधर्मत्वासिद्धिमाशङ्क्यापेक्षितं पूरयन् विवक्षितमर्थमाह— **ईक्षतीति**। ईक्षणविषयत्वेन वाक्यशेषे निर्दिश्यमानमपि ब्रह्मापरमेवेत्याशङ्क्याह— **तत्रेति**। ईक्षतिध्यायत्योर्निर्धारणार्था सप्तमी। रजतादिदृष्टेराभासत्वात् तथाभूतमेवेत्यवध्रियते। अत एव दर्शनविशेषणम्— **सम्यगिति**। अस्तु तर्हीक्षतिकर्मणोऽन्यस्यैव ध्येयत्वमित्याशङ्क्य सौत्रं सशब्दं व्याचष्टे— **स एवेति**। निर्देशवैषम्यान्न प्रत्यभिज्ञेति शङ्कते— **तस्यैवैनन्विति**। वैषम्यमुपेत्य प्रत्यभिज्ञोपपत्तिमाह— **अत्रेति**। एतच्छब्दस्य प्रकृतगामित्वाद् ध्यायतिकर्मणश्च प्रकृतत्वात् तस्यैवैतच्छब्दसमानाधिकृतपञ्चम्यन्तपरशब्देन प्रत्यभिज्ञानादभिध्यातव्यविषयपरशब्दस्य वाक्यशेषे जीवघनविषयत्वाज्जीवघनोऽभिध्यातव्यः, तस्मात्परात्परः परमेश्वरोऽन्य एवेक्षतिकर्मभूत इत्याशङ्क्याह— **न चेति**। यो ध्येयः स एव तदुत्थसम्यग्धियोऽपीक्षणस्य विषयः, संभवत्येकवाक्यत्वे वाक्यभेदस्यायोगात्, एतच्छब्दस्य संनिहितपरामर्शित्वेऽपि संनिहिततरजीवघनविषयत्वात्, जीवघनशब्दस्य च ध्येयविषयत्वाभावात्, तस्येक्षितव्यस्य चैकतेत्यर्थः। उपक्रमोपसंहारयोरेकवाक्यतार्थमुपक्रमे यो ध्यातव्यः स एवोपसंहारेऽपीक्षणगोचरश्चेत्

पुरुषः परामृश्यते, येन तस्मात्परात्परोऽयमीक्षितव्यः पुरुषोऽन्यः स्यात्। कस्तर्हि जीवघन इति? उच्यते-घनो मूर्तिः। जीवलक्षणो घनो जीवघनः। सैन्धवखिल्यवद् यः परमात्मनो जीवरूपः खिल्यभाव उपाधिकृतः, परश्च विषयेन्द्रियेभ्यः सोऽत्र जीवघन इति।

अपर आह-'स सामभिरुन्नीयते ब्रह्मलोकम्' इत्यतीतानन्तरवाक्यनिर्दिष्टो यो ब्रह्मलोकः परश्च लोकान्तरेभ्यः सोऽत्र जीवघन इत्युच्यते। जीवानां हि सर्वेषां करणपरिवृतानां सर्वकरणात्मनि हिरण्यगर्भे ब्रह्मलोकनिवासिनि संघातोपपत्तेर्भवति ब्रह्मलोको जीवघनः। तस्मात्परो यः परमात्मेक्षणकर्मभूतः स एवाभिध्यानेऽपि कर्मभूत इति गम्यते। परं पुरुषमिति च विशेषणं परमात्मपरिग्रह एवावकल्पते। परो हि पुरुषः परमात्मैव भवति यस्मात्परं किंचिदन्यन्नास्ति, 'पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः' इति

प्रकटार्थविवरणम्

वाक्यभेदस्यान्याय्यत्वादिति भावः। यद्युपक्रमोपसंहारयोरेकवाक्यतासिद्धये योऽभिध्यातः[तव्यः] उपक्रमे स एव उपसंहारेऽपीक्षणगोचर इत्यूरीक्रियते, कस्तर्हि जीवघनशब्दार्थः? तत्र "मूर्तौ घनः" इति सूत्रावष्टम्भेनार्थमाह—**घनो मूर्तिरित्यादिना।** सन्निहितावलम्ब्येतच्छब्दसामानाधिकरण्यादर्थान्तरमाह—**अपर आहेति।** कया वृत्त्या जीवघनशब्दो ब्रह्मलोकमाहेत्याशङ्क्याह—**जीवानां हीति।** सर्वे जीवास्तावत् करणग्रामोपहिताः; करणग्रामाभिमानी च हिरण्यगर्भः; स तस्मिन् लोके वसतीति परम्परया [1]जीवघनाः संहता यस्मिन् स जीवघन इत्यर्थः। ब्रह्मलोकस्यापि कारणत्वात् परमात्मा ततः पर इत्याह—**तस्मात्पर इति।** परपुरुषशब्दस्य परमात्मनि मुख्यत्वाच्च स एवाभिध्यातव्य इत्याह— **परं पुरुषमिति।** उपक्रमपर्यालोचनयाऽप्येवमेवेत्याह—

भाष्यभावप्रकाशिका

च संनिहिततरत्वादित्यर्थः। खिल्यभावोऽल्पभाव इत्यर्थः।

तथापि कथं जीवघनत्वमिति? अत आह—**जीवानामिति।** परिच्छिन्नकरणावच्छिन्नानामपरिच्छिन्नकरणात्मनि हिरण्यगर्भेऽन्तर्भावात् तस्य जीवपूर्णतया जीवघनत्वात् तल्लोकोऽपि जीवघन इत्युपचारादुच्यत इत्यर्थः। **स एवाभिध्यानेऽपीति।** ईक्षतिध्यानयोः कार्यकारणभूतत्वादेकविषयत्वं युक्तमिति भावः। परशब्दश्च ब्रह्मण एव मुख्यपरत्वात् उत्सर्गतस्तदेव गमयतीत्याह—**परं पुरुषमिति।** मुख्यत्वं दर्शयति— **परो हीति।** ईदृग्विधस्य परपुरुषत्वे प्रमाणमाह—**पुरुषादिति।** परापरे ब्रह्मणी प्रकृत्यापरस्य

न्यायनिर्णयः

तर्हि जीवघनशब्दस्य पृथगर्थो वक्तव्यः, न हि जीवघनपदं प्रमत्तगीतमिति शङ्कते— **कस्तर्हीति।** 'मूर्तौ घनः' इति सूत्रेणाह— **उच्यत इति।** षष्ठीसमासं व्यावर्तयति— **जीवेति।** उक्तमर्थं दृष्टान्तेनाह— **सैन्धवेति।** खिल्यभावोऽल्पत्वम्। कथमनवच्छिन्नस्य परस्याल्पत्वं, तत्राह— **उपाधीति।** तत्र पञ्चम्यन्तपरशब्दोपपत्तिमाह— **परश्चेति।**

एतच्छब्दस्य प्रकृतपरामर्शित्वमाश्रित्य पक्षान्तरमाह— **अपर इति।** कया वृत्त्या जीवघनशब्दो ब्रह्मलोकं ब्रूते, तत्राह— **जीवानामिति।** परिच्छिन्नकरणावच्छिन्नानामनवच्छिन्नकरणात्मनि हिरण्यगर्भेऽन्तर्भावात् तस्य जीवपूर्णतया तद्घनत्वात्तल्लोकोऽपि जीवघन इत्युपचर्यत इत्यर्थः। तस्य कारणत्वात्परमात्मा परस्तस्मादित्याह— **तस्मादिति।** ईक्षणध्यानयोः कार्यकारणभावादेकविषयतेत्याह— **स एवेति।** परस्यैव ध्यातव्यत्वे विशेषणमनुकूलयति— **परमिति।** विराडपेक्षया परत्वं सूत्रेऽपीत्युक्तमाशङ्क्य मुख्यं परत्वमुत्सर्गतो ब्रह्मण्येवेत्याह— **परो हीति।** 'यस्मात्परं नापरमस्ति किंचित्' इति श्रुत्या परमात्मानं विशिनष्टि— **यस्मादिति।** ईश्वरस्य परमपुरुषार्थत्वे मानमाह— **पुरुषादिति।** परापरे ब्रह्मणी प्रकृत्य परशब्देनापरस्य व्यावर्तनादपि परमेव ब्रह्म

१. 'जीवाः घनाः संहता यस्मिन्' इति पाठः स्यात्।

च श्रुत्यन्तरात्। 'परं चापरं ब्रह्म यदोंकारः' इति च विभज्यानन्तरमोंकारेण परं पुरुषमभिध्यातव्यं ब्रुवन् परमेव ब्रह्म परं पुरुषं गमयति। 'यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुच्यते' (प्र.उ. ५।५) इति पाप्मविनिर्मोकफलवचनं परमात्मानमिहाभिध्यातव्यं सूचयति।

अथ यदुक्तं परमात्माभिध्यायिनो न देशपरिच्छिन्नं फलं युज्यत इति। अत्रोच्यते-त्रिमात्रेणोंकारेणालम्बनेन परमात्मानमभिध्यायतः फलं ब्रह्मलोकप्राप्तिः, क्रमेण च सम्यग्दर्शनोत्पत्तिरिति क्रममुक्त्यभिप्रायमेतद् भविष्यतीत्यदोषः।।१३।।

।।इति चतुर्थमीक्षतिकर्माधिकरणम्।।

शारीरकन्यायसंग्रहः

५।।दहराधिकरणम्।।सू.१४-२१।।

दहर उत्तरेभ्यः।।१४।। गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च।।१५।। धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः।।१६।। प्रसिद्धेश्च।।१७।। इतरपरामर्शात् स इति चेन्नासंभवात्।।१८।। उपक्रमगताया अपि श्रुतेः लिङ्गानुगृहीतोपसंहारश्रुतिर्बलीयसी, प्रत्ययसंवादात्—इति न्यायेनापहतपाप्मत्वादिलिङ्गानुगृहीतात्मश्रुतिबलेनाकाशश्रुतिर्ब्रह्मपरतया निर्णीता। तथा प्रकृतिप्रत्ययार्थयोः परस्परविरोधे, प्रत्ययार्थस्य प्रकृत्यर्थसापेक्षत्वात्, प्रकृत्यर्थस्य तन्निरपेक्षत्वात्, निरपेक्षमुपादेयं सापेक्षं विहाय—इति न्यायेन 'ब्रह्मणः पुरम्' इत्यत्र स्वस्वामिसंबन्धप्रतिपादकसापेक्षषष्ठ्यर्थं विहाय निरपेक्षब्रह्मशब्दस्य मुख्यार्थोपादानेन जीवपरता निरस्ता, तथा सति भेदे सादृश्ये चोपमानोपमेयभाव इति न्यायेन भूताकाशेनोपमीयमानो दहराकाशो न भूताकाश इत्युक्तम्।

उत्तराच्चेदाविर्भूतस्वरूपस्तु।।१९।। अन्यार्थश्च परामर्शः।।२०।। अल्पश्रुतेरिति चेत्तदुक्तम्।।२१।। लिङ्गस्य श्रुतिलिङ्गाभ्यां बाधो युक्तः, प्राबल्यात्—इति न्यायेन अवस्थात्रयसंबन्धलक्षणं जीवलिङ्गं बाधित्वा "एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्म" इति श्रुतिलिङ्गाभ्यां वाक्यस्य ब्रह्मपरता निर्णीता।

प्रकटार्थविवरणम्

परं चापरं चेति। फलवचनानुसारेणापि परमात्माऽभिध्यातव्य इत्याह—**यथेति।** पादोदर उरगः। पूर्वपक्षमनुभाष्य दूषयति—**यदुक्तमित्यादिना।** विशुद्धब्रह्मात्मैकत्वविज्ञाने हि न देशपरिच्छिन्नं फलम्। उपासने तदपि न विरुध्यत इत्यर्थः। इति चतुर्थमीक्षतिकर्माधिकरणम्।।

भाष्यभावप्रकाशिका

परशब्देन व्यावर्तनादप्येवमित्याह—**परं चेति। त्रिमात्रेणेति।** ओङ्कारोपाधिमदुपासनाद् देशावच्छिन्नं फलं युक्तमित्यर्थः। कथं तर्हि पुरुषमीक्षत इति निर्देश इति? तत्राह—**क्रमेण चेति।** ब्रह्मलोके सम्यग्दर्शनमुत्पद्यत इत्यर्थः।।१३।। इति चतुर्थमीक्षतिकर्माधिकरणम्।

न्यायनिर्णयः

ध्यातव्यमित्याह— **परं चेति।** न केवलमुपक्रमादेवं, किंतु फलोक्तेरपीत्याह— **यथेति।** पादोदरः सर्पः। पूर्वपक्षबीजमनूद्य दूषयति— **अथेत्यादिना।** परिशुद्धब्रह्मैक्यज्ञाने देशपरिच्छिन्नं फलमयुक्तम्। ॐकारोपाधिब्रह्मोपास्तौ तदविरुद्धमित्यर्थः। कथं तर्हि 'पुरुषमीक्षते' इति, तत्राह— **क्रमेणेति।** ब्रह्मलोके सम्यग्दर्शनोत्पत्तौ मोक्षं विवक्षित्वेक्षतिवाक्यमित्यर्थः। एकवाक्यताकाङ्क्ष-प्रकरणानुगृहीतश्रुतिप्रत्यभिज्ञाया देशपरिच्छिन्नफलत्वलिङ्गानुगृहीतप्रत्यभिज्ञातो बलीयस्त्वाद् ध्यातव्यं परमेवेत्युपसंहरति— **अदोष इति।।१३।।** इति चतुर्थमीक्षतिकर्माधिकरणम्।।

५।।दहराधिकरणम्।।सू. १४-२१।।

दहर उत्तरेभ्यः।।१४।।

'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' (छा. उ. ८।१।१) इत्यादिवाक्यं समाम्नायते। तत्र योऽयं दहरे हृदयपुण्डरीके दहर आकाशः श्रुतः, स किं भूताकाशोऽथवा विज्ञानात्माऽथवा परमात्मेति संशय्यते। कुतः संशयः? आकाशब्रह्मपुरशब्दाभ्याम्। आकाशशब्दो ह्ययं भूताकाशे परस्मिंश्च प्रयुज्यमानो दृश्यते। तत्र किं भूताकाश एव दहरः स्यात् किंवा पर इति संशयः। तथा ब्रह्मपुरमिति किं जीवोऽत्र ब्रह्मनामा, तस्येदं पुरं

प्रकटार्थविवरणम्

दहर उत्तरेभ्यः। छान्दोग्यवाक्यं पठति—**अथ यदिदमिति**। ब्रह्मपुरे शरीरे दहरमल्पं पुण्डरीकतुल्यं स्थानम्। पशौ विशस्यमानेऽष्टदलकमलाकारो मांसखण्डः हृदयं प्रसिद्धमेव। [१]सबीजं संशयमाह—**तत्र योऽयमित्यादिना**। [२]पूर्वत्र परपुरुषशब्दस्य ब्रह्मणि मुख्यत्वेन ब्रह्मैवाभिध्यातव्यमभ्यधायि। तथेहाप्याकाशशब्दस्य भूताकाशे रूढत्वात् स एवोपास्य उपदिश्यत इति

भाष्यभावप्रकाशिका

दहर उत्तरेभ्यः।।१४।। दहरम् सूक्ष्मम्। अन्वेषणम् श्रवणमननाभ्यां ज्ञानम्। विज्ञानं ध्यानवशात् साक्षात्कारः, तदिच्छापि [वि]जिज्ञासनम्। अत्र संशयमाह—**तत्रेति**। प्रथममेवं बहिस्संशयो द्रष्टव्यः—किं दहराकाशोऽन्वेष्टव्यः, किं वा तदन्तःस्थमिति। यदाऽऽकाशः तदा भूताकावो जीवो वेत्यादि संशयः। प्रश्नपूर्वकं सन्देहकारणमाह—**कुत इति**। ननु "आकाशस्तल्लिङ्गादि"त्यनेनैव गतमेतत्, सत्यम्, वाक्यशेषलिङ्गात् तदुक्तम्, इह वाक्यशेषलिङ्गान्याकाशपराणि न भवन्ति, किन्तु तदन्तःस्थपराणीति मन्यते पूर्ववादी। ननु ब्रह्मशब्दो जीवे मुख्यया वृत्त्या न वर्तते, नैवम्, पुरसम्बन्धस्य जीव एव संभवादित्याह—**तस्येदमिति**। अथवा

न्यायनिर्णयः

'परात्परं पुरिशयं पुरुषम्' इत्यादिवाक्याद् ध्यातव्यपुरुषनिर्णये परस्य पुरिशयमिति पुरसंबन्धसिद्धेरयमपि पुरसंबन्धी दहराकाशो ब्रह्मेत्याह— **दहर इति**। छान्दोग्यवाक्यमुदाहरति— **अथेति**। भूमविद्यान्तरं विद्यान्तरारम्भार्थोऽथशब्दः। यदिदमिति प्रसिद्धं हृदयं परामृष्टम्। अस्मिन्निति प्रत्यक्षत्वोक्तिः। ब्रह्मपुरं शरीरम्। दहरं सूक्ष्मम्। पुण्डरीकं तदाकारत्वात् प्रकृतं हृदयमेव। तत्र परस्य नित्यसंनिधेर्वेश्मशब्दः। संनिहितं हृदयं सप्तम्या परामृश्य तस्यातिसूक्ष्मस्य परस्य तत्र सदा स्थितिं सूचयन् वेश्मत्वमेव विशदयति— **दहर इति**। व्यवहितमपि हृदयं योग्यत्वात् तच्छब्देनोक्त्वा तदन्तराकाशस्य विचार्यतां ज्ञेयतां च दर्शयति— **तस्मिन्निति**। तस्मिन्निति सप्तम्या हृदयोक्तेस्तदन्तस्थं दहराकाशमन्वेष्यं जिज्ञास्यं च किंवा तस्याः संनिहिततरदहराकाशार्थत्वात् तदन्तस्थं किंचिदन्विष्य ज्ञेयमिति संशयं सूचयति— **तत्रेति**। वाक्यं सप्तम्यर्थः। यदाऽऽकाशोऽन्विष्य ज्ञेयस्तदा प्राप्तं संशयमाह— **स इति**। द्वितीये संशये प्रश्नपूर्वकं हेतुमाह— **कुत इति**। द्वयोरपि पक्षत्रयोपनायकत्वं व्यावर्तयन्नाकाशशब्दाधीनं पक्षद्वयमाह— **आकाशेति**। शब्दान्तरात् पक्षद्वयप्राप्तिमाह— **तथेति**। इतिशब्दः संशयशब्देन संबध्यते। नन्वयमन्यः संशयो न प्रकृतस्तस्यान्यादृशत्वात्,

---

१. अत्राकाशपदं भूताकाशकोटेरुत्थापकम्। ब्रह्मपुरशब्दः जीवकोटेरुत्थापकः, ब्रह्मकोटेस्तु औपसंहारिकमाकाशोपमितत्वादीति द्रष्टव्यम्। (ब्र. वि.) उपपत्तिश्च भाष्ये स्पष्टा।

२. पूर्वं यथा प्रतीकोपासनाया अपि वचनबलेन ब्रह्मलोकप्राप्तिद्वारा मोक्षफलकत्वमुपगतम्, एवमिहापि पूर्वपक्षे जीवस्य भूताकाशस्य वोपास्यत्वेऽपि वचनबलात् सत्यसङ्कल्पादिप्राप्तिः भविष्यतीति सङ्गतिर्द्रष्टव्या (ब्र. वि.)। आकाशस्तल्लिङ्गादित्यधिकरणे अनन्तत्वलिङ्गस्योपक्रमोपसंहार-संस्पर्शित्व-उपपत्ति-फलरूपतात्पर्यलिङ्गोपेतत्वात् तेन श्रुतिबाध आश्रितो युज्यते। अत्र तु न तादृशं लिङ्गमस्ति। अतो न तेन गतार्थता। द्र. ब्र. वि., रत्नप्रभायामपि द्रष्टव्यम्।

शरीरं ब्रह्मपुरम्, अथवा परस्यैव ब्रह्मणः पुरं ब्रह्मपुरमिति। तत्र जीवस्य परस्य वाऽन्यतरस्य पुरस्वामिनो दहराकाशत्वे संशयः। तत्राकाशशब्दस्य भूताकाशे रूढत्वाद् भूताकाश एव दहरशब्द इति प्राप्तम्। तस्य च दहरायतनापेक्षया दहरत्वम्। 'यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः' (छा. उ. ८।१।३) इति च बाह्याभ्यन्तरभावकृतभेदस्योपमानोपमेयभावः, द्यावापृथिव्यादि च तस्मिन्नन्तः समाहितम्, अवकाशात्मनाऽऽकाशस्यैकत्वात्। अथवा जीवो दहर इति प्राप्तम्, ब्रह्मपुरशब्दात्। जीवस्य हीदं पुरं सच्छरीरं ब्रह्मपुरमित्युच्यते। तस्य स्वकर्मणोपार्जितत्वात्। भक्त्या च तस्य ब्रह्मशब्दवाच्यत्वम्।

प्रकटार्थविवरणम्

पूर्वपक्षमाह—**तत्राकाशशब्दस्येति**। कथं भूताकाशस्याल्पत्वम्, कथं वैकस्मिन्नेवोपमानोपमेयभावः[1], कथं वा द्यावापृथिव्यादीनां तत्रात्यल्पेऽवस्थानम्, इत्याशङ्क्य तत्सर्वं क्रमेण संभावयति—**तस्य चेत्यादिना**। "एष आत्मा" इत्यात्मशब्दस्य भूताकाशे असामञ्जस्यात् पक्षान्तरमाह—**अथ वेति**। कया वृत्त्या ब्रह्मशब्दो जीवमाहेत्याशङ्क्याह—**भक्त्या चेति**। बृंहणयोगाद् गौण्या

भाष्यभावप्रकाशिका

ब्रह्मशब्दस्य परस्मिन्मुख्यत्वाद् यथा कथञ्चित् सम्बन्धः कल्पनीय इत्यभिप्रेत्याह—**अथ वा परस्येति**। भवतु यस्य कस्यचित् पुरम्, ततः किं स्यादिति? तदाह—**तत्र जीवस्येति। आकाशशब्दस्येति**। प्रथमश्रुतश्रुतित्वादात्मशब्दश्रुतिस्तदनुरोधेन नेतव्येत्यर्थः। उपासनार्थं दहरत्वं ब्रह्मणो घटते, न त्वाकाशस्येति, तत्राह—**तस्य चेति**। सति भेदे सादृश्ये चोपमानोपमेयभावः, तत् कथमेकस्मिन् संभवेदिति, तत्राह—**यावान् वाऽयमिति**। ननु द्यावापृथिव्यादीनामन्तः समाधानं कारणे ब्रह्मण्यवकल्पते, नाकाश इति, तत्राह—**द्यावेति**। दहरे कथमुपपद्यत इति? तत्राह—**अवकाशात्मनेति**। अपहतपाप्मत्वादि त्वनिन्यनुपादकः[तस्मिन्नित्यानुवादः], सत्यकामत्वादि च उपासनार्थमारोप्यत इत्यभिप्रायः। ननु ब्रह्मशब्देन झटिति परमात्मनि बुद्धिस्थे कथं जीवपरिग्रह इति? तत्राह—**जीवस्य हीति**। जीवस्य कः सम्बन्ध इति? तदाह—**तस्येति**। ब्रह्मशब्दस्तत्र कथमिति? तदाह—**भक्त्या चेति**। चैतन्यं भक्तिः। ननु गौणमुख्ययोर्मुख्यो ग्राह्य इति, तत्राह—**न हीति**। कार्यकारणसम्बन्धस्य साधारणत्वात्,

न्यायनिर्णयः

तत्राह— **तत्रेति**। उक्ते संशये सतीति यावत्। परपुरुषशब्दस्य ब्रह्मणि मुख्यत्वाद् ब्रह्मैव ध्येयमित्युक्तम्। इहाप्याकाशशब्दस्य भूताकाशे रूढेस्तस्यैवोपास्यतेति पूर्वपक्षमाह— **तत्रेति**। दहरवाक्यस्य सोपाधिके ब्रह्मण्यन्वयोक्तौ तत्र प्रवृत्तस्य निरुपाधिकं बुभुत्समानस्य तस्मिन् प्राजापत्यवाक्यान्वयोक्तेः संगतयः। पूर्वपक्षे भूताकाशादिध्यानं, सिद्धान्ते परोपास्तिद्वारा प्रतिपत्तिरिति फलम्। न च 'आकाशस्तल्लिङ्गात्' इत्यनेन गतत्वात्पूर्वपक्षानुत्थानं, तत्र वाक्यशेषस्थलिङ्गानामाकाशविषयत्वात्, प्रकृते तेषां तदन्तस्थविषयत्वेन तदविषयत्वादिति। उपास्त्यर्थं ब्रह्मणो दहरत्वेऽपि भूताकाशस्य तदयोगात् कुतो ग्रहणं तत्राह— **तस्येति**। तद्ध्यानेनापि वाक्यशेषस्थं फलं संपद्यते वाक्यादित्यर्थः। सति भेदे सादृश्ये चोपमानोपमेयभावादेकत्र तदसिद्धिरित्याशङ्क्याह— **यावानिति**। ब्रह्मणि द्यावापृथिव्यादीनामन्तःसमाधानं, कारणत्वात्। तदभावादाकाशे नैवमित्याशङ्क्याह— **द्यावापृथिव्यादीति**। दहरे कथं तत्समाधानं, तत्राह— **अवकाशेति**। अपहतपाप्मत्वादि तस्मिन् नित्यानुवादः। सत्यकामत्वादि ध्यानार्थमध्यस्तमिति भावः। एष आत्मेत्यात्मशब्दसामञ्जस्यार्थं पक्षान्तरमाह— **अथवेति**। ब्रह्मशब्दस्यामुख्यत्वाज्जीवे तच्छब्दात् परस्मिञ्झटिति बुद्धिस्थे कुतो जीवोक्तिरित्याशङ्क्य पुरसंबन्धस्य तत्रैव संभवादित्याह— **जीवस्येति**। तस्यापि पुरेण कः संबन्धः, तत्राह— **तस्येति**। तथापि तस्मिन्नौपाधिके कथं ब्रह्मपदं, तत्राह— **भक्त्येति**। चैतन्यगुणयोगेनेत्यर्थः। गौणमुख्ययोर्मुख्ये संप्रत्ययमाशङ्क्योक्तम्—

---

१. नन्वत्र पूर्वपक्षिणा श्रुतस्योपमानोपमेयभावस्योपपत्त्यर्थम् आन्तरत्वेन बाह्यत्वेन चैकस्मिन्नेवाकाशे भेदः कल्प्यते। स च कल्पितेऽपि भेदे न निर्वहति। तत्र स्वतःसिद्धभेदे सादृश्यनिर्वाहार्थं आन्तरस्याल्पत्वेन बाह्यस्य च महत्त्वेन समानपरिमाणत्वाभावेन सादृश्यायोगात्। न च जीवे इयमनुपपत्तिः। तत्र स्वतःसिद्धभेदे सादृश्यनिर्वाहार्थं मानसत्वमेव। तत्क्रतुन्यायानुसारेण तस्यैव ग्राह्यत्वात्। अधिकं न्या.र.मणौ, ब्र.वि.पृ. ३०३-३०४। स्वरूपग्रहणादिति चेत्? उच्यते। मानसमेवेह महत्त्वं विवक्षितम्। तच्च व्यावहारिकदहरत्वाविरोधि। तदन्तःसमाहितानां द्यावापृथिव्यादीनामपि

न हि परस्य ब्रह्मणः शरीरेण स्वस्वामिभावः संबन्धोऽस्ति। तत्र पुरस्वामिनः पुरैकदेशेऽवस्थानं दृष्टम्, यथा राज्ञः। मनउपाधिकश्च जीवः, मनश्च प्रायेण हृदये प्रतिष्ठितमित्यतो जीवस्यैवेदं हृदयेऽन्तरवस्थानं स्यात्। दहरत्वमपि तस्यैव आराग्रोपमितत्वादवकल्पते। आकाशोपमितत्वादि च ब्रह्माभेदविवक्षया भविष्यति। न चात्र दहरस्याकाशस्यान्वेष्टव्यत्वं विजिज्ञासितव्यत्वं च श्रूयते। 'तस्मिन् यदन्तः' इति परविशेषणत्वेनोपादानादिति।

अत उत्तरं ब्रूमः–परमेश्वर एवात्र दहराकाशो भवितुमर्हति, न भूताकाशो जीवो वा। कस्मात्? उत्तरेभ्यो

प्रकटार्थविवरणम्

वृत्त्येत्यर्थः[1]। मुख्यार्थत्यागे कारणमाह— **न हीति**। ननु पादाद्यवयवेषु युगपद्वेदनानुसन्धानान्न जीवस्य हृदयमात्रवर्तित्वमित्याशङ्क्याह— **तत्र पुरस्वामिन इति**। सकलकलेवराभिमानिनोऽपि प्रायेण हृदयेऽवस्थानमित्यर्थः। इतश्च जीव एव हृदयेऽवस्थित इत्याह— **मनउपाधिकश्चेति**। "आराग्रमात्रो ह्यवरोऽपि दृष्टः" इति श्रुतेः जीवस्याल्पत्ववचनमपि मुख्यमित्याह— **दहरत्वमपीति**। यच्चाकाशोपमितत्वं[2] द्यावापृथिव्यादीनामन्तः समाहितत्वादिकं च, तत्सर्वं ब्रह्मभावापेक्षया भविष्यतीत्याह— **आकाशोपमितत्वादि चेति**। किं च पूर्वं दहरस्य विज्ञेयत्वमङ्गीकृत्य जीवो दहर इत्युक्तम्। इदानीं न दहरस्य विज्ञेयत्वं विज्ञेयविशेषणत्वेनोपादानादित्याह— **न चात्र दहरस्येति**।

भाष्यभावप्रकाशिका

[अ] साधारण्येन व्यपदेशो भवतीति न्यायात्, जीवधर्मोपार्जितं तेन व्यपदेश्यम्; [न] ब्रह्मणेत्यर्थः। ननु जीवपुरमस्तु शरीरम्, पुण्डरीकदहरगेहता तु ब्रह्मणोऽस्तु, राज्ञः पुरे मैत्रस्य गृहवदिति, अत आह— **तत्र पुरेति**। वेश्मन आधारस्याधेयापेक्षायां पुरस्वामिनः प्रकृतत्वात् तेनाधेयेन सम्बन्धान्नाधेयान्तरापेक्षेत्यर्थः। ननु जीवस्य शरीरेण विशेषसम्बन्धेऽपि हृदयेन न विशेषसम्बन्धोऽस्ति, अत्र [अतः] कथं तस्यैव तत् सद्मेति? अत आह— **मनउपाधिक इति**। मनसोऽपि चञ्चलत्वाद् हृदयस्थानेनासाधारण्यमयुक्तमिति, अत्राह— **प्रायेणेति**। ननु सर्वगतस्य कथं दहरत्वमिति, अत्राह— **दहरत्वमपीति**। तर्हि दहरत्वादेवाकाशोपमानमयुक्तमिति, अत्राह— **आकाशेति**। यद्भावापेक्षयाऽऽकाशोपमितत्वादि, तदेव ब्रह्माकाशमस्त्विति, तत्राह— **न चात्रेति**। अथवा भूताकाश एव दहरोऽस्तु, तथाप्यदोष इति, अत्राह— **न चात्रेति**। अन्वेष्टव्यस्यैव ब्रह्मत्वाद् दहरस्य चान्वेष्टव्यत्वाकथनादसौ जीवो भूताकाशो वेत्यर्थः।

न्यायनिर्णयः

न हीति। कार्यकारणसंबन्धस्य साधारण्यादसाधारण्येन व्यपदेशाज्जीवकर्मार्जितं शरीरं तेनैव व्यपदेश्यमित्यर्थः। तस्य जीवपुरत्वेऽपि राजपुरे मैत्रसद्मवत् पुण्डरीकदहरगेहता ब्रह्मणोऽस्तु, तत्राह— **तत्रेति**। वेश्मनः खल्वाधारस्याधेयापेक्षायां पुरस्वामिनाऽऽधेयेन संबन्धान्नान्यापेक्षेत्यर्थः। जीवस्य देहेन विशेषसंबन्धेऽपि हृदयेन तदभावात् कथं तस्यैव तद्वेश्मता, तत्राह— **मन इति**। तस्यापि चञ्चलत्वान्न हृदयेनासाधारण्यं, तत्राह— **मनश्चेति**। तथापि तस्य सर्वगतस्य कुतो दहरत्वं, तत्राह— **दहरत्वमिति**। दहरत्वादेव तर्हि नाकाशोपमितत्वादीत्याशङ्क्याह— **आकाशेति**। यद्भावमपेक्ष्यैतत् कल्प्यते तदेव ब्रह्माकाशशब्दं लाघवादित्याशङ्क्याऽऽद्ये संशये पूर्वपक्षमाह— **न चेति**। परविशेषणत्वेनेत्यत्र परो दहराकाशः। **उपादानात्** तस्मिन्निति सप्तम्यन्ततच्छब्दस्येति शेषः। यद्वा परशब्दोऽन्तस्थवस्तुविषयस्तद्विशेषणत्वेन तस्मिन्निति दहराकाशस्योक्तेरित्यर्थः। तच्छब्दस्य सन्निकृष्टान्वययोगे विप्रकृष्टान्वयस्य जघन्यत्वादाकाशान्तर्गतं ध्येयमिति भावः। भूताकाशस्य जीवस्य वा दहराकाशान्तस्थस्य वा ध्यानार्थं दहरवाक्यमुपसंहर्तुमितिशब्दः।

सिद्धान्तयति— **अत इति**। तत्र प्रतिज्ञां व्याचष्टे— **परमेश्वर इति**। प्रतिज्ञायां प्रश्नद्वारा हेतूनाह— **कस्मादिति**। तानेव

---

१. 'बृंहणयोगात् गौण्या वृत्त्या वेत्यर्थः' इति पाठः स्यात्। अत एव 'बृंहयति' इति योगार्थमादाय जीवे यौगिको ब्रह्मशब्दः, चैतन्यगुणयोगात् गौणो वेति भामती। मुख्यार्थाद् रूढ्यर्थाद् भज्यते प्रच्याव्यते इति भक्तिरिति व्युत्पत्त्या भाक्तत्वस्योभयत्र साम्यात्। 'भक्त्या च तस्य ब्रह्मशब्दवाच्यत्व'मिति भाष्ये वाच्यत्वं गम्यत्वम्। भाक्तत्वेऽभिधेयत्वविरोधात्। द्र. कल्पतरुः २९१।

२. अस्मिन् पक्षे जीवे आकाशपदप्रयोगः आकाशगतारूपत्वादिगुणयोगेन गौण्येति बोध्यम्। द्र. भामती

वाक्यशेषगतेभ्यो हेतुभ्यः। तथाहि– अन्वेष्टव्यतयाऽभिहितस्य दहरस्याकाशस्य 'तं चेद् ब्रूयुः' इत्युपक्रम्य 'किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यम्' इत्येवमाक्षेपपूर्वकं प्रतिसमाधानवचनं भवति– 'स ब्रूयाद् यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते' (छा. उ. ८।१।३) इत्यादि। तत्र पुण्डरीकदहरत्वेन प्राप्तदहरत्वस्याकाशस्य प्रसिद्धाकाशौपम्येन दहरत्वं निवर्तयन् भूताकाशत्वं दहरस्याकाशस्य निवर्तयतीति गम्यते। यद्यप्याकाशशब्दो भूताकाशे रूढस्तथापि तेनैव तस्योपमा नोपपद्यत इति भूताकाशशङ्का निवर्तिता भवति। नन्वेकस्याप्याकाशस्य बाह्याभ्यन्तरत्व-कल्पितेन भेदेनोपमानोपमेयभावः संभवतीत्युक्तम्। नैवं संभवति। अगतिका हीयं गतिः, यत् काल्पनिकभेदाश्रयणम्। अपि च कल्पयित्वाऽपि भेदमुपमानोपमेयभावं वर्णयतः परिच्छिन्नत्वादभ्यन्तराकाशस्य

प्रकटार्थविवरणम्

सिद्धान्तसूत्रं योजयति—**परमेश्वर एवेत्यादिना**। तमाचार्यं प्रति यदि शिष्या ब्रूयुः—पुण्डरीकमेव तावदल्पम्, अल्पतरश्च तद्गताकाशः; अतः किं तदत्रात्यल्पे विद्यते यच्छ्रुत्युपपत्तिभ्यामन्वेषणीयम्; यद्वाव किल साक्षात्करणीयम्—इत्यल्पत्वदोषेण दहरस्याविज्ञेयत्वाक्षेपपूर्वकं श्रुतेः प्रतिसमाधानवचनं भवति–स आचार्यो ब्रूयादित्यादि। प्रतिवचनस्य विवक्षितमर्थमाह—**तत्रेति**। ननु आकाशशब्दस्य भूताकाशे रूढत्वात् कथं तद्व्यावृत्तिरित्याशङ्क्याह—**यद्यपीति**। सति भेदे गोगवययोरुपमानोपमेयभावः सिद्धः। एकस्मिन्नेव तूपमानोमपेयभावः "रामरावणयोर्युद्धं रामरावणयोरिव" इत्यगतिका गतिरित्यर्थः[1]। सादृश्ये सत्युपमानोपमेयभावो

भाष्यभावप्रकाशिका

उत्तरेभ्य इत्यस्य व्याख्या—**वाक्यशेषेति**। भवतु, तथापि प्रकृते किमायातमिति? तदाह—**तत्र पुण्डरीकेति**। कयाऽनुपपत्त्येति? तदाह—**यद्यपीति**। "रामरावणयोर्युद्धं रामरावणयोरिवे" त्यादौ गत्यन्तराभावादारोपितभेदेनोपमा, इह तु सत्यां गतौ न युक्तेत्यर्थः। **अपि चेति**। हृत्पुण्डरीकवेष्टनाकृतदहरत्वनिवृत्तिपरत्वे च वाक्यस्यावकाशात्मनैकत्वादुपमानोपमेयभावोऽपि

न्यायनिर्णयः

विवृणोति— **तथा हीति**। विहितस्य[2] 'तदन्वेष्टव्य'मित्यादिनेति शेषः। आकाशस्याक्षेपपूर्वकमिति संबन्धः। तमाचार्यं प्रति शिष्या यदि ब्रूयुरित्याक्षेपमुपक्रम्यावतार्येति योजना। आक्षेपप्रकारमाह— **किं तदिति**। पुण्डरीकमेव तावदल्पम्, अल्पतरं च तदन्तर्गतमाकाशं, तथा च किं तदत्रात्यल्पेऽस्ति यच्छ्रुतियुक्तिभ्यामन्वेष्यं यद्वाव साक्षात्कर्तव्यमित्यल्पतादोषेण दहरस्य ज्ञेयत्वमाक्षिप्य समाहितमित्यर्थः। तदेव दर्शयति— **स इति**। आचार्यः सर्वनामार्थः। अस्मिन्निति हार्दाकाशोक्तिः। 'उभावग्निश्च वायुश्च' इत्यादिसंग्रहार्थमादिपदम्। तस्य विवक्षितमर्थमाह— **तत्रेति**। निवर्तयन्नित्याचार्यो गृह्यते। आकाशशब्दस्य भूताकाशे रूढत्वात् कयाऽनुपपत्त्या तन्निवर्तनं, तत्राह— **यद्यपीति**। परोक्तिं स्मारयित्वा निरस्यति— **नन्वित्यादिना**। गत्यन्तराभावादारोपित-भेदेनोपमानस्य क्वाचित्कत्वेऽपि सत्यां गतौ तदसिद्धिरित्यर्थः। सादृश्ये सत्युपमानोपमेयत्वं दृष्टम्। न चोपाधिपरिच्छिन्नान्तराकाशस्य महत्परिमाणेन बाह्याकाशेन सादृश्यमित्याह— **अपि चेति**। तर्हि परस्यापि भूताकाशो नोपमानमतुल्यपरिमाणत्वादित्याह—

---

१. अत्र ह्यस्तनत्वाद्यतनत्वादिना युद्धे भेदमारोप्य उपमा योज्या। अथवाऽभेदे निबध्यमानस्यौपम्यस्यानन्वयात् अन्वर्थनामाऽनन्वयोऽत्रालङ्कारः। स च निरुपमत्वे पर्यवस्यति। यथा स्वमहिमप्रतिष्ठत्वमाधाररहितत्वे, यथा वा 'स्वयंदासास्तपस्विनः' इति दासराहित्ये पर्यवस्यति। यदि तु अभेदेऽपि परस्परव्यावर्तकविशेषणवत्त्वे उपमानं संभवति। यथा "उपाददे तस्य सहस्ररश्मिः त्वष्ट्रा नवं निर्मितमातपत्रम्। स तद्दुकूलादविदूरमौलिः बभौ पतद्गङ्ग इवोत्तमाङ्गे" (कु.सं. ७-४१) इत्यत्रोपमानस्य शिवस्यैवोपमेयत्वेऽपि उत्तमाङ्गपतद्गङ्गप्रवाहत्व-छत्रदुकूलसंनिकृष्टमौलित्वरूपविशेषणभेदकृतभेदसत्त्वात् सादृश्यानन्वयाभावात् उपमाप्रभेदः। अस्ति चात्रापि 'एषः' इति 'अन्तर्हृदये' इति च विशेषणमिति विभाव्यते, तदापि नान्वेत्येवोपमेत्याह—अपि चेति भाष्येण। द्र. परिमलः।

२. 'अन्वेष्टव्यतया विहितस्य' इति भाष्ये पाठान्तरम्।

न बाह्याकाशपरिमाणत्वमुपपद्येत। ननु परमेश्वरस्यापि 'ज्यायानाकाशात्' (शत. ब्रा. १०।६।३।२) इति श्रुत्यन्तरान्नैवाकाशपरिमाणत्वमुपपद्यते। नैषः दोषः। पुण्डरीकवेष्टनप्राप्तदहरत्वनिवृत्तिपरत्वाद् वाक्यस्य न तावत्त्वप्रतिपादनपरत्वम्। उभयप्रतिपादने हि वाक्यं भिद्येत[1]। न च कल्पितभेदे पुण्डरीकवेष्टित आकाशैकदेशे द्यावापृथिव्यादीनामन्तः समाधानमुपपद्यते। 'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः' (छा. उ. ८।१।५) इति चात्मत्वापहतपाप्मत्वादयश्च गुणा न भूताकाशे संभवन्ति। यद्यप्यात्मशब्दो जीवे संभवति तथापीतरेभ्यः कारणेभ्यो जीवाशङ्काऽपि निवर्तिता भवति। न ह्युपाधिपरिच्छिन्नस्याराग्रोपमितस्य जीवस्य पुण्डरीकवेष्टनकृतं दहरत्वं शक्यं निवर्तयितुम्। ब्रह्माभेदविवक्षया जीवस्य सर्वगतत्वादि विवक्ष्येतेति चेत्, यदात्मतया जीवस्य सर्वगतत्वादि विवक्ष्येत तस्यैव ब्रह्मणः साक्षात् सर्वगतत्वादि विवक्ष्यतामिति युक्तम्। यदप्युक्तं ब्रह्मपुरमिति जीवेन पुरस्योपलक्षितत्वाद्

प्रकटार्थविवरणम्

दृष्टः। उपाधिपरिच्छिन्नस्य च महत्परिमाणेन न सादृश्यमस्तीत्याह— **अपि चेति**। तर्हि परमेश्वरस्यापि न भूताकाश उपमानम्, समानपरिमाणत्वाभावादित्याह— **ननु परमेश्वरस्यापीति**। न भूताकाशसमानपरिमाणत्वप्रतिपादनपरं वाक्यम्, किं तु शङ्कितात्पपरिमाणत्वव्यावृत्तिपरमित्याह— **नैष दोष इति**। उभयत्र किं न तात्पर्यमित्याशङ्क्याह— **उभयेति**। भूताकाशापरिग्रहे लिङ्गान्तरमाह— **न च कल्पितेति**। विगता जिघत्सा भक्षणेच्छा यस्य स विजिघत्सः। आकाशोपमितत्वादिकारणेभ्योऽपि भूताकाशं निरस्य जीवनिराकरणेऽपि योजयति— **यद्यपीत्यादिना**। कल्पनालाघवेन परिहरति— **यदात्मतयेति**। ब्रह्मशब्दस्य परब्रह्मण्येव

भाष्यभावप्रकाशिका

न युक्त इति भावः। अपि च सर्व एवोत्तरहेतवो दहराकाशस्य भूताकाशत्वं विघ्नन्तीत्याह— **न च कल्पितेति**। **न भूताकाशे संभवन्तीति**। अपहतपाप्मत्वादेर्नित्यानुवादत्वमगतिका गतिः, सत्यकामत्वादीनां च सति संभवे समारोपणमयुक्तम्। उपक्रमगताकाशश्रुतेश्चोपसंहारगतात्मश्रुतिरपहतपाप्मत्वादिलिङ्गानुगृहीता बलीयसी; प्रत्ययसंवादादिति न्यायादाकाशशब्दं ब्रह्मेति

न्यायनिर्णयः

नन्विति। नेदं वाक्यं भूताकाशतुल्यत्वविषयं किंतु शङ्कितात्पत्वव्यावृत्तिपरमित्याह— **नेति**। निवृत्तौ तावत्त्वे च वाक्यतात्पर्यमाशङ्क्योक्तम्— **उभयेति**। न च संभवत्येकवाक्यत्वे वाक्यभेदः। न च तावत्त्वमेव प्रतिपाद्यम्, अफलत्वात्। न च शङ्कितदहरत्वनिवृत्तिरेव फलम्, तत्रैव वाक्यतात्पर्यप्रसङ्गात्। न च साक्षादेव तत्सिद्धावार्थिकत्वकल्पना युक्तेति भावः। भूताकाशाग्रहे लिङ्गान्तरमाह— **न चेति**। तत्रैव हेत्वन्तरम्— **एष इति**। विगता जिघत्सा खादितुमिच्छा यस्य स तथा। चकारादुक्तं सर्वमाकाशस्यैकदेशे नोपपद्यत इति संबन्धः। तदेव स्पष्टयति— **आत्मत्वेति**। न तावद् भूताकाशे संभवत्यात्मत्वम्, अचैतन्यात्। न चापहतपाप्मत्वादेर्नित्यानुवादत्वम्। नापि सत्यकामत्वादेरारोपितत्वम्। अगतिका हीयं गतिः। उपक्रमस्थाकाशश्रुतेश्चोपसंहारस्थात्मश्रुतिरुक्तलिङ्गसंगता बलीयसी, प्रत्ययसंवादादित्याकाशशब्दं ब्रह्मैवेति भावः। आकाशोपमितत्वादिहेतुभ्यो भूताकाशं निरस्य तद्बलादेव जीवमपि निरस्यति— **यद्यपीति**। ननु कथमाकाशोपमितत्वं जीवशङ्कानिवर्तकं, तस्यापि तदुपमितत्वेन शङ्कितदहरत्वनिवृत्त्योपमानपर्यवसानात्, तत्राह— **न हीति**। तादात्म्येन शङ्कते— **ब्रह्मेति**। आदिपदं सर्वाधारत्वादिसंग्रहार्थम्। लाघवेन प्रत्याह— **यदिति**। ब्रह्मपुरशब्दाज्जीवोपादानमुक्तमनुवदति— **यदपीति**।

---

१. तात्पर्यभेदात् गौरवलक्षणो वाक्यभेदः स्यादिति भावः।

राज्ञ इव जीवस्यैवेदं पुरस्वामिनः पुरैकदेशवर्तित्वमस्त्विति। अत्र ब्रूमः–परस्यैवेदं ब्रह्मणः पुरं सच्छरीरं ब्रह्मपुरमित्युच्यते, ब्रह्मशब्दस्य तस्मिन् मुख्यत्वात्। तस्याप्यस्ति पुरेणानेन संबन्धः, उपलब्ध्यधिष्ठानत्वात्। 'स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते' (प्र. उ. ५।५) 'स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः' (बृ. उ. २।५।१८) इत्यादिश्रुतिभ्यः। अथवा जीवपुर एवास्मिन् ब्रह्म संनिहितमुपलक्ष्यते। यथा शालग्रामे विष्णुः संनिहित इति, तद्वत्। 'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते' (छा. उ. ८।१।६) इति च कर्मणामन्तवत्फलत्वमुक्त्वा 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति' इति प्रकृतदहराकाशविज्ञानस्यानन्तफलत्वं वदन् परमात्मत्वमस्य सूचयति। यदप्येतदुक्तं न दहरस्याकाशस्यान्वेष्टव्यत्वं विजिज्ञासितव्यत्वं च श्रुतम्,

प्रकटार्थविवरणम्

मुख्यत्वात् प्रथमश्रुतनिरपेक्षब्रह्मप्रातिपादिकार्थानुगुण्येन चरमश्रुतसापेक्षविभक्त्यर्थो नेतव्य इत्यभिप्रेत्याह—**परस्यैवेदं ब्रह्मण इति**। कस्तर्हि संबन्धःषष्ठ्या आलम्बनमित्याशङ्क्य व्यङ्ग्यव्यञ्जकभाव इत्याह—**तस्याप्यस्तीति**। यदि जीवोऽन्नाद्यभ्यवहारेण शरीरं बृंहयति वर्धयति इति मुख्य एव तस्मिन् ब्रह्मशब्दः; स्वकर्मोपार्जितत्वाच्च तस्यासाधारणं शरीरमित्यभिमानः, तत्राह—**अथवेति**। किं च दहरविज्ञानस्यानन्तफलश्रवणादपि दहरः परमात्मेत्याह—**तद्यथेत्यादिना**। इह जीवत्येव देहे दहरमात्मानं तत्समाहितांश्च सत्यकामादीन् गुणान् शास्त्राचार्योपदेशमनुविद्य अनुभूय ये व्रजन्ति परलोकं तेषां सर्वेषु लोकेषु कामचरणं स्वेच्छागमनान्तमप्रतिहतमैश्वर्यं भवतीत्यर्थः। नैतद् दहराकाशस्य[शविज्ञानस्य] फलं दहरस्याविज्ञेयत्वादित्याह—**यदप्येतदुक्तमिति**। उत्तरत्राकाशस्य

भाष्यभावप्रकाशिका

भावः। जीवोऽपि न दहराकाश इत्याह—**यद्यपीति। अत्र ब्रूम इति**। अयमर्थः—ब्रह्मणः पुरमित्यत्र स्वस्वामिसम्बन्धप्रतिपादकषष्ठ्यर्थं विहाय ब्रह्मशब्दस्य मुख्यार्थ उपादेयः; प्रत्ययार्थस्य प्रकृत्यर्थसापेक्षतया दुर्बलत्वादिति। ननु ब्रह्मपरिग्रहे प्रत्ययार्थस्य कथञ्चिदालम्बनं प्रसज्यते, जीवपरिग्रहे तु प्रकृत्यर्थस्य कथञ्चिदालम्बनं स्यादिति शङ्कायामाह—**तस्याप्यस्तीति**। असाधारणसम्बन्धोऽप्यस्तीत्यर्थः। **अथवा जीवपुर इति**। उत्तरहेतुभ्यः प्रकृताधेयेन सम्बन्धासंभवे वेश्मान्येनापि सम्बध्यते; यथा राज्ञः पुरे मैत्रस्य सद्म, एवमित्यर्थः। अनन्तफलश्रवणादपि ब्रह्मैवेति वक्तुं कर्मफलनित्यतानिराकरणद्वारेणाभिधानमनन्तफलत्वं च दर्शयतीत्याह—**तद्यथेति**। अनुविद्य श्रवणमननमनु ब्रह्मानुभूय। चरणं चारः, कामेषु चरणं कामचारः। ननु दहराकाशस्यान्वेष्टव्यत्वे

न्यायनिर्णयः

प्रथमश्रुतब्रह्मशब्देन चरमश्रुतविभक्त्यर्थो नेतव्य इत्याह— **अत्रेति**। ब्रह्मणः पुरमित्यत्र स्वस्वामित्वं षष्ठ्यर्थं हित्वा ब्रह्मशब्दो मुख्यार्थः स्वीकर्तव्यः, प्रत्ययार्थस्य प्रकृत्यर्थापेक्षस्य दौर्बल्यादित्यर्थः। ननु ब्रह्मपक्षे प्रत्ययस्य निरालम्बनत्वमेव। जीवपक्षे प्रकृत्यालम्बनं कथंचिदस्ति, तदर्थस्य ब्रह्माभेदात्, तत्राह— **तस्येति**। ब्रह्मणः शरीरमुपलब्ध्यधिष्ठानमित्यत्र मानमाह— **स इति**। सर्वासु पूर्ष्विति व्यपदिश्य पुरिशय इति विशेषणं हृदयसंबन्धविवक्षया नेयम्। आदिपदं 'यो वेद निहितं गुहायाम्' इत्यादिसंग्रहार्थम्। ननु शारीरः शरीरमन्नपानाभ्यवहरणेन बृंहयतीति तस्मिन्मुख्यं ब्रह्मत्वं, तस्य च स्वकर्मार्जितत्वादसाधारणं शरीरं, तथा च प्रकृतिप्रत्ययौ जीवे मुख्यविति, तत्राह— **अथवेति**। शारीरसंबद्धमेव वेश्मोत्तरहेतुभ्यो ब्रह्मणाऽपि संबध्यते। दृष्टं हि राजपुरे मैत्रसद्मेत्यर्थः। किंच कर्मफलनित्यतानिवृत्त्या दहरज्ञानस्यानन्तफलत्वश्रुतेर्दहरस्य परत्वमित्याह— **तद्यथेति**। कर्मणस्तत्फलाच्चोपेक्षानन्तर्यमथशब्दार्थः। इह जीवत्येव देहे दहरमात्मानं तदाश्रितांश्च सत्यकामादिगुणानाचार्योपदेशमनुविद्यानुभूय ये परलोकं व्रजन्ति तेषां सर्वेषु लोकेषु कामचारः स्वेच्छया चरणमप्रतिहतमनन्तमैश्वर्यमित्यर्थः। श्रुतितात्पर्यमाह— **प्रकृतेति**। वदन्नित्याचार्योक्तेदो वोक्तः। दहराकाशस्यान्वेष्यत्वादिसिद्धौ तत्र विचारः। न तु तदस्ति, 'तस्मिन्यदन्तः' इत्यन्तःस्थविशेषणत्वादन्वेषणादेरिति,

परविशेषणत्वेनोपादानादिति। अत्र ब्रूमः– यद्याकाशो नान्वेष्टव्यत्वेनोक्तः स्यात्, 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः' (छा. उ. ८।१।३) इत्याद्याकाशस्वरूपप्रदर्शनं नोपयुज्येत। नन्वेतदप्यन्तर्वर्तिवस्तुसद्भावप्रदर्शनायैव प्रदर्श्यते; 'तं चेद् ब्रूयुर्यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यम्' इत्याक्षिप्य परिहारावसर आकाशौपम्योपक्रमेण द्यावापृथिव्यादीनामन्तःसमाहितत्वदर्शनात्। नैतदेवम्। एवं हि सति यदन्तःसमाहितं द्यावापृथिव्यादि तदन्वेष्टव्यं विजिज्ञासितव्यं चोक्तं स्यात्। तत्र वाक्यशेषो नोपपद्येत। 'अस्मिन् कामाः समाहिताः, एष आत्माऽपहतपाप्मा' इति हि प्रकृतं द्यावापृथिव्यादिसमाधानाधारमाकाशमाकृष्य 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्' इति समुच्चयार्थेन चशब्देनात्मानं कामाधारमाश्रितांश्च कामान् विज्ञेयान्

प्रकटार्थविवरणम्

स्वरूपप्रतिपादनान्यथानुपपत्त्या तस्य ज्ञेयत्वमन्तः समाहितैः सह विवक्षितमित्याह—**अत्र ब्रूम इत्यादिना**। अन्यथाऽप्युपपत्तिमाह—**नन्वेतदपीति**। यथा "वेतसशाखयाऽवकाभिश्चाग्निं विकर्षति"[1] इत्यत्र "आपो वै शान्ताः" इत्याश्रयभूताप्स्तुत्या वेतसशाखावके स्तूयेते; तथाऽऽधारस्तुत्या आधेयसंस्तवो विवक्षित इति भावः। तर्हि यत् स्तूयते तद्विधीयत इति न्यायादाधारस्यैवाधेयत्वं[2] प्रसज्येतेत्याह—**नैतदेवमिति**। तदा किं दूषणमित्यत आह—**तत्रेति**। वाक्यशेषे वा किं दर्शितं येन तस्यानुपपत्तिरित्याशङ्क्याह—**अस्मिन् कामा इति**। यस्मात् प्रकृतपरामर्शकेन सर्वनाम्नाऽऽकाशं परामृश्य सकलकामाधारत्वमात्मत्वं चोक्त्वा ज्ञेयत्वमुपसंहृतम्,

भाष्यभावप्रकाशिका

सिद्धे तत्र विचारो युक्तः, न तु तदस्ति, "तस्मिन् यदन्त"रित्यन्तःस्थविशेषणत्वादित्युक्तमनुभाषते—**यदपीति**। **कुत एतदिति**। तत्राह—**तं चेदिति**। "किं तदत्रे"त्याक्षेपात् "उभे अस्मिन्नि" ति चान्तस्थवस्तुकथनेन समाधानाच्चाधारत्वमेवास्येत्यर्थः। अस्तु को दोष इति? अत्राह—**तत्र वाक्येति**। तत्र दहराकाशस्य प्रकृतस्यैतच्छब्देन परामर्शात्तद्वेदनस्येदं फलं श्रूयते। अतः फलवत्त्वात् तदेवान्वेष्टव्यम्। ननु एतच्छब्देनाकाशाकर्षणमयुक्तम्; द्यावापृथिवीभ्यां व्यवहितत्वात्, मैवम्, एकवचनान्तमस्मिन्नेष इति च वदंस्तद्वे [देव] परामृष्टुमर्हतीत्यर्थः। ननु सत्यकामविषयज्ञानस्यैतत् फलम्; तदनन्तरनिर्देशात्, न तु दहरात्मविज्ञानस्येति, अत आह—**समुच्चयार्थेनेति**। अतः "तस्मिन् यदन्तः" इत्यत्र तच्छब्दोऽनन्तरमप्याकाशमतिलङ्घ्य हृत्पुण्डरीकं परामृशति। तस्मिन् हृदयपुण्डरीके यदन्तराकाशम्, तदन्वेष्टव्यमित्यभिप्रायः। ननु एतच्छब्दस्य संनिहितपरामर्शकत्वाज्जीवात्मनश्च सर्वान् प्रति

न्यायनिर्णयः

तत्राह— **यदपीति**। उत्तरत्राकाशस्वरूपप्रतिपादनानुपपत्त्या तस्य ज्ञेयत्वमन्तःसमाहितैः सहेष्टमित्याह— **अत्रेति**। तत्प्रतिपादनमन्यथोपपन्नमिति शङ्कते— **नन्विति**। कथमेतदवगम्यते, तत्राह— **तमिति**। 'किं तदत्र' इत्याक्षेपात् 'उभे अस्मिन्' इति चान्तःस्थवस्तूक्त्या समाधानादाधारत्वमेवाकाशस्येत्यर्थः। तस्याधारमात्रत्वविवक्षायामाधेयस्यैव ध्येयत्वं स्यादित्याह— **नैतदिति**। अस्तु को दोषः, तत्राह— **तत्रेति**। दहराकाशस्य प्रकृतस्यैतच्छब्देन परामर्शात् तद्वेदनस्य फलवत्त्वश्रुतेस्तदेव ध्येयम्। न चैतच्छब्देन द्यावापृथिवीभ्यां व्यवधानान्नाकाशाकर्षणम्, 'अस्मिन्' 'एषः' इति चैकवचनात् तस्यैव परामर्शयोग्यत्वादित्यर्थः। सत्यकामवेदनस्यैतत्फलं, तदानन्तर्यात्, न दहराकाशबुद्धेरित्याशङ्क्याह— **समुच्चयेति**। 'संदिग्धस्य वाक्यशेषान्निर्णयः' इति

---

१. अग्निचयने इदं वाक्यं श्रूयते। तत्र वेतसशाखा प्रसिद्धा, अवकाः शैवालाः। अग्निः स्थण्डिलः। तस्य विकर्षणं संस्कारः। तत्साधनतया वेतसशाखावके अत्र विधीयेते। तत्संनिधौ च 'आपो वै शान्ताः, शान्ताभिरेवास्य शुचं शमयति' इति अपां स्तुतिः गम्यते। परन्तु विध्यन्वयाभावात् न तत्रैव तत्पर्यवसानम्। किन्तु अपां स्तुत्या तज्जन्यानां वेतसावकानां स्तुतौ तात्पर्यमिति।

२. 'तदाधारस्यैव ध्येयत्वम्' इति स्यात्। सः आकाशः आधारो यस्य द्यावापृथिव्यादेः तस्येत्यर्थः।

वाक्यशेषो दर्शयति। तस्माद् वाक्योपक्रमेऽपि दहर एवाकाशो हृदयपुण्डरीकाधिष्ठानः सहान्तःस्थैः समाहितैः पृथिव्यादिभिः सत्यैश्च कामैर्विज्ञेय उक्त इति गम्यते। स चोक्तेभ्यो हेतुभ्यः परमेश्वर इति।।१४।।

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च।।१५।।

दहरः परमेश्वर उत्तरेभ्यो हेतुभ्य इत्युक्तम्। त एवोत्तरे हेतव इदानीं प्रपञ्च्यन्ते। इतश्च परमेश्वर एव दहरः, यस्माद् दहरवाक्यशेषे परमेश्वरस्यैव प्रतिपादकौ गतिशब्दौ भवतः—'इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्ति' (छा. उ. ८।३।२) इति। तत्र प्रकृतं दहरं ब्रह्मलोकशब्देनाभिधाय तद्विषया गतिः प्रजाशब्दवाच्यानां जीवानामभिधीयमाना दहरस्य ब्रह्मतां गमयति। तथा ह्यहरहर्जीवानां सुषुप्तावस्थायां ब्रह्मविषयं गमनं दृष्टं श्रुत्यन्तरे—'सता सोम्य तदा संपन्नो भवति' (छा. उ. ६।८।१)

प्रकटार्थविवरणम्

तस्मादित्युपसंहारः। तस्मिन् दहराकाशे यदन्तःसमाहितं तत् साधारमन्वेष्टव्यमिति श्रुतेर्योजना। पुरप्रवेशमन्तरेण तन्मन्दिरभ्रमणासंभववत् दहराकाशान्वेषणमन्तरेण तत्समाहितान्वेषणासंभवात् दहरान्वेषणमवश्यंभावीति भावः।

गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च। उत्तरसूत्रसन्दर्भस्य महासङ्गतिमाह—**दहरः परमेश्वर इति।** समनन्तरसङ्गतिमाह—**इतश्चेति।** गतिशब्दयोर्विवक्षितमर्थमाह—**तत्र प्रकृतमिति।** सुषुप्ते जीवानां दहरे गमनमस्तु, एतच्छब्दपरामर्शात्, तथापि ब्रह्मत्वे किमायातमित्याशङ्क्य "तथाहि दृष्टम्" इत्यवतारयति—**तथा ह्यहरहरिति।** ब्रह्मवित्प्रसिद्धिं चाह—**लोकेऽपीति।** गतिसामर्थ्यं

भाष्यभावप्रकाशिका

संनिहिततरत्वाज्जीवात्मैवेहोच्यते, समुच्चयश्चोपपद्यते, मैवम्, विजातीयप्रत्यक्षादिप्रमाणोपस्थापितात् सजातीयश्रुतिप्रमाणोपस्थापित-दहराकाशस्य परामर्शो युक्तः बुद्धिलाघवात्। किञ्च जीवात्मपरामर्शे सत्यपहतपाप्मत्वादीनां तत्रासंभवाद् वाक्यभेदश्च स्यादित्यपि द्रष्टव्यम्।।१४।।

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च।।१५।। ननु तथा हीति वाच्यम्, इतश्चेति कथमुच्यते? नैष दोषः; एतत्सूत्रेणानुक्तान् हेतून् पूर्वसूत्राभिप्रायत्वेन प्रदर्शितवतस्तदभिप्रायेण "इतश्चे"ति वचनोपपत्तेः। गतिशब्दो [शब्दौ] व्याख्याय "तथाहि दृष्ट"मिति सूत्रावयवं व्याचष्टे—**तथा ह्यहरहरिति।** लोके च दृष्टमित्याह—**लोकेऽपीति।** ननु अस्या अपि प्रसिद्धेः श्रुतिमूलत्वात् श्रुतेः

न्यायनिर्णयः

न्यायादादौ 'तस्मिन् यदन्तः' इति तच्छब्दोऽनन्तरमप्याकाशमभिलङ्घ्य हृत्पुण्डरीकं परामृशति। तत्र यदन्तराकाशं तदन्वेष्टव्यं विजिज्ञासितव्यं चेत्युपसंहरति— **तस्मादिति।** नन्वेतच्छब्दस्य संनिहितार्थत्वात्, जीवात्मनः सर्वान् प्रति संनिहिततरत्वात् 'तस्यैव तादर्थ्यात्, कामानां च तत्र समाहितत्वेन समुच्चयसिद्धेस्तत्परं वाक्यमित्याशङ्क्य विजातीयाध्यक्षादिसिद्धजीवात् सजातीयश्रुतिसिद्धदहराकाशाख्यपरमात्मपरामर्शे लाघवात्, जीवे चापहतपाप्मत्वाद्ययोगात् वाक्यभेदापत्तेर्मैवमित्याह— **स चेति।।१४।।**

दहराकाशस्येश्वरत्वे हेत्वन्तरमाह— **गतीति।** उत्तरसूत्रसंदर्भस्य परमसंगतिमाह— **दहर इति।** अवतारितसूत्रस्यावान्तरसंगतिमाह— **इतश्चेति।** इतःशब्दार्थमाह— **यस्मादिति।** तावेवोदाहरति— **इमा इति।** प्रजाश्चिदाभासा जीवाः। अहरहः स्वापे। कथं तर्हि पुनरुत्थानं, तत्राह— **एतमिति।** उक्तगतिशब्दयोर्विवक्षितमर्थमाह— **तत्रेति।** श्रुतिः सप्तम्यर्थः। एतच्छब्दाज्जीवानां स्वापे दहरगमनेऽपि तस्य ब्रह्मत्वे किमायातं, तदाह— **तथा हीति।** अध्यायभेदधिया श्रुत्यन्तरशब्दः। 'स्वमपीतो भवति'

१. तस्यैव = जीवात्मन एव, तादर्थ्यात् = एतच्छब्दार्थत्वात्।

इत्येवमादौ। लोकेऽपि गाढं सुषुप्तमाचक्षते–'ब्रह्मीभूतो ब्रह्मतां गत' इति। तथा ब्रह्मलोकशब्दोऽपि प्रकृते दहरे प्रयुज्यमानो जीवभूताकाशशङ्कां निवर्तयन् ब्रह्मतामस्य गमयति। ननु कमलासनलोकमपि ब्रह्मलोकशब्दो गमयेत्। गमयेद् यदि ब्रह्मणो लोक इति षष्ठीसमासवृत्त्या व्युत्पाद्येत। सामानाधिकरण्यवृत्त्या तु व्युत्पाद्यमानो ब्रह्मैव लोको ब्रह्मलोक इति परमेव ब्रह्म गमयिष्यति। एतदेव चाहरहर्ब्रह्मलोकगमनं दृष्टं ब्रह्मलोकशब्दस्य सामानाधिकरण्यवृत्तिपरिग्रहे लिङ्गम्। न ह्यहरहरिमाः प्रजाः कार्यब्रह्मलोकं सत्यलोकाख्यं गच्छन्तीति शक्यं कल्पयितुम्।।१५।।

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः।।१६।।

प्रकटार्थविवरणम्

प्रपञ्चय शब्दसामर्थ्यं प्रपञ्चयति—**तथा ब्रह्मलोकेति**। जीवभूताकाशयोः ब्रह्मलोकशब्दानभिधेयत्वादित्यर्थः। तथापि ब्रह्मगमकत्वं न संभवति, सत्यलोके प्रसिद्धत्वादित्याह—**नन्विति**। निषादस्थपतिन्यायेन कर्मधारयस्योभयपदप्रधानतया बलीयस्त्वाद् ब्रह्मैव लोक्यते साक्षात्क्रियते मुमुक्षुभिरिति तद्गमक एवेत्याह—**गमयेद् यदीति**। कर्मधारयसमासपरिग्रहे लिङ्गमुपोद्बलकं दर्शयितुं "लिङ्गं च" इति सूत्रभागं व्याचष्टे—**एतदेव चेति**।

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः। समस्तजगद्विधारणलक्षणस्य परमात्मलिङ्गस्य दहरे दर्शनाच्च दहरः परमात्मेत्याह—

भाष्यभावप्रकाशिका

प्रामाण्याय (न) कथमिदमुदाह्रियते? मैवम्; दार्ढ्यायोपन्यासात्, ईदृशी नामेयं वैदिकी प्रसिद्धिः, यल्लोकेऽपि प्रतीयत इति। एवं गते [तेः] ब्रह्मत्वप्रतिपत्तिहेतुतां दहरस्योक्त्वा शब्दस्याह—**तथेति**। यथा श्रुत्यन्तरे, यथा च लोके सुषुप्तौ ब्रह्मगतिः, तथा ब्रह्मलोकशब्दोऽपीति योजना। ननु जीवभूताकाशव्यावर्तकत्वेऽपि न ब्रह्मतां गमयेदिति शङ्कते—**ननु कमलेति। षष्ठीसमासेति**। षष्ठीविभक्त्यश्रवणात् षष्ठ्यर्थलक्षणास्वीकारेण गौरवप्रङ्गादित्यर्थः। निषादस्थपत्यधिकरणन्यायेन कर्मधारयः परिगृह्यत इत्याह—**समानाधिकरण्येति**। ननु तेनैव न्यायेन विशेषणसमासः परिग्रहीतुं न युक्तः; तन्न्यायाविषयत्वात्। तथाहि—एकस्य शब्दस्यार्थद्वयसाधारणत्वे सति गुरुलघुचिन्तया लघुः परिग्रहीतव्य इति न्यायः, तथा सति [1]लोकविशेषे प्रयोगबाहुल्यात् तस्यैव बुद्धिस्थत्वाद् ब्रह्मविषयत्वं कथमित्याशङ्क्य "लिङ्गं चेति" सूत्रपदमुत्तरत्वेनावतारयति—**एतदेवेति**। लोक्यते योगिभिरिति लोकः ब्रह्मेत्यर्थः।।१५।।

न्यायनिर्णयः

इत्यादिवाक्यमादिपदार्थः। **तथाहीत्यादिसूत्रावयवस्यार्थान्तरमाह— लोकेऽपीति**। प्रसिद्धेः श्रुतिमूलत्वात् तत्प्रामाण्यायानुदाहार्यत्वेऽपीदृशी नामेयं वैदिकी प्रसिद्धिरियं लोकेऽप्यस्तीति श्रुतिप्रामाण्यदार्ढ्याय तदुक्तिरिति मत्वा किलेत्युक्तम्। दहरस्य ब्रह्मत्वधीहेतुतां गतेरुक्त्वा शब्दस्यापि कथयति— **तथेति**। गतिवदित्येतत्। शब्दस्य सिद्धान्तानुगुण्यं नेति शङ्कते— **नन्विति**। षष्ठीविभक्त्यश्रुतेस्तदर्थलक्षणायां गौरवान्नास्य लोकार्थतेत्याह— **गमयेदिति**। तथापि कुतोऽस्य ब्रह्मार्थतेत्याशङ्क्य निषादस्थपत्यधिकरणन्यायेनाह— **सामानाधिकरण्येति**। ननु तेनैव न्यायेन विशेषणसमासो न युक्तः, तन्न्यायाविषयत्वात्। एकस्य शब्दस्यार्थद्वयसाधारण्ये गुरुलघुचिन्तया लघुर्ग्राह्य इति न्यायः। तथा सति लोकविशेषे प्रयोगबाहुल्यात् तस्यैवादौ बुद्धिस्थत्वात् कुतो ब्रह्मविषयत्वमित्याशङ्क्य तत्र 'लिङ्गं च' इत्युत्तरत्वेन योजयति— **एतदेवेति**। तस्य लिङ्गत्वं स्फुटयति— **न हीति**।।१५।।

सर्वजगद्धारणस्य परमात्मलिङ्गस्य दहरे दर्शनाच्च तस्य परत्वमित्याह— **धृतेश्चेति**। अस्य धृत्यात्मनो महिम्नो दहरे

---

१. लोकविशेषे = ब्रह्मलोके।

धृतेश्च हेतोः परमेश्वर एवायं दहरः। कथम्? 'दहरोऽस्मिन्नन्तराकाशः' इति हि प्रकृत्याकाशौपम्यपूर्वकं तस्मिन् सर्वसमाधानमुक्त्वा तस्मिन्नेव चात्मशब्दं प्रयुज्यापहतपाप्मत्वादिगुणयोगं चोपदिश्य तमेवानतिवृत्तप्रकरणं निर्दिशति–'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय' (छा. उ. ८।४।१) इति। तत्र विधृतिरित्यात्मशब्दसामानाधिकरण्याद् विधारयितोच्यते, क्तिचः कर्तरि स्मरणात्। यथोदकसंतानस्य विधारयिता लोके सेतुः क्षेत्रसंपदामसंभेदाय, एवमयमात्मैषामध्यात्मादिभेदभिन्नानां लोकानां वर्णाश्रमादीनां च विधारयिता सेतुरसंभेदायासंकरायेति। एवमिह प्रकृते दहरे विधारणलक्षणं महिमानं दर्शयति। अयं च महिमा परमेश्वर एव श्रुत्यन्तरादुपलभ्यते 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' (बृ. उ. ३।८।९) इत्यादेः। तथाऽन्यत्रापि निश्चिते परमेश्वरवाक्ये श्रूयते–'एष सर्वेश्वर एष

प्रकटार्थविवरणम्

धृतेश्चेति। ननु अथशब्देन प्रकरणं विच्छिद्य विधृतिरिति श्रूयते। ततः कथं दहरस्य विधारकत्वमित्याह—**कथमिति।** प्रकृतपरामर्शिना यच्छब्देनात्मशब्देन च दहरस्यैव बुद्धिस्थत्वान्नाथशब्दः प्रकरणविच्छेदकः, किं तु वाक्योपक्रममात्रज्ञापनार्थ इति परिहारार्थः। ननु स्त्रियां भावे क्तिन्प्रत्ययविधानान्न विधृतिशब्देन दहरस्य विधारकत्वमुच्यत इत्याशङ्क्याह—**तत्र विधृतिरिति।** प्रकृतिशब्दवद्विधृतिशब्दः क्तिच्प्रत्ययान्त[1], न क्तिन्प्रत्ययान्त इत्यर्थः। ननु सेतुशब्देनापि विधारकत्वमेवोच्यते; अतः पौनरुक्त्यमित्याशङ्क्य विभागहेतुत्वं सेतुशब्दार्थ इत्याह—**यथोदकसन्तानस्येति।** उपसंहरति—**एवमिहेति।** विधारकत्वं वायोरप्यस्तीति नेदं परमात्मलिङ्गमित्याशङ्क्याह—**अयं च महिमेति।** वायोरपि परमेश्वरायत्तमेव विधारकत्वमिति भावः।

भाष्यभावप्रकाशिका

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः॥१६॥ सूत्रस्थधृतिशब्दो भाववचनः। अस्य धृतिलक्षणस्य महिम्नोऽस्मिन्नीश्वरे श्रुत्यन्तरेषूपलब्धेरित्यर्थः। श्रुतिगतविधृतिशब्दस्यार्थमाह—**तत्र विधृतिरिति।** भावे विहितस्य कर्तृविषयत्वं प्रत्ययस्यायुक्तमिति, अत आह—**क्तिच इति।** लोकप्रसिद्धदृष्टान्तेन वाक्यस्यार्थं दर्शयति—**यथेति।** सूत्रं योजयति—**एवमिहेति।** उपलब्ध्यन्तरमाह—**तथाऽन्यत्रेति। निश्चित इति।** सन्देहस्याप्यविषय इत्यर्थः॥१६॥

न्यायनिर्णयः

श्रुतस्यास्मिन्नीश्वरे श्रुत्यन्तरेषूपलब्धेस्तस्येश्वरत्वमित्यर्थः। सूत्रं व्याचष्टे— **धृतेरिति।** अथशब्देन प्रकरणं विच्छिद्य विधृतिशब्दात् कथं दहरस्य विधारकत्वमित्याह— **कथमिति।** प्रकृतगामिना यच्छब्देनात्मशब्देन च दहरस्यैव बुद्धिस्थत्वान्न प्रकरणविच्छेदकोऽथशब्दः, किंतु वाक्योपक्रमद्योतीत्याह— **दहरोऽस्मिन्नित्यादिना।** श्रौतविधृतिशब्दस्यार्थमाह— **तत्रेति।** स्त्रियां भावे क्तिन्विधानान्न विधृतिशब्देन दहरस्य विधारकत्वमित्याशङ्क्य प्रकृतिशब्दवदयं न क्तिन्प्रत्ययान्तः, किंतु क्तिच्प्रत्ययान्त इत्याह— **क्तिच इति।** सेतुशब्देनापि विधारकोक्त्या पौनरुक्त्यमाशङ्क्य दृष्टान्तेनासंकरहेतुत्वं सेतुशब्दस्यार्थमाह— **यथेति।** इतिशब्दः श्रुत्यक्षरार्थसमाप्त्यर्थः। उक्तेऽर्थे सूत्रं योजयति— **एवमिति।** तथापि कथं दहरस्येश्वरत्वं, तत्राह— **अयं चेति।** द्यावापृथिव्यादिस्थितिरक्षराधीनेति वदद्वाक्यमादिशब्दार्थः। प्रकारान्तरेण धृतिमाचष्टे— **तथेति।** निश्चितत्वं संदेहस्याप्यविषयत्वम्। राजकुमारव्यावृत्त्यर्थं भूताधिपतिरित्युक्तम्। लोकपालात्मनाऽपि परस्यैवावस्थानं वक्तुं भूतपालपदम्।

---

१. सूत्रे तु धृतिशब्दो भावे क्तिन्नन्त इति बोध्यम्। 'मूलप्रकृतिरविकृतिः' इत्यत्र प्रकरोतीति प्रकृतिः इति व्युत्पाद्यमानः प्रकृतिशब्दः क्तिजन्तः। सोऽत्र दृष्टान्तितः।

भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय' (बृ. उ. ४।४।२२) इति। एवं धृतेश्च हेतोः परमेश्वर एवायं दहरः।।१६।।

प्रसिद्धेश्च।।१७।।

इतश्च परमेश्वर एव 'दहरोऽस्मिन्नन्तराकाशः' इत्युच्यते। यत्कारणमाकाशशब्दः परमेश्वरे प्रसिद्धः। 'आकाशो वै नाम नामरूपयोर्निर्वहिता' (छा. उ. ८।१४) 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' (छा. उ. १।९।१) इत्यादिप्रयोगदर्शनात्। जीवे तु न क्वचिदाकाशशब्दः प्रयुज्यमानो दृश्यते। भूताकाशस्तु सत्यामप्याकाशशब्दप्रसिद्धावुपमानोपमेयभावाद्यसंभवान्न ग्रहीतव्य इत्युक्तम्।।१७।।

इतरपरामर्शात् स इति चेन्नासंभवात्।।१८।।

यदि वाक्यशेषबलेन दहर इति परमेश्वरः परिगृह्येतास्तीतरस्यापि जीवस्य वाक्यशेषे परामर्शः-'अथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाच'

प्रकटार्थविवरणम्

प्रसिद्धेश्च। आ समन्तात्प्रकाशत इति यौगिकवृत्त्या[1] परमात्मनि आकाशशब्दस्य मुख्यत्वाच्च दहरः परमात्मैवेत्याह— **प्रसिद्धेश्चेति।** तर्हि भूताकाशे रूढत्वात् स एव कस्मान्न गृह्यत इत्याशङ्क्याह— **भूताकाशस्त्विति।**

इतरपरामर्शात्स इति चेन्नासंभवात्। विनिगमनकारणाभावं मन्वानः प्रत्यवतिष्ठते— **यदि वाक्यशेषेति।** अयं वाक्यशेषो

भाष्यभावप्रकाशिका

प्रसिद्धेश्च।।१७।। तर्हि लोकवेदयोः प्रसिद्धत्वाद् भूताकाशः परिगृह्यतामिति, तत्राह— **भूताकाश इति।।१७।।**

न्यायनिर्णयः

विधारकतया सेतुरिवेति सर्वव्यवस्थापकत्वमाह— **सेतुरिति।** तदेव स्फुटयति— **एषामिति।** सूत्रार्थमुपसंहरति— **एवमिति।।१६।।**

दहरस्य परत्वे हेत्वन्तरम्— **प्रसिद्धेश्चेति।** चकारार्थमाह— **इतश्चेति।** इतःशब्दार्थं स्फुटयति— **यदिति।** नास्ति लौकिकी प्रसिद्धिरिति श्रौतीं प्रसिद्धिमाह— **आकाश इति।** 'यदेष आकाश आनन्दो न स्यात्' इति ग्रहीतुमादिपदम्। ब्रह्मण्याकाशशब्दप्रसिद्ध्युक्त्या जीवपक्षोऽपि निरस्त इत्याह— **जीवे त्विति।** क्वचित् लोके वेदे चेत्यर्थः। तर्हि लोकवेदप्रसिद्धेर्भूताकाशो गृह्यतां, नेत्याह— **भूतेति।।१७।।**

विनिगमनहेत्वभावं मन्वानस्य प्रत्यवस्थानं प्रत्याह— **इतरेति।** तत्र चोद्यं व्याचष्टे— **यदि[दी]ति।** वाक्यशेषमेवाह— **अथेति।** दहराकाशाख्यसोपाधिकवस्तूक्त्यनन्तरमित्येतत्। सर्वनामभ्यां विद्वानुक्तः। तमेव सुप्तं सर्वकालुष्यविनिर्मुक्तं वक्ति— **संप्रसाद इति।** अस्मादभिमानद्वयविषयादिति यावत्। शरीरशब्दो देहद्वयार्थः। ततः समुत्थानं विविक्तात्मज्ञानवत्त्वम्, तत्फलं स्वरूपेणाभिनिष्पत्तिस्तत्त्वसाक्षात्कारः, तत्फलमाह— **परमिति।** उपसंपद्याभिनिष्पद्यत इति मुखं व्यादाय स्वपितीतिवत्।

---

१. आकाशशब्दस्य ब्रह्मणि निरूढलक्षणया प्रयोग इति भामत्याशयः। आकाशशब्दो ब्रह्मणि रूढ इति मतं 'ये तु'इत्यादिनाऽनूद्य भामत्यां खण्ड्यते। तच्च पञ्चपादिकाकृन्मतमिति कल्पतरुदर्शनात् ज्ञायते।
प्रकटार्थकृता तु आकाशशब्दस्य ब्रह्मणि योगवृत्तिः स्वीकृता। सा च रूढिपूर्वकलक्षणायाः योगापेक्षया बलीयस्त्वमिति मीमांसान्यायमाश्रित्य कल्पतरौ खण्डिता। द्र. पृ. २९८। स च न्यायः 'उद्गातृचमसमेकः श्रुतिसंयोगादि'त्यधिकरणे द्रष्टव्यः पू. मी. ३-५-८

(छा. उ. ८।३।४) इति। अत्र हि संप्रसादशब्दः श्रुत्यन्तरे सुषुप्तावस्थायां दृष्टत्वात् तदवस्थावन्तं जीवं शक्नोत्युपस्थापयितुम्, नार्थान्तरम्। तथा शरीरव्यपाश्रयस्यैव जीवस्य शरीरात् समुत्थानं संभवति। यथाऽऽकाशव्यपाश्रयाणां वाय्वादीनामाकाशात् समुत्थानं, तद्वत्। यथा चादृष्टोऽपि लोके परमेश्वरविषय आकाशशब्दः परमेश्वरधर्मसमभिव्याहारात् 'आकाशो वै नाम नामरूपयोर्निर्वहिता' (छा. उ. ८।१४) इत्येवमादौ परमेश्वरविषयोऽभ्युपगतः, एवं जीवविषयोऽपि भविष्यति। तस्मादितरपरामर्शाद् 'दहरोऽस्मिन्नन्तराकाश' इत्यत्र स एव जीव उच्यत इति चेत्। नैतदेवं स्यात्। कस्मात्? असंभवात्। न हि जीवो बुद्ध्याद्युपाधिपरिच्छेदाभिमानी सन्नाकाशेनोपमीयेत। न चोपाधिधर्मानभिन्यमानस्यापहतपाप्मत्वादयो धर्माः संभवन्ति। प्रपञ्चितं चैतत् प्रथमसूत्रे। अतिरेकाशङ्कापरिहारायात्र तु पुनरुपन्यस्तम्। पठिष्यति चोपरिष्टात्–'अन्यार्थश्च परामर्शः' (ब्र. सू. १।३।२०) इति।।१८।।

प्रकटार्थविवरणम्

जीवविषय इति वा कुतः सिद्धमित्याशङ्क्यावस्थावत्त्वादिलिङ्गादित्याह—**अत्र हीति**। ननु नाकाशशब्दः क्वचिज्जीवे प्रयुज्यत इत्युक्तं विनिगमनकारणमित्याशङ्क्याह—**यथा चादृष्टोऽपीति**। यद्यप्यस्ति दहरविद्यावाक्यशेषे जीवपरामर्शः, तथापि न तद्-बलेन दहरो जीवः शक्यते ग्रहीतुम्, दहरोक्तानां धर्माणां जीवेऽसंभवादित्याह—**नैतदेवं स्यादिति**। का तर्हि गतिः जीवपरामर्शस्येत्याशङ्क्याह—**पठिष्यति चेति**। जीवपरामर्शो जीवस्य स्वापाधारपरमात्मन एवोपासनार्थ इत्यर्थः।

भाष्यभावप्रकाशिका

इतरपरामर्शात् स इति चेन्नासंभववात्।।१८।। संप्रसादावस्थावच्छरीरादुत्थानमपि जीवलिङ्गमित्याह—**तथा शरीरेति**। ननु शरीराश्रयश्चेत्, कथं शरीरादुत्तिष्ठेदिति? तत्राह—**यथेति**।

ननु तस्मिन्नाकाशशब्दो न प्रसिद्धः इति, मैवम्; ब्रह्मण्यपि तद्धर्मसमभिव्याहारात् प्रसिद्धेः। जीवेऽपि वाक्यशेषलिङ्गात् प्रसिद्धिः स्यादित्याह—**यथा चादृष्ट इति**। ननु वाक्यशेष उभयोः परामर्शकं लिङ्गजातमस्ति, इतरलिङ्गानि चेतरत्र न संभवन्ति। कथं दहरस्य ब्रह्मत्वनिश्चय इति? तत्राह—**पठिष्यतीति**।।१८।।

न्यायनिर्णयः

ज्योतिःशब्दस्य सूर्यादिविषयत्वं निषेधति— **एष इति**। कुतो वाक्यशेषस्य जीवविषयत्वं, तत्राह— **अत्रेति**। 'संप्रसादे रत्वा चरित्वा' इत्यादि बृहदारण्यकं श्रुत्यन्तरम्। अवस्थावत्त्ववद् देहादुत्थानमपि जीवलिङ्गमित्याह— **तथेति**। देहाश्रयश्चेत् कथं तस्मादुत्तिष्ठेत्, तत्राह— **यथेति**। जीवे न क्वचिदाकाशशब्दोऽस्तीत्युक्तं विनिगमनमित्याशङ्क्य ब्रह्मणि 'तद्धर्माभिव्यवहारात्तच्छब्दवज्जीवेऽपि वाक्यशेषलिङ्गात् तत्प्रसिद्धिः स्यादित्याह— **यथा चेति**। चोद्यमुपसंहरति— **तस्मादिति**। दहर[वाक्य]शेषे जीवपरामर्शेऽपि न तेन दहरो जीवः स्यादिति नञर्थमाह— **नैतदिति**। तत्र प्रश्नपूर्वकं हेतुमाह— **कस्मादिति**। यदाकाशोपमितत्वं दहरस्य श्रुतं तत्र जीवे संभवतीति विभजते— **न हीति**। अपहतपाप्मत्वादीनामपि दहरोक्तानां जीवे न संभावनेत्याह— **न चेति**। उपाधिधर्माः पाप्मादयः। ब्रह्माभेदाज्जीवेऽपि सर्वमेतद् युक्तमित्याशङ्क्याह— **प्रपञ्चितं चेति**। तर्हि पुनरुक्तिः, तत्राह— **अतिरेकेति**। का तर्हि जीवपरामर्शस्य गतिः, तत्राह— **पठिष्यतीति**। जीवपरामर्शो जीवस्य स्वापाधारपरात्मधीशेष इत्यर्थः।।१८।।

---

१. 'तद्धर्मसमभिव्याहारात्' इति पाठो युक्तः।

उत्तराच्चेदाविर्भूतस्वरूपस्तु।।१९।।

इतरपरामर्शाद् या जीवाशङ्का जाता साऽसंभवान्निराकृता। अथेदानीं मृतस्येवामृतसेकात् पुनः समुत्थानं जीवाशङ्कायाः क्रियते उत्तरस्मात् प्राजापत्याद् वाक्यात्। तत्र हि 'य आत्माऽपहतपाप्मा' इत्यपहतपाप्मत्वादिगुणकमात्मानमन्वेष्टव्यं विजिज्ञासितव्यं च प्रतिज्ञाय 'य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मा' (छा.उ.८।७।४) इति ब्रुवन्नक्षिस्थं द्रष्टारं जीवमात्मानं निर्दिशति। 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' (छा.उ.८।९।३) इति च तमेव पुनःपुनः परामृश्य 'य एष स्वप्ने महीयमानश्चरत्येष आत्मा' (छा. उ. ८।१०।१) इति, 'तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मा' (छा. उ. ८।११।१)

प्रकटार्थविवरणम्

उत्तराच्चेदाविर्भूतस्वरूपस्तु। सूत्रसङ्गतिमाह—[**इतर**] **परामर्शाद्येति**। दहरविद्यां समाप्य इन्द्रविरोचनाख्यायिका; तस्यां जीवस्य प्राजापत्याद् वाक्यादपहतपाप्मत्वाद्यवगमादसिद्धो हेतुरिति भावः। कथं वा प्राजापत्ये वाक्ये जीवोपदेशः सिद्ध इत्याशङ्क्याह—**तत्र हीति**। इन्द्रविरोचनौ किल देवासुरराजौ ब्रह्मविद्यादित्सया प्रजापतिमाजग्मतुः। आगत्य च द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतुः। ततः प्रजापतिना किमिच्छन्तावvसतमिति पृष्टौ प्रोचतुः—य आत्माऽपहतपाप्मादिविशेषणः तमावां विविदिषाव इति। प्रजापतिस्तु तथैवाभ्यनुज्ञाय "य एषोऽक्षिणि" इति प्रथमे पर्यायेऽक्षिस्थानं द्रष्टारं ब्रुवन् जीवमेव निर्दिशतीत्यर्थः। द्वितीयतृतीयपर्याययोरप्यवस्थावत्त्वलिङ्गेन जीव एव निर्दिष्ट इत्याह—**एतं त्वेव त इति**। प्रजापतिना जीवो निर्दिष्टः, न तु तस्यापहतपाप्मत्वादिगुणत्वम् इत्याशङ्क्याह—**तस्यैव चेति**।

भाष्यभावप्रकाशिका

उत्तराच्चेदाविर्भूतस्वरूपस्तु॥१९॥ **इदानीमिति**। प्राजापत्ये वाक्ये जीवेऽप्यपहतपाप्मत्वादयो धर्माः श्रूयन्ते, तत् कथमसंभव इति शङ्का जायत इत्यर्थः। ननु अत्रापहतपाप्मत्वादिगुणः परमात्मैव, न जीव इति, तत्राह—**य एष इति**। ननु यथा परमात्मप्रतिपत्त्यर्थं पञ्चकोशोपन्यासः, यथा च भूमप्रतिपत्त्यर्थं प्राणाद्युपन्यासः, तथा ब्रह्मप्रतिपत्त्यर्थं जीवोपन्यासो भवत्विति, तत्राह—**एतं त्वेवेति**। उत्तरत्रान्यस्य[1] प्रतिपाद्यमानत्वादित्यर्थः। ननु परमात्मनोऽप्यक्षिस्थानत्वमुपपन्नम्; "अन्तर उपपत्ते"रित्युक्तत्वादिति, तत्राह—**य एष इति**। ननु स्वप्ने विषयतया महीयमानता परमात्मनः स्यात् 'रुक्माभावं[रुक्माभं] स्वप्नधीगम्य'मिति वचनादिति, तत्राह—**तद्यत्रेति**। अवस्थावत्त्वावगमादिति भावः।

न्यायनिर्णयः

उक्तासंभवस्यासिद्धिमाशङ्क्य परिहरति— **उत्तराच्चेदिति**। चोद्यस्य वृत्तमनूद्य तात्पर्यमाह— **इतरपरामर्शादिति**। निराकृताशङ्कोत्थाने निराकरणापर्यवसानमाशङ्क्याह— **अथेति**। पुनस्तदुत्थाने हेतुमाह— **उत्तरस्मादिति**। प्राजापत्ये वाक्ये जीवेऽप्यपहतपाप्मत्वादिश्रुतेरसंभवो नेति शङ्कत इत्यर्थः। कथं तत्र जीवोक्तिः, तत्राह— **तत्रेति**। प्रतिज्ञावाक्यस्य परमात्मविषयत्वमाशङ्क्याद्यपर्यायस्य जीवविषयत्वादुपक्रमस्यापि तथेत्याह[1]— **य इति**। ननु छायात्मैवास्मिन् पर्याये प्रतिपाद्यते, दृश्यमानत्वस्य तस्मिन् मुख्यत्वात्, नेत्याह— **द्रष्टारमिति**। परप्रतिपत्त्यर्थं पञ्चकोशोक्तिवद्भूमप्रतिपत्त्यर्थं प्राणाद्युक्तिवच्च ब्रह्मार्थं जीवोक्तिरपि स्यादित्याशङ्क्य द्वितीयतृतीययोरपि तद्विषयत्वमाह— **एतं त्विति**। उत्तरत्रान्यस्यानुक्तेर्नान्यार्था जीवोक्तिरित्यर्थः। 'अन्तर उपपत्तेः' इत्यत्र परस्याक्षिस्थानताया दर्शितत्वादाद्यपर्यायस्य परविषयत्वादुत्तरयोरपि तद्विषयतेत्याशङ्क्याह— **य इति**। स्वप्ने वासनामयैर्विषयैर्महीयमानता परस्यैव 'रुक्माभं स्वप्नधीगम्य'मित्युक्तेरित्याशङ्क्याह— **तदिति**। तदेतदिति संबन्धः। यत्र यस्यामवस्थायां तदेतत् स्वपनं यथा स्यात् तथा सुप्तः स्वापावस्थां प्राप्तो भवति तस्यामवस्थायामुपसंहृतकरणग्रामस्तद्व्यापारकृतकालुष्यहीनः स्वप्नमज्ञानमात्रतया विलापयन् मुक्ताद् व्यावृत्तस्तैजसानन्तरभावी प्राज्ञो ज्ञानक्रियां विना स्वरूपचैतन्येनाज्ञानसाक्षी साक्ष्यस्य देहादेः सत्तास्फूर्तिप्रदत्वेन चात्मेत्यर्थः। तथा

---

१. 'तदर्थतेत्याह' इति पा।

इति च जीवमेवावस्थान्तरगतं व्याचष्टे। तस्यैव चापहतपाप्मत्वादि दर्शयति–'एतदमृतमभयमेतद् ब्रह्म' इति। 'नाह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि' (छा. उ. ८।११।१) इति च सुषुप्तावस्थायां दोषमुपलभ्य 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्मात्' (छा. उ. ८।११।३) इति चोपक्रम्य शरीरसंबन्धनिन्दापूर्वकम् 'एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः' (छा. उ. ८।१२।३) इति जीवमेव शरीरात्समुत्थितमुत्तमपुरुषं दर्शयति। तस्मादस्ति संभवो जीवे पारमेश्वराणां धर्माणाम्। अतः 'दहरोऽस्मिन्नन्तराकाशः' इति जीव एवोक्त इति चेत् कश्चिद् ब्रूयात्, तं प्रति ब्रूयात्–'आविर्भूतस्वरूपस्तु' इति। तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। नोत्तरस्मादपि वाक्यादिह जीवस्याशङ्का संभवतीत्यर्थः। कस्मात्? यतस्तत्राप्याविर्भूतस्वरूपो जीवो विवक्ष्यते। आविर्भूतं स्वरूपमस्येत्याविर्भूतस्वरूपः। भूतपूर्वगत्या जीववचनम्। एतदुक्तं भवति–'य

प्रकटार्थविवरणम्

प्रकृष्टधर्माद्यनुष्ठानाज्जीवस्याप्यपहतपाप्मत्वादि संभवतीत्यर्थः। चतुर्थेऽपि पर्याये शरीरात् समुत्थितत्वलिङ्गात् जीव एव निर्दिष्ट इत्याह—**नाह खल्वित्यादिना**। अहेति निपातः खेदार्थे। खिद्यमानः इन्द्रः प्रोवाच–अयं सुप्तोऽयमहस्मीत्येवं नात्मानं सम्प्रति जानाति, नो एवेमानि भूतानि, विनाशमेवापीतो भवति, नाहमत्र भोग्यं पश्यामीत्येवं सुषुप्तावस्थायां दोषमुपलभ्योपसन्नमिन्द्रं प्रजापतिरुवाच—एतमेव तुभ्यं पुनरपि व्याख्यास्यामि, नैतस्मादन्यमित्युपक्रम्य 'मघवन् मर्त्यं वा इदं शरीर' 'मित्यादिनिन्दापूर्वकं

भाष्यभावप्रकाशिका

ननु तस्मिन्नपहतपाप्मत्वादिकमनुपपन्नमिति, मैवम्; ध्यानादिसाधनसाध्यापहतपाप्मत्वादिकमन्तरेणापि ब्रह्मरूपता जीवे संभवति; श्रुत्युक्तत्वादित्याह—**तस्यैव चेति**। ननु यः 'अपहतपाप्मे' त्यादिनोपक्रान्तः परमात्मा, स चतुर्थे पर्याये प्रतिपाद्यते , अतः प्रतिपादनाभावोऽसिद्ध इति, तत्राह—**नाहेति**। जीवस्यापहतपाप्मत्वाभ्युपगमे प्रत्यक्षविरोधमाशङ्क्य परिहरति—**शरीरसम्बन्धेति**। साधनसाध्यत्वादपहतपाप्मत्वादीनां शरीरपरित्यागोत्तरकाले संभव इति भावः।

न्यायनिर्णयः

चावस्थावत्त्वाज्जीवोऽयमिति श्रुत्यर्थं संक्षिप्याह— **जीवमिति**। स्वप्नावस्थातोऽन्या स्वापावस्थाऽवस्थान्तरम्। तथापि तस्मिन्नपहतपाप्मत्वादि कथमित्याशङ्क्य विनाऽपि ब्रह्मरूपतामुपास्त्या तद्धीरित्याह— **तस्येति**। य आत्माऽपहतपाप्मा इत्यादिनोपक्रान्तः स परमात्मतया चतुर्थपर्याये कथ्यते, तेन तत्प्रतिपादनसिद्धिरित्याशङ्क्य चतुर्थपर्यायस्यापि जीवविषयत्वमाह— **नाहेति**। अहेति निपातः खेदार्थे। खिद्यमानो हीन्द्रः प्रोवाच, अयं सुप्तः पुमानयमस्म्यहमित्येवं नात्मानमस्यामवस्थायां जानाति, नो एवेमानि भूतानि, विनाशमेवापीतो भवति, नाहमत्र भोग्यं पश्यामीत्येवं स्वापे दोषं दृष्ट्वा पुनरुपससादेत्यर्थः। तं प्रजापतिरुवाच, 'एतं त्वेव' इति प्रकृतमेवात्मानं ते तुभ्यं पुनरपि व्याख्यास्यामि नैतस्मादन्यमित्युपक्रमार्थः। तथापि जीवस्यापहतपाप्मत्वाद्युपगमेऽध्यक्षादिविरोधः, न, हेत्वधीनस्य देहोत्तरकालं जीवेऽपि योगादित्याह— **शरीरेति**। 'मघवन्मर्त्यं वा इदम्' इत्यादिना देहसंबन्धं निन्दित्वा तस्मादुत्थितं जीवमेवोत्तमपुरुषम् 'एष संप्रसादोऽस्मात्' इत्यादिना दर्शयतीति योजना। असंभवासिद्धिं निगमयति— **तस्मादिति**। हेत्वसिद्धिफलमाह— **अत इति**। सिद्धान्तमादत्ते— **तं प्रतीति**। आविर्भावस्य विशेषविषयत्वात् तदर्थस्तुशब्दो वृथेत्याशङ्क्याह— **तुशब्द इति**। पक्षव्यावृत्तिमेव स्फुटंयति—**नेति**। इहेति दहरवाक्योक्तिः। पर्यायचतुष्टयस्य जीवार्थत्वात् कुतस्तदाशङ्का नेति शङ्कते— **कस्मादिति**। सौत्रं हेतुमाह— **यत इति**। पर्यायचतुष्टयं सप्तम्यर्थः। पुंलिङ्गसूचितं बहुव्रीहिसमासमाह— **आविर्भूतमिति**। तस्य ब्रह्मत्वात् कथं जीवो विशेष्यते, तत्राह— **भूतेति**। अविद्यातत्कार्यप्रतिबिम्बितत्वेन चिद्धातोर्जीवभावोऽभूदिति बिम्बब्रह्मैक्यज्ञानेऽपि

एषोऽक्षिणि' इत्यक्षिलक्षितं द्रष्टारं निर्दिश्योदशरावब्राह्मणेनैनं शरीरात्मताया व्युत्थाप्य 'एतं त्वेव ते' इति पुनःपुनस्तमेव व्याख्येयत्वेनाकृष्य स्वप्नसुषुप्तोपन्यासक्रमेण 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति यदस्य पारमार्थिकं स्वरूपं परं ब्रह्म तद्रूपतयैनं जीवं व्याचष्टे, न जैवेन रूपेण। यत्तत्परं ज्योतिरुपसंपत्तव्यं श्रुतं तत्परं ब्रह्म। तच्चापहतपाप्मत्वादिधर्मकं, तदेव च जीवस्य पारमार्थिकं स्वरूपम्, 'तत्त्वमसि' इत्यादिशास्त्रेभ्यः, नेतरदुपाधिकल्पितम्। यावदेव हि स्थाणाविव पुरुषबुद्धिं द्वैतलक्षणामविद्यां निवर्तयन् कूटस्थनित्यदृक्स्वरूपमात्मानमहं ब्रह्मास्मीति न प्रतिपद्यते, तावज्जीवस्य जीवत्वम्। यदा तु

प्रकटार्थविवरणम्

जीवमेव दर्शयतीत्यर्थः। "तस्मात्" इत्यादिना पर्वपक्षमुपसंहृत्य सिद्धान्तसूत्रभागं योजयति। नन्वाविर्भूतस्वरूपश्चेत् कथं जीवो विवक्ष्यत इत्याशङ्क्याह—**भूतपूर्वगत्येति**। अविद्यातत्कार्यप्रतिबिम्बितत्वेन च चिद्धातोर्जीवभावोऽभूदिति बिम्बभूतब्रह्मैक्यावगमेऽपि जीवाभिधानमित्यर्थः। पर्यायचतुष्टयात्मकस्य प्राजापत्यवाक्यस्य संक्षेपतोऽभिप्रायमाह—**एतदुक्तं भवतीति**। "उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतम्" इत्यादिना यथोदकशरावे शरीरप्रतिबिम्बं व्यभिचारित्वादनात्मा तथा बिम्बभूतं शरीरमप्यनात्मेति दर्शितम्। प्रसिद्धजीवानुवादेन तस्य ब्रह्मतां व्याचचक्षे प्रजापतिरिति ब्रह्मण एव तत्रापहतपाप्मत्वादिधर्मकत्वमित्यर्थः। "परं ज्योतिरुपसंपद्य" इति ज्योतिस्तत्रोपसंपत्तव्यं भाति, न ब्रह्मेत्याशङ्क्याह—**यत्तत्परमिति**। स्वेन रूपेणेति विशेषणादित्यर्थः। नन्वेकरसत्वाद् ब्रह्मणः कुतोऽपहतपाप्मत्वादिधर्मकत्वम्, कुतस्तरां तद्रूपेण जीवस्यापहतपाप्मत्वादिधर्मकत्वमित्याशङ्क्याह—**तच्चापहतेति**। पापादिप्रतिषेधस्यैकरसताऽविरोधित्वादित्यर्थः। तर्हि विरुद्धधर्माक्रान्तत्वान्न ब्रह्म जीवस्य स्वरूपत्वेनोपदेष्टुं शक्यमित्याशङ्क्याह—**तदेव चेति**। यथा बिम्बप्रतिबिम्बयोः विरुद्धधर्माक्रान्तत्वेऽपि प्रतिबिम्बं बिम्बमेवेति वाक्येन विरुद्धांशपर्युदासेन स्वरूपैक्यं बोध्यते, तद्वदित्यर्थः। ननु संसारित्वस्य तात्त्विकत्वान्न पर्युदासः कर्तुं शक्यत इत्याशङ्क्याह—**नेतरदिति**। अविद्यान्वयव्यतिरेकाभ्यां संसारित्वस्याविद्योपाध्यधीनत्वमेव दर्शयति—**यावदेव हीति**। ननु ज्ञानाच्चेद् ब्रह्मीभावः, तर्हि न जीवस्य ब्रह्म निजं रूपमित्याशङ्क्याह—

भाष्यभावप्रकाशिका

ननु आविर्भूतस्वरूपस्य ब्रह्मत्वात् कथं जीववचनमिति? तत्राह—**भूतपूर्वगत्येति**। ननु स्वरूपाविर्भावेऽपि जीवो जीव एव, नान्यः, तत् कथं ब्रह्मत्वमिति? तत्राह—**एतदुक्तमिति**। उत्तरश्रुतिसन्दर्भः किमर्थस्तर्हीति? तदाह—**उदशरावेति**। उपजनापायधर्मकत्वात् प्रतिबिम्बवदनात्मा देहादिरिति दर्शयितुमित्यर्थः। व्युत्थानम् बाधः। ननु परं ज्योतिरेवोपसंपत्तव्यत्वेन श्रूयते, न ब्रह्मेति, अत आह—**यत्तत्परमिति**। **तच्चेति**। जीवस्य ब्रह्माभेदाद् ब्रह्मरूपेण निजसिद्धाविर्भूतापहतपाप्मत्वादिस्वरूपं जीवं प्रतिपादयति वाक्यमिति भावः। कथमेकत्वमिति? तत्राह—**तदेव चेति**। विरुद्धत्वादेकत्वमयुक्तमित्याशङ्क्याह—**नेतरदिति**। तर्हि प्रतीयमानं किंनिमित्तमिति, तदाह—**उपाधिपरिकल्पितमिति**। एतदेव दृष्टान्तेनोपपादयति—**यावदेवेति**। ननु इतरस्य कल्पितत्वं किमिति

न्यायनिर्णयः

जीवत्वोक्तिरित्यर्थः। स्वरूपाविर्भावेऽपि जीवस्य जीवत्वानपायात् कुतो ब्रह्मतेत्याशङ्क्य प्राजापत्यवाक्यतात्पर्यमाह— **एतदिति**। अवस्थाविशेषविशिष्टस्य परैक्यायोगमाशङ्क्याह— **अक्षीति**। उपजनापायवत्त्वात् प्रतिबिम्बवदनात्मा देहादिरिति वक्तुम्'उदशराव आत्मानमवेक्ष्य यदात्मनो रूपं न विजानीथस्तन्मे ब्रूत'मित्युत्तरो ग्रन्थ इत्याह— **उदशरावेति**। प्रकृतो द्रष्टा द्वितीयार्थः। व्युत्थापनं बाधः। प्रकरणविच्छेदं व्यावर्तयति— **एतमिति**। अवस्थानां व्यभिचारित्वेन कल्पितत्वात्तदस्पृष्टं वस्तूपदेष्टुमवस्थोक्तिरिति तदुक्तिफलमाह— **स्वप्नेति**। परं ज्योतिरित्यादिश्रुतेस्तात्पर्यमाह— **यदिति**। परं ज्योतिरेवोपसंपत्तव्यं श्रूयते, न ब्रह्मेत्याशङ्क्याह— **यत्तदिति**। यत्तु जीवस्य नापहतपाप्मत्वादीति, तत्राह— **तच्चेति**। जीवस्य ब्रह्माभेदात् तद्रूपेण स्वाभाविकाविर्भूतापहतपाप्मत्वादिस्वरूपं तद् वदति वाक्यमित्यर्थः। कथं मिथो विरुद्धयोर्जीवब्रह्मणोरैक्यं, तत्राह— **तदेवेति**। विरुद्धत्वबुद्धौ कथं शास्त्रमपि तद्बोधीत्याशङ्क्याह— **नेतरदिति**। प्रातीतिकविरुद्धाकारस्यौपाधिकत्वादागमावगतं स्वाभाविकमैक्यमविरुद्धमित्यर्थः। अविद्यान्वयव्यतिरेकाभ्यां

देहेन्द्रियमनोबुद्धिसंघाताद् व्युत्थाप्य श्रुत्या प्रतिबोध्यते, नासि त्वं देहेन्द्रियमनोबुद्धिसंघातः, नासि संसारी, किं तर्हि? तद्यत्सत्यं स आत्मा चैतन्यमात्रस्वरूपस्तत्त्वमसीति, तदा कूटस्थनित्यदृक्स्वरूपमात्मानं प्रतिबुध्यास्माच्छरीराद्यभिमानात् समुत्तिष्ठन् स एव कूटस्थनित्यदृक्स्वरूप आत्मा भवति। 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' (मु. उ. ३।२।९) इत्यादिश्रुतिभ्यः। तदेव चास्य पारमार्थिकं स्वरूपं येन शरीरात् समुत्थाय स्वेन रूपेणाभिनिष्पद्यते।

कथं पुनः स्वं च रूपं स्वेनैव च निष्पद्यत इति संभवति कूटस्थनित्यस्य? सुवर्णादीनां तु द्रव्यान्तरसंपर्कादभिभूतस्वरूपाणामनभिव्यक्तासाधारणविशेषाणां क्षारप्रक्षेपादिभिः शोध्यमानानां स्वरूपेणाभिनिष्पत्तिः स्यात्। तथा नक्षत्रादीनामहन्यभिभूतप्रकाशानामभिभावकवियोगे रात्रौ स्वरूपेणाभिनिष्पत्तिः स्यात्। न तु तथाऽऽत्मचैतन्यज्योतिषो नित्यस्य केनचिदभिभवः संभवत्यसंसर्गित्वाद् व्योम्न इव, दृष्टविरोधाच्च। दृष्टिश्रुतिमतिविज्ञातयो हि जीवस्य स्वरूपम्। तच्च शरीरादसमुत्थितस्यापि

प्रकटार्थविवरणम्

तदेव चास्येति। प्रतिबन्धमलविगमापेक्षया भवतिरौपचारिक इत्यर्थः। कूटस्थनित्यत्वादसङ्गत्वाच्च मलसंसर्ग एव नोपपद्यत इति मन्वानो विप्रतिषेधमाह—**कथं पुनरिति।** इतश्च नात्मनि मलप्रतिबन्धसंभव इत्याह—**दृष्टविरोधाच्चेति।** "विज्ञानघन एव"

भाष्यभावप्रकाशिका

स्यात्, उभयोः पारमार्थिकत्वं किं न स्यादिति, अत आह—**तदेव चास्येति।** इतरस्य प्रमाणशून्यत्वादित्यर्थः। विरोधमाशङ्कते—**कथं पुनरित्यादिना।** कथमसंभव इति? तत्राह—**कूटस्थमिति।** विशेषणस्य व्यावर्त्यमाह—**सुवर्णादीनामिति।** ननु नक्षत्रादीनां सुवर्णादिवदभिभावकद्रव्यसंपर्कविनाशाद्यभावेऽपि स्वरूपाभिनिष्पत्तिवत् स्यादिति, तत्राह—**तथा नक्षत्रेति।** द्रव्यान्तरसंसृष्टं तेनाभिभूतं तस्माद् विविच्यते, कूटस्थनित्यं पुनरन्येनासंसृष्टं कुतो विवेचनादभिव्यज्येतेति भावः। न च जीवो नाभिव्यक्तः; दृष्ट्यादिरूपेण भासमानत्वादित्याह—**दृष्टविरोधाच्चेति।** तावता कथं विरोध इति? तदाह—**तच्चेदिति।**

न्यायनिर्णयः

संसारित्वस्याविद्यात्वं वक्तुं दृष्टान्तेनान्वयमाह— **यावदिति।** व्यतिरेकमाह— **यदेति।** व्युत्थापनद्वारा प्रतिबोधनमभिनयति— **नासीति।** व्युत्थापनफलमसंसारित्वमुक्त्वा तत्फलमाकाङ्क्षापूर्वकमाह— **किमिति।** शास्त्रीयमात्मज्ञानमनूद्य तत्फलमाह— **तदेति।** विदुषो ब्रह्मत्वे मानमाह— **स इति।** किमित्यन्यतरस्य कल्पितत्वं, द्वयोरपि वस्तुत्वं किं न स्यात्, तत्राह— **तदेवेति।** शरीरविशिष्टं रूपं कल्पितमन्यथा तस्मादुत्थितस्य स्वेनाभिनिष्पत्त्ययोगादित्यर्थः। स्वेन रूपेणाभिनिष्पत्तिरित्यत्र विरोधं चोदयति— **कथमिति।** तत्र हेतुं सूचयति— **कूटस्थेति।** विशेषणव्यावृत्तिमाह— **सुवर्णादीनामिति।** पार्थिवं रजो द्रव्यान्तरम्। असाधारणो विशेषः स्वर्णत्वभास्वरत्वादिः। दाहच्छेदादिसंग्रहार्थमादिपदम्। स्वर्णादिवन्नक्षत्रादीनामभिभावकद्रव्यसंपर्काविनाशेऽपि स्वरूपाभिनिष्पत्तिवत् प्रकृतेऽपि स्यादित्याशङ्क्याह— **तथेति।** स्वर्णादीनामिवेति यावत्। अभिभावकं सावित्रं तेजोऽभीष्टम्। दार्ष्टान्तिके वैषम्यमाह— **न त्विति।** द्रव्यान्तरसंसृष्टं तेनाभिभूतं ततो विविक्तमभिव्यक्तिमर्हति, कूटस्थनित्यं त्वन्येनासंपृक्तमसङ्गाद्वितीयं ततो विवेकद्वारा नाभिव्यक्तिभागित्यर्थः। वस्तुतोऽसंसर्गित्वे व्योमोदाहरणम्। जीवस्याभिभूतस्वरूपतया ज्ञानात् तदभिव्यक्तिः स्वरूपेणाभिनिष्पत्तिरित्याशङ्क्याह— **दृष्टेति।** जीवस्वरूपस्यानभिव्यक्तौ दृष्टः सर्वो व्यवहारो विरुध्येत, तस्याहमिति तद्धीपूर्वकत्वात्। तथाच तदनभिव्यक्तिरयुक्तेत्यर्थः। उक्तमेव व्यक्तीकुर्वन्नादौ तदीयं स्वरूपमनुवदति— **दृष्टीति।** 'विज्ञानघन एव' इत्यादिश्रुतेश्चिन्मात्रस्वभावस्तावदात्मा। तच्चैतन्यं चक्षुरादिद्वारा व्यज्यमानं दृष्ट्यादिशब्दितम्। अतो दृष्ट्यादयोऽस्य स्वरूपमित्यर्थः।

जीवस्य सदा निष्पन्नमेव दृश्यते। सर्वो हि जीवः पश्यञ्शृण्वन् मन्वानो विजानन् व्यवहरत्यन्यथा व्यवहारानुपपत्तेः। तच्चेच्छरीरात् समुत्थितस्य निष्पद्येत, प्राक्समुत्थानाद् दृष्टो व्यवहारो विरुध्येत। अतः किमात्मकमिदं शरीरात्समुत्थानं, किमात्मिका वा स्वरूपेणाभिनिष्पत्तिरिति। अत्रोच्यते—प्राग्विवेकविज्ञानोत्पत्तेः शरीरेन्द्रियमनोबुद्धिविषयवेदनोपाधिभिरविविक्तमिव जीवस्य दृष्ट्यादिज्योतिःस्वरूपं भवति। यथा शुद्धस्य स्फटिकस्य स्वाच्छ्यं शौक्ल्यं च स्वरूपं प्राग्विवेकग्रहणाद् रक्तनीलाद्युपाधिभिरविविक्तमिव भवति। प्रमाणजनितविवेकग्रहणात्तु पराचीनः स्फटिकः स्वाच्छ्येन शौक्ल्येन च स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते प्रागपि तथैव सन्। तथा देहाद्युपाध्यविविक्तस्यैव सतो जीवस्य [1]श्रुतिकृतं विवेकविज्ञानं शरीरात्समुत्थानं, विवेकविज्ञानफलं स्वरूपेणाभिनिष्पत्तिः केवलात्मस्वरूपावगतिः। तथा विवेकाविवेकमात्रेणैवात्मनोऽशरीरत्वं

प्रकटार्थविवरणम्

इत्यादिश्रुतेश्चिन्मात्रस्वभावस्तावदात्मा; तच्च चैतन्यं चक्षुरादिद्वारेण व्यज्यमानं दृष्ट्यादिशब्दवाच्यम्; तच्चेत् प्रतिबद्धं सर्वो व्यवहारो विरुध्येतेत्यर्थः। यथाऽसङ्गस्याप्याकाशस्य तत्र तत्रोदकप्रतिबिम्बितस्य मिथ्यैव तद्गतचलनादिधर्मभागित्वम्, तथा चितोऽसङ्गत्वेऽपि तत्तन्त्राविद्याप्रतिबिम्बिततया मिथ्यैव तत्कार्यसंसृष्टता घटते। [2]तदवगमे च बिम्बभूतब्रह्मात्मैक्यावगमेन स्वरूपादिनिष्पत्तिरित्याह—**अत्रोच्यत इति**। यच्चावाचि- चैतन्यं सदा व्यक्तमेव, न तत्र प्रतिबन्धसंभव इति; तत्राह—**प्राग्विवेकविज्ञानोत्पत्तेरिति**। 'नास्ति विशुद्धज्ञानस्वभाव आत्मा, न प्रकाशते चे'ति व्यवहारार्हत्वं चितोऽविद्याकृतः प्रतिबन्धः। तत एव च देहादिभिः मिथ्यैव तादात्म्यमनुभूयते। तदिदमाह—**अविविक्तमिवेति**। मिथ्यासंसृष्टत्वे दृष्टान्तमाह—**यथा शुद्धस्येति**। दार्ष्टान्तिकमाह—**तथा देहादीति**। ननु शरीरात् समुत्थानं नामोत्क्रमणम्, न तु लक्ष्यपदार्थविषयं विवेकज्ञानं, सशरीरत्वमपि

भाष्यभावप्रकाशिका

वस्तुतोऽन्यसंसर्गाभावेऽप्यविद्यावशाद् देहादिभिः संसृष्टमस्य दृष्ट्यादिरूपं भाति। अतस्तद्विवेकापेक्षया स्वरूपाभिनिष्पत्तिर्युक्तेति परिहरति—**प्राग्विवेकेति**। वेदना हर्षभयादयः। दार्ष्टान्तिकमाह—**तथा देहेति**। अन्वयव्यतिरेकसहितश्रुत्या कृतं विवेकज्ञानम् पदार्थपरिशोधनं शरीरात् समुत्थानम्, तस्य विवेकज्ञानस्य फलं केवलात्मस्वरूपसाक्षात्कारः स्वरूपेणाभिनिष्पत्तिरिति श्रुत्यर्थं

न्यायनिर्णयः

अथोक्तं रूपमदेहस्यैव व्यज्यते सदेहस्य तद्व्यक्तिविरोधित्वात्। न हि देहसंबन्धे जीवस्यासाधारणं रूपं प्रकटीभवति, तत्राह—**तच्चेति**। तामेव दृष्टिं व्याचष्टे— **सर्वो हीति**। सदा दृष्ट्यादिरूपं जीवस्य व्यक्तमित्यत्रार्थापत्तिमाह— **अन्यथेति**। अनुपपत्तिमेव स्फुटयति— **तच्चेदिति**। दृष्ट्यादिरूपं सर्वनामार्थः। निष्पत्तिरभिव्यक्तिः। जीवस्य सदा स्वरूपव्यक्तौ फलितमाह— **अत इति**। कालपरिपाकनिमित्तं प्रयत्नविशेषनिमित्तं वेति संदेहादाह— **किमिति**। कालकृतप्रतिबन्धध्वंसोपाधिका वा पुरुषव्यापारोपाधिका वेति संशयादुक्तम्— **किमात्मिकेति**। वस्तुतोऽसंसर्गेऽपि देहादिभिरविद्यया संसृष्टमिवास्य दृष्ट्यादिरूपम्, अतस्तद्विवेकापेक्षया स्वरूपाभिनिष्पत्तिरित्युत्तरमाह— **अत्रेति**। वेदना हर्षादयः। मिथ्यासंसृष्टत्वे दृष्टान्तः— **यथेति**। विवेकादूर्ध्वं स्वरूपेणाभिनिष्पत्तिरपि दृष्टेत्याह— **प्रमाणेति**। उच्यत इत्युक्तितात्पर्यमाह— **प्रागपीति**। शरीरात्समुत्थायेत्यादिश्रुत्यर्थं दर्शयन् दार्ष्टान्तिकमाह— **तथेति**। श्रुतिकृतम् अन्वयव्यतिरेकसहितया 'योऽयं विज्ञानमयः' इत्यादिश्रुत्या सिद्धमिति यावत्। विवेकज्ञानं त्वंपदार्थशोधनम्। स्वरूपाभिनिष्पत्तिमेव विवेकफलभूतां विशिनष्टि— **केवलेति**। ननु देहादुत्थानं नामोत्क्रमणं न पदार्थशोधनं, सदेहत्वं च वास्तवं

---

१. अनेन 'एष सम्प्रसादः' इति श्रुतिरेवं व्याख्याता भवति— एष सम्प्रसादः = जीवः अस्मात् शरीरात् समुत्थाय = शरीराद् विविक्तमात्मानं ज्ञात्वा वेदान्तविचारेण, स्वेन रूपेणाभिनिष्पद्यते = स्वेन विशुद्धचिन्मात्रात्मनाऽभिव्यक्तो भवति, तादृक्स्वरूपगोचरसाक्षात्कारवान् भवतीति यावत्। ततः परं ज्योतिरुपसम्पद्यते। उपसम्पत्तिः अनावृतस्फुरणरूपब्रह्मात्मना ऐक्यपर्यवसिता। शरीरात् समुत्थानं परोक्षज्ञानम्। स्वेन रूपेणाभिनिष्पत्तिः साक्षात्कारः। स च वृत्तिरूपः। तेनाविद्यानिवृत्तौ सत्यां स्वरूपेण स्थितिः ज्योतिरुपसम्पत्तिः। अतः तस्याः अभिनिष्पत्तिपूर्वकालीनत्वाभावात् 'उपसम्पद्य अभिनिष्पद्यते' इत्येतत् 'मुखं व्यादाय स्वपिति' इतिवत् सङ्गमनीयम्। द्र. भामती ३०४, ब्र. वि. ३३५-३३६।

२. 'तदपगमे' इति पाठः स्यात्।

सशरीरत्वं च मन्त्रवर्णात् 'अशरीरं शरीरेषु' (क. उ. १।२।२२) इति, 'शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते' (भ.गी.१३।३१) इति च सशरीरत्वाशरीरत्वविशेषाभावस्मरणात्। तस्माद् विवेक-विज्ञानाभावादनाविर्भूतस्वरूपः सन् विवेकविज्ञानादाविर्भूतस्वरूप इत्युच्यते। न त्वन्यादृशावाविर्भावानाविर्भावौ स्वरूपस्य संभवतः, स्वरूपत्वादेव। एवं मिथ्याज्ञानकृत एव जीवपरमेश्वरयोर्भेदो न वस्तुकृतः, व्योमवदसङ्गत्वाविशेषात्। कुतश्चैतदेवं प्रतिपत्तव्यम्? यतो 'य एषोऽक्षिणि पुरुषो दृश्यते' इत्युपदिश्य 'एतदमृतमभयमेतद् ब्रह्म' इत्युपदिशति। योऽक्षिणि प्रसिद्धो द्रष्टा द्रष्टृत्वेन विभाव्यते सोऽमृताभयलक्षणाद् ब्रह्मणोऽन्यश्चेत् स्यात् ततोऽमृताभयब्रह्मसामानाधिकरण्यं न स्यात्। नापि प्रतिच्छायात्माऽयमक्षिलक्षितो निर्दिश्यते, प्रजापतेर्मृषावादित्वप्रसङ्गात्। तथा द्वितीयेऽपि पर्याये 'य एष स्वप्ने महीयमानश्चरति' इति न

प्रकटार्थविवरणम्

तात्त्विकम्, न त्वविद्याकृतमित्याशङ्क्याह—**तथा विवेकेति**। अशरीरमिति शरीरसंबन्धरहितम्, अथ च शरीरेष्ववस्थितमिति परस्परपराहतिपरिहाराय विवेकस्वभावपर्यालोचनया अशरीरत्वम्; अविद्याकृतं तु सशरीरत्वमत्रावगम्यत इत्यर्थः। ननु स्वकर्मोपार्जिते शरीरे दुःखाद्युपभोगस्यावर्जनीयत्वान्न जीवतः स्वरूपाविर्भावसंभव इत्याशङ्क्याह—**शरीरस्थोऽपीति**। अशरीरो यथा न लिप्यते शरीरदोषेण तथा सशरीरस्यापि व्याप्रियमाणे शरीरे न कर्तृत्वं स्वात्मनि गम्यते, अत एव न लिप्यत इति सशरीरत्वाशरीरत्वयोः विशेषाभावस्मरणात् जीवतोऽपि स्वरूपाविर्भावो न विरुध्यत इत्यर्थः। उपसंहरति—**तस्मादिति**। ज्ञानाज्ञानकृतावाविर्भावानाविर्भावावित्येवं स्थिते सति भेदोऽप्यंशांशिभावादिकृतो निरस्तो भवतीत्याशङ्क्याह—**एवं मिथ्येति**। इतोऽपि ब्रह्मणोऽन्यो जीवः प्रतिपाद्यो न भवतीत्यभ्युपगन्तव्यमित्याह—**कुतश्चेति**। श्रुतिलिङ्गाभ्यां केवलं जीवलिङ्गं बाध्यत इति जीवो ब्रह्मतया व्याख्यायते, न ततोऽप्यतिरिक्तत्वेनेत्यर्थः। ननु न जीवो ब्रह्मतया व्याख्यायते, किं तु 'छाययेत्याशङ्क्याह[1]—**नापि प्रतिच्छायेति**। आत्मान्वेषणाय प्रवृत्तयोर्देवासुरराजयोरनात्मोपदेशे मृषावादित्वमेव स्यादित्यर्थः।

भाष्यभावप्रकाशिका

विभजते—**श्रुतिकृतमिति**। अत्राशरीरत्वं मिथ्याज्ञानाभावे भवति, न शरीरस्यापाय इत्युक्तम्, अत्र प्रमाणमाह—**तथा विवेकेति**। मुख्यावेव किं न स्यातामिति? तत्राह—**न त्वन्यादृशाविति**। न्यायसहितश्रुत्यन्तरावष्टम्भेन जीवब्रह्मभेदो मिथ्येत्युक्तम्, इदानीं प्राजापत्यवाक्यादपि न तद्भेदो वास्तव इत्याह—**कुतश्चेति**। ननु एतज्जीवेन सामानाधिकरण्यं न भवति, किन्तु प्रतिच्छायया प्रतीकत्वाभिप्रायेणेत्याशङ्क्याह—**नापीति**। उपासनाविध्यश्रवणात् प्रतिपादकत्वसंभवे प्रतीकपरत्वकल्पनमयुक्तमिति भावः।

न्यायनिर्णयः

नाविद्यं, प्रसिद्धिविरोधात्, तत्राह— **तथेति**। उक्तश्रुत्यनुरोधेनेति यावत्। देहासंबन्धिनो देहे स्थितिरित्युक्ते विरोधं निरसितुं विवेकतोऽदेहत्वमविवेकतः सदेहत्वं मान्त्रवर्णिकमित्यर्थः। स्वकर्मार्जिते देहे दुःखादिभोगस्यावर्जनीयत्वान्न जीवतः स्वरूपाविर्भाव इत्याशङ्क्याह— **शरीरेति**। अशरीरवदित्यपेरर्थः। जीवतोऽपि स्वरूपस्याविर्भावः स्यादिति शेषः। अविरुद्धे श्रुत्यर्थे सौत्रमाविर्भावपदं युक्तमित्याह— **तस्मादिति**। मुख्यावेव तौ किं न स्यातां, तत्राह— **न त्विति**। ज्ञानाज्ञानाभ्यामाविर्भावानाविर्भावावित्येवं स्थिते सत्यंशांशित्वादिकृतो भेदोऽपि निरस्त इत्याह— **एवमिति**। न्यायसहितश्रुत्या जीवब्रह्मणोर्भेदो मिथ्येत्युक्तम्। सम्प्रति प्राजापत्यवाक्यादपि तद्भेदो मिथ्येत्याह— **कुतश्चेति**। एतद् भिन्नस्य जीवस्याप्रतिपाद्यत्वम्। तन्नास्तित्वमेवमित्युच्यते। कुतःशब्दोक्तं हेत्वन्तरं स्फोरयति— **यत इति**। अतो ब्रह्म प्रत्यग्भूतमत्र प्रतिपाद्यमिति शेषः। उक्तं व्यतिरेकेण विवृणोति— **योऽक्षिणीति**। श्रुतिलिङ्गाभ्यां केवलं जीवलिङ्गं बाधित्वा जीवो ब्रह्मतयोच्यते, नान्यत्वेनेत्यर्थः। प्रतीकाभिप्रायेण छायया ब्रह्मणः

---

१. 'किन्तु छायात्मेत्याशङ्क्याह' इति पाठः स्यात्।

प्रथमपर्यायनिर्दिष्टादक्षिपुरुषाद् द्रष्टुरन्यो निर्दिष्टः, 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' इत्युपक्रमात्। किंचाहमद्य स्वप्ने हस्तिनमद्राक्षं नेदानीं तं पश्यामीति दृष्टमेव प्रतिबुद्धः प्रत्याचष्टे। द्रष्टारं तु तमेव प्रत्यभिजानाति य एवाहं स्वप्नमद्राक्षं स एवाहं जागरितं पश्यामीति। तथा तृतीयेऽपि पर्याये 'नाह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि' इति सुषुप्तावस्थायां विशेषविज्ञानाभावमेव दर्शयति, न विज्ञातारं प्रतिषेधति। यत्तु तत्र 'विनाशमेवापीतो भवति' इति, तदपि विशेषविज्ञानविनाशाभिप्रायमेव, न विज्ञातृविनाशाभिप्रायम्। 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात्' (बृ. उ. ४।३।३०) इति श्रुत्यन्तरात्। तथा चतुर्थेऽपि पर्याये 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्मात्' इत्युपक्रम्य

प्रकटार्थविवरणम्

ननु प्रथमे पर्याये जागरिताभिमानी विश्वो निर्दिष्टः; द्वितीये तु स्वप्नाभिमानी तैजसः; ततो जीवभेदप्रतिपादने तात्पर्यं प्रजापतेर्लक्ष्यते इत्याशङ्क्याह—**तथा द्वितीयेऽपीति**। अवस्थाभेद एव, न त्ववस्थावतो भेदः। प्रत्यभिज्ञायमानत्वाच्चेत्याह—**किं चाहमिति**। नन्विन्द्रेण द्रष्टुः प्रतिषेधात्र तस्य ब्रह्मतया व्याख्यानमित्याशङ्क्याह—**तथा तृतीयेऽपीति**। एवंविधमिति बुद्धिवृत्तिरूपमेव ज्ञानं सुषुप्तौ नास्ति, न स्वरूपस्फुरणस्याप्यभावः, [1]परामर्शासंभवप्रसङ्गादिति भावः। विज्ञातुरात्मनः स्वरूपभूतायाः विज्ञातेः स्वरूपान्यथाभावो नास्ति, विनाशहेत्वभावादित्यर्थः। यच्चागादि चतुर्थे पर्याये जीवमेव दर्शयतीति, तत्राह—**तथा चतुर्थेऽपीति**।

भाष्यभावप्रकाशिका

ननु अवस्थाविशिष्टस्यात्मनस्तेनैक्यमयुक्तमिति, तत्राह—**तथा द्वितीयेऽपीति**। अवस्थाविशेषाणां व्यभिचारित्वप्रदर्शनेन जीवस्यासङ्गत्वप्रतिपादनाम्ना[दनं ना]नुपपन्नमिति भावः। अथवा इतोऽपि न छायापुरुषः प्रतिपाद्यः, किन्तु जीव एव; तस्यावस्थान्तरस्थायित्वादित्याह—**तथेति**। अवस्थाव्यभिचारेऽपि जीवस्वरूपाव्यभिचारात्, तस्यासङ्गत्वं युक्तमित्याह—**किञ्चेति**। ननु ज्ञानस्वरूपत्वादात्मनस्तस्य च सुषुप्तेऽभावप्रतिपादनान्नित्यत्वमयुक्तमिति, तत्राह—**तथा तृतीयेऽपीति**। चतुर्थे पर्यायेऽपहतपाप्मत्वादिगुणः परमात्मा प्रतिपाद्यते, पूर्वत्र तु जीव इत्याशङ्क्याह—**तथा चतुर्थे इति**। तत्पर्यायोपक्रमालोचनायां जीवानुवादेन तस्य ब्रह्मत्वं विवक्षितं भातीति भावः। उपाधिविशिष्टस्य कथं परमात्मनैक्यमित्याशङ्कायामाह—**मघवन्निति**।

न्यायनिर्णयः

सामानाधिकरण्यं, न जीवेनेति नास्ति लिङ्गमित्याशङ्क्याह— **नापीति**। उपास्तिविध्यश्रवणात् प्रतिपादकत्वसंभवे प्रतीकोक्तिकल्पनायोगादात्मान्वेषणाय प्रवृत्तयोः सुरासुरराजयोरनात्मानं वदन् प्रजापतिर्मृषावादी विप्रलम्भकः स्यादतो ब्रह्मणो जीवेन सामानाधिकरण्याल्लिङ्गसिद्धिरित्यर्थः। द्वितीये पर्याये जीवस्यावस्थावैशिष्ट्यदृष्टेराद्येऽपि पर्याये न ब्रह्मैक्यमिष्टमित्याशङ्क्याह— **तथेति**। आद्ये पर्याये जीवब्रह्मसामानाधिकरण्यात् तदैक्यवदित्यर्थः। अवस्थानां व्यभिचारित्वाज्जीवस्यासङ्गत्वाद् युक्ता द्वितीयपर्यायस्यैक्यपरतेति भावः। अवस्थाव्यभिचारे तद्वतोऽपि तद्भावात् कुतोऽसङ्गतेत्याशङ्क्याह— **किंचेति**। आत्मनो ज्ञानरूपत्वात् तस्य च स्वापेऽभावात् कथं तदव्यभिचारितेत्याशङ्क्याह— **तथेति**। पर्यायद्वयं दृष्टान्तयितुं तथेत्युक्तम्। विज्ञातृनिषेधे परामर्शासिद्धिरिति भावः। ज्ञातुरभावोक्तिरपि तत्रास्तीत्याशङ्क्याह— **यत्त्विति**। तत्र बृहदारण्यकश्रुतिं संवादयति— **न हीति**। आत्मनः स्वभावभूतविज्ञप्तेर्नान्यथाभावो [ऽ]योग्यत्वादित्यर्थः। पर्यायत्रयवच्चतुर्थपर्यायालोचनायामपि ब्रह्माव्यतिरिक्तजीवस्य

१. 'सुखमहमस्वाप्सं, न किंचिदवेदिषम्' इति सुप्तोत्थितस्य स्मरणाभावप्रसङ्गादित्यर्थः।

'मघवन् मर्त्यं वा इदं शरीरम्' (छा. उ. ८-१२-१) इत्यादिना प्रपञ्चेन शरीराद्युपाधिसंबन्धप्रत्याख्यानेन संप्रसादशब्दोदितं जीवं 'स्वेन रूपेणाभिनिष्पद्यते' (छा. उ. ८।१२।३) इति ब्रह्मस्वरूपापन्नं दर्शयन्न परस्माद् ब्रह्मणोऽमृताभयस्वरूपादन्यं जीवं दर्शयति।

केचित्तु परमात्मविवक्षायाम् 'एतं त्वेव ते' इति जीवाकर्षणमन्याय्यं मन्यमाना एतमेव वाक्योपक्रमसूचितमपहतपाप्मत्वादिगुणकमात्मानं ते भूयोऽनुव्याख्यास्यामीति कल्पयन्ति। तेषाम् 'एत'मिति संनिहितावलम्बिनी सर्वनामश्रुतिर्विप्रकृष्येत। भूयः श्रुतिश्चोपरुध्येत, पर्यायान्तराभिहितस्य पर्यायान्तरेऽनभिधीयमानत्वात्। 'एतं त्वेव ते' इति च प्रतिज्ञाय प्राक् चतुर्थात् पर्यायादन्यमन्यं व्याचक्षाणस्य प्रजापतेः प्रतारकत्वं प्रसज्येत। तस्माद् यदविद्याप्रत्युपस्थापितमपारमार्थिकं जैवं रूपं कर्तृभोक्तृरागद्वेषादिदोषकलुषितमनेकानर्थयोगि तद्विलयनेन तद्विपरीतमपहतपाप्मत्वादिगुणकं पारमेश्वरं स्वरूपं विद्यया प्रतिपद्यते, सर्पादिविलयनेनेव रज्ज्वादीन्। अपरे तु वादिनः पारमार्थिकमेव जैवं रूपमिति मन्यन्तेऽस्मदीयाश्च केचित्। तेषां

प्रकटार्थविवरणम्

[1]एकदेशिव्याख्यां प्रत्याख्याति— **केचित्त्वित्यादिना**। यस्माद् वाक्यपौर्वापर्यालोचनया जीवानुवादेन ब्रह्मभाव एव विवक्षितः

भाष्यभावप्रकाशिका

आचार्यदेशीयव्याख्यानमाह— **केचित्त्विति**। जीवात्मनोऽपहतपाप्मत्वादिगुणासंभवादिति भावः। दूषयति— **तेषामिति**। किं च वाक्योपक्रमसूचितं वस्तु सर्वत्र परामृश्यते "एतं त्वेव त" इति, किं वा चतुर्थ एव पर्याय इति विकल्प्य, उत्तरपक्षे दूषणमाह— **भूयश्श्रुतिरिति**। अथ वाक्योपक्रमसूचितं सर्वत्र परामृश्यते, न तु प्रतिपाद्यत इति, तत्राह— **एतं त्वेवेति**।

न्यायनिर्णयः

प्रतिपाद्यत्वमित्याह— **तथेति**। कथमुपहितस्यानुपहितपरैक्यमित्याशङ्क्याह— **मघवन्निति**। संप्रसादस्यैव परेणैक्यमुच्यते, न जीवस्येत्याशङ्क्याह— **संप्रसादेति**। स्वरूपेणाभिनिष्पत्तिवचनाद् ब्रह्मस्वरूपापन्नत्वेऽपि न ततोऽन्यत्वं निरस्यते, भिन्नाभिन्नत्वादित्याशङ्क्य विरोधादेकोपाधौ तदयोगादभेदाभावे स्वरूपाभिनिष्पत्तेरयुक्तत्वात् तद्गतभेदस्य कल्पिततत्वमेवेत्याह— **नेति**।

एकदेशिव्याख्यामनुवदति— **केचित्त्विति**। जीवस्यापहतपाप्मत्वाद्ययोगात् तदाकर्षणस्यान्याय्यत्वम्। कथं तर्हि प्रकृतानुगुणतया वाक्यं व्याख्यायते, एतच्छब्देन पूर्वपर्यायेषु प्रकृतजीवानाकर्षणे तदालम्बनाभावाद् वाक्यार्थधियोऽनुदयात्, तत्राह— **एतमिति**। सर्वनामश्रुत्या दूषयति— **तेषामिति**। किंचोपक्रमसूचितोऽर्थश्चतुर्थ एव पर्याये सर्वनामार्थः, सर्वत्र वा? तत्राद्यं प्रत्याह— **भूयः श्रुतिश्चेति**। उपक्रान्तोऽर्थः सर्वत्र सर्वनामार्थोऽपि न प्रतिपाद्यकोटिनिवेशीति द्वितीयमाशङ्क्याह— **एतं त्विति**। स्वयूथ्यमतायोगे फलितमाह— **तस्मादिति**। ब्रह्मैव जीवस्तदित्थं कथमित्याशङ्क्याह— **कर्त्रिति**। तस्य विलापनयोग्यतामाह— **अनेकेति**। कथं तर्हि तत्परिहाण्या पारमार्थिकरूपापत्तिरित्याशङ्क्य सदृष्टान्तमाह— **तदिति**। रज्ज्वादीनेषा रज्जुरित्यादिविद्यया पुरोवर्त्यधिष्ठानमिति शेषः। पौर्वापर्यालोचनया प्राजापत्यवाक्ये जीवानुवादेन ब्रह्मत्वं तस्येष्टमित्युक्तम्। सम्प्रति सूत्रसामर्थ्यात् प्रत्यक्षादिप्रामाण्याच्च जैवं

---

१. 'अन्येषां वाक्यानां प्रत्यगभिन्नवस्तुपरत्वेऽपि न प्रजापतिवाक्यं तत्परम्, अपहतपाप्मत्वादिकीर्तनवैयर्थ्यापत्तेः' इत्येतेषां पक्षः। 'अपरे तु' इत्यादिनाऽग्रे वक्ष्यमाणस्तु— 'कुत्रापि प्रत्यगभिन्नं वस्तु न प्रतिपाद्यते' इत्येवंरूपः। द्र. ब्र. वि. ३३९।

सर्वेषामात्मैकत्वसम्यग्दर्शनप्रतिपक्षभूतानां प्रतिबोधायेदं शारीरकमारब्धम्। एक एव परमेश्वरः कूटस्थनित्यो विज्ञानधातुरविद्यया मायया मायाविवदनेकधा विभाव्यते, नान्यो विज्ञानधातुरस्तीति। यत्त्विदं परमेश्वरवाक्ये जीवमाशङ्क्य प्रतिषेधति सूत्रकारः-'नासंभवात्' (ब्र. सू. १।३।१८) इत्यादिना, तत्रायमभिप्रायः- नित्यशुद्धबुद्धमुक्तस्वभावे कूटस्थनित्ये एकस्मिन्नसङ्गे परमात्मनि तद्विपरीतं जैवं रूपं व्योम्नीव तलमलादि परिकल्पितम्। तदात्मैकत्वप्रतिपादनपरैर्वाक्यैर्न्यायोपेतैर्द्वैतवादप्रतिषेधैश्चापनेष्यामीति परमात्मनो जीवादन्यत्वं द्रढयति। जीवस्य तु न परस्मादन्यत्वं प्रतिपिपादयिषति; किं त्वनुवदत्येवाविद्याकल्पितं लोकप्रसिद्धं जीवभेदम्। एवं हि स्वाभाविककर्तृत्वभोक्तृत्वानुवादेन प्रवृत्ताः कर्मविधयो न विरुध्यन्त इति मन्यते।

प्रकटार्थविवरणम्

तस्मादित्युपसंहारः। ये त्वेतन्नानुमन्यन्ते तेषां शारीरकमेवोत्तरमित्याह—**अपरे त्वित्यादिना**। अविद्याप्रतिबिम्बितत्वेनानेकजीवभावेन, मायाप्रतिबिम्बितत्वेन चेश्वरभावेनेति योजना। ननु सूत्रकारो जैवं वाक्यार्थं प्रतिषेधंस्तत्त्वतो भिन्नं मन्यत इत्याशङ्क्याह— **यत्त्विदमिति**। परमात्मन्युपाधिप्रविष्टे यत् जैवं रूपं तन्निराचिकीर्षया विधेयतत्पदार्थसमर्थने सूत्रकारः प्रवृत्तो, नोद्देश्यस्य तात्त्विकभेदप्रतिपादन इति भावः। निराचिकीर्षितं चेज्जैवं रूपम्, कथं तर्हि निरधिकारिणां विधीनां प्रामाण्यमित्याशङ्क्याह— **एवं हि स्वाभाविकेति**। ननु न क्वापि जीवब्रह्मणोरैक्यं दर्शयति सूत्रकारः, किं तु सर्वत्र भेदमेव; अतो नैक्यं तस्य

भाष्यभावप्रकाशिका

सूत्रकारवचनसामर्थ्यात् प्रत्यक्षादिप्रामाण्याच्च जैवं रूपं पारमार्थिकमिति मतान्तरमाह—**अपरे त्विति**। तेषां शारीरकेणैवोत्तरं दत्तमित्याह—**तेषामिति**। अविद्यामाययोर्भेदाशङ्कां व्यावर्तयति—**अविद्यामाययेति**।

ननु प्रतिषेधादन्यो जीव इति, तत्राह— **यत्त्विदमिति**। संसारिणो जीवाद् भेदप्रदर्शनेन यावदीश्वरस्यासंसारित्वं न प्रदर्श्यते, तावद् भेदव्यपदेशेऽपि जीवस्यासंसारित्वं न सिध्येदित्यभिप्रेत्यापातभेदं दर्शयति सूत्रकार इत्यर्थः। जीवभेदस्य प्रसिद्धत्वाच्च न

न्यायनिर्णयः

रूपं वास्तवमिति मतान्तरमाह— **अपरे त्विति**। शारीरकमेव तेषामुत्तरमित्याह— **तेषामिति**। तत्प्रतिषेधार्थं नैतदारब्धं, सम्यग्ज्ञानार्थत्वादित्याशङ्क्याह— **आत्मेति**। कथमिदमेव तेषामुत्तरमित्युक्ते तदर्थं संगृह्णाति— **एक इति**। तस्य परिणामित्वं वारयति— **कूटस्थेति**। ज्ञानादिगुणवत्त्वं प्रत्याह— **विज्ञानेति**। कथं तस्यैकत्वं, चेतनाचेतनभेदधीविरोधादित्याशङ्क्याह— **अविद्ययेति**। माया ततोऽन्येति वादं व्युदसितुं माययेत्युक्तम्। साधारणासाधारणप्रपञ्चभेदस्याप्रामाणिकत्वात्, अविद्यादिभेदे च मानाभावात्, एकस्मादेवाज्ञानाद्विचित्रशक्तितो विश्वधीसंभवे तद्भेदे गौरवान्न सोऽस्तीत्यर्थः। एकस्यानेकधा भानं नाविद्ययाऽपि दृष्टमित्याशङ्क्य विवर्तानुगुणं दृष्टान्तमाह— **मायावीति**। 'नान्योऽतोऽस्ति' इत्यादिश्रुतेरवधारणार्थमाह— **नेति**। शारीरकार्थसंक्षेपसमाप्तावितिशब्दः। श्रुतिसामर्थ्यादतिरिक्तजीवाभावेऽपि सूत्रसामर्थ्यादन्यो जीवोऽस्तीत्याशङ्क्याह— **यत्त्विति**। आदिशब्देन 'नेतरोऽनुपपत्तेः' इति गृह्यते। संसारिणो जीवाद्भेदोक्त्या यावदीश्वरस्यासंसारित्वं नोच्यते तावदभेदव्यपदेशेऽपि जीवस्यासंसारित्वं न सिध्यतीत्यापातिकं भेदं सूत्रकारोऽनुवदतीत्याह— **तत्रेति**। तत्र तत्र श्रुतिस्मृतीतिहासपुराणेषु प्रमितं परमात्मरूपमनूद्य ततो विपरीतं प्रातीतिकं जीवरूपं तत्र कल्पितमिति सोदाहरणमाह— **नित्येति**। कथं तर्हि तस्य निरसनमित्याशङ्क्याह— **तदात्मेति**। वाक्यानि तत्त्वमसीत्यादीनि। जीवब्रह्मणोश्चैतन्याविशेषात् तदाकारेणाकारान्तरेण वा भेदायोगो न्यायः। 'नेह नाना' इत्यादयो द्वैतवादनिषेधाः। परस्य जीवादन्यत्वे तस्यापि ततोऽन्यत्वं स्यादित्याशङ्क्याह— **जीवस्येति**। अधिष्ठानस्यारोप्यादन्यत्वेऽपि न तस्याधिष्ठानादन्यतेत्यर्थः। कथं तर्हि तस्य परस्मादन्यत्वं, तत्राह— **किंत्विति**। अनुवादस्य प्रमित्यपेक्षां प्रत्याह— **अविद्येति**। अपूर्वत्वाभावाच्च तस्याप्रतिपाद्यतेत्याह— **लोकेति**। जीवभेदस्याप्रामाणिकत्वे कुतो

प्रतिपाद्यं तु शास्त्रार्थमात्मैकत्वमेव दर्शयति–'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र. सू. १।१।३०) इत्यादिना। वर्णितश्चास्माभिर्विद्वदविद्वद्भेदेन कर्मविधिविरोधपरिहारः।।१९।।

अन्यार्थश्च परामर्शः।।२०।।

अथ यो दहरवाक्यशेषे जीवपरामर्शो दर्शितः–'अथ य एष संप्रसादः' (छा. उ. ८।३।४) इत्यादिः, स दहरे परमेश्वरे व्याख्यायमाने न जीवोपासनोपदेशो न प्रकृतविशेषोपदेश इत्यनर्थकत्वं प्राप्नोतीति, अत आह–अन्यार्थोऽयं जीवपरामर्शो न जीवस्वरूपपर्यवसायी। किं तर्हि? परमेश्वरस्वरूपपर्यवसायी। कथम्? संप्रसादशब्दोदितो जीवो जागरितव्यवहारे देहेन्द्रियपञ्जराध्यक्षो भूत्वा तद्वासनानिर्मितांश्च स्वप्नान्

प्रकटार्थविवरणम्

विवक्षितमित्याशङ्क्याह—**प्रतिपाद्यं त्विति**। नन्वैक्यं चेत् प्रतिपाद्यं तर्हि अवश्यं कर्मविधिविरोधः प्रबन्धेन परिहरणीयः। स च न सूत्रकारेण मुखतः परिहृतः, नापि भाष्यकारेणेत्याशङ्क्याह—**वर्णितश्चेति**। तदेवं जीवानुवादेन तस्य ब्रह्मात्मताप्रतिपादने विरोधानुपलम्भात्, प्राजापत्ये च वाक्ये ब्रह्मातिरिक्तस्य जीवस्याप्रतिपाद्यत्वात् न तदवष्टम्भेनापि दहरवाक्ये जीवप्रतिपादनं शङ्कितव्यमिति स्थितम्।

अन्यार्थश्च परामर्शः। एवं प्रासङ्गिकं प्राजापत्यव्याख्यानं परिसमाप्य प्रकृतदहरवाक्यशेषस्य गतिं दर्शयितुं शङ्कामाह—**अथ यो दहरेत्यादिना**। ननु जीववाचके संप्रसादशब्दे श्रूयमाणे कथं परमेश्वरपरत्वं वाक्यस्येत्याह—**कथमिति**। वाक्ययोजनापूर्वकं परमेश्वरे तात्पर्यमाह—**संप्रसादेत्यादिना**।

भाष्यभावप्रकाशिका

प्रतिपाद्यत्वमित्याह—**लोकप्रसिद्धमिति**। अनुवादे च प्रयोजनमाह—**एवं हीति**। ननु आत्मविदः कर्मण्यधिकारः, ततश्च कर्तृत्वादिभेदस्य पारमार्थिकत्वमिति, मैवम्; कर्तृत्वादिविशिष्टस्यात्मत्वाभावात्, तद्विदश्चामुख्यात्मविषयकर्मण्यधिकारात्, तदिदमाह—**वर्णितश्चेति**।।१९।।

अन्यार्थश्च परामर्शः।।२०।। न जीवोपासनेति। वाक्यभेदप्रसङ्गादित्यर्थः। **न प्रकृतेति**। प्रकृतदहराकाशस्य जीवत्वानङ्गीकारादित्यर्थः।।२०।।

न्यायनिर्णयः

निरधिकाराणां विधीनां प्रामाण्यमित्याशङ्क्यानुवादफलमाह— **एवं हीति**। ननु जीवब्रह्मणोरैक्यं न क्वापि सूत्रकारो मुखतो वदति, किंतु सर्वत्र भेदमेवातो नैक्यमिष्टं, तत्राह— **प्रतिपाद्यं त्विति**। आदिपदं 'आत्मेति तूपगच्छन्ती'त्यादिसंग्रहार्थम्। 'विद्वान् यजेत' इत्यादिश्रुत्या कर्मस्वात्मविदोऽधिकारात् कर्तृत्वादेर्वास्तवत्वे कुतो जीवस्य ब्रह्मैक्यं, तदैक्ये वा कुतो विधिविरोधो नेत्याशङ्क्य विशिष्टस्यामुख्यात्मत्वात् तद्विदश्च कर्माधिकारान्मुख्यात्मविद्यावतस्तत्त्यागाधिकारान्न काण्डयोर्विरोधोऽस्तीत्युक्तं स्मारयति— **वर्णितश्चेति**।।१९।।

जीवानुवादेन ब्रह्मताविधाने विरोधाभावात् प्राजापत्ये वाक्ये जीवस्याप्रतिपाद्यत्वान्न तदवष्टम्भेन दहरवाक्ये जीवाशङ्केत्युक्तम्। इदानीं दहरवाक्यशेषस्य गतिमाह— **अन्यार्थश्चेति**। सूत्रव्यावर्त्यां शङ्कामाह— **अथेति**। वाक्यभेदप्रसङ्गं हेतूकृत्योक्तम्— **न जीवेति**। प्रकृतो विशेषो दहराकाशस्तस्यापि नायमुपदेशस्तस्याजीवत्वादित्याह— **नेति**। उत्तरत्वेन सूत्रमवतार्य व्याकरोति— **अत इति**। अन्यार्थत्वमेवाकाङ्क्षाद्वारा स्फोरयति— **किं तर्हीति**। संप्रसादपदे जीववादिनि श्रुते नेश्वरपरत्वं वाक्यस्येत्याक्षिपति— **कथमिति**। व्याख्यया वाक्यस्य परस्मिन्नेव तात्पर्यमाह— **संप्रसादेति**। तादात्म्यविषयत्वं संबन्धविषयत्वं चोभयरूपत्वं

नाडीचरोऽनुभूय श्रान्तः शरणं प्रेप्सुरुभयरूपादपि शरीराभिमानात् समुत्थाय सुषुप्तावस्थायां परं ज्योतिराकाशशब्दितं परं ब्रह्मोपसंपद्य विशेषविज्ञानवत्त्वं च परित्यज्य स्वेन रूपेणाभिनिष्पद्यते। यदस्योपसंपत्तव्यं परं ज्योतिर्येन स्वेन रूपेणायमभिनिष्पद्यते स एष आत्माऽपहतपाप्मत्वादिगुण उपास्य इत्येवमर्थोऽयं जीवपरामर्शः परमेश्वरवादिनोऽप्युपपद्यते।।२०।।

अल्पश्रुतेरिति चेत् तदुक्तम्।।२१।।

यदप्युक्तम्, 'दहरोऽस्मिन्नन्तराकाशः' इत्याकाशस्याल्पत्वं श्रूयमाणं परमेश्वरे नोपपद्यते, जीवस्य त्वाराग्रोपमितस्याल्पत्वमवकल्पत इति, तस्य परिहारो वक्तव्यः। उक्तो ह्यस्य परिहारः परमेश्वरस्यापेक्षिकमल्पत्वमवकल्पत इति 'अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च' (ब्र. सू. १।२।७) इत्यत्र। स एवेह परिहारोऽनुसंधातव्य इति सूचयति। श्रुत्यैव चेदमल्पत्वं प्रत्युक्तं प्रसिद्धेनाकाशेनोपमिमानया 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः' (छा. उ. ८।१।३) इति।।२१।।

।।इति पञ्चमं दहराधिकरणम्।।

शारीरकन्यायसंग्रहः

६।।अनुकृत्यधिकरणम्।।सू.२२–२३।।

अनुकृतेस्तस्य च।।२२।। अपि च स्मर्यते।।२३।। श्रुतार्थपरित्यागादश्रुतार्थोपादानरूपाच्छब्दस्य लक्षणावृत्तिपरिग्रहाद् वरमश्रुतार्थाध्याहारः कल्पनालाघवात्—इति न्यायेन तत्रेति सतिसप्तमीपरिग्रहे सूर्यादयो न भान्तीति वर्तमानतायाः प्रमाणान्तरविरोधात् न भास्यन्तीत्यागामिलक्षणां विहाय कर्मणि सप्तमीपरिग्रहेण न भासयन्तीति णिजर्थमध्याहृत्य यत्सूर्यादिभिरभास्यमानं सूर्यादीनां च भासकं तद् ब्रह्म इति निर्णीतम्।

प्रकटार्थविवरणम्

अल्पश्रुतेरिति चेत्तदुक्तम्। इदानीं दहरश्रुतेः गतिं दर्शयितुमुपक्रमते—**यदप्युक्तमित्यादिना।** तदुक्तमित्यस्यार्थान्तरमाह—**श्रुत्यैवेदमिति।**

।।इति पञ्चमं दहराधिकरणम्।।

भाष्यभावप्रकाशिका

अल्पश्रुतेरिति चेत्तदुक्तम्।।२१।। तदुक्तमित्यस्यार्थान्तरमाह—**श्रुत्यैव चेति।। २१।।** इति पञ्चमं दहराधिकरणम्।।

न्यायनिर्णयः

देहद्वयविषयत्वं वा। यत्तु जीवस्य नापहतपाप्मत्वादीति, तत्राह— **यदिति।।२०।।**

जीवपरामर्शस्य गतिमुक्त्वा दहरश्रुतेः शङ्काद्वारा गतिमाह— **अल्पेति।** शङ्काभागं विभजते— **यदपीति।** तस्य परममहत्त्वादित्यर्थः। जीवेऽपि कथमल्पा 'श्रुतिर्महत्त्वाविशेषात्, तत्राह— **जीवस्येति।** तदुक्तमित्येतद् व्याचष्टे— **उक्तो हीति।** तमेव स्मारयति— **परमेति।** कुत्रेदं समाधानमुक्तं, तत्राह— **अर्भकेति।** तथापि परस्य परममहतो नास्ति दहरत्वमित्यत्र किमायातं, तत्राह— **स एवेति।** तदुक्तमित्यस्य व्याख्यान्तरमाह— **श्रुत्येति।** तदेवं श्रुतिलिङ्गाभ्यां दहरवाक्यं ध्येये परस्मिन्नन्वितं, प्राजापत्यवाक्यं तु ज्ञेये परस्मिन्नन्वितमिति स्थितम्।।२१।।

।।इति पञ्चमं दहराधिकरणम्।।

१. 'अल्पश्रुतिः' 'अल्पत्वश्रुतिः' इति वा पाठः स्यात्।

६।।अनुकृत्यधिकरणम्।।सू. २२-२३।।

अनुकृतेस्तस्य च।।२२।।

'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति'.(मु. उ. २।२।१०) इति समामनन्ति। तत्र यं भान्तमनुभाति सर्वं यस्य च भासा सर्वमिदं विभाति, स किं तेजोधातुः कश्चिदुत प्राज्ञ आत्मेति विचिकित्सायां तेजोधातुरिति तावत् प्राप्तम्। कुतः? तेजोधातूनामेव सूर्यादीनां भानप्रतिषेधात्। तेजःस्वभावकं हि चन्द्रतारकादि तेजःस्वभावक एव

प्रकटार्थविवरणम्

अनुकृतेस्तस्य च। 'आथर्वणगतं वाक्यं पठति—**न तत्रेति।** सतिसप्तमीदर्शनात् विषयसप्तमीदर्शनाच्च[२] संशयमाह—**तत्र यं भान्तमित्यादिना।** [३]पूर्वत्राऽऽत्मश्रुत्यपगतपाप्मत्वादिलिङ्गप्रमाणविरोधादाकाशशब्दस्य रूढिपरित्यागेनेश्वरे वृत्तिरुक्ता। तथेहापि सतिसप्तमीपक्षे योग्यानुपलब्धिविरोधात्र[४] भातीत्यस्य वर्तमानार्थनतापरित्यागेन यस्मिन् सति सूर्यो न भास्यति स तेजोधातुः कश्चिदुपास्य उपदिश्यत इति पूर्वपक्षमाह—**तेजोधातुरिति तावत्प्राप्तमिति।**

भाष्यभावप्रकाशिका

अनुकृतेस्तस्य च।।२२।। तावता कथं तेजोधातुत्वसिद्धिरिति? अत्राह—**तेज इति।** तत्रेति विषयसप्तमीपरिग्रहे न तत्र

न्यायनिर्णयः

'परं ज्योतिरुपसंपद्य' इत्यादिवाक्यार्थविचारप्रसङ्गात् 'तच्छुभ्रं ज्योतिषां ज्योतिः' इति वाक्योक्तपरज्योतिष्ट्वसाधकं 'न तत्रे'त्यादिवाक्यं विमृशति— **अनुकृतेरिति।** आथर्वणवाक्यमादत्ते— **न तत्रेति।** सूर्यस्यानाभासकत्वेऽपि रात्राविव चन्द्रादेर्भासकत्वं, नेत्याह— **नेति।** विद्युतामपि फल्गुत्वमनुभवसिद्धमिति मत्वोक्तम्— **नेमा इति।** कैमुतिकन्यायमाह— **कुत इति।** इतश्च सूर्यादेर्न ब्रह्मणि भासकत्वमित्याह— **तमेवेति।** अनुगमनवदनुभानं स्वगतभानकृतमित्याशङ्क्याह— **तस्येति।** उक्ते वाक्ये विषयं निष्कृष्य सप्तम्याः सति, विषये च साधारण्यहेतोः संशयमाह— **तत्रेति।** पूर्वत्रात्मश्रुत्याद्यविरोधादाकाशशब्दस्य रूढित्यागेनेश्वरे वृत्तिरुक्ता, तथेहापि सतिसप्तम्यां योग्यानुपलब्धिविरोधात्र भातीत्यस्य वर्तमानार्थतात्यागाद् यस्मिन् सति सूर्यो न भास्यति स तेजोधातुरुपास्यत्वेनोच्यत इति पूर्वपक्षमाह— **तेज इति।** उक्ताथर्वणश्रुतेर्निर्विशेषे ज्ञेये ब्रह्मण्यन्वयोक्तेः श्रुत्यादिसंगतयः। पूर्वपक्षे तेजोधातोर्ध्यानं, सिद्धान्ते निर्विशेषब्रह्मधीरिति फलभेदः। सप्तम्या विषयेऽपि संभवादध्याहारस्यायुक्तत्वात्र तेजोधातुरिति शङ्कते— **कुत इति।** विषयसप्तम्या णिजध्याहारादितरत्र लिङ्गानुग्रहात् तेजोधातुरेवायमित्याह— **तेजोधातूनामिति।** कुतोऽस्य तेजोधातोर्लिङ्गतेत्याशङ्क्याह— **तेजःस्वभावकमिति।**

---

१. यद्यप्ययं मन्त्रः कठोपनिषद्यपि समाम्नातः तथापि तत्र परमात्मप्रश्नोत्तरविषयतया तेजःपूर्वपक्षासंभवात् मुण्डकस्थ एवोदाहरणमिति भावः।

२. 'यस्य च भावेन भावलक्षणम्' इति सूत्रविहिता सप्तमी सति सप्तमी। सा चोपपदविभक्तिः। विषयसप्तमी तु वैषयिकाधिकरणे 'सप्तम्यधिकरणे च' इति सूत्रविहिता कारकविभक्तिः। उपपदविभक्तेश्च कारकविभक्तिर्बलीयसी। तत् कथं प्रबलदुर्बलाभ्यां संशय इति चेत्? उच्यते। विषयसप्तमी 'भाति' इत्यत्र 'भासयति' इति णिजर्थाध्याहारसापेक्षा। अन्यथा भानस्याकर्मकत्वेन विषयानपेक्षणात्। उपपदविभक्तिस्तु निरपेक्षा। अतो निरपेक्षत्वेन तस्याः प्राबल्यसंभावनया उभयोः प्राबल्यदौर्बल्यानवधारणनिमित्तः संशयः संभवतीति।

३. अनेन दृष्टान्तसंगतिः प्रदर्शिता। कल्पतरुमते तु नेयं संगतिः संभवति। तन्मते वक्ष्यमाणरीत्या भातीत्यत्र लडर्थात्यागात्। अतस्तत्र प्रकारान्तरमाश्रित्य पूर्वेणाक्षेपसंगतिः प्रदर्शिता।

४. ब्रह्मविद्याभरणे विरोधोऽन्यथा समाहितः। मन्त्रे न भातीत्यस्य स्पष्टं न भातीत्यर्थः। सर्वथा भाननिषेधे प्रत्यक्षविरोधात्, पूर्वापरविरोधाच्च। न हि यस्मिन् सति यत्रैव भाति तत्, तमनुभातीति युक्तम्। अत्र चोपास्यतया कल्प्यमानं तेजः सूर्यादिमण्डलस्थतया कल्प्यते। सूर्यादिषु तदेव तेजः स्पष्टं भाति। तज्ज्योतिषः सूर्यादिज्योतिरविवेकात् 'सूर्यादिः स्पष्टं भाति' इति व्यवहारः भ्रमादिति। अयं च प्रयासः भातीत्यत्र लट्प्रत्ययार्थस्य संरक्षणाय पूर्वपक्षिणा समाश्रित इति।

सूर्ये भासमानेऽहनि न भासत इति प्रसिद्धम्। तथा सह सूर्येण सर्वमिदं चन्द्रतारकादि यस्मिन् न भासते सोऽपि तेजःस्वभाव एक कश्चिदित्यवगम्यते। अनुभानमपि तेजःस्वभावक एवोपपद्यते, समानस्वभावकेष्वनुकारदर्शनात्। गच्छन्तमनुगच्छतीतिवत्। तस्मात् तेजोधातुः कश्चिदित्येवं प्राप्ते ब्रूमः- प्राज्ञ एवायमात्मा भवितुमर्हति। कस्मात्? अनुकृतेः। अनुकरणमनुकृतिः। यदेतत् 'तमेव भान्तमनुभाति सर्वम्' इत्यनुभानं, तत् प्राज्ञपरिग्रहेऽवकल्पते। 'भारूपः सत्यसंकल्पः' (छा. उ. ३।१४।२) इति हि प्राज्ञमात्मानमामनन्ति। न तु तेजोधातुं कंचित् सूर्यादयोऽनुभान्तीति प्रसिद्धम्। समत्वाच्च तेजोधातूनां

प्रकटार्थविवरणम्

'प्रतिज्ञापदमध्याहृत्य सौत्रं हेतुं योजयति—**प्राज्ञ एवायमिति**। यदि सतिसप्तम्यङ्गीकारेण कदाचित् सूर्यादिः यस्मिन् सति भानं न भविष्यति स तेजोधातुः परिगृह्यते, तदा तदनुभानं नोपपद्यते; न ह्यभिभावुकानुकारः क्वचित् प्रसिद्धः; अतः सूर्याद्यविरोधी परमात्मैवेह विवक्षित इति भावः। किं च प्रसिद्धावद्योतकेन सर्वनाम्ना परामर्शो वाक्यान्तरसिद्धपरमात्मपरिग्रह एव युक्तः, नाप्रसिद्धतेजोधातुपरिग्रह इत्याह—**भारूप इत्यादिना**। सूर्यादयो न तेजोधातुमनुभान्ति, तदवान्तरजातीयत्वात् प्रदीपवदित्याह—

भाष्यभावप्रकाशिका

सूर्यो भासयतीति प्रयोगः स्यात्। तदभावाद् वाक्यस्थपदानामनन्वयप्रसङ्गात् सतिसप्तमी स्वीकार्येति मत्वाऽऽह—**तथा सह सूर्येणेति**। ननु यस्मिन् सति न भाति यत्, तत्तमनुभातीति विरुद्धमिति, अत आह—**अनुभानमपीति**। तमनुभातीति तदपेक्षया निकृष्टप्रकाशत्वमुच्यत इत्यर्थः।

तेजसामनुभानं कथं प्राज्ञमात्मानं गमयेदित्याशङ्क्य, श्रुत्यन्तरे तस्य हा[भा]रूपत्वावगमादित्याह—**भारूप इति**। तेजोऽन्तरे प्रमाणाभावाच्चेत्याह—**न तु तेजोधातुमिति**। विरोधाच्चेत्याह—**समत्वाच्चेति**। इदमेव वाक्यं तेजोऽन्तरे प्रमाणमिति नाशङ्कनीयम्, अन्यपरस्य वाक्यस्य प्रमाणान्तरविरोधे देवताधिकरणन्यायासिद्धेरिति भावः। ननु सूर्यादयश्चाक्षुषं तेजोऽपेक्ष्य

न्यायनिर्णयः

प्रसिद्धिमनुरुध्य दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह— **तथेति**। यस्मिन् सति यन्न भाति तत् तमनुभातीति विरुद्धमिति कुतः सतिसप्तमीत्याशङ्क्याह— **अनुभानमिति**। तमनुभातीति तदपेक्षया निकृष्टप्रकाशत्वमिष्टमित्यर्थः। अनुभानस्याविरोधित्वात् प्रागुक्तलिङ्गाच्च कस्यचित् तेजोधातोरुपास्यताऽत्राभीष्टेत्युपसंहरति— **तस्मादिति**। पूर्वपक्षमनूद्य सिद्धान्तमवतार्य प्रतिज्ञामध्याहरति— **एवमिति**। लिङ्गसिद्धं तेजोधातुं त्यक्त्वा कुतोऽयं नियमः स्यादिति शङ्कते— **कस्मादिति**। हेतुमादाय व्याकरोति— **अनुकृतेरिति**। किं तदनुकरणं, तदाह— **यदेतदिति**। तेजसामनुभानं कथं प्राज्ञं ज्ञापयतीत्याशङ्क्य श्रुत्यन्तरे भारूपत्वावधारणादित्याह— **भारूप इति**। तेजोन्तरे मानाभावाच्च न तदिह ग्राह्यमित्यनुभानस्यान्यथासिद्धिं निराह— **न त्विति**। न चेदमेव वाक्यं तत्र मानमन्यपरस्य मानान्तरविरोधे देवताधिकरणन्यायानवतारादिति भावः। विरोधाच्चानुभानं परपक्षे न स्यादित्याह— **समत्वाच्चेति**। ननु सूर्यादयश्चाक्षुषं तेजोऽपेक्ष्य भासन्ते, चक्षुष्मतस्तद्भानात्, तत्राह— **यमिति**। चक्षुषोऽनुद्भूतप्रकाशत्वात् तज्जन्यज्ञानविषयत्वे

---

१. विषयवाक्ये प्राणाकाशादिपदवत् सर्वनामातिरिक्तस्य ब्रह्मणि प्रयुक्तस्य पदस्याभावात् सूत्रे पक्षानिर्देशः। हेतुसामर्थ्यात् पक्ष उन्नेय इति तात्पर्यम्। न्या.र.म. २३५।

२. 'अग्निमेव दहन्तमयोऽनुदहति' इत्यत्राग्निरेव दहति, नायःपिण्डः इति प्रतीयते। तत्तादात्म्यारोपात्तु तत्र दहतीति प्रत्ययः। एवं 'तमेव भान्तमनुभाति' इत्यत्रापि स एव भाति, न सूर्यादिकमित्यर्थः एवकारबलात् प्रतीयते। भानं च स्फुरणम्। तच्च ब्रह्मणः स्वत एव। तत्राध्यस्तस्य जगतोऽपि तत्सत्तयैव सत्तावत् तत्स्फुरणेनैव स्फुरणम्। अत एवोक्तम्—'अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्। आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्' इति। अतोऽध्यासपरिनिष्पन्नं स्वरूपमादाय 'अनुभाति' इत्युक्तम्। अयं चार्थः 'तस्य भासा सर्वमिदं विभाति' इति चतुर्थचरणेन स्पष्टीकृतः। तद्भानं विना सर्वस्य पृथग्भानाभावरूपमनुभानमनुकृतेरित्यनेनोक्तम्। तस्य चेति सर्वभासकत्वमुक्तमिति रत्नप्रभा पृ. २४१।

सूर्यादीनां न तेजोधातुमन्यं प्रत्यपेक्षाऽस्ति यं भान्तमनुभायुः। न हि प्रदीपः प्रदीपान्तरमनुभाति। यदप्युक्तं समानस्वभावकेष्वनुकारो दृश्यत इति। नायमेकान्तो नियमः। भिन्नस्वभावकेष्वपि ह्यनुकारो दृश्यते। यथा सुतप्तोऽयःपिण्डोऽग्न्यनुकृतिरग्निं दहन्तमनुदहति, भौमं वा रजो वायुं वहन्तमनुवहतीति। अनुकृतेरित्यनुभानसुसूचत्[1]। तस्य चेति चतुर्थं पादमस्य श्लोकस्य सूचयति। 'तस्य भासा सर्वमिदं विभाति' इति तद्धेतुकं भानं सूर्यादेरुच्यमानं प्राज्ञमात्मानं गमयति। 'तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्' (बृ. उ. ४।४।१६) इति हि प्राज्ञमात्मानमामनन्ति। तेजोन्तरेण सूर्यादितेजो विभातीत्यप्रसिद्धम्; विरुद्धं च, तेजोन्तरेण तेजोन्तरस्य प्रतिघातात्। अथवा न सूर्यादीनामेव श्लोकपरिपठितानामिदं तद्धेतुकं विभानमुच्यते। किं तर्हि? 'सर्वमिदम्' इत्यविशेषश्रुतेः सर्वस्यैवास्य नामरूपक्रियाकारकफलजातस्य याऽभिव्यक्तिः सा ब्रह्मज्योतिःसत्तानिमित्ता। यथा सूर्यादिज्योतिःसत्तानिमित्ता सर्वस्य रूपजातस्याभिव्यक्तिस्तद्वत्।

प्रकटार्थविवरणम्

समत्वाच्चेति। परोक्तं व्यभिचारेण परिहरति—**नायमेकान्त इति**।

सूत्रस्यैकं भागं व्याख्याय भागान्तरमवतारयति—**अनुकृतेरितीति**। पूर्वं सर्वशब्दं प्रकृतविषयं परिगृह्य व्याख्यातम्। इदानीं सर्वशब्दस्यासङ्कुचितवृत्तितामुपादाय व्याचष्टे—**अथ वेत्यादिना**।

भाष्यभावप्रकाशिका

प्रकाशन्ते। अन्धस्याप्रकाशनादिति, अत आह—**यं भान्तमनुभायुरिति**। लोचनस्यानुद्भूतप्रकाशत्वात् तज्जन्यज्ञानविषयत्वमेवादित्यादेः, न तु सजातीयप्रकाशापेक्षेति भावः। तदेतदुपपादयति— **न हीति**। उक्तमनुभाषते—**यदपीति**। तत्रानुकारः स्वभावसाम्यमपेक्षते, किं वा क्रियासाम्यम्। यद्याद्यः, तत्राह—**नायमिति**। उत्तरपक्षस्त्वङ्गीक्रियत इत्याह—**भौममिति**। तत्र वह्न्ययःपिण्डयोर्यद्यपि दहनक्रिया न भिद्यते; तथापि द्रव्यभेदेन क्रियाभेदं कल्पयित्वा क्रियासादृश्यं व्याख्येयम्। वायुरजसोस्तु नितयदिग्देशं वहनमस्त्येवेति भावः। स्वोक्तहेतोरसौत्रत्वमाशङ्क्याह—**अनुकृतेरिति**। हेत्वन्तरपरतया सूत्रस्य द्वितीयपदमवतारयति—**तस्य चेति**। तस्य हेतुत्वमर्थमाह—**तस्येति**। तावता कथं प्राज्ञत्वमिति? अत्राह—**तद्देवा इति**। स्वपक्षे प्रमाणं दर्शयित्वा परपक्षे तदभावमाह—**तेजोऽन्तरेणेति**। सर्वशब्दस्यार्थान्तरमाह—**अथवेति**।

न्यायनिर्णयः

सूर्यादेर्न सजातीयापेक्षेति भावः। तदेव दृष्टान्तेन स्पष्टयति— **न हीति**। पूर्ववादिनोक्तमनुभाषते— **यदपीति**। गच्छन्तमनुगच्छतीति समानस्वभावकेष्वनुकारादनुभानात् तेजसां सूर्यादीनां सति यस्मिन् भानं निषिध्यते सोऽपि कश्चित् तेजोधातुरित्यनुवादार्थः। अनुकारः स्वभावसाम्यमपेक्षते, क्रियासाम्यं वा? नाद्य इत्याह— **नायमिति**। द्वितीयमङ्गीकुर्वन्नाह— **भौमं वेति**। अग्न्ययःपिण्डयोर्दहनक्रियाभेदाभावेऽपि द्रव्यभेदेन क्रियाभेदं कल्पयित्वा क्रियासाम्यम्। वायुरजसोस्तु नियतदिग्देशगमनमस्त्येव। प्रकृतेऽपि सूर्यादेर्ब्रह्मणश्च तुल्यं भानमिति भावः। हेतोरसूत्रानुसारित्वमाशङ्क्योक्तम्— **अनुकृतेरितीति**। सूत्रस्य द्वितीयं पदं हेत्वन्तरत्वेनावतारयति— **तस्य चेति**। चतुर्थपादोपात्तं हेत्वन्तरं स्फोरयति— **तस्येति**। कथमेतावता तस्य प्राज्ञत्वं, तत्राह— **तदिति**। स्वपक्षे मानमुक्त्वा परपक्षे तदभावमाह— **तेजोन्तरेणेति**। न केवलं मानाभावः, तद्विरोधश्चेत्याह— **विरुद्धं चेति**। कुतो प्रकृतसूर्यादिविषयतया सर्वशब्दो व्याख्यातः। सम्प्रति तस्यासंकुचद्वृत्तित्वं मत्वा व्याख्यान्तरमाह— **अथवेति**। सर्वनाम्ना प्रकरणादपि ब्रह्मैवात्र ग्राह्यमित्याह— **नेति**। ब्रह्मज्योतिर्गतविकारातिरेकेण तत्सत्तामात्रायत्तं सर्वभानं, तत्राह— **यथेति**।

---

१. सूत्रे अनुभानादिति वक्तव्ये 'अनुकृतेः' इति सामान्योक्तिः ब्रह्माध्यस्तं सूर्यादि ब्रह्मसत्तयैवास्तीतिवत् ब्रह्मसत्तयैव स्फुरति, अनुभवव्यक्त्यन्तरस्याकल्पनीयत्वात् इति श्रौतावधारणानुग्राहकोपपत्तिसूचनार्थम्। तस्येति मन्त्रगतचतुर्थपादग्रहणं तदर्थसर्वप्रपञ्चभासकत्वरूपहेत्वन्तरप्रदर्शनार्थम्। पञ्चम्यश्रवणात् हेतुत्वस्यास्फुटत्वात् तत्स्फुटीकरणार्थश्चकारः। न्या.र.म. २३४-२३५।

'न तत्र सूर्यो भाति' इति च तत्रशब्दमाहरन् प्रकृतग्रहणं दर्शयति। प्रकृतं च ब्रह्म 'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतम्' (मु. उ. २।२।५) इत्यादिना। अनन्तरं च 'हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्। तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः' (मु. उ. २।२।९) इति। कथं तज्ज्योतिषां ज्योतिरित्यत इदमुत्थितम्—'न तत्र सूर्यो भाति' इति। यदप्युक्तं सूर्यादीनां तेजसां भानप्रतिषेधस्तजोधातावेवान्यस्मिन्नवकल्पते, सूर्य इवेतरेषामिति। तत्र तु स एव तेजोधातुरन्यो न संभवतीत्युपपादितम्। ब्रह्मण्यपि चैषां भानप्रतिषेधोऽवकल्पते। यतो यदुपलभ्यते तत् सर्वं ब्रह्मणैव ज्योतिषोपलभ्यते, ब्रह्म तु नान्येन ज्योतिषोपलभ्यते, स्वयंज्योतिःस्वरूपत्वात्,

प्रकटार्थविवरणम्

किं च 'प्रकरणादपि ब्रह्मैव ग्राह्यमित्याह—**न तत्र सूर्यो भातीति चेति**। किं च स्पष्टं ब्रह्माभिधायकपूर्वमन्त्रस्याकाङ्क्षापूरकत्वादस्त्युत्तरो मन्त्रो ब्रह्मपर इत्याह—**अनन्तरं चेत्यादिना**। हिरण्मये ज्योतिर्मये अन्नमयाद्यपेक्षया परे कोश आनन्दमये; पुच्छप्रतिष्ठाभूतं यद् ब्रह्म विरजमागन्तुकमलरहितम्, निष्कलं निरवयवं तच्छुभ्रं स्वभावतो निर्मलम्[2]; ज्योतिषां सूर्यादीनां ज्योतिर्भासकम्; तच्चात्मविदामनुभवसिद्धमित्यर्थः। सूर्याभिभावके तेजोधातौ प्रमाणान्तरसिद्धे सति तस्येह ग्रहणं न्याय्यं न वेति चिन्तावतारः स्यात्; तत्सद्भावे प्रमाणाभावात् स एव नास्तीत्याह—**तत्र स एवेति**। एवं तावत् परोक्तं निरस्य इदानीं तत्रेति विषयसप्तमीयम्, तं सूर्यादयो न भासयन्तीति णिजर्थाध्याहारेण[3] सूर्यादेरगोचरः स्वयंप्रकाशः सर्वस्य चिदाभासेन भासकः परमात्माऽत्र प्रतिपाद्य इति रहस्यमाह—**ब्रह्मण्यपि चैषामिति**।

भाष्यभावप्रकाशिका

ननु व्यवहितप्रकरणत्वादिह सम्बन्धो नोपपद्यत इति, तत्राह—**अनन्तरं चेति**। अपेक्षितानपेक्षिताभिधानयोरपेक्षिताभिधानं न्याय्यम्; दृष्टार्थत्वादित्याह—**कथं तदिति**। ननु यद्यपि ब्रह्मणि प्रमाणं समस्ति; तथापि तस्मिन् सति न भातीति विरुद्धम्; आत्मनः सदा भानादिति, तत्राह—**ब्रह्मण्यपीति**। अयं भावः—तत्रेति न सतिसप्तमी, किन्तु विषयसप्तमी। तत्र ब्रह्मणि प्रकाशयितव्ये प्रकाशकतया सूर्यादयो न भान्ति, किन्तु ब्रह्मैव सूर्यादिषु प्रकाशयितव्येषु प्रकाशकत्वेन भातीति। अथवा सतिसप्तमीपरिग्रहेण तेजोऽन्तरस्वीकारे न भान्तीति वर्तमानव्यपदेशात् तत्र च प्रमाणान्तरविरोधात्र भास्यन्तीति लक्षणया श्रुतार्थपरित्यागेनाश्रुतार्थोपादाने

न्यायनिर्णयः

प्रकृतपरामर्शेऽपि कुतो ब्रह्म गृह्यते तत्राह— **प्रकृतं चेति**। प्रकृतमपि ब्रह्म व्यवहितत्वान्नेह संबन्धार्हमित्याशङ्क्याह— **अनन्तरं चेति**। हिरण्मयो ज्योतिर्मयोऽन्नमयाद्यपेक्षया परश्चायं कोशो यमानन्दमयमाचक्षते, तत्र 'ब्रह्म पुच्छं प्रतिष्ठा' इति यत् प्रतिष्ठाभूतं ब्रह्म तत् प्रतिष्ठितं, तच्च विरजमागन्तुकमलविकलं, निष्कलं निरवयवं, शुभ्रं नैसर्गिकदोषरहितम्। ज्योतिषां सूर्यादीनां ज्योतिरवभासकम्। तच्च विदुषामनुभवसिद्धमित्यर्थः। उदाहरणमपेक्ष्याव्यवहितं ब्रह्मेत्युक्तम्। सम्प्रत्यपेक्षितानपेक्षिताभिधानयोरपेक्षिताभिधानं न्याय्यमाकाङ्क्षापूरकत्वेन दृष्टार्थत्वादिति विवक्षित्वोक्तम्— **कथमिति**। स्पष्टब्रह्मवादिपूर्वमन्त्राकाङ्क्षापूरकत्वादुत्तरोऽपि मन्त्रो ब्रह्मपर इत्यर्थः। सतिसप्तमीमादायोक्तमनुभाषते— **यदपीति**। सूर्याद्यभिभावके तेजोधातौ प्रामाणिके तस्येह ग्रहो न वेति चिन्ता। तद्भावे मानाभावान्न सोऽस्तीत्याह— **तत्रेति**। ननु ब्रह्मणि प्रामाणिकेऽपि तस्मिन् सति सूर्यादयो न भान्ति[4], तस्य सदा भावात् तेषां सदा भानाभावप्रसङ्गात्, तत्राह— **ब्रह्मणीति**। तत्रेति न सतिसप्तमी, किंतु विषयसप्तमी। ततो ब्रह्मणि विषये सूर्यादयो न भान्ति, ब्रह्मैव तेषु प्रकाशकत्वेन भातीत्यर्थः। यद्वा सतिसप्तमीं गृहीत्वा तेजोन्तरोक्तौ न भातीति वर्तमानापदेशे मानान्तरविरोधात्र

१. तेजोधातुलिङ्गस्य निरस्तत्वात् प्रकरणं ब्रह्मसाधकमिति भावः। प्रकरणं लिङ्गं बाधितुं नालमिति मत्त्वा 'तत्रशब्दमाहरन्' इति भाष्यस्वारस्यानुरोधेन च प्रकृतपरामर्शकतच्छब्दश्रुतिप्रदर्शनपरतया व्याख्यानं भामत्याम्। २. स्वाभाविकमलमविद्या। परमार्थतस्तद्रहितमित्यर्थः।

३. 'तस्मिन् विषये सूर्यादिकं न भाति' इत्युक्ते प्रकाशकं न भवति इत्येवार्थः स्वरसतः प्रतीयत इति नाध्याहारावश्यकता इति भामती। द्र. कल्पतरुः।

४. 'इति न युक्तम्' इति शेषः पूरणीयः प्रतिभाति।

येन सूर्यादयस्तस्मिन् भायुः। ब्रह्म ह्यन्यद् व्यनक्ति, न तु ब्रह्मान्येन व्यज्यते। 'आत्मनैवायं ज्योतिषाऽऽस्ते' (बृ. उ. ४।३।६) 'अगृह्यो न हि गृह्यते' (बृ. उ. ४।२।४) इत्यादिश्रुतिभ्यः।।२२।।

अपि च स्मर्यते।।२३।।

अपि चेदृग्रूपत्वं प्राज्ञस्यैवात्मनः स्मर्यते भगवद्गीतासु–'न तद्भासयते सूर्यो न शशाङ्को न पावकः। यद्गत्वा न निवर्तन्ते तद्धाम परमं मम'। इति, 'यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्'। (भ. गी. १५।६,१२) इति च।।२३।।

।।इति षष्ठमनुकृत्यधिकरणम्।।

प्रकटार्थविवरणम्

अपि च स्मर्यते। णिजर्थाध्याहारेण सूर्याद्यविषयत्वे स्मृतिसंवादमाह—**अपि चेदृग्रूपमिति।** सर्वावभासकत्वेऽपि [१]स्मृतिसंवादमाह—**यदादित्यगतमिति।** मामकं मदीयं यच्चैतन्यज्योतिः, सत्ता[तत्सत्ता]ऽधीनसद्भावत्वादित्यर्थः।

भाष्यभावप्रकाशिका

गौरवात्, श्रुतार्थापरित्यागेनाध्याहार एव श्रेयान्; कल्पनालाघवात्। अतो न भासयन्तीति णिजर्थमध्याहृत्य सूर्यादिभिरनवभास्यं ब्रह्मैव तेषामवभासकम्, न तेजोऽन्तरमिति स्वीकार्यमिति भावः। ननु यस्माद् घटादिरुपलभ्यते, तदपि ब्रह्मणोपलभ्यते चेत्, ब्रह्माप्यन्येनोपलभ्येतेति, अत आह—**ब्रह्म तु नान्येनेति।** येनोपलभ्यत्वेन हेतुना सूर्यादयस्तस्मिन् भायुः तथा ब्रह्म न त्वन्येनोपलभ्यते, स्वयज्ज्योतिःस्वरूपत्वादिति योजना। एतदुपपादयति—**ब्रह्म हीति।** स्वप्रकाश्यत्वादर्शनात् सर्वप्रकाशकस्य नान्यप्रकाश्यत्वमिति भावः।।२२।।

अपि च स्मर्यते।।२३।। न तद्भासयत इत्यग्राह्यत्वम्, यदादित्यगतमिति तस्यैव ग्राहकत्वमिति विशेषः।।२३।। इति षष्ठमनुकृत्यधिकरणम्।

न्यायनिर्णयः

भास्यतीति लक्षणायां श्रुतत्यागेनाश्रुतस्वीकारे गौरवात् तदत्यागेनाध्याहारे लाघवान्न भासयतीति णिजर्थमध्याहृत्य सूर्याद्यभास्यं ब्रह्मैव तद्भासकमिहाभीष्टमिति भावः। यस्माद् घटादिरुपलभ्यते तदपि ब्रह्मणोपलभ्यते चेद् ब्रह्मापि केनचिदन्येनोपलभ्येताविशेषादित्याशङ्क्याह— **ब्रह्म त्विति।** येनोपलभ्यत्वेन सूर्यादयस्तस्मिन् ब्रह्मणि विषये भायुस्तथा ब्रह्म नान्येनोपलभ्यते स्वयंज्योतिःस्वरूपत्वादन्यकृतोपलम्भानपेक्षणादित्यक्षरयोजना। तदुपपादयति— **ब्रह्म हीति।** स्वप्रकाशस्य प्रकाश्यत्वादर्शनादशेषप्रकाशकं ब्रह्म नान्यप्रकाश्यमित्यर्थः। ब्रह्मणः स्वयंज्योतिष्ट्वेन सर्वभासकत्वे मानमाह— **आत्मनेति।** तस्यान्यानवभास्यत्वेऽपि श्रुतिमाह— **अगृह्य इति।।२२।।**

णिजध्याहारेण ब्रह्मणः सूर्याद्यविषयत्वे श्रुत्युक्ते स्मृतिमाह— **अपीति।** सूत्रं व्याकरोति— **अपि चेति।** तत्राग्राह्यत्वे स्मृतिमाह— **न तदिति।** ग्राहकत्वेऽपि तामाह— **यदादित्येति।** तदेवं 'न तत्र' इत्यादिवाक्यं ज्योतिषां ज्योतिषि ज्ञेये परस्मिन्नन्वितमिति।।२३।। इत्यनुकृत्यधिकरणम्।।

---

१. ननु श्रुतिस्मृत्योरुपबृंहणीयोपबृंहणभावात् निश्चितस्मृत्यर्थानुसारेण संदिग्धश्रुत्यर्थो निर्णेय इति स्मृत्युपन्यासः सूत्रे। तत्र द्वितीया स्मृतिः न प्रकृतार्थोपबृंहणं भवितुमर्हति। श्रुतौ हि ब्रह्मभानाभिन्नसर्वजगद्भानमुक्तम्। स्मृतौ तु आदित्यादिगततेजः परमात्मसम्बन्धीतीत्यर्थभेदात् इति चेत्? उच्यते। आद्यमेव प्रकृतोपबृंहणम्। तत्र सूर्याद्यभास्यत्वोक्त्या 'न तत्र सूर्यः' इत्यत्र विषयसप्तम्याः 'भाति' इत्यस्य 'भासयति' इत्यर्थस्य च निर्णयात्। द्वितीयं तु यथाऽऽदित्यादितेजः परमात्मसम्बन्धि तथा घटपटादिभानमपि इति दृष्टान्तार्थम्। ब्र. वि. ३५०।

'तमेव भान्त'मित्यस्य ब्रह्मस्फुरणेनैव स्फुरणवत्त्वमित्यर्थकतायां तु सूर्यादीनां परमात्मतेजोऽनुप्रवेशेन तेजस्वित्वप्रतिपादिका स्मृतिः भवत्येवोपबृंहणमिति ध्येयम्। न्या. र. म. २३५।

७।।प्रमिताधिकरणम्।।सू. २४-२५।।

शब्दादेव प्रमितः।।२४।।

'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति' इति श्रूयते; तथा 'अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः। ईशानो भूतभव्यस्य स एवाद्य स उ श्वः। एतद्वै तत्' (क. उ. २।४।१२,१३) इति च। तत्र योऽयमङ्गुष्ठमात्रः पुरुषः श्रूयते स किं विज्ञानात्मा किंवा परमात्मेति संशयः। तत्र परिमाणोपदेशात् तावद् विज्ञानात्मेति प्राप्तम्।

शारीरकन्यायसंग्रहः

शब्दादेव प्रमितः।।२४।। हृद्यपेक्षया तु मनुष्याधिकारत्वात्।।२५।। लौकिकात् सामान्यतोदृष्टानुमानात् तात्पर्यवद्वाक्यं बलीयः, वाक्यगोचरविषयादन्यत्रैव व्याप्तेः सावकाशत्वात्—इति न्यायेन तत्त्वमस्यादितादात्म्यप्रतिपादकवाक्येनानेकपदार्थसामर्थ्यलक्षणेन परस्परविरुद्धस्वभावयोर्जीवब्रह्मणोरैक्यं नास्ति तमःप्रकाशयोरिव इत्याद्यनुमानं बाधित्वा विरुद्धांशपरित्यागेनाविरुद्धांशलक्षणया चैकत्वं प्रतिपादितम्।

अथ वा जीवब्रह्मणोरप्रत्यक्षयोः भेदोऽप्यप्रत्यक्षः। अप्रत्यक्षस्य भेदस्य प्रत्यक्षत्वमङ्गीकृत्य इदमुच्यते। संभावितदोषात् प्रत्यक्षादसंभावितदोषं तात्पर्यवद्वाक्यं बलीयः, दूरवर्तितया संभावितदोषसर्पप्रत्यक्षात् समीपवर्तितयाऽसंभावितदोषाप्तवाक्यस्य तात्पर्यवतः प्राबल्यदर्शनात्—इति न्यायेन जीवब्रह्मणोः भेदप्रत्यक्षं बाधित्वा ऐक्यमुक्तम्। अथ वाऽनूद्यमानगतधर्मस्य प्रतिपाद्यमानधर्मविरोधे सति स बाध्यः, प्रतिपाद्यमानस्य तात्पर्यवत्त्वात्—इति न्यायेन अङ्गुष्ठपरिमाणबाधया ईशानत्वं जीवस्योपपादितम्।

प्रकटार्थविवरणम्

शब्दादेव प्रमितः। काण्ववाक्यं [काठकवाक्यं] पठति—**अङ्गुष्ठमात्र इति।** आत्मनि शरीरे, मध्ये हृदये। अधूमकं ज्योतिरिवाप्रकम्प्यप्रकाशरूपः कालत्रयपरिच्छेद्यस्य नियन्ता, स एवाद्य वर्तते, श्वोऽपि स एव भविता, एतद्वै तद्यत्पृष्टं नचिकेतसा। [1]परिमाणेशानशब्दाभ्यां संशयमाह—**तत्र योऽयमिति।** पूर्वत्रानुभानादिलिङ्गेन विषयसप्तमीं परिगृह्य णिजर्थाध्याहारेण सूर्यादिरगोचरो ब्रह्मेत्युक्तम्, तथेहापि परिमाणलिङ्गेन जीवं परिगृह्येशानोऽस्मीति चेतो धारयेदिति विध्यध्याहारेणोपासनपरं वाक्यमिति

न्यायनिर्णयः

परस्य ज्योतिष्ट्वोक्तेर्ज्योतिरिवेत्युपमीयमानपुरुषस्य ततोऽर्थान्तरत्वमाशङ्क्योक्तम्— **शब्दादिति।** काठकवाक्यं पठति— **अङ्गुष्ठेति।** स्वाभाविकं परिच्छेदं वारयति— **पुरुष इति।** पूर्णत्वात् सर्वत्रोपलब्धेर्नाङ्गुष्ठमात्रतेत्याशङ्क्य विशेषव्यक्तिस्थानद्वारा तद्योगमाह— **मध्य इति।** आत्मनि देहे मध्ये हृदयसद्मनीत्यर्थः। तस्यैव परात्मत्ववादिवाक्यान्तरमाह— **तथेति।** अधूमकं ज्योतिरकलुषितमेकरूपं प्रकाशमात्रं यथा दृष्टं तथाऽयमपि कूटस्थप्रकाशधातुरित्याह— **ज्योतिरिति।** ज्योतिःपरत्वादधूमकमिति लिङ्गव्यत्ययः। शोधितत्वमर्थस्य तदर्थतामाह— **ईशान इति।** भूतभव्यग्रहणं भवतोऽपि प्रदर्शनार्थम्। कालत्रयपरिच्छेद्यस्य नियन्तेति यावत्। अद्वितीयत्वमाह— **स एवेति।** वर्तमाने काले स एवास्ति, श्वो भविष्यत्यपि काले स एव भविता, अतीतेऽपि काले स एवासीत्। यत्रचिकेतसा पृष्टम् 'अन्यत्र धर्मात्' इत्यादिना, तदेतदेवेत्याह— **एतदिति।** विषयमनूद्य परिमाणोक्तेरीशानशब्दाच्च संशयमाह— **तत्रेति।** पूर्वत्रानुभानादिना विषयसप्तम्या णिजध्याहारेण सूर्यादिरगोचरो ब्रह्मेत्युक्तं, तथेहापि परिमाणलिङ्गाज्जीवमादायेशानोऽस्मीति चेतो धारयेदिति विध्यध्याहारेणोपास्तिपरं वाक्यमिति पूर्वपक्षयति— **तत्रेति।** पठितकाठकश्रुतेर्निर्विशेषे

---

१. परिमाणलिङ्गस्योपक्रमस्थत्वेन प्राबल्यसंभावनया लिङ्गश्रुत्योः बलाबलानवधारणनिमित्तः संशयः।
ननु दहराधिकरणे परमात्मनोऽपि अल्पपरिमाणत्वमुक्तम्। तत् कथं जीवस्यासाधारणमिति चेत्? उच्यते। तत्र स्थानविशेषं निर्दिश्य दहरत्वोक्त्या औपाधिकं तद् भवेत्। इह तु न स्थानविशेषः स्पष्टं निर्दिष्टः। यत्तु 'मध्य आत्मनि' इति श्रुतं तत्र आत्मशब्दः स्वभाववाची वा जीववाची वा ब्रह्मवाची वेत्यनिर्धारितम्। अतो जीवस्याल्पपरिमाणत्वं तदुपाधेरन्तःकरणस्य तत्त्वमादाय युज्यते। न चैतदप्यौपाधिकमेवेति न परमात्मनो विशेषकमिति वाच्यम्। अस्योपाधेः परित्यागे जीवत्वस्यैव त्यागात् अस्य परिमाणस्य स्वाभाविकत्वाभिमानात्। द्र. भामती, कल्पतरुश्च।
अपि च ब्रह्मविषयमल्पपरिमाणश्रवणमुपाधिसंकीर्तननियतम्। जीवविषयं तु तद्रहितमपि। अत उपाधिसङ्कीर्तनरहितमिदं जीवविषयमभ्युगतमिति परिमले। पृ. ३१५।

न ह्यनन्तायामविस्तारस्य परमात्मनोऽङ्गुष्ठपरिमाणमुपपद्यते। विज्ञानात्मनस्तूपाधिमत्त्वात् संभवति कयाचित् कल्पनयाऽङ्गुष्ठमात्रत्वम्। स्मृतेश्च– 'अथ सत्यवतः कायात् पाशबद्धं वशं गतम्। अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्'। (म. भा. ३।२९७।१७) इति। न हि परमेश्वरो बलाद् यमेन निष्क्रष्टुं शक्यः। तेन तत्र संसार्यङ्गुष्ठमात्रो निश्चितः। स एवेहापीत्येवं प्राप्ते ब्रूमः– परमात्मैवायमङ्गुष्ठमात्रपरिमितः पुरुषो भवितुमर्हति। कस्मात्? शब्दात् 'ईशानो भूतभव्यस्य' इति। न ह्यन्यः परमेश्वराद् भूतभव्यस्य

प्रकटार्थविवरणम्

पूर्वपक्षमाह–तत्र **परिमाणोपदेशादिति**। किं च स्मृतिसंवादादप्यङ्गुष्ठमात्रो जीव इत्याह—**स्मृतेश्चेति**। प्रकरणानुगृहीतेन निरङ्कुशैश्वर्यलिङ्गेन[1] केवलं जीवलिङ्गमवबाध्य पारमेश्वरमेवेदं वाक्यमिति सिद्धान्तमाह—**परमात्मैवायमित्यादिना**।

भाष्यभावप्रकाशिका

शब्दादेव प्रमितः॥२४॥ परिमाणोपदेशादिति। अयं भावः—यद्यपि क्वचित् परिमाणमुपदिश्यत उपासनार्थत्वेन; तथाप्यत्रानुपासकवाक्ये परिमाणोपदेशो न युक्त इति। ननु लिङ्गाच्छ्रुतेः प्राबल्याद् "ईशान" इति श्रुत्या परमात्माऽवगम्यते, न जीव इत्याशङ्क्य परमात्मपरिग्रहेऽङ्गुष्ठपरिमाणोपदेशस्यात्यन्तबाधः स्यात्, जीवपरिग्रहे तु कतिपयेशितृत्वादीशानत्वमुपपद्यत इत्यभिप्रेत्याह— **न ह्यनन्तेति**। **कयाचिदिति**। हृदयकमलकोशस्याङ्गुष्ठमात्रत्वादिति भावः। ननु तत्रापि श्रूयमाणः परमात्मा किं न स्यादिति? तत्राह—**न हीति**।

न्यायनिर्णयः

प्रत्यग्ब्रह्मण्यन्वयोक्तेः श्रुत्यादिसंगतयः। पूर्वपक्षे जीवस्योपास्तिः, सिद्धान्ते तस्यैव परात्मतया धीरिति फलभेदः। परस्योपासनायै क्वचित् परिमाणोक्तावपि वस्तुपरत्वेन त्वदिष्टे वाक्ये तदयोगाज्जीवग्रहोऽत्रेति मत्वोक्तम्— **परिमाणेति**। श्रुतेरेव लिङ्गाद् बलीयस्त्वादीशानश्रुत्या परमात्मावगतौ कुतो जीवशङ्केत्याशङ्क्य परमात्मनि परिमाणोक्तेरत्यन्तबाधाज्जीवे कतिपयेशितृत्वादीशानत्वसिद्धेर्गौणी श्रुतिरित्याशयेनाह— **न हीति**। जीवस्यापि विभुत्वादुक्तपरिमाणासिद्धिरित्याशङ्क्याह— **विज्ञानेति**। **कयाचिदिति**। हृदयकमलकोशस्य जीवोपलब्धिस्थानस्याङ्गुष्ठमात्रतयेत्यर्थः। किंच यथा सति विषये च साधारणी सप्तमी 'न तद्भासयते' इति स्मृत्या विषये व्यवस्थापिता, तथा परिमाणमपि जैवमैश्वरं वेति संशये सति 'अङ्गुष्ठमात्रं निश्चकर्ष' इति स्मृत्या निश्चयसिद्धिरित्याह— **स्मृतेश्चेति**। मरणानन्तर्यमथशब्दार्थः। तत्रापि परमात्मैव प्रतिपाद्योऽस्तु, नेत्याह— **न हीति**। 'प्रभवति संयमने ममापि विष्णुः' इति यमस्य तदधीनत्वस्मृतेरित्यर्थः। स्मृतेः संसारिविषयत्वं निगमयति— **तेनेति**। निश्चितार्थस्मृत्या संदिग्धार्थश्रुतेरपि जीवार्थतैवेत्याह— **स इति**। वाक्यस्य जीवगामित्वे स्थिते तस्येशानोऽस्मीति ध्यानं फलतीत्युपसंहर्तुमितिशब्दः। पूर्वपक्षमनूद्य सिद्धान्तमवतार्य प्रतिज्ञां व्याकरोति— **एवमिति**। जीवे लिङ्गसिद्धे नियमासिद्धिरित्याह— **कस्मादिति**। श्रुतिलिङ्गयोः श्रुतिर्बलीयसीति मत्वा हेतुमाह— **शब्दादिति**। जीवेऽपि कतिपयेशितृत्वादविरुद्धा श्रुतिरित्युक्तं, तत्र, भूतभव्यस्येत्यविशेषश्रुतेरित्याह— **न हीति**।

---

१. यद्यपि ईशानश्रुतिरेव सूत्रे सूत्रिता, ईशानशब्दो हि योगरूढ्या परमेश्वरपर इति, तथापि न तावता लिङ्गं नास्तीत्यायाति। अतः ईशानश्रुतिः भूतभव्येशितृत्वं लिङ्गमुभयमत्र परमात्मविषयं विद्यत इत्याशयः।
ननु ईशानशब्दस्य रूढ्यर्थपरिग्रहोऽत्र न युक्तः, भूतभव्यस्येति यौगिकार्थप्रतिसम्बन्ध्यर्थोपादानात्। तदुपादाने हि रूढ्यर्थत्यागेन केवलयौगिकार्थपरत्वमेव 'पद्मानि यस्याग्रसरोरुहाणि विकासयत्यूर्ध्वमुखैर्मयूखैः' इत्यादौ दृष्टम्। तत्र सरोरुहपदेन रुढ्यर्थपरिग्रहे पद्मपदस्य पुनरुक्तत्वापत्तेः इति चेत्? उच्यते। योगार्थप्रतिसम्बन्ध्युपादानं रूढ्यर्थाविवक्षायां न नियामकम्। 'कुर्यां हरस्यापि पिनाकपाणेः' इत्यादौ तदभावेऽपि पृथग् हरपदोपादानात्। किन्तु काव्यानां व्यञ्जनाप्रधानत्वात् यत्र योगरूढं पदं व्यञ्जनाव्यापारव्यग्रं तन्निर्वाहार्थं योगार्थमात्रपरं तत्रैव रूढ्यर्थाविवक्षा। 'यस्याग्रसरोरुहाणि' इत्यत्र हिमवदौन्नत्यव्यञ्जनोपयुक्तं सरोरुहपदं योगार्थमादायैव भवतीति रूढ्यर्थप्रतीत्यर्थं पुनः पद्मपदोपादानम्। एवं पिनाकपाणिपदं शौर्यातिशयव्यञ्जनार्थं योगार्थपरमिति हरपदोपादानम्। प्रकृते तु रूढ्यर्थाविवक्षायां कारणाभावात् सोऽपि विवक्षित इति श्रुतिरेवेशानशब्दः। द्र. ब्र. वि. ३५४-३५५ न्या. र. म.। ये तु अत एव तस्य लिङ्गत्वमिति मन्यन्ते तेषां सूत्रविरोध इत्यलमधिकेन।

निरङ्कुशमीशिता। 'एतद्वै तत्' इति च प्रकृतं पृष्टमिहानुसंदधाति। एतद्वै तद् यत्पृष्टं ब्रह्मेत्यर्थः। पृष्टं चेह ब्रह्म 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वद' (क. उ. १।२।१४) इति। शब्दादेवेत्यभिधानश्रुतेरेवेशान इति परमेश्वरोऽयं गम्यत इत्यर्थः।।२४।।

कथं पुनः सर्वगतस्य परमात्मनः परिमाणोपदेश इति? अत्र ब्रूमः-

हृद्यपेक्षया तु मनुष्याधिकारत्वात्।।२५।।

सर्वगतस्यापि परमात्मनो हृदयेऽवस्थानमपेक्ष्याङ्गुष्ठमात्रत्वमिदमुच्यते। आकाशस्येव वंशपर्वापेक्षमरत्निमात्रत्वम्। न ह्यञ्जसाऽतिमात्रस्य परमात्मनोऽङ्गुष्ठमात्रत्वमुपपद्यते। न चान्यः परमात्मन इह ग्रहणमर्हतीशानशब्दादिभ्य इत्युक्तम्। ननु प्रतिप्राणिभेदं हृदयानामनवस्थितत्वात् तदपेक्षमप्यङ्गुष्ठमात्रत्वं नोपपद्यत इत्यत उत्तरमुच्यते- मनुष्याधिकारत्वादिति। शास्त्रं ह्यविशेषप्रवृत्तमपि मनुष्यानेवाधिकरोति, शक्तत्वादर्थित्वादपर्युदस्तत्वादुपनयनादिशास्त्राच्चेति। वर्णितमेतदधिकारलक्षणे। मनुष्याणां च नियतपरिमाणः

प्रकटार्थविवरणम्

एवकारेण श्रुतिरेव लिङ्गबाधिका सूत्रितेत्याह—**शब्दादेवेति।**

हृद्यपेक्षया तु मनुष्याधिकारत्वात्। शङ्कानिरासकतया सूत्रमवतारयति—**कथं पुनरित्यादिना।** [1]अरत्निः समुष्टिः करः।

भाष्यभावप्रकाशिका

भूतभव्यस्येत्यविशेषश्रवणान्न कतिपयेशितृत्वमित्याह—**न ह्यन्य इति।** शब्दादिति सूत्रे वाक्यस्याभिधानात्, तस्य लिङ्गाद् दुर्बलत्वात् लिङ्गाद् जीवपरिग्रहः स्यादिति, तत्राह—**शब्दादेवेति।**।२४।।

हृद्यपेक्षया तु मनुष्याधिकारत्वात्।।२५।। तर्हि जीव एवाङ्गुष्ठपरिमाणः कस्मान्न गृह्यते मुख्यार्थत्वायेति? तत्राह—**न चेति।** "स्वर्गकामो यजेते" त्यादौ स्वर्गकामिन एवाधिकारित्वं श्रुतम्, न तु मनुष्यस्येति, तत्राह—**शास्त्रमिति। मनुष्यानिति।** त्रैवर्णिकानित्यर्थः।। अर्थित्वादिति अन्तः संज्ञानां मुमुक्षूणां च काम्येष्वधिकारं निवर्तयति, शक्तत्वादिति तिर्यग्देवर्षीणामशक्तानाम्।

न्यायनिर्णयः

प्रकरणमपीश्वरविषयमित्याह— **एतदिति।** उक्तमर्थं वाक्ययोजनया स्पष्टयति— **एतद्वा इति।** जीवस्यैव पृष्टत्वेन प्रकृतत्वमाशङ्क्योक्तम्— **पृष्टं चेति।** उपहिते तु जीवे कालत्रयापरिच्छेद्यत्वं कार्यकारणास्पृष्टत्वं च दुर्योजमिति भावः।। सूत्रे शब्दादिति वाक्योक्तेस्तस्य लिङ्गाद् दुर्बलत्वाद् बलवतो लिङ्गाज्जीवोक्तिः स्यादित्याशङ्क्याह— **शब्दादिति।** श्रुतिलिङ्गविरोधे श्रुतिरेव बाधिका न लिङ्गमिति मर्यादां वक्तुं सूत्रभाष्ययोरेवकारः।।२४।।

सिद्धान्ते परस्य विभुत्वादङ्गुष्ठमात्रत्वमयुक्तमित्युत्तरसूत्रव्यावर्त्यमाह— **कथमिति।** सूत्रमवतारयति— **अत्रेति।** तदवयवं व्याचष्टे— **सर्वेति।** तुशब्दसूचितं दृष्टान्तमाह— **आकाशस्येति।** करः सकनिष्ठिकोऽरत्निः। किमिति हृद्यवस्थानादङ्गुष्ठमात्रत्वं परस्य गौणमिष्टं, तत्राह— **न हीति।** तर्हि परिमाणमुख्यत्वाय जीव एव गृह्यतां, नेत्याह— **न चेति।** मुख्यसंभवे गौणमुख्ययोर्मुख्ये संप्रत्ययो, मुख्यासंभवश्चात्रोक्तस्तेन गौणं परिमाणमित्यर्थः। सूत्रावयवव्यावर्त्यां शङ्कामाह— **नन्विति।** तदुत्तरत्वेन तं पातयति— **अत इति।** स्वर्गकामादिवाक्ये स्वर्गादिकामिन एवाविशेषेणाधिकारित्वं न मनुष्यस्येत्याशङ्क्याह— **शास्त्रमिति।** मनुष्यशब्दस्त्रैवर्णिकविषयः। तेषां शास्त्राधिकारे हेतुमाह— **शक्तत्वादिति।** तेन तिरश्चां देवतानामृषीणां चाधिकारो वारितः। तिर्यञ्चो वेदार्थज्ञानादिसामर्थ्याभावाद्

---

१. 'सरत्निः' इति पाठः स्यात्।

कायः। औचित्येन नियतपरिमाणमेव चैषामङ्गुष्ठमात्रं हृदयम्। अतो मनुष्याधिकारत्वाच्छास्त्रस्य मनुष्यहृदयावस्थानापेक्षमङ्गुष्ठमात्रत्वमुपपन्नं परमात्मनः।

यदप्युक्तं, परिमाणोपदेशात् स्मृतेश्च संसार्येवायमङ्गुष्ठमात्रः प्रत्येतव्य इति, तत् प्रत्युच्यते–'स आत्मा तत्त्वमसि' (छा. उ. ६।८।७) इत्यादिवत् संसारिण एव सतोऽङ्गुष्ठमात्रस्य ब्रह्मत्वमिदमुपदिश्यत इति।

प्रकटार्थविवरणम्

स एव सकनिष्ठिकोऽरत्निः। उक्तेऽर्थे जैमिनीयतन्त्रसंमतिमाह—**वर्णितमेतदिति**। अधकारलक्षणे षष्ठेऽध्याये वर्णितमिदं मनुष्याधिकारत्वं शास्त्रस्य। तथा हि—"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादि श्रूयते। तत्र संशयः—किं तिर्यगादीनामप्यधिकारः, किं वा मनुष्याणामेवेति। तत्र तिर्यगादीनामपि सुखप्राप्तिदुःखपरिहारयोः अर्थित्वादविशेषश्रवणाच्चास्त्यधिकार इति पूर्वः पक्षः। सिद्धान्तस्तु–तिर्यगादीनां विधिनिषेधविवेककारणविधुरतया द्रव्यहीनतयाऽनुष्ठानासमर्थत्वान्नास्त्यधिकार इति निर्णीतम्। तथा त्रैवर्णिकेष्वपि यस्याप्रतिसमाधेयमङ्गवैकल्यं न तस्याधिकारः, यथा बधिरस्य 'प्रैषश्रवणे, पङ्गोर्विष्णुक्रमणेषु, अन्धस्याऽऽज्यावेक्षणे। तदेवं सामर्थ्यादियुक्तस्याधिकार इति। अस्तु मनुष्याधिकारं शास्त्रम्, ततः किमित्याशङ्क्याह—**मनुष्याणां चेति**।

पूर्वमङ्गुष्ठमात्रशब्द उपाधिं निमित्तीकृत्य परमात्मानं लक्षयतीत्युक्तम्; इदानीम् अङ्गुष्ठमात्रशब्दो जीववाचक एवास्तु; तथापि परमात्मपरमेवेदं वाक्यमित्येतद् दर्शयितुमुपक्रमते—**यदप्युक्तमित्यादिना**। इतश्चायमेव वाक्यार्थः; स्पष्टेनास्पष्टनिर्णयादित्याह—

भाष्यभावप्रकाशिका

उपनयनादिशास्त्रादिति शूद्रादीनामधिकारं निवर्तयति। एतदपेक्षितन्यायस्य षष्ठाध्याये कथितत्वान्नेह प्रपञ्च्यत इत्याह—**वर्णितमिति**। मनुष्याणां चोच्चावचावयवानां कथं नियतपरिमाणं हृदयमिति? अत्राह—**मनुष्याणामिति**। इदानीमङ्गुष्ठमात्रपुरुषस्य जीवत्वेऽपि परमात्मपरत्वं न विरुध्यत इति वक्तुं चोद्यमुद्भावयति—**यदप्युक्तमिति**। अनूद्यमानं जीवगतमङ्गुष्ठपरिमाणं परमात्मधर्मविरोधाद् बाध्यते; प्रतिपाद्यस्य तात्पर्यवत्त्वादित्यभिप्रेत्य परिहरति—**तत्प्रत्युच्यत इति**।

न्यायनिर्णयः

व्युत्क्रमशक्ताः। देवानां स्वदेवत्ये कर्मण्यात्मोद्देशेन द्रव्यत्यागायोगादशक्तिः। ऋषीणामार्षेयवरणादौ तदभावात्। स्थावराणां मुमुक्षूणां च कर्मण्यधिकारं निवर्तयति— **अर्थित्वादिति**। मुमुक्षोः शुद्ध्यर्थं नित्येष्वधिकारेऽपि काम्येषु तदभावः। शूद्राधिकारं वारयति— **अपर्युदस्तत्वादिति**। ते हि 'शूद्रो यज्ञेऽनवक्लृप्तः' इति पर्युदासान्न वैदिके कर्मण्यधिकारिणः। तत्रैव हेत्वन्तरमाह— **उपनयनादीति**। न हि शूद्राणामेकजातित्वस्मृतेरुपनयनं, तदभावे कुतोऽध्ययनं, तस्य तदङ्गत्वात्, अध्ययनाभावे कुतस्तदर्थेऽधिकारः। अत्र चापेक्षितन्यायस्य षष्ठेऽध्याये सिद्धत्वान्नेह तदर्थं यत्यत इत्याह— **इति वर्णितमिति**। फलार्थे कर्मणि तिर्यगादेरपि सुखकामस्याधिकारः (स) स्वर्गकामश्रुतेरविशेषादित्याशङ्क्याङ्गश्रुत्यर्थवत्त्वाय समर्थविषयतया तिर्यगादेस्तदभावेन स्वर्गकामपदं संकोच्य मनुष्याधिकारत्वे स्थिते चातुर्वर्ण्यमधिकरोति शास्त्रमिति प्राप्य 'वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्यः' इति त्रयाणामेवाग्निसंबन्धश्रवणात् तेषामेवाधिकार इति प्रतिष्ठापितमित्यर्थः। मनुष्याणामपि कथमुच्चावचावयवानां नियतपरिमाणं हृदयं, तत्राह— **मनुष्याणां चेति**। अस्मदादिदेहस्यापि परिमाणमनियतं दृष्टं, तत्राह— **औचित्येनेति**। देहस्य नियतपरिमाणत्वेऽपि हृदयस्य किमायातं, तदाह— **नियतेति**। परस्मिन् परिमाणोक्तेर्योगमुपसंहरति— **अत इति**।

अङ्गुष्ठमात्रपुरुषस्य जीवत्वेऽपि वाक्यस्य परार्थतेति वक्तुमुक्तमनुवदति— **यदपीति**। परमात्मपरे वाक्येऽनूद्यमानजीवस्थमङ्गुष्ठमात्रत्वं प्रतिपाद्यमानपरात्मधर्मविरोधाद् बाध्यं, प्रतिपाद्यस्य तात्पर्यविषयत्वादित्याह— **तदिति**। परमात्मपरे वाक्ये तस्यैव वक्तव्यत्वे कुतो

---

१. प्रैषेति। 'प्रोक्षणीरासादय' 'अग्नीदग्नीन् विहर' इत्यादयः प्रैषाः परसम्बोधनार्थाः। न बधिरः तान् श्रोतुं शक्नुयात्। विष्णुक्रमेष्विति। 'विष्णोः क्रमोऽसि' इत्यादिमन्त्रेण वेदिसमीपे यजमानेन क्रियमाणाः पादविक्षेपाः विष्णुक्रमाः। न च तेषु पङ्गुः समर्थः। आज्येति। यजमानेन पत्न्या च यागार्थघृतस्यावेक्षणं कार्यम्। न चान्धेन तत् कर्तुं शक्यम्।

'द्विरूपा हि वेदान्तवाक्यानां प्रवृत्तिः, क्वचित् परमात्मस्वरूपनिरूपणपरा; क्वचिद् विज्ञानात्मनः परमात्मैकत्वोपदेशपरा। तदत्र विज्ञानात्मनः परमात्मनैकत्वमुपदिश्यते, नाङ्गुष्ठमात्रत्वं कस्यचित्। एतमेवार्थं परेण स्फुटीकरिष्यति– 'अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः। तं स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवेषीकां धैर्येण। तं विद्याच्छुक्रममृतम्' (का. उ. २।६।१७) इति।।२५।।

।।इति सप्तमं प्रमिताधिकरणम्।।

प्रकटार्थविवरणम्

एतमेव चार्थमिति। धैर्येणेति। शान्त्यादिगुणमवलम्ब्य प्रवृहेत् पृथक्कुर्यात् इत्यन्वयव्यतिरेकाभ्यां परिशोधयेत्। तं च विविक्तं चित्प्रतिबिम्बं शुद्धममृतं बिम्बस्थानीयं ब्रह्मैव जानीयादित्यर्थः[२]।

।।इति सप्तमं प्रमिताधिकरणम्।।

भाष्यभावप्रकाशिका

ननु परमात्मपरे वाक्ये स एव कथनीयः, न जीव इति, तत्राह—**द्विरूपा हीति**। जीवस्य परमात्मनैक्यकथनं न जीवाभिधानमृते शक्यमित्यर्थः। तर्हि प्रत्यक्षादिविरोध इति शङ्कां परिहरति—**एतमिति**। विरुद्धांशपरित्यागेनाविरुद्धांशलक्षणयैकत्वमुच्यत इत्यर्थः।।२५।। इति सप्तमं प्रमिताधिकरणम्।

न्यायनिर्णयः

जीवोक्तिरित्याशङ्क्य वाक्यप्रवृत्तेर्द्वैरूप्यमाह— **द्विरूपेति**। कथं प्रकृते वाक्यप्रवृत्तिः, तत्राह— **तदत्रेति**। न हि परैक्यं जीवस्योक्तिं विना शक्यं वक्तुमिति तदुक्तिरित्यर्थः। प्रत्यक्षादिविरोधे किमुत्तरं, तत्राह— **एतमिति**। विरुद्धांशत्यागेनाविरुद्धांशलक्षणयैक्ये वाक्यार्थे न विरोधधीरित्यर्थः। यतोऽन्तरात्मा पुरुषत्वात्पूर्णोऽपि जनानां हृदये सदा संनिविष्टस्ततोऽङ्गुष्ठमात्र इति त्वमर्थानुवादः। तस्यान्वयव्यतिरेकाभ्यां तदनुसारिश्रुत्या च शोध्यत्वमाह— **तमिति**। शरीरं स्थूलं सूक्ष्मं च। प्रवृहेत् पृथक्कुर्यात्। धैर्येण शमादिनेति यावत्। तं च विविक्तमात्मानं विशुद्धममृतं ब्रह्मैव जानीयादित्याह— **तमिति**। तदेवं काठकवाक्यं प्रत्यग्ब्रह्मणि ज्ञातव्ये समन्वितमिति।।२५।। इति प्रमिताधिकरणम्।।

---

१. ननु परमात्मनोऽङ्गुष्ठमात्रत्वं न संभवति इति सूत्रकारेण हृदयापेक्षमङ्गुष्ठपरिमाणत्वमुक्तम्। द्विविधेति भाष्यात् तु जीवमुद्दिश्य ब्रह्मत्वबोधनमिति प्रतीयते इति सूत्रार्थास्पर्शित्वाद् भाष्यमनुपपन्नमिति चेत्? न, भाष्यतात्पर्यानवबोधात्। कठवल्लीवाक्यस्यावान्तरतात्पर्यमेकं, महातात्पर्यं चैकम्। अवान्तरतात्पर्यमुपास्ये ब्रह्मणि, महातात्पर्यं च ज्ञेये ब्रह्मणि। अतएव भाष्यकारैः वाक्यद्वयोपन्यासः कृतः। अत एवोपासनाफलं कठवल्ल्यामेव 'शतं चैका च हृदयस्य नाड्यः' इत्यादिना बोधितम्। अत एव चतुर्थाध्याये द्वितीयचरणे 'तदोकः' इति सूत्रे 'हार्दविद्यां प्रकृत्य समामनन्ति' इति प्रथमवाक्यस्योपास्ये ब्रह्मणि तात्पर्यमिति प्रकटीकृतम्। इत्थं चात्रत्यं भाष्यं महातात्पर्याभिप्रायकं द्रष्टव्यम्। द्र. रत्नप्रभा २४६।

२. पूर्वं केवलतत्पदार्थपरोऽयं मन्त्र इति स्वीकृत्य पूर्वपक्षसिद्धान्तौ प्रवृत्तौ। इदानीं तु तत्त्वमस्यादिमहावाक्यसमानार्थकत्वं स्वीकृत्याधिकरणरचनापरं 'यदप्युक्त'मित्यादि भाष्यम्। [पृ.३२९] अन्यथाऽङ्गुष्ठपरिमाणत्वस्य 'हृद्यपेक्षये'ति सूत्रेण परिहारोक्तेः पुनः शङ्काऽसङ्गतेः। इदमेव च भाष्यकाराभिमतम्। अस्मिन् पक्षे अङ्गुष्ठमात्रो जीव एवेति तत्पदस्वारस्यहानाभावात्। अधिकरणं चेत्थमारचनीयम्— 'अङ्गुष्ठमात्र' इति मन्त्रः जीवस्येशानत्वेनोपासनापरो वा जीवब्रह्मैक्यपरो वेति संशये, अङ्गुष्ठमात्रत्वेन निर्देशात्, अभेदपरत्वे तद्वैयर्थ्यात् उपासनापर इति पूर्वपक्षे परिच्छिन्नपरिमाणताया अपवादार्थः तथा जीवानुवाद इति जीवब्रह्मैक्यपरमेवेति सिद्धान्त इति। 'हृद्यपेक्षये'ति सूत्रं च अङ्गुष्ठमात्रत्वेन जीवस्यानुवादः कथमिति शङ्कानिरासकतया व्याख्येयमिति। भामत्यां तु सकलमेव भाष्यमेवमर्थपरतया व्याख्यातम्। 'यदप्युक्त'मिति भाष्यं च जीवानुवादः किमर्थ इति शङ्कानिरासकतया व्याख्यातम्। द्र. ३१४-३१६। तदपेक्षया पूर्वोक्तरीतिः समीचीना भाति।

शारीरकन्यायसंग्रहः

८।।देवताधिकरणम्।।सू. २६-३३।।

तदुपर्यपि बादरायणः संभवात्।।२६।। ब्रह्मविद्यातदङ्गविधयो न देवादीनधिकुर्वन्ति, वैदिकविधित्वात्, अग्निहोत्रादिविधिवत्; न देवादयो जन्मान्तराधीतवेदानुस्मर्तारः, जन्ममरणाभ्यां व्यवहितसंस्कारवत्त्वात्, अस्मदादिवत् इति तेषामनधिकारः प्राप्तः। तत्र न्यायानुगृहीतमर्थवादलिङ्गं सामान्यतोदृष्टानुमानाद् बलीयः, व्याप्तेर्लिङ्गविषयादन्यत्रैव सङ्कोचोपपत्तेः—इति न्यायेन, अर्थित्वादिसंपन्नस्य पुरुषस्य फलवति प्रवृत्तिः अस्मदादिवत् स्वाभाविकी—इति न्यायेन मनुष्यशरीरमारभ्य अर्वाचीनस्थूलशरीररहीनानां प्रेतपिशाचादीनां बालादिष्वनुप्रविष्टानां जन्मान्तराधीतवेदानुस्मरणेनोच्चारणादिदर्शनात् देवादीनामपि जन्मान्तराधीतवेदानुस्मरणं सम्भवतीति न्यायानुगृहीतेन, "तद्यो यो देवानां प्रत्यबुध्यत" इत्यादिब्रह्मविद्यासंबन्धलिङ्गेनानुमानद्वयं बाधित्वा देवादीनां ब्रह्मविद्यातदङ्गविधिष्वधिकारो दर्शितः। चिन्तायाः प्रयोजनम् "परं पुरिशयं पुरुषमीक्षते" इत्यादिसम्यग्ज्ञानोत्पत्तिद्वारेण क्रममुक्तिफलोपासनानुष्ठानसिद्धिः सिद्धान्ते।

विरोधः कर्मणीति चेत् नानेकप्रतिपत्तेर्दर्शनात्।।२७।। स्वामिनः स्वत्वपरित्यागेन परस्वत्वापत्तिपर्यन्तं दानम्। यागस्यापि तद्रूपत्वमङ्गीकृत्येदमुच्यते। देवादयो युगपदनेकविग्रहान्तर्धानादिशक्तियोगिनो न भवन्ति, संसारित्वात्, अस्मदादिवत् इत्यनुमानात् कारकान्तरवत् सन्निपत्योपकारकत्वायोगात् देवादिविग्रहाधिकारादिप्रतिपादकानामर्थवादानां स्वशेषिकर्मविधि-विरोधात् अनधिकारः प्राप्तः। तत्र किंशुकादिवृक्षशाखासु छिन्नप्ररोहिणीषु किंशुकादेरेकस्यैव युगपदनेकविग्रहदर्शनात् देवादीनामपि तत्संभवात्— इति न्यायेन संभवत्प्रत्यक्षादिमूलेतिहासपुराणैश्च अनुगृहीतानि मन्त्रार्थवादलिङ्गानि सामान्यतोदृष्टानुमानं बाधित्वा देवादीनां युगपदनेकविग्रहान्तर्धानादिशक्तियोगं दर्शयन्तीत्युक्तम्। कृत्वाचिन्तायाः प्रयोजनं प्राणोपासनाफलसंभवात् उपासनानुष्ठानम्।

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्।।२८।। 'युगपदनेकत्र कार्त्स्न्येन वर्तमाना जाति'रिति जातिलक्षणात् इन्द्रादीनामेकसन्ततिप्रवाहाणां जात्यभावादवान्तरप्रलये च सर्वव्यक्त्युच्छेदेन तत्परतन्त्रजात्युच्छित्तेः शब्दार्थसंबन्धानित्यत्वप्रसङ्गेन वेदस्याप्रामाण्यप्रसङ्गात् शेषिविधिप्रामाण्यविरोधिनोऽर्थवादप्रामाण्यस्यासंभवेन देवताविग्रहाद्यसंभवः प्राप्तः। तत्र युगपदनेकत्र कार्त्स्न्येन वर्तमाना जातिः इति ग्रहणाद् वरमनेकत्र कार्त्स्न्येन वर्तमाना जातिः इति ग्रहणम्— इति न्यायेन इन्द्रादीनामनेकसन्ततिप्रवाहाणां पूर्वापरव्यक्त्यनुगतां जातिमङ्गीकृत्य संबन्धनित्यता दर्शिता। सुवर्णादिद्रव्याणां कुण्डलादिषु क्रमभाविषु अवयवापचयादिसंभवात् न कार्त्स्न्येन अनुवृत्तिरिति। तथा अनेकार्थानुयायिनीनां गवादिजातीनां स्वातन्त्र्यं भवितुमर्हति, अनेकानुगतत्वात् सर्वगतत्वाद्वा, आकाशादिवत् इत्यनुमानेन सर्वव्यक्त्युच्छित्तावपि जातिसद्भावमङ्गीकृत्य अवान्तरप्रलयात्; व्यक्तीनामुत्पत्तिः पूर्वसिद्धजात्यभिधायक-शब्दविकल्पितजात्युपरक्तव्यक्त्यभिसंधानपूर्विका भवितुमर्हति, बुद्धिपूर्वसृष्टित्वात्, अस्मदादिसृष्टिवत् इत्यनुमानेन व्यक्त्युत्पत्तेः प्रागपि शब्दार्थसंबन्धनित्यता दर्शिता। ततश्च संपिण्डितोऽयं प्रयोगः— विवादाध्यासितः सृष्टिसमकालः शब्दार्थसंबन्धव्यवहारः पूर्वपूर्वतद्रूपव्यवहारस्मृतिनिबन्धनो भवितुमर्हति, अभिधानाभिधेयव्यवहारत्वात्, जात्यभिधानव्यवहारत्वाद्वा, इदानीन्तनव्यवहारवदिति।

अत एव च नित्यत्वम्।।२९।। वेदः पौरुषेयः, वाक्यत्वात्, अस्मदादिवाक्यवत्—इत्यस्य प्रत्यनुमानम्— विवादाध्यासितं सृष्टिसमकाले वेदोच्चारणं पूर्वपूर्वतद्रूपोच्चारणानुस्मृतिनिबन्धनम्, वेदोच्चारणत्वात्, इदानीन्तनवेदोच्चारणवत् इति; तथा च वेदो न पुरुषप्रणीतः, चिरवृत्ततया व्यवहारानुच्छेदे सत्यपि प्रतिपन्नकर्तृस्मरणशून्यत्वात्, आत्मवत्; वेदो न स्वार्थप्रवृत्तज्ञानान्तरजन्यः, अनीश्वरबुद्धितत्कार्यत्वाभावे सति धर्माधर्मब्रह्मप्रमाणत्वात्, ईश्वरज्ञानवदिति।

समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च।।३०।। महाप्रलये जातीनां व्यवहर्तॄणां चात्यन्तोच्छेदात् अभिधानानां च साङ्केतिकत्वप्रसङ्गेन स्वशेषिविधिवाक्यप्रामाण्यविरोधिभिरर्थवादैः न देवतादिविग्रहप्रलयादिसिद्धिरिति प्राप्तम्। तत्र यथा वर्णानां देशकालवस्तुक्रमाभावेऽप्यनित्योच्चारणादिक्रमविशिष्टानामेव पदत्वेऽपि पूर्वक्रमानुस्मृतिनिमित्ततत्सदृशक्रम-रचनाक्रमसादृश्यपरंपराया अनिदंप्रथमत्वादनित्यस्याप्यभिधानस्य नित्यता; वर्णानित्यत्वपक्षेऽप्येवमेवाभिधाननित्यता; तथा महाप्रलये व्यक्तिवज्जात्युच्छित्तावपि कारणशक्तिनियमादिभिर्भाष्योक्तहेतुभिश्च पूर्वापरीभूतगवादिजातिसादृश्यनियमादेवाभिधेयनित्यतासिद्धेः कारणगताभिधानाभिधेयशक्तिप्रसूतयोः शब्दार्थयो रूपप्रदीपयोरिव प्रकाशनशक्तिसंबन्धनियमात् शब्दार्थसंबन्धनित्यतासिद्धिरित्युक्तम्।

८।।देवताधिकरणम्।।सू. २६-३३।।

तदुपर्यपि बादरायणः संभवात्।।२६।।

अङ्गुष्ठमात्रश्रुतिर्मनुष्यहृदयापेक्षया, मनुष्याधिकारत्वाच्छास्त्रस्येत्युक्तम्।[1] तत्प्रसङ्गेनेदमुच्यते। बाढं

शारीरकन्यायसंग्रहः

पुनश्च प्रेतपिशाचादीनां जन्मान्तरानुस्मृतिनिदर्शनन्यायानुगृहीतानामृषिषु स्मृत्यादिप्रमाणप्रसिद्धकल्पान्तरीयवेदानुस्मरणलिङ्गानां तेषामेव कल्पान्तरव्यवहारानुस्मरणं प्रति साधकत्वमुक्तम्।

मध्वादिष्वसंभवादनधिकारं जैमिनिः।।३१।। ज्योतिषि भावाच्च।।३२।। भावं तु बादरायणोऽस्ति हि।।३३।। विधिनैकवाक्यत्वात् अवान्तरपदसंसर्गवदर्थवादवाक्यनां न पृथक्प्रामाण्यमिति प्राप्तम्। तत्र यथा प्रयाजाद्यङ्गविधिवाक्यानां स्वार्थप्रमितावनन्यार्थता, प्रमितानामेवार्थानां प्रयोजनवशात् अन्यार्थता (इत्यन्येषामप्यर्थवादादीनां विधिप्रकरणगतवाक्यानां प्रमितावनन्यार्थताऽनुवादविरोधरहितवाक्यत्वात्, प्रयाजादिवाक्यवत्—इति न्यायेनार्थपरता उक्ता। अथवा प्रकरणपाठात् प्रयाजार्थता;) तथा प्रमाणान्तरप्राप्तिविरोधरहितानामप्यर्थवादमन्त्राणां स्वार्थप्रमितावनन्यार्थता प्रमितानामेवार्थानां प्रयोजनवशादन्यार्थतेति न्याय्यम्, अङ्गिविधिप्रकरणपठिताऽनुवादविरोधरहितवाक्यत्वात्, प्रयाजादिवाक्यवत्— इति न्यायेन अर्थपरतोक्ता। अथवा प्रकरणपाठात् प्रयाजाद्यङ्गानुष्ठानवत एवापूर्वसिद्धिरित्युच्यते। एवमर्थवादैरौत्सर्गिकप्रमितिकार्यैः प्रमीयमाणेन्द्रादिसाङ्गोपाङ्गदेवताप्रमितिमत एव यागानुष्ठानादपूर्वसिद्धिरिति कल्प्यते। प्रमेयद्वारेण च विध्युपकारो विधिप्रकरणत्वात्, प्रयाजादिवाक्यवदिति। अथवा इन्द्रादिशब्दव्यतिरिक्तासाधारणदेवतार्थाकारप्रमितिबुद्धिः कर्मणाऽपेक्ष्यमाणा भवितुमर्हति, कर्त्राद्यन्यतमकारकबुद्धित्वात्, कर्तृकारकबुद्धिवत्—इति मन्त्रार्थवादप्रामाण्येन देवादीनामधिकारः साधितः।

प्रकटार्थविवरणम्

तदुपर्यपि बादरायणः संभवात्। इह निर्गुणब्रह्मविद्या विषयः। तस्यां किं देवादीनामप्यधिकारोऽस्त्युत नास्तीत्यर्थित्वसामर्थ्यादिसंभवासंभवाभ्यां विचारः। ननु समन्वयाध्याये नायं विचारो युक्तः, अधिकारचिन्तायाः समन्वयेऽनुपयोगादित्याशङ्क्य

भाष्यभावप्रकाशिका

तदुपर्यपि बादरायणः संभवात्॥२६॥ समन्वयाध्यायेऽधिकारचिन्ताऽसङ्गतेति शङ्कायां प्रासङ्गिकीं सङ्गतिं दर्शयितुं

न्यायनिर्णयः

मनुष्याधिकारत्वादित्युक्तेरमनुष्याणां देवादीनामनधिकारमाशङ्क्योक्तम्— **तदुपर्यपीति।** निर्गुणविद्याहेतुवेदान्तविचारादिषु देवादीनामधिकारोऽस्ति न वेति सामर्थ्याद्यसंभवसंभवाभ्यां संदेहे शास्त्रसांगत्येऽपि लक्षणासंगतेयं चिन्तेत्याशङ्क्य प्रासङ्गिकीं संगतिमाह— **अङ्गुष्ठेति।** अत्र चाधिकारनिरूपणद्वारा मन्त्रार्थवादादीनां प्राप्तिविरोधयोरसतोर्देवताविग्रहादावन्वयोक्तेरध्यायसंगतिः। मन्त्रादिप्रामाण्ये न्यायसाम्यादुपसदनादिगिरामधिकार्यादिसमर्पकाणां श्रुतेऽर्थे प्रामाण्यात् तत्त्वमादिवचसोऽपि ब्रह्मैक्ये पर्यवसानमिति श्रुतिशास्त्राध्यायपादसंगतयः। पूर्वपक्षे मन्त्राद्यप्रामाण्यादुपगमनादिगिरामपि स्वार्थे तदयोगात्तत्त्वमादेरपि नैक्यनिष्ठतेति फलम्। सिद्धान्ते तत्तत्प्रामाण्यस्य तत्तदर्थे संभवात् तत्त्वमस्यादेरपि संभवत्यैक्यनिष्ठतेति फलम्। यद्वा देवतादीनामनधिकारन्यायेन क्रममुक्तिफलोपास्तिषु भोगद्वारा मोक्षकाममनुष्यप्रवृत्तिरप्यनियतेति पूर्वपक्षे फलम्। सिद्धान्ते देवाद्यधिकारविचारस्य·

---

१. 'मनुष्याधिकारत्वात्' इति श्रवणे हि 'मनुष्याणामेवाधिकारो नान्येषा' मिति भ्रमः प्रसक्तः। तन्निवृत्तये इत्यर्थः। सूत्रे 'तदुपरि' इत्यत्र 'तद्' इति लुप्तषष्ठीकं पृथक्पदम्। 'पूरणगुण—' इत्यादिसूत्रेणाव्ययेन सह समासप्रतिषेधात् इति ब्र.वि.पृ. ३५८। उक्तसूत्रे सत्तव्यसाहचर्यात् कृदव्ययस्यैव ग्रहणमिति मते तु न समासानुपपत्तिः। द्र. सि. कौ. सू. ७०५।

मनुष्यानधिकरोति शास्त्रम्। न तु मनुष्यानेवेतीह ब्रह्मज्ञाने नियमोऽस्ति। तेषां मनुष्याणामुपरिष्टाद् ये देवादयस्तानप्यधिकरोति शास्त्रमिति बादरायण आचार्यो मन्यते। कस्मात्? संभवात्। संभवति हि तेषामप्यर्थित्वाद्यधिकारकारणम्। तत्रार्थित्वं तावन्मोक्षविषयं देवादीनामपि संभवति '[1]विकारविषयविभूत्यनित्यत्वालोचनादिनिमित्तम्। तथा सामर्थ्यमपि तेषां संभवति, मन्त्रार्थवादेतिहासपुराणलोकेभ्यो विग्रहवत्त्वाद्यवगमात्। न च तेषां कश्चित् प्रतिषेधोऽस्ति। न चोपनयनशास्त्रेणैषामधिकारो निवर्त्येत,

प्रकटार्थविवरणम्

प्रासङ्गिकत्वमाह—**अङ्गुष्ठमात्रश्रुतिरिति**। सिद्धान्तेनैवोपक्रमते—**तेषां मनुष्याणामिति**। ननु देवानां विचित्रानन्दभोगभागिनां वैराग्याभावान्न मोक्षेऽर्थित्वमित्याशङ्क्याह—**तत्रार्थित्वं तावदिति**। वैषयिकसुखस्यानित्यत्वपारतन्त्र्यादिदोषवत्त्वेन तत्र वैराग्योपपत्तौ परमपुरुषार्थत्वेन मोक्षेऽर्थित्वमुपपन्नम्। ननु इन्द्रायेति चतुर्थ्यन्तपदप्रयोग एव देवता; तस्याश्च विग्रहाभावान्नास्ति ज्ञानसाधनानुष्ठाने (तथा) सामर्थ्यमित्याशङ्क्याह—**तथा सामर्थ्यमपीति**। ननु "नावेदविन्मनुते तं बृहन्तम्" इत्यादेः तेषां वेदाभावेन प्रतिषेध इत्याशङ्क्याह—**न च तेषामिति**। जन्मान्तराधीतवेदस्मरणसंभवादित्यर्थः। ननु उपनीतस्य वैदिकानुष्ठाने अधिकारात् देवानां तदभावान्नाधिकार इत्यर्शङ्क्याह—[2]**न चोपनयनेति**। तर्ह्युपनयनस्य वैयर्थ्यम्, लिखितपाठेनापि वेदपरिचयात् इत्यप्यवाच्यम्,

भाष्यभावप्रकाशिका

प्रसङ्गमाह— **अङ्गुष्ठेति**। मन्त्रार्थवादानां देवताविग्रहादौ समन्वयस्य प्रतिपाद्यमानत्वात् समन्वयविशेष एव प्रतिपाद्यत इत्यर्थः। मनुष्याधिकारत्वमयोगव्यवच्छेदेन, अन्ययोगव्यवच्छेदेन वा। आद्योऽङ्गीक्रियते, द्वितीयस्तु नोपपद्यत इत्याह—**बाढमिति**। ब्रह्मविद्यातदङ्गविधयः, देवादीन् नाधिकुर्वन्ति, वैदिकविधित्वात्; अग्निहोत्रादिविधिवदिति चोदयति—**कस्मादिति**।

ननु देवानां विविधभोगभाजां वैराग्याभावान्नाधिकारित्वं ब्रह्मविद्यायामिति, तत्राह—**तत्रार्थित्वमिति**। ननु आदित्यादीनां विग्रहाभावात् सामर्थ्याभाव इति, अत आह—**सामर्थ्यमपीति**। अर्थितासामर्थ्ययोः सतोरपि यथा शूद्रस्यानधिकारः, तथा स्यादिति, तत्राह—**न चेति**। ननु त्रैवर्णिकानामेवोपनयनसंभवाद् देवादीनां तदभावादनधिकार इति, अत आह— **न चोपनयनेति**। ननु तथापि

न्यायनिर्णयः

देवादिप्रवृत्त्यङ्गत्वाभावेऽपि यथोक्तोपास्तिषु मनुष्यप्रवृत्त्यर्थं साक्षान्मोक्षफलनिर्गुणविद्यायां तेषामपि प्रवृत्तिरिति प्रयोजनम्। तत्रादौ सिद्धान्तमेव दर्शयन्मनुष्याधिकारत्वं शास्त्रस्यायोगव्यवच्छेदादन्ययोगव्यवच्छेदाद्वेति विकल्प्याद्यमङ्गीकरोति— **बाढमिति**। द्वितीयं दूषयति— **न त्विति**। नियमाभावं सूत्राक्षरव्याख्यया विशदयति— **तेषामिति**। ब्रह्मविद्यातदङ्गविधयो देवादीन्नाधिकुर्वन्ति, वैदिकविधित्वात्, अग्निहोत्रादिविधिवदिति शङ्कते— **कस्मादिति**। अनुमानमग्रे दूष्यम्। आदौ हेतुमुत्थाप्य व्याचष्टे— **संभवादिति**। ननु देवतादीनां विविधभोगभाजामवैराग्यान्न मोक्षेऽर्थित्वं, तत्राह— **तत्रेति**। वैषयिकसुखस्यानित्यत्वपारतन्त्र्यादिदोषदृष्ट्या तत्र वैराग्यसिद्धौ परमपुरुषार्थतया मोक्षेऽर्थित्वं महाधियां तेषामुदेष्यतीत्यर्थः। चतुर्थ्यन्तशब्दातिरिक्तदेवताऽभावात् तस्याश्च विग्रहायोगान्न ज्ञानहेत्वनुष्ठानशक्तिरित्याशङ्क्याह— **तथेति**। तयोः सतोरपि शूद्रवदनधिकारं शङ्कित्वोक्तम्— **न चेति**। त्रैवर्णिकानामेवोपनयनाद् देवादीनां तदभावे वैदिकशक्त्यभावान्नाधिकार इत्याशङ्क्याह— **न चेति**। तर्हि तदभावादङ्गिनोऽध्ययनस्याभावे

---

१. **विकारविषयविभूतीति**। अमरावत्यादिविकारगोचरैश्वर्येत्यर्थः। **मन्त्रेत्यादि**। मन्त्रः— 'सहस्राक्षो गोत्रभिद् वज्रबाहुः' इत्यादिः। अर्थवादः— इन्द्रप्रजापतिसंवादादिरूपः। इतिहासः-भारतादिः। पुराणं-विष्णुपुराणादि। लोकः शिल्पशास्त्रम्। ब्र.वि.

२. उपनयनस्य सन्ध्यावन्दनप्रभृतिसर्ववैदिककर्मानुष्ठानार्थत्वेऽपि यान् प्रति तद् विहितं तेषामेव तत् सर्ववैदिककर्माधिकारप्रयोजकमित्युपेयम्। अन्यथा शूद्रादीनां साधारणधर्मेषु, तान् प्रत्येव विशेषतो विहितेषु च कर्मस्वधिकारो न स्यात्। तथा च देवादीनामुपनयनाभावेऽपि न वैदिक्यां ब्रह्मविद्यायामधिकारानुपपत्तिः तान् प्रत्युपनयनस्याविहितत्वात्। द्र.ब्र.वि. ३५९।

उपनयनस्य वेदाध्ययनार्थत्वात्। तेषां च स्वयंप्रतिभातवेदत्वात्। अपि चैषां विद्याग्रहणार्थं ब्रह्मचर्यादि दर्शयति– 'एकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास' (छा. उ. ८।११।३) 'भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्म' (तै. उ. ३।१) इत्यादि। यदपि कर्मस्वनधिकार-कारणमुक्तम्–'न देवानां देवतान्तराभावात्' इति, 'न ऋषीणामार्षेयान्तराभावात्' (जै. सू. ६।१।६,७) इति; न तद् विद्यास्वस्ति। न हीन्द्रादीनां विद्यास्वधिक्रियमाणानामिन्द्राद्युद्देशेन किंचित् कृत्यमस्ति; न च भृग्वादीनां भृग्वादिसगोत्रतया। तस्माद् देवादीनामपि विद्यास्वधिकारः केन वार्यते? देवाद्यधिकारेऽ-प्यङ्गुष्ठमात्रश्रुतिः स्वाङ्गुष्ठापेक्षया न विरुध्यते।।२६।।

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्।।२७।।

प्रकटार्थविवरणम्

"आचार्याधीनो वेदमधीष्व" इति नियमविधानात्। न च गुरुमुखादेव श्रुतो वेदः फलवदर्थज्ञानजनकः, 'स्मर्यमाणादपि सम्यगर्थावबोधदर्शनात्। देवता जन्मान्तरानुभूतं न स्मरति, संसारित्वात् अस्मदादिवदित्यनुमानममानम्। पिशाचादीनां बालादिदेहानुप्रविष्टानां जन्मान्तराधीतवेदानुस्मरणोच्चारणादिदर्शनात्; देवताया अपि तथा संभवात् संबन्धो भवतीति वैदिकसाधनानुष्ठानम्। श्रौतं च लिङ्गं साधनानुष्ठानेऽस्तीत्याह–**अपि चेति**। ननु ब्रह्मविद्या देवादीन् नाधिकरोति, वेदार्थत्वात्, अग्निहोत्रादिवत्। अग्निहोत्रादौ चानधिकारकारणं वर्णितं पूर्वतन्त्रे। तत्राह—**यदपीति**। अर्थित्वादिसंपन्नस्य पुरुषस्य फलवति स्वाभाविकी प्रवृत्तिरिति न्यायेनानुगृहीतम् "तद्यो यो देवानां प्रत्यबुध्यत" इत्यादिब्रह्मविद्यासंबन्धलिङ्गमनुमानं बाधित्वाऽधिकारं गमयतीति भावः। ननु देवादीनामपि चेदधिकारः कथमङ्गुष्ठ[मात्र]श्रुतिरित्याशङ्क्याह—**देवाद्यधिकारेऽपीति**।

भाष्यभावप्रकाशिका

उपनयनाभावादध्यनाभावे न तदर्थेऽधिकार इति, अत आह—**तेषां चेति**। ननु जन्ममरणाभ्यां व्यवहितत्वादनुपपन्नं वेदानुस्मरणम्, मैवम्; भूतप्रेतपिशाचादिषु दर्शनादिति भावः। न च कर्मानधिकारे ब्रह्मविद्यायामनधिकारः स्यादित्याह—**यदपीति**।

न्यायनिर्णयः

कुतो वेदार्थेऽधिकारः, तत्राह— **तेषां चेति**। जन्ममरणव्यवधानेऽपि भूतप्रेतादिषु स्मृतिदर्शनान्न तदस्मृतिरिति भावः। तथापि पूर्वोक्तानुमाने जाग्रति कुतो देवादयो ब्रह्मविद्यायामधिक्रियेरन्नित्याशङ्क्य कालातीतत्वमाह— **अपि चेति**। ब्रह्मचर्यादीत्यादिपदेनोपगमन-शुश्रूषादि गृह्यते। द्वितीयमादिपदं सनत्कुमारनारदसंवादादिसंग्रहार्थम्। न केवलं लिङ्गविरोधादेव कालातीतत्वं, किंतु 'तद्यो यो देवानाम्' इत्यादिवाक्यविरोधादपीति मत्वाऽऽह— **यदपीति**। देवानां कर्मसु नाधिकारः, देवतान्तराणामुद्देश्यानामभावात् तदनुष्ठानाशक्तेरिति सूत्रार्थः। ऋषीणामपि भृग्वादीनामार्षेयकर्मणि नाधिकारः, भृग्वाद्यन्तराभावात् तद्युक्ते कर्मण्यशक्तेरिति सूत्रान्तरार्थः। अधिकारहेत्वसत्त्वं ज्ञानेऽपि तुल्यं तेषामिति कुतो वाक्यार्थधीरित्येतद् दूषयति— **न तदिति**। तदेव स्पष्टयति— **न हीति**। साधकबाधकसत्त्वासत्त्वफलमाह— **तस्मादिति**। ननु देवादीनामधिकारे कथमङ्गुष्ठमात्रश्रुतिः, न हि तेषां महादेहानां हृदयमङ्गुष्ठमात्रं, तत्राह— **देवादीति**। साधारणी खल्वङ्गुष्ठमात्रश्रुतिस्तत्र तत्र तत्तदङ्गुष्ठपरिमितहृदयापेक्षया निर्वक्ष्यतीत्यर्थः।।२६।।

मन्त्रादिप्रामाण्येन विग्रहादिमत्त्वं गृहीत्वा देवतादीनामधिकारो निरूपितः। सम्प्रति देवताविग्रहादिवादिमन्त्रादीनामन्यपराणामविरोधे प्रामाण्यात् प्रत्यक्षादिविरोधमाशङ्क्य परिहर्तुं सूत्रचतुष्टये स्थिते प्रथमं कर्मणि विरोधमाशङ्क्य परिहरति— **विरोध इति**।

---

१. अस्मिन्नपि जन्मनि क्रियमाणमध्ययनं न तत्काल एव सम्यग्ज्ञानं जनयति, किन्तु संस्कारद्वारा विचारकाले स्मृतिमुत्पाद्य। देवानां चाविनष्टस्मृतित्वात् जन्मान्तरीयाध्ययनमपि अस्मदादिवदेव विचारोपयोगि। वस्तुतस्तु 'स्वाध्यायोऽध्येतव्यः' इति स्वशाखाध्ययनविषयो नियमः। देवादीनां च न स्वीया शाखाऽस्तीति न तेषु स नियमः प्रवर्तत इत्यपि वक्तुं शक्यमिति ब्र.वि.पृ. ३६०।

स्यादेतत्- यदि विग्रहवत्त्वाद्यभ्युपगमेन देवादीनां विद्यास्वधिकारो वर्ण्येत, विग्रहवत्त्वादृत्विगादिवदिन्द्रादीनामपि स्वरूपसंनिधानेन कर्माङ्गभावोऽभ्युपगम्येत। तदा च विरोधः कर्मणि स्यात्। न हीन्द्रादीनां स्वरूपसंनिधानेन यागेऽङ्गभावो दृश्यते। न च संभवति। बहुषु यागेषु युगपदेकस्येन्द्रस्य स्वरूपसंनिधानतानुपपत्तेरिति चेत्; नायमस्ति विरोधः। कस्मात्? अनेकप्रतिपत्तेः। एकस्यापि देवतात्मनो युगपदनेकस्वरूपप्रतिपत्तिः संभवति। कथमेतदवगम्यते? दर्शनात्। 'तथाहि-'कति देवाः' इत्युपक्रम्य 'त्रयश्च त्री च शता त्रयश्च त्री च सहस्रा' इति निरुच्य 'कतमे ते' इत्यस्यां पृच्छायाम् 'महिमान एवैषामेते

प्रकटार्थविवरणम्

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्। मन्त्रादिप्रामाण्यावष्टम्भेन विग्रहवत्त्वमङ्गीकृत्य पूर्वमधिकारो निरूपितः। तेषां चान्यपराणामविरोधे प्रामाण्यमिष्टम्। विद्यते चेह विरोध इत्याह—**स्यादेतदिति।** योग्यानुपलब्ध्या संप्रदानकारकदेवताऽभावे निश्चिते अननुष्ठानमेव स्यादृत्विगभाव इवेति भावः। किं च युगपदेकस्य कर्णाटलाटादिदेशगतहविर्भोक्तृत्वमपि न जाघटतीत्याह—**न च संभवतीति।** सिद्धान्तभागमवतारयति—**नायमस्तीति।** शिलोपश्छान्दसः। त्रीणि शतानीत्यर्थः। "अष्टौ वसव एकादश रुद्रा द्वादशादित्या इन्द्रः प्रजापतिश्च" इति त्रयस्त्रिंशद् देवाः। पुनः शाकल्येन 'कति देवा' इति पृष्टे षडेवेति याज्ञवल्क्यस्योत्तरम्। षण्णामग्निपृथिवीवाय्वन्तरिक्षादित्यदिवां महिमानस्त्रयस्त्रिंशद्देवाः, न ततो भिद्यन्ते। पुनरप्यग्न्यादिकमेकीकृत्य त्रयो लोका एव त्रयो देवा उक्ताः। पुनरन्नप्राणौ द्वावेव देवौ त्रयाणां तत्रान्तर्भावात्; पुनरध्यर्ध एको देवः। सति हि वायौ सर्वमिदमध्यार्धोत्दृद्धिं प्राप्नोतीति।

भाष्यभावप्रकाशिका

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्।।२७।। विरोधः कर्मणीत्यादिसूत्रचतुष्टयेन देवताविग्रहादिप्रतिपादकमन्त्रादीनां प्रत्यक्षादिविरोधमाशङ्क्य परिहरति। प्रमाणान्तरविरुद्धार्थे मन्त्रादीनामन्यपराणां प्रामाण्यायोगाद् विग्रहवद्देवताविषयो मन्त्रादिरुपचरितार्थोऽभ्युपगन्तव्यः। तथा च सति शब्दोपहितोऽर्थः, अर्थोपहितो वा शब्दो देवता इति तस्याचेतनत्वान्नाधिकारः संभवतीति शङ्कते—**स्यादेतदिति।** दर्शनाभावमुक्त्वा युक्त्यभावमाह—**न चेति।** उद्दिश्य त्यागात्मकत्वाद् यागस्य यद्यपि नास्ति विरोधः, तथाप्यङ्गीकृत्य परिहरति—**नायमिति।** तद् व्याचष्टे—**एकस्यापीति।** श्रौतं दर्शनमाह—**तथा हीति।** वैश्वदेवस्य निविदि कति देवाः शस्यमानाः प्रसंख्याता इति शाकल्येन पृष्टे याज्ञवल्क्यस्योत्तरम्—**त्रयश्चेति।** अत्र निविदिति शस्यमानदेवतासंख्यावाचको मन्त्र उच्यते। वसवोऽष्टावेकादश रुद्रा द्वादशादित्या इन्द्रः प्रजापतिरिति त्रयस्त्रिंशद् देवताः। एते च षण्णां देवानामग्निपृथिवीवाय्वन्तरिक्षादित्यदिवां महिमानः, तेऽपि त्रयाणां लोकानाम्, ते च द्वयोरन्नप्राणयोः, तौ चैकस्य प्राणस्येति प्राणस्य सर्वे महिमान

न्यायनिर्णयः

मानान्तरविरुद्धेऽर्थे मन्त्रादीनामन्यपराणामप्रामाण्याद् विग्रहवद्देवतादिविषयाणां तेषामुपचरितार्थतया शब्दोपहितोऽर्थस्तदुपहितो वा शब्दो देवादिरित्यचेतनत्वात् तस्य नाधिकारसिद्धिरित्यभिसंधाय शङ्कां विभजते— **स्यादेतदिति।** अभ्युपगम्यतामिन्द्रादीनामध्वर्युप्रभृतिवदध्वरे स्वरूपसंनिधानेनाङ्गत्वं, तत्राह— **तदा चेति।** कथं विरोधप्रसक्तिः, तत्राह— **न हीति।** दर्शनाभावमुक्त्वा युक्त्यभावमाह— **न चेति।** इन्द्रादीनां स्वरूपसन्निधिद्वारा यागाङ्गत्वायोगे हेतुमाह— **बहुष्विति।** उद्दिश्य त्यागत्वाद् यागस्य न विरोधोऽस्तीत्याह— **नायमिति।** विरोधमङ्गीकृत्यापि परिहर्तुं प्रश्नपूर्वकं हेतुमादाय व्याख्याति— **कस्मादिति।** एकस्य युगपदनेकत्वापत्तिर्विरुद्धेत्याह— **कथमिति।** प्रामाणिकत्वेन विरोधं समाधत्ते— **दर्शनादिति।** तत्र श्रौतं दर्शनमाह— **तथाहीति।** वैश्वदेवस्य निविदि कति देवाः शस्यमाना इति शाकल्येन पृष्टे याज्ञवल्क्यस्योत्तरम्— **त्रयश्चेति।** शस्यमानदेवतासंख्यावाचिमन्त्रपदं निविदुच्यते। षडधिकत्रिशताधिकत्रिसहस्रं देवा इति संख्यानिर्णयानन्तरं संख्येयप्रश्ने वसवोऽष्टावेकादश रुद्रा द्वादशादित्याः प्रजापतिरिन्द्रश्चेति त्रयस्त्रिंशद्देवेषु पूर्वेषामन्तर्भावो दर्शित इत्याह— **कतम इति।**

---

१. सौत्रं दर्शनादिति पदं श्रुतिस्मृत्योः महिमविशेषवतां कायव्यूहदर्शनादिति व्याचष्टे—तथाहीति।

त्रयस्त्रिंशत्त्वेव देवाः' (बृ.उ. ३।९।१,२) इति निर्ब्रुवती श्रुतिरेकैकस्य देवतात्मनो युगपदनेकरूपतां दर्शयति। तथा त्रयस्त्रिंशतोऽपि षडाद्यन्तर्भावक्रमेण 'कतम एको देव इति प्राणः' (बृ. उ. ३।९।९) इति प्राणैकरूपतां देवानां दर्शयन्ती तस्यैवैकस्य प्राणस्य युगपदनेकरूपतां दर्शयति। तथा स्मृतिरपि- 'आत्मनो वै शरीराणि बहूनि भरतर्षभ। योगी कुर्याद् बलं प्राप्य तैश्च सर्वैर्महीं चरेत्। प्राप्नुयाद्विषयान् कैश्चित् कैश्चिदुग्रं तपश्चरेत्। संक्षिपेच्च पुनस्तानि सूर्यो रश्मिगणानिव'। इत्येवंजातीयका प्राप्ताणिमाद्यैश्वर्याणां योगिनामपि युगपदनेकशरीरयोगं दर्शयति। किमु वक्तव्यमाजानसिद्धानां देवानाम्। अनेकरूपप्रतिपत्तिसंभवाच्चैकैका देवता बहुभी रूपैरात्मानं प्रविभज्य बहुषु यागेषु युगपदङ्गभावं गच्छतीति। परैश्च न दृश्यतेऽन्तर्धानादि-क्रियायोगादित्युपपद्यते।

अनेकप्रतिपत्तेर्दर्शनादित्यस्यापरा व्याख्या- विग्रहवतामपि कर्माङ्गभावचोदनास्वनेका प्रतिपत्ति-

प्रकटार्थविवरणम्

एवं षडाद्यन्तर्भावः। श्रुतिषु दर्शनादिति व्याख्याय स्मृतिषु दर्शनादिति व्याचष्टे—**तथा स्मृतिरपीति**। "[१]अणिमा लघिमा चैव महिमा प्राप्तिरीशिता। प्राकाश्यं[म्यं] च वशित्वं च यत्र कामावसायिता।" आजानो देवलोकः, तत्रैवोत्पन्नानां भवत्येवमनेकरूपप्राप्तिः। ततः प्रकृते किं परिहृतमित्याशङ्क्याह—**अनेकरूपप्रतिपत्तीति**। अयोग्यत्वाच्च योग्यानुपलब्धिविरोधोऽपि नास्तीत्याह—**परैश्चेति**। सन्निधानेनैवाङ्गत्वमिति सर्वत्र नैकरूपमेव प्रतिपत्तिः, व्यवहितमप्युद्दिश्य बहूनां नमस्करणदर्शनादित्यर्थान्तरमाह—**अनेकप्रतिपत्तेरिति**।

भाष्यभावप्रकाशिका

इत्येकस्यानेकरूपतासिद्धेरित्यर्थः। त्रयस्त्रिंशतोऽपीत्यस्य देवतानामित्यनेन सम्बन्धः। भवतु योगिनामनेकरूपप्रतिपत्तिः, देवानां किमायातमिति? तत्राह—**प्राप्तेति**। **आजानसिद्धानामिति**। उपायानुष्ठानमन्तरेण जन्मनैव सिद्धानामित्यर्थः। ततः किमायातमिति? तदाह—**अनेकरूपेति**।

अपरा व्याख्येति। अयमर्थः—अनेकत्र कर्मणि युगपदङ्गभावप्रतिपत्तिरङ्गभावगमनम्, तस्य दर्शनादिति। तदेव स्पष्टयितुं

न्यायनिर्णयः

अन्तर्भावश्रुतेस्तात्पर्यमाह— **एकैकस्येति**। तेऽपि देवाः षण्णामग्निपृथिवीवाय्वन्तरिक्षादित्यदिवां महिमानः, तेऽपि त्रयाणां लोकानां, ते च द्वयोरन्नप्राणयोः, तौ चैकस्य प्राणस्येति प्राणस्य सर्वे महिमान इत्येकस्यानेकरूपताधीरित्याह— **तथेति**। त्रयस्त्रिंशतोऽपि देवानामिति संबन्धः। श्रौतं दर्शनमुक्त्वा स्मार्तं दर्शनमाह— **तथेति**। बलं योगमाहात्म्यम्। तेषामर्थक्रियामाह— **तैश्चेति**। तेषां भोगायतनत्वमाह— **प्राप्नुयादिति**। परलोकहितत्वमाह— **कैश्चिदिति**। तत्पारवश्यं पुंसो निरस्यति— **संक्षिपेच्चेति**। योगिनामनेकरूपप्रतिपत्तावपि देवानां किं जातं, तदाह— **प्राप्तेति**। 'अणिमा लघिमा चैव महिमा प्राप्तिरीशिता। प्राकाम्यं च वशित्वं च यत्रकामावसायिता।।' इत्यष्टैश्वर्याणि। अपिशब्दसूचितमर्थमाह— **किम्विति**। आजानसिद्धानां जन्मनैव प्राप्तातिशयानामित्यर्थः। तथापि प्रकृते किं जातं तदाह— **अनेकेति**। श्रुतिस्मृतिभ्यां युक्तिविरोधे समाहितेऽपि प्रतीतिविरोधस्य कः समाधिः, तत्राह— **परैश्चेति**। आदिशब्देन परदृष्टिप्रतिबन्धो गृह्यते। उक्तन्यायाद् युज्यते देवादीनां विग्रहवत्त्वोपगमेन विद्यास्वधिकार इति शेषः। संनिहितस्यैवाङ्गतेति न नियमोऽसंनिहितस्यापि युगपदनेकत्र कर्मण्यङ्गभावप्रतिपत्तिरङ्गभावगमनं तस्य दर्शनादित्यर्थान्तरमाह—

---

१. अणिमा झटिति परमाणुतुल्यतयाऽवस्थानम्। तूलपिण्डवल्लघुत्वापादनं (शरीरस्य) लघिमा। लोहादिवद् गुरुत्वापादनं गरिमा। पर्वतादिवदाकारसम्पादनं महिमा। अङ्गुल्यग्रेण चन्द्रादिस्पर्शः प्राप्तिः। प्राकाम्यमिच्छानभिघातः। ईशित्वं सर्जनशक्तिः। वशित्वं नियमनशक्तिः। एतत्सर्वं यत्र कामावसायितायां सत्यसङ्कल्पतायां सिद्धायामेव भवति। ब्र.वि. ४०९, रत्नप्रभायां द्र. २५०।

दृश्यते। क्वचिदेकोऽपि विग्रहवाननेकत्र युगपदङ्गभावं न गच्छति, यथा बहुभिर्भोजयद्भिर्नैको ब्राह्मणो युगपद् भोज्यते। क्वचिच्चैकोऽपि विग्रहवाननेकत्र युगपदङ्गभावं गच्छति, यथा बहुभिर्नमस्कुर्वाणैरेको ब्राह्मणो युगपन्नमस्क्रियते। तद्वदिहोद्देशपरित्यागात्मकत्वाद् यागस्य विग्रहवतीमप्येकां देवतामुद्दिश्य बहवः स्वं स्वं द्रव्यं युगपत् परित्यक्ष्यन्तीति विग्रहवत्त्वेऽपि देवतानां न किंचित् कर्मणि विरुध्यते।।२७।।

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्।।२८।।

मा नाम विग्रहवत्त्वे देवादीनामभ्युपगम्यमाने कर्मणि कश्चिद् विरोधः प्रसञ्जि। शब्दे तु विरोधः प्रसज्येत। कथम्? औत्पत्तिकं हि शब्दस्यार्थेन संबन्धमाश्रित्य 'अनपेक्षत्वात्' (जै. सू. १।१।५) इति वेदस्य प्रामाण्यं स्थापितम्। इदानीं तु विग्रहवती देवताऽभ्युपगम्यमाना यद्यप्यैश्वर्ययोगाद् युगपदनेक-कर्मसंबन्धीनि हवींषि भुञ्जीत, तथापि विग्रहयोगादस्मदादिवज्जननमरणवती सेति नित्यस्य शब्दस्य

प्रकटार्थविवरणम्

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्। कर्मण्यविरोधमङ्गीकृत्य विरोधान्तरमुद्भावयति—**मा नामेति।** औत्पत्तिकसूत्रे हि वाच्यवाचकसंबन्धो नित्योऽङ्गीकृतः। 'अस्यैकं नामेति इदमा निर्दिश्य सङ्केतेऽवश्यमिदंतद्वाच्ययोः नैसर्गिकसंबन्धस्याभ्युपगन्तव्यत्वादित्याद्युपपत्त्या। यदा च पौरुषेयः संबन्धो न भवति तदा पुरुषबुद्ध्यपेक्षाऽभावादनपेक्षत्वलक्षणं प्रामाण्यं स्थापितम् "तत्प्रमाणं बादरायणस्यानपेक्षत्वात्" इति सूत्रावयवेन। तत् तव विरुध्यते, संबन्ध्यनित्यत्वेन संबन्धानित्यत्वादिति

भाष्यभावप्रकाशिका

व्यतिरेकमाह—**क्वचिदेक इति।** इदानीमपेक्षितामङ्गतामाह—**क्वचिच्चेति।** तस्मादसंनिहिताया अपि देवताया विप्रकृष्टानेकार्थोपलम्भसमर्थाया युगपदनेकत्राङ्गता न विरुद्धेत्युपसंहरति—**तद्वदिहेति।**।२७।।

शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्।।२८।। जातिविषयत्वान्न विरोध इति शङ्कते—**कथमिति।** गोत्वादिवद् वस्वादिषु पूर्वावमर्शाभावादुपाधेरप्यप्रतीतेः, आकाशादिशब्दवद् व्यक्तिवचना वस्वादिशब्दा इति परिहरति पूर्ववादी—**औत्पत्तिकं हीति।** अयमर्थः—व्यक्तीनामनित्यत्वात् तत्सम्बन्धस्यापि देवदत्तशब्दार्थसम्बन्धवदनित्यतया पुरुषबुद्धिपराधीनत्वान्मानान्तरापेक्ष-पुरुषधीजन्यशब्दार्थसम्बन्धाधीनवाक्यार्थप्रत्ययस्यापि मानान्तरापेक्षत्वाद् वेदस्याप्रामाण्यं स्यात् इति।

न्यायनिर्णयः

अनेकेति। तदेव स्पष्टयितुं व्यतिरेकं सोदाहरणमाह— **क्वचिदिति।** सम्प्रत्यभीष्टाङ्गत्वार्थमन्वयं सदृष्टान्तमाचष्टे— **क्वचिच्चेति।** अन्वयव्यतिरेकसिद्धमर्थं प्रकृते योजयति— **तद्वदिति।** असंनिधानेऽपि देवताया विप्रकृष्टानेकार्थदृष्टिशक्तेर्युगपदनेकत्राङ्गता सिद्धेत्यर्थः। कर्मण्यविरोधमुपसंहरति— **इति विग्रहेति।**।२७।।

तत्राविरोधेऽपि देवतादीनां विग्रहवत्त्वे शब्दे प्रामाण्यविरोधमाशङ्क्य प्रत्याह— **शब्द इति चेदिति।** शङ्कां विभजते— **मा नामेति।** शब्दस्याकृत्यर्थत्वात् तत्र विरोधो नेति शङ्कते— **कथमिति।** गोत्वादिवद् वस्वादिषु पूर्वापरापरामर्शादुपाधेरपि पाचकत्वादिवददृष्टेराकाशादिशब्दवद् व्यक्तिवचनो वस्वादिशब्द इति मत्वाऽऽह— **औत्पत्तिकं हीति।** अस्माभिरपि तथैव तदिष्टमिति न तस्य विरोधोऽस्तीत्याशङ्क्याह— **इदानीं त्विति।** व्यक्तीनामनित्यत्वात् तत्संबन्धस्यापि सङ्केतवदनित्यतया पुंधीकृतत्वान्मानान्तरापेक्षपुंधीप्रभवशब्दार्थसंबन्धाधीनवाक्यार्थधियोऽपि मानान्तरापेक्षत्वाद् वेदस्यामानत्वं स्यादित्यर्थः। परिहारस्थं

---

१. 'अस्येदं नाम' इति पाठः स्यात्।

नित्येनार्थेन नित्ये संबन्धे प्रतीयमाने यद् वैदिके शब्दे प्रामाण्यं स्थितं, तस्य विरोधः स्यादिति चेत्[1]। नायमप्यस्ति विरोधः। कस्मात्? अतः प्रभवात्। अत एव हि वैदिकाच्छब्दाद् देवादिकं जगत् प्रभवति। ननु 'जन्माद्यस्य यतः' (ब्र. सू. १।१।२) इत्यत्र ब्रह्मप्रभवत्वं जगतोऽवधारितं, कथमिह शब्दप्रभवत्वमुच्यते? अपि च यदि नाम वैदिकाच्छब्दादस्य प्रभवोऽभ्युपगतः, कथमेतावता विरोधः शब्दे परिहृतः? यावता वसवो रुद्रा आदित्या विश्वेदेवा मरुत इत्येतेऽर्था अनित्या एवोत्पत्तिमत्त्वात्। तदनित्यत्वे च तद्वाचिनां वैदिकानां वस्वादिशब्दानामनित्यत्वं केन निवार्यते? प्रसिद्धं हि लोके देवदत्तस्य पुत्र उत्पन्ने यज्ञदत्त इति तस्य नाम क्रियत इति। तस्माद् विरोध एव शब्द इति चेत्, न; गवादिशब्दार्थसंबन्धनित्यत्वदर्शनात्। न हि गवादिव्यक्तीनामुत्पत्तिमत्त्वे तदाकृतीनामप्युत्पत्तिमत्त्वं स्यात्। द्रव्यगुणकर्मणां हि व्यक्तय एवोत्पद्यन्ते, नाकृतयः। आकृतिभिश्च शब्दानां संबन्धो, न व्यक्तिभिः। व्यक्तीनामानन्त्यात् संबन्धग्रहणानुपपत्तेः।

प्रकटार्थविवरणम्

भावः। सिद्धान्तत्वेन सूत्रभागमवतारयति—**नायमप्यस्तीति**। जगत्कारणत्वेन प्रागेव सिद्धत्वात् शब्दानां नानित्यत्वमित्यर्थः।

पूर्वापरविरोधं शङ्कते—**नन्विति**। हेतुश्चायमसाधक इत्याह—**अपि चेति**। न वस्वादिव्यक्तयो वस्वादिशब्दवाच्याः, किं तु सामान्यानि तानि, गोत्ववत्; अतो नार्थानित्यत्वेन शब्दानित्यत्वमिति परिहरति—**न गवादिशब्दार्थेति**। ननु व्यक्तिभिरेव किं न संबन्ध इत्याशङ्क्याह—**व्यक्तीनामानन्त्यादिति**। सामान्यद्वारेण संबन्धग्रहणं चेत्, तदेव तर्ह्यस्तु शक्तिगोचरः; लाघवाव्यभिचाराभ्याम्;

भाष्यभावप्रकाशिका

तदविरोधेन शब्दप्रभवत्वेऽपि कथं शब्दे विरोधाभाव इत्याह—**अपि चेति**। ननु जातेश्शब्दार्थत्वान्न विरोध इति, तत्राह—**यावतेति**। अनेकत्र कार्त्स्न्येन वर्तमाना जातिरित्यङ्गीकारे सुवर्णादिषु व्यभिचाराद् अनेकत्र युगपत्कार्त्स्न्येन वर्तमाना जातिरिति लक्षणमङ्गीकरणीयम्। तत इन्द्रादिजात्यभाव इत्यर्थः। अर्थोत्पत्त्युत्तरकालत्वाच्च शब्दस्य न शब्दप्रभवत्वमर्थस्येत्याह—**प्रसिद्धं हीति**। ननु तत्रापि व्यक्तेरनित्यत्वात् सम्बन्धोऽनित्य इति, तत्राह—**न हि गवादीति**। व्यक्त्यभेदाज्जातिरप्युत्पद्यत इति, तत्राह—**द्रव्यगुणेति**।

न्यायनिर्णयः

नञर्थमाह— **नायमिति**। कर्मण्यविरोधं दृष्टान्तयितुमपिशब्दः। तत्र प्रश्नपूर्वकं हेतुमुक्त्वा व्याचष्टे— **कस्मादिति**। तथा च देवादिजगद्धेतुत्वेन शब्दस्य नित्यत्वात् तदनित्यत्वकृतो दोषो नास्तीति शेषः। पूर्वापरविरोधं शङ्कते— **नन्विति**। शब्दस्य निमित्तत्वाद् ब्रह्मणश्चोपादानत्वादुभयप्रभवत्वं जगतो युक्तमित्याशङ्क्याह— **अपि चेति**। आकृतेः शब्दार्थतया विरोधसमाधिरित्याशङ्क्याह— **यावतेति**। मानाभावान्न वसुत्वादिजातिरस्ति, तद्व्यक्तीनां जनिमत्त्वादनित्यतेति नाविरोध इत्यर्थः। व्यक्तीनामनित्यत्वेऽपि वाचकशब्दनित्यतया सुकरो विरोधसमाधिरित्याशङ्क्याह— **तदिति**। जगतः शब्दप्रभवत्वमुपेत्य विरोधमुक्त्वा शब्दस्यार्थोत्पत्त्युत्तरकालत्वादर्थस्य ततो जन्मायोगात् तदेव नास्तीत्याह— **प्रसिद्धं हीति**। विरोधं निगमयति— **तस्मादिति**। वस्वादिशब्दार्थसंबन्धनित्यत्वं दृष्टान्तेन वदन्नुत्तरमाह— **नेति**। तत्रापि व्यक्तेरनित्यत्वान्न संबन्धनित्यतेत्याशङ्क्याह— **न हीति**। व्यक्तिभिरभेदाज्जातिरपि जातेत्याशङ्क्योक्तम्— **द्रव्येति**। अभेदवद् भेदस्यापि भावान्नित्यमनेकसमवेतं सामान्यमिति च स्थितेरिति हिशब्दार्थः। आकृतीनामुत्पत्त्यभावेऽपि कुतः संबन्धनित्यता, तत्राह— **आकृतिभिश्चेति**। तास्त्वाकृतिद्वारा लक्षणया शाब्द्यो

---

१. ननु इन्द्रादिपदस्य कश्यपादिसङ्केतितार्थप्रतिपादकत्वेऽपि कथं वेदस्याप्रामाण्यम्। स्वप्रामाण्यस्य मूलभूतप्रमाणान्तरापेक्षत्वं खलु ज्ञातार्थज्ञापकत्वेनाप्रामाण्यावहम्। अन्यथा शक्तिग्रहरूपपुरुषबुद्धिमपेक्ष्य बोधजनकस्य शब्दस्य प्रामाण्यमेवोच्छिद्येतेति चेत्? उच्यते। सङ्केतयितृपुरुषाणामव्यवस्थितत्वेन बहूनां सङ्केतविषयत्वे सति क इन्द्रादिः प्रकृते देवता इत्यादिनिर्धारणाभावेऽनुष्ठानासंभवेनाननुष्ठानलक्षणाप्रामाण्यप्रसञ्जने तात्पर्यमिति। ब्र.वि. ३६६।

व्यक्तिषूत्पद्यमानास्वप्याकृतीनां नित्यत्वान्न गवादिशब्देषु कश्चिद् विरोधो दृश्यते। तथा देवादिव्यक्ति-प्रभवाभ्युपगमेऽप्याकृतिनित्यत्वान्न कश्चिद् वस्वादिशब्देषु विरोध इति द्रष्टव्यम्। [1]आकृतिविशेषस्तु देवादीनां मन्त्रार्थवादादिभ्यो विग्रहवत्त्वाद्यवगमादवगन्तव्यः। स्थानविशेषसंबन्धनिमित्ताश्चेन्द्रादिशब्दाः, सेनापत्यादिशब्दवत्। ततश्च यो यस्तत्तत्स्थानमधिरोहति, स स इन्द्रादिशब्दैरभिधीयत इति न दोषो भवति। न चेदं शब्दप्रभवत्वं ब्रह्मप्रभवत्ववदुपादानकारणाभिप्रायेणोच्यते। कथं तर्हि? स्थिते वाचकात्मना नित्ये शब्दे नित्यार्थसंबन्धिनि शब्दव्यवहारयोग्यार्थव्यक्तिनिष्पत्तिरतः प्रभव इत्युच्यते। कथं पुनरवगम्यते शब्दात् प्रभवति जगदिति? प्रत्यक्षानुमानाभ्याम्। प्रत्यक्षं श्रुतिः, प्रामाण्यं प्रत्यनपेक्षत्वात्। अनुमानं स्मृतिः,

प्रकटार्थविवरणम्

तन्नान्तरीयसिद्धत्वेनानन्यलब्धत्वाभावाच्च न [व्यक्ति]शक्तिकल्पनावकाशः[2]।

व्यक्तयो व्यवहारार्हा लक्षणावर्त्मना पदात्। औपाधिकस्तु दण्ड्यादिर्जात्यभावे भवेद् बलात्॥

ननु लक्षणया व्यक्तिप्रतीतिरप्यङ्गीकृता चेत्, तर्हि लाक्षणिकार्थस्यानित्यत्वेन शब्दानित्यत्वमित्याशङ्क्याह—**व्यक्तिषु त्विति**। "युगपदनेकत्र कार्त्स्न्येन वर्तमाना जातिः" इति लक्षणादिन्द्रादीनां पूर्वापरव्यक्त्यनुगता जातिः न विरुध्यत इति भावः। प्रयोगोऽपि—वस्वादिशब्दा जातिवाचकाः, बहुषु प्रयुज्यमानाखण्डशब्दत्वात्, पटादिशब्दवत्। तथा जातिः स्वतन्त्रा, अनेकार्थानुगतत्वात्, सर्वगतत्वाद्वा, [3]मृदाकाशवदिति। पिण्डस्य सर्वगतत्वेऽपि नष्टव्यक्तिदेशे स्वातन्त्र्येणावस्थानं विनाशो वा स्यादमूर्तस्य स्वातन्त्र्येण गमनादर्शनात्। अतः सर्वव्यक्त्युच्छित्तावपि अवान्तरप्रलये जातिसद्भावान्न वाच्यवाचकसंबन्धनित्यताव्याघातः; किं त्वेकशक्तित्वेऽपि नावान्तरप्रलये कश्चिद्विरोध इत्याह—**स्थानविशेषेति**। यश्चोद्भावितः पूर्वापरविरोधः तं प्रत्याह—**न चेदमिति**। उत्तरं पदमवतारयति—**कथं पुनरिति**। "एते असृग्रमिन्दवस्तिरःपवित्रमाशवः। विश्वान्यभि सौभगा।" इत्यस्या ऋचः पदशो देवादिकं जगत् ससर्ज

भाष्यभावप्रकाशिका

उपसंहरति—**व्यक्तिष्विति**। देवादिष्वाकृत्यभाव उक्त इति, तत्राह—**आकृतीति**। सुवर्णादीनां कार्यान्तरेष्ववयवापचयसंभवात् कार्त्स्न्येन वर्तमानत्वमसिद्धम्, अतोऽनेकत्र कार्त्स्न्येन वर्तमाना जातिरिति लाघवादङ्गीकरणीयमयौगपद्येऽपीति भावः। शब्दस्य निमित्तकारणत्वान्न पूर्वापरविरोध इत्याह—**न चेदमिति**।

न्यायनिर्णयः

भवन्तीति भावः। दृष्टान्तमुपसंहरति— **व्यक्तिष्विति**। गवादिशब्दार्थसंबन्धनित्यत्वेऽपि प्रकृते किमित्याशङ्क्य दार्ष्टान्तिकमाह— **तथेति**। उक्तो देवादिष्वाकृत्यभावः साधकाभावादित्याशङ्क्याह— **आकृतीति**। अनेकत्र साकल्येन वर्तमाना जातिरित्यङ्गीकारादिन्द्रादीनां मन्त्रादिसिद्धविग्रहादिपञ्चकवतां पूर्वापरव्यक्त्यनुगता जातिरनुगतधीवेद्या न विरुध्यते। वस्वादिशब्दा जातिवाचिनो बहुषु प्रयुज्यमानाखण्डशब्दत्वात् पटादिशब्दवदिति चानुमानादित्यर्थः। इन्द्रादिशब्दानामुपाधिनिमित्तत्वं पक्षान्तरमाह— **स्थानेति**। औपाधिकत्वपक्षे शब्दार्थमनूद्यावान्तरलयेऽपि विरोधाभावमाह— **ततश्चेति**। यत्तु पूर्वापरविरोध इति, तत्राह— **न चेति**। तर्हि कथम् 'अतः प्रभवात्' इत्युक्तं, तत्राह— **कथमिति**। उक्तेऽर्थे मानं पृष्ट्वोत्तरपदमवतारयति— **कथमित्यादिना**। नन्वैन्द्रियकं प्रत्यक्षं जगतः शब्दप्रभवत्वे नास्ति, तत्राह— **प्रत्यक्षमिति**। तत्रापि श्रुतौ प्रत्यक्षशब्दे हेतुमाह— **प्रामाण्यमिति**। तथापि तत्रानुमानं कथं प्रमाणं, तत्राह— **अनुमानमिति**। तत्रापि प्रवृत्तिनिमित्तमाह— **प्रामाण्यमिति**। अव्यभिचारिलिङ्गोत्थत्वादनुमानस्य स्वतः-

---

१. आकृतिविशेषस्त्विति। सहस्राक्षत्वाद्यभिव्यङ्ग्यो जातिविशेषः इन्द्रत्वादिः। स्थानविशेषेति। दिक्पालाधिपतित्वादिरूपोपाधिविशेषेत्यर्थः। यदि इन्द्रादयः सर्वेषु कल्पेषु समानसंस्थानाः तदा जात्यभिव्यञ्जकसंस्थानस्य सत्त्वात् जातिवाचकत्वमिन्द्रादिपदानाम्। यदि तु कल्पभेदेन विषमसंस्थाना एवेन्द्रादय इति कश्चिद् वदेत् तदा जात्यसिद्धावपि स्वर्गलोकाधिपतित्वाद्युपाधिका इन्द्रादिशब्दाः सन्त्वित्यभिप्रेत्योपाधिपक्षः प्रदर्शितो भाष्ये। ब्र.वि. ३७३। २. यद्वा केवलव्यक्तिषु शक्तिरिह निरस्यते। अनुपपत्तिज्ञानं विनैव व्यक्तेः शब्दशक्त्यायत्तजातिज्ञानविषयत्वेनोभयशक्तेरावश्यकत्वात्। अन्यथा विशिष्टवाचकपदस्यैवाभावापत्तौ 'तत्त्वमसी'त्यादौ भागत्यागलक्षणाश्रयणसिद्धान्तव्याकोपात्। द्र. रत्न. २५२।

३. मृद्वत्, आकाशवच्चेति यथाक्रमं दृष्टान्तः।

प्रामाण्यं प्रति सापेक्षत्वात्। ते हि शब्दपूर्वां सृष्टिं दर्शयतः। 'एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानिन्दव इति पितॄंस्तिरःपवित्रमिति ग्रहानाशव इति स्तोत्रं विश्वानीति शस्त्रमभिसौभगेत्यन्याः प्रजाः' (ता. ब्रा. ६।९।१५) इति श्रुतिः। तथाऽन्यत्रापि 'स मनसा वाचं मिथुनं समभवत्' (बृ. उ. १।२।४) इत्यादिना तत्र तत्र शब्दपूर्विका सृष्टिः श्राव्यते। स्मृतिरपि–'अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः'। (द्र. म. भा. १२।२३२।२४) इति। उत्सर्गोऽप्ययं वाचः संप्रदायप्रवर्तनात्मको द्रष्टव्यः, अनादिनिधनाया अन्यादृशस्योत्सर्गस्यासंभवात्। तथा– 'नाम रूपं च भूतानां कर्मणां च प्रवर्तनम्। वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः'। (वि. पु. १।५।६३) इति। 'सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक्। वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे।' (मनु. १।२१) इति च।

प्रकटार्थविवरणम्

प्रजापतिः। एतानि च पदानि कथंचित् देवादिप्रत्यायकत्वात् तत्र प्रयुक्तानि। तथा हि—एतच्छब्दस्य सर्वनाम्नः सर्वदैकरूपत्वेन देवानामुपस्थापकत्वम्। न हि कदाचिन्नव वसवः। उक्तं हि—"तस्माद् यावन्त एवाग्रे देवास्तावन्त इदानीम्" इति। अन्वहं सृजत इत्यसृग्रम्। अस्माच्छब्दान्मनुष्याननुस्मृत्य ससर्ज। चन्द्रलोकनिवासिनः पितरः इन्दव इवेतीन्दवः। इन्दवशब्दात् पितॄननुस्मृत्य ससर्ज। ग्रहेषु सोमाधारपात्रेषु तिरोभावेन दशापवित्रं निधीयते। अस्ति च विधिः "दशापवित्रेण ग्रहान् पायति" इति। तेन तिरःपवित्रशब्दात् ग्रहान् बुद्धिस्थान् ससर्ज। अश्नुवते व्याप्नुवन्ति ऋचः सामानि इति आशवशब्दात् बुद्धिस्थं [स्तोत्रम्], स्तोत्रानन्तरम् विशन्तीति विश्वानि शस्त्रशब्दवाच्या ऋचः। प्रगीतं हि शस्त्रं यादृच्छिकत्वात्। "अभिसौभगा" इति शब्दादन्याः पश्वाद्याः प्रजा बुद्धिस्थाः ससर्जेति छन्दोगब्राह्मणवाक्यार्थः। प्रजापतिर्मनसा वाचं त्रयीलक्षणां मिथुनं मन्त्रब्राह्मणद्वन्द्वभूतं समभवत् अन्वभूत्। अव्यक्तरूपेण वा मनसा मिथुनीभूतां त्रयीविहितसृष्टिक्रममन्वालोचयदित्यर्थः। "प्रत्यक्षानुमानाभ्याम्" इत्यस्य

भाष्यभावप्रकाशिका

उत्सर्गोऽपीति। गुरुशिष्यपरम्पराध्ययनं संप्रदायः। उक्तमर्थं लौकिकदृष्टान्तेनोपपादयति—**अपि चेति**। अस्मदादिषु

न्यायनिर्णयः

प्रामाण्येऽप्युत्पत्तौ सापेक्षत्वमात्रसाम्यादनुमानशब्दः स्मृताविति भावः। पञ्चम्याऽभीष्टमर्थमाह— **ते हीति**। तत्र श्रुतिमाह— **एत इति**। 'एते असृग्रमिन्दवस्तिरः पवित्रमाशवः। विश्वान्यभिसौभगा' इत्येतन्मन्त्रस्थपदैः स्मृत्वा देवादीन् ब्रह्मा ससर्ज। तत्र संनिहितवाचकैतच्छब्दो देवानां करणेष्वनुग्राहकत्वेन संनिहितानां स्मारकः। असृग् रुधिरं तत्प्रधानदेहरमणान्मनुष्याणामसृग्रशब्दः स्मारकः। इन्दुमण्डलमध्यस्थपितॄणामिन्दुशब्दः स्मारकः। पवित्रं सोमं स्वान्तस्तिरःकुर्वतां ग्रहाणां तिरःपवित्रशब्दः स्मारकः। ऋचोऽश्नुवतां स्तोत्राणां गीतिरूपाणामाशवः शब्दः स्मारकः। स्तोत्रानन्तरं प्रयोगं विशतां शस्त्राणां विश्वशब्दः स्मारकः। व्यापिवस्तुवाच्यभिशब्दसंयुक्तः सौभगेति शब्दः सौभाग्यवाचकः, तेनाभिसौभगेति निरतिशयसौभाग्यार्थः शब्दोऽन्यासां प्रजानां स्मारकः। तथा च तत्तत्पदेन तत्तद्देवादीन् स्मृत्वा प्रजापतिः सृष्टवानिति शब्दपूर्विका सृष्टिः श्रौतीत्यर्थः। तत्रैव श्रुत्यन्तरमाह— **तथेति**। स प्रजापतिर्मनसा सह वाचं मिथुनभावमभवदभावयत्। त्रयीप्रकाशितां सृष्टिं मनसाऽऽलोचितवानित्यर्थः। 'स भूरिति व्याहरत् स भूमिमसृजत' इत्यादिवाक्यमादिशब्दार्थः। तत्र तत्रेत्याम्नायप्रदेशोक्तिः। तत्र स्मृतिमाह— **स्मृतीति**। रूपसर्गात् प्राथम्यमादावित्युक्तम्। संप्रदायातिरेकेणाप्राप्तिर्दिव्यत्वम्। अस्त्वेवं शब्दसृष्टिस्तथापि कथं तत्पूर्वाऽर्थसृष्टिः, तत्राह— **यत इति**। उत्सृष्टत्वोक्त्या पौरुषेयत्वमाशङ्क्योक्तम्— **उत्सर्गोऽपीति**। संप्रदायो गुरुशिष्यपरंपराध्ययनम्। उत्सृष्टिरेव किं न स्यात्, तत्राह— **अनादीति**। कर्मणां प्रवर्तनं सतामनुष्ठापनमुक्तम्। सर्वेषामित्यत्र कर्मणां सृष्टिरेवोक्तेति भेदः। संस्थाशब्दो रूपभेदग्राही। अस्मदादिषु

'अपि च चिकीर्षितमर्थमनुतिष्ठंस्तस्य वाचकं शब्दं पूर्वं स्मृत्वा पश्चात् तमर्थमनुतिष्ठतीति सर्वेषां नः प्रत्यक्षमेतत्। तथा प्रजापतेरपि स्रष्टुः सृष्टेः पूर्वं वैदिकाः शब्दा मनसि प्रादुर्बभूवुः, पश्चात् तदनुगतानर्थान् ससर्जेति गम्यते। तथा च श्रुतिः- 'स भूरिति व्याहरत् स भूमिमसृजत' (तै. ब्रा. २।२।४।२) इत्येवमादिका भूरादिशब्देभ्य एव मनसि प्रादुर्भूतेभ्यो भूरादिलोकान् सृष्टान् दर्शयति।

किमात्मकं पुनः शब्दमभिप्रेत्येदं शब्दप्रभवत्वमुच्यते? स्फोटमित्याह। वर्णपक्षे हि तेषामुत्पन्नप्रध्वंसित्वान्नित्येभ्यः शब्देभ्यो देवादिव्यक्तीनां प्रभव इत्यनुपपन्नं स्यात्। उत्पन्नप्रध्वंसिनश्च वर्णाः, प्रत्युच्चारणमन्यथा चान्यथा च प्रतीयमानत्वात्। तथाहि- अदृश्यमानोऽपि पुरुषविशेषोऽध्ययन-

प्रकटार्थविवरणम्

प्रसिद्धार्थमाह—**अपि चेत्यादिना।** प्रजापतिः शब्दविकल्पितं ससर्ज बुद्धिपूर्वकस्रष्टृत्वादस्मदादिवदित्यर्थः।

शब्दमेव निरूपयति—**किभात्मकं पुनरिति।** वैयाकरण आह—**स्फोटमिति।** स्फुटयते व्यज्यते वर्णैरिति स्फोटः। स एवार्थसृष्टौ कारणं नित्यत्वात्; न वर्णाः, तेषामनित्यत्वादित्यर्थः। ननु वर्णानित्यत्वमसिद्धमित्याशङ्क्याह—**उत्पन्नप्रध्वंसिनश्चेति।**

भाष्यभावप्रकाशिका

घटादिकार्योत्पतेः शब्दपूर्वकत्वस्य प्रत्यक्षत्वाज्जगत्सृष्टेरपि शब्दपूर्वकत्वमनुमातुं शक्यमिति यावत्।[१] 'प्रत्यक्षानुमानाभ्या'मिति सौत्रपदं व्याचष्टे—**अपि चेति।** कल्पकालीना सृष्टिः, शब्दपूर्विका, सृष्टित्वात्, इदानीन्तनसृष्टिवत्; तथा कल्पकालीन-शब्दार्थसम्बन्धव्यवहारः, तथाविधसम्बन्धस्मृतिपूर्वकः, अभिधानाभिधेयसम्बन्धव्यवहारत्वात्, संप्रतिपन्नवदिति भावः। इदानीं लोके गृहीतसम्बन्धशब्दप्रभवत्वं जगतः प्रतिपादयति—**स भूरिति।**

वर्णव्यतिरिक्तं शब्दमप्युपगम्य तस्माज्जगदुत्पत्तिरुच्यते, किं वा वर्णेभ्यः। न तावदाद्यः; तद्भावे प्रमाणभावात्। नापि द्वितीयः; वर्णानामव्यु[प्यु]त्पन्नप्रध्वंसित्वेन जगत्कारणत्वायोगादित्याक्षिपति—**किमात्मकमिति।** आचार्यदेशीयस्तावदाह—**स्फोटमिति।** ननु अन्यथा प्रतीयमानत्वमसिद्धम्, नैवम्, पुरुषविशेषानुमापकतयाऽन्यथा प्रतीतेरित्याह—**तथा हीति।** औपाधिकोऽयं

न्यायनिर्णयः

पटाद्युत्पत्तेः शब्दपूर्वकत्वप्रात्यक्ष्याज्जगतोऽपि सृष्टेस्तत्पूर्वकत्वमनुमेयमिति प्रत्यक्षानुमानाभ्यामित्यत्रार्थान्तरमाह— **अपि चेति।** कल्पकालीना सृष्टिः शब्दपूर्विका, सृष्टित्वात्, इदानीन्तनसृष्टिवत्। विमतः शब्दार्थसंबन्धव्यवहारः तथाविधसंबन्धानुस्मृतिपूर्वकः, अभिधानाभिधेयसंबन्धव्यवहारत्वात्, संप्रतिपन्नवदित्याह— **तथेति।** प्रत्यक्षादिसिद्धेऽर्थे तैत्तिरीयश्रुतिमाह— **तथा चेति।** 'स भुव इति व्याहरत् सोऽन्तरिक्षमसृजत' इत्यादिरादिशब्दार्थः। उक्तश्रुतेस्तात्पर्यमाह— **भूरादीति।**

यदुक्तं जगतः शब्दप्रभवत्वं तदाक्षिपति— **किमात्मकमिति।** वर्णातिरिक्तं शब्दमुपेत्य ततो वा जगदुत्पत्तिरिष्टा, वर्णेभ्यो वा? नाद्यः, वर्णातिरिक्ते वाचके शब्दे मानाभावात्। नेतरः, वर्णानामुत्पन्नप्रध्वंसिनां जगद्धेतुत्वासिद्धेरित्यर्थः। तत्र वैयाकरणो वक्ष्यमाणं मानं मत्वाऽऽद्यं पक्षमालम्बते— **स्फोटमिति।** स्फुटयते व्यज्यते वर्णैरिति स्फोटोऽर्थव्यञ्जकः शब्दः, तमर्थसृष्टौ हेतुमभिप्रेत्येदमुक्तं तस्य नित्यत्वात् कारणत्वसंभवादित्यर्थः। वर्णानामेव प्रत्यभिज्ञया नित्यानां जगद्धेतुत्वसिद्धौ न स्फोटकल्पनेत्याशङ्क्य प्रत्यभिज्ञाया जातिगामित्वान्मैवमित्याह— **वर्णेति।** हेत्वसिद्धिमाशङ्क्याह— **उत्पन्नेति।** तदपि न संमतमित्याशङ्क्य पुरुषविशेषानुमापकत्वेन तत्संमतिं साधयति— **तथाहीति।** वर्णेष्वन्यथात्वधियो ध्वन्युपाधिकत्वेन मिथ्यात्वान्न तदनित्यत्वसाधकतेत्याशङ्क्याह— **न चेति।**

---

१. यद्यपि शब्दस्य सृष्ट्युपयोगित्वं न सार्वत्रिकमुपपादयितुं शक्यम्। शब्दप्रपञ्चानभिज्ञकर्तृकस्यापि पदार्थस्योपलम्भात्, पदार्थसृष्ट्यनन्तरं तदुचितनामकल्पनस्यापि दर्शनाच्च। तथापि श्रुत्युक्तशब्दप्रभवस्य संभावनार्थं युक्तिरियमुच्यते। लोके शब्दं स्मृत्वाऽर्थसृष्टिदर्शने सति हिरण्यगर्भः सृष्ट्यर्थं शब्दमनुसन्धत्ते इत्यस्य संभावयितुं शक्यत्वात्। किं च शिल्पशास्त्रं पर्यालोच्य शिल्पिभिः विचित्रा देवतादिप्रतिकृतयो निर्मीयन्ते। तत्र शब्दस्य सृष्टावुपयोगः स्पष्टः। २. 'मिति वा' इति पाठान्तरम्। तत्र च एकस्यैव ग्रन्थस्य प्रकारान्तरेणेदमवतारणमिति न्यायनिर्णयदर्शनेन स्पष्टम्।

ध्वनिश्रवणादेव विशेषतो निर्धार्यते, 'देवदत्तोऽयमधीते' 'यज्ञदत्तोऽयमधीते' इति। न चायं वर्णविषयोऽन्यथात्वप्रत्ययो मिथ्याज्ञानं, बाधकप्रत्ययाभावात्। न च वर्णेभ्योऽर्थावगतिर्युक्ता। न ह्येकैको वर्णोऽर्थं प्रत्याययेत्, व्यभिचारात्। न च वर्णसमुदायप्रत्ययोऽस्ति, क्रमवत्त्वाद् वर्णानाम्। पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितोऽन्त्यो वर्णोऽर्थं प्रत्याययिष्यतीति यद्युच्येत, तन्न; संबन्धग्रहणापेक्षो हि शब्दः स्वयं प्रतीयमानोऽर्थं प्रत्याययेद् धूमादिवत्। न च पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितस्यान्त्यवर्णस्य प्रतीतिरस्ति, अप्रत्यक्षत्वात् संस्काराणाम्। कार्यप्रत्यायितैः संस्कारैः सहितोऽन्त्यो वर्णोऽर्थं प्रत्याययिष्यतीति चेत्? न; संस्कारकार्यस्यापि स्मरणस्य क्रमवर्तित्वात्।

प्रकटार्थविवरणम्

ननु उदात्तानुदात्तादिभावेन यो वर्णेष्वन्यथात्वप्रत्ययः स विभ्रम इत्याशङ्क्याह— **न चायमिति**। किं च वर्णेभ्योऽर्थावगत्यनुपपत्त्याऽपि स्फोटो वक्तव्य इत्याह—**न च वर्णेभ्य इति**। एकैकवर्णोच्चारणेऽर्थप्रतीतेरदर्शनाद् वर्णान्तरोच्चारणस्य वैयर्थ्याच्चेत्यर्थः। अस्तु समुदितेभ्योऽर्थप्रत्ययः इत्याशङ्क्याह—**न चेति**। वर्णानामुच्चारणस्य क्रमवत्त्वादुच्चारणानन्तरं योग्यानुपलब्ध्याऽभावावगमात् न समुदायप्रतीतिरित्यर्थः। यथाऽऽग्नेयादीनां क्रमवर्तिनामपि संस्कारद्वारा साहित्यं तथा वर्णेषु भविष्यतीत्याह—**पूर्ववर्णजनितेति**। प्रत्यक्षदृष्टशब्दपरित्यागेन बालस्याप्रत्यक्षसंस्कारेषु व्युत्पत्त्यभावात्, श्रोतुश्चार्थावगमात् पूर्वक्षणे संस्कारानवगमात् न संस्कारपक्षोऽपि समञ्जस इत्याह—**तन्नेति**। वर्णस्मृतिलक्षणकार्यदर्शनात् तत्कारणसंस्कारावगमात् तत्सहितोऽन्त्यो वर्णः श्रोत्रात् प्रत्येष्यत इति चेत्, नानवगतसंस्काराणां साहित्यं क्रमेणैवानुमानादित्याह—**न, संस्कारेति**। शब्दादर्थबोधप्रसिद्ध्या स्फोटमुपपाद्य प्रत्यक्षमेव

भाष्यभावप्रकाशिका

वर्णेष्वन्यथात्वप्रत्यय इत्याशङ्क्याह—**न चायमिति**। एवं वर्णानामुत्पत्तिमत्त्वात् तत्प्रभवत्वं जगतोऽयुक्तमित्युक्तम्, इदानीमवाचकत्वादप्यवाचकशब्दप्रभवत्वं जगतोऽयुक्तमिति वक्तुमर्थप्रत्यायकत्वं वर्णानामाक्षिपति— **न च वर्णेभ्य इति**। किमेकैकस्माद् वर्णादर्थप्रत्ययः, किं वा वर्णसमुदायादिति विकल्प्य न तावदाद्य इत्याह— **न ह्येकैक इति**। नापि द्वितीय इत्याह—**न चेति**। वर्णानां स्वरूपसाहित्याभावेऽप्याग्नेयादीनामिव संस्कारद्वारा साहित्यमस्तीति शङ्कते—**पूर्वेति**। वर्णानित्यत्ववादिपक्षेऽपि न सत्तया बोधकत्वम्, किन्तु प्रतीयमानतया, इतरत्र व्यभिचारादित्याह—**सम्बन्धग्रहणेति**। उच्चरितस्य बधिरेणागृहीतस्य गृहीतस्य वाऽविदितसङ्गतेरप्रत्यायकत्वादित्यर्थः। अस्तु तर्हि प्रतीयमानस्य बोधकत्वम्, तर्हि प्रत्यक्षेण, किं वाऽनुमानेन? न तावदाद्य इत्याह—**न च पूर्वेति**। द्वितीयं पक्षमाशङ्कते—**कार्येति**। अर्थप्रत्ययकार्येणावगम्यते, किं वा स्मृतिभिः? न तावदाद्यः; इतरेतराश्रयप्रसङ्गात्—संस्कारावसायादर्थप्रत्ययः, ततश्च तदवसाय इति। किञ्च भावनाख्यसंस्कारस्य विषयस्मृतिजनकस्य नार्थप्रत्ययजनकत्वसंभवः, नापि तस्यैवार्थप्रत्ययजननसामर्थ्यं युक्तम्; आत्मनः स्मृतिप्रसवसामर्थ्यलक्षणस्य संस्कारस्य सामर्थ्यान्तरायोगात्, दहनशक्तेः प्रकाशनशक्तिवत्। अपि च व्युत्क्रमोच्चारितवर्णेभ्योऽप्यर्थप्रत्ययः प्रसज्यते, संस्कारस्यार्थप्रत्ययहेतोस्तदाऽपि भावात्। अथोत्तरः, तत्राह—**न, संस्कारेति**। ननु न स्फोटेऽपि प्रमाणमस्ति। तथाहि—वर्णानामर्थ-

न्यायनिर्णयः

वर्णानामुत्पत्तिमत्त्वात् तत्प्रभवत्वं जगतो नेत्युक्त्वा तेषामवाचकत्वादपि तथेति वक्तुमर्थप्रत्यायकत्वं प्रत्याचष्टे— **न चेति**। किमेकैकस्माद् वर्णादर्थधीरुत समुदायादिति विकल्प्याद्यं दूषयति— **न हीति**। एकैकोक्तावर्थधियोऽदृष्टेर्वर्णान्तरोक्तिवैयर्थ्याच्चेत्यर्थः। द्वितीयं प्रत्याह— **न चेति**। तेषामुच्चारणस्य क्रमवत्त्वाद् योग्यानुपलब्धेरभावाधिगमान्न तद्धीरित्यर्थः। वर्णानां स्वरूपतोऽसाहित्येऽपि संस्कारद्वारा साहित्यमाग्नेयादिवदित्याह— **पूर्वेति**। अज्ञातो ज्ञातो वा सोऽर्थधीहेतुरिति विकल्प्याऽऽद्यं निराह— **तन्नेति**। उच्चरितस्य बधिरेणा[गृहीतस्य] गृहीतस्याप्यगृहीतसंगतेरप्रत्यायकत्वादित्यर्थः। ज्ञातस्य ज्ञापकत्वे दृष्टान्तः— **धूमादिवदिति**। द्वितीयेऽध्यक्षेणानुमानेन वा तद्धीरिति विकल्प्याऽऽद्यं निरस्यति— **न चेति**। द्वितीयं शङ्कते— **कार्येति**। अर्थधीः, स्मरणं वा कार्यम्। नाद्यः, संस्कारावगतेरर्थधीस्ततश्च सेत्यन्योन्याश्रयणादित्याह— **नेति**। यदि द्वितीयः, तत्राह— **संस्कारेति**। स्मरणस्यापीति

तस्मात् स्फोट एव शब्दः। स चैकैकवर्णप्रत्ययाहितसंस्कारबीजेऽन्त्यवर्णप्रत्ययजनितपरिपाके प्रत्ययिन्येकप्रत्ययविषयतया झटिति प्रत्यवभासते। न चायमेकप्रत्ययो वर्णविषया स्मृतिः। वर्णानामनेकत्वादेकप्रत्ययविषयत्वानुपपत्तेः। तस्य च प्रत्युच्चारणं प्रत्यभिज्ञायमानत्वान्नित्यत्वम्। भेदप्रत्ययस्य वर्णविषयत्वात्। तस्मान्नित्याच्छब्दात् स्फोटरूपादभिधायकात् क्रियाकारकफललक्षणं जगदभिधेयभूतं प्रभवतीति।

'वर्णा एव तु शब्दः' इति भगवानुपवर्षः[1]। ननूत्पन्नप्रध्वंसित्वं वर्णानामुक्तम्; तन्न, त एवेति

प्रकटार्थविवरणम्

स्फोटे प्रमाणमाह—**स चैकैकेति**। वर्णप्रत्ययेन आहितो निक्षिप्तः संस्कार एव बीजं यस्मिन् अन्तःकरणे, तथाऽन्त्यवर्णप्रत्ययेन जनितः परिपाकः पौष्कल्यं यस्मिन् तस्मिन् मनसि 'एकं पदम्, एकं वाक्य'मित्येवं शीघ्रं प्रत्यवभासत इत्यर्थः। नन्वेकं पदमित्यादावपि न वर्णातिरिक्तं किंचिदालम्बनं भातीत्याशङ्क्याह— **न चायमिति**। अनेकेष्वेकत्वबुद्धेः विभ्रमत्वप्रसङ्गात् पदादिबुद्धिगोचरः स्फोट एवेत्यर्थः। तस्य नित्यत्वे प्रमाणमाह—**तस्य चेति**। ननु तदेवेदं पदमिति प्रत्यभिज्ञानात् न नित्यत्वसिद्धिः, उदात्तादिभेदप्रत्ययादित्याशङ्क्याह—**भेदप्रत्ययस्येति**।

आचार्यसंप्रदायमुपादाय सिद्धान्तमाह—**वर्णा एव त्विति**। गौरित्युक्ते गकारौकारविसर्गातिरिक्तस्य स्वतन्त्रस्य परतन्त्रस्य वा

भाष्यभावप्रकाशिका

प्रत्यायकत्वानुपपत्तौ सत्यामर्थप्रत्ययदर्शनात् स्फोटावगमः, किं वा प्रमाणान्तरात्? न तावदाद्यः; इतरेतराश्रयप्रसङ्गात्—तदवगमादर्थधीः, तया च तदवगमः इति। सत्तामात्रेणार्थधीहेतुत्वे सदा तत्प्रसङ्गात्। न च प्रमाणान्तरमुपलभामह इति शङ्कायामाह—**स चेति**। ननु वर्णान्वयव्यतिरेकनियमादर्थधियो वर्णा एव शब्दः इति, मैवम्; अन्यथासिद्धत्वात् तेषां स्फोटात्मकशब्दाभिव्यञ्जकत्वेनेत्याह—**वर्णप्रत्ययेनि**। एकैकवर्णप्रत्ययैराहितं संस्काराख्यं बीजं यस्मिन् प्रत्ययिनि चेतसि, तत्तथोक्तम्, तस्मिन्नित्यर्थः। नोत्तरवर्णानर्थक्यमित्याशङ्कनीयमित्याह—**अन्त्यवर्णेति**। एकोऽयमिति प्रत्ययः एकप्रत्ययः, तद्विषयतया। झटिति द्रागिति, सहसेति यावत्। त्रिचतुरपञ्चषट्दर्शनसंस्कारपरिपाकसचिवे चेतसि रत्नतत्त्ववदिति भावः। ननु पुरुषभेदानुमापकत्वात् प्रत्युच्चारणं च भिन्नत्वात् तस्याप्यनित्यत्वमिति, अत आह— **भेदप्रत्ययस्येति**।

तदेतत् स्वमतमुपपादयन्नपाकरोति—**वर्णा एवेति**। क्षणिकतया वर्णानां न सङ्गतिग्रह इति शङ्कां परिहरति—**न त एवेति**।

न्यायनिर्णयः

संबन्धः। क्रमभाविस्मरणानुमितसंस्काराणामपि क्रमभावेनासाहित्यान्न तत्सहितान्त्यवर्णधीरित्यर्थः। वर्णानां वाचकत्वायोगे फलितमाह— **तस्मादिति**। ननु वर्णानामर्थप्रत्यायकत्वासिद्धावर्थधीदृष्ट्या तद्धेतुत्वेन वा स्फोटो गम्यते मानान्तराद् वा? नाद्यः, तदवगतेरर्थधीः, तया च सेत्यन्योन्याश्रयणात्। न च सत्तामात्रेण स्फोटोऽर्थधीहेतुः, सदा तदापातात्। न द्वितीयः, तदनुपलब्धेः। तत्राह— **स चेति**। स चैकप्रत्ययविषयतया प्रत्यवभासत इति संबन्धः। वर्णान्वयव्यतिरेकनियमादर्थधियो वर्णा एव शब्द इत्याशङ्क्य तेषां स्फोटव्यञ्जकत्वेनान्यथासिद्धेर्मैवमित्याह— **एकैकेति**। एकैकवर्णप्रत्ययैराहितं संस्काराख्यं बीजं यस्मिन् प्रत्ययिनि चित्ते तस्मिन्निति यावत्। न चान्त्यवर्णानर्थक्यं, तद्बीजन्यातिशयवत्त्वाच्चित्तस्येत्याह— **अन्त्येति**। यथा नानादर्शनसंस्कारपरिपाकसचिवे चेतसि रत्नतत्त्वं चकास्ति, तथा यथोक्ते चित्ते विना विचारं सहसैवैकोऽयं शब्द इति धीविषयतया स्फोटो भातीत्याह— **एकेति**। अन्योन्याश्रयमपाकर्तुं झटितीत्युक्तम्। एकधियो वर्णविषयस्मृतित्वान्न स्फोटसाधकतेत्याशङ्क्याह— **न चेति**। अनेकेष्वेकत्वबुद्धेर्भ्रमत्वात् पदादिधीगोचरः स्फोट एवेत्यर्थः। स्फोटस्याप्युत्पन्नप्रध्वंसित्वान्न जगद्धेतुतेत्याशङ्क्याह— **तस्य चेति**। पुरुषभेदानुमापकतया प्रत्युच्चारणं भिन्नत्वात् कुतोऽस्य नित्यत्वं, तत्राह— **भेदेति**। स्फोटवादमुपसंहरति— **तस्मादिति**।

आचार्यसंप्रदायोक्तिपूर्वकं सिद्धान्तमाह— **वर्णा इति**। गौरित्युक्ते गकारौकारविसर्जनीयातिरिक्तस्य स्वतन्त्रस्य परतन्त्रस्य वा

१. अत्र च "अथ गौः इत्यत्र कः शब्दः? गकारौकारविसर्जनीयाः इति भगवानुपवर्षः" इति शाबरभाष्यमनुसन्धेयम्। पृ. ४५ (१-१-५)

प्रत्यभिज्ञानात्। सादृश्यात् प्रत्यभिज्ञानं केशादिष्विवेति चेत्, न; प्रत्यभिज्ञानस्य प्रमाणान्तरेण बाधानुपपत्तेः। प्रत्यभिज्ञानमाकृतिनिमित्तमिति चेत्, न; व्यक्तिप्रत्यभिज्ञानात्। यदि हि प्रत्युच्चारणं गवादिव्यक्तिवदन्या अन्या वर्णव्यक्तयः प्रतीयेरंस्तत आकृतिनिमित्तं प्रत्यभिज्ञानं स्यात्। न त्वेतदस्ति। वर्णव्यक्तय एव हि प्रत्युच्चारणं प्रत्यभिज्ञायन्ते। द्विर्गोशब्द उच्चारित इति हि प्रतिपत्तिर्न तु द्वौ गोशब्दाविति। ननु वर्णा अप्युच्चारणभेदेन भिन्नाः प्रतीयन्ते देवदत्तयज्ञदत्तयोरध्ययनध्वनिश्रवणादेव भेदप्रतीतेरित्युक्तम्। अत्राभिधीयते-सति वर्णविषये निश्चिते प्रत्यभिज्ञाने संयोगविभागाभिव्यङ्ग्यत्वाद् वर्णानामभिव्यञ्जकवैचित्र्यनिमित्तोऽयं वर्णविषयो विचित्रः प्रत्ययो न स्वरूपनिमित्तः। अपि च वर्णव्यक्तिभेदवादिनाऽपि प्रत्यभिज्ञानसिद्धये

प्रकटार्थविवरणम्

श्रोत्रेणाग्रहणादित्यर्थः। प्रत्यभिज्ञया च स्थायित्वावगमात्र क्षणिकत्वम्। तस्याः 'भ्रान्तत्वं[1] शङ्कते—**सादृश्यादिति**। 'त एवामी केशा' इति प्रत्यभिज्ञा भवेद् भ्रान्तिः, पुनर्वचन[वपन]ग्राहकप्रमाणविरोधात्; न तथा 'त एवैते गकारादय' इति प्रत्यभिज्ञाया बाधकं किंचिद् दृश्यत इत्याह—**न; प्रत्यभिज्ञानस्येति**। तर्हि गोत्वादिप्रत्यभिज्ञावद् गत्वादिसामान्यविषयं प्रत्यभिज्ञानमस्तु; वर्णास्त्वनित्या एवेत्याह—**प्रत्यभिज्ञानमाकृतिनिमित्तमिति**। सिद्धे निरुपाधिकव्यक्तिभेदे अनुगताकारः प्रत्ययः सामान्यमवलम्बते; अन्यथा घटाकाशो महाकाश इत्यत्रापि प्रसङ्गात्; नेह व्यक्तिभेदे प्रमाणस्ति। ततः 'सोऽयं देवदत्तः' इतिवत् 'त एवामी गकारादयः' इति प्रत्यभिज्ञा व्यक्तिमेवावलम्बत इत्याह—**न; व्यक्तिप्रत्यभिज्ञानादिति**। अस्त्येव व्यक्तिभेदे प्रमाणमित्याह—**ननु वर्णा अपीति**। सत्यमस्ति भेदप्रत्ययः; तथापि प्रत्यभिज्ञाया निरपेक्षस्वरूपविषयत्वेन[2] दुर्बलत्वाद् यथैकस्यामाकाशव्यक्तौ घटाकाशः कूपाकाश इति वर्तुलत्वदीर्घत्वादिप्रत्ययो व्यञ्जकवैचित्र्यनिमित्तः, तथा व्यञ्जकवायुसंयोगविभागवैचित्र्यनिमित्तो वर्णेषु वैचित्र्यप्रत्यय इत्याह—**अत्राभिधीयत इत्यादिना**। किं चानन्ता गकारव्यक्तयः कल्पनीयाः; तासु च प्रत्यभिज्ञानसिद्धये गत्वं सामान्यं कल्पनीयम्; तत्राप्युदात्तादिभेदप्रत्ययनिर्वाहाय परोपाधिकत्वं वक्तव्यम्; ततो वरमेकस्यां गकारव्यक्तौ[3] परोपाधिकत्वकल्पनमित्याह—**अपि चेति**।

भाष्यभावप्रकाशिका

प्रत्यत्नानन्तरीयकतया वर्णानां भेदस्य सिद्धत्वात् अन्यथासिद्धा प्रत्यभिज्ञेति शङ्कते—**सादृश्यादिति**। किं बाधादेव कल्प्यते, किं वा क्वचिद् व्यभिचारात्। न तावदाद्य इत्याह—**न प्रत्यभिज्ञानस्येति**। नापि द्वितीयः; सर्वत्र संशयप्रसङ्गात्। ज्वालादौ तु प्रभावित[त]त्वादिकार्यान्यथानुपपत्त्या तथाभावात्। इह च तदभावादिति भावः। गवादौ सामान्यनिमित्तं प्रत्यभिज्ञानं दृष्टम्, तद्वत् किं न स्यादिति चोदयति—**प्रत्यभिज्ञानमिति**। परिहरति—**न व्यक्तीति**। यत्राकृतिनिमित्तं प्रत्यभिज्ञानम्, तत्र व्यक्तीनां भेदो दृश्यते, इह तु न दृश्यत इति भावः। युक्तितः प्रत्यभिज्ञा व्यक्तिविषयेत्युक्तम्, इदानीं प्रतीतितो व्यक्तिविषयत्वमाह—**वर्णव्यक्तय इति**। दहनतुहिनवद् विरुद्धधर्मत्वाद् धर्मिभेद इति चोदयति—**ननु वर्णा इति**। ननु भवद्भिरपि भेदप्रतीतिहेतुः कल्पनीयः, तेन

न्यायनिर्णयः

श्रोत्रेणाग्रहणादुपवर्षाचार्यो वर्णानामेव तु शब्दत्वं पश्यतीत्यर्थः। तेषां क्षणिकत्वान्न जगद्धेतुतेत्युक्तं स्मारयति— **नन्विति**। प्रत्यभिज्ञया स्थायित्वसिद्धेर्न क्षणिकतेत्याह— **तन्नेति**। प्रयत्नानन्तरीयकतया वर्णानां भेदसिद्धेरन्यथासिद्धा प्रत्यभिज्ञेत्याह— **सादृश्यादिति**। किं क्वचिद् व्यभिचारदृष्टेरेवं बाधदृष्टेर्वा? नाद्यः, सर्वत्र संशयप्रसङ्गात्। ज्वालादौ तु प्रभावैतत्यादिकार्यानुपपत्त्या तथात्वादिह तदभावादित्याह— **नेति**। न द्वितीय इत्याह— **प्रत्यभिज्ञानस्येति**। गवादौ जातिप्रत्यभिज्ञादृष्टेरिहापि तथेति शङ्कते— **प्रत्यभिज्ञानमिति**। यत्र जातिप्रत्यभिज्ञा तत्र व्यक्तिभेदो दृष्टः। प्रकृते तदभावान्न जातिविषयतेत्याह— **व्यक्तीति**। तदेव स्फुटयति— **यदि हीति**। युक्तितो व्यक्तिविषया प्रत्यभिज्ञेत्युक्त्वा प्रतीतितोऽपि तथेत्याह— **वर्णेति**। हिशब्दसूचितमनुभवमभिनयति— **द्विरिति**। दहनतुहिनवद्विरुद्धधर्मवत्त्वाद् धर्मिभेदः स्यादिति शङ्कते— **नन्विति**। भेदप्रत्ययेऽपि प्रत्यभिज्ञाया निरपेक्षस्वरूपविषयत्वेन प्राबल्यात् तस्य च सापेक्षभेदविषयत्वेन दौर्बल्यादेकस्यामाकाशव्यक्तौ कुम्भाकाशः कूपाकाश इतिवद् व्यञ्जकवायुसंयोगविभागवैचित्र्याद् वर्णेषु वैचित्र्यधीर्न स्वत इत्याह— **अत्रेति**। कल्पनागौरवाच्च वर्णेषु स्वतो वैचित्र्यं नास्तीत्याह— **अपि चेति**। भेदधीहेतोस्त्वयाऽपि

---

१. भ्रान्तत्वमिति। भ्रान्तं = भ्रमः भावे क्तः। तस्य भावः भ्रान्तत्वं भ्रमत्वमित्यर्थः।

२. अत्र 'विषयत्वेन प्राबल्यात् भेदप्रत्ययस्य च सापेक्षभेदविषयत्वेन दुर्बलत्वात्' इति पाठः त्रुटितः संभाव्यते। ३. भेदप्रत्ययस्येति शेषः।

वर्णाकृतयः कल्पयितव्याः। तासु च परोपाधिको भेदप्रत्यय इत्यभ्युपगन्तव्यम्। तद्वरं वर्णव्यक्तिष्वेव परोपाधिको भेदप्रत्ययः, स्वरूपनिमित्तं च प्रत्यभिज्ञानमिति कल्पनालाघवम्। एष एव च वर्णविषयस्य भेदप्रत्ययस्य बाधकः प्रत्ययो यत् प्रत्यभिज्ञानम्। कथं ह्येकस्मिन् काले बहूनामुच्चारयतामेक एव सन् गकारो युगपदनेकरूपः स्यात्– उदात्तश्चानुदात्तश्च स्वरितश्च सानुनासिकश्च निरनुनासिकश्चेति। अथवा ध्वनिकृतोऽयं प्रत्ययभेदो न वर्णकृत इत्यदोषः। कः पुनरयं ध्वनिर्नाम? यो दूरादाकर्णयतो वर्णविवेकमप्रतिपद्यमानस्य कर्णपथमवतरति, प्रत्यासीदतश्च पटुमृदुत्वादिभेदं वर्णेष्वासञ्जयति।

प्रकटार्थविवरणम्

नन्वबाधितव्यक्तिभेदप्रत्ययात्र कल्पनागौरवमित्याशङ्क्याह—**एष एव चेति**। ननु बाधोऽगतिका गतिः। 'एकत्वं नानात्वं चास्त्वित्याशङ्क्याह—**कथं ह्येकस्मिन्निति**। युगपदेकस्यानेकरूपत्वानुपपत्तितर्कसहकृतमेकत्वप्रत्यभिज्ञानं भेदप्रत्ययबाधकमिति भावः। पूर्वं हृत्कण्ठादिप्रदेशैः वायुसंयोगस्य व्यञ्जकत्वमङ्गीकृत्य भेदप्रत्ययो न वर्णस्वरूपनिबन्धन इत्यभाणि। स्वमतमिदानीमाह—**अथ वेति**। यथा मणिकृपाणदर्पणादिषु प्रतिबिम्बितं मुखं वर्तुलत्वादितद्धर्मविशिष्टं भाति, तथा उदात्तादिधर्मवत्सु ध्वनिषु प्रतिबिम्बिता वर्णाः तद्धर्मत्वविशिष्टा भान्तीत्यर्थः। ध्वनिस्वरूपं प्रश्नपूर्वकमाह—**कः पुनरयमिति**। वर्णातिरिक्तः शब्दो

भाष्यभावप्रकाशिका

कल्पनमुभयोरपि समानमित्याशङ्क्याह—**तासु चेति**। सामान्यकल्पनमतिरिच्यत इत्यर्थः। औपाधिकभ्रमोऽयं न भवति, बाधकाभावादित्याशङ्कायामाह—**एष एवेति**। प्रत्यभिज्ञानस्य बाधकत्वमुपपादयति—**कथं हीति**। प्रत्यभिज्ञा[यां] स्वरूपतो विरुद्धधर्मायोगादौपाधिकत्वं भेदस्येत्यर्थः। अथवा प्रत्यभिज्ञाया बाधकमाशङ्कते पूर्ववादी—**कथं हीति**। न चोदात्तादयो व्यञ्जकधर्माः; व्यञ्जकवायूनामश्रावणत्वात् तद्धर्माणामप्यश्रावणत्वाद् वर्णेष्वारोपासंभवादित्याशयः। संयोगविभागवैचित्र्याद् भेदावभास इत्युक्तमस्य समाधानं पुरस्तात्, इदानीं तत्रापरितोषात् परिहारान्तरमाह—**अथवेति**। अथ प्रश्नपूर्वकं वर्णेभ्यो ध्वनिं निष्कर्षयति—**कः पुनरिति**। न चायमनिर्धारितविशेषवर्णत्वसामान्यमात्रप्रत्ययो न वर्णातिरिक्तविषय इति शङ्कनीयम्; तस्यानुनासिकत्वादिभेदवतः प्रत्यभिज्ञानाभावात्। अत एव सामान्याभावानुपपत्तेरिति भावः। तस्मादवर्णात्मकः शब्दो ध्वनिः,

न्यायनिर्णयः

कल्प्यत्वात् तुल्या कल्पनेत्याशङ्क्य जातिकल्पना तवाधिकेत्याह— **तास्विति**। कथं तर्हि भेदाभेदधियावित्याशङ्क्याह— **तद्वरं वर्णेति**। नायमौपाधिको भ्रमो बाधकाभावादित्याशङ्क्याह— **एष इति**। एकत्वनानात्वयोरेकत्र वास्तवत्वोपपत्तौ किमिति बाध्यबाधकत्वं, तत्राह— **कथं हीति**। एकस्य युगपदनेकरूपत्वानुपपत्तिसहकृतमेकत्वप्रत्यभिज्ञानं भेदधियो बाधकमेवेत्यर्थः। कण्ठादिदेशैः सह कोष्ठनिष्ठस्य वायोः संयोगविभागयोर्व्यञ्जकत्वमुपेत्य वर्णेषु भेदधीर्न स्वरूपकृतेति परमतमुक्त्वा स्वमतमाह— **अथवेति**। अत्र प्रश्नपूर्वकं वर्णेभ्यो ध्वनिं निष्कर्षति— **कः पुनरित्यादिना**। अवतरति स ध्वनिरिति शेषः। वर्णातिरिक्तशब्दो ध्वनिरित्यर्थः। स एव प्रत्यासन्नस्य पुंसो वर्णेषु स्वधर्मानारोपयतीत्याह— **प्रत्यासीदतश्चेति**। वर्णेषूदात्तादिवत् 'षड्जत्वादिरपि स्वाभाविकः स्यादित्याशङ्क्याह— **तदिति**। वर्णानामेवाव्यक्तानां ध्वनित्वे कुतो भेदधीस्तेषु तत्कृतेत्याशङ्क्याह—

---

१. इदं कल्पतरौ खण्डितम्। एकत्वनानात्वयोरेकत्र वास्तवत्वेनोभयप्रत्ययप्रामाण्योपपादनस्य स्फोटवाद्यनभिमतत्वेन तत्खण्डनस्य प्रकृतासङ्गतेरिति। द्र. पृ. ३२६, अतः 'कथं हि' इत्यादि भाष्यमुक्तप्रत्यभिज्ञाबाधकप्रदर्शनपरतया प्रथमं योजयित्वा पुनरावृत्त्या परिहारपरतयाऽपि योजितं भामत्याम्। 'अथवा ध्वनिकृतः' इति तत्र शङ्काग्रन्थत्वे 'एक एव सन्' इत्यस्य एकश्चेदित्यर्थः। परिहारग्रन्थत्वे प्रत्यभिज्ञावधृतैकभाव इत्यर्थ इति परिमले। 'अथवा ध्वनिकृतः' इति तत्र शङ्काग्रन्थत्वे 'एक एव सन्' इत्यस्य एकश्चेदित्यर्थः। परिहारग्रन्थत्वे प्रत्यभिज्ञावधृतैकभाव इत्यर्थ इति परिमले। परिहरति—**अथवेति**। इत्थमिति वक्तव्ये अथवेत्युक्तिः अस्यामेव त्वभ्युपेत्य परिहार इति। ब्रह्मविद्याभरणे तु— "**कथं हीति**। कथं तर्हि इत्यर्थः। परिहरति—**अथवेति**। इत्थमिति वक्तव्ये अथवेत्युक्तिः अस्यामेव शङ्कायां 'संयोगविभागव्यङ्ग्यत्वात्' इति परिहारः प्राक् प्रदर्शित एव, इदं तु परिहारान्तरमिति द्योतनाय" इत्युक्त्वा यथाश्रुतयोजनाऽपि दर्शिता। पृ. ३७९। २. 'पटुत्वादिः' इति पाठान्तरं युक्तम्।

तन्निबन्धनाश्चोदात्तादयो विशेषा न वर्णस्वरूपनिबन्धनाः, वर्णानां प्रत्युच्चारणं प्रत्यभिज्ञायमानत्वात्। एवं च सति सालम्बना उदात्तादिप्रत्यया भविष्यन्ति। इतरथा हि वर्णानां प्रत्यभिज्ञायमानानां निर्भेदत्वात् संयोगविभागकृता उदात्तादिविशेषाः कल्प्येरन्। संयोगविभागानां चाप्रत्यक्षत्वान्न तदाश्रया विशेषा वर्णेष्वध्यवसितुं[1] शक्यन्त इत्यतो निरालम्बना एवैत उदात्तादिप्रत्ययाः स्युः। अपि च नैवैतदभिनिवेष्टव्यमुदात्तादिभेदेन वर्णानां प्रत्यभिज्ञायमानानां भेदो भवेदिति। न ह्यन्यस्य भेदेनान्यस्याभिद्यमानस्य भेदो भवितुमर्हति। न हि व्यक्तिभेदेन जातिं भिन्नां मन्यन्ते। वर्णेभ्यश्चार्थप्रतीतेः संभवात् स्फोटकल्पनाऽनर्थिका। न कल्पयाम्यहं स्फोटम्, प्रत्यक्षमेव त्वेनमवगच्छामि, एकैकवर्णग्रहणाहितसंस्कारायां बुद्धौ झटिति

प्रकटार्थविवरणम्

ध्वनिरित्यर्थः। स एव प्रत्यासन्नस्य पुंसो वर्णेषु स्वधर्माध्यारोपे निमित्तमित्याह—**प्रत्यासीदतश्चेति**। [2]नन्वव्यक्ता वर्णा एव ध्वनयः, कुतो भेदसिद्धिरित्याशङ्क्याह—**वर्णानामिति**। ननु वायुसंयोगविभागयोः व्यञ्जकत्वं हित्वा किं ध्वनीनां व्यञ्जकत्वपरिकल्पनेनेत्याशङ्क्याह—**एवं च सतीति**। उदात्तादीनां वायुधर्मत्वे सत्यश्रावणानां च श्रावणमेवात्र [भ्रमेऽत्र] प्रतिभासायोगात्; अन्यथा चक्षुषा रसभ्रमस्यापि प्रसङ्गात्। अतः श्रावणध्वनीनामेव व्यञ्जकत्वे तद्धर्मसमानानिर्वचनीयधर्मान्तरसमारोपात् सालम्बना उदात्तादिप्रत्ययाः भविष्यन्तीत्यर्थः। ननु न वर्णमात्रं क्वापि प्रत्यभिज्ञायते, किं तूदात्तादिधर्मविशिष्टतया; अतः उदात्तादेः समारोपकल्पनाऽनुपपन्नेत्याशङ्क्याह—**अपि च नैवैतदिति**। खण्डमुण्डाद्युपरक्तं गोत्वं प्रत्यभिज्ञायत इत्येतावता न खण्डादिभेदभिन्नत्वं तात्त्विकमिति भावः। एवं प्रत्यभिज्ञाप्रमाणेन वर्णानां स्थायित्वमुपपाद्य इदानीमर्थप्रत्यायकत्वमुपपादयन् स्फोटं विघटयति—**वर्णेभ्यश्चेति**। कल्पनामसहमानः उक्तमुद्भावयति—**न कल्पयाम्यहमिति**। यस्यां बुद्धौ य आकारः परिस्फुरति स तस्या आलम्बनम्; नेह वर्णातिरिक्तः कश्चिदाकारो

भाष्यभावप्रकाशिका

अशब्दात्मको वा वर्णो व्यञ्जकः श्रावणोऽभ्युपेयः। तद्धर्माध्यासाद् वर्णभेदावभास इत्याह—**तन्निबन्धनाश्चेति**। पूर्वपरिहारेऽपरितोषकारणं दर्शयति—**एवं च सतीति**। उदात्तादीनां वर्णधर्मत्वेऽपि न वर्णभेदः स्यादित्याह—**अपि चेति**। ननु विरुद्धधर्माश्रयत्वादग्निज्वालादिवद् भेदः स्यादिति, अत आह—**न हीति**। जातिवदाकाशवच्चेत्यर्थः।

न्यायनिर्णयः

वर्णानामिति। ध्वनेश्च सानुनासिकत्वादिभेदवतस्तदभावात् तेभ्योऽर्थान्तरत्वात् तत्कृता तेषु भेदधीर्युक्तेत्यर्थः। एतेन तस्य जातित्वमपि प्रत्युक्तम्। वायुसंयोगविभागयोर्व्यञ्जकत्वं हित्वा किमिति ध्वनीनां तदुपगतं, तत्राह— **एवं चेति**। पक्षान्तरेऽपि तुल्यमेषां सालम्बनत्वमित्याशङ्क्याह— **इतरथेति**। अस्तु कल्पना, का हानिः, तत्राह— **संयोगेति**। अप्रत्यक्षत्वमश्रावणत्वम्। पूर्वत्रापरितोषे हेतूक्तिसमाप्तावितिशब्दः। अपरितोषहेतुसत्त्वे प्रथमपक्षायोगं फलमाह— **अत इति**। वर्णमात्रस्याप्रत्यभिज्ञानादुदात्तादिमत्तयैव तद्भानात् तदारोपकल्पनानुपपत्तेर्द्वितीयोऽपि पक्षो नेत्याशङ्क्याह— **अपि चेति**। विरुद्धधर्मत्वादग्निज्वालादिवद् भेदः स्यादित्याशङ्क्याह— **न हीति**। तदेवोदाहरणेन स्फोरयति— **न हीति**। खण्डमुण्डाद्युपरक्ततया प्रत्यभिज्ञायमानगोत्ववदुदात्तादिमत्त्वेन भातानामपि वर्णानां न तात्त्विकं नानात्वमिति भावः। प्रत्यभिज्ञया स्थायित्वं वर्णानामुक्त्वा तेषामेव वाचकत्वं वक्तुं स्फोटं विघटयति— **वर्णेभ्यश्चेति**। कल्पनाममृष्यन्नाह— **नेति**। कथं तर्हि तद्धीः, तत्राह— **प्रत्यक्षमिति**। तथा स्फोटावगतिं स्फुटयति— **एकैकेति**। वर्णेषु व्यञ्जकेषु दृष्टेषु तद्व्यङ्ग्यतया स्फोटो विनैव संप्रयोगं चकास्तीत्याह— **झटितीति**। यः खल्वाकारो यस्यां स्फुरति स तदालम्बनम्। न चात्र कश्चिदाकारो वर्णातिरिक्तो भाति। तेनास्या वर्णगामित्वान्नातिरिक्ते स्फोटे मानतेत्याह— **नास्या इति**। वर्णगामित्वमस्यास्तद्भानोत्तरत्वादसिद्धमित्याशङ्क्याह— **एकैकेति**। सर्ववर्णविषयत्वे तदितरस्फोटविषयत्वे च तुल्ये न

---

१. 'अध्यवसातुम्' इति पाठान्तरं व्याकरणानुरोधि। 'अध्यसितुम्' इत्यपि संभाव्यते। २: अव्यक्तो वर्ण एव ध्वनिरित्युपगमे वाचिके जपे वर्णेषु अव्यक्तेषु ध्वनिबुद्धिः स्यात्, दुन्दुभ्यादिध्वनौ शब्दत्वमात्रेण गृह्यमाणे 'अयमव्यक्तो वर्ण' इति धीः स्यादिति मन्तव्यम्। रत्नप्रभा- पृ. २५७

प्रत्यवभासनादिति चेत्, न; अस्या अपि बुद्धेर्वर्णविषयत्वात्। एकैकवर्णग्रहणोत्तरकाला हीयमेका बुद्धिर्गौरिति समस्तवर्णविषया, नार्थान्तरविषया। कथमेतदवगम्यते? यतोऽस्यामपि बुद्धौ गकारादयो वर्णा अनुवर्तन्ते, न तु दकारादयः। यदि ह्यस्या बुद्धेर्गकारादिभ्योऽर्थान्तरं स्फोटो विषयः स्यात् ततो दकारादय इव गकारादयोऽप्यस्या बुद्धेर्व्यावर्तेरन्। न तु तथाऽस्ति। तस्मादियमेकबुद्धिर्वर्णविषयैव स्मृतिः। नन्वनेकत्वाद् वर्णानां नैकबुद्धिविषयतोपपद्यत इत्युक्तम्, तत् प्रतिब्रूमः-संभवत्यनेकस्याप्येकबुद्धिविषयत्वम्, पङ्क्तिर्वनं सेना दश शतं सहस्रमित्यादिदर्शनात्। या तु गौरित्येकोऽयं शब्द इति बुद्धिः, सा बहुष्वेव वर्णेष्वेकार्थावच्छेदनिबन्धनौपचारिकी वनसेनादिबुद्धिवदेव।

अत्राह- यदि वर्णा एव सामस्त्येनैकबुद्धिविषयतामापद्यमानाः पदं स्युस्ततो जारा राजा कपिः पिक इत्यादिषु पदविशेषप्रतिपत्तिर्न स्यात्। त एव हि वर्णा इतरत्र चेतरत्र च प्रत्यवभासन्त इति। अत्र वदामः-

प्रकटार्थविवरणम्

भातीत्याह—**नास्या अपीति**। अनेकस्य निरुपाधिकैकबुद्धिविषयत्वाभावेऽपि सोपाधिकैकबुद्धिविषयत्वं न विरुध्यत इत्याह—**संभवत्यनेकस्यापीति**। ननु देशविशेषोपाधिवशात् पङ्क्त्यादिबुद्धिरुपपन्ना; वर्णेषु तु पदादिबुद्धौ नास्त्युपाधिरित्याशङ्क्याह—**या तु गौरितीति**। एकपदार्थबुद्धिजनकत्वोपाधौ वर्णेष्वेव पदव्यवहारः, एकसंसर्गबुद्धिजनकत्वोपाधे:[धौ] पदेष्वेव वाक्यव्यवहार इत्यादि द्रष्टव्यम्। न चेतरेतराश्रयत्वं, क्रमविशेषवतां वर्णानामर्थप्रत्ययजनकत्वात्; अर्थप्रत्ययदर्शनेन तत्सामर्थ्यमनुमायैकपद-व्यवहारादित्यर्थः। वर्णातिरिक्तपदानभ्युपगमे व्यवहारभङ्ग इत्याह—**अत्राह यदीति**। क्रमविशेषः पदविशेषनियामकः, अन्यथा स्फोटविशेषाभिव्यक्तिरपि न स्यादित्याह—**अत्र वदाम इत्यादिना**। ननु वर्णानां क्रमोऽपि न संभवति, तत्राह—

भाष्यभावप्रकाशिका

ननु वर्णविषयत्वमसिद्धम्; वर्णग्रहणोत्तरकालभावित्वादिति, अत आह—**एकैकवर्णेति**। ननु समस्तवर्णविषयत्वे वर्णव्यतिरिक्तविषयत्वे च तुल्ये कथमेकत्र पक्षपात इति शङ्कते—**कथमेतदिति**। ननु कथं व्यावर्तेरन्नित्युच्यते? स्फोटाभिव्यञ्जकत्वेन वर्णानामनुवृत्त्युपपत्तेः, मैवम्; लक्ष्यबुद्धौ लक्षणप्रतीत्यनुपपत्तेः, अग्निबुद्धाविव धूमस्येति भावः।

ननु तत्रैकदेशसम्बन्धनिबन्धना प्रतीतिः, इह तु किंनिबन्धना प्रतीतिरिति? तत्राह—**या तु गौरिति**। न चैकार्थधीहेतुत्वे सत्येकपदत्वम्, एकपदत्वे चैकार्थधीहेतुत्वमिति परस्पराश्रयत्वम्; अर्थप्रत्ययात्पूर्वं कियतामेव वर्णानामेकस्मृतिसमारोहितया प्रकाशमानानामेकार्थधियं प्रति कारकत्वात्, पश्चाच्च तदुन्नयनेनैकपदत्वाध्यवसानात्। ननु अनेकेषामेकबुद्धविषयत्वं भवतु

न्यायनिर्णयः

पक्षपातहेतुरिति शङ्कते— **कथमिति**। पक्षपाते हेतुमाह— **यत इति**। गौरिति बुद्धौ गकारादिवर्णानामेवानुवृत्तावपि कुतोऽस्यास्तदा-लम्बनत्वं, स्फोटव्यञ्जकत्वेनापि तदनुवृत्तियोगादित्याशङ्क्याह— **यदीति**। न खल्वस्यां बुद्धौ विषयभूतस्फोटव्यञ्जकतया वर्णानुवृत्तिर्वह्निबुद्धाविव धूमस्य लक्ष्यबुद्धौ लक्षणस्य भानासिद्धेरिति भावः। नन्वस्या बुद्धेः स्फोटाविषयत्वे न वर्णविषयत्वमपि, तेषां प्रागेव प्रत्येकं दृष्टतया प्रकृतबुद्ध्यनपेक्षत्वात्, तत्राह— **तस्मादिति**। अनेकेष्वेकत्वबुद्धेर्भ्रमत्वमुक्तं स्मारयति— **नन्विति**। अनेकस्य निरुपाधिकैकबुद्ध्यविषयत्वेऽपि सोपाधिकतया तद्विषयत्वं स्यादित्याह— **तदिति**। तत्रैकदेशसंबन्धादिनिबन्धना धीः, इह तु किंकृतेत्याशङ्क्याह— **या त्विति**। न चैकार्थधीहेतुत्वे सत्येकपदत्वं तस्मिंश्च तद्धीहेतुत्वमित्यन्योन्याश्रयत्वम्, अर्थज्ञानात्पूर्वं केषांचिद् वर्णानामेकस्मृत्यारूढानामेकार्थधीहेतुत्वादेकपदत्वनिश्चयात्। न चानेकसंस्काराणां नैकस्मृतिहेतुत्वम्। कुशकाशादिष्वनेकसंस्कारजन्यैकस्मृतिदर्शनात्[१]। क्रमवद्वर्णसंस्काराणां स्थायित्वादन्त्यवर्णदृष्ट्यनन्तरं साहित्यात् तेषां सर्ववर्णविषयैकस्मृतिहेतुत्वसिद्धेरिति भावः। वर्णानामेकस्मृत्यारोहिणामेकपदत्वे पदविशेषसिद्धौ क्रमापेक्षा न स्यादित्याह— **अत्रेति**। तदपेक्षाभावे हेतुः— **त एवेति**। दृष्टान्तेन प्रत्याह— **अत्रेति**। क्रमानुरोधिनां वर्णानां पदधीविषयत्वे फलितमाह—

१. कुशकाशादिविषयकसमूहालम्बनस्मृतेर्दर्शनादित्यर्थः।

सत्यपि समस्तवर्णप्रत्यवमर्शे यथा क्रमानुरोधिन्य एव पिपीलिकाः पङ्क्तिबुद्धिमारोहन्ति, एवं क्रमानुरोधिन एव वर्णाः पदबुद्धिमारोक्ष्यन्ति। तत्र वर्णानामविशेषेऽपि क्रमविशेषकृता पदविशेषप्रतिपत्तिर्न विरुध्यते। वृद्धव्यवहारे चेमे वर्णाः क्रमाद्यनुगृहीता गृहीतार्थविशेषसंबन्धाः सन्तः स्वव्यवहारेऽप्येकैकवर्णग्रहणानन्तरं समस्तप्रत्यवमर्शिन्यां बुद्धौ तादृशा एव प्रत्यवभासमानास्तं तमर्थमव्यभिचारेण प्रत्याययिष्यन्तीति वर्णवादिनो लघीयसी कल्पना। स्फोटवादिनस्तु दृष्टहानिरदृष्टकल्पना च। वर्णाश्चेमे क्रमेण गृह्यमाणाः स्फोटं व्यञ्जयन्ति, स स्फोटोऽर्थं व्यनक्तीति गरीयसी कल्पना स्यात्। अथापि नाम प्रत्युच्चारणमन्येऽन्ये वर्णाः स्युः, तथापि प्रत्यभिज्ञालम्बनभावेन वर्णसामान्यानामवश्याभ्युपगन्तव्यत्वाद् या वर्णेष्वर्थप्रतिपादनप्रक्रिया रचिता सा सामान्येषु संचारयितव्या। ततश्च नित्येभ्यः शब्देभ्यो देवादिव्यक्तीनां प्रभव इत्यविरुद्धम्।।२८।।

प्रकटार्थविवरणम्

वृद्धव्यवहारे चेति। नित्यत्वसर्वगतत्वाभ्यां देशकालक्रमाभावे व्यञ्जकानां क्रमवत्त्वात् आकाशवदौपाधिकक्रमवतां वर्णानां यथासङ्गतिग्रहं शाब्दे व्यवहारेऽर्थप्रत्यायकत्वमुपपद्यते। लाघवं चास्मिन् पक्षे भवतीत्यर्थः। उक्तं हि—"यावन्तो यादृशा ये च यदर्थप्रतिपादकाः। वर्णाः प्रज्ञातसामर्थ्याः ते तथैवावबोधकाः॥" इति। स्फोटवादिनस्तु दृष्टं यद् वर्णानामर्थप्रत्यायकत्वं तस्य हानिः, अदृष्टस्य च स्फोटस्य कल्पना। सा च गौरवदुष्टेत्याह—**वर्णाश्चेम इति**।

वर्णान् सर्वगतान् नित्यान् सर्वत्र व्यक्तियोगतः। स्वतन्त्रेन्द्रियवेद्यत्वाद् द्रव्यं भाट्टविदो विदुः॥
प्राभाकरादयः प्राहुः गुणान् खसमवायतः। नामरूपश्रुतेर्नैव द्रव्यताऽस्तीति मामकाः॥

प्रौढवादेन वर्णानामनित्यत्वमभ्युपगम्याऽऽह—**अथापि नामेति**। नित्यानि वर्णसामान्यानि क्रमविशेषवन्ति यस्मिन्नर्थे वृद्धव्यवहारे गृहीतसङ्गतिकानि तमर्थमेकस्मृत्यारूढानि प्रत्याययिष्यन्तीति नास्माकं काचित् क्षतिरित्यर्थः।

भाष्यभावप्रकाशिका

नामान्यत्र, इह त्वेकस्मृतिरेव नोपपद्यते; संस्काराणामनेकत्वादेव[क]स्मृतिहेतुत्वानुपपत्तेः, नैष दोषः; कुशपलाशकाशादिष्वनेकसंस्कारजन्यैकस्मृतिदर्शनादिति भावः। एते वर्णा एतावन्तः, एत एतत्क्रमका इत्यादिविशेषावगमः कथमिति? तत्राह—**वृद्धव्यवहार इति**। इदानीं वर्णानामनित्यत्वाभ्युपगमेऽपि गत्वादिसामान्यावच्छेदेनैव सङ्गतिग्रहोऽनादिव्यवहारश्च सेत्स्यतीत्याह—**अथापि नामेति**॥२८॥

न्यायनिर्णयः

तत्रेति। कथमेतेषां वर्णानामेतावतामेतत्क्रमकाणामेतत्पदत्वमित्यादिविशेषधीः, तत्राह— **वृद्धेति**। व्युत्पत्तिदशा वृद्धव्यवहारः। क्रमादीत्यादिशब्देन संख्या गृह्यते। स्वव्यवहारो मध्यमवृद्धस्य प्रवृत्त्यवस्था। तादृशत्वं व्युत्पत्तिदशादृष्टक्रमाद्यनुगृहीतत्वम्। **तं तमर्थं** गृहीतसंबन्धप्रतियोगिनमिति यावत्। 'यावन्तो यादृशा ये च यदर्थप्रतिपादकाः। वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः॥' इति न्यायेनाह— **इति वर्णेति**। स्फोटवादिनस्तु यद् दृष्टं वर्णानामर्थबोधकत्वं तस्य हानिरदृष्टस्य स्फोटस्य कल्पना, सा च गौरवदुष्टेत्याह— **स्फोटेति**। किंच येन हेतुना वर्णानामर्थव्यञ्जकत्वं निरस्तं तेनैव तेषां न स्फोटव्यञ्जकत्वमपि। यदि कथंचिदमी स्फोटं भासयेयुस्तर्हि तथैवार्थमिति युक्तं लाघवादित्याह— **वर्णाश्चेति**। स्फोटपक्षं प्रतिक्षिपता वर्णपक्षः समर्थितः। सम्प्रति वर्णानामनित्यत्वेऽपि 'गोत्वादिजात्यभेदेनैव संगतिधीरनादिव्यवहारश्चेति प्रौढिमारूढः सन्नाह— **अथापीति**। अर्थप्रतिपादनप्रक्रिया 'वर्णेभ्यश्चार्थप्रतीतेः संभवात्' इत्याद्या। वर्णानां नित्यत्ववाचकत्वयोः सिद्धौ फलितमाह— **ततश्चेति**॥२८॥

---

१. 'गत्वादिजात्यवच्छेदेनैव' इति पाठः भाष्यभावप्रकाशिकादर्शनेनोह्यते।

प्रकटार्थविवरणम्

ननु नायं प्रौढवादः, प्रमाणवत्त्वात्; तथाहि—शब्दोऽनित्यः, [1]सामान्यवत्त्वे सति अस्मदादिबाह्यप्रत्यक्षविषयत्वात्, पटवत्; न; ध्वनिभागे सिद्धसाधनत्वात्; [2]विमत इति विशेषणे [3]भागासिद्धः; तवान्त्यातिरिक्तानामप्रत्यक्षत्वात्, [4]तस्यैव पक्षत्वे [5]व्यर्थविशेषणत्वात्, योग्यताऽनङ्गीकाराच्चासिद्धः; तथा [6]सामान्येषु अनैकान्तिकः, सन् घटः, सन् पटः इतिवत् सद् घटत्वं सत् पटत्वम् इत्यनुगतप्रत्ययात्; न च स्वरूपसत्तानिमित्तोऽनुगमः, तदपलापापातात्, द्रव्यस्य द्रव्याश्रयत्ववत् सामान्यस्य सामान्यश्रयत्वेऽप्यनवस्थापरिहारात्। गोत्वं गोत्वमिति [गौरिति] प्रत्यययोरिव सत्ता सतीति प्रत्यययोरवैलक्षण्यात् न सत्तान्तरप्रसङ्गः।

यच्चेदमनुमानम्—शब्दोऽनित्यः, तीव्रत्वादिधर्मोपेतत्वात्, दुःखवत्, तत्र [7]व्यधिकरणासिद्धो हेतुः; तीव्रत्वादिरहित-वर्णानुपलम्भासिद्धौ[8] गोत्वस्यापि खण्डादिधर्मकत्वप्रसङ्गः, व्यभिचारात् अतद्धर्मत्वे समः समाधिः, प्रत्येकं तीव्रत्वादेरवर्तनाद् भागासिद्धिश्च।

कार्यत्वादनित्यत्वसाधने वेदवादिनं प्रत्यसिद्धिः। न च नित्यत्वे सदोपलम्भापातात् कार्यत्वम्, [9]व्यञ्जक-भावाभावाभ्यामुपलम्भानुपलम्भसिद्धेः।

यच्च विरचितम्—शब्दा न प्रतिनियसंस्कारसंस्कार्याः, समानेन्द्रियग्राह्यसमानदेशधर्मापन्नत्वे सति युगपदिन्द्रियसंबद्धत्वात्,

---

१. द्रव्यत्वादौ व्यभिचारवारणाय सामान्यवत्त्वे सतीति। आकाशादौ तद्वारणाय विशेष्यम्। ईश्वरप्रत्यक्षविषयत्वमादाय पुनस्तद्वारणाय अस्मदादीति। आत्मनि तद्वारणाय बाह्येति। २. ध्वनेरनित्यत्वस्योभयसंमतत्वेन विमतविशेषणेन तस्य पक्षवहिर्भावात् न सिद्धसाधनमिति भावः।

३. भागासिद्ध इति। अत्रेयं प्रक्रिया। भेरीदण्डसंयोगात् निमित्तकारणात्, भेर्याकाशसंयोगात् असमवायिकारणात् महाकाशप्रदेशे समवायिकारणे प्रथममेकः शब्द उत्पद्यते। तस्य च विभुगुणतया आश्रयद्वारा स्वतो वा गमनानुपपत्तेः न श्रोत्रेण सम्बन्धः। ततः तस्मात् शब्दात् असमवायिकारणात् अदृष्टादिनिमित्तकारणात् आद्यशब्दाश्रयाकाशप्रदेशानन्तराकाशप्रदेशेषु समवायिकारणेषु सर्वदिक्षु शब्दा उत्पद्यन्ते। तेभ्यश्चान्ये, तेभ्यश्चान्ये इत्येवं वीचीसन्तानवत् यावच्छ्रोत्रसमवेतशब्दं शब्दसन्तानाः उत्पद्यन्ते। तत्र यः शब्दः कर्णशष्कुल्यवच्छिन्नाकाशप्रदेशे उत्पद्यते स एव श्रोत्रसमवायात् श्रोत्रेण गृह्यते, नान्यः। अतः तत्पूर्वतनशब्देषु पक्षान्तर्गतेषु उक्तहेत्वभावात् भागासिद्धिरित्याह—तवान्त्येति।

४. तस्यैव = श्रोत्रग्राह्यान्त्यशब्दस्यैवेत्यर्थः। ५. उपान्त्यादिशब्दव्यवच्छेदकं यत् धर्मिणि विशेषणं तद् व्यर्थम्। व्यवच्छेद्यस्यास्माकमसिद्धेरित्यर्थः। अधिकं न्या. र. दी. व्याख्यायां द्रष्टव्यम्। पृ. १७।

६. 'सद् घटत्व' मित्यादिप्रतीत्या हि घटत्वादौ सत्ता जातिर्विषयीक्रियते। तथा चोक्तहेतोस्तत्र सत्त्वात् साध्यस्य चाभावात् व्यभिचारः। ननु तत्र स्वरूपसत्तयैव सत्प्रतीतिः, न सत्ताजात्येत्याशङ्क्याह—न चेति। तथा सति 'घटः सन्' इत्यत्रापि तथोपपत्तौ सत्ताजात्यपलापप्रसङ्गादित्यर्थः। ननु जातेः जात्याश्रयत्वेऽनवस्थारूपबाधकात् तत्र स्वरूपसत्तोपगम इति चेन्नेत्याह—द्रव्यस्येति। ननु कथं नानवस्था? सत्ता सतीति प्रतीत्या तत्र सत्तान्तरावगाहनात्, तत्राह—गोत्वमिति।

७. व्यधिकरणश्चासावसिद्धश्चेत्यर्थः। तीव्रत्वादिर्हि ध्वनिधर्मः, न वर्णधर्म इति भावः। ननु तीव्रत्वादिविशेषं विना वर्णानुपलम्भाद् वर्णानां तद्धर्मकत्वसिद्धिरिति चेत्, तर्हि खण्डादिविशेषं विना गोत्वानुपलम्भाद् गोत्वस्यापि खण्डादिधर्मकत्वप्रसङ्गः इति प्रतिवन्दीमाह— तीव्रत्वादीति। ननु खण्डं विनाऽपि व्यक्त्यन्तरे गोत्वोपलब्धेः व्यभिचारान्न तद्धर्मकत्वं गोत्वस्येति चेत्, तर्हि तीव्रत्वादिकं विनाऽपि मृद्वादिवर्णोपलम्भान्न वर्णधर्मत्वं तीव्रत्वादेरित्याह—व्यभिचारादिति।

८. 'नुपलम्भात् तद्धर्मकत्वसिद्धौ' इति पाठः वेदान्ततत्त्वालोकदर्शनादूह्यते। [पृ. ५]

९. व्यञ्जकश्चेह ध्वनिरेव विवक्षितः। द्र. न्या. र. दी. २६।

१०. अनुमानमिदं न्यायसारकारस्येति ग्रन्थाभिप्रायपरिज्ञानार्थं तत्रत्यो विषयः संक्षेपेणोच्यते। तथाहि—तत्रोक्तरीत्या वर्णानां नित्यत्वे सर्वदोपलब्ध्यनुपलब्धिप्रसङ्गम् आपाद्य व्यञ्जकभावाभावयोर्नियामकत्वं स्वीकृत्य, व्यञ्जकः कः? इति पृष्ट्वा वायुसंयोगविभागयोर्व्यञ्जकत्वमाशङ्क्य सर्वशब्दानां युगपद्ग्रहणप्रसङ्गेन तद्दूषितम्। दोषोऽयं ध्वनेर्व्यञ्जकत्वेऽपि समानः। पुनश्चाभिव्यञ्जकानामान्तरालिकस्वभावभेदात् एकैको व्यञ्जकः एकैकमेव शब्दमभिव्यनक्ति इति कार्यव्यवस्थादर्शनेन कल्प्यत इति तत्परिहारमाशङ्क्य व्यञ्जकः श्रोत्रस्य संस्कारमादधाति शब्दानां वेति विकल्प्य क्रमेण खण्डितम्। तत्र व्यञ्जकः शब्दसंस्कारमादधातीति पक्षे उक्तं दूषणमिहानूदितम्। अस्यार्थः—प्रतिनियताः क्रमभाविनो ये क्रमेण वर्णग्रहणोपयोगिनः संस्काराः तैः संस्कारवन्तो न भवन्ति। समानेन्द्रियग्राह्यत्वे सति समानधर्मापन्नत्वे सति युगपदिन्द्रियसम्बद्धत्वात्। चक्षुस्सम्बद्धैकद्रव्यगतरूपरसादौ युगपदिन्द्रियसम्बद्धत्वमस्ति। क्रमवर्तिसंस्कारसंस्कार्यत्वमेव चास्ति, भिन्नेन्द्रियग्राह्यत्वेन क्रमेणैव ग्राह्यत्वात्। अतस्तत्र व्यभिचारवारणाय समानेन्द्रियग्राह्यत्वं विशेषणम्। समानेन्द्रियं च बाह्येन्द्रियं ग्राह्यम्। घटतद्गतरूपतद्गतरूपत्वादीनां समानेन्द्रियग्राह्यत्वेऽपि संयोगसंयुक्तसमवायादिविभिन्नसंनिकर्षाहितविभिन्नसंस्कारत्वात् क्रमभाविसंस्कारवत्सु तेषु व्यभिचारवारणार्थं समानधर्मापन्नत्वं विशेषणम्। क्रमेण इन्द्रियसम्बद्धतादृशपदार्थद्वये व्यभिचारवारणाय विशेष्यम्। इदं च न्यायसारव्याख्यां, न्यायरत्नदीपावलीव्याख्यां, न्यायचन्द्रिकाव्याख्यां चानुसृत्योक्तमिति। अत्र न्यायरत्नदीपावली व्याख्यायां समानदेशत्वं युगपदिन्द्रियसम्बद्धत्वमिति व्याख्यानात् तस्य च विशेष्यतयोक्तत्वेन सत्यन्ते देशपदस्य न निवेश इति भाति। द्र. न्या. र. दी. पृ. २७।

अत एव च नित्यत्वम्।।२९।।

स्वतन्त्रस्य कर्तुरस्मरणादिभिः स्थिते वेदस्य नित्यत्वे देवादिव्यक्तिप्रभवाभ्युपगमेन तस्य विरोधमाशङ्क्य 'अतः प्रभवात्' इति परिहृत्येदानीं तदेव वेदनित्यत्वं स्थितं द्रढयति– अत एव च नित्यत्वमिति।

प्रकटार्थविवरणम्

पटादिवदिति; तत्रानैकान्तिको हेतुः, सर्वगततया 'मनःसंसृष्टानन्तात्मसु युगपदनुपलम्भेन प्रतिनियतव्यञ्जकव्यङ्ग्यत्वात्। अथ सर्वगतत्वेऽप्यसंसर्गः, तर्हि वर्णानामपि प्रतिबिम्बितानामेव श्रोत्रसंबन्धादसिद्धो हेतुः। एतेन योग्यानुपलम्भादभावावगमः प्रत्युक्तः।

यदगादि **उदयनेन**—वर्णात्मकाः शब्दाः आत्ममनोविषयसंबन्धातिरिक्तसंस्कारनिरपेक्षेण श्रोत्रेण व्यज्यन्ते, श्रावणत्वात्, ध्वनिधर्मवत् इति; तत्र सति वर्णसंबन्धे व्यञ्जकनैरपेक्ष्यसाधने सिद्धसाधनम्,संबन्धार्थत्वाद् व्यञ्जकस्य। किं च दर्पणस्य व्यञ्जकमन्तरेण चाक्षुषत्वं दृष्टमित्येतावता न प्रतिबिम्बस्य चाक्षुषत्वे नैरपेक्ष्यानुमानम्। अतोऽप्रयोजकताऽपि। तस्मात्—नित्या वर्णाः, ध्वन्याद्यन्यत्वे सति श्रावणत्वात्, शब्दत्ववदिति स्थितम्।

श्रोत्रज्ञेयत्वमज्ञात्वा शब्दैकाकारधीर्यतः। शब्दशब्दो वदेत् तस्माज्जातिं वर्णानुगामिनीम्।।

अत एव च नित्यत्वम्। वृत्तानुवादपूर्वकं सूत्रं व्याचष्टे—**कर्तुरस्मरणादिभिरिति।** वेदोऽपौरुषेयः, अस्मर्यमाणकर्तृकत्वादात्मवत्; 'मुक्तकश्लोकानामवधारितं चेत् पौरुषेयत्वम् तर्हि स्मृत एव कर्ता सामान्येन; नावधारितश्चेत् न विपक्षत्वम्'[३]। न च सन्दिग्धासिद्धिः, कर्तुरननुभवादेवास्मरणनिश्चयात्। तथा वेदोऽपौरुषेयः, असर्वज्ञवचनत्वाभावे सति धर्मादिप्रमाणत्वात्, परपरिकल्पितेश्वरबुद्धिवत्। तथा विमतो व्यवहारः, पूर्वपूर्वव्यवहारानुस्मृतिनिबन्धनः, अभिधानाभिधेयव्यवहारत्वात्, जात्यभिधानव्यवहारत्वाद्वा इदानीन्तनव्यवहारवत् इत्यादिहेतुभिः वेदस्य नित्यत्वं सिद्धम्। तद्विरोधे **जैमिनीयैरुद्भाविते** "अतः प्रभवात्" इत्यनेन परिहारमभिधाय इदानीं तेनैव हेतुना **काणादादीन्** प्रति वेदस्यापौरुषेयत्वं द्रढयति। वेदोऽपौरुषेयः, जगत्कारणत्वात्, ईश्वरवत्—इति प्रयोगः। नन्वदृष्टे व्यभिचारः, न; वाच्यमुपलभ्य वाचकविरचना हि पौरुषेयता; न तादृश्यदृष्टेऽस्तीति कथं विपक्षता। यच्चानुमेनिरे **काणादाः**—वैदिक्यानुपूर्वी प्रणेतृपूर्विका, इदंप्रथमा वा, वर्णानुपूर्वीत्वात्, संप्रतिपन्नवदिति। तत्रादिमादिपदार्थस्वभावव्यवस्थाऽपि प्रणेतृपूर्विका व्यवस्थात्वात् संप्रतिपन्नवत्। अतीतकल्पानुपूर्वी चेदंप्रथमा आनुपूर्वीत्वात् संप्रतिपन्नवत्—इत्यतिप्रसङ्गलक्षणप्रतिकूलतर्कसद्भावादनुकूलतर्काभावाच्चाप्रयोजकत्वम्। यच्च वेदवाक्यमाप्तप्रणीतं तद्विपरीतागमस्वीकारित्रैवर्णिकेभ्योऽधिकैः त्रैवर्णिकैः प्रमाणत्वेनाद्रियमाणवाक्यत्वात्, आयुर्वेदवाक्यवदिति, तत्राप्तप्रणीतत्वे सन्दिग्धे प्रामाण्यनिश्चयाभावात् तार्किकाणां सन्दिग्धासिद्धो हेतुः। बौद्धशास्त्रमाप्तप्रणीतं तद्विपरीतागमस्वीकारिभिः बौद्धेभ्योऽधिकैः बौद्धैः प्रमाणत्वेनाद्रियमाणवाक्यत्वात् आयुर्वेदवदित्यतिप्रसङ्गश्च।

भाष्यभावप्रकाशिका

अत एव च नित्यत्वम्।।२९।। ननु पूर्वमीमांसायामेव वेदस्य नित्यत्वं सिद्धम्, तत्किमिति पुनरिह नित्यत्वं साध्यत इति, तत्राह—**कर्तुरिति**। अनित्याच्छब्दाज्जगत उत्पत्तौ तस्याप्युत्पत्तिमत्त्वेन सापेक्षत्वाज्जगत्कारणत्वायोगात्, नित्यो वेदः, जगदुत्पत्तिहेतुत्वादीश्वरवदिति सिद्धमेव नित्यत्वमनेन दृढीकृतमिति भावः।।२९।।

न्यायनिर्णयः

जगतः शब्दजत्वमुक्तमुपजीव्य शब्दनित्यत्वमाह— **अत एवेति**। पूर्वमीमांसायामेव वेदनित्यत्वस्य सिद्धत्वादिह तन्नित्यत्वसाधनमकिञ्चित्करमित्याशङ्क्य सूत्रतात्पर्यमाह— **कर्तुरिति**। पूर्वतन्त्रसिद्धमेव वेदनित्यत्वं देवादिजगदुत्पत्तौ वाचकशब्दस्यापि तद्भावादयुक्तमिति शङ्किते शब्दादेवं नित्याकृतिमतस्तज्जन्मेति समाहितम्। एवं वेदोऽवान्तरप्रलयस्थायी, जगद्धेतुत्वात्,

---

१. यथाश्रुतार्थमादायेदमुक्तम्। समानेन्द्रियपदेन बाह्येन्द्रियविवक्षायां तु उपान्त्यादिशब्देषु श्रोत्रेन्द्रियसंबन्धाभावेनोक्तहेतोरभावाद् भागासिद्धिः बोध्या। द्र. न्या. र. दी. २७।

२. मुक्तकश्लोकेषु व्यभिचारमाशङ्क्य निराकरोति—मुक्तकेति। ३. न विपक्षत्वमिति। निश्चितसाध्याभाववानेव विपक्ष इति भावः।

अत एव नियताकृतेर्देवादेर्जगतो वेदशब्दप्रभवत्वाद् वेदशब्दे नित्यत्वमपि प्रत्येतव्यम्। तथा च मन्त्रवर्णः- 'यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम्' (ऋ. सं. १०।७१।३) इति स्थितामेव वाचमनुविन्नां दर्शयति। वेदव्यासश्चैवमेव स्मरति-'युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः। लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा' इति।।२९।।

समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च।।३०।।

अथापि स्यात्- यदि पश्वादिव्यक्तिवद् देवादिव्यक्तयोऽपि संतत्यैवोत्पद्येरन् निरुध्येरंश्च ततोऽभि-

प्रकटार्थविवरणम्

वेदवाक्यमाप्तप्रणीतं हेतुदर्शनशून्यमहाजनपरिगृहीतत्वात् आयुर्वेदवदित्यसङ्गतम्, चन्द्रप्रादेशत्वादित्योदयवाक्यादौ व्यभिचाराद्, असिद्धेश्च। वेदोऽनाप्तप्रणीतः, आप्ताप्रणीतवाक्यत्वात् संप्रतिपन्नवत् इत्यपि न प्राप्नोति, अनुकूलतर्काभावात्; श्रेयोऽर्थिभिः परिगृहीतत्वात् अबाध्यार्थबोधनशक्तिमत्त्वानुपपत्तिबाधाच्च।

यदपरमनुममे—[1]'गवादिपदं संङ्केतपूर्वकतयैव व्यवहारपदं पदत्वात् संप्रतिपन्नवदिति; तत्र वृद्धव्यवहारे प्रवृत्तिलिङ्गेन [2]शक्तिमनुमाय व्यवहारान्तरे गवादिपदानां व्यवहार्यत्वस्य प्रत्यक्षत्वात् तद्बाधः। प्रयोगश्च—विमतं गवादिशब्दार्थसंबन्धज्ञानं वृद्धव्यवहारपुरस्सरं गवादिशब्दार्थसंबन्धज्ञानत्वात् इदानींतनवत्। तस्मात् पदानां पदार्थैः तद्बुद्धिजननसामर्थ्यलक्षणस्य संबन्धस्य स्वाभाविकत्वादानुपूर्व्याच्चेदंप्रथमताऽभावात्सिद्धं वेदस्य नित्यत्वम्। पुराणादिषु तु वाक्यरचनायाः पुरुषधीप्रभवत्वात् पौरुषेयतेष्यत इत्यलम्।

वेदनित्यत्वे श्रुतिस्मृतिसंवादमाह—**तथा च मन्त्रवर्ण इति**। पूर्वं केचन यजमानाः यज्ञमाहात्म्येन वाचो वेदस्य पदवीयं स्थानमायन् वेदावस्थानयोग्यत्वं प्राप्ताः सन्तः तां वाचमन्वविन्दन् अनुलेभिरे पश्चात् इति स्थितामेव वाचं लब्धां दर्शयतीत्यर्थः।

समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च। सूत्रनिरस्याशङ्कामाह—**अथापि स्यादिति**। अवान्तरप्रलये व्यक्तीनां नाशेऽपि जातीनां सद्भावाद् भवति वाच्यवाचकसंबन्धाविच्छेदः; महाप्रलये तु जातीनामपि लयात् सङ्केत एवापूर्वः कर्तव्य

भाष्यभावप्रकाशिका

समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च।।३०।। सूत्रव्यावर्त्यामाशङ्कामाह—**अथापि स्यादिति**। अभिधानाभिधेयाविच्छेदे सम्बन्धस्य नित्यत्वं भवेत्, अध्यापकाध्येतृपरम्पराऽविच्छेदे च वेदस्य नित्यत्वं स्यात्, निरन्वयविनाशे

न्यायनिर्णयः

ईश्वरवदित्यनुमानेन दृढीकर्तुमिदं सूत्रमित्यर्थः। तत्तात्पर्यमुक्त्वाऽक्षराणि व्याकरोति— **अत इति**। अनुमानसिद्धेऽर्थे श्रुतिमनुकूलयति— **तथा चेति**। यज्ञेन पुण्येन कर्मणा वाचो वेदस्य पदवीयं मार्गयोग्यतां ग्रहणयोग्यतामायन्नाप्तवन्तः, ततस्तां वाचमृषिषु प्रविष्टां विद्यमानामन्वविन्दन्ननुलब्धवन्तो याज्ञिका इति यावत्। तस्य तात्पर्यमाह— **स्थितामिति**। अनुविन्नामनुलब्धामित्येतत्। तत्रैव स्मृतिमाह— **वेदेति**। वेदान् कर्मज्ञानार्थान् मन्त्रब्राह्मणवादान् सेतिहासानितिहासशब्दितनानार्थवादोपेतान् प्रसिद्धेतिहाससहितान् वा तेषामप्यवान्तरप्रलये सत्त्वात्। पूर्वमवान्तरसर्गादावित्यर्थः। तपसाऽपि न तल्लाभोऽध्यापकाभावादित्याशङ्क्याह— **अनुज्ञाता इति**।।२९।।

महाप्रलये जातेरपि सत्त्वासिद्धेः शब्दार्थसंबन्धानित्यत्वमाशङ्क्य प्रत्याह— **समानेति**। सूत्रव्यावर्त्यामाशङ्कामाह— **अथापीति**। अवान्तरलये शब्दार्थसंबन्धानित्यत्वाभावेऽपीति यावत्। तत्र विरोधसमाधिमुक्तमङ्गीकरोति— **यदीति**।

---

१. 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः' इति शब्दार्थसम्बन्धनित्यत्वाभिधानात् सम्बन्धिनोऽपि नित्यत्वं सेत्स्यतीत्याशङ्कानिरासायेदमनुमानम्। सङ्केतपूर्वकतयैव व्यवहारविषयः, न तु नित्यसम्बन्धद्वारेत्येवकारार्थः।

२. **शक्तिमिति**। शक्तिलक्षणशब्दार्थसम्बन्धमित्यर्थः।

धानाभिधेयाभिधातृव्यवहाराविच्छेदात् संबन्धनित्यत्वेन विरोधः शब्दे परिह्रियेत। यदा तु खलु सकलं त्रैलोक्यं परित्यक्तनामरूपं निर्लेपं प्रलीयते, प्रभवति चाभिनवमिति श्रुतिस्मृतिवादा वदन्ति तदा कथमविरोध इति। तत्रेदमभिधीयते– समाननामरूपत्वादिति। तदाऽपि संसारस्यानादित्वं तावदभ्युपगन्तव्यम्। प्रतिपादयिष्यति चाचार्यः संसारस्यानादित्वम्– 'उपपद्यते चाप्युपलभ्यते च' (ब्र. सू. २।१।३६) इति। अनादौ च संसारे यथा स्वापप्रबोधयोः प्रलयप्रभवश्रवणेऽपि पूर्वप्रबोधवदुत्तरप्रबोधेऽपि व्यवहारान्न कश्चिद् विरोधः, एवं कल्पान्तरप्रभवप्रलययोरपीति द्रष्टव्यम्। स्वापप्रबोधयोश्च प्रलयप्रभवौ श्रूयेते–'यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यते यथाऽग्नेर्ज्वलतः सर्वा

प्रकटार्थविवरणम्

इति कथं न नित्यताव्याघात इत्यर्थः। परिहारत्वेन सूत्रभागमवतारयति—**तत्रेदमभिधीयते इति**। सत्यपि महाप्रलये पूर्वोत्तरकल्पयोः समाननामरूपत्वात् सर्वदैकरूप्यं व्यवहारस्य नित्यत्वं न विरुध्यते, ब्रह्मवत् नित्यत्वाभावेऽपीति भावः। ननु परमेश्वरस्याऽऽद्यः प्रपञ्चसर्गो महासर्गः स्वीकृतश्चेत्तर्हि ततः पूर्वं सर्गान्तराभावात् केन समाननामरूपत्वमित्याशङ्क्याह—**तदापीति**। मुक्तबद्धत्वदोषपरिहारायेत्यर्थः। ननु सूत्रकृताऽनुक्तत्वान्नानादित्वमित्याशङ्क्याह—**प्रतिपादयिष्यति चेति**। अस्त्वनादित्वम्, तथापि विनष्टसमानोत्पादे नास्ति दृष्टान्त इत्याशङ्क्याह—**अनादौ चेति**। सुषुप्ते रूपादीनां विषयत्वं चक्षुरादीनां विषयित्वम् यद्यपि नष्टं तथापि जागरणे नियमेनैव व्यवहारो दृश्यते। न हि चक्षुषो रसो विषयो भवति। तथा कल्पान्तरीयशब्दार्थव्यवहारस्य लयेऽपि कल्पान्तरे तथैव प्रादुर्भविष्यतीत्यर्थः। दृष्टान्तं श्रुत्या द्रढयति—**स्वापप्रबोधयोश्चेति**। महान्धकारपिहितानामिव घटादीनां विशेषाभिव्यक्त्य[भावा]भिप्रायेणैकीभावाभिधानं, चिद्विषयत्वाकारोदयाभिप्रायेण जागरणे प्राणशब्दावाच्यात् परमात्मनो निर्गमाभिधानम्; अन्यथा महाप्रलयादविशेषापातात्; तस्मात् सुषुप्ते जातिव्यक्त्योः चिद्विषयत्वमात्रविलयः; अवान्तरप्रलये व्यक्तीनाम्; महाप्रलये तूभयोरपीति विभागो द्रष्टव्यः।

भाष्यभावप्रकाशिका

तु जगतोऽत्यन्तापूर्वस्य चोत्पादे तदनुपपन्नम्। सम्बन्धिनोरभावे सम्बन्धाभावात्, अध्यापकाद्यभावे चाश्रयाभावात्, जीवानां चान्तःकरणोपाधित्वात् तदभावेऽभावात्, ब्रह्मणश्च शुद्धस्य वेदतद्वासनाश्रयत्वायोगादिति शङ्कार्थः। विरोधं परिहर्तुं संसारस्यानादित्वं दर्शयति—**तदापि संसारस्येति**। भवत्वनादित्वम्, तथापि महाप्रलयान्तरिते कुतः स्मरणं वेदानामिति? अत आह—**अनादौ चेति**। यद्यपि प्राणमात्रावशेषोऽस्ति; तथापि कर्मविक्षेपसंस्कारसहिताविद्यावशेषतासाम्यादनयोर्यथा स्वापेत्यादिना साम्यव्यपदेशः।

न्यायनिर्णयः

अभिधातृशब्देनाध्यापकाध्येतारावुक्तौ। अभिधानाभिधेयव्यवहाराविच्छेदे संबन्धनित्यत्वमध्यापकाध्येतृपरम्पराऽविच्छेदे च वेदनित्यतेत्यविरोध इत्यर्थः। महाप्रलये तु नाविरोध इत्याह— **यदा त्विति**। जगतो निरन्वयनाशेऽत्यन्तापूर्वस्य चोत्पत्तौ संबन्धनित्यत्वाद्यसिद्धिः, संबन्धिनोरभावे तदभावात्, अध्यापकाद्यभावे वाऽऽश्रयाभावात्, ब्रह्मणश्च केवलस्यातदाश्रयत्वात्। अतो महाप्रलये विरोधतादवस्थ्यमित्यर्थः। तं परिहर्तुं सूत्रं पातयति— **तत्रेति**। तदिदं व्याकुर्वन्ननादित्वं संसारस्य प्रतिजानीते— **तदापीति**। महाप्रलयमहासर्गाङ्गीकारेऽपीति यावत्। तत्र वक्ष्यमाणन्यायं हेतूकरोति— **प्रतिपादयिष्यतीति**। तस्यानादित्वेऽपि महाप्रलयव्यवधानादस्मरणे वेदानां कुतस्तदीयो व्यवहारः, तत्राह— **अनादौ चेति**। न कश्चिद्विरोधः, शब्दार्थसंबन्धनित्यत्वादेरिति शेषः। स्वापे लये च प्राणमात्रावशेषानवशेषाभ्यां विशेषेऽपि कर्मविक्षेपसंस्कारसहिताविद्यावशेषतासाम्यादनयोः साम्यम्। कथं पुनः स्वापे प्रलयस्य प्रबोधे च प्रभवस्य श्रवणं, तदाह— **स्वापेति**। यदेत्युपक्रमादथशब्दस्तदेत्यर्थे। प्राणः परमात्मा। सुषुप्तस्य परस्मिन्नेकीभावावस्था तदेत्युक्ता। एनं प्रकृतं प्राणं परमात्मानम्। अन्तर्बहिरिन्द्रियाणि सविषयाणि स्वापे परमात्मनि लीनानीत्यर्थः। प्रबोधे तस्मादेव जगतो जन्मोदाहरति— **स इति**।

दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः' (कौ. उ. ३।३) इति।

स्यादेतत्– स्वापे पुरुषान्तरव्यवहाराविच्छेदात् स्वयं च सुप्तप्रबुद्धस्य पूर्वप्रबोधव्यवहारानुसंधान-संभवादविरुद्धम्। महाप्रलये तु सर्वव्यवहारोच्छेदाज्जन्मान्तरव्यवहारवच्च कल्पान्तरव्यवहारस्यानु-संधातुमशक्यत्वाद् वैषम्यमिति। नैष दोषः। सत्यपि सर्वव्यवहारोच्छेदिनि महाप्रलये परमेश्वरानुग्रहादीश्वराणां हिरण्यगर्भादीनां कल्पान्तरव्यवहारानुसंधानोपपत्तेः। यद्यपि प्राकृताः प्राणिनो न जन्मान्तरव्यवहारमनुसंदधाना दृश्यन्त इति, तथापि न प्राकृतवदीश्वराणां भवितव्यम्। तथा हि-प्राणित्वाविशेषेऽपि मनुष्यादिस्तम्बपर्यन्तेषु ज्ञानैश्वर्यादिप्रतिबन्धः परेण परेण भूयान् भवन् दृश्यते, तथा मनुष्यादिष्वेव हिरण्यगर्भपर्यन्तेषु ज्ञानैश्वर्याद्यभिव्यक्तिरपि परेण परेण भूयसी भवतीत्येतच्छ्रुतिस्मृतिवादेष्वसकृदनुश्रूयमाणं न शक्यं नास्तीति

प्रकटार्थविवरणम्

अनुसन्धानसंभवासंभवाभ्यां दृष्टान्तदार्ष्टान्तिकयो: वैलक्षण्यमाह—**स्यादेतत्स्वाप इति।** हिरण्यगर्भादीनामनुसन्धानसंभवात् न वैषम्यमित्याह—**नैष दोष इति।** यदप्युक्तम्—मरणानन्तरमुत्पन्नानां जन्मान्तरीयानुसन्धानं न दृश्यते, तथाऽत्र विप्रकर्षात् कल्पान्तरीयानुसंधानमपि न संभवतीति; तत्राह—**न प्राकृतवदीश्वराणामिति।** अतिप्रसङ्गसहकृतागमबाधितं सामान्यतोदृष्टानुमानमिति

भाष्यभावप्रकाशिका

वैषम्यमाशङ्कते—**स्यादेतदिति।** सर्वेषां युगपत्सुषुप्त्यभावात् तदा प्रबुद्धेभ्य: सुषुप्तानां व्यवहारग्रहणोपपत्ते: कालविप्रकर्षस्य मरणस्य च वासनोच्छेदिनोऽभावात् स्मरणं तत्रोपपन्नम्, नेह। किञ्च विवादाध्यासित: पुरुष:, जन्मान्तरव्यवहारमनुसन्धातुं नार्हति, जन्मविनाशाभ्यां व्यवहितत्वात्; अस्मदादिवदित्यर्थ:। **नैष दोष इति।** अयमभिसन्धि:— प्रेतपिशाचादीनां जन्मान्तरानुस्मरणदर्शनानुगृहीतानामृष्यादिषु स्मृत्यादिप्रमाणसिद्धकल्पान्तरीयवेदानुस्मरणसूचकश्रौतलिङ्गानां कल्पान्तर-व्यवहारानुस्मरणसाधकत्वं भवति। किञ्च जन्मविनाशयो: कालविप्रकर्षस्य च न सर्वसंस्कारोच्छेदकत्वम्; पूर्वाभ्यस्तस्मृत्यानु-सन्धानाज्जातमात्रस्य हर्षभयशोकादिदर्शनादिति।

न्यायनिर्णय:

स सुषुप्त: पुरुष:। यथेत्यस्मात् प्रागुपक्रमवशात् तदेति द्रष्टव्यम्। एतस्मादात्मन इत्यत्रापादानं प्राण: परमात्मैव। सर्वे प्राणा वागादयस्तेभ्योऽनन्तरं तदनुग्राहका देवा अग्न्यादयस्तदनन्तरं लोका: शब्दादिविषया:। कल्पितस्याज्ञातसत्त्वाभावाद् दृष्ट्यदृष्टिभ्यामुत्पत्तिलयावुक्तौ। व्यावहारिकसत्त्वे त्वनास्था श्रुतेरिति। अनुसंधानयोगायोगाभ्यां दृष्टान्तदार्ष्टान्तिकवैषम्यं शङ्कते—**स्यादिति।** सर्वेषां यौगपद्येनास्वापात् तदा प्रबुद्धेभ्य: सुप्तानां पुनर्व्यवहारग्रहात् कालविप्रकर्षस्य मरणस्य च वासनोच्छेदिनोऽभावात् तत्र स्मरणम्। इह तु विमतो न जन्मान्तरव्यवहारानुसंधानार्ह:, जनिमृतिव्यवहितत्वात्, अस्मदादिवदित्यनुमानात्र स्मरणम्, अतो दृष्टान्ते शब्दार्थसंबन्धनित्यत्वाद्यविरुद्धम्, दार्ष्टान्तिके नैवमित्यर्थ:। हिरण्यगर्भादीनामनुसंधानसिद्धेर्न वैषम्यमित्याह— **नैष इति।** तेषामस्मदादिसाम्यमाशङ्क्योक्तम्— **यद्यपीति।** इतिशब्दो यद्यपीत्यनेन संबध्यते। तथापि न प्राकृतवदिति वक्तव्यम्। उक्तमर्थं दृष्टान्तेन साधयति— **यथेति।** आ मानुषादा च स्थाणोर्ज्ञानादिप्रतिबन्धस्योत्तरोत्तरमुत्कर्षप्रतीतिं प्रमाणयति— **दृश्यत इति।** आ मनुष्यादा च हिरण्यगर्भादुत्तरोत्तरज्ञानाद्याधिक्ये मानमाह— **इत्येतदिति।** 'हिरण्यगर्भ: समवर्तत' इत्यादय: श्रुतिवादा:। 'ज्ञानमप्रतिघं यस्य' इत्यादय: स्मृतिवादा:। तेषामुक्तेऽर्थे तात्पर्यलिङ्गमभ्यासमाह— **असकृदिति।** पूर्वकल्पीयेश्वराणां कल्पान्तरे मुक्तत्वात् कथं

वदितुम्। ततश्चातीतकल्पानुष्ठितप्रकृष्टज्ञानकर्मणामीश्वराणां हिरण्यगर्भादीनां वर्तमानकल्पादौ प्रादुर्भवतां परमेश्वरानुगृहीतानां सुप्तप्रतिबुद्धवत् कल्पान्तरव्यवहारानुसंधानोपपत्तिः। तथा च श्रुतिः– 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये' (श्वे. उ. ६।१८) इति। स्मरन्ति च शौनकादयो 'मधुच्छन्दःप्रभृतिभिर्ऋषिभिर्दाशतय्यो दृष्टाः' इति। प्रतिवेदं चैवमेव काण्डर्ष्यादयः स्मर्यन्ते। श्रुतिरप्यृषिज्ञानपूर्वकमेव मन्त्रेणानुष्ठानं दर्शयति– 'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्तं वा प्रतिपद्यते'

प्रकटार्थविवरणम्

भावः। ननु पूर्वकल्पे ये हिरण्यगर्भादयो बभूवुः तेषां कल्पान्ते मुक्तत्वात् कथं कल्पान्तरेऽनुसन्धानमित्याशङ्क्याह—**ततश्चातीतेति**। पुरुषविशेषाणामनुसन्धानं संभवतीत्येवं स्थिते ये पूर्वकल्पे हिरण्यगर्भादिप्राप्तिनिमित्तं कर्मचिरुस्तेषां यजमानानां हिरण्यगर्भादिभावनायुक्तानां परमेश्वरानुग्रहाद् घटतेऽनुसन्धानमित्यर्थः। हिरण्यगर्भस्य परमेश्वरानुग्रहे श्रुतिमाह—**तथा चेति**। नैकस्यैव प्रतिभानं येनाविश्वासः स्यात्, किन्तु तत्तच्छाखाद्रष्टारोऽन्येऽपि प्रादुर्बभूवुरित्याह—**स्मरन्ति चेति**। दाशतय्यो दशमण्डलयोगिन्य ऋचः। "संख्याया अवयवे तयप्" स्वार्थे। ताश्च—"ऋचां दशसहस्राणि ऋचां पञ्च शतानि च। ऋचामशीतिः पादश्च पारणं संप्रकीर्तितम्॥" इत्यनुवाकानुक्रमण्यां श्रीशौनकेन महर्षिणोक्तसंख्याका द्रष्टव्या इत्यर्थः। किं चर्षिज्ञानपूर्वकमनुष्ठानं वदन्ती श्रुतिः तांस्तानृषीन् मन्त्रद्रष्टॄन् गमयतीत्याह—**श्रुतिरपीति**। अविदितान्यार्षेयच्छन्दोदैवतब्राह्मणानि यस्य मन्त्रस्य तेनेति विग्रहः। तस्मात् कल्पान्तरीयानुसन्धानेन व्यवहारप्रवर्तकानां संभवात् पूर्वकल्पतुल्य एवोत्तरः कल्प इति फलितार्थः। किं च सृष्टिनिमित्तादृष्टमहिम्नाऽपि पूर्वसदृश्येवोत्तरसृष्टिरित्याह—

भाष्यभावप्रकाशिका

ननु कल्पान्तरव्यवहारानुसन्धानेऽपि वर्णाश्रमधर्माणां तत्प्रतिपादकवेदानां चान्यत्वात्, प्रतिकल्पं शब्दार्थसम्बन्धस्य वेदानां चानित्यत्वमित्याशङ्क्य महाप्रलये व्यक्तिवज्जात्युच्छित्तावपि वक्ष्यमाणधर्माधर्मकार्यत्वकारणशक्तिनियमादिभिर्हेतुभिः पूर्वापरीभूतगवादिजातिसादृश्यनियमादेवाभिधानाभिधेयतानित्यतासिद्धेः, मध्ये चाऽभिधानाभिधेयजनककारणशक्त्योर्बोध्यबोधकसामर्थ्यनियमात्, तत्प्रसूतयोः शब्दार्थयोः रूपप्रदीपयोरिव सम्बन्धनियमाच्छब्दार्थसम्बन्धनित्यता; वर्णानामनित्योच्चारणादिक्रमविशिष्टानां नित्यत्वेन

न्यायनिर्णयः

व्यवहितानुसंधानं, तत्राह— **ततश्चेति**। पुरुषविशेषाणां व्यवहितानुसंधानयोगस्य स्थितत्वादिति यावत्। पुरुषविशेषानेवाह— **अतीतेति**। ईश्वराणां तद्भावनाभाजां यजमानानामित्यर्थः। प्रादुर्भवतां हिरण्यगर्भादिभावेनेति शेषः। तेषां व्यवहितव्यवहारानुसंधाने हेतुमाह— **परमेश्वरेति**। हिरण्यगर्भस्य परानुग्रहे मानमाह— **तथा चेति**। विपूर्वो दधातिः करोत्यर्थः। पूर्वं कल्पादौ। प्रहिणोति ददाति। लटश्चोभयत्राविवक्षा। आत्माकारबुद्धौ प्रकाशत इति तथोक्तः। तत्त्वमस्यादिवाक्योत्थधीवृत्तिव्याप्यमित्येतत्। शरणं मुक्त्यालम्बनमित्यर्थः। न केवलमेकस्यैव प्रतिभानं येनाविश्वासः; किंतु तत्तच्छाखाद्रष्टारोऽपि बहवः सन्तीत्याह— **स्मरन्तीति**। ऋग्वेदो दशमण्डलात्मको मण्डलानां दशतयमत्रास्तीति। दाशतय्यस्तत्र भवा ऋचः। ऋग्वेदातिरिक्तेष्वपि वेदेषु काण्डसूक्तमन्त्रादिदृशो बौधायनादिभिः स्मृता इत्याह— **प्रतीति**। एवमेव मधुच्छन्दःप्रभृतिवदेवेत्यर्थः। किंचर्ष्यादिधीपूर्वमनुष्ठानं दर्शयन्ती श्रुतिस्तांस्तानृषीन् मन्त्रदृशो दर्शयतीत्याह— **श्रुतिरिति**। तत्र तत्र प्रथममृष्यादिज्ञानं विनाऽनुष्ठाने दोषमाह— **यो हेति**। आर्षेयमृषिसंबन्धः, छन्दो गायत्र्यादि, दैवतमग्न्यादि, ब्राह्मणं विनियोगः न विदितान्येतानि यस्य मन्त्रस्य तेन याजयति यागं कारयत्यध्यापयत्यध्ययनं कारयति, स्थाणुं स्थावरं, गर्तं नरकम्। ऋष्याद्यज्ञाने दोषित्वं तच्छब्दार्थः। भूतप्रेतादीनां जन्मान्तरानुस्मरणदर्शनन्यायानुगृहीतानामृष्यादिषु स्मृत्यादिप्रमितकल्पान्तरीयवेदानुस्मरणसूचकश्रौतलिङ्गानां कल्पान्तरव्यवहारानुस्मरणसाधकत्वम्। न च कालविप्रकर्षस्य जन्मनाशयोश्च सर्वसंस्कारोच्छेदकत्वं, पूर्वाभ्यस्तस्मृत्यनुसंधानाज्जातमात्रस्य हर्षादिदृष्टेरित्यर्थः। कल्पान्तरानुसंधानेन व्यवहारप्रवर्तनयोगात्

१. ऋग्वेदस्य पारायणे ऋक्संख्योक्तिरियम्। 'ऋचामशीतिपादश्चैतत् पारायणमुच्यते' इति शौनकोक्तचरणव्यूहे पाठः। पृ. १४।

इत्युपक्रम्य 'तस्मादेतानि मन्त्रे मन्त्रे विद्यात्' (आर्षेयब्रा. १) इति। प्राणिनां च सुखप्राप्तये धर्मो विधीयते। दुःखपरिहाराय चाधर्मः प्रतिषिध्यते। दृष्टानुश्रविकसुखदुःखविषयौ च रागद्वेषौ भवतो न विलक्षणविषयावित्यतो धर्माधर्मफलभूतोत्तरा सृष्टिर्निष्पद्यमाना पूर्वसृष्टिसदृश्येव निष्पद्यते। स्मृतिश्च भवति– 'तेषां ये यानि कर्माणि प्राक्सृष्ट्यां प्रतिपेदिरे। तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः। हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते। तद्भाविताः प्रपद्यन्ते तस्मात् तत् तस्य रोचते'। (वि. पु. १।५।६०, ६१) इति। प्रलीयमानमपि चेदं जगच्छक्त्यवशेषमेव प्रलीयते, शक्तिमूलमेव च प्रभवति। इतरथाऽऽकस्मिकत्वप्रसङ्गात्। न चानेकाकाराः

प्रकटार्थविवरणम्

प्राणिनां चेति। काम्यमानसुखप्राप्तये धर्मोऽनुष्ठितः पूर्वकल्पे, द्वेषविषयदुःखपरिहाराय चाधर्मः परित्यक्तः; तयोश्चेत् स्वरूपं कल्पान्तरे व्यभिचरेत्, तदाऽकृताभ्यागमकृतविप्रणाशप्रसङ्ग इति भावः। यच्चोक्तं निर्लेपं प्रलीयत इति, तदपि नास्तीत्याह— **प्रलीयमानमपि चेदमिति**। वाच्यवाचकशक्त्योरवशिष्टत्वान्न शब्दार्थसंबन्धानित्यताप्रसङ्ग इति भावः। ननु शक्तिरपि प्रतिकल्पमन्यथा वाच्यवाचकयोः किं न स्यादित्याशङ्क्याह— **न चानेकाकारा इति**। गौरवप्रसङ्गादित्यर्थः।

ननु विलम्बतां तावद् विलयः; स्थितिकाल एव शक्तिसद्भावे किं मानम्? तत्रार्थापत्तिः प्रमाणमिति मेनिरे **मीमांसकाः**। करतलानलसंयोगे स्फोटोदयदर्शनात् तस्य च तावन्मात्रादसंभवात्। ('प्रतिबन्धकाभावस्य सहकारित्वमवकल्पते। न;) प्रतिबन्धदशायामपि प्रसक्तेः। अतोऽस्ति किंचिदतीन्द्रियं व्यवस्थापकं सा शक्तिरिति गीयते।

तत्राहुः **नैयायिकादयः**—प्रतिबन्धकाभावेनैव दृष्टेन सहकारिणा व्यवस्थोपपत्तौ नातीन्द्रिया शक्तिः कल्पनीयेति।

भाष्यभावप्रकाशिका

सर्वगतत्वेन च स्वतः क्रमशून्यानां पूर्वपूर्वक्रमानुस्मृतिनिमित्ततत्तत्सदृशोत्तरोत्तरक्रमसादृश्यपरम्पराया अनिदंप्रथमत्वान्मीमांसकमते वेदनित्यतावदित्यभिप्रेत्य धर्माधर्मनिमित्तत्वात् सृष्टेः पूर्वसदृश्येवोत्तरसृष्टिरित्याह—**प्राणिनां चेति**। एतावता पूर्वसृष्टिसदृशत्वं कथमिति? अत आह—**दृष्टानुश्रविकेति**। विशिष्टसंस्थानपश्वादिकामनयाऽनुष्ठितं कर्म तादृशं पश्वादि निष्पादयतीत्यर्थः। उपादानकारणशक्तिनियमादपि पूर्वसृष्टिसदृश्येवोत्तरसृष्टिरित्याह—**प्रलीयमानमपीति**। कार्यस्य कारणमात्रपर्यन्तं विनाशात् सृष्टेः सादृश्यमयुक्तमिति, अत आह—**शक्त्यवशेषमिति**। शक्तीनां वैचित्र्यात् कथं सादृश्यमिति? अत आह—**न चानेकाकारा इति**।

न्यायनिर्णयः

पूर्वकल्पतुल्यैवोत्तरकल्पप्रवृत्तिरित्युक्तम्। सम्प्रति सृष्टिनिमित्तादृष्टमहिम्नाऽपि पूर्वसदृश्येवोत्तरसृष्टिरित्याह— **प्राणिनां चेति**। कथमेतावता पूर्वसृष्टिसादृश्यमुत्तरसृष्टेरित्याशङ्क्याह— **दृष्टेति**। अन्वयव्यतिरेकसिद्धत्वं दृष्टत्वम्। आगममात्रप्रतिपन्नत्वमानुश्रविकत्वम्। विशिष्टसंस्थानपश्वादिकामनया कृतं कर्म तादृशं पश्वादि भावयतीति दृष्टविषयरागाद्यधीनकर्मफलभूतसृष्टेः श्लिष्टं पूर्वसृष्टिसादृश्यमित्यर्थः। पूर्वोत्तरसृष्टिसादृश्ये मानमाह— **स्मृतिश्चेति**। तेषां सृज्यमानानां प्राणिनामिति निर्धारणे षष्ठी। तेषां पौनःपुन्येन सृज्यमानतया सर्गस्य प्रवाहात्मनाऽनादित्वं द्योत्यते। पूर्वकृतकर्मपारवश्यमुत्तरसृष्टौ किमिति प्राणिनामित्याशङ्क्याह— **हिंस्रेति**। व्यवस्थया धर्माधर्मसंस्कृतत्वं कथं तेषामिष्टं, तत्राह— **तस्मादिति**। सम्प्रतितनधर्मादिरुचिदृष्ट्या प्राचि भवेऽपि तत्तद्भावितत्वधीरित्यर्थः। यत्तु निर्लेपं प्रलीयते जगदिति, तत्राह— **प्रलीयमानमिति**। ततश्चोपादानशक्तिनियमादपि पूर्वसदृश्येवोत्तरसृष्टिरित्यर्थः। कार्यस्य कारणमात्रत्वात् तन्नाशान्नोत्तरसृष्टेः सादृश्यमित्याशङ्क्याह— **शक्तीति**। निरन्वयनाशेन नवस्योदये दोषमाह— **इतरथेति**। शक्तिवैचित्र्याद् विचित्रसृष्टिमाशङ्क्याह— **न चेति**। अविद्याशक्तेरेकस्यास्तत्तत्कार्ये शक्तिभेदकल्पने गौरवात् 'आत्माविद्यैव नः

---

१. कुण्डलितोंऽशः 'सत्यमेतत्' [पृ. ३५६] इत्यादिवाक्यगत एव लेखकप्रमादादत्रापि पतित इति वेदान्ततत्त्वालोकदर्शनात् निश्चीयते। द्र. वे. त. पृ. ६।

शक्तयः शक्याः कल्पयितुम्। ततश्च विच्छिद्य विच्छिद्याप्युद्भवतां भूरादिलोकप्रवाहाणां, देवतिर्यङ्मनुष्यलक्षणानां च प्राणिनिकायप्रवाहाणां, वर्णाश्रमधर्मफलव्यवस्थानां चानादौ संसारे नियतत्वमिन्द्रियविषयसंबन्धनियतत्ववत् प्रत्येतव्यम्। न हीन्द्रियविषयसंबन्धादेर्व्यवहारस्य प्रतिसर्गमन्यथात्वं षष्ठेन्द्रियविषयकल्पं शक्यमुत्प्रेक्षितुम्। अतश्च सर्वकल्पानां तुल्यव्यवहारत्वात् कल्पान्तरव्यवहारानुसंधानक्षमत्वाच्चेश्वराणां समाननामरूपा एव प्रतिसर्गं विशेषाः प्रादुर्भवन्ति। समाननामरूपत्वाच्चावृत्तावपि महासर्गमहाप्रलयलक्षणायां जगतोऽभ्युपगम्यमानायां न कश्चिच्छब्दप्रामाण्यादिविरोधः। समाननामरूपतां च श्रुतिस्मृती दर्शयतः— 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो स्वः' (ऋ. सं. १०।१९०।३) इति। यथा पूर्वस्मिन्

प्रकटार्थविवरणम्

तत्राहुः—सत्यमेतद् यदि प्रतिबन्धकाभावस्य सहकारित्वमवकल्पते; न तु तदस्ति; तथा सति प्रतिबन्धकशब्दार्थाभावापातात्। तथा हि—सति पुष्कलकारणे कार्योत्पादविरोधी प्रतिबन्धकः; इतरथा कारणाभावादेव कार्याभावोपपत्तेः मन्त्रादिषु प्रतिबन्धकवार्ता न स्यात्। न च तदभावे तद्भाव इति प्रतिबन्धकत्वं मण्यादेर्न स्यात्। यथोक्तम्—"प्रतिबन्धो विसामग्री तद्धेतुः प्रतिबन्धकः" इति—तदसत्; विसामग्रीशब्दाभिधेयप्रतिबन्धकाभावाभावो हि प्रतिबन्धकभाव एव; न च स एव तस्य हेतुः। न चान्यस्य प्रतिबन्धकत्वप्रसिद्धिरस्ति। किञ्च सिद्धे प्रतिबन्धकाभावस्य कारणत्वे तद्वैकल्यापादकः [प्रतिबन्धकः] सिध्यति, सिद्धे च तस्मिंस्तदभावः कारणमितीतरेतराश्रयं स्यात्। न च तस्य कारणत्वे मानम्; व्यतिरेकाभावात् उत्तम्भकसन्निधाने सत्यपि प्रतिबन्धके कार्यदर्शनात्। यच्चोक्तम्—उत्तम्भकाभावविशिष्ट एव प्राक्तनो मणिः प्रतिबन्धक इति, तत्रेदं वक्तव्यम्—किं क्वचित् प्रतिबन्धके सति तत्संसर्गाभावः कारणं, किं वा तस्यात्यन्ताभावः? आद्ये देशान्तरे उत्तम्भकसंसर्गे वह्नेः दाहो न स्यात्; अन्त्ये च क्वचित्प्रतिबन्धेऽन्यत्रापि कार्यानुदयप्रसङ्गः। तस्मात् प्रतिबन्धकाभावस्य कारणत्वानुपपत्तेः कार्यभावाभावव्यवस्थासिद्धये प्रतिबन्धव्यवहारसिद्धये च शक्तिरभ्युपगन्तव्या। तस्याश्च प्रतिबन्धो ध्वंसः; प्रतिबन्धकापसरणकारणात् पुनरुदयः। शक्तिभेदाच्चान्यत्र कार्यदर्शनमविरुद्धम्। औष्ण्यादेः प्रतिबन्धकल्पनं तु बालवल्गनम्। पूर्ववदुपलब्धेः, अतीन्द्रियातिशयकल्पने चापसिद्धान्तः। तदेवं सर्वभावानां शक्तिमत्त्वात् प्रलयेऽपि मूलकारणे तान् [तां] विहाय नामरूपं विलीयत इति सूक्तम्।

अस्तु शक्तिशेष एव लयः; ततः किमित्यत आह—**ततश्च विच्छिद्य विच्छिद्यापीति**। दृष्टान्तं स्पष्टयति—**न हीति**। षष्ठेन्द्रियस्य मनसो नास्त्यसाधारणो विषयः। सुखादेरपि साक्षिमात्रवेद्यत्वाभ्युपगमात्। तत्तुल्यमत्यन्तासदन्यथात्वं प्रतिदिनं [प्रतिकल्पं] न हि शक्यं कल्पयितुमित्यर्थः। उक्तं संक्षेपेणोपसंहृत्य सूत्रं योजयति—**अतश्च सर्वकल्पानामित्यादिना**।

न्यायनिर्णयः

शक्ति'रिति स्थितेरित्यर्थः। पूर्वोत्तरसृष्टिसादृश्ये फलितमाह— **ततश्चेति**। विच्छिद्य महाप्रलयव्यवधानेनापीत्यर्थः। भूरादिलोकप्रवाह भोगभूमयः। देवादिप्राणिसमूहो भोक्तृवर्गः। वर्णाश्रमादिव्यवस्थास्तदीयधर्माधर्म इति भेदः। दृष्टान्तं स्पष्टयति— **न हीति**। 'मनःषष्ठानीन्द्रियाणि' इति स्मृतेः षष्ठमिन्द्रियं मनस्तस्य नासाधारणो विषयः, सुखादेरपि साक्षिमात्रगम्यत्वात् तत्तुल्यमत्यन्तासदिति यावत्। यद्वा षष्ठमिन्द्रियं ज्ञानेन्द्रियेषु कर्मेन्द्रियेषु वा नास्ति, तद्विषयस्तु दूरापास्तस्तथा व्यवहारान्यथात्वं प्रतिकल्पमशक्यं कल्पयितुम्। न हि कस्यांचिदपि सृष्टौ नेत्रश्रोत्रादेर्गोचरविपर्ययो दृष्टः। तथा सर्वकल्पेषु [1]लोकलोकितद्धर्मनियमसिद्धिरित्यर्थः। उक्तमर्थं संक्षिप्य निगमयन् प्रकृतसूत्राक्षराणि योजयति— **अतश्चेति**। समाननामरूपाणां विशेषाणां प्रतिसर्गं सर्गेऽपि कुतो विरोधसमाधिः, तत्राह— **समानेति**। प्रादुर्भवतां विशेषाणां समाननामरूपत्वे मानमाह— **समानेति**। उक्तं व्याकर्तुं श्रुतिं व्याचष्टे—

१. लोकाः भूरादयः, लोकिनो देवादयः।

कल्पे सूर्याचन्द्रमःप्रभृति जगत् क्लृप्तं तथाऽस्मिन्नपि कल्पे परमेश्वरोऽकल्पयदित्यर्थः। तथा 'अग्निर्वा अकामयत। अन्नादो देवानां स्यामिति। स एतमग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवपत्' (तै. ब्रा. ३।१।४।१) इति नक्षत्रेष्टिविधौ योऽग्निर्निरवपद् यस्मै वाऽग्नये निरवपत् तयोः समाननामरूपतां दर्शयतीत्येवंजातीयका श्रुतिरिहोदाहर्तव्या। स्मृतिरपि-'ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः। शर्वर्यन्ते प्रसूतानां तान्येवैभ्यो ददात्यजः। यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये। दृश्यन्ते तानि तान्येव तथा भावा युगादिषु। (वि. पु. १।५।६५, ६६) यथाभिमानिनोऽतीतास्तुल्यास्ते साम्प्रतैरिह। देवा देवैरतीतैर्हि रूपैर्नामभिरेव च'। इत्येवंजातीयका द्रष्टव्या।।३०।।

मध्वादिष्वसंभवादनधिकारं जैमिनिः।।३१।।

इह देवादीनामपि ब्रह्मविद्यायामस्त्यधिकार इति यत् प्रतिज्ञातं तत् पर्यावर्त्यते। देवादीनामनधिकारं जैमिनिराचार्यो मन्यते। कस्मात्? मध्वादिष्वसंभवात्। ब्रह्मविद्यायामधिकाराभ्युपगमे हि विद्यात्वाविशेषान्मध्वादि-

प्रकटार्थविवरणम्

वेदेषु वेदविषया दृष्टयो, येषां यत् [यानि] वेददर्शनानि पूर्वं बभूवुः तेषां शर्वर्यन्ते प्रलयान्ते तान्येव परमेश्वरः संपादयतीत्यर्थः। वसन्तर्तुचिह्नानि नवपल्लवादीनि। पर्यये संवत्सरपरिवर्तने। चक्षुराद्यभिमानिनो ये देवा अतीतास्ते साम्प्रतैः देवैः तुल्याः।

मध्वादिष्वसंभवादनधिकारं जैमिनिः। एवं तावद् देवानां विग्रहवत्त्वे सर्गप्रलयाभ्युपगमे च नास्ति कर्मणि शब्दे च विरोध इत्युपपाद्य पुनर्मूलाधिकरणसिद्धान्तमाक्षिपति सूत्रद्वयेन—**मध्वादिष्वित्यादिना।** रोहितं शुक्लं कृष्णं परःकृष्णं मध्ये चञ्चलं चेति

भाष्यभावप्रकाशिका

सूत्रं व्याचष्टे—**समाननामेति। अग्निर्वा अकामयतेति।** भाविनीं वृत्तिमाश्रित्य यजमान एवाग्निरुच्यते; अग्नेरग्निदेवतान्तराभावात्।।३०।।

मध्वादिष्वसंभवादनधिकारं जैमिनिः।।३१।। ननु यत्रासंभवः, तत्राधिकारो मा भूत्, यत्र तु संभवति, तत्र किमिति [न]

न्यायनिर्णयः

यथेति। तत्रैव श्रुत्यन्तरमाह— **तथेति।** भाविवृत्त्या यजमानोऽग्निरुच्यते, अग्नेरग्न्यन्तराभावात्। यजमानश्चैवं कामयित्वा किं कृतवानिति, तदाह— **स इति।** कृत्तिकाभ्यः कृत्तिकानक्षत्रदेवतायै। बहुवचनं नक्षत्रबहुत्वात्। अष्टाकपालमष्टसु कपालेषु पचनीयं निरवपन्निरुप्तवान्। उक्तपुरोडाशहविष्कामिष्टिं कृतवानित्यर्थः। उक्तश्रुतेस्तात्पर्यमाह— **नक्षत्रेति।** 'मित्रो वा अकामयत' 'चन्द्रमा वा अकामयत' इत्येवंविधा श्रुतिरेवंजातीयका। पूर्वोत्तरसृष्ट्योः समाननामरूपत्वमिहेत्युक्तम्। स्मृतिरपीह द्रष्टव्येति संबन्धः। वेदेष्विति विषयसप्तमी। शर्वर्यन्ते प्रलयान्ते। ऋतुलिङ्गानि वसन्तादीनामृतूनां चिह्नानि नवकिसलयप्रसूनादीनि। पर्यये पर्याये पौनःपुन्येन परिवर्तने। ये चक्षुराद्यभिमानिनोऽतीता देवास्ते साम्प्रतैर्देवैरिह चक्षुराद्यभिमानिभिस्तुल्या इति योजना।।३०।।

देवानां विग्रहवत्त्वे सर्गप्रलयोपगमे च कर्मणि शब्दे च विरोधमाशङ्क्य समाधिरुक्तः। सम्प्रति 'तदुपर्यपि—' इत्यत्रोक्तमधिकारमाक्षिपति— **मध्वादिष्विति।** पूर्वपक्षसूत्रतात्पर्यमाह— **इहेति।** प्रतिज्ञाभागस्याक्षरार्थमाह— **देवादीनामिति।** तेषां समर्थिताधिकारस्याक्षेपो न युक्त इत्याह— **कस्मादिति।** तत्र हेतुमवतार्य व्याकरोति— **मध्वादिष्विति।** मधुविद्यायां

विद्यास्वप्यधिकारोऽभ्युपगम्येत। न चैवं संभवति। कथम्? 'असौ वा आदित्यो देवमधु' (छा. उ. ३।१।१) इत्यत्र मनुष्या आदित्यं मध्वध्यासेनोपासीरन्। देवादिषु ह्युपासकेष्वभ्युपगम्यमानेष्वादित्यः कमन्यमादित्यमुपासीत? पुनश्चादित्यव्यपाश्रयाणि पञ्च रोहितादीन्यमृतान्युपक्रम्य वसवो रुद्रा आदित्या मरुतः साध्याश्च पञ्च देवगणाः क्रमेण तत्तदमृतमुपजीवन्तीत्युपदिश्य 'स य एतदेवममृतं वेद वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति' (छा. उ. ३।६।३) इत्यादिना वस्वाद्युपजीव्यान्यमृतानि विजानतां वस्वादिमहिमप्राप्तिं दर्शयति। वस्वादयस्तु कानन्यान् वस्वादीनमृतोपजीविनो विजानीयुः, कं वाऽन्यं वस्वादिमहिमानं प्रेप्सेयुः। तथा– 'अग्निः पादो वायुः पाद आदित्यः पादो दिशः पादः' (छा. उ. ३।१८।२), 'वायुर्वाव संवर्गः' (छा. उ. ४।३।१) 'आदित्यो ब्रह्मेत्यादेशः' (छा. उ. ३।१९।१) इत्यादिषु देवतात्मोपासनेषु न तेषामेव देवतात्मनामधिकारः संभवति। तथा 'इमावेव गोतमभरद्वाजावयमेव गोतमोऽयं भरद्वाजः' (बृ. उ. २।२।४) इत्यादिष्वप्यृषिसंबन्धेषूपासनेषु न तेषामेवर्षीणामधिकारः संभवति।।३१।।

प्रकटार्थविवरणम्

पञ्च रूपाणि। सप्तसु शीर्षण्यप्राणेषु द्वयोर्द्वयोः गौतमादिदृष्ट्योपासनम्। दक्षिणः कर्णः गौतमः, वामो भारद्वाजः, चक्षुर्दक्षिणं विश्वामित्रः, वामं जमदग्निः इत्यादि।

भाष्यभावप्रकाशिका

निर्धार्यत[1] इति, अत आह—**ब्रह्मविद्याधिकारेति। कमन्यमिति।** उपास्योपासकभावस्य भेदाधिष्ठानत्वात् प्राचां चादित्यानामस्मिन् कल्पे क्षीणाधिकारतयाऽऽदित्यत्वाभावादुपासनाया असंभव इति भावः। तर्ह्यादित्यव्यतिरिक्तानां देवतानामुपासकत्वं किं न स्यादिति? तत्राह—**पुनश्चेति।** लोहितं शुक्लं कृष्णं परं कृष्णं मध्ये क्षोभत इवेति निर्दिष्टानि पञ्च रोहितादीन्यमृतानि प्रागाद्यूर्ध्वान्तप्रदेशेषु स्थितरश्मिनाधी [नाडीभिः] ऋग्वेदाद्युदितकर्मकुसुमेभ्यः ऋग्वेदादिमन्त्रमधुपैरानीतानि सोमाज्यपयः-प्रभृतिद्रव्याहुतिनिष्पन्नानि यशस्तेज इन्द्रियं वीर्यमित्येवमात्मकान्यादित्यमधुसम्बन्धानि वस्वाद्युपजीव्यानि चिन्तयतां वस्वादिप्राप्तेः फलत्वनिर्देशात् तेषामुपासकत्वे कर्मकर्तृभावविरोधः स्यादित्यर्थः।।३१।।

न्यायनिर्णयः

देवानामधिकारायोगं वक्तुं पृच्छति— **कथमिति।** तेषामनुपासकत्वार्थमुपासकान्तरसत्त्वमाह— **असाविति।** किमर्थं मनुष्यग्रहणं, तत्राह— **देवादिष्विति।** उपास्योपासकभावस्य भेदापेक्षत्वात् प्राचामादित्यानामस्मिन् कल्पे क्षीणाधिकारत्वेनादित्यत्वाभावाददित्य एव मधुदृष्टिरादित्यस्यायुक्तेत्यर्थः। तर्हि देवतान्तराणामुक्तोपास्त्यधिकारित्वं, नेत्याह— **पुनश्चेति।** लोहितं, शुक्लं, कृष्णं, परं कृष्णं, मध्ये क्षोभत इव इत्युक्तानि पञ्च रोहितादीन्यमृतानि प्रागाद्यूर्ध्व[र्ध्वान्त]देशस्थितरश्मिनाडीभिस्तत्तद्वेदोक्तकर्मकुसुमेभ्यस्तत्तद्वैदिक-मन्त्रमधुकरैरादित्यमण्डलमानीतानि सोमाज्यपयःप्रभृतिद्रव्याहुतिनिष्पन्नानि यशस्तेजो वीर्यमिन्द्रियमित्येवमात्मकान्यादित्यमधुसंबन्धीनि वस्वाद्युपजीव्यानि चिन्तयतां फलं वस्वाद्याप्तिरुच्यते। तेषामुपासकत्वे कर्मकर्तृविरोधः स्यादित्यर्थः। आदिशब्दार्थं व्याचष्टे— **तथेति।** कर्मकर्तृविरोधसाम्यादित्यर्थः। तथापि कथमृषीणामनधिकारः, तत्राह— **तथेति।** सप्तसु शीर्षण्यप्राणेषु द्वयोर्द्वयोर्गोतमादि-दृष्ट्योपास्तिः। दक्षिणः कर्णो गोतमः, वामो भरद्वाजः, चक्षुर्दक्षिणं विश्वामित्रः, वामं जमदग्निरित्यादि। न च तत्र तेषामेवाधिकारः, विरोधादित्यर्थः।।३१।।

---

१. 'किमिति निवार्यत' इति पाठः स्यात्।

कुतश्च देवादीनामनधिकारः?

ज्योतिषि भावाच्च।।३२।।

यदिदं ज्योतिर्मण्डलं द्युस्थानमहोरात्राभ्यां बम्भ्रमज्जगदवभासयति तस्मिन्नादित्यादयो देवतावचनाः शब्दाः प्रयुज्यन्ते। लोकप्रसिद्धेर्वाक्यशेषप्रसिद्धेश्च। न च ज्योतिर्मण्डलस्य हृदयादिना विग्रहेण चेतनतयाऽर्थित्वादिना वा योगोऽवगन्तुं शक्यते, मृदादिवदचेतनत्वावगमात्। एतेनाग्न्यादयो व्याख्याताः।

स्यादेतत्– मन्त्रार्थवादेतिहासपुराणलोकेभ्यो देवादीनां विग्रहवत्त्वाद्यवगमादयमदोष इति। नेत्युच्यते।

प्रकटार्थविवरणम्

ज्योतिषि भावाच्च। "यावदादित्यः पुरस्तादुदेता" इत्यादिवाक्यशेषात्। अस्त्वचेतनमादित्यादिशब्दवाच्यम्, ततः किमित्याशङ्क्याह —**न च ज्योतिर्मण्डलस्येति**।

विग्रहवत्त्वे प्रमाणं शङ्कते—**स्यदेतदिति**। सिद्धान्तवाद्युक्तं प्रमाणं दूषयति—**नेत्युच्यत इत्यादिना**। "ऐन्द्र्या गार्हपत्यमुपतिष्ठते"

भाष्यभावप्रकाशिका

ज्योतिषि भावाच्च।।३२।। ननु क्वचिदधिकाराभावेन कथं सर्वत्राधिकाराभावः? ब्राह्मणस्य राजसूयाधिकाराभावेऽपि बृहस्पतिसवेऽधिकारभाववदुपपत्तेरित्याशङ्क्य, देवादीनां विग्रहाद्यभावादनधिकारं साधयति—**कुतश्च देवादीनामिति**। अन्यपरवाक्यस्य प्रमाणान्तरविरोधाभावे स्वार्थे प्रामाण्यमस्तीत्यङ्गीकृत्य विरोधाभावो दर्शितः पूर्वसूत्रे, इदानीमन्यपरत्वादेवाप्रामाण्यमाशङ्कते—**ज्योतिषि भावाच्चेत्यादिना**। तस्यैवाधिकारः किं न स्यादिति, तत्राह—**न च ज्योतिरिति**।

स्यादेतन्मन्त्रार्थवादेति। अयमर्थः—तत्र च "गृह्णामि ते [जगृभ्मा ते] दक्षिणमिन्द्रहस्तम्" "वज्रहस्तः पुरन्दरः" "तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे" इत्यादिना विग्रहवत्त्वम्, "अद्धीन्द्र पिब च प्रस्थितस्ये"त्यादिना हविर्भोजनम्, "इन्द्रो दिवः इन्द्र ईशे" "ईशानमस्य जगतस्स्वर्दृश" मित्यादिनेशानत्वम्, "तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयती" त्यादिना देवतायाः प्रसादः, प्रसन्नायाश्च फलदानमवगतम्। "इष्टान्भोगान् हि वो दास्यन्ते यज्ञभाविताः।" "ते तृप्तास्तर्पयन्त्येनमि"त्यादीनि च पुराणादिवचनानि देवतादीनां विग्रहवत्त्वादिपञ्चकं दर्शयन्ति। लोकतोऽपि देवतादीनां विग्रहादिपञ्चकमवगम्यते—यमं दण्डहस्तमालिखन्ति, वरुणं पाशहस्तम्, वदन्ति च देवता भुङ्क्त इति। तथैशानीमिमामाहुः—'देवग्रामः' 'देवक्षेत्र'मिति। अथास्याः प्रसादं च प्रसन्नायाश्च फलदानमाहुः—प्रसन्नोऽस्य पशुपतिः, पुत्रोऽस्य जातः, प्रसन्नोऽस्य धनदः, धनमनेन लब्धमिति। तदेतत् पूर्वपक्षी दूषयति—

न्यायनिर्णयः

क्वचिदनधिकारान्न सर्वत्रानधिकारः, ब्राह्मणस्य राजसूयानधिकारेऽपि बृहस्पतिसवेऽधिकारादिति शङ्कते— **कुतश्चेति**। देवादीनां विग्रहाद्यभावादनधिकारं सार्वत्रिकं साधयति— **ज्योतिषीति**। सूत्रं विभजते— **यदिति**। आदित्यः सविता पूषा चन्द्रमा नक्षत्रमित्यादिशब्दानां ज्योतिर्मण्डलविषयत्वे प्रसिद्धिद्वयं प्रमाणयति— **लोकेति**। 'यावदादित्यः पुरस्तादुदेता' इत्यादिः 'असौ वा आदित्यो देवमधु' इत्यादिवाक्यशेषः[१]। उदयास्तमयौ च ज्योतिर्मण्डलस्योपलभ्येते, तेन तदेवादित्यपदोक्तम्। अस्तु तर्हि तस्यैवाधिकारः, तत्राह— **न चेति**। आदित्यादीनामचैतन्यादनधिकारेऽपि चैतन्यादग्न्यादीनामधिकारः स्यादित्याशङ्क्याह— **एतेनेति**। न खल्वादित्यादिभ्योऽग्न्यादयो विशिष्यन्ते, येन तेषां चेतनत्वादधिकारितेत्यर्थः। देवादीनां विग्रहाद्यपरिग्रहादनधिकारितेत्युक्तममृष्यमाणः सिद्धान्ती शङ्कते— **स्यादिति**। 'वज्रहस्तः पुरंदरः' इत्यादयो मन्त्राः। 'प्रजापतिरात्मनो वपामुदक्खिदत्' इत्यादयोऽर्थवादाः। 'इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।' 'ते तृप्तास्तर्पयन्त्येनं सर्वकामफलैः शुभैः।' इत्यादीनीतिहासपुराणानि। लोकेऽपि यमं दण्डहस्तमालिखन्ति। वरुणं पाशहस्तम्। अतो मन्त्रादिप्रामाण्याद् देवादीनां विग्रहादियोगाद् विद्याधिकारितेत्यर्थः। **विग्रहवत्त्वादीति**। आदिशब्देन हविर्भोजनं तृप्तिरैश्वर्यं फलदानं च गृहीतम्। देवादीनां

१. इत्यादेर्वाक्यस्य शेष इत्यर्थः।

न तावल्लोको नाम किंचित् स्वतन्त्रं प्रमाणमस्ति। प्रत्यक्षादिभ्य एव ह्यविचारितविशेषेभ्यः प्रमाणेभ्यः प्रसिध्यन्नर्थो लोकात् प्रसिध्यतीत्युच्यते। न चात्र प्रत्यक्षादीनामन्यतमं प्रमाणमस्ति। इतिहासपुराणमपि पौरुषेयत्वात् प्रमाणान्तरमूलमाकाङ्क्षति। अर्थवादा अपि विधिनैकवाक्यत्वात् स्तुत्यर्थाः सन्तो न पार्थगर्थ्येन देवादीनां विग्रहादिसद्भावे कारणभावं प्रतिपद्यन्ते। मन्त्रा अपि श्रुत्यादिविनियुक्ताः प्रयोगसमवायिनोऽभिधानार्था न कस्यचिदर्थस्य प्रमाणमित्याचक्षते। तस्मादभावो देवादीनामधिकारस्य।।३२।।

भावं तु बादरायणोऽस्ति हि।।३३।।

तुशब्दः पूर्वपक्षं व्यावर्तयति। बादरायणस्त्वाचार्यो भावमधिकारस्य देवादीनामपि मन्यते। यद्यपि

प्रकटार्थविवरणम्

इत्यादिभिः विनियुक्ता मन्त्राः साङ्गकर्मानुष्ठापकप्रयोगविधिग्राहिताः कर्मतत्साधनाभिधानार्थाः, नाज्ञातज्ञापका इत्याचक्षते **मीमांसका इत्यर्थः**।

भावं तु बादरायणोऽस्ति हि। ब्रह्मविद्या देवादीन् नाधिकरोति, विद्यात्वात्, मध्वादिविद्यावत् इत्यत्राप्रयोजकता-

भाष्यभावप्रकाशिका

नेत्युच्यत इति। ननु लोकप्रसिद्धेः प्रत्यक्षादिप्रसिद्धिभ्यः को भेद इति? तत्राह—**प्रत्यक्षादिभ्य इति**। तर्हि लोकप्रसिद्धेरितिहासमूलताऽस्त्वित्याशङ्क्याह—**इतिहासपुराणमिति**। यन्मूलतया लोकप्रसिद्धिमूलतेतिहासादेः, तदेव लोकप्रसिद्धेर्मूलं किं न स्यादिति भावः। अर्थवादादीनां तर्ह्यपौरुषेयतया लोकप्रसिद्धिमूलत्वं स्यादिति, अत आह—**अर्थवादा अपीति**। तर्हि मन्त्राणां स्तुत्यर्थताऽभावात् तत्र प्रामाण्यमिति, अत आह—**मन्त्रा अपीति। (अयमपीति।)** अयमर्थः—व्रीह्यादिवत् कर्मणि विनियुक्तानां मन्त्राणां दृष्टद्वारेणोपकारकत्वे संभवति सत्यदृष्टकल्पनाऽयोगादौत्सर्गिकं चार्थपरत्वं पदानाम् इति प्रयोगसमवेतार्थस्मरण एव तात्पर्यम्; [न] अनधिगतविग्रहादावपि, तात्पर्यभेदे वाक्यभेदप्रसङ्गादिति भावः।।३२।।

भावं तु बादरायणोऽस्ति हि।।३३।। किं मध्वादिविद्यास्वेवाधिकाराभावः, उत ब्रह्मविद्यायामपि? यद्याद्यः, तदाऽङ्गीक्रियते। उत्तरपक्षस्त्वनुपपन्न इत्याह—**यद्यपीत्यादिना**। ननु मध्वादिष्वधिकाराभावाद् विद्यात्वाद् ब्रह्मविद्यायामप्य[न]धिकार इहानुमीयत

न्यायनिर्णयः

विग्रहादिपञ्चकं प्रामाणिकमित्युक्तं दूषयति— **नेतीति**। यदुक्तं लोकतो विग्रहादिधीरिति, तत्राह— **न तावदिति**। तर्हि प्रत्यक्षादिप्रसिद्धितो लोकप्रसिद्धेर्न भेदः, तत्राह— **प्रत्यक्षादिभ्य इति**। अस्तु तर्हि तन्मूला लोकप्रसिद्धिः, नेत्याह— **न चेति**। देवताविग्रहादिपञ्चकं सप्तम्यर्थः। तर्हि लोकप्रसिद्धेरितिहासपुराणं मूलं, तत्राह— **इतिहासेति**। तस्य यन्मूलं तदेव लोकप्रसिद्धेर्मूलमिति चेत्, अस्तु तर्हि निर्मूलं तल्लोकप्रसिद्धेर्मूलं, पौरुषेयगिरां मूलाभावे प्रामाण्यासिद्धेः। न च तस्य यन्मूलं तदेव लोकप्रसिद्धेर्मूलं, तन्मूलतया संभावितार्थवादमन्त्राणां निरसिष्यमाणत्वादिति भावः। अपौरुषेयाणामर्थवादानां तर्हि लोकप्रसिद्धिमूलत्वं, न, अर्थवादाधिकरणविरोधादित्याह— **अर्थवादा इति**। मन्त्राणां तर्हि स्तुत्यर्थत्वाभावात् तन्मूलतेत्याशङ्क्याह— **मन्त्रा इति**। व्रीह्यादिवत् कर्मणि श्रुतिलिङ्गादिविनियुक्तानां तेषां दृष्टद्वारोपकारे सत्यदृष्टकल्पनायोगात्, अर्थपरत्वस्य शब्दानामौत्सर्गिकत्वात्, प्रयोगसमवेतार्थस्मृतावेव तात्पर्यम्, नाज्ञातदेवताविग्रहादावपि, तात्पर्यभेदे वाक्यभेदादिति मत्वा मन्त्राधिकरणमुक्तेऽर्थे प्रमाणयति— **इत्याचक्षत इति**। विग्रहादिपञ्चके मानाभावे फलितमाह— **तस्मादिति**।।३२।।

सूत्राभ्यां पूर्वपक्षे सिद्धान्तयति— **भावं त्विति**। तत्र परपक्षनिषेधं स्वपक्षप्रतिज्ञां च विभजते— **तुशब्द इति**। यदुक्तं ब्रह्मविद्या देवादीन् नाधिकरोति, विद्यात्वात्, मध्वादिविद्यावदिति, तत्र मध्वादिविद्यानां देवादिव्यामिश्रत्वान्न तास्तानधिकुर्वन्ति, न विद्यात्वात्; ब्रह्मविद्या तु न व्यामिश्रेत्यतस्तानप्यधिकरोतीत्यप्रयोजकत्वमाह— **यद्यपीति**। तत्र देवादीनामधिकारस्य संभवे

मध्वादिविद्यासु देवतादिव्यामिश्रास्वसंभवोऽधिकारस्य, तथाप्यस्ति हि शुद्धायां ब्रह्मविद्यायां संभवः। अर्थित्वसामर्थ्याप्रतिषेधाद्यपेक्षत्वादधिकारस्य। न च क्वचिदसंभव इत्येतावता यत्र संभवस्तत्राप्यधिकारोऽपोद्येत। मनुष्याणामपि न सर्वेषां ब्राह्मणादीनां सर्वेषु राजसूयादिष्वधिकारः संभवति। तत्र यो न्यायः सोऽत्रापि भविष्यति। ब्रह्मविद्यां च प्रकृत्य भवति दर्शनं श्रौतं देवाद्यधिकारस्य सूचकम्– 'तद् यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्' (बृ. उ. १।४।१०) इति। 'ते होचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिति। इन्द्रो ह वै देवानामभिप्रवव्राज विरोचनोऽसुराणाम्' (छा. उ. ८।७।२) इत्यादि च। स्मार्तमपि गन्धर्वयाज्ञवल्क्यसंवादादि। यदप्युक्तं ज्योतिषि भावाच्चेति। अत्र ब्रूमः– ज्योतिरादिविषया अपि आदित्यादयो देवतावचनाः शब्दाश्चेतनावन्तमैश्वर्याद्युपेतं तं तं देवतात्मानं समर्पयन्ति, मन्त्रार्थवादादिषु तथा व्यवहारात्। अस्ति ह्यैश्वर्ययोगाद् देवतानां

प्रकटार्थविवरणम्

मुक्त्वाऽतिप्रसङ्गसहकृतलिङ्गबाधं दर्शयति—न च क्वचिदसंभव इति। यथा चक्षुरादिशब्दा लौकिकानां गोलकादिविषया अपि शास्त्रकाराणामतिरिक्तेन्द्रियविषयाः, तथाऽऽदित्यादिशब्दा अपीत्याह—ज्योतिरादिविषया अपीति। 'मेधातिथेर्मेष'

भाष्यभावप्रकाशिका

इति, तत्राह—न क्वचिदिति। उक्तमर्थं संप्रतिपन्नोदाहरणेनोपपादयति—मनुष्याणामिति। ननु तत्र प्रमाणमस्ति, इह तु नास्तीत्याशङ्क्याह—ब्रह्मविद्यामिति। स्मार्तमपीति। "मित्र ब्रह्मामृतं किस्विद् किंस्विद्वेद्यमनुत्तमम्। चिन्तयेत् तत्र वै गत्वा गन्धर्वो मामपृच्छत। विश्वावसुस्ततो राजन् वेदान्तज्ञानकोविदः।" इति मोक्षधर्मेषु जनकं प्रति याज्ञवल्क्यवचनदर्शनात्, प्रह्लादाजगरसंवाददर्शनाच्चेत्यर्थः। यथा गोलकादिषु प्रयुज्यमानश्चक्षुरादिशब्दस्तद्व्यतिरिक्तेष्विन्द्रियेष्वर्थतोऽमुख्येषु वर्तते, तद्वज्ज्योतिरादिशब्दा अपीत्याह—ज्योतिरादीति। ननु तत्रोपपन्नम्; व्यतिरिक्तेन्द्रियसद्भावे प्रमाण[ण]भावात्, इह तु प्रमाणं न दृश्यत इति, अत आह—मन्त्रार्थवादादिष्विति। व्यवहारात् प्रवृत्तेरित्यर्थः।

न्यायनिर्णयः

हेतुमाह— अर्थित्वेति। वैराग्यादिब्रह्मचर्यादिसंग्रहार्थमादिपदम्। द्विविधसामर्थ्यस्यैव योग्यताख्यस्याधिकारकारणत्वेऽपि तत्प्रयोजकत्वेनार्थित्वाद्यास्थेयम्। अतिप्रसङ्गपक्षबाधकोपहतं चेदमनुमानमित्याह— नेति। राजसूयाद्यनधिकृतस्यापि ब्राह्मणस्य बृहस्पतिसवे [श्रुति] प्रामाण्यादधिकारः। प्रकृते तु कथमित्याशङ्क्याह— ब्रह्मेति। तत्र ब्रह्मवेदनात् सर्वभावे स्थिते देवानां मध्ये यो यो देवः प्रतिबुद्धवानात्मानमहं ब्रह्मास्मीति स स प्रतिबोद्धैव तद् ब्रह्माभवत्। तथापि जातित्रयस्यैव विद्याधिकारमाशङ्क्याह— ते हेति। ते देवाश्चासुराश्चान्योन्यमुक्तवन्तः किल, हन्त यद्यनुमतिर्भवतां तर्हि तमात्मानं विचारयामः। यं विचारतो ज्ञात्वा सर्वाणि फलान्याप्नोतीत्युक्त्वा विद्याग्रहणायेन्द्रविरोचनौ प्रजापतिमाजग्मतुरित्यर्थः। चकारो बृहदारण्यकश्रुत्या छान्दोग्यश्रुतेः समुच्चयार्थः। श्रौतलिङ्गेनानुमानबाधं दर्शयित्वा स्मार्तेनापि तद्बाधं दर्शयति— स्मार्तमिति। 'किमत्र ब्रह्म अमृतं किंस्विद्वेद्यमनुत्तमम्। चिन्तयेत् तत्र वै गत्वा गन्धर्वो मामपृच्छत।। विश्वावसुस्ततो राजा वेदान्तज्ञानकोविदः।' इति मोक्षधर्मे जनकयाज्ञवल्क्यसंवादात् प्रह्लादाजगरसंवादाच्चोक्तानुमानासिद्धिरित्यर्थः। आदित्यादिशब्दानां ज्योतिर्मण्डलविषयत्वात् तस्याचेतनस्य विग्रहादिरहितस्य नाधिकारोऽस्तीत्युक्तं, तत्राह— यदपीति। गोलकादिषु प्रयुक्तचक्षुरादिशब्दानामतिरिक्तेन्द्रियार्थत्ववदादित्यादिशब्दानां ज्योतिरादिषु प्रयोगेऽपि तदतिरिक्ते चेतने प्रवृत्तिरित्याह— ज्योतिरिति। दृष्टान्तेऽतिरिक्तेन्द्रियसत्त्वे मानवत् प्रकृते तन्नास्तीत्याशङ्क्याह— मन्त्रेति। यथा चेतने देवतात्मन्यादित्यादिशब्दस्तथा मन्त्रादिषु शाब्दव्यवहारादिति हेत्वर्थः। कथं तर्हि ज्योतिरादिष्वादित्यादिशब्दः,

ज्योतिराद्यात्मभिश्चावस्थातुं यथेष्टं च तं तं विग्रहं ग्रहीतुं सामर्थ्यम्। तथा हि श्रूयते सुब्रह्मण्यार्थवादे- 'मेधातिथेर्मेषेति मेधातिथिं ह काण्वायनमिन्द्रो मेषो भूत्वा जहार' (षड्विंशब्रा. १।१) इति। स्मर्यते च- 'आदित्यः पुरुषो भूत्वा कुन्तीमुपजगाम ह' इति। मृदादिष्वपि चेतना अधिष्ठातारोऽभ्युपगम्यन्ते, 'मृदब्रवीत्' 'आपोऽब्रुवन्' (शत. ६।१।३।२,४) इत्यादिदर्शनात्। ज्योतिरादेस्तु भूतधातोरादित्यादिष्वचेतनत्वमभ्युपगम्यते। चेतनास्त्वधिष्ठातारो देवतात्मानो मन्त्रार्थवादादिषु व्यवहारादित्युक्तम्।

यदप्युक्तं मन्त्रार्थवादयोरन्यार्थत्वान्न देवताविग्रहादिप्रकाशनसामर्थ्यमिति। अत्र ब्रूमः– प्रत्ययाप्रत्ययौ हि सद्भावासद्भावयोः कारणम्, नान्यार्थत्वमनन्यार्थत्वं वा। तथा ह्यन्यार्थमपि प्रस्थितः पथि पतितं

प्रकटार्थविवरणम्

इतीन्द्रसंबोधनम्। मन्त्रपदमेतद् व्याचष्टे ब्राह्मणवाक्यम्—**मेधातिथिं ह काण्वायनमिति**। यच्चोक्तं मृदादिवदचेतनत्वादिति, तत्राह—**मृदादिष्वपीति**। ननु ज्योतिरादेरचेतनत्वं प्रत्यक्षसिद्धम्; कथं चेतनत्वमुच्यते इत्याशङ्क्याह—**ज्योतिरादेस्त्विति**।

मन्त्रार्थवादा न स्वार्थे प्रमाणम्, अन्यपरवाक्यत्वात्, विषभक्षणादिवाक्यवदित्युक्तं स्मारयति—**यदप्युक्तमिति**। यस्मात् प्रामाण्याद् [प्रमाणाद्] यस्मिन्नर्थेऽबाधितः प्रत्ययः तस्मात् तत्सद्भावः सिध्यति, नान्यस्या। अन्यपरत्वं च प्रयोजकम्,

भाष्यभावप्रकाशिका

तर्हि मण्डलादिषु ज्योतिरादिशब्दानां कथं प्रयोग इत्याशङ्क्याह—**अस्ति हीति**। देवानामनेकरूपप्रतिपत्तिसंभवात्, उभयत्रापि मुख्यवृत्तिर्न विरुध्यत इत्यर्थः। विविधविग्रहग्रहणसामर्थ्ये प्रमाणमाह—**तथा हीति**। तस्यार्थमाह—**मेधातिथिमिति**। **मृदादिवदिति**। अत्रापि किमधिष्ठातृविवक्षयोच्यते, किं वाऽधिष्ठेयविवक्षया। तत्राद्येऽचेतनत्वमसंप्रतिपन्नमित्याह—**मृदादिष्वपीति**। ननु किं तत्र प्रमाणमिति? अत आह—**मृदब्रवीदिति**। अधिष्ठेयविवक्षया, चेत्, अचेतनत्वमभ्युपगम्यत एवेत्याह—**ज्योतिरादेरिति**। कथं तर्ह्यधिष्ठातृचेतनसिद्धिरिति? अत आह—**चेतना इति**।

न्यायनिर्णयः

तत्राह— **अस्तीति**। देवादीनामनेकरूपप्रतिपत्तियोगाच्चेतनाचेतनयोरादित्यादिशब्दानां मुख्यत्वसिद्धिरित्यर्थः। देवादीनां विविधविग्रहग्रहसामर्थ्ये मानमाह— **तथाहीति**। सुब्रह्मण्यो नामोद्गातृगणप्रविष्टः कश्चिदृत्विग्विशेषः, तत्संबद्धार्थवादः 'इन्द्राऽऽगच्छ' इत्यादिः। तत्र मेधातिथेः मेष, इतीन्द्रसंबोधनं मन्त्रपदं श्रुतं, तद् व्याचष्टे— **मेधेति**। इन्द्रस्य नानाविग्रहयोगेऽपि देवतान्तरस्य किमित्याशङ्क्याह— **स्मर्यते चेति**। धर्मो वायुरिन्द्रश्च पुरुषो भूत्वा तामेवोपजग्मुः। अश्विनौ च पुरुषौ भूत्वा माद्रीमुपजग्मतुरिति महाभारते प्रसिद्धमित्यर्थः। यत्तु मृदादिवदचेतनत्वं, तत्राधिष्ठातृविवक्षया, अधिष्ठेयविवक्षया वाऽचेतनत्वम्। प्रथमं प्रत्याह— **मृदादिष्विति**। तेष्वधिष्ठातृचेतनोपगमे मानमाह— **मृदिति**। आदिशब्देन वागादिसंवादो गृहीतः। द्वितीये दार्ष्टान्तिकेऽपि तदिष्टमेवेत्याह— **ज्योतिरादेरिति**। मृदादिष्वधिष्ठातृचैतन्ये मानवदत्र तदभावादधिष्ठेयवदधिष्ठातुरपि न चैतन्यमित्याशङ्क्याह— **चेतनास्त्विति**। मन्त्रादयो न स्वार्थे मानम्, अन्यपरवाक्यत्वात्, विषभक्षणवाक्यवदित्युक्तमनुवदति— **यदपीति**। यस्मान्मानाद् यस्मिन्नबाधिता धीस्तस्मात् तद्भावः सिध्यति। यत्र तु यतो मानान्न तथा धीर्न ततस्तत्सिद्धिरित्युत्सर्गः। तथा च मन्त्रादिभ्योऽपि स्वार्थे चेदबाधिता धीस्ततस्तेषां तत्र प्रामाण्यमित्याह— **अत्रेति**। अनन्यार्थत्वे स्वार्थे प्रामाण्यमन्यथा नेत्युक्तमाशङ्क्याह— **नेति**। न हि विषभक्षणवाक्यमन्यार्थत्वान्न स्वार्थे मानं, किंतु मानान्तरविरोधात्। अवेक्षणस्य च संस्कारार्थस्य स्वार्थपरिच्छेदकत्वात्। न च तथाविधं वाक्यं न परिच्छेदकं, संवादविसंवादयोरसतोरवान्तरतात्पर्यात् तत्परिच्छेदध्रौव्यात्। न चानन्यार्थत्वं प्रामाण्ये प्रयोजकम्, अबाधितस्वार्थज्ञाने तदभावेन प्रामाण्याभावादृष्टेरित्यर्थः। अन्यार्थत्वमप्रयोजकमित्यत्र दृष्टान्तमाह— **तथा हीति**। प्रतिसंयोगिवस्तु तात्पर्यानपेक्षमेव मानं चक्षुः। वाक्यं तु यत्र तात्पर्यं तत्र मानं, न प्रत्यर्थमिति

तृणपर्णाद्यस्तीत्येव प्रतिपद्यते। अत्राह—विषम उपन्यासः। तत्र हि तृणपर्णादिविषयं प्रत्यक्षं प्रवृत्तमस्ति येन तदस्तित्वं प्रतिपद्यते। अत्र पुनर्विध्युद्देशैकवाक्यभावेन स्तुत्यर्थेऽर्थवादे न पार्थगर्थ्येन वृत्तान्तविषया प्रवृत्तिः शक्याऽध्यवसातुम्। न हि महावाक्येऽर्थप्रत्यायकेऽवान्तरवाक्यस्य पृथक्प्रत्यायकत्वमस्ति। यथा 'न सुरां पिबेत्' इति नञ्वति वाक्ये पदत्रयसंबन्धात् सुरापानप्रतिषेध एवैकोऽर्थोऽवगम्यते; न पुनः 'सुरां पिबेदि'ति पदद्वयसंबन्धात् सुरापानविधिरपीति। अत्रोच्यते—विषम उपन्यासः। युक्तं यत् सुरापानप्रतिषेधे पदान्वयस्यैकत्वादवान्तरवाक्यार्थस्याग्रहणम्। विध्युद्देशार्थवादयोस्त्वर्थवादस्थानि पदानि पृथगन्वयं वृत्तान्तविषयं प्रतिपद्यानन्तरं कैमर्थ्यवशेन कामं विधेः स्तावकत्वं प्रतिपद्यन्ते। यथा हि 'वायव्यं श्वेतमालभेत

प्रकटार्थविवरणम्

संस्कारार्थस्याप्याज्यावेक्षणस्य स्वार्थपरिच्छेदकत्वदर्शनात्। विषभक्षणवाक्यस्य तु मानान्तरविरोधादेवाप्रामाण्यमित्यभिप्रेत्याह—**प्रत्ययाप्रत्ययाविति**। यत्परः शब्दः स शब्दार्थः। [1]ननु शक्तिगोचरतोऽन्यपरत्वादप्रामाण्यमित्यस्य न्यायस्य शब्दविषयत्वाद् विलक्षणो दृष्टान्त इत्याह—**विषम उपन्यास इति**। ननु विधिवाक्यैकवाक्यभावेन विध्यपेक्षितस्तुतिलक्षणार्थवादे[2] सति यद्यपि न स्वातन्त्र्येण कथायां तात्पर्यं निश्चेतुं शक्यम्, तथाप्यवान्तरतात्पर्यं सिद्धसंसर्गेऽप्यस्त्वित्याशङ्क्याह—**न हि महावाक्य इति**। तात्पर्यभेदे वाक्यभेदप्रसङ्गात्। "संभवत्येकवाक्यत्वे वाक्यभेदस्तु नेष्यते" इति भावः। यत्र पदैकवाक्यता तत्रावान्तरतात्पर्ये भवेद् वाक्यभेदः, यत्र तु वाक्यस्य स्वतो वाक्यान्तरेण प्रयोजनवशेनान्वयः तत्रावान्तरतात्पर्ये प्रधानाविरोधिनि कल्प्यमानेऽपि प्रयाजादिवाक्येष्विव न वाक्यभेदो दोष इत्याह—**अत्रोच्यत इत्यादिना**। अत एव "अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" इति **जैमिनिनाऽपि** यत्र पदसमूहे विभज्यमाने नैराकाङ्क्ष्येणान्वयाप्रतिपत्तिः तदेकं वाक्यमिति सूत्रितम्।

भाष्यभावप्रकाशिका

अनूदितं पूर्वपक्षमेकदेशिमतेन दूषयति—**प्रत्ययाप्रत्ययाविति**। प्रकाशनसामर्थ्यस्य प्रामाण्यस्य सद्भावासद्भावयोः, कारणम् गमकमिति यावत्। अत्र दृष्टान्तमाह—**तथा हीति**। एकदेशिमतं पूर्वपक्षं दूषयति—**अत्राहेति**। प्रतिसंयोगिवस्तु तात्पर्यनिरपेक्षमेव चक्षुः प्रमाणं भवति, वाक्यं तु यत्र तात्पर्यम्, तत्र प्रमाणम्, न प्रतिपदार्थमिति दृष्टान्तो विषम इत्यर्थः। विध्युद्देशः विधिवाक्यम्, विधिरुद्दिश्यतेऽनेनेति। स्तुत्यर्थे विधेयप्राशस्त्यलक्षणापरे। वृत्तान्तः भूतार्थः। ननु महावाक्यावान्तरवाक्यभेदेन प्रत्यायकत्वमस्त्विति, तत्राह—**न हीति**। ननु नञ्व्यतिरिक्तपदार्थाभ्यां विधिरवगम्यते, अप्राप्तनिषेधायोगादिति, अत आह—**न पुनरिति**। न प्रत्ययमात्रादसावप्यस्यार्थः, तत्रत्ययस्य रागप्राप्तविषयतया भ्रान्तत्वादित्यर्थः। साक्षात्सिद्धान्ती परिहरति—**अत्रोच्यत इति**। यद्यपि पदैकवाक्यतायां नार्थान्तराधिगतिः, विशिष्टार्थप्रत्यायनाय प्रयुक्तपदानामन्यत्र पर्यवसानायोगात्। यथाहुः—"साक्षाद् यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्। वर्णास्तथापि नैकस्मिन् पर्यवस्यन्ति निष्फले"। "वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्। पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्।" इति। तथापि वाक्यैकवाक्यतायां (न) द्वारभूतार्थान्तराधिगतिः संभवति, यथा—देवदत्तस्य

न्यायनिर्णयः

वैशेष्यमाह— **अत्रेति**। विध्युद्देशो विधिवाक्यं, विधिरुद्दिश्यतेऽनेनेति व्युत्पत्तेः। स्तुत्यर्थत्वं विधेः प्राशस्त्यलक्षणापरत्वम्। वृत्तान्तो भूतार्थः। महावाक्यावान्तरवाक्यभेदेन पृथक्प्रत्यायकत्वं मन्त्रादेर्विधेश्चेत्याशङ्क्याह— **नेति**। न प्रत्ययमात्रादर्थसिद्धिः, तत्रत्ययस्य पदद्वयसंबन्धाद् विधिरपि तत्र भाति, अप्राप्तनिषेधायोगादित्याशङ्क्याह— **नेति**। न प्रत्ययमात्रादर्थसिद्धिः, तत्रत्ययस्य रागप्राप्ततया भ्रमत्वात्, तत्राप्तस्य च रजतादिवन्निषेधादित्यर्थः। यद्यपि पदैकवाक्यतायां नार्थान्तरधीर्विशिष्टबोधनप्रयुक्तपदानामन्यत्रापर्यवसानात्, तथापि वाक्यैकवाक्यतायां द्वारार्थे वाक्यार्थधीः। यथा देवदत्तस्य गौः क्रेतव्या बहुक्षीरेत्युक्ते बहुक्षीरत्वद्वारा क्रयणे तात्पर्यमित्युभयं तात्पर्यभेदाद् भाति, तथेहापीत्याह— **अत्रेति**। आर्थवादिकानां पदानां साक्षादेव विध्यन्वये किमिति पृथगन्वयप्रतिपत्तिः, तत्राह— **यथा हीति**। अर्थवादस्थपदानां विधिना साक्षादसंबन्धे योग्यत्वाभावं हेतुमाह— **न हीति**।

---

१. 'न तु शक्तिगोचरः, अतोऽन्यपरत्वात्' इत्यादिः पाठः स्यात्। २. 'लक्षणापरेऽर्थवादे' इति पाठः स्यात्।

भूतिकामः' (तै. सं. २।१।१) इत्यत्र विध्युद्देशवर्तिनां वायव्यादिपदानां विधिना संबन्धः, नैवं 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' इत्येषामर्थवादगतानां पदानाम्। न हि भवति वायुर्वा आलभेतेति क्षेपिष्ठा देवता वा आलभेतेत्यादि। वायुस्वभावसंकीर्तनेन त्ववान्तरमन्वयं प्रतिपद्यैवं विशिष्टदेवत्यमिदं कर्मेति विधिं स्तुवन्ति। तद् यत्र सोऽवान्तरवाक्यार्थः प्रमाणान्तरगोचरो भवति, तत्र तदनुवादेनार्थवादः प्रवर्तते; यत्र प्रमाणान्तरविरुद्धस्तत्र गुणवादेन। यत्र तु तदुभयं नास्ति तत्र

प्रकटार्थविवरणम्

तर्हि किं सर्वत्रैवार्थवादानां स्वार्थे प्रामाण्यमिति; नेत्याह—**तद्यत्र स इति**। विमतो वेदः स्वार्थेऽपि प्रमाणम्, प्रधानविधिप्रकरणपठितविरोधानुवादरहितवाक्यत्वात्, प्रयाजादिवाक्यवदिति प्रयोगः। इन्द्रादयोऽर्थवादादिप्रमाणकाः, विध्यपेक्षितातीन्द्रियार्थत्वे सति तद्गम्यत्वात्, स्वर्गवत्; तत्सिद्धस्वर्गानभ्युपगमे च व्यतिरिक्तात्मविचारानर्थक्यप्रसङ्ग इत्याह—**अपि च विधिभिरेवेति**।

भाष्यभावप्रकाशिका

गौः क्रेतव्या, एषा बहुक्षीरेति। तत्र बहुक्षीरप्रतिपादनं द्वारम्, तात्पर्यं तु क्रयणे, तद्वदिति भावः। अन्वयभेदप्रतिपत्तिं दर्शयति—**यथेति**। कुत इति? अयोग्यत्वादित्याह—**न हि भवतीति**। कथं तर्ह्यन्वय इति? तदाह—**वायुस्वभावेति**। अध्ययनविधिगृहीतस्याक्षरमात्रस्यापि निष्प्रयोजनत्वासंभवात् प्रयोजनाकाङ्क्षायामर्थवादवाक्यानां विधेयस्तुतिलक्षणया विधिनैकवाक्यत्वम्; अन्वयभेदेऽपि तात्पर्यभेदस्य वाक्यभेदापादकस्याभावाद् वाक्यैकवाक्यताया अभिधानपर्यवसानादन्वयभेदेनावान्तरवाक्यभेदः। नीलं सुगन्धि महदुत्पलमित्यादिवाक्ये च प्रधानार्थाभेदात् तस्य चानेकविशेषणवत्त्वेऽपि गुणानुरोधादावर्तनाभावाद् वाक्यैकवाक्यतया नान्वयभेदप्रसङ्गः। अर्थवादानां स्वार्थे तात्पर्याभावेऽपि तत्राप्रामाण्यम्, विशिष्टार्थपरस्य वाक्यस्य तात्पर्यभेदाभावेऽपि विशेषणेषु प्रामाण्यम्। न च तत्र विशिष्टविषयत्वान्यथानुपपत्त्या विशेषणप्रत्यय आक्षेप्यः, आक्षेपाद्विशेषणप्रतिपत्तौ सत्यां विशिष्टविषयत्वम्, तद्विषयत्वाच्च तदाक्षेप इति परस्पराश्रयत्वात्, विशेषणेष्वप्रामाण्ये च विशेषणाविषयत्वाद् विशिष्टेऽपि प्रामाण्यायोगात्, अविवक्षितस्वार्थत्वे चार्थवादाद् विधेयप्राशस्त्यलक्षणाया अप्यभिधेयाविनाभावस्य लक्षणाबीजस्याभावेनानुपपत्तेः। लोकेऽपि गङ्गादिशब्दानां स्वाभिधेयसम्बद्धतीरादिलक्षकत्वदर्शनात्, स्वार्थासम्बद्धसमुद्रतीरादिलक्षकत्वादर्शनाच्चेति भावः।

ननु अन्तरा द्वारत्वेन प्रतीयमानार्थेऽपि मन्त्रार्थवादानां प्रामाण्ये "अग्निर्हिमस्य भेषजम्", "यजमानः प्रस्तरः" इत्यादिवाक्यानामपि प्रामाण्यं प्रसज्येतेति, तत्राह—**तद्यत्रेति**। **तदनुवादेनेति**। मानान्तरावगतयोः परस्परानपेक्षतया बोधकत्वेनानुवादाभावेऽपि प्रमातुर्मानान्तरात् प्रथमं तदर्थावगममभिप्रेत्य तदनुवादेनेत्युक्तम्। **गुणवादेनेति**। लक्षितलक्षणया प्राशस्त्यपरत्वमिति यावत्। अन्यपरवाक्यस्य द्वारार्थे प्रमाणान्तरविरोधे 'विषं भुङ्क्ष्वे' त्यादिवाक्यस्येवाप्रामाण्यादिति भावः।

ननु मानान्तरविरोधाभावेऽपि देवताविग्रहादौ संवादकप्रमाणाभावादर्थवादानामप्रामाण्यं स्यादित्याशङ्क्याह—**यत्र तु तदुभयमिति**। यत्र विद्यमानार्थत्वम्, तत्र प्रमाणान्तरसंवाद इष्टः। इह तदभावात् किं गुणवादः, किं वा यत्रैव प्रमाणान्तरविरोधः,

न्यायनिर्णयः

कथं तर्हि विधिना तेषामन्वयः, तत्राह— **वाय्विति**। अध्ययनविध्युपात्तस्याक्षरमात्रस्यापि नैष्फल्यायोगात् तत्फलाकाङ्क्षायामर्थवादानां विधेयस्तुतिलक्षणया तदेकवाक्यत्वम्। न चान्वयभेदेऽपि वाक्यभेदः, तात्पर्यभेदस्य तद्भेदकस्याभावादित्यर्थः। तर्हि सर्वत्रार्थवादानां स्वार्थे प्रामाण्यात् 'अग्निर्हिमस्य' इत्याद्यपि स्वार्थे प्रमाणं, नेत्याह— **तदिति**। मानान्तरसंवादाभावात् 'आदित्यो यूपः' इत्यादीनां स्वार्थे प्रामाण्यमाशङ्क्योक्तम्— **यत्रेति**। 'वज्रहस्तः पुरंदरः' इत्यादिषु संवादविसंवादयोरभावेऽपि संदेहात्र स्वार्थे मानतेत्याशङ्क्याह— **यत्र त्विति**। इतिशब्दादूर्ध्वं विचार्येत्यध्याहार्यम्। उक्तं हि— 'विरोधे गुणवादः स्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः॥' इति। यत्र विद्यमानार्थत्वं तत्र संवादो दृष्टः। प्रकृते तदभावात् किं गुणवादः, किंवा यत्र

किं प्रमाणान्तराभावाद् गुणवादः स्यादाहोस्वित् प्रमाणान्तराविरोधाद् विद्यमानवाद इति- प्रतीतिशरणैर्विद्यमानवाद आश्रयणीयो न गुणवादः। एतेन मन्त्रो व्याख्यातः। अपि च विधिभिरेवेन्द्रादिदेवत्यानि हवींषि चोदयद्भिरपेक्षितमिन्द्रादीनां स्वरूपम्। न हि स्वरूपरहिता इन्द्रादयश्चेतस्यारोपयितुं शक्यन्ते। न च चेतस्यनारूढायै तस्यै तस्यै देवतायै हविः प्रदातुं शक्यते। श्रावयति च- 'यस्यै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेद् वषट्करिष्यन्' (ऐ. ब्रा. ३।८।१) इति। न च शब्दमात्रमर्थस्वरूपं संभवति,

प्रकटार्थविवरणम्

किं च सिद्धार्थव्युत्पत्तेरुपपादितत्वात् "अविशिष्टस्तु वाक्यार्थः" इत्युक्तत्वाच्च मन्त्रादिप्रतिपाद्या देवताऽभ्युपेया, न चतुर्थ्यन्तप्रयोगमात्रमित्याह—**न च शब्दमात्रमिति**। यच्चोक्तं मूलाभावादितिहासपुराणमप्रमाणमिति, तत्राह—**इतिहासपुराणमपीति**।

भाष्यभावप्रकाशिका

तत्रैव गुणभावदृष्टेरिह च तदभावाद् विद्यमानार्थतेति विशये, प्रमाणानां स्वतः प्रामाण्याद् विद्यमानार्थता युक्ता; मुख्येऽर्थे संभवति गुणाश्रयणायोगाच्च। अर्थवादवाक्यानि च, स्वार्थप्रमितावनन्यार्थानि प्रयोजनवशादन्यार्थानि, विधिप्रकरणपठितानुवादविरोधशून्यवाक्यत्वात्, प्रयाजादिवाक्यवदित्यनुमानाच्चेत्यर्थः। यथा 'स्वर्गकामो यजेते'ति विधिनाऽपेक्षितस्वर्गरूपमलौकिकमप्यर्थवादादवगम्यमानं विधिप्रमाणकम्, यथा च "व्रात्यो व्रात्यस्तोमेन यजेत" इति व्रात्यस्तोमविध्यपेक्षितं व्रात्यस्वरूपं विधिप्रमाणकम्, एवं यागविधिनैव देवतारूपापेक्षणादर्थवादादिना देवतारूपं विधिप्रमाणकमेवेत्याह—**अपि चेति**। कथमिन्द्रादिस्वरूपापेक्षा विधीनामिति? अत आह—**न हि स्वरूपेति**। यथा दर्शपूर्णमासप्रकरणे पाठात् प्रयाजाद्यनुष्ठानादेवापूर्वसिद्धिः, एवमौत्सर्गिकप्रमितिकार्यैरर्थवादैः प्रमीयमाणदेवताप्रमितिमतो यागा[द]पूर्वसिद्धिः कल्प्यते; तत्प्रकरणे पाठात्, तद्वदित्यनुमानादिति भावः। मा भूदारोपणमिति, तत्राह—**न च चेतसीति**। देवतामुद्दिश्य हविरवमृश्य च तद्विषयस्वत्वत्यागात्मकत्वाद् यागस्येति भावः। न केवलमुद्देशान्यथानुपपत्त्या, श्रूयमाणत्वाच्चेत्याह—**श्रावयति चेति**। ननु विध्यपेक्षायां मन्त्रार्थवादादिभ्यो देवताविग्रहाधिगमो भवेत्, तदपेक्षैव नास्ति; शब्दस्वरूपस्यैव देवतात्वात्, तस्य च मानान्तरसिद्धत्वादिति, तत्राह—**न च शब्दमात्रमिति**। विहिता संप्रदानकारकबुद्धिः, इन्द्रायेत्यादिशब्दातिरिक्तार्थाकारा, कारकबुद्धित्वात्, कर्तृकारकबुद्धिवत्। न च शब्दरूपमन्त्रकारकबुद्धौ व्यभिचारः, तस्या अपि "ऐन्द्र्या गार्हपत्य" मित्यादिकारकत्वप्रतिपादकशब्दातिरिक्तमन्त्ररूपार्थाकारबुद्धित्वादिति भावः।

न्यायनिर्णयः

विरोधस्तत्रैव तद्दृष्टेरिह तदभावाद्विद्यमानार्थतेति संदेहे मानानां स्वतो मानत्वाद्विद्यमानार्थता, सति च मुख्ये गुणानाश्रयणात्, अर्थवादवाक्यानि स्वार्थप्रमितावनन्यार्थान्येव फलवशादन्यार्थानि, विधिप्रकरणस्थानुवादविरोधविधुरवाक्यत्वात्, प्रयाजादिवाक्यवदित्यनुमानादित्याह— **प्रतीतीति**। अर्थवादानां संवादविसंवादासत्त्वे स्वार्थे प्रामाण्योक्त्या मन्त्राणामपि तदुक्तमेवेत्यतिदिशति— **एतेनेति**। तस्यापि संवादाद्यभावे स्वार्थे मानत्वाविशेषात् प्रतीते देवतारूपे प्रामाण्यमावश्यकमित्यर्थः। न केवलं मन्त्रादिप्रमाणकमेव देवतारूपं, विधिप्रमाणकमपीत्युपादानं प्रमाणयति— **अपि चेति**। यथा स्वर्गकामवाक्ये विध्यपेक्षितं स्वर्गरूपं 'यन्न दुःखेन संभिन्नम्' इत्यर्थवादसिद्धं विधिप्रमाणकं तथा यागविधिनैव देवतारूपापेक्षणादर्थवादादिसिद्धमपि तद्रूपं तत्प्रमाणकमेवेत्यर्थः। कथमिन्द्रादिस्वरूपापेक्षा विधीनां, ते हि करणेतिकर्तव्यताभाव्यमात्रापेक्षिणः, तत्राह— **न हीति**। दर्शपूर्णमासाधिकारपाठात् प्रयाजाद्यनुष्ठानादेवापूर्वसिद्धिः। तथौत्सर्गिकप्रतीतिकार्यार्थवादप्रमितदेवताप्रमितिमतो यागादपूर्वसिद्धिरविशेषादित्यर्थः। चेतसि देवतारूपारोपणमपि मा भूत्, तत्संप्रदानकहविर्दान(क)स्य तदपेक्षत्वाभावादित्याशङ्क्याह— **न चेति**। देवतामुद्दिश्य हविरवमृश्य तदीयस्वत्वत्यागात्मकत्वाद् यागस्येत्यर्थः। न केवलं यागदेहालोचनया चेतसि देवतारोपः, किंतु श्रूयमाणत्वाच्चेत्याह— **श्रावयतीति**। विध्यपेक्षायां मन्त्रादिभ्यो देवताविग्रहादि ग्राह्यं, तदपेक्षैव नास्ति, शब्दरूपस्यैव देवतात्वात्, तस्य च मानान्तरसिद्धत्वात्, तत्राह— **न चेति**। विमता बुद्धिः शब्दातिरिक्तार्थाकारा, कारकबुद्धित्वात्, कर्तृबुद्धिवत्। न च

शब्दार्थयोर्भेदात्। तत्र यादृशं मन्त्रार्थवादयोरिन्द्रादीनां स्वरूपमवगतं, न तत्तादृशं शब्दप्रमाणकेन प्रत्याख्यातुं युक्तम्। इतिहासपुराणमपि व्याख्यातेन मार्गेण संभवन्मन्त्रार्थवादमूलत्वात् प्रभवति देवताविग्रहादि साधयितुम्। प्रत्यक्षादिमूलमपि संभवति। भवति ह्यस्माकमप्रत्यक्षमपि चिरन्तनानां प्रत्यक्षम्। तथा च व्यासादयो देवादिभिः प्रत्यक्षं व्यवहरन्तीति स्मर्यते। यस्तु ब्रूयादिदानीन्तनानामिव पूर्वेषामपि नास्ति देवादिभिर्व्यवहर्तुं सामर्थ्यमिति, स जगद्वैचित्र्यं प्रतिषेधेत्। इदानीमिव च नान्यदाऽपि सार्वभौमः क्षत्रियोऽस्तीति ब्रूयात्। ततश्च राजसूयादिचोदना उपरुन्ध्यात्। इदानीमिव च कालान्तरेऽप्यव्यवस्थितप्रायान् वर्णाश्रमधर्मान् प्रतिजानीत। ततश्च व्यवस्थाविधायि शास्त्रमनर्थकं स्यात्। तस्माद् धर्मोत्कर्षवशाच्चिरन्तना

प्रकटार्थविवरणम्

मार्जारादिदृष्टिवत् स्वविषयेऽतिशयग्राहकमार्षेयमपि प्रत्यक्षं मूलं संभवतीत्याह—**प्रत्यक्षादिमूलमपीति**। सामान्यतोदृष्टं दूषयति अतिप्रसङ्गेन—**यस्तु ब्रूयादित्यादिना**। **व्यवस्थाविधायीति**। कृतादियुगेषु धर्मविभागशास्त्रम्। **श्लिष्यते** युज्यते। पृथिव्यप्तेजोऽनिलाकाशसमुदायेभ्यः समुत्थितं यच्छरीरं पञ्चात्मकम्, तस्मिन् योगप्रकर्षेण ज्ञाते सतीत्यर्थः। चित्रकारादिप्रसिद्धिरपि

भाष्यभावप्रकाशिका

ननु तथापि देवतादिरूपज्ञानमुद्देशोऽपेक्षते, ननु[तु]रूपसत्ताम्; आरोपेणापि ज्ञानसंभवादिति, तत्राह—**तत्र यादृशमिति**। असति बाधके प्रतीयमानस्य मिथ्यात्वकल्पनमयुक्तमिति भावः। न च यज्ञकर्मणो देवतां प्रति गुणभावात् तत एव फलोत्पादे यागभावनायाः फलवत्त्वं हीयते; यागभावनायाः फलवत्या यागाख्यस्वकरणान्तरव्यापारत्वाद्देवताप्रसादादेः। अतः कर्मणोऽपूर्ववद् देवताप्रसादादिकमवान्तरव्यापार इत्यपि द्रष्टव्यम्। न केवलं मन्त्रार्थवादेभ्य इत्याह—**इतिहासेति**। इतिहासपुराणादेः प्रत्यक्षादिमूलत्वमपि युक्तमित्याह—**प्रत्यक्षादीति**। श्लिष्यते युज्यत इत्यर्थः। इष्टदेवतासाक्षात्कारोद्देशेन जपविधानादपि श्लिष्यत

न्यायनिर्णयः

मन्त्ररूपकारकबुद्धौ व्यभिचारः, तत्रापि 'ऐन्द्र्या गार्हपत्यम्' इत्यादिकारकत्ववादिशब्दातिरिक्तमन्त्ररूपार्थाकारबुद्धित्वोपगमादिति भावः। ननु तथापि देवतारूपज्ञानमुद्देशोऽपेक्षते, न तद्रूपसत्त्वम्, आरोपादपि तद्धीयोगाद् योषिदग्निधीवत्, तत्राह— **तत्रेति**। दृष्टस्यासति बाधके न मिथ्यात्वम्। न च कर्मणो देवतागुणत्वात् तस्मादेव फलोत्पादे यागस्य फलवत्त्वविरोधः, अपूर्ववद् देवताप्रसादस्यापि यागावान्तरव्यापारत्वादित्यर्थः। न केवलं मन्त्रार्थवादेभ्यो देवताविग्रहादिसिद्धिः, किं त्वितिहासपुराणादपीत्याह— **इतिहासेति**। मन्त्रादावुक्तप्रामाण्यप्रकारो व्याख्यातो मार्गः। न केवलं मन्त्राद्येव तन्मूलं, किं तु प्रत्यक्षाद्यपीत्याह— **प्रत्यक्षादीति**। ननु न तत् तस्य मूलम्, न हि देवादिविषयमस्मदादीनामस्ति प्रत्यक्षम्, तत्राह— **भवतीति**। व्यासादीनां तद्विषयं प्रत्यक्षमस्तीत्यत्र मानमाह— **तथा चेति**। न चार्षं प्रत्यक्षमितिहासादिसिद्धं, तच्च तन्मूलतया मानमित्यन्योन्याश्रयत्वम्, आर्षप्रत्यक्षस्य योगिप्रत्यक्षान्तर्भूतस्यानुमानागमाभ्यामेव सिद्धत्वात्, इतिहासादौ च तन्मूलत्वव्यक्तीकरणाय तदनुवादादित्यर्थः। ननु पूर्वेऽपि व्यासादयो न देवादीन् प्रत्यक्षयन्ति, प्राणित्वात्, अस्मदादिवदित्यनुमानान्न योगिप्रत्यक्षं तन्मूलमिति शङ्कते— **यस्त्विति**। सामान्यतो दृष्टमतिप्रसक्त्या प्रत्याचष्टे— **स इति**। विमतं घटमात्रं, वस्तुत्वात्, घटवदित्यपि संभवादित्यर्थः। अतीतानागतौ कालौ, सार्वभौमशून्यौ, कालत्वात्, वर्तमानवदित्यतिप्रसङ्गान्तरमाह— **इदानीमिवेति**। तत्रापि सिद्धसाध्यत्वं प्रत्याह— **ततश्चेति**। विमतः कालोऽव्यवस्थितप्रायवर्णाश्रमशाली, कालत्वात्, संमतवदित्यतिप्रसङ्गान्तरमाह— **इदानीमिवेति**। तत्रापि सिद्धसाध्यत्वमाशङ्क्याह— **ततश्चेति**। **व्यवस्थाविधायि** तत्तद्युगेषु तत्तद्वर्णाश्रमयोगितया तत्तदसंकीर्णधर्मबोधकमित्यर्थः। सामान्यतो दृष्टस्यातिप्रसक्तिप्रहतत्वे फलितमाह— **तस्मादिति**। इष्टदेवतासाक्षात्कारोद्देशेन जपविधानादपि युक्तमेतदित्याह— **अपि चेति**। आदिपदेन संयोगफलं

देवादिभिः प्रत्यक्षं व्यवजह्रुरिति श्लिष्यते। अपि च स्मरन्ति-'स्वाध्यायादिष्टदेवतासंप्रयोगः' (यो. सू. २।४४) इत्यादि योगोऽप्यणिमाद्यैश्वर्यप्राप्तिफलः स्मर्यमाणो न शक्यते साहसमात्रेण प्रत्याख्यातुम्। श्रुतिश्च योगमाहात्म्यं प्रख्यापयति- 'पृथिव्यप्तेजोऽनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते। न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम्' (श्वे. उ. २।१२) इति। ऋषीणामपि मन्त्रब्राह्मणदर्शिनां सामर्थ्यं नास्मदीयेन सामर्थ्येनोपमातुं युक्तम्। तस्मात् समूलमितिहासपुराणम्। लोकप्रसिद्धिरपि न सति संभवे निरालम्बनाऽध्यवसातुं युक्ता। तस्मादुपपन्नो मन्त्रादिभ्यो देवादीनां विग्रहवत्त्वाद्यवगमः। ततश्चार्थित्वादिसंभवादुपपन्नो देवादीनामपि ब्रह्मविद्यायामधिकारः। [1]क्रममुक्ति-दर्शनान्यप्येवमेवोपपद्यन्ते।।३३।।

।।इत्यष्टमं देवताधिकरणम्।।

प्रकटार्थविवरणम्

देवताविग्रहविषया नाप्रमाणमित्याह—**लोकप्रसिद्धिरपीति**। अधिकरणार्थमुपसंहरति—**तस्मादिति**।

।।इत्यष्टमं देवताधिकरणम्।।

भाष्यभावप्रकाशिका

इत्याह—**अपि चेति**। योगिप्रत्यक्षमपि देवताविषयं योगविध्यन्यथानुपपत्त्या मन्यत इत्याह—**योगोऽपीति**। आर्षमपि दर्शनमितिहासादेर्मूलं युक्तमित्याह—**ऋषीणामिति**। लोकतोऽपि देवताविग्रहोऽवगम्यत इत्याह—**लोकप्रसिद्धिरिति**। भवत्वेवम्, प्रकृते किमिति? अत आह—**ततश्चेति**। ब्रह्मलोकादि प्राप्तानां देवादिभावमापन्नानां तत्रोत्पन्नापरोक्षज्ञानानां मुक्तिप्रतिपादकान्यपि वाक्यानि देवतादीनामधिकारं सूचयन्तीत्याह—**क्रममुक्तिरिति[मुक्तीति]**।।३३।। इत्यष्टमं देवताधिकरणम्।

न्यायनिर्णयः

देवतासाक्षात्कारस्तत्फलं व्यवहारश्चोच्यते। योगशास्त्रादपि योगिनो देवतादिभिः सह प्रत्यक्षं व्यवहरन्तीति दृष्टमित्याह— **योगोऽपीति**। न केवलं योगशास्त्राद् योगमाहात्म्यधीः, किं तु श्रुतेरपीत्याह— **श्रुतिश्चेति**। पादतलमारभ्याऽऽजानोर्जानोरा नाभेर्नाभेराग्रीवं ग्रीवायाश्चाऽऽकेशप्ररोहं ततश्चाऽऽब्रह्मरन्ध्रं क्रमेण पृथिव्यादिधारणया पृथिव्यादिपञ्चात्मके भूतसमुदाये समुत्थिते प्रतिपत्तिद्वारा वशीकृते योगगुणे चाणिमादौ प्रवृत्ते योगाभिव्यक्तं तेजोमयं देहं प्राप्तस्य योगिनो न जरादिसंगतिरित्यर्थः। किंच मन्त्रादिदृशामृषीणां शक्तिरस्मदादिशक्तिसदृशी नेत्यभ्युपगन्तव्यम्। तथा व्यासादीनामपि शक्तेरस्मदादिशक्त्यतिशायितया न तत्प्रत्यक्षं प्रतिक्षेप्तुं शक्यमित्याह— **ऋषीणामिति**। सिद्धे व्यासादीनामतीन्द्रियार्थदर्शित्वे फलितमाह— **तस्मादिति**। तथा चेतिहासादिप्रामाण्याद् देवताविग्रहादिपञ्चकसिद्धिरित्यर्थः। लोकप्रसिद्ध्याऽपि तत्सिद्धिरित्याह— **लोकेति**। प्रमाणस्यादुष्टत्वे प्रमेयसिद्धिरवश्यंभाविनीत्यवान्तरप्रकृतमुपसंहरति— **तस्मादिति**। तेषां विग्रहवत्त्वादौ सिद्धे प्रकृते किमित्याशङ्क्य परमप्रकृतमुपसंहरति— **ततश्चेति**। किंच ब्रह्मलोकादिप्राप्तानां देवादिभावं प्राप्तानां तत्रोत्पन्नापरोक्षधियां मुक्तिवादीन्यपि श्रुतिस्मृतिवाक्यानि देवादीनामधिकारं सूचयन्तीति तेषां विद्याधिकारे श्रुतार्थापत्तिमाह— **क्रमेति**।।३३।। इत्यष्टमं देवताधिकरणम्।।

---

१. **क्रममुक्तीति**। देवताधिकारविचारस्यान्यान्यपि फलानि सन्ति। मधुविद्यादीनां तत्तद्देवतापदप्राप्तिफलकत्वं सिध्यति। अन्यथा श्रुतं परित्यज्यान्यदेव फलं कल्प्यं स्यात्। तथा अन्तरादित्यादिविद्यासु आदित्यादिदेवतान्तर्वर्तित्वेन ब्रह्मोपासनम्। अन्यथा आदित्यमण्डलान्तर्वर्तित्वेनैव तदुपासनं सिध्येत्। तथोपकोसलविद्यादिषु मार्गपर्वत्वेनार्चिरादिदेवताध्यानसिद्धिः। 'तद् देवानामन्नं तं देवा भक्षयन्ति' इत्याद्यर्थवादपर्यालोचनया वैराग्यविशेषसिद्धिरित्यादिकं न्यायरक्षामणौ द्रष्टव्यम्। पृ. २९०।

९।।अपशूद्राधिकरणम्।।सू. ३४-३८।।

शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि।।३४।।

यथा मनुष्याधिकारनियममपोद्य देवादीनामपि विद्यास्वधिकार उक्तस्तथैव द्विजात्यधिकारनियमापवादेन शूद्रस्याप्यधिकारः स्यादित्येतामाशङ्कां निवर्तयितुमिदमधिकरणमारभ्यते[1]। तत्र शूद्रस्याप्यधिकारः स्यादिति

शारीरकन्यायसंग्रहः

शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि।।३४।। क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्।।३५।। संस्कारपरामर्शात् तदभावाभिलापाच्च।।३६।। तदभावनिर्धारणे च प्रवृत्तेः।।३७।। श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च।।३८।। अर्थवादलिङ्गात् न्यायानुगृहीतादपि विध्यन्यथानुपपत्तिर्बलीयसी, तात्पर्यवत्त्वात्—इति न्यायेन, 'अर्थित्वादिमूतश्च फलवति प्रवृत्तिः स्वाभाविकी' इति न्यायानुगृहीतात् शूद्रशब्दलिङ्गात् वैदिकविद्यायां शूद्रस्याधिकारे प्राप्ते, साङ्गाध्ययनविधिर-दृष्टसंस्कारवद्वेदवाक्यजनितार्थप्रमितिमत एवोत्तरविधिष्वधिकारो नान्यस्य इति नियममन्तरेणानुपपद्यमानो वैदिकेषु ब्रह्मविद्याफलपर्यन्तसाधनविधिषु शूद्रस्याधिकारं वारयतीत्युक्तम्। अथवा यौगिकार्थसन्निधाने सत्यप्रतिपन्नरूढ्यर्थग्रहणाद् वरं प्रतिपन्नयौगिकार्थग्रहणम्—इति न्यायेन योगवृत्तिराश्रिता। शूद्रशब्दस्यैकस्य लिङ्गस्य बहुलिङ्गविरोधो वा दर्शितः।

प्रकटार्थविवरणम्

शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि। प्रासङ्गिकीं सङ्गतिमाह—**यथा मनुष्येति।** अधिकारनिरूपणद्वारेण पूर्वत्र मन्त्रादीनां स्वार्थे समन्वयो निरूपितः। इहापि तथैव शूद्रशब्दस्य समन्वयो निरूप्यत इति प्रासङ्गिकः समन्वयेऽन्तर्भावो विज्ञेयः। ब्रह्मविद्या विषयः। तस्यां किं शूद्रस्याधिकारोऽस्त्युत नास्तीति सन्देहे पूर्ववाद्याह—**तत्र शूद्रस्यापीति।** अनवक्लृप्तोऽसमर्थः। अहेति

भाष्यभावप्रकाशिका

शुगस्य तदनादरश्रवणात् तदाद्रवणात्सूच्यते हि।।३४।। अवान्तरसङ्गतिं कथयन्नधिकरणतात्पर्यमाह—**यथा मनुष्येति।**

न्यायनिर्णयः

मनुष्याधिकारनियमापवादेन देवादीनामधिकारवद् द्विजात्यधिकारनियमं निरस्य शूद्रस्यापि स्यादधिकारः, संवर्गविद्याधिकारिणि जानश्रुतौ शूद्रशब्दादित्याशङ्क्याह— **शुगस्येति।** प्रासङ्गिकीं संगतिं वदन्नधिकरणस्य तात्पर्यमाह— **यथेति।** पूर्वत्रात्रैवर्णिकदेवाद्यधिकारोक्त्या मन्त्रादीनां स्वार्थे समन्वयः साधितः। सम्प्रति विद्याधिकारिणि शूद्रशब्ददृष्टेर्जातिशूद्रस्यापि विद्याहेतुवेदान्तविचारादिष्वधिकारमाशङ्क्य शूद्रशब्दस्य क्षत्रिये समन्वयोक्तेरेतदध्यायान्तर्भावोऽस्य युक्तः। आर्थवादिकशूद्रशब्दस्यैव पौर्वापर्यालोचनया वेदान्तानां स्वार्थे समन्वयसिद्धेः श्रुत्यादिसंगतयः। पूर्वपक्षे जातिशूद्रस्यापि ब्रह्मविद्यायां त्रैवर्णिकादविशेषः, सिद्धान्ते ततो विशेषः फलति। ब्रह्मविद्या विषयः। तस्यां शूद्रस्याधिकारोऽस्ति न वेत्यधिकारहेतुसत्त्वासत्त्वाभ्यां संदेहे पूर्वपक्षयति— **तत्रेति।** सत्यपि लौकिके सामर्थ्ये

---

१. ननु 'अवैद्यत्वादभावः कर्मणि स्यात्' (जै.सू. ६-१-३७) इति पूर्वतन्त्र एवानधीयानस्य शूद्रस्यानधिकारसिद्धेः गतार्थमिदमधिकरणमिति चेत्? मैवम्; तत्राग्न्यभावादग्निसाध्ये कर्मणि अधिकारो निराकृतः। अनग्नित्वमेव तत्र मूलयुक्तिः। अवैद्यत्वम् = विद्याराहित्यं तु अभ्युच्चयमात्रम्। अग्न्यसाध्यासु विद्यासु शूद्राधिकारशङ्काया निरास इहैवेति। द्र. कल्पतरुः पृ. ३४९-३५०। यथा चानग्नित्वस्य मूलयुक्तित्वम्, अवैद्यत्वस्य चाभ्युच्चययुक्तित्वं तथा निरूपितं परिमले। वस्तुतस्तु शास्त्रभेदादेकेनान्यस्य गतार्थताशङ्कैव नास्ति। तथापि गतार्थता परिहरणीयेति चेत् इह 'शूद्र' त्यामन्त्रणेन तेषामधिकारोऽस्त्वित्यधिकाशङ्कानिरासकताऽस्त्येव। अधिकाशङ्कयैवाधिकरणान्तरारम्भस्य पूर्वतन्त्रे इह च बहुशः प्रसिद्धत्वादिति ध्येयम्।

तावत् प्राप्तम्। अर्थित्वसामर्थ्ययोः संभवात्। 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' (तै. सं. ७।१।१।६) इतिवत् 'शूद्रो विद्यायामनवक्लृप्तः' इति च निषेधाश्रवणात्। यच्च कर्मस्वनधिकारकारणं शूद्रस्यानग्नित्वम्, न तद् विद्यास्वधिकारस्यापवादकं लिङ्गम्। [1]न ह्याहवनीयादिरहितेन विद्या वेदितुं न शक्यते। भवति च लिङ्गं शूद्राधिकारस्योपोद्बलकम्। संवर्गविद्यायां हि जानश्रुतिं पौत्रायणं शुश्रूषुं शूद्रशब्देन परामृशति– 'अह हारेत्वा शूद्र तवैव सह गोभिरस्तु' (छा. उ. ४।२।३) इति। विदुरप्रभृतयश्च शूद्रयोनिप्रभवा अपि विशिष्टविज्ञानसंपन्नाः स्मर्यन्ते। तस्मादधिक्रियते शूद्रो विद्यास्विति।

एवं प्राप्ते ब्रूमः– न शूद्रस्याधिकारः, वेदाध्ययनाभावात्। अधीतवेदो हि विदितवेदार्थो वेदार्थेष्वधि-

प्रकटार्थविवरणम्

निपातः खेदार्थः। हारेण सहित इत्वा रथस्तवैव गोभिः सहास्तु, शूद्र, किमनेनात्यल्पेनेति रैक्वः प्रोवाच। पूर्वाधिकरणेऽर्थित्वादिसंपन्नस्य फलवति स्वाभाविकी प्रवृत्तिरिति न्यायानुगृहीतेन [तात्] "तद्यो यो देवानाम्" इति ब्रह्मविद्यासंबन्धलिङ्गाद् देवादीनामधिकारो निरूपितः। तथेहाप्यर्थित्वादिसंपन्नस्य शूद्रशब्देन परामर्शलिङ्गादस्त्यधिकार इति भावः।

सूत्राद् बहिरेव सिद्धान्तमाह— **न शूद्रस्याधिकार इति**। [2]साङ्गाध्ययनविधिरदृष्टसंस्कारवद्वेदवाक्यजनितप्रमितिमत

भाष्यभावप्रकाशिका

शङ्काबीजमाह— **तत्र शूद्रस्येति**। ननु सत्यपि लौकिके सामर्थ्ये शास्त्रीयसामर्थ्याभावादनधिकार इत्याशङ्क्याह— **शूद्रो यज्ञ इति**। ननु कर्मानधिकारे तेनैव न्यायेन विद्यायामप्यनधिकारः स्यादिति, तत्राह— **यच्च कर्मस्विति**। आहवनीयाद्यभावादनधिकारः, किं वाऽधिकारे प्रमाणाभावादिति? न तावदाद्य इत्याह— **न हीति**। दृष्टसाधनत्वादिति भावः। नापि द्वितीय इत्याह— **भवति चेति**। अहेत्ययं निपातो निग्रहार्थीयोऽन्यत्र; इह तु अनर्थः। हारेत्वा हारेण युक्ता इत्वा गन्त्री रथः। गोभिः सह तवैवास्तु तिष्ठतु, हे शूद्रेति शुश्रूषोरधिकारिणः शूद्रशब्देन संबोधनादिति भावः।

न्यायनिर्णयः

शास्त्रीयसामर्थ्याभावादनधिकारमाशङ्क्याह— **तस्मादिति**। अनग्नित्वादित्यर्थः। अनवक्लृप्तत्वमयोग्यत्वम्। कर्मानधिकारे तेनैव न्यायेन विद्यायामपि नाधिकारः, तत्राह— **यच्चेति**। किमाहवनीयाद्यभावादनधिकारः शूद्रस्य विद्यायामुच्यते, किंवाऽधिकारे मानाभावात्। तत्राद्यं दूषयति— **न हीति**। विद्याया दृष्टसाधनत्वादाहवनीयादेस्तत्राकिंचित्करत्वात् तद्रहितस्यापि तद्धेतुमतस्तत्प्राप्तिरिति भावः। द्वितीयं निराह— **भवतीति**। अहेति खेदार्थो निपातः। हारेण सहित इत्वा रथः स तवैव हे शूद्र, गोभिः सहास्तु, किमनेनात्यल्पेन गार्हस्थ्यं निर्वोढुमसमर्थेनेति रैक्वो जानश्रुतिं विद्याधिकारिणं शूद्रशब्देनोक्तवानित्यर्थः। न केवलं शूद्राधिकारे श्रौतं लिङ्गम्, स्मार्तमपीत्याह— **विदुरेति**। अर्थित्वादिमतः साधने फलवति स्वाभाविकी प्रवृत्तिरिति न्यायानुगृहीतेन 'तद्यो यो देवानाम्' इति ब्रह्मधीसंबन्धलिङ्गेन देवादीनामधिकारो यथोक्तस्तथाऽत्राप्यर्थित्वादिमतः शूद्रशब्देन परामर्शलिङ्गादस्त्यधिकारस्तस्येत्युपसंहरति— **तस्मादिति**।

सूत्राद् बहिरेव सिद्धान्तयति— **एवमिति**। अध्ययनाभावेऽपि किमित्यधिकारो विद्याहेतुषु नेष्यते, तत्राह— **अधीतेति**।

---

१. ननु आहवनीयादियुक्तकर्मणां 'विद्यां चाविद्यां च' (ई. उ. ११) इति वचनबलेन सविशेषविद्यायामपेक्षितत्वात्, निर्विशेषविद्यायामपि चित्तशुद्ध्यर्थं तेषामपेक्षितत्वात् शूद्रस्य चाहवनीयाद्यभावेन तदभावात्, विद्याप्रकरणे विद्याङ्गतयोपसदनोपनयनयोः संस्कारयोराम्नानेन शूद्रस्य च 'न च संस्कारमर्हति' इति तत्प्रतिषेधेन शास्त्रीयसामर्थ्याभावाच्च कथमधिकारशङ्केति चेत्? उच्यते। जन्मान्तरानुष्ठितैरेवाग्निहोत्रादिभिः, इह जन्मनि स्ववर्णोचितकर्मभिरेव च चित्तशुद्धेः विद्योपकारस्य च सिद्धौ आहवनीयाद्यपेक्षाऽभावात्। सच्छूद्रस्यामन्त्रकसंस्कारस्य मन्वादिभिरभ्यनुज्ञानाच्चेति। द्र. ब्र. वि. ४१२, अधिकं न्या. र. मणौ द्र.।

२. अध्ययनस्य प्रधानकर्मत्वं निरस्य संस्कारकर्मत्वमिहैवाधिकरणे निरूप्यते। द्र. भामती। अत एव तस्य प्रधानकर्मत्वसंस्कारकर्मत्वाभ्यां संशयः प्रदर्शितः कल्पतरौ।

क्रियते। न च शूद्रस्य वेदाध्ययनमस्ति, उपनयनपूर्वकत्वाद् वेदाध्ययनस्य, उपनयनस्य च वर्णत्रयविषयत्वात्। यत्त्वर्थित्वम्, न तदसति सामर्थ्येऽधिकारकारणं भवति। सामर्थ्यमपि न लौकिकं केवलमधिकारकारणं भवति। शास्त्रीयेऽर्थे शास्त्रीयस्य सामर्थ्यस्यापेक्षितत्वात्। शास्त्रीयस्य च सामर्थ्यस्याध्ययननिराकरणेन निराकृतत्वात्। यच्चेदं 'शूद्रो यज्ञेऽनवक्लृप्तः' इति, तन्न्यायपूर्वकत्वाद् विद्यायामप्यनवक्लृप्तत्वं द्योतयति, न्यायस्य साधारणत्वात्। यत्पुनः संवर्गविद्यायां शूद्रशब्दश्रवणं लिङ्गं मन्यसे, न तल्लिङ्गं, न्यायाभावात्। न्यायोक्ते हि लिङ्गदर्शनं द्योतकं भवति। न चात्र न्यायोऽस्ति। कामं चायं शूद्रशब्दः

प्रकटार्थविवरणम्

एवोत्तरविधिष्वधिकारो नान्यस्येति नियममन्तरेणानुपपद्यमानो वैदिकेषु ब्रह्मविद्यारूपफलपर्यन्तसाधनविधिषु शूद्रस्याधिकारं वारयतीति भावः। संस्कृतवेदार्थज्ञानाभावेन सामर्थ्याभावस्य न्यायस्य तुल्यत्वात् यज्ञग्रहणमुपलक्षणार्थमित्याह—**न्यायस्य च साधारणत्वादिति**। पूर्ववाद्युक्तं लिङ्गमाभासीकरोति—**न तल्लिङ्गमिति**। न्यायतः सिद्धस्यार्थस्यार्थवादवाक्यमुपोद्बलकं भवति, न स्वातन्त्र्येण कस्यचित् साधकमिति पूर्वमीमांसानुकारेणोक्तम्, न रहस्याभिप्रायेण, असति विरोधेऽर्थवादस्य स्वार्थे प्रामाण्याभ्युपगमात्। उभयथाऽप्यध्ययनाभावेनासामर्थ्यान्नेदं लिङ्गमधिकारप्रापकमिति भावः। ननु यथा "एतया निषादस्थपतिं याजयेत्" इति वचनबलादेवेष्टौ निषादस्थपतेरधिकारोऽध्ययनाभावेऽपि, तथा शूद्रस्य संवर्गविद्यायां भविष्यतीत्याशङ्क्याभ्युपगम्याऽऽह—**कामं**

भाष्यभावप्रकाशिका

अस्तु तर्ह्यध्ययनमपीति, अत्राह—**न चेति**। ननु लिखितपाठादिनाऽवाप्तस्वाध्यायादर्थावबोधसंभवात् सामर्थ्यं किं न स्यात्? न च— प्रतिषिद्धाध्ययनाद् दुरितोदयभिया न प्रवर्तत इति—शङ्कनीयम्; कूपखानकन्यायेन लिखितपाठादिजनितविद्याबलाद् दुरितनिवृत्तिमवलोकयतः प्रवत्तिसंभवादिति, अत आह—**सामर्थ्यमपीति। अध्ययननिराकरणेन निराकृतत्वादिति**। अयमाशयः— साङ्गाध्ययनविधिरदृष्टसंस्कारवद्वेदवाक्यजनितार्थप्रमितिमत एवोत्तरविधिष्वधिकारमन्यथानुपपत्त्या नियमयन् ब्रह्मविद्याफलपर्यन्तसाधन-विधिषु शूद्रस्याधिकारं वारयति। ततश्च विद्याया एवानुदयान्न कूपखानकन्यायोऽपीत्याह—**न्यायस्य साधारणत्वादिति**। 'शूद्रो यज्ञेऽनवक्लृप्त' इति उपलक्षणत्वात् सिद्धवदभिधानस्य न्यायपूर्वकत्वादध्ययनाद्यभावलक्षणन्यायस्तुल्य इति विद्यायामप्यनधिकारोऽस्माद् वचनाद् गम्यत इत्यर्थः। **न्यायाभावादिति**। "निषादस्थपतिं याजये"दितिवत् साक्षाच्चोदनाभावादर्थवादगतशूद्रशब्दस्य चान्यतः

न्यायनिर्णयः

साङ्गाध्ययनविधिरदृष्टसंस्कारसहितवेदवाक्योत्थप्रमितिमत एवोत्तरविधिष्वधिकारो नान्यस्येति नियमयन् वैदिकेषु ब्रह्मधीफलपर्यन्तो-पायविधिषु शूद्रस्यानधीयानस्याधिकारं वारयतीति भावः। अध्ययनमपि तर्हि तस्य किं न स्यात्, तत्राह— **न चेति**। उपनयनमपि तस्य स्यादित्याशङ्क्याह— **उपनयनस्येति**। वक्ष्यते हि तस्य वर्णत्रयविषयत्वम्। यदुक्तमर्थित्वसामर्थ्ययोः संभवादिति, तत्रार्थित्वमुपेत्य सामर्थ्यं प्रत्याह— **यत्त्विति**। सामर्थ्यमपि तस्य संभवतीत्याशङ्क्य लौकिकं वैदिकं वेति विकल्प्याद्यं निराह— **सामर्थ्यमिति**। ननु लिखितपाठादिना प्राप्तस्वाध्यायादर्थधीयोगादस्ति तस्य वैदिकमपि सामर्थ्यम्। न च निषिद्धाध्ययनाद् दुरितोदयभयात्र प्रवर्तते, लिखितपाठादिजनितविद्यया तन्निबर्हणात्, तत्राह— **शास्त्रीयस्येति**। लिखितपाठादिजन्यविद्यया दुरितनिवृत्तावध्ययनविध्यानर्थक्यान्नैवमित्यर्थः। यत्तु 'शूद्रो विद्यायामनवक्लृप्तः' इति पर्युदासो न श्रुत इति, तत्राह— **यच्चेति**। संस्कृतवेदार्थज्ञानाभावेनासामर्थ्यस्य यज्ञवज्ज्ञानेऽपि तुल्यत्वाद् यज्ञोक्तेरुपलक्षणत्वादनधिकारो ज्ञानेऽपि वाचनिकः शूद्रस्येत्याह— **न्यायस्येति**। पूर्वपक्षबीजमनुभाष्य दूषयति— **यदिति**। तदभावेऽपि स्वतन्त्रमेव लिङ्गदर्शनं द्योतकमित्याशङ्क्याह— **न्यायेति**। 'निषादस्थपतिं याजयेत्' इतिवच्चोदनाभावादर्थवादस्थशूद्रशब्दस्य चान्यतः सिद्धार्थवद्योतिनः स्वतोऽप्रापकत्वादन्यपरस्य मानान्तराविरोध एव प्रामाण्यादत्र न्यायविरोधस्योक्तत्वादसाधकं लिङ्गमित्यर्थः। शूद्राधिकारेऽपि तर्हि लिङ्गानुग्राहको न्यायोऽस्तु, नेत्याह— **न चेति**। किंचार्थवादवशाद् विद्यामात्रे वा शूद्राधिकारः, संवर्गविद्यायामेव वा? नाद्य इत्याह— **कामं चेति**। तद्विषयत्वात्

संवर्गविद्यायामेवैकस्यां शूद्रमधिकुर्यात्, तद्विषयत्वात्, न सर्वासु विद्यासु। अर्थवादस्थत्वात्तु न क्वचिदप्ययं शूद्रमधिकर्तुमुत्सहते। शक्यते चायं शूद्रशब्दोऽधिकृतविषयो योजयितुम्। कथमित्युच्यते– 'कम्वर एनमेतत्सन्तं सयुग्वानमिव रैक्वमात्थ' (छा. उ. ४।१।३) इत्यस्माद्धंसवाक्यादात्मनोऽनादरं श्रुतवतो जानश्रुतेः पौत्रायणस्य शुगुत्पेदे; तामृषी रैक्वः शूद्रशब्देनानेन सूचयांबभूवाऽऽत्मनः परोक्षज्ञताख्यापनायेति गम्यते। जातिशूद्रस्यानधिकारात्। कथं पुनः शूद्रशब्देन शुगुत्पन्ना सूच्यत इति। उच्यते–तदाद्रवणात्। शुचमभिदुद्राव, शुचा वाऽभिदुद्रुवे, शुचा वा रैक्वमभिदुद्रावेति शूद्रः। अवयवार्थसंभवाद् रूढ्यर्थस्य

प्रकटार्थविवरणम्

वा[चा]यमिति। तथापि विद्यात्वसामान्यात्र विद्यान्तरेष्वधिकारापादकत्वमिति भावः। इदानीमभ्युपगमं परित्यजति—**अर्थवादस्थत्वादिति।** निषादस्थपतिशब्दस्य विधिवाक्यस्थत्वाद् घटतेऽधिकारप्रापकत्वम्; अस्य तु शूद्रशब्दस्यार्थवादगतत्वान्न संवर्गविद्यायामप्ययं शूद्रमधिकर्तुं शक्नोतीत्यर्थः। एवं सूत्राद् बहिरेव परिहारमुक्त्वा सूत्रयोजनया[1] परिहारान्तरं वक्तुमुपक्रमते—**शक्यते चायमित्यादिना।** जानश्रुतिर्हि बह्वन्नदोग्ध्रीषु काले[2] हर्म्यतले कदाचित् सुष्वाप। तस्योपरिष्टादन्तरिक्षे हंसेषु गच्छत्सु मध्ये अग्रेसरं हंसं पृष्ठगो हंसः प्रोवाच—'किं न पश्यसि परमधार्मिकस्य जानश्रुतेर्ज्योतिः द्युलोकलग्नम्; तत् त्वां धक्ष्यति' इत्युक्तोऽग्रेसरः प्रोवाच—कमेनं वराकं सन्तं सयुग्वानमिव रैक्वमेतद्वचनं त्वमात्थ ब्रवीषि। युग्वा गन्त्री तया सह वर्तते यो रैक्वो, यस्य ज्ञानफले सकलमपि कर्मफलमन्तर्भूतं स एवास्य वचनस्य योग्यः, नायमज्ञो जानश्रुतिरित्यर्थः। रैक्वं [शोकं] प्राप्तः, शोकेन वा स गृहीतः, शोकवशाद्वा

भाष्यभावप्रकाशिका

सिद्धार्थाविद्योतिनः स्वतः प्रापकत्वाभावादन्यपरस्य च मानान्तराविरोध एव प्रामाण्यस्वीकारात्, इह न्यायविरोधस्य च दर्शितत्वादिति भावः। किं चाऽर्थवादबलाद् विद्यामात्रेऽधिकारः कल्प्यते, किं वा संवर्गविद्यायाम्? न तावदाद्य इत्याह— **कामं वे[चे]ति।** अस्तु तर्हि द्वितीयः, तथा सति विद्यात्वाविशेषात् सर्वत्राधिकारप्राप्तिरिति शङ्कायामाह—**अर्थवादस्थत्वादिति।** तर्हि शूद्रपदस्य वैदिकस्यानर्थक्यं स्यादिति, तत्राह—**शक्यते चेति।** ननु जात्यन्तरे रूढस्य कथमर्थान्तरविषयत्वमिति चोदयति— **कथमिति।** यौगिकार्थसंनिधाने सति, अप्रतिपन्नरूढ्यर्थग्रहणाद्वरं प्रतिपन्नयौगिकार्थग्रहणमित्यभिप्रेत्य परिहरति—**उच्यत इत्यादिना। कंवर इति।** कमित्याक्षेपे। उ इत्यनर्थको निपातः। अर इत्यामन्त्रणे। वर इति वा सोपहासमवरमाह। अथवा वरो वराकः; निकृष्टोऽयं राजा। तमेतत्सन्तं प्राणिमात्रमित्यर्थः; युग्वा गन्त्री शकटी तया सह वर्तत इति सयुग्वा। शुगिति शोकः, शुचमभिदुद्राव

न्यायनिर्णयः

संवर्गविद्याविषयार्थवादस्थत्वादस्येति यावत्। संवर्गविद्याधिकारे शूद्रशब्दसिद्धे विद्यात्वादन्यत्रापि तदधिकारोऽस्त्विति द्वितीयमाशङ्क्याह— **अर्थवादेति।** तर्हि वैदिकशूद्रपदस्यानर्थक्यमित्याशङ्क्य सूत्रं योजयति— **शक्यते चेति।** जात्यन्तरे रूढस्य कथमन्यार्थतेति शङ्कते— **कथमिति।** यौगिकार्थसंनिधावदृष्टरूढिग्रहाद् वरं दृष्टयोगग्रहणमित्याह— **उच्यत इति।** जानश्रुती राजा बहुविधान्नपानदानशूरो ग्रीष्मे रात्रौ हर्म्ये सुष्वाप। तस्योर्ध्वमन्तरिक्षे दृष्टिगोचरे हंसेषु गच्छत्सु पृष्ठगामी हंसो हंसमग्रेसरं प्रत्युवाच— किं न पश्यसि परमधार्मिकस्य जानश्रुतेर्ज्योतिर्द्युलोकसंलग्नं तत् त्वां धक्ष्यतीति। ततः सोऽब्रवीत् कमेनं वराकं प्राणिमात्रं सन्तमरे सयुग्वानमिव रैक्वमेतद्वचनं ब्रवीषि। उशब्दोऽवधारणे। युग्वा गन्त्री तया सह वर्तते यो रैक्वः, यस्य धीफले कर्मफलं सर्वमन्तर्भूतं स एवैतदुक्तियोग्यो नायमज्ञो राजेत्यर्थः। श्रुतिमेतामाश्रित्य शुगस्येत्याद्यक्षराणि योजयति— **इत्यस्मादिति।** उत्पन्नशोकसूचनमनुपयोगीत्याशङ्क्याह— **आत्मन इति।** शूद्रशब्दस्य मुख्यार्थत्यागे हेतुमाह— **जातीति।** तदाद्रवणादित्यस्य शङ्कामाह— **कथमिति।** व्याख्येयमादाय त्रिधा व्याख्याति— **उच्यत इति।** शुचं शोकमभिदुद्राव प्राप्तवानित्यर्थः। शुचा वा कर्त्र्या स्वयमभिदुद्रुवे प्राप्त

१. अस्य = जानश्रुतेः तदनादरश्रवणात् शुगुत्पन्ना सा रैक्वेण शूद्रशब्देन सूच्यते। शूद्रशब्दस्य यौगिकार्थप्रदर्शनपरोऽयमंशः 'तदाद्रवणात्' इति। शोकेन रैक्वं प्रति गमनं च आख्यायिकया सूच्यते इत्यावृत्त्या योजना। न्यायरक्षामणिः।

२. 'बह्वन्नदो ग्रीष्मकाले' इति पाठः संभाव्यते।

चासंभवात्। दृश्यते चायमर्थोऽस्यामाख्यायिकायाम्।।३४।।

[1]क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्।।३५।।

इतश्च न जातिशूद्रो जानश्रुतिः। यत्कारणम्, प्रकरणनिरूपणेन क्षत्रियत्वमस्योत्तरत्र चैत्ररथेनाभिप्रतारिणा क्षत्रियेण समभिव्याहाराल्लिङ्गाद् गम्यते। उत्तरत्र हि संवर्गविद्यावाक्यशेषे चैत्ररथिरभिप्रतारी क्षत्रियः संकीर्त्यते– 'अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे' (छा. उ. ४।३।५) इति। चैत्ररथित्वं चाभिप्रतारिणः कापेययोगादवगन्तव्यम्। कापेययोगो हि चित्ररथस्यावगतः 'एतेन वै चित्ररथं कापेया अयाजयन्' (ताण्ड्य. ब्रा २०।१२।५) इति। समानान्वयानां

प्रकटार्थविवरणम्

रैक्वं प्रति गत इति यौगिकार्थसन्निधाने सत्यप्रतिपन्नरूढ्यर्थकल्पनाद् वरं संप्रतिपन्नयौगिकार्थकल्पनमिति भावः। ननु तस्माद्धंसवाक्यात् स्वस्यानादरश्रवणात् जानश्रुतेः शुगुत्पन्नेत्येतदेव कथमवगम्यते येनासौ शूद्रशब्देन सूच्यत इत्युच्येतेत्याशङ्क्याह— **दृश्यते चायमिति**।

क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्। शूद्रशब्दस्य यौगिकत्वे हेत्वन्तरमाह—**इतश्चेति**। शुनकस्यापत्यं कपिगोत्रं पुरोहितम्। राजानं चाभिप्रतारिणं नामतः, कक्षसेनस्यापत्यम्। तावुभौ भोजनायोपविष्टौ सूपकारेण परिविष्यमाणौ ब्रह्मचारी याचितवान् भिक्षामित्येतावत् प्रतीयते वाक्यशेषे, न चैत्ररथ इत्याशङ्क्याह—**चैत्ररथित्वं चेति**। योऽभिप्रतारी स एव चैत्ररथ इति

भाष्यभावप्रकाशिका

प्राप्तवानित्यर्थः। शुचा अभिदुद्रुवे शुचा कर्त्र्या प्राप्त इत्यर्थः। शुचा वा करणभूतया रैक्वं गतवान्। एवं तदाद्रवणादिति तच्छब्देन शुभ[शुग् वा] जानश्रुतिर्वा रैक्वो वा परामृश्यत इत्युक्तम्।।३४।।

क्षत्रियत्वावगतेश्च चैत्ररथेन लिङ्गात्।।३५।। समभिव्याहारादयमर्थोऽवगम्यत इत्युत्तरसूत्रतात्पर्यमाह—**इतश्चेति**। अभिप्रतारिणः कथं चैत्ररथित्वम्? चैत्ररथस्य वा कथं क्षत्रियत्वम्? तत्समभिव्याहारो वा जानश्रुतेः कथम्? समभिव्याहारेऽपि कथमस्य क्षत्रियत्वमिति? तदाह—**उत्तरत्र हीति**। अनेन चैत्ररथेन समानविद्यायां समभिव्याहाराल्लिङ्गादित्यर्थः। परिविष्यमाणेन [माणौ] सूदेन; ब्रह्मचारिभिक्षयाऽस्याशूद्रत्वं सूच्यत इत्यर्थः। ननु कथमभिप्रतारिणश्चैत्ररथित्वमिति? तदाह—**चैत्ररथित्वं चेति**। कापेया

न्यायनिर्णयः

इत्यर्थः। शुचा वा करणभूतया रैक्वं गतवानित्यर्थः। एवं तावत् तदाद्रवणादिति तच्छब्देन शुग् जानश्रुती रैक्वो वा गृह्यते। उक्तव्युत्पत्त्या शूद्रशब्दस्याधिकृतार्थत्वे पूर्वोक्तं न्यायं सूचयति— **अवयवेति**। हंसवाक्यादात्मनोऽनादरं श्रुत्वा जानश्रुतेः शुगुत्पन्नेत्येतदेव कथं गम्यते, येनासौ शूद्रशब्देन सूच्यते, तत्राह— **दृश्यते चेति**।।३४।।

शूद्रशब्दस्य यौगिकत्वे हेत्वन्तरमाह— **क्षत्रियत्वेति**। चशब्दार्थमाह— **इतश्चेति**। हेत्वन्तरमेव स्फोरयति— **यदिति**। कथमभिप्रतारिणश्चैत्ररथित्वं, चैत्ररथस्य वा कथं क्षत्रियत्वं, कथं वा जानश्रुतेस्तेन समभिव्याहारः, तस्मिन् सत्यपि वा कथं तस्य क्षत्रियत्वं, तदाह— **उत्तरत्रेति**। संवर्गविद्याविध्यनन्तरमर्थवादारम्भार्थोऽथशब्दः। हशब्दो वृत्तान्तावद्योती। शौनकः शुनकस्यापत्यं कापेयं कपिगोत्रं पुरोहितमभिप्रतारिणं च नाम्ना राजानं काक्षसेनिं कक्षसेनस्यापत्यं तौ भोक्तुमुपविष्टौ सूदेन परिविष्यमाणौ ब्रह्मचारी भिक्षितवानित्यर्थः। ब्रह्मचारिभिक्षयास्याऽशूद्रत्वेऽपि कथं चैत्ररथित्वं, तदाह— **चैत्रेति**। कापेययोगेऽपि कथं तस्य चैत्ररथित्वप्रथा, तत्राह— **कापेयेति**। अवगतिमेव छान्दोग्यश्रुत्या स्फुटयति— **एतेनेति**। द्विरात्रेणेति यावत्। चित्ररथस्य कापेययोगेऽपि

१. 'क्षत्रियत्वगतेश्च' इत्यादीनि सर्वाण्यपि सूत्राणि शूद्रामन्त्रणलिङ्गान्यथाकरणार्थानीति कल्पतरुः। पृ. ३५५।

च प्रायेण समानान्वया याजका भवन्ति। 'तस्माच्चैत्ररथिनर्मैकः क्षत्रपतिरजायत' इति च क्षत्रपतित्वावगमात् [१]क्षत्रियत्वमस्यावगन्तव्यम्। तेन क्षत्रियेणाभिप्रतारिणा सह समानायां विद्यायां संकीर्तनं जानश्रुतेरपि क्षत्रियत्वं सूचयति। समानानामेव हि प्रायेण समभिव्याहारा भवन्ति। [२]क्षत्तृप्रेषणाद्यैश्वर्ययोगाच्च जानश्रुतेः क्षत्रियत्वावगतिः। अतो न शूद्रस्याधिकारः।।३५।।

संस्कारपरामर्शात् तदभावाभिलापाच्च।।३६।।

इतश्च न शूद्रस्याधिकारः, यद् विद्याप्रदेशेषूपनयनादयः संस्काराः परामृश्यन्ते– 'तं होपनिन्ये' (श. ब्रा. ११।५।३।१३) 'अधीहि भगव इति होपससाद' (छा. उ. ७।१।१) 'ब्रह्मपरा ब्रह्मनिष्ठाः परं

प्रकटार्थविवरणम्

कापेययोगादवगन्तव्यम्; तत् कथमित्याह—**कापेययोगो हीति**। तत्तद्राजवंश्यानां तत्तत्पुरोहितवंश्या बाहुल्येन याजका भवन्ति; कापेययोगश्च पूर्वं चित्ररथस्यावगतः; तस्मादिदानीमपि कापेययोगादभिप्रतारी चैत्ररथ इत्यर्थः। तर्हि चित्ररथस्यैव क्षत्रियत्वं कुतः सिद्धम्, येन तत्साहचर्यात् जानश्रुतेः क्षत्रियत्वावगम इत्याशङ्क्याह—**तस्माच्चैत्ररथिनर्मेति**। क्षत्ता सूतः, तस्य प्रेषणं रैक्वान्वेषणाय। एवं जानश्रुतेः क्षत्रियत्वावगमात्र तस्य शूद्रशब्देन परामर्शात् शूद्राधिकारप्राप्तिरिति स्थितम्।

संस्कारपरामर्शात् तदभावाभिलापाच्च। शूद्राधिकाराभावे लिङ्गान्तरमाह—**इतश्चेत्यादिना**। **ब्रह्मपरा** वेदपारगाः [**ब्रह्मनिष्ठाः**]

भाष्यभावप्रकाशिका

अयाजयन्निति छन्दोगानां सत्रे श्रवणादित्यर्थः। ननु भवतु चित्ररथस्य कापेययोगः, तथाप्यभिप्रतारिणः कथं चैत्ररथित्वमिति? तत्राह—**समानान्वयानामिति**। चित्ररथस्य याजकेन कापेयेन योगाद् याज्योऽभिप्रतारी, चैत्ररथित्वाच्च क्षत्रियत्वमित्यर्थः। वचनादपि क्षत्रियत्वमित्याह—**तस्माच्चैत्रेति**। फलितमाह— **तेनेति**।।३५।।

न्यायनिर्णयः

कथमभिप्रतारिणश्चैत्ररथित्वं, तत्राह— **समानेति**। चित्ररथस्य याजकेन कापेयेन योगाद् याज्योऽभिप्रतारी चैत्ररथिः सिद्धः, तत्तत्पुरोहितवंश्यानामेव तत्तद्राजवंश्येषु प्रायो याजकत्वात्। चैत्ररथित्वाच्च क्षत्रियोऽभिप्रतारी, चित्ररथस्य क्षत्रियत्वात् तद्वंश्यस्य तद्योगादित्यर्थः। वचनादपि तस्य क्षत्रियत्वमित्याह— **तस्मादिति**। चित्ररथादित्यर्थः। तथापि क्षत्रियत्वे किं जातं जानश्रुतेरित्याशङ्क्याह— **तेनेति**। समभिव्याहारेऽपि कुतोऽस्य क्षत्रियत्वं, तत्राह— **समानानामिति**। शिष्याचार्ययोः स्वामिभृत्ययोश्च समभिव्याहारेऽपि वैषम्यमस्तीति प्रायेणेत्युक्तम्। तस्य क्षत्रियत्वे हेत्वन्तरमाह— **क्षत्त्रिति**। आदिशब्देन गोदानादिसंग्रहः। क्षत्रियत्वे संवर्गविद्याधिकारिणः सिद्धे फलितमाह— **अत इति**।३५।।

शूद्रस्यानधिकारे लिङ्गान्तरमाह— **संस्कारेति**। चशब्दार्थमाह— **इतश्चेति**। हेत्वन्तरं स्फोरयति— **यदिति**। आदिशब्देनाध्ययनाचार्यशुश्रूषादयो गृह्यन्ते। परामर्शं विशदयति— **तं हेति**। विद्यार्थिनं शिष्यमाचार्यः किलोपनीतवान्। अनुपनीतस्य विद्यादानायोगादिति यावत्। सनत्कुमारं प्रति नारदोऽपि विद्यार्थी मन्त्रमुच्चारयन्नुपसत्तिं कृतवानित्याह— **अधीहीति**। भारद्वाजादयः षड् ऋषयः [अ]परं ब्रह्म परत्वेनावगतवन्त इति ब्रह्मपरास्तद्ध्याननिष्ठाश्च ब्रह्मनिष्ठाः, परं च परमार्थभूतं ब्रह्म विचारयन्तो निर्णयार्थमेष पिप्पलादस्तज्जिज्ञासितं सर्वं वक्ष्यतीति निश्चित्य रिक्तहस्तानां गुरूपगमनायोगं मन्यमानाः समित्पाणयस्तमुपसन्नाः

---

१. क्षत्रियत्वमिति। क्षत्रश्चासौ पतिश्चेति कर्मधारय इति भावः।

२. पूर्वं वाक्योपक्रमे संदेहमभ्युपेत्यैव वाक्यशेषात् निर्णयः कृतः। इदानीं नैव संदेहः, शूद्रशब्दपरामर्शात् प्रागेव अमात्यप्रेषणादिना क्षत्रियत्वनिश्चयादित्याह— **क्षत्त्रिति**। द्र. कल्पतरुः ३५६।

ब्रह्मान्वेषमाणा एष ह वै तत् सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः' (प्र. उ. १।१) इति च। 'तान् हानुपनीयैव' (छा. उ. ५।११।७) इत्यपि प्रदर्शितैवोपनयनप्राप्तिर्भवति। शूद्रस्य च 'संस्काराभावोऽभिलप्यते, 'शूद्रश्चतुर्थो वर्ण एकजातिः' (गौ. ध. सू. २।१।५१) इत्येकजातित्वस्मरणात्। 'न शूद्रे पातकं किंचिन्न च संस्कारमर्हति' (मनु. १०।१२६) इत्यादिभिश्च।।३६।।

तदभावनिर्धारणे च प्रवृत्तेः।।३७।।

इतश्च न शूद्रस्याधिकारः। यत् सत्यवचनेन शूद्रत्वाभावे निर्धारिते जाबालं गौतम उपनेतुमनुशासितुं

प्रकटार्थविवरणम्

कार्यब्रह्मनिष्ठाः। ननु नास्त्युपनयननियमः, वैश्वानरविद्यायामभावादित्याशङ्क्याह **तान् हानुपनीयैवेति**। तानौपमन्यवप्रभृतीननुपनीयैवाश्वपतिः प्रोवाचेति विशेषप्रतिषेधात् उपनयनप्राप्तिः प्रदर्शिता भवतीत्यर्थः। अस्तु, ततः किमित्यत आह— **शूद्रस्य चेति**। पातकमभक्ष्यभक्षणादिकृतम्।

तदभावनिर्धारणे च प्रवृत्तेः। किंगोत्रोऽसीति पृष्टे नाहं वेद, नापि मातेति जाबालेनोक्ते गौतम आह—नैतत् सत्यवचनमब्राह्मणो विवक्तुमर्हति, मायावित्वसंभवाच्छूद्रस्य। अतः त्वामुपनेष्ये, न सत्यवचनात् अतिक्रान्तोऽसीत्यर्थः।

भाष्यभावप्रकाशिका

संस्कारपरामर्शात्तदभावाभिलापाच्च।।३६।। ननु अनुपनीतानामप्यधिकारः श्रूयत इत्याशङ्क्याह— **तान् हेति**। प्राप्तिपूर्वकत्वात्प्रतिषेधस्य प्राप्तोपनयनानां द्विजादीना [द्विजातीना] मधिकार इत्यर्थः।।३६।।

तदभावनिर्धारणे च प्रवृत्तेः।।३७।। बहुलिङ्गविरोधे एकस्यैव शूद्रशब्दस्य बाधो युक्त इत्यभिप्रेत्य लिङ्गान्तराण्याह— **तदभावनिर्धारणे चेति**।।३७।।

न्यायनिर्णयः

किलेत्याह— **ब्रह्मेति**। अनुपनीतानामपि वैश्वानरविद्यायामधिकारश्रुतेरनियतमुपनयनमित्याशङ्क्याह— **तानिति**। औपमन्यवप्रभृतीन् ब्राह्मणाननुपनीयैवाश्वपती राजोवाचेति निषेधात् तस्य प्राप्तिपूर्वत्वात् प्राप्तोपनयनानां द्विजानामेवाधिकारः इत्यर्थः। संस्कारपरामर्शादिति व्याख्यायावशिष्टं व्याचष्टे— **शूद्रस्येति**। एकजातिरुपनयनरहितः। पातकं भक्ष्याभक्ष्यविभागाभावकृतम्। आदिशब्देन 'पद्यु ह वा एतत्' इत्यादि गृह्यते।।३६।।

शूद्रस्य विद्यानधिकारे लिङ्गान्तरमाह— **तदभावेति**। चकारार्थमाह— **इतश्चेति**। तदेव स्फुटयति— **यदिति**। सत्यकामो जाबालो ब्रह्मचर्यकालमालक्ष्य प्रमीतपितृकः स्वां मातरं जबालामपृच्छत्— भगवति, कस्यचिद् गुरोरावासमासाद्य ब्रह्मचर्यमाचरितुमिच्छामि, ब्रवीतु भवती किंगोत्रोऽहमिति। सा तु— त्वत्पितृपरिचरणपरतया नाहं तदवेदिषम्, जबालाऽहमस्मि, त्वं जाबालोऽसीत्येतावदवगतमवादीत्। ततः सत्यकामो गौतममभ्येत्याभ्यभाषत, ब्रह्मचर्यं भगवति चरितुमिच्छाम्यनुगृहणातु मां भवानिति। ततो गौतमेन किंगोत्रोऽसीति पृष्टो[पृष्टे] नाहं वेद, नापि मातेति तेनोक्ते तदीयसत्यवचनेन शूद्रस्य मायावित्वयोगात् तदशूद्रत्वे सिद्धे तमुपनेतुमध्यापयितुं चाचार्यो यस्मात् प्रवृत्तस्तस्मान्न शूद्रस्याधिकारोऽस्तीत्यर्थः। कथमुक्तनीत्या गौतमस्य

---

१. भाष्ये **संस्काराभाव** इति। 'न शूद्रे पातकम्' इति वचनेन शूद्रस्य संस्कारो निषिद्धः। 'मन्त्रवर्जं न दुष्यति' इति अमन्त्रकः सोऽभ्यनुज्ञातः। अयं चामन्त्रकसंस्काराङ्गीकारो जातकर्मादिविधिनिमित्तसंस्कारविषय एव। न तूपनयनादिविषयः। 'शूद्रश्चतुर्थो वर्ण एकजातिः' इति द्वितीयजन्मप्रयोजकसंस्कारनिषेधादिति। द्र. ब्र. वि. पृ. ४२५।

च प्रववृते। [१]''नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरोप त्वा नेष्ये न सत्यादगाः' (छा. उ. ४।४।५) इति श्रुतिलिङ्गात्।।३७।।

[२]श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च।।३८।।

इतश्च न शूद्रस्याधिकारः। यदस्य स्मृतेः श्रवणाध्ययनार्थप्रतिषेधो भवति। वेदश्रवणप्रतिषेधो वेदाध्ययनप्रतिषेधस्तदर्थज्ञानानुष्ठानयोश्च प्रतिषेधः शूद्रस्य स्मर्यते। श्रवणप्रतिषेधस्तावत्–'अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम्' (गौ. ध. सू. २।३।४) इति। 'पद्यु ह वा एतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतव्यम्' इति च। अत एवाध्ययनप्रतिषेधः। यस्य हि समीपेऽपि नाध्येतव्यं भवति स कथमश्रुतमधीयीत। भवति च 'वेदोच्चारणे जिह्वाच्छेदो धारणे शरीरभेद' इति। अत एव चार्थादर्थज्ञानानुष्ठानयोः प्रतिषेधो भवति– 'न शूद्राय मतिं दद्यात्' (मनु. ४-८०) इति, 'द्विजातीनामध्ययनमिज्या दानम्' (गौ. ध. सू. २।१।१) इति च। येषां पुनः पूर्वकृतसंस्कारवशाद् विदुरधर्मव्याधप्रभृतीनां ज्ञानोत्पत्तिस्तेषां न शक्यते फलप्राप्तिः प्रतिषेद्धुम्, ज्ञानस्यैकान्तिकफलत्वात्। 'श्रावयेच्चतुरो वर्णान्' (म. भा, १२/३२७/४९) इति चेतिहासपुराणाधिगमे चातुर्वर्ण्यस्याधिकारस्मरणात्।

प्रकटार्थविवरणम्

श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च। त्रपुजतुभ्यां सीसकलाक्षाभ्यां तप्ताभ्यामित्यर्थः। पद्यु पादयुक्तम्। दानं नित्यम्। नैमित्तिकं तु दानं शूद्रस्याप्यस्ति। यच्चोक्तं विदुरादीनां ज्ञानित्वं स्मर्यते पुराणेष्विति, तत्राह—**येषां पुनरिति**। साधकस्याधिकारिचिन्ता प्रवृत्ता,

भाष्यभावप्रकाशिका

श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च।।३८।। विदुरादीनां स्मृतिविरोधाद् ज्ञानाभावस्य वक्तुमयुक्तत्वादुत्पन्नज्ञानानां मुक्तिरेव

न्यायनिर्णयः

प्रवृत्त्यौन्मुख्यं, तत्राह— **नेति**। एतत् सत्यवचनं विवक्तुं विविच्य निःसंदिग्धं वक्तुमित्येतत्। 'न सत्यादगाः' सत्यवचनान्नातिगतोऽसीत्यर्थः।।३७।।

श्रौतमिव लिङ्गं शूद्रस्य विद्यानधिकारे स्मार्तं तद्दर्शयति— **श्रवणेति**। तद् व्याकरोति— **इतश्चेति**। उक्तमेव विभजते— **वेदेति**। तत्र श्रवणप्रतिषेधं स्वहस्तयति— **श्रवणेति**। पठ्यमानं वेदं समीपे प्रमादादेव शृण्वतः शूद्रस्य प्रत्यवायप्रायश्चित्तालोचनायां सीसलाक्षाभ्यां संतप्ताभ्यामतिद्रुताभ्यां श्रोत्रद्वयपूरणं कार्यमित्यर्थः। पद्यु पदा युक्तम्। संचारसमर्थमिति यावत्। श्रवणनिषेधादेवार्थादध्ययननिषेधोऽपि सिध्यतीत्याह— **अत इति**। तदेव स्फुटयति— **यस्येति**। न केवलमार्थिकोऽध्ययननिषेधः, श्रौतश्चेत्याह— **भवतीति**। अध्ययननिषेधानुपपत्त्या ज्ञानानुष्ठानयोरपि स सिध्यतीत्याह— **अत इति**। साक्षादपि ज्ञाननिषेधमाह— **भवतीति**। अनुष्ठाननिषेधमपि शाब्दं दर्शयति— **द्विजातीनामिति**। दानमत्र नित्यमिष्टम्, नैमित्तिकस्य शूद्रेऽपि योगात्। यत्तु विदुरादीनां ज्ञानित्वं स्मृतिसिद्धमिति, तत्राह— **येषामिति**। साधकस्याधिकारचिन्ता, न सिद्धस्येत्याह— **तेषामिति**। विदुरादीनां ज्ञानाभावस्य स्मृतिविरोधेन दुर्वचत्वादुत्पन्नज्ञानानां तेषां मुक्तिरेव। सामग्र्याः साध्याव्यभिचारादित्यर्थः। कुतस्तर्हि शूद्राणां

---

१. नन्विदं ब्राह्मण्यनिर्धारणं, न शूद्रत्वाभावनिर्धारणमिति चेत्, न। अत्राब्राह्मणपदस्य सामान्यपरस्यापि वाक्यशेषवशेन शूद्रपरत्वात्। द्र. न्यायरक्षामणिः, ३१४।

२. सूत्रे श्रवणम्, अध्ययनं चार्थः प्रयोजनं यस्य शूद्रसमीपे वेदोच्चारणस्य तस्य प्रतिषेधादित्येकोऽर्थः। पुनश्च श्रवणं चाध्ययनं चार्थश्चेति द्वन्द्वः। अर्थपदं प्रयोजनपरं सत् धारणाभिधायि। तदेवाभिधेयपरं सत् वेदार्थज्ञानं तदनुष्ठानं च लक्षयति, तेषां प्रतिषेधादिति। द्र. न्यायरक्षामणिः।

वेदपूर्वकस्तु नास्त्यधिकारः शूद्राणामिति स्थितम्।।३८।।

।।इति नवममपशूद्राधिकरणम्।।

१०।।कम्पनाधिकरणम्।।सू. ३९।।

[1]कम्पनात्।।३९।।

अवसितः प्रासङ्गिकोऽधिकारविचारः। प्रकृतामेवेदानीं वाक्यार्थविचारणां प्रवर्तयिष्यामः। 'यदिदं किंच जगत् सर्वं प्राण एजति निःसृतम्। महद् भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति' (क.उ. २।६।२)

शारीरकन्यायसंग्रहः

कम्पनात्।।३९।। एकस्याः श्रुतेरेकवाक्यतासाकाङ्क्षप्रकरणानुगृहीतबहुलिङ्गविरोधे बाधो युक्तः, प्रत्ययसंवाद-तात्पर्यादेकवाक्यतासापेक्षत्वादागमस्य इति [2]प्रकरणानुगृहीतजगत्कम्पनाश्रयत्वभयहेतुत्वामृतत्वसाधनत्वलिङ्गैः प्राणशब्दो ब्रह्मपरतया निर्णीतः।

प्रकटार्थविवरणम्

न सिद्धस्येत्यर्थः। साधकस्याप्यस्त्युपायान्तरमित्याह—**श्रावयेदिति**। इति नवममपशूद्राधिकरणम्।।

कम्पनात्। सङ्गतिं कथयति—**अवसित इति**। काठकवाक्यं पठति—**यदिदमिति**। एजतिधात्वर्थस्य कम्पनस्य सूत्रकारेण

भाष्यभावप्रकाशिका

साधनस्य साध्याव्यभिचारादित्याह—**तेषामिति**। तर्हि शूद्राणां कथं ज्ञानोत्पत्तिरिति? तत्राह—**श्रावयेदिति**। क्व तर्हि शूद्रस्यानधिकार इति? तदाह—**वेदपूर्वक इति**।।३८।। इति नवममपशूद्राधिकरणम्।

कम्पनात्।।३९।। सूत्राक्षरानुगमा[भा]वान्नेदं विषयवाक्यमिति शङ्कायामक्षरानुगमाभावेऽप्यर्थानुगमोऽस्तीत्याह—

न्यायनिर्णयः

ज्ञानोत्पत्तिः, तत्राह— **श्रावयेदिति**। कुत्र तर्हि तदधिकारो वार्यते, तत्राह— **वेदेति**। आर्थवादिकशूद्रशब्दस्योक्तनीत्या क्षत्रियेऽन्वयात्र जातिशूद्रस्य वेदद्वाराऽधिकारो विद्यायामित्युपसंहरति— **इति स्थितमिति**।।३८।। इति नवममपशूद्राधिकरणम्।।

बहुलिङ्गविरोधादेकस्य शूद्रशब्दस्य मुख्यार्थबाधवद् वायुसहितजगत्कम्पनाश्रयत्वभयहेतुत्वामृतत्वसाधनत्वलिङ्गैर्बहुभिर्विरोधात् प्राणश्रुतेरेकस्या मुख्यार्थत्यागमाह— **कम्पनादिति**। आपादसमाप्तेरुत्तरसंदर्भस्य संगतिमाह— **अवसित इति**। अस्याधिकरण-स्योदाहरणतया काठकवाक्यं पठति— **यदिति**। यत्किंचेदमविशिष्टं जगत् तत् सर्वं प्राणे निमित्ते सत्येजति चेष्टते। तच्च तस्मादेव निःसृतमुत्पन्नम्। तच्च प्राणाख्यं जगत्कारणं महदपरिच्छिन्नं, बिभेत्यस्मादिति भयं तदेव। भयहेतुत्वं निरूपयति— **वज्रमिति**। उद्यतं वज्रमिवेत्यर्थः। प्राणतत्त्वधियोऽमृतत्वहेतुत्वमाह— **य इति**। सूत्राक्षराननुगमान्नेदमुदाहरणमित्याशङ्क्याह— **एतदिति**। एजतिधात्वर्थस्य

---

१. अत्र प्राणः, अशनिरूपेण परिणतो वायुश्चेति द्वयमुपास्यमिति पूर्वपक्षः। सिद्धान्तो ब्रह्म ज्ञेयमिति। सूत्रे 'शब्दादेव प्रमितः' इति सूत्रात् मण्डूकप्लुत्या 'शब्दात्' 'प्रमितः' इति पदद्वयमनुवर्तते। शब्दः = सर्वशब्दः, प्रमितः = अवगतः। अधिकाराद् ब्रह्मेति लभ्यते। तथा च सर्वशब्दवशात् सकलजगत्कम्पयितृत्वेनावगतः ब्रह्मैव, सवायुकस्य जगतः कम्पनात् तद्रूपलिङ्गात् इत्यर्थः। द्र. भामती, कल्पतरुश्च। न्यायरक्षामणौ 'शब्दा'दित्येवानुवर्तितम्। प्राणशब्दात् इत्यर्थः। ब्रह्म पक्षः, प्राणशब्दात् प्रतीयते इति साध्यम्। अन्यत् समानम्। ब्रह्मविद्याभरणे तु–प्राणो वज्रं चेति पक्षाध्याहारः। ब्रह्मेति साध्यम्, सौत्रं कम्पनपदं भावव्युत्पत्त्या सर्वजगच्चालनं प्राणस्य ब्रह्मत्वसाधकं समर्पयति। करणव्युत्पत्त्या वज्रस्य ब्रह्मत्वसाधकम् अग्निसूर्यादिभयानकत्वं समर्पयति। ब्रह्मगतयोरेव तयोरत्र ग्राह्यत्वोपपादनार्थं पूर्वोत्तरपर्यालोचनं कृतम्। द्र. ब्र. वि. ४३२-४३३।

२. 'प्रत्ययसंवादस्य तात्पर्यनिमित्तत्वादेकवाक्यतासापेक्षत्वादागमस्य— इति न्यायेन' इति पाठः संभाव्यते ग्रन्थकृच्छैलीपर्यालोचनात्।

इति। एतद्वाक्यम् 'एजृ कम्पने' इति धात्वर्थानुगमाल्लक्षितम्। अस्मिन् वाक्ये सर्वमिदं जगत् प्राणाश्रयं स्पन्दते, महच्च किंचिद् भयकारणं वज्रशब्दितमुद्यतं, तद्विज्ञानाच्चामृतत्वप्राप्तिरिति श्रूयते। तत्र कोऽसौ प्राणः, किं तद् भयानकं वज्रमित्यप्रतिपत्तेर्विचारे क्रियमाणे प्राप्तं तावत् प्रसिद्धेः पञ्चवृत्तिर्वायुः प्राण इति। प्रसिद्धेरेव चाशनिर्वज्रं स्यात्। वायोश्चेदं माहात्म्यं संकीर्त्यते। कथम्? सर्वमिदं जगत् पञ्चवृत्तौ वायौ प्राणशब्दिते प्रतिष्ठायैजति। वायुनिमित्तमेव च महद् भयानकं वज्रमुद्यम्यते। वायौ हि पर्जन्यभावेन विवर्तमाने विद्युत्स्तनयित्नुवृष्ट्यशनयो विवर्तन्त इत्याचक्षते। वायुविज्ञानादेव चेदममृतत्वम्। तथाहि श्रुत्यन्तरम्–'वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्युं जयति य एवं वेद' (बृ. उ. ३।३।२) इति। तस्माद् वायुरयमिह प्रतिपत्तव्य इति।

प्रकटार्थविवरणम्

ग्रहणात् एजतिपदयुक्तमेतद् वाक्यं सूत्रितमित्यर्थः। आपातप्रतिपन्नमर्थमाह—**अस्मिन् वाक्य इति।** पूर्वत्र साङ्गाध्ययनविध्यन्यथानुपपत्त्या शूद्रश्रवणलिङ्गस्य बाधो दर्शितः; इह तु प्राण इति श्रुतिरमृतत्वं च लिङ्गम्; तयोर्विरोधे श्रुतिरेव बलीयसीत्यभिप्रेत्याह—**प्रसिद्धेः पञ्चवृत्तिरिति।** ननु "अत एव प्राणः" इत्यत्र ब्रह्मलिङ्गेन श्रुतेर्बाधो दर्शितः। इहापि सर्वमिदं जगत् प्राणे निस्सृतं प्रतिष्ठितमेजतीति जगदाश्रयत्वं ब्रह्मलिङ्गं प्रतीयत इत्याशङ्क्याह—**वायोश्चेदमिति। प्रतिष्ठाय** प्राणनिमित्तां प्रतिष्ठां लब्ध्वा जगच्चलतीति प्रसिद्धम्; ततो नेदं ब्रह्मलिङ्गं स्पष्टमिति भावः। वज्रशब्दादपि न ब्रह्म परिग्राह्यमित्याह—**वायुनिमित्तमेव चेति। व्यष्टिः** विशेषः व्यावृत्तं रूपम्; समष्टिः समनुगताकारः। यस्मात् समष्टिव्यष्ट्यात्मकं तत्रा[त्मकसूत्रा]त्मज्ञानादमृतत्वं श्रुतम्, तस्मादित्युपसंहारः।

भाष्यभावप्रकाशिका

एजृ कम्पन इति। संशयविषयं दर्शयितुं वाक्ये प्रतीयमानार्थं संक्षेपतो दर्शयति—**अस्मिन् वाक्य इत्यादिना।** संशयकारणमाह—**अप्रतिपत्तेरिति।** ननु "प्राणस्तथानुगमादि" ति निर्णीतं प्राणशब्दस्य ब्रह्मपरत्वम्, तद्वदिहापि स्यादिति, मैवम्; तद्वदिह तल्लिङ्गाभावादित्याह—**वायोश्चेदमिति।** ननु भयहेतुतया वज्रोद्गमनहेतुत्वेन वा वज्रशब्दत्वं सर्वकारणत्वाद् ब्रह्मणो युक्तम्, न प्राणस्येति, तत्राह—**वायुनिमित्तमिति।** वायोरपि वज्रकारणतया तच्छब्दत्वं युक्तमित्यर्थः।

न्यायनिर्णयः

कम्पनस्य सूत्रणादेजतिपदयुक्तमेतद्वाक्यं सूत्रितमित्यर्थः। वाक्ये प्रातीतिकमर्थं संक्षिप्याह— **अस्मिन्निति।** सहेतुकं संशयमुक्त्वा श्रुत्या पूर्वपक्षयति— **तत्रेत्यादिना।** 'शब्दादेव प्रमितः' इत्यत्र ब्रह्मवाक्ये जीवानुवादो ब्रह्मैक्यज्ञानायेत्युक्तम्। इह तु प्राणस्य स्वरूपेण कल्पितस्य न ब्रह्मैक्यं यतोऽनूद्येत, तस्मादुपास्तिविधिरिति प्रत्यवस्थीयते। सिद्धान्ते तु निर्विशेषे ब्रह्मण्युक्तश्रुत्यन्वयादस्ति श्रुत्यादिसंगतिः। फलं तु पूर्वोत्तरपक्षयोरुपास्तिर्ज्ञानं चेति। नन्वतिदेशाधिकरणे प्रातर्दने विचारे च प्राणशब्दस्य ब्रह्मार्थत्वमुक्तम्, तथेहापीत्यनर्थकमधिकरणम्। मैवम्। 'प्राणमेवाभिसंविशन्ति' इत्यत्र निरपेक्षकारणत्वपरैवकारवत्, 'प्राणोऽस्मि प्रज्ञात्मा' इत्यादावुपक्रमोपसंहारैकरूप्यवच्चात्र तदभावादगतार्थत्वादित्यभिप्रेत्याह— **वायोश्चेति।** जगत्कम्पनहेतुत्वं ब्रह्मलिङ्गमिहापि भाति, तत्कथं वायोरिदं माहात्म्यमित्याह— **कथमिति।** उक्तलिङ्गमन्यथयति— **सर्वमिति।** तथापि जगद्भयहेतुत्वं ब्रह्मलिङ्गमित्याशङ्क्याह— **वाय्विति।** न तावदत्रोपमा, तद्वाचकाभावात्। न च ब्रह्मनिमित्तं भयानकं वज्रमुद्यम्यते, मानाभावात्। न चेदमेव मानं, वायुनिमित्तत्वेन तदुद्यमनोक्तेरित्यर्थः। कथं वायोरपि वज्रोद्यमहेतुत्वं, तत्रापि मानाभावाद् वाक्यस्य साधारण्यात्, तत्राह— **वायौ हीति।** तथापि ज्ञानस्यामृतत्वहेतुत्वं ब्रह्मलिङ्गमित्याशङ्क्याह— **वाय्विति।** तत्र बृहदारण्यकमनुकूलयति— **तथाहीति।** व्यष्टिर्विशेषः। समष्टिः सामान्यम्। प्राणवज्रश्रुतिभ्यां सिद्धमुपसंहरति— **तस्मादिति।**

एवं प्राप्ते ब्रूमः–ब्रह्मैवेदमिह प्रतिपत्तव्यम्। कुतः? पूर्वोत्तरालोचनात्। पूर्वोत्तरयोर्हि ग्रन्थभागयोर्ब्रह्मैव निर्दिश्यमानमुपलभामहे। इहैव कथमकस्मादन्तराले वायुं निर्दिश्यमानं प्रतिपद्येमहि। पूर्वत्र तावत् 'तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते। तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन' (का. उ. २।६।१) इति ब्रह्म निर्दिष्टम्। तदेवेहापि संनिधानात्, जगत्सर्वं प्राण एजतीति च लोकाश्रयत्वप्रत्यभिज्ञानान्निर्दिष्टमिति गम्यते। प्राणशब्दोऽप्ययं परमात्मन्येव प्रयुक्तः, 'प्राणस्य प्राणम्' (बृ. उ. ४।४।१८) इति दर्शनात्। एजयितृत्वमपीदं परमात्मन एवोपपद्यते, न वायुमात्रस्य। तथा चोक्तम्–'न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ' (क. उ. २।५।५) इति। उत्तरत्रापि 'भयादस्याग्निस्तपति भयात् तपति सूर्यः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः' (क. उ. २।६।३) इति ब्रह्मैव निर्देक्ष्यते, न वायुः। सवायुकस्य जगतो भयहेतुत्वाभिधानात्। तदेवेहापि संनिधानाद्, महद्भयं वज्रमुद्यतमिति च

प्रकटार्थविवरणम्

उत्सूत्रमेव सिद्धान्तमाह—**ब्रह्मैवेदमिति**। पूर्वापरवाक्यैकवाक्यतानुगृहीतसकललोकाश्रयत्वलिङ्गं प्राणश्रुतेः बाधकमिति भावः। किं च ब्रह्मणि लाक्षणिकोऽपि प्राणशब्दो नात्यन्तमप्रसिद्ध इत्याह—**प्राणशब्दो ह्ययमिति**। इदानीं सूत्रं योजयितुमुपक्रमते—**एजयितृत्वमपीत्यादिना**। सवायुकस्य जगतः कम्पनश्रवणादपि न वायुः प्राण इत्यर्थः। कथं तर्हि वज्रशब्दः सङ्गच्छत इत्याशङ्क्याह—

भाष्यभावप्रकाशिका

सर्वशब्दात् सवायुकस्य जगतः कम्पनात् परमात्मैव पूर्वापरशब्दात् प्रमितोऽत्राप्यनुषज्यत इति परिहरति—**ब्रह्मैवेति**। ननु अस्तु पूर्वस्मिन् वाक्ये ब्रह्म निर्दिष्टम्, तथापि कथं तदेवेहोच्यत इति शङ्कायां प्रकरणाल्लिङ्गप्रत्यभिज्ञानाच्चेत्याह—**तदेवेहापीति**। ननु श्रुत्या मुख्यप्राणेऽवगते कथं प्रकरणादिनाऽर्थान्तरकल्पनेति? तत्राह—**प्राणशब्दोऽपीति**। एकवाक्यतासाकाङ्क्षप्रकरणानुगृहीतबहुलिङ्गविरोधे ब्रह्मणि प्रयुक्तपूर्वत्वात् प्राणशब्दस्य मुख्यार्थबाधो युक्त इत्यर्थः। भयहेतुत्वलिङ्गप्रत्यभिज्ञानादपि ब्रह्मैवावगम्यतेऽत्रापीति वक्तुमुत्तरत्रापि ब्रह्मनिर्देशमाह—**उत्तरत्रापीति**। ननु अशनिलक्षणे वज्रे प्रसिद्धस्य वज्रशब्दस्य ब्रह्मणि

न्यायनिर्णयः

आध्यात्मिकाधिदैविकवायूपास्त्यर्थं वाक्यमित्युक्तमनूद्य सिद्धान्तयति— **एवमिति**। बहिरेव प्रतिजानीते— **ब्रह्मेति**। वाक्यस्य वायूपास्तिपरत्वे श्रौते कुतो ब्रह्मधीरित्याह— **कुत इति**। पूर्वोत्तरवाक्यैकवाक्यतानुगृहीतं सर्वलोकाश्रयत्वादिलिङ्गं प्राणश्रुतेर्बाधकमित्याह— **पूर्वेति**। तत्र वाक्यैकवाक्यत्वं विवृणोति— **पूर्वोत्तरयोरिति**। तथाप्येजतिवाक्ये वायुरुच्यतामित्याशङ्क्य वाक्यैक्यसंभवे न तद् भेत्तव्यमित्याह— **इहैवेति**। पूर्ववाक्यस्य कुतो ब्रह्मार्थत्वं, तत्राह— **पूर्वत्रेति**। शुक्रं शुभ्रं ज्योतिष्मत्। तस्यैव पूर्णतामह— **तद् ब्रह्मेति**। तस्य कूटस्थतामाह— **तदेवेति**। तस्य सर्वाधिष्ठानतामाह— **तस्मिन्निति**। तदेव व्यतिरेकमुखेनाह— **तदु नेति**। तथापि कथं तदेवात्र वाच्यमित्याशङ्क्य प्रकरणात्, लिङ्गप्रत्यभिज्ञानाच्चेत्याह— **तदेवेति**। प्राणश्रुत्या मुख्यप्राणे सिद्धे कथं प्रकरणादिनाऽर्थान्तरधीरित्याशङ्क्याह— **प्राणेति**। एकवाक्यताकाङ्क्षप्रकरणानुगृहीतबहुलिङ्गविरोधे ब्रह्मणि प्रयुक्तपूर्वप्राणशब्दस्य न मुख्यार्थोऽस्तीत्यर्थः। उत्सूत्रं सिद्धान्तमुक्त्वा सर्वजगत्कम्पहेतुत्वं लिङ्गान्तरं सूत्रयोजनया दर्शयति— **एजयितृत्वमिति**। तत्र हेतुः— **तथा चेति**। केन तर्हि मर्त्यानां जीवनं, तत्राह— **इतरेणेति**। इतरं स्फोरयति— **यस्मिन्निति**। पूर्वत्र ब्रह्मोक्तेरत्रापि तदेकवाक्यत्वात् तदेवोक्तमित्युक्तम्। इदानीमुत्तरवाक्येऽपि ब्रह्मोक्तिमाह— **उत्तरत्रेति**। अस्येश्वरस्य भयादग्निसूर्यौ तपतः। इन्द्रादयः स्वव्यापारेषु धावन्ति। मृत्योरुक्तानपेक्ष्य पञ्चमत्वम्। कथमत्र ब्रह्मोक्तं, वायुरेवाग्न्यादिभयकारणं किं न स्यात्, तत्राह— **सवायुकस्येति**। तथापि कथं प्रकृते ब्रह्मोक्तिरित्याशङ्क्य प्रकरणानुगृहीतभयहेतुत्वलिङ्गप्रत्यभिज्ञानादित्याह— **तदेवेति**। अशनौ

भयहेतुत्वप्रत्यभिज्ञानान्निर्दिष्टमिति गम्यते। वज्रशब्दोऽप्ययं भयहेतुत्वसामान्यात् प्रयुक्तः। यथा हि वज्रमुद्यतं ममैव शिरसि निपतेद् यद्यहमस्य शासनं न कुर्यामित्यनेन भयेन जनो नियमेन राजादिशासने प्रवर्तते, एवमिदमग्निवायुसूर्यादिकं जगदस्मादेव ब्रह्मणो बिभ्यन्नियमेन स्वव्यापारे प्रवर्तत इति भयानकं वज्रोपमितं ब्रह्म। तथा च ब्रह्मविषयं श्रुत्यन्तरम्—'भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः। भीषाऽस्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चमः' (तै. उ. २।८।१) इति। अमृतत्वफलश्रवणादपि ब्रह्मैवेदमिति गम्यते। ब्रह्मज्ञानाद्ध्यमृतत्वप्राप्तिः। 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे. उ. ३।८) इति मन्त्रवर्णात्। यत्तु वायुविज्ञानात् क्वचिदमृतत्वमभिहितं तदापेक्षिकम्। तत्रैव प्रकरणान्तरकरणेन परमात्मानमभिधाय 'अतोऽन्यदार्तम्' (बृ. उ. ३।४२) इति वाय्वादेरार्तत्वाभिधानात्। प्रकरणादप्यत्र परमात्मनिश्चयः। 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वद' (क. उ. १।२।१४) इति परमात्मनः पृष्टत्वात्।।३९।।

।।इति दशमं कम्पनाधिकरणम्।।

शारीरकन्यायसंग्रहः

११।।ज्योतिरधिकरणम्।।सू. ४०।।

ज्योतिर्दर्शनात्।।४०।। श्रुतिलिङ्गाभ्यामुपसंहारसापेक्षवाक्योपक्रमगतेन प्रकरणेनानुगृहीता श्रुतिर्बलीयसी, एकवाक्यतासिद्धेः—इति न्यायेन शरीरादुत्थितस्यानन्तरमुपसंपत्तव्यत्वमादित्यस्य नाडीखण्डे दृष्टमिति लिङ्गानुगृहीतां ज्योतिःश्रुतिं बाधित्वा अपहतपाप्मादिप्रकरणानुगृहीतोत्तमपुरुषश्रुत्या ज्योतिःश्रुतिर्ब्रह्मपरतया नीता।

प्रकटार्थविवरणम्

वज्रशब्दोऽप्ययमिति। किं च निरुपचरितामृतत्वश्रवणाच्च प्राणो ब्रह्मैवेत्याह—**अमृतत्वेत्यादिना।**

।।इति दशमं कम्पनाधिकरणम्।।

भाष्यभावप्रकाशिका

प्रयोगो न युक्त इति, तत्राह—**वज्रशब्दोऽपीति।** तत्र भयहेतौ ब्रह्मणि प्रयोगोपपत्तिं दर्शयति—**यथा हीति।** भयहेतुत्वस्य श्रुत्यन्तरे ब्रह्मणोऽवगमात् तत्प्रत्यभिज्ञानादपि ब्रह्मैव प्रतिपाद्यत इत्याह—**तथा चेति। तदापेक्षिकमिति।** "अप पुनर्मृत्युं जयति" इति अपमृत्युजयस्योक्तत्वादित्यर्थः। इतश्चापेक्षिकमित्याह—**तत्रैवेति।** तत्रैव पञ्चमप्रपाठके सूत्रात्माभिधानानन्तरमेव परमात्मानमन्तर्यामिणं प्रकृत्य तद्व्यतिरिक्तस्य विनाशित्वप्रतिपादनादित्यर्थः।।३९।।

।।इति दशमं कम्पनाधिकरणम्।।

न्यायनिर्णयः

प्रसिद्धवज्रशब्दस्य ब्रह्मविरोधित्वान्नात्र ब्रह्मोक्तमित्याशङ्क्याह— **वज्रेति।** तस्य भयहेतौ ब्रह्मणि प्रवृत्तिं दृष्टान्तेन स्फुटयति— **यथेति।** भयहेतुत्वस्य श्रुत्यन्तरे ब्रह्मणः सिद्धेस्तत्प्रत्यभिज्ञानादपि ब्रह्मैवेदमित्याह— **तथा चेति।** भीषा भयेनास्माद् ब्रह्मणो निमित्तादिति यावत्। ब्रह्मैवात्र प्रतिपाद्यमित्यत्र लिङ्गान्तरमाह— **अमृतत्वेति।** श्रुतस्य फलस्य ब्रह्मधिया व्याप्तिमाह— **ब्रह्मेति।** व्याप्तिभङ्गमुक्तमनूद्य प्रत्याह— **यत्त्विति।** 'अप पुनर्मृत्युं जयति' इत्यपमृत्युजयस्योक्तेरित्यर्थः। तस्यापेक्षिकत्वे हेत्वन्तरमाह— **तत्रैवेति।** पञ्चमेऽध्याये सूत्रोक्त्यनन्तरमेव परमात्मानमन्तर्यामिणं प्रकृत्य ततोऽन्यस्य नाशित्वोक्तेर्वायुज्ञानाधीनममृतत्वमापेक्षिकमित्यर्थः। एजतिवाक्ये ब्रह्मैव प्रतिपाद्यमित्यत्र मानान्तरमाह— **प्रकरणादिति।** तस्य परमात्मविषयत्वे हेतुमाह— **अन्यत्रेति।।३९।।**

।।इति दशमं कम्पनाधिकरणम्।।

११।।ज्योतिरधिकरणम्।। सू. ४०

ज्योतिर्दर्शनात्।।४०।।

'एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' (छा. उ. ८।१२।३) इति श्रूयते। तत्र संशय्यते–किं ज्योतिःशब्दं चक्षुर्विषयतमोपहं तेजः, किंवा परं ब्रह्मेति। किं तावत् प्राप्तम्? प्रसिद्धमेव तेजो ज्योतिःशब्दमिति। कुतः? तत्र ज्योतिःशब्दस्य रूढत्वात्। 'ज्योतिश्चरणाभिधानात्' (ब्र. सू. १।१।२४) इत्यत्र हि प्रकरणाज्ज्योतिःशब्दः स्वार्थं परित्यज्य ब्रह्मणि वर्तते। न चेह तद्वत् किंचित् स्वार्थपरित्यागे कारणं दृश्यते। तथा च नाडीखण्डे–'अथ

प्रकटार्थविवरणम्

ज्योतिर्दर्शनात्। ज्योतिःश्रुतिब्रह्मप्रकरणाभ्यां संशयमाह—**तत्रेत्यादिना।** पूर्वत्रैकस्याः प्राणश्रुतेः लिङ्गप्रकरणाभ्यां बाधो दर्शितः; इह तु—ज्योतिरिति श्रुतिः, क्त्वाप्रत्ययात् पूर्वापरभावश्च लिङ्गम्; प्रकरणं चाभिनिष्पन्नस्वरूपापेक्षयोपपन्नम्; अतोऽर्चिरादिमार्गेऽर्चिरपेक्षया पर आदित्यः ज्योतिःश्रुत्याऽभिधीयते इत्याह—**प्रसिद्धमेव तेज इति।** ननु ब्रह्मप्रकरणगतो ज्योतिः शब्दः पूर्वं ब्रह्मण्येव व्यवस्थापितः; तथाऽयमपि भविष्यतीत्याशङ्क्याह—**ज्योतिश्चरणेति।** द्युसंबन्धात्प्रत्यभिज्ञायमानस्य प्रकृतस्य परामर्शकयच्छब्दसामानाधिकरण्यात् तत्र ज्योतिःशब्दस्य स्वार्थत्यागोऽङ्गीकृतः, तथेह बलवत् कारणं नोपलभ्यत इति भावः। इतश्चार्चिरादिमार्गस्थ आदित्यो ज्योतिरित्याह— **तथा चेति।** शरीरादुत्थितस्योपसंपत्तव्यं ज्योतिरादित्याख्यमेव रश्मिनाडीसंबन्ध-प्रतिपादके खण्डे दृष्टमित्यर्थः।

भाष्यभावप्रकाशिका

ज्योतिर्दर्शनात्।।४०।। पूर्वोक्तन्यायेनैवास्यापि निर्णयसंभवात् पुनरधिकरणारम्भो व्यर्थ इत्याशङ्क्याह—**ज्योतिश्चरणेति।** ननु आदित्यज्योतिषि परं ज्योतिरिति विशेषणम्, स्वरूपाभिनिष्पत्तिः, उत्तमपुरुषत्वं च कथं संभवेदिति? अत आह—**तथा चेति।**

न्यायनिर्णयः

बहुलिङ्गविरोधेन श्रुतिबाधवत् प्रकरणानुगृहीतोत्तमपुरुषश्रुत्या ज्योतिःश्रुतेर्मुख्यार्थबाधमाह— **ज्योतिरिति।** दहराधिकरणे ज्योतिःशब्दं ब्रह्मेति सिद्धवदादाय ब्रह्मरूपेणोच्यते जीव इत्युक्तम्। इदानीं ब्रह्मैव ज्योतिःशब्दमित्येतद् विशदयितुं तदेव वाक्यमाह— **एष इति।** परं ज्योतिरिति श्रुतिभ्यां संशयमाह— **तत्रेति।** चक्षुषो विषयो घटादिः, तस्यावरकं बाह्यं तमः, तदपहतिकारणमादित्याख्यं तेजः, तदिह ज्योतिरुच्यते, ज्योतिःश्रुतेस्तत्र रूढत्वादित्येकः पक्षः। ज्योतिर्विशेषणस्य परत्वस्य निरतिशयत्वस्य ब्रह्मणोऽन्यत्रायोगात् तदेव ज्योतिरिति पक्षान्तरम्। प्रश्नपूर्वकं पूर्वपक्षयति— **किमिति।** न च प्रकरणात् प्राणस्येव ज्योतिषो ब्रह्मत्वम्, तत्र सर्वशब्दश्रुतिसंकोचवत् प्रकृते प्रकरणानुग्राहकाभावात्, परशब्दस्य विशेषणार्थस्य विशेष्यानुसारेणाऽऽदित्येऽपि नेयत्वात्। उक्तश्रुतेर्निर्विशेषे ब्रह्मण्यन्वयोक्तेः श्रुत्यादिसंगतयः। पूर्वोत्तरपक्षयोरादित्योपास्त्या क्रममुक्तिः, ब्रह्मज्ञानान्मुक्तिरिति फलभेदः। सर्वशब्दस्येवात्र कस्याश्चिदपि श्रुतेरसंकोचात् प्रागिवेहापि 'समुत्थाय' इत्यादिश्रुत्यसंकोचाद्वा युक्तमादित्यग्रहणमिति भावः। प्रसिद्धस्याप्रतिपाद्यत्वात् तद्ग्रहणं नेति शङ्कते— **कुत इति।** अप्रतिपाद्यत्वेऽपि तस्योपास्यत्वेनाऽऽदेयत्वमाह— **तत्रेति।** ज्योतिरधिकरणन्यायेनास्यापि निर्णयात् पूर्वपक्षानुत्थानादनारभ्यमेतदधिकरणमित्याशङ्क्याह— **ज्योतिरिति।** ब्रह्मणो गायत्रीवाक्ये प्रकृतत्वात् तस्य सर्वनाम्ना परामृष्टस्य द्युसंबन्धलिङ्गात् प्रत्यभिज्ञानात्तत्र ज्योतिःशब्दो ब्रह्मणि प्रसिद्धिमुल्लङ्घ्य नीतः। न च तथाऽस्मिन् वाक्ये ज्योतिःशब्दस्य स्वार्थत्यागे हेतुरदृष्टत्वादित्यगतार्थतेत्यर्थः। नन्वत्रापि परं ज्योतिरिति ज्योतिषो विशेषणं स्वरूपाभिनिष्पत्तिरुत्तमपुरुषत्वं चादित्येऽनुपपन्नं ज्योतिःशब्दस्य प्रसिद्धार्थत्यागे हेतुरस्तु, नेत्याह— **तथा चेति।** 'अथ या एता हृदयस्य नाड्यः' इत्यादि नाडीखण्डः। तत्रादित्यग्रहानुरोधेन मुमुक्षोस्तत्प्राप्तिरभिहितेति संबन्धः। विशेषज्ञानोपरमानन्तर्यमथशब्दार्थः।

यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते' (छा. उ. ८।६।५) इति मुमुक्षोरादित्यप्राप्तिरभिहिता। तस्मात् प्रसिद्धमेव तेजो ज्योतिःशब्दमिति।

एवं प्राप्ते ब्रूमः—परमेव ब्रह्म ज्योतिःशब्दम्। कस्मात्? दर्शनात्। तस्य हीह प्रकरणे वक्तव्यत्वेनानुवृत्तिर्दृश्यते, 'य आत्माऽपहतपाप्मा' (छा. उ. ८।७।१) इत्यपहतपाप्मत्वादिगुणकस्यात्मनः प्रकरणादावन्वेष्टव्यत्वेन विजिज्ञासितव्यत्वेन च प्रतिज्ञानात्। 'एतं त्वेव ते भूयोऽनुव्याख्यास्यामि' (छा. उ. ८।९।३) इति चानुसंधानात्। 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छा. उ. ८।१२।१) इति चाशरीरतायै ज्योतिःसंपत्तेरस्याभिधानात्। ब्रह्मभावाच्चान्यत्राशरीरताऽनुपपत्तेः। 'परं ज्योतिः' 'स उत्तमः पुरुषः' (छा.

प्रकटार्थविवरणम्

सिद्धान्तत्वेन सूत्रमवतारयति—**एवं प्राप्ते ब्रूम इत्यादिना।** [1]शरीरात्समुत्थाय त्वंपदार्थलक्ष्यं विविच्य ज्योतिरुपसंपद्य तत्पदलक्ष्यं निर्धार्यानन्तरं स्वरूपाभिनिष्पत्तिर्वाक्यार्थज्ञानफलमित्ययमर्थोऽस्य वाक्यस्योपक्रमबलादवगम्यते; कथंकारमर्चिरादिमार्गग्रहणमिति भावः। किं च सुखदुःखोपकरणमनःशरीरव्यावृत्तयेऽस्याः[2] ज्योतिःसंपत्तेरभिधानात् अर्चिरादिमार्गगतस्य च 'मनसैतान् पश्यन्नि' ति मनोवियोगाभावाद् ब्रह्मैव ज्योतिरित्याह—**अशरीरं वावेति।** परत्वादिविशेषणाच्च ब्रह्मैव ज्योतिरित्याह—**परं ज्योतिरिति।**

भाष्यभावप्रकाशिका

अर्चिराद्यपेक्षया परं ज्योतिष्ट्वमादित्यस्यापि संभवति; उपसंपद्येति च क्त्वाश्रुतेः पूर्वकालार्थाया: ब्रह्मपक्षे बाधप्रसङ्गाद् आदित्यमुपसंपद्य कार्यब्रह्मलोकं गत्वा स्वेन रूपेणाभिनिष्पद्यते स चोत्तमः पुरुष इत्यङ्गीकर्तव्यमिति भावः। प्रकरणस्य विच्छेदमाशङ्क्य, अविच्छिन्नतामाह—**एतं त्वेव त इति।** यद्यादित्य एवार्चिराद्यपेक्षया परं ज्योतिः, तदा तत्प्राप्त्याऽशरीरत्वं न स्यात्, तत्प्राप्त्या स्वरूपाभिनिष्पत्तिश्च न स्यात्, अन्यस्यान्यात्मतानुपपत्तेरित्याह—**अशरीरमिति।** उपासनया तत्प्राप्तावशरीरत्वमस्त्विति,

न्यायनिर्णयः

यत्रेत्यारब्धकर्मावसानकालोक्तिः। एतदुत्क्रमणं यथा तथेति क्रियाविशेषणम्। अस्मादभिमानविषयाद् देहादुत्क्रमणं यदा करोत्यथ तदैतैरादित्यस्य रश्मिभिरालम्बनैरूर्ध्वः[3]सन्नाक्रमत उपरि गच्छतीत्युपक्रम्यादित्यं गच्छतीत्युपसंपत्तव्यस्य ज्योतिषो यथाऽऽदित्यत्वं तथा श्रुतम्, तस्यापि परत्वमर्चिरादिभ्यो युक्तम्, समुत्थायोपसंपद्येति च पूर्वकालार्थक्त्वाश्रुतेर्ब्रह्मपक्षे बाधाद् देहाभिमानत्यागरूपमुत्थानं कृत्वोपसंपद्य कार्यब्रह्मलोकं गत्वा स्वेन रूपेणाभिनिष्पद्यते स चोत्तमः पुरुष इत्यङ्गीकारे सर्वाविरोधादादित्यपक्षो ज्योतिःश्रुत्या क्त्वाश्रुतिभ्यां चाभ्युपेय इत्यर्थः। मार्गपर्वभूतादित्योपास्त्या तत्प्राप्तिद्वारा क्रममुक्तिपरं वाक्यमित्युपसंहरति— **तस्मादिति।**

पूर्वपक्षमनूद्य सिद्धान्तमवतार्य प्रतिज्ञामाह— **एवमिति।** श्रुतिभिस्तेजसो ग्राह्यत्वे कुतो ब्रह्मधीरिति पृच्छति— **कस्मादिति।** हेतुमादाय व्याचष्टे— **दर्शनादिति।** परस्य ब्रह्मणोऽस्मिन् प्रकरणे वक्तव्यत्वेनानुवृत्तिदर्शनं हेतुना साधयति— **य इति।** प्रकरणाविच्छेदं कथयति— **एतमिति।** किंचार्चिराद्यपेक्षया परं ज्योतिरादित्यश्चेत् तत्प्राप्त्या विदुषो नाशरीरत्वम्, आदित्यस्य देवतात्मनः सशरीरत्वात्। न च तत्प्राप्त्या स्वरूपाभिनिष्पत्तिः, अन्यस्यान्यात्मताऽयोगादित्याह— **अशरीरमिति।** उपास्त्या तत्प्राप्तावशरीरत्वमाशङ्क्याह— **ब्रह्मेति।** इतश्चात्र ब्रह्मैव ज्योतिरित्याह— **परमिति।** शरीरादुत्थितस्यानन्तरमुपसंपत्तव्यत्वमादित्यस्य

---

१. शरीरादित्यादि। उपसम्पत्तिः साक्षात्कारः, स्वरूपेणाभिनिष्पत्तिः ब्रह्मभावः इत्येवं क्त्वाश्रुतिव्यत्यासमकृत्वैव व्याख्यातं ब्रह्मविद्याभरणे। दहराधिकरणे तु तद्व्यत्यास आश्रितः। प्रकटार्थकारास्तु तद्व्यत्यासमकृत्वा प्रकारान्तरेणार्थं वर्णयन्ति। मुक्तानां यावत्सर्वमुक्ति अपहतपाप्मत्वादिगुणकेश्वरभावापत्तिरिति पक्षे शरीरात् समुत्थाय = शरीराद् विविक्तमात्मानं ब्रह्माभेदेन साक्षात्कृत्य, परं ज्योतिरुपसम्पद्य = उक्तेश्वररूपेण अवस्थाय सर्वमुक्तौ स्वेन = चिन्मात्ररूपेणावस्थितो भवतीत्यर्थः। अधिकविचारो न्यायरक्षामणौ द्रष्टव्यः।

२. 'अस्याः अभिधानात्' इति भाष्ये पाठोऽनेन सूच्यते। ३. 'ऊर्ध्व आक्रमते' इति पाठानुसारिणीयं व्याख्या।

उ. ८।१२।३) इति च विशेषणात्। यत्तूक्तं मुमुक्षोरादित्यप्राप्तिरभिहितेति। नासावात्यन्तिको मोक्षो गत्युत्क्रान्तिसंबन्धात्। न ह्यात्यन्तिके मोक्षे गत्युत्क्रान्ती स्त इति वक्ष्यामः।।४०।।

।।इत्येकादशं ज्योतिरधिकरणम्।।

१२।।अर्थान्तरत्वाधिकरणम्।।सू.४१।।

आकाशोऽर्थान्तरत्वादिव्यपदेशात्।।४१।।

शारीरकन्यायसंग्रहः

आकाशोऽर्थान्तरत्वादिव्यपदेशात्।।४१।। उपक्रमगताभ्यामपि श्रुतिलिङ्गाभ्यां वाक्यशेषगतानि बहूनि श्रुतिलिङ्गानि बलवन्ति, बहुसंवादस्य तात्पर्यनिमित्तत्वात्— इति न्यायेन "आकाशो वै नाम" इति प्रसिद्धिलिङ्गाकाशश्रुती भूताकाशप्रतिपादिके बाधित्वा नामरूपनिर्वहणतद्व्यतिरेकामृताभयलिङ्गैः ब्रह्मात्मश्रुतिभ्यां च ब्रह्मपरत्वं वाक्यस्य निर्णीतम्।

प्रकटार्थविवरणम्

नाडीखण्डेऽर्चिरादिमार्गपर्ववर्णनमुचितमुपासनप्रकरणस्थत्वादित्यभिप्रेत्याह—**नासावात्यन्तिक इति।**

आकाशोऽर्थान्तरत्वादिव्यपदेशात्। छान्दोग्यवाक्यं पठित्वाऽऽकाशश्रुतेर्नामरूपव्यतिरेकाच्च संशयमाह—**तत्किमाकाश-**

भाष्यभावप्रकाशिका

अत आह—**ब्रह्मभावादिति। परं ज्योतिः स उत्तमपुरुष इति च विशेषणादिति।** अयमर्थः—शरीरादुत्थितस्यानन्तरमुपसंपत्तव्यत्वमादित्यस्य नाडीखण्डे दृष्टमिति लिङ्गानुगृहीता[तां] ज्योतिःश्रुतिं बाधित्वाऽपहतपाप्मादि-प्रकरणानुगृहीतोत्तमपुरुषश्रुत्या ज्योतिश्शब्दं परं ब्रह्माभ्युपगन्तव्यम्; एकवाक्यतापादकप्रकरणानुगृहीतश्रुतेर्लिङ्गानुगृहीतश्रुतितो बलीयस्त्वादिति। **नासावात्यन्तिक इति।** पूर्वापरालोचनायामस्मिन् प्रकरणे क्रममुक्तेरप्रतीतेः। क्त्वाश्रुतिं बाधित्वा परज्योतिष उपसंपत्तिरेव स्वरूपाभिनिष्पत्तिः, तस्यैव चोत्तमपुरुषशब्दवाच्यत्वमिति स्वीकृत्यास्य वाक्यस्य ब्रह्मपरत्वमङ्गीकर्तव्यमिति भावः।।४०।। इत्येकादशं ज्योतिरधिकरणम्।

आकाशोऽर्थान्तरत्वादिव्यपदेशात्।।४१।। ननु रूढिपरिग्रहे तस्य नामरूपनिर्वहणमनुपपन्नम् इति, मैवम्; नामरूपशब्दाभ्यां

न्यायनिर्णयः

नाडीखण्डे दृष्टमिति लिङ्गानुगृहीतां ज्योतिरादिश्रुतिमपहतपाप्मत्वादिपरमात्मप्रकरणानुगृहीतोत्तमपुरुषादिश्रुत्या बाधित्वा परं ब्रह्म ज्योतिरास्थेयम्, एकवाक्यतापादकफलवत्प्रकरणोपेतश्रुतेर्विफललिङ्गसंगतश्रुतितो बलीयसीत्वात्। अस्य[अस्यां] हि निर्गुणविद्यायां श्रुताशरीरताफलायामर्चिराद्यनवतारादादित्यानर्थक्यान्मार्गपर्वत्वेन तस्य सगुणविद्यासूपदिष्टत्वादेवोत्कर्षायोगादत्र ज्योतिर्मन्त्र-श्रुतेर्मार्गानुक्तेरादित्योक्तौ श्रुतित्रयानर्थक्यात्, 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्' इति न्यायाद् बलवत्प्रकरणोपेतप्रागुक्तश्रुत्या ब्रह्मैव ज्योतिरिति भावः। परोक्तमनुभाष्य दूषयति— **यत्त्विति।** आत्यन्तिकेऽपि मोक्षे तदुभयं स्यादित्याशङ्क्य बादर्यधिकरण-विरोधान्मैवमित्याह— **न हीति।** पूर्वापरालोचनायामत्र क्रममुक्त्यप्रतीतेर्बाधित्वा क्त्वाश्रुतिं परस्य ज्योतिषो ब्रह्मणः प्राप्तिरेव स्वरूपाभिनिष्पत्तिः, तस्यैवोत्तमपुरुषतेत्युपेत्य वाक्यस्य ब्रह्मपरत्वमास्थेयम्। अतो ब्रह्मज्ञानात् तत्प्राप्तिरिति भावः।।४०।।

।।इत्येकादशं ज्योतिरधिकरणम्।।

प्रकरणोपेतोत्तमपुरुषादिश्रुत्या ज्योतिरादिश्रुतेर्बाध उक्तः। इदानीमात्मब्रह्मश्रुतिभ्यां लिङ्गानुगृहीताभ्यामाकाशश्रुतेर्बाधमाह—

'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म तदमृतं स आत्मा' (छा. उ. ८।१४।१) इति श्रूयते। तत् किमाकाशशब्दं परं ब्रह्म, किंवा प्रसिद्धमेव भूताकाशमिति विचारे– भूतपरिग्रहो युक्तः; आकाशशब्दस्य तस्मिन् रूढत्वात्, नामरूपनिर्वहणस्य चावकाशदानद्वारेण तस्मिन् योजयितुं शक्यत्वात्, स्रष्टृत्वादेश्च स्पष्टस्य ब्रह्मलिङ्गस्याश्रवणादिति।

एवं प्राप्त इदमुच्यते–परमेव ब्रह्मेहाकाशशब्दं भवितुमर्हति। कस्मात्? अर्थान्तरत्वादिव्यपदेशात्। 'ते

प्रकटार्थविवरणम्

शब्दमिति। पूर्वत्रोपक्रमानुसारेणार्थान्तरे प्रसिद्धोऽपि ज्योतिःशब्दः स्वार्थात् प्रच्यावितः, तथेहाकाशोपक्रमबलात् ब्रह्मादिशब्दः स्वार्थात् 'प्रच्याव्यतामित्यभिप्रेत्याह— **भूतपरिग्रहो युक्त इति**। बलवदपवादकमपि नोपलभ्यत इत्याह— **नामरूपनिर्वहणस्य चेति**।

भूताकाशस्य नामरूपप्रपञ्चान्तर्गतत्वादेव ततो[2]ऽर्थान्तरत्वानुपपत्तेः निरङ्कुशस्य तन्निर्वाहकत्वस्याप्ययोगाद् ब्रह्मैवाकाशपद-

भाष्यभावप्रकाशिका

प्रसिद्धदेवदत्तादिसंज्ञानां शुक्लनीलरूपाणां चाङ्गीकरणादुपपन्नमित्याह— **नामरूपेति**। ननु "आकाशस्तल्लिङ्गादि" त्यत्रोक्तन्यायेनाकाशशब्दं ब्रह्मेति सिध्यति; तेन नेदमधिकरणमारब्धव्यमिति, तत्राह— **स्रष्टृत्वादेश्चेति**। तस्य च "आकाशो ह वै नाम" इति श्रुत्या प्रसिद्धवदुपादानाल्लिङ्गेन च प्रमितस्य बृहत्त्वाद् ब्रह्मत्वमाभूतसंप्लवावस्थानादमृतत्वमाप्नोतीत्यात्मत्वं च सम्भवतीति भावः।

ननु भूताकाशस्यापि नामरूपाभ्यामर्थान्तरत्वं युक्तम्, देवदत्तादिशब्दस्य नामत्वात् शुक्लनीलादेश्च रूपत्वादिति, अत

न्यायनिर्णयः

आकाश इति। छान्दोग्यवाक्यमुदाहरति— **आकाश इति**। आकाशब्रह्मश्रुतिभ्यां संशयमुक्त्वा पूर्वपक्षयति— **तदित्यादिना**। यथोपक्रमादर्थान्तरे प्रसिद्धोऽपि ज्योतिःशब्दः स्वार्थात् प्रच्यावितस्तथाऽऽकाशोपक्रमाद् ब्रह्मादिशब्दः स्वार्थात् प्रच्याव्यतामिति मत्वा हेतुमाह— **आकाशेति**। निर्विशेषे ब्रह्मण्युक्तश्रुतेरन्वयोक्तेः श्रुत्यादिसंगतयः। पूर्वपक्षे वाय्वादिमात्राधिष्ठानाकाशात्मकब्रह्मोपास्त्या क्रममुक्तिः, सिद्धान्ते सर्वाधिष्ठानब्रह्मधिया साक्षान्मुक्तिरिति फलभेदः। रूढिग्रहे तस्य नामरूपनिर्वहणमयुक्तमित्याशङ्क्य नामरूपशब्दाभ्यां प्रसिद्धदेवदत्तादिसंज्ञानां सितासितादिरूपाणां च स्वीकारात् तदाश्रयावकाशदानद्वारा भूताकाशेऽपि तन्निर्वहणं युक्तमित्याह— **नामेति**। 'आकाशस्तल्लिङ्गात्' इत्यनेन गतार्थत्वमाशङ्क्याह— **स्रष्टृत्वादेश्चेति**। तत्र हि सर्वजगदुत्पत्तेरेवकार-सिद्धनिरपेक्षकारणत्वस्य प्रश्नप्रत्युक्तिसामानाधिकरण्यसामर्थ्यस्य च दृष्टेर्ब्रह्मपरत्वं, नैवमिह तत्परत्वे किंचिदसाधारणं लिङ्गमित्यगतार्थतेत्यर्थः। तस्य च श्रुत्या प्रसिद्धवदुपादानात् प्रमितस्य बृहत्त्वाद् ब्रह्मत्वम्, आभूतसंप्लवस्थानादमृतत्वं, आप्नोतीत्यात्मत्वं व्यापित्वात्। तस्मान्नामादिवद् भूताकाशोपास्त्यर्थं वाक्यमित्यर्थः।

पूर्वपक्षमनूद्य सूत्रमवतार्य प्रतिज्ञां व्याकरोति— **एवमिति**। आकाशशब्दाद् भूताकाशो भाति, कुतो ब्रह्मधीरित्याह— **कस्मादिति**। हेतुमादायार्थान्तरत्वव्यपदेशं विशदयति— **अर्थान्तरत्वादीति**। भूताकाशस्यापि नामरूपाभ्यामर्थान्तरत्वं, देवदत्तादिशब्दस्य

---

१. भामतीमते तु ब्रह्मशब्दो मुख्यार्थ एव। तथाहि— अत्र निर्वहितेत्यन्तमेकं वाक्यम्। तद् भूताकाशपरम्। ते = नामरूपे अन्तरा = मध्ये यत् तद् ब्रह्म। नामरूपयोरन्तरालत्वं प्रपञ्चाधिष्ठानत्वम्। तथा च ब्रह्मोपासनपरं 'ते यदन्तरा' इति वाक्यम्। पूर्ववाक्येन तु तदङ्गतया नामरूपनिर्वोढृतया भूताकाशोपासनं विधीयत इति पूर्वपक्ष्याशयः।

२. अर्थान्तरत्वेति। भेदेत्यर्थः। 'ते नामरूपे यदन्तरा यस्माद् भिन्ने' इति रत्नप्रभायां श्रुतिर्व्याख्याता 'आकाशस्तल्लिङ्गात्' इत्यत्र। प्रकटार्थे तु तत्र 'मध्ये' इति श्रुतिगतः 'अन्तरा' शब्दो व्याख्यातः। तदनुसारेणार्थान्तरत्वव्यपदेशः एवमुपपादनीयः। नामरूपमध्यस्थत्वं यथाश्रुतं ब्रह्मण्यघटमानं नामरूपास्पृष्टत्वं प्रतिपादयत् अर्थात् नामरूपाभ्यां भेदं प्रतिपादयतीति। इदं च 'ते अन्तरा यत्' इति योजनयोक्तम्। 'यत् अन्तरा ते' इति योजनायामपि 'नामरूपे यदाधारके तत्' इत्यर्थलाभादर्थाद् भेदो लभ्यत एवेति।

यदन्तरा तद् ब्रह्म' इति हि नामरूपाभ्यामर्थान्तरभूतमाकाशं व्यपदिशति। न च ब्रह्मणोऽन्यन्नामरूपाभ्यामर्थान्तरं संभवति, सर्वस्य विकारजातस्य नामरूपाभ्यामेव व्याकृतत्वात्। नामरूपयोरपि निर्वहणं निरङ्कुशं[1] न ब्रह्मणोऽन्यत्र संभवति। 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छा. उ. ६।३।२) इत्यादिब्रह्मकर्तृकत्वश्रवणात्। ननु जीवस्यापि प्रत्यक्षं नामरूपविषयं निर्वोढृत्वमस्ति। बाढमस्ति। अभेदस्त्विह विवक्षितः। नामरूपनिर्वहणाभिधानादेव च स्रष्टृत्वादि ब्रह्मलिङ्गमभिहितं भवति। 'तद् ब्रह्म तदमृतं स आत्मा' (छा. उ. ८।१४।१) इति च ब्रह्मवादस्य लिङ्गानि। 'आकाशस्तल्लिङ्गात्' (ब्र. सू. १।१।२२) इत्यस्यैवायं प्रपञ्चः।।४१।।

।।इति द्वादशमर्थान्तरत्वाधिकरणम्।।

प्रकटार्थविवरणम्

लक्ष्यमित्याह—**परमेव ब्रह्मेति**। नामरूपनिर्वहणं ब्रह्मलिङ्गमेव न भवतीत्याह—**ननु जीवस्यापीति**। सत्यं जीवस्यापि नामरूपनिर्वाहकत्वं साक्षाच्छ्रुतमस्ति; किं तु परमेश्वराभेदाभिप्रायेणेत्याह—**बाढमस्तीति**। यच्चोक्तं न स्रष्टृत्वादि ब्रह्मलिङ्गमिहास्तीति, तत्राह—**नामरूपेति**। ननु बहूनि चेद् ब्रह्मवादस्य लिङ्गानि सन्ति, तर्हि "आकाशस्तल्लिङ्गात्" इत्यनेनास्य विचारितत्वात् न

भाष्यभावप्रकाशिका

आह—**न चेति**। नामरूपे यत्र सम्भूयोच्येते, तत्र शब्दार्थाविव श्रुतिषु विवक्ष्येते, यथा "तन्नामरूपाभ्यां व्याक्रियते"त्यादौ, तद्वदित्यर्थः। किञ्च भूताकाशमपि विकारत्वेन नामरूपान्तःपाति सत् कथमात्मानमुद्वहेत्, न च निर्वाहकत्वं निरङ्कुशं श्रूयमाणं परतन्त्रे भूताकाशे युज्यते इत्याह—**नामरूपयोरिति**। अन्यत्र नामरूपनिर्वहणस्य ब्रह्मकर्तृकत्वावगमात् तदेवात्रापि प्रतीयत इत्याह—**अनेनेति**। नामरूपनिर्वाहकत्वं ब्रह्मणोऽसाधारणं न भवतीति शङ्कते—**ननु जीवस्येति**। यदुक्तम् स्रष्टृत्वं ब्रह्मलिङ्गमिह नास्तीति, तत्राह—**नामरूपेति**। अस्रष्टृत्वं[अस्पष्टत्वं] तु विशेष इति भावः। ननु आकाशशब्दस्य ब्रह्मपरत्वे केवललिङ्गान्येव सन्ति, भूताकाशपरत्वे श्रुतिलिङ्गे स्तः। अतः केवललिङ्गेभ्यः श्रुतिलिङ्गयोर्बलीयस्त्वाद् भूताकाशोऽभ्युपगन्तव्य इत्याशङ्क्य, इहापि ब्रह्मात्मश्रुतिसम्भव इत्याह—**तद्ब्रह्मेति**। उपक्रमगताकाशश्रुतेः "आकाशो वै नामे"ति प्रसिद्धिलिङ्गाच्च नामरूपनिर्वहणे "ते यदन्तरे" ति तद्व्यतिरेकामृतत्वलिङ्गैरनुगृहीते ब्रह्मात्मश्रुति[ती] प्रबले इति भावः। "आकाशस्तल्लिङ्गादि" त्यत्रोपक्रमोपसंहाराभ्यां प्रतिपाद्यमानतया

न्यायनिर्णयः

नामत्वान्नीलपीतादे रूपत्वात् ताभ्यामन्यत्वस्य भूताकाशे सिद्धत्वादित्याशङ्क्याह— **न चेति**। यत्र नामरूपशब्दौ संभूयोक्तौ तत्र शब्दार्थाविव श्रुतिषु गृह्येते 'तन्नामरूपाभ्यामेव' इत्यादौ तथा दृष्टेः। न च शब्दार्थान्तर्भूतस्य भूताकाशस्य ततोऽर्थान्तरत्वमित्यर्थः। किंच भूताकाशमपि विकारतया नामरूपान्तर्भूतं कथमात्मानमुद्वहेत्, न च तन्निर्वाहकत्वं निरङ्कुशं श्रुतं परतन्त्रभूताकाशे कथंचिन्नेयमित्याह— **नामेति**। अन्यत्र तन्निर्वहणस्य ब्रह्मकर्तृकत्वसिद्धेस्तदेवात्रापि प्रत्यभिज्ञातमित्याह— **अनेनेति**। नामरूपनिर्वाहकत्वमादिशब्दोक्तं न 'ब्रह्मसाधारणमिति[2] शङ्कते— **नन्विति**। जीवस्य तन्निर्वाहकत्वेऽपि ब्रह्माभेदात् तस्य ब्रह्मसाधारणतेत्याह— **बाढमिति**। स्रष्टृत्वादिब्रह्मलिङ्गमिह नेत्युक्तं प्रत्याह— **नामेति**। आकाशशब्दस्य ब्रह्मार्थत्वे लिङ्गान्येव सन्ति, भूताकाशार्थत्वे श्रुतिलिङ्गे स्तः। तथा च केवललिङ्गेभ्यस्तयोर्बलीयस्त्वाद् भूताकाशग्रहणमित्याशङ्क्यात्रापि ब्रह्मात्मश्रुती विद्येते इत्याह— **तदिति**। उपक्रमस्थाकाशश्रुतेः 'आकाशो वै नाम' इति प्रसिद्धिलिङ्गाच्च नामरूपनिर्वहणतदर्थान्तरत्वामृतत्वलिङ्गानुगृहीते ब्रह्मात्मश्रुती बलवत्याविति भावः। 'आकाशस्तल्लिङ्गात्' इत्यत्रोपक्रमोपसंहाराभ्यां प्रतिपाद्यतया तात्पर्यवदानन्त्यलिङ्गादाकाशस्य ब्रह्मत्वमुक्तम्, इहापि श्रुत्यन्तरसिद्धनामादिनिर्वाहकत्वसंवादेन तात्पर्यवल्लिङ्गादाकाशस्य ब्रह्मत्वमुच्यते, तत्कथं पृथगारम्भ

---

१. **निरङ्कुशमिति**। निरङ्कुशत्वम्-अनन्याधीनत्वम्, असङ्कुचितसर्वनामरूपविषयकत्वं च। तेन हिरण्यगर्भस्यापि व्यावृत्तिः।

२. 'ब्रह्मासाधारण'मिति पाठः स्यात्। एवमग्रेऽपि।

१३।।सुषुप्त्युत्क्रान्त्यधिकरणम्।।सू. ४२-४३।।

सुषुप्त्युत्क्रान्त्योर्भेदेन।।४२।।

व्यपदेशादित्यनुवर्तते। बृहदारण्यके षष्ठे प्रपाठके 'कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' (बृ. उ. ४।३।७) इत्युपक्रम्य भूयानात्मविषयः प्रपञ्चः कृतः। तत् किं संसारिस्वरूपमात्रान्वाख्यानपरं वाक्यमुतासंसारिस्वरूपप्रतिपादनपरमिति संशयः। किं तावत् प्राप्तम्? संसारिस्वरूपमात्रविषयमेवेति। कुतः? उपक्रमोपसंहाराभ्याम्। उपक्रमे 'योऽयं विज्ञानमयः प्राणेषु' इति

शारीरकन्यायसंग्रहः

सुषुप्त्युत्क्रान्त्योर्भेदेन।।४२।। पत्यादिशब्देभ्यः।।४३।। एकस्मिन् वाक्ये प्रसिद्धाप्रसिद्धयोः लिङ्गेषु सन्निविष्टेषु प्रसिद्धानुवादेन तस्याप्रसिद्धात्मतैव प्रतिपाद्या, वाक्यस्यापूर्वार्थविषयत्वात्—इति न्यायेन जीवलिङ्गैः तदनुवादेन तस्य ब्रह्मात्मता वाक्येन प्रतिपाद्यत इत्युक्तम्।

।।इति शारीरकन्यायसंग्रहे भगवत्प्रकाशात्मविरचिते प्रथमस्याध्यायस्य तृतीयः पादः।।

प्रकटार्थविवरणम्

पृथगारम्भ इत्याशङ्क्याह—**आकाशस्तल्लिङ्गादिति**। तस्यैव साधकोऽयं विचारः। 'इह हि आकाशस्य सिद्धवद् ब्रह्मणि वृत्तिमाश्रित्य तत्र संशयादिप्रवृत्तिः। अतो नास्य तद्वेलेनारम्भाक्षेप इति भावः। इति द्वादशमर्थान्तरत्वाधिकरणम्।।

सुषुप्त्युत्क्रान्त्योर्भेदेन। उभयलिङ्गदर्शनात् संशयमाह—**तत्किं संसारीति**। पूर्वत्र बहुतरलिङ्गावगमेन ब्रह्मपरत्वं निर्णीतम्। इह तु आदिमध्यावसानेषु जीवलिङ्गानामेव बहुत्वात् जीवकथनपरं वाक्यमित्याह—**किं तावदित्यादिना**। "कतम आत्मा" इति

भाष्यभावप्रकाशिका

तात्पर्यवदानन्त्यलिङ्गाद् ब्रह्मपरत्वमुक्तम्; इहापि श्रुत्यन्तरप्रतिपन्ननामरूपनिर्वाहकत्वसंवादेन तात्पर्यवल्लिङ्गाद् ब्रह्मपरत्वमुच्यते। कथं पृथगारम्भ इति? अत आह—**आकाश इति**।।४१।। इति द्वादशमर्थान्तरत्वाधिकरणम्।।

सुषुप्त्युक्रान्त्योर्भेदेन।।४२।। आकाङ्क्षितपदं पूरयति—**व्यपदेशादिति**। ननु जीवपरिग्रहे "महानज" इत्यादि कथमुपपद्यत इत्याक्षिपति—**कुत इति**। मैवम्; 'आदिमध्यावसानेषु जीवस्य प्रतिपादनात्। तत्परे ग्रन्थसन्दर्भे सर्वं तत्रैव योज्यते।' तत्र महत्त्वं देहादिभ्यो महत्त्वादापेक्षिकम्, प्राज्ञत्वमपि कथञ्चिद् व्याख्येयम्। (ननु) 'अनन्वागतं पुण्येने'त्याद्यपि सुषुप्त्यवस्थापेक्षया

न्यायनिर्णयः

इत्याशङ्क्याह— **आकाश इति**। तत्र स्रष्टृत्वस्पाष्ट्यवदिह नेति विशेषोऽस्तीति भावः।।४१।। इति द्वादशमर्थान्तरत्वाधिकरणम्।।

श्रुत्युपेतलिङ्गेन श्रुतेर्बाधमुक्त्वा लिङ्गेन लिङ्गस्यैव बाधमाह— **सुषुप्तीति**। साकाङ्क्षत्वं वारयति— **व्यपदेशादिति**। षष्ठाध्यायवाक्यजातं विषयत्वेनोदाहरति— **बृहदिति**। देहादीनामन्यतमो वा तदतिरिक्तो वाऽऽत्मेति जनकस्य प्रश्ने याज्ञवल्क्यस्योत्तरम्— **योऽयमिति**। विज्ञानं बुद्धिः, तन्मयस्तत्प्रायः। प्राणेषु हृदीति व्यतिरेकार्थे सप्तम्यौ; प्राणबुद्ध्यतिरिक्त इत्यर्थः। बुद्धिवृत्तेर्विविनक्ति— **अन्तरिति**। अज्ञानाद् भिनत्ति— **ज्योतिरिति**। पुरुषः पूर्णो योऽयमेवंभूतः स आत्मेत्यर्थः। तदेव वाक्यमधिकृत्योपक्रमस्थ-विज्ञानमयशब्दादुपसंहारस्थसर्वेशानादिशब्दाच्च संशयमाह— **तदिति**। अङ्गुष्ठमात्रश्रुतावुपक्रमोपसंहारौ न जीवार्थावत्र तथेत्यगतार्थत्वं मत्वा प्रश्नपूर्वकं पूर्वपक्षयति— **किं तावदिति**। नामरूपाभ्यां भेदवादादाकाशं ब्रह्मेत्युक्ते भेदवादो नैकान्तः, असत्यपि भेदे 'प्राज्ञेनाऽऽत्मना संपरिष्वक्तः' इति भेदोपचारादित्याशङ्क्यात्रापि मुख्यभेदसाधनादधिकरणसंगतिः। षष्ठाध्यायस्य निर्विशेषे ब्रह्मण्यन्वयोक्तेः श्रुत्यादिसंगतयः। पूर्वपक्षे जीवानुवादेन कर्तृस्तुतिः, सिद्धान्ते तदनुवादेन तद्याथार्थ्यधीरिति फलभेदः। जीवे महानित्याद्ययुक्तमित्याह— **कुत इति**। आदिमध्यावसानेषु जीवोक्तेस्तत्परे संदर्भे 'महानज' इत्यादि तत्रैव कथंचिन्नेयमित्याह—

१. अत्र यच्छब्देन प्रकृताकाशस्य परामर्शात् तस्य नामरूपनिर्वाहकत्वं ब्रह्मत्वसाधकं लभ्यत इति भावः।

शारीरलिङ्गात्, उपसंहारे च 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु' (बृ. उ. ४।४।२२) इति तदपरित्यागात्, मध्येऽपि बुद्धान्ताद्यवस्थोपन्यासेन तस्यैव प्रपञ्चनादिति।

एवं प्राप्ते ब्रूमः—परमेश्वरोपदेशपरमेवेदं वाक्यम्, न शारीरमात्रान्वाख्यानपरम्। कस्मात्? सुषुप्तावुत्क्रान्तौ च शारीराद् भेदेन परमेश्वरस्य व्यपदेशात्। सुषुप्तौ तावत्—'अयं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्' (बृ. उ. ४।३।२१) इति शारीराद् भेदेन परमेश्वरं व्यपदिशति। तत्र पुरुषः शारीरः स्यात्, तस्य वेदितृत्वात्। बाह्याभ्यन्तरवेदनप्रसङ्गे सति तत्प्रतिषेधसंभवात्। प्राज्ञः परमेश्वरः, सर्वज्ञत्वलक्षणया प्रज्ञया नित्यमवियोगात्। तथोत्क्रान्तावपि 'अयं शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन् याति' (बृ. उ. ४।३।३५) इति जीवाद्भेदेन परमेश्वरं व्यपदिशति। तत्रापि शारीरो जीवः स्याच्छरीरस्वामित्वात्। प्राज्ञस्तु स एव परमेश्वरः। तस्मात् सुषुप्त्युत्क्रान्त्योर्भेदेन व्यपदेशात् परमेश्वर एवात्र विवक्षित इति गम्यते। यदुक्तमाद्यन्तमध्येषु शारीरलिङ्गात् तत्परत्वमस्य वाक्यस्येति; अत्र ब्रूमः—उपक्रमे तावत् 'योऽयं विज्ञानमयः

प्रकटार्थविवरणम्

जनकेन पृष्टे याज्ञवल्क्यः[वल्क्येन] "योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्वर्तमानः" इति प्राणाद्यवच्छिन्नो जीव एवोक्तः; ततो[1] जागरणाद्यवस्थावत्त्वेन चेत्यर्थः।

पदान्तराधिकरणे [राध्याहारेण] सूत्रं योजयति—**परमेश्वर इत्यादिना।** ननु 'अयं पुरुषः' इति कार्यकरणसङ्घात एवोच्यते, न जीव इत्याशङ्क्याह—**तत्र पुरुष इति।** तर्हि सुषुप्ते विशेषविज्ञानाभावात् प्रकर्षेणाज्ञरूपेण संपन्नो जीव एवोच्यत इत्याशङ्क्याह—**प्राज्ञः परमेश्वर इति।** निरतिशयप्रज्ञाशालिनि प्रसिद्धः प्राज्ञशब्दो नाज्ञं ब्रूयात्। अतः सर्वज्ञत्वश्रवणप्रमाणिकया प्रज्ञयाऽवियोगादीश्वर

भाष्यभावप्रकाशिका

कर्मफलोपभोगाभावाद् द्रष्टव्यमित्यभिप्रेत्य परिहरति पूर्ववादी—**उपक्रम इत्यादिना।** ननु ययोर्भेद उपदिश्यते, तौ धर्मिप्रतियोगिनौ वक्तव्यौ, तौ चेह न स्तः पुरुषशब्देन प्रसिद्धस्य करशिरश्चरणादिमतः शरीरस्याभिधानादिति, तत्राह—**तत्र पुरुष इति।** ननु भवतु पुरुषः शारीरः, तथापि प्राज्ञशब्देनापि स एवोच्यते—प्रकर्षेणाज्ञः प्राज्ञ इति व्युत्पत्त्या, नेश्वरः; तस्य च "प्राज्ञेनाऽऽत्मना सम्परिष्वक्त" इति भेदव्यपदेशः शिलापुत्रकस्य शरीरमितिवदुपचारादुपपन्न इति, अत आह—**प्राज्ञस्तु परमेश्वर इति।** योगाद्रूढेर्बलीयस्त्वादिति भावः। यौगिकत्वपक्षेऽपि प्रयोगबाहुल्यात् परमेश्वर एव प्राज्ञ इत्याह—**सर्वज्ञ इति।**

न्यायनिर्णयः

उपक्रम इति। जीवानुवादेन कर्मापेक्षितकर्तृस्तुत्या तदधिकारसिद्धिरत्रेष्टेत्युपसंहर्तुमितिशब्दः।

पूर्वपक्षमनुभाष्य सिद्धान्तयन् बहिरेव प्रतिज्ञामाह— **एवमिति।** उपक्रमोपसंहारपरामर्शानां जीवार्थतया तत्परे संदर्भे कथमीश्वरोक्तिरित्याह— **कस्मादिति।** तत्र हेतुं सोपस्कारमवतारयति— **सुषुप्ताविति।** सौषुप्तं भेदवादमुदाहरति— **सुषुप्तौ तावदिति।** करशिरश्चरणादिमति शरीरे पुरुषशब्दात् कुतः शारीरात् परस्य भेदः, तत्राह— **तत्रेति।** तस्य वेदितृत्वेऽपि प्रकृते वेदितृत्वं नापेक्ष्यं, तदा बाह्यान्तरार्थधीनिषेधादित्याशङ्क्याह— **बाह्येति।** पुरुषस्य शारीरत्वेऽपि प्रकर्षेणाज्ञ इति व्युत्पत्त्या प्राज्ञशब्देनापि तस्यैवोक्तेर्भेदोक्तेरौपचारिकत्वात्र शारीरात् परस्य भेदोक्तिरित्याशङ्क्याह— **प्राज्ञ इति।** योगाद् रूढेर्बलीयस्त्वं मत्वा हेतुमाह— **सर्वेति।** औत्क्रान्तिकीमपि भेदोक्तिं दर्शयति— **तथेति।** अन्वारूढोऽधिष्ठित उत्सर्जन् ननावेदनातः शब्दं कुर्वन्निति यावत्। शारीरशब्दस्य शरीरसंबन्धिमात्रत्वात् प्राज्ञस्य प्रज्ञातिशयत्वात् कुतो भेदधीरित्याशङ्क्य रूढिबलीयस्त्वन्यायेनाह— **तत्रेत्यादिना।** भेदोक्तिफलमाह— **तस्मादिति।** पूर्वपक्षबीजमनुभाष्य दूषयति— **यदुक्तमिति।** उपक्रमस्य संसार्यर्थत्वं निरस्यति— **उपक्रम इति।**

१. ततः = जीवस्यैवोक्तत्वात्।

प्राणेषु' इति न संसारिस्वरूपं विवक्षितम्; किं तर्हि? अनूद्य संसारिस्वरूपं परेण ब्रह्मणाऽस्यैकतां विवक्षति। यतो 'ध्यायतीव लेलायतीव' (बृ. उ. ४।३।७) इत्येवमाद्युत्तरग्रन्थप्रवृत्तिः संसारिधर्म-निराकरणपरा लक्ष्यते। तथोपसंहारेऽपि यथोपक्रममेवोपसंहरति-'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु' इति। योऽयं विज्ञानमयः प्राणेषु संसारी लक्ष्यते, स वा एष महानज आत्मा परमेश्वर एवास्माभिः प्रतिपादित इत्यर्थः। यस्तु मध्ये बुद्धान्ताद्यवस्थोपन्यासात् संसारिस्वरूपविवक्षां मन्यते, स प्राचीमपि दिशं प्रस्थापितः प्रतीचीमपि दिशं प्रतिष्ठेत। यतो न बुद्धान्ताद्यवस्थोपन्यासेनावस्थावत्त्वं संसारित्वं वा विवक्षति, किं तर्हि? अवस्थारहितत्वमसंसारित्वं च। कथमेतदवगम्यते? यत् 'अत ऊर्ध्वं विमोक्षायैव ब्रूहि' इति पदे पदे पृच्छति, यच्च 'अनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुषः' (बृ. उ. ४।३।१४,१५) इति पदे पदे प्रतिवक्ति। 'अनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्शोकान्

प्रकटार्थविवरणम्

एव प्राज्ञ इत्यर्थः। उत्सर्जन् संभृतशकटवत् शब्दं कुर्वन्। योऽयं विज्ञानमयो जीवः प्राणेषु ह्यद्यन्तर्वर्तमानः स ज्योतिः पुरुषः स्वप्रकाशः परमात्मेति प्रसिद्धानुवादेनाप्रसिद्धब्रह्मात्मता प्रतिपाद्यत[1] इत्याह—**उपक्रमे तावदिति।** ध्यायन्त्यां बुद्धौ ध्यायतीव, लेलायन्त्यां चलन्त्यां बुद्धौ चलतीव, न तु साक्षाच्चलतीत्यर्थः। मध्ये तर्हि जागराद्यवस्थोपन्यासात् संसारिणि तात्पर्यं भवत्वित्याशङ्क्याह—**यस्त्विति।** प्रश्नप्रतिवचनपर्यालोचनया मोक्षसाधनासंसारिस्वरूपज्ञानमेवेह विवक्षितमिति भावः।

भाष्यभावप्रकाशिका

अनुवाद एव किं न स्यादिति? अत आह—**यतो ध्यायतीति।** "एकस्मिन् वाक्ये प्रसिद्धाप्रसिद्धार्थयोर्लिङ्गेषु संनिविष्टेषु प्रसिद्धानुवादेनाप्रसिद्धार्थ एव प्रतिपाद्यो वाक्यस्यापूर्वार्थविषयत्वायेति न्यायेन जीवलिङ्गैः तदनुवादेनात्मता वाक्येन प्रतिपाद्यत इति भावः। न केवलं प्रश्नसामर्थ्यात्, उत्तरसामर्थ्यादपि तस्यैव प्रतिपाद्यत्वमित्याह—**यच्चानन्वागत इति।**।४२।।

न्यायनिर्णयः

तस्य प्रश्नद्वारा विषयमाह— **किमिति।** अनुवादमात्रमेवात्रेष्टं किं न स्यादित्याशङ्क्याह— **यत इति।** बुद्धौ ध्यायन्त्यामात्मा ध्यायतीव, चलन्त्यां चलतीव, वस्तुतो न ध्यायति न चलतीत्यर्थः। उपसंहारानुसारेणोपक्रमस्यैकस्मिन् वाक्ये नेयत्वात् तस्य संसार्यर्थत्वादुपक्रमस्य तदर्थतेत्याशङ्क्याह— **तथेति।** तस्य [2]परमार्थत्वं वाक्यार्थोक्त्या वक्ति— **योऽयमिति।** परामर्शस्य संसारिगामित्वमुक्तमनूद्य पूर्वापरविरोधेन प्रत्याह— **यस्त्विति।** बुद्धान्तो जागरितम्। संसारिस्वरूपबुद्धेर्वाक्याननुगुणत्वे हेतुमाह— **यत इति।** अवस्थावत्त्वेन संसारित्वे दृष्टेऽपि तद्राहित्यमभिप्रेतमित्यत्र नियामकं पृच्छति— **कथमिति।** एकस्मिन् वाक्ये प्रसिद्धाप्रसिद्धयोर्लिङ्गेषु प्रसिद्धार्थानुवादेनाप्रसिद्धार्थ एव प्रतिपाद्यो वाक्यस्यापूर्वार्थत्वायेति न्यायेन जीवलिङ्गैस्तदनुवादेन तस्य ब्रह्मता वाक्येनोच्यतेऽन्यथा प्रश्नायोगादित्याह— **यदिति।** अतः कामादिविवेकानन्तरं विमोक्षाय तदौपयिकसाक्षात्कारायैव ब्रूहीति पुनः पुना राजा यस्मात् पृच्छति तस्मात् प्रश्नसामर्थ्यात् प्रतीचो ब्रह्मता प्रतिपाद्येत्यर्थः। न केवलं प्रश्नसामर्थ्यादेवम्, उत्तरसामर्थ्यादपीत्याह— **यच्चेति।** तेन जाग्रद्भोगादिनाऽनन्वागतोऽस्पृष्टो भवति, असङ्गत्वादिति प्रत्युक्तेरित्यर्थः। प्रतिवचनान्तरं दर्शयति— **अनन्वागतमिति।** आत्मतत्त्वं पुण्यपापाभ्यामनाघ्रातमिति यावत्। तदा सुप्तौ हृदयस्य बुद्धेः संबन्धिनः शोकान्

---

१. प्रतिपाद्यत इति। उपक्रमे प्राणादिभ्यो विवेको जीवस्य प्रतिपाद्यते, मध्ये स्वप्नादेर्व्यभिचारित्वादनात्मधर्मत्वमुच्यते। एवं त्वंपदार्थशोधनं कृत्वा 'स वा एष महानज आत्मा' इति तस्य ब्रह्मैक्यमुच्यत इति भावः। सूत्रयोजना तु बहुविधाऽत्रार्थे न्यायरक्षामणौ कृता द्र. ३३३।

२. परमार्थत्वं = परमात्मार्थकत्वम्।

हृदयस्य भवति' (बृ. उ. ४।३।२२) इति च। तस्मादसंसारिस्वरूपप्रतिपादनपरमेवैतद् वाक्यमित्यवगन्तव्यम्।।४२।।

पत्यादिशब्देभ्यः ।।४३।।

इतश्चासंसारिस्वरूपप्रतिपादनपरमेवैतद् वाक्यमित्यवगन्तव्यम्। यदस्मिन् वाक्ये पत्यादयः शब्दा असंसारिस्वरूपप्रतिपादनपराः संसारिस्वभावप्रतिषेधनाश्च भवन्ति। 'सर्वस्य वशी सर्वस्याधिपतिः' इत्येवंजातीयका असंसारिस्वभावप्रतिपादनपराः। 'स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्' (बृ. उ. ४।४।२.२) इत्येवंजातीयकाः संसारिस्वभावप्रतिषेधनाः। तस्मादसंसारी परमेश्वर इहोक्त इत्यवगम्यते।।४३।।

।।इति श्रीमच्छंकरभगवत्पादकृतौ शारीरकमीमांसाभाष्ये प्रथमाध्यायस्य तृतीयः पादः।।३।।

प्रकटार्थविवरणम्

पत्यादिशब्देभ्यः। हेत्वन्तराभिधानपरतया सूत्रं योजयति—**इतश्चेति।** सर्वमस्य वशे वर्तते अधीनं भवतीति सर्वस्य वशी। सर्वस्य नियमनशक्तिसंपन्न ईशानः। तत एव सर्वस्याधिपतिः नियन्तेत्यर्थः।

।।इति श्रीमच्छारीरकमीमांसाभाष्यविवरणे प्रकटार्थे प्रथमस्याध्यायस्य तृतीयः पादः समाप्तः।।

भाष्यभावप्रकाशिका

पत्यादिशब्देभ्यः।।४३।। असंसारिप्रतिपादनात्, [कान्] संसारिनिषेधपरांश्च शब्दान् क्रमेण दर्शयति—**सर्वस्य वशीत्यादिना।।४३।।** इति त्रयोदशं सुषुप्त्युत्क्रान्त्यधिकरणम्।

।।इति श्रीपरमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यचित्सुखमुनिविरचितायां भाष्यभावप्रकाशिकायां प्रथमाध्यायस्य तृतीयः पादः समाप्तः।।

न्यायनिर्णयः

कामादीनशेषानतिक्रान्तो भवतीत्याह— **तीर्णो हीति।** अनुवादमात्रस्य प्रश्नप्रत्युक्तिभ्यामयोगे फलितमाह— **तस्मादिति।।४२।।**

वाक्यस्यासंसारिपरत्वे हेत्वन्तरमाह— **पत्यादीति।** सूत्रे हेत्वन्तरद्योतिचकाराभावात् तदविषयत्वमाशङ्क्य व्याचष्टे— **इतश्चेति।** तत्र हेतुभावं योजयति— **यदिति।** तत्रासंसारिविषयं शब्दजातमुदाहरति— **सर्वस्येति।** स्वाधीनं सर्वमपि नियन्तुं शक्तिरस्तीति वक्तुं द्वितीयं विशेषणम्। स्वाधीनं स्वनियम्यं च सर्वमधिष्ठाय पालयतीति वक्तुं तृतीयम्। संसारिस्वभावनिषेधकं शब्दजातमादत्ते— **स नेति।** श्रुतिलिङ्गसिद्धमुपसंहरति— **तस्मादिति।** निर्विशेषप्रचुराणां वाक्यानां सिद्धोऽन्वयो ब्रह्मणीति पादार्थमुपसंहरति— **इत्यवगम्यत इति।।४३।।** इति त्रयोदशं सुषुप्त्युत्क्रान्त्यधिकरणम्।।

।।इति श्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचिते शारीरकन्यायनिर्णये प्रथमाध्यायस्य तृतीयः पादः।।३।।

।।इति प्रथमाध्यायस्य ज्ञेयब्रह्मप्रतिपादकास्पष्टश्रुतिसमन्वयाख्यस्तृतीयः पादः।।

प्रथमाध्याये चतुर्थः पादः

१।।आनुमानिकाधिकरणम्।।सू.१-७।।

आनुमानिकमप्येकेषामिति चेन्न [1]शरीररूपकविन्यस्तगृहीतेर्दर्शयति च।।१।।

ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मणो लक्षणमुक्तम्– 'जन्माद्यस्य यतः' (ब्र.सू.१।१।२) इति। तल्लक्षणं प्रधानस्यापि समानमित्याशङ्क्य तदशब्दत्वेन निराकृतम्– 'ईक्षतेर्नाशब्दम्' (ब्र.सू.१।१।५) इति। गतिसामान्यं च वेदान्तवाक्यानां ब्रह्मकारणवादं प्रति विद्यते, न प्रधानकारणवादं प्रतीति प्रपञ्चितं गतेन ग्रन्थेन। इदं त्विदानीमवशिष्टमाशङ्क्यते– यदुक्तं प्रधानस्याशब्दत्वम्, तदसिद्धम्, कासुचिच्छाखासु

शारीरकन्यायसंग्रहः

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च।।१।। सूक्ष्मं तु तदर्हत्वात्।।२।। तदधीनत्वादर्थवत्।।३।। ज्ञेयत्वावचनाच्च।।४।। वदतीति चेन्न प्राज्ञो हि प्रकरणात्।।५।। त्रयाणामेव चैवमुपन्यासः प्रश्नश्च।।६।। महद्वच्च।।७।। स्मार्तार्भ्यां क्रमलिङ्गाभ्यामेकवाक्यतासंबन्धिनी श्रौते क्रमप्रकरणे बलीयसी, सन्निधानात्, वाक्यैकवाक्यत्वाच्च—इति न्यायेन स्मृतिपठितमहदव्यक्तपुरुषक्रमसदृशश्रौतमहदव्यक्तपुरुषक्रममध्यवर्त्यव्यक्तशब्दस्य मध्यवर्तिप्रधानाभिधायित्वं, न व्यक्तमव्यक्तमिति शब्दलिङ्गं च बाधित्वा, प्रकृतात्मशरीरबुद्धिक्रममध्यवर्ति शरीरमव्यक्त-शब्देनाभिधीयत इत्युक्तम्।

प्रकटार्थविवरणम्

व्यवहितेन संबन्धं वक्तुं वृत्तमनुवदति— **ब्रह्मजिज्ञासामिति।** ईक्षत्यधिकरणे प्रधानस्याशब्दत्वम्, ब्रह्मणि वेदान्तानां गतिसामान्यं च सूत्रितम्। तत्र गतिसामान्यं प्रपञ्चितं गतेन ग्रन्थेन। इदानीं केषांचिच्छब्दानाम् आपाततः प्रधानपरतया

भाष्यभावप्रकाशिका

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च।।१।। आनुमानिकमपीति। ननु वेदान्तवाक्यानां ब्रह्मणि समन्वयं दर्शयितुमयमध्यायः समारब्धः; न च चतुर्थेन पादेन ब्रह्मणि समन्वयः प्रदर्श्यते; तस्मादस्य कथं समन्वयाध्यायसङ्गतिरिति शङ्कां निराकर्तुं वृत्तं सङ्कीर्तयति—**ब्रह्मजिज्ञासामिति। तल्लक्षणमिति।** अतिव्यापकं लक्षणमित्याशङ्क्येत्यर्थः। तर्हि समन्वयस्य सिद्धत्वात् किमुत्तरपादेनेति, तत्राह—**इदं त्विति।** ननु प्रधानस्य स्वरूपमेव समर्प्यते, न तु जगत्कारणत्वम्।

न्यायनिर्णयः

प्रसिद्धगोचरलिङ्गस्याप्रसिद्धगोचरलिङ्गेन बाध्यत्ववत् प्रकरणोपेतस्थानात् तत्तुल्यस्थानस्यैव बाधमाशङ्काद्वारा कथयति—**आनुमानिकमिति।** वेदान्तानां ब्रह्मणि समन्वयार्थमध्यायारम्भादत्र तदभावादध्यायासंगतिमाशङ्क्य वृत्तं कीर्तयति—**ब्रह्मेति। तदशब्दत्वेन** प्रधानवादिवैदिकशब्दशून्यत्वेनेत्यर्थः। ब्रह्मणोऽपि तुल्यमशब्दत्वमित्याशङ्क्याह—**गतीति।** तर्हि समन्वयस्य सिद्धत्वात् कृतं पादेनेत्याशङ्क्याह—**इदमिति।** अवशिष्टमनाशङ्कितमनिराकृतं चेत्यर्थः। शङ्कामेव दर्शयति—**यदिति।** प्रतीत्या

---

१. सूत्रे **शरीररूपकेति।** स्वेन रूपेण रूपवन्तं करोति इति रूपकम्, रूपवच्छब्दात् 'तत्करोती'ति णिचि इष्ठवद्भावेन मतुपो लुकि ण्वुलि णिलोपे च रूपकशब्दसिद्धिः। रूपकं रथादि। तद्रूपेण विन्यस्तं = तत्सामानाधिकरण्येन प्रतिपादितं रूपकविन्यस्तं शरीरादि। तस्य ग्रहणादित्यर्थः। तत्रापि अव्यक्तपदेन शरीररूपं यद् रूपकविन्यस्तं तस्य ग्रहणमित्याह— शरीरेति।
'रूपकविन्यस्तशरीरगृहीतेः' इति तु न सूत्रितम्। तथा सति 'रूपकविन्यस्ते'ति विशेषणं तद्भिन्नशरीरव्यावर्तकं स्यात्। तत् तदा संगच्छेत यदि अत्र अव्यक्तपदेन रूपकविन्यस्तं शरीरं ग्राह्यं, तद्भिन्नं वेति विवादः स्यात्। किञ्चेह द्विप्रकारा युक्तिः सूत्रिता सामान्यविशेषाभ्याम्। प्रथमतः रूपकविन्यस्ता एव 'इन्द्रियेभ्यः परा ह्यर्थाः' इत्यत्र गृह्यन्ते प्रकृतत्वादिति 'रूपकविन्यस्तगृहीतेः' इत्यंशेन प्रतिपादितम्। पुनस्तत्राव्यक्तशब्देन शरीरमेव गृह्यते परिशेषादिति च दर्शयितुं शरीररूपं यद् रूपकविन्यस्तमित्येवं विशषणविशेष्यभावव्यत्यासः आश्रितः। तथा च सूचितं भाष्ये- **प्रकरणात्, परिशेषाच्चेति।** अनेनैव सूत्रेणार्थान्तरसंग्रहः, तत्र तद्योजनाप्रकारश्च न्यायरक्षामणौ निरूपितः। द्र. ३४८-३५२।

प्रधानसमर्पणाभासानां शब्दानां श्रूयमाणत्वात्। अतः प्रधानस्य कारणत्वं वेदसिद्धमेव महद्भिः परमर्षिभिः कपिलप्रभृतिभिः परिगृहीतमिति प्रसज्यते। तद् यावत् तेषां शब्दानामन्यपरत्वं न प्रतिपाद्यते, तावत् सर्वज्ञं ब्रह्म जगतः कारणमिति प्रतिपादितमप्याकुलीभवेत्। अतस्तेषामन्यपरत्वं दर्शयितुं परः संदर्भः प्रवर्तते।

आनुमानिकमप्यनुमाननिरूपितमपि प्रधानमेकेषां शाखिनां शब्दवदुपलभ्यते। काठके हि पठ्यते— 'महतः परमव्यक्तमव्यक्तात्पुरुषः परः' (क.उ.१।३।११) इति। तत्र य एव यन्नामानो यत्क्रमाश्च महदव्यक्तपुरुषाः स्मृतिप्रसिद्धास्त एवेह प्रत्यभिज्ञायन्ते। तत्राव्यक्तमिति स्मृतिप्रसिद्धेः, शब्दादिहीनत्वाच्च

प्रकटार्थविवरणम्

शङ्क्यमानानामन्यपरत्वव्याख्यानेनाशब्दत्वप्रपञ्चनाय कतिपयसूत्रारम्भः। तेन च समन्वय एव दृढीकृत इति भावः।

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च। एवं संबन्धमभिधाय पूर्वपक्षभागं व्याचष्टे— **आनुमानिकमपीति।** अव्यक्तपदं शरीरपरं प्रधानपरं वेति प्रकरणाव्यक्तशब्दाभ्यां सन्देहे प्रकृतजीवप्रतिपादनत्यागेनाप्रसिद्ध-ब्रह्मप्रतिपादनवदप्रसिद्धप्रधानप्रतिपादकमेव काठकवाक्यमिति भावः। किं च स्मार्तक्रमसादृश्येन प्रत्यभिज्ञायमानत्वादित्याह— **तत्र य एवेति।** किञ्च प्रधानेऽव्यक्तमिति सांख्यस्मृतिप्रसिद्धे रूढ एवायं शब्द इत्यर्थः। यौगिकत्वेऽपि प्रधानमेवाभिधीयत इत्याह—

भाष्यभावप्रकाशिका

अतः कथमि[म]तिव्यापकत्वाशङ्केति? तत्राह—**अतः प्रधानस्य कारणत्वमिति।** अयमाशयः—''महतः परमव्यक्तम्'' इत्यत्र हि परशब्दोऽविप्रकृष्टकालत्वं पूर्वत्वमाह। तथा च कारणत्वम्। ''अजामेका''मित्यादयश्च मन्त्राः साक्षात्कारणत्वमभिदधति। ननु तथापि ब्रह्मणः कारणत्वं न हन्यते, तत्प्रतिपादकवेदान्तवाक्यानां दर्शितत्वादिति, तत्राह—**तद्यावदिति।** जगतः कारणान्वयाभावादिति भावः। अतः सूत्रितं प्रधानस्याशब्दत्वं समन्वयदृढीकरणाय प्रपञ्चयितुमुत्तरपादारम्भ इत्यस्त्येव सङ्गतिरिति। उपसंहरति— **अतस्तेषामिति।**

एतावता कथं प्रधानसिद्धिरित्याशङ्क्य प्रधाने स्थानं प्रमाणमाह—**तत्र य एवेति।** इदानीमव्यक्तश्रुतिरपि प्रमाणमित्याह— **तत्राव्यक्तमिति।** न केवलमव्यक्तपदं तत्र रूढ्या वर्तते, अपि तु योगवृत्त्याऽपीत्याह—**शब्दादिहीनत्वाच्चेति।** तेनाव्यक्तसंज्ञायाः

न्यायनिर्णयः

प्रधानार्पकत्वेऽपि वस्तुतो नेति वक्तुमाभासपदम्। ननु प्रधानस्य स्वरूपमेवार्प्यते, न जगत्कारणत्वम्;तत् कुतोऽतिव्याप्तिः शङ्क्यते, तत्राह—**अत इति।** 'महतः परमव्यक्तम्' इत्यत्राव्यक्तस्य प्रधानस्य कारणत्वं परशब्दाद् गम्यते। स हि प्रकर्षवाची। प्रकर्षश्च महतोऽव्यक्तस्य तत्कारणत्वम्। 'अजामेकाम्' इत्यादौ साक्षादेव प्रधानस्य कारणतासिद्धिः। कपिलादिस्मृतयश्चोक्तश्रुत्यनुसारिण्यस्तदर्थाः। तेन श्रुतिस्मृतिसिद्धा प्रधानकारणतेत्यतिव्याप्तिरित्यर्थः। तथापि कारणत्वं तद्वादिवाक्योक्तेर्ब्रह्मणो युक्तम्, षोडशिग्रहणवत् कारणे विकल्पसंभवात्, तत्राह—**तदिति।** क्रियायामिव वस्तुनि विकल्पायोगादिति भावः। सूत्रितं प्रधानाशब्दत्वं समन्वयदार्ढ्याय प्रपञ्चयितुं पादारम्भ इत्यस्त्येव संगतिरित्युपसंहरति—**अत इति।**

पूर्वं प्रधानाद्येव वेदान्तार्थ इत्युक्ते तन्निषेधेन सर्ववेदान्तेषु ब्रह्मधीरुक्ता, तामुपेत्याधुना प्रधानाद्यपि कारणत्वेन समन्वयार्थः, न चानेककारणवैयर्थ्यम्, कल्पभेदेन व्यवस्थानादित्याह—**आनुमानिकमिति।** अपिशब्दादेकशब्दाच्च ब्रह्माङ्गीकारेण पूर्वपक्षो विचारश्चायं क्वाचित्क इति सूचितम्। अव्यक्तपदं प्रधानपरं शरीरपरं वेति स्मार्तक्रमश्रौतपारिशेष्याभ्यामुभयप्रत्यभिज्ञया संशये प्रसिद्धजीवोक्तिभङ्गेनाप्रसिद्धब्रह्मोक्तिवदप्रसिद्धप्रधानोक्तिपरमेव काठकवाक्यमिति पूर्वपक्षयन्नुपलब्धिमुदाहरति—**काठके हीति।** अत्र प्रधानस्याशब्दत्वप्रतिपादनेन समन्वयदार्ढ्यादस्ति श्रुत्यादिसंगतिः। पूर्वपक्षे प्रधानस्यापि शब्दवत्त्वाद् ब्रह्मण्यन्वयानियतिः, सिद्धान्ते तस्याशब्दत्वाद् ब्रह्मण्यन्वयनियतिरिति फलभेदः। कथमत्र प्रधानमव्यक्तपदादुक्तमित्याशङ्क्य प्रधाने स्थानं मानमाह— **तत्रेति।** स्मृतिः सांख्यस्मृतिः। श्रुतिः सप्तम्यर्थः। अव्यक्तश्रुतिरपि प्रधाने मानमित्याह—**तत्रेति।** सांख्यस्मृतिसिद्धप्रधानस्याव्यक्तशब्देनोक्तौ तदीयां रूढिं हेतूकरोति—**स्मृतीति।** पारिभाषिकत्वादव्यक्तशब्दस्यानिर्णायकत्वमाशङ्क्योक्तम्—**शब्दादीति।** रूढियोगाभ्यामव्यक्तशब्दस्य

न व्यक्तमव्यक्तमिति व्युत्पत्तिसंभवात् स्मृतिप्रसिद्धं प्रधानमभिधीयते। [1]तस्य शब्दवत्त्वादशब्दत्वमनुपपन्नम्। [2]तदेव च जगतः कारणं श्रुतिस्मृतिन्यायप्रसिद्धिभ्य इति चेत्?

नैतदेवम्। न ह्येतत् काठकवाक्यं स्मृतिप्रसिद्धयोर्महदव्यक्तयोरस्तित्वपरम्। न ह्यत्र यादृशं स्मृतिप्रसिद्धं स्वतन्त्रं कारणं त्रिगुणं प्रधानं तादृशं प्रत्यभिज्ञायते। शब्दमात्रं ह्यत्राव्यक्तमिति प्रत्यभिज्ञायते। स च शब्दो न व्यक्तमव्यक्तमिति यौगिकत्वादन्यस्मिन्नपि सूक्ष्मे सुदुर्लक्ष्ये च प्रयुज्यते। न चायं कस्मिंश्चिद् रूढः। या तु प्रधानवादिनां रूढिः सा तेषामेव पारिभाषिकी सती न वेदार्थनिरूपणे कारणभावं प्रतिपद्यते। न च

प्रकटार्थविवरणम्

शब्दादिहीनत्वाच्चेति। अस्तु प्रधानं शाब्दम्, किमेतावता ब्रह्मण्यायातमित्याशङ्क्याह— **तदेव च जगत इति**। यदा प्रधानं शाब्दं तदा कपिलस्मृतेः तत्सिद्धन्यायेन च तदेव जगत्कारणमिति न जगत्कारणे ब्रह्मणि समन्वयः सिध्यतीति भावः।

सौत्रस्य नञोऽर्थमाह— **नैतदेवमिति**। किं प्रधानस्य शाब्दत्वं तात्पर्यवृत्त्या, किं वा शक्तिगोचरत्वेन? नाद्य इत्याह— **न ह्येतदिति**। "आत्मानं रथिनं विद्धि" इत्यारभ्य "पुरुषान्न परं किंचित्" इत्यन्तं वाक्यं परमात्मविज्ञानपरमेव, "निचाय्य तं मृत्युमुखात्प्रमुच्यते" इति फलश्रवणादिति भावः। ननु प्रधानस्येह प्रत्यभिज्ञायमानत्वात् तत्र तात्पर्यं कल्प्यत इत्याशङ्क्याह— **न तत्रेति**। विशेषप्रत्यभिज्ञापकाभावान्नाव्यक्तशब्दस्य तत्र तात्पर्यं कल्पयितुं शक्यत इत्यर्थः। ननु प्रधानेऽव्यक्तशब्दस्य रूढत्वाच्छक्तिगोचरत्वेनैव शाब्दत्वमित्याशङ्क्याह— **न चायं कस्मिंश्चिदिति**। [3]वृद्धव्यवहारेऽसिद्धम्; नाप्यखण्डः शब्दोऽयमित्यर्थः। ननु सांख्यैः रूढिरङ्गीकृतेत्याशङ्क्याह— **या त्विति**। पुरुषकृतः सङ्केतो नानादिवेदार्थनिर्धारणे हेतुरित्यर्थः। ननु स्मार्तक्रमसादृश्येन

भाष्यभावप्रकाशिका

पारिभाषिकत्वादर्थनिर्णयाहेतुत्वं नाशङ्कनीयमिति भावः। ननु तथाप्यव्यक्तपदेन कारणत्वं नोक्तमिति, तत्राह—**तदेव चेति**। **श्रुतिस्मृतिन्यायप्रसिद्धिभ्य इति**। श्रुतिः अजामेकामित्याद्या। स्मृतिः साङ्ख्यस्मृतिः, "विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान्" इत्याद्या च। न्यायश्च—"भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्चे"त्यादिः। न च प्रकरणाच्छरीरमव्यक्तपदवाच्यम्; तस्य स्पष्टत्वादित्यपि द्रष्टव्यम्।

इदानीं श्रुतिप्रमाणं दूषयति—**न ह्येतदिति**। कुतो न भवतीति? तत्राह—**न ह्यत्रेति**। ननु साङ्ख्यस्मृतिप्रसिद्धाव्यक्तशब्दस्य श्रुतावपि प्रयुज्यमानत्वात् तच्छब्देन प्रधानं प्रत्यभिज्ञायत इति, अत आह—**शब्दमात्रमिति**। शब्दद्वाराऽर्थोऽपि प्रत्यभिज्ञायत इत्याशङ्क्य यौगिकत्वात् तदेकार्थप्रत्यायकत्वमनुपपन्नमित्याह—**स च शब्द इति**। ननु रूढत्वात् तदेकार्थप्रत्यायकत्वमित्याशङ्क्याह—**न चायमिति**। **न वेदार्थेति**। लौकिकी प्रसिद्धी रूढिर्वेदार्थनिर्णयनिमित्तम्। यथाहुः—"य एव लौकिकाःशब्दास्त एव वैदिकास्त

न्यायनिर्णयः

प्रधानवाचित्वे फलितमाह—**तस्येति**। तथापि कारणत्वं तस्याशाब्दमित्याशङ्क्याह—**तदिति**। श्रुतिः 'अजामेकाम्' इत्याद्या। स्मृतिः सांख्यीया, 'विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान्' इत्याद्या च। 'भेदानां परिमाणात्' इत्यादिर्न्यायः। न च प्रकरणपारिशेष्याभ्यां शरीरमव्यक्तं, तस्य स्पष्टत्वेन तच्छब्दानर्हत्वात्। अतो जगत्कारणस्य प्रधानस्य शब्दवत्त्वान्न गतिसामान्यमित्यर्थः।

स्थानादिभिरुक्तं प्रत्याह—**नैतदिति**। तत्रादौ श्रुतिं निराह—**न हीति**। कुतो न तदस्तित्वपरम्, स्मार्तप्रधानस्यैवात्र प्रत्यभिज्ञानात्, नेत्याह—**न हीति**। यादृशमित्यस्य व्याख्यानम्—**स्वतन्त्रमित्यादि**। सांख्यस्मृतिसिद्धाव्यक्तशब्दस्य श्रुतावपि प्रयोगात् तेन प्रत्यभिज्ञातं प्रधानमित्युक्तमाशङ्क्याह—**शब्देति**। शब्दस्यार्थव्याप्तेरर्थस्यापि प्रत्यभिज्ञानमाशङ्क्य यौगिकत्वात् तदेकार्थसिद्धिरित्याह—**स चेति**। रूढ्या तन्मात्रसिद्धौ कुतो योगाद् दुर्बलादर्थान्तरं शङ्क्यते, तत्राह—**न चेति**। परस्य प्रधाने रूढिरव्यक्तशब्दस्यास्तीत्याशङ्क्याह—**या त्विति**। न हि परीक्षकाणां पारिभाषिकी प्रसिद्धिर्वेदार्थनिर्णयनिमित्तम्, परीक्षकविप्रतिपत्त्या

---

१. 'अतस्तस्य' इति पा.। २. एवकारोऽप्यर्थकः। श्रुतिस्मृतिन्यायेत्यत्र श्रुतिपदेन 'अजामेका' मिति श्रुतिर्गृहीतेति रत्नप्रभायां न्यायनिर्णये च। भामतीमते तु प्रकृतैव 'महतः पर' मिति श्रुतिः गृह्यते। तत्र परत्वं कारणत्वपर्यवसायीति। ३. 'वृद्धव्यवहारेऽसिद्धेर्नाखण्डशब्दोऽयम्' इति पाठः स्यात्।

क्रममात्रसामान्यात् समानार्थप्रतिपत्तिर्भवत्यसति तद्रूपप्रत्यभिज्ञाने। न ह्यश्वस्थाने गां पश्यन्नश्वोऽयमित्यमूढोऽध्यवस्यति। प्रकरणनिरूपणायां चात्र न परपरिकल्पितं प्रधानं प्रतीयते; शरीररूपकविन्यस्तगृहीतेः। शरीरं ह्यत्र रथरूपकविन्यस्तमव्यक्तशब्देन परिगृह्यते। कुतः? प्रकरणात्, परिशेषाच्च। तथा ह्यनन्तरातीतो ग्रन्थ आत्मशरीरादीनां रथिरथादिरूपकक्लृप्तिं दर्शयति– 'आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च। इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्। आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।' (क.उ.१।३।३,४) इति। तैश्चेन्द्रियादिभिरसंयतैः संसारमधिगच्छति, संयतैस्त्वध्वनः

प्रकटार्थविवरणम्

प्रत्यभिज्ञायत इत्युक्तम्, तत्राह— **न च क्रममात्रेति**। इतश्च न प्रधानमव्यक्तशब्दवाच्यमित्याह— **प्रकरणनिरूपणायां चेति**। प्रकरणं विविच्य दर्शयति— **तथा हीत्यादिना**। रथिरथादिसामान्यकल्पनं रूपकक्लृप्तिः। प्रग्रहमश्वरशनां, तेष्विति तेषामिन्द्रियाणां विषयान् शब्दादीन् हयानां गोचरान् मार्गानाहुः। रथरूपककल्पनां दर्शयित्वा किं दर्शितमित्याशङ्क्याह— **तैश्चेन्द्रियादिभिरिति**।

भाष्यभावप्रकाशिका

एवैषामर्थाः" इति। न तु परीक्षकाणां पारिभाषिकीत्यर्थः। एवं श्रुतिं दूषयित्वा स्थानं दूषयति—**न च क्रममात्रेति। असति तद्रूपप्रत्यभिज्ञान इति**। तद्रूपविपरीतरूपप्रत्यभिज्ञान इत्यर्थः। प्रमाणानां स्वत एव स्वार्थनिश्चायकत्वात् स्थानप्रमाणस्यापि तद्रूपप्रत्यभिज्ञापेक्षाभावादित्याशङ्क्य तद्विपरीतरूपावगमे स्थानादर्थनिश्चयाभावे दृष्टान्तमाह—**न ह्यश्वस्थान इति**। ननु अत्र विपरीतरूपप्रत्यभिज्ञानं कथमिति? तदाह—**प्रकरणेति**। एतदुक्तं भवति—"आत्मानं रथिनम्" इत्यस्मिन् वाक्ये बुद्ध्यात्मनोर्मध्ये शरीरस्य श्रुतत्वादत्रापि शरीरमेवाव्यक्तपदेन समर्प्यते, स्मार्तक्रमात् प्रकरणानुगृहीतश्रौतक्रमस्य बलीयस्त्वादिति। प्रकरणं दर्शयति—**तथा ह्यनन्तरेति**। तेषु शरीरादिषु मध्ये विषयान् इन्द्रियहयगोचरानित्याहुः। यथाऽश्वोऽध्वानमालक्ष्य चलति, एवमिन्द्रियहयाः स्वगोचरमालक्ष्य चरन्तीति। ननु मार्गगमने रथिनो रथाद्यपेक्षा, न भोगे; चिद्रूपतया स्वरूपेणैव भोगसम्भवात्। अतः शरीरादीनां रथादिकल्पनया प्रतिपादना न कार्येति, तत्राह—**आत्मेन्द्रियमनोयुक्तमिति**। आत्मा भोक्तेत्याहुः। कथमिन्द्रियमनोयुक्तम्? इन्द्रियमनो योगो[यथा] भवति, इन्द्रियार्थमनःसंनिकर्षेण विना भोगासम्भवादसङ्गस्यात्मनः। अथवाऽऽत्मा शरीरम्, तदा

न्यायनिर्णयः

वेदार्थेऽपि तत्प्रसङ्गात्। लौकिकी प्रसिद्धी रूढिः। तथा 'य एव च लौकिकाः शब्दास्त एव वैदिकास्त एव चैषामर्थाः' इति न्यायादित्यर्थः। श्रुतिं दूषयित्वा स्थानं दूषयति—**न चेति**। मात्रचोऽर्थं स्फुटयति— **असतीति**। स्थानस्यापि नास्ति तद्रूपप्रत्यभिज्ञापेक्षा, स्वत एव प्रमाणत्वेन निश्चायकत्वादित्याशङ्क्य तद्रूपविपरीतप्रत्यभिज्ञासत्त्वमत्रेष्टमिति मत्वा विपरीतरूपज्ञाने स्थानादर्थासिद्धौ दृष्टान्तमाह—**न हीति**। कथं तर्हीह विपरीतरूपप्रत्यभिज्ञेत्याशङ्क्य सूत्रभागमवतार्य विभजते—**प्रकरणेति**। 'आत्मानं रथिनं विद्धि' इत्यस्मिन् वाक्ये बुद्ध्यात्मनोर्मध्ये शरीरस्य श्रुतत्वात् तदेवात्रापि महच्छब्दितबुद्धिपुरुषमध्यस्थमव्यक्तशब्देन गृह्यते। श्रौतक्रमस्य स्मार्तक्रमाद् बलीयस्त्वादित्यर्थः। उभयोरपि स्थानत्वात् कुतः श्रौतं स्थानमास्थाय शरीरमेव ग्राह्यमित्याह—**कुत इति**। प्रकरणाद्यनुगृहीतत्वेन श्रौतक्रमस्य प्राबल्यादित्याह—**प्रकरणादिति**। तदुभयं वक्तुमुपक्रमते—**तथा हीति**। तत्र प्रकरणं विविच्य दर्शयति—**अतीतेति**। रूपकक्लृप्तिः सादृश्यकल्पना; आत्मनो भोक्तृ रथित्वं शरीराख्यरथस्वामित्वम्। तत्र हि भोक्ता प्रधानम्। स्थूलं शरीरं भोगायतनत्वेन गुणतया रथवदवधेयमित्याह—**आत्मानमिति**। विवेकाविवेकप्रधानवृत्तिभ्यां बुद्धिरेव शरीरद्वारा सुखदुःखे भोक्तारमुपनयतीति मत्वाऽऽह—**बुद्धिमिति**। मनसाऽश्वरशनास्थानीयेन विवेकिना विषयेभ्यः श्रोत्रादीनि निगृह्यन्ते, तेनाविवेकिना तेषु प्रवर्त्यन्ते, तेन मनसो युक्तं प्रग्रहत्वमित्याह—**मन इति**। असंयतानीन्द्रियाणि पुरुषं संसारानर्थं, संयतानि मुक्तिद्वारं प्रापयन्तीत्याह—**इन्द्रियाणीति**। यथाऽश्वोऽध्वानमालक्ष्य चरत्येवमिन्द्रियहयाः स्वार्थमुपलभ्य चरन्तीत्याह—**विषयानिति**। शरीरादिषु मध्ये शब्दादीन् विषयानिन्द्रियहयगोचरानाहुरिति योजना। ननु मार्गे रथिनो रथाद्यपेक्षा, न भोगे, चिद्रूपतया स्वभावेनैव तद्योगात्, अतो देहादीनां रथादिकल्पनावैषम्यं, तत्राह—**आत्मेति**। आत्मा भोक्तेत्याहुरिति संबन्धः। तस्यासङ्गस्यार्थेन्द्रियासंनिकर्षे भोगायोगादिन्द्रियमनोयोगो यथा भवतीति क्रियाविशेषणेन तस्य भोक्तृत्वमुपपादयति—**इन्द्रियेति**। यद्वाऽऽत्मा देहः। देहेन्द्रियादिषु

पारं तद्विष्णोः परमं पदमाप्नोतीति दर्शयित्वा, किं तदध्वनः पारं विष्णोः परमं पदमित्यस्यामाकाङ्क्षायां तेभ्य एव प्रकृतेभ्य इन्द्रियादिभ्यः परत्वेन परमात्मानमध्वनः पारं विष्णोः परमं पदं दर्शयति– 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः।' (क.उ.१।३।१०,११) इति। तत्र य एवेन्द्रियादयः पूर्वस्यां रथरूपककल्पनायामश्वादिभावेन प्रकृतास्त एवेह परिगृह्यन्ते प्रकृतहानाप्रकृतप्रक्रियापरिहाराय। तत्रेन्द्रियमनोबुद्ध्यस्तावत् पूर्वत्रेह च समानशब्दा एव। अर्था ये शब्दादयो विषया इन्द्रियहयगोचरत्वेन निर्दिष्टास्तेषां चेन्द्रियेभ्यः परत्वम्, 'इन्द्रियाणां ग्रहत्वं विषयाणामतिग्रहत्वम्' (द्र.बृ.उ.३।२) इति श्रुतिप्रसिद्धेः। विषयेभ्यश्च मनसः परत्वम्, मनोमूलत्वाद् विषयेन्द्रियव्यवहारस्य। मनसस्तु परा बुद्धिः, बुद्धिं

प्रकटार्थविवरणम्

ननु पूर्ववाक्यविलक्षणक्रमदर्शनादन्ये एव पदार्था अत्रोच्यन्त इत्याशङ्क्याह— **तत्र य एवेति**। एवं प्रकरणशुद्धिं कृत्वा परिशेषमुपक्रमते— **तत्रेन्द्रियमन इति**। पूर्वत्र परिशिष्टं शरीरमुत्तरत्र परिशिष्टेनाव्यक्तपदेनाभिधातव्यमिति भावः। ननु उत्तरोत्तरपरत्वाभिधानं केनाभिप्रायेण? श्रेष्ठत्वाभिप्रायेणेत्याह— **अर्था ये शब्दादय इति**। इन्द्रियाणां ग्राहकत्वं विषयाधीनमिति विषयाणामतिग्राहकत्वं [ग्रहत्वं] विवक्षितमिति भावः। श्रुतिस्मृतिप्रसिद्धा वा हैरण्यगर्भी बुद्धिर्हिरण्यगर्भभेदेन ब्रह्मादिशब्दवाच्या

भाष्यभावप्रकाशिका

शरीरेन्द्रियादियुक्तमात्मानं भोक्तेत्याहुरित्यर्थः। प्राकरणिकसम्बन्धस्याकाङ्क्षापरस्परत्वात् [परतन्त्रत्वात्] पूर्ववाक्यप्रकृतस्य शरीरस्याव्यक्तशब्दाकाङ्क्षां दर्शयितुं रथादिरूपककल्पनायाः प्रयोजनं दर्शयन् मुख्यस्य परमपदस्य प्रकरणिन आकाङ्क्षामवतारयति— **तैश्चेन्द्रियादिभिरिति। अस्यामाकाङ्क्षायामिति**। विष्णोः पदस्य स्वरूपपरत्वयोराकाङ्क्षायामित्यर्थः। ननु यद्यपि पूर्वस्मिन् वाक्ये शरीरं प्रकृतम्; तथापीह प्रधानमेवाव्यक्तशब्देन गृह्यतामिति, तत्राह—**तत्र य एवेति**। एवं प्रकरणं दर्शयित्वा परिशेषं दर्शयति—**तत्रेन्द्रियमन इति**। ननु यथा पूर्वत्रानुक्तानामर्थानां ग्रहणम्, तथाऽनुक्तस्य प्रधानस्य ग्रहणमस्त्वित्याशङ्क्य तेषां विषयशब्देनोक्तत्वमाह—**अर्थास्तु ये शब्दादय इति**। ननु अर्थशब्देन विषयग्रहणमयुक्तम्; तेषामिन्द्रियेभ्योऽन्तरङ्गेभ्यो बाह्यानां परत्वायोगादित्याशङ्क्य कयाचिदपेक्षया परत्वं सम्भवतीत्याह—**तेषां चेति**। आन्तरत्वेन श्रेष्ठत्वाभावेऽप्यतिग्रहतयाऽर्थानां प्राधान्यस्य श्रुत्युक्तत्वात् "अष्टौ ग्रहा अष्टावतिग्रहा" इति श्रुत्या प्राण-जिह्वा-वाक्-चक्षुः-श्रोत्र-मनो-हस्त-त्वगिन्द्रियेभ्यो ग्रहशब्दोदितेभ्यो गन्ध-रस-नाम-रूप-शब्द-काम-कर्म-स्पर्शाख्या विषया अतिग्रहा निर्दिष्टाः। तत्र गृह्णन्ति वशीकुर्वन्ति इति ग्रहाः इन्द्रियाणि। इन्द्रियाणामपि ग्राहकत्वं विषयाधीनमिति विषया अतिग्रहा उच्यन्ते। तेनातिग्रहतयाऽतिशयप्राधान्यमित्यर्थः। ग्रहत्वेनेन्द्रियैः साम्येऽपि मनसः स्वगतेन विशेषेणार्थेभ्यः परत्वमाह—**विषयेभ्यश्चेति**। कुतो रथित्वेनोपक्षिप्तो गृह्यत इति?

न्यायनिर्णयः

युक्तमात्मानं भोक्तेत्याहुरिति योजना। प्राकरणिकसंबन्धस्याकाङ्क्षाधीनत्वात् पूर्ववाक्यस्थदेहस्याव्यक्तशब्दाकाङ्क्षां वक्तुं रथादिरूपक-कल्पनाफलं वदन् परमपदस्य प्रकरणिनो मुख्यस्याकाङ्क्षामवतारयति—**तैश्चेति**। परमपदस्य स्वरूपे परत्वे चाकाङ्क्षामाह—**किमिति**। आकाङ्क्षाद्वयशान्तयेऽनन्तरं ग्रन्थमादत्ते—**तेभ्य इति**। पूर्ववाक्ये शरीरस्य प्रकृतत्वेऽपि प्रधानमेवात्राव्यक्तमित्याशङ्क्याह—**तत्रेति**। प्रकरणं प्रदर्श्य परिशेषं दर्शयितुमारभते—**तत्रेति**। पूर्वत्रानुक्तानामर्थानामिहोक्तिवत् प्रधानस्यापि स्यादित्याशङ्क्य तेषां विषयशब्देनोक्तेर्मैवमित्याह—**अर्था इति**। अर्थशब्देन विषयोक्तिरयुक्ता, विषयाणामिन्द्रियेभ्योऽन्तरङ्गेभ्यो बाह्यतया परत्वायोगादित्याशङ्क्याह—**तेषां चेति**। आन्तरत्वेन श्रेष्ठत्वाभावेऽपि तेषामतिग्रहतया ग्रहरूपेन्द्रियापेक्षया प्राधान्यस्य श्रुत्युक्तत्वात् परत्वम्। 'अष्टौ ग्रहा अष्टावतिग्रहाः' इति श्रुत्या प्राणजिह्वावाक्चक्षुःश्रोत्रमनोहस्तत्वगिन्द्रियेभ्यो ग्रहेभ्यो गन्धरसनाम-रूपशब्दकामकर्मस्पर्शविषया अतिग्रहा उक्ताः। तत्र गृह्णन्ति वशीकुर्वन्ति पुरुषमिति ग्रहा इन्द्रियाणि। तेषामपि ग्राहकत्वं विषयाधीनमित्यतिग्रहा विषयास्तेनातिग्रहतया तेषां प्राधान्यमित्यर्थः। तर्हि कथमर्थेभ्यो मनसः परत्वं, तस्यापि ग्रहत्वेन प्राणादिसाम्यादित्याशङ्क्य स्वगतविशेषेणार्थेभ्यस्तस्य परत्वमाह—**विषयेभ्यश्चेति**। तथापि कथं बुद्धेर्मनसः सकाशात्परत्वं,

ह्यारुह्य भोग्यजातं भोक्तारमुपसर्पति। बुद्धेरात्मा महान्परः, यः स 'आत्मानं रथिनं विद्धि' इति रथित्वेनोपक्षिप्तः। कुतः? आत्मशब्दात्। भोक्तुश्च भोगोपकरणात्परत्वोपपत्तेः। महत्त्वं चास्य स्वामित्वादुपपन्नम्। अथवा 'मनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः। प्रज्ञा संविच्चितिश्चैव स्मृतिश्च परिपठ्यते' (म. भा.) इति स्मृतेः, 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' (श्वे.उ.६।१८) इति च श्रुतेर्या प्रथमजस्य हिरण्यगर्भस्य बुद्धिः सा सर्वासां बुद्धीनां परमा प्रतिष्ठा; सेह महानात्मेत्युच्यते। 'सा च पूर्वत्र बुद्धिग्रहणेनैव गृहीता सती हिरुगिहोपदिश्यते। तस्या अप्यस्मदीयाभ्यो बुद्धिभ्यः परत्वोपपत्तेः। एतस्मिंस्तु पक्षे परमात्मविषयेणैव परेण पुरुषग्रहणेन रथिन आत्मनो ग्रहणं द्रष्टव्यम्। परमार्थतः परमात्मविज्ञानात्मनोर्भेदाभावात्। तदेवं शरीरमेवैकं परिशिष्यते। इतराणीन्द्रियादीनि प्रकृतान्येव परमपददिदर्शयिषया समनुक्रामन् परिशिष्यमाणेनेहान्त्येनाव्यक्तशब्देन परिशिष्यमाणं प्रकृतं शरीरं दर्शयतीति गम्यते।

प्रकटार्थविवरणम्

'महानात्मे'त्युच्यत इत्याह— **अथ वेति**। नन्वप्रक्रान्ता सा कथमुच्यत इत्याशङ्क्याह— **सा च पूर्वत्रेति**। हिरुक् पृथक्। तर्ह्यात्माऽपि रथी परिशिष्टः स्यादित्याशङ्क्याह— **एतस्मिंस्तु पक्ष इति**। उपसंहरति— **तदेवमिति**। ननु शरीरादिप्रतिपादने फलाभावात्

भाष्यभावप्रकाशिका

तदाह—**आत्मशब्दादिति**। तत्रत्यभिज्ञानादित्यर्थः। ननु तर्हि "महतः परमव्यक्तम्" इति न निर्देष्टव्यम्, किन्त्वात्मनः परमिति, महच्छब्दस्यात्मवाचकत्वाभावादित्याशङ्क्य, तर्हि श्रुतिस्मृतिप्रसिद्धा हिरण्यगर्भबुद्धिरिहोच्यत इत्याह—**अथवेति**। भोग्यजातस्याधिकरणत्वाद् बुद्धिः [पूः]। ननु पूर्वत्रानुक्तहिरण्यगर्भबुद्धेरिव प्रधानस्यापि ग्रहणं स्यादिति, अत आह—**सा चेति**। हिरुक् पृथगित्यर्थः। ननु बुद्धेरेव बुद्धिः कथं परा स्यादिति? तत्राह—**तस्या अपीति**। व्यष्टिबुद्धीनामाश्रयत्वात् समष्टिबुद्धिः परेत्यर्थः। ननु तर्हि रथिनः पूर्वोक्तस्याग्रहणवच्छरीरस्याप्यग्रहणं स्यादित्याशङ्क्याह—**एतस्मिंस्त्विति**। प्रकरण-परिशेषाभ्यामव्यक्तपदेन शरीरग्रहणं प्रतिज्ञातमुपसंहरति—**इतराणीति**। शरीरादिषु रथादिकल्पनायाः प्रयोजनालोचनायामपि शरीरग्रहणं लभ्यत इति,

न्यायनिर्णयः

तयोर्भोक्तारं प्रत्यविशेषादित्याशङ्क्याह—**मनसस्त्विति**। निश्चयद्वारा विषया भोक्तुरुपकुर्वन्ति, निश्चयश्च बुद्धिरिति संशयात्मकमनसो बुद्धिप्राधान्यमित्यर्थः। बुद्ध्युपहितस्यात्मनस्ततो न परत्वं महत्त्वं चेत्याशङ्क्य यो रथित्वेन पूर्वत्रोक्तः सोऽत्र गृह्यत इत्याह—**बुद्धेरिति**। तत्रत्यभिज्ञानं तत्र हेतूकुर्वंस्तद्धेतुमाह—**आत्मेति**। यत्तु कथमस्य परत्वमिति, तत्राह—**भोक्तुश्चेति**। यत्पुनर्न तस्य महत्त्वमिति, तत्राह—**महत्त्वं चेति**। तर्हि 'महतः परमव्यक्तम्' इति न वक्तव्यं, किं त्वात्मनः परमिति, महच्छब्दस्यात्मवाचित्वा[भावा]दित्याशङ्क्याह—**अथवेति**। संकल्पविकल्परूपमननशक्त्या हैरण्यगर्भी बुद्धिर्मनः। तस्या व्यष्टिमनःसु समष्टितया व्याप्तिमाह—**महानिति**। संकल्पादिशक्तितया तर्हि संदेहात्मत्वं, तत्राह—**मतिरिति**। महत्त्वमुपपादयति—**ब्रह्मेति**। भोग्यजाताधारत्वमाह—**पूरिति**। निश्चयात्मत्वमाह—**बुद्धिरिति**। कीर्तिशक्तिमत्त्वमाह—**ख्यातिरिति**। नियमनशक्तिमत्त्वमाह—**ईश्वर इति**। लोके यत्प्रकृष्टं ज्ञानं ततोऽनतिरेकमाह—**प्रज्ञेति**। तत्फलमपि ततो नार्थान्तरविषयमित्याह—**संविदिति**। चित्प्रधानत्वमाह—**चितिरिति**। ज्ञातसर्वार्थानुसंधानशक्तिमाह—**स्मृतिश्चेति**। सर्वत्र विद्वत्प्रसिद्धिमनुकूलयति—**परिपठ्यत इति**। श्रुतिरपि हिरण्यगर्भबुद्धौ वेदाविर्भावमीश्वरानुग्रहवशादभिवदन्ती तदीयां बुद्धिमुक्तलक्षणां विवक्षतीत्याह—**य इति**। परत्वं तस्याः साधयति—**सर्वासामिति**। तर्हि पूर्वत्रानुक्तहिरण्यगर्भबुद्धेरिव प्रधानस्यापीहोक्तिः स्यात्, नेत्याह—**सा चेति**। हिरुगिति पृथक्त्वोक्तिः। कथं बुद्धेरेव परा बुद्धिरित्याशङ्क्य सर्वासामित्यत्रोक्तं स्फुटयति—**तस्या इति**। व्यष्टिबुद्ध्याश्रयत्वात् परा समष्टिबुद्धिरिति बुद्धेरित्यादिना तदुक्तिरविरुद्धेत्यर्थः। तर्हि पूर्वोक्तस्य रथिनोऽनुक्तिवदिह शरीरस्यापि च रथस्य स्यादित्याशङ्क्याह—**एतस्मिन्निति**। ननु पुरुषोक्त्या न रथिग्रहस्तस्य जीवत्वात् पुरुषस्य परमात्मत्वात्, तत्राह—**परमार्थत इति**। परिशेषमुपसंहरति—**तदेवमिति**। प्रकरणपरिशेषाभ्यामव्यक्तं शरीरमिति प्रतिज्ञातं निगमयति—**इतराणीति**। देहादिषु

१. भाष्ये **सा च पूर्वत्रेति, एतस्मिंस्त्विति च**। अत एव क्लेशात् अथवेति पक्षः प्रौढिवाद इत्युक्तं ब्रह्मविद्याभरणे।

शरीरेन्द्रियमनोबुद्धिविषयवेदनासंयुक्तस्य ह्यविद्यावतो भोक्तुः शरीरादीनां रथादिरूपककल्पनया संसारमोक्षगतिनिरूपणेन प्रत्यगात्मब्रह्मावगतिरिह विवक्षिता। तथा च 'एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः।' (क.उ. १।३।१२) इति वैष्णवस्य परमपदस्य दुरवगमत्वमुक्त्वा तदवगमार्थं योगं दर्शयति- 'यच्छेद् वाङ्मनसी प्राज्ञस्तद् यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति नियच्छेत् तद् यच्छेच्छान्त आत्मनि।' (क.उ. १।३।१३) इति। एतदुक्तं भवति- वाचं मनसि संयच्छेत्, वागादिबाह्येन्द्रियव्यापारमुत्सृज्य मनोमात्रेणावतिष्ठेत। मनोऽपि विषयविकल्पाभिमुखं विकल्पदोषदर्शनेन ज्ञानशब्दोदितायां बुद्धावध्यवसायस्वभावायां धारयेत्। तामपि बुद्धिं महत्यात्मनि भोक्तर्यग्र्यायां वा बुद्धौ सूक्ष्मतापादनेन नियच्छेत्। महान्तं त्वात्मानं शान्त आत्मनि प्रकरणवति परस्मिन् पुरुषे परस्यां काष्ठायां प्रतिष्ठापयेदिति च। तदेवं पूर्वापरालोचनायां नास्त्यत्र परपरिकल्पितस्य प्रधानस्यावकाशः।।१।।

सूक्ष्मं तु तदर्हत्वात्।।२।।

प्रकटार्थविवरणम्

किमर्थं तत् प्रतिपाद्यत इत्याशङ्क्याह— **शरीरेन्द्रियमनोबुद्धीति**। इतश्च परमात्मावगतिरेवात्र विवक्षिता, न प्रधानावगतिरित्याह— **तथा च एष इति**। "दर्शयति च" इति सूत्रपदस्य अर्थोऽनेन पुनः दर्शितः[1]। वागित्यत्र द्वितीयालोपश्छान्दसः।

भाष्यभावप्रकाशिका

(अत) आह—**शरीरेन्द्रियेति**। व्यतिरेकप्रतियोगिनः शरीरस्य ग्रहणं विना न सिध्यति तद्व्यतिरेकबोधाधीनं प्रत्यगात्मनो ब्रह्मत्वावगतिप्रयोजनमित्यर्थः। कथमेतदवगम्यत इत्यपेक्षायामात्मनो दुरवगमत्वकथनपूर्वकं तज्ज्ञानसाधनविधानादित्याह—**तथा चेति**। वागिति छान्दसो द्वितीयालोपः। वाग्ग्रहणं बाह्येन्द्रियाणामुपलक्षणार्थमङ्गीकृत्य व्याचष्टे—**वागादीन्द्रियव्यापारमिति**।

सूक्ष्मं तु तदर्हत्वात्।।२।। पूर्वपक्षिणोऽनुशयबीजनिरासायाह—**सूक्ष्मं त्विति**। सूत्राक्षराणि योजयित्वा सूत्रस्य विवक्षितमर्थं

न्यायनिर्णयः

रथादिकल्पनाफलालोचनायामपि शरीरमेवाव्यक्तमित्याह—**शरीरेति**। सुखादिर्वेदना। देहादिसंयोगे हेतुः—**अविद्यावत इति**। तत्संयोगफलमाह—**भोक्तुरिति**। देहादिव्यतिरेकबोधाधीनमात्मनो ब्रह्मत्वाधिगतिफलम्। न च प्रतियोगिनो देहादेरग्रहे तद्व्यतिरेकधीः। तथा चेन्द्रियादिवदेव शरीरमपि ग्राह्यमित्यव्यक्तशब्दस्य तदर्थतेत्यर्थः। प्रत्यग्ब्रह्मधीरिहाभीष्टेति कथं दृष्टिरित्याशङ्क्यात्मनो दुर्बोधत्वोक्त्या तद्धीहेतुविधेरित्याह—**तथा चेति**। अप्रकाशस्वभावत्वं व्यासेधति—**दृश्यते त्विति**। श्रवणादिपरिपाकानन्तर्यमाह—**अग्र्येति**। सूक्ष्मार्थविषतया सूक्ष्मत्वम्, तन्निष्ठानामेवोक्तबुद्धिद्वारा तद्दर्शनं न बहिर्मुखानामित्याह—**सूक्ष्मेति**। वाक्यतात्पर्यमाह—**वैष्णवस्येति**। कुतस्तर्हि तद्धीरित्याशङ्क्यानन्तरवाक्यमवतारयति—**तदिति**। ब्रह्मात्मधीसाधनविधायि वाक्यं व्याकरोति—**एतदिति**। वागिति द्वितीयालोपस्य छान्दसत्वाद् वाचमित्युक्तम्। वाचो ग्रहणं बाह्येन्द्रियोपलक्षणमित्युपेत्य वाक्यार्थमाह—**वागादीति**। तथा च सति मनसि संकल्पादिसंभवान्नैकरसब्रह्मधीरित्याशङ्क्याह—**मनोऽपीति**। बुद्धेरपि विषयप्रावण्यात् तस्यां सत्यां न ब्रह्मधीरित्याशङ्क्याह—**तामिति**। महत्यात्मनि पृथगवस्थिते नैक्यधीरित्याशङ्क्याह—**महान्तं त्विति**। तस्याधिष्ठानान्तरं नेति सूचयति—**परस्यामिति**। प्रकरणात् परिशेषाच्चाव्यक्तपदं शरीरमेव दर्शयतीति पूर्वत्र व्याख्यातं दर्शयति—**चेति**। विधान्तरेऽपि पुनर्व्याख्यायाधुना सूत्रार्थमुपसंहरति—**तदेवमिति**।।१।।

---

१. पूर्वापरपर्यालोचनयाऽपि न प्रधानग्रहणमिति 'दर्शयति' इत्यस्यार्थः। इदं चावान्तरप्रकरणोद्घाटनम्। महाप्रकरणोद्घाटनं च 'त्रयाणामेव' इति सूत्रे। द्र. ब्र. वि. ४७०।

उक्तमेतत् प्रकरणपरिशेषाभ्यां शरीरमव्यक्तशब्दम्, न प्रधानमिति। इदमिदानीमाशङ्क्यते- कथमव्यक्तशब्दार्हत्वं शरीरस्य, यावता स्थूलत्वात् स्पष्टतरमिदं शरीरं व्यक्तशब्दार्हम्; अस्पष्टवचनस्त्वव्यक्तशब्द इति। अत उत्तरमुच्यते- सूक्ष्मं त्विह कारणात्मना शरीरं विवक्ष्यते सूक्ष्मस्याव्यक्तशब्दार्हत्वात्। यद्यपि स्थूलमिदं शरीरं न स्वयमव्यक्तशब्दमर्हति, तथापि तस्य त्वारम्भकं भूतसूक्ष्ममव्यक्तशब्दमर्हति। प्रकृतिशब्दश्च विकारे दृष्टः। यथा- 'गोभिः श्रीणीत मत्सरम्' (ऋ.सं. ९।४६।४) इति। श्रुतिश्च- 'तद्धेदं तर्ह्यव्याकृतमासीत्' (बृ.उ. १।४।७) इतीदमेव व्याकृतनामरूपविभिन्नं जगत् प्रागवस्थायां परित्यक्तव्याकृतनामरूपं बीजशक्त्यवस्थमव्यक्तशब्दयोग्यं दर्शयति।

तदधीनत्वादर्थवत्।।३।।

अत्राह- यदि जगदिदमनभिव्यक्तनामरूपं बीजात्मकं प्रागवस्थमव्यक्तशब्दार्हमभ्युपगम्येत, तदात्मना

प्रकटार्थविवरणम्

सूक्ष्मं तु तदर्हत्वात्। शङ्कोत्तरत्वेन सूत्रं व्याचष्टे— **उक्तमेतदित्यादिना।** कार्यकारणयोरभेदाभिप्रायेण कारणवाचकोऽव्यक्तशब्दः कार्ये प्रयुक्तः; तत्रोदाहरणं यथा-गोभिः गोविकारेण पयसा श्रीणीत विकारापन्नं कुर्यात् मत्सरं सोममित्यर्थः। अभेदाभिप्रायेण कार्यस्याव्यक्तशब्दवाच्यत्वे श्रुतिमाह— **श्रुतिश्चेति।**

तदधीनत्वादर्थवत्। मतसाम्यमाशङ्कते— **अत्राहेत्यादिना।**

भाष्यभावप्रकाशिका

कथयति—**यद्यपि स्थूलमिति।** भवत्वेवं सूक्ष्मस्य तदर्हत्वम्, स्थूलस्य शरीरस्य किमायातमिति? अत्राह—**प्रकृतिशब्दश्चेति।** प्रकृतेर्विकाराणामनन्यत्वात् प्रकृतेरव्यक्तत्वं विकार उपचर्यत इत्यर्थः। प्रकृतिशब्दस्य विकारे प्रयोगे दृष्टान्तमाह—**यथा गोभिरिति।** अत्र हि गोशब्दस्तद्विकारे पयसि प्रयुक्तः, तेन गोभिः पयोभिर्मत्सरं सोमं श्रीणीत युक्तं कुर्यात्। यद्यपि पाकार्थोऽयं शब्दः, तथापि 'हिरण्येन श्रीणीते'त्या[दि]वदत्र [प]यस्सम्बन्धार्थः। अव्यक्तात् कारणादनन्यत्वे प्रमाणमाह—**श्रुतिश्चेति।**

न्यायनिर्णयः

अव्यक्तपदस्य देहे प्रवृत्तियोग्यत्वमाह—**सूक्ष्मं त्विति।** शङ्कोत्तरत्वेन व्याख्यातुं वृत्तमनूद्य शङ्कां दर्शयति—**उक्तमिति।** प्रवृत्तिनिमित्ताभावान्न शरीरमव्यक्तशब्दमिति शङ्कामेव विशदयति—**कथमिति।** दुर्निरूपत्वं तत्राव्यक्तशब्दप्रवृत्तिनिमित्तमित्याशङ्क्याह—**यावतेति।** स्पष्टतरत्वेन व्यक्तशब्दार्हत्वेऽपि तस्मिन्नव्यक्तपदं किं नोच्यते, तत्राह—**अस्पष्टेति।** उत्तरत्वेन सूत्रमवतार्य तदक्षराणि व्याकरोति—**अत इति।** इहेत्युदाहरणोक्तिः। स्थूलस्य देहस्य कुतः सूक्ष्मत्वं, तदाह—**कारणेति।** अव्यक्तशब्देन कारणात्मना सक्ष्मस्य देहस्य वक्तुमिष्टत्वे हेतुमाह—**सूक्ष्मस्येति।** अक्षरार्थमुक्त्वा प्रवृत्तिनिमित्तं व्यक्तीकर्तुं विवक्षितमर्थमाह—**यद्यपीति।** भूतसूक्ष्मस्याव्यक्तशब्दार्हत्वेऽपि किं जातं स्थूलस्य देहस्येत्याशङ्क्याह—**प्रकृतीति।** प्रकृतेर्विकाराणामनन्यत्वाद् विकारे प्रकृतेरव्यक्तत्वमुपचरितमित्यर्थः। प्रकृतिशब्दस्य विकारे प्रयोगे श्रौतं दृष्टान्तमाह—**यथेति।** गोभिस्तद्विकारैः पयोभिर्मत्सरं सोमं श्रीणीत 'श्रीञ् पाके' इत्यस्य धातोर्लोटि 'मध्यमपुरुषबहुवचनम्। विकारापन्नं कुर्यात्। पाकार्थत्वेऽपि 'हिरण्येन श्रीणीते'तिवदत्र संबन्धार्थत्वं श्रीणातेरिष्टम्। तथा कारणवाचकमव्यक्तपदं तदभिन्नकार्ये भवत्यौपचारिकमित्यर्थः। अव्यक्तात् कारणाद् विकाराणामनन्यत्वे हेतुमाह—**श्रुतिश्चेति।** अव्यक्तमव्याकृतमित्यनर्थान्तरमित्युपेत्य व्याचष्टे—**इदमिति।** तदा तस्य स्वरूपेणासत्त्वं व्यावर्तयति—**बीजेति।** बीजमेव शक्तिरतीन्द्रियत्वात्। तदात्मना स्थितमिति यावत्।।२।।

उक्तश्रुत्या प्रधानप्रसक्तिं प्रत्याह—**तदधीनत्वादिति।** तद् व्याख्यातुमादौ व्यावर्त्यां शङ्कां दर्शयति—**अत्रेति।** प्रकृता श्रुतिः सप्तम्यर्थः। जगतोऽव्यक्तशब्दार्हत्वमिदानीमविवक्षितं, शरीरस्य तु कारणात्मना तच्छब्दत्वं प्रतिज्ञातमित्याशङ्क्याह—**तदात्मनेति।**

---

१. अध्वर्यून् संबोध्य 'यूयं श्रीणीत' इति मन्त्रेऽस्मिन्नभिधीयते। अतो लोण्मध्यमपुरुषत्वेन व्याख्यातम्। मानान्तराप्राप्तत्वेन चास्यार्थस्यात्रैव विधिकल्पनमभिप्रेत्य 'विकारापन्नं कुर्यात्' इति फलितार्थकथनम्। मिश्रयेदिति यावत्।

च शरीरस्याप्यव्यक्तशब्दार्हत्वं प्रतिज्ञायेत, स एव तर्हि प्रधानकारणवाद एवं सत्यापद्येत। अस्यैव जगतः प्रागवस्थायाः प्रधानत्वेनाभ्युपगमादिति। अत्रोच्यते- यदि वयं स्वतन्त्रां कांचित् प्रागवस्थां जगतः कारणत्वेनाभ्युपगच्छेम, प्रसञ्जयेम तदा प्रधानकारणवादम्। परमेश्वराधीना त्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते, न स्वतन्त्रा। सा चावश्याभ्युपगन्तव्या। अर्थवती हि सा। न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिध्यति। शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः। मुक्तानां च पुनरनुत्पत्तिः। कुतः? विद्यया तस्या बीजशक्तेर्दाहात्। अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिः, यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः।

प्रकटार्थविवरणम्

सत्यत्वमिथ्यात्वाभ्यां महद्वैलक्षण्यमाह— **अत्रोच्यत इत्यादिना**। सा च अविक्रियस्य साक्षात् जगत्स्रष्टृत्वानुपपत्तेः अवश्याश्रयणीयेत्याह— **सा चावश्येति**। नन्व[वि]क्रियस्यापि यदि मायया स्रष्टृत्वं तर्हि मुक्तानामपि तयैव किं न बन्ध इत्याशङ्क्याह— **मुक्तानां चेति**। तस्या मायाया मुक्तं प्रति बीजशक्तेरविद्यावाच्याया दाहादित्यर्थः। उक्तमेव स्पष्टयति— **अविद्यात्मिका हीति**। जीवोपाधेर्मायाप्रदेशस्य विद्यापनोद्यतया अविद्याशब्दवाच्यस्य मायातादात्म्यात् मायाऽप्यविद्यात्मिकेत्यर्थः।

भाष्यभावप्रकाशिका

तदधीनत्वादर्थवत्।।३।। अव्याकृतम् अव्यक्तमित्यनर्थान्तरम्। **प्रधानत्वेनाभ्युपगमादिति**। सुखदुःखमोहात्मकं तद्रूपकार्यं तथाविधमेव कारणं गमयतीत्यर्थः। कथं तर्ह्यभ्युपगम इति? तदाह—**परमेश्वराधीना त्विति**। ब्रह्मण एव जगदुपादानत्वसम्भवात् साऽनर्थिकेत्याशङ्क्याह—**सा चावश्येति**। अर्थवत्त्वमेव सूचितं दर्शयति—**न हि तयेति**। वह्न्यादिवच्छक्तिरहितस्य कार्याजनकत्वादित्यर्थः। बन्धमोक्षव्यवस्थाया अन्यथाऽनुपपत्तेश्चेयमभ्युपगन्तव्येत्याह—**मुक्तानामिति**। अथवा तदभ्युपगमे मोक्षो न स्यात्; तस्या एकरूपत्वात्; तद्विनाशे वा समस्तसंसारोच्छेदप्रसङ्गादित्याशङ्क्याह—**मुक्तानामिति**। तद्दाहेऽपि न कृत्स्नसंसारोच्छेदः; प्रतिजीवमविद्याभेदाभ्युपगमादिति भावः। बीजशक्तेर्वस्तुत्वाद् विद्यया-दाहोऽनुपपन्न इति, अत आह—**अविद्यात्मिका हीति**। प्रतिजीवमविद्याया भेदेऽप्यविद्यात्वमात्रेणाव्यक्तमव्याकृतमिति चैकत्वमुपचर्यते। ननु एवम् अविद्यैव जगद्बीजम् इति किमीश्वरेणेति? अत आह—**परमेश्वराश्रयेति**। जीवाधिकरणाऽप्यविद्या स्वकार्यं कर्तुं परमेश्वरं निमित्ततया विषयतया चाश्रयत इतीश्वराश्रयोच्यते, न तु तदाधारतया। तेन जीवाश्रयाविद्याविषयतया ब्रह्म प्रपञ्चविभ्रमोपादानम्, यथा देवदत्ताविद्याविषयशुक्त्यादि रजताद्युपादानमुच्यते। अथवा स्वसत्ताप्रतीत्योश्चेतनापेक्षत्वमीश्वराश्रयत्वं नाम। सत्तायामपेक्षां दर्शयति—**मायामयीति**। यथा मायाविनो माया परतन्त्रा, तद्वदित्यर्थः। प्रतीतौ चेतनापेक्षां दर्शयति—**महासुषुप्तिरिति**। जीवानां स्वयम्प्रकाशब्रह्मस्वरूपताप्रतिपत्तिप्रतिबन्धकतयाऽप्यर्थवती सेत्याह—**यस्यामिति**।

न्यायनिर्णयः

सिद्धान्तमनूद्यानिष्टं प्रसञ्जयति—**स एवेति**। तर्हि तस्यां प्रागवस्थायाम्। **एवं सति** प्रागवस्थं जगदव्यक्तशब्दयोग्यमित्यादाविष्टे सतीत्यर्थः। सुखदुःखमोहात्मकं कार्यं तादृगेव कारणं गमयतीति हेतुमाह—**अस्यैवेति**। तत्र सूत्रमुत्तरत्वेन व्याकर्तुं भूमिकां करोति—**अत्रेति**। कथं तर्हि भवद्भिरभ्युपगम्यते, तदाह—**परमेति**। तस्यैव जगदुपादानत्वादानर्थक्यादेषा नोपेयेत्याशङ्क्याह—**सा चेति**। तदधीनत्वादिति व्याख्यायार्थवदित्यंशं व्याख्याति—**अर्थवतीति**। तदेव समर्थयते—**न हीति**। कूटस्थासङ्गाद्वयस्य ब्रह्मणः स्रष्टृत्वानुपपत्त्या मायाशक्तिरेष्टव्येत्युक्तम्। इदानीं बन्धमोक्षव्यवस्थानुपपत्तेश्चेत्याह—**मुक्तानां चेति**। यस्यां सत्यां जननमरणादिः संसारः, यन्निवृत्त्या तन्निवृत्तिः, सा मायाशक्तिरेष्टव्येत्यर्थः। ननु न बीजशक्तिर्विद्यया दह्यते, वस्तुत्वात्, आत्मवत्, नेत्याह—**अविद्येति**। केचित्तु प्रतिजीवमविद्याशक्तिभेदमिच्छन्ति। तन्न। अव्यक्ताव्याकृतादिशब्दायास्तस्या भेदकाभावादेकत्वेऽपि स्वशक्त्या विचित्रकार्यकरत्वादित्याह—**अव्यक्तेति**। न च तस्या जीवाश्रयत्वं, जीवशब्दवाच्यस्य कल्पितत्वात् तदविद्यारूपत्वात् तच्छब्दलक्ष्यस्य ब्रह्माव्यतिरेकादित्याह—**परमेश्वरेति**। मायाऽविद्ययोर्भेदादीश्वरस्य मायाश्रयत्वं जीवानामविद्याश्रयतेति वदन्तं प्रत्याह—**मायामयीति**। यथा मायाविनो माया परतन्त्रा तथैषाऽपीत्यर्थः। प्रतीतौ तस्याश्चेतनापेक्षायामाह—**महासुप्तिरिति**। अर्थापत्त्या मायाशक्तेः सत्त्वमुक्त्वा अग्रहवत्त्वेन विपर्यासवत्त्वेन चानन्तजीवनिर्भासहेतुत्वेनापि साऽर्थवतीत्याह—**यस्यामिति**।

तदेतदव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टम्– 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' (बृ.उ.३।८।११) इति श्रुतेः; क्वचिदक्षरशब्दोदितम्– 'अक्षरात्परतः परः' (मु.उ.२।१।२) इति श्रुतेः; क्वचिन्मायेति सूचितम्– 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' (श्वे.उ.४।१०) इति मन्त्रवर्णात्। अव्यक्ता हि सा माया, तत्त्वान्यत्वनिरूपणस्याशक्यत्वात्। तदिदं 'महतः परमव्यक्तम्' इत्युक्तमव्यक्तप्रभवत्वान्महतः यदा हैरण्यगर्भी बुद्धिर्महान्। यदा तु जीवो महांस्तदाऽप्यव्यक्ताधीनत्वाज्जीवभावस्य महतः परमव्यक्तमित्युक्तम्। अविद्या ह्यव्यक्तम्। अविद्यावत्त्वेनैव जीवस्य सर्वः संव्यवहारः संततो वर्तते। तच्चाव्यक्तगतं महतः परत्वमभेदोपचारात् तद्विकारे शरीरे परिकल्प्यते। सत्यपि शरीरवदिन्द्रियादीनां तद्विकारत्वाविशेषे शरीरस्यैवाभेदोपचारादव्यक्तशब्देन ग्रहणम्, इन्द्रियादीनां स्वशब्दैरेव गृहीतत्वात्, परिशिष्टत्वाच्च शरीरस्य।

अन्ये तु वर्णयन्ति– द्विविधं हि शरीरं स्थूलं सूक्ष्मं च। स्थूलं यदिदमुपलभ्यते। सूक्ष्मं यदुत्तरत्र वक्ष्यते–

प्रकटार्थविवरणम्

न केवलं श्रुतार्थापत्तिसिद्धा माया, अनेकश्रुतिसिद्धाऽपि भवतीत्याह— **तदेतदव्यक्तमिति**। न च सांशत्वे कार्यत्वप्रसङ्गश्चोद्यो **मीमांसकैः**, क्षित्यादौ व्यभिचारात्;[1] नापि **नैयायिकैः**, कल्पितप्रदेशवत्त्वेऽप्याकाशस्यानादित्वाभ्युपगमात्, द्रव्यस्य द्रव्यान्तर-समवेतस्य सावयवत्वस्याभ्युपगमात्; स्वपक्षेऽपि मायातिरिक्तमेव जडं दृश्यम्, यथा कार्यम्; सांशमपि तथा। तच्च त्रिगुणत्वयुगपदनेकपरिणामित्वादिबलादाश्रयणीयमुक्तम्। उक्तं हि— "प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि। वालाग्रशतभागोऽपि न कल्प्यो निष्प्रमाणकः॥" इति। [2]आनन्त्यान्न क्रमेण क्षयप्रसङ्गः। [3]सत्त्वासत्त्वाभ्यामनिर्वचनीयत्वात् साऽव्यक्तशब्दार्हा भवतीत्याह— **अव्यक्ता हि मायेति**। कथं तर्हि परत्वाभिधानमुपपद्यत इत्याशङ्क्याह— **तदिदं महत इति**। मायाप्रदेशे ह्यविद्यायां प्रतिबिम्बितं चैतन्यं जीवसंज्ञां लभते। औपाधिकस्योपाध्यधीनत्वात् जीवादपि मायायाः परत्वाभिधानमुपपन्नमित्यर्थः। नन्वस्त्वविद्याया महतः परत्वम्; तथापि न शरीरस्येत्याशङ्क्याह— **तच्चाव्यक्तगतमिति**। नन्विन्द्रियादीनामपि मायाकार्यत्वाविशेषात् किमित्यव्यक्तशब्देनाग्रहणमित्याशङ्क्याह— **सत्यपीति**।

भाष्यभावप्रकाशिका

एवमर्थापत्त्या तत्सम्बन्धमभिधायेदानीं तत्र श्रुतिमाह—**तदेतदिति**। इदानीमव्यक्तशब्दार्हतां दर्शयितुं तस्या अनिर्वचनीयतयाऽस्पष्टतामाह—**अव्यक्ता हीति**। इदानीं परत्वमस्या उपपादयति—**तदिदमिति**। तदधीनत्वं वक्तुमव्यक्तस्याविद्यात्वमाह—**अविद्या ह्यव्यक्तमिति**। इदानीं तदधीनत्वं दर्शयति—**अविद्या(पर)[व]त्त्वेनेति**। तथापि कथं शरीरस्य महतः परत्वमिति? अत आह— **तच्चाव्यक्तगतमिति**। ननु इन्द्रियादीनामप्यभेदसंभवादव्यक्तत्वं परत्वं च स्यादिति, अत आह— **सत्यपीति**।

न्यायनिर्णयः

तत्रैव श्रुतिमाह—**तदिति**। अनवच्छिन्नत्वादाकाशत्वं, तत्त्वज्ञानं विनाऽनिवृत्तेरक्षरत्वं, विचित्रकार्यत्वान्मायात्वमिति भेदः। इदानीमनिर्वाच्यत्वेनाव्यक्तशब्दार्हत्वमाह—**अव्यक्तेति**। उक्तमर्थं प्रकृतश्रुत्या योजयति—**तदिदमिति**। कुतस्तस्य महतः सकाशात्परत्वमित्याशङ्क्य बुद्धिपक्षे तावदुपपत्तिमाह—**अव्यक्तेति**। युक्तं हि कार्यात्कारणस्य परत्वमिति भावः। जीवपक्षेऽपि परत्वोपपत्तिमाह—**यदा त्विति**। दृष्टं हि राजादेः स्वाधीनादमात्यादेः परत्वमिति भावः। कुतो जीवभावस्याव्यक्ताधीनत्वमविद्याधीनत्वादित्याशङ्क्याव्यक्तस्योक्तं स्वरूपं स्मारयति—**अविद्येति**। सम्प्रति जीवभावस्य तदधीनत्वमाह—**अविद्यावत्त्वेनेति**। तथापि कथं शरीरस्य महतः सकाशात्परत्वं, तत्राह—**तच्चेति**। इन्द्रियादीनामपि प्रकृत्यभेदादव्यक्तत्वं परत्वं च तुल्यमिति कुतः शरीरस्यैवेह ग्रहणमित्याशङ्क्याह—**सत्यपीति**।

आचार्यदेशीयमतमुत्थापयति—**अन्ये त्विति**। तन्मतेऽपि सूत्रद्वयं योजयितुं पातनिकामाह—**द्विविधमिति**। तस्य द्विविधस्यापि

१. मीमांसकैः सृष्टिप्रलयानङ्गीकारेण तन्मते क्षित्यादेरनादित्वेन कार्यत्वाभावात् व्यभिचार इति भावः।

२. नन्वेकैकजीवमुक्तौ एकैकाविद्यारूपप्रदेशनाशात् क्रमेण मायायाः क्षयप्रसङ्ग इत्याशङ्क्याह— आनन्त्यादिति।

३. सत्त्वासत्त्वेति। अनिर्वचनीयत्वं प्रवृत्तिनिमित्तमिति भावः। नन्वेवं सति शरीरेऽपि तत्सत्त्वात् 'यद्यपि स्थूलमिदं शरीरं नाव्यक्तशब्दमर्हति' इति कथमुक्तमिति चेत्? उच्यते। स्फुटप्रत्यक्षागोचरत्वमव्यक्तत्वमिति लोकप्रसिद्धिमनुसृत्य तथोक्तम्। द्र. ब्र. वि. ४७५।

'तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्' (ब्र.सू. ३।१।१) इति। तच्चोभयमपि शरीरमविशेषात् पूर्वत्र रथत्वेन संकीर्तितम्। इह तु सूक्ष्ममव्यक्तशब्देन परिगृह्यते, सूक्ष्मस्याव्यक्तशब्दार्हत्वात्। तदधीनत्वाच्च बन्धमोक्षव्यवहारस्य जीवात् तस्य परत्वम्। यथाऽर्थाधीनत्वादिन्द्रियव्यापारस्येन्द्रियेभ्यः परत्वमर्थानामिति।

तैस्त्वेतद् वक्तव्यम्, अविशेषेण शरीरद्वयस्य पूर्वत्र रथत्वेन संकीर्तितत्वात् समानयोः प्रकृतत्वपरिशिष्टत्वयोः कथं सूक्ष्ममेव शरीरमिह गृह्यते, न पुनः स्थूलमपीति। आम्नातस्यार्थं प्रतिपत्तुं प्रभवामो नाम्नातं पर्यनुयोक्तुम्; आम्नातं चाव्यक्तपदं सूक्ष्ममेव प्रतिपादयितुं शक्नोति, नेतरद्, व्यक्तत्वात् तस्येति चेत्? न; एकवाक्यताधीनत्वादर्थप्रतिपत्तेः। न हीमे पूर्वोत्तरे आम्नाते एकवाक्यतामनापद्य कंचिदर्थं प्रतिपादयतः, प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गात्। न चाकाङ्क्षामन्तरेणैकवाक्यताप्रतिपत्तिरस्ति। तत्राविशिष्टायां शरीरद्वयस्य

प्रकटार्थविवरणम्

एवं स्वाभिप्रायेण सूत्रद्वयं व्याख्याय वृत्तिकारव्याख्यानमनुवदति— **अन्ये तु वर्णयन्तीति**। स्थूलदेहारम्भकं शुक्लशोणितसूक्ष्मावयवभूतं सूक्ष्मं नाम प्रतिजीवमसाधारणं वर्तते, देहान्तरप्रतिपत्तौ येन संपरिष्वक्तो जीवो गच्छति, तदभिप्रायेण "सूक्ष्मं तु तदर्हत्वात्" इति सूत्रम्। कथं तर्हि तस्य जीवात्परत्वमित्याशङ्क्य "तदधीनत्वाच्च" इति द्वितीयसूत्रं प्रवृत्तम्। "अर्थवत्" इति सूत्रभागं व्याचष्टे— **यथेति**। तत्र न तावत् शरीरशब्दो भूतसूक्ष्मं वक्तुं शक्तः, तत्रागृहीतसङ्गतित्वात्; ब्रवीतु वा; तथापि प्रकृतहानं प्रसज्यत इत्याह— **तैस्त्वेतद्वक्तव्यमिति**। अव्यक्तशब्दबलेन प्रकृतहानं क्रियत इत्याह— **आम्नातस्यार्थमिति**। पूर्वोत्तराम्नानयोरेकवाक्यताधीनत्वात् अर्थप्रतिपत्तेः, तव च तदभावात् कुतस्तरामर्थप्रतिपत्तिः? कुतस्तमामव्यक्तशब्दबलेन स्थूलकलेवरपरित्याग इत्याह— **नेति**। एकवाक्यताधीनाऽर्थप्रतिपत्तिरित्येतदेव कुत इत्याशङ्क्याह— **न हीमे इति**। शरीरशब्दस्य स्थूलशरीरे रूढत्वात् तस्य प्रकृतस्य प्रहाणं, भूतसूक्ष्मस्य त्वप्रकृतस्याव्यक्तशब्दवाच्यत्वात् प्रक्रिया निष्प्रमाणिका प्रसज्यत इत्यर्थः। अस्तु तर्हि एकवाक्यतेत्याशङ्क्याह— **न चाकाङ्क्षामिति**। यत्रैकवाक्यता तत्राकाङ्क्षापूर्विकैव; यथा कर्तव्यस्य इतिकर्तव्यताकाङ्क्षया प्रयाजादिवाक्यान्वय इत्यर्थः। अस्तु तर्ह्यव्यक्तपदस्याप्रसिद्धार्थस्य वाच्याकाङ्क्षायां प्रकृतशरीरसबन्ध इत्याशङ्क्याह— **तत्राविशिष्टायामिति**।

भाष्यभावप्रकाशिका

आचार्यदेशीयमतमाह—**अन्ये त्विति**। सूत्रद्वयं स्वमते [तन्मते] योजयति— **[इ]हेत्यादिना**। पूर्ववाक्य उभयोर्ग्रहणे सति सूक्ष्मस्यैव ग्रहणं कथमिति? अत आह—**सूक्ष्मस्येति**।तदधीनतया ततः परत्वे दृष्टान्तं सूत्रोक्तमाह—**यथाऽर्थाधीनत्वादिति**। एतद् दूषयति—**तैस्त्वेतदिति**। अव्यक्तपदमेव व्यक्तस्थूलशरीरव्यावृत्तिहेतुरिति शङ्कते—**आम्नातस्येति**।तर्ह्येकवाक्यतामादायैवार्थः प्रतिपाद्यतामिति, तत्राह—**न चाकाङ्क्षामिति**। उभयं प्रकृतत्वाद् ग्राह्यत्वेनाकाङ्क्षितम्। अत एकाभिधायकमव्यक्तपदं

न्यायनिर्णयः

प्रामाणिकत्वमाह—**स्थूलमिति**। देहद्वयस्याप्रस्तुतत्वमाशङ्क्याह—**तच्चेति**। भूमिकां कृत्वा 'सूक्ष्मं तु' इति सूत्रावयवं व्याकरोति—**इहेति**। पूर्ववाक्ये द्वयोः संनिधौ सूक्ष्मस्यैवात्र ग्रहे को हेतुरित्याशङ्क्य 'तदर्हत्वात्' इति हेत्वर्थमाह—**सूक्ष्मस्येति**। कथं तर्हि तस्य महतो जीवात्परत्वमित्याशङ्क्य द्वितीये सूत्रे तदधीनत्वं व्याचष्टे—**तदधीनत्वाच्चेति**। सूक्ष्मदेहाधीनौ विवेकाविवेकाभ्यां बन्धमोक्षौ, तेन तद्वतो जीवात् परत्वमित्यर्थः। तत्र सौत्रं दृष्टान्तमाह—**यथेति**। इतिशब्दो दार्ष्टान्तिकद्योती वृत्तिकारमतसमाप्त्यर्थश्च। **वृत्तिकृतं मतं निराचष्टे—तैस्त्विति**। अव्यक्तपदमेव व्यक्तस्थूलदेहव्यावृत्तिहेतुरित्याह—**आम्नातस्येति**। आम्नातमपि पदमुभयसाधारणमित्याशङ्क्याह—**आम्नातं चेति**। पूर्वोत्तराम्नातयोरेकवाक्यताधीनत्वादर्थदृष्टेस्त्वन्मते चैकवाक्यताऽभावात् कुतोऽर्थधीः;, कुतश्चाव्यक्तशब्देन स्थूलदेहनिवृत्तिरित्याह—**नेति**। एकवाक्यताधीनाऽर्थधीरित्येतदेव कथमित्याशङ्क्याह—**न हीति**। शरीरशब्दस्य स्थूलशरीरे रूढेस्तस्य प्रकृतस्य हानं भूतसूक्ष्मस्याप्रकृतस्याव्यक्तशब्दत्वप्रक्रिया च निष्प्रमाणिकाऽऽयाता स्यादित्याह—**प्रकृतेति**। पूर्वोत्तराम्नाते तर्ह्येकवाक्यतामापद्यैवार्थं प्रतिपादयेतां, तत्राह—**न चेति**। अस्तु तर्हि तद्वशादेकवाक्यतापत्तिः, तत्राह—**तत्रेति**। आकाङ्क्षाया

ग्राह्यत्वाकाङ्क्षायां यथाकाङ्क्षं संबन्धेऽनभ्युपगम्यमान एकवाक्यतैव बाधिता भवति, कुत आम्नातस्यार्थप्रतिपत्तिः? न चैवं मन्तव्यम्– दुःशोधत्वात् सूक्ष्मस्यैव शरीरस्येह ग्रहणम्, स्थूलस्य तु दृष्टबीभत्सतया सुशोधत्वादग्रहणमिति। यतो नैवेह शोधनं कस्यचिद् विवक्ष्यते। न ह्यत्र शोधनविधायि किंचिदाख्यातमस्ति। अनन्तरनिर्दिष्टत्वात्तु किं तद् विष्णोः परमं पदमितीदमिह विवक्ष्यते। तथा हीदमस्मात्परमिदमस्मात्परमित्युक्त्वा 'पुरुषान्न परं किंचित्' इत्याह। सर्वथाऽपि त्वानुमानिकनिराकरणोपपत्तेस्तथा नामास्तु, न नः किंचिच्छिद्यते।।३।।

ज्ञेयत्वावचनाच्च।।४।।

ज्ञेयत्वेन च सांख्यैः प्रधानं स्मर्यते गुणपुरुषान्तरज्ञानात् कैवल्यमिति वदद्भिः। न हि गुणस्वरूपमज्ञात्वा

प्रकटार्थविवरणम्

ननु शरीरद्वयस्य प्रकृतत्वाविशेषेऽपि वैराग्यविषयतया परिशोधनप्रयोजनवशेन सूक्ष्ममेवाव्यक्तशब्देनोपादीयते, न स्थूलमित्याशङ्क्याह— **न चैवं मन्तव्यमिति**। स्पष्टदोषानुपलम्भेन दुःखेन शोधोऽस्येति दुःशोधम्। दौर्गन्ध्यादिदोषावलम्बेन दृष्टा बीभत्सा घृणा यस्मिंस्तद् दृष्टबीभत्सं तस्य भावस्तत्ता तया वैराग्यविषयत्वेन सुनिरूप्यत्वादग्रहणमिति न मन्तव्यम्। इदानीमभ्युपगम्याह— **सर्वथाऽपीति**।

ज्ञेयत्वावचनाच्च। किंच ज्ञेयत्वेनानुपदेशादपि न प्रधानमिह विवक्षितमित्याह— **ज्ञेयत्वेनेति**। सत्त्वादिगुणानां साम्यावस्था प्रधानं गुण उच्यते; तस्मात्पुरुषस्यान्तरज्ञानात् विवेकज्ञानादित्यर्थः। न केवलं विवेकग्रहणे प्रतियोगित्वेन ज्ञेयत्वं, प्रकृतिलयादिफलसिद्धये

भाष्यभावप्रकाशिका

कारणाभेदोपचारात् स्थूले सूक्ष्मेऽपि वर्तत इत्यभ्युपगन्तव्यम्; आकाङ्क्षाधीनत्वात् पदप्रवृत्तेः। यदाहुः—"काकेभ्यो रक्ष्यतामन्नमिति बालोऽपि चोदितः। उपघातप्रधानत्वान्न श्वादिभ्यो न रक्षति।।" इति। तस्मात् प्रकरणपारिशेष्ययोरुभयोरुभयत्र तुल्यत्वान्नैकग्रहणनियमहेतुरस्तीति भावः। दुःशोधत्वात् सूक्ष्मस्यैवाकाङ्क्षा, नेतरस्येत्याशङ्क्याह—**न चैवमिति**। विष्णोः परमं पदमवगमयितुं पदमत्र प्रतिपाद्यत्वेन विवक्ष्यते, न वैराग्याय शोधनमित्यर्थः। किञ्च अव्यक्तपदेन स्थूलमेव गृह्यते; सूक्ष्मशरीरस्य "बुद्धिं तु सारथिं विद्धी"त्यादिना विभागशो गृहीतत्वात्, पूर्वत्र रथत्वकल्पनायोगाच्छरीरशब्देनागृहीतत्वादित्यपि द्रष्टव्यम्। अलं वा विवादेन, विदुषां यत्र रुचिस्तद् गृह्यताम्। सर्वथाऽपि प्रधाननिराकरणं सिद्धमित्याह—**सर्वथाऽपीति**।।३।।

ज्ञेयत्वावचनाच्च।।४।। निःश्रेयससाधनत्वेन विवेक एव ज्ञेयः, न प्रधानमित्याशङ्क्यार्थात् प्रधानस्यापि ज्ञेयत्वमस्तीत्याह—

न्यायनिर्णयः

वाक्यैक्यधीहेतुत्वे सतीति यावत्। उभयमपि प्रकृतत्वाद् ग्राह्यत्वेनाकाङ्क्षितं, तेन तद्द्वारा पदप्रवृत्तेरव्यक्तपदस्योभयत्रापि प्रवृत्तौ प्रकरणपारिशेष्ययोस्तुल्यत्वान्नैकत्र नियमोऽस्तीत्यर्थः। सूक्ष्मस्यैव देहस्याकाङ्क्षा, दुःशोधत्वात्, तस्यात्मनोऽतिसंनिकृष्टस्य सहसा ततो निष्क्रष्टुमशक्यत्वात्। अन्यस्य तु दुष्टत्वेन दृष्टत्वादात्मनो निष्कर्षस्य सुकरत्वादिशङ्क्याह—**न चेति**। कुतो न मन्तव्यं, तत्राह—**यत इति**। इहेति प्रकरणोक्तिः। वैराग्याय शोधनमत्र नेष्टमिति कथं गम्यते, तत्राह—**न हीति**। किं तर्हि विवक्षितं, तदाह— **अनन्तरेति**। तस्य तस्य परत्वेन वचनात् परमपदमेव कथमत्राभीष्टं, तत्राह—**तथा हीति**। परमपददिदर्शयिषया पारम्पर्यमत्राभीष्टमिति पूर्वोत्तरालोचनातो भातीत्यर्थः। किंचाव्यक्तपदेन स्थूलमेव शरीरमुक्तं, 'बुद्धिं तु सारथिं विद्धि' इत्यादिना सूक्ष्मदेहस्य विभक्तत्वेन रथकल्पनाविषयत्वात् तस्य शरीरपदेनानुक्तत्वात्, इहापि 'मनसस्तु परा बुद्धिः' इति गृहीतत्वेनापरिशेषादिति मत्वोपेत्यापि दूषयति—**सर्वथेति**। स्थूलसूक्ष्मयोरन्यतरग्रहेऽपीति यावत्। **तथा नामास्त्विति**। त्वदिच्छया सूक्ष्मदेहस्यैवाव्यक्तशब्दत्वं स्यादित्यर्थः। **किंचिदिति**। प्रधानवादनिराकरणमुक्तम्।।३।।

प्रधानस्याव्यक्तशब्दावाच्यत्वे हेत्वन्तरमाह—**ज्ञेयत्वेति**। तद् व्याख्यातुं पातनिकां करोति—**ज्ञेयत्वेनेति**। गुणानां पुरुषाणां चान्तरं विवेकः, तस्यैव मुक्तिहेतुत्वेन ज्ञेयत्वमिष्टं न प्रधानस्येत्याशङ्क्यार्थान्तरस्यापि तदिष्टमित्याह—**न हीति**। इति

गुणेभ्यः पुरुषस्यान्तरं शक्यं ज्ञातुमिति। क्वचिच्च विभूतिविशेषप्राप्तये प्रधानं ज्ञेयमिति स्मरन्ति। न चेदमिहाव्यक्तं ज्ञेयत्वेनोच्यते। पदमात्रं ह्यव्यक्तशब्दः। नेहाव्यक्तं ज्ञातव्यमुपासितव्यं चेति वाक्यमस्ति। न 'चानुपदिष्टपदार्थज्ञानं पुरुषार्थमिति शक्यं प्रतिपत्तुम्। तस्मादपि नाव्यक्तशब्देन प्रधानमभिधीयते। अस्माकं तु रथरूपकक्लृप्तशरीराद्यनुसरणेन विष्णोरेव परमं पदं दर्शयितुमयमुपन्यास इत्यनवद्यम्।।४।।

वदतीति चेन्न प्राज्ञो हि प्रकरणात्।।५।।

अत्राह सांख्यः– 'ज्ञेयत्वावचनात्' इत्यसिद्धम्। कथम्? श्रूयते ह्युत्तरत्राव्यक्तशब्दोदितस्य प्रधानस्य ज्ञेयत्ववचनम्– 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते।' (का.उ.१।३।१५) इति। अत्र हि यादृशं शब्दादिहीनं प्रधानं महतः परं स्मृतौ निरूपितं तादृशमेव निचाय्यत्वेन निर्दिष्टम्। तस्मात् प्रधानमेवेदम्, तदेव चाव्यक्तशब्दनिर्दिष्टमिति।

प्रकटार्थविवरणम्

चोपास्यत्वमिष्टमित्याह— **क्वचिच्चेति।** ननु मा भूद् वेदे ज्ञातव्यत्वेनोपदेशः; तथापि अव्यक्तपदादस्ति तज्ज्ञानजन्मेत्याशङ्क्याह— **न चानुपदिष्टमिति।** विध्यायत्तत्वात् अदृष्टफलसिद्धेरित्यर्थः। तर्हि तवापि शरीरस्य ज्ञेयत्वेनानुपदेशान्न फलसिद्धिरित्याशङ्क्याह— **अस्माकं त्विति।**

वदतीति चेन्न प्राज्ञो हि प्रकरणात्। "ज्ञेयत्वावचनाच्च" इत्यस्यासिद्धतामाशङ्क्य परिहरति— **वदतीति चेदिति।**

भाष्यभावप्रकाशिका

न हि गुणेति। प्रकृतिलयादिसिद्ध्यर्थं स्वप्रधानतयाऽपि विज्ञेयत्वम् [प्रधानेऽ]स्तीत्याह—**क्वचिच्चेति।** इहाप्यव्यक्तपदेन ज्ञेयत्वमुच्यत इत्याशङ्क्याह— **न चेदमिति।** ननु पदात् पदार्थस्यार्थाज्ज्ञेयत्वं भवतीति, तत्राह—**न चानुपदिष्टेति।** ननु वर्णितनीत्या भवतां मतेऽप्यनर्थकमव्यक्तपदमिति, अत आह—**अस्माकमिति।** शरीरादिभ्यः परत्वप्रतिपत्त्यर्थमित्यर्थः। प्रधानपक्षेऽपि किं न स्यादिति? प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गादित्याह—**रथरूपकेति।**।४।।

वदतीति चेन्न प्राज्ञो हि प्रकरणात्।।५।। ननु अत्र ब्रह्मैवावगम्यत इत्याशङ्क्याह—**अत्र हीति।**

न्यायनिर्णयः

गुणत्रयसाम्यावस्थारूपप्रधानस्यापि ज्ञेयत्वमिति शेषः। तथापि विवेकगुणतया प्रधानस्य ज्ञेयत्वं न स्वप्रधानतयेत्याशङ्क्य प्रकृतिलयादिसिद्ध्यर्थं स्वप्रधानतयाऽपि तज्ज्ञेयत्वमिष्टमित्याह—**क्वचिच्चेति।** इहापि ज्ञेयत्वमव्यक्तशब्देनोक्तमित्याशङ्क्य सूत्रार्थमाह—**न चेति।** तदेव स्पष्टयति—**पदेति।** नन्वव्यक्तशब्दे प्रयुक्ते तदर्थस्यार्थादेव ज्ञेयत्वमज्ञाते शब्दाप्रयोगात्, नेत्याह—**न चेति।** आर्थिकधियोऽपुमर्थत्वसंभवाच्छाब्दमेव फलवज्ज्ञानं, न चाव्यक्ते तथाविधा धीरित्यर्थः। पञ्चम्यर्थमनूद्य चकारद्योत्यमाह—**तस्मादिति।** त्वन्मतेऽप्युक्तनीत्याऽव्यक्तपदमनर्थकमित्याशङ्क्याह—**अस्माकं त्विति।** परमपदस्य सर्वस्मात्परत्वज्ञानार्थं देहाद्युपन्यासोऽस्मत्पक्षे स्यादित्यव्यक्तशब्देन स्थूलदेहोक्तिरर्थवतीत्यर्थः।।४।।

ज्ञेयत्वावचनस्यासिद्धिमाशङ्क्य परिहरति—**वदतीत्यादिना।** चोद्यं विवृणोति—**अत्रेति।** उक्तहेतोर्न प्रधानमव्यक्तमित्युक्ते सतीत्यर्थः। साधितत्वान्नासिद्धिरिति शङ्कते—**कथमिति।** वाक्यशेषेणोत्तरम्—**श्रूयते हीति।** अशब्दमित्यादिषु प्रत्येकं नित्यशब्दः संबध्यते। ननु निष्प्रपञ्चं ब्रह्मोक्त्वा तस्य प्रत्यक्त्वेन ज्ञानान्मुक्तिरत्रोच्यते, न प्रधानस्यात्र प्रसङ्गोऽस्ति, तत्राह—**अत्रेति।** शब्दादिशून्यतया स्मार्तप्रधानस्य प्रत्यभिज्ञानात् तदेवात्रोक्तमित्याह—**तस्मादिति।** तथापि 'महतः परमव्यक्तम्' इत्यत्र किं जातं, तदाह—**तदेवेति।**

---

१. 'अनुपदिष्टम्' इति पा.।

अत्र ब्रूमः– नेह प्रधानं निचाय्यत्वेन निर्दिष्टम्। प्राज्ञो हीह परमात्मा निचाय्यत्वेन निर्दिष्ट इति गम्यते। कुतः? प्रकरणात्। प्राज्ञस्य हि प्रकरणं विततं वर्तते– 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इत्यादिनिर्देशात्, 'एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते' इति च दुर्ज्ञानत्ववचनेन तस्यैव ज्ञेयत्वाकाङ्क्षणात्, 'यच्छेद्वाङ्मनसी प्राज्ञः' इति च तज्ज्ञानायैव वागादिसंयमस्य विहितत्वात्, मृत्युमुखप्रमोक्षणफलत्वाच्च। न हि प्रधानमात्रं निचाय्य मृत्युमुखात्प्रमुच्यत इति सांख्यैरिष्यते। चेतनात्मविज्ञानाद्धि मृत्युमुखात्प्रमुच्यत इति तेषामभ्युपगमः। सर्वेषु वेदान्तेषु प्राज्ञस्यैवात्मनोऽशब्दादिधर्मत्वमभिलप्यते। तस्मान्न प्रधानस्यात्र ज्ञेयत्वमव्यक्तशब्दनिर्दिष्टत्वं वा।।५।।

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च।।६।।

इतश्च न प्रधानस्याव्यक्तशब्दवाच्यत्वं ज्ञेयत्वं वा। यस्मात् त्रयाणामेव पदार्थानामग्निजीवपरमात्मनामस्मिन् ग्रन्थे कठवल्लीषु वरप्रदानसामर्थ्याद् वक्तव्यतयोपन्यासो दृश्यते; तद्विषय एव च प्रश्नः। नातोऽन्यस्य प्रश्न उपन्यासो वाऽस्ति। तत्र तावत्– 'स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम्' (क.उ.१।१।१३) इत्यग्निविषयः प्रश्नः। 'येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।

प्रकटार्थविवरणम्

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च। '[1]त्रयाणां मृत्योरुपन्यासः, प्रश्नश्च नचिकेतस एवमेवावकल्पते, न प्रधानविवक्षायामित्याह— **त्रयाणामेवेति।** क्रमेण प्रश्नत्रयं पठति— **तत्र तावदिति।** भो मृत्यो स त्वं स्वर्ग्यं स्वर्गहेतुमग्निमध्येषि स्मरसीत्यर्थः। त्रितयविषयं

भाष्यभावप्रकाशिका

सर्वेषु चेति। न च शब्दादिशून्यतया स्मृतिसिद्धप्रधानस्य प्रत्यभिज्ञानात् तदेवेह प्रतिपाद्यत इति शङ्कनीयम्; सजातीयश्रुतिप्रमाणसिद्धब्रह्मपरिग्रहे संभवति विजातीयस्मृतिप्रमाणसिद्धप्रधानपरिग्रहायोगादिति भावः।।५।।

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च।।६।। अप्रक्रान्तत्वादपि न प्रधानं प्रतिपाद्यमित्याह—**इतश्चेति।** अप[प्र]क्रान्तत्वं

न्यायनिर्णयः

उत्तरमाह—**अत्रेति।** तत्र नञोऽर्थमाह—**नेहेति।** कस्य तर्हि ज्ञेयत्वेनात्रोक्तिः, तत्राह—**प्राज्ञो हीति।** प्रधानेऽपि संभवति परमात्मग्रहे को हेतुरित्याह—**कुत इति।** तत्र हेतुमुक्त्वा विभजते—**प्रकरणादिति।** परमात्मप्रकरणस्य प्रकृतत्वे हेतुमाह—**पुरुषादिति।** इतश्चाशब्दादिवाक्ये परस्यैवात्मनो ज्ञेयत्वमित्याह—**एष इति।** तत्रैव हेत्वन्तरमाह—**तस्यैवेति।** 'दृश्यते त्वग्र्यया बुद्ध्या' इत्यादि तदाकाङ्क्षणम्। तस्यैव ज्ञेयत्वमित्यत्र हेत्वन्तरमाह—**यच्छेदिति।** फलविशेषश्रुतेरपि परस्यैव ज्ञेयत्वमित्याह—**मृत्य्विति।** प्रधानेऽपि तदविरुद्धमित्याशङ्क्याह—**न हीति।** कथं तर्हि तेषामभ्युपगमः, तत्राह—**चेतनेति।** सर्वोपनिषदालोचनायामपि परस्यैव ज्ञेयत्वमत्रेष्टमित्याह—**सर्वेष्विति।** तुल्यश्रुतिसिद्धब्रह्मोक्तिसंभवे विजातीयस्मृतिसिद्धप्रधानोक्त्ययोगान्न प्रधानधीरित्युपसंहरति—**तस्मादिति।।५।।**

प्रतिज्ञाद्वये युक्त्यन्तरमाह—**त्रयाणामिति।** प्राथमिकं चकारं प्रतिज्ञापरत्वेन व्याकरोति—**इतश्चेति।** प्रधानस्याप्रक्रान्तत्वमितःशब्दार्थं स्फुटयति—**यस्मादिति।** कठानां वल्लीभिरवच्छिन्ने ग्रन्थे त्रयाणामेव प्रश्नप्रतिवचने दृष्टे, मृत्योर्नचिकेतसं प्रति वरत्रयदानस्यान्यथाऽनुपपत्तेरित्यर्थः। सौत्रमेवकारं व्याचष्टे—**नेति।** क्रमेण प्रश्नत्रयमुदाहरति—**तत्रेत्यादिना।** हे मृत्यो, स मदर्थं दत्तवरस्त्वं स्वर्ग्यं स्वर्गहेतुमग्निमध्येषि स्मरसि, तेन तद्विषयां विद्यां मदर्थं वदेत्यर्थः। मनुष्ये तद्देहे प्रेते त्यक्तप्राणे सति येयं

---

१. त्रयाणामिति। त्रयाणामुपन्यासः, त्रयाणां प्रश्नः इत्युभयत्रेदं संबध्यते।

एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः।' (क.उ.१।१।२०) इति जीवविषयः प्रश्नः; 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वद।' (क.उ.१।२।१४) इति परमात्मविषयः। प्रतिवचनमपि– 'लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा।' (क.उ.१।१।१५) इत्यग्निविषयम्; 'हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्। यथा च मरणं प्राप्य आत्मा भवति गौतम। योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्।' (क.उ.२।५।६,७) इति व्यवहितं जीवविषयम्; 'न जायते म्रियते वा विपश्चित्' (क.उ.१।२।१८) इत्यादि बहुप्रपञ्चं परमात्मविषयम्। नैवं प्रधानविषयः प्रश्नोऽस्ति। अपृष्टत्वाच्चानुपन्यसनीयत्वं तस्येति।

अत्राह– योऽयमात्मविषयः प्रश्नो 'येयं प्रेते विचिकित्सा मनुष्येऽस्ती'ति, किं स एवायम् 'अन्यत्र धर्मादन्यत्राधर्मात्' इति पुनरनुकृष्यते, किंवा ततोऽन्योऽयमपूर्वः प्रश्न उत्थाप्यत इति। किं चातः? स एवायं

प्रकटार्थविवरणम्

प्रतिवचनं च क्रमेणाह— **प्रतिवचनमपीति**। भूरादिलोकादिं प्रथमजं तं पृष्टमग्निं तस्मै नचिकेतसे मृत्युरुवाच। या इष्टकाश्चेतव्याः, यावतीर्यावत्संख्याकाः, येन वा प्रकारेण, तत् सर्वमुवाचेति श्रुतेः वचनम्। "हन्त त इदं प्रवक्ष्यामि" इत्यनेन ब्रह्मविषयोपदेशप्रतिज्ञापनेन व्यवहितं जीवविषयं प्रतिवचनम् "यथा च मरणं प्राप्य" इत्यादि। यथाश्रुतमिति। येन यादृशं देवतादिज्ञानमनुष्ठितं स तदनुरूपामेव योनिं प्राप्नोतीत्यर्थः।

किमेक एवात्मविषयः प्रश्नः, किं वा द्वाविति पूर्वपक्षी विकल्पयति— **अत्राहेति**। सिद्धान्त्याह— **किं चात इति**। अत इति सप्तम्यर्थे तसिः। एकः प्रश्नः इत्यस्मिन् पक्षे किं दूषणं, प्रश्नद्वये वा किमित्यर्थः। प्रथमविकल्पे सूत्रमसङ्गतम्; द्वितीये प्रधानाभिधानेऽप्यदोष इत्याह— **स एवायमित्यादिना**। यदि वरव्यतिरेकेणापूर्वं प्रश्नं वयं कल्पयामः तदा प्रधानाभिधानमपि स्यात्;

भाष्यभावप्रकाशिका

दर्शयति—**वरप्रदानसामर्थ्यादिति**। व्यवहितं जीवविषयमिति। "देवैरत्रापि विचिकित्सितम्' इत्यारभ्य "यस्मिन्नेतावुपाश्रिताविं" त्यन्तग्रन्थसन्दर्भेण परमात्मप्रश्नप्रतिवचनादिरूपेण जीवप्रश्नवाक्यव्यवहितमपि योग्यत्वाद् जीवविषयमित्यर्थः।

एवं सूत्राक्षराणि योजयित्वाऽर्थमुपपादयितुमाक्षेपं दर्शयति—**अत्राहेति**। जीवपरमात्मनोरेक एव चेत् प्रश्नस्त्रयाणामिति सूत्रविरोधः स्यात्। अथ परमात्मनोऽन्यः प्रश्नोऽन्यश्च जीवस्य, तदा सौमनस्यावाप्त्यग्न्यात्मज्ञानप[व]स्त्रयानन्तर्भावे चतुर्थवरान्तरकल्पनावत् प्रधानवचनकल्पना स्यात्। अन्तर्भावे वा प्रधानाख्यानमपि वरप्रदानान्तर्भूतं किं न स्यादित्यर्थः।

न्यायनिर्णयः

विचिकित्सा। तामेव पक्षभेदेन दर्शयति—**अस्तीति**। संदिग्धमात्मतत्त्वमेतदित्युक्तम्। प्रतिवचनत्रयमपि क्रमेण कथयति—**प्रतीति**। लोकहेतुविराड्दृष्ट्योपास्यत्वात् लोकादिश्चित्योऽग्निस्तमुक्तवान् मृत्युर्नचिकेतसे। याः स्वरूपतो यावतीः संख्यातो यथा वाऽग्निश्चीयते तत्सर्वमुवाचेति संबन्धः। हन्तेदानीं गुह्यं गोप्यं सनातनं चिरन्तनं ब्रह्म ते तुभ्यं प्रवक्ष्यामीति प्रतिज्ञाय जीवमपि ब्रवीति—**यथेति**। आत्मा मरणं प्राप्य यथा भवति तथा च वक्ष्यामीति योजना। कथं स मरणे भवति, तत्राह—**योनिमिति**। मृतानां पुनर्विचित्रजन्मापत्तौ निमित्तमाह—**यथेति**। **यथाश्रुतमिति**। येन यादृशं देवताज्ञानमनुष्ठितं स तदनुरूपामेव योनिं प्राप्नोतीत्यर्थः। 'देवैरत्रापि विचिकित्सितं पुरा' इत्यारभ्य 'यस्मिन्नेतावुपाश्रितौ' इत्यन्तेन संदर्भेण परमात्मप्रतिवचनरूपेण जीवप्रश्नाद् व्यवहितमपि यथोक्तं वचो योग्यत्वाज्जीवविषयमित्याह—**व्यवहितमिति**। एवमिति सूत्रावयवार्थं विवृणोति—**नैवमिति**।

सूत्राक्षराणि योजयित्वा तदर्थोक्त्यर्थमाक्षिपति—**अत्रेति**। परापरार्थे प्रश्नप्रस्तावेसतीति यावत्। उक्तिप्रकारं प्रकटयति—**योऽयमिति** इतिशब्दो विमर्शावसानद्योती। कल्पद्वयेऽपि फलं पृच्छति—**किंचेति**। तत्राद्यमनूद्य सूत्रावयवायोगं फलमाह—**स एवेति**।

प्रश्नः पुनरनुकृष्यत इति यद्युच्येत, द्वयोरात्मविषययोः प्रश्नयोरेकतापत्तेरग्निविषय आत्मविषयश्च द्वावेव प्रश्नावित्यतो न वक्तव्यं त्रयाणां प्रश्नोपन्यासाविति। अथान्योऽयमपूर्वः प्रश्न उत्थाप्यत इत्युच्येत, ततो यथैव वरप्रदानव्यतिरेकेण प्रश्नकल्पनायामदोषः, एवं प्रश्नव्यतिरेकेणापि प्रधानोपन्यासकल्पनायामदोषः स्यादिति।

अत्रोच्यते– [1]नैवं वयमिह वरप्रदानव्यतिरेकेण प्रश्नं कंचित् कल्पयामो वाक्योपक्रमसामर्थ्यात्। वरप्रदानोपक्रमा हि मृत्युनचिकेतःसंवादरूपा वाक्यप्रवृत्तिरा समाप्तेः कठवल्लीनां लक्ष्यते। मृत्युः किल नचिकेतसे पित्रा प्रहिताय त्रीन् वरान् प्रददौ। नचिकेताः किल तेषां प्रथमेन वरेण पितुः सौमनस्यं वव्रे, द्वितीयेनाग्निविद्याम्, तृतीयेनात्मविद्याम्, 'येयं प्रेते' इति 'वराणामेष वरस्तृतीयः' (क.उ.१।१।२०) इति लिङ्गात्। तत्र यदि 'अन्यत्र धर्मादि'त्यन्योऽयमपूर्वः प्रश्न उत्थाप्येत ततो वरप्रदानव्यतिरेकेणापि प्रश्नकल्पनाद् वाक्यं बाध्येत।

ननु प्रष्टव्यभेदादपूर्वोऽयं प्रश्नो भवितुमर्हति। पूर्वो हि प्रश्नो जीवविषयः, येयं प्रेते विचिकित्सा मनुष्येऽस्ति नास्तीति विचिकित्साभिधानात्। जीवश्च धर्मादिगोचरत्वान्न 'अन्यत्र धर्मादि'ति प्रश्नमर्हति।

प्रकटार्थविवरणम्

न तु तथेति प्रथमविकल्पाङ्गीकारेण परिहरति— **अत्रोच्यत इत्यादिना**। आत्मविषयप्रश्नस्य एकतामाक्षिपति— **नन्विति**। न केवलं

भाष्यभावप्रकाशिका

द्वितीयपक्षोऽनभ्युपगमादेव परिहृत इत्याह—**नैव वयमिति**। अत्र कथं वाक्योपक्रमः? कथं वा प्रश्नान्तराभ्युपगमे तद्विरोध इति?तत्राद्यमाह—**वरप्रदानेति**। ननु पितुःसौमनस्यं वरो न भवति, किन्तु प्रश्नः सः, [प्रश्नरूपा] अग्निजीवपरमात्मविषयापरे[वरा इ]त्याशङ्क्याह—**वराणामेष इति**। इदानीं प्रश्नान्तरकल्पने वाक्यविरोधं दर्शयति—**तत्र यद्यन्यत्रेति**।

लिङ्गात्प्रश्नभेदे गम्यमाने वाक्यबलात्प्रश्नाभेदाङ्गीकारो न युक्त इति चोदयति—**ननु प्रष्टव्येति**। ननु न प्रष्टव्यभेदः, उत्तरप्रश्नेऽपि जीवस्याभिधानादित्याशङ्क्याह—**जीवश्चेति**। परमात्मविषयस्तु युक्त इत्याह-—**प्राज्ञस्त्विति**। अर्थस्वभावालोचनया

न्यायनिर्णयः

कल्पान्तरमनूद्याक्षेप्ता स्वपक्षसिद्धिं फलमाह—**अथेत्यादिना**। न चात्मज्ञानवरदानान्तर्भूतमेव परमात्मज्ञानमपि, प्रधानज्ञानस्यापि तदन्तर्भावसंभवादिति भावः।

सूत्रावयवविरोधमग्रे परिहरिष्यन्नाद्यं पक्षमङ्गीकृत्याह—**अत्रेति**। द्वितीयस्त्वनभ्युपगमादेव परास्त इत्याह—**नैवेति**। प्रकृतो ग्रन्थः सप्तम्यर्थः। अतो न प्रधानोक्तिप्रसक्तिरिति शेषः। वरदानं विनाऽपूर्वप्रश्नकल्पनाभावे हेतुमाह—**वाक्येति**। कथं वाक्योपक्रमः, तद्विरोधो वा प्रश्नान्तरोपगमे कथमित्याशङ्क्य वाक्योपक्रमं दर्शयति—**वरेति**। उपक्रमानुसारित्वमुपसंहारस्यापि सूचयति—**आ समाप्तेरिति**। आद्यन्तयोरेकरूपतया वाक्यवृत्तिमेव विशदयति—**मृत्युरिति**। वरदानतदुपादानविषयाख्यायिकाद्योतनार्थमुभयत्र किलेत्युक्तम्। वरत्रयमेव विशेषतो बुभुत्स्यमानं प्रकटयति—**नचिकेता इति**। ननु पितुः सौमनस्यं वरो न भवति, तत्र प्रश्नाभावात्, किंतु अग्निजीवपरात्मार्थाः प्रश्नरूपा वराः, तेषु प्रत्युक्तेरपि भावात्, तत्राह—**येयमिति**। प्रेते सतीत्युपक्रमे सतीति शेषः। वाक्योपक्रमं दर्शयित्वा प्रश्नान्तरकल्पने तद्विरोधं दर्शयति—**तत्रेति**।

वाक्यबलात् प्रश्नैक्यमयुक्तं लिङ्गात् तद्भेदसिद्धेरिति शङ्कते—**नन्विति**। प्रष्टव्यभेदं स्पष्टयति—**पूर्वो हीति**। न हि तस्य परविषयत्वं, तत्रास्ति नास्तीति विचिकित्साऽयोगात् तस्य सदेकतानत्वादित्यर्थः। तथापि न प्रष्टव्यभेदः, द्वितीयेऽपि प्रश्ने जीवस्यैवोक्तेरित्याशङ्क्याह—**जीवश्चेति**। कस्तर्हि द्वितीयप्रश्नार्थो न परो जीवादन्योऽस्ति, तत्राह—**प्राज्ञस्त्विति**।

---

१. 'नैव' इति पा.।

प्राज्ञस्तु धर्माद्यतीतत्वाद्‘अन्यत्र धर्मादि’ति प्रश्नमर्हति। प्रश्नच्छाया च न समाना लक्ष्यते। पूर्वस्यास्तित्वनास्तित्वविषयत्वादुत्तरस्य धर्माद्यतीतवस्तुविषयत्वात्। तस्मात् प्रत्यभिज्ञानाभावात् प्रश्नभेदः; न पूर्वस्यैवोत्तरत्रानुकर्षणमिति चेत्? न। जीवप्राज्ञयोरेकत्वाभ्युपगमात्। भवेत् प्रष्टव्यभेदात् प्रश्नभेदो यद्यन्यो जीवः प्राज्ञात् स्यात्। न त्वन्यत्वमस्ति। ‘तत्त्वमसी’त्यादिश्रुत्यन्तरेभ्यः। इह च ‘अन्यत्र धर्मात्’ इत्यस्य प्रश्नस्य प्रतिवचनं ‘न जायते म्रियते वा विपश्चित्’ इति जन्ममरणप्रतिषेधेन प्रतिपाद्यमानं शारीरपरमेश्वरयोरभेदं दर्शयति। सति हि प्रसङ्गे प्रतिषेधो भागी भवति। प्रसङ्गश्च जन्ममरणयोः शरीरसंस्पर्शाच्छारीरस्य भवति, न परमेश्वरस्य। तथा– ‘स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति। महान्तं विभुमात्मानं मत्वा धीरो न शोचति।’ (क.उ.२।४।४) इति स्वप्नजागरितदृशो जीवस्यैव महत्त्वविभुत्वविशेषणस्य मननेन शोकविच्छेदं दर्शयन्न प्राज्ञादन्यो जीव इति दर्शयति। प्राज्ञविज्ञानाद्धि

प्रकटार्थविवरणम्

धर्मादियुक्तत्वतद्विरहितत्वरूपेण प्रष्टव्ययोः भेदात् प्रश्नभेदः; प्रश्नवाक्यसादृश्यस्याभावादित्याह— **प्रश्नच्छाया चेति**।

प्रष्टव्ययोर्वास्तवभेदात् तावन्न प्रश्नभेद इत्याह— **न जीवप्राज्ञयोरिति**। किं च जन्ममरणप्रतिषेधेनोत्तरं ब्रुवाणो मृत्युः जीवस्यौपाधिकजन्मादिव्यपोहेन निजब्रह्मरूपतां प्रतिपादयतीत्याह— **इह चान्यत्रेति**। किं च जीवस्यैव विज्ञानेन संसारनिवृत्तिफलश्रवणादपि तस्य ब्रह्मभावो विवक्षित इत्याह— **तथा स्वप्नान्तमिति**। अन्तशब्दः [1]स्वरूपवाची। उभौ स्वप्नजागरितस्वभावौ। येनेति। यो जीवोऽनुपश्यति तमेव परिच्छेदभ्रमापोहेन महान्तं ज्ञात्वा विद्वान्न शोचतीत्यर्थः। भेददर्शनस्य निन्दितत्वाच्च न जीवेश्वरयोः

भाष्यभावप्रकाशिका

प्रश्नभेदमुपपाद्य प्रश्नस्वभावालोचनयाऽपि प्रश्नभेदमाह—**प्रश्नच्छायेति**।

एतद्वाक्यगतलिङ्गेभ्योऽपि जीवपरयोरभेदं दर्शयितुं क्रमेण लिङ्गान्याह—**इह चेति**। कथमिति—(**सति हीति**। ननु जीवस्यापि परमेश्वरवन्नित्यत्वान्न प्रसङ्ग इति,) तत्राह—**प्रसङ्गश्चेति**। शरीरसम्बन्धादस्ति प्रसङ्ग इत्यर्थः। अतोऽध्यस्तातद्धर्मव्युदासेन जीवतत्त्वप्रतिपादनमेव परमात्मप्रश्नस्योत्तरं मन्वानस्तयोरभेदं सूचयतीति भावः। **येनानुपश्यतीति**। साक्षिणा पश्यति लोक इत्यर्थः। ननु जीवगतमहत्त्वविभुत्वविशेषणज्ञानाच्छोकविच्छेदः स्यादित्याशङ्क्याह—**प्राज्ञविज्ञानाद्धीति**। यदेवेह हृदये तदेवामुत्रादित्य इत्येकत्वमुक्तमित्यर्थः। जीवप्रश्नानन्तरं कामादिभिः प्रलोभनेनातिदुर्लभत्वख्यापनादपि ब्रह्मरूपेण जीवः प्रतिपिपादयिषित

न्यायनिर्णयः

धर्मादिगोचरत्वागोचरत्वाभ्यां तद्भेदधीरित्यर्थः। अर्थस्वभावालोचनया प्रश्नभेदमुक्त्वा प्रश्नस्वभावालोचनयाऽपि तद्भेदमाह— **प्रश्नेति**। वैषम्यं स्फोरयति—**पूर्वस्येति**। आर्थे शाब्दे च वैषम्ये फलितमाह—**तस्मादिति**। प्रष्टव्यभेदादुक्तं प्रश्नभेदं प्रत्याह— **नेति**। तदेव व्यतिरेकद्वारा स्फोरयति—**भवेदिति**। ननु प्राज्ञादन्यो जीवो वादिभिरिष्यते, नेत्याह—**नत्विति**। कठश्रुतिमपेक्ष्यान्तरशब्दः। एतद्वाक्यगतलिङ्गेभ्योऽपि जीवपरयोरैक्यं वक्तुं क्रमेण लिङ्गान्युपन्यस्यति—**इहेति**। यद्यपि परमात्मप्रश्नस्य प्रत्युक्तिं जन्मादिनिषेधेन मृत्युराह, तथापि कथमैक्यं, तत्राह—**सतीति**। अप्रसक्तनिषेधस्यातिप्रसङ्गित्वात् प्रसङ्गे सत्येव निषेधो युक्तश्चेज्जीवस्यापि ब्रह्मवन्नित्यत्वाज्जन्माद्ययोगान्न तन्निषेधः स्यादित्याशङ्क्याह—**प्रसङ्गश्चेति**। परस्मिन्नेवाविद्यया देहयोगाज्जन्मादिप्रसङ्गादध्यस्तातद्धर्म-व्युदासेन जीवतत्त्ववेदनमेव परप्रश्नस्योत्तरं मन्वानस्तयोरैक्यं सूचयतीत्यर्थः। तत्रैव लिङ्गान्तरमाह—**तथेति**। अन्तशब्दो मध्यवाची। येन साक्षिणा लोको भूयो भूयः पश्यति तमात्मानमिति संबन्धः। वाक्यतात्पर्यमाह—**स्वप्नेति**। यद्यपि जीवतत्त्वधिया शोकोच्छित्तिस्तथापि कथं जीवप्राज्ञयोरैक्यं, तत्राह—**प्राज्ञेति**। ‘तत्र को मोहः कः शोक एकत्वमनुपश्यतः’ इत्यादिदर्शनादिति शेषः।

---

१. तथा च ‘स्वप्नान्तः’ स्वप्न इत्यर्थः।

शोकविच्छेद इति वेदान्तसिद्धान्तः। तथाऽग्रे— 'यदेवेह तदमुत्र यदमुत्र तदन्विह। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।' (क.उ.२।४।१०) इति जीवप्राज्ञभेददृष्टिमपवदति। तथा जीवविषयस्यास्तित्वनास्तित्वप्रश्नस्यानन्तरम् 'अन्यं वरं नचिकेतो वृणीष्व' (क.उ.१।१।२१) इत्यारभ्य मृत्युना तैस्तैः कामैः प्रलोभ्यमानोऽपि नचिकेता यदा न चचाल, तदैनं मृत्युरभ्युदयनिःश्रेयसविभागप्रदर्शनेन विद्याऽविद्याविभागप्रदर्शनेन च 'विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त' (क.उ.१।२।४) इति प्रशस्य प्रश्नमपि तदीयं प्रशंसन् यदुवाच—'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति।' (क.उ.१।२।१२) इति, तेनापि जीवप्राज्ञयोरभेद एवेह विवक्षित इति गम्यते। यत्प्रश्ननिमित्तां च प्रशंसां महतीं मृत्योः प्रत्यपद्यत नचिकेताः, यदि तं विहाय प्रशंसानन्तरमन्यमेव प्रश्नमुपक्षिपेदस्थान एव सा सर्वा प्रशंसा प्रसारिता स्यात्।

प्रकटार्थविवरणम्

भेदस्तात्त्विक इत्याह— **तथा यदेवेहेति**। यदेव चैतन्यमिहाविद्यातत्कार्ये प्रतिबिम्बितं तदेवामुत्र मायायामपि। यदमुत्र वर्तते तदेवेहेति स्वरूपैक्ये स्थिते यः कश्चिदिहैकरसे स्वरूपे नानेवाल्पमपि नानात्वं पश्यति स मृत्योः मारकान्मरणभयमाप्नोतीत्यर्थः। किं च जीवविषयप्रश्नस्यानन्तरम् "तं दुर्दर्शम्" इत्यादि यस्मादुवाच मृत्युः तेनापि हेतुनाऽभेद एव विवक्षित इति गम्यत इत्युत्तरेणान्वयः। किं कुर्वन्मृत्युरेतदुवाचेत्यपेक्षायामाह— **अन्यं वरमित्यादि**। भो नचिकेतः त्वम् अन्यं वरं वृणीष्व। किमतिगहनेनात्मविज्ञानेन यत्र देवानामपि न निश्चय इत्यारभ्य "शतायुषः पुत्रपौत्रान् वृणीष्व" इत्यादिना तैस्तैः पुत्रादिकामैः प्रलोभ्यमानोऽपि यदाऽऽत्मज्ञानान्न चलितः, तदैनं नचिकेतसं प्रशस्य तदीयं प्रश्नं प्रशंसन्। कथं प्रशंसन्नित्यपेक्षायामाह— "अन्यच्छ्रेयोऽन्यदुतैव प्रेयः" इत्यभ्युदयनिःश्रेयसयोः विभागप्रदर्शनेन, "दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता" इति विद्याऽविद्याविभागकरणेन चानन्तरम् "विद्याभीप्सिनं नचिकेतसं मन्ये अहम्, यस्मात्त्वां बहवः कामाः यथोपदिष्टा अपि नालोलुपन्त तव लोभमापादितवन्तः" इत्येवं प्रशस्येत्यर्थः। किं च प्रशंसाया अपि सार्थकत्वं पूर्वप्रश्नस्यैवानुकर्षे घटत इत्याह— **यत्प्रश्ननिमित्तां चेति**।

भाष्यभावप्रकाशिका

इत्याह—**तथा जीवेति**। अधिकारित्वजिज्ञासनादप्येवं गम्यत इत्याह—**यदा न चचालेति**। "नान्यं तस्मान्नचिकेता वृणीते" इत्युक्त्याऽचलनं दर्शितम्। किञ्च वक्ष्यमाणविद्याया निःश्रेयससाधनत्वख्यापनादपि तथा गम्यत इत्याह—**तदेवमिति**। अभ्युदयनिःश्रेयसविभागप्रदर्शनम् "अन्यच्छ्रेयोऽन्यदुतैव प्रेय" इति, विद्याऽविद्याविभागप्रदर्शनम्—"दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाते"त्यादि। **प्रशस्य प्रश्नमपीति**। "त्वादृङ्नो भूयान्नचिकेतः प्रष्टे" ति प्रशस्येत्यर्थः। जीवगोचरप्रश्नस्य परमात्मप्रतिपादकवाक्येनोत्तरदानादपि तयोरभेदो गम्यत इत्याह—**तं दुर्दर्शमिति**। अपि च प्रश्नप्रशंसानुपपत्तिरपि प्रश्नयोर्विषयाभेदं दर्शयतीत्याह—**यत्प्रश्नेति**। यद्विषयः प्रश्नः यत्प्रश्नः।

न्यायनिर्णयः

इतश्च तयोरैक्यमित्याह—**तथेति**। इह देहे यच्चैतन्यं तदेवामुत्र परत्रादित्यादावसंसारि ब्रह्म, यच्चामुत्र तदेवेह देहेऽनुप्रविष्टमित्यन्योन्यैक्यमित्यर्थः। भेददृष्ट्यपवादाच्च तयोरैक्यमित्याह—**मृत्योरिति**। यः कश्चिदिह ब्रह्मात्मनि नानेव मिथ्याभेदं पश्यति स मरणं प्राप्नोति। पुनः पुनर्म्रियते, न पुमर्थभागित्यर्थः। जीवप्रश्नानन्तरं तत्तत्कामोक्तिपूर्वकं प्रलोभनेनातिदुर्लभत्वख्यापनादपि जीवो ब्रह्मात्मनाऽभीष्ट इत्याह—**तथेति**। अधिकारित्वजिज्ञासनादपि जीवस्य ब्रह्मात्मना प्रतिपाद्यतेत्याह—**यदेति**। 'नान्यं तस्मात्' इत्यादिश्रुतेरचलनं नचिकेतसोऽवसीयते। वक्ष्यमाणविद्याया मुक्तिहेतुत्वख्यापनादपि जीवस्य ब्रह्मात्मतावदनमित्याह—**तदेति**। 'अन्यच्छ्रेयोऽन्यदुतैव प्रेयः' इत्याद्यभ्युदयनिःश्रेयसविभागोक्तिः। 'दूरमेते विपरीते' इत्यादिविद्याऽविद्याविभागगीरिति विभागः। त्वा त्वां बहवोऽपि कामा नालोलुपन्त श्रेयसो विच्छेदं न कृतवन्तस्ततो विद्यार्थिनं त्वां मन्येऽहमिति योजना। 'त्वादृङ् नो भूयात्' इति प्रश्नं प्रशंसन् यदुवाच तेनापीति संबन्धः। जीवप्रश्नस्य परमात्मवाक्येनोत्तरोक्तेरपि तयोरैक्यमित्याह—**तमिति**। प्रशंसानुपपत्तिरपि प्रश्नयोरर्थैक्यं गमयतीत्याह—**यदिति**। **यद्विषयः प्रश्नो यत्प्रश्नस्तं विहायेति संबन्धः। प्रस्तुतप्रश्नवाची तच्छब्दः।**

तस्माद् 'येयं प्रेते' इत्यस्यैव प्रश्नस्यैतदनुकर्षणम्- 'अन्यत्र धर्मात्' इति।

यत्तु प्रश्नच्छायावैलक्षण्यमुक्तम्, तददूषणम्। तदीयस्यैव विशेषस्य पुनः पृच्छ्यमानत्वात्। पूर्वत्र हि देहादिव्यतिरिक्तस्यात्मनोऽस्तित्वं पृष्टम्, उत्तरत्र तु तस्यैवासंसारित्वं पृच्छ्यत इति। यावद्ध्यविद्या न निवर्तते तावद् धर्मादिगोचरत्वं जीवस्य जीवत्वं च न निवर्तते। तन्निवृत्तौ तु प्राज्ञ एव 'तत्त्वमसी'ति श्रुत्या प्रत्याय्यते। न चाविद्यावत्त्वे तदपगमे च वस्तुनः कश्चिद् विशेषोऽस्ति। यथा कश्चित् संतमसे पतितां कांचिद्रज्जुमहिं मन्यमानो भीतो वेपमानः पलायते, तं चापरो ब्रूयात् 'मा भैषीर्नायमही रज्जुरेवे'ति; स च तदुपश्रुत्याहिकृतं भयमुत्सृजेद् वेपथुं पलायनं च। न त्वहिबुद्धिकाले तदपगमकाले च वस्तुनः कश्चिद् विशेषः स्यात्। तथैवैतदपि द्रष्टव्यम्। ततश्च 'न जायते म्रियते वा' इत्येवमाद्यपि भवत्यस्तित्वप्रश्नस्य प्रतिवचनम्।

सूत्रं त्वविद्याकल्पितजीवप्राज्ञभेदापेक्षया योजयितव्यम्। एकत्वेऽपि ह्यात्मविषयस्य प्रश्नस्य प्रायणावस्थायां देहव्यतिरिक्तास्तित्वमात्रविचिकित्सनात् कर्तृत्वादिसंसारस्वभावानपोहनाच्च पूर्वस्य पर्यायस्य जीवविषयत्वमुत्प्रेक्ष्यते। उत्तरस्य तु धर्माद्यत्ययसंकीर्तनात् प्राज्ञविषयत्वमिति। ततश्च युक्ताऽग्नि-

प्रकटार्थविवरणम्

एवं तावत् प्रष्टव्यवस्तुभेदनिबन्धनः प्रश्नभेदो नास्तीत्युपपाद्य यद् वचनव्यक्तेरन्यथात्वं दृश्यते तस्य गतिं वक्तुमुपक्रमते— **यत्तु प्रश्नच्छायेति**। ननु पूर्वमविद्यावत्त्वं पश्चाद् विद्यावत्त्वं चेत् तर्हि अविद्यानपगमे विद्योदये च वस्तुनि कश्चिद्विकारो वक्तव्यः; तथा च क्षीरवदनित्यत्वमित्याशङ्क्याह— **न चाविद्यावत्त्वे इति**। विद्योदयोऽप्यात्मन उपाधिमहिम्नैव; तत्कृतश्चाविद्यास्तमयोऽप्यनिर्वाच्य एव, नात्मगतः कश्चन विकार इति भावः। यस्मादविद्याकृतसंसारभावाभावयोरपि स्वतो निर्विकारं तस्मात् तात्त्विकमरणाभावात् [1]मरणनिमित्तं नास्तित्वाशङ्काभावादस्तित्वमेव प्रतिपादितं भवतीत्याह— **ततश्चेति**। कथं तर्हि त्रयाणामिति सूत्रमित्याशङ्क्याह— **सूत्रं त्विति**।

भाष्यभावप्रकाशिका

ननु जीवस्य धर्मादिगोचरस्य तद्रहितब्रह्मणैकत्वमनुपपन्नमित्याशङ्क्याह—**यावद्धीति**। तस्याविद्यावतस्तद्रहितेन नैकत्वमित्याशङ्क्याह—**तन्निवर्तनेन त्विति**। तर्ह्यविद्यानिवृत्त्युत्तरकालीनत्वादेकत्वस्य कृतकतयाऽनित्यत्वमिति, तत्राह—**न चाविद्येति**। उक्तार्थे दृष्टान्तमाह—**यथेति**। एवं जीव-ब्रह्मणोरेकत्वे वरप्रदानोपक्रमाविरोधो लभ्यत इत्युक्तम्, इदानीं जीवविषयप्रश्नस्याव्यवहितप्रतिवचनवत्त्वं लाभान्तरमाह—**ततश्चेति**। तर्हि "त्रयाणाम्" इति कथं सूत्रमिति? तत्राह—**सूत्रं त्विति**॥६॥

न्यायनिर्णयः

प्रष्टव्यभेदाभावे फलितमाह—**तस्मादिति**।

प्रश्नस्वभावालोचनया प्रष्टव्यभेदमुक्तमनूद्य प्रत्याह—**यत्त्विति**। विशेषमेव दर्शयति—**पूर्वत्रेति**। विशेषोक्तिसमाप्ताविितिशब्दः। जीवस्य धर्मादिमतो न तद्रहितब्रह्मैक्यमिति प्रष्टव्यभेदमाशङ्क्याह—**यावदिति**। कथं तर्हि जीवस्याविद्यावतस्तद्धीनब्रह्मैक्यं, तत्राह—**तदिति**। अविद्यानिवृत्त्युत्तरकालत्वादैक्यस्य तर्हि कृतकत्वेनानित्यत्वं, नेत्याह—**न चेति**। उक्तं दृष्टान्तेन स्पष्टयति—**यथेत्यादिना**। जीवब्रह्मैक्ये वरदानोपक्रमाविरोधमुक्त्वा जीवप्रश्नस्याव्यवहितप्रत्युक्तिमत्त्वं लाभान्तरमाह—**ततश्चेति**।

जीवब्रह्मणोरैक्येन प्रश्नैक्ये कथं त्रयाणामिति सूत्रं, तत्राह—**सूत्रं त्विति**। योजनामभिनयति—**एकत्वेऽपीति**। कल्पितभेदेन सूत्रयोजनाप्रकारसमाप्ताविितिशब्दः। कल्पितभेदेन प्रश्नभेदे फलितमाह—**ततश्चेति**। परमात्मकल्पनावत् प्रधानकल्पनाऽपि किं न

१. 'मरणनिमित्तनास्तित्वाशङ्काऽभावात्' इति पाठः स्यात्।

जीवपरमात्मकल्पना। प्रधानकल्पनायां तु न वरप्रदानं न प्रश्नो न प्रतिवचनमिति वैषम्यम्।।६।।

महद्वच्च।।७।।

यथा महच्छब्दः सांख्यैः सत्तामात्रेऽपि प्रथमजे प्रयुक्तो न तमेव वैदिकेऽपि प्रयोगेऽभिधत्ते, 'बुद्धेरात्मा महान्परः' (क.उ.१।३।१०), 'महान्तं विभुमात्मानम्' (क.उ.१।२।२२), 'वेदाहमेतं पुरुषं महान्तम्' (श्वे.उ.३।८) इत्येवमादावात्मशब्दप्रयोगादिभ्यो हेतुभ्यः। तथाऽव्यक्तशब्दोऽपि न वैदिके प्रयोगे प्रधानमभिधातुमर्हति। अतश्च नास्त्यानुमानिकस्य शब्दवत्त्वम्।।७।।

।।इति प्रथममानुमानिकाधिकरणम्।।

शारीरकन्यायसंग्रहः

२।। चमसाधिकरणम्।।सू.८-१०।।

चमसवदविशेषात्।।८।। ज्योतिरुपक्रमा तु तथा ह्यधीयत एके।।९।। कल्पनोपदेशाच्च मध्वादिवदविरोधः।।१०।। बहूनां गुणवाचिशब्दानां व्यवहितलक्षणापरिग्रहेण गुणिशब्दस्य योगार्थपरिग्रहो बाधनीयः, तेषामेव शब्दानामव्यवहितलक्षणा-परिग्रहानुगृहीतेन प्रसिद्धार्थाकृतिकल्पनया रूढिपरिग्रहेण, आकृतिकल्पनाबुद्धिमात्राधिक्येन प्रत्ययलाघवात्— इति न्यायेन, रोहितादिशब्दानां रञ्जनीयत्वादिगुणसामान्यव्यवधानेन रजःसत्त्वादिव्यवहितलक्षणानुगृहीतामजाशब्दस्य योगवृत्तिं बाधित्वा, रोहितादिगुणसंहतिप्रधानं तेजोऽबन्नमजाकारं कल्पयित्वाऽजाशब्दस्य रूढिवृत्तिः परिगृहीता।

प्रकटार्थविवरणम्

महद्वच्च। किं च महच्छब्दस्य वेदे सांख्याभिमतार्थव्यभिचारदर्शनात् अव्यक्तपदस्यापि व्यभिचारं भावयन्नाह— **महद्वच्चेति।** इति प्रथममानुमानिकाधिकरणम्।

भाष्यभावप्रकाशिका

महद्वच्च।।७।। साङ्ख्यप्रसिद्धेर्वैदिकप्रसिद्ध्या विरोधाच्च साङ्ख्यप्रसिद्धिर्वेदार्थनिर्णयेऽनादरणीयेत्याह—**महद्वच्चेति। सत्तामात्र इति।** साङ्ख्यैः पुरुषार्थक्रियाक्षमं सदित्युच्यते, सतो भावः सत्ता, तन्मात्रं महत्तत्त्वम्; भोगापवर्गलक्षणपुरुषार्थस्य महच्छब्दोदितबुद्धिकार्यत्वात्।।७।। इति प्रथममानुमानिकाधिकरणम्।

न्यायनिर्णयः

स्यात्, तत्राह—**प्रधानेति।** वैषम्यं परस्मात् प्रधानस्येति शेषः।।६।।

सांख्यप्रसिद्धेर्वेदप्रसिद्ध्या विरोधाच्च न सा वेदार्थनिर्णयहेतुरित्याह—**महद्वच्चेति।** दृष्टान्तं व्याचष्टे—**यथेति।** भोगापवर्गपुरुषार्थस्य महच्छब्दितबुद्धिकार्यत्वात् पुरुषापेक्षितफलकारणं सदुच्यते। तत्र भावप्रत्ययोऽपि स्वरूपार्थो न सामान्यवाची। कार्यानुमेयं महत्र प्रत्यक्षमिति मात्रशब्दः। तस्मिन् प्रथमजे प्रयुक्तोऽपीति संबन्धः। वैदिकप्रयोगमेवाह—**बुद्धेरिति।** तत्र महच्छब्देन सांख्यीयमहतोऽनुक्तौ हेतुमाह—**आत्मेति।** आदिशब्देन फलभेदोक्तिपुरुषशब्दप्रयोगादयो गृह्यन्ते। सूत्रेऽभीष्टं दार्ष्टान्तिकमाह—**तथेति।** 'महतः परम्' इत्यत्राव्यक्तस्याप्रधानत्वे फलितमुपसंहरति—**अतश्चेति।।७।।**

।।इति प्रथममानुमानिकाधिकरणम्।।

---

१. ननु साङ्ख्येन 'बुद्धेरात्मा महान् परः' इत्यत्र महत्तत्त्वपर एव महच्छब्दः इत्युच्यते इति कथं तद् दृष्टान्तीकृत्याव्यक्तपदस्य प्रधानार्थकत्वनिराकरणम्? उच्यते—दृष्टान्तोक्तिव्याजेन तत्रापि साध्यसाधनपरं सूत्रमिति। द्र. ब्र. वि. ४९२।

२।।चमसाधिकरणम्।। सू. ८-१०।।

चमसवदविशेषात्।।८।।

पुनरपि प्रधानवाद्यशब्दत्वं प्रधानस्यासिद्धमित्याह। कस्मात्? मन्त्रवर्णात्- 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः (श्वे.उ.४।५) इति। अत्र हि मन्त्रे लोहितशुक्लकृष्णशब्दै रजःसत्त्वतमांस्यभिधीयन्ते। लोहितं रजो रञ्जनात्मकत्वात्। शुक्लं सत्त्वं प्रकाशात्मकत्वात्। कृष्णं तम आवरणात्मकत्वात्। तेषां साम्यावस्थाऽवयवधर्मैर्व्यपदिश्यते लोहितशुक्लकृष्णेति। न जायते इति चाजा स्यात्, 'मूलप्रकृतिरविकृतिः'[1]

प्रकटार्थविवरणम्

चमसवदविशेषात्। सङ्गतिमाह— **पुनरिति।** अजामन्त्रः प्रधानवादस्य मूलं न वेति सन्देहे पूर्वत्र प्रत्यभिज्ञापकाभावादव्यक्तपदं प्रधानपरं न भवतीत्युक्तम्।[2] इह तु बहुतरप्रत्यभिज्ञापकसद्भावाद् रोहितशुक्लकृष्णशब्दैः सत्त्वरजस्तमांस्युपलक्ष्य प्रकृतिरुपलक्षणीयेति

भाष्यभावप्रकाशिका

चमसवदविशेषात्।।८।। ननु प्रधानस्य रूपरहितत्वादेतन्मन्त्रप्रतिपाद्यत्वं न युक्तमित्याशङ्क्याह—**अत्र हीति।** रूढ्यभावात् कथमभिधानमित्याशङ्क्य, गुणवृत्त्याऽभिधानमित्याह—**रोहितमिति।** रोहितं हि कुसुम्भं रञ्जयति, एवं रजोऽपि रञ्जयतीति रोहितम्। एवं प्रसन्नमम्भः शुक्लम्, सत्त्वमपि प्रसन्नमिति शुक्लम्। एवमावरकं मेघादि कृष्णम्। तमोऽप्याव[प्याव]रकमिति कृष्णम्। भवतु, एवम्भूता गुणाः, प्रधानस्य किमायातमिति? तत्राह—**तेषामिति। अवयवधर्मैरिति।** अवयवाः प्रधानस्य सत्त्वादयः, तेषां धर्मा रोहितादयः, तैरित्यर्थः। ननु रोहितादिशब्दानां रञ्जनीयत्वादिगुणसाम्येन रजस्सत्त्वादिपरत्वे व्यवहितलक्षणा स्यात्, धर्मिणां तु तेजोऽबन्नानां ग्रहणे न व्यवहितलक्षणा भवेदित्याशङ्क्य, तेजोऽबन्नानां जनिमत्त्वान्न जायत इत्यजेति योगवृत्तेस्तेष्वसंभवादाकृत्यभावादाकृत्याऽपि वृत्त्यसंभवादजेति प्रधानमुच्यत इत्याह—**न जायत इति चेति।** वाक्यशेषोऽपि

न्यायनिर्णयः

कारणवाचकाव्यक्तशब्देन कार्यं शरीरं लक्ष्यमित्युक्तम्। इदानीं धर्मवाचिलोहितादिपदैस्तद्धर्माणि तेजोऽबन्नानि लक्ष्यन्त इत्युपेत्याजामन्त्रस्य प्रधानपरत्वं प्रत्याह—**चमसवदिति।** अजाशब्दस्य छांगातोऽपकृष्टस्य प्रधानमाययोस्तेजोऽबन्ने च गुणतो वृत्तियोगादजामन्त्रः प्रधानपरो वा तेजोऽबन्नाख्यावान्तरप्रकृतिमायारूपपरमप्रकृत्योरन्यतरपरो वेति संशये पूर्वपक्षयति—**पुनरिति।** प्रधानस्याशब्दतायाः साधितत्वादस्थाने प्रत्यवस्थानमित्याह—**कस्मादिति।** प्रधानस्यार्थतोऽप्रत्यभिज्ञानात् तस्याव्यक्तपदावाच्यत्वेऽपि त्रिगुणत्वादिनाऽजामन्त्रे तत्प्रत्यभिज्ञानात् तत्परतेति मत्वाऽऽह—**मन्त्रेति।** अजामन्त्रस्याप्रधानपरत्वात् तदशब्दत्वोक्त्या समन्वयस्यैव दार्ढ्यात् पादादिसंगतयः। पूर्वपक्षे प्रधानस्य शब्दवत्त्वेन गतिसामान्यासिद्धिः, सिद्धान्ते तस्याशब्दत्वात् तत्सिद्धिरिति फलभेदः। मन्त्रवर्णमेवानुक्रामति—**अजामिति।** प्रधानस्य रूपराहित्यादेतत्प्रतिपाद्यत्वं नास्तीत्याशङ्क्याह—**अत्रेति।** रूढ्यभावे कथमभिधानं, गुणवृत्त्येत्याह—**लोहितमिति।** कुसुम्भवदम्भोवन्मेघवच्च तेषां तथात्वेऽपि प्रधानस्य किमायातं, तदाह—**तेषामिति। अवयवधर्मैः**अवयवाः प्रधानस्य सत्त्वादयस्तेषां धर्माः शुक्लादयस्तैरित्यर्थः। लोहितादिशब्दानां रञ्जनीयत्वादिगुणयोगाद् रजआदिपरत्वे व्यवहितलक्षणा स्यात्, धर्मिणां तेजोऽबन्नानां ग्रहे नैवमित्याशङ्क्य तेषु जनिमत्त्वादाकृत्यभावाच्चाजाशब्दायोगान्न तल्लक्षणेत्याह—**नेति।**

---

१. मूलप्रकृतिः = प्रधानम्। अविकृतिः = अकार्यम्। एतेन प्रधानस्य परिणामित्वाभ्युपगमात् कथमविकृतित्वमिति शङ्का निरस्ता।

२. पूर्वत्र अव्यक्तपदेन शरीरमेव ग्राह्यम्। संनिहितस्य वैदिकस्य ग्रहणसम्भवे विप्रकृष्टस्य तान्त्रिकस्य प्रधानस्य वेदे ग्रहणायोगादित्युक्तम्। इह तु संनिहितं किमपि अजापदग्रहणयोग्यं नोपलभ्यते इति प्रत्युदाहरणसंगतिः। नन्विहापि 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' इत्यादिपूर्वमन्त्रे 'मायां तु प्रकृतिं विद्यात्' इत्याद्युत्तरमन्त्रे च संनिहिता मायाऽस्त्येवेति चेत्, सत्यम्। संनिहितं नास्तीति कृत्वा चिन्तैषा न्यायव्युत्पादनार्था। ब्र. वि. ४९३।

(सां.का. ३) इत्यभ्युपगमात्। नन्वजाशब्दश्छागायां [1]रूढः। बाढम्। सा तु रूढिरिह नाश्रयितुं शक्या, विद्याप्रकरणात्। सा च बह्वीः प्रजास्त्रैगुण्यान्विता जनयति। तां प्रकृतिमज एकः पुरुषो जुषमाणः प्रीयमाणः सेवमानो वाऽनुशेते, तामेवाविद्ययाऽऽत्मत्वेनोपगम्य सुखी दुःखी मूढोऽहमित्यविवेकितया संसरति। अन्यः पुनरजः पुरुष उत्पन्नविवेकज्ञानो विरक्तो जहात्येनां प्रकृतिं भुक्तभोगां [2]कृतभोगापवर्गां परित्यजति, मुच्यत इत्यर्थः। तस्माच्छ्रुतिमूलैव प्रधानादिकल्पना कापिलानामिति।

एवं प्राप्ते ब्रूमः– नानेन मन्त्रेण श्रुतिमत्त्वं सांख्यवादस्य शक्यमाश्रयितुम्। न ह्ययं मन्त्रः स्वातन्त्र्येण कंचिदपि वादं समर्थयितुमुत्सहते। सर्वत्रापि यया कयाचित् कल्पनयाऽजात्वादिसंपादनोपपत्तेः सांख्यवाद

प्रकटार्थविवरणम्

भावः। अजाशब्दोऽपि तत्र यौगिकवृत्त्या प्रवर्तत इत्युक्तम्; तत्र रूढिर्योगमपहरतीति न्यायावष्टम्भेन शङ्कते— **नन्वजाशब्द इति।** रूढ्यसंभवे योगवृत्त्युपादानं युक्तमेवेत्याह— **बाढमिति।** किं च सृज्यमानप्रकृतित्वं प्रधानस्य प्रत्यभिज्ञापकमस्तीत्याह— **सा चेति।** किं च सांख्याभिमतक्षेत्रज्ञभेदस्यापि प्रत्यभिज्ञायमानत्वाद् भवत्ययं मन्त्रः सांख्यवादस्य मूलमित्याह— **तां प्रकृतिमिति।**

नकारमधिकृत्य व्याचष्टे— **नानेन मन्त्रेणेति।**

भाष्यभावप्रकाशिका

साङ्ख्यवादस्यानुकूलः; आत्मनामनात्मनां च भेदप्रतिपादकत्वादित्याह—**सा च बह्वीरिति। त्रैगुण्यान्विता इति।** सुख-दुःख-मोहान्विता इत्यर्थः। अनुशेत इति व्याचष्टे—**तामेवाविद्ययेति।** एवं तृतीयपादं व्याख्याय मन्त्रस्य चतुर्थपादं व्याचष्टे—**अन्यः पुनरिति।** भुक्तभोगामिति व्याचष्टे—**कृतभोगापवर्गामिति।** शब्दाद्युपलब्धिर्भोगः, गुणपुरुषान्यताख्यातिरपवर्गः अपवृज्यतेऽनयेति व्युत्पत्त्या।

अविशेषादिति हेतुना समर्थनीयं प्रतिज्ञार्थमाह—**नानेनेति।** तत्र हेतुमाह—**न ह्ययमिति।** तदेव कुत इत्याकाङ्क्षायां प्रकरणोपपदवाक्यशेषादिविशेषाभावादिति सूत्रपदं व्याचष्टे—**सर्वत्रापीति।**।८।।

न्यायनिर्णयः

'रूढिर्योगमपहरति' इति न्यायेन शङ्कते—**नन्विति।** रूढ्ययोगे योगवृत्त्यादानं युक्तमित्याह—**बाढमिति।** वाक्यशेषस्य प्रधानानुगुण्याच्च मन्त्रस्य तत्परतेत्याह—**सा चेति। त्रैगुण्यान्विताः** सुखदुःखमोहान्विताः। आत्मभेदवादित्वाच्च मन्त्रस्य प्रधानपरतेत्याह—**तामिति।** अनुशयनमेव विशदयति—**तामेवेति।** चतुर्थं पादं व्याकरोति—**अन्य इति।** भुक्तभोगामिति व्याचष्टे—**कृतेति।** शब्दाद्युपलब्धिर्भोगः। गुणपुरुषान्यताधीरपवृज्यतेऽनेनेत्यपवर्गः। स्वरूपस्थितेरकृतकत्वात् पुनर्मुक्तिवचनाच्चाजामन्त्रस्य प्रधानवादानुकूल्ये फलितमाह—**तस्मादिति।**

पूर्वपक्षमनूद्य सिद्धान्तयति—**एवमिति।** सौत्रहेतुसाध्यां प्रतिज्ञां पूरयति—**नेति।** तदेव स्पष्टयति—**न हीति।** तत्र हेत्वपेक्षायां प्रकरणोपपदवाक्यशेषाभावादिति सौत्रं हेतुं व्याचष्टे—**सर्वत्रेति।** दृष्टान्तमादाय कर्माङ्गं व्यावर्त्योपनिषत्प्रसिद्धं चमसं दर्शयति—

---

१. भाष्ये **छागायामिति।** छागशब्दस्याजादिगणे पाठकल्पनया टाबुपपत्तिः। शाबरभाष्यादिष्वपि 'छागा' इत्याकारान्तप्रयोगदर्शनमेवमेवोपपादनीयम्। न च तथा सति 'अजा छागी' (अमरकोशः) इति प्रयोगः कथमिति वाच्यम्। पुंयोगलक्षणङीषोपपत्तेः। अजादिलक्षणटाप् जातिलक्षणङीषो बाधकः, न पुंयोगलक्षणस्येति कैयटेनोक्तत्वात्। न चैवमश्वेत्यादावपि पुंयोगलक्षणङीषापत्तिरिति वाच्यम्। अनभिधानेन वारणसंभवात्। उभयविधप्रयोगदर्शनात् अजादिगणे 'छागाद्वा' इति गणसूत्रं पठनीयमिति नागेशाशय इति शेखरदीपककाराः। द्र. पृ. ३७०। अस्मिंश्च मते टाबभावपक्षे जातिलक्षणङीषैवोपपत्तिः। सर्वथा छागेति आवन्तस्य प्रामाणिकैः प्रयोगात् कथमप्युपपत्तिः कर्तव्यैव।

२. भाष्ये **कृतभोगापवर्गामिति।** श्रुतौ 'भुक्तभोगा'मिति पदे 'भुक्ते'ति 'कृते'त्यर्थकम्। भोगपदमपवर्गस्याप्युलक्षणमित्याशयः। अत्रापवर्गपदेन करणव्युत्पत्त्या मोक्षसाधनं प्रकृतिपुरुषविवेकज्ञानमुक्तम्। अन्यथा प्रकृतिविविक्ततयाऽवस्थितपुरुषस्यैवापवर्गपदार्थतया तस्य नित्यत्वेन प्रकृतिकृतत्वानुपपत्तेः। अथवाऽविवेकध्वंसः अपवर्गपदार्थोऽस्तु। तस्य प्रकृतिकृतत्वोपपत्तेः। अस्मिन् पक्षेऽपवर्गपदं भावसाधनमेव। यदा प्रधानं बुद्धिद्वारा सुखदुःखात्मना परिणतं भवति तदा पुरुषः तत्प्रकाशतामापद्यते, स एव तस्य भोग उच्यते। अतः प्रधानकृतत्वं भोगस्येति ध्येयम्। ब्र. वि. पृ. ४९५।

एवेहाभिप्रेत इति विशेषावधारणकारणाभावात्। चमसवत्। यथा हि 'अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः' (बृ.उ.२।२।३) इत्यस्मिन् मन्त्रे स्वातन्त्र्येणायं नामासौ चमसोऽभिप्रेत इति न शक्यते निरूपयितुम्। सर्वत्रापि यथाकथंचिदर्वाग्बिलत्वादिकल्पनोपपत्तेः। एवमिहाप्यविशेषोऽजामेकामित्यस्य मन्त्रस्य। नास्मिन् मन्त्रे प्रधानमेवाजाऽभिप्रेतेति शक्यते नियन्तुम्।।८।।

तत्र तु 'इदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः' (बृ.उ.२।२।३) इति वाक्यशेषाच्चमस-विशेषप्रतिपत्तिर्भवति। इह पुनः केयमजा प्रतिपत्तव्येति। अत्र ब्रूमः-

ज्योतिरुपक्रमा तु तथा ह्यधीयत एके।।९।।

परमेश्वरादुत्पन्ना ज्योतिःप्रमुखा [१]तेजोबन्नलक्षणा चतुर्विधस्य भूतग्रामस्य प्रकृतिभूतेयमजा प्रतिपत्तव्या। तुशब्दोऽवधारणार्थः। भूतत्रयलक्षणैवेयमजा विज्ञेया, न गुणत्रयलक्षणा। कस्मात्? तथा ह्येके शाखिनस्ते-जोबन्नानां परमेश्वरादुत्पत्तिमाम्नाय तेषामेव रोहितादिरूपतामामनन्ति- 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य' (छा.उ.६।४।१) इति। तान्येवेह तेजोबन्नानि [२]प्रत्यभिज्ञायन्ते रोहितादिशब्दसामान्यात्। रोहितादीनां च शब्दानां रूपविशेषेषु मुख्यत्वाद् भाक्तत्वाच्च गुणविषयत्वस्य।

प्रकटार्थविवरणम्

उत्तरसूत्रनिरस्याशङ्कामाह— **तत्र त्विदं तच्छिर इति।** **ज्योतिरुपक्रमा तु तथा ह्यधीयत एके। चतुर्विधस्येति।** स्वेदजाण्डजजरायुजोद्भिज्जलक्षणस्येत्यर्थः। किं च [३]लक्षितलक्षणापरिग्रहाद् वरं गुणवाचकैः शब्दैः गुणिनां तेजोबन्नानां लक्षणो[लक्षणयो]पादानमित्यभिप्रेत्याह— **रोहितादीनां च शब्दानामिति।** ननु कथं शाखान्तरगतविशेषोपादानेन शाखान्तरे निर्णय

भाष्यभावप्रकाशिका

ज्योतिरुपक्रमा तु तथा ह्यधीयत एके।।९।। उत्तरसूत्रमवतारयितुं विशेषमाशङ्कते—**तत्र त्विदं तच्छिर इति।** **इह तु** तथाभूतविशेषाश्रवणात् स्मृतिसिद्धं प्रधानमेव परिग्रहीतव्यमित्याशयवानाह—**इह पुनरिति।** विजातीयस्मृतिप्रमाणात् सजातीयश्रुतिप्रमाणस्य संनिहितत्वाल्लाघवात् श्रुत्यन्तरेणार्थनिर्णय इत्याह—**परमेश्वरादिति। चतुर्विधस्येति।** जरायुजाण्डजस्वेदजोद्भिज्जलक्षणस्येत्यर्थः।

न्यायनिर्णयः

चमसवदिति। अर्वाग्बिलत्वादिना विशेषसिद्धिमाशङ्क्याह—**सर्वत्रेति।** गिरिगुहादावित्यर्थः। दृष्टान्तस्थमर्थं दार्ष्टान्तिके योजयति—**एवमिति।।८।।**

सूत्रान्तरमवतारयितुं चोदयति—**तत्रेति।** दृष्टान्तवाक्यं सप्तम्यर्थः। इहेत्यजामन्त्रोक्तिः। चमसदृष्टान्तवदजामन्त्रे विशेषाश्रवणात् प्रधानमेव स्मार्तं ग्राह्यमित्यर्थः। सूत्रमवतारयति—**अत्रेति।** विजातीयस्मृतेः सजातीयश्रुतेः संनिधेर्लाघवेन श्रुत्यन्तरादर्थनिर्णयोऽजामन्त्रस्येति व्याचष्टे—**परमेश्वरादिति।** 'तत्तेजोऽसृजत' इत्यादिश्रुतेर्विशेषणम्, जरायुजाण्डस्वेदजोद्भिज्जभेदाच्चातुर्विध्यम्। इयमजेति मान्त्रवर्णिकी प्रकृतिरुक्ता। ज्योतिरुपक्रमेति विशेषोक्तौ तुशब्देन विशेषगीर्वृथेत्याशङ्क्याह—**तुशब्द इति।** अवधारणारूपमर्थमेव स्फोरयति—**भूतेति।** स्मृतिमनुसृत्य गुणत्रयात्मिका कुतोऽसौ नेष्टेत्याह—**कस्मादिति।** सूत्रावयवेनोत्तरमाह—**तथेति।** छान्दोग्ये तेजोऽबन्नानामीश्वरकार्याणां रोहितादिरूपवतामुक्तत्वेऽपि किमित्यजामन्त्रे तान्येव वक्तव्यानीति, एकार्थत्वे हेत्वभावादित्याशङ्क्याह—**तानीति।** स्मार्ते प्रधानेऽपि

---

१. 'ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते' इत्यादौ तृतीयभूतेऽपि ज्योतिःपदप्रयोगात् सूत्रे ज्योतिःशब्देन तदेव विवक्षितमिति।
२. सर्ववेदान्तप्रत्ययं ब्रह्मेति न्यायेन श्रुत्यन्तरगतप्रत्यभिज्ञैव ग्राह्या, न स्मृतिप्रत्यभिज्ञा बहिरङ्गत्वादिति भावः। द्र. न्या. र. म. ३६५।
३. लोहितशुक्लकृष्णशब्दैः सत्त्वरजस्तमांसि लक्षयित्वा तद्द्वाराऽवयविप्रकृतिलक्षणापेक्षया साक्षाल्लक्षणायाः स्वीकारः उचित इति भावः।

असंदिग्धेन च संदिग्धस्य निगमनं न्याय्यं मन्यन्ते। तथेहापि 'ब्रह्मवादिनो वदन्ति। किंकारणं ब्रह्म' (श्वे.उ.१।१) इत्युपक्रम्य 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्' (श्वे.उ.१।३) इति पारमेश्वर्याः शक्तेः समस्तजगद्विधायिन्या वाक्योपक्रमेऽवगमात्। वाक्यशेषेऽपि 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति, 'योयोनिं योनिमधितिष्ठत्येकः' (श्वे.उ.४।१०,११) इति च तस्या एवावगमान्न स्वतन्त्रा काचित् प्रकृतिः प्रधानं नामाजामन्त्रेणाऽऽम्नायत इति शक्यते वक्तुम्। प्रकरणात्तु सैव दैवी शक्तिरव्याकृतनामरूपा नामरूपयोः प्रागवस्थाऽनेनापि मन्त्रेणाम्नायत इत्युच्यते। तस्याश्च स्वविकारविषयेण त्रैरूप्येण त्रैरूप्यमुक्तम्।।९।।

प्रकटार्थविवरणम्

इत्याशङ्क्याह— **असन्दिग्धेनेति**। 'यथा "पुरोडाशं चतुर्धा करोति" इति' विशेषवचनेन निर्णयस्तथेत्यर्थः। किं च श्वेताश्वतरेऽपि पूर्वापरपर्यालोचनया मायैवाजा प्रतीयते। ततोऽपि नाजामन्त्रार्थः प्रधानमित्याह— **तथेहापीति**। ध्यानमयेन योगेनानुगताः परमेश्वरमनुप्रविष्टाः ते ऋषयः देवात्मनो ब्रह्मणः कारणत्वनिर्वाहिकां शक्तिं स्वगुणैः स्वविकारैः पृथिव्यादिभिः निगूढां तिरस्कृतनिजरूपामपश्यन् दृष्टवन्त इत्यर्थः। मायाप्रदेशानां जीवोपाधीनामविद्यानामनेकत्वाद् योनिं योनिमिति वीप्सा। ननु यदि

भाष्यभावप्रकाशिका

ननु रोहितादिशब्दानां तत्रापि समानत्वात् स्मृतिप्रसिद्धं प्रधानं किमिति न गृह्यत इत्याशङ्क्य मुख्येऽर्थे संभवति रञ्जनादिना रोहिताद्युपचारस्याङ्गीकर्तुमयुक्तत्वादित्याह—**रोहितादीनां चेति**। ननु वाक्यान्तरेण शाखान्तरगतवाक्यनिर्णयो न युक्त इत्याशङ्क्य सर्वशाखाप्रत्ययन्यायादुपपन्न इत्याह—**असन्दिग्धेन चेति**। न केवलं शाखान्तरीयवाक्यादस्मदभिमतसिद्धिः, पूर्वोत्तर-वाक्यपर्यालोचनायामियमपि श्रुतिरस्मद्दर्शनानुगुणाऽवगम्यत इत्याह—**तथेहापीति**। ब्रह्मरूपस्य विशुद्धत्वाज्जगत्कारणत्वम-युक्तमित्याशयवती श्रुतिः पृच्छति—**किंकारणमिति**। जगतः कारणं तत्किं ब्रह्म किं वाऽन्यदिति वा पृच्छति—**किं कारणमिति**। जगदुत्पत्तौ किमुपकरणवद् ब्रह्मेति वा। ध्यानयोगेनात्मानं गताः प्राप्ता ध्यानयोगानुगताः। देवस्यात्मभूता शक्तिः देवात्मशक्तिः। **यो योनिमिति**। अविद्याशक्तिर्योनिः, तस्याश्च भेदाद्योनिं योनिमिति वीप्सा। ननु कारणभूतमायाशक्तेरपि लोहितशुक्लकृष्णत्वाभावात् "लोहितशुक्लकृष्णामि"ति कथं व्यपदेशः? तत्राह—**तस्याश्चेति**।।९।।

न्यायनिर्णयः

रोहितादिशब्दानां नीतत्वात् तदेव किमित्यत्र न ग्राह्यमित्याशङ्क्य मुख्यसंभवे रञ्जनादिना रोहिताद्युपचारस्यायोगादित्याह—**रोहितादीनां चेति**। शाखान्तरीयवाक्येन शाखान्तरस्थं वाक्यं कथं निर्णेतव्यमित्याशङ्क्य सर्वशाखाप्रत्ययन्यायादित्याह—**असंदिग्धेनेति**। न परशाखान्तरस्थवाक्यादिष्टसिद्धिः, किंतु पूर्वापरालोचनायामियमपि श्वेताश्वतरश्रुतिरस्मदनुगुणेत्याह—**तथेति**। ब्रह्मणः शुद्धत्वान्न जगद्धेतुतेति पृच्छति—**किमिति**। यज्जगत्कारणं तत्किं ब्रह्म किं वाऽन्यदिति वा प्रश्नः, जगदुत्पत्तौ किमुपकरणवद् ब्रह्मेति वा। ते ब्रह्मवादिनोऽनया रीत्या विमृश्य ध्यानाख्येन योगेनानुगताः परमात्मानमनुप्रविष्टास्तस्यैव देवस्यात्मभूतामैक्येनाध्यस्तां मायाशक्तिं गुणत्रयात्मिकां त्रिगुणजगन्निर्माणसहकारिणीमपश्यन्निति श्रुतेरजामन्त्रस्यापि मूलप्रकृति-विषयतेत्यर्थः। न केवलमुपक्रमादेवमुपसंहारादपीत्याह—**वाक्येति**। परकीये प्रधाने मायाशब्दं वारयति—**मायिनं त्विति**। अविद्याशक्तिर्योनिः, तस्याश्चाभेदेऽपि कार्यभेदेन भेदाद् वीप्सा। न च सा परेष्टा प्रकृतिः, एकस्य देवस्य तदधिष्ठातृत्वश्रुतेः। पूर्वोत्तरविरोधादजामन्त्रस्य प्रधानार्थत्वाभावे स्थिते तदुभयानुगुण्यान्मायाशक्तिविषयत्वमेव तस्येत्याह—**प्रकरणात्त्विति**। दैव्याः शक्तेः 'तद्धेदं तर्ह्यव्याकृतम्' इति श्रुत्यन्तरप्रसिद्धिं सूचयति—**अव्याकृतेति**। तस्यामभिव्यक्तनामरूप-कार्यलिङ्गकमनुमानमाह—**नामेति**। पूर्वोत्तरवाक्याभ्यामिवेति वक्तुमपिशब्दः। कथमस्मिन् पक्षे लोहितशुक्लकृष्णामिति कारणभूतमायाशक्तेस्त्रैरूप्यं, वैश्वरूप्यात्, तत्राह—**तस्याश्चेति**।।९।।

---

१. दर्शपूर्णमासप्रकरणे हि आग्नेयः, अग्नीषोमीयः, असोमयाजिन ऐन्द्राग्नः इति त्रयः पुरोडाशाः। तत्र स्विष्टकृद्यागानन्तरमिडाभक्षणे कृतेऽवशिष्टस्य पुरोडाशस्य ऋत्विग्भ्यो दातुं चतुर्धा विभागोऽनेन विधीयते। तत्र कस्य पुरोडाशस्य चतुर्धा करणमिति विशेषानिर्णये शाखान्तरीयेण 'आग्नेयं चतुर्धा करोति' इति वचनेन आग्नेयस्येति निर्णीयते। अयमुपसंहारन्यायः इत्युच्यते। तदुक्तं- 'सामान्यविधिरस्पष्टः संह्रियेत विशेषतः' इति। द्र. तं. वा. ३-४-१४। २. 'इति सामान्यवचनस्य 'आग्नेयं चतुर्धाकरोति' इति शाखान्तरगतेन विशेषवचनेन' इति भाव्यम्।

कथं पुनस्तेजोबन्नानां त्रैरूप्येण त्रिरूपाऽजा प्रतिपत्तुं शक्यते? यावता न तावत् तेजोऽबन्नेष्वजाकृतिरस्ति। न च तेजोऽबन्नानां जातिश्रवणादजातिनिमित्तोऽप्यजाशब्दः संभवतीति। अत उत्तरं उठति–

कल्पनोपदेशाच्च मध्वादिवदविरोधः।।१०।।

नायमजाकृतिनिमित्तोऽजाशब्दः, नापि यौगिकः। किं तर्हि? कल्पनोपदेशोऽयम्। अजारूपकक्लृप्तिस्तेजोऽबन्नलक्षणायाश्चराचरयोनेरुपदिश्यते। यथा हि लोके यदृच्छया काचिदजा रोहितशुक्लकृष्णवर्णा स्याद् बहुबर्करा सरूपबर्करा च, तां च कश्चिदजो जुषमाणोऽनुशयीत, कश्चिच्चैनां भुक्तभोगां जह्यात्, एवमियमपि तेजोऽबन्नलक्षणा भूतप्रकृतिस्त्रिवर्णा बहु सरूपं चराचरलक्षणं विकारजातं जनयति, अविदुषा च क्षेत्रज्ञेनोपभुज्यते, विदुषा च परित्यज्यत[1] इति। न चेदमाशङ्कितव्यम्- एकः क्षेत्रज्ञोऽनुशेतेऽन्यो जहातीत्यतः क्षेत्रज्ञभेदः पारमार्थिकः परेषामिष्टः प्राप्नोतीति। न हीयं क्षेत्रज्ञभेदप्रतिपिपादयिषा, किंतु बन्धमोक्षव्यवस्थाप्रतिपिपादयिषा त्वेषा। प्रसिद्धं तु भेदमनूद्य बन्धमोक्षव्यवस्था प्रतिपाद्यते। भेदस्तू-

प्रकटार्थविवरणम्

मायैवाजा कथं तर्हि [2]तस्यां स्त्रीरूपतेत्याशङ्क्याह— **तस्याश्चेति**। स्वविकाराश्रयेण रोहितादिरूपत्रयेण त्रिरूपतोपचर्यत इति भावः।

[3]सूत्रकारोक्ताजाशब्दार्थाभिप्रायेण शङ्कामाह— **कथं पुनरिति**। यस्मात् तेजोबन्नेषु तावदजाजातिर्नास्ति ततो न जातिद्वारेण तत्र प्रवर्तते। नाप्यजन्मनिमित्तः, जन्मश्रवणादित्यर्थः। कल्पनोपदेशाच्च मध्वादिवदविरोधः। तेजोबन्नेषु अजाकारपरिकल्पनोपदेशादजाशब्दप्रयोगो न विरुध्यत इत्याह— **कल्पनोपदेशादिति**। **यदृच्छयेति**। अनियमेन। **बर्करो** बालपशुः। यच्चोक्तं क्षेत्रज्ञभेदोपलम्भात् साङ्ख्यवादः प्रत्यभिज्ञायत इति; तत्राह— **न चेदमाशङ्कितव्यमिति**। ननु व्यवस्थाप्रतिपादने अर्थाद्भेदः प्रतिपादित एवेत्याशङ्क्याह— **प्रसिद्धं त्विति**। नार्थादपि भेदप्रतिपादनमित्यर्थः। ननु प्रसिद्धिरपि तात्त्विकभेदविषयैवेत्याशङ्क्याह—

भाष्यभावप्रकाशिका

कल्पनोपदेशाच्च मध्वादिवदविरोधः।।१०।। सूत्रान्तरमवतारयितुं शङ्कते—**कथं पुनरिति**। रूढ्या, किं वा योगेनेति विकल्प्य, न तावदाद्य इत्याह—**यावतेति**। आकृतिर्जातिः। योगवृत्तिरपि न संभवतीत्याह—**न चेति**। **जातिश्रवणादिति**। जन्मश्रवणादित्यर्थः। सूत्रमवतारयति—**अत उत्तरमिति**। कल्पनोपदेशमेव दर्शयति—**अजारूपकक्लृप्तिरिति**। ननु छागा रोहितशुक्लकृष्णैव न भवति, अन्यथाऽप्युपलम्भादिति, अत आह—**यदृच्छयेति**। बहुबर्करा बहुशाबा।

ननु व्यवस्थाप्रतिपादकं शास्त्रं व्यवस्थोपपत्तये भेदमपि प्रतिपादयतीत्याशङ्क्याह—**प्रसिद्धं त्विति**। ननु प्रमाणव्यतिरेकेण

न्यायनिर्णयः

अवान्तरपरमप्रकृत्योरन्यतरार्थत्वे मन्त्रस्योक्ते सत्यवान्तरप्रकृत्यर्थत्वममृष्यन्नाह—**कथमिति**। काऽनुपपत्तिरित्याशङ्क्य रूढ्या योगाद्वा तद्धीरिति विकल्प्याद्यं दूषयति—**यावतेति**। आकृतिर्जातिः। द्वितीयं प्रत्याह—**न चेति**। जातिर्जन्म तदभावोऽजातिरेवं रूढियोगाभ्यां यस्मादजाशब्देन तेजोऽबन्नाख्या प्रकृतिर्न ज्ञातुं शक्या तस्मान्नाजामन्त्रस्यावान्तरप्रकृत्यर्थतेत्यर्थः। तत्र सूत्रमुत्तरमित्याह—**अत इति**। पक्षद्वयमनङ्गीकारपरास्तमित्याह—**नायमिति**। अजाशब्दस्तर्हि कथमवान्तरप्रकृतौ वर्तते, तत्राह—**किमिति**। कल्पनोपदेशं दर्शयति—**अजेति**। तमेवोपदेशं दृष्टान्तेन स्पष्टयति—**यथेति**। ननु छागा न लोहितशुक्लकृष्णैवान्यथाऽपि भानात्, तत्राह—**यदृच्छयेति**। बर्करो बालपशुः। यत्तु क्षेत्रज्ञभेदोपलम्भात्प्रधानवादप्रत्यभिज्ञेति, तत्राह—**न चेति**। तत्र हेतुः—**न हीति**। व्यवस्थावादि शास्त्रं तदर्थं भेदमपि साधयिष्यतीत्याशङ्क्याह—**प्रसिद्धं त्विति**। प्रमाणातिरेकेण प्रसिद्ध्ययोगात् तत्प्रसिद्धस्य तस्य

---

१. परित्यागोऽत्र ज्ञानेन बाधः विवक्षितः, तत्कृतसुखदुःखाद्यभावप्रयोजकत्वेन त्यागसाम्यात्। 'मत्वा धीरो हर्षशोकौ जहाति' इतिवत्। ब्र. वि. ५००।

२. 'तस्यास्त्रिरूपता' इति पाठः स्यात्।

३. सूत्रकारेणात्र मन्त्रे तेजोऽबन्नरूपाऽजोक्ता। भाष्यकारैस्तु प्रकरणपर्यालोचनया मायैवाजा स्वीकृता।

पाधिनिमित्तो मिथ्याज्ञानकल्पितो न पारमार्थिकः। 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा' (श्वे.उ.६।११) इत्यादिश्रुतिभ्यः। मध्वादिवत्। यथा आदित्यस्यामधुनो मधुत्वम्, वाचश्चाधेनोर्धेनुत्वम्, द्युलोकादीनां चानग्नीनामग्नित्वम् इत्येवंजातीयकं कल्प्यते, एवमिदमनजाया अजात्वं कल्प्यत इत्यर्थः। तस्मादविरोधस्तेजोऽबन्नेष्वजाशब्दप्रयोगस्य।।१०।।

।।इति द्वितीयं चमसाधिकरणम्।।

शारीरकन्यायसंग्रहः

३।। न संख्योपसंग्रहाधिकरणम्।।सू. ११-१३।।

न सङ्ख्योपसंग्रहादपि नानाभावादतिरेकाच्च।।११।। प्राणादयो वाक्यशेषात्।।१२।। ज्योतिषैकेषामसत्यन्ने।।१३।।

यत्र गुणिशब्दस्य षष्ठ्यन्तता तत्र गुणशब्दः स्वप्रधानः, यथा पटस्य शौक्ल्यमिति; यत्र सामानाधिकरण्यं तत्र गुणिप्रधानता, यथा शुक्लः पट इति। तथा नोपसर्जनेन पदान्तरस्यान्वयः, किं तु प्रधानेन, यथा दण्डी धावतीति। एताभ्यां न्यायाभ्याम् ''पञ्च पञ्चजनाः'' इति द्वितीयपञ्चशब्दस्य जनशब्दप्रधानस्य प्रथमपञ्चशब्देनानन्वयात् न पञ्चविंशतिसंख्यासिद्धिः इत्यसमासपक्षे दर्शितम्। समासपक्षे तु समासान्तरात् सामान्यविषयात् संज्ञासमासो विशेषविषयो बलीयान् इति [न्यायेन] पञ्चैव पञ्चजना इति न पञ्चविंशतिसंख्यासिद्धिः इति दर्शितम्।

प्रकटार्थविवरणम्

भेदस्तूपाधिनिमित्त इति। प्रसिद्धेः परमार्थत्वापरमार्थत्वयोः उदासीनत्वादागमामिक्षा [मान्मिथ्याऽ] ज्ञानेषु प्रतिबिम्बभावकृतो जीवभेद इत्यवगम्यत इत्यर्थः। ननु वेदस्य यथार्थत्वात् नान्यशब्दस्यान्यत्र प्रयोग उपपद्यत इत्याशङ्क्याह— **मध्वादिवदिति।**

।।इति द्वितीयं चमसाधिकरणम्।।

भाष्यभावप्रकाशिका

प्रसिद्ध्यनुपपत्तेः प्रामाणिकतया भेदस्य पारमार्थिकत्वमित्याशङ्क्याह—**भेदस्त्विति।** कथं भेदस्य परिकल्पितत्वमित्याशङ्क्य, आत्मैकत्वप्रतिपादकश्रुतिविरोधादित्याह—**एको देव इति।** दृष्टान्तभागं सूत्रस्य व्याचष्टे—**यथाऽऽदित्यस्येति।** आदिशब्द-गृहीतान्युदाहरणान्याह—**वाचश्चेति।** उपसंहरति—**तस्मादविरोध इति।** रोहितादिशब्दानां रञ्जनीयत्वादिव्यवहितलक्षणा-नुगृहीतामजाशब्दस्य योगवृत्तिं प्रधाने बाधित्वा रोहितादिगुणं[ण]संहतिप्रधानं तेजोऽबन्नमजाकारं कल्पयित्वाऽजाशब्दस्य रूढिपरिग्रहो युक्तः; समुदायप्रसिद्धिपरित्यागेनावयवप्रसिद्ध्याश्रयणस्यायुक्तत्वात्। इह च रूप[क]कल्पनया समुदायप्रसिद्धेरेवानपेक्षायाः संभवादिति भावः।।१०।। इति द्वितीयं चमसाधिकरणम्।

न्यायनिर्णयः

प्रामाणिकतया वस्तुतेत्याशङ्क्याह—**भेदस्त्विति।** कथं तस्य कल्पितत्वमित्याशङ्क्यैक्यवादिवाक्यवशादित्याह—**एक इति।** श्रुत्यन्तरमैक्यवादि संग्रहीतुमादिपदम्। दृष्टान्तमवतार्य व्याचष्टे—**मध्वादिवदिति।** रोहितादिशब्दानां रञ्जनीयत्वादिगुणसामान्यव्यवधानेन रजःसत्त्वादिव्यवहितलक्षणानुगृहीतामजाशब्दस्य योगवृत्तिं प्रधाने बाधित्वा रोहितादिगुणसंहतिप्रधानं तेजोऽबन्नमजाकारं परिकल्प्याजाशब्दस्य रूढिग्रहो युक्तः, समुदायप्रसिद्धित्यागेनावयवप्रसिद्ध्याश्रयणस्यायुक्तत्वात्। इह च रूप[क]कल्पनया समुदायप्रसिद्धेरनपेक्षायोगादिति चकारार्थमभिप्रेत्याविरोधं व्याकुर्वन्नुपसंहरति—**तस्मादिति।** तथा चाजामन्त्रस्यावान्तरपरमप्रकृत्योरन्यतरार्थत्वेनाप्रधानविषयत्वात् तस्याशब्दत्वं सिद्धमित्यर्थः।।१०।।

।।इति द्वितीयं चमसाधिकरणम्।।

३।।न संख्योपसंग्रहाधिकरणम्।।सू. ११-१३।।

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च।।११।।

एवं परिहृतेऽप्यजामन्त्रे पुनरन्यस्मान्मन्त्रात् सांख्यः प्रत्यवतिष्ठते। 'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः। तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्' (बृ.उ.४।४।१७) इति। अस्मिन् मन्त्रे पञ्च पञ्चजना इति पञ्चसंख्याविषयाऽपरा पञ्चसंख्या श्रूयते, पञ्चशब्दद्वयदर्शनात्। त एते पञ्च पञ्चकाः पञ्चविंशतिः संपद्यन्ते। तया पञ्चविंशतिसंख्यया यावन्तः संख्येया आकाङ्क्ष्यन्ते तावन्त्येव च तत्त्वानि सांख्यैः संख्यायन्ते— 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकश्च विकारो न प्रकृतिर्न

प्रकटार्थविवरणम्

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च। अवान्तरसङ्गतिमाह— **एवमिति**। ननु यः पञ्चजनादिप्रतिष्ठाधारः तमात्मानं ब्रह्मामृतं मन्यमानो विद्वान् जीवन्नेवामृतो भवतीत्येतावत् प्रतीयते। कथमस्मान्मन्त्रात् सांख्यस्य प्रत्यवस्थानमित्याशङ्क्याह— **अस्मिन् मन्त्र इति**। "पञ्च पञ्चजनाः" इत्यत्र पञ्चविंशतिसंख्या प्रतीयते न वेति सन्देहे-पूर्वत्र लक्षितलक्षणाभिया प्रधानाप्रतीतिरुक्ता। अत्र तदभावान्मुख्यवृत्त्यैव 'पञ्च पञ्चपूल्य' इत्युक्ते पञ्चविंशतिपूलप्रतीतिवत् पञ्चविंशतिसंख्याप्रतीतिरिति भावः। अस्तु पञ्चविंशतिसंख्याप्रतीतिः, ततो वा किमायातमित्याशङ्क्याह— **तथा [तया] पञ्चविंशतिसंख्ययेति**। श्रौतसंख्यायाः संख्येयाकाङ्क्षायां स्मृतिप्रसिद्धा[१] चेत्पञ्चविंशतितत्त्वानि संबध्यन्त इति भावः। जगतो मूलं प्रकृतिरविकृतिरनादिरित्यर्थः।

भाष्यभावप्रकाशिका

न संख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च।।११।। अवान्तरसङ्गतिमाह—**एवमिति**। तथापि साङ्ख्याभिमतस्य कः प्रसङ्ग इति? तदाह—**त एते पञ्च पञ्चका इति**। साङ्ख्याभिमतपञ्चविंशतितत्त्वसिद्धिः कथमित्याशङ्क्य, सङ्ख्यैव संख्येयाकाङ्क्षा स्मृतिसिद्धपञ्चविंशतितत्त्वानि संख्येयतया स्वीकरोतीत्याह—**तया पञ्चविंशतिसङ्ख्ययेति**। ननु आधारत्वेनात्मनोऽवस्थानादाकाशस्य च पृथगभिधानात् त्रयोविंशतिर्जना इति वाच्यम्; न पञ्च पञ्च जना इतीति चेत्, मैवम्; मूलप्रकृतिं विभज्य सत्त्वादिगुणैः पञ्चविंशतिसङ्ख्याकल्पनोपपत्तेः। तथा सत्यात्माकाशाभ्यां सप्तविंशतितत्त्वानि स्युरिति चेत्, न; प्रकृतिमात्रेणैकीकरणे गुणानां पञ्चविंशतितत्त्वोपपत्तेः। अतो "यस्मिन्पञ्च पञ्चजना" इति पञ्चविंशतितत्त्वान्यभिधीयन्त इत्याह—**तावन्त्येव चेति**। अविकृतिः

न्यायनिर्णयः

अजाशब्दस्य योगं निरस्याजामन्त्रस्य प्रधानार्थत्वं निरस्तम्। इदानीं पञ्चजनशब्दस्य योगनिरासेन 'यस्मिन्' इत्यादिमन्त्रस्य प्रधानार्थत्वं निरस्यति—**न संख्येति**। पञ्चजनमन्त्रः सांख्यीयतत्त्वपरो वाऽर्थान्तरपरो वेति योगरूढ्यविनिगमाद् विशये संगतिमाह—**एवमिति**। अध्यात्माधिकारे प्रसिद्धच्छा गाया अयोगादजा तेजआदिकेत्युक्तम्। अत्रापि प्रसिद्धमनुष्यग्रहे वाक्यस्य निस्तात्पर्यादवयववृत्त्या सांख्यतत्त्वपरतेति संगतिरित्यर्थः। पञ्चजनमन्त्रस्याप्रधानपरत्वेन तदशब्दत्वोक्त्या समन्वयदृढीकरणात् पादादिसंगतिः। पूर्वपक्षे प्रधानाशब्दत्वनिवृत्त्या गतिसामान्यासिद्धिः, सिद्धान्ते तदशब्दत्वस्थित्या तत्सिद्धिरिति फलम्। तमेव मन्त्रं बृहदारण्यकस्थं पठति—**यस्मिन्निति**। पञ्चजना वाक्यशेषस्थाः प्राणादयः पञ्चाव्याकृताख्यश्चाकाशो यस्मिन् प्रतिष्ठितस्तमेव निष्प्रपञ्चब्रह्मात्मकममृतमात्मानं मन्ये; यद्यपि पूर्वं मर्त्योऽभूवम्, तथापीदानीं विद्वानमृतोऽस्मीति मन्त्रदृशो वचनम्। कथमस्मान्मन्त्रात् प्रत्यवस्थानं सांख्यस्येत्याशङ्क्याह—**अस्मिन्निति**। तथापि कथं सांख्यवादप्रसङ्गः, तत्राह—**त इति**। पञ्चविंशतिसंख्यादृष्टावपि सांख्यीयतत्त्वासिद्धिरित्याशङ्क्य संख्यैव संख्येयाकाङ्क्षायां स्मृतिसिद्धतत्त्वानि संगृह्णातीत्याह—**तयेति**। न चाधारत्वेनात्मनोऽवस्थानादाकाशस्य च पृथक्कथनात् त्रयोविंशतिर्जना इति वाच्यं, मूलप्रकृतिं सत्त्वादिभिर्विभज्य पञ्चविंशतित्वकल्पनात्। न चैवमात्माकाशाभ्यां सप्तविंशतित्वं, गुणानां मूलप्रकृतिमात्रेणैकीकरणादित्यभिप्रेत्याह—**तावन्तीति**। तत्र सांख्यस्मृतिमाह—**मूलेति**।

---

१. 'स्मृतिप्रसिद्धानि पञ्चविंशतितत्त्वानि' इति पाठः स्यात्।

विकृतिः पुरुषः' (सांख्यका.३) इति। तया श्रुतिप्रसिद्धया पञ्चविंशतिसंख्यया तेषां स्मृतिप्रसिद्धानां पञ्चविंशतितत्त्वानामुपसंग्रहात् प्राप्तं पुनः श्रुतिमत्त्वमेव प्रधानादीनाम्।

ततो ब्रूमः– न संख्योपसंग्रहादपि प्रधानादीनां श्रुतिमत्त्वं प्रत्याशा कर्तव्या। कस्मात्? नानाभावात्। नाना ह्येतानि पञ्चविंशतिस्तत्त्वानि। नैषां पञ्चशः पञ्चशः साधारणो धर्मोऽस्ति, येन पञ्चविंशतेरन्तराले पराः पञ्च पञ्चसंख्या निविशेरन्। न ह्येकनिबन्धनमन्तरेण नानाभूतेषु द्वित्वादिकाः संख्या निविशन्ते।

प्रकटार्थविवरणम्

महदहङ्कारपञ्चभूततन्मात्राण्येते 'महदादयः प्रकृतिविकृतयः स्वोत्तरं प्रति प्रकृतयो विकृतयश्च मूलकारणापेक्षयेति प्रकृतिविकृतय इत्यर्थः। एकादशेन्द्रियाणि, पञ्च विषया इत्ययं षोडशसंख्यावच्छिन्नो गणः केवलो विकार एव। पुरुषः पुनः कूटस्थचिन्मात्रविग्रहो न कस्यचित् प्रकृतिर्विकृतिर्वेत्यर्थः।

असमस्तपञ्चशब्दद्वयात् पञ्चपञ्चकसंख्यायाः प्रतीतिं तावदभ्युपगम्य तया संख्यया सांख्याभिप्रेततत्त्वानामुपसंग्रहो न भवतीत्याह— **न संख्योपसंग्रहादपीति**। यथा ज्ञानसाधनत्वं क्रियासाधनत्वं चासाधारणं निमित्तमाश्रित्यैकादशेन्द्रियेषु पञ्च ज्ञानेन्द्रियाणि [पञ्च कर्मेन्द्रियाणि] इत्यवान्तरसंख्यानिवेशः, तथा महदादिषु पञ्चशः पञ्चशः साधारणं निमित्तं वक्तव्यम्; न च

भाष्यभावप्रकाशिका

अकार्यमन्यस्य। महदहङ्कारपञ्चतन्मात्राणि सप्त प्रकृतिविकृतयः। तथाहि—महानहङ्कारस्य प्रकृतिः, मूलप्रकृतेस्तु विकृतिः, एवमहङ्कारस्तामसस्तन्मात्राणां प्रकृतिः, सात्त्विक एकादशेन्द्रियाणाम्, तन्मात्राणि चाकाशादीनां पञ्चानां प्रकृतयः। एवं पञ्चभूतानि एकादशेन्द्रियाणीति च षोडशको विकार एव। पृथिव्यादीनां घटादिप्रकृतित्वेऽपि तत्त्वान्तरप्रकृतित्वाभावाद् उपादानमात्रेण प्रकृतित्वानभिधानान्न प्रकृतित्वम्। "न प्रकृतिर्न विकृतिः पुरुषः"; कूटस्थनित्यत्वात्। सङ्ख्ययोपसङ्ग्रहादिति समासं स्वीकृत्य सूत्रपदं व्याचष्टे—**तया श्रुप्रतिसिद्धयेति**।

नानात्वं व्याचष्टे—**नाना हीति**। नानात्वमेवं विरुद्धं न भवतीत्याशङ्क्य, नानात्वं सूत्राभिमतं दर्शयति—**नैषामिति**। न हि सत्त्वरजस्तमोमहदहङ्काराणामेकः क्रिया वा गुणो वा जातिर्वा धर्मः पञ्चतन्मात्रादिभ्यो व्यावृत्त[ः] सत्त्वादिषु चानुगतः कश्चिदस्ति। नापि पृथिव्यप्तेजोवायुघ्राणानाम्; "आकाशश्च प्रतिष्ठित" इत्याकाशस्य पृथगभिधानेनात्राप्रवेशात्। एवं रसनादिष्वपि योज्यमिति भावः। किं तेनेति? अत आह—**येनेति**। ननु पञ्चविंशतिसङ्ख्याया अन्तराले पञ्चपञ्चसङ्ख्यानामपि भावात् तथा व्यपदेशो न विरुध्यत इति, तत्राह—**न ह्येकेति**।

न्यायनिर्णयः

अविकृतिरन्यस्य कस्यचिद् विकारो नेति यावत्। महदहंकारपञ्चतन्मात्राणि सप्त प्रकृतिविकृतयः। महानहंकारस्य प्रकृतिर्मूलप्रकृतेर्विकृतिः। अहंकारोऽपि तामसस्तन्मात्राणां प्रकृतिः, सात्त्विकस्त्वेकादशेन्द्रियाणाम्। तन्मात्राण्याकाशादीनां स्थूलानां प्रकृतयः। पञ्चभूतान्येकादशेन्द्रियाणि [इति] षोडशको गणो विकार एव। पृथिव्यादीनां घटादिप्रकृतित्वेऽपि तत्त्वान्तराप्रकृतित्वाद् विकृतय एव। पुरुषस्तु कौटस्थ्यात् प्रकृतिविकृतित्वविरहीत्यर्थः। संख्योपसंग्रहादिति व्याकुर्वन् पूर्वपक्षमुपसंहरति—**तयेति**।

सिद्धान्तसूत्रमवतार्य प्रतिज्ञां विभजते—**तत इति**। श्रुत्युक्तसंख्ययाऽपेक्षितसंख्येयविशेषार्पणं स्मृतेर्युक्तम् तयोर्मूलमूलित्वादित्याह—**कस्मादिति**। सौत्रं हेतुमुपादाय व्याचष्टे—**नानेति**। नानात्वमेव न विरुद्धमित्याशङ्क्याभिप्रेतं नानात्वमाह—**नैषामिति**। न हि सत्त्वरजस्तमोमहदहंकाराणां क्रियागुणजातीनामन्यतमस्तन्मात्रादिभ्यो व्यावृत्तः सत्त्वादिषु चानुवृत्तः कश्चिदेको धर्मोऽस्ति। नापि पृथिव्यप्तेजोवायुघ्राणानामुक्तो धर्मः संभवति, आकाशस्य पृथगुक्तेरप्रवेशात्। एवं रसनादिष्वपि पञ्चशः साधारणधर्मवैधुर्यमिति भावः। किं तेनानुपयोगिनेत्याशङ्क्याह—**येनेति**। पञ्चविंशतिसंख्यान्तराले पञ्चानामपि पञ्चसंख्यानां भावात् तथोक्तिरित्याशङ्क्याह—**न हीति**। त्रयस्त्रिंशद्देवा इति महासंख्यायामष्टौ वसव इत्यवान्तरसंख्या साधारणधर्माधीना, तथाऽत्रापि न साधारणधर्मादृते

१. 'महदाद्याः' इति पा.। २. 'प्राणानाम्' इति पा.।

अथोच्येत– पञ्चविंशतिसंख्यैवेयमवयवद्वारेण लक्ष्यते, यथा 'पञ्च सप्त च वर्षाणि न ववर्ष शतक्रतुः' इति द्वादशवार्षिकीमनावृष्टिं कथयन्ति, तद्वदिति। तदपि नोपपद्यते। अयमेवास्मिन् पक्षे दोषो यल्लक्षणाऽऽश्रयणीया स्यात्। परश्चात्र पञ्चशब्दो जनशब्देन समस्तः पञ्चजना इति, '[1]भाषिकेण स्वरेणैकपदत्वनिश्चयात्।

प्रकटार्थविवरणम्

तदस्ति महदादीनां परस्परमत्यन्तविलक्षणत्वात्। अतः पञ्चपञ्चकत्वाभावान्नोपसंग्रह इत्यर्थः। महासंख्याया अवान्तरसंख्याऽविनाभूतत्वादवान्तरसंख्यावाचकेन पञ्चशब्दद्वयेन पञ्चविंशतितत्त्वसंख्यैव लक्ष्यते पञ्चपञ्चकत्वाभावेऽपि इति शङ्कते— **अथोच्येतेति।** परिहरति— **तदपि नेति।** नाविनाभावमात्रेण लक्षणा, किं तु मुख्यार्थपरिग्रहे प्रमाणान्तरविरोधे; पौरुषेये च पुरुषविवक्षया; नेह तदस्तीति निष्कारणलक्षणाश्रयणमेव दूषणमित्यर्थः। पूर्वमसमासाश्रयणेनावान्तरसंख्याप्रतीतिमभ्युपगम्य न तत्त्वसंख्यालक्षणं संभवतीत्युक्तम्। इदानीं तु समास एवायमित्याह— **परश्चात्रेति। भाषिकेणेति।** पाठकप्रसिद्धेनान्तोदात्तस्वरेणेत्यर्थः। उक्तं हि— "छन्दोगा बह्वृचाश्चैव तथा वाजसनेयिनः। उच्चनीचस्वरं प्राहुः स वै भाषिक उच्यते॥" इति। पाणिनिरपि "तत्पुरुषस्य च" ["समासस्य"] इति सूत्रेण तत्पुरुषस्यान्तोदात्तस्वरं विदधौ। इष्टौ च तैत्तिरीयकाणामाज्यग्रहणमन्त्रे समासलिङ्गानां दर्शनात् समासो

भाष्यभावप्रकाशिका

त्रयस्त्रिंशद्देवसङ्ख्यानामष्टौ वसव इत्याद्यवान्तरसङ्ख्याया असाधारणधर्मनिबन्धनत्वदर्शनादिति भावः।

पूर्वपक्ष्येकदेशिनो मतमुत्थापयति—**अथोच्येतेति।** परसङ्ख्याया अवान्तरसङ्ख्यापूर्वकत्वात् पौर्वापर्यलक्षणया प्रत्यासत्त्या परसङ्ख्यालक्षणार्थं पूर्वसङ्ख्योपन्यास इति भावः। निराचष्टे—**अयमेवास्मिन्निति।** असमासपक्षमङ्गीकृत्य परिहार उक्तः, इदानीं समस्तत्वान्न प्रतीयते पञ्चविंशतिसङ्ख्येत्याह—**परश्चात्रेति। भाषिकेण स्वरेणेति।** 'छन्दोगा बह्वृचाश्चैव तथा वाजसनेयिनः। उच्चनीचस्वरं प्राहुः स वै भाषिक उच्यते॥" इति। उच्चैकस्वरो भाषिकः; सामासिक इति यावत्; इतरेषां नीचस्वरत्वनियमात् "उच्चनीचस्वरं प्राहुः " इति व्यपदेशः। अत्र त्वन्तोदात्तो भाषिक इति। अन्यत्र हि चैवंविधस्य पदस्यैकपदत्वावगमादिहापि

न्यायनिर्णयः

महासंख्यायामवान्तरसंख्यासिद्धिरित्यर्थः। अपरसंख्यापूर्वत्वात् परसंख्यायास्तत्पौर्वापर्यलक्षणप्रत्यासत्त्या परसंख्यालक्षणार्थमपरसंख्योक्तिरिति पूर्वपक्षदेशीयश्चोदयति—**अथेति।** तदेवोदाहरणेन स्फोरयति—**यथेति।** असमासमङ्गीकृत्य पञ्चशब्दद्वयदर्शनेऽपि पञ्चसंख्याद्वयरूपावान्तरसंख्यया पञ्चविंशतिलक्षणमहासंख्योपलक्ष्यत्वे श्रुतिसंभवे लक्षणा न युक्तेति परिहरति—**तदिति।** किंच पञ्चशब्दस्य जनशब्देन समस्तत्वात् पञ्चसंख्याद्वयासिद्ध्या तद्द्वारा पञ्चविंशतिसंख्याऽपि न सिध्यतीत्याह—**परश्चेति।** समस्तत्वे हेतुमाह—**(पारि) भाषिकेणेति।** अन्तानुदात्तस्वरो भाषिकग्रन्थसिद्धोऽत्र (पारि)भाषिकः। तथाहि—प्रथमोऽस्मिन्मन्त्रे पञ्चशब्दो भवत्युदात्तः, द्वितीयः सर्वानुदात्तः, जनशब्दश्चान्तोदात्तः। तथा च न द्वितीयपञ्चशब्दजनशब्दयोः समासमन्तरेणान्त्यस्याकारस्योदात्तत्वमितरेषां चानुदात्तत्वं, 'समासस्य' इति सूत्रेण समासस्यान्तोदान्तत्वविधानात्। 'अनुदात्तं पदमेकवर्जम्' इति च सूत्रेणोदात्तः स्वरितो वा यस्मिन् पदे विधीयते तदेकं हित्वा शिष्टस्यानुदात्तत्वं स्मर्यते। एवमन्तोदात्तस्वरबलात् तत्र समासो निर्धारितः। भाषिके तु शतपथब्राह्मणस्वरविधायकग्रन्थे 'स्वरितोऽनुदात्तो वा' इति सूत्रेण यो मन्त्रदशायामनुदात्तः स्वरितो वा स ब्राह्मणावस्थायामुदात्तो भवतीत्यपवादः स्वीकृतः। ततश्चान्त्यादाकारादितरेषामनुदात्तादीनां ब्राह्मणदशायामुदात्तत्वं प्राप्तम् 'उदात्तमनुदात्तमनन्त्यम्' इति

---

१. **भाषिकेणेति।** भाषायां भवो भाषिकः। प्रवचनशब्दो मन्त्रभागे वैदिकानां प्रसिद्धः, तथा भाषाशब्दो ब्राह्मणभागे। प्रकृतस्थले च मन्त्रस्य शतपथब्राह्मणगतत्वात् तत्स्वरविधायकभाषिकसूत्रसिद्धस्वरः भाषिकपदेन विवक्षितः। भाषिकसूत्राणि तु न्यायनिर्णये व्याख्याय योजितान्येव। एवं च "छन्दोगा बह्वृचाश्चैव......भाषिक उच्यते" इति प्रकटार्थोदाहृतः प्राचीनश्लोकोऽपि समञ्जसः। 'भाषास्वरोपदेशात्...' (पू.मी. १२.३.२०) इति सूत्रे शाबरभाष्ये उदाहृतत्वेनास्य प्रामाणिकत्वात् छन्दोगबह्वृचब्राह्मणयोरपि भाषिकस्वरनिश्चयात्। यद्यपीदानीं छन्दोगानां, बह्वृचानां च ब्राह्मणे न कोऽपि स्वर उपलभ्यते तथापि ऋग्वेदसामवेदयोः बहूनां शाखानां प्रमाणसिद्धत्वात् शाखान्तराभिप्रायेण, उपलभ्यमानब्राह्मणेऽपि तादृशस्वरपाठभ्रंशकल्पनया वा तदुपपत्तिः। एवं सति "ये तु— 'छन्दोगा...उच्यते' इति वचनमुदाहृत्यान्तोदात्तो भाषिक इति व्याचक्षते, तेषामध्ययनविरोधः। अन्तानुदात्तं हि समाम्नातारः पञ्चजनपदमधीयते" (पृ. ३९२) इति कल्पतरौ यत् प्रकटार्थखण्डनं कृतम्, तत्र प्रकटार्थोक्तस्य 'भाषिकेणेति। पाठकप्रसिद्धेनान्तोदात्तस्वरेणेत्यर्थः' इत्यंशस्यैव खण्डनं विवक्षितं, नोक्तश्लोकस्यापीति ध्येयम्।

प्रयोगान्तरे च 'पञ्चानां त्वा पञ्चजनानाम्' (तै.सं. १।६।१।२) इत्यैकपद्यैकस्वर्यैकविभक्तिकत्वावगमात्। समस्तत्वाच्च न वीप्सा पञ्च पञ्चेति। न च पञ्चकद्वयग्रहणं पञ्च पञ्चेति। न च पञ्चसंख्याया एकस्याः पञ्चसंख्यया परया विशेषणं पञ्च पञ्चका इति। उपसर्जनस्य विशेषणेनासंयोगात्। नन्वापन्नपञ्चसंख्याका जना एव पुनः पञ्चसंख्यया विशेष्यमाणाः पञ्चविंशतिः प्रत्येष्यन्ते; यथा 'पञ्च पञ्चपूल्य' इति पञ्चविंशतिपूलाः प्रतीयन्ते, तद्वत्। नेति ब्रूमः। युक्तं यत्पञ्चपूलीशब्दस्य समाहाराभिप्रायत्वात् कतीति सत्यां

प्रकटार्थविवरणम्

निश्चीयत इत्याह— **प्रयोगान्तरे चेति**। अस्तु समासः, ततः किमित्याशङ्क्याह— **समस्तत्वाच्चेति**। द्वितीयपञ्चशब्दस्य जनशब्देन समस्तत्वात् तत्पारतन्त्र्यात्र संख्यावृत्तिः, नापि पञ्चकद्वयग्रहणमित्यर्थः। पूर्वया पञ्चसंख्ययोत्तरस्याः पञ्चसंख्याया विशेषितत्वमित्यपि नाशङ्कनीयमित्याह— **न च पञ्चसंख्याया इति**। विशेषणानां विशेष्येणैवान्वयात् परस्परमनन्वयादित्यर्थः। मा भूत् संख्यायाः संख्यान्तरेण विशेषितत्वम्; पदार्थानां तु भविष्यतीत्याह— **नन्वापन्नेति**। दृष्टान्तदार्ष्टान्तिकयोः वैलक्षण्येन परिहरति— **नेति ब्रूम इति**। परस्पराकाङ्क्षया हि पदयोरन्वयः; तत्र पञ्चानां पूलानां समाहारः पञ्चपूलीति समाहारार्थे द्विगुसमासः; ते च समाहारा:

भाष्यभावप्रकाशिका

तत्सामान्यदेकपदत्वमित्याह—**प्रयोगान्तरे चेति**। ननु भवतु समासः, तथापि किमित्यत आह—**समस्तत्वाच्चेति**। असमासमङ्गीकृत्य पञ्चकद्वयस्य ग्रहणेऽपि दशैव तत्त्वानि इति न नियमेन साङ्ख्यतत्त्वप्रत्यभिज्ञानमित्याह—**न च पञ्चकद्वयेति**। **उपसर्जनस्येति**। पञ्चशब्दस्य सङ्ख्योपसर्जनद्रव्यवचनत्वेन संख्याया उपसर्जनतया विशेषणेनासंयोग इत्यर्थः। उपसर्जनेन द्वितीयपञ्चशब्देन प्रथमपञ्चशब्दस्य सम्बन्धो नास्तीति चेत् जनशब्देनैव सम्बन्धो भवत्विति परमपूर्वपक्षी चोदयति—**नन्वापन्नेति**। पञ्चजनशब्दस्य यौगिकत्वमङ्गीकृत्य परिहरति—**युक्तं यदिति**। पञ्चसङ्ख्यया पृथक्त्वैकार्थसमवायिन्या समुदायानामनवच्छिन्नतया कतीत्याकाङ्क्षायां पदान्तराभिहिता पञ्चसंख्या सम्बध्यते। तत्र हेतुः—पञ्चसंख्ययोत्पत्तिशिष्टया जनानामवच्छिन्नत्वात् पञ्चपूलीतिवत्। अत्र

न्यायनिर्णयः

सूत्रेण मन्त्रदशायामुदात्तस्यानन्त्यस्य परलग्नतयोच्चार्यमाणस्यानुदात्तत्वं विहितम्, तदत्राकारो नकारादुपरितनः सन्नाकाशश्चेत्यनेन लग्नतयोच्चार्यमाणोऽनुदात्तो भवति। स चैवमन्तानुदात्तस्वरः (पारि)भाषिकः। अन्तोदात्तो भाषिक इति पक्षे त्वध्ययनविरोधः। तेन (पारि)भाषिकेण स्वरेणैकपदत्वनिश्चयादसमासासिद्धिरिति भावः। अन्यत्र चैवंविधप्रयोगस्यैकपदत्वनिश्चयादिहापि तत्सामान्यादेकपदतेति समासे हेत्वन्तरमाह—**प्रयोगान्तरे चेति**। 'आज्यमसि' इत्याज्यस्याधिकारादाज्यं संबोध्य 'पञ्चानां त्वा पञ्चजनानां यन्त्राय धर्त्राय गृह्णामि' इति तैत्तिरीयकश्रुतेः, पञ्चानां पञ्चजनानां देवताविशेषणानां कृते यन्त्रवद् व्यवस्थितं यन्मदीयं शरीरं तदेव धर्त्रमैहिकामुष्मिकभोगधारणसमर्थं तदवैकल्यार्थं गृह्णामीति यजमानोक्तिः। समासेऽपि किं स्यात्, तत्राह—**समस्तत्वाच्चेति**। वीप्साऽभावे पञ्चसंख्याद्वयासिद्धेस्तद्द्वारा पञ्चविंशतिसंख्याया न लक्ष्यतेत्यर्थः। किं चासमासेऽपि पञ्चशब्दद्वयप्रयोगे दशानामेव लाभात्र सांख्यस्मृतिप्रत्यभिज्ञेत्याह—**न चेति**। पञ्च पञ्चेति पञ्चकद्वयग्रहेऽपि दशैव तत्त्वानि सिध्यन्ति, न पञ्चविंशतेस्तत्त्वानां प्रत्यभिज्ञेत्यर्थः। यद्वा समास एव पञ्चपञ्चेति पञ्चकद्वयाग्रहात्र लक्षणयाऽपि पञ्चविंशतिसंख्याधीरित्यर्थः। नन्वसमासेऽपि वीप्सां हित्वा दण्डिन्यायेन जायमानाजायमानसाधारणजनशब्दोक्ततत्त्वविशेषणीभूतपञ्चसंख्याविशेषणत्वादाद्यपञ्चसंख्यायाः सांख्यीय-पञ्चविंशतिधीरिति, नेत्याह—**न चेति**। शुक्लादिशब्दवत् पञ्चशब्दस्य संख्योपसर्जनद्रव्यपरत्वाद् गुणभूतसंख्याया न संख्यान्तरेण विशेषणम्। तथा सति विशेष्येण द्रव्येण विशेषणेन च संख्यया युगपदाकृष्टा संख्या नैकेनाप्यन्वियादित्याह—**उपसर्जनस्येति**। न खलूपसर्जनमुपसर्जनान्तरेण साक्षादेव संबध्यते, प्रधानानुयायित्वात् तेषां मिथः संगत्ययोगात्। अतः संख्ययोर्विशेषणविशेष्यतया न पराभीष्टसंख्याधीरित्यर्थः। नानाभावेन दूषितमपि परमपूर्वपक्षिणं संख्यान्तरानाकाङ्क्षानोपसर्जनन्यायाभ्यां दूषयितुमुत्थापयति—**नन्विति**। प्राप्तपञ्चसंख्याकानां जनानां पञ्चसंख्यया विशेषणे पञ्चविंशतितत्त्वधीरित्येतद् दृष्टान्तेन साधयति—**यथेति**। जायन्त इति जनाः, पञ्च च ते जनाश्चेति पञ्चजना इति यौगिकत्वमुपेत्य प्रत्याह—**नेतीति**। दृष्टान्ते संख्यान्तराकाङ्क्षां दर्शयति—**युक्तमिति**।

१. भाष्ये ऐकस्वर्यम् = एकपदत्वप्रयुक्तस्वरत्वम्।

भेदाकाङ्क्षायां पञ्च पञ्चपूल्य इति विशेषणम्। इह तु पञ्च जना इत्यादित एव भेदोपादानात् कतीत्यसत्यां भेदाकाङ्क्षायां न पञ्च पञ्चजना इति विशेषणं भवेत्। भवदपीदं विशेषणं पञ्चसंख्याया एव भवेत्। तत्र चोक्तो दोषः। तस्मात् पञ्च पञ्चजना इति न पञ्चविंशतितत्त्वाभिप्रायम्।

अतिरेकाच्च न पञ्चविंशतितत्त्वाभिप्रायम्। अतिरेको हि भवत्यात्माकाशाभ्यां पञ्चविंशतिसंख्यायाः। आत्मा तावदिह प्रतिष्ठां प्रत्याधारत्वेन निर्दिष्टः। यस्मिन्निति सप्तमीसूचितस्य 'तमेव मन्य आत्मानम्' इत्यात्मत्वेनानुकर्षणात्। आत्मा च चेतनः पुरुषः। स च पञ्चविंशतावन्तर्गत एवेति न तस्यैवाधारत्वमाधेयत्वं च युज्यते। अर्थान्तरपरिग्रहे च तत्त्वसंख्यातिरेकः सिद्धान्तविरुद्धः प्रसज्येत। तथा 'आकाशश्च प्रतिष्ठितः' इत्याकाशस्यापि पञ्चविंशतावन्तर्गतस्य न पृथगुपादानं न्याय्यम्। अर्थान्तरपरिग्रहे चोक्तं दूषणम्।

प्रकटार्थविवरणम्

कतीत्याकाङ्क्षायां सत्यां पञ्चेति विशेषणं युक्तम्; पञ्चजना इति तु समाहारे समास ईबन्तत्वप्रसङ्गात्। अतः प्रथमत एव संख्याप्रतीतेः पुनराकाङ्क्षाऽभावान्न पञ्चेति विशेषणं युक्तमित्यर्थः। ननु प्रथमं स्वरूपाणां संख्या प्रतीता, संख्याविशिष्टस्वरूपाणां तु संख्याकाङ्क्षायां पुनः पञ्चेति विशेषणं भविष्यतीत्याशङ्क्याह— **भवदपीदमिति। पञ्चसंख्याया एवेति।** पञ्चसंख्याविशिष्टानां रूपाणामेवेदं पञ्चेति विशेषणं भवेत्। तदा यथा पञ्च स्वरूपाणि तथा पञ्च विशिष्टरूपाणि सिध्यन्ति। तत्र च सांख्यतत्त्वासिद्धिरेवोक्तो दोष इत्यर्थः।

इतश्च पञ्चजनशब्दो न पञ्चविंशतितत्त्वान्याचष्टे अनिष्टसप्तविंशतिसंख्याप्रसङ्गादित्याह— **अतिरेकाच्चेति।** किं च भवतु

भाष्यभावप्रकाशिका

समुदायस्याप्रतीतेः पदान्तरनिर्दिष्टपञ्चसंख्या न सम्बध्यत इति भावः। मा भूत् तर्हि जनानामुत्पत्तिशिष्टसंख्यावच्छिन्नानां शब्दान्तरवाच्यसंख्यावच्छेदः, पञ्चसंख्यायास्तु संख्यान्तरानवच्छिन्नत्वात् तयाऽवच्छेदो भविष्यतीति, तत्राह—**भवदपीति। उक्तो दोष इति।** विशेषणविशेष्ययोरेव सम्बन्धः, न विशेषणयोः; अन्योपसर्जनत्वादिति कथितमित्यर्थः।

ननु यच्छब्दस्य सर्वनामतया सर्वसाधारणत्वात् ततः कथमात्मप्रतिपत्तिरित्याशङ्क्य, आत्मशब्दसमानाधिकृततच्छब्दसामर्थ्यादिति परिहरति—**यस्मिन्निति।** अनन्तर्गतपक्षे दूषणमाह—**अर्थान्तरपरिग्रह इति।** यदि सत्त्वरजस्तमांसि प्रधानेनैकीकृत्यात्माकाशौ पृथगुच्येते, तदा पञ्च पञ्चजना इति पञ्चविंशतितत्त्वानां पृथक्कथनात् सिद्धान्तविरोधः। अथ सत्त्वरजस्तमांसि मिथो भेदेन

न्यायनिर्णयः

द्विगुसमासेन समाहाराभिधानात् पदान्तरोक्तसंख्यया समाहारोऽवच्छेत्तुं युक्तः। उत्पत्तिशिष्टया तुल्यपदस्थसंख्यया समाहारिणः पूला अवच्छिद्यन्ते, तेन पञ्चपूलीत्यत्रास्त्याकाङ्क्षेति विशेषणविशेष्यधीरित्यर्थः। दार्ष्टान्तिके नैवमाकाङ्क्षेत्याह—**इहेति।** पञ्चजना इत्यत्र ङीबन्तत्वाश्रुत्या समाहारादृष्टेर्जनानां च स्वगतसंख्यावच्छिन्नत्वान्न संख्यान्तराकाङ्क्षेति कुतो विशेषणविशेष्यतेत्यर्थः। जनानामुत्पत्तिशिष्टसंख्यावरुद्धानां शब्दान्तरोक्तसंख्यानवरोधेऽपि पञ्चसंख्यायाः संख्यान्तरानवरुद्धत्वात् तयाऽवरोधः स्यादित्याशङ्क्य विशेषणविशेष्ययोरेव योगो न विशेषणयोरन्योपसर्जनत्वादित्युक्तमित्यर्थः। नानाभावादिना सिद्धमुपसंहरति—**तस्मादिति।** नोपसर्जनन्यायमवतारयति—**भवदिति।** इष्टापत्तिमाशङ्क्याह—**तत्रेति।**

पञ्चपञ्चजनशब्दो न पञ्चविंशतितत्त्ववाचीत्यत्र सूत्रावयवं हेत्वन्तरमाह—**अतिरेकाच्चेति।** तदेव स्फोरयति—**अतिरेको हीति।** तत्रात्मकृतसंख्यातिरेकं विवृणोति—**आत्मेति।** इहेति मन्त्रोक्तिः। यच्छब्दस्य सर्वनामत्वेन साधारण्यात् कथं तस्मादात्मधीरित्याशङ्क्याह—**यस्मिन्निति।** आधारत्वेनात्मनिर्देशेऽपि तस्य तत्त्वान्तर्भावान्नातिरेकः स्यादित्याशङ्क्याह—**आत्मा चेति।** आधारानन्तर्भावे दोषमाह—**अर्थान्तरेति।** आत्मनेवाकाशेनापि संख्यातिरेकं दर्शयति—**तथेति।** स हि तत्त्वेष्वन्तर्भूतो न वेति विकल्प्याद्ये दोषमाह—**आकाशश्चेति।** द्वितीयं प्रत्याह—**अर्थान्तरेति।** न च सत्त्वरजस्तमांसि प्रधानेनैकीकृत्यात्माकाशौ पृथगुक्तौ, तत्र पञ्च पञ्चजना इति पञ्चविंशतितत्त्वानां पृथगुक्तेरपसिद्धान्तात्। गुणानां मिथोभेद आधारत्वेनात्मनिष्कर्षेऽपि नभसो

कथं च संख्यामात्रश्रवणे सत्यश्रुतानां पञ्चविंशतितत्त्वानामुपसंग्रहः प्रतीयेत। जनशब्दस्य तत्त्वेष्वरूढत्वात्। अर्थान्तरोपसंग्रहेऽपि संख्योपपत्तेः। कथं तर्हि पञ्च पञ्चजना इति। उच्यते– 'दिक्संख्ये संज्ञायाम्' (पा.सू. २।१।५०) इति विशेषस्मरणात् संज्ञायामेव पञ्चशब्दस्य जनशब्देन समासः। ततश्च रूढत्वाभिप्रायेणैव केचित् पञ्चजना नाम विवक्ष्यन्ते, न सांख्यतत्त्वाभिप्रायेण। ते कतीत्यस्यामाकाङ्क्षायां पुनः पञ्चेति प्रयुज्यते। पञ्चजना नाम ये केचित्, ते च पञ्चैवेत्यर्थः। सप्तर्षयः सप्तेति यथा।।११।।

के पुनस्ते पञ्चजना नामेति, तदुच्यते–

प्राणादयो वाक्यशेषात्।।१२।।

'यस्मिन् पञ्च पञ्चजनाः' इत्यत उत्तरस्मिन् मन्त्रे ब्रह्मस्वरूपनिरूपणाय प्राणादयः पञ्च निर्दिष्टाः– 'प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः' (बृ.उ.मा. ४।२।२१) इति।

प्रकटार्थविवरणम्

वा पञ्चविंशतिसंख्याप्रतीतिः, तावता सांख्याभिमतानां ग्रहणं कुत इत्याह— **कथं चेति**। अथ जनशब्दात् प्रतीयते, तत्राह— **जनशब्दस्येति**। अथ संख्यायाः संख्येयाकाङ्क्षायां तान्येव संबध्यन्ते, तत्राह— **अर्थान्तरोपसङ्ग्रहेऽपीति**। किं तर्हि पञ्चजनशब्दस्यार्थान्तरमित्याह— **कथं तर्हीति**। कर्मधारयाद्यनेकविधसमाससंभवेऽपि संज्ञासमासं बलवत्तरमाप्तवचनादुपादायाह— **उच्यत इत्यादिना**। दिग्वाचिनः संख्यावाचिनश्च शब्दाः संज्ञायां गम्यमानायामुत्तरपदेन समस्यन्ते, स तत्पुरुषसंज्ञकः समासो भवतीति सूत्रार्थः।

संज्ञिनिर्देशार्थं सूत्रमवतारयति— **के पुनस्त इति। प्राणादयो वाक्यशेषात्।** ननु यदि वाक्यशेषगताः पञ्च प्राणादयो गृह्यन्ते,

भाष्यभावप्रकाशिका

विवक्ष्यन्ते, तदाऽऽधारत्वेनात्मनो निष्कर्षेऽप्याकाशस्याधेयान्तरेभ्यः पृथग् वचनमनर्थकमिति भावः। कथं तत्त्वानामश्रुतत्वम्? जनशब्दस्य तद्वाचकत्वादित्याशङ्क्याह—**जनशब्दस्येति**। संख्याऽनुपपद्यमाना संख्येयं कल्पयतीत्यर्थापत्त्या सिद्धिरित्याशङ्क्याह— **अर्थान्तरोपसंग्रह इति**। वाक्यस्य वैयर्थ्यमाशङ्कते—**कथं तर्हीति**। साक्षात्परिहारमाह—**दिक्संख्ये इति**। दिग्वाचिनः संख्यावाचिनश्च शब्दाः संज्ञायां विषये सुबन्तेन समस्यन्त इत्यर्थः। ततः किं फलमिति? तदाह—**ततश्चेति**। एवं सति पञ्चजनशब्दोऽवयवार्थयोगानपेक्षत्वादेकस्मिन्नपि वर्तते; एकस्मिन्नपि वसिष्ठे सप्तर्षिशब्दवदिति भावः।।११।।

प्राणादयो वाक्यशेषात्।।१२।। कया तर्हि वृत्त्या जनशब्देन ते वक्ष्यन्त इति? लक्षणयेत्याह—**जनसम्बन्धाच्चेति**।

न्यायनिर्णयः

नाधेयान्तरेभ्यो युक्ता पृथगुक्तिरिति भावः। किंच पञ्चविंशतिसंख्यादृष्टावपि न सांख्यीयतत्त्वधीः, संख्येयमात्रेण संख्याया युक्तत्वादित्याह—**कथं चेति**। कथं तत्त्वानामश्रुतत्वं जनशब्देन श्रुतत्वात्, तत्राह—**जनेति**। संख्यैव संख्येयं कल्पयन्ती सांख्यीयतत्त्वानि विषयीकरिष्यतीत्यर्थोपपत्तिमाशङ्क्याह—**अर्थान्तरेति**। किं तर्हि तदर्थान्तरं, येन वाक्यस्योपपत्तिरिति पृच्छति—**कथमिति**। कर्मधारयाद्यनेकयोगेऽपि संज्ञासमासं बलवत्तरमाप्तोक्तेरुपेत्यात्र परेष्टसंख्याधीरेव नेति परिहरति—**उच्यत इति**। दिग्वाचिनः संख्यावाचिनश्च शब्दाः संज्ञायां विषये सुबन्तेन समस्यन्ते, दक्षिणाग्निः सप्तर्षय इति दर्शनात्, स तु समासस्तत्पुरुषसंज्ञ इति स्मृतेरित्यर्थः। संज्ञात्वेऽपि पाचकशब्दवदवयववृत्त्या पञ्चजनशब्दस्य बोधकत्वमाशङ्क्योक्तम्—**ततश्चेति**। सति संज्ञात्वे पञ्चजनशब्दोऽवयवार्थयोगानपेक्षत्वादेकस्मिन्नपि वसिष्ठे सप्तर्षिशब्दवदेकत्रापि भवतीति भावः। प्राथमिकपञ्चशब्दस्यान्वयमाकाङ्क्षया दर्शयति—**त इति**। वाक्यार्थं सदृष्टान्तं स्पष्टयति—**पञ्चेति**।।११।।

स्वरूपविशेषासिद्धौ श्रुतेरप्रामाण्यात् तद्विशेषसाधकस्य चादृष्टेस्तत्प्रामाण्ये संदिहानः शङ्कते—**के पुनरिति**। सूत्रेणोत्तरमाह—**तदिति**। तद् व्याकुर्वन्निर्णायकमाह—**यस्मिन्निति**। अप्यर्थे श्रुतावुतशब्दः। येऽपि प्राणादीनां प्राणनादिसाधकमात्मानं विदुस्ते ब्रह्म

तेऽत्र वाक्यशेषगताः संनिधानात् पञ्चजना विवक्ष्यन्ते। कथं पुनः प्राणादिषु जनशब्दप्रयोगः? तत्त्वेषु वा कथं जनशब्दप्रयोगः? समाने तु प्रसिद्ध्यतिक्रमे वाक्यशेषवशात् प्राणादय एव ग्रहीतव्या भवन्ति। जनसंबन्धाच्च प्राणादयो जनशब्दभाजो भवन्ति। जनवचनश्च पुरुषशब्दः प्राणेषु प्रयुक्तः- 'ते वा एते पञ्च ब्रह्मपुरुषाः' (छा.उ.३।१३।६) इत्यत्र। 'प्राणो ह पिता प्राणो ह माता' (छा.उ.७।१५।१) इत्यादि च ब्राह्मणम्। समासबलाच्च समुदायस्य रूढत्वमविरुद्धम्। कथं पुनरसति प्रथमप्रयोगे रूढिः शक्याऽऽश्रयितुम्? शक्योद्भिदादिवदित्याह। प्रसिद्धार्थसंनिधाने ह्यप्रसिद्धार्थः शब्दः प्रयुज्यमानः समभिव्याहारात् तद्विषयो

प्रकटार्थविवरणम्

तर्हि पञ्च च ते जनाश्चेति कर्मधारयोऽप्यविरुद्ध इति मत्वा जनशब्दप्रवृत्तिं पृच्छति— **कथं पुनः प्राणादिष्विति**। प्रतिबन्दिग्रहणेन कश्चित् परिहरति— **तत्त्वेषु वा कथमिति**। यदि प्रसिद्ध्यतिक्रमेण तत्त्वेषु जनशब्दः परेणाभ्युपगम्यते, तत्राह— **समाने त्विति**। जनशब्दस्य प्राणादिषु प्रवृत्तौ कारणान्तरमाह— **जनसंबन्धाच्चेति**। एवमेकदेशिनः परिहारमुक्त्वा रहस्यमाह— **समासबलाच्चेति**। अश्वकर्णादिवत् पञ्चजना इति समुदायस्यैव रूढत्वम्, नैकैकस्यावयवार्थो मृग्यत इति भावः। वृद्धव्यवहारे प्रयोगाभावे न रूढिरित्याह— **कथं पुनरिति**। लौकिकप्रयोगाभावेऽपि रूढिर्दृष्टेत्याह— **शक्योद्भिदादिवदिति**। वस्तुसङ्ग्रहवाक्यं विवृणोति— **प्रसिद्धार्थेति**। उद्भिदेति तृतीया; सा करणे प्रसिद्धा; करणं च यागः; अतो यजत्यर्थसामानाधिकरण्यादुद्भिदेति यागनामधेयं निर्णीतम्। तदुक्तम्— "पदमज्ञातसंबन्धं प्रसिद्धैरपृथक्श्रुति। निर्णीयते निरूढं तु न स्वार्थादपनीयते"।।इति। तथा "यूपं छिनत्ति" इति प्रसिद्धविषयकर्मसमभिव्याहारात् छेदनादिसंस्कार्ययूपपदार्थावगतिः। तथा "वेदिं करोति" इति करोत्यर्थसमभिव्याहारात्

भाष्यभावप्रकाशिका

जनपर्यायस्य पुरुषशब्दस्य प्राणेषु प्रयुक्तपूर्वत्वात् तदात्मकत्वाच्च तेषां जनशब्दवाच्यत्वं युक्तमित्याह—**जनवचनश्चेति**। प्राणस्य सर्वात्मकत्वादपि युक्तमेतदित्याह—**प्राणो ह पितेति**। जनशब्दमात्रस्य प्रयोगमङ्गीकृत्य परिहार उक्तः, इदानीं तु जनशब्दमात्रस्यैव प्रयोगो न भवति, किन्तु पञ्चजनशब्दस्य, स तत्र रूढ एवेत्याह—**समासबलादिति**। अथवा (अ)सत्यामवयवप्रसिद्धौ समुदायशक्तिकल्पनमयुक्तम्, संभवति पञ्चविंशतितत्त्वेष्ववयवप्रसिद्धिरिति, अत आह—**समासबलादिति**। अश्वकर्णादिवल्लोक-प्रसिद्ध्यभावान्न रूढिरित्याक्षिपति—**कथं पुनरिति**। जनेषु पञ्चजनशब्दस्य प्रयोगो लोके दृष्ट इति प्रथमप्रयोगाभावोऽसिद्धः; तथापि प्रथमप्रयोगाभावमभ्युपेत्य समाधत्ते—**शक्योद्भिदादिवदिति**। उद्भिच्छब्दो यागविशेषवचनः; यजेतेति पदसमभिव्याहारात्। उद्भेदनं प्रकाशनं पशूनामनेन क्रियत इत्युद्भिदिति व्युत्पत्तेः, उद्भिदेति तृतीयानिर्देशात् करणस्य यागस्य प्रयोगः। तथा "यूपं छिनत्ती"ति प्रसिद्धविषयक्रियासमभिव्याहारात् यूपपदार्थावगतिः। "वेदिं करोती" ति करोत्यर्थसमभिव्याहाराद् वेदिपदार्थावगतिरित्यर्थः।

न्यायनिर्णयः

निश्चितवन्त इति योजना। पञ्चजनशब्दो लोके प्राणादिष्वगृहीतसंगतिस्तान् कथमाचक्षीतेति शङ्कते—**कथमिति**। यथा सत्येत्युक्ते सत्यभामा गम्यते तथा जनशब्दो भाष्ये पञ्चजनविषयः। किं पञ्चजनशब्दस्य सांख्यीयतत्त्वविषयत्वं, प्राणाद्यविषयत्वं वा। नाद्यः, तेष्वपि शक्त्यग्रहणसाम्यादित्याह—**तत्त्वेष्विति**। द्वितीयं प्रत्याह—**समाने त्विति**। कया तर्हि वृत्त्या पञ्चजनशब्देन प्राणादिधीः, लक्षणयेत्याह—**जनेति**। किंच पञ्चजनपर्यायस्य पुरुषशब्दस्य प्राणेषु प्रयुक्तपूर्वत्वाद् युक्ता तेषां पञ्चजनशब्दतेत्याह—**जनेति**। (किंच) पञ्चजनपर्यायस्य पुरुषशब्दस्य प्राणे प्रयुक्तत्वं व्यनक्ति—**ते वा इति**। ते खल्वेते हृदयच्छिद्रेषु पूर्वदक्षिणपश्चिमोत्तरोर्ध्वेषु पञ्चसु पञ्च प्राणादयो ब्रह्मणो हार्दस्य पुरुषस्य द्वारपाला इत्यत्र प्राणादिषु पुरुषशब्दोऽस्तीत्यर्थः। प्राणस्य सर्वात्मत्वादपि तदात्मकानां तेषां युक्ता पञ्चजनशब्दतेत्याह—**प्राणो हेति**। अवयवप्रसिद्धिसंभवे समुदायप्रसिद्धिरयुक्ता। संभवति पञ्चविंशत्यां तत्त्वेष्ववयवप्रसिद्धिः, पञ्च च ते जनाश्चेति व्युत्पत्तेः। तत्त्वानां च जायमानाजायमानानां छत्रिन्यायेन जनशब्दितानां पञ्चसंख्यावतां पञ्चसंख्यावत्त्वे पञ्चविंशतित्वसिद्धिरित्याशङ्क्याह—**समासेति**। रूढिमाक्षिपति—**कथमिति**। जनशब्दितमनुष्येषु पञ्चजनशब्दस्य दृष्टत्वात् प्रथमप्रयोगाभावासिद्धावपि तदभावमुपेत्य दृष्टान्तमाह—**शक्येति**। संग्रहवाक्यं विवृणोति—**प्रसिद्धेति**। तत्रोद्भिदधिकरणमुदाहरति—

नियम्यते, यथा 'उद्भिदा यजेत' 'यूपं छिनत्ति' 'वेदिं करोति' इति। तथाऽयमपि पञ्चजनशब्दः समासान्वाख्यानादवगतसंज्ञाभावः संज्याकाङ्क्षी वाक्यशेषसमभिव्याहृतेषु प्राणादिषु वर्तिष्यते।

कैश्चित्तु देवाः पितरो गन्धर्वा असुरा रक्षांसि च पञ्च पञ्चजना व्याख्याताः। अन्यैश्च चत्वारो वर्णा निषादपञ्चमाः परिगृहीताः। क्वचिच्च 'यत्पाञ्चजन्यया विशा' (ऋ.सं.८।५३।७) इति प्रजापरः प्रयोगः पञ्चजनशब्दस्य दृश्यते। तत्परिग्रहेऽपीह न कश्चिद्विरोधः। आचार्यस्तु न पञ्चविंशतेस्तत्त्वानामिह प्रतीतिरस्तीत्येवंपरतया 'प्राणादयो वाक्यशेषात्' इति जगाद।।१२।।

भवेयुस्तावत् प्राणादयः पञ्चजना माध्यंदिनानां येऽन्नं प्राणादिष्वामनन्ति। काण्वानां तु कथं प्राणादयः पञ्चजना भवेयुर्येऽन्नं प्राणादिषु नामनन्तीति। अत उत्तरं पठति–

[1]ज्योतिषैकेषामसत्यन्ने।।१३।।

प्रकटार्थविवरणम्

क्रियमाणवेदिपदार्थावगतिरित्यर्थः। वृत्त्यन्तरकारमतेऽपि सांख्याभिमतानि तत्त्वानि न सिध्यन्तीत्याह— **कैश्चित्त्विति।** ब्राह्मणाच्छूद्रायां जातो निषादः। **पाञ्चजन्ययेति।** प्रजया विशा पुरुषरूपया यदिन्द्राह्वाननिमित्तं घोषाः सृष्टा इत्यत्र प्रजापरः प्रयोगो दृश्यते, अतोऽत्र पञ्च प्रजा ग्राह्या इत्यर्थः। नन्वाचार्यवचनमेवं विरुध्यत इत्याशङ्क्याह— **आचार्यस्त्विति।** न व्याख्यान्तराभावाभिप्रायेणेत्यर्थः।

भाष्यभावप्रकाशिका

आचार्यदेशीयानां मतान्याह—**कैश्चिदिति।** परमार्थतस्तु पञ्चजना वाक्यशेषगता एवेत्याशयः।।१२।।

ज्योतिषैकेषामसत्यन्ने।।१३।। सूत्रान्तरमवतारयितुं काण्व-माध्यन्दिनवाक्ययोः परस्परविरोधमाशङ्कते—**भवेयुरिति।** ननु

न्यायनिर्णयः

यथेति। 'उद्भिदा यजेत पशुकामः' इत्यत्रोद्भित्पदं विधेयगुणार्पकं वा कर्मनाम वेति संशये, खनित्रादावुद्भिच्छब्दस्य प्रसिद्धेः, नामत्वे च यजतितुल्यार्थत्वेनानर्थक्यात् ज्योतिष्टोमे गुणविधिरिति प्राप्ते, यजेतेति यागेन भावयेदित्यर्थकल्पनात्, उद्भिदेतिं करणार्थपदस्य तत्सामानाधिकरण्यात् तदेकार्थत्वात्, उद्भिद्वतेति कल्पने मत्वर्थलक्षणापातात्, उद्भिदा यागं भावयेद् यागेन पशुमिति वैयधिकरण्ये च यागस्य फलं प्रति साधनत्वं गुणं प्रति साध्यत्वमिति वैरूप्यात्, विध्यावृत्त्या वाक्यभेदाच्च, उद्भिनत्ति साधयति पशुमिति यागेऽपि प्रसिद्धियोगात्, अत्र नामत्वसिद्धौ चान्यत्र 'समे दर्शपूर्णमासाभ्यां यजेत' इत्यादौ नामवद्यागानुवादेन गुणफलविधिसंभवात्, ज्योतिष्टोमे वा ऽप्रकृते गुणविध्ययोगात्, कर्मनामैव संनिहितयज्ञ्यनुराधादुद्भित्पदमिति राद्धान्तितमित्यर्थः। संग्रहवाक्यस्थादिशब्दोपात्तमुदाहरणद्वयमाह—**यूपमिति।** छिनत्तीतिप्रसिद्धार्थपदसमभिव्याहाराद् यूपपदस्य तदर्थश्छेदनयोग्यो दारुविशेषो गम्यते। वेदिं करोतीति च करोतिसमभिव्याहाराद् वेद्यर्थः संस्कारयोग्यः स्थण्डिलविशेषः सिद्ध इत्यर्थः। दृष्टान्तद्वयार्थं दार्ष्टान्तिके योजयति—**तथेति।**

आचार्यदेशीयानां मतद्वयमाह—**कैश्चिदित्यादिना।** शूद्रायां ब्राह्मणाज्जातो निषादः। श्रुत्यन्तरानुसारेण संभावितं पक्षान्तरमाह—**क्वचिच्चेति।** पाञ्चजन्यया प्रजया विशतीति विशा पुरुषरूपया यदिन्द्राह्वाननिमित्तं घोषा असृक्षत सृष्टास्तद्युक्तं घोषातिरेकेण तदाह्वानायोगादित्यत्र प्रजापरः प्रयोगो दृष्टः। ततोऽत्र पञ्चसंख्याया उपलक्षणत्वात् पञ्चजनशब्देन सर्वप्रजाग्रहणमित्यर्थः। उक्तपक्षान्यतमग्रहेऽपि सांख्यनिरासयोगात् प्रधानस्याशब्दत्वसिद्धेरस्माकं न विशेषपक्षपातोऽस्तीत्याह—**तदिति।** आचार्यवचनं विरुध्यते तस्य प्राणादिविषयत्वादित्याशङ्क्य व्याख्यान्तराभावधिया तत्र प्रवृत्तमित्याह—**आचार्यस्त्विति।।१२।।**

सूत्रान्तरमवतारयितुं श्रुत्योर्मिथो विरोधं चोदयति—**भवेयुरिति।** सूत्रमुत्तरत्वेनावतारयति—**अत इति।** तद् व्याकरोति—

१. ज्योतिषेत्येकवचनं तु 'तद् देवा ज्योतिषां ज्योतिः' इत्यत्र निर्दिष्टानां ज्योतिषां ज्योतिष्ट्वेनैकीकृत्य ग्रहणं सूचयितुम्। अतो न संख्याधिक्यम्। 'ज्योतिः' इति प्रथमैकवचननिर्दिष्टं तु न ग्रहणमर्हति, तस्य ब्रह्मत्वात्।

'असत्यपि काण्वानामन्ने ज्योतिषा तेषां पञ्चसंख्या पूर्यते। तेऽपि हि 'यस्मिन्पञ्च पञ्चजनाः' इत्यतः पूर्वस्मिन् मन्त्रे ब्रह्मस्वरूपनिरूपणायैव ज्योतिरधीयते— 'तद्देवा ज्योतिषां ज्योतिः' (बृ.उ४।४।१६) इति। कथं पुनरुभयेषामपि तुल्यवदिदं ज्योतिः पठ्यमानं समानमन्त्रगतया पञ्चसंख्यया केषांचिद् गृह्यते, केषांचिन्नेति। अपेक्षाभेदादित्याह। माध्यंदिनानां हि समानमन्त्रपठितप्राणादिपञ्चजनलाभान्नास्मिन् मन्त्रान्तरपठिते ज्योतिष्यपेक्षा भवति। तदलाभात्तु काण्वानां भवत्यपेक्षा। अपेक्षाभेदाच्च समानेऽपि मन्त्रे ज्योतिषो ग्रहणाग्रहणे। यथा समानेऽप्यतिरात्रे वचनभेदात् षोडशिनो ग्रहणाग्रहणे, तद्वत्। तदेवं न तावच्छ्रुतिप्रसिद्धिः काचित् प्रधानविषयाऽस्ति। स्मृतिन्यायप्रसिद्धी तु परिहरिष्येते।।१३।।

।।इति तृतीयं संख्योपसंग्रहाधिकरणम्।।

प्रकटार्थविवरणम्

उत्तरसूत्रस्य[2] शङ्कामाह— **भवेयुस्तावदिति। ज्योतिषैकेषामसत्यन्ने।** एकत्रैव ज्योतिषो ग्रहणाग्रहणे विरुद्धे इत्याह— **कथं पुनरिति।** सिद्धान्त्यविरोधमाह— **अपेक्षाभेदादिति।** [3]एकस्मिन्नेव मन्त्रे पठितानां प्राणादीनां पञ्चतयस्य पञ्चसंख्याया लाभादित्यर्थः। "अतिरात्रे षोडशिनं गृह्णाति" नातिरात्रे षोडशिनं गृह्णाति" इति वचनभेदादेकस्मिन्नप्यतिरात्रेऽङ्गिनि षोडशिग्रहणमग्रहणं चाङ्गमुपपद्यते शास्त्रभेदेनोभयवचनप्रामाण्यादित्यर्थः। उपसंहरति प्रधानस्याशाब्दत्वप्रपञ्चम्— **तदेवमिति।** तथापि स्मृतिन्यायप्रसिद्धिभ्यां प्रधानमेव जगत्कारणं भविष्यतीत्याशङ्क्याह— **स्मृतिन्यायेति।**

।।इति तृतीयं संख्योपसंग्रहाधिकरणम्।।

भाष्यभावप्रकाशिका

केषाञ्चिज्ज्योतिः पञ्चसंख्यापूरकम्, अन्येषां न, इति कथं वस्तुनि विकल्प इति शङ्कते—**कथं पुनरिति।** ग्राहकसामर्थ्यभेदादिति परिहरति—**अपेक्षेति। यथा समानेऽपीति।** विरोधेऽपि तुल्यबलत्वाज्ज्योतिर्विहाय वाक्यशेषगतानामेव ग्रहणं न विरुध्यते; क्रियायामिव वस्तुस्वरूपकथायां प्रतिपत्तिक्रियाविकल्पोपपत्तेरिति भावः।।१३।। इति तृतीयं नसङ्ख्योपसंग्रहाधिकरणम्।

न्यायनिर्णयः

असत्यपीति। ज्योतिरपि पञ्चसंख्यापूरकमात्मातिरिक्तं काण्वश्रुतावश्रुतमित्याशङ्क्याह—**तेऽपीति।** [4]यत्पूर्वकालापरिच्छेद्यमुक्तं तज्ज्योतिषामादित्यादीनां भासकममृतत्वेनायुष्ट्वेन जीवनगुणवत्तयोपासते देवाः, तेनायुष्मन्तस्ते जाता इत्याह—**तदिति।** अस्मिन् मन्त्रे षष्ठ्यन्तज्योतिषा पञ्चसंख्यापूरणं, न त्वात्मज्योतिषा, तस्यैकस्याधाराधेयत्वायोगात्। केषांचित् पञ्चसंख्यापूरकं ज्योतिरन्येषां नेति न विकल्पो वस्तुनीति शङ्कते—**कथमिति।** ग्राहकसामर्थ्यभेदादविरोधमाह—**अपेक्षेति।** तदेव स्फुटयति—**माध्यंदिनानामिति।** तथापि कथमेकस्यैव ज्योतिषस्तुल्ये मन्त्रे ग्रहाग्रहौ, न हि वस्तुनि विकल्पोऽस्ति, तत्राह—**अपेक्षेति।** उक्तं दृष्टान्तेन स्पष्टयति—**यथेति।** विरोधेऽपि तुल्यबलत्वाज्ज्योतिर्विहाय वाक्यशेषस्थानामेव प्राणादीनां सान्नानां क्वचिद् ग्रहणम् अन्यत्र सज्योतिषां तेषामेव ग्रहणं क्रियायामिव वस्तुन्यपि दृष्टिक्रियायां विकल्पसिद्धेरिति मत्वाऽऽह—**तद्वदिति।** पञ्चजनमन्त्रात् प्रधानस्य श्रुतिमत्त्वाभावेऽपि प्रकारान्तरेण तस्य तद्वत्त्वमाशङ्क्य तद्विषयत्वेन संभावितश्रुतीनामन्यविषयत्वेन नीतत्वान्नैवमित्याह—**तदेवमिति।** तथापि न ब्रह्मणि समन्वयः प्रधानार्थस्मृतिन्यायविरोधादित्याशङ्क्य भाविनं समाधिं सूचयति—**स्मृतीति।**।।१३।।

।।इति तृतीयं संख्योपसंग्रहाधिकरणम्।।

---

१. काण्वानामपि माध्यन्दिनशाखातः अन्नस्य उपसंहारसंभवात् कृत्वाचिन्तयाऽयं परिहारः। एतत्सूचनाय च सूत्रे 'असत्यन्ने' इत्युक्तम्। तेन हि यदि शाखान्तरतोऽन्नोपसंहारो न स्यात् तदानीं ज्योतिषा संख्यापूरणमिति गम्यते। अन्यथा 'अन्नाभावात्' इत्येवासूत्रयिष्यत्। इदं च भाष्ये 'असत्यपि' इति 'अपि' शब्देन सूचितम्। द्र. ब्र. वि. ५१६, न्या. र. म. ३७७। कृत्वाचिन्ता चेयं न्यायव्युत्पादनार्था। एकस्मादन्यार्थप्रवृत्तात् संनिहितवाक्यात् आकाङ्क्षितस्य सर्वस्यालाभे तथाभूतादनेकस्मादपि कुतश्चित् किञ्चिदित्यनेन प्रकारेण तद् ग्राह्यमिति न्यायः। द्र. न्या. र. म. ३७७ २. 'उत्तरसूत्रनिरस्य' इति पाठः स्यात्। ३. इदं 'समानमन्त्र' इत्यादिभाष्यव्याख्यानं शोधनीयम्। ४. 'यत् पूर्वार्धे काला—' इति पाठः कल्पतरौ दृश्यते।

४।।कारणत्वाधिकरणम्।। सू. १४-१५।।

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः।।१४।।

प्रतिपादितं ब्रह्मणो लक्षणम्। प्रतिपादितं च ब्रह्मविषयं गतिसामान्यं वेदान्तवाक्यानाम्। प्रतिपादितं च प्रधानस्याशब्दत्वम्। तत्रेदमपरमाशङ्क्यते- न जन्मादिकारणत्वं ब्रह्मणो, ब्रह्मविषयं वा गतिसामान्यं वेदान्तवाक्यानां प्रतिपत्तुं शक्यम्। कस्मात्? विगानदर्शनात्। प्रतिवेदान्तं ह्यन्याऽन्या सृष्टिरुपलभ्यते

शारीरकन्यायसंग्रहः

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः।।१४।।समाकर्षात्।।१५।। बहूनां शब्दानामेकविषयाणां परस्पर-विरोधेनार्थनिर्णयासामर्थ्ये सति प्रमाणान्तरानुसारेण सर्वशब्दलक्षणापरिग्रहाद्वरं स्वान्तर्वर्तिबहुशब्दानुसारेण कतिपयशब्दलक्षणा, लाघवात् इति न्यायेन प्रमाणान्तरसिद्धप्रधानपरतायां सर्वशब्दलक्षणां बाधित्वा असदव्याकृतादिशब्दानां चेतनकारणवाचिबहु-शब्दानुसारेण लक्षणया ब्रह्मपरत्वमिति तदेव जगत्कारणमुक्तम्।

प्रकटार्थविवरणम्

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः। एवं तावत् प्रधानस्याशाब्दत्वं प्रपञ्च्य पुनर्गतिसामान्यमेवाशङ्क्य प्रपञ्च्यत इति व्यवहितसङ्गतिं वदिष्यन् वृत्तं सङ्कीर्तयति— **प्रतिपादितमिति।** 'एकरूपादिप्रवृत्तिदर्शनादित्याह— **विगानदर्शनादिति।**

भाष्यभावप्रकाशिका

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः।।१४।। कारणत्वेनेति। वृत्तं कीर्तयत्यधिकरणतात्पर्यं दर्शयितुम्— **प्रतिपादितमिति।**इदानीं सृष्टिवाक्यानां परस्परविरोधाशङ्कानिरासायाधिकरणारम्भं दर्शयति—**तत्रेदमिति।** ननु [ब्रह्मणः] गतिसामान्यात् कारणत्वमुक्तमिति, अत आह—**ब्रह्मविषयं वेति।** ननु विरोधपरिहारपरमिदमधिकरणमविरोधाध्यायसङ्गतम्, न समन्वयाध्यायसङ्गतमिति

न्यायनिर्णयः

पूर्वाधिकरणत्रयेण प्रधाननिराकरणेन वेदान्तानां ब्रह्मकारणत्वं प्रत्यविगीतत्वमुक्तम्। इदानीं कारणविषयाणां तेषां मिथोव्याहतार्थत्वेन स्वतोऽनिश्चायकत्वान्मानान्तरसिद्धप्रधानलक्षकत्वे गतिसामान्यासिद्धिरित्याशङ्क्याह—**कारणत्वेन चेति।** अधिकरणतात्पर्यं वक्तुं जन्मादिसूत्रे वृत्तं कीर्तयति—**प्रतिपादितमिति।** शास्त्रयोनित्वाधिकरणमारभ्यानुमानिकसूत्रात्प्राक्तनाधिकरणानां तात्पर्यमनुवदति—**प्रतिपादितमिति।** अधिकरणत्रयार्थमनुवदति—**प्रतिपादितं चेति।** सम्प्रति कारणे ब्रह्मण्यन्वयपर्यवसानाय कारणविषयवाक्यानामविरोधार्थमधिकरणमारभमाणो जगत्कारणवादिवाक्यानि ब्रह्मणि मानं न वेति विप्रतिपत्तेर्विशये पूर्वत्रात्रज्योतिषो- र्विकल्पेन निर्देशादविरोधे सिद्धेऽपि प्रकृते सिद्धे कारणे विकल्पायोगाद्विरोधे सत्यप्रामाण्यमिति पूर्वपक्षमाह—**तत्रेति।** कारणत्वं ब्रह्मणो गतिसामान्यादुक्तमित्याशङ्क्याह—**ब्रह्मेति।** न चाविरोधार्थमधिकरणं नेह संगतमिति वाच्यं, समन्वयतो वाक्यार्थज्ञाने मानान्तरविरोधाशङ्कानिरासस्याविरोधाध्यायार्थत्वात्। इह च कारणविषयवाक्यानामेव मिथो विरोधान्न समन्वयो ब्रह्मणीत्याशङ्क्य तन्निरासेनैव[2] समन्वयस्यैव साध्यत्वादध्यायसंगतिसिद्धेः। कार्यश्रुतिविरोधस्यापीह परिहर्तुं शक्यत्वेऽपि वेदान्तानां न कार्ये तात्पर्यमिति ज्ञापयितुं नात्र परिह्रियते। कार्यस्यापि प्रतिपाद्यत्वमुपेत्योत्तरत्र तदीयश्रुतिविरोधः परिहरिष्यते। एतेन श्रुतिशास्त्रसंगती सिद्धे। क्वाचित्कासत्पदस्य कर्मकर्तृप्रयोगस्य चासद्वादपरत्वं स्वभाववादपरत्वं च व्युदस्य गतिसामान्यस्थापनात् पादसंगतिः। पूर्वपक्षे कार्यद्वारा स्वतश्चकारणे विप्रतिपत्त्या तल्लक्षिते परस्मिन्नपि तदापत्तेर्न कारणे तुरीये च समन्वयधीरिति गतिसामान्यासिद्धिः। सिद्धान्ते ब्रह्मणि कारणत्वस्य कल्पितत्वात् तत्र वस्तुतोऽविवादात् तल्लक्षिते सत्यज्ञानादिलक्षणे तस्मिन्नन्वयसिद्धेर्गतिसामान्य-सिद्धिः। प्रतिपादितस्यासिद्धिरयुक्तेति शङ्कते—**कस्मादिति।** कार्ये कारणे च विप्रतिपत्तिदर्शनादुक्तस्यापि भवत्यसिद्धिरित्याह— **विगानेति।** कार्यविषयं विगानं तावद् दर्शयति—**प्रतीति।** क्रमादीत्यादिशब्दादक्रमो गृह्यते। क्रमवैचित्र्यकृतं

१. अत्राशुद्धिर्भाति। २. एवकारं विनाऽत्र पाठः स्यात्।

क्रमादिवैचित्र्यात्। तथाहि– क्वचित् 'आत्मन आकाशः संभूतः' (तै.उ.२।१) इत्याकाशादिका सृष्टिराम्नायते। क्वचित् तेजआदिका– 'तत्तेजोऽसृजत' (छा.उ.६।२।३) इति। क्वचित् प्राणादिका– 'स प्राणमसृजत प्राणाच्छ्रद्धाम्' (प्र.उ.६।४) इति। क्वचिदक्रमेणैव लोकानामुत्पत्तिराम्नायते– 'स इमाँल्लोकानसृजत। अम्भो मरीचीर्मरमापः' (ऐ.उ.१।२) इति। तथा क्वचिदसत्पूर्विका सृष्टिः पठ्यते– 'असद्वा इदमग्र आसीत्। ततो वै सदजायत' (तै.उ.२।७) इति, 'असदेवेदमग्र आसीत् तत्सदासीत् तत्समभवत्' (छा.उ.३।१९।१) इति च। क्वचिदसद्वादनिराकरणेन सत्पूर्विका प्रक्रिया प्रतिज्ञायते– 'तद्धैक आहुरसदेवेदमग्र आसीत्' इत्युपक्रम्य 'कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेतेति सत्त्वेव सोम्येदमग्र आसीत्' (छा.उ.६।२।१,२) इति। क्वचित् स्वयंकर्तृकैव व्याक्रिया जगतो निगद्यते– 'तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यामेव व्याक्रियत' (बृ.उ.१।४।७) इति। एवमनेकधा विप्रतिपत्तेर्वस्तुनि च विकल्पस्यानुपपत्तेर्न वेदान्तवाक्यानां जगत्कारणावधारणपरता न्याय्या। स्मृतिन्यायप्रसिद्धिभ्यां तु कारणान्तरपरिग्रहो न्याय्य इति।

प्रकटार्थविवरणम्

भूरादिक्रमेण हि लोकाः प्रसिद्धाः। तद्वैपरीत्येनाह—**अक्रमेणैवेति**। अम्भ इत्यम्मयशरीरप्रधानः स्वर्लोकः; मरीचिरिति रश्मिप्रधानोऽन्तरिक्षलोकः मरमिति मरणप्रचुरोऽयं लोकः; आप इत्यब्बहुलः पाताललोक इत्यर्थः। न केवलं सृष्टिरेवान्यथा प्रकाशते; स्रष्टर्यपि विगानं दृश्यत इत्याह—**तथा क्वचिदसत्पूर्विकेति**। तदसत् यदा कार्योन्मुखं तदा सदासीदुच्यते। तदेव कार्याकारेण व्यक्तं सत् समभवदित्युच्यते। फलितमाह—**एवमनेकधेति**। किं तर्हि न्याय्यमित्याशङ्क्याह—**स्मृतिन्यायेति**। सर्वे

भाष्यभावप्रकाशिका

चेत्, मैवम्; समन्वयतो वाक्यार्थावगमे परिसमाप्ते सति प्रमाणान्तरविरोधाशङ्कायां तन्निरासोऽविरोधाध्यायार्थः, इह तु वाक्यानामेव परस्परविरुद्धत्वान्न ब्रह्मणि समन्वय इत्याशङ्क्य विरोधनिरासेन समन्वय एव साध्यत इति युक्ता समन्वयाध्यायसङ्गतिः अधिकरणस्य। इदानीं कार्ये विनिगम[विगान]माह—**प्रतिवेदान्तमिति**। क्रमादीत्यादिग्रहणेनाक्रमो गृह्यते। इदानीं करण[कारणे] विप्रतिपत्तिमाह—**तथा क्वचिदसदिति**। केषाञ्चिच्छाखिनामसत्पूर्विका सृष्टिरभिमतेति द्योतयति तद्धैके शाखिन आहुरिति प्रतिपादयद्वाक्यमित्याह—**तद्धैक आहुरिति**। विप्रतिपत्त्यन्तरमाह—**क्वचित्स्वयमिति**। कस्तर्हि न्याय्य इत्याकाङ्क्षायां प्रमाणान्तरेण कारणे निश्चिते वेदान्तवाक्यानां तल्लक्षकत्वाभ्युपगम इत्याह—**स्मृतिन्यायेति**।

न्यायनिर्णयः

विगानमाह—**क्वचिदिति**। आदिशब्दार्थमक्रमं कथयति—**क्वचिदिति**। ईक्षिता परः सर्वनामार्थः। लोकान्विशिनष्टि—**अम्भ इति**। अम्मयशरीरप्रचुरः स्वर्गो लोकोऽम्भःशब्दार्थः। मरीचिरिति रश्मिप्रधानोऽन्तरिक्षलोकः। मर इति मरणप्रधानोऽयं लोकः। आप इत्यब्बहुलः पाताललोक इति विवेकः। कार्ये विप्रतिपत्तिवत् कारणेऽपि सा दृष्टेत्याह—**तथेति**। इदमसदिवाव्यक्तमग्रे प्रागवस्थायामिति यावत्। ततोऽनभिव्यक्तनामरूपात् कारणादभिव्यक्तनामरूपं जगज्जातम्। अनभिव्यक्तमेव हि व्यक्तं भवतीत्याह—**तत इति**। छान्दोग्यश्रुतिस्तैत्तिरीयश्रुत्या तुल्यार्थेत्याह—**असदिति**। तत्समभवत् तत्कारणं यदात्मनाऽऽसीत् तत् सदर्थक्रियोन्मुखं कार्यरूपेण च संवृत्तमित्यर्थः। तथापि कुतो विप्रतिपत्तिः, तत्राह—**क्वचिदिति**। प्रक्रिया सृष्टिः। तत् तत्र कारणे केचिदाहुः, तेषां मतं दूषयति—**कुतस्त्विति**। तदेव स्फुटयति—**कथमिति**। व्यतिरेकमुक्त्वाऽन्वयमाह—**सत्त्विति**। विप्रतिपत्त्यन्तरमाह—**क्वचिदिति**। तदिदं जगत् तर्हि प्रागवस्थायामव्याकृतकारणमासीत् तत्किल शब्दात्मनाऽर्थात्मना च व्याक्रियत व्यक्तमभवदित्यर्थः। विप्रतिपत्तीरुपसंहृत्य तत्फलमाह—**एवमिति**। वस्तुनीति कार्यकारणयोरुक्तिः। किं तर्हि न्याय्यम्? मानान्तरेण कारणे निश्चिते वेदान्तानां तल्लक्षकत्वमित्याह—**स्मृतीति**। स्मृतिः सांख्यस्मृतिः, न्यायो 'भेदानां परिमाणात्' इत्यादिः कारणान्तरं प्रधानम्।

एवं प्राप्ते ब्रूमः– सत्यपि प्रतिवेदान्तं सृज्यमानेष्वाकाशादिषु क्रमादिद्वारके विगाने न स्रष्टरि किंचिद् विगानमस्ति। कुतः? यथाव्यपदिष्टोक्तेः। यथाभूतो ह्येकस्मिन् वेदान्ते सर्वज्ञः सर्वेश्वरः सर्वात्मैकोऽद्वितीयः 'कारणत्वेन व्यपदिष्टस्तथाभूत एव वेदान्तान्तरेष्वपि व्यपदिश्यते। तद्यथा– 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २।१) इति। अत्र तावज्ज्ञानशब्देन परेण च तद्विषयेण कामयितृत्ववचनेन चेतनं ब्रह्म न्यरूपयत्। अपरप्रयोज्यत्वेनेश्वरं कारणमब्रवीत्। तद्विषयेणैव परेणात्मशब्देन शरीरादिकोशपरम्परया चान्तरनुप्रवेशनेन सर्वेषामन्तः प्रत्यगात्मानं निरधारयत्। 'बहु स्यां प्रजायेय' (तै.उ. २।६) इति चात्मविषयेण बहुभवनानुशंसनेन सृज्यमानानां विकाराणां स्रष्टुरभेदमभाषत। तथा 'इदं सर्वमसृजत, यदिदं किंच' (तै.उ. २।६) इति समस्तजगत्सृष्टिनिर्देशेन प्राक्सृष्टेरद्वितीयं स्रष्टारमाचष्ट[२]।

प्रकटार्थविवरणम्

जगत्कारणविषयाः शब्दाः विषयाः। ते किं कारणान्तरं समर्पयन्ति ब्रह्म वेति सन्देहे पूर्वाधिकरणे यथा कर्मधारयाद्यनेकविधसमासप्रतिभासेनानिर्णयप्रसङ्गे सत्याप्तवचनात् संज्ञासमासोऽङ्गीकृतः, तथा वेदान्तेभ्योऽनेककारणप्रतिभासेनानिर्णयप्रसङ्गे स्मृतिन्यायाभ्यां प्रधानपरिग्रहो न्याय्यः। सर्वे जगत्कारणविषयाः शब्दाः तत्रैव लक्षणविषया[लक्षणया] वर्तन्त इति गतिसामान्यमिति भावः।

स्रष्टरि विप्रतिपत्त्यभावात् तत्र तावद् वेदान्तानां गतिसामान्यं सिद्धमित्याह—**एवं प्राप्ते ब्रूम इत्यादिना**। तैत्तिरीयके तावत् उक्तलक्षणं कारणं निरूपयति—**तद्यथेत्यादिना। अपरप्रयोज्यत्वेनेति**। परेण प्रेर्यत्वाभावेन स्वतन्त्रस्यैव जगत्स्रष्टृतेत्यर्थः। एवं

भाष्यभावप्रकाशिका

कार्ये विप्रतिपत्तिं तावदङ्गीकृत्य कारणे विप्रतिपत्तिं निराकरोति—**सत्यपीति**। सौत्रं पदं हेतुत्वेनावतारयति—**यथाव्यपदिष्टेति**। तद् व्याचष्टे—**यथाभूत इति**। अधिकरणप्रतिपाद्यन्यायस्य परस्परविरुद्धार्थत्वादनिश्चायकानां सर्वशब्दानां प्रमाणान्तरसिद्धप्रधानलक्षणाश्रयणाद् वरं बहुशब्दानुसारेण कतिपयलक्षणाश्रयम्; लाघवादित्येवंलक्षणस्य सिद्ध्यर्थमनेकेषां शब्दानामविरोधं तावद्दर्शयति—**तद्यथा सत्यमिति। चेतनं ब्रह्मेति**। सर्वजगदुपादानस्य सृज्यमानाभिज्ञतया सर्वज्ञत्वमुक्तमित्यर्थः। सर्वेश्वरत्वमप्युक्तमित्याह—**अपरप्रयोज्यत्वेनेति**। सर्वात्मत्वमपि दर्शितमित्याह—**तद्विषयेणेति**। एकत्वमप्युक्तमित्याह—**बहु स्यामिति**। अद्वितीयत्वमपि प्रतिपादितमित्याह—**तथेदं सर्वमिति**। वेदान्तान्तरेष्वपि तथाभूतस्यैव व्यपदेशं दर्शयति—**तदत्रेति**।

न्यायनिर्णयः

कार्यद्वारा स्वतश्च कारणे विप्रतिपत्तेस्तल्लक्ष्येऽपि परत्र तद्भावाद् गतिसामान्यासिद्धिरिति पूर्वपक्षमनूद्य सिद्धान्तयति—**एवमिति**। कार्ये विप्रतिपत्तिमुपेत्य कारणे तां निराकुर्वन् प्रतिजानीते—**सत्यपीति**। स्रष्टरि यत्कारणत्वं तस्मिन्निति शेषः। तत्रापि विप्रतिपत्तिरुक्तेति शङ्कते—**कुत इति**। हेतुमुक्त्वा व्याचष्टे—**यथेति**। यथाभूतत्वं विशिनष्टि—**सर्वेत्यादिना**। सर्वकारणत्वोपयुक्तमाद्यं विशेषणद्वयं, तेन फलितं तृतीयं, तेनोपलक्षितं तुरीयगोचरमवशिष्टम्। वेदान्तानां मिथो विप्रतिपत्त्यभावं मत्वोक्तम्—**तथेति**। मिथो विरुद्धार्थत्वेनानिश्चायकानां सर्वशब्दानां मानान्तरसिद्धप्रधानलक्षणाश्रयणाद् वरं बहुशब्दानुरोधेन कतिपयलक्षणाश्रयणं लाघवादिति वक्तुमनेकशब्दानामविरोधं तावदाह—**तद्यथेति**। तद्विषयेणेत्यत्र तच्छब्दो ब्रह्मार्थः। 'सोऽकामयत' इति कामयितृत्ववचनम्। जगदुपादानस्य ब्रह्मणः सृज्यमानज्ञतया सर्वज्ञतोक्तेत्याह—**चेतनमिति**। अपरप्रयोज्यत्वम् 'इदं सर्वमसृजत' इति स्वातन्त्र्यम्। तेन सर्वेश्वरत्वं दर्शितमित्याह—**अपरेति**। सर्वात्मत्वमपि संगीतमित्याह—**तदिति**। तत्पदं पूर्ववत्। सत्यादिवाक्यापेक्षया तस्मादित्यादिवाक्यस्थात्मशब्दस्य परत्वम्। तस्य सर्वप्रत्यक्त्वमप्युक्तमित्याह—**शरीरादीति**। एकत्वमपि तस्योक्तमित्याह—**बहु स्यामिति**। अद्वितीयत्वमपि तस्यैवोक्तमित्याह—**तथेति**। तैत्तिरीये यथोक्तब्रह्मोक्तावपि कुतो वेदान्तान्तरेषु तदुक्तिरित्याशङ्क्याह—

---

१. **कारणत्वेनेति**। सूत्रयोजनैवं भाष्येण दर्शिता। नानाभावात्, अतिरेकाच्चेत्यनुवर्तते। अतिरेकपदं च विरोधार्थकं यथायोगं विपरिणम्यते। कारणत्वे इति सप्तमी। आकाशादिषु कार्यत्वे आम्नानस्य नानाभावात् = वैलक्षण्यात् विरोधे सत्यपि ब्रह्मणः कारणत्वे विरोधो नास्ति। कारणत्वेनेति आवृत्तं तृतीयान्तम्। आकाशादिषु कारणत्वेन यथाव्यपदिष्टोक्तेः = यथा एकस्मिन् वेदान्ते व्यपदिष्टं तथैव सर्वत्रोक्तेः इति। ब्र. वि. ५२०। अत्र प्रतिज्ञा हेतुश्च द्वयमपि सूत्रत एव लम्भितम्। सूत्रस्य योजनान्तरमपि भामत्यां द्रष्टव्यम्। पृ. ५०१। २. 'आचष्टे' इति पा.।

तदत्र यल्लक्षणं ब्रह्म कारणत्वेन विज्ञातं तल्लक्षणमेवान्यत्रापि विज्ञायते– 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्', 'तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत' (छा.उ.६।२।१,३) इति। तथा 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्। स ईक्षत लोकान्नु सृजै' (ऐ.उ.१।१) इति च। एवंजातीयकस्य कारणस्वरूपनिरूपणपरस्य वाक्यजातस्य प्रतिवेदान्तमविगीतार्थत्वात्। कार्यविषयं तु विगानं दृश्यते–क्वचिदाकाशादिका सृष्टिः, क्वचित् तेजआदिकेत्येवंजातीयकम्। न च कार्यविषयेण विगानेन कारणमपि ब्रह्म सर्ववेदान्तेष्वविगीतमधिगम्यमानमविवक्षितं भवितुमर्हतीति शक्यते वक्तुम्, अतिप्रसङ्गात्। समाधास्यति चाचार्यः कार्यविषयमपि विगानं 'न वियदश्रुतेः' (ब्र.सू.२।३।१) इत्यारभ्य। भवेदपि कार्यस्य विगीतत्वमप्रतिपाद्यत्वात्। न ह्ययं सृष्ट्यादिप्रपञ्चः प्रतिपिपादयिषितः। न हि तत्प्रतिबद्धः

प्रकटार्थविवरणम्

तावत् तैत्तिरीयके सर्वज्ञमीश्वरं सर्वात्मभूतमेकमद्वितीयं जगत्कारणं निरूप्य छान्दोग्यादिष्वप्यतिदिशति—**तत्र यल्लक्षणमिति**। ननु कार्ये विगानदर्शनात् कारणेऽपि विगानमनुमीयत इत्याशङ्क्याह—**कार्यविषयं त्विति**। कार्ये विगानमङ्गीकृत्यान्यविगानेनान्यस्य विगीतत्वेऽतिप्रसङ्ग उक्तः। इदानीं कार्येऽपि नास्ति विप्रतिपत्तिः; आकाशादिक्रमेणैकरूपैव सर्ववेदान्तेषु सृष्टिरिति वक्ष्यत इत्याह—**समाधास्यति चेति**। किं च कार्यप्रपञ्चस्य प्रमाणान्तरसिद्धत्वात् [1]तत्प्रतिबिम्बफलभावाच्च तत्र तात्पर्यद्योतनाय भवेद्विगानमित्याह—**भवेदपीति**। नन्वध्ययनविध्युपात्तानां सृष्टिवाक्यानाम् अवश्यं पुरुषार्थानुबन्धो वक्तव्य इति प्रपञ्चज्ञानप्रतिबद्धं किंचित् पुरुषार्थं परिकल्प्य तत्रैव परमतात्पर्यं कल्प्यत इत्याशङ्क्याह—**न च कल्पयितुमिति**। "फलवत्सन्निधावफलं तदङ्गम्" इति न्यायेन

भाष्यभावप्रकाशिका

एकमेवाद्वितीयमित्येकत्वाद्वितीयत्वयोर्व्यपदेशः, "तदैक्षते"ति समस्तजगदीक्षणश्रवणात् सर्वज्ञत्वस्य, 'ऐतदात्म्यमिदं सर्व'मिति सर्वात्मकत्वस्य, "बहु स्यामि"ति स्वातन्त्र्याभिधानादैश्वर्यस्य व्यपदेशोऽस्तीति भावः। एवम् "आत्मा वा इदम्" इत्यत्रापि सर्वज्ञत्वादिप्रतिपादनमूहनीयम्। **एवञ्जातीयकस्येति**। "यःसर्वज्ञःसर्ववि" दित्यादिवाक्यस्येत्यर्थः। कथं तर्हि कार्यविषयवाक्यानीति? तत्राह—**कार्यविषयमिति**। तर्हि कार्यविषयविगानदर्शनात् तद्द्वारा तत्कारणे ब्रह्मण्यपि विगानं भवेदिति, अत्राह—**न च कार्यविषयेणेति**। अङ्गीकृत्यैतदुक्तम्, तदेव तु नास्तीत्याह—**समाधास्यतीति**। सृष्टिविषयवाक्यानां सृष्टौ तात्पर्यमङ्गीकृत्यैतदुक्तम्, इदानीं तेषां तत्र तात्पर्यं नास्तीत्याह—**भवेदपीति**। अप्रतिपाद्यत्वमेव दर्शयति—**न ह्ययमिति**। ननु "पूषा प्रपिष्टभाग" इत्यादौ विधिवद् विश्वजिदादिषु प्रयोजनवच्चात्र प्रयोजनं कल्प्यतामित्याशङ्क्य 'फलवत्संनिधावफलं तदङ्ग'मिति न्यायेन प्रयोजनवद्वाक्यसंनिधिपठितानां

न्यायनिर्णयः

तदिति। तत्रादौ छन्दोगश्रुतिमाह—**सदिति**। 'एकमेवाद्वितीयम्' इत्येकत्वाद्वितीयत्वयोरुक्तिः। 'तदैक्षत' इति सर्वजगदीक्षणश्रुत्या सर्वज्ञत्वोक्तिः। 'ऐतदात्म्यमिदं सर्वम्' इति सर्वात्मत्वोक्तिः। 'बहु स्याम्' इति स्वातन्त्र्योक्तेरैश्वर्यगीः। ऐतरेयश्रुतावपि तादृग् ब्रह्मोक्तमित्याह—**तथेति। इति च** एकत्वाद्वितीयत्वादि पूर्वश्रुताविवोक्तमिति शेषः। यथोक्तं ब्रह्माथर्वणादावपि कथितमित्याह—**एवमिति**। अविगीतार्थत्वान्न कारणे विप्रतिपत्तिरिति शेषः। कथं तर्हि कार्यवाक्यानि तानि तद्द्वारा कारणे विगानं सूचयन्ति, तत्राह—**कार्येति**। तर्हि कार्यद्वारा कारणे ब्रह्मण्यपि विगानमुक्तं, नेत्याह— **न चेति**। स्थाण्वादिविप्रतिपत्त्या घटादिष्वसाधारणस्वरूपनिरूपितेष्वपि तदापत्तिरिति [त्तिरति] प्रसङ्गः। ननु स्थाण्वादेर्घटादेश्च भेदान्न तत्तद्द्वारा घटादौ विप्रतिपत्तिः, कार्यकारणयोस्त्वभेदात् कार्यद्वारा कारणेऽपि स्यात्, तत्राह—**समाधास्यतीति**। सृष्टिवाक्यानां सृष्टौ तात्पर्यमुपेत्य कार्यविगानसमाधिरुक्तः। तेषां तत्र तात्पर्यमेव नास्तीत्याह—**भवेदिति**। हेतुं साधयति— **न हीति**। तस्य प्रतिपादयितुमिष्टत्वाभावं स्पष्टयति—**न हीति**। 'पूषा प्रपिष्टभाग' इत्यादौ विधिवद् विश्वजिदादौ फलवच्चात्र फलं कल्प्यमित्याशङ्क्य 'फलवत्संनिधावफलं तदङ्गम्' इति न्यायात्

१. 'तत्प्रतिबद्धफलाभावाच्च तत्रातात्पर्य' इति स्यात्।

कश्चित् पुरुषार्थो दृश्यते, श्रूयते वा। न च कल्पयितुं शक्यते, उपक्रमोपसंहाराभ्यां तत्र तत्र ब्रह्मविषयैर्वाक्यैः साकमेकवाक्यताया गम्यमानत्वात्। दर्शयति च सृष्ट्यादिप्रपञ्चस्य ब्रह्मप्रतिपत्त्यर्थताम्– 'अन्नेन सोम्य शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ' (छा.उ.६।८।४) इति। मृदादिदृष्टान्तैश्च कार्यस्य कारणेनाभेदं वदितुं सृष्ट्यादिप्रपञ्चः श्राव्यत इति गम्यते। तथा च संप्रदायविदो वदन्ति– 'मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा। उपायः सोऽवताराय नास्ति भेदः कथंचन।' (माण्डू.का.३।१५) इति। ब्रह्मप्रतिपत्तिप्रतिबद्धं तु फलं श्रूयते– 'ब्रह्मविदाप्नोति परम्' (तै.उ.२।१), 'तरति शोकमात्मवित्' (छा.उ.७।१।३) 'तमेव विदित्वाऽति मृत्युमेति' (श्वे.उ.३।८) इति। प्रत्यक्षावगमं चेदं फलम्। 'तत्त्वमसि' इत्यसंसार्यात्मत्वप्रतिपत्तौ सत्यां संसार्यात्मत्वव्यावृत्तेः।।१४।।

यत्पुनः कारणविषयं विगानं दर्शितम्– 'असद्वा इदमग्र आसीत्' इत्यादि, तत् परिहर्तव्यम्। अत्रोच्यते–

समाकर्षात्।।१५।।

प्रकटार्थविवरणम्

प्रयाजादिवाक्यानामिव स्वार्थं प्रतिपाद्य सृष्टिवाक्यानां ब्रह्मवाक्यैरेकवाक्यतान्वयात् फलवत्त्वोपपत्तेः न स्वार्थेऽपि फलान्तरकल्पना युक्तिमतीति भावः। सृष्टेरद्वितीयप्रतिपत्तिशेषतया लिङ्गमप्यस्तीत्याह—**दर्शयति चेति**। ननु ब्रह्मज्ञानमपि न फलम्[1], येन निष्फलसृष्टेः तच्छेषता स्यादित्याशङ्क्याह—**ब्रह्मप्रतिपत्तीति**। तस्मात् फलवद्ब्रह्मज्ञानशेषत्वात् स्रष्टरि येनकेनचित्क्रमेणाद्वैत-बुद्ध्यवतारेणोपपत्तेः न सृष्टिविगानं स्रष्टरि विगानमापादयतीति सिद्धम्।

इदानीं श्रुत्युक्तस्रष्टृविप्रतिपत्तिनिरासाय सूत्रमवतारयति—**यत्पुनरित्यादिना। समाकर्षात्**। तावदेव कारणे विप्रतिपत्तिरुदयमासादयति

भाष्यभावप्रकाशिका

तेनैकवाक्यत्वाद् न पृथक् फलकल्पनेत्याह— **न चेति**। पूर्वं न्यायसामर्थ्यादेकवाक्यत्वमुक्तम्, इदानीं श्रुतितोऽप्येकवाक्यत्वमित्याह—**दर्शयति चेति**। शुङ्गेन कार्येणेति यावत्। साम्प्रतं सृष्टिवाक्यानां युक्त्या स्वार्थे तात्पर्याभावं दर्शयति—**मृदादिदृष्टान्तैरिति**। मृदादिषु कार्यकारणयोरभेददर्शनाज्जगतोऽपि ब्रह्माभेदः प्रसाध्यत इत्यर्थः। **गौडपादाचार्यवचनादप्येवमित्याह—तथा चेति**। फलवद्वाक्यसम्बन्धं सृष्टिवाक्यानां दर्शयितुं ब्रह्मवाक्यजायाः प्रतिपत्तेः फलवत्त्वमाह—**ब्रह्मप्रतिपत्तीति**। विदुषामनुभवसिद्धं चैतदित्याह—**प्रत्यक्षावगममिति**। ननु अस्माभिर्नावगम्यत इति, अत आह—**तत्त्वमसीति**।।१४।।

समाकर्षात्।।१५।। कारणविषयवाक्यविप्रतिपत्तिनिराकरणायोत्तरसूत्रमित्याह—**यत्पुनरिति**। मन्त्रब्राह्मणयोरेकार्थत्वाद्

न्यायनिर्णयः

फलवद्वाक्यसंनिध्याम्नातानां तेनैकवाक्यत्वान्नैवमित्याह—**न चेति**। न्यायादेकवाक्यत्वमुक्त्वा श्रुतेरपि तत्सिद्धिरित्याह—**दर्शयतीति**। शुङ्गं कार्यम्। सृष्टिवाक्यानां स्वार्थातात्पर्यं युक्त्याऽपीत्याह—**मृदादीति**। दृष्टान्तेषु कार्यकारणयोरभेदाज्जगतोऽपि ब्रह्माभेदः साध्यते। दृष्टान्तदार्ष्टान्तिकयोस्तुल्यत्वादित्यर्थः। सृष्ट्यादिप्रपञ्चस्याविवक्षिततत्वे वृद्धसंमतिमाह—**तथा चेति**। लोहं सुवर्णम्। अन्यथाऽन्यथेति वीप्सा ज्ञेया। **अवताराय**। ब्रह्मात्मैक्यबुद्धेरिति शेषः। प्रतिपाद्ये ब्रह्मणि नास्ति भेदो न विगानमित्यर्थः। सृष्टिवाक्यानां फलवद्वाक्यसंबन्धार्थं ब्रह्मवाक्योत्थधियः फलवत्त्वमाह—**ब्रह्मेति**। मृत्युमत्येतीत्यन्वयः। विदुषामनुभवसिद्धं चैतदित्याह—**प्रत्यक्षेति**। ननु विद्वद्भिरपि नास्माभिरिदमवगम्यते, तत्राह—**तत्त्वमिति**।।१४।।

सृष्टिवाक्यानां स्वार्थे तात्पर्याभावमुक्त्वा कारणे परोक्तं विगानमनूद्य तस्य परिहारयोग्यत्वमाह—**यदिति**। तत्र परिहारत्वेन

---
१. 'न फलवत्'।

'असद्वा इदमग्र आसीत्' (तै.उ. २।७) इति नात्रासन्निरात्मकं कारणत्वेन श्राव्यते। यतः 'असन्नेव स भवति। असद् ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुः' (तै.उ. २।६) इत्यसद्वादापवादेनास्तित्वलक्षणं ब्रह्मान्नमयादिकोशपरम्परया प्रत्यगात्मानं निर्धार्य 'सोऽकामयत' इति तमेव प्रकृतं समाकृष्य सप्रपञ्चां सृष्टिं तस्माच्छ्रावयित्वा 'तत्सत्यमित्याचक्षते' इति चोपसंहृत्य 'तदप्येष श्लोको भवति' इति तस्मिन्नेव प्रकृतेऽर्थे श्लोकमिममुदाहरति– 'असद्वा इदमग्र आसीत्' इति। यदि त्वसन्निरात्मकमस्मिन् श्लोकेऽभिप्रेयेत ततोऽन्यसमाकर्षणेऽन्यस्योदाहरणादसंबद्धं वाक्यमापद्येत। तस्मान्नामरूपव्याकृतवस्तुविषयः प्रायेण सच्छब्दः प्रसिद्ध इति तद्व्याकरणाभावापेक्षया प्रागुत्पत्तेः सदेव ब्रह्मासदिवासीदित्युपचर्यते। एषैव 'असदेवेदमग्र आसीत्' (छा.उ. ३।१९।१) इत्यत्रापि योजना। 'तत्सदासीत्' इति समाकर्षणात्। अत्यन्ताभावाभ्युपगमे हि तत्सदासीदिति किं समाकृष्येत? 'तद्धैक आहुरसदेवेदमग्र आसीत्' (छा.उ. ६।२।१)

प्रकटार्थविवरणम्

यावत् पूर्वपरामर्शं न चर्करीति। पूर्वापरपर्यालोचनायां त्वसदादिशब्दानां चेतनकारणवाचिबहुशब्दानुसारेण लक्षणया ब्रह्मण्येव वृत्तिरिति प्रमाणान्तरानुसारेण सर्वशब्दानां प्रधाने लक्षणाश्रयणाद्वरं स्वान्तर्वर्तिबहुशब्दानुसारेण कतिपयलक्षणाश्रयणमिति भावः। ननु "उदिते जुहोति" "अनुदिते जुहोति" इतिवत् केषांचित् सत्कारणं केषांचिदसत्कारणमिति श्रुत्यैव विकल्पो दर्शितः; कथमसच्छब्दस्य ब्रह्मणि लक्षणाश्रयणमित्याशङ्क्याह—**तद्धैक आहुरिति**। यथा कालपरिच्छेदाभावेऽपि श्रोतृकालापेक्षयाऽग्र आसीदित्यादि कालव्यपदेशः, तद्वदसत्पक्षस्य श्रौतत्वाभावेऽपि अनादिसंसारसन्ततौ मन्दमतिपरिकल्पितस्य अनूद्य निरास इति

भाष्यभावप्रकाशिका

ब्राह्मणेऽप्यसदेव प्रतिपाद्यत इत्याशङ्क्य, तन्निरासार्थमसन्निन्दापुरस्सरं प्रवृत्तत्वाद् ब्राह्मणस्य सत्कारणविषयत्वं निश्चितमित्याह—**यतः असन्नेवेति**। ब्रह्मणः सत्त्वेऽपि कारणस्यास्तित्वं कथमित्याशङ्क्य, तदुत्तरत्वेन सूत्रं योजयति—**सोऽकामयतेति**। उपक्रमोपसंहारयोरैकरूप्याद् वाक्यस्य कारणास्तित्वे तात्पर्यं गम्यत इत्याह—**तत्सत्यमिति**। तदेकार्थत्वान्मन्त्रस्यापि सद्विषयत्वमाह—**तदप्येष इति**। कथं तर्ह्यसच्छब्दस्य वृत्तिरिति? उपचारादित्याह—**तस्मादिति**। उक्तन्यायं वाक्यान्तरेऽप्युपदिशति—**एषैवेति**। ननु तत्रोक्तार्थे मन्त्रस्योदाहृतत्वादुपपन्नम्, इह तदभावात् कथं तद्विषयत्वमिति? तत्राह—**तत्सदासीदिति**। ननु पूर्वमसदेव पश्चात् सद् भवति, तत्राह—**अत्यन्ताभावेति**। शशविषाणादौ पश्चादपि सत्त्वादर्शनात्, आसीच्छब्दस्य तच्छब्दस्य सच्छब्दस्य चानुपपत्तेश्चेत्यर्थः।

न्यायनिर्णयः

सूत्रमवतारयति—**अन्नेति**। तैत्तिरीयश्रुत्यनुसारेण व्याख्यातुं प्रतिज्ञां पूरयति—**असदिति**। मन्त्रब्राह्मणयोरैकार्थ्याद् ब्राह्मणस्यासंदिग्धतया कारणार्थत्वान्मन्त्रस्यापि तादर्थ्यमेवेति पूर्वापरानुसंधानेन साधयति—**यत इति**। ब्रह्मास्तित्वलक्षणं निर्धार्य तस्मिन्नेव श्लोकमुदाहरतीति संबन्धः। कोशपञ्चकोक्तिद्वारा तस्य प्रत्यक्त्वमुक्तमित्याह—**अन्नेति**। ब्रह्मणः सत्त्वे प्रत्यक्त्वेऽपि कारणस्यास्तित्वं कथमित्याशङ्क्य सूत्रं योजयति—**स इति**। 'इदं सर्वमसृजत यदिदं किंच' इत्याद्या सृष्टिश्रुतिः। उपक्रमोपसंहारयोरैकरूप्याद् वाक्यस्य कारणास्तित्वे तात्पर्यं सिध्यतीत्याह—**तदिति**। मन्त्रब्राह्मणयोरैकार्थ्ये नियामकाभावाद् ब्राह्मणस्य कारणास्तित्वार्थत्वेऽपि मन्त्रस्य तत्र स्यादित्याशङ्क्याह—**तदपीति**। व्यतिरेकद्वारोक्तं स्फोरयति—**यदीति**। कथं तर्हि सति कारणेऽसच्छब्दप्रवृत्तिः, श्रुतिर्हि वाक्याद्बलीयसीत्याशङ्क्योपचाराद् युक्ता श्रुतिरित्याह—**तस्मादिति**। सदेवेत्यत्र नामादिव्याकरणात्प्रागेव ब्रह्मणि सच्छब्दोऽस्तीति प्रायेणेत्युक्तम्। तैत्तिरीयकश्रुतावुक्तन्यायं बृहदारण्यकच्छान्दोग्यश्रुतावतिदिशति—**एषेति**। ननु तैत्तिरीयके ब्राह्मणोक्तेऽर्थे मन्त्रोक्तेस्तयोरैकार्थ्याद् युक्तं कारणास्तित्वार्थत्वमिह तदभावात् कथं सदर्थत्वं, तत्राह—**तदिति**। पूर्वमसदेव पुनः सद्भवतीति समाकर्षोपपत्तिमाशङ्क्याह—**अत्यन्तेति**। शशविषाणादौ कालान्तरेऽपि सत्त्वानुपलम्भादासीच्छब्दस्य तच्छब्दस्य सच्छब्दस्य वाऽयोगादत्यन्तासत्त्वे समाकर्षासिद्धिरित्यर्थः। उक्तन्यायं छान्दोग्येऽपि योजयति—**तद्धेति**। उदितानुदितहोमवद्विरुद्धार्थत्वेऽपि प्रामाण्यसिद्धेः शाखान्तरीयाभिप्रायेणैकीयमतोक्तौ

इत्यत्रापि न श्रुत्यन्तराभिप्रायेणायमेकीयमतोपन्यासः, क्रियायामिव वस्तुनि विकल्पस्यासंभवात्। तस्माच्छ्रुतिपरिगृहीतसत्पक्षदार्ढ्यायैवायं मन्दमतिपरिकल्पित स्यासत्पक्षस्योपन्यस्य निरास इति द्रष्टव्यम्। 'तद्धेदं तर्ह्यव्याकृतमासीत्' (बृ.उ.१।४।७) इत्यत्रापि न निरध्यक्षस्य जगतो व्याकरणं कथ्यते, 'स एष इह प्रविष्ट आ नखाग्रेभ्यः' (बृ.उ.१।४।७) इत्यध्यक्षस्य व्याकृतकार्यानुप्रवेशित्वेन समाकर्षात्। निरध्यक्षे व्याकरणाभ्युपगमे ह्यनन्तरेण प्रकृतावलम्बिना स इत्यनेन सर्वनाम्ना कः कार्यानुप्रवेशित्वेन समाकृष्येत? चेतनस्य चायमात्मनः शरीरेऽनुप्रवेशः श्रूयते। प्रविष्टस्य चेतनत्वश्रवणात् 'पश्यँश्चक्षुः शृण्वञ्श्रोत्रं मन्वानो मनः' (बृ.उ.१।४।७) इति। अपि च यादृशमिदमद्यत्वे नामरूपाभ्यां व्याक्रियमाणं जगत् साध्यक्षं व्याक्रियत एवमादिसर्गेऽपीति गम्यते दृष्टविपरीतकल्पनानुपपत्तेः। श्रुत्यन्तरमपि 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छा.उ.६।३।२) इति साध्यक्षामेव जगतो व्याक्रियां दर्शयति। 'व्याक्रियत' इत्यपि कर्मकर्तरि लकारः सत्येव परमेश्वरे व्याकर्तरि सौकर्यमपेक्ष्य द्रष्टव्यः। यथा लूयते केदारः स्वयमेवेति सत्येव

प्रकटार्थविवरणम्

भावः। यदुक्तमकर्तृकस्यैव जगतो व्याकरणं स्वभाववादानुवादि श्रूयत इति; तत्रापि सूत्रं योजयति—**तद्धेदं तर्हीति**। ननु महाभूतसमुदायो भौतिके वर्तमानोऽनुप्रविष्ट उच्यते; कुत ईश्वरसिद्धिरित्याशङ्क्याह—**चेतनस्य चायमिति**। इतश्च सत्कर्तृकैव सृष्टिरव्याकृतवाक्येनोक्तेत्याह—**अपि चेति**। किं चाऽऽख्यातप्रयोगोऽपि न कर्तारं वारयतीत्याह—**व्याक्रियत इत्यपीति**। यत्कर्म गुणयोगात् कर्तृत्वेन विवक्ष्यते स कर्मकर्ता, यथा केदारस्य लवनकर्तुः व्यापारं प्रति कर्मत्वेऽपि अप्रयासेन लूयमानत्वाभिप्रायेण स्वयमेव लूयत इति कर्तृत्वमुपचर्यते, तथा जगत् परमेश्वरेण निष्पाद्यमानं सङ्कल्पमात्रेण निष्पाद्यत इति स्वयमेव निष्पन्नमित्युपचार इत्यर्थः। अथ वा तज्जगत् परमेश्वरेण नामरूपाभ्यां व्याक्रियत व्याकृतं निष्पादितमिति कर्मकारकमेवाख्याताभिधेयमित्याह—

भाष्यभावप्रकाशिका

विरुद्धार्थत्वेऽप्युदितानुदितहोमवाक्यवत् प्रामाण्ययोगाच्छाखान्तराभिप्रायेण किं न स्यादित्याशङ्क्याह—**क्रियायामिवेति**। स्वयंकर्तृकत्वमपि जगतो न प्रतिपादितमित्याह—**तद्धेदमिति**। कुत इत्यपेक्षायामुत्तरत्वेन सूत्रं योजयति—**स एष इति**। ननु तच्छब्दः प्रसिद्धं किञ्चित्परामृशति, नाप्रतिपन्नं किञ्चिदुत्थापयतीत्याशङ्क्याह—**निरध्यक्षेति**। तथापि तच्छब्दपरामृष्टस्याध्यक्षता कथमिति? अत्राह—**चेतनस्य चेति**। कार्यानुप्रवेशिनश्चेतनत्वं कथमिति? तदाह—**प्रविष्टस्येति**। जगदेकदेशस्य सकर्तृकत्वदर्शनादितरस्यापि तदनुमीयत इत्याह—**अपि चेति**। न केवलमनुमानादित्याह—**श्रुत्यन्तरमिति**। सकर्तृकत्वे लकारविरोधं परिहरति—**व्याक्रियतेति**।

न्यायनिर्णयः

का हानिरित्याशङ्क्याह—**क्रियायामिति**। तर्हि का गतिरेकीयमतोक्तेरित्याशङ्क्याह—**तस्मादिति**। 'सत्त्वेव सोम्ये'ति समाकर्षादित्यत्रापि सूत्रं नेयम्। यत्तु स्वयंकर्तृकत्वमव्याकृतवाक्ये श्रुतं तद् दूषयति—**तद्धेदमिति**। तत्रापि हेतुत्वेन सूत्रं योजयति—**स इति**। ननु सर्वनाम प्रसिद्धार्थं नाप्रसिद्धमुत्थापयति, तत्राह—[१]**निरध्यक्षेति**। यद्यपि 'यन्मदन्यदि'त्यत्रोक्तो मच्छब्दार्थः स इति सर्वनाम्ना परामृश्यते तथाप्यव्याकृतवाक्येऽध्यक्षस्यासंनिहितत्वे कार्यानुप्रवेशित्वेनैष इति संनिहितावलम्बिना पराम्रष्टव्याभावात् तद्विरोधः स्यादित्यर्थः। तथापि कथं परामृष्टस्याध्यक्षत्वं, तत्राह—**चेतनस्येति**। कार्यानुप्रविष्टस्य कुतश्चेतनत्वं, तत्राह—**प्रविष्टस्येति**। पश्यन्नात्मा चष्ट इति चक्षुरुक्तः। तथाऽसौ कर्तृव्युत्पत्त्या श्रोत्रादिसंज्ञो भवति। इतश्च जगतो व्याकरणं साध्यक्षमेवेत्याह—**अपि चेति**। विमतं सकर्तृकं, कार्यत्वात्, घटवदित्याह—**यादृशमिति**। घटस्य सकर्तृकत्वेऽपि क्षित्यादेस्तत्रेति व्यवस्थामाशङ्क्याह—**दृष्टेति**। न केवलमनुमानाज्जगतो व्याक्रिया साध्यक्षा, किंतु छान्दोग्यश्रुतेरपीत्याह—**श्रुत्यन्तरमिति**। बृहदारण्यकापेक्षयाऽन्तरशब्दः। श्रुत्यनुमानाभ्यां जगतः सकर्तृकत्वे कर्मकर्तरि लकारश्रुतिरयुक्तेत्याशङ्क्याह—**व्याक्रियत इति**। तत्र संप्रतिपत्त्यर्थं दृष्टान्तमाह—**यथेति**। कर्मकर्तरि लकार

१. अनेन 'निरध्यक्षव्याकरणाभ्युपगमे' इति भाष्ये पाठ इत्यूह्यते।

पूर्णके लवितरि।[1] यद्वा कर्मण्येवैष लकारोऽर्थाक्षिप्तं कर्तारमपेक्ष्य द्रष्टव्यः। यथा गम्यते ग्राम इति।।१५।।

।।इति चतुर्थं कारणत्वाधिकरणम्।।

५।।बालाक्यधिकरणम्।। सू. १६-१८।।

जगद्वाचित्वात्।।१६।।

कौषीतकिब्राह्मणे बालाक्यजातशत्रुसंवादे श्रूयते– 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्यः' (कौ.ब्रा.४।१८) इति। तत्र किं[2] जीवो वेदितव्यत्वेनोपदिश्यत उत मुख्यः प्राण उत परमात्मेति विशयः। किं तावत् प्राप्तम्? प्राण इति। कुतः? 'यस्य वैतत्कर्म' इति श्रवणात्।

शारीरकन्यायसंग्रहः

जगद्वाचित्वात्।।१६।। जीवमुख्यप्राणलिङ्गान्नेति चेत् तद्व्याख्यातम्।।१७।। अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके।।१८।। एकस्य शब्दस्यानेकार्थरूढस्याभिधेयोपादाने विप्रतिपत्तौ सत्यामन्यतरोपादाने च विशेषाभावे तस्य वृत्त्यन्तराश्रयणेनापि वाक्यार्थप्रतिपत्तिर्युक्ता, तदर्थत्वादभिधानप्रयोगस्य—इति न्यायेन कर्मशब्दस्य चलनादृष्टयो रूढस्यान्यतरोपादाने कारणाभावादनिर्णये सति, क्रियत इति कर्म इति वृत्त्यन्तरेण कार्यं जगदुपादाय तत्कर्तृ ब्रह्मावधारितम्।

प्रकटार्थविवरणम्

यद्वेति। यथा 'ग्रामो गम्यते' इत्युक्ते अर्थाद् देवदत्तेनेति कर्ता प्रतीयते, तथेहापि कर्मणि प्रत्ययार्थेऽर्थात् कर्तृप्रतीतिरित्यर्थः। इति चतुर्थं कारणत्वाधिकरणम्।

जगद्वाचित्वात्। विषयमाह—**कौषीतकीति।** बालाकाया अपत्यं बालाकिः ब्राह्मणः। राजा अजातशत्रुः। तयोः ब्रह्मविषयसंवादे गोष्ठ्याम्। कर्मशब्दस्य रूढियोगवृत्तिसंभवात् संशयमाह—**तत्र किमिति।** पूर्वत्र बहूनां चेतनवाचिशब्दानां

भाष्यभावप्रकाशिका

अभ्युपेत्यैतदुक्तम्। कर्मण्येव तु लकार इत्याह—**यद्वेति।** कथं तर्हि [स]कर्तृकतेति? अत्राह—**अर्थेति।।१५।।** इति चतुर्थं कारणत्वाधिकरणम्।

जगद्वाचित्वात्।।१६।। ननु कर्मशब्दस्य क्रियाऽदृष्टयोः साधारणत्वादसाधारणप्रमाणमन्तरेण परिस्पन्दमाश्रित्य कथं प्राणस्य

न्यायनिर्णयः

इत्येतदुक्तं, कर्मण्येवासावित्याह—**यद्वेति।** कथं तर्हि जगतः सकर्तृकत्वं, तत्राह—**अर्थेति।** तत्रापि लोकसिद्धं दृष्टान्तमाह—**यथेति।** तदेवं श्रुतीनामविगानाद् ब्रह्मणि गतिसामान्यं सिद्धम्।।१५।। इति चतुर्थं कारणत्वाधिकरणम्।।

बहूनां शब्दानां मिथो विरुद्धार्थानामविरोधेनैककारणार्थत्ववदेकस्य शब्दस्यानेकार्थस्य विशेषार्थत्वेन वाक्यस्य कारणपरत्वमाह—**जगदिति।** अधिकरणस्य विषयमाह—**कौषीतकीति।** श्रुतिं दर्शयन्नजातशत्रूक्तिमाह—**यो वा इति।** एतेषामादित्यादीनाम्। न केवलं जगदेकदेशस्य कर्ता, किंतु जगतः सर्वस्येत्याह—**यस्येति।** सामान्यविशेषार्थवाक्याभ्यां जगत्कर्ता ततो निष्कृष्टो द्रष्टव्य इत्याह—**स इति।** कर्मशब्दस्य रूढियोगाभ्यां संशयमाह—**तत्रेति।** विमृश्य पूर्वपक्षमाह—**किमिति।** प्राणस्य प्रथमप्राप्तौ हेतुं पृच्छति—**कुत इति।**

---

१. 'तद्धेदं तर्ह्यव्याकृतमासीत्' इति पूर्ववाक्ये अव्याकृतमिति कर्मण्येव क्तप्रयोगः। 'कर्मवत् कर्मणे'ति सूत्रेण लकारेण कर्तुरभिधानविवक्षायामेव कर्मकार्यातिदेशस्य कृततया कर्मकर्तरि कर्मणि विहितक्तप्रत्ययानुपपत्तेः। तत्समभिव्याहाराच्च कर्मण्येव 'व्याक्रियत' इति प्रयोग उचित इत्यभिप्रेत्याह— **यद्वेति।** द्र. ब्र. वि. ५२७।

२. अत्र भाष्ये जीव इत्यनेन जीवसामान्यं, जीवविशेषो हिरण्यगर्भश्च विवक्षितः। तत्र प्रथमं मुख्यप्राणपूर्वपक्षः उपन्यस्तः। तत्रादित्यादिकर्तृत्वासंभवात् 'ये चैते' इत्यादिना हिरण्यगर्भपूर्वपक्षः। ततः 'जीवो वाऽय'मिति जीवसामान्यपूर्वपक्षः। ब्र. वि. ५२९।

परिस्पन्दलक्षणस्य च कर्मणः प्राणाश्रयत्वात्। वाक्यशेषे च 'अथास्मिन् प्राण एवैकधा भवति' इति प्राणशब्ददर्शनात्। प्राणशब्दस्य च मुख्ये प्राणे प्रसिद्धत्वात्। ये चैते पुरस्ताद् बालाकिना 'आदित्ये पुरुषश्चन्द्रमसि पुरुषः' इत्येवमादयः पुरुषा निर्दिष्टास्तेषामपि भवति प्राणः कर्ता, प्राणावस्था-विशेषत्वादादित्यादिदेवतात्मनाम्। 'कतम एको देव इति प्राण इति स ब्रह्म त्यदित्याचक्षते' (बृ.उ. ३।९।९) इति श्रुत्यन्तरप्रसिद्धेः। जीवो वाऽयमिह वेदितव्यतयोपदिश्यते। तस्यापि धर्माधर्मलक्षणं कर्म शक्यते श्रावयितुम्– 'यस्य वैतत्कर्म' इति। सोऽपि भोक्तृत्वाद् भोगोपकरणभूतानामेतेषां पुरुषाणां कर्तोपपद्यते। वाक्यशेषे च जीवलिङ्गमवगम्यते। यत्कारणं वेदितव्यतयोपन्यस्तस्य पुरुषाणां कर्तुर्वेदनायोपेतं बालाकिं

प्रकटार्थविवरणम्

मुख्यार्थत्वानुसारेण ब्रह्मपरिग्रहः कृतः; तथेहापि कर्मप्राणशब्दयोः मुख्यत्वानुसारेण पूर्वपक्षमाह—**प्राण इति**। नन्विहादित्यादिपुरुषाणां कर्ता वेदितव्यत्वेनोक्तः; न च प्राणस्य तत्कर्तृत्वमस्तीत्याशङ्क्याह—**ये चैते पुरस्तादिति**। सूत्रात्मा हि प्राण उपास्यत्वेनेह विवक्षितः; तस्यावस्थाभेदा आदित्यादय इति। अत्र प्रमाणमाह—**कतम इति**। स प्राणो ब्रह्म आदित्यादिदेवतात्मना बृहत्त्वात्, देवतायाः परोक्षत्वात् तदिति [त्यदिति] परोक्षं नाम कथयन्तीत्यर्थः। पूर्वपक्षान्तरमाह—**जीवो वेति**। बृहन् पाण्डुरवासः सोम राजन्निति सुप्तं पुरुषमामन्त्र्य संबोध्येत्यर्थः। यदि प्राणो भोक्ता स्यादामन्त्रणशब्दं शृणुयादेव। न हि स्वामिनि व्याप्रियमाणे

भाष्यभावप्रकाशिका

ग्रहणमिति? अत्राह—**वाक्यशेष इति**। ननु पूर्वोक्तपुरुषकर्तृकत्वेन निर्दिश्यमानः कथं प्राणः स्यात्? तस्य तत्कर्तृकत्वासम्भवादित्याशङ्क्याह—**कतम एको देव इति**। ''महिमान एवैते'' इत्यादिना पूर्वोक्तदेवानां प्राणान्तर्भावकथनेन तदवस्थाभेदत्वप्रतिपादनादित्यर्थः। वाक्यान्तरे च लिङ्गशरीरस्यामूर्तरसस्य''त्यदि''ति परोक्षरूपसूत्रात्मकत्वप्रतिपादनात्, तस्य चेह ''त्यदि''ति प्राणत्वेन प्रत्यभिज्ञानात् तस्य लिङ्गरूपादादित्यादिदेवतात्मकत्वं युक्तमित्याह—**स ब्रह्म त्यदिति**। जीवस्यापि स्वार्जितादृष्टद्वारेण पुरुषाणां कर्तृत्वमुपपन्नमित्याह—**सोऽपीति**। ननु कर्मशब्दस्य साधारणस्यादृष्टपरत्वमङ्गीकृत्य कथं जीवाङ्गीकरणमिति? अत आह—**वाक्यशेषे चेति**। ''तौ ह सुप्तं पुरुषमाजग्मतुस्तमेतैर्नामभिरामन्त्रयांचक्रे बृहत्पाण्डरवासः सोमराजेति स ततो नोत्तस्थौ'' इत्यादिना स्वनामाश्रवणाद् अचेतनत्वेनानात्मत्वमुक्त्वा प्राणस्य तद्व्यतिरिक्तजीवप्रतिपादनादित्यर्थः। ननु उपक्रमे ''ब्रह्म

न्यायनिर्णयः

एकवाक्ये सति सच्छब्दासच्छब्दो नीतः, वाक्यभेदे कर्मशब्दो ब्रह्मशब्दान्न शक्यो नेतुम्। अत्राप्येकवाक्यत्वे यथोत्तरसच्छब्दात् प्राचीनोऽसच्छब्दो नीतस्तथोत्तरकर्मशब्दाद् ब्रह्मशब्दस्य नयनमिति मत्वा हेतुमाह—**यस्येति**। क्वाचित्कहैरण्यगर्भमतद्योतिकर्मशब्दस्य ब्रह्मानुगुण्योक्तिद्वारा गतिसामान्यं संसाध्य समन्वयसाधनात् पादादिसंगतिः। पूर्वपक्षे प्राणजीवान्यतरस्य वेदितव्यतया ब्रह्मणि गतिसामान्यासिद्धिः, उत्तरत्र परस्यैव तथात्वात् तत्सिद्धिरिति फलम्। श्रुतेऽपि कर्मशब्दे कथं प्राणधीरन्यत्रापि तद्योगात्, तत्राह—**परिस्पन्देति**। कर्मशब्दस्य क्रियाऽदृष्टसाधारण्यादसाधारणप्रमाणाभावे कथं परिस्पन्देन प्राणधीः, तत्राह—**वाक्येति**। करणोपरमानन्तर्यमथशब्दार्थः। प्राणशब्दस्यापि साधारण्यादनिर्णयं शङ्कित्वोक्तम्—**प्राणेति**। पुरुषकर्तृत्वेनोक्तस्य न प्राणत्वं तस्य तदकर्तृत्वादित्याशङ्क्याह—**ये चेति**। आदित्यादीनां प्राणावस्थाविशेषत्वे मानमाह—**कतम इति**। 'महिमान एवैते' इत्यादिना पूर्वोक्तदेवतानां प्रश्नप्रत्युक्तिभ्यां प्राणत्वोक्त्या तदवस्थात्वमक्तमित्यर्थः। वाक्यान्तरे च लिङ्गस्यामूर्तरसस्य त्यदिति परोक्षसूत्रत्वोक्ते-स्तस्येह त्यदिति प्राणत्वेन प्रत्यभिज्ञानात् तस्य लिङ्गरूपादादित्यादिदेवतात्वंत्याह—**स इति**। पक्षान्तरमाह—**जीवो वेति**। तस्मिन्नमूर्ते कर्मशब्दायोगमाशङ्क्याह—**तस्येति**। तथापि तनुमहिम्नोऽस्य नादित्यादिकर्तृत्वमित्याशङ्क्यादृष्टद्वारा तद्योगमाह—**सोऽपीति**। कर्मशब्दस्य साधारणस्यादृष्टार्थत्वमुपेत्य कथं जीवोक्तिरित्याशङ्क्याह—**वाक्येति**। तदेव स्फुटयति—**यदिति**। 'तौ ह सुप्तं पुरुषमाजग्मतुस्तमेतैर्नामभिरामन्त्रयांचक्रे बृहत्पाण्डरवासः सोम राजन्निति स नोत्तस्थौ' इत्यादिना संबोधनशब्दाश्रुतेर-

प्रति बुबोधयिषुरजातशत्रुः सुप्तं पुरुषमामन्त्र्यामन्त्रणशब्दाश्रवणात् प्राणादीनामभोक्तृत्वं प्रतिबोध्य यष्टिघातोत्थानात् प्राणादिव्यतिरिक्तं जीवं भोक्तारं प्रतिबोधयति। तथा परस्तादपि जीवलिङ्गमवगम्यते– 'तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा स्वाः श्रेष्ठिनं भुञ्जन्त्येवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते एवमेवैत आत्मान एतमात्मानं भुञ्जन्ति' (कौ.ब्रा. ४/ २०) इति। प्राणभृत्त्वाच्च जीवस्योपपन्नं प्राणशब्दत्वम्। तस्माज्जीवमुख्यप्राणयोरन्यतर इह ग्रहणीयो, न परमेश्वरः, तल्लिङ्गानवगमादिति।

एवं प्राप्ते ब्रूमः–परमेश्वर एवायमेतेषां पुरुषाणां कर्ता स्यात्। उपक्रमसामर्थ्यात्। इह हि बालाकिरजातशत्रुणा सह 'ब्रह्म ते ब्रवाणि' इति संवदितुमुपचक्रमे। स च कतिचिदादित्याद्यधिकरणान्

प्रकटार्थविवरणम्

करणानामुपरमो दृष्ट इत्यर्थः। भोक्तृत्वमपि जीवस्यैव गमकमित्याह—**तथा परस्तादिति**। श्रेष्ठी प्रधानपुरुषः स्वैर्भृत्यैः उपकरणैः भुङ्क्ते, यथा वा भृत्याः श्रेष्ठिनं ग्रासाच्छादनेनोपजीवन्ति। एवं जीवोऽप्यादित्यादिभिः प्रकाशादिकरणेन भोगोपकरणैः भुङ्क्ते आदित्यादयोऽप्येनं जीवमुपजीवन्ति हविर्ग्रहणादिनेत्यर्थः। "अथास्मिन् प्राण एवैकधा" इति प्राणशब्दः कथं जीवे विद्यत इत्याशङ्क्याह—**प्राणभृत्त्वाच्चेति**।

उत्सूत्रमेव तावत् सिद्धान्तमाह—**परमेश्वर एवायमिति**। यद्वाक्यशेषे सन्दिग्धं तन्निश्चितेनोपक्रमेण निर्णीयते, यथा "उच्चैर्ऋचा क्रियते" इत्यादावृगादिशब्दानां वेदवचनत्वं निर्णीतम् "अग्नेर्ऋग्वेदः" "वायोर्यजुर्वेदः" इत्यसन्दिग्धोपक्रमात्; तथेहापि ब्रह्माभिधानोपक्रमात्, अब्रह्मविदश्चापोदितत्वात् ब्रह्मैव वेदितव्यः पुरुष इत्यर्थः। किञ्चादित्यादिपुरुषकर्तृत्वमपि न

भाष्यभावप्रकाशिका

ते ब्रवाणी" ति श्रवणात् स्वाराज्यफलेन चोपसंहारात् सर्वपाप्मप्रदाहलिङ्गात् क्रियत इति कर्मेति व्युत्पत्त्या जगति कर्मशब्दस्य संभवात् तत्कर्तृत्वस्य परमात्मन एव संभवात् परमात्मैव कस्मान्न गृह्यत इत्याशङ्क्य, बालाकिवाक्यादजातशत्रुवाक्यस्य नियमनासंभवाद् योग-रूढ्योश्च रूढेर्बलीयस्त्वात् कर्मशब्देन जगतोऽभिधानासंभवात् फलवचनयोश्चोपचरितार्थत्वोपपत्तेरित्याह—**न परमेश्वर इति**।

भवतु बालाकिवाक्ये ब्रह्मणोपक्रमः, तथाप्यजातशत्रुवाक्यं किमिति ब्रह्मविषयमिति? तत्राह—**स च कतिचिदिति**। ननु

न्यायनिर्णयः

चेतनत्वेनानात्मत्वं [1]प्राणादेरुक्तातिरिक्तजीवोक्तेर्वाक्यशेषस्तदर्थः। न हि ततोऽन्यो भोक्ताऽस्तीत्यर्थः। इतोऽपि वेदितव्यो जीव एवेत्याह—**तथेति। परस्तादिति**। अनन्तरवाक्यापेक्षया पश्चादिति यावत्। श्रेष्ठी प्रधानपुरुषः स्वैर्भृत्यैः उपकरणैरित्येतत्। भृत्या वा प्रधानमशनाच्छादनादिनोपजीवन्तीत्याह—**यथेति**। एवं जीवोऽप्यादित्यादिभिः प्रकाशादिना भोगोपकरणैर्भुङ्क्ते। भृत्यवदादित्यादयोऽपि जीवं हविर्ग्रहणादिनोपजीवन्तीत्याह—**एवमिति**। 'अथास्मिन्प्राण एवैकधा भवति' इति प्राणशब्दो जीवे कथं स्यात्, तत्राह—**प्राणेति**। प्राणजीवयोरन्यतरस्य वेदितव्यत्वाद् गतिसामान्यासिद्धिरित्युपसंहरति—**तस्मादिति**। 'ब्रह्म ते ब्रवाणि' इत्युपक्रमात्, उपसंहारे च स्वाराज्यफलोक्तेः, सर्वपाप्मदाहलिङ्गात्, क्रियत इति कर्मशब्दस्य जगदर्थत्वात्, तत्कर्तृत्वस्य परस्मिन्नेव युक्तत्वात्, परमात्मैवायमित्याशङ्क्य बालाकिवाक्यादजातशत्रुवाक्यनियमायोगात्, योगरूढ्योश्च रूढेर्बलीयस्त्वात्, फलोक्तेश्चोपचरितार्थत्वान्नैवमित्याह—**नेति**।

पूर्वपक्षमनूद्य सूत्राद्बहिरेव सिद्धान्तयति—**एवमिति**। लिङ्गासिद्धेरीश्वरे निरस्ते नियमासिद्धिरिति शङ्कते—**कस्मादिति**। यद् वाक्यशेषे संदिग्धं तन्निश्चितेनोपक्रमेण नेतव्यमित्याह—**उपक्रमेति**। तत्सामर्थ्यं दर्शयितुमुपक्रममाह—**इहेति**। तद्वाक्ये ब्रह्मणोपक्रमेऽपि बालाकिना ब्रह्म नोक्तं किमिति राज्ञो वाक्यं तद्विषयं नियम्यते, न हि भ्रान्तवाक्यादभ्रान्तवाक्यं नियन्तुं शक्यम्, तत्राह—**स चेति**।

१. 'प्राणादेरुक्त्वा' इति पाठः स्यात्।

पुरुषानमुख्यब्रह्मदृष्टिभाज उक्त्वा तूष्णीं बभूव। तमजातशत्रुः 'मृषा वै खलु मा संवदिष्ठा ब्रह्म ते ब्रवाणि' इत्यमुख्यब्रह्मवादितयाऽपोद्य तत्कर्तारमन्यं वेदितव्यतयोपचिक्षेप। यदि सोऽप्यमुख्यब्रह्मदृष्टिभाक् स्यादुपक्रमो बाध्येत। तस्मात् परमेश्वर एवायं भवितुमर्हति। 'कर्तृत्वं चैतेषां पुरुषाणां न परमेश्वरादन्यस्य स्वातन्त्र्येणावकल्पते। 'यस्य वैतत्कर्म' इत्यपि नायं परिस्पन्दलक्षणस्य, धर्माधर्मलक्षणस्य वा कर्मणो निर्देशः। तयोरन्यतरस्याप्यप्रकृतत्वात्, असंशब्दितत्वाच्च। नापि पुरुषाणामयं निर्देशः। 'एतेषां पुरुषाणां कर्ता' त्येव तेषां निर्दिष्टत्वात्। लिङ्गवचनविगानाच्च। नापि पुरुषविषयस्य करोत्यर्थस्य क्रियाफलस्य वाऽयं निर्देशः,

प्रकटार्थविवरणम्

सूत्रात्मनः स्वातन्त्र्येण घटते, "भीषाऽस्माद्वातः पवते" इति श्रुतेः; नापि जीवस्य, देवानां पशुत्वादित्याह—**कर्तृत्वं चैतेषामिति**। यच्चोक्तं कर्मशब्दः परिस्पन्दे धर्माधर्मयोर्वा रूढ इति, तत्राह—**यस्य वैतत्कर्मेति**। उभयत्र रूढस्य कर्मशब्दस्य प्रकरणमुपपदं वा विनाऽन्यतरस्मिन् वृत्त्ययोगात् तदभावाच्चानिर्णयप्रसङ्गे परिशेषाद् यौगिकवृत्त्या जगद्वाचकत्वमभ्युपगन्तव्यम्; अतो जगद्वाचित्वात् कर्मशब्दस्य तत्कर्तृ ब्रह्मेह विवक्षितमिति सूत्रार्थः। ननु नास्ति परिशेषः कर्तव्यपुरुषाणां कर्मशब्देन निर्देशादित्याशङ्क्याह—**नापि पुरुषाणामिति**। न केवलं पौनरुक्त्यम्; पुरुषाणां बहुत्वान्नपुंसकलिङ्गमेकवचनं च विरुध्यत इत्याह—**लिङ्गवचनेति**। ननु तथापि नास्ति परिशेषः; करणस्य कार्यनिष्पत्तेर्वाऽभिधानात् इत्याशङ्क्याह—**नापि पुरुषविषयस्येति**। क्रियमाणपुरुषविषयव्यापाराभावे च न कर्तृत्वमेव परिपूर्णमेवं भवति; अत आर्थिकत्वान्न स्वशब्देन वाच्यमिति भावः। यस्मान्नास्त्यन्यत्र प्रसङ्गः, तस्मात् सूत्रार्थः सुस्थ इत्याह—**परिशेषादिति**। प्रकृतवाचकत्वमेवैतच्छब्दस्येति मत्वाऽऽह—

भाष्यभावप्रकाशिका

बालाकिना ब्रह्म नोक्तं चेत्, तस्यैवोपक्रमविरोधः, न त्वजातशत्रोः। तेनाजातशत्रुवाक्यस्य न ब्रह्मनिष्ठता सिध्येदित्याशङ्क्याह—**यदि सोऽपीति**। अजातशत्रुणा बालाकेरब्रह्मवादिनो विशेषमात्मनो दर्शयता मुख्यं ब्रह्मैवाभिधेयम्; अन्यथा स्वस्यापि मृषावादितया तस्मादविशेषप्रसङ्गादिति भावः। कर्मशब्दस्य चलनादृष्टयो रूढस्यान्यतरोपादाने कारणाभावादनिर्णये क्रियत इति कर्मेति व्युत्पत्त्या जगदुपादाय तत्कर्तृत्वेन ब्रह्मैव निर्दिश्यत इति प्रतिपादयति—**यस्य वैतदित्यादिना**। ननु एतच्छब्दस्य प्रकृतपरामर्शकत्वात्, तत्समभिव्याहृतकर्मशब्दस्य तद्वशादन्यतरविषयत्वमित्याशङ्क्याह—**अप्रकृतत्वादिति**। उपपदाभावं दर्शयति—**असंशब्दितत्वादिति**। ननु एतच्छब्देन प्रकृतपरामर्शिना प्रकृतत्वात् पुरुषा एव परामृश्यन्ते न त्व(न)भिमतं जगदिति, अत आह—**नापि पुरुषाणामिति**। **लिङ्गवचनविगानादिति**। पुरुषाणां बहुत्वात् पुंलिङ्गपदाभिधेयत्वादेतदिति चैकस्य नपुंसकस्य चाभिधानादित्यर्थः। ननु पुरुषाणां पृथङ् निर्देशेऽपि तद्विषयायाः कृतेस्तत्फलस्य च कार्यजन्मनोऽनिर्दिष्टत्वाद् "यस्य वैतत्कर्मे" ति तयोर्निर्देशान्न पौनरुक्त्यमिति, अत आह—**नापि पुरुषविषयस्येति**। कर्तृशब्देनैव कर्तारमभिदधता ते उपात्ते आक्षिप्ते; कृतेः फलावच्छिन्नत्वात्, कृत्यवच्छिन्नत्वाच्च

न्यायनिर्णयः

चेत् तस्यैवोपक्रमो विरुध्येत, राज्ञस्तु तथाऽनुपक्रमान्न तद्विरोधः, तेन तद्वाक्यस्याब्रह्मार्थतेत्याशङ्क्याह—**तमिति**। तथापि कथं वेदितव्यस्य ब्रह्मत्वं, तत्राह—**यदीति**। राज्ञा बालाकेरब्रह्मवादिनो विशेषमात्मनो दर्शयता मुख्यं ब्रह्मैव वाच्यम्, अन्यथा स्वस्यापि मृषावादित्वात् ततोऽविशेषादित्यर्थः। उपक्रम सामर्थ्यसिद्धमुपसंहरति—**तस्मादिति**। इतश्चेश्वर एव वेदितव्य इत्याह—**कर्तृत्वं चेति**। प्राणावस्थाविशेषत्वादादित्यादीनां तस्य तत्कर्तृत्वं युक्तं, भोक्तुरप्यदृष्टद्वारा भोगोपकरणादित्यादिकर्तृत्वं स्यादित्याशङ्क्य निरङ्कुशं तत्कर्तृत्वमीश्वरस्यैवेति विशिनष्टि—**स्वातन्त्र्येणेति**। किंच कर्मशब्दस्य चलनादृष्टयो रूढस्यान्यतरार्थत्वानियमात् क्रियत इति जगदर्थत्वात् तत्कर्तृत्वेन ब्रह्मैव ग्राह्यमित्याह—**यस्येति**। एतच्छब्दस्य प्रकृतार्थत्वात् तत्समभिव्याहृतकर्मशब्दस्य तद्वशादन्यतरार्थत्वधीरित्याशङ्क्याह—**तयोरिति**। उपपदाभावाच्च तस्य नान्यतरार्थतेत्याह—**असंशब्दितत्वाच्चेति**। एतच्छब्देन प्रकृतगामिना प्रकृतत्वात् पुरुष एव परामृश्यते, न जगदित्याशङ्क्याह—**नापीति**। तदनुक्तौ हेत्वन्तरमाह—**लिङ्गेति**। पुरुषाणां बहुत्वात् पुंलिङ्गशब्दवाच्यत्वात्, एतदित्येकस्य नपुंसकस्य चोक्तेर्न पुरुषोक्तिरित्यर्थः। पुरुषाणां पृथक्कथनेऽपि तदर्थक्रियायास्तत्फलस्य च कार्यजन्मनोऽनुक्तत्वादेतत्कर्मेति तदुक्तौ न पौनरुक्त्यमित्याशङ्क्याह—**नापीति**। क्रियातत्फले कर्तारं वदता कर्तृशब्देनैवाक्षिप्ते।

---

१. अन्तर्याम्यधिकरणन्यायेन ब्रह्मगतमेव तद् ग्राह्यमिति भावः।

कर्तृशब्देनैव तयोरुपात्तत्वात्। पारिशेष्यात् प्रत्यक्षसंनिहितं जगत् सर्वनाम्नैतच्छब्देन निर्दिश्यते। क्रियत इति च तदेव जगत् कर्म। ननु जगदप्यप्रकृतमसंशब्दितं च। सत्यमेतत्। तथाप्यसति विशेषोपादाने साधारणेनार्थेन संनिधानेन संनिहितवस्तुमात्रस्यायं निर्देश इति गम्यते, न विशिष्टस्य कस्यचित्, विशेषसंनिधानाभावात्। पूर्वत्र च जगदेकदेशभूतानां पुरुषाणां विशेषोपादानादविशेषितं जगदेवेहोपादीयत इति गम्यते। एतदुक्तं भवति– य एतेषां पुरुषाणां जगदेकदेशभूतानां कर्ता, किमनेन विशेषेण, यस्य कृत्स्नमेव जगदविशेषितं कर्मेति। वाशब्द एकदेशावच्छिन्नकर्तृत्वव्यावृत्त्यर्थः। ये बालाकिना ब्रह्मत्वाभिमताः पुरुषाः कीर्तितास्तेषामब्रह्मत्वख्यापनाय विशेषोपादानम्। एवं ब्राह्मणपरिव्राजकन्यायेन सामान्यविशेषाभ्यां जगतः कर्ता वेदितव्यतयोपदिश्यते। परमेश्वरश्च सर्वजगतः कर्ता सर्ववेदान्तेष्ववधारितः।।१६।।

जीवमुख्यप्राणलिङ्गान्नेति चेत् तद् व्याख्यातम्।।१७।।

प्रकटार्थविवरणम्

नन्विति। जगत् प्रकृतं न भवति स्वशब्देनानुक्तं चेत्येतत् सत्यम्; तथापि सर्वनाम्नः प्रसिद्धमात्रावद्योतकत्वात् प्रकृतवाचकत्वनियमो नास्ति; सति तु संकोचके विशेषे प्रकृताभिधायित्वं क्वचिद्भवति; तदभावे साधारणेनार्थेन वाच्येनैतच्छब्दस्य सदा संबद्धत्वेन स्वरसत एव साधारणार्थनिर्देशो घटत इति परिहारार्थः। इतश्च साधारणनिर्देश एवायमित्याह—**पूर्वत्र चेति।** ननु यदि साधारण्येन जगद्विवक्षितं तर्हि किं पुरुषाणां विशेषोपादानेनेत्याशङ्क्याह—**ये बालाकिनेति।**

भाष्यभावप्रकाशिका

कर्तुरित्यर्थः। तस्य कथं कर्मशब्दवाच्यत्वमिति? तत्राह—**क्रियत इति।** सर्वनाम्नः प्रत्यक्षादिसंनिहितपरामर्शकत्वादुपपदाद्यभावे च विशेषविषये संकोचानुपपत्तेः जगदेवैतच्छब्दसमानाधिकृतकर्मशब्देन निर्दिश्यत इति परिहरति—**सत्यमेतदिति।** किञ्चाप्रकृतत्वमपि नास्ति; जगत एकदेशेन प्रकृतत्वादित्याह—**पूर्वत्रेति।** ननु तर्ह्येतच्छब्देन जगतः परामर्शनात् पुरुषा अपि निर्दिष्टा इति एतेषां पुरुषाणां पृथगभिधानमनर्थकमित्याशङ्क्य, अभिप्रेतमर्थं दर्शयति—**एतदुक्तमिति।** अथापि "पुरुषाणां कर्ता यस्य वैतत्कर्मे" ति भेदनिर्देशोऽनर्थक एव; जगत्कर्तृत्वनिर्देशादेव तत्कर्तृत्वस्यापि सिद्धेरित्याशङ्क्याह—**ये बालाकिन इ[ने]ति।** ननु तथापि परमात्मविषयत्वं वाक्यस्य कथमिति? अत्राह—**परमेश्वरश्चेति।**।१६॥

न्यायनिर्णयः

ताभ्यां कर्तुरवच्छेदादित्यर्थः। परिशेषसिद्धमर्थमाह—**पारिशेष्यादिति।** तस्य कथं कर्मशब्दत्वं, न हि तच्चलनमदृष्टं वा, तत्राह—**क्रियत इति।** प्रकरणोपपदयोरसत्त्वाविशेषे सर्वनामसमानाधिकृतकर्मशब्दस्य कर्मव्युत्पत्त्या कुतो जगदर्थतेति शङ्कते—**नन्विति।** सर्वनाम्नः संनिहितार्थत्वादुपपदाद्यभावे विशेषे संकोचायोगादेतच्छब्दसहितकर्मशब्देन जगदेवोक्तमित्याह—**सत्यमिति।** किंचाप्रकृतत्वमपि जगतो नास्ति, तदेकदेशानां पुरुषाणां प्रकृतत्वात् तद्द्वारा कृत्स्नजगदुक्तियोगादित्याह—**पूर्वत्रेति।** तर्हि तन्मात्रमेव सर्वनाम्ना ग्राह्यं, श्रुतिलक्षणयोः श्रुतेरौचित्यादित्याशङ्क्य तदत्यागान्नैवमित्याह—**अविशेषितमिति।** तर्हि सर्वनाम्ना जगद्ग्राहिणा पुरुषाणामपि ग्रहादेतेषामित्यादिपृथगुक्तिरनर्थिकेत्याशङ्क्याह—**एतदिति।** यस्य कृत्स्नं जगत् कर्म स वेदितव्य इति संबन्धः। वाशब्दाद्वेदितृविकल्पं प्रत्याह—**वाशब्द इति।** तथापि 'पुरुषाणां कर्ता यस्य वैतत्कर्म' इति कुतो भेदोक्तिः, जगत्कर्तृत्वोक्तेरेवादित्यादिकर्तृत्वसिद्धेरित्याशङ्क्याह—**य इति।** उक्तन्यायात् कर्मशब्दस्य जगदर्थत्वे वाक्यार्थमुपसंहरति—**एवमिति।** ब्राह्मणा भोजयितव्याः परिव्राजकाश्चेत्युक्ते सामान्यविशेषाभ्यां संनिहितसर्वब्राह्मणग्रहणवदत्रापि व्यपदेशाभ्यां सर्वजगत्कर्ता वेदितव्यत्वेनोक्त इत्यर्थः। तथापि कथं वाक्यस्य ब्रह्मपरत्वम् परस्यापि जगत्कर्तुर्वेदितव्यत्वयोगात्, तत्राह—**परमेति।** उपनिषदामैदम्पर्यालोचनायामन्यस्य सर्वजगत्कर्तृत्वायोगादत्र कृत्स्नजगत्कर्ता वेदितव्यः पर एवेत्यर्थः।।१६॥

अथ यदुक्तं वाक्यशेषगताज्जीवलिङ्गान्मुख्यप्राणलिङ्गाच्च तयोरेवान्यतरस्येह ग्रहणं न्याय्यम्, न परमेश्वरस्येति; तत् परिहर्तव्यम्। अत्रोच्यते- परिहृतं चैतत् 'नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्' (ब्र.सू.१।१।३१) इत्यत्र। त्रिविधं ह्यत्रोपासनमेवं सति प्रसज्येत जीवोपासनं मुख्यप्राणोपासनं ब्रह्मोपासनं चेति। न चैतन्न्याय्यम्। उपक्रमोपसंहाराभ्यां हि ब्रह्मविषयत्वमस्य वाक्यस्यावगम्यते। तत्रोपक्रमस्य तावद् ब्रह्मविषयत्वं दर्शितम्। उपसंहारस्यापि निरतिशयफलश्रवणाद् ब्रह्मविषयत्वं दृश्यते- 'सर्वान्पाप्मनोऽपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद' इति। नन्वेवं सति प्रतर्दनवाक्यनिर्णयेनैवेदमपि वाक्यं निर्णीयेत। न निर्णीयते। 'यस्य वैतत्कर्म' इत्यस्य ब्रह्मविषयत्वेन तत्रानिर्धारितत्वात्। तस्मादत्र जीवमुख्यप्राणशङ्का पुनरुत्पद्यमाना निवर्त्यते। प्राणशब्दोऽपि ब्रह्मविषयो दृष्टः 'प्राणबन्धनं हि सोम्य मनः' (छा.उ.६।८।२) इत्यत्र। जीवलिङ्गमप्युपक्रमोपसंहारयोर्ब्रह्मविषयत्वादभेदाभिप्रायेण योजयितव्यम्।

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके।।१८।।

प्रकटार्थविवरणम्

जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम्। एवं तावत् सिद्धान्तमुक्त्वा परोक्तापाकरणायाह—**यथो[यदु]क्त**मित्यादिना। पौनरुक्त्यं शङ्कते—**नन्वेवं सतीति**। कर्मशब्दस्य परिस्पन्दादृष्टयो रूढिबलेन जायमानार्थान्तरपरत्वाशङ्कापाकरणाय पुनरारम्भ इत्याह—**न निर्णीयत इति**। यच्चोक्तं प्राणशब्दो मुख्ये प्राणे प्रसिद्ध इति, तत्राह—**प्राणशब्दोऽपीति**। का तर्हि जीवलिङ्गस्य गतिरिति तत्राह—**जीवलिङ्गमपीति**।

भाष्यभावप्रकाशिका

जीवमुख्यप्राणलिङ्गान्नेति चेत् तद् व्याख्यातम्।।१७।। अधिकरणस्य वैयर्थ्यमाशङ्कते—**नन्वेवमिति**। परिहरति—**न निर्णीयेतेति**। **''यस्य वैतदि''**ति कर्मशब्दस्य चलनादृष्टयोः रूढत्वात् तदनुसारेण जीवप्राणयोरयन्तरपरत्वाद् वाक्यभेद एवेत्याशङ्क्य पुनर्निराक्रयत इत्यर्थः। वाक्यशेषे प्राणशब्ददर्शनान्मुख्यप्राणविषयत्वमिति यदुक्तम्, तत्राह—**प्राणशब्दोऽपीति**। वाक्यशेषे जीवलिङ्गमवगम्यत इति यदुक्तम्, तत्राह—**जीवलिङ्गमपीति**।।१७।।

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके।।१८।। जीवलिङ्गेनापि ब्रह्मोपलक्ष्यत इत्युक्तम्, इदानीं

न्यायनिर्णयः

सिद्धान्तमुक्त्वा परोक्तमनूद्य प्रत्याह—**जीवेति**। अनुवादं विवृणोति—**अथेति**। सूत्रावयवेन परिहरति—**अत्रेति**। उक्तमेव संक्षिप्य स्मारयति—**त्रिविधमिति**। अस्तूपास्तित्रैविध्यं, का क्षतिः, तत्राह—**न चेति**। उपक्रमोपसंहारैकरूप्यसिद्धवाक्यैक्यभङ्गात्र त्रैविध्यमित्यर्थः। हेत्वसिद्धिमाशङ्क्योक्तम्—**तत्रेति**। दर्शितम् उपक्रमसामर्थ्यादित्यादिनेति शेषः। तथापि कथमुपसंहारस्य ब्रह्मार्थत्वं, तत्राह—**उपसंहारस्येति**। श्रैष्ठ्यं गुणाधिक्यम्। आधिपत्यमैश्वर्यम्। स्वाराज्यमनन्याधीनत्वम्। प्रातर्दनविचारेण गतत्वादधिकरणमनर्थकमिति शङ्कते—**नन्विति**। तत्रोपक्रमोसंहारैकरूप्यादेकवाक्यत्वे जीवप्राणलिङ्गे ब्रह्मपरतया नीते, तुल्यमत्रापि वाक्यैक्यमिति नार्थोऽधिकरणस्येत्यर्थः। कर्मशब्दस्यात्र चलनादृष्टयो रूढेस्तद्वशाद् वाक्यस्य जीवप्राणान्यतरपरत्वाद् वाक्यभेदे शङ्किते तन्निरासार्थमधिकरणमित्याह—**नेत्यादिना। तस्मात्** अनन्तरोक्ताद् यस्येत्यादिवाक्यादिति यावत्। प्रकृताधिकरणं सप्तम्यर्थः। यत्तु वाक्यशेषे प्राणशब्दान्मुख्यप्राणार्थं वाक्यमिति, तत्राह—**प्राणेति**। मनस्तदुपाधिको जीवः। प्राणबन्धनं परमात्माश्रयः। यत्तु वाक्यशेषे जीवलिङ्गं दृष्टमिति, तत्राह—**जीवेति**।।१७।।

जीवलिङ्गेनापि लक्ष्यते प्रत्यग्ब्रह्मेत्युक्तम्। इदानीं तल्लिङ्गाज्जीवोक्तिमुपेत्य वाक्यतात्पर्यगम्यं ब्रह्मैवेत्याह—**अन्यार्थं त्विति**।

अपि च नैवात्र विवदितव्यं जीवप्रधानं वेदं वाक्यं स्याद् ब्रह्मप्रधानं वेति। यतोऽन्यार्थं जीवपरामर्शं ब्रह्मप्रतिपत्त्यर्थमस्मिन् वाक्ये जैमिनिराचार्यो मन्यते। कस्मात्? प्रश्नव्याख्यानाभ्याम्। प्रश्नस्तावत् सुप्तपुरुषप्रतिबोधनेन प्राणादिव्यतिरिक्ते जीवे प्रतिबोधिते पुनर्जीवव्यतिरिक्तविषयो दृश्यते— 'क्वैष एतद् बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत् कुत एतदागात्' (कौ. ब्रा. ४।१८) इति। प्रतिवचनमपि 'यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन् प्राण एवैकधा भवति' इत्यादि, 'एतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः' (कौ.ब्रा. ४।१९) इति च। सुषुप्तिकाले च परेण ब्रह्मणा जीव एकतां गच्छति; परस्माच्च ब्रह्मणः प्राणादिकं जगज्जायत इति वेदान्तमर्यादा। तस्माद्यत्रास्य जीवस्य निःसंबोधतास्वच्छतारूपः[1] स्वाप उपाधिजनितविशेषविज्ञानरहितं स्वरूपं, यतस्तद्भ्रंशरूपमागमनं, सोऽत्र परमात्मा वेदितव्यतया श्रावित इति गम्यते। अपि चैवमेके शाखिनो वाजसनेयिनोऽस्मिन्नेव

प्रकटार्थविवरणम्

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके। इतश्च ब्रह्मलिङ्गानुरोधेनैव जीवलङ्गिं नेतव्यमित्याह—**अपि चेति।** भो बालाके एष पुरुषः क्वाशयिष्ट कुत्र शयनं कृतवानित्येतत् किं जानासि? क्व वा एतच्चक्षुरादिकं[2] स्थितं कुतो वा प्रबोधकाले आगादागतमित्यर्थः। ननु प्रतिवचने "प्राण एवैकधा भवति" इति श्रूयते; अतः प्रश्नप्रतिवचने न ब्रह्मविषये इत्याशङ्क्याह—**सुषुप्तिकाले चेति।** प्रश्नप्रतिवचनयोः ब्रह्मविषयत्वे शाखान्तरसंवादमाह—**अपि चैवमिति।** ननु तत्राप्याकाशे शयनं श्रूयते,न

भाष्यभावप्रकाशिका

तल्लिङ्गाज्जीवस्यैव ग्रहणमङ्गीकृत्य ब्रह्मण एव वाक्यतात्पर्यविषयत्वं दर्शयति—**अपि चेति। प्रश्नस्तावत्सुषुप्तपुरुषेति।** जीवाधिकरण-भवनापादानविषयत्वाज्जीवातिरिक्तविषय इत्यर्थः। ननु तथापि ब्रह्मैवैतदिति कथं निर्णय इति? तत्राह—**एतस्मादिति।** सर्वकारणत्व-प्रतिपादनादिति भावः। सर्ववेदान्तसिद्धं चैतदित्याह—**सुषुप्तिकाले चेति।** उपसंहारव्याजेनैतदुपपादयति—**तस्माद्यत्रेति।** यतो निःसंबोधः, अतः स्वस्थतारूपः, विक्षेपाभावात्। एतदेव विभजते—**उपाधिजनितेति।** तद्भ्रंशः स्वापभ्रंशः। न केवलं कौषीतकीनाम्, वाजसनेयिनामपि जीवातिरिक्तात्मा नास्तीत्याह—**अपि चैवमिति।** ननु आकाशः शयनस्थानम्, न परमात्मेत्याशङ्क्याह—**आकाशशब्द इति।**

न्यायनिर्णयः

इतश्च वाक्यं ब्रह्मार्थमेवेति सूत्रं व्याकरोति—**अपि चेति।** तत्र तुशब्दं व्याकुर्वन् प्रतिजानीते—**नैवेति।** तत्र हेतुत्वेनान्यार्थमित्यादि विभजते—**यत इति।** जीवपरामर्शस्य ब्रह्मप्रतिपत्त्यर्थत्वे हेतुं पृच्छति—**कस्मादिति।** सौत्रं पदमादाय प्रश्नं व्याचष्टे—**प्रश्न इति।** जीवाधिकरणभवनापादानविषयत्वाज्जीवातिरिक्तार्थता प्रश्नस्येत्यर्थः। तत्राधिकरणप्रश्नमुदाहरति—**क्वैष इति।** हे बालाके, शयनमेतद्यथा तथैष पुरुषः कस्मिन्नधिकरणे स्वापे शयनं कृतवानित्यर्थः। भवनायतनं पृच्छति—**क्वेति।** एतद्भवनं यथा स्यात् तथा क्वाश्रये सुप्तोऽभूदित्यर्थः। स्वापे शयनभवनयोराधारं पृष्ट्वोत्थानावस्थायामागमनापादानं पृच्छति—**कुत इति।** एतदागमनं यथा तथा कस्मादुद्बोधदशायामागादुत्थानं कृतवानित्यर्थः। व्याख्यानं व्याचष्टे—**प्रतिवचनमिति।** तत्र प्राणशब्दात् कुतो ब्रह्मधीः, तत्राह—**एतस्मादिति।** सर्वकारणत्वोक्तेरत्र ब्रह्म सिद्धमित्यर्थः। सर्ववेदान्तप्रसिद्धं चैतदित्याह—**सुषुप्तीति।** उक्तमर्थमुप-संहारव्याजेनोपपादयति—**तस्मादिति।** यतो निःसंबोधः स्वच्छतारूपः स्वापो विक्षेपाभावात्, सोऽस्य जीवस्य यत्र भवति स परमात्मेत्ति योज्यम्। ननु निःसंबोधत्वं स्वापस्यासिद्धं, 'न हि द्रष्टुः' इत्यादिश्रुतेः, तत्राह—**उपाधीति।** अत एवोक्तं 'पश्यन्वै तत्र पश्यति' इति। आगत्यपादानमपि ब्रह्मैवेत्याह—**यत इति।** तद्भ्रंशेत्यत्र तच्छब्दः स्वापार्थः। न केवलं कौषीतकिनां प्रश्नादिना जीवातिरिक्ताम्नानं, किंतु वाजसनेयिनामपीत्याह—**अपि चेति।** तदेति स्वापोक्तिः। नन्वाकाशस्तत्र शयनस्थानमुक्तं, न ब्रह्म,

---

१. 'निःसंवोधस्वस्थतारूपः' इति पा.। २. चक्षुरादिकमिति। एतद् व्याख्यानं खण्डितं ब्रह्मविद्याभरणे प्रश्नोत्तरत्रिकद्वयस्यापि जीवातिरिक्त-विषयकत्वप्रदर्शनवेलायाम्। द्र. ब्र. वि. ५३९। पूर्वाधिकरणन्यायेनैव सिद्धे कृत्वाचिन्तयेदमधिकरणमिति न्यायरक्षामणिः। द्र. ३९४-३९७।

बालाक्यजातशत्रुसंवादे स्पष्टं विज्ञानमयशब्देन जीवमाम्नाय तद्व्यतिरिक्तं परमात्मानमामनन्ति— 'य एष विज्ञानमयः पुरुषः क्वैष तदाऽभूत् कुत एतदागात्' (बृ.उ. २।१।१६) इति प्रश्ने। प्रतिवचनेऽपि 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते' (बृ.उ. २।१।१७) इति। आकाशशब्दश्च परमात्मनि प्रयुक्तः 'दहरोऽस्मिन्नन्तराकाशः' (छा.उ. ८।१।१) इत्यत्र। 'सर्व एत आत्मानो व्युच्चरन्ति' (बृ.उ.मा. २।१।२३) इति चोपाधिमतामात्मनामन्यतो व्युच्चरणमामनन्तः परमात्मानमेव कारणत्वेनाऽऽमनन्तीति गम्यते। प्राणनिराकरणस्यापि सुषुप्तपुरुषोत्थापनेन प्राणादिव्यतिरिक्तोपदेशोऽभ्युच्चयः।।१८।।

।।इति पञ्चमं जगद्वाचित्वाधिकरणम्।।

शारीरकन्यायसंग्रहः

६।।वाक्यान्वयाधिकरणम्।।सू. १९-२२।।

वाक्यान्वयात्।।१९।। प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः।।२०।। उत्क्रमिष्यत एवंभावादित्यौडुलोमिः।।२१।। अवस्थितेरिति काशकृत्स्नः।।२२।। नेह जीवब्रह्मलिङ्गेष्वेकस्मिन् वाक्ये सन्निविष्टेषु ब्रह्मणः सर्वात्मत्वसिद्धये जीवलिङ्गानि ब्रह्मण्येव योज्यन्ते, प्रतर्दनाधिकरणे सिद्धत्वात्; नापि जीवलिङ्गैः प्रसिद्धं जीवमनूद्याप्रसिद्धब्रह्मता निर्णीयते, सुषुप्त्युत्क्रान्त्यधिकरणे सिद्धत्वात्, किन्तु जीवब्रह्मणोरुद्देश्योपादेययोर्भेदोऽप्यपेक्षित इति भेदाभेदपरं सामानाधिकरण्यम् इति प्राप्ते कार्यकारणभावशून्ययोर्द्रव्ययोरुद्देश्योपादेयभावेन सामानाधिकरण्यमेकस्यैव सतो द्रव्यस्योपाधिपरिकल्पितभेदापेक्षम्, न तु द्रव्यभेदापेक्षम्; 'घटाकाशो महाकाशः', 'सोऽयं देवदत्तः,' इत्यादिषु दर्शनात् इति न्यायेन जीवब्रह्मणोरत्यन्तैक्यमेव दर्शितम्। तथा च लिङ्गम्—आत्मशब्देनोपक्रान्तस्य जीवस्य धर्मिणो धर्म्यन्तरोपादानमन्तरेण ब्रह्मधर्मैर्वाक्यपरिसमाप्तेर्विशिष्टतया प्रतिपादनं धर्मिभेदं निरुणद्धि। भेदाभेदौ तु लोकवज्जीवब्रह्मणोरप्यनुमानेन सिद्धेः न शास्त्रगम्यावित्यत्यन्तैक्यमेव साधितम्।

प्रकटार्थविवरणम्

ब्रह्मणीत्याशङ्क्याह—**आकाशशब्दश्चेति**। इतश्च तत्र परमात्मैव विवक्षितो भूताकाशाज्जीवानां निर्गमायोगात्, प्रतिबिम्बभेदभ्रमस्य च बिम्बाधिष्ठानत्वात् इत्याह—**सर्व एत इति**। एवं जीवनिराकरणपरतया सूत्रं व्याख्याय प्राणनिराकरणेऽप्यतिदिशति—**प्राणेति**। सुषुप्तावामन्त्रणशब्दाश्रवणेन व्यतिरेकप्रतिपादनं व्याख्यानमत्र द्रष्टव्यम्। ताभ्यां प्रश्नव्याख्यानाभ्यां प्राणशब्दमन्यार्थम्, न प्राणोपदेशपरं मन्यते जैमिनिरिति योजना।

।। इति पञ्चमं जगद्वाचित्वाधिकरणम् ।।

भाष्यभावप्रकाशिका

अन्तःकरणाधारत्वेऽपि पुरीतदाकाशस्य परमात्मन एव जीवाधारत्वमित्यर्थः। न केवलं जीवनिरासायेदं सूत्रम्, प्राणनिरासायापीत्याह—**प्राणेति**। "यत्रैष एतत्सुप्तोऽभूदि"त्यादिप्राणादिव्यतिरिक्तोपदेशो द्रष्टव्यः। प्राणव्यतिरिक्ताज्जीवादपि व्यतिरिक्तविषयप्रश्नव्याख्यानाभ्यां प्राणस्याप्रतिपाद्यत्वं सुतरां ख्यापितं भवतीति भावः।।१८।। इति पञ्चमं जगद्वाचित्वाधिकरणम्।

न्यायनिर्णयः

तत्राह—**आकाशेति**। इतश्च प्रत्युक्तेर्ब्रह्मार्थतेत्याह—**सर्व इति**। जीवनिरासतया सूत्रं व्याख्याय प्राणनिरासेऽपि तस्य तात्पर्यमाह—**प्राणेति**। अस्मिन् वाक्ये प्राणोपदेशमन्यार्थमेवातिरिक्तात्मप्रतिपत्त्यर्थं **जैमिनिर्मन्यते**। प्राणातिरिक्ताज्जीवादपि व्यतिरिक्तार्थाभ्यामुक्तप्रश्नप्रत्युक्तिभ्यां प्राणमात्रे वाक्यस्यापर्यवसानात्। किंच वाजसनेयिनोऽपि 'यत्रैष एतत्' इत्यादिना प्राणादिव्यतिरिक्तं जीवं वदन्तो वाक्यस्य परस्मिन् पर्यवसानं पश्यन्तीति सूत्रस्यात्र योजना। तदेवं जीवप्राणातिरिक्ते ब्रह्मणि दर्शितवाक्यान्वयादनपवादं वेदान्तानां ब्रह्मणि गतिसामान्यमिति।।१८।।

।।इति पञ्चमं जगद्वाचित्वाधिकरणम्।।

६।। वाक्यान्वयाधिकरणम्।। सू. १९-२२।।

वाक्यान्वयात्।।१९।।

बृहदारण्यके मैत्रेयीब्राह्मणेऽधीयते— 'न वा अरे पत्युः कामाय' इत्युपक्रम्य 'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्' (बृ.उ. २।४।५) इति। तत्रैतद् विचिकित्स्यते— किं विज्ञानात्मैवायं द्रष्टव्यश्रोतव्यत्वादिरूपेणोपदिश्यत आहोस्वित् परमात्मेति। कुतः पुनरेषा विचिकित्सा? प्रियसंसूचितेनात्मना भोक्त्रोपक्रमाद् विज्ञानात्मोपदेश इति प्रतिभाति; तथाऽऽत्मविज्ञानेन सर्वविज्ञानोपदेशात् परमात्मोपदेश इति। किं तावत् प्राप्तम्? विज्ञानात्मोपदेश इति। कस्मात्? उपक्रमसामर्थ्यात्। पतिजायापुत्रवित्तादिकं हि भोग्यभूतं सर्वं जगदात्मार्थतया प्रियं भवतीति प्रियसंसूचितं भोक्तारमात्मानमुपक्रम्यानन्तरमिदमात्मनो दर्शनाद्युपदिश्यमानं कस्यान्यस्यात्मनः स्यात्।

प्रकटार्थविवरणम्

वाक्यान्वयात्। विषयवाक्यमाह—**बृहदारण्यक इति।** उभयलिङ्गदर्शनात् संशयमाह—**तत्रैतद्विचिकित्स्यत इति।** पूर्वत्र ब्रह्मोपक्रमसामर्थ्याद् ब्रह्मपरत्वं निर्णीतम्; इह तु 'जीवोपक्रमात् जीवपरत्वमित्याह—**विज्ञानात्मोपदेश इति।**

भाष्यभावप्रकाशिका

वाक्यान्वयात्।।१९।। वैराग्यार्थं पत्यादीनां सोपाधिकं प्रियत्वमिति दर्शयतीत्याह—**न वा अर इति।** कामाय प्रयोजनाय। संशयकारणं पृच्छति—**कुत इति। प्रियसंसूचितेनेति।** पतिजायादिप्रियैर्भोग्यैरनुमितेन भोक्त्रेत्यर्थः। ननु जीवस्योपक्रान्तत्वेऽपि द्रष्टव्यत्वेन परमात्माऽप्युपदिश्यत इत्याशङ्क्याह—**अनन्तरमिदमिति।** ब्रह्मणो द्रष्टव्यत्वे तस्य विज्ञानात्मभावेन

न्यायनिर्णयः

जीवेतरपरविषयत्वे प्रश्नादिना वाक्यस्योक्ते जीवपरभेदमाशङ्क्यात्मशब्दोपक्रान्तस्य ब्रह्मधर्मवत्तया मैत्रेयीब्राह्मणे निर्देशादौपाधिको भेदो वास्तवमैक्यमित्याह—**वाक्येति।** विषयवाक्यमादत्ते—**बृहदिति।** आत्मशेषत्वेन पत्यादेः सर्वस्य प्रियत्वादनन्यार्थतया निरुपाधिप्रियत्वेनानतिशयानन्दस्यात्मनो ज्ञातव्यत्वं मत्वाऽऽह—**न वा इति।** आत्मनो दर्शनयोग्यतामुक्त्वा तद्दर्शनमनूद्य तद्धेतुत्वेनाङ्गाङ्गितया श्रवणादीनि दर्शयति—**आत्मेति।** आत्मवेदने वेदितव्यान्तराभावात् कृतकृत्यतेत्याह—**आत्मन इति।** उक्तवाक्यस्थमात्मानमधिकृत्य संशयमाह—**तत्रेति।** प्रश्नपूर्वकं जीवब्रह्मलिङ्गदर्शनं संशयहेतुमाह—**कुत इति। प्रियसंसूचितेन** पतिजायादिभिः प्रियैर्भोग्यैरनुमितेन भोक्त्रेत्यर्थः। विमृश्य पूर्वपक्षयति—**किं तावदिति।** सत्युभयलिङ्गे विशेषदृष्टौ हेतुं पृच्छति—**कस्मादिति।** ब्रह्मोपक्रमात् तत्परत्ववदत्रापि जीवोपक्रमात् तत्परतेत्याह—**उपक्रमेति।** मैत्रेयीब्राह्मणस्य जीवमात्र[पर]त्वं निषिध्य ब्रह्मण्यन्वयोक्त्या गतिसामान्यदृढीकरणात् पादादिसंगतिः। पूर्वपक्षे ब्राह्मणस्य भोक्त्रर्थतया गतिसामान्यासिद्धौ ब्रह्मकारणत्वासिद्धिः, सिद्धान्ते तस्य प्रत्यग्ब्रह्मार्थत्वेन गतिसामान्यसिद्धेस्तत्सिद्धिरिति फलभेदः। उपक्रमसामर्थ्यमेव स्फुटयन्नुपक्रमं दर्शयति—**पतीति।** जीवस्योपक्रान्तत्वेऽपि परस्य द्रष्टव्यत्वमाशङ्क्य तत्सामर्थ्यं कथयति—**अनन्तरमिति।** अन्यस्य दर्शनाद्युक्तावुपक्रमो भज्येतेत्यर्थः।

---

१. ननु 'येनाहं नामृता स्यां किमहं तेन कुर्या'मिति अन्यत् निराकृत्य 'अमृतत्वसाधनमेव ब्रूहि' इति अमृतत्वसाधनज्ञानविषयेण परमोपक्रमात् तस्य च ब्रह्मत्वात् कथं जीवविषय उपक्रमः? उच्यते। प्रकृतिविविक्तात्मज्ञानं मोक्षसाधनमिति पूर्वपक्षी मन्यते। अतस्तन्मतेऽमृतत्वसाधनज्ञानविषयत्वं जीवस्येत्युपक्रमो न विरुध्यते। अत एव कृत्वाचिन्तया प्रवर्तितमिदमधिकरणमिति। द्र. ब्र. वि. ५४२।

अत्र 'न वा अरे पत्युःकामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति' इत्यादिवाक्यसंदर्भस्य 'आत्मा वा अरे द्रष्टव्यः' इति विधिशेषतया तत्र चात्मपदस्य परमात्मपरत्वात् एकवाक्यतानिर्वाहाय एतत्संदर्भगतानामात्मशब्दानां परमात्मपरत्वमाश्रित्य व्याचक्षते मतान्तरीयाः। आत्मशब्दस्येश्वरसाधारणत्वेऽपि पत्यादिसमभिव्याहारेण तत्प्रतिसम्बन्धिनो जायादिजीवात्मन एव स्वरसत आत्मशब्दादुपस्थितेः, प्रसिद्धिद्योतक 'वै' शब्दश्रवणेन च तस्यैवात्मशब्दार्थत्वौचित्यात् तत् न युक्तमिति। अत एवोपक्रमगतस्य जीवपरामर्शस्य गतिप्रदर्शनार्था 'प्रतिज्ञासिद्धेः'— इत्यादित्रिसूत्री; विस्तरस्तु न्यायरक्षामणौ ब्रह्मविद्याभरणे च द्रष्टव्यः।

मध्येऽपि 'इदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ति' (बृ.उ २।४।१२) इति 'प्रकृतस्यैव महतो भूतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन ब्रुवन् विज्ञानात्मन एवेदं द्रष्टव्यत्वं दर्शयति। तथा 'विज्ञातारमरे केन विजानीयात्' (बृ.उ. २।४।१४) इति कर्तृवचनेन शब्देनोपसंहरन् विज्ञानात्मानमेवेहोपदिष्टं दर्शयति। तस्मादात्मविज्ञानेन सर्वविज्ञानवचनं भोक्त्रर्थत्वाद् भोग्यजातस्यौपचारिकं द्रष्टव्यमिति।

प्रकटार्थविवरणम्

उद्देश्योपादेययोः [2]भेदोऽपि वक्तव्य इति भेदाभेदपरतानिराकरणायाधिकरणारम्भः। इतश्च ब्रह्मणो भिन्नाभिन्नपरं वाक्यमित्याह—**मध्येऽपीति**। इदं प्रकृतं महद् ब्रह्म भूतं सत्यमनन्तं नित्यमपारं सर्वगं विज्ञानघन एवोपाधौ प्रतिबिम्बिततया जीवरूपापन्नमेतेभ्यो भूतेभ्यः समुत्थाय प्रतिबिम्बमिव दर्पणादेः तानि भूतान्युपाधिरूपाणि यदा नश्यन्ति तदा तन्नाशमनु नश्यति विशेषमुपाधिकृतं जहाति प्रेत्य तथाभूतं नाशमनुभूय न संज्ञा विशेषपरिज्ञानं भवति, अन्तःकरणापायेऽप्रमातृत्वादित्यर्थः। किञ्च कर्तृविहिततृजन्तत्वेन [3]विज्ञातृशब्देनोपसंहारादपि जीवस्य विज्ञेयत्वमित्याह—**तथा विज्ञातारमिति**। कथं तर्ह्येकविज्ञानेन सर्वविज्ञानमित्याशङ्क्याह—**तस्मादिति**।

भाष्यभावप्रकाशिका

समुत्थानाभिधानस्यानुपयुक्तत्वादपि जीवस्यैव द्रष्टव्यत्वमित्याह—**मध्येऽपीति**। महद्भूतम् सत्यम्, अनन्तम् नित्यम्, अपारम् सर्वगम्, विज्ञानघनः विज्ञानैकरसम् एव। एतेभ्यः कार्यकारणपरिणतेभ्यः समुत्थाय साम्येनोत्थायेत्यर्थः। ज्ञानकर्तृत्वेन व्यपदेशादुपसंहारस्यापि जीवपरत्वमाह—**तथा विज्ञातारमिति**। ननु जीवपरिग्रहे कथमेकविज्ञानेन सर्वविज्ञानमवकल्पत इत्याशङ्क्य, उपक्रमादिपर्यालोचनया जीवस्यावगमादौपचारिकं तदित्याह—**तस्मादिति**। भोग्यजातं प्रति भोक्तुः प्राधान्यादित्यर्थः।

न्यायनिर्णयः

इतश्च जीवस्यैव द्रष्टव्यतेत्याह—**मध्येऽपीति**। इदं प्रत्यक्तत्त्वम्। महदनवच्छिन्नम्। भूतं परमार्थसत्यम्। अनन्तं नित्यम्। अपारं सर्वगतम्। विज्ञानघनो विज्ञानमात्रम्। तत्र जात्यन्तरासंमिश्रत्वमेवार्थः। स [ए]वैतेभ्यः कार्यकारणाकारपरिणतेभ्योऽविद्याभूतेभ्यो भूतेभ्यः साम्येनोत्थाय जीवत्वमनुभूय तान्येव भूतानि ज्ञानाद् विनश्यन्त्यनु पश्चाद् विनश्यति विशेषात्मत्वं त्यजति। न च तत्त्यागानन्तरमस्य रूपादिधीरस्तीत्यर्थः। ब्रह्मणो द्रष्टव्यत्वे तस्य जीवत्वेनोत्थानोक्तेरयोगात् तस्यैवात्र द्रष्टव्यतेति वाक्यार्थं संगृह्णाति—**प्रकृतस्येति**। ज्ञानकर्तृत्वोक्तेरुपक्रमादिवदुपसंहारस्यापि जीवपरत्वमाह—**तथेति**। जीवपक्षे कथमेकविज्ञानेन सर्वविज्ञानमित्याशङ्क्योपक्रमादिना तदौपचारिकमित्याह—**तस्मादिति**। भोक्तुर्भोग्यं प्रति प्राधान्यात् तज्ज्ञाने तद्धीरुपचरितेत्यर्थः।

---

१. एवं च 'इदं महद् भूत'मिति वाक्यस्य प्रकृतद्रष्टव्यात्मपरत्वे प्रकृतपरामर्शक'मिद'मिति सर्वनामैव नियामकमिति सूचितम्। 'अस्य महतो भूतस्य निःश्वसितमेतद्' इत्यादिवाक्यगतस्य महतो भूतस्य अत्र प्रत्यभिज्ञानाच्च। तत्र हि अस्येति पदं प्रकृतात्मपरं निर्विवादम्। द्र. ब्र. वि. ५४५।

२. उपादेयता = विधेयता। तादात्म्येन विधेयतास्थले उद्देश्यविधेययोः भेदोऽप्यावश्यकः। अत्यन्ताभेदे तददर्शनात्। न हि भवति 'घटो घटः' इति। अतो भेदसमानाधिकरणोऽभेद एव सामानाधिकरण्यस्थले संसर्गतया भासत इत्युपेयम्। सति चैवं 'तत्त्वमसि' इत्यत्रापि तन्निर्वाहार्थं भेदाभेदौ वक्तव्यौ इति जीवब्रह्मणोर्भेदाभेदौ इति शङ्कानिरासकमिदमधिकरणमिति भावः।

एतेन-जीवलिङ्गानां ब्रह्मपरत्वकथनार्थमिदमधिकरणं न भवति, प्रतर्दनाधिकरणे कथितत्वात्। नापि जीवानुवादेन ब्रह्मप्रतिपादनार्थम्, 'सुषुप्त्युत्क्रान्त्योः' इत्यत्र गतत्वात्। अतो व्यर्थमिदमधिकरणमिति निरस्तम्। जीवोद्देशेन ब्रह्मत्वप्रतिपादने भेदोऽप्यावश्यक इति भेदाभेदशङ्काप्राप्तौ कल्पितभेदेनोद्देश्यत्वादिकम्, स्वतोऽत्यन्ताभेदः इति ज्ञापनार्थमस्यारम्भात्। ज्ञापने चात्र लिङ्गमात्मशब्देनोपक्रान्तस्य जीवस्य धर्मिणः, ब्रह्मणो धर्म्यन्तरस्य ग्रहणं विनैव ब्रह्मधर्मकथनम्। भेदाभेदे धर्मिद्वयस्य ग्रहः स्यादिति मन्तव्यम्। रत्न, ३३२।

३. विज्ञातृशब्देनेति। न च विज्ञातृपदेन विशिष्टज्ञानवान् सर्वज्ञः परमात्माऽपि वक्तुं शक्य इति वाच्यम्। विज्ञानशब्दस्यान्तःकरणपरिणामभूतज्ञाने रूढत्वात्, अस्मिन्नेव प्रकरणे 'तदितर इतरं विजानाति' 'तत् केन कं विजानीयात्' इति जीवधर्मस्यैव विपूर्वकज्ञाधातुनाऽभिधानात्।

एवं प्राप्ते ब्रूमः– परमात्मोपदेश एवायम्। कस्मात्? वाक्यान्वयात्। वाक्यं हीदं पौर्वापर्येणावेक्ष्यमाणं परमात्मानं प्रति अन्वितावयवं लक्ष्यते। कथमिति, तदुपपाद्यते– 'अमृतत्वस्य तु नाशाऽस्ति वित्तेन' (बृ.उ २।४।२) इति याज्ञवल्क्यादुपश्रुत्य 'येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान् वेद तदेव मे ब्रूहि' (बृ.उ. २।४।३) इत्यमृतत्वमाशासानाया मैत्रेय्या[1] याज्ञवल्क्य आत्मविज्ञानमिदमुपदिशति। न चान्यत्र परमात्मविज्ञानादमृतत्वमस्तीति श्रुतिस्मृतिवादा वदन्ति। तथा चात्मविज्ञानेन सर्वविज्ञानमुच्यमानं नान्यत्र परमकारणविज्ञानान्मुख्यमवकल्पते। न चैतदौपचारिकमाश्रयितुं शक्यम्, यत्कारणमात्मविज्ञानेन सर्वविज्ञानं प्रतिज्ञायानन्तरेण ग्रन्थेन तदेवोपपादयति[2]– 'ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद' (बृ.उ. २।४।६) इत्यादिना। यो हि ब्रह्मक्षत्रादिकं जगदात्मनोऽन्यत्र स्वातन्त्र्येण लब्धसद्भावं पश्यति तं मिथ्यादर्शिनं तदेव मिथ्यादृष्टं ब्रह्मक्षत्रादिकं जगत् पराकरोतीति भेददृष्टिमपोद्य 'इदं सर्वं यदयमात्मा' (बृ.उ. २।४।६) इति

प्रकटार्थविवरणम्

[3]प्रतिज्ञाध्याहारेण सूत्रमवतारयति—**परमात्मोपदेश एवायमिति**। अमृतत्वं प्रार्थयन्त्यै मैत्रेय्या उपदिष्टत्वात्, एकविज्ञानेन सर्वविज्ञानाभिधानाच्चात्यन्तिकमैक्यमिह विवक्षितमिति भावः। यदुक्तमौपचारिकत्वं, तत्राह—**न चैतदौपचारिकमिति**। न ह्यौपचारिकमविवक्षितं तात्पर्येण प्रतिपादनीयमिति भावः। ब्रह्मेति ब्राह्मणजातिः। तं भेददर्शिनं श्रेयोमार्गात् परादात् पराकुर्यादित्यर्थः।

भाष्यभावप्रकाशिका

अमृतत्वायोपदिश्यमानमपि जीवज्ञानं किं न स्यादिति? अत आह— **न चान्यत्रेति**। परमात्मनः कारणत्वात् तज्ज्ञानात् सर्वविज्ञानमुपपन्नमित्याह—**परमकारणेति**। ननु मुख्यमेव न भवतीति, तत्राह—**न चैतदिति**। उपपादनवैयर्थ्यप्रसङ्गादित्यर्थः। भेददर्शननिन्दापूर्वकमभेदं प्रतिपादयदिदं वाक्यमेकविज्ञानेन सर्वविज्ञानोपपादकमिति प्रदर्शयितुमन्यार्थमाह—**यो हीति**। पराकरोति अमृतत्वात् पराकुर्यादिति यावत्। आत्मैव जगतस्तत्त्वम्, न तु तदतिरिक्तमिति दृष्टान्त प्रबन्धेन प्रतिपादयन्ती श्रुतिरेकविज्ञानेन

न्यायनिर्णयः

आदिमध्यावसानेभ्यो मैत्रेयीब्राह्मणस्य जीवेऽन्वयान्न ब्रह्मणि गतिसामान्यमित्येतदनूद्य सिद्धान्तमवतार्य बहिरेव प्रतिजानीते—**एवमिति**। जीवोपदेशस्य दर्शितत्वान्नियमासिद्धिरित्याह—**कस्मादिति**। नियामकं सूत्रमादायाक्षराणि व्याचष्टे—**वाक्येति**। आदिमध्यावसानेषु जीवे भाति ब्रह्म प्रति वाक्यस्यान्वितावयवत्वं नेति शङ्कते—**कथमिति**। जीवपरामर्शस्यान्यथासिद्धिं वक्ष्यमाणां विवक्षित्वाऽऽह—**तदिति**। वित्तेन तत्साध्येन कर्मणेत्यर्थः। कर्मसाधनं वित्तं न चेदिष्टम्, किं तर्हि तवेष्टं, तदाह—**यदेवेति**। अमृतत्वसाधनत्वेनात्मज्ञानस्योक्तेरात्मनो ज्ञातव्यस्य ब्रह्मतेत्यर्थः। अमृतत्वायोक्तमपि ज्ञानं जीवविषयं स्यादित्याशङ्क्याह—**न चेति**। ब्रह्मज्ञानं विना नामृतत्वमित्यत्र मानमाह—**इति श्रुतीति**। 'नान्यः पन्थाः' 'न कर्मणा' इत्यादयः श्रुतिवादाः। 'ज्ञानादेव तु कैवल्यम्' इत्यादयः स्मृतिवादाः। इतश्च ब्रह्मपरमेव वाक्यमित्याह—**तथेति**। परस्य परमकारणत्वात् तज्ज्ञानाद् युक्तं सर्वज्ञानमिति विशिनष्टि—**परमेति**। भोक्त्रर्थत्वाद्भोग्यजातस्य सर्वविज्ञानं जीवेऽपि गौणं स्यात्, किं मुख्येनेत्याशङ्क्य प्रतिपादनवैयर्थ्यान्मैवमित्याह—**न चेति**। भेददृष्टिनिन्दापूर्वकमभेदं वददिदं वाक्यमेकविज्ञानेन सर्वविज्ञानं वक्तीति वक्तुमस्यार्थमाह—**यो हीति**। जगतो ब्रह्माधीनस्य प्रातीतिकमन्यत्वमनुज्ञातुं **स्वातन्त्र्येणेत्युक्तम्**। **पराकरोति** पुरुषार्थात्पराकुर्यात्। प्रच्यावयेदिति यावत्। किंचात्मैव जगतस्तत्त्वमिति

---

१. 'आशासानायै मैत्रेय्यै' इति पा। २. तथा च उपपत्तिरूपतात्पर्यलिङ्गात् न तस्य गौणत्वं युक्तमिति भावः। अत्र च एकविज्ञानेन सर्वविज्ञानं न तज्जन्यं भिन्नं ज्ञानं विवक्षितं, किन्तु आत्मविज्ञानमेव सर्वस्य तत्त्वविज्ञानं विवक्षितम्। अभेदे तृतीया। एकविज्ञानाभिन्नं तत्त्वतः सर्वविज्ञानमित्यर्थः। एवं ब्रह्मज्ञानेन सर्वं तत्त्वतो विज्ञातं भवतीत्यस्य ब्रह्मज्ञानाभिन्नं यत् तत्त्वतो ज्ञानं तद्विषयः सर्वम् इत्यर्थः। स्वीयतत्त्वज्ञानाभिन्नज्ञानविषयब्रह्मकं सर्वमिति यावत्। द्र. शांकरपादभूषणम्. पृ. ७२७।

३. मैत्रेयीब्राह्मणं परमात्मपरमेव इति प्रतिज्ञायाः अध्याहारः। वाक्यान्वयात् = उपक्रमोपसंहारैकरूप्यात्। अमृतत्वोपक्रमोपसंहारैकरूप्यात् निर्विशेषप्रत्यगभिन्नात्मपरतैव निश्चीयत इति भावः।

सर्वस्य वस्तुजातस्यात्माव्यतिरेकमवतारयति। 'दुन्दुभ्यादिदृष्टान्तैश्च तमेवाव्यतिरेकं द्रढयति। 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' (बृ.उ. ४।५।१०) इत्यादिना च प्रकृतस्यात्मनो नामरूपकर्मप्रपञ्चकारणतां व्याचक्षाणः परमात्मानमेनं गमयति। तथैवैकायन[2]प्रक्रियायामपि सविषयस्य सेन्द्रियस्य सान्तःकरणस्य प्रपञ्चस्यैकायनमनन्तरमबाह्यं कृत्स्नं प्रज्ञानघनं व्याचक्षाणः परमात्मानमेनं गमयति। तस्मात् परमात्मन एवायं दर्शनाद्युपदेश इति गम्यते।।१९।।

यत्पुनरुक्तं प्रियसंसूचितोपक्रमाद् विज्ञानात्मन एवायं दर्शनाद्युपदेश इति। अत्र ब्रूमः-

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः।।२०।।

प्रकटार्थविवरणम्

दुन्दुभिशङ्खवीणादृष्टान्तैश्च सामान्यग्रहणेन विशेषग्रहणं ब्रुवन् वस्तुभेदाभावं दृढं करोतीत्यर्थः। किञ्च सर्वस्रष्टृत्वादपि परमात्मत्वनिश्चय इत्याह—**अस्य महत इति**। 'यथा सर्वासामपां समुद्र एकायन'मित्यादिना सकलप्रलयाधारत्वप्रतिपादनादपि परमात्मत्वमित्याह—**तथैकायनप्रक्रिययाऽपीति**।

भाष्यभावप्रकाशिका

सर्वविज्ञानमुपपादयतीत्याह—**दुन्दुभ्यादीति**। यथा दुन्दुभेर्हन्यमानस्य, यथा शङ्खस्य ध्मायमानस्य, यथा वीणायै वाद्यमानायै न बाह्यान् शब्दान् शक्नुयाद् ग्रहणायेत्यादिदृष्टान्तैः दुन्दुभ्यादिशब्दसामान्याद् दुन्दुभ्यादिशब्दभेदाः पृथगगृह्यमाणरजतवत् तत्र परिकल्पिता यथा, तथा चिद्रूपस्फुरणं विना स्थितिकाले स्फुरणशून्यं जगच्चिद्रूपे परिकल्पितमिदमिति प्रतिपादितमित्यर्थः। एवमेकविज्ञानेन सर्वविज्ञानस्योपपाद्यमानत्वादनौपचारिकं तदिति परमात्मविषयमिदं प्रकरणमित्युक्तम्, इदानीं द्रष्टव्यत्वेनाभिहितस्य जगत्कारणताभिधानादपि द्रष्टव्यादिवाक्यं परमात्मविषयमित्याह—**अस्य महत इति**। **एकायनप्रक्रिययेति**। सा तथा ['स यथा] सर्वासामपां समुद्र एकायन'मिति दृष्टान्तेन समस्तजगदधिष्ठानतया परमात्मा प्रतिपाद्यत इत्यर्थः।।१९।।

न्यायनिर्णयः

दृष्टान्तेन वदन्ती श्रुतिरेकधिया सर्वधियं साधयतीत्याह—**दुन्दुभ्यादीति**। यथा दुन्दुभेर्हन्यमानस्य, यथा शङ्खस्य ध्मायमानस्य, यथा वीणायै वाद्यमानायै न बाह्याञ्शब्दाञ्शक्नुयाद् ग्रहणायेत्यादिदृष्टान्तैर्दुन्दुभ्यादिशब्दसामान्याद्दुन्दुभ्यादिशब्दभेदा भेदेनागृह्यमाणाः शुक्त्यग्रहे ग्राह्यरजतवत् तत्र कल्पिताः। तथा चिद्रूपस्फुरणं विना स्थितिकाले स्फुरणशून्यं जगच्चिद्रूपे कल्पितमित्यैक्यमुक्तमित्यर्थः। एकविज्ञानेन सर्वविज्ञानस्योपपाद्यमानत्वात् तदनौपचारिकमिति प्रकरणं ब्रह्मविषयमित्युक्तम्। इदानीं द्रष्टव्यस्य जगत्कारणत्वोक्तेरपि तद्वाक्यं ब्रह्मार्थमित्याह—**अस्येति**। किंच 'स यथा सर्वासामपां समुद्र एकायनम्' इति दृष्टान्तेन ब्रह्मणः सर्वजगदवसानत्वेनाभिधानात् तद्विषयमेव द्रष्टव्यादिवाक्यमित्याह—**तथेति**। स्थित्युत्पत्तिलयोक्त्यालोचनातः सिद्धमुपसंहरति—**तस्मादिति**।।१९।।

---

१. अयं भावः-एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय स्वयमेव तदुपपादयति श्रुतिः। तत्र आत्मविज्ञानेन सर्वविज्ञानमात्मनः सर्वात्मकत्वे एव सिध्यतीति प्रथमं तत् साधयति भेददर्शननिन्दापूर्वकम्— 'ब्रह्म तं परादाद् योऽन्यत्रात्मनो ब्रह्म वेद' इत्यादि। अन्यत्रेति सार्वविभक्तिकस्त्रल् 'अन्यत्र भीष्माद् गाङ्गेयात्' इत्यादौ 'अन्यः' इति प्रथमार्थे इव अत्र अन्यदिति द्वितीयार्थे। 'यो ब्राह्मणजातिमात्मनो भिन्नां वेद' इत्यर्थः। 'इदं ब्रह्म....इदं सर्वं यदयमात्मा' इति सार्वात्म्यमुक्तम्। सर्वात्मकत्वं च सर्वत्रानुगतत्वेनैव वक्तव्यमिति दुन्दुभ्यादिदृष्टान्तैः आत्मनोऽनुगतिं 'यत् यस्य स्फुरणं विना न स्फुरति तत् ततो नातिरिक्त'मिति नियमपुरस्सरं प्रपञ्चयति। तत्रायमर्थः-दुन्दुभिपदं दुन्दुभिजनितशब्दसामान्यं लक्षयति, शब्दपदं तद्विशेषम्। अग्रहणेन इत्यध्याह्रियते। 'दुन्दुभिशब्दसामान्याग्रहणेन तद्विशेषान् ग्रहीतुं न शक्नुयात्; दुन्दुभिशब्दसामान्यस्य ग्रहणे एव तद्विशेषो गृहीतो भवति' इति। एव शङ्खवीणापर्याययोरपि। तत्र यथा दुन्दुभ्यादिशब्दसामान्यं तद्विशेषेष्वनुगतम्, एवं सद्रूपस्फुरणं विनाऽस्फुरति प्रपञ्चे सद्रूपं ब्रह्मानुगतमिति। द्र. ब्र. वि. ५४८-५४९ न्या. र. म. ४०१-४०२। २. 'प्रक्रिययाऽपि' इति पा.।

अस्त्यत्र प्रतिज्ञा 'आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवति' 'इदं सर्वं यदयमात्मा' इति च। तस्याः प्रतिज्ञायाः सिद्धिं सूचयत्येतल्लिङ्गं यत् प्रियसंसूचितस्यात्मनो द्रष्टव्यत्वादिसंकीर्तनम्। यदि हि विज्ञानात्मा परमात्मनोऽन्यः स्यात् ततः परमात्मविज्ञानेऽपि विज्ञानात्मा न विज्ञात इत्येकविज्ञानेन सर्वविज्ञानं यत् प्रतिज्ञातं तद्धीयेत। तस्मात् प्रतिज्ञासिद्ध्यर्थं विज्ञानात्मपरमात्मनोरभेदांशेनोपक्रमणमित्याश्मरथ्य आचार्यो मन्यते।।२०।।

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः।।२१।।

विज्ञानात्मन एव देहेन्द्रियमनोबुद्धिसंघातोपाधिसंपर्कात् कलुषीभूतस्य ज्ञानध्यानादिसाधनानुष्ठानात् संप्रसन्नस्य देहादिसंघातादुत्क्रमिष्यतः परमात्मैक्योपपत्तेरिदमभेदेनोपक्रमणमित्यौडुलोमिराचार्यो मन्यते। श्रुतिश्चैवं भवति– 'एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते'

प्रकटार्थविवरणम्

पूर्वपक्षबीजापाकरणाय सूत्रमवतारयति—**यत्पुनरुक्तमिति**। **प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः**। जीवब्रह्मणोर्भिन्नाभिन्नत्वेऽपि 'अभेदांशेन जीवरूपेणोपक्रमणं प्रतिज्ञासिद्ध्यर्थमित्यर्थः।

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः। संसारदशायां [2]भिन्नस्यैव मोक्षदशायां ब्रह्मणैक्यमङ्गीकृत्य जीवोपक्रमणमिति मतान्तरमाह—**उत्क्रमिष्यत इति**। किञ्च जीवस्य नामरूपाश्रयत्वावगमादपि नामरूपविमुक्ताद् ब्रह्मणो भेद एव संसारदशायामित्याह—

भाष्यभावप्रकाशिका

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः॥२०॥ उपक्रमसामर्थ्याज्जीवविषयमिदं वाक्यमिति यदुक्तम्, तस्य परिहारायोत्तरसूत्रत्रयमित्याह—**यत्पुनरुक्तमिति**। प्रतिज्ञासिद्धिं दर्शयितुं प्रतिज्ञां तावद् दर्शयति—**अस्त्यत्रेति**। एतदेव व्यतिरेकमुखेन दर्शयति—**यदि हीति**। **अभेदांशेनेति** भेदस्याप्येतन्मते सद्भावं सूचयति॥२०॥

उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः॥२१॥ मुक्त्यवस्थायामेवाभेदः, संसारदशायां तु भेद एवेत्यौडुलोमिमतमुक्तम्। तत्र श्रुतिं प्रमाणमाह—**श्रुतिश्चैवमिति**। ननु अभिन्नस्यापि जीवस्योपाधिकृतभेदविगमादभिनिष्पत्तिरौपचारिकीत्याशङ्क्य,

न्यायनिर्णयः

उपक्रमसामर्थ्याज्जीवार्थत्वं वाक्यस्योक्तमनुवदति—**यदिति**। तत्र सूत्रत्रयमवतारयति—**अत्रेति**। प्रथममाश्मरथ्यमतमाह—**प्रतिज्ञेति**। प्रतिज्ञासिद्ध्यर्थं प्रतिज्ञामाह—**अस्तीति**। अत्रेति प्रकृतब्राह्मणवाक्योक्तिः। तदर्थं प्रतिज्ञान्तरमाह—**इदमिति**। ऐक्यप्रतिज्ञया सर्वविज्ञाने विवक्षितेऽपि जीवोपक्रमस्य किं जातं, तदाह—**तस्या इति**। तदेव व्यतिरेकद्वारा स्पष्टयति—**यदीति**। 'प्रतिज्ञासिद्धेर्लिङ्गम्' इति व्याख्यायावशिष्टं व्याख्यास्यन्नुपसंहरति—**तस्मादिति**। भेदाभेदवादद्योतनायाभेदांशेनेत्युक्तम्॥२०॥

मतान्तरमाह—**उत्क्रमिष्यत इति**। विभजते—**विज्ञानेति**। मुक्तावेवाभेदः, संसारे भेद एवेत्युक्तेऽर्थे मानमाह—**श्रुतिश्चेति**। अभिन्नस्यापि जीवस्यौपाधिकभेदविगमादभिनिष्पत्तिरौपचारिकीत्याशङ्क्य नामरूपाश्रयत्वकालुष्यस्य श्रुत्यन्तरे स्वाभाव्योक्तेः साध्य

---

१. जीवस्य ब्रह्मणो भेदः 'नाहमीश्वरः' इति प्रत्यक्षसिद्धः। अभेदश्च 'तत् त्वमसि' इति श्रुतिसिद्धः। अतः प्रमाणबलाद् जीवब्रह्मणोः भेदाभेदावुपेयौ। तयोश्च विरोधपरिहारार्थमवच्छेदकभेदः आस्थेयः। चिद्रूपत्वेनाभेदः, जीवत्वेश्वरत्वरूपावच्छेदकभेदेन च भेदः। सार्वदिकश्च भेदाभेदः आश्मरथ्याचार्याणामभिमतः। एवं स्थिते भेदग्राहिप्रत्यक्षेण एकविज्ञानेन सर्वविज्ञानस्य बाधो मा भूदिति शास्त्रीयाभेदबोधनाय जीवधर्मेण परमात्मोपक्रमः इति भावः।

२. भेदाभेदौ समानकालीनौ विरुद्धौ। अवच्छेदकभेदाश्रयणं च न शास्त्रीयम्। शास्त्रेण कालभेदेन विरोधपरिहारः आश्रितः—'आ मुक्तेर्भेद एव स्यात् जीवस्य च परस्य च। मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः' इति। अतो मुक्तेः पूर्वं जीवत्वं विवक्षित्वा भूतपूर्वगत्या जीवधर्मेण परमात्मोपक्रमः। 'तत्त्वमसि' इति भवष्यद्वृत्त्याऽभेदपरमित्यौडुलोम्याशयः।

(छा.उ. ८।१२।३) इति। क्वचिच्च जीवाश्रयमपि नामरूपं नदीनिदर्शनेन ज्ञापयति– 'यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्।' (मु. उ. ३।२।८) इति। यथा लोके नद्यः स्वाश्रयमेव नामरूपं विहाय समुद्रमुपयन्त्येवं जीवोऽपि स्वाश्रयमेव नामरूपं विहाय परं पुरुषमुपैतीति हि तत्रार्थः प्रतीयते दृष्टान्तदार्ष्टान्तिकयोस्तुल्यतायै।।२१।।

अवस्थितेरिति काशकृत्स्नः।।२२।।

अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानादुपपन्नमिदमभेदेनोपक्रमणमिति काशकृत्स्न आचार्यो मन्यते। तथा च ब्राह्मणम्– 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छा. उ. ६।३।२) इत्येवंजातीयकं परस्यैवात्मनो जीवभावेनावस्थानं दर्शयति; मन्त्रवर्णश्च– 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते' (तै. आ. ३।१२।७) इत्येवंजातीयकः। न च तेजःप्रभृतीनां सृष्टौ

प्रकटार्थविवरणम्

क्वचिच्च जीवाश्रयमपीति। "यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय" इति नदीनिदर्शनं व्याचष्टे—**यथा लोक इति।**

अवस्थितेरिति काशकृत्स्नः। इदानीं यदर्थमधिकरणमारब्धं तद् भिन्नाभिन्नत्वनिराकरणं 'काशकृत्स्नस्य मतेन स्फुटीकर्तुमाह—**अस्यैव परमात्मन इति।** सर्वाणि रूपाणि विचित्य निर्माय तेषां नामानि च कृत्वा धीरः सर्वज्ञः स्वयं तत्रानुप्रविश्य अभिवदन् य आस्ते "तमेवं विद्वानमृत इह भवति" इति मन्त्रोऽपि परमात्मन एवावस्थानं दर्शयतीत्यर्थः। ननु जीवो नाम परमात्मविकार इत्याश्रयणेऽप्येकविज्ञानेन सर्वविज्ञानं घटते; किमभेदेनेत्याशङ्क्याह—**न च तेजःप्रभृतीनामिति।**

भाष्यभावप्रकाशिका

नामरूपाश्रयत्वलक्षणकालुष्यस्य श्रुत्यन्तरेण स्वाभाविकत्वप्रतिपादनात् साधनसाध्य एवाभेदः, न स्वाभाविक इत्याह—**क्वचिच्चेति।** ननु एतदप्यौपाधिकं किं न स्यादिति? अत आह—**यथा लोक इति।**।२१।।

अवस्थितेरिति काशकृत्स्नः।।२२। एवमाचार्यदेशीयमतद्वयमुक्त्वाऽपरितोषान्मतान्तरमाह—**अवस्थितेरिति।** जीवपरमात्मनोर्भेदाभावाद् जीवात्मनोपक्रमः परमात्मनैवोपक्रमः। स्थूलदर्शिलोकप्रतीतिसौकर्यार्थं तु भोक्तृरूपेणोपक्रमणमिति भावः। अत्र मते श्रुतिं प्रमाणमाह—**तथा चेति।** ननु जीवस्य ब्रह्मविकारत्वाद् ब्रह्मण एव जीवात्मनाऽवस्थानं युक्तमित्याशङ्क्याह—**न चेति।**

न्यायनिर्णयः

एवाभेदो, न स्वभावत इत्याह—**क्वचिदिति।** उक्तं कालुष्यमपि किमित्यौपचारिकं न स्यादित्याशङ्क्य वाक्ये दृश्यमानमर्थमाह—**यथेति।** नदीनां नामरूपाश्रयत्वेऽपि कुतो जीवस्य तदाश्रयत्वं, तत्राह—**दृष्टान्तेति।**।२१।।

सिद्धान्तमाह—**अवस्थितेरिति।** सूत्रं व्याचष्टे—**अस्यैवेति।** जीवपरयोरभेदाज्जीवेनोपक्रमः परेणैवोपक्रमः। भोक्त्रोपक्रमश्च स्थूलदर्शिलोकसौकर्यायेति भावः। परस्यैव जीवेनावस्थाने मानमाह—**तथा चेति।** न केवलं ब्राह्मणं परापरयोरैक्यं दर्शयति, किंतु मन्त्रश्चेत्याह—**मन्त्रेति।** धीरः सर्वज्ञः सर्वाणि रूपाणि चराचराणि शरीराणि विचित्य निर्माय तेषां नामानि च कृत्वा स्वयं तत्रानुप्रविश्याभिवदनादि कुर्वन् यो वर्तते तमेवंभूतं विद्वानिहैवामृतो भवतीति मन्त्रोऽपि परस्यैव जीवेन स्थितिमाहेत्यर्थः। तेजःप्रभृतीनामिव जीवस्य ब्रह्मकार्यत्वाद् ब्रह्मज्ञाने सर्वज्ञानसिद्धेरात्यन्तिकमैक्यं श्रुतमप्ययुक्तमित्याशङ्क्याह—**न चेति।**

१. तात्पर्यलिङ्गैर्निर्णीततात्पर्यं तत्त्वमसिवाक्यं भविष्यद्वृत्त्या व्याख्यातुमनुचितम्। उदाहृतागमवचनं तु श्रुतिविरोधे सति पारमार्थिके भेदेऽप्रमाणम्। भेदाभेदौ च समानसत्ताकौ विरुद्धौ। अतः प्रत्यक्षसिद्धो भेदोऽनृतः, शास्त्रप्रतिपाद्यश्चाभेदः परमार्थः इति परमार्थभेदाभिप्रायेण जीवधर्मोपक्रम इति काशकृत्स्नाभिप्रायः।

जीवस्य पृथक्सृष्टिः श्रुता, येन परस्मादात्मनोऽन्यस्तद्विकारो जीवः स्यात्।

काशकृत्स्नस्याचार्यस्याविकृतः परमेश्वरो जीवो, नान्य इति मतम्। आश्मरथ्यस्य तु यद्यपि जीवस्य परस्मादनन्यत्वमभिप्रेतम्, तथापि प्रतिज्ञासिद्धेरिति सापेक्षत्वाभिधानात् कार्यकारणभावः कियानप्यभिप्रेत इति गम्यते। औडुलोमिपक्षे पुनः स्पष्टमेवावस्थान्तरापेक्षौ भेदाभेदौ गम्येते।

तत्र काशकृत्स्नीयं मतं श्रुत्यनुसारीति गम्यते, प्रतिपिपादयिषितार्थानुसारात् 'तत्त्वमसि' इत्यादिश्रुतिभ्यः। एवं च सति तज्ज्ञानादमृतत्वमवकल्पते। विकारात्मकत्वे हि जीवस्याभ्युपगम्यमाने विकारस्य प्रकृतिसंबन्धे प्रलयप्रसङ्गान्न तज्ज्ञानादमृतत्वमवकल्पेत। अतश्च स्वाश्रयस्य नामरूपस्यासंभवादुपाध्याश्रयं नामरूपं जीव

प्रकटार्थविवरणम्

मतत्रयं विभज्य कथयति—**काशकृत्स्नस्येत्यादिना**। अन्त्यस्योपादेयत्वमाह—**तत्र काशकृत्स्नीयमिति**। 'कारणशून्ययोः[1] द्रव्ययोरुद्देश्योपादेयभावेन सामानाधिकरण्यमेकस्यैव द्रव्यस्योपाधिकल्पितभेदापेक्षम्, न द्रव्यभेदापेक्षम्, 'सोऽयं देवदत्तः' इतिवत् इति न्यायेन "तत्त्वमसि" इति शास्त्रात् प्रतिपिपादयिषितं यज्जीवस्य ब्रह्मैक्यं तदनुसारित्वादित्यर्थः। किञ्च ज्ञानादमृतत्वश्रुत्यन्यथानुपपत्त्याऽप्ययं पक्षो युक्त इत्याह—**एवं च सतीति**। यच्चोक्तं जीवस्य नामरूपाश्रयत्वं, तत्राह—**अतश्चेति**। यतः परमात्मैव प्रतिबिम्बितो जीवः अतश्चेति योजना। नामरूपविलयमात्रे निदर्शनम्, सर्वथा साम्ये मानाभावात्।

भाष्यभावप्रकाशिका

आचार्यत्रयमतं विभजते समीचीनं पक्षं दर्शयितुम्—**काशकृत्स्नस्येत्यादिना**। भेदस्यापि सद्भावात् 'कार्यकारणभावः कियानपी'त्युक्तम्। **अवस्थान्तरापेक्षाविति**। संसारदशायां भेद एव, मुक्त्यवस्थायामभेद एवेत्यर्थः। किमत्र युक्तमिति? तदाह—**तत्र काशकृत्स्नीयमिति**। ननु इतरपक्षस्यापि श्रुतिमूलत्वमुक्तमित्याशङ्क्य, तत्र तात्पर्याभावाच्छ्रुतिमत्त्वमसिद्धमित्याह—**प्रतिपिपादयिषितेति**। तत्त्वम्पदार्थयोः पारोक्ष्यसंसारित्वविभ्रमनिरासेन तदेकत्वप्रतिपादकवाक्यार्थानुसारादित्यर्थः। कथमीदृशस्य प्रतिपिपादयिषितत्वमिति? तत्राह—**तत्त्वमसीति**। भेदाभेदयोः पारमार्थिकत्वाभ्युपगमे ज्ञानेन भेदस्य वस्तुभूतस्योच्छेत्तुमशक्यत्वाज्ज्ञानान्मोक्षश्रुतिरप्यनुपपन्नार्था स्यादित्याह—**एवं च सतीति**। एवमेव सतीत्यर्थः। जीवस्य विकारात्मकत्वे कर्मज्ञानकाण्डयोरप्रामाण्यमपि स्यादित्याह—**विकारात्मकत्वे हीति**। ननु नदीनिदर्शनेन स्वगतमेव नामरूपमभ्युपगन्तव्यं दृष्टान्तसाम्यायेत्युक्तमित्याशङ्क्याह—**अतश्चेति**। श्रुतिविरुद्धं न कल्पनीयमित्यर्थः। ननु जीवस्योत्पत्तिश्रवणाद् भेदाभेदपक्षः

न्यायनिर्णयः

समीचीनसंग्रहार्थं पक्षत्रयं विभजते—**काशेति**। आश्मरथ्यपक्षेऽपि तुल्यं जीवस्य परस्मादनन्यत्वं, नेत्याह—**आश्मरथ्यस्येति**। अभेदवद् भेदस्यापि भावात् कियानपीत्युक्तम्। आद्यपक्षादपि द्वितीयपक्षस्यानपेक्षितत्वार्थं तत्रत्यमर्थमाह—**औडुलोमीति**। अवस्थान्तरे बन्धमोक्षौ। सम्प्रत्यन्तिमस्यादेयत्वमाह—**तत्रेति**। इतरस्यापि द्वयस्य दर्शितं श्रुतिमूलत्वमित्याशङ्क्योक्तश्रुतेस्तत्रातात्पर्यान्मैवमित्याह—**प्रतीति**। पारोक्ष्यसद्वयत्वनिवृत्त्या तत्त्वमर्थयोरैक्यवादिवाक्यानुसारित्वादन्तिमस्यादेयतेत्यर्थः। कथमीदृग्वाक्यार्थस्येष्टत्वं, तत्राह—**तत्त्वमिति**। किंच भेदाभेदयोर्वस्तुत्वे वस्तुभूतभेदस्य ज्ञानेनानुच्छेदाज्ज्ञानान्मुक्तिश्रुतिरयुक्ता स्यात्, तस्मादात्यन्तिकमैक्यमेव तात्त्विकमित्याह—**एवं चेति**। चकारोऽवधारणे। जीवस्य ब्रह्मकार्यत्वेऽपि तत्तादात्म्यरूपममृतत्वं स्यादित्याशङ्क्याह—**विकारेति**। जीवस्योत्पत्तिप्रलयौ चेत् काण्डद्वयं विरुध्येतेति भावः। नदीदृष्टान्तेन स्वगतं नामरूपम्, अन्यथा दृष्टान्तवैषम्यादतोऽन्यत्वमपीत्युक्तमित्याशङ्क्याह—**अतश्चेति**। आत्यन्तिकाभेदे ज्ञानादमृतत्वयोगादित्यतःशब्दार्थः। दृष्टान्तश्रुतेरन्यथाऽपि नेतुं शक्यत्वात् तदनुरोधात् तत्त्वमादिविरुद्धं न कल्प्यमिति भावः। जीवस्याग्निविस्फुलिङ्गदृष्टान्तात् प्राणादिवज्जन्मश्रुत्या

---

१. 'कार्यकारणभावशून्ययोः' इति पाठः स्यात्।

उपचर्यते। अत एवोत्पत्तिरपि जीवस्य क्वचिदग्निविस्फुलिङ्गोदाहरणेन श्राव्यमाणोपाध्याश्रयैव वेदितव्या।

यदप्युक्तं प्रकृतस्यैव महतो भूतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन दर्शयन् विज्ञानात्मन एवेदं द्रष्टव्यत्वं दर्शयतीति, तत्रापीयमेव त्रिसूत्री योजयितव्या। 'प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः'। इदमत्र प्रतिज्ञातम्– 'आत्मनि विदिते सर्वं विदितं भवति' इति,'इदं सर्वं यदयमात्मा' (बृ. उ. २।४।६) इति च। उपपादितं च, सर्वस्य नामरूपकर्मप्रपञ्चस्यैकप्रसवत्वादेकप्रलयत्वाच्च, दुन्दुभ्यादिदृष्टान्तैश्च कार्यकारणयोरव्यतिरेकप्रतिपादनात्। तस्या एव प्रतिज्ञायाः सिद्धिं सूचयत्येतल्लिङ्गं यन्महतो भूतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन कथितमित्याश्मरथ्य आचार्यो मन्यते। अभेदे हि सत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातमवकल्पत इति। 'उत्क्रमिष्यत एवंभावादित्यौडुलोमिः'। उत्क्रमिष्यतो विज्ञानात्मनो ज्ञानध्यानादिसामर्थ्यात् संप्रसन्नस्य परेणात्मनैक्यसंभवादिदमभेदाभिधानमित्यौडुलोमिराचार्यो मन्यते। 'अवस्थितेरिति काशकृत्स्नः'। अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानादुपपन्नमिदमभेदाभिधानमिति काशकृत्स्न आचार्यो मन्यते। ननूच्छेदाभिधानमेतत् 'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ति' (बृ. उ. २।४।१२) इति, कथमेतदभेदाभिधानम्? नैष दोषः; विशेषविज्ञानविनाशाभिप्रायमेतद् विनाशाभिधानम्, नात्मोच्छेदाभिप्रायम्।

प्रकटार्थविवरणम्

उत्पत्तिश्रवणस्याप्यौपाधिकत्वमेव गतिरित्याह—**अत एवोत्पत्तिरपीति।**

पूर्वपक्षबीजान्तरनिराकरणेऽपि सूत्रत्रययोजनामतिदिशति—**यदप्युक्तमित्यादिना।**

भाष्यभावप्रकाशिका

प्रमाणवानित्याशङ्क्याह—**अत एवोत्पत्तिरिति।**

द्वितीयं पूर्वपक्षबीजमप्यनयैव त्रिसूत्र्याऽपाकरोति—**यदप्युक्तमिति।** प्रतिज्ञायां श्रुतेस्तात्पर्यमाह—**उपपादितमिति। एकप्रसवत्वादिति।** 'स यथा ऽऽर्द्रैधाग्ने'रित्यादिना 'स यथा सर्वासामपा'मित्यादिना चैकप्रसवत्वमेकप्रलयत्वं चोक्तमित्यर्थः। अविनाशी विनाशायोग्य

न्यायनिर्णयः

भेदाभेदपक्षस्य प्रामाणिकत्वं, तत्राह—**अत इति।** अनौपाधिके जन्मनि ज्ञानादमृतत्वासिद्धेरेवेत्यर्थः।

द्वितीयं पूर्वपक्षबीजमनुभाषते—**यदपीति।** प्रकृतत्रिसूत्र्या प्रत्याह—**तत्रापीति।** योजनाप्रकारमेव दर्शयितुमाश्मरथ्यमतमाह—**प्रतिज्ञेति।** तद् व्याख्यातुं प्रतिज्ञास्वरूपमाह—**इदमिति।** आत्मनि विदिते विदितत्वं कथं प्रपञ्चे स्यादिति संदिहानं प्रत्याह—**इदं सर्वमिति।** सर्वस्यात्ममात्रत्वमुक्तमपि कुतो मुख्यमित्याशङ्क्याह—**उपपादितं चेति।** सर्वस्यात्ममात्रत्वमिति शेषः। उपपादनप्रकारं सूचयति—**एकेति।** 'स यथाऽऽर्द्रैधोग्नेः' इत्यादिनैकप्रसवत्वं, 'स यथा सर्वासामपाम्' इत्यादिना चैकप्रलयत्वं सर्वस्योक्तम्। यच्च यस्मादुत्पद्यते यत्र लीयते तत् ततो नातिरिच्यते, यथा घटादि मृदादेः। तस्मादात्मप्रभवत्वादात्मप्रलयत्वाच्च सर्वस्य जगतस्तन्मात्रत्वम्। तथा चात्मधिया सर्वधीरित्यर्थः। दृष्टान्तश्रुतेरपि सर्वस्य कार्यप्रपञ्चस्यात्ममात्रत्वसिद्धेर्मुख्यमेव प्रतिज्ञातमैक्यमित्याह—**दुन्दुभ्यादीति।** प्रतिज्ञां व्याख्यायावशिष्टं व्याचष्टे—**तस्या इति।** प्रतिज्ञां घटयितुं परस्य जीवत्वेनोत्थानं किमित्युच्यते, तत्राह—**अभेदे हीति।** मतान्तरमाह—**उत्क्रमिष्यत इति।** सिद्धान्तमाह—**अवस्थितेरिति।** परापरयोरभेदाभिधानमिदमित्युक्तमाक्षिपति—**नन्विति।** विनाशोक्तेर्विषयान्तरसंभवादात्मन उच्छेदाविषयत्वाद् युक्तमभेदाभिधानमित्याह—**नेति।** अविशेषश्रुतेर्विशेषार्थत्वे नियामकमाह—**अत्रेति। मोहं** मोहनं वाक्यमिति यावत्। अविनाशीति विनाशायोग्यत्वम्, अनुच्छित्तिधर्मेति विनाशायोगित्वमुक्तमिति भेदः।

'अत्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञाऽस्ति' इति पर्यनुयुज्य स्वयमेव श्रुत्याऽर्थान्तरस्य दर्शितत्वात्– 'न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा मात्राऽसंसर्गस्त्वस्य भवति' (बृ. उ. मा. ४।३।१५) इति। एतदुक्तं भवति– कूटस्थनित्य एवायं विज्ञानघन आत्मा; नास्योच्छेदप्रसङ्गोऽस्ति; मात्राभिस्त्वस्य भूतेन्द्रियलक्षणाभिरविद्याकृताभिरसंसर्गो विद्यया भवति; संसर्गाभावे च तत्कृतस्य विशेषविज्ञानस्याभावान्न प्रेत्य संज्ञाऽस्तीत्युक्तमिति।

यदप्युक्तम्– 'विज्ञातारमरे केन विजानीयात्' इति कर्तृवचनेन शब्देनोपसंहाराद् विज्ञानात्मन एवेदं द्रष्टव्यत्वमिति, तदपि काशकृत्स्नीयेनैव दर्शनेन परिहरणीयम्। अपि च 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' (बृ. उ. २।४।१४) इत्यारभ्याविद्याविषये तस्यैव दर्शनादिलक्षणं विशेषविज्ञानं प्रपञ्च्य 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इत्यादिना विद्याविषये तस्यैव दर्शनादिलक्षणस्य विशेषविज्ञानस्याभावमभिदधाति। पुनश्च विषयाभावेऽपि आत्मानं विजानीयादित्याशङ्क्य 'विज्ञातारमरे केन विजानीयात्' इत्याह। ततश्च विशेषविज्ञानाभावोपपादनपरत्वाद् वाक्यस्य विज्ञानधातुरेव केवलः सन् भूतपूर्वगत्या कर्तृवचनेन तृचा निर्दिष्ट इति गम्यते। दर्शितं तु पुरस्तात् काशकृत्स्नीयस्य पक्षस्य श्रुतिमत्त्वम्।

प्रकटार्थविवरणम्

तृतीयं च पूर्वपक्षबीजमन्त्येन मतेनापाकरणीयमित्याह—**तदपि काशकृत्स्नीयेनैवेति**। आद्यमतद्वयस्य तत्त्वभेदावलम्बित्वात् तत्परिग्रहेण परिहारो न [१]संभवति। काशकृत्स्नस्य तु तत्त्वभेदाभावात् स्वरूपाभेदाभिप्रायेण कर्तृवाची शब्दः परमात्मनि प्रयुक्त इति भावः। किञ्चाविद्यातज्जान्तःकरणप्रतिबिम्बितत्वेन यत्प्रमातृत्वमभूत् तदभिप्रायेणैक्यप्रतिपत्तावपि कर्तृशब्दो न विरुध्यत इत्याह—**अपि च यत्र हीति**। ननु आश्मरथ्यादिमते तात्त्विकेऽपि भेदे भूतपूर्वगत्या मोक्षकर्तृत्वनिर्देशः किं नाङ्गीक्रियते,कुतः काशकृत्स्नमते पक्षपात इत्याशङ्क्याह—**दर्शितं तु पुरस्तादिति**।

भाष्यभावप्रकाशिका

इत्यर्थः। **अनुच्छित्तिधर्मेति**। विनाशायोगीत्यर्थः। काशकृत्स्नीयेनैवेत्यवधारणं भेदाभेदपक्षे भेदपक्षे च "विज्ञातारमरे केने" त्ययमाक्षेपो नोपपद्यते; जीवस्येश्वरेण भिन्नेनावगतिसंभवादत्यन्ताभेदपक्षे कर्मकरणयोरभावाद् निषेधो युक्त इत्यभिप्रायेण। अतो जीवपरयोरभेदाद् जीवस्य भ्रान्तिकल्पितं विज्ञातृत्वं भूतपूर्वगत्याऽभिहितमिति भावः। न केवलं काशकृत्स्नीयमतावलम्बनेन, श्रुतिपौर्वापर्यालोचनायामप्येवमेवेत्याह—**अपि च यत्र हीति**। **पुनश्चेति**। एकस्यैव कर्मकर्तृभावविरोधादित्यर्थः। वाक्यस्यान्यपरत्वात् केवलस्य परस्य प्रतिपाद्यत्वमयुक्तमित्याह—**ततश्चेति**। ननु त्रिषु पक्षेषु काशकृत्स्नस्यैव पक्षे कः पक्षपात इति? अत आह—**दर्शितं त्विति**।

न्यायनिर्णयः

कथं तर्हि 'न प्रेत्य' इत्यादि, तत्राह—**मात्रेति**। कथमेतावता मिथोविरोधसमाधिरित्याशङ्क्य श्रुतितात्पर्यमाह—**एतदिति**। तृतीयं पूर्वपक्षबीजमनुवदति—**यदपीति**। **उपसंहारात्** कर्तृत्वस्य च विज्ञानात्मन्येव संभवादिति शेषः। भेदाभेदवादे जीवस्येश्वरेण भिन्नेनावगतियोगात् 'विज्ञातारमरे केन' इत्याक्षेपायोगादत्यन्ताभेदे कर्मकरणयोरभावादाक्षेपसिद्धेरन्तिमपक्षस्यैवादेयत्वमित्युत्तरमाह—**तदपीति**। तन्मते जीवपरयोर् भेदाज्जीवस्य भ्रान्तं ज्ञातृत्वं भूतपूर्वगत्या तृजन्तेनोक्तमिति भावः। श्रुतिपौर्वापर्यालोचनायामपि जीवस्य भ्रान्तं ज्ञातृत्वमित्याह—**अपि चेति**। अन्वयव्यतिरेकाभ्यां द्वैतदृष्टेरविद्यकत्वेऽपि प्रत्यग्दृष्टिरविद्यानपेक्षेत्याशङ्क्याह—**पुनश्चेति**। एकस्यैव कर्मकर्तृत्वविरोधादित्यर्थः। विज्ञातारमित्यादिवाक्यस्यान्यपरत्वे फलितमाह—**ततश्चेति**। ननु पक्षेषु त्रिषु सत्सु काशकृत्स्नस्यैव पक्षे पक्षपाते को हेतुः, तत्राह—**दर्शितं त्विति**।

१. 'अपि चे'त्युत्तरभाष्यदर्शितरीत्या पारमार्थिकत्वपक्षे 'यत्र हि द्वैतमिव' इति इवशब्दः, विद्ययाऽऽत्ममात्रपरिशेषश्च नोपपद्यत इत्यतः तन्मतपरिग्रहेण परिहारो न संभवतीत्याशयः।

अतश्च विज्ञानात्मपरमात्मनोरविद्याप्रत्युपस्थापितनामरूपरचितदेहाद्युपाधिनिमित्तो भेदो, न पारमार्थिक इत्येषोऽर्थः सर्वैर्वेदान्तवादिभिरभ्युपगन्तव्यः, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा.उ. ६।२।१) 'आत्मैवेदं सर्वम्' (छा.उ. ७।२५।२), 'ब्रह्मैवेदं सर्वम्' (मु.उ. २।२।११), 'इदं सर्वं यदयमात्मा' (बृ.उ. २।४।६), 'नान्योऽतोऽस्ति द्रष्टा' (बृ.उ. ३।७।२३), 'नान्यदतोऽस्ति द्रष्टृ' (बृ.उ. ३।८।११) इत्येवंरूपाभ्यः श्रुतिभ्यः; स्मृतिभ्यश्च– 'वासुदेवः सर्वमिति' (भ.गी. ७।१९), 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' (भ.गी. १३।२), 'समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्' (भ.गी. १३।२७) इत्येवंरूपाभ्यः; भेददर्शनापवादाच्च– 'अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः' (बृ.उ. १।४।१०), 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (बृ.उ. ४।४।१९) इत्येवंजातीयकात्। 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म' (बृ.उ. ४।४।२५) इति चात्मनि सर्वविक्रियाप्रतिषेधात्। अन्यथा च मुमुक्षूणां निरपवादविज्ञानानुपपत्तेः, सुनिश्चितार्थत्वानुपपत्तेश्च। निरपवादं हि विज्ञानं सर्वाकाङ्क्षा-निवर्तकमात्मविषयमिष्यते, 'वेदान्तविज्ञानसुनिश्चितार्थाः'[1] (मु. उ. ३।२।६) इति च श्रुतेः, 'तत्र को

प्रकटार्थविवरणम्

पुनः श्रुतिमत्त्वं स्मृतिमत्त्वं चाह—**सदे[सदेवसोम्येदमग्र आसीदे] कमेवाद्वितीयमिति**। यच्च **केशवेन** वल्गितम् "प्रलये श्रुतिरद्वैतमाह न सर्वदा" इति, तदसत्; प्रसिद्धप्रलयानुवादेन विधित्सितस्याद्वैतस्य सृष्टिं विधायापि "ऐतदात्म्यमिदं सर्वं तत्सत्यम्" इत्युपसंहारे सत्यताभिधानात्। यच्च भेददर्शनमेव निन्द्यते, न भेद इत्युक्तम्, तदसत्; सत्ये भेदे तद्दर्शनस्यापि निन्दानुपपत्तेः। न हि भेददर्शनमेव संसारः, मूर्च्छादेरपि संसारत्वात्, [2]इवशब्दायोगाच्चेति। जीवस्य संसारविक्रियावत्त्वान्न ब्रह्ममात्रतेत्याशङ्क्याह—**स वा एष इति**। किञ्च सत्ये भेदे तत्प्रमितिविरोधात् ब्रह्मैवाहमित्यबाधितविज्ञानं न स्यादित्याह—**अन्यथा चेति**। अभेदाच्चेत् ब्रह्माहम्, भेदादब्रह्माहमिति किं न स्यादिति संशयः स्यादित्याह—**सुनिश्चितेति**। ततः किमित्यत आह—**निरपवादं हीति**। स्थिता

भाष्यभावप्रकाशिका

पुनश्च काशकृत्स्नीयस्य मतस्य श्रुतिमत्त्वं स्मृतिमत्त्वं चोपसंहारोपक्रममाह[3]—**अतश्चेति**। श्रुत्यन्तरमाह—**भेददर्शनापवादादिति**। ननु एतत्सर्वमाश्मरथ्यपक्षेऽप्युपपन्नम्; सर्वस्य भेदाभेदाभ्युपगमादित्याशङ्क्य जीवस्य विकारत्वाभ्युपगमाच्छ्रुतिविरोध एवेत्याह—**स वा एष महानिति**। अथाभेदांशेन विक्रियानिषेधादिसंभवाच्छ्रुतिमत्त्वमवष्टभ्य प्रत्यवतिष्ठेत, तथापि वेदान्तसिद्धात्मैकत्वज्ञानं निरपवादं न स्यात्; भेदाभेदयोर्मिथो विरोधात् समुच्चयाभावादेकस्य बलीयस्त्वे तदितरावलम्बिनो ज्ञानस्य बाधात्, तुल्यबलतायां च संशयप्रसङ्गादित्याह—**अन्यथा चेति**। विज्ञानं चेत् सिध्यति, तावताऽलमित्याशङ्क्याह—**निरपवादं हीति**। "एकत्वमनुपश्यत"

न्यायनिर्णयः

तस्य श्रुतिमत्त्वे फलितमुपसंहरति—**अतश्चेति**। उक्तार्थस्योपगन्तव्यत्वे श्रुतिस्मृतिमत्त्वं पुनरुपन्यस्यति—**सदित्यादिना**। इतोऽपि परापरयोराविद्यो भेदो, न पारमार्थिक इत्याह—**भेदेति**। भेदाभेदवादेऽपि सर्वमेतदभेदांशाद् युक्तमित्याशङ्क्य तत्पक्षे जीवस्य कार्यत्वादात्मविक्रियानिषेधविरोधः स्यादित्याह—**स वा इति**। अभेदांशेन निषेधादिसिद्धेरेतदपि मतद्वयं श्रुतिमदेवेत्याशङ्क्य तत्पक्षे वैदिकात्मैक्यधियो निरपवादत्वायोगान्मुक्तेरसिद्धिरित्याह—**अन्यथेति**। भिन्नाभिन्नत्वमिति निश्चितार्था धीरनपवादेत्याशङ्क्य भेदाभेदयोर्विरोधादसमुच्चयादेकस्य बलीयस्त्वे तदितरज्ञानस्य बाधात्, तुल्यबलत्वे संशयान्निरपवादत्वासिद्धिरित्याह—**सुनिश्चितेति**। ज्ञानं सिध्यति चेत् तावतैव पुमर्थसिद्धौ कृतं निरपवादत्वेनेत्याशङ्क्याह—**निरपवादं हीति**। न केवलमङ्गीकारमात्रं, श्रुत्यनुकूलं चैतदित्याह—**वेदान्तेति**। ये यतयो यतनशीला नियतबाह्यकरणाः शुद्धबुद्धयश्च ते विषयवैतृष्ण्यद्वारा

१. सुनिश्चितः वेदान्तजन्यविज्ञानस्यार्थो विषयो यैस्ते इत्यर्थः। २. 'यत्र हि द्वैतमिव' इति श्रुतिगत 'इव' शब्देत्यर्थः। तेन द्वैतस्य मिथ्यात्वबोधनादिति भावः। ३. भाष्यगत उपसंहारः उपक्रमे यस्य तदित्यर्थः। द्र. कल्प. ४१८।

मोहः कः शोक एकत्वमनुपश्यतः' (ई.उ. ७) इति च। स्थितप्रज्ञलक्षणस्मृतेश्च (द्र.भ.गी. २।५४)।

स्थिते च क्षेत्रज्ञपरमात्मैकत्वविषये सम्यग्दर्शने क्षेत्रज्ञः परमात्मेति नाममात्रभेदात् 'क्षेत्रज्ञोऽयं परमात्मनो भिन्नः' 'परमात्माऽयं क्षेत्रज्ञाद्भिन्न' इत्येवंजातीयक आत्मभेदविषयो निर्बन्धो निरर्थकः। एको ह्ययमात्मा नाममात्रभेदेन बहुधाऽभिधीयते इति। न हि 'सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायाम्' (तै. उ. २।१) इति कांचिदेवैकां गुहामधिकृत्यैतदुक्तम्। न च ब्रह्मणोऽन्यो गुहायां निहितोऽस्ति,

प्रकटार्थविवरणम्

प्रतिष्ठिता सुनिश्चिता ब्रह्मात्मैक्यविषया प्रज्ञां यस्य सः स्थितप्रज्ञः। ततो ब्रह्मैवाहमिति सुनिश्चितमेकत्वज्ञानं वाच्यमित्यर्थः। ननु अपुनरुक्तशब्दद्वयविषयत्वात् स्तम्भकुम्भवत् स्वरूपभेद इत्याशङ्क्याह—**स्थिते च क्षेत्रज्ञेति**। मिथ्याभेदेनापि नामभेदोपपत्तौ स्वरूपभेदे न प्रमाणमिति भावः। नन्वभेदे जीवे भासमाने ब्रह्मापि भासेत, तदा च गुहाहितत्ववचनं विरुध्येतेत्याशङ्क्याह—**न हि सत्यं ज्ञानमिति**। बिम्बप्रतिबिम्बन्यायेनापि भासमानाभासमानत्वे न विरुध्येते इति भावः। इतश्च गुहाश्रुतिः न भेदं साधयतीत्याह—**न च ब्रह्मणोऽन्य इति**।

भाष्यभावप्रकाशिका

इति च श्रुतिः, न "त्वेकत्वनानात्वे अनुपश्यत" इति। स्थितप्रज्ञताऽपि स्मृतिसिद्धा न सिध्येत्। भेदाभेदपक्षे ब्रह्मैवास्मीति ज्ञानस्थैर्यायोगादित्याह—**स्थितप्रज्ञेति**। औडुलोमिपक्षेऽपि जीवस्य पूर्वसिद्धब्रह्मरूपत्वासंभवात् कोशकारादीनामपि पूर्वसिद्धकीटभावाभावात् तत्सदृशस्यैवोत्पत्तेर्मोक्षानुपपत्तिर्द्रष्टव्या।

ननु क्षेत्रज्ञपरमात्मनोर्नामभेदात् साविद्यनिरविद्यत्वेन रूपभेदाच्च घटपटादिवद्भेद एष्टव्य इत्याशङ्क्याह—**स्थिते चेति**। बिम्बप्रतिबिम्बयोरिवावदातानवदातयोरुपाधिपरिकल्पितभेदयोस्तात्त्विकमेकत्वम् प्रातिभासिकविरुद्धधर्माध्यासावष्टम्भेन न बाधनीयमित्यर्थः। ननु परमात्मनो गुहाविष्टत्वश्रवणात् तस्यास्फुटत्वात् स्फुटाज्जीवात् तस्य भेद एष्टव्य इत्याशङ्क्याह—**न हीति**। गुहाशब्देनाविद्यान्तःकरणयोरभिधानात्, तत्र जीवभावेन प्रतिबिम्बितस्य स्फुटत्वेऽपि बिम्बस्थानीयस्यास्फुटता ब्रह्मणो न विरुध्यत इति भावः। अस्तु तर्हि ब्रह्मणोऽन्यद् गुहाप्रविष्टमिति, तत्राह—**न च ब्रह्मणोऽन्य इति**।

न्यायनिर्णयः

सर्वकर्मसंन्यासपूर्वकश्रवणाद्यनुष्ठानरूपाद् योगाभ्यासाद् वेदान्तकरणकसाक्षात्कारादपरोक्षीकृतात्मानो मुच्यन्त इत्यर्थः। इतश्चैकमेव तत्त्वं नानेकमपीत्याह—**तत्रेति**। एकत्वमाचार्योपदेशमनु पश्यतः शोकमोहोपलक्षितसर्वानर्थोपशान्तिरिति श्रूयते, न त्वेकत्वनानात्वे अनुपश्यत इति श्रुतिरित्यर्थः। निरपवादमेवात्मापरोक्ष्यं मोक्षापेक्षमित्यत्र स्मृतिमाह—**स्थितेति**। न हि भेदाभेदवादे स्मृतिसिद्धा स्थितप्रज्ञता, ब्रह्मैवास्मीति ज्ञानस्थैर्यायोगादब्रह्मत्वस्यापि तद्विषयत्वात्। तस्मादेकत्वमैकान्तिकमित्यर्थः।

अस्तु तर्हि परापरयोर्नामभेदादविद्यावत्त्वतदभावाभ्यां रूपभेदाच्च घटपटादिवद् भेदभावः संसारावस्थायामिति, नेत्याह—**स्थिते चेति**। आत्यन्तिकभेदे जीवस्य पूर्वसिद्धब्रह्मत्वायोगात् कोशकारादीनामपि पूर्वसिद्धकीटत्वानुपगमात् तत्सदृशस्यैवोत्पत्तेर्मोक्षासिद्धिः। न च बिम्बप्रतिबिम्बवदुपाधिकल्पितभेदयोस्तात्त्विकमैक्यं प्रातीतिकविरुद्धधर्माध्यासेन शक्यं बाधितुमिति भावः। निर्बन्धनैरर्थक्ये हेतुः—**एको हीति**। नामग्रहणं रूपोपलक्षणम्। इतिशब्दादुपरिष्टाद् यस्मादर्थो हिशब्दः संबन्धनीयः। ननु 'यो वेद निहितं गुहायाम्' इति परस्य गुहाहितत्वश्रुतेस्तस्यास्फुटत्वात् तद्विपरीताज्जीवाद्भेदः स्यात्, नेत्याह—**न हीति**। गुहाशब्देनाविद्यान्तःकरणयोर्ग्रहणात् तत्र जीवभावेन प्रतिबिम्बितस्य ब्रह्मणः स्फुटत्वेऽपि बिम्बस्थानीयस्यास्फुटत्वं तस्यैव न विरुध्यतेऽविद्याशक्तेरघटमानपटीयस्त्वादिति भावः। **कांचिदेवैकामिति**। जीवभावेन प्रतिबिम्बाधारातिरिक्तामित्यर्थः। अस्तु तर्हि ब्रह्मणोऽन्यदेवान्तःकरणादि गुहां प्रविष्टं, नेत्याह—**न चेति**। श्रोत्राकाशयोरिव जीवब्रह्मणोरङ्गाङ्गिभावादभेदवद्भेदोऽपि स्यात्। अन्यथा जीवमुद्दिश्य ब्रह्मविधानायोगात्।

'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै.उ. २।६) इति स्रष्टुरेव प्रवेशश्रवणात्। ये तु निर्बन्धं कुर्वन्ति, ते वेदान्तार्थं बाधमानाः श्रेयोद्वारं सम्यग्दर्शनमेव बाधन्ते; कृतकमनित्यं च मोक्षं कल्पयन्ति; न्यायेन च न संगच्छन्त इति।।२२।।

।।इति षष्ठं वाक्यान्वयाधिकरणम्।।

प्रकटार्थविवरणम्

विपक्षे दण्डमाह—**ये तु निर्बन्धमिति**। अथ कृतकोऽपि नित्य एव, तत्राह—**न्यायेन चेति**। भावरूपत्वे सति कृतकत्वस्यानित्यत्वेन व्याप्तत्वादित्यर्थः। किञ्च यच्छास्त्रीयं भेदाभेदविषयं ज्ञानं तेन स भेदो निवर्त्यते चेत्, तर्हि ज्ञानस्य स्वविषयनिरासिताप्रसङ्गः; कर्मणा तन्निवृत्तौ, निवृत्त्यभावे वा "ब्रह्म वेद ब्रह्मैव भवति" इति श्रुतिविरोधः[1]। अभ्यासजन्यज्ञानहेयत्वे चाज्ञानमात्रत्वप्रसङ्गाद्ज्ञानम्, तत्र भेदादेव च श्रवणादिविधानोपपत्तेः; **भास्कर**व्याहृतांशत्वस्य च स्वावसर एव निराकरिष्यमाणत्वात्; तस्मादुपाधिपरिकल्पितभेदपरामर्शेन स्वरूपपर्यवसायि वेदवाक्यमिति स्थितम्।

।। इति षष्ठं वाक्यान्वयाधिकरणम् ।।

भाष्यभावप्रकाशिका

ननु अभेदस्य श्रुतिगम्यत्वेऽपि भेदोऽप्यभ्युपगन्तव्यः; अन्यथा जीवमुद्दिश्य ब्रह्मरूपताविधानायोगात्, तस्मात् "तत्त्वमसी" ति सामानाधिकरण्यं भेदाभेदपरम्, श्रोत्राकाशयोरिव तयोरंशांशिभावादित्याशङ्क्याह—**ये तु निर्बन्धमिति**। अयं भावः—कार्यकारणभावशून्यद्रव्ययोरुद्देश्योपादेयभावेन सामानाधिकरण्यमेकस्यैव द्रव्यस्योपाधिपरिकल्पितभेदापेक्षम्, न द्रव्यभेदापेक्षम्, सोऽयं देवदत्त इत्यादिवत्। न च जीवो ब्रह्मणोंऽशः; "निष्कलं निष्क्रियं शान्तमि" ति श्रुतिविरोधात्, नापि कर्णनेमिमण्डलावच्छिन्नं नभो नभसोंऽशः, तस्यापि नभोरूपत्वात्; तदवच्छिन्नस्य तदंशतेत्यपि न युक्तम्; नभोरूपातिरिक्तकर्णनेमिमण्डल-तत्संयोगयोरतद्रूपयोस्तदंशतानुपपत्तेः, संयोगस्य निरवयवाकाशेऽव्याप्यवृत्त्यसंभवात् व्यापकत्वाङ्गीकारे सर्वत्र शब्दश्रवणप्रसङ्गात्, प्रतिसंबन्ध्यधीननिरूपणतया सर्वत्रानिरूप्यत्वेऽपि स्वरूपेण भावात्, अंशांशिनोश्च भेदपक्षेषु दुर्निरूपत्वात्। तदेवं श्रोत्रस्याप्याकाशांशता-भावात् तद्वद् जीवो ब्रह्मणोऽनंशत्वाद[द् न]भिन्नाभिन्न इत्युक्तम्। न च भेदः शास्त्रप्रतिपाद्यः, लोकत एव सिद्धत्वात्। न च वास्तवत्वे भेदस्य तस्य ज्ञानान्निवृत्तिः। अतो जीव-ब्रह्मणोरत्यन्तैक्यमेवेति। ननु सम्यग्दर्शनाभावेऽपि कर्मैव मोक्षसाधनं भविष्यतीति, तत्राह—**कृतकमिति**। कृतकत्वेऽपि प्रध्वंसवन्नित्यतेत्याशङ्क्याह—**न्यायेनेति**। मोक्षस्य निरतिशयानन्दरूपतया भावरूपत्वाद् बन्धप्रध्वंसतयाऽभावत्वेऽपि तस्य कृतकत्वेऽनित्यत्वप्रसङ्गात्, प्रध्वंसप्रध्वंसेऽपि प्रध्वस्तस्य कारणाभावादेव पुनरुत्पत्तेरप्रसङ्गात्, प्रध्वंसप्रध्वंसस्यापि प्रध्वंसवदेव प्रध्वंसाभावविरोधित्वात् प्रध्वंसस्यापि कृतकत्वेनानित्यताङ्गीकारादिति भावः।।२२।। इति षष्ठं वाक्यान्वयाधिकरणम्।

न्यायनिर्णयः

अतस्तत्त्वमिति सामानाधिकरण्यं भेदाभेदविषयमित्याशङ्क्याह—**ये त्विति**। कार्यकारणत्वशून्यद्रव्ययोरुद्देश्योपादेयत्वेन सामानाधिकरण्यं सोऽयमितिवदेकस्यैव द्रव्यस्यौपाधिकभेदापेक्षं न द्रव्यभेदमाकाङ्क्षति। न च ब्रह्मणोंऽशो जीवः, निष्कलश्रुतेः। न च श्रोत्रस्य कर्णनेमिमण्डलावच्छेदेऽपि नभसोंऽशत्वमवच्छेदकाभावे तन्मात्रत्वात्। अतो जीवस्यापि ब्रह्मांशत्वाभावान्न भिन्नाभिन्नत्वम्। न च भेदः शास्त्रार्थः, लौकिकत्वात्। अभेदस्य त्वैकान्तिकस्य शास्त्रीयत्वात् तदनुपगमे सम्यग्धीरेव मुक्तिहेतुर्बाधिता स्यादिति भावः। कर्मैव मुक्तिहेतुरिति कृतं सम्यग्धियेत्याशङ्क्याह—**कृतकमिति**। कृतकत्वेऽपि ध्वंसवन्नित्यतेत्याशङ्क्याह—**न्यायेनेति**। मोक्षो निरतिशयानन्दत्वेन भावत्वात् कृतकश्चेदनित्यः स्यात्, एवं बन्धध्वंसतया तस्याभावत्वेऽपि कृतकत्वे कथं नानित्यता? ध्वंसध्वंसे च ध्वस्ताध्वस्तेर्बन्धस्य पुनरुत्पत्तावपुनरावृत्तिश्रुतिर्विरुध्येत। न च ध्वंसध्वंसेऽपि कारणाभावान्न ध्वस्तस्य पुनरुत्पत्तिस्तद्ध्वंसस्य प्रतियोगिभेदेऽनवस्थानात्, तदभेदे च तदुत्पत्तेरावश्यकत्वात्। अतो न कर्मसाध्या मुक्तिः। न चास्मन्मते बन्धध्वंसोऽपि वस्तुव्यतिरिक्तोऽस्तीति भावः। तदेवं प्रत्यग्भूते ब्रह्मणि मैत्रेयीब्राह्मणमन्वितमित्युपसंहर्तुमितीत्युक्तम्।।२२।।

।।इति षष्ठं वाक्यान्वयाधिकरणम्।।

---

१. कर्मणा निवृत्तौ ज्ञानेन निवृत्त्युक्त्ययोगादिति भावः।

७।।प्रकृत्यधिकरणम्।।सू. २३-२७।।

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्।।२३।।

यथाऽभ्युदयहेतुत्वाद् धर्मो जिज्ञास्य एवं निःश्रेयसहेतुत्वाद् ब्रह्म जिज्ञास्यमित्युक्तम्। ब्रह्म च 'जन्माद्यस्य यतः' (ब्र.सू. १।१।२) इति लक्षितम्। तच्च लक्षणं घटरुचकादीनां मृत्सुवर्णादिवत् प्रकृतित्वे कुलालसुवर्णकारादिवन्निमित्तत्वे च समानमित्यतो भवति विमर्शः-किमात्मकं पुनर्ब्रह्मणः कारणत्वं स्यादिति। तत्र निमित्तकारणमेव तावत् केवलं स्यादिति प्रतिभाति। कस्मात्? ईक्षापूर्वककर्तृत्वश्रवणात्।

शारीरकन्यायसंग्रहः

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्।।२३।। अभिध्योपदेशाच्च।।२४।। साक्षाच्चोभयाम्नानात्।।२५।। आत्मकृतेः परिणामात्।।२६।। योनिश्च हि गीयते।।२७।। नेदं जगत् चेतनोपादानम्, द्रव्यत्वे सति कार्यत्वात्, घटादिवत्; न ब्रह्म कार्यद्रव्योपादानम्, चेतनत्वात्, जीववत्; न ब्रह्म कार्यद्रव्यस्योपादानम्, ईश्वरत्वात् लौकिकेश्वरवत्; इदं जगदचेतनोपादानम्, कार्यद्रव्यत्वात्, घटादिवत् इत्याद्यनुमानैर्न ब्रह्म जगदुपादानमिति प्राप्तम्। तत्र श्रुतिलिङ्गाभ्यां सामान्यतोदर्शितानुमानानि बहून्यपि दुर्बलानि श्रुतिविषयादन्यत्र व्याप्तिसङ्कोचोपपत्तेः इति न्यायेन प्रतिज्ञादृष्टान्तलिङ्गादुपादानकारणाभिधायिपञ्चमीशब्दाच्च ब्रह्म उपादानकारणं निर्णीतम्।

प्रकटार्थविवरणम्

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्। एवं तावद् ब्रह्मण्येव गतिसामान्यं, प्रधानस्याशब्दत्वं च प्रपञ्च्य इदानीं यज्जन्मादिसूत्रे जगन्निमित्तोपादानत्वं ब्रह्मणो लक्षणमसूसुचत् तत् प्रपञ्चयितुमिदमधिकरणमारभ्यत[1] इति व्यवहितसङ्गतिमाह—**यथाऽभ्युदयेति।** पूर्वपक्षमाह—**तत्र निमित्तकारणमेवेति।** पूर्वत्र विरुद्धयोरपि जीवब्रह्मणोरैक्यं प्रमाणावष्टम्भेनाभाणि। प्रकृतित्तत्वनिमित्त्वयोः

भाष्यभावप्रकाशिका

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्।।२३।। प्रकृतिश्चेति। वेदान्तानां ब्रह्मणि समन्वयस्य प्रदर्शितत्वात् परिसमाप्तं समन्वयलक्षणमिति किमपरमवशिष्टम्, यदर्थमधिकरणमिदमारभ्यत इति शङ्कां निराकर्तुं वृत्तं सङ्कीर्तयन् सङ्गतिमाह—**यथाऽभ्युदयेति।** इदानीमवशिष्टमाह—**तच्च लक्षणमिति।** एवं च सति लक्षणस्य समन्वयाध्यायसङ्गतत्वाल्लक्षणसम्बन्धिनोऽधिकरणस्य समन्वयाध्यायसङ्गतिः सिद्धेति भावः। ब्रह्मणो निमित्तकारणत्वे सति प्रधानमेवोपादानकारणं भविष्यतीति मन्वानः पूर्वपक्षयति—**तत्र निमित्तकारणमिति।** तदेव साधयति—**ईक्षापूर्वकं हीति।** न ब्रह्म कार्यद्रव्योपादानम्, चेतनत्वाज्जीववदित्यनुमानमाह—

न्यायनिर्णयः

यत्प्रतिज्ञाबलान्मैत्रेयीब्राह्मणस्य ब्रह्मपरत्वं तस्मादेवोपादानत्वं ब्रह्मणः साधयति—**प्रकृतिश्चेति।** व्यवहितसंबन्धादपौनरुक्त्यं वक्तुं वृत्तं कीर्तयति—**यथेति।** सदृष्टान्तमाद्यसूत्रार्थमनूद्य ब्रह्मलक्षणस्य कारणत्वस्य द्वितीयसूत्रार्थस्य विचारप्रतिज्ञया संगतिमाह—**ब्रह्म चेति।** ब्रह्मकारणत्वार्थाधिकरणस्य कारणविशेषविचारस्य च संबन्धोक्तिपूर्वकमवशिष्टमर्थमाचक्षाणः सनिमित्तं संशयमाह—**तच्चेति।** जन्मादिसूत्रे त्वेतदधिकरणसिद्धवत्कारेणोभयकरणत्वोक्तिः। तदनन्तरमस्यारभ्यत्वेऽपि निर्णीततात्पर्यैर्वेदान्तैर्निमित्तत्वमात्रसाधकानुमितेर्विरोधोक्तिः सुकरेति समन्वयावसाने लिखितमेतदधिकरणम्। उक्ते[2] विषये समन्वयो दुःसाध्य इति कारणतामात्रं तत्रोक्तमिति भावः। ब्रह्मलक्षणस्याध्यायादिसंबन्धादस्यापि तद्योगिनस्तत्सिद्धिः। पूर्वपक्षे प्रतिज्ञागौणत्वं सिद्धान्ते तन्मुख्यत्वं फलमिति। समानधर्मदृष्ट्या विमर्शमेव विशदयति—**किमिति।** प्रतिज्ञाया मुख्यत्वेन वाक्यस्य जीवपरत्वे परास्ते निमित्तोपादानभेदाद् गौणी सेति पूर्वपक्षयति—**तत्रेति।** एवकारार्थं स्फुटयति—**केवलमिति।** तत्र मानं पृच्छति—**कस्मादिति।** न

---

१. ननु इदमेवाधिकरणं जन्माद्यधिकरणसमीपे कुतो न कृतमिति चेत्? उच्यते। 'शास्त्रयोनित्वात्' इत्यारभ्य कृतः सर्वोऽपि विचारः उक्तलक्षणस्यासंभवादिदोषनिरासायैव इति द्योतयितुं तत्र न कृतम्। अध्यायान्ते करणे हि कृत्स्नस्याध्यायस्य लक्षणविचारोपक्रमोपसंहारान्तर्गततयोक्तार्थद्योतनं सुखेन भवति। ब्र. वि. ५६३। २. 'अनुक्ते' इति पाठः स्यात्। द्र.कल्प. ४२४ पृ.।

ईक्षापूर्वकं हि ब्रह्मणः कर्तृत्वमवगम्यते– 'स ईक्षांचक्रे'..... 'स प्राणमसृजत' (प्र.उ. ६।३४) इत्यादिश्रुतिभ्यः। ईक्षापूर्वकं च कर्तृत्वं [1]निमित्तकारणेष्वेव कुलालादिषु दृष्टम्। अनेककारकपूर्विका च क्रियाफलसिद्धिर्लोके दृष्टा। स च न्याय आदिकर्तर्यपि युक्तः संक्रमयितुम्। ईश्वरत्वप्रसिद्धेश्च। ईश्वराणां हि राजवैवस्वतादीनां निमित्तकारणत्वमेव केवलं प्रतीयते, तद्वत् परमेश्वरस्यापि निमित्तकारणत्वमेव युक्तं प्रतिपत्तुम्। कार्यं चेदं जगत् सावयवमचेतनमशुद्धं च दृश्यते, कारणेनापि तस्य तादृशेनैव भवितव्यं, कार्यकारणयोः सारूप्यदर्शनात्। ब्रह्म च नैवंलक्षणमवगम्यते 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' (श्वे.उ. ६।१९) इत्यादिश्रुतिभ्यः। पारिशेष्याद् ब्रह्मणोऽन्यदुपादानकारणमशुद्ध्यादिगुणकं स्मृति-

प्रकटार्थविवरणम्

पुनर्विरुद्धयोरैक्ये नास्ति मानम्, वैपरीत्ये चानुमानमस्ति—ब्रह्म निमित्तम्, ईक्षापूर्वककर्तृत्वात् कुलालवदिति। अतो न ब्रह्मलक्षणं संबोभवीतीति भावः। किञ्च जगत् नाभिन्ननिमित्तोपादानं कार्यत्वात् कुम्भवदित्याह—**अनेककारकपूर्विका चेति**। किञ्च निमित्तमेव ब्रह्मेश्वरत्वात् राजवदित्याह—**ईश्वरप्रसिद्धेश्चेति**। किञ्च जगद्विलक्षणत्वादपि न तदुपादानं ब्रह्मेत्याह—**कार्यं चेदमिति**। निष्कलं [निरवयवम्]; निष्क्रियम् अपरिणामि; शान्तं विक्षेपरहितम्, निरवद्यम् अविद्यारागादिदोषरहितम्; निरञ्जनम् असङ्गमित्यर्थः। यदा चोपादानत्वं ब्रह्मणो नोपपद्यते तदा हठात् प्रधानमेवोपादानं भविष्यतीत्याह—**पारिशेष्यादिति**।

भाष्यभावप्रकाशिका

ईक्षापूर्वकं चेति। जगद्द्रव्योत्पत्तिः भिन्ननिमित्तोपादानपूर्विका, द्रव्योत्पत्तित्वात्, घटाद्युत्पत्तिवदित्यनुमानमाह—**अनेककारकेति**। ब्रह्म, न कार्यद्रव्योपादानम्, ईश्वरत्वात्, लौकिकेश्वरवदित्यनुमानमाह—**ईश्वरत्वेति**। इदं जगत्, अचेतनोपादानम्, कार्यद्रव्यत्वादित्यनुमानमाह— **कार्यं चेदमिति**। अचेतनत्वादशुद्धत्वाच्च न ब्रह्मकार्यत्वम्, घटादिवदित्याह—**अचेतनमिति**। निष्कलम् निरवयवम्। निष्क्रियम् परिस्पन्दपरिणामरहितम्। शान्तम् रागादिशून्यम्। निरवद्यम् पुण्यापुण्यशून्यम्। निरञ्जनम् सुखदुःखाविद्यादिभिरसङ्गि। आगमस्य कारणमात्रे पर्यवसानादनुमानैस्तद्विशेषनिश्चय इत्याह— **पारिशेष्यादिति**। ब्रह्मोपादानत्वस्य प्रसक्तस्य प्रतिषेधे साङ्ख्यस्मृतिसिद्धप्रधानादन्यत्राप्रसङ्गात् तदेव परिशिष्यत इत्यर्थः। ''सदेव सोम्येदमग्र आसीदि''त्यादिश्रुतेः

न्यायनिर्णयः

ब्रह्म कार्यद्रव्योपादानं, चेतनत्वात् कर्तृत्वाच्च, कुलालादिवदित्याह—**ईक्षेति**। हेतुद्वयं श्रुत्या स्फुटयति—**ईक्षेत्यादिना**। ब्रह्मणश्चेतनस्य कर्तुरिव कार्यद्रव्योपादानत्वे किं बाधकमित्याशङ्क्य कुलालादेरपि तत्प्रसक्तिरित्याह—**ईक्षेति**। अनुमानान्तरं वक्तुं या द्रव्योत्पत्तिः सा भिन्ननिमित्तोपादानपूर्वा, यथा घटाद्युत्पत्तिरिति व्याप्तिमाह—**अनेकेति**। जगद्द्रव्योत्पत्तिर्भिन्ननिमित्तोपादानपूर्वा, द्रव्योत्पत्तित्वात्, घटोत्पत्तिवदित्यनुमिनोति—**स चेति**। न ब्रह्म कार्यद्रव्योपादानम् ईश्वरत्वात्, लौकिकेश्वरवदित्याह—**ईश्वरत्वेति**। साध्यवैकल्यं प्रत्याह—**ईश्वराणां हीति**। दार्ष्टान्तिकं निगमयति—**तद्वदिति**। विमतचेतनोपादानं, कार्यद्रव्यत्वात्, घटवदित्याह—**कार्यं चेति**। कार्यत्वं साधयति—**सावयवमिति**। विमतं न ब्रह्मोपादानम्, अचेतनत्वादशुद्धत्वाच्च, घटादिवदित्याह—**अचेतनमिति**। तथापि जगच्चेतनोपादानं किं न स्यात्, तत्राह—**कारणेनेति**। ब्रह्मैव तर्हि तादृगस्तु, नेत्याह—**ब्रह्म चेति**। निष्कलं निरवयवम्। निष्क्रियं परिणामपरिस्पन्दरहितम्। शान्तं रागद्वेषादिशून्यम्। निरवद्यं पुण्यापुण्यवर्जितम्। निरञ्जनं सुखदुःखादिभिरस्पृष्टम्। आदिशब्देन 'शुद्धमपापविद्धम्' इत्याद्या श्रुतिरुक्ता। ब्रह्मणश्चेन्न जगदुपादानत्वं, तर्हि किं तदुपादानं, न हि निमित्तमात्राद्भावरूपं कार्यम्, तत्राह—**पारिशेष्यादिति**। तत्र ब्रह्मण्युक्तमसारूप्यं नास्तीत्याह—**अशुद्ध्यादीति**। न च तस्याप्रमितत्वादनुपादानत्वमित्याह—**स्मृतीति**। ब्रह्मोपादानत्वस्य प्रसक्तस्य निषेधे सांख्यीयप्रधानादन्यत्राप्रसङ्गात्तदेव परिशेषतो जगदुपादानमित्यर्थः। 'सदेव'

---

१. ईक्षापूर्वकद्रव्यकर्तृत्वमित्यर्थः। तेन 'यक्ष्ये' इतीक्षापूर्वकं यागकर्तरि न व्यभिचारः। यागस्य देवतोद्देशेन द्रव्यत्यागात्मकतया त्यागस्य चेच्छारूपत्वात् तत्प्रकृतित्वस्यापि तत्र सत्त्वेन एवकारासंगतेः। ब्र. वि. ५६३। एवकारं विना प्रकटार्थोक्तानुमाने तु यथाश्रुतमेव साधु।

प्रसिद्धमभ्युपगन्तव्यम्। ब्रह्मकारणत्वश्रुतेर्निमित्तत्वमात्रे पर्यवसानादिति।

एवं प्राप्ते ब्रूमः-- प्रकृतिश्चोपादानकारणं च ब्रह्माभ्युपगन्तव्यं निमित्तकारणं च। न केवलं निमित्तकारणमेव। कस्मात्? प्रतिज्ञादृष्टान्तानुपरोधात्। एवं प्रतिज्ञादृष्टान्तौ श्रौतौ नोपरुध्येते। प्रतिज्ञा तावत्- 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' (छा.उ. ६।१।२) इति। तत्र चैकेन विज्ञातेन सर्वमन्यदविज्ञातमपि विज्ञातं भवतीति प्रतीयते। तच्चोपादानकारणविज्ञाने सर्वविज्ञानं संभवत्युपादानकारणाव्यतिरेकात् कार्यस्य। निमित्तकारणाव्यतिरेकस्तु कार्यस्य नास्ति, लोके तक्ष्णः प्रासादव्यतिरेकदर्शनात्। दृष्टान्तोऽपि-'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छा.उ. ६।१।४) इत्युपादानकारणगोचर एवाम्नायते। तथा 'एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात्', 'एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यात्' (छा.उ. ६।१।५,६) इति च। तथाऽन्यत्रापि 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' (मु.उ. १।१।३) इति प्रतिज्ञा। 'यथा पृथिव्यामोषधयः संभवन्ति' (मु.उ. १।१।७) इति दृष्टान्तः। तथा 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्' (बृ.उ. ४।५।६) इति प्रतिज्ञा। 'स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्शक्नुयाद् ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः'

प्रकटार्थविवरणम्

सिद्धान्तसूत्रं योजयति—**प्रकृतिश्चेति**। निमित्तकारणत्वेऽपि प्रतिज्ञा किं न स्यादित्याशङ्क्याह—**निमित्तकारणाव्यतिरेकस्त्विति**। तक्षा वर्धकिः। तस्मादुपादानत्व एव प्रतिज्ञाया अबाधः स्यात्; निमित्तत्वे तु सा बाधिता स्यादित्यर्थः। इदानीं बाधं दर्शयति—**दृष्टान्तोऽपीत्यादिना**। घटः प्रकाशते इत्यनुगतप्रकाशातिरेकेण घटादेरसिद्धेः तत्रैव कल्पितत्वादनुगतः

भाष्यभावप्रकाशिका

का गतिरिति? अत आह—**ब्रह्मकारणत्वश्रुतेरिति**। अनुमानविरोधाद्विशेषे सङ्कोचः क्रियत इत्यर्थः।

प्रतिज्ञावाक्यस्यार्थं दर्शयति—**तत्र चेति**। प्रतिज्ञानुपरोधं दर्शयति—**तच्चेति**। कारणत्वाविशेषान्निमित्तकारणस्य, तद्विज्ञानेऽपि सर्वविज्ञानं किं न स्यादिति? अत आह—**निमित्तेति**। विपरीतदृष्टान्तोऽपि क्वचित् स्यादित्याशङ्कानिरासाय दृष्टान्तान्तराणि दर्शयति—**यथैकेन लोहमणिनेति**। गतिसामान्यं दर्शयति—**तथाऽन्यत्रेति**। **न बाह्यान् शब्दानिति**। दुन्दुभिशब्दत्वसामान्यात् पृथग्भूतान् दुन्दुभ्याघातजान् शब्दविशेषान् ग्रहीतुं न शक्नुयात्। दुन्दुभेस्तु शब्दसामान्यस्य ग्रहणे तेऽपि गृह्यन्त इत्यर्थः। निमित्तेऽपि

न्यायनिर्णयः

इत्यादिश्रुतेस्तर्हि का गतिरित्याशङ्क्यानुमानविरोधाद्विशेषे संकोच इत्याह—**ब्रह्मेति**।

जन्मादिसूत्रोक्तलक्षणस्यासंभावितत्वमितिशब्दोपसंहृतमनूद्य सिद्धान्तमवतार्य प्रतिज्ञां व्याकरोति—**एवमिति**। उक्तानुमानेषु जीवत्सु नोभयकारणतेति शङ्कते—**कस्मादिति**। हेतुमादाय व्याचष्टे—**प्रतिज्ञेति**। **एवमिति**। उभयकारणत्वे सतीति यावत्। तयोरनुपरोधं वक्तुं प्रतिज्ञामाह—**प्रतिज्ञेति**। तद्वाक्यार्थमाह—**तत्रेति**। तदनुपरोधं स्वमते दर्शयति—**तच्चेति**। निमित्तकारणज्ञानादेव सर्वज्ञानं किं न स्यात्, तत्राह—**निमित्तेति**। दृष्टान्तानुपरोधमाह—**दृष्टान्तोऽपीति**। मृदि ज्ञातायां तद्विकारस्य ज्ञेयत्वेनानवशेषे हेतुः—**वाचेति**। घटादेर्वाचारम्भणत्वं वस्तुतोऽसत्त्वं साधयति—**नामेति**। शून्यशेषत्वं निषेधति—**मृत्तिकेति**। विपरीतदृष्टान्तोऽपि स्यादिति शङ्कां निरसितुं दृष्टान्तान्तराण्याह—**तथेति**। गतिसामान्यार्थमाथर्वणगतौ प्रतिज्ञादृष्टान्तावाह—**तथेति**। बृहदारण्यकेऽपि तौ निर्दिशति—**आत्मनीति**। घटः प्रकाशते पटो वेत्यनुगतप्रकाशातिरेकेण घटादेरसिद्धेस्तत्रैव कल्पितत्वात् प्रकाशोऽनुगतोऽधिष्ठानं प्रकृतिरित्यनुगतः स दृष्टान्तो यथा तथोच्यते। **बाह्यान्** दुन्दुभिशब्दसामान्यबहिर्भूतानिति यावत्। दुन्दुभेस्तच्छब्दसामान्यस्येत्यर्थः।

(बृ.उ. ४।५।८) इति दृष्टान्तः। एवं यथासंभवं प्रतिवेदान्तं प्रतिज्ञादृष्टान्तौ प्रकृतित्वसाधनौ प्रत्येतव्यौ। यत इतीयमपि पञ्चमी 'यतो वा इमानि भूतानि जायन्ते' इत्यत्र 'जनिकर्तुः प्रकृतिः' (पा.सू. १।४।३०) इति विशेषस्मरणात् प्रकृतिलक्षण एवापादाने द्रष्टव्या। निमित्तत्वं त्वधिष्ठात्रन्तराभावादधिगन्तव्यम्। यथा हि लोके मृत्सुवर्णादिकमुपादानकारणं कुलालसुवर्णकारादीनधिष्ठातॄनपेक्ष्य प्रवर्तते, नैवं ब्रह्मण उपादानकारणस्य सतोऽन्योऽधिष्ठाताऽपेक्ष्योऽस्ति, प्रागुत्पत्तेरेकमेवाद्वितीयमित्यवधारणात्। अधिष्ठात्रन्तराभावोऽपि प्रतिज्ञादृष्टान्तानुपरोधादेवोदितो वेदितव्यः। अधिष्ठातरि ह्युपादानादन्यस्मिन्नभ्युपगम्यमाने पुनरप्येकविज्ञानेन सर्वविज्ञानस्यासंभवात् प्रतिज्ञादृष्टान्तोपरोध एव स्यात्। तस्मादधिष्ठात्रन्तराभावादात्मनः कर्तृत्वमुपादानान्तराभावाच्च प्रकृतित्वम्।।२३।।

कुतश्चात्मनः कर्तृत्वप्रकृतित्वे?

प्रकटार्थविवरणम्

प्रकाशोऽधिष्ठानतया प्रकृतिरित्यत्र दृष्टान्तो यथा भवति तथोच्यते। बाह्यान् दुन्दुभिशब्दसामान्यबहिर्भूतान् ग्रहीतुं न शक्नोतीत्यनुगतमधिष्ठानं प्रकृतिरित्यर्थः। एवं प्रतिज्ञादृष्टान्तानुपरोधात् लिङ्गादुपादानत्वं प्रसाध्येदानीं पञ्चमीश्रुत्या साधयति—**यत इतीयमपीति**। जनिकर्तुर्जायमानस्य कार्यस्य प्रकृतिरुपादानम् अपादानसंज्ञं भवति; अपादाने पञ्चमी विभक्तिः भवतीत्यर्थः। अस्त्वेवमुपादानत्वम्, निमित्तत्वं तस्यैव विरुद्धं कथमुच्यत इत्याशङ्क्याह—**निमित्तत्वं त्विति**। सूत्रमप्यधिष्ठात्रन्तराभावे योजयति—**अधिष्ठात्रन्तराभावोऽपीति**।

निमित्तत्वमुपादानत्वं चैकस्याविरुद्धमिति सूत्रचतुष्टयेन साधयति—**कुतश्चेत्यादिना**।

भाष्यभावप्रकाशिका

पञ्चमीदर्शनादुपादानत्वं कथं गमयेदिति? अत आह—**जनिकर्तुरिति**। यत इति पञ्चमी न कारणमात्रे स्मर्यते; विशेषस्मरणादित्यर्थः। ननु तथापि निमित्तत्वं कथमिति? तदाह—**निमित्तत्त्वमिति**। उपादानकारणस्य ब्रह्मणो मृद इवाधिष्ठात्रन्तरानवगमाद् ब्रह्मणोऽन्यन्निमित्तकारणं जगतो नास्तीत्यर्थः। अत्रापि प्रतिज्ञादृष्टान्तानुपरोध एव हेतुरित्याह—**अधिष्ठात्रन्तराभावोऽपीति**। एतदुपपादयति—**अधिष्ठातरीति**।।२३।।

न्यायनिर्णयः

दुन्दुभ्याघातस्य जनकस्य जन्यतया संबन्धी वा शब्दो विशेषशब्द इत्यर्थः। वेदान्तत्रयगतं न्यायं वेदान्तान्तरेष्वतिदिशति—**एवमिति**। प्रतिज्ञाद्यनुपरोधलिङ्गादुपादानत्ववत् पञ्चमीश्रुत्याऽपि तद्धीरित्याह—**यत इति**। 'यत' इत्यादिश्रुतौ यत इतीयं पञ्चम्यपि प्रकृतिरूपापादान एव द्रष्टव्येति संबन्धः। जाड्याद् बद्ध एवेति निमित्तेऽपि पञ्चमीदृष्टेरुपादानत्वं कथं गमयेत्, तत्राह—**जनीति**। जायमानस्य कार्यस्य प्रकृतिरुपादानमपादानसंज्ञं भवतीत्यपादाने पञ्चमीस्परणान्न कारणमात्रे सा युक्तेत्यर्थः। यद्यपि सूत्रे प्रकृतिग्रहणं सर्वकारणसंग्रहार्थमित्युक्तम्,[1] तथापि तदनादृत्य 'प्रकृतिश्च' इतिसूत्रस्थप्रकृतिशब्दवदयमपीति मन्यते। तथापि कथं निमित्तत्वं, तदाह—**निमित्तत्वमिति**। अधिष्ठात्रन्तराभावं व्यतिरेकदृष्टान्तेन साधयति—**यथेति**। अन्यस्याधिष्ठातुरपेक्षणीयस्यासत्त्वे हेतुमाह—**प्रागिति**। ब्रह्मणोऽन्यन्निमित्तं जगतो नेत्यत्रापि सूत्रावयवसामर्थ्यमाह—**अधिष्ठात्रन्तरेति**। उक्तमेव व्यतिरेकेण स्फोरयति—**अधिष्ठातरीति**। श्रुतिलिङ्गाभ्यां सिद्धमुपसंहरति—**तस्मादिति**।।२३।।

द्विधा हेतुत्वमेकस्य युक्तमिति वक्तुं सूत्रचतुष्टयमवतारयति—**कुतश्चेति**। स्रष्टव्यविषयसंकल्पोक्तेरुभयकारणत्वं तावदाह—

---

१. जनिकर्तुरिति। अस्मिन् सूत्रे प्रकृतिपदं कारणमात्रपरमिति न्यासकृतोक्तम्। अन्यथा 'पुत्रात् प्रमोदो जायत' इत्यत्र पञ्चम्यनापत्तेरिति। 'हेतुमनुष्येभ्योऽन्यतरस्यां रूप्य' इति ज्ञापकात् हेतुपञ्चमीसिद्धेः न्यासकृतैवोक्तत्वात् तत् खण्डयित्वा प्रकृतिपदस्योपादानपरत्वमेव महाभाष्याद्यभिमतमिति विस्तरेण निरूपितं न्यायरक्षामणौ। तत् तत्रैव द्रष्टव्यम्।

अभिध्योपदेशाच्च।।२४।।

अभिध्योपदेशश्चात्मनः कर्तृत्वप्रकृतित्वे गमयति 'सोऽकामयत। बहु स्यां प्रजायेय' (तै.उ. २।६) इति, 'तदैक्षत बहु स्यां प्रजायेय' (छा.उ. ६।२।३) इति च। तत्राभिध्यानपूर्विकायाः स्वातन्त्र्यप्रवृत्तेः कर्तेति गम्यते। बहु स्यामिति प्रत्यगात्मविषयत्वाद् बहुभवनाभिध्यानस्य प्रकृतिरित्यपि गम्यते।।२४।।

साक्षाच्चोभयाम्नानात्।।२५।।

प्रकृतित्वस्यायमभ्युच्चयः। इतश्च प्रकृतिर्ब्रह्म, यत्कारणं साक्षाद् ब्रह्मैव कारणमुपादायोभौ प्रभवप्रलयावाम्नायेते– 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति' (छा. उ. १।९।१) इति। यद्धि यस्मात्प्रभवति यस्मिंश्च प्रलीयते तत् तस्योपादानं प्रसिद्धम्। यथा व्रीहियवादीनां पृथिवी। साक्षादिति चोपादानान्तरानुपादानं दर्शयति–आकाशादेवेति। प्रत्यस्तमयश्च नोपादानादन्यत्र कार्यस्य दृष्टः।।२५।।

आत्मकृतेः परिणामात्।।२६।।

इतश्च प्रकृतिर्ब्रह्म, यत्कारणं ब्रह्मप्रक्रियायाम् 'तदात्मानं स्वयमकुरुत' (तै.उ. २।७) इत्यात्मनः

प्रकटार्थविवरणम्

अभिध्योपदेशाच्च। अभिध्या सृज्यमानविषयः सङ्कल्पः।

साक्षाच्चोभयाम्नानात्। आकाशादेवेति एवकारसूचितमुपादानान्तरानुपादानम् "साक्षात्" इति पदेन सूत्रकारो दर्शयतीति योजना। ननु उपादानान्तरव्यावृत्तिरेवकारार्थो न भवति, किं तु निमित्तकारणस्याकाशस्योपादानत्वव्यावृत्तिरित्याशङ्क्याह— **प्रत्यस्तमयश्च नोपादानादन्यत्रेति।** निमित्ते कार्यस्य प्रत्यस्तमयादर्शनादाकाशस्य निमित्तत्वमेवात्र विवक्षितं न भवतीत्यर्थः।

आत्मकृतेः परिणामात्। परिणामशब्दो मिथ्यापरिणामविवर्ताभिप्रायः। ननु सर्वोऽपि परिणामस्तव मिथ्यैव, किं विशेषणेन?

भाष्यभावप्रकाशिका

अभिध्योपदेशाच्च।।२४।। अभिध्या अनागतेच्छा संकल्पः। अभिध्योपदेशवशात् कर्तृत्व-प्रकृतित्वे कथमवगम्येते इति? तदाह—**तत्राभिध्येति।।२४।।**

साक्षाच्चोभयाम्नानात्।।२५।। आकाशादिति। ब्रह्मण इत्यर्थः। 'आकाशादेवे'त्यवधारणार्थं सूत्रपदं दर्शयतीत्याह— **साक्षादिति चेति।** ननु निमित्तकारणादपि प्रभवप्रलययोः संभवादुपादानत्वमुभयाम्नानात् कथमवगन्तव्यमित्याशङ्क्य, कारणे लयश्रवणादुपादानत्वसिद्धिरित्याह—**प्रत्यस्तमयेति।।२५।।**

आत्मकृतेः परिणामात्।।२६।। तदेव विभजते—**आत्मानमिति।** ननु पूर्वसिद्धस्य कर्तृत्वम्, पूर्वमसिद्धस्य च साध्यत्वं

न्यायनिर्णयः

अभिध्येति। प्रतिज्ञां पूरयन्नभिध्योपदेशं विशदयति—**अभिध्येति।** कथं तस्मात् कर्तृत्वप्रकृतित्वे गम्येते, तत्राह—**तत्रेति।।२४।।**

निमित्तत्वमुपेत्योपादानत्वे हेत्वन्तरमाह—**साक्षाच्चेति।** सूत्रस्य तात्पर्यमाह—**प्रकृतित्वस्येति।** अक्षराणि व्याकरोति—**इतश्चेति।** आकाशस्य ब्रह्मत्वम् 'आकाशस्तल्लिङ्गात्' इत्युक्तम्। नन्वाकाशं ब्रह्मोक्त्वा सर्वभूतानां तदधीनप्रभवप्रलयाभिधानेऽपि कथं ब्रह्मणः सर्वभूतोपादानत्वं, तत्राह—**यद्धीति।** सूत्रावयवसूचितमर्थमाह—**साक्षादिति।** आकाशादेवेत्येवकारसूचितमुपादानान्तरानुपादानं साक्षादिति पदेन सूत्रकारो दर्शयतीति योजना। उपादानान्तरव्यावृत्तिरेवकारार्थो न भवति, किंतु निमित्तस्याकाशस्योपादानत्व-व्यावृत्तिरित्याशङ्क्याह—**प्रतीति।** निमित्ते कार्यस्य लयादृष्टेराकाशस्य तन्मात्रत्वमत्र नेष्टमित्यर्थः।।२५।।

ब्रह्मणो जगन्निमित्तस्य तत्प्रकृतित्वे हेत्वन्तरमाह—**आत्मेति।** सूत्रं व्याकरोति—**इतश्चेति।** उक्तमेव विभज्य निर्दिशति—

प्रकटार्थविवरणम्

सत्यम्, तथाप्यस्ति विशेषः सोपाधिकत्वनिरुपाधिकत्वकृतो लोके। तथा हि—निरुपाधिको दुग्धस्यान्यथाभावः सत्यः परिणामः, मुखस्य चाक्षिपात्रे प्रतिबिम्बितस्य तद्गताल्पतादिभाक्त्वमन्यथाभावो मिथ्यापरिणामः। तद्वद् ब्रह्मणोऽपि मायायां प्रतिबिम्बितस्य [1]तद्विकारिभावित्वं मिथ्यापरिणामः। कार्यकरणसङ्घातोपाधिकस्य च यथा जीवस्य स्वोपाधिकविकारैः। [2]जगदाश्रयत्वमेव प्रकृतित्वम्। श्रुतिरपीममेवार्थमाह—"इन्द्रो मायाभिः पुरुरूपः" इति। स्मृतिरपि—"मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।" "प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया।।" इति। न चैवं प्रकृतित्वं ब्रह्मणो गौणम्; जीवस्य धर्माश्रयत्ववन्मुख्यत्वात्, अन्यस्य मुख्यत्वस्यासंभवाच्च। न च सृष्टिश्रुतिप्रामाण्यात् सत्यमेव परिणामित्वम्; तत्रापि सत्यशब्दाश्रवणात्, प्रमाणस्य [3]स्वप्रमेयमात्रसहिष्णुत्वात् सत्यमिथ्यात्वयोरौदासीन्यात्, स्वप्नसृष्टिवाक्यवच्च प्रामाण्योपपत्तिः। देवदत्तो व्याघ्रोऽभवदितिवत् "सच्च त्यच्चाभवत्" इति श्रुतिः। "माया ह्येषा मया सृष्टा" इतिवत् "तत्तेजोऽसृजत" इति श्रुतिः। किञ्च "निष्कलं निष्क्रियम्" "एतदप्रमयं ध्रुवम्" "नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः" इत्यादिश्रुतिस्मृतिविरोधे मिथ्यासृष्टिविषयत्वमेव न्याय्यम्।

यच्चात्र **केशवेन** प्रलेपे—"विरोध एव नास्ति, विकारोत्पत्तेः पूर्वं कारणस्याविकारित्वात् तदभिप्रायाः श्रुतयः" इति, तदसत्; अविशेषप्रवृत्ताया: श्रुतेः पीडाप्रसङ्गात्। न च सृष्टिरित्यनु[श्रुत्यनु]सारेण पीडैव न्याय्येति वाच्यम्। शुक्तेः स्वतोऽरूप्यत्वेऽपि मिथ्यारूप्यतादात्म्यवत् निर्विकारस्यापि सदा मायोपाधिकविकारविषयत्वात् सृष्टिश्रुतेः। यच्चापरं कर्णकठोरं रुरुदे "विरोधेऽप्यल्पत्व-निष्फलत्वसामान्यविषयत्वैर्यथासंभवं निष्क्रियत्वादिश्रुतीनामेव भङ्गः; स्मृतयस्तु कपिलस्मृतिवत् तद्विरोधे नादर्तव्याः" इति, तत्र न तावदल्पत्वं भङ्गकारणम्, कर्मकाण्डेऽपि विधेरर्थवादादिभ्योऽल्पत्वेन भङ्गप्रसङ्गात्; नापि निष्फलत्वम्, "यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विदन्ते। अथ सोऽभयं गतो भवति।" इति निर्विशेषब्रह्मनिश्चयवत एवाभयप्राप्तिश्रवणात्; "उदरमन्तरं कुरुते। अथ तस्य भयं भवति।" इत्यल्पमपि भेदं कुर्वतो भयप्राप्त्यभिधानात्; क्वचिद्विदुषोऽपि ऐश्वर्यश्रवणस्य सगुणोपासनफलस्य स्तुत्यर्थतया संकीर्तनात्; परमनिर्वाणं निर्विशेषब्रह्मात्मैकत्वज्ञानस्यैव फलमिति फलवत्तयाऽविकार्यद्वितीयब्रह्मप्रतिपत्तेः प्राधान्यात्र तद्विरुद्धविकारपरत्वं सृष्टिश्रुतीनामाश्रयणीयम्। किञ्च "प्रमाणानु-ग्राहकस्तर्कः" इति **न्यायविदो** वदन्ति। तदनुग्राहकत्वं च बलवत्त्वापादनमेव; अतो विकारित्वे सावयवत्वानित्यत्वादि-प्रसङ्गलक्षणतर्कानुगृहीताविकारित्वश्रुतेरेव बाधकत्वम्।

यच्च [4]**भास्करेणाभाणि** "शक्तिविक्षेपकत्वं परिणामित्वम्" इति, तत्र सा शक्तिरसत्या सत्या वा ? आद्ये मायासख्यम्; चरमे निरूपणासहिष्णुत्वं वाच्यम्। निरूपणं न सहते सत्या च इति व्याघातात्। निरूप्यमाणे च नात्यन्तभेदे[ऽभेदे] वा शक्तितद्वद्भावः; भिन्नाभिन्नत्वं च विरोधादेव नाङ्गं धारयति। चन्द्रभेदस्य तदेकत्वज्ञानेन, देहाद् भेदज्ञानेन च तदभेदस्य बाधदर्शनाद् विरोधः स्थित एव। किञ्चैकस्मिन्नेव रूपे चेद्भेदाभेदबुद्धी, पर्यायतापातः; रूपभेदे चेदनवस्था। शक्यमपि तस्याः सदसद्वा न निरूपणं सहते। "पराऽस्य शक्तिः" इति चानिर्वाच्यप्रपञ्चा मायैवेत्यवोचत्।

यच्चावाचि "सूत्रकारादिभिः परिणामवादोऽङ्गीकृतः; इदानींतनास्तु विगीतच्छिन्नमूलमाहायानिकबौद्धगन्धिनं मायावादं वर्णयन्तो लोकं व्यामोहयन्ति" इति, तत् तस्य प्रद्वेषप्रकर्षप्रकटनपटीयस्त्वमात्रम्। तथा हि—अनादिस्तावद् वेदो मायामविक्रियतां च ब्रह्मणो बहुशः श्रावयामास। तदर्थं च भगवान् **पराशरो** यथाश्रुत्युपदिदेश—

"अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः। वर्जितः शक्यते वक्तुं यः सदाऽस्तीति केवलम्।।"

"सोऽहं स त्वं जगच्चेदं सदेवासुरमानुषम्। अविद्यामोहितात्मानः पुरुषा भिन्नदृष्टयः।।" इति।।

तत्सूनुरपि तदेव प्रकटीचकार—

"अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्"। "विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान्।।"

"दैवी ह्येषा गुणमयी मम माया दुरत्यया।।" इत्यादि बहु यदुकुलतिलकवचनच्छलेन। तत्सूनुश्च **शुकदेवः** प्रथमत एव भागवते "यत्र त्रिसर्गो मृषा" इत्या[इत्युप]क्षिप्य बहुशो मायावादमुवाच—

---

१. 'तद्विकारभाक्त्वम्' इति पाठः स्यात्। २. 'मायोपाधेर्ब्रह्मणः स्वोपाधिमायाविकारैर्जगदाश्रयत्वं जगत्प्रकृतित्वम्' इति वे. तत्त्वालोकः पृ. १५।
३. 'स्वप्रमेयासत्त्वमात्रासहिष्णुत्वात्' इति वे. तत्त्वालोके पाठः। ४. द्र. भास्करभाष्यम्, ८५ पृ.।

कर्मत्वं कर्तृत्वं च दर्शयति। आत्मानमिति कर्मत्वं, स्वयमकुरुतेति कर्तृत्वम्। कथं पुनः पूर्वसिद्धस्य सतः कर्तृत्वेन व्यवस्थितस्य क्रियमाणत्वं शक्यं संपादयितुम्? परिणामादिति ब्रूमः। पूर्वसिद्धोऽपि हि सन्नात्मा विशेषेण विकारात्मना परिणमयामासात्मानमिति। विकारात्मना च परिणामो मृदाद्यासु प्रकृतिषूपलब्धः। स्वयमिति च विशेषणान्निमित्तान्तरानपेक्षत्वमपि प्रतीयते।

परिणामादिति वा पृथक्सूत्रम्। तस्यैषोऽर्थः– इतश्च प्रकृतिर्ब्रह्म, यत्कारणं ब्रह्मण एव विकारात्मना परिणामः सामानाधिकरण्येनाम्नायते–'सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तं च' (तै. उ. २।६) इत्यादिनेति।।२६।।

योनिश्च हि गीयते।।२७।।

इतश्च प्रकृतिर्ब्रह्म, यत्कारणं ब्रह्म योनिरित्यपि पठ्यते वेदान्तेषु–'कर्तारमीशं पुरुषं ब्रह्म योनिम्' (मु.उ. ३।१।३) इति, 'यद्भूतयोनिं परिपश्यन्ति धीराः' (मु.उ. १।१।६) इति च। योनिशब्दश्च

प्रकटार्थविवरणम्

''यो दुर्विमर्शपथया निजमाययेदं सृष्ट्वा गुणान् विभजते तदनु प्रविष्टः।
तस्मै नमो दुरवबोधविहारतन्त्रसंहारचक्रहतये परमेश्वराय।।''

तच्छिष्यश्च **गौडपादाचार्यो** यथोपदिष्टमेव वर्णयांबभूव। तदेवं वेदाचार्यपरम्परागतं मायावादं व्याचक्षाणं निन्दन् कथं ब्रह्महा न भवेत्। तस्मात् सूक्तं परिणामशब्दो मिथ्यापरिणामविषय इति। वक्ष्यति च ''न स्थानतोऽपि परस्योभयलिङ्गम्'' इत्यत्र निर्विशेषतां स्वयं सूत्रकारः।

अथवाऽभ्युपगतस्तावत् सांख्यैः परिणामवादः। तान्प्रति तदभ्युपगमेनैवाभिन्ननिमित्तोपादानत्वं साधयता [१]सेति श्लिष्यते। **निरुक्तं** निर्वचनार्हमिदमेवेति। निर्वचनानर्हम**निरुक्तं** कपोतरूपादि।

भाष्यभावप्रकाशिका

क्रियमाणत्वम्, तत्कथमेकस्योभयसंभव इति शङ्कते—**कथं पुनरिति**। तदुत्तरत्वेन सूत्रावयवमवतारयति—**परिणामादिति**। एतावता कथं विरोधः परिहृत इति? तत्राह—**विकारात्मनेति**। एकेन रूपेण सिद्धस्य पूर्वमसिद्धरूपान्तराकारेण परिणामो दृष्टत्वान्नापलनीय इत्यर्थः। पूर्वमुक्तहेतुसमर्थनार्थं परिणामादिति सूत्रपदमित्युक्तम्, इदानीं हेत्वन्तरप्रतिपादनपरमिति स्वतन्त्रमेतदित्याह—**परिणामादिति वेति**। मृद् घट इतिवत् ''सच्च त्यच्चे''ति सामानाधिकरण्याद् ब्रह्मण उपादानत्वमवगम्यते। निमित्तकारणेन कार्यस्य सामानाधिकरण्यादर्शनादित्यर्थः।।२६।।

योनिश्च हि गीयते ।।२७।। कथमिदमुपादानत्वं गमयतीति? अत आह—**योनिशब्दश्चेति**। एवं तर्हि श्रुतित्वेन

न्यायनिर्णयः

आत्मानमिति। पूर्वसिद्धस्य कर्तृत्वं, क्रियमाणत्वं त्वसिद्धस्य, तन्नोभयमेकस्य स्यादिति शङ्कते—**कथमिति**। सूत्रावयवमवतार्य व्याचष्टे—**परिणामादिति**। आत्मानमिति विशेषणादेतद्धीरित्यर्थः। इत्थं मिथ्यापरिणामेऽपि कथं विरोधसमाधिरित्याशङ्क्याह—**विकारेति**। एकेन रूपेण पूर्वसिद्धस्याप्यसिद्धरूपान्तरेण परिणामो दृष्टत्वाद् युक्तः स्यादित्यर्थः। श्रौतेन विशेषणान्तरेण सूचितमर्थमाह—**स्वयमिति**। आत्मकृतेरिति हेतुसाधनार्थं परिणामादिति पदमित्युक्तम्। सम्प्रति स्वतन्त्रहेत्वन्तरमेतदित्याह—**परिणामादिति वेति**। अर्थभेदाभावे कथं पार्थक्यं, तत्राह—**तस्येति**। अर्थविशेषमेव दर्शयति—**इतश्चेति**। मृद् घटः, सुवर्णं कुण्डलमितिवद् ब्रह्मणः सच्च त्यच्चेति जगतः सामानाधिकरण्यादुपादानत्वम्; निमित्ते तदयोगादित्यर्थः। सत् प्रत्यक्षं भूतत्रयम्। त्यत् परोक्षं भूतद्वयम्। निरुक्तमिदमेवमिति निर्वचनार्हम्। ततोऽन्यदनिरुक्तम्।।२६।।

जगन्निमित्तस्येव ब्रह्मणस्तत्प्रकृतित्वे हेत्वन्तरमाह—**योनिश्चेति**। वेदान्तानेव लेशतो दर्शयति—**कर्तारमिति**। क्रियाशक्तिवदीशनशक्तिरपि तस्यास्तीत्याह—**ईशमिति**। ताटस्थ्यं व्यावर्तयति—**पुरुषमिति**। तस्य पुरि शयानस्य परिच्छेदं व्यवच्छिनत्ति—**ब्रह्मेति**। आकाशादेरन्यत्वे कथं पूर्णता, तत्राह—**योनिमिति**। अपश्यन्निति संबन्धः। यद्भूतयोनिमित्यत्र तदक्षरं

१. 'साधयामास' इति पाठः स्यात्।

प्रकृतिवचनः समधिगतो लोके 'पृथिवी योनिरोषधिवनस्पतीनाम्' इति। स्त्रीयोनेरप्यस्त्येवावयवद्वारेण गर्भं प्रत्युपादानकारणत्वम्। क्वचित् स्थानवचनोऽपि योनिशब्दो दृष्टः- 'योनिष्ट इन्द्र निषदे अकारि' (ऋ.सं. १।१०४।१) इति। वाक्यशेषात्त्वत्र प्रकृतिवचनता परिगृह्यते 'यथोर्णनाभिः सृजते गृह्णते च (मु.उ. १।१।७) इत्येवंजातीयकात्। तदेवं प्रकृतित्वं ब्रह्मणः प्रसिद्धम्। यत्पुनरिदमुक्तमीक्षापूर्वकं कर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु लोके दृष्टं नोपादानेष्वित्यादि, तत् प्रत्युच्यते- न लोकवदिह भवितव्यम्। न ह्ययमनुमानगम्योऽर्थः। शब्दगम्यत्वात्त्वस्यार्थस्य यथाशब्दमिह भवितव्यम्। शब्दश्चेक्षितुरीश्वरस्य प्रकृतित्वं प्रतिपादयतीत्यवोचाम। पुनश्चैतत् सर्वं विस्तरेण प्रतिवक्ष्यामः।।२७।।

।।इति सप्तमं प्रकृत्यधिकरणम्।।

प्रकटार्थविवरणम्

योनिश्च हि गीयते। ननु अनुपादेय[पादान]त्वेऽपि स्त्रीयोनौ योनिशब्दः प्रसिद्धः इत्याशङ्क्याह—**स्त्रीयोनेरपीति।** शोणितावयवद्वारेण। योनिशब्दस्यार्थान्तरमप्यस्ति, तदिह न ग्राह्यमित्याह—**क्वचिदित्यादिना।** योनिः स्थानम्; ते तव; भो इन्द्र; निषदे स्थित्यै; मयाऽकारि कृतमित्यर्थः। एवं तावच्छ्रुतिलिङ्गानुसारेण ब्रह्मणो निमित्तोपादानत्वं प्रसाध्य पूर्वपक्षोक्तानुमानदूषणायाह—**यत्पुनरित्यादिना।** किं शब्दगम्यमीश्वरमनङ्गीकृत्येदमनुमानम्, किं वाऽङ्गीकृत्य? आद्येऽप्रसिद्धविशेष्यत्वादाश्रयासिद्धत्वाच्च नानुमानगम्योऽयमर्थः सिध्यतीत्यर्थः। द्वितीये धर्मिग्राहकागमविरोध इत्यभिप्रेत्याह—**शब्दगम्यत्वात्त्विति।** न च कार्यमनेककारकसाध्यमिति नियमः, कारकव्यापार एव व्यभिचारात्। यच्चोक्तं वैलक्षण्यादिति, तत्राह—**पुनश्चैतत्सर्वमिति।** प्रतिवक्ष्यामः पराकरिष्याम इत्यर्थः।

।। इति सप्तमं प्रकृत्यधिकरणम् ।।

भाष्यभावप्रकाशिका

प्रथमप्रमाणत्वात् पूर्वमेव वक्तव्यम्, किमर्थमिदमभ्युच्चयत्वेन कथ्यत इत्याशङ्क्याह—**क्वचित्स्थानवचनोऽपीति।** निषदे निषदनाय उपवेशनाव[य] स्थानम् अकारीत्यर्थः। ननु तर्हि व्यभिचारित्वादिदमसाधकमिति, तत्राह—**वाक्यशेषादिति।** प्रत्यक्षानुमानाभ्यामवगम्यं चेत् तद् यथा लोके दृष्टम्, तथैवानुमातुं शक्यम्, इह त्वागमैकसमधिगम्यत्वाद् धर्म इव नानुमानं प्रभवति; श्रुतिलिङ्गात् प्रतिज्ञादृष्टान्तरूपात् सामान्यतोदर्शनानुमानानामन्यत्रैव सावकाशानां दुर्बलत्वादिति परिहरति—**न लोकवदिति।** शब्दश्चेत्युपादान-कारणत्वाभिधायी योनिशब्दः, यत इति पञ्चमीशब्दश्च गृह्यते। चकारात् प्रतिज्ञादृष्टान्तलिङ्गमपि संगृहीतम्। शब्दादवगतमपि युक्तिविरोधादनुपपन्नमित्याशङ्क्य युक्तिविरोधः परिहरिष्यत इत्याह—**पुनश्चेति।** किञ्च चेतनत्वाज्जीववदनुपादानत्वमिति यदुक्तम्, तत्र जीवशब्देन चैतन्यविशिष्टं शरीरं विवक्षितम्, किं वा चैतन्यमात्रम्। आद्ये

न्यायनिर्णयः

परविद्याधिगम्यमिति संबन्धः। योनिशब्दे ब्रह्मणि प्रयुक्तेऽपि कथं तस्योपादानत्वं, न हि तस्य प्रकृत्यर्थत्वं प्रसिद्धं, तत्राह—**योनिशब्दश्चेति।** ननूपादानत्वं विनाऽपि स्त्रीयोनौ योनिशब्दो दृश्यते, तत्राह—**स्त्रीति।** अवयवशब्देन योनिप्रभवं शोणितं गृह्यते। तर्हि योनिशब्दस्य श्रुतित्वात् प्रथमतो वक्तव्यत्वे किमर्थं पश्चादुच्यते, तत्राह—**क्वचिदिति।** योनिः स्थानं ते तव भो इन्द्र निषदे निषदनायोपवेशनाय स्थित्यर्थमकारि कृतमित्यर्थः। योनिशब्दस्य व्यभिचारित्वेनाश्रुतित्वेनासाधकतेत्याशङ्क्याह—**वाक्येति।** भूतयोन्यादिवाक्यं सप्तम्यर्थः। वाक्यशेषशब्दो ब्रह्मादिपदस्याप्युपलक्षणः। श्रुत्यादिसिद्धं सिद्धान्तमुपसंहरति—**एवमिति।** परोक्तमनुमानजातमपाकर्तुमनुवदति—**यदिति।** यथादृष्टमनुमेयम्, इह तु धर्मवन्नानुमानं युक्तं, श्रुतिलिङ्गाभ्यां ब्रह्मणोऽन्यत्रैव सामान्यतोदृष्टानां सावकाशत्वेन दुर्बलत्वादित्याह—**तदिति।** किंच श्रौतमीश्वरमनाश्रित्यानुमानम् आश्रित्य वा? नाद्यः, अप्रसिद्धविशेषणत्वादिप्रसङ्गादित्याह—**न हीति।** न द्वितीयो धर्मिग्राहकमानविरोधादित्याह—**शब्देति।** शब्दानुसारेणापि कथमुभयथा कारणत्वं, तत्राह—**शब्दश्चेति।** योनिशब्दो यत इति पञ्चमी च [शब्द]शब्दार्थः। चकारात् प्रतिज्ञाद्यनुपरोधलिङ्गमपि गृहीतम्। शब्दावगतमपि वैलक्षण्यादि युक्तिविरोधादयुक्तमित्याशङ्क्याह—**पुनश्चेति।** युक्तिविरोधस्याग्रे निरासादागमविरुद्धानुमानस्य कालातीतत्वेनाप्रामाण्याद्यथागममुभयथा कारणत्वमिति भावः।।२७।। इति सप्तमं प्रकृत्यधिकरणम्।।

८।।सर्वव्याख्यानाधिकरणम्।। सू. २८।।

एतेन सर्वे व्याख्याता व्याख्याताः।।२८।।

'ईक्षतेर्नाशब्दम्' (ब्र. सू. १।१।५) इत्यारभ्य प्रधानकारणवादः सूत्रैरेव पुनः पुनराशङ्क्य निराकृतः, तस्य हि पक्षस्योपोद्बलकानि कानिचिल्लिङ्गाभासानि वेदान्तेष्वापातेन मन्दमतीन् प्रति भान्तीति। स च कार्य-कारणानन्यत्वाभ्युपगमात् प्रत्यासन्नो वेदान्तवादस्य। देवलप्रभृतिभिश्च कैश्चिद् धर्मसूत्रकारैः स्वग्रन्थेष्वाश्रितः, तेन तत्प्रतिषेधे यत्नोऽतीव कृतः, नाण्वादिकारणवादप्रतिषेधे। तेऽपि तु ब्रह्मकारणवादपक्षस्य प्रतिपक्षत्वात्

शारीरकन्यायसंग्रहः

एतेन सर्वे व्याख्याता व्याख्याताः।।२८।। "एषोऽणुरात्मा चेतसा वेदितव्यः" "अणोरणीयान्" "अणुः पन्थाः" इत्याद्यणुशब्दस्यात्यन्तपरिच्छिन्नाच्छवस्तुनोः साधारणस्यात्मादिनियतार्थशब्दसामानाधिकरण्यादच्छताभिधानेनात्मपरत्वं युक्तम् इति न्यायेन परमाणुवादो न शब्दमूलः; तथा "असद्वा इदमग्र आसीत्", "असदेवेदमग्र आसीत्" इत्याद्यसच्छब्दस्य सच्छब्दसामानाधिकरण्यादनभिव्यक्तत्वधर्मसामान्यात् सति लक्षणावृत्तिराश्रीयते, न सच्छब्दस्य असति लक्षणा; ब्रह्मव्यतिरिक्तस्य सतोऽभिव्यक्तनामरूपतया शून्येन धर्मसामान्याभावाद् ब्रह्मणश्चानङ्गीकरणादिति शून्यवादो निरस्तः। तथा "तद्धेदं तर्ह्यव्याकृतमासीत्" इति कर्मकर्तरि लकारे एकस्योभयकल्पनाविरोधं प्रतिपाद्य तत्परिहारकल्पनाद्वरं कर्मणि लकारोपादानेन कर्त्राक्षेप इति स्वभाववादोऽपि न शब्दमूल इति सिद्धम्।

इति भगवत्प्रकाशात्मविरचिते शारीरकन्यायसङ्ग्रहे प्रथमस्याध्यायस्य चतुर्थः पादः।

प्रकटार्थविवरणम्

एतेन सर्वे व्याख्याता व्याख्याताः। ननु यद्यपि प्रधानं जगत्कारणं न भवति, तथापि परमाण्वादीनां जगत्कारणत्वात् न ब्रह्मण्येव जगत्कारणे समन्वयो व्यवतिष्ठत इत्याह—**एतेनेति**। ननु प्रधानं प्रबन्धेन निराकृतम्; मतान्तरं त्वतिदेशेन निराक्रियत इति को विशेष इत्याशङ्क्याह—**ईक्षतेरिति**। तर्हि निष्प्रयोजनत्वात् निर्मूलत्वाच्च नातिदेशोऽपि कर्तव्य इत्याशङ्क्याह—**तेऽपि त्विति**।

भाष्यभावप्रकाशिका

साध्यविकलो दृष्टान्तः, तस्यापि केशलोमाद्युपादानत्वाभ्युपगमात्, "यथा सतः पुरुषात्केशलोमानी"ति श्रुतेः। द्वितीये दृष्टान्त-दार्ष्टान्तिकयोरेकतोपाधिः, चेतनत्वे सत्यल्पशक्तिकत्वं चात्रोपाधिः; द्वितीयोऽपि हेतुः केशलोमाद्युत्पत्तावनैकान्तः, तृतीयोऽपि प्रथमेन समानयोगक्षेमः। चतुर्थोऽपि मायोपादानत्वेन सिद्धसाधनः। इतरानुमानयोरपि दृष्टान्ते साध्यवैकल्यम्, सर्वत्र धर्मिग्राहकप्रमाणविरोधकालात्ययापदेशौ यथासंभवमूहनीयौ। सप्रतिसाधनता च—विवादपदं जगत्, ईश्वरोपादानकम्, उपादानवत्त्वात् खगेश्वरसम्बन्धादित्यपि द्रष्टव्यम्।।२७।। इति सप्तमं प्रकृत्यधिकरणम्।

एतेन सर्वे व्याख्याता व्याख्याताः।।२८।। "एतेन" इत्यतिदेशाधिकरणस्य तात्पर्यं दर्शयितुं वृत्तं कीर्तयति—**ईक्षतेरिति**। तस्यैव विशेषतो निराकरणे कारणमाह—**तस्य हीति**। कारणान्तरमाह—**स चेति**। न केवलमभ्यर्हितत्वात्, स्मृतिमत्त्वाच्च तस्य प्राधान्यमित्याह—**देवलेति**। एवं प्रधानत्वात् प्रधानवादस्यैव प्राधान्येन निराकरणं कृतमित्याह—**तेनेति**। तर्हि तावतैव ब्रह्मणः

न्यायनिर्णयः

उक्तन्यायेन प्रधानस्याशब्दत्वेऽपि न ब्रह्मण्येव जगत्कारणे समन्वयः। 'अणोरणीयान्', 'अण्व्य इवेमा धानाः', 'असदेवेदम्' इत्यादिशब्दादणुस्वभावशून्यानां जगद्धेतुत्वसंभवादित्याशङ्क्याह—**एतेनेति**। अतिदेशेनाण्वादिवादं निरस्य जगद्धेतौ ब्रह्मणि समन्वयस्थापनादस्य श्रुत्यादिसंगतिः। फलं तु पूर्ववत्। अतिदेशाधिकरणस्य तात्पर्यं वक्तुं वृत्तं कीर्तयति—**ईक्षतेरिति**। तस्यैव विशेषतो निरासे हेतुमाह—**तस्येति**। प्रधानवादस्यैव प्राधान्येन निरासे हेत्वन्तरमाह—**स चेति**। न केवलमभ्यर्हितत्वात् तस्य प्राधान्यं, स्मृतिमूलत्वादपीत्याह—**देवलेति**। उक्तहेतुफलमाह—**तेनेति**। तर्हि तावतैव ब्रह्मकारणत्वसिद्धेरलमतिदेशेनेत्याशङ्क्याह—

प्रतिषेद्धव्याः। तेषामप्युपोद्बलकं वैदिकं किंचिल्लिङ्गमापातेन मन्दमतीन् प्रति भायादिति। अतः प्रधानमल्लनिबर्हणन्यायेनातिदिशति– एतेन प्रधानकारणवादप्रतिषेधन्यायकलापेन सर्वेऽण्वादिकारणवादा अपि प्रतिषिद्धतया व्याख्याता वेदितव्याः। तेषामपि प्रधानवदशब्दत्वाच्छब्दविरोधित्वाच्चेति। व्याख्याता व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति।।२८।।

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमच्छंकरभगवत्पूज्यपादकृतौ शारीरकमीमांसाभाष्ये प्रथमाध्यायस्य चतुर्थः पादः समाप्तः।।४।।

प्रकटार्थविवरणम्

'अणोरणीयान्'' इत्यणुवादस्य, ''असदेवेदमग्र आसीत्'' इत्यसद्वादस्य, ''तन्नामरूपाभ्यां व्याक्रियत'' इति स्वभाववादस्य लिङ्गमापाततो भाति। तन्निराकरणे च प्रयोजनं पुरुषप्रयत्नस्य प्रतिनियतविषयत्वम्; अतोऽतिदेशेन निरास इत्यर्थः। पूर्वापरपर्यालोचनयाऽऽत्मादिशब्दसामानाधिकरण्ये चाण्वादिशब्दानामच्छ[नां सूक्ष्म]त्वादिमति परमेश्वरे वृत्तिरिति नाण्वादिवादस्यासाधारणः कश्चिच्छब्दोऽस्ति, वेदेन विरुध्यते च, ब्रह्मण एवोपादानत्वाभिधायिना शब्देनेत्यर्थः। द्विरुक्तेः कृत्यमाह—**व्याख्याता इति**।

मायया यज्जगद्बीजं जीवोऽविद्यावशेन च।
तज्ज्ञानं सत्यमद्वैतं सिद्धं वेदसमन्वयात्।।

इति श्रीमच्छारीरकमीमांसाभाष्यविवरणे प्रकटार्थे प्रथमस्याध्यायस्य चतुर्थः पादः।।

भाष्यभावप्रकाशिका

कारणत्वसिद्धेर्व्यर्थोऽतिदेश इति, तत्राह—**तेऽपीति**। ननु अशब्दत्वात् तेषामुत्थानमेव नास्तीति, तत्राह—**तेषामपीति**। अणु-शून्य-स्वभावकारणवादिनाम् ''अणोरणीयान्'' 'अणुः पन्थाः' 'संबाहुभ्यां धमति संपतत्रैः', ''असद्वा इदमग्र आसीत्'' ''असदेवेदमग्र आसीत्' ''तन्नामरूपाभ्यां व्याक्रियत'' इत्याद्युपोद्बलकं शङ्क्यत इत्यर्थः। तथापि साङ्ख्यनिराकरणन्यायेन तन्निराकरणं किमिति क्रियते? विपरीतं किमिति न कृतमिति? तत्राह—**प्रधानमल्लेति**। सूत्रं व्याचष्टे—**एतेनेति**। पदाभ्यासस्य प्रयोजनमाह—**व्याख्याता व्याख्याता इति**।।२८।।

इति श्रीमत्परमहंसपरिव्राजकाचार्य-ज्ञानोत्तमपूज्यपादशिष्य-श्रीचित्सुखमुनिविरचितायां भाष्यभावप्रकाशिकायां प्रथमाध्यायस्य चतुर्थः पादः

न्यायनिर्णयः

तेऽपीति। अण्वादिवादानामशब्दत्वादेव निषेधे पुनरुत्थानाभावान्न निषेध्यतेत्याशङ्क्याह—**तेषामिति**। 'अणोरणीयान्' इत्याद्यब्रह्मपरं ब्रह्मपरं वेत्यण्वादिशब्दस्य परमाण्वादिविषयत्वाविषयत्वाभ्यां संदेहे, परमाणुष्वणुशब्दस्य प्रसिद्धत्वात्, कुलालो मृदा घटं करोतीतिवत् 'पतत्रैर्द्यावापृथिवी देवः संजनयन्निति' तेषां हेतुत्वोक्तेः, 'असद्वा इदम्', 'असदेवेदम्' इति शून्यवादात् 'तन्नामरूपाभ्यामेव व्याक्रियत' इति कर्मकर्तरि लकारेण स्वभाववादादनुपादानं ब्रह्मेति प्रतीतेः, 'अण्व्य इवेमा धानाः' इति च जगतो मृद्दृष्टान्ताद् ब्रह्मणः प्रकृतित्वे, वटधानादृष्टान्तात् अण्वादीनामपि तत्प्रकृतित्वयोगाद् गतिसामान्यासिद्धिरित्यर्थः। अथैवं पूर्वपक्षभानेऽपि किमिति सांख्यमतनिरसनन्यायेन तन्निरसनं क्रियते, किमिति न विपरीतमित्याशङ्क्य पूर्वपक्षप्राप्तिमितिशब्दसमापितामनूद्य सिद्धान्तमाह—**अत इति**। उक्तंन्यायस्य तेषु प्राप्तिमाह—**तेषामिति**। अणोरणीयानित्यात्मनः सूक्ष्मतया प्रत्यक्षाद्यगोचरत्ववचनात्, पतत्रशब्दस्य परमाणुवाचकत्वासिद्धेः, 'अणुः पन्था' इति ज्ञानमार्गस्तुतेः, 'असदेवेदम्' इत्यादेः समाहितत्वात्, मृदादिदृष्टान्तानां च प्रतिज्ञानुरोधित्वात्, धानादृष्टान्तस्यापि तदनुरोधेन भाक्तत्वात्, अण्वादीनां प्रधानवदशब्दत्वात्, ब्रह्मकारणवादिशब्दविरोधित्वादुक्तान्यपि वाक्यानि ब्रह्मपराणीति ब्रह्मणि कारणे सिद्धः समन्वयो वेदान्तानामित्यर्थः। पुनरुक्तेस्तात्पर्यमाह—**व्याख्याता इति**।।२८।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृते शारीरकभाष्यन्यायनिर्णये प्रथमाध्यायस्य चतुर्थः पादः।।४।।

समाप्तश्च प्रथमोऽध्यायः।।

ब्रह्मसूत्रशाङ्करभाष्यम्

अथ द्वितीयोऽध्यायः

प्रथमेऽध्याये सर्वज्ञः सर्वेश्वरो जगत उत्पत्तिकारणम्, मृत्सुवर्णादय इव घटरुचकादीनाम्; उत्पन्नस्य जगतो नियन्तृत्वेन स्थितिकारणम्, मायावीव मायायाः; प्रसारितस्य च जगतः पुनः स्वात्मन्येवोपसंहारकारणम्, अवनिरिव चतुर्विधस्य भूतग्रामस्य; स एव च सर्वेषां न आत्मेत्येतद् वेदान्तवाक्यसमन्वयप्रतिपादनेन प्रतिपादितम्। प्रधानादिकारणवादाश्चाशब्दत्वेन निराकृताः। इदानीं स्वपक्षे स्मृतिन्यायविरोधपरिहारः, प्रधानादिवादानां च न्यायाभासोपबृंहितत्वं, प्रतिवेदान्तं च सृष्ट्यादिप्रक्रियाया अविगीतत्वमित्यस्यार्थजातस्य

शारीरकन्यायसंग्रहः

१।।स्मृत्यधिकरणम्।सू. १-२।।

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्।।१।।इतरेषां चानुपलब्धेः।।२।। तुल्यबलयोः प्रमाणयोरन्यतरस्याप्रामाण्यानुपपत्तौ सावकाशनिरवकाशन्यायेन प्रामाण्यं व्यवस्थाप्यते। प्रबलदुर्बलयोस्तु प्रमाणयोर्विरोधे प्रबलेन दुर्बलस्य बाध एव न्याय्यो न व्यवस्था— इति न्यायेनाभ्युदयविषयतया सावकाशयाऽपि स्मृत्या निःश्रेयसविषयतयाऽन्यत्र निरवकाशाऽपि स्मृतिर्बाध्यत इत्युक्तम्। अथवा क्लृप्तमूलया स्मृत्या कल्प्यमूला स्मृतिर्बाध्या, मूलकल्पनायां बुद्धिगौरवात्— इति न्यायेन प्रत्यक्षश्रुतिमूलमन्वादिस्मृत्या साङ्ख्यस्मृतिर्बाध्यत इति।।

प्रकटार्थविवरणम्

पूर्वोत्तराध्याययोर्हेतुहेतुमद्भावलक्षणं संदर्भं दर्शयितुं वृत्तं संकीर्तयति—**प्रथमेऽध्याय इति**। जन्मादिसूत्रमारभ्योत्पत्तिस्थितिलयकारणं परं ब्रह्मेति प्रतिपादितम्। 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' 'अवस्थितेरिति काशकृत्स्नः' इत्यादिप्रदेशेषु च सर्वात्मत्वमद्वितीयत्वं प्रतिपादितमित्यर्थः। इदानीं द्वितीयाध्यायार्थं संक्षेपतो दर्शयति—**इदानीमिति**। तत्रापि प्रथमपादेन समन्वयस्य स्मृतिन्यायविरोधपरिहारः, द्वितीयेन सांख्यादिमतानां भ्रान्तिमूलत्वम्, उत्तरपादद्वयेन च सर्वशाखासूत्पत्त्यादिप्रक्रियायाः परस्परविरोधो नास्तीति प्रतिपाद्यते।

भाष्यभावप्रकाशिका

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्।।१।। समन्वयाविरोधलक्षणयोःसङ्गतिप्रदर्शनाय सुखावबोधाय च तयोःसङ्क्षेपतस्तात्पर्यार्थमाह—**प्रथमेऽध्याय इति**।। "अवस्थितेरिति काशकृत्स्न" इत्यनेन सर्वात्मकत्वमपि प्रतिपादितमिति कथयति आत्मभेदप्रतिपादकसांख्यस्मृतिविरोधमुद्भावयितुम्—**स एव चेति**।। किम्प्रमाणकमेतदिति? अत आह—**एतद्वेदान्तेति**।। चतुर्थपादार्थं कथयति—**प्रधानादिकारणवादा इति**।। इदानीमुत्तराध्यायस्य पादशः तात्पर्यार्थं कथयति—**इदानीं स्वपक्ष इति**।। **न्यायाभासोपबृंहितत्वमिति**।। भ्रान्तिमूलत्वमित्यर्थः।। आदिशब्दः संख्याक्रमसङ्ग्रहाय। सृष्ट्यादिप्रक्रियाया इति तृतीयचतुर्थपादयोरर्थः

न्यायनिर्णयः

अतिदेशाधिकरणे प्रधानवदशब्दत्वं परमाण्वादीनामपीत्युक्तम्। सम्प्रति प्रधानस्य वैदिकशब्दवत्त्वाभावेऽपि स्मृतिरूपशब्दवत्त्वमाशङ्क्य परिहरति—**स्मृतीति**। पूर्वोत्तराध्याययोर्विषयविषयिभावसंबन्धं वक्तुं पूर्वाध्यायार्थं संक्षेपतोऽनुवदति—**प्रथम इति**। जन्मादिसूत्रमारभ्योत्पत्त्यादिकारणं ब्रह्मेति तत्र तत्रोक्तं पूर्वाध्यायार्थमनुभाष्यात्मभेदवादिसांख्यस्मृतिविरोधोद्भावनानुकूलत्वेन 'शास्त्रदृष्ट्या' इत्यादिप्रदेशेषु दर्शितमद्वितीयत्वमनुवदति—**स एवेति**। किंप्रमाणकमेतदित्याशङ्क्योक्तम्—**एतदिति**। चतुर्थपादार्थमुत्तरार्थमनुद्रवति—**प्रधानादीति**। वृत्तमनुभाष्योत्तराध्यायार्थं पादशः संगृह्णाति—**इदानीमिति**। न्यायाभासोपबृंहितत्वं भ्रान्तिमूलत्वम्। तृतीयचतुर्थपादयोरर्थमाह—**प्रतिवेदान्तं चेति**। सृष्ट्यादीत्यादिशब्दः संख्याक्रमसंग्रहार्थः। तत्र तृतीये

प्रतिपादनाय द्वितीयोऽध्याय आरभ्यते। तत्र प्रथमं तावत् स्मृतिविरोधमुपन्यस्य परिहरति–

१।।स्मृत्यधिकरणम्।।सू. १-२।।

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्।।१।।

यदुक्तं ब्रह्मैव सर्वज्ञं जगतः कारणमिति, तदयुक्तम्। कुतः? स्मृत्यनवकाशदोषप्रसङ्गात्। स्मृतिश्च तन्त्राख्या परमर्षिप्रणीता शिष्टपरिगृहीता, अन्याश्च तदनुसारिण्यः स्मृतयः एवं सत्यनवकाशाः प्रसज्येरन्। तासु ह्यचेतनं प्रधानं स्वतन्त्रं जगतः कारणमुपनिबध्यते। मन्वादिस्मृतयस्तावच्चोदनालक्षणेनाग्निहोत्रादिना

प्रकटार्थविवरणम्

दर्शिते हि समन्वये विरोधशङ्कायामविरोधाध्यायोत्थानमिति हेतुहेतुमद्भावः। एवमध्यायतात्पर्यमुक्त्वाऽनन्तराधिकरणतात्पर्यमाह—**तत्र प्रथममिति**।।

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्।। उक्तः समन्वयो विषयः। स किं सांख्यस्मृत्या विरुध्यते न वेति संशये पूर्ववादी विरुध्यत इत्याह—**यदुक्तमित्यादिना**। तन्त्र्यते व्युत्पाद्यते वस्तुजातमस्मिन्निति तन्त्रं शास्त्रम्। तदाख्या संज्ञा अस्या इति तन्त्राख्या। तस्याः ब्रह्मकारणपक्षेऽनवकाशो व्यर्थता प्रसज्येत; अन्याश्च देवलादिस्मृतयो व्यर्था एव स्युरित्यर्थः। कल्प्यतामर्थान्तरेऽवकाश इत्याशङ्क्याह—**तासु हीति**। एतदुक्तं भवतीति [भवति]—पूर्वाधिकरणे ह्यण्वादि-

भाष्यभावप्रकाशिका

कथितः। तृतीये भूतविषयसृष्ट्यादिवाक्यानामविगानम्, चतुर्थे प्राणादिविषयसृष्ट्यादिवाक्यानामिति। तदेवं पूर्वोक्तसमन्वयस्य प्रत्यक्षादिविरोधाशङ्कायां तन्निराकरणमनेन क्रियत इति, विषय-विषयि[त्व]लक्षणः सम्बन्धोऽध्याययोः। तत्र पूर्वलक्षणार्थो विषयः, एतल्लक्षणार्थश्च विषयी। तेन विषयसिद्ध्युत्तरकालीनत्वात् तद्विषयिविचारस्य निर्विषयस्य विचारस्यानुपपत्तेः पूर्वोत्तर-भावित्वमप्यनयोरुचितमिति भावः।। तदेवमध्यायमवतार्य तदवयवमाद्याधिकरणमवतारयति—**तत्र प्रथममिति**।

हेतुत्वेन सूत्रपदमवतारयितुं पृच्छति—**कुत इति**।। तन्त्र्यन्ते व्युत्पाद्यन्ते तत्त्वान्यनेनेति तन्त्रम्, तन्त्रमित्याख्या यस्याः सा तन्त्राख्या, बौद्धादिस्मृतिसाम्यनिवृत्त्यर्थं "शिष्टपरिगृहीते"ति विशेषणम्। **अन्याश्चेति**।। आसुरिपञ्चशिखदेवलादिप्रणीताः।। **एवं सतीति**।। सर्वज्ञत्वादिविशेषणं ब्रह्म जगत्कारणमित्यभ्युपगम इत्यर्थः।। ननु सति विरोधे निरवकाशत्वाशङ्का, स एव कथमिति? अत आह—**तासु हीति**।। ननु अचेतनाया मायायाः कारणत्वं वेदान्तिभिरभ्युपगम्यत इति, अत आह—**स्वतन्त्रमिति**।। ननु

न्यायनिर्णयः

भूतभोक्तृविषयसृष्ट्यादिवाक्यानामविगानम्, चतुर्थे प्राणादिविषयसृष्ट्यादिवाक्यानामिति विभागः। उक्तसमन्वयस्याध्यक्षादिविरोधे तन्निरसनमनेनेति विषयविषयित्वं संबन्धः। तत्र पूर्वस्य विषयत्वादस्य विषयित्वान्निर्विषयविचारायोगाद् विषयसिद्ध्युत्तरकालत्वात् तद्विषयविचारस्येति पूर्वोत्तरत्वमनयोरुचितमिति भावः। अध्यायमवतार्य तदवयवमाद्याधिकरणमवतारयति—**तत्रेति**। समन्वये स्मृतिविरोधसमाधानार्थत्वादधिकरणस्य श्रुत्यादिसंगतयः। पूर्वपक्षे स्मृतिविरोधे समन्वयासिद्धिः। सिद्धान्ते तदविरोधे तत्सिद्धिः।

उक्तश्चेतने जगदुपादाने समन्वयो विषयः। स किं सांख्यस्मृत्या विरुध्यते न वेति तत्प्रामाण्याप्रामाण्याभ्यां संदेहे पूर्वपक्षमाह—**यदुक्तमिति**। हेतुत्वेन सूत्रपदमवतारयितुं पृच्छति—**कुत इति**। सूत्रपदं हेतुमादाय व्याचष्टे—**स्मृतीति**। तन्त्र्यन्ते व्युत्पाद्यन्ते तत्त्वान्यनेनेति तन्त्रं शास्त्रम्, तन्त्रमित्याख्या यस्याः सा तथेति यावत्। आप्तप्रणीतत्वेन प्रामाण्यं तस्याः सूचयति—**परमर्षीति**। बौद्धादिस्मृतिसाम्यव्यावृत्त्यर्थं विशिनष्टि—**शिष्टेति**। **अन्याश्चेति**। आसुरिपञ्चशिखादिप्रणीताः। **एवं सतीति**। ब्रह्म सर्वज्ञत्वादिविशेषणं जगत्कारणमित्युपगमे सतीत्यर्थः। सति विरोधे निरवकाशत्वाशङ्का, विरोधस्तु कथमित्याशङ्क्याह—**तासु हीति**। उक्तरूपाया मायाशक्तेर्जगत्कारणत्वेन सिद्धान्तेऽपि स्वीकृतत्वान्नास्ति विरोधाशङ्केत्याशङ्क्याह—**स्वतन्त्रमिति**। सांख्यस्मृतीनां सावकाशत्वाय

धर्मजातेनापेक्षितमर्थं समर्पयन्त्यः सावकाशा भवन्ति– अस्य वर्णस्यास्मिन् कालेऽनेन विधानेनोपनयनम्, ईदृशश्चाचारः, इत्थं वेदाध्ययनम्, इत्थं समावर्तनम्, इत्थं सहधर्मचारिणीसंयोग इति। तथा पुरुषार्थांश्च वर्णाश्रमधर्मान् नानाविधान् विदधति। नैवं कपिलादिस्मृतीनामनुष्ठेये विषयेऽवकाशोऽस्ति। मोक्षसाधनमेव हि सम्यग्दर्शनमधिकृत्य ताः प्रणीताः। यदि तत्राप्यनवकाशाः स्युरानर्थक्यमेवासां प्रसज्येत। तस्मात् तदविरोधेन वेदान्ता व्याख्यातव्याः।

कथं पुनरीक्षत्यादिभ्यो हेतुभ्यो ब्रह्मैव सर्वज्ञं जगतः कारणमित्यवधारितः श्रुत्यर्थः स्मृत्यनवकाश-दोषप्रसङ्गेन पुनराक्षिप्यते? भवेदयमनाक्षेपः स्वतन्त्रप्रज्ञानाम्। परतन्त्रप्रज्ञास्तु प्रायेण जनाः स्वातन्त्र्येण

प्रकटार्थविवरणम्

शब्दानामात्मादिशब्दसामानाधिकरण्यादर्थान्तरपरत्वमुक्तम्। सांख्यादिस्मृतिषु त्वर्थान्तरपरत्वे कारणाभावात् प्रधानादिपरत्वमेवेत्यस्ति विरोध इति भावः। ननु मन्वादिस्मृतिविरोधे तासामप्रामाण्यात् न तद्विरोधो दोष इत्याशङ्क्याह—**मन्वादिस्मृतयस्तावदिति।** सावकाशानवकाशयोरनवकाशं बलवदिति न्यायेन धर्मेऽपि सावकाशमन्वादिस्मृतिविरोधे नानवकाशसांख्यस्मृतेरप्रामाण्यमित्यर्थः।

पूर्वपक्षमाक्षिपति—**कथं पुनरिति।** वेदस्मृत्योर्विरोधे स्मृतेर्दौर्बल्यस्य सुप्रसिद्धत्वात् नायमाक्षेपो युक्त इति भावः। ये स्वातन्त्र्येण पूर्वापरपर्यालोचनया वेदार्थं प्रति वक्तुं [प्रतिपत्तुं] समर्थाः तेषां न घटत एवायमाक्षेपः; कपिलादिषु श्रद्दधानानां पुनर्मन्दबुद्धीनां घटतेऽयमाक्षेप इत्याह—**भवेदयमिति।**

भाष्यभावप्रकाशिका

साङ्ख्यस्मृतीनां सावकाशत्वाश्रयणे मन्वादिस्मृतीनां निरवकाशता प्रसज्यत इत्याशङ्क्य, अनुष्ठेयविषये सावकाशत्वाद् नात्यन्तनिरवकाशता; तात्पर्यविषयस्यानुष्ठेयस्याबाधादित्याह—**मन्वादिस्मृतय इति।।** न केवलं क्रत्वर्थप्रतिपादकतया सावकाशत्वम्, किन्तु पुरुषार्थप्रतिपादकतयाऽपीत्याह—**तथा पुरुषार्थानिति।।** अनवकाशः अवकाशाभावः।

ननु प्रमाणान्तरनिरपेक्षवेदान्तवाक्याज्जगत्कारणे ब्रह्मण्यवगते तत्सापेक्षस्मृत्यवष्टम्भेन तदाक्षेपो न युक्त इति पूर्वपक्षमाक्षिपति—**कथं पुनरिति।।** समाधत्ते—**भवेदयमिति।।** अयमर्थः—अस्मदादीनां स्वातन्त्र्येण वेदार्थनिर्णये सामर्थ्यासंभवात् तदर्थमवश्यम्भाविन्यां

न्यायनिर्णयः

प्रधानवादोपादाने मन्वादिस्मृतीनां निरवकाशतेत्याशङ्क्य तात्पर्यविषयस्यानुष्ठेयस्याबाधात् तस्मिन् विषये तासामस्ति सावकाशत्वमित्याह—**मन्वादीति।** क्रत्वर्थसमर्पकत्वेन मन्वादिस्मृतीनां सावकाशत्वमभिनयति—**अस्येति।** न केवलं क्रत्वर्थप्रतिपादकतया सावकाशत्वम्, किंतु पुरुषार्थप्रतिपादकतयाऽपीत्याह—**तथेति।** नन्वनुष्ठेये विषये कपिलादिस्मृतयोऽपि सावकाशाः सत्यो ब्रह्मकारणवादेऽपि न निरवकाशा भविष्यन्ति, नेत्याह—**नैवमिति।** तत्र हेतुमाह—**मोक्षेति।** परिशेषायातं फलितमाह—**यदीति।** सावकाशनिरवकाशयोर्निरवकाशं बलवदिति न्यायसिद्धमर्थं कथयति—**तस्मादिति।**

पूर्वपक्षमाक्षिपति—**कथमिति।** मानान्तरनिरपेक्षया श्रुत्या ब्रह्मणि जगत्कारणेऽवधारिते तदपेक्षस्मृत्यवष्टम्भेन तदाक्षेपो न युक्तः, सापेक्षनिरपेक्षयोर्निरपेक्षस्य बलवत्त्वादित्यर्थः। स्वतन्त्रप्रज्ञानां परतन्त्रप्रज्ञानां वा यथोक्ताक्षेपानुपपत्तिरिति विकल्प्याद्यमङ्गीकरोति—**भवेदिति।** स्मृत्यपेक्षामन्तरेण पौर्वापर्यालोचनया श्रुतिवशादेव तदर्थप्रतिपत्तिसामर्थ्यं स्वतन्त्रप्रज्ञत्वम्। न हि तान्प्रति स्मृत्यवष्टम्भेनाक्षेप्तुं युक्तं, श्रुत्यैव तेषां तदर्थप्रतिपत्तेरुपपत्तेरित्यर्थः। द्वितीयं प्रत्याह—**परतन्त्रेति।** अस्मदादीनां विना स्मृत्यपेक्षां स्वातन्त्र्येण वेदार्थनिर्णये सामर्थ्याभावात् तदर्थमवश्यंभाविन्यां पूर्वसिद्धस्मृत्यपेक्षायां सर्वज्ञकपिलादिप्रणीतस्मृतिविरोधेन श्रुत्यर्थनिश्चयायोगात् तदर्थस्योपचरितत्वोपपत्तौ स्मृत्यवष्टम्भेनाक्षेपः संभवतीत्यर्थः। स्मृत्यवष्टम्भमन्तरेणापि केषांचिद् वेदार्थनिर्णयः सिध्यति। न हि

श्रुत्यर्थमवधारयितुमशक्नुवन्तः प्रख्यातप्रणेतृकासु[1] स्मृतिष्ववलम्बेरन्। तद्बलेन च श्रुत्यर्थं प्रतिपित्सेरन्। अस्मत्कृते च व्याख्याने न विश्वस्युर्बहुमानात् स्मृतीनां प्रणेतृषु। कपिलप्रभृतीनां चार्षं ज्ञानमप्रतिहतं स्मर्यते। श्रुतिश्च भवति–'ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत्' (श्वे.उ. ५।२) इति। तस्मान्नैषां मतमयथार्थं शक्यं संभावयितुम्। तर्कावष्टम्भेन चैतेऽर्थं प्रतिष्ठापयन्ति। तस्मादपि स्मृतिबलेन वेदान्ता व्याख्येया इति पुनराक्षेपः।

तस्य समाधिः–नान्यस्मृत्यनवकाशदोषप्रसङ्गादिति। यदि स्मृत्यनवकाशदोषप्रसङ्गेनेश्वरकारणवाद आक्षिप्येत, एवमप्यन्या ईश्वरकारणवादिन्यः स्मृतयोऽनवकाशाः प्रसज्येरन्। ता उदाहरिष्यामः–'यत्तत्

प्रकटार्थविवरणम्

किञ्च तेषामतीन्द्रियार्थदर्शित्वान्न तदुक्तमन्यथा भवतीत्याह—**कपिलप्रभृतीनां चेति**। युक्त्युपेतत्वाच्च न तन्मतमन्यथा भवतीत्याह—**तर्कावष्टम्भेन चेति**।

एवमाक्षेपमुपपाद्य परिहारत्वेन सूत्रमवतारयति—**तस्य समाधिरिति**। यथा ब्रह्मकारणवादे सांख्यादिस्मृतिविरोधः, तथा

भाष्यभावप्रकाशिका

पूर्वसिद्धस्मृत्यपेक्षायां सर्वज्ञकपिलप्रणीतस्मृतिविरोधे नार्थनिर्णयः संभवति। **श्रुत्यर्थं प्रतिपित्सेरन्निति**।। उपचरितमर्थं श्रुतेः प्रतिपद्येरन्नित्यर्थः।। ननु कथमुपचरितार्थे प्रतिपित्सा? मुख्य एवार्थे श्रुतीनां भवद्भिः शक्ति-तात्पर्ययोः प्रदर्शितत्वादित्याह—**अस्मत्कृत इति**।। श्रद्धाजडत्वादित्यर्थः। आपाततःसमाधानमुक्त्वा परमसमाधानमाह—**कपिलप्रभृतीनामिति**।। ननु अप्रतिहतज्ञानत्वप्रतिपादिकाऽपि स्मृतिः सांख्यस्मृतिवदनिर्णीतप्रामाण्येति, अत आह—**श्रुतिश्चेति**।। बिभर्ति पुष्णातीत्यर्थः। अतो योगिप्रत्यक्षमूलतया साङ्ख्यस्मृतीनां वेदानपेक्षत्वादेव विरोधेऽपि नाप्रामाण्यमित्युपसंहरति—**तस्मादिति**।। "प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्" इत्यादिना "यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः।" इत्यन्तेन तर्कस्य निर्णयज्ञानसाधनत्वावगमात् तर्कबलप्रवृत्ता स्मृतिः प्रबलेत्याह—**तर्कावष्टम्भेनेति**।।

न्यायनिर्णयः

स्मृतिकर्तारः स्मृत्यन्तरापेक्षया तदर्थं निर्धारयन्तीत्यभिप्रायेण प्रायेणेत्युक्तम्। बौद्धादिस्मृत्यवष्टम्भव्यासेधार्थं प्रख्यातपदम्। तदवलम्बनफलमाह—**तद्बलेनेति**। **श्रुत्यर्थं प्रतिपित्सेरन्निति**। उपचरितं तदर्थं प्रतिपद्येरन्नित्यर्थः। श्रुतीनामुपचरितार्थप्रतिपित्सा न युक्ता, मुख्येऽर्थे तासां शक्तितात्पर्ययोर्व्याख्यातत्वादित्याशङ्क्याह—**अस्मत्कृते च चेति**। नत्राविश्वासे हेतुमाह—**बहुमानादिति**। अस्मदादिष्विव तेष्वपि बहुमानानुपपत्तिमाशङ्क्याह—**कपिलेति**। तेषामप्रतिहतज्ञानत्वप्रतिपादिका स्मृतिः सांख्यस्मृतिवदनिर्णीत-प्रामाण्येत्याशङ्क्याह—**श्रुतिश्चेति**। यस्तावदग्रे सर्गादौ जायमानं कपिलनामानमृषिं स्थितिकाले च प्रसूतं भूतभविष्यद्वर्तमानार्थज्ञानैर्बिभर्ति पुष्णाति तमीश्वरं पश्येदिति योजना। योगिप्रत्यक्षमूलतया सांख्यस्मृतीनां श्रुत्यनपेक्षत्वात् तद्विरोधेऽपि नाप्रामाण्यमिति फलितमाह—**तस्मादिति**। तर्कमूलत्वाच्च कपिलादिस्मृतीनां प्राबल्यमित्याह—**तर्केति**। 'प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्' इत्यादिना 'यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः' इत्यन्तेन तर्कस्य निर्णायकत्वावगमात् तद्बलप्रवृत्तकपिलादिस्मृतीनां प्राबल्ये सिद्धे सिद्धमर्थमाह—**तस्मादिति**। मूलद्वयसाहित्येन बलवत्त्वसंभावनार्थोऽपिशब्दः।

सांख्यस्मृतिविरोधं समन्वयस्य पूर्वपक्षमुक्त्वा सिद्धान्तयति—**तस्येति**। ब्रह्मकारणवादे सांख्यस्मृतिविरोधवत् प्रधान-कारणवादेऽपि स्मृत्यन्तरविरोधात्र ब्रह्मवादिनं प्रत्येतदुद्भावनमुचितमिति व्याचष्टे—**यदीति**। श्रुत्यर्थे स्मृत्यवष्टम्भेनाक्षेपस्यावकाशो नास्तीत्यरुचिं सूचयति—**एवमपीति**। यासां स्मृतीनां प्रधानवादे निरवकाशत्वं ता दर्शयति—**ता इति**। 'तस्मादव्यक्तम्' इत्यत्र तच्छब्देन चेतनमेव कारणं परामृष्टमित्युपदेष्टुं चेतनस्य प्रकृतत्वमाह—**यत्तदिति**। सूक्ष्मत्वमतीन्द्रियत्वम्। अविज्ञेयत्वं

१. 'प्रख्यातप्रणेतृकाः स्मृतीः' इति पा.।

सूक्ष्ममविज्ञेयम्' (म.भा.शा. ३३४-२८) इति परं ब्रह्म प्रकृत्य 'स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते' इति चोक्त्वा 'तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम' इत्याह। तथाऽन्यत्रापि 'अव्यक्तं पुरुषे ब्रह्मन्निर्गुणे संप्रलीयते' (म.भा.शान्ति ३३९-३१) इत्याह। 'अतश्च संक्षेपमिमं शृणुध्वं नारायणः सर्वमिदं पुराणः। स सर्गकाले च करोति 'सर्वं संहारकाले च तदत्ति भूयः' (म.भा.शान्ति. ३०१-११५) इति पुराणे। भगवद्गीतासु च-'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा' (भ.गी.७।६) इति। परमात्मानमेव च प्रकृत्य आपस्तम्बः पठति-'तस्मात् 'कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्यः' (आ.ध.सू. १।८।२३।२) इति। एवमनेकशः स्मृतिष्वपीश्वरः कारणत्वेनोपादानत्वेन च प्रकाश्यते। स्मृतिबलेन प्रत्यवतिष्ठमानस्य स्मृतिबलेनैवोत्तरं वक्ष्यामीत्यतोऽयमन्यस्मृत्यनवकाशदोषोपन्यासः। दर्शितं तु श्रुतीनामीश्वरकारणवादं प्रति तात्पर्यम्। विप्रतिपत्तौ च स्मृतीनामवश्यकर्तव्येऽन्यतरपरिग्रहेऽन्यतरपरित्यागे

प्रकटार्थविवरणम्

प्रधानवादेऽपि स्मृत्यन्तरविरोधः समान इति न मां प्रत्येवोद्भावनीय इति भावः। अव्यक्तमनिर्वचनीयं भूतसूक्ष्ममित्यर्थः। प्रभव इति जन्मकर्ता, प्रलय इति प्रलयहेतुरुच्यते। तस्मात् परमात्मनः कायाः सर्वदेहाः प्रभवन्तीति निमित्तत्वमुक्तम्। स मूलमित्युपादानत्वम्। शश्वद्भवः शाश्वतिकोऽनादिः, स नित्यो विनाशरहित इत्यर्थः। ननु किमिति प्रतिबन्दिन्यायेन परिहारोऽभिहित इत्याशङ्क्याह—**स्मृतिबलेनेति**। सांख्यादिस्मृतिश्रद्धाजडस्य हीदं चोद्यम्; स्मृत्यन्तरविरोधे तत्रापि न श्रद्धातव्यमिति दर्शयितुमिति भावः। साक्षात्परिहारमाह—**दर्शितं त्विति**। तत्परश्रुतिविरोधे स्मृतेरप्रामाण्यं सुप्रसिद्धमिति नोद्भाव्यत इति भावः। ननु तर्हि स्मृत्योर्विरोधे

भाष्यभावप्रकाशिका

'तस्मादव्यक्त'मिति तच्छब्देन चेतनमेव कारणं परामृष्टमिति दर्शयितुं चेतनस्य प्रकृततामाह—**यत्तत्सूक्ष्ममित्यादिना**।। एतत्सर्वं वाक्यं निमित्तकारणत्वप्रतिपादकमिति सेश्वरसाङ्ख्यमतमाशङ्क्याह—**उपादानत्वेन चेति**।।

ननु श्रुतिविरोधोपन्यासः किमर्थं न कृत इति? तत्राह—**स्मृतिबलेनेति**।। ननु स्मृतीनां परस्परविरोधे न तत्त्वनिर्णय

न्यायनिर्णयः

प्रमाणान्तरानवगाह्यत्वम्। तर्हि सर्वप्रमाणागोचरत्वान्नास्त्येव तदित्याशङ्क्य सर्वभूतानां सत्तास्फूर्तिप्रदत्वेन स्वतःसिद्धस्य दुरपह्नवत्वं मन्वानो ब्रूते—**स हीति**। कार्यलिङ्गकमनुमानमपि तत्र संभावनाहेतुरित्याशयवानाह—**तस्मादिति**। अव्यक्तशब्देनाव्याकृतकार्यं भूतसूक्ष्ममत्र विवक्षितम्, अव्याकृतस्यानादित्वेनोत्पत्त्यनभ्युपगमात्। निमित्तकारणत्वमेवात्र चेतनस्योक्तमिति सेश्वरसांख्यमतम्। अनादिनोऽपि चाव्यक्तस्य संभवत्येवेश्वराधीनत्वमित्याशङ्क्याह—**तथाऽन्यत्रेति**। अत्र त्वव्यक्तमिति भूतसूक्ष्मलयाधिकरणमव्याकृतं गृहीतम्। इतिहाससमर्पितेऽर्थे पौराणिकीं संमतिमाह—**अतश्चेति**। अन्तर्यामिव्यतिरिक्तवस्तुनो दुर्वचनत्वमतःशब्दार्थः। सर्वात्मत्वे कथमस्य नापक्षयः सर्वत्रापक्षयोपलम्भादित्याशङ्क्याह—**पुराण इति**। सर्वस्य तदन्तर्भावेऽपि तस्य सर्वस्मिन्ननन्तर्भावादिति हेतुमभिप्रेत्य सर्वात्मत्वं साधयति—**स सर्गेति**। उक्तेऽर्थे भागवतीं स्मृतिं संवादयति—**भगवद्गीतास्विति**। प्रभवत्यस्मादिति प्रभवो जन्महेतुः। प्रलीयतेऽस्मिन्निति प्रलयस्तद्धेतुः। तत्रैव कल्पसूत्रकारसंमतिमाह—**परमात्मानमिति**। तस्मादिति 'आत्मलाभान्न परमि'त्यादौ प्रकृतं परमात्मानं परामृशति। सर्वे काया ब्रह्मादयः स्तम्बपर्यन्ता देहास्तस्मात् प्रभवन्तीति निमित्तत्वमुक्तम्, स मूलमित्युपादानत्वम्। विपरीतं वा। शश्वद्भवः शाश्वतिकोऽनादिः। स नित्यो नाशशून्य इत्यर्थः। उदाहृतस्मृतीनां तात्पर्यमाह—**एवमिति**। तात्पर्यलिङ्गमभ्यासं दर्शयति—**अनेकश इति**। ननु श्रुतिविरोधोपन्यासे संभाविते किमिति स्मृतिविरोधः सिद्धान्तिनोपन्यस्यते, तत्राह—**स्मृतीति**। तर्हि स्मृतीनां परस्परविरोधे तत्त्वनिर्णयानुपपत्तिरित्याशङ्क्याह—**दर्शितं त्विति**। ततश्च मन्वादिस्मृतीनां श्रुतिमूलत्वेन प्राबल्यात् तदनुसारेण तत्त्वनिर्णयसिद्धिरित्यर्थः। नन्वनुमितश्रुतिमूलतया कपिलादिस्मृतीनामपि मन्वादिस्मृतिभिः

१. 'सर्गं' इति पा.। २. 'काद्याः' इति क्वचित् पा.।

च श्रुत्यनुसारिण्यः स्मृतयः प्रमाणम्, अनपेक्ष्या इतराः। तदुक्तं प्रमाणलक्षणे–'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्' (जै. सू. १।३।३) इति। न चातीन्द्रियानर्थाञ्श्रुतिमन्तरेण कश्चिदुपलभत इति शक्यं संभावयितुम्, निमित्ताभावात्। शक्यं कपिलादीनां सिद्धानामप्रतिहतज्ञानत्वादिति चेत्, न; सिद्धेरपि सापेक्षत्वात्। धर्मानुष्ठानापेक्षा हि सिद्धिः। स च धर्मश्चोदनालक्षणः। ततश्च पूर्वसिद्धायाश्चोदनाया अर्थो

प्रकटार्थविवरणम्

परस्परविगीतार्थत्वान्नास्त्येवोभयोरपि प्रामाण्यमित्याशङ्क्याह—**विप्रतिपत्तौ चेति**। क्रियायामिव वस्तुनि विकल्पासंभवादवश्यकर्तव्येऽन्यतरस्वीकारे क्लृप्तमूलत्वात् श्रुत्यनुसारिण्यः स्मृतयः प्रमाणं तद्विरुद्धास्त्वनपेक्षणीया इत्यर्थः। प्रथमतन्त्रे प्रथमाध्याये **जैमिनिनाऽप्येतदुक्तमिति**। "औदुम्बरी सर्वा वेष्टियितव्या" इति स्मृतेः "औदुम्बरीं स्पृष्ट्वोद्गायेत्" इति श्रुत्या विरोधेऽनपेक्षं प्रामाण्यं स्यात् क्लृप्तकल्प्यविरोधे क्लृप्तं बलवदिति न्यायात्, विरोधे त्वसति मूलानुमानं, विरोधरहिताया एव स्मृतेर्लिङ्गत्वात्। श्रुतिविरोधवत्तन्मूलस्मृतिविरोधेऽप्यप्रामाण्यमेवेति भावः॥ ननु स्मृतेरार्षं प्रत्यक्षं मूलम्, न श्रुतिरित्याशङ्क्याह—**न चातीन्द्रियानिति**। अतीन्द्रियानिन्द्रियैः पश्यतीति वचनं व्याहतमित्यर्थः। योगमाहात्म्यबलात् कपिलादीनां शक्यं संभावयितुमित्याह—**शक्यमिति**। सिद्धेः योगमाहात्म्यस्यापि कल्पान्तरीयवैदिकानुष्ठानसापेक्षत्वात् न वेदार्थविपरीतातीन्द्रियार्थदर्शित्वं शक्यं संभावयितुमित्याह—**न, सिद्धेरपीति**। किञ्च सिद्धानामतीन्द्रियार्थदर्शित्वकल्पनायामपि न कपिलवाक्यमात्रात् निर्णय इत्याह—**सिद्धव्यपाश्रयेति**। उक्तं

भाष्यभावप्रकाशिका

इत्याशङ्क्याह—**दर्शितं त्विति**॥ ननु तर्हि मन्वादिस्मृतीनां कपिलादिस्मृतिविगानादप्रामाण्यमेवाङ्गीकृतमिति, तत्राह—**विप्रतिपत्तौ चेति**॥ **अवश्यकर्तव्य इति**॥ वस्तुनि विकल्पानुपपत्तेरिति भावः॥ ननु कथमनपेक्षत्वम्? ताभिरपि मूलश्रुत्यनुमाने सति श्रुत्योरेव परस्परविरोध इति तुल्यबलतया व्यवस्थोपपत्तेरिति, अत आह—**तदुक्तमिति**॥ विरोधे श्रुतिविरोधे, अनपेक्षम् अप्रमाणं, स्यात्। असति ह्यनुमानं विरुद्धार्थतया बाधकप्रत्यक्षश्रुतिवाक्यानुपलम्भे स्मृतिवाक्येन मूलश्रुतिवाक्यानुमानमित्यर्थः। ननु प्रत्यक्षमूलतया श्रुतिमूलत्वाभावात् तद्विरोधेऽपि साङ्ख्यस्मृतिः प्रमाणमेवेत्याशङ्क्याह—**न चेति**। यद्यप्यस्मदादिप्रत्यक्षमूलत्वाभावः; तथापि योगिप्रत्यक्षमूलत्वं सांख्यस्मृतीनां स्यादित्याशङ्कते—**शक्यं कपिलादीनामिति**॥ निराचष्टे—**न, सिद्धेरपीति**॥ एतत्प्रपञ्चयति—**धर्मेति**॥ ततः किं फलितमिति? तदाह—**ततश्चेति**॥ अयं भावः— कपिलादीनामीश्वरवदाजानसिद्धताऽभावाद् विनिश्चितवेदप्रामाण्यानां

न्यायनिर्णयः

समानबलत्वादनिर्णयतादवस्थ्ये विकल्पः स्यादिति, नेत्याह—**विप्रतिपत्तौ चेति**। क्रियायामिव वस्तुनि विकल्पायोगाद् विरुद्धस्मृत्युपलब्धावन्यतरत्यागेनान्यतरस्वीकारध्रौव्ये क्लृप्तश्रुतिमूलाः स्मृतयो मानत्वेनापेक्ष्यन्ते, कल्प्यश्रुतिमूलास्तु दुर्बलत्वादुपेक्ष्यन्ते, तथा च तत्त्वनिर्णयोपपत्तिरित्यर्थः। ननु यत्र स्मृत्योर्विरोधस्तत्र तन्मूलयोः श्रुत्योर्विरोधपर्यवसानात् तयोश्च तुल्यबलतया व्यवस्थाऽऽस्थेयेति, तत्राह—**तदुक्तमिति**। 'औदुम्बरीं स्पृष्ट्वोद्गायेत्' इति प्रत्यक्षश्रुतिविरुद्धा 'सर्वा वेष्टयितव्या' इति स्मृतिर्मानं न वेति संदेहे, वेदार्थानुष्ठातॄणां स्मृतिभिर्मूलश्रुत्यनुमानात् प्रत्यक्षानुमितश्रुत्योश्च तुल्यबलत्वादुदितानुदितहोमवद् विकल्पसंभवान्मानमिति प्राप्ते प्रत्याह—**विरोधे त्विति**। श्रुतिविरोधे स्मृतीनां प्रामाण्यमनपेक्षमपेक्षावर्जितम्। हेयमिति यावत्। यतोऽसति विरोधे मूलश्रुत्यनुमानं, प्रत्यक्षश्रुतिविरुद्धे त्वर्थे कुतः स्मृत्या श्रुत्यनुमानम्, अर्थापहारेण मानस्याप्यपहारात्। अतो मूलाभावादप्रमाणं सर्ववेष्टनस्मृतिः। तथा कपिलादिस्मृतिरपीत्यर्थः। ननु कपिलादिस्मृतेर्न श्रुतिमूलत्वेन प्रामाण्यमिष्यते, किंतु प्रत्यक्षमूलत्वेनेत्याशङ्क्यायोगिप्रत्यक्षं योगिप्रत्यक्षं वा तन्मूलमिति विकल्प्याद्यं दूषयति—**न चेति**। द्वितीयं शङ्कते—**शक्यमिति**। अतीन्द्रियार्थोपलम्भनं संभावयितुमिति शेषः। किं तेषां साधनसाध्या सिद्धिराजानतो वेति विकल्प्याद्ये श्रुतिमन्तरेणातीन्द्रियार्थोपलब्धिर्न सिध्यतीत्याह—**न; सिद्धेरपीति**। योगमाहात्म्यरूपा सिद्धिः; तस्याः साधनसापेक्षत्ववदतीन्द्रियार्थोपलब्धिरपि कपिलादीनां श्रुत्यपेक्षेति वक्तुमपीत्युक्तम्। सिद्धेः सापेक्षत्वं स्फुटयति—**धर्मेति**। तथापि कथमतीन्द्रियार्थोपलब्धेः श्रुत्यपेक्षेति, तत्राह—**स चेति**। चोदनासूत्रप्रामाण्याद् धर्मस्य चोदनालक्षणत्वेऽपि कपिलादिवचनानुसारेण श्रुतेरर्थनिर्णये काऽनुपपत्तिरिति, तत्राह—**ततश्चेति**। कपिलादीनां विनिश्चितवेदप्रामाण्यानां

न पश्चिमसिद्धपुरुषवचनवशेनातिशङ्कितुं शक्यते। सिद्धव्यपाश्रयकल्पनायामपि बहुत्वात् सिद्धानां प्रदर्शितेन प्रकारेण स्मृतिविप्रतिपत्तौ सत्यां न श्रुतिव्यपाश्रयादन्यन्निर्णयकारणमस्ति। परतन्त्रप्रज्ञस्यापि नाकस्मात् स्मृतिविशेषविषयः पक्षपातो युक्तः। कस्यचित् क्वचित् पक्षपाते सति पुरुषमतिवैश्वरूप्येण तत्त्वाव्यवस्थानप्रसङ्गात्। तस्मात् तस्यापि स्मृतिविप्रतिपत्त्युपन्यासेन श्रुत्यनुसारानुसारविषयविवेचनेन च सन्मार्गे प्रज्ञा संग्रहणीया।

या तु श्रुतिः कपिलस्य ज्ञानातिशयं प्रदर्शयन्ती प्रदर्शिता, न तया श्रुतिविरुद्धमपि कापिलं मतं श्रद्धातुं शक्यम्, कपिलमिति श्रुतिसामान्यमात्रत्वात्। अन्यस्य च कपिलस्य सगरपुत्राणां प्रतप्तुर्वासुदेवनाम्नः

प्रकटार्थविवरणम्

हि— "कपिलो यदि सर्वज्ञः कणादो नेति का प्रमा। तावुभौ यदि सर्वज्ञौ मतभेदः कथं तयोः॥" इति। तव वा कथं निर्णयलाभ इत्याशङ्क्याह—**प्रदर्शितेनेति**। ननु पुरुषस्य परतन्त्रप्रज्ञत्वात् स्वातन्त्र्येण श्रुतिव्यपाश्रयो न निर्णयकारणम्, किन्तु यस्मिन्नभिरुचिरुत्पद्यते तदनुसारेणैवासौ श्रुतिमपि योजयतीत्याशङ्क्याह—**परतन्त्रप्रज्ञस्यापीति**॥

ननु तर्हि कपिलस्य श्रौतत्वात् तन्मतमपि सन्मार्ग एवेत्याशङ्क्याह—**या तु श्रुतिरिति**॥ यद्यपि कपिलः श्रौतः तथापि तन्मतं श्रुत्यनुसारीति न प्रमाणमस्ति, बृहस्पतिवद् व्यामोहार्थतयाऽप्युपदेशसंभवादिति भावः। किञ्च शब्दसादृश्यमात्रेणायं श्रौतत्वविभ्रमः, सांख्यसूत्रकृदेव कपिल इहोच्यत इत्यत्र प्रमाणाभावादित्याह—**कपिलमिति**। नन्वन्यस्याभावात् स एवोक्त इत्याशङ्क्याह—**अन्यस्य चेति**। प्रतप्तुः प्रदग्धुः। किञ्च यः परमेश्वरः सृष्ट्यादौ प्रसूतं कपिलं ज्ञानैः पूरयति, जायमानं च सर्वं पश्यति स एव

भाष्यभावप्रकाशिका

तदर्थानुष्ठानवतां तत्प्रभावलब्धसिद्धीनां तद्विरुद्धार्थाभिधानासंभवात्र तद्वचनबलात् पूर्वमेवावधृतप्रामाण्यस्य वेदस्यान्यार्थत्वकल्पनं युक्तमिति॥ तदेवं वेदविरोधे सिद्धवचनमेवाप्रमाणम्, न तद्विरोधे वेदान्तवाक्यमित्युक्तम्। इदानीं सिद्धवचनानां परस्परविरोधाद् न तद्वचनादाश्वासः श्रुतिमूलतां विहायेत्याह—**सिद्धव्यपाश्रयेति**॥ सिद्धव्यपाश्रयेण कल्पना सिद्धव्यपाश्रयकल्पना[1]। यदुक्तम् परतन्त्रप्रज्ञत्वादस्माकमनिर्णीतवेदार्थविरोधात् स्मृतेरप्रामाण्यं न कल्पनीयम्, अपि तु स्मृत्यनुसारेण वेदार्थो निर्णेतव्यः इति, तत्राह—**परतन्त्रप्रज्ञस्यापीति**॥ कथं तर्हि निर्णय इति? अत आह—**तस्मात्तस्यापीति**॥ तेनापीत्यर्थः॥ ननु कपिलस्याप्रतिहतज्ञानत्वश्रवणात् तदुक्तस्मृत्यप्रामाण्याङ्गीकरणे श्रुतिविरोध एव प्रसज्यत इत्याशङ्क्याह—**या तु श्रुतिरिति**॥ ननु कपिलमिति श्रुतिसद्भावात् तद्विरोधपरिहाराय सावकाशनिरवकाशन्यायेन श्रुतिस्मृत्योर्व्यवस्था युक्तेति, तत्राह—**श्रुतिसामान्यमात्रत्वादिति**॥

न्यायनिर्णयः

तदर्थानुष्ठानवतां तत्प्रभावलब्धसिद्धीनां तद्विरुद्धार्थाभिधानासंभवात् तद्वचनात्प्रागेवावधृतप्रामाण्यस्य वेदस्य तदनुरोधेनोपचरितार्थत्वकल्पनमनुचितमिति भावः। **अतिशङ्कितुम्** मुख्यां वृत्तिमतीत्योपचरितवृत्त्या शङ्कितुमिति यावत्। न द्वितीयः, कपिलादीनामीश्वरवदाजानसिद्धेरसिद्धत्वात् सिद्धत्वेऽपि तेषां बहुत्वात्तदुक्तिमाश्रित्य श्रुत्यर्थकल्पनायां तदैकमत्यस्यामानत्वाद्[2]न्यस्मृत्यनवकाशन्यायेन स्मृतीनामेव मिथो विवादे श्रुत्यवष्टम्भं विना तास्वपि विश्वासाभावात्र तदनुसारेण श्रुत्यर्थनिर्धारणसिद्धिरित्याह—**सिद्धेति**। यत्तु परतन्त्रप्रज्ञत्वादस्माकमनिश्चितवेदार्थानां विरोधेन स्मृतेरप्रामाण्यमनाशङ्कनीयम्; अपि तु स्मृत्यनुसारेण वेदार्थो निश्चयितव्यः[निश्चेतव्यः], अन्यथा परतन्त्रप्रज्ञानां वेदार्थानिश्चयप्रसङ्गादिति, तत्राह—**परतन्त्रेति**। कथं तर्हि परिहृत्याव्यवस्थां तत्त्वं निर्णेतव्यं, तत्राह—**तस्मादिति**। **तस्यापीति**। तेन परतन्त्रप्रज्ञेनापीत्यर्थः। सन्मार्गः श्रुत्यनुसारिस्मृत्युक्तोऽर्थस्तत्र प्रज्ञासंग्रहस्तस्मिन्नेव बुद्धिस्थैर्यमित्यर्थः।

ननु कपिलस्याप्रतिहतज्ञानत्वश्रवणात् तदुक्तस्मृत्यप्रामाण्याङ्गीकारे श्रुतिरेव विरुध्येतेत्याशङ्क्याह—**या त्विति**। कपिलशब्दश्रुत्यविरोधाय सावकाशानवकाशन्यायेन श्रुतिस्मृत्योर्व्यवस्थाऽऽस्थेयेत्याशङ्क्याह—**कपिलमितीति**। शब्दसामान्यादेव सांख्यप्रणेता

१. सिद्धानां वचनमाश्रित्य वेदार्थनिर्णयकल्पनेत्यर्थः। २. अमानत्वात् = अप्रमाणकत्वात्।

स्मरणात्। अन्यार्थदर्शनस्य च प्राप्तिरहितस्यासाधकत्वात्। भवति चान्या मनोर्माहात्म्यं प्रख्यापयन्ती श्रुतिः– 'यद्वै किंच मनुवदत्तद्भेषजम्' (तै. सं. २।२।१०।२) इति। मनुना च–'सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि। संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति।।' (म.स्मृ. १२।९१) इति सर्वात्मत्वदर्शनं प्रशंसता कापिलं मतं निन्द्यत इति गम्यते। कपिलो हि न सर्वात्मत्वदर्शनमनुमन्यते, आत्मभेदाभ्युपगमात्। महाभारतेऽपि च–'बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु' (म.भा.शान्ति. ३५०-१) इति विचार्य 'बहवः पुरुषा राजन् सांख्ययोगविचारिणाम्' इति परपक्षमुपन्यस्य तद्व्युदासेन–'बहूनां पुरुषाणां हि यथैका योनिरुच्यते। तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकम्।।' इत्युपक्रम्य 'ममान्तरात्मा तव च ये चान्ये

प्रकटार्थविवरणम्

सर्वेषामात्मेतीश्वरपरमिदं वाक्यम्। अन्यपरस्य च वाक्यस्य न्यायतः प्राप्तिरहितस्यार्थस्यासाधकत्वात् न सांख्यसूत्रकारं प्रापकरहितं गमयेदिदं वाक्यमित्याह—**अन्यार्थदर्शनस्य चेति**। किञ्च वेदसिद्धमनुवचनविरुद्धाभिधायित्वादपि न श्रौत इत्याह—**भवति चेति**। किञ्च महाभारतेऽपि कापिलं मतं निन्दित्वा सर्वात्मतैवोक्तेत्याह—**महाभारतेऽपीति**।। पुरुषा जीवाः किं स्वभावेनैव बहवः, किं वैक एव परमात्मा बहूनां दृश्यमानानां स्वभाव इत्येवं विचार्येत्यर्थः। बहूनां देहानां यथैका पृथिवी योनिरधिष्ठानमुच्यते, तथा तमेकं पुरुषं परमात्मानं बहूनां प्रतिबिम्बकल्पानां जीवानां योनिं विश्वं परिपूर्णं सर्वज्ञत्वादिगुणसंपन्नं कथयिष्यामीत्यर्थः। विश्वे मूर्धानोऽस्यैव

भाष्यभावप्रकाशिका

सांख्यप्रणेता कपिलः श्रौत इति शब्दसाम्याद् भ्रम इत्यर्थः।। ननु तर्हि कपिलश्रुतेरानर्थक्यं प्राप्तमिति, अत आह—**अन्यस्य चेति**।। यत्र यत्र वासुदेवांशत्वमवगतम्, तत्र तत्र सर्वात्मत्वोपदेष्टृत्वं दृष्टम्, इह तु तद्विरुद्धार्थोपदेष्टृत्वम्, ततोऽन्यत्वमवसीयत इति भावः। किञ्चान्यपरत्वादप्यस्यानुग्राहकन्यायाभावे न गमकत्वमित्याह—**अन्यार्थदर्शनस्येति**।। एवं कपिलस्य द्वैतोपदेष्टुः श्रौततां निराकृत्य सर्वात्मत्वोपदेष्टुर्मनोः श्रौततां प्रतिपादयति—**भवति चान्येति**।। इदानीं कपिलवचनविरोधं मनुवचनस्य दर्शयति—**मनुना चेति**।। विरोधं स्पष्टयितुं तस्याभ्युपगमं दर्शयति—**कपिलो हीति**।। पूर्वं कारणविषये व्यासादिवचनविरोधः कापिलस्य मतस्य दर्शितः, सम्प्रति सर्वात्मत्वविषयेऽपि व्यासवचनविरोधमाह—**महाभारते ऽपीति**।। एवं स्मृतिविरोधमभिधाय वेदविरोधमाह—**श्रुतिश्चेति**।।

न्यायनिर्णयः

कपिलः श्रौत इति भ्रान्तिरविवेकिनामित्यर्थः। श्रुतौ तर्हि कपिलशब्दस्य कोऽर्थः स्यादित्याशङ्क्याह—**अन्यस्येति**। वैदिको हि कपिलो वासुदेवनामा पितुरादेशादश्वमेधपशुमन्विष्य परिसरे पश्यतामिन्द्रचेष्टितमदृष्टवतां षष्टिसहस्रसंख्याजुषामात्मोपरोधिनां सगरसुतानां सहसैव भस्मीभावहेतुः सांख्यप्रणेतुरवैदिकादन्यः स्मर्यते। यत्र यत्र वैदिकत्वे सति वासुदेवांशत्वं तत्र तत्र सर्वात्मतोपदेष्टृत्वं दृष्टम्। इह तु तद्विरुद्धार्थोपदेष्टुस्ततोऽन्यत्वमिति भावः। किंच परमात्मप्रतिपत्तिपरमिदं वाक्यं, यो ज्ञानैरग्रे प्रसूतं कपिलं बिभर्ति तं पश्येदिति दर्शनात्। न च तस्यानुग्राहकन्यायाभावे कपिलज्ञानातिशयावेदकत्वमित्याह—**अन्यार्थेति**। कपिलस्य द्वैतवादिनः श्रौतत्वं निरस्य सर्वात्मत्ववादिनो मनोः श्रौतत्वमाह—**भवति चेति**। मनोरपि कपिलेनैकवाक्यत्वं शङ्कित्वोक्तम्—**मनुना चेति**। सर्वात्मत्वप्रशंसायामपि कथं कापिलं मतं निन्दितमित्याशङ्क्य तद्दर्शयितुं तदीयं मतमाह—**कपिलो हीति**। पूर्वं कापिलमतस्य कारणविषये व्यासादिवचनविरोधो दर्शितः। सम्प्रति सर्वात्मत्वविषयेऽपि व्यासवचनविरोधमाह—**महाभारतेऽपीति**। सर्वात्मतैव निर्धारितेत्युत्तरत्र संबन्धः। पुरुषा जीवाः, ते किं स्वभावेनैव बहवः किंवैक एव परमात्मा बहूनां दृश्यानां स्वभाव इति पृच्छति—**बहव इति**। पूर्वपक्षमनुभाष्य तन्निरासेन सिद्धान्तमाह—**बहव इत्यादिना**। यथा पुरुषाणां तदाकाराणां बहूनां देहानामेका पृथिवी योनिरधिष्ठानमुच्यते, तथा तमेकं पुरुषं परमात्मानं बहुलत्वेन प्रतिपन्नानां जीवानां वास्तवं स्वभावं विश्वं परिपूर्णं सर्वज्ञत्वादिगुणयुक्तं कथयिष्यामीत्याह—**बहूनामिति**। सर्वज्ञत्वादिगुणकस्य तद्विरुद्धप्रत्यगात्मैक्यमयुक्तमित्याशङ्क्य विरोधस्य प्रातीतिकत्वं मत्वोक्तम्—**ममेति**। सर्वान्तरात्मत्वे परस्मिन्नपि संसारित्वप्रसक्तिरित्याशङ्क्य वस्तुतस्तदभावमाह—**सर्वेषामिति**।

देहसंस्थिताः। सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित्।। विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः। एकश्चरति भूतेषु स्वैरचारी यथासुखम्।।' (म.भा.शा. ३५१-४,५) इति सर्वात्मतैव निर्धारिता। श्रुतिश्च सर्वात्मतायां भवति--'यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ई.उ. ७) इत्येवंविधा। अतश्च सिद्धमात्मभेदकल्पनयाऽपि कपिलस्य तन्त्रं वेदविरुद्धं वेदानुसारिमनुवचनविरुद्धं च, न केवलं स्वतन्त्रप्रकृतिकल्पनयैवेति। वेदस्य हि निरपेक्षं स्वार्थे प्रामाण्यं, रवेरिव रूपविषये। पुरुषवचसां तु मूलान्तरापेक्षं वक्तृस्मृतिव्यवहितं चेति विप्रकर्षः। तस्माद् वेदविरुद्धे विषये स्मृत्यनवकाशप्रसङ्गो न दोषः।।१।।

कुतश्च स्मृत्यनवकाशप्रसङ्गो न दोषः?

प्रकटार्थविवरणम्

सर्वत्र प्रतिबिम्बिततत्वादिति विश्वमूर्धा। सर्वेषां जीवानां एक एवात्मा स्वभाव इति या सर्वात्मता निर्धारिता सा च श्रुतिस्मृतिमूलेत्याह—**श्रुतिश्चेति**। यस्मिन् काले विजानतः पुंसः सर्वाणि भूतान्यात्मैवाभूत् स्वरूपतयाऽधिगतस्य ब्रह्मण एव सर्वत्र प्रतिबिम्बिततत्वादित्यर्थः। ननु वेदविरुद्धत्वेऽपि सावकाशानवकाशत्वेन व्यवस्था भविष्यतीति नाशङ्कनीयमित्याह—**वेदस्य हीति**। तुल्यबलयोः प्रमाणयोः अन्यतरस्यापि अप्रामाण्यानुपपत्तौ सावकाशानवकाशन्यायेन प्रामाण्यं व्यवस्थाप्यते; प्रबलदुर्बलयोस्तु विरोधे प्रबलेन दुर्बलस्य बाधो न्याय्य इति भावः।

सूत्रान्तरमवतारयति—**कुतश्चेति**।

भाष्यभावप्रकाशिका

ननु वेदविरोधे स्मृतेरेव कथमप्रामाण्यम्? विपरीतं किं न स्यादित्याशङ्क्याह—**वेदस्य हीति**।। अयं भावः—वेदस्यापौरुषेयत्वादीश्वरकार्यत्वेऽपि वेदस्येश्वरज्ञान–पूर्वकताऽभावान्निरपेक्षत्वात्, कपिलादिवचसां च तदर्थस्मृतिपूर्वकत्वादर्थस्मृतीनां च तदर्थानुभवपूर्वकत्वात् तद्वचनप्रामाण्यनिश्चयाय यावत् स्मृत्यनुभवौ कल्प्येते, तावत् स्वतःसिद्धप्रामाण्यवेदवाक्यादर्थो निश्चीयते इति शीघ्रतरप्रवृत्तवेदवाक्यजनितं विज्ञानमसञ्जातविरोधि स्मृतिप्रामाण्यं बाधत इति।।१।।

न्यायनिर्णयः

किमिति तर्हि प्रत्यात्ममात्मभूतः परमात्मा नोपलभ्यते, तत्राह—**न ग्राह्य इति**। तस्यासत्त्वं शङ्कित्वोक्तम्—**विश्वेति**। विश्वे मूर्धानोऽस्यैव सर्वत्र प्रतिबिम्बिततत्वात्। तथा विश्वभुजादौ योज्यम्। परमात्मनः सर्वात्मत्वेनोक्तस्य निरपेक्षतया स्वतन्त्रस्य परमसुखरूपतामाह—**एक इति**। कापिलमतस्य वेदानुसारिस्मृतिविरोधमुक्त्वा साक्षादेव वेदविरोधमाह—**श्रुतिश्चेति**। यस्मिन् काले पुरुषस्य विजानतः स्वरूपतयाऽधिगतब्रह्मण एव सर्वत्र प्रतिबिम्बिततत्वाद्भूतानि सर्वाण्यात्मैवाभूत् तस्मिन् काले शोकमोहोपलक्षितः सर्वोऽपि सकारणः संसारो विदुषो नास्तीति श्रुत्यर्थः। श्रुतिस्मृतिविरोधे परमतस्यानादेयत्वं सिद्धमित्युपसंहरति—**अतश्चेति**। इतिशब्दः सिद्धमित्यनेन संबध्यते। वेदविरोधे स्मृतेरेव किमित्यप्रामाण्यं, विपरीतं किं न स्यादित्याशङ्क्याह—**वेदस्येति**। ईश्वरकार्यत्वेऽपि तद्धीपूर्वकत्वाभावाद् वेदस्यापौरुषेयत्वेनानपेक्षत्वात्, कपिलादिस्मृतीनां तु तदर्थस्मृतिपूर्वकत्वात् तदर्थस्मृतीनां च तदर्थानुभवपूर्वकत्वादुक्तप्रामाण्यनिश्चयाय स्मृत्यनुभवौ यावत् कल्प्येते, तावदेव स्वतःसिद्धप्रामाण्यवेदवाक्यात् तदर्थो निश्चित इति झटिति प्रवृत्तवेदवाक्योत्थं ज्ञानमसंजातविरोधि स्मृतिविरोधे तत्प्रामाण्यस्य बाधकमिति भावः। **विप्रकर्षो** विशेषः श्रुतिस्मृत्योरिति यावत्। सिद्धे विशेषे फलितमाह—**तस्मादिति**।।१।।

उक्तेऽर्थे हेत्वन्तरपरत्वेनोत्तरसूत्रमुत्थापयति—**कुतश्चेति**।

इतरेषां चानुपलब्धेः।।२।।

प्रधानादितराणि यानि प्रधानपरिणामत्वेन स्मृतौ कल्पितानि महदादीनि, न तानि वेदे लोके वोपलभ्यन्ते। भूतेन्द्रियाणि तावल्लोकवेदप्रसिद्धत्वाच्छक्यन्ते स्मर्तुम्। अलोकवेदप्रसिद्धत्वात्तु महदादीनां षष्ठस्येवेन्द्रियार्थस्य न स्मृतिरवकल्पते। यदपि क्वचित् तत्परमिव श्रवणमवभासते तदप्यतत्परं व्याख्यातम् 'आनुमानिकमप्येकेषाम्' (ब्र.सू. १।४।१) इत्यत्र। कार्यस्मृतेरप्रामाण्यात् कारणस्मृतेरप्यप्रामाण्यं युक्तमित्यभिप्रायः। तस्मादपि न स्मृत्यनवकाशप्रसङ्गो दोषः। तर्कावष्टम्भं तु 'न विलक्षणत्वात्' (ब्र.सू. २।१।४) इत्यारभ्योन्मथिष्यति।।२।।

।।इति प्रथमं स्मृत्यधिकरणम्।।

शारीरकन्यायसंग्रहः

२।।योगप्रत्युक्त्यधिकरणम्।।सू. ३।।

एतेन योगः प्रत्युक्तः।।३।। यत्रान्योन्यानपेक्षया स्वार्थप्रमापकयोर्वाक्ययोर्वाक्यैकवाक्यभावेन एकवाक्यता तत्र अन्यतरवाक्यबाधेऽप्यन्यतरवाक्यस्य प्रामाण्यं युक्तम्, विध्युद्देशार्थवादवाक्यवत्[1], इदं रजतमिति ज्ञानवच्च प्रमितावन्योन्यनिरपेक्षत्वात्—इति न्यायेन, "अथ तद्दर्शनोपायः षडङ्गो योगः" इति वाक्ये प्रकृतिपुरुषव्यतिरिक्तेश्वरप्रतिपादकावान्तरवाक्यबाधेऽपि योगप्रतिपादकावान्तरवाक्यस्य प्रामाण्यं दर्शयित्वा विरुद्धांशबाधः कृतः।।

प्रकटार्थविवरणम्

इतरेषां चानुपलब्धेः।। ननु कथमनुपलम्भः, सांख्याभ्युपगतानां भूतेन्द्रियाणामुपलम्भादित्याशङ्क्याह—**भूतेन्द्रियाणीति**। ननु "महतः परमव्यक्तम्" इत्यस्ति महदादीनामुपलम्भ इत्याशङ्क्याह—**यदपीति**। फलितमाह—**कार्यस्मृतेरिति**। एकदेशस्य निर्मूलत्वेनाप्रामाण्ये सतीतरस्याप्यप्रामाण्यम्; भूतादेस्तु नासाधारण्यमित्यर्थः। यच्चोक्तं कपिलादिवचनं युक्त्युपेतमिति, तत्राह—[2]**तर्कावष्टम्भजमिति**।। इति प्रथमं स्मृत्यधिकरणम्।।

भाष्यभावप्रकाशिका

इतरेषां चानुपलब्धेः।।२।। महदादिकार्यविषयस्मृतेर्मूलभूतप्रमाणाभावेनाप्रामाण्यवत् कारणविषयस्मृतेरप्यप्रामाण्यं युक्तमित्याह—**प्रधानादितराणीतिं**।। ननु भूतेन्द्रियाणि लोकसिद्धान्येवेत्याशङ्क्य, तथापि महदहङ्कारपञ्चतन्मात्राणां स्मृतिर्न संभवतीत्याह—**भूतेन्द्रियाणीति**।। सूत्रं व्याख्याय तस्य तात्पर्यार्थमाह—**कार्यस्मृतेरिति**।। ननु स्मृतिविरोधाभावेऽपि ब्रह्मकारणवादस्य न्यायविरोधोऽस्त्येवेत्याशङ्क्याह—**तर्केति**।। इति प्रथमं स्मृत्यधिकरणम्।।

न्यायनिर्णयः

सूत्राक्षराणि व्याचष्टे—**प्रधानादिति**। तथा च मूलप्रमाणाभावादप्रमाणं महदादिविषया स्मृतिरिति शेषः। भूतानामिन्द्रियाणां च लोकवेदप्रसिद्धत्वान्न तद्विषयस्मृत्यप्रामाण्यमित्याशङ्क्याङ्गीकरोति—**भूतेति**। तथापि महदहंकारपञ्चतन्मात्राणां मूलाभावान्न स्मृतिः संभवतीत्याह—**अलोकेति**। महदादीनामपि 'महतः परमव्यक्तम्' इत्यादावस्ति प्रसिद्धिरित्याशङ्क्याह—**यदपीति**। महदादिस्मृतेर्मूलाभावात् तदप्रामाण्येऽपि किमायातं प्रधानस्मृतेरित्याशङ्क्य सूत्रस्य तात्पर्यमाह—**कार्येति**। सांख्यस्मृत्यप्रामाण्ये सिद्धे फलितमुपसंहरति—**तस्मादिति**। मूलप्रमाणाभावस्तच्छब्दार्थः। अपिना स्मृत्यादिविरोधः समुच्चितः। स्मृतिविरोधाभावेऽपि ब्रह्मकारणवादो न्यायविरोधान्न सिध्यतीत्याशङ्क्याह—**तर्केति**।।२।।इति प्रथमं स्मृत्यधिकरणम्।।

---

१. अर्थवादस्य विसंवादिनि स्वार्थेऽप्रामाण्येऽपि विध्युद्देशस्य प्रामाण्यम्। विध्युद्देशार्थवादयोश्च वाक्यैकवाक्यता देवताधिकरणे निरूपितेति दृष्टान्तोपपत्तिः। २. इदं भाष्ये पाठान्तरम्।

२।।योगप्रत्युक्त्यधिकरणम्।।सू. ३।।

एतेन योगः प्रत्युक्तः।।३।।

एतेन सांख्यस्मृतिप्रत्याख्यानेन योगस्मृतिरपि प्रत्याख्याता द्रष्टव्येत्यतिदिशति। तत्रापि श्रुतिविरोधेन प्रधानं स्वतन्त्रमेव कारणं, महदादीनि च कार्याण्यलोकवेदप्रसिद्धानि कल्प्यन्ते। नन्वेवं सति समानन्यायत्वात् पूर्वेणैवैतद् गतम्, किमर्थं पुनरतिदिश्यते? 'अस्ति ह्यत्राभ्यधिकाशङ्का। सम्यग्दर्शनाभ्युपायो हि योगो वेदे विहितः-'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.उ. २।४।५) इति। 'त्रिरुन्नतं स्थाप्य समं शरीरम्' (श्वे.उ. २।८) इत्यादिना चासनादिकल्पनापुरःसरं बहुप्रपञ्चं योगविधानं श्वेताश्वतरोपनिषदि दृश्यते। लिङ्गानि च वैदिकानि योगविषयाणि सहस्रश उपलभ्यन्ते-'तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्' (क.उ. २।६।११) इति, 'विद्यामेतां योगविधिं च कृत्स्नम्' (क.उ. २।६।१८) इति चैवमादीनि।

प्रकटार्थविवरणम्

एतेन योगः प्रत्युक्तः। एतेनेत्यतिदेशाधिकरणम्। अतः पूर्ववदेव विषयसंशयपूर्वपक्षसिद्धान्ताः। अतिदेशस्याधिकाशङ्का वक्तव्येत्याह—**नन्वेवमिति।।** श्रौतलिङ्गानुगृहीतत्वात् योगस्मृतिः प्रमाणमित्यधिकाशङ्कामाह—**अस्त्यत्रेति।।** त्रीण्युरोग्रीवशिरांसि उन्नतानि यस्मिंस्त्रिरुन्नतम्। विद्यामेतां ब्रह्मविषयां योगविधिं ध्यानप्रकारं च कृत्स्नं मृत्युर्नचिकेतसे प्रोवाचेत्यर्थः। संप्रतिपन्नोऽर्थैकदेशो

भाष्यभावप्रकाशिका

एतेन योगः प्रत्युक्तः।।३।। एतेनेति।। ननु अर्थसाम्याभावे कथमेकन्यायविषयत्वमिति, तत्राह—**तत्रापीति।।** अभ्यधिकाशङ्काभावादधिकरणान्तरारम्भमाक्षिपति—**नन्विति।।** अभ्यधिकाशङ्कां दर्शयितुं योगस्य श्रुतिमूलत्वं दर्शयति—**सम्यग्दर्शनेति।।** इदानीमष्टाङ्गयोगविधानमपि श्रुतौ दृश्यत इत्याह—**त्रिरुन्नतमिति।।** न केवलं श्रुतिरेवेत्याह—**लिङ्गानि चेति।।** तानि दर्शयति—**तां योगमित्यादिना।।** तैरपि वैदिकैरिव तत्त्वदर्शनोपायत्वं योगस्याभ्युपगम्यत इत्याह—**योगशास्त्रेऽपीति।।**

न्यायनिर्णयः

सांख्यस्मृतेर्मन्वादिस्मृतिविरोधेऽपि योगस्मृतेर्न सोऽस्तीति मन्वादिस्मृतिष्वपि योगस्यानुमोदितत्वात्। तथा च प्रधानादि-विषयेऽपि योगस्मृतेर्मानत्वात् तद्विरुद्धसमन्वयो न सिद्ध्यतीत्याशङ्क्याह—**एतेनेति।** चेतनं जगदुपादानं वदतः समन्वयस्य प्रधानं वास्तवमीश्वराधिष्ठितं जगदुपादानमिति वदन्त्या योगस्मृत्या विरोधोऽस्ति न वेति प्रधानादिविषये तत्प्रामाण्याप्रामाण्याभ्यां संदेहे पूर्वपक्षमग्रे दर्शयिष्यन्नतिदेशसूत्रं व्याकरोति—**एतेनेत्यादिना।** श्रुत्यादिसंगतिचतुष्टयं फलं च पूर्वन्यायातिदेशत्वात् पूर्ववदत्रापि द्रष्टव्यम्। अर्थसाम्याभावे तुल्यन्यायाविषयत्वादतिदेशानुपपत्तिरित्याशङ्क्यार्थसाम्यमाह—**तत्रापीति।** अधिकाशङ्काऽभावादधिकरणारम्भमाक्षिपति—**नन्विति। एवं सतीति।** सांख्ययोगस्मृत्योरर्थसाम्ये सतीति यावत्। अधिकाशङ्कां दर्शयन्नधिकरणारम्भं समर्थयते—**अस्तीति।** तामेव दर्शयितुमादौ योगस्मृतेः श्रुतिमूलत्वमाह—**सम्यगिति।** ननु श्रवणमनननिदिध्यासनान्येवात्र सम्यग्धीहेतुत्वेन विधीयन्ते, न त्वष्टाङ्गयोगविधिरत्रास्तीत्याशङ्क्य श्रुत्यन्तरमाह—**त्रिरुन्नतमिति।** त्रीणि देहग्रीवशिरांस्युन्नतानि यस्मिन् 'समं कायशिरोग्रीवं धारयन्' इत्यादिस्मृतेः, तच्छरीरं तथा, समं संस्थाप्य युञ्जीतेति योजना। न केवलं श्रुत्यनुगृहीतो योगः, किंतु श्रौतलिङ्गानुगृहीतश्चेत्याह—**लिङ्गानि चेति।** तान्येव दर्शयति—**तां योगमित्यादिना।** इन्द्रियाणामन्तर्बहिर्भावेन व्यवस्थितानां स्थिरामविचालिनीं धारणामैकाग्र्यलक्षणां योगविदो योगं मन्यन्ते। यथोक्तमैकाग्र्यमेव परमं तप इति वक्तुं योगशब्दादुपरिष्टादितिशब्दः। एतां ब्रह्मविषयां विद्यां योगप्रकारं च सर्वं मृत्योः सकाशान्नचिकेता लब्ध्वा ब्रह्म प्राप्तोऽभूदित्याह—**विद्यामेतामिति।** [2]श्रुतिवल्लिङ्गानुगृहीतयोगस्य सम्यग्ज्ञानोपायत्वेऽपि किमायातं योगस्मृतेरित्याशङ्क्याह—

---

१. 'अस्त्यत्र' इति पा.। २. 'श्रुतितल्लिङ्ग' इति पाठः स्यात्।

योगशास्त्रेऽपि 'अथ [1]'तत्त्वदर्शनोपायो योगः' इति सम्यग्दर्शनाभ्युपायत्वेनैव योगोऽङ्गीक्रियते। अतः संप्रतिपन्नार्थैकदेशत्वादष्टकादिस्मृतिवद् योगस्मृतिरप्यनपवदनीया भविष्यतीति। इयमभ्यधिकाशङ्काऽतिदेशेन निवर्त्यते। अर्थैकदेशसंप्रतिपत्तावप्यर्थैकदेशविप्रतिपत्तेः पूर्वोक्ताया दर्शनात्।

सतीष्वप्यध्यात्मविषयासु बह्वीषु स्मृतिषु सांख्ययोगस्मृत्योरेव निराकरणे यत्नः कृतः। सांख्ययोगौ हि परमपुरुषार्थसाधनत्वेन लोके प्रख्यातौ, शिष्टैश्च परिगृहीतौ, लिङ्गेन च श्रौतेनोपबृंहितौ–'तत्कारणं सांख्ययोगाभिपन्नं ज्ञात्वा देवं मुच्यते सर्वपाशैः' (श्वे.उ. ६।१३) इति। निराकरणं तु न सांख्यज्ञानेन

प्रकटार्थविवरणम्

यस्याः सा तथोक्ता, तस्या भावः तस्मात् योगस्मृतिर्न निराकरणीया, "अष्टकाः कर्तव्याः" "गुरुरनुगन्तव्यः" इत्यादिवदित्यर्थः।

ननु बौद्धादिस्मृतयोऽध्यात्मविषयाः सन्ति; तत्राप्यतिदेशः किं न कृत इत्याशङ्क्याह—**सतीष्वपीति**।। बौद्धादिस्मृतीनामपुरुषार्थसाधनतायाः स्पष्टत्वात् न तत्रातिदेशः कृत इति भावः। तत्कारणं तेषां कामानां कारणं देवं साङ्ख्ययोगाभ्यां दृष्टं ज्ञात्वा मुच्यतेऽविद्याबन्धैरित्यर्थः। यद्येवं प्रख्यातत्वं शिष्टपरिग्रहः श्रौतेन च लिङ्गेनोपबृंहितत्वमस्ति, किमिति तर्हि निराकरणमित्याशङ्क्याह—**निराकरणं त्विति**।।

भाष्यभावप्रकाशिका

इदानीमभ्यधिकाशङ्कां दर्शयति—**अतःसंप्रतिपन्नेति**।। कथं तर्हि निराकरणमिति? तत्राह—**अर्थैकदेशेति**।। यत्रान्योन्यापेक्षया स्वार्थप्रमापकयोरवान्तरवाक्ययोर्वाक्यैकवाक्यता, तत्रान्यतरवाक्यबाधेऽप्यन्यतरस्य प्रामाण्यं दृष्टं विध्युद्देशार्थवादयोः, अतो योगप्रतिपादकवाक्यप्रामाण्येऽपि महदहङ्कारप्रतिपादकवाक्यं वेदविरुद्धमप्रमाणमेवेति भावः।।

ननु अन्या अप्यध्यात्मविषया बौद्धार्हतादिस्मृतयः सन्त्येव, ताः किमिति न निराक्रियन्त इति? तत्राह—**सतीष्वपीति**।। ननु तर्हि श्रुतिसिद्धत्वादेव निराकरणमशक्यम्; अन्यथा श्रुतिविरोधादित्याशङ्क्य प्रधानादिविषये प्रामाण्यनिराकरणेऽपि तात्पर्यविषययोगभागे त्वम्पदार्थपरिशोधनांशे च वेदाविरुद्धे प्रामाण्यं न विहन्यत इत्याह—**निराकरणं त्विति**।। किमत्र प्रमाणमिति? अत

न्यायनिर्णयः

योगशास्त्रेऽपीति। आत्मज्ञानस्य मोक्षोपायत्वनिश्चयात् तज्जिज्ञासानन्तरमित्यथशब्दार्थः। एवं योगस्य सम्यग्धीहेतुत्वमुपपाद्याधिकां शङ्कां दर्शयति—**अत इति**। योगः सम्यग्दर्शनोपायः संप्रतिपन्नार्थैकदेशस्तद्वत्त्वाद् योगस्मृतिरनिराकार्येत्यत्र दृष्टान्तमाह—**अष्टकादीति**। 'अष्टकाः कर्तव्याः' 'गुरुरनुगन्तव्यः' 'तडागं खनितव्यम्' इत्यादिस्मृतयो न प्रमाणं, धर्मस्य वेदैकप्रमाणकत्वात्। अष्टकादेरिष्टसाधनत्वे वेदादृष्टेः, स्मृतेश्च भ्रान्त्याऽपि संभवादिति प्रापय्य वेदार्थानुष्ठातॄणामेव स्मृतिषु सनिबन्धनासु कर्तृत्वान्मूलभूतं वेदमनुमापयन्त्यः स्मृतयो मानमिति प्रमाणलक्षणे राद्धान्तितम्। तथा योगस्मृतिरपि मानमित्यर्थः। अधिकां शङ्कामनूद्य तन्निवर्तकत्वेनातिदेशाधिकरणस्यार्थवत्त्वमाह—**इयमिति**। कथं तर्हि निराकरणं, तदाह—**अर्थैकदेशेति**। योगस्मृतिर्योगविषये वेदाविसंवादान्मानमपि प्रधानादौ तद्विसंवादादमानम्, अर्थवादस्य विधिशेषत्वेन प्रामाण्येऽपि विसंवादिनि स्वार्थे तदनभ्युपगमादित्यर्थः।

नन्वध्यात्मविषयाः सन्ति सहस्रं बौद्धार्हतादिस्मृतयः; ताः किमित्युपदेशातिदेशाभ्यां न निराक्रियन्ते, तत्राह—**सतीष्वपीति**। तत्र हेतूनाह—**सांख्येत्यादिना**। ननु लोके पशुसदृशानां प्राकृतानां परमपुरुषार्थसाधनत्वेन बौद्धादिदर्शनमपि प्रसिद्धमित्याशङ्क्याह—**शिष्टैश्चेति**। ननु शिष्टपरिग्रहस्यापि विशिष्टप्रमाणमूलत्वमेष्टव्यम् 'आचाराच्च स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनाम्' इति न्यायात्, तत्राह—**लिङ्गेन चेति**। 'एको बहूनां यो विदधाति कामान्' इत्युपक्रम्य श्रुतम्—तत्कारणमिति। तेषां कामानां कारणं सांख्यैर्ज्ञानिभिर्योगैर्ध्यायिभिश्चाभिपन्नमाभिमुख्येन प्रत्यक्तया प्राप्तं देवं ज्ञात्वा सर्वपाशैरविद्यादिक्लेशैर्मुच्यत इत्यर्थः। तर्हि श्रुतिसिद्धत्वादिकारणवशान्निराकरणमशक्यमन्यथा श्रुत्यादिविरोधादित्याशङ्क्याह—**निराकरणं त्विति**। किमत्र प्रमाणमित्यपेक्षायामुक्तम्—

१. 'तद्दर्शनोपायः' इति पा.।

वेदनिरपेक्षेण योगमार्गेण वा निःश्रेयसमधिगम्यत इति। श्रुतिर्हि वैदिकादात्मैकत्वविज्ञानादन्यन्निःश्रेयससाधनं वारयति- 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे.उ. ३।८) इति। द्वैतिनो हि ते सांख्या योगाश्च नात्मैकत्वदर्शिनः। यत्तु दर्शनमुक्तं 'तत्कारणं सांख्ययोगाभिपन्नम्' इति, वैदिकमेव तत्र ज्ञानं ध्यानं च सांख्ययोगशब्दाभ्यामभिलप्यते प्रत्यासत्तेरित्यवगन्तव्यम्। येन त्वंशेन न विरुध्येते तेनेष्टमेव सांख्ययोगस्मृत्योः सावकाशत्वम्। तद्यथा- 'असङ्गो ह्ययं पुरुषः' (बृ.उ. ४।३।१५) इत्येवमादिश्रुतिप्रसिद्धमेव पुरुषस्य विशुद्धत्वं निर्गुणपुरुषनिरूपणेन सांख्यैरभ्युपगम्यते। तथा च योगैरपि 'अथ परिव्राड् विवर्णवासा मुण्डोऽपरिग्रहः' (जाबा.५) इत्येवमादिश्रुतिप्रसिद्धमेव निवृत्तिनिष्ठत्वं प्रव्रज्याद्युपदेशेनानुगम्यते। एतेन सर्वाणि तर्कस्मरणानि प्रतिवक्तव्यानि। तान्यपि तर्कोपपत्तिभ्यां तत्त्वज्ञानायोपकुर्वन्तीति चेदुपकुर्वन्तु नाम। तत्त्वज्ञानं तु वेदान्तवाक्येभ्य एव भवति, 'नावेदविन्मनुते तं बृहन्तम्' (तै.ब्रा. ३।१२।९।७) 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ.उ. ३।९।२६) इत्येवमादिश्रुतिभ्यः।।३।।

।।इति द्वितीयं योगप्रत्युक्त्यधिकरणम्।।

प्रकटार्थविवरणम्

प्रत्यासत्तेरिति।। प्रकरणे सन्निहितत्वादित्यर्थः।। इदानीमनिराकार्यमंशमाह—**येन त्वंशेनेति**।। कणभक्षाक्षचरणसूत्रेष्वप्यतिदिशति—**एतेन सर्वाणीति**।। इति द्वितीयं योगप्रत्युक्त्यधिकरणम्।।

भाष्यभावप्रकाशिका

आह—**श्रुतिर्हीति**।। ननु तेऽप्य[प्यात्म]ज्ञानादेव निःश्रेयसं वदन्ति, तत्कथमवैदिकत्वं तेषामिति? अत आह—**द्वैतिनो हीति**।। तर्हि श्रौतस्य लिङ्गस्य का गतिरिति? तामाह—**यत्तु दर्शनमिति**।। प्रसिद्धिविरोधेन कथमभ्युपगम्यत इत्याशङ्क्य प्रकरणाद्वाक्यशेषाच्चेत्याह—**प्रत्यासत्त्येति**।। सङ्ख्या सम्यग्बुद्धिर्वैदिकी, तया वर्तन्त इति साङ्ख्याः। योगो ध्यानम्। उपायोपेयाभेदविवक्षया चित्तवृत्तिनिरोधस्य योगस्य प्रत्ययैकतानतालक्षणं ध्यानमुपायः इति ध्यानं योग इत्युपचर्यते। ननु तर्हि प्रसिद्धयोः सर्वथा किमप्रामाण्यमिति? नेत्याह—**येन त्वंशेनेति**।। अविरुद्धांशमेव दर्शयति—**तद्यथेति**।। प्रतिवक्तव्यानि—निराकर्तव्यानि। तर्कः अनुमानम्। युक्तिः उपपत्तिः।। ननु तर्हि तेषां वैदिकवाक्येभ्यः को विशेष इति? तत्राह—**तत्त्वज्ञानमिति**।। किमत्र प्रमाणमिति? तदाह—**नावेदविदिति**।।३।। इति द्वितीयं योगप्रत्युक्त्यधिकरणम्।।

न्यायनिर्णयः

श्रुतिर्हीति। ननु वैदिकादात्मज्ञानादेव सांख्यादयोऽपि निःश्रेयसं वदन्ति, तत्कथमवैदिकत्वेन ते निरस्यन्ते, तत्राह—**द्वैतिनो हीति**। तर्हि श्रौतस्य लिङ्गस्य का गतिरित्यत आह—**यत्त्विति**। प्रसिद्धिविरोधेन कथमभ्युपगम्यते? प्रमाणवशादित्याह—**प्रत्यासत्तेरिति**। वैदिकी सम्यग्बुद्धिः संख्या, तया सह वर्तत इति सांख्यम्। योगो ध्यानं चित्तवृत्तिनिरोधस्तस्य योगस्य तदुपायत्वात् प्रत्ययैकतानताया ध्यानस्य तेनाभेदोपचारात्। अतः संनिकृष्टं सम्यग्ज्ञानं वैदिकं सांख्यादिशब्दितमित्यर्थः। तर्हि प्रसिद्धयोः सांख्ययोगस्मृत्योः सर्वथा नास्ति प्रामाण्यम्, नेत्याह—**येन त्विति**। अविरुद्धमंशमेव स्मृतिद्वयेऽपि विभज्य दर्शयति—**तद्यथेति**। प्रव्रज्यादीत्यादिशब्देन तद्धर्मसंग्रहः। अथोक्तविधया सांख्ययोगस्मृतिविरोधाभावेऽपि काणादादिस्मृतिविरोधान्न समन्वयसिद्धिरित्यत आह—**एतेनेति**। सांख्ययोगस्मृतिनिराकरणन्यायेनेति यावत्। तेषां निराकर्तव्यतामसृष्यन्नाशङ्कते—**तान्यपीति**। तर्कोऽनुमानमनुग्राह्यमानम्। उपपत्तिरनुग्राहिका युक्तिरिति भेदः। तर्कस्मरणानां तत्त्वज्ञानोपकारकत्वमङ्गीकरोति—**उपकुर्वन्त्विति**। तर्हि वैदिकवाक्येभ्यस्तेषां को विशेषः, तत्राह—**तत्त्वज्ञानं त्विति**। तत्र मानमाह—**नावेदविदिति**।।३।।इति द्वितीयं योगप्रत्युक्त्यधिकरणम्।।

३।।नविलक्षणत्वाधिकरणम्।।सू. ४-११।।

न विलक्षणत्वादस्य तथात्वं च शब्दात्।।४।।

ब्रह्मास्य जगतो निमित्तकारणं प्रकृतिश्चेत्यस्य पक्षस्याक्षेपः स्मृतिनिमित्तः परिहृतः। तर्कनिमित्त इदानीमाक्षेपः परिह्रियते। कुतः पुनरस्मिन्नवधारित आगमार्थे तर्कनिमित्तस्याक्षेपस्यावकाशः? ननु धर्म इव

शारीरकन्यायसंग्रहः

न विलक्षणत्वादस्य तथात्वं च शब्दात्।।४।। अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्।।५।। दृश्यते तु।।६।।

इदं जगद् ब्रह्मप्रकृतिकं न भवति, ब्रह्मासाधारणचैतन्यस्वभावेन अननुगतत्वात्; यत्कार्यं यत्कारणस्वभावेनाननुगतं तत् तत्प्रकृतिकं न भवति, यथा सुवर्णस्वभावेन अननुगतः पट इति ; तथा— ब्रह्म न जगत्प्रकृतिकं[प्रकृतिः] संभवति, तस्मिन्ननुगतस्वभावत्वात् ; यत् यस्मिन्ननुगतस्वभावं न तत् तत्प्रकृतिः यथा घटस्य सुवर्णमिति साङ्ख्यानुमाने। अनयोश्च-घटः प्रकाशते इति जगतः चैतन्यगुणत्वात्, शकृद्देहसामान्यादेः वृश्चिकलोमादिषु प्रत्यभिज्ञाऽभावात्, शास्त्रेण च ब्रह्मप्रकृतित्वावधारणात् असिद्धानैकान्तिककालात्ययापदिष्टत्वानि साधितानि।।

असदिति चेन्न प्रतिषेधमात्रत्वात्।।७।।अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्।।८।। न तु दृष्टान्तभावात्।।९।। स्वपक्ष-दोषाच्च।।१०।। "सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" "सदेव सोम्येदमग्र आसीत्" इत्यादिसच्छब्दार्थस्य घटादिष्वनुवर्तमानस्य मूलकारणत्वात् सप्रतियोगिको निषेधो नास्तीति त्रिष्वपि कालेषु कार्यमसदिति वक्तुं न शक्यते, किं तु सन्मूलकारणं कार्यमसदित्येतदवादि—इति दर्शितम्।।

तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेत् एवमप्यविमोक्षप्रसङ्गः।।११।। कश्चित् तर्को व्यवहारेण स्थाप्यते, यथा अग्निमान् पर्वतः इति। अपरश्चागमेन रक्ष्यते, यथा कार्यकारणयोः अनन्यभाव इति। तदुभयानुग्रहशून्यस्तु अप्रतिष्ठित इत्युक्तम्।।

प्रकटार्थविवरणम्

न विलक्षणत्वादस्य तथात्वं च शब्दात्।। अस्यावान्तरसङ्गतिमाह—**ब्रह्मास्येति**। पूर्वपक्षमाक्षिपति—**कुतः पुनरिति**।

भाष्यभावप्रकाशिका

न विलक्षणत्वादस्य तथात्वं च शब्दात्।।४।। न विलक्षणत्वादिति।। अवान्तरसङ्गतिमाह—**ब्रह्मास्येति।।** चोदयति—**कुतः पुनरिति।।** समानविषयत्वे विरोधो भवेत्, इह तु न समानविषयता; ब्रह्मणो मानान्तराविषयत्वेनातर्क्यत्वेन च निरपेक्षाम्नायैक-गोचरत्वादित्यर्थः।। ननु तर्कोपकरणत्वं वेदान्तमीमांसाया अपि प्रदर्शितमित्याशङ्क्य स एव पूर्ववाद्याह—**ननु धर्म इवेति।।**

न्यायनिर्णयः

तदेवं वेदविरुद्धानां स्मृतीनामप्रामाण्यात्र तद्विरोधः समन्वयस्येति समन्वयविरोधिनीनां स्मृतीनामाभासतामुक्त्वा तद्विरोधिनो न्यायस्याभासतां विवक्षुः सांख्ययोगन्यायस्याभासत्वार्थं पूर्वपक्षयति—**न विलक्षणत्वादिति**। चेतनाद् ब्रह्मणो जगदुत्पत्तिं ब्रुवन् समन्वयो विषयः। स किमाकाशादि न चेतनप्रकृतिकं द्रव्यत्वाद् घटादिवदिति सांख्ययोगन्यायेन विरुध्यते न वेति तदनाभासत्वाभासत्वाभ्यां संदेहे पूर्वाधिकरणेनोत्तराधिकरणसंदर्भस्य संगतिमाह—**ब्रह्मेति**। अत्र च समन्वयस्य यथोक्तन्याय-विरोधसमाधेरेव श्रुत्यादिसंगतयः। फलं तु पूर्वोत्तरपक्षयोः समन्वयासिद्धिस्तत्सिद्धिश्चेति। पूर्वपक्षमाक्षिपति—**कुत इति**। ब्रह्मणो मानान्तराविषयत्वेनातर्क्यत्वेन चानपेक्षाम्नायैकगम्यत्वात् तर्कागमयोरतुल्यार्थत्वेनाविरोधादागमार्थे तर्कनिमित्ताक्षेपस्य निरवकाशतेत्यर्थः। ननु तर्कोपकरणेति कर्तव्याया वेदान्तमीमांसायास्तर्कोपकरणत्वमुक्तं प्रथमसूत्रे, तथा च तर्कस्य वेदान्तैस्तुल्यार्थत्वमिष्टं, करणोपकरणयोरेकार्थत्वावगमात्, तत्राह—**नन्विति**। शक्तितात्पर्यावधारणे परं तर्कस्योपकरणत्वम्, न तु तस्य ब्रह्मविषयता। 'नैषा

ब्रह्मण्यप्यनपेक्ष आगमो भवितुमर्हति। भवेदयमवष्टम्भो यदि प्रमाणान्तरानवगाह्य आगममात्रप्रमेयोऽयमर्थः स्यात्, अनुष्ठेयरूप इव धर्मः। परिनिष्पन्नरूपं तु ब्रह्मावगम्यते। परिनिष्पन्ने च वस्तुनि प्रमाणान्तराणामस्त्यवकाशो यथा पृथिव्यादिषु। यथा च श्रुतीनां परस्परविरोधे सत्येकवशेनेतरा नीयन्ते, एवं प्रमाणान्तरविरोधेऽपि तद्वशेनैव श्रुतिर्नीयेत। दृष्टसाम्येन चादृष्टमर्थं [1]समर्थयन्ती युक्तिरनुभवस्य संनिकृष्यते; विप्रकृष्यते तु श्रुतिरैतिह्यमात्रेण स्वार्थाभिधानात्। अनुभवावसानं च ब्रह्मविज्ञानमविद्याया निवर्तकं मोक्षसाधनं च

प्रकटार्थविवरणम्

कस्मान्नास्त्यवसर इत्याशङ्क्यानुमानात्मकतर्कस्यागोचरत्वाद् ब्रह्मण इत्याह—**ननु धर्म इवेति**। पूर्वपक्षं समाधत्ते—**भवेदयमिति**॥ ननु सिद्धत्वेन वेदातिरिक्तप्रमाणगोचरत्वेऽपि प्रमाणानां स्वगोचरशूराणां नास्ति विरोधः; सत्यपि वा विरोधे वेदानुरोधेनैव मानान्तरं किं न नीयत इत्याशङ्क्याह—**यथा च श्रुतीनामिति**॥ यथा प्रधानाप्रधानश्रुतीनां परस्परविरोधे प्रधानानुसारेणाप्रधानश्रुतयो नीयन्ते, तथा मानान्तरविरोधे श्रुतेरप्रामाण्यं युक्तम्, उपजीव्यत्वेन मानान्तरस्य प्राधान्यादित्यर्थः। किञ्च यथा पूर्वत्र प्रत्यक्षश्रुतिविरोधे स्मृतेर्विप्रकृष्टार्थाया अप्रामाण्यमुक्तम्, एवमनुभवसन्निकृष्टतर्कविरोधे विप्रकृष्टायाः श्रुतेरप्रामाण्यमित्याह—**दृष्टसाम्येन चेति। ऐतिह्यमात्रेणेति**। प्रवादपारम्पर्यमात्रेणेत्यर्थः। किञ्चावश्यं ब्रह्मवादिनाऽपि तर्कोऽपेक्षितव्यः, तमन्तरेणासंभावनाऽनिरासेन फलवन्निश्चयविज्ञानायोगादित्याह—**अनुभवावसानं चेति**।

भाष्यभावप्रकाशिका

शब्दशक्तितात्पर्यावधारण एव तर्कस्योपकरणता, न तु ब्रह्मविषयतेत्यर्थः। सिद्धस्वभावत्वात् साध्यस्वभावधर्मवैलक्षण्यात् प्रत्यक्षादिगोचरत्वसंभवात् तर्कविषयत्वमपि संभवतीत्याह—**भवेदयमिति**॥ ननु श्रुतिविरोधे मानान्तरमेव किमिति न बाध्यत इत्याशङ्क्याह—**यथा च श्रुतीनामिति**॥ अयमर्थः— सावकाशा बह्व्योऽपि श्रुतयो निरवकाशैकश्रुतिविरोधे तदनुगुणतया यथा नीयन्ते, एवमनवकाशैकतर्कविरोधे तदानुगुण्येन बह्व्योऽपि श्रुतयो गुणकल्पनया व्याख्येया इति। ब्रह्मसाक्षात्कारस्य मोक्षसाधनतया प्रधानत्वात् तत्र शब्दादपि परोक्षगोचरादपरोक्षार्थसाधर्म्यगोचरस्तर्कोऽन्तरङ्गमिति स एव बलवानित्याह—**दृष्टसाधर्म्येण चेति**॥ **ऐतिह्यमात्रेणेति**॥ अनिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यमैतिह्यम्। तन्नित्यपरोक्षविषयम्; तद्वत् परोक्षार्थैकविषयत्वमागमस्यैतिह्यमात्रत्वं द्रष्टव्यम्॥ अनुभवस्यैव कथं प्राधान्यमिति? तद्दर्शयति—**अनुभवावसानं चेति**॥ ननु वैदिकत्वाद्धर्मवददृष्टफलं ब्रह्मविज्ञानमिति, तत्राह—**मोक्षेति**॥ अधिष्ठानसाक्षात्कारस्य तदविद्यातत्कार्यनिवर्तकत्वस्य

न्यायनिर्णयः

तर्केण' इति श्रुतेरित्यर्थः। सिद्धस्य ब्रह्मणः साध्याद् धर्माद् वैलक्षण्येनाध्यक्षादिविषयत्वसंभवात् तर्कगम्यत्वमपि संभवति। अतस्तुल्यविषयत्वादागमार्थेऽपि तर्कनिमित्ताक्षेपस्यावकाशोऽस्तीति समाधत्ते—**भवेदित्यादिना**। एकविषयत्वेन विरोधेऽपि किमिति मानान्तरमेव श्रुतिविरोधान्न बाध्यते, तत्र दृष्टान्तेनोत्तरमाह—**यथा चेति**। यथा सावकाशा भूयस्योऽपि श्रुतयो निरवकाशैकश्रुतिविरोधे तदनुरोधेन नीयन्ते, तथा निरवकाशैकतर्कविरोधे तदनुगुणतया भूयस्योऽपि श्रुतयो गुणकल्पनया व्याख्येयाः; सावकाशनिरवकाशयोर्निरवकाशस्य बलीयस्त्वादित्यर्थः। ब्रह्मण्याम्नायात् तर्कस्य बलीयस्त्वे हेत्वन्तरमाह—**दृष्टेति**। ब्रह्मसाक्षात्कारस्य मोक्षोपायतया प्राधान्यात् तत्र शब्दादपि परोक्षगोचरादपरोक्षार्थसाधर्म्यगोचरस्तर्कोऽन्तरङ्गमिति तस्यैव बलवत्त्वमित्यर्थः। ऐतिह्यमात्रेण प्रवादपारम्पर्यमात्रेण। परोक्षतयेति यावत्। अनुभवस्य प्राधान्ये तर्कस्योक्तन्यायेन तस्मिन्नन्तरङ्गत्वादागमस्य च बहिरङ्गत्वात् 'अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलवत्' इति न्यायादुक्तं तर्कस्य बलवत्त्वम्। अनुभवप्राधान्यं तु नाद्यापि सिद्धमित्याशङ्क्याह—**अनुभवेति**। ननु ब्रह्मज्ञानं वैदिकत्वाद्धर्मवददृष्टफलमेष्टव्यम्, तत्कुतोऽस्यानुभवावसानाविद्यानिवर्तकत्वं, तत्राह—**मोक्षेति**। अधिष्ठानसाक्षात्कारस्य शुक्त्यादिज्ञाने तदविद्यातत्कार्यनिवर्तकत्वदृष्टेर्ब्रह्मज्ञानस्यापि तर्कवशादसंभावनादिनिरासद्वारा साक्षात्कारावसायिनस्तदविद्यानिवर्तकत्वेनैव मुक्तिहेतुतेति नादृष्टफलतेत्यर्थः। यत्तु 'नैषा' इत्यादिश्रुतेर्ब्रह्मणि न प्रवेशस्तर्कस्येति,

१. 'समर्पयन्ती' इति पा.। २. 'सानत्वेनाविद्या' इति पाठः स्यात्।

दृष्टफलतयेष्यते। श्रुतिरपि–'श्रोतव्यो मन्तव्यः' इति श्रवणव्यतिरेकेण मननं विदधती तर्कमप्यत्रादर्तव्यं दर्शयति। अतस्तर्कनिमित्तः पुनराक्षेपः क्रियते–'न विलक्षणत्वादस्य' इति।

यदुक्तं चेतनं ब्रह्म जगतः कारणं प्रकृतिरिति, तन्नोपपद्यते। कस्मात्? विलक्षणत्वादस्य विकारस्य प्रकृत्याः। इदं हि ब्रह्मकार्यत्वेनाभिप्रेयमाणं जगत् ब्रह्मविलक्षणमचेतनमशुद्धं च दृश्यते। ब्रह्म च जगद्विलक्षणं चेतनं शुद्धं च श्रूयते। न च विलक्षणत्वे प्रकृतिविकारभावो दृष्टः। न हि रुचकादयो विकारा मृत्प्रकृतिका भवन्ति, शरावादयो वा सुवर्णप्रकृतिकाः। मृदैव तु मृदन्विता विकाराः प्रक्रियन्ते, सुवर्णेन च सुवर्णान्विताः। तथेदमपि जगदचेतनं सुखदुःखमोहान्वितं सदचेतनस्यैव सुखदुःखमोहात्मकस्य कारणस्य कार्यं भवितुमर्हतीति[1], न विलक्षणस्य ब्रह्मणः। ब्रह्मविलक्षणत्वं चास्य जगतोऽशुद्ध्य-चेतनत्वदर्शनादवगन्तव्यम्। अशुद्धं हि जगत् सुखदुःखमोहात्मकतया[2] प्रीतिपरितापविषादादिहेतुत्वात्

प्रकटार्थविवरणम्

किञ्च यदि शब्दैकगम्यं ब्रह्म स्यात्, मननविधानं न भवेदित्याह—**श्रुतिरपीति**।।

एवमाक्षेपावसरमुक्त्वा पूर्वपक्षसूत्रावयवं योजयति—**यदुक्तमित्यादिना**।। जगन्न ब्रह्मप्रकृतिकम्, तद्विलक्षणत्वात्, यद् यस्माद्विलक्षणं न तत् तत्प्रकृतिकम्, यथा घटादि न तन्तुप्रकृतिकमित्यर्थः। व्यतिरेकमुखेन व्याप्तिं द्रढयति—**न च विलक्षणत्व इति**। हेत्वसिद्धिमाशङ्क्य परिहरति—**ब्रह्मविलक्षणत्वं चास्येति**। एक एव हि स्त्रीपिण्डो युगपत् पतिसपत्न्युपपतीनां प्रीतिपरितापविषादहेतुर्भवति, तथाऽन्येऽपि भावा इत्यशुद्धत्वम्, शुद्धब्रह्मरूपतायां चैकरूपत्वप्रसङ्गादप्यशुद्धत्वं जगत इत्यर्थः।

भाष्यभावप्रकाशिका

शुक्त्यादिज्ञाने दृष्टत्वादित्यर्थः। अपि च श्रुतिरपि ब्रह्मणि तर्कमङ्गीकरोतीत्याह—**श्रुतिरपीति**।।

विलक्षणत्वमेव दर्शयति—**इदं हीति**।। ततः किमायातमिति? तदाह—**न च विलक्षणत्व इति**।। व्याप्तिं दर्शयति—**न हीति**।। इदानीमनुमानमाह—**तथेदमपीति**।। सर्वं कार्यम्, सुखदुःखमोहसामान्यप्रकृतिकम्; तदन्वितस्वभावत्वात्; यथा मृदन्वित-स्वभावा घटादयो मृत्प्रकृतिकाः, तद्वदिति। इदानीं ब्रह्मकारणत्वमयुक्तमित्याह—**न विलक्षणस्येति**।। तदयं प्रयोगः—इदं जगत्, ब्रह्मप्रकृतिकं न भवति, तत्स्वभावेनाननुगतत्वात्; यथा च मृत्स्वभावेनाननुगतं रुचकहारादि मृत्प्रकृतिकं न भवति, तद्वदिति। ब्रह्म, जगत्प्रकृतिर्न भवति, तस्मिन्ननुगतस्वभावत्वात्, यथा घटादिष्वननुगतसुवर्णादि न घटप्रकृतिः; तद्वदिति। अशुद्धत्वमुप-पादयति—**अशुद्धं हीति**।। इदानीमचेतनत्वं दर्शयति—**अचेतनं चेति**।। व्यभिचारमाशङ्कते—**ननु चेतनमपीति**।। ननु

न्यायनिर्णयः

तत्राह—**श्रुतिरपीति**। विधिविरोधेऽर्थवादश्रुतिरदृढीभवतीति भावः। ब्रह्मणि तर्कप्रवेशे फलितमाह—**अत इति**।

सूत्रावयवमवतारितं व्याकरोति—**यदुक्तमित्यादिना**। ब्रह्मणो जगत्प्रकृतित्वं प्रतिपादितत्वान्नानुपपन्नमित्याह—**कस्मादिति**। तत्र सोपस्करं हेतुमाह—**विलक्षणत्वादिति**। जगद्ब्रह्मणोर्मिथो विलक्षणत्वं दृष्टिश्रुतिभ्यां स्पष्टयति—**इदं हीति**। तयोर्मिथो वैलक्षण्येऽपि किमायातमित्याशङ्क्याह—**न चेति**। अदृष्टत्वमेव स्पष्टयन् व्याप्तिमाह—**न हीति**। व्यतिरेकमुक्त्वाऽन्वयमाचष्टे—**मृदैवेति**। व्याप्तिमुक्त्वा पूर्वपक्षसाधकमनुमानमाह—**तथेति**। विमतं सुखदुःखमोहसामान्यप्रकृतिकं, तदन्वितस्वभावत्वात्, यथा मृदन्वितस्वभावा घटादयो मृत्प्रकृतिकास्तथेत्यर्थः। सिद्धान्तं निषेद्धुमनुमानमाह—**न विलक्षणस्येति**। विमतं न ब्रह्मप्रकृतिकं, तत्स्वभावेनाननुगतत्वात्, यथा मृत्स्वभावेनाननुगतं रुचकादि न मृत्प्रकृतिकं तद्वदित्यर्थः। किंच न ब्रह्म जगत्प्रकृतिः, तस्मिन्ननुगतस्वभावत्वात्, यथा घटादिष्वननुगतं सुवर्णादि तत्प्रकृतिर्न भवति तद्वदित्यनुमानमभिप्रेत्याह—**ब्रह्मेति**। तत्राशुद्धत्वमुपपादयति—**अशुद्धं हीति**। विषादादीत्यादिपदेन रागद्वेषादयो गृह्यन्ते। नरकादीत्यादिशब्देन लोकभेदानां

१. 'इति' शब्दः क्वचिन्न। २. 'प्रतीयते' इत्यधिकं क्वचित्।

स्वर्गनरकाद्युच्चावचप्रपञ्चत्वाच्च। अचेतनं चेदं जगत्, चेतनं प्रति कार्यकरणभावेनोपकरणभावोपगमात्। न हि साम्ये सत्युपकार्योपकारकभावो भवति। न हि प्रदीपौ परस्परस्योपकुरुतः। ननु चेतनमपि कार्यकरणं स्वामिभृत्यन्यायेन भोक्तुरुपकरिष्यति। न; स्वामिभृत्ययोरप्यचेतनांशस्यैव चेतनं प्रत्युपकारकत्वात्। यो ह्येकस्य चेतनस्य परिग्रहो बुद्ध्यादिरचेतनभागः स एवान्यस्य चेतनस्योपकरोति, न तु स्वयमेव चेतनश्चेतनान्तरस्योपकरोत्यपकरोति वा। निरतिशया ह्यकर्तारश्चेतना इति सांख्या मन्यन्ते। तस्मादचेतनं कार्यकरणम्। न च काष्ठलोष्टादीनां चेतनत्वे किंचित् प्रमाणमस्ति। प्रसिद्धश्चायं चेतनाचेतनप्रविभागो लोके। तस्माद् ब्रह्मविलक्षणत्वान्नेदं जगत् तत्प्रकृतिकम्।

योऽपि कश्चिदाचक्षीत श्रुत्वा[1] जगतश्चेतनप्रकृतिकतां तद्बलेनैव समस्तं जगच्चेतनमवगमिष्यामि; प्रकृतिरूपस्य विकारेऽन्वयदर्शनात्। अविभावनं तु चैतन्यस्य परिणामविशेषाद्[2] भविष्यति। यथा

प्रकटार्थविवरणम्

अचेतनत्वं च साम्ये सत्युपकार्योपकारकभावायोगादित्याह—**अचेतनं चेदमिति**।। चेतनोपकारकत्वादचेतनमित्यस्य व्यभिचारं शङ्कते—**ननु चेतनमपीति**।। भृत्यदेहस्यैव स्वामिनं प्रत्युपकारकत्वान्नास्ति व्यभिचार इत्याह—**न, स्वामिभृत्ययोरिति**।। इतश्चाचेतनं जगदित्याह—**न च काष्ठेति**।।

वेदान्तैकदेशिनो मतमुद्भावयति—**योऽपि कश्चिदित्यादिना**।। चेतनप्रकृतिकत्वात् जगच्चेतनं चेत् किमिति चैतन्यं सर्वत्र न व्यज्यत इत्याशङ्क्याह—**अविभावनं त्विति**।। यदुक्तं चेतनत्वसाम्ये सत्युपकार्योपकारकभावो न संभवतीति, तदप्यविरुद्धमित्याह—

भाष्यभावप्रकाशिका

साक्षादुपकार[क]त्वाभावेऽप्युपकारककार्यकरणाधिष्ठातृतयोपकारकत्वं स्यादिति, अत आह—**निरतिशया हीति**।। उपजनापायवद्धर्म-शून्या इत्यर्थः। चेतनत्वे प्रमाणाभावादप्यचेतनत्वमित्याह—**न चेति**। अचेतनत्वे प्रमाणान्तरमाह—**प्रसिद्धश्चायमिति**।। श्रुतार्थापत्त्या चेतनत्वमवगम्यते जगत इति।।

सूत्रैकदेशव्यावर्त्यामाशङ्कां दर्शयति—**योऽपि कश्चिदिति**।। कयाऽनुपपत्त्येति? तत्राह—**प्रकृतिरूपस्येति**।। अनुपलम्भपराहतमेतदिति, अत आह—**अविभावनं त्विति**।। स्वयंप्रकाशस्य चैतन्यस्य परिणामविशेषादनुपलम्भः कथमिति? तत्राह—**यथेति**।।

न्यायनिर्णयः

तत्रावस्थितप्राणिप्रभेदानां च ग्रहणम्। जगतोऽचेतनत्वं साधयति—**अचेतनं चेति**। चेतनत्वाविशेषेऽपि स्यादुपकार्योपकारकत्वं, नेत्याह—**न हीति**। तदेव दृष्टान्तेन स्पष्टयति—**न हि प्रदीपाविति**। साम्ये सत्युपकार्योपकारकत्वं नास्तीत्यत्र व्यभिचारं चोदयति—**नन्विति**। स्वामिभृत्यन्यायं विघटयन्नुत्तरमाह—**न, स्वामीति**। किं चेतनस्य साक्षादेव चेतनान्तरं प्रत्युपकारकत्वं, किं वोपकारककार्यकरणाधिष्ठातृत्वेनेति विकल्प्याद्यं प्रत्याह—**यो हीति**। स एवेत्येवकारनिरस्यं दर्शयति—**न त्विति**। द्वितीयं निरस्यति—**निरतिशया हीति**। उपजनापाय[वद्]धर्मशून्यत्वं निरतिशयत्वम्। अत एवाकर्तृत्वमतिशयमन्तरेण सिध्यति, तत्कथं परम्परयाऽपि चेतनानामनाधेयातिशयानामुपकार्योपकारकत्वमित्यर्थः। समयोरुपकार्योपकारकत्वासंभवे फलितमाह—**तस्मादिति**। किंच कार्यकरणे चेतनत्वशङ्काऽवकाशवती, तत्र चेतनस्य सत्त्वात्; काष्ठादिषु तदाशङ्कैव नोदेतीत्याह—**न चेति**। इतश्च जगतश्चेतनत्वमयुक्तमित्याह—**प्रसिद्धश्चेति**। जगतोऽशुद्धत्वेऽचेतनत्वे च सिद्धे पूर्वोक्तमनुमानमुपसंहरति—**तस्मादिति**।

श्रुतार्थापत्त्या चेतनत्वं जगतोऽवगतमिति सूत्रैकदेशव्यावर्त्यामाशङ्कां दर्शयति—**योऽपीति**। जगतश्चेतनप्रकृतिकत्वश्रुतिबलेन चेतनत्वावगतिरित्युक्तं व्यनक्ति—**प्रकृतीति**। अनुपलम्भपराहता श्रुतार्थापत्तिरमानमित्याशङ्क्याह—**अविभावनं त्विति**। समस्ते

---

१. 'श्रुत्या' इति पा.। २. अन्तःकरणान्यपरिणामत्वादित्यर्थः।

स्पष्टचैतन्यानामप्यात्मनां स्वापमूर्च्छाद्यवस्थासु चैतन्यं न विभाव्यत एवं काष्ठलोष्टादीनामपि चैतन्यं न विभावयिष्यते। एतस्मादेव च विभाविताविभावितत्वकृताद् विशेषाद्रूपादिभावाभावाभ्यां च कार्यकरणानामात्मनां च चेतनत्वाविशेषेऽपि गुणप्रधानभावो न विरोत्स्यते। यथा च पार्थिवत्वाविशेषेऽपि मांससूपौदनादीनां प्रत्यात्मवर्तिनो विशेषात् परस्परोपकारित्वं भवत्येवमिहापि भविष्यति। प्रविभागप्रसिद्धिरप्यत एव न विरोत्स्यत इति। तेनापि कथंचिच्चेतनाचेतनत्वलक्षणं विलक्षणत्वं परिह्रियेत। शुद्ध्यशुद्धिलक्षणं तु विलक्षणत्वं नैव परिह्रियते। न चेतरदपि विलक्षणत्वं परिहर्तुं शक्यत इत्याह—तथात्वं च शब्दादिति। अनवगम्यमानमेव हीदं लोके समस्तस्य वस्तुनश्चेतनत्वं चेतनप्रकृतिकत्वश्रवणाच्छब्दशरणतया केवलयोत्प्रेक्ष्येत, तच्च शब्देनैव विरुध्यते। यतः शब्दादपि तथात्वमवगम्यते। तथात्वमिति प्रकृतिविलक्षणत्वं कथयति। शब्द एव 'विज्ञानं चाविज्ञानं च' (तै.उ. २।६) इति कस्यचिद् विभागस्याचेतनतां श्रावयंश्चेतनाद् ब्रह्मणो विलक्षणमचेतनं जगच्छ्रावयति।।४।।

प्रकटार्थविवरणम्

एतस्मादेव चेति।। किञ्च सत्यपि साम्ये प्रतिव्यक्ति स्वभावभेदादुपकार्योपकारकत्वं दृष्टमित्याह—**यथा च पार्थिवत्वेति**।। सूपो मुद्गादिः। चेतनाचेतनभेदप्रसिद्धिरप्यभिव्यक्त्यनभिव्यक्तिभावादेव न विरुद्धा भवति; अतो वैलक्षण्यमसिद्धमित्यर्थः। तदेतदेकदेशिमतं सांख्यो दूषयति—**तेनापीति**।। अभ्युपगम्य चेतनत्वाचेतनत्ववैलक्षण्यस्य परिहारं वैलक्षण्यान्तरस्यैवे[रमस्त्येवे]त्युक्तम्। इदानीमभ्युपगमं त्यजति—**न चेतरदपीति**।।

भाष्यभावप्रकाशिका

अन्तः[करण]परिणामानुपरागादनुपलब्धिरिति भावः। कथं तर्हि चेतनतया समानानां गुणप्रधानभाव इति? अत आह—**एतस्मादेव चेति**।। **प्रत्यात्मवर्तिनो विशेषादिति**।। स्वासाधारणधर्मवशादित्यर्थः।। का तर्हि विभागप्रसिद्धेरुपपत्तिरिति? विभावनाविभावनविशेष एवेत्याह—**प्रविभागेति**।। अभ्युपेत्यापाततःसमाधानमाह—**तेनापीति**। परमसमाधानं तु सूत्रावयवेन वक्तुमवतारयति—**न चेतरदपीति**।। सूत्रावयवाभिप्रायमाह—**अनवगम्यमानमिति**।। श्रुतार्थापत्तिः श्रुतिविरोधादप्रमाणमित्याह—**तच्च शब्देनैवेति**।। न च—अयमपि शब्दो विभाविताविभावितत्वविशेषापेक्षो भविष्यतीति—आशङ्कनीयम्; औपचारिकत्वप्रसङ्गात्, मुख्ये च संभवति तदयोगादिति भावः।।४।।

न्यायनिर्णयः

जगति सतोऽपि चैतन्यस्य तत्र तत्रान्तःकरणपरिणामानुपरागादनुपलब्धिरविरुद्धेत्यर्थः। स्वप्रकाशस्य चैतन्यस्य परिणामविशेषानुपरागादनुपलब्धिरसिद्धा स्वप्रकाशत्वविरोधादित्याशङ्क्य दृष्टान्तेन परिहरति—**यथेत्यादिना**। तर्हि चेतनत्वेन तुल्यानां कार्यकरणानामात्मनां च गुणप्रधानत्वाभावादुपकार्योपकारकत्वानुपपत्तिरुक्ता तदवस्थेत्याशङ्क्याह—**एतस्मादिति**। साम्येऽपि संभवत्युपकार्योपकारकत्वमित्येतदुदाहरणेन स्फोरयति—**यथा चेति**। **प्रत्यात्मवर्तिनो विशेषात्** तदसाधारणधर्मवशादित्यर्थः। सर्वस्यापि जगतश्चेतनत्वे कथं चेतनाचेतनविभागप्रसिद्धिरत आह—**प्रविभागेति**। अत एव विभावितत्वाविभावितत्वविशेषादेवेत्यर्थः। जगतश्चेतनत्वमुपेत्यापाततः समाधानमाह—**तेनापीति**। परमसमाधानं वक्तुं सूत्रावयवमवतारयति—**न चेति**। तस्याभिप्रायं दर्शयितुं परकीयाभिप्रायमनुवदति—**अनवगम्यमानमिति**। लोकानुरोधवैधुर्यं केवलं चे[केवलये]त्युक्तम्। सम्प्रति सूत्रावयवाभिप्रायमाह—**तच्चेति**। श्रुतिविरोधे श्रुतार्थापत्तिरमानमिति भावः। विरोधमेव स्फोरयति—**यत इति**। अनुभवसमुच्चयार्थोऽपिशब्दः। न चायं शब्दो विभावितत्वाविभावितत्वविशेषापेक्षो भविष्यत्यौपचारिकत्वप्रसङ्गात्, मुख्यसंभवे तदयोगादिति भावः।।४।।

---

१. अन्तःकरणपरिणामो वृत्तिः। अन्तःकरणादन्यत्र वृत्त्युपरागदशायामेव चैतन्याभिव्यक्तिः, नान्यदेति भावः। द्र. रत्न.

ननु चेतनत्वमपि क्वचिदचेतनत्वाभिमतानां भूतेन्द्रियाणां श्रूयते। यथा 'मृदब्रवीत्' 'आपोऽब्रुवन्' (शत.ब्रा. ६।१।३।२,४) इति, 'तत्तेज ऐक्षत' 'ता आप ऐक्षन्त' (छा.उ. ६।२।३,४) इति चैवमाद्या भूतविषया चेतनत्वश्रुतिः। इन्द्रियविषयाऽपि 'ते हेमे प्राणा अहंश्रेयसे विवदमाना ब्रह्म जग्मुः' (बृ.उ. ६।१।७) इति, 'ते ह वाचमूचुस्त्वं न उद्गायेति' (बृ.उ. १।३।२) इत्येवमाद्येन्द्रियविषयेति। अत उत्तरं पठति–

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्।।५।।

तुशब्द आशङ्कामपनुदति। न खलु 'मृदब्रवीदि'त्येवंजातीयकया श्रुत्या भूतेन्द्रियाणां चेतनत्वमाशङ्कनीयम्। यतोऽभिमानिव्यपदेश एषः। मृदाद्यभिमानिन्यो वागाद्यभिमानिन्यश्च चेतना देवता वदनसंवदनादिषु चेतनोचितेषु व्यवहारेषु व्यपदिश्यन्ते, न भूतेन्द्रियमात्रम्। कस्मात्? विशेषानुगतिभ्याम्। विशेषो हि भोक्तॄणां भूतेन्द्रियाणां च चेतनाचेतनप्रविभागलक्षणः प्रागभिहितः। सर्वचेतनतायां चासौ नोपपद्येत। अपि च कौषीतकिनः प्राणसंवादे करणमात्राशङ्काविनिवृत्तयेऽधिष्ठातृचेतनपरिग्रहाय देवताशब्देन विशिंषन्ति–

प्रकटार्थविवरणम्

उत्तरसूत्रस्य[सूत्रनिरस्या]शङ्कामाह—**ननु चेतनत्वमपीति**। विज्ञानं चाविज्ञानं च मूलकारणमेवाभवदिति वचनमस्पष्टचैतन्याभिप्रायेणापि सङ्गच्छते; वचनान्तरात्तु वदनसंवदनादिचेतनधर्मावगमाच्चेतनत्वं भविष्यतीत्यर्थः।

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्। वचनान्तरमन्यविषयं न मृदादेश्चेतनत्वं गमयतीत्याह—**अभिमानीति**।। विशेषशब्दस्यार्थान्तरमाह—**अपि च कौषीतकिन इति**।। प्राणे प्राणस्य; निःश्रेयसं श्रैष्ठ्यं विदित्वा तस्मै बलिहरणादिकं कृतवत्य

भाष्यभावप्रकाशिका

ननु औपचारिक एव विभागः श्रुतेरर्थोऽभ्युपगन्तव्यः, अचेतनत्वाभिमतानामपि चेतनत्वश्रवणादिति चोदयति सूत्रान्तरमवतारयितुम्—**ननु चेतनत्वमिति**।। अत एव जगतश्चेतनत्वं न केवलं श्रुत्यर्थापत्तिगम्यम्, अपि तु श्रुतिगम्यमपीति भावः।।

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्।।५।। इयं श्रुतिरभिमानिदेवताविषयतयाऽपि मुख्यार्था सती विभागश्रुतेरुपचरितार्थतां न कल्पयतीति परिहरति—**न खल्विति**।। तत्र विशेषं व्याचष्टे—**विशेषो हीति**। उपकार्योपकरणभावात्, साम्ये च तदनुपपत्तेः, चेतनाचेतनविभागावगमात् केवलभूतेन्द्रियविषया नैषा श्रुतिरित्यर्थः। देवताशब्दकृतो वाऽत्र विशेषो विशेषशब्देनोच्यत इत्याह—**अपि चेति**।। **अहंश्रेयस इति**।। अहं श्रेयानित्यस्मै प्रयोजनाय स्वश्रैष्ठ्यायेत्यर्थः।। **निःश्रेयसं विदित्वेति**।। श्रैष्ठ्यं विदित्वेत्यर्थः।

न्यायनिर्णयः

केवलश्रुत्यपेक्षया तदनुगृहीतार्थापत्तेर्बलीयस्त्वाद् विभागश्रुत्यर्थस्यौपचारिकत्वमेवेति शङ्कते—**नन्विति**। यथाशब्दस्तथाशब्दमध्याहृत्येन्द्रियविषयाऽपि चेतनत्वश्रुतिरस्तीति संबध्यते। काऽसाविन्द्रियविषया श्रुतिरित्यपेक्षायामाह—**ते हेति**। मृदादिश्रुतिरभिमानिदेवताविषयतया मुख्यार्था सती विभागश्रुतेरुपचरितार्थतां न कल्पयतीति परिहरति—**अत इति**। सूत्रं व्याचष्टे—**तुशब्द इति**। आशङ्कापनोदप्रकारमेव प्रकटयति—**न खल्विति**। अत्र हेतुत्वेन सूत्रभागमादत्ते—**यत इति**। तस्यार्थमाह—**मृदादीति**। भूतमात्रमिन्द्रियमात्रं वा चेतनत्वेन व्यपदिश्यमानं न भवतीत्यत्र प्रश्नपूर्वकं हेतुद्वयमाह—**कस्मादिति**। तत्र विशेषं व्याचष्टे—**विशेषो हीति**। तस्यान्यथोपपत्तिं वारयति—**सर्वेति**। उपकार्योपकारकत्वाधिगतेः, साम्ये च तदयोगात्, प्रसिद्धिश्रुतिभ्यां चेतनाचेतनत्वविभागावगमात् केवलभूतेन्द्रियविषया नैषा श्रुतिरित्यर्थः। अविशेषेण विशेषं व्याख्याय प्राणेषु विशेषं विशेषतो व्याकरोति—**अपि चेति**। विशिंषन्ति वागादीन् [१]प्राणानिति शेषः। अहंश्रेयसे श्रेयानहमित्यस्मै प्रयोजनाय। स्वकीयश्रेष्ठत्वायेत्यर्थः।

१. 'प्राणादीन्' इति पा.।

'एता ह वै देवता अहंश्रेयसे विवदमानाः' इति, 'ता वा एताः सर्वा देवताः प्राणे निःश्रेयसं विदित्वा' (कौ.उ. २।१४) इति च। अनुगताश्च सर्वत्राभिमानिन्यश्चेतना देवता मन्त्रार्थवादेतिहासपुराणादिभ्योऽवगम्यन्ते। 'अग्निर्वाग्भूत्वा मुखं प्राविशत्' (ऐ.उ. २।४) इत्येवमादिका च श्रुतिः करणेष्वनुग्राहिकां देवतामनुगतां दर्शयति। प्राणसंवादवाक्यशेषे च 'ते ह प्राणाः प्रजापतिं पितरमेत्योचुः' (छा.उ. ५।१।७) इति श्रेष्ठत्वनिर्धारणाय प्रजापतिगमनं, तद्वचनाच्चैकैकोत्क्रमणेनान्वयव्यतिरेकाभ्यां प्राणश्रैष्ठ्यप्रतिपत्तिः, 'तस्मै बलिहरणम् इति चैवंजातीयकोऽस्मदादिष्विव व्यवहारोऽनुगम्यमानोऽभिमानिव्यपदेशं द्रढयति। 'तत्तेज ऐक्षत' इत्यपि परस्या एव देवताया अधिष्ठात्र्याः स्वविकारेष्वनुगताया इयमीक्षा व्यपदिश्यत इति द्रष्टव्यम्। तस्माद् विलक्षणमेवेदं ब्रह्मणो जगत्। विलक्षणत्वाच्च न ब्रह्मप्रकृतिकम्।।५।। इत्याक्षिप्ते प्रतिविधत्ते—

दृश्यते तु।।६।।

तुशब्दः पक्षं व्यावर्तयति। यदुक्तं विलक्षणत्वान्नेदं जगद् ब्रह्मप्रकृतिकमिति; नायमेकान्तः। दृश्यते

प्रकटार्थविवरणम्

इत्यर्थः। विशेषपदं व्याख्यायानुगतिं व्याचष्टे—**अनुगताश्चेति**।। ''तत्तेज ऐक्षत'' इत्यस्य व्याख्यानमीक्षत्यधिकरणे त्वयैव कृतं द्रष्टव्यमित्यर्थः। यस्मान्नास्ति भूतेन्द्रियाणां चेतनत्वं तस्मादिति पूर्वपक्षोपसंहारः।।

दृश्यते तु।। हेतोरनैकान्तिकत्वात् नेदमनुमानं प्रमाणम्। ततो नास्ति समन्वयस्य साङ्ख्यानुमानेन विरोध इति सिद्धान्ताशयः।

भाष्यभावप्रकाशिका

अनुगतिं व्याचष्टे—**अनुगताश्चेति**।। **सर्वत्रेति**।। भूतेन्द्रियादिष्वित्यर्थः। पूर्वमविशेषेणानुगतिमभिधाय, इदानीं करणेष्वेव देवतानुगतिं श्रुतितो दर्शयति—**अग्निर्वाग्भूत्वेति**।। अनुगतिशब्दस्य व्याख्यान्तरमाह—**प्राणसंवाद इति**।। शरीराणामिव क्षेत्रज्ञाधिष्ठितानां व्यवहारानुगतिं प्राणानां दर्शयन्ती श्रुतिः क्षेत्रज्ञाधिष्ठानेनैव चैतन्यं द्रढयतीत्यर्थः। इन्द्रियेषु चेतनत्वाभिधानस्याभिमानिनिमित्ततामुक्त्वा भूतेषु दर्शयति—**तत्तेज इति**।। तस्मान्नासिद्धो हेतुरित्युपसंहरति—**तस्मादिति**।। अनुमानमुपसंहरति—**विलक्षणत्वाच्चेति**।।५।।

दृश्यते तु।।६।। सिद्धान्तयति—**दृश्यते त्विति**।। आपातेन परिहरति—**दृश्यते हीति**।। ननु ईदृशं वैलक्षण्यं विवक्षितं न

न्यायनिर्णयः

निःश्रेयसं श्रैष्ठ्यं प्राणे ज्ञात्वा तदनुवर्तिन्यः सर्वा देवता बभूवुरित्यर्थः। इदानीमनुगतिमविशेषतो दर्शयति—**अनुगताश्चेति**। सर्वत्रेति भूतेन्द्रियादिग्रहणम्। सम्प्रति करणेष्वेव देवतानुगतिं श्रुतितो दर्शयति—**अग्निरिति**। करणेष्वेवानुगतिं विधान्तरेण निरूपयति—**प्राणेति**। क्षेत्रज्ञाधिष्ठितानां शरीराणामिव प्राणानामपि व्यवहारानुगतिं दर्शयन्ती श्रुतिस्तेषां क्षेत्रज्ञाधिष्ठानेनैव चैतन्यं द्रढयतीत्यर्थः। भूतेन्द्रियविषयचेतनत्वश्रुतेरभिमानिनिमित्ततां विशेषानुगतिभ्यामुक्त्वा भूतेषु चेतनत्वाभिधानस्याभिमानिनिमित्ततां विशेषतो दर्शयति—**तत्तेज इति**। सर्वस्य चेतनत्वासंभवे हेत्वसिद्धिसमाधिमुपसंहरति—**तस्मादिति**। तत्फलमनुमानं निगमयति—**विलक्षणत्वाच्चेति**।।५।।

ब्रह्मणि समन्वयो यथोक्तन्यायविरोधान्न सिध्यतीति पूर्वपक्षमनुभाष्य सिद्धान्तमाह—**इत्याक्षिप्त इति**। सिद्धान्तसूत्रं विभजते—**तुशब्द इति**। व्यावर्त्यपक्षमनूद्य तद्व्यावृत्तिप्रकारमेव विवृणोति—**यदुक्तमिति**। वैलक्षण्ये प्रकृतिविकृतिभावासिद्धिरिति

१. तस्मै प्राणाय बलिहरणं वागादिभिः स्वीयवसिष्ठत्वादिगुणानां समर्पणम्।

हि लोके चेतनत्वेन प्रसिद्धेभ्यः पुरुषादिभ्यो विलक्षणानां केशनखादीनामुत्पत्तिः, अचेतनत्वेन च प्रसिद्धेभ्यो गोमयादिभ्यो वृश्चिकादीनाम्। नन्वचेतनान्येव पुरुषादिशरीराण्यचेतनानां केशनखादीनां कारणानि, अचेतनान्येव च वृश्चिकादिशरीराण्यचेतनानां गोमयादीनां कार्याणीति। उच्यते–एवमपि किंचिदचेतनं चेतनस्यायतनभावमुपगच्छति, किंचिन्नेत्यस्त्येव वैलक्षण्यम्। महांश्चायं पारिणामिकः स्वभावविप्रकर्षः, पुरुषादीनां केशनखादीनां च [1]स्वरूपादिभेदात्। तथा गोमयादीनां वृश्चिकादीनां च। अत्यन्तसारूप्ये च प्रकृतिविकारभाव एव प्रलीयेत। अथोच्येत– अस्ति कश्चित् पार्थिवत्वादिस्वभावः पुरुषादीनां केशनखादिष्वनुवर्तमानो गोमयादीनां च वृश्चिकादिष्विति। ब्रह्मणोऽपि तर्हि सत्तालक्षणः स्वभाव आकाशादिष्वनुवर्तमानो दृश्यते।

विलक्षणत्वेन च कारणेन ब्रह्मप्रकृतिकत्वं जगतो दूषयता किमशेषस्य ब्रह्मस्वभावस्याननुवर्तनं विलक्षणत्वमभिप्रेयते, उत यस्य कस्यचित्, अथ चैतन्यस्येति वक्तव्यम्[2]। प्रथमे विकल्पे

प्रकटार्थविवरणम्

तत्रापि सलक्षणयोरेव कार्यकारणभाव इति नानैकान्तिकत्वमित्याह—**नन्वचेतनान्येवेति**।। यद्यप्यचेतनं शरीरं कारणं तथापि तच्चेतनस्याधिकरणं, न केशनखादीत्यस्त्येव वैलक्षण्यमित्याह—**उच्यत इति**।। किञ्चाचेतनत्वे समानेऽपि परिणामकृतो महान् विशेषोऽस्तीत्याह—**महांश्चायमिति**।। विपक्षे बाधकमाह—**अत्यन्तसारूप्ये चेति**।। पुनः दृष्टान्तवैषम्यमाशङ्क्य साम्यमाह—**अथोच्येतास्तीत्यादिना**।।

पूर्वं साधारणस्यैव हेतोः दूषणमुक्त्वा अर्थविशेषे दोषविशेषं वक्तुं विकल्पयति—**विलक्षणत्वेन चेत्यादिना**।। समस्तस्य ब्रह्मस्वभावस्याननुवर्तनात् जगत् ब्रह्मप्रकृतिकं न भवतीत्येवं वदता सर्वथा साम्ये प्रकृतिविकारभाव इत्युक्तं स्यात्। तदसङ्गतमित्याह—**प्रथमे विकल्प इति**।। द्वितीयतृतीययोरसिद्धिदृष्टान्ताभावौ। न मृदादिर्दृष्टान्तः, परस्यासिद्धेः। सर्वेष्वपि

भाष्यभावप्रकाशिका

भवति, किन्तु कारणगतासाधारणधर्माननुगमो वैलक्षण्यमित्याशङ्क्याह—**महांश्चायमिति**।। सालक्षण्यं कारणधर्माणां सर्वेषामनुगमः, किं वैकस्य कारणस्वभावस्यानुगम इति विकल्प्य न तावदाद्य इत्याह—**अत्यन्तेति**।। द्वितीयपक्षमवलम्बते—**अथोच्येतेति**।। परिहरति—**ब्रह्मणोऽपीति**।। इदानीं वैलक्षण्यं विकल्प्य दूषयति—**विलक्षणत्वेन चेति**।।

न्यायनिर्णयः

नियमभङ्गे हेतुमाह—**दृश्यते हीति**। दृष्टान्ते वैलक्षण्यमसिद्धमिति शङ्कते—**नन्विति**। तत्राचेतनानां कार्यकारणभावमभ्युपेत्यैव वैलक्षण्यं साधयति—**उच्यत इति**। ईदृशं वैलक्षण्यमविवक्षितम्, कारणगतासाधारणधर्माननुगतिरूपं तु तदिष्टमित्याशङ्क्याह—**महांश्चेति**। पारिणामिकः तत्तत्केशादिगतपरिणामात्मक इति यावत्। रूपादीत्यादिशब्देन परिमाणादि परिगृह्यते। किंच वैलक्षण्यात् प्रकृतिविकृतित्वं प्रत्याचक्षाणः सालक्षण्यात् तदिच्छति। तच्च कारणधर्माणां सर्वेषामनुगमो वा कस्यचिदेव वा कारणस्वभावस्येति विकल्प्याद्ये दोषमाह—**अत्यन्तेति**। द्वितीयमुत्थापयति—**अथेति**। तर्हि जगद्ब्रह्मणोरपि किंचित्स्वभावानुगतिरूपसारूप्यसंभवान्न प्रकृतिविकृतित्वप्रत्याख्यानमित्याह—**ब्रह्मणोऽपीति**।

प्रकृतिविकृतित्वहेतुं सालक्षण्यं विकल्प्य दूषयित्वा तदभावहेतुं वैलक्षण्यं विकल्पयति—**विलक्षणत्वेनेति**। आद्यमप्रयोजकत्वेन प्रत्याचष्टे—**प्रथम इति**। अस्तु समस्तस्य ब्रह्मस्वभावस्य जगत्यननुवर्तनम्, अस्तु च जगतो ब्रह्मप्रकृतिकत्वम्, का हानिः। न च जगतो ब्रह्मप्रकृतिकत्वे समस्ततत्स्वभावस्य जगत्यनुवर्तनानुपपत्तिः, सर्वस्यापि कार्ये सर्वकारणरूपानुवृत्तावसति विशेषे

१. 'रूपादि' इति पा.। २. ब्रह्मविलक्षणत्वं किं ब्रह्मनिष्ठधर्मवृत्तियावत्त्वावच्छिन्नप्रतियोगिताकाभाववत्त्वम्, उत ब्रह्मनिष्ठधर्मत्वावच्छिन्नप्रतियोगिताकाभाववत्त्वम्, अथवा ब्रह्मनिष्ठचैतन्याभाववत्त्वमिति विकल्पाभिप्रायः।

समस्तप्रकृतिविकारोच्छेदप्रसङ्गः। न ह्यसत्यतिशये प्रकृतिर्विकार[1] इति भवति। द्वितीये चासिद्धत्वम्। दृश्यते हि सत्तालक्षणो ब्रह्मस्वभाव आकाशादिष्वनुवर्तमान इत्युक्तम्। तृतीये तु दृष्टान्ताभावः। किं हि यच्चैतन्येनानन्वितं तदब्रह्मप्रकृतिकं दृष्टमिति ब्रह्मवादिनं प्रत्युदाह्रियेत। समस्तस्य वस्तुजातस्य ब्रह्मप्रकृतिकत्वाभ्युपगमात्। आगमविरोधस्तु प्रसिद्ध एव, चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेत्यागमतात्पर्यस्य प्रसाधितत्वात्। यत्तूक्तं परिनिष्पन्नत्वाद् ब्रह्मणि प्रमाणान्तराणि संभवेयुरिति, तदपि मनोरथमात्रम्। रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षस्य गोचरः। लिङ्गाद्यभावाच्च नानुमानादीनाम्। आगममात्रसमधिगम्य एव त्वयमर्थो, धर्मवत्। तथा च श्रुतिः–'नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ' (का.उ. १।२।९) इति। 'को अद्धा वेद क इह प्रवोचत्'। 'इयं विसृष्टिर्यत आबभूव' (ऋ.सं. १०।१२९।६,७) इति चैते ऋचौ सिद्धानामपीश्वराणां दुर्बोधतां जगत्कारणस्य दर्शयतः। स्मृतिरपि भवति–'अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्' इति। 'अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते' (भ.गी. २।२५)

प्रकटार्थविवरणम्

पक्षेष्वागमविरोधः स्पष्ट इत्याह—**आगमविरोधस्त्विति**।। परोक्तमनूद्य पूर्वोक्तमेव स्मारयति—**यत्तूक्तमित्यादिना**।। आपनेया आधेया। अन्येन वेदानुसारिणा आचार्येण प्रोक्ता ब्रह्ममतिः सम्यगापरोक्ष्यफलाय[क्ष्यज्ञानाय] भवति। भोः प्रेष्ठ प्रियतम। अद्धा साक्षात्। स्वयमेवागमनिरपेक्षतया को वेदेमम्; को वाऽस्मिन्नर्थे प्रवक्ता स्यात् इयं विचित्रा सृष्टिर्यत आविर्भूतेत्यर्थः।

भाष्यभावप्रकाशिका

तृतीये त्वसाधारणानैकान्तिकतेत्याह—**तृतीये त्विति**।। तमेव दर्शयति—**किं हीति**।। घटेश्वरसम्बन्धे[न्धस्ये]श्वरकार्यत्वात् तद्व्यावृत्त्यर्थं द्रव्यत्वे सत्यचेतनत्वादिति हेतुर्विशेषणीयः। तत्र व्यर्थविशेष्यता तावदास्ताम्, तथा सति दृष्टान्ताभावः, अविद्याद्रव्यस्यापि तेनाभ्युपगमादिति भावः।। इदानीमनुमानस्य कालात्ययापदिष्टतामाह—**आगमविरोधस्त्विति**।। किञ्च मानान्तरविषयतामङ्गीकृत्यैतदवोचाम, सैव च नास्तीत्याह—**यत्तूक्तमित्यादिना**।। यथा कार्यत्वाविशेषेऽपि "आरोग्यकामः पथ्यमश्नीयात्" "स्वर्गकामो यजेते" त्येकस्य मानान्तरयोग्यत्वम् नेतरस्य; एवं भूतत्वाविशेषेऽपीति भावः।। अत्र किं प्रमाणमिति? तदाह—**नैषेति**।। आपनेया आपादनीया। अथवा आपनेया निराकार्येत्यर्थः। अन्येनैव वेदविदा।। ननु भावानामचिन्त्यत्वमुक्तम्, न तु ब्रह्मण इति, तत्राह—**अव्यक्तोऽयमिति**।

न्यायनिर्णयः

प्रकृतिविकृतित्वासिद्धेरित्युक्तमुपपादयति—**न हीति**। मध्यमकल्पमसिद्ध्या निरस्यति—**द्वितीये चेति**। अन्तिममसाधारणत्वेन निराकरोति—**तृतीये त्विति**। दृष्टान्ताभावमेव स्पष्टयति—**किं हीति**। आकाशादेर्दृष्टान्तत्वमाशङ्क्याह—**समस्तस्येति**। पक्षत्रयेऽपि साधारणं कालातीतत्वमाह—**आगमेति**। ब्रह्मणो मानान्तरगम्यत्वमङ्गीकृत्योक्तम्, तदपि नास्तीत्युक्तानुवादपूर्वकमाह—**यत्त्विति**। यथा कार्यत्वाविशेषेऽपि 'आरोग्यकामः पथ्यमश्नीयात्' 'स्वर्गकामो यजेत'इत्यत्रैकस्य मानान्तरयोग्यत्वं नेतरस्येति स्वीकृतं तथा भूतत्वाविशेषेऽपि पृथिव्यादेर्मानान्तरगम्यत्वं ब्रह्मणस्त्वाम्नायैकगम्यतेति मन्वानः सन्नाह—**आगममात्रेति**। ब्रह्मणो मानान्तरायोग्यत्वे मानमाह—**तथा चेति**। ब्रह्मविषया मतिरेषा तर्केण नापनेया नापनीया। न प्रापणीयेत्यर्थः। यद्वा कुतर्केण नापनेया निरस्या न भवति। किं त्वन्येनैवाचार्येण वेदविदा प्रोक्ता सुज्ञानाय फलावसायिसाक्षात्काराय भवति। हे प्रेष्ठ प्रियतमेति नचिकेतसं प्रति मृत्योर्वचनम्। क इह ब्रह्म व्यवहारभूमावद्धा साक्षाद् वेद। को वा तत्रावोचत्। छान्दसो दैर्घ्यलोपः। छन्दसि कालानियमात् ब्रह्म प्रब्रूयादित्यर्थः। यतो यस्मात् परस्मादात्मनः सकाशादियं विसृष्टिर्विविधा सृष्टिर्बभूव स एव स्वरूपं वेद नान्य इति मन्त्रप्रतीकयोरर्थः। प्रतीकतो दर्शितयोर्मन्त्रयोस्तात्पर्यमाह—**एते इति**। ब्रह्मणस्तर्काद्यगोचरत्वे पौराणिकसंमतिमाह—**अचिन्त्या इति**। भावानामचिन्त्यत्वेन

१. 'प्रकृतिविकारभावः' 'प्रकृतिविकारः' इति पा.।

इति, 'न मे विदुः सुरगणाः प्रभवं न महर्षयः। अहमादिर्हि देवानां महर्षीणां च सर्वशः' (भ.गी. १०।२) इति चैवंजातीयका।

यदपि श्रवणव्यतिरेकेण मननं विदधच्छब्द एव तर्कमप्यादर्तव्यं दर्शयतीत्युक्तम्। नानेन मिषेण शुष्कतर्कस्यात्रात्मलाभः संभवति। श्रुत्यनुगृहीत एव ह्यत्र तर्कोऽनुभवाङ्गत्वेनाश्रीयते—स्वप्नान्तबुद्धान्तयोरुभयोरितरेतरव्यभिचारादात्मनोऽनन्वागतत्वं, संप्रसादे च प्रपञ्चपरित्यागेन सदात्मना संपत्तेर्निष्प्रपञ्चसदात्मत्वं, प्रपञ्चस्य ब्रह्मप्रभवत्वात् कार्यकारणानन्यत्वन्यायेन ब्रह्माव्यतिरेक इत्येवंजातीयकः।

प्रकटार्थविवरणम्

मिषेण मननविधानव्याजेनेत्यर्थः।। **शुष्कतर्कस्येति**।। प्रमाणाश्रयणविधुरस्येत्यर्थः। श्रुत्या तत्त्वे प्रतिपादिते अनु पश्चात् पुरुषदोषनिरासाय गृहीतः श्रुत्यनुगृहीतः। कोऽसावित्याशङ्क्याह—**स्वप्नान्तेत्यादिना**।। अवस्थावत्त्वेन जीवस्य ब्रह्मत्वासंभवाशङ्कायां स्वप्नजागरितयोः परस्परव्यभिचारित्वादात्मनः स्वाभाविकधर्मत्वे तदयोगादवस्थाद्वयेनात्मनोऽसंपृक्तत्वम्; देहादिप्रपञ्चतादात्म्येन भासमानस्य न कदाचिन्निष्प्रपञ्चात्मता संभवतीत्यसंभवाशङ्कापाकरणाय सुषुप्तोपन्यासः; द्वैतग्राहकप्रमाणविरोधात् अद्वितीयात्मताऽसंभवाशङ्कायां तज्जत्वादिहेतुना ब्रह्मव्यतिरिक्तवस्त्वभाव इत्येवंरूप एव तर्क आश्रीयत इत्यर्थः। इतश्च न

भाष्यभावप्रकाशिका

यदि स्मृत्यागमसिद्धं ब्रह्मणस्तर्काविषयत्वम्, कथं तर्हि श्रवणातिरिक्तमननविधानमिति? अत आह—**यदपीति**।। प्रमाणविषयविवेचकतया तदितिकर्तव्यताभूतस्तर्कस्तदनुग्राहकोऽसति प्रमाणान्तरेऽनुग्राह्ये निरालम्बनतया शुष्को नाश्रीयते, आगमप्रमाणाश्रया तु तद्विषयासंभावनाविपरीतभावनाप्रतिबन्धनिरसनेनोपयुज्यत इति स एव "मन्तव्य" इति विधीयते इत्याह—**नानेनेति**।। **श्रुत्यनुगृहीत इति**।। श्रुत्याऽऽकाङ्क्षितत्वादबाधित इत्यर्थः। कथमेतदवगम्यत इत्याशङ्कायां तत्प्रकरणे तादृशस्योक्तत्वादित्याह—**स्वप्नान्तेति**।। **अनन्वागतत्वमिति**।। स्वप्नाद्यवस्थाभ्योऽस्य पृथक्त्वमुदासीनत्वमित्यर्थः। संप्रसादावस्थोपन्यासेनात्मनो निष्प्रपञ्चब्रह्मप्राप्तिसंभावनां दर्शयति श्रुतिरित्याह—**संप्रसादे चेति**।। ब्रह्मणः कारणत्वप्रतिपादकश्रुतीनामभेदोपपादने तात्पर्यमित्याह—**प्रपञ्चस्येति**।। सूत्रकाराभिप्रायादप्येवंभूतस्तर्कः स्वीकर्तव्यः; न तु शुष्कतर्क इत्याह—**तर्काप्रतिष्ठानादिति**।। जगत् ब्रह्मकार्यं न भवति, चैतन्येनाननुगतत्वादित्ययं हेतुरसाधारणानैकान्तिकः सपक्षाननुगमादित्युक्तम्।

न्यायनिर्णयः

तर्कागोचरत्वेऽपि ब्रह्मणि किमायातमित्याशङ्क्य भगवद्वाक्यमुदाहरति—**अव्यक्तोऽयमिति**। कथमविकार्योऽयमित्याशङ्क्य जन्ममरणयोर्मानाभावादित्याह—**न म इति**। तेषामीश्वरप्रभवाप्रमितिकर्तृत्वे हेतुमाह—**अहमिति**।

श्रुतिस्मृतिभ्यां ब्रह्मणस्तर्काविषयत्वे सिद्धे कथं श्रवणातिरिक्तमननविधानमित्याशङ्कामनुवदति—**यदपीति**। मननविधानसामर्थ्यात् तर्कमात्रस्य ब्रह्मण्यनुप्रवेशो विवक्षितः, श्रुत्यनुगृहीतस्य वेति विकल्प्याद्यं दूषयति—**नानेनेति**। **मिषेण** मननविधिव्याजेनेति यावत्। अनुग्राह्यमानहीनतया निरालम्बनत्वं तर्कस्य शुष्कत्वम्। तत्र हेतुं वदन् द्वितीयमङ्गीकरोति—**श्रुतीति**। श्रुत्यनुग्राहको हि तर्कस्तद्विषयासंभावनादिप्रतिबन्धप्रध्वंसेन ब्रह्मण्यनुभवाङ्गम्। तदननुगृहीतस्तु निरालम्बनत्वान्नात्रोपयुज्यते। तथा च तर्कमात्रस्यात्राप्रवेशात् तर्कविशेषस्य च श्रुतिद्वाराऽनुप्रवेशाविरोधात् तर्कागोचरत्वं मननविधानं चेत्यर्थः। श्रुत्याकाङ्क्षितं तर्कमेव मननविधिविषयमुदाहरति—**स्वप्नान्तेति**। स्वप्नजागरितयोर्मिथो व्यभिचारादात्मनः स्वभावतस्तद्वत्त्वाभावादवस्थाद्वयेन तस्य स्वतोऽसंपृक्तत्वम्। अतो जीवस्यावस्थावत्त्वेन नाब्रह्मत्वमित्यर्थः[1]। तथापि देहादितादात्म्येनात्मनो भानान्न निष्प्रपञ्चब्रह्मतेत्याशङ्क्याह—**संप्रसादे चेति**। 'सता सोम्य तदा संपन्नो भवति' इति श्रुतेः सुषुप्ते निष्प्रपञ्चसदात्मत्वावगमादात्मनस्तथाविधब्रह्मत्वसिद्धिरित्यर्थः। द्वैतग्राहिप्रत्यक्षादिविरोधात् कथमात्मनोऽद्वितीयब्रह्मत्वमित्याशङ्क्य तज्जत्वादिहेतुना ब्रह्मातिरिक्तवस्त्वभावसिद्धेरध्यक्षादीनामतत्त्वावेदकप्रामाण्यादविरोधाद् युक्तमात्मनोऽद्वितीयब्रह्मत्वमित्याह—**प्रपञ्चस्येति**। ब्रह्मणि सावकाशं तर्कं दर्शयित्वा श्रुत्यननुगृहीततर्कस्य तस्मिन्ननवकाशत्वं

१. अवस्थावत्त्वेनाब्रह्मत्वं यच्छङ्कितं तन्नेत्यर्थः।

'तर्काप्रतिष्ठानात्' (ब्र.सू. २।१।११) इति च केवलस्य तर्कस्य विप्रलम्भकत्वं दर्शयिष्यति।

योऽपि चेतनकारणश्रवणबलेनैव समस्तस्य जगतश्चेतनतामुत्प्रेक्षते, तस्यापि 'विज्ञानं चाविज्ञानं च' (तै.उ. २।६) इति चेतनाचेतनविभागश्रवणं विभावनाविभावनाभ्यां चैतन्यस्य शक्यत एव योजयितुम्। परस्यैव त्विदमपि विभागश्रवणं न युज्यते। कथम्? परमकारणस्य ह्यत्र समस्तजगदात्मना समवस्थानं श्राव्यते 'विज्ञानं चाविज्ञानं चाभवत्' इति। तत्र यथा चेतनस्याचेतनभावो नोपपद्यते विलक्षणत्वात्, एवमचेतनस्यापि चेतनभावो नोपपद्यते। प्रत्युक्तत्वात्तु विलक्षणत्वस्य यथाश्रुत्येव चेतनं कारणं ग्रहीतव्यं भवति।।६।।

प्रकटार्थविवरणम्

मन्तव्यश्रुत्या शुष्कतर्कापेक्षणमित्याह—**तर्काप्रतिष्ठानादिति चेति**।। तस्मादतीन्द्रियेऽर्थे शुष्कतर्कस्याप्रवेशान्न तद्विरोधः समन्वयस्येति सिद्धान्तमुक्त्वा यदेकदेशिनो दूषणमुक्तं साङ्ख्येन न तत् तस्य; किन्तु सांख्यस्यैवेत्याह—**योऽपीत्यादिना**।। ननु स्वपक्षे "विज्ञानं चाविज्ञानं च" इति यथाश्रुतवैलक्षण्याभ्युपगमे कथमसिद्धिरित्याशङ्क्याह—**प्रत्युक्तत्वात्त्विति**।। असिद्धित्वाभावेऽप्यनैकान्तिकत्वेन परिहृतत्वादित्यर्थः।।

भाष्यभावप्रकाशिका

इदानीं घटः प्रकाशत इति प्रत्यक्षेण श्रुतार्थापत्त्या च चैतन्यानुगमावगमादसिद्धोऽयमित्याह—**योऽपीति**।। ननु अर्थापत्तेः साक्षाच्छ्रुतिविरोध उक्त इति, तत्राह—**तस्यापीति**। सावकाशनिरवकाशन्यायेन विभागश्रुतिः सावकाशा निरवकाशार्थापत्त्या विभावनाविभावनविषयतया व्यवस्थाप्यत इत्यर्थः। एवं स्वमते विभागश्रुतिविरोधं परिहृत्य प्रधानकारणवादे तं दर्शयति—**परस्यैवेति**।। ननु गुणानामविज्ञानात्मकत्वम्, विज्ञानात्मा च पुरुष इति विभागोऽभ्युपगम्यत एवेत्याक्षिपति—**कथमिति**।। विभागासंभवं वक्तुं श्रुत्यभिप्रेतार्थमाह—**परमकारणस्येति**।। भवतु परमकारणस्यैव प्रधानस्य तथाऽवस्थानमिति, तत्राह—**तत्र यथेति**।। ननु भवतोऽपि चेतनस्याचेतनभावोऽनुपपन्न इत्याशङ्क्य चेतनस्यापि सुषुप्त्याद्यवस्थास्विवाविभावितचैतन्यत्वं कारणस्योपपादितमित्याह—**प्रत्युक्तत्वादिति**।। अथवा—वैलक्षण्ये कार्यकारणभावो नास्तीत्यभ्युपेत्यैतदुक्तम्, परमार्थतस्त्वचेतनस्यापि चेतनकार्यत्वं न विरुध्यत इत्याह—**प्रत्युक्तत्वादिति**।। हेतोर्व्यभिचारित्वस्य गोमयवृश्चिकादौ प्रदर्शितत्वादित्यर्थः।।६।।

न्यायनिर्णयः

सूत्रकृतोऽपि संमतमित्याह—**तर्केति**। विप्रलम्भकत्वमर्थविशेषाव्यवस्थापकत्वम्। ब्रह्मणि निरालम्बनस्य तर्कस्याप्रवृत्तेः, श्रुत्यनुगृहीतस्य प्रवृत्तावपि जगन्न ब्रह्मकार्यं चैतन्येनाननुगतत्वादित्यस्य श्रुत्यनुगृहीतत्वाभावात्[1] तद्विरोधिनो न प्रवृत्तिरित्युक्तम्।

इदानीं 'घटः प्रकाशत' इति प्रत्यक्षेण श्रुतार्थापत्त्या च जगतश्चैतन्यानुगमावगमादसिद्धं चैतन्येनाननुगतत्वमित्याह—**योऽपीति**। श्रुतार्थापत्तेः श्रुतिविरोधे नास्ति मानतेत्युक्तमाशङ्क्याह—**तस्यापीति**। सावकाशानवकाशन्यायेन सावकाशा विभागश्रुतिरनवकाशार्थापत्त्या विभावनाविभावनविषयतया व्यवस्थापनीयेत्यर्थः। स्वमते विभागश्रुतिविरोधं समाधाय प्रधानवादे तद्विरोधमाह—**परस्येति**। घटः स्फुरतीति प्रत्यक्षसंग्रहार्थमपीत्युक्तम्। सत्त्वरजस्तमसामज्ञानात्मकत्वात् पुरुषस्य चातदात्मकत्वादस्मन्मते विभागश्रुतेर्नानुपपत्तिरिति शङ्कते—**कथमिति**। उक्तरीत्या विभागासंभवं वक्तुं श्रुत्यभिमतमर्थमाह—**परमकारणस्येति**। प्रधानस्यैव मूलकारणत्वादशेषजगदात्मनाऽवस्थानमित्याशङ्क्याह—**तत्रेति**। विभागश्रवणे सतीति यावत्। तर्हि त्वन्मतेऽपि चेतनस्याचेतनभावानुपपत्तिस्तुल्येत्याशङ्क्य चेतनस्यापि कारणस्य स्वापादाविवानाविर्भावितचैतन्यत्वमुक्तमित्याह—**प्रत्युक्तत्वादिति**। यद्वा वैलक्षण्ये कार्यकारणत्वं नेत्युपेत्योक्तम्। वस्तुतस्त्वचेतनस्यापि चेतनकार्यत्वमविरुद्धम्, गोमयवृश्चिकादौ हेतोर्व्यभिचारस्योक्तत्वादित्याह—**प्रत्युक्तत्वादिति**।।६।।

---

१. 'अननुगृहीतत्वात्' इति मुद्रितः पाठः।

असदिति चेन्न प्रतिषेधमात्रत्वात्।।७।।

यदि चेतनं शुद्धं शब्दादिहीनं च ब्रह्म तद्विपरीतस्याचेतनस्याशुद्धस्य शब्दादिमतश्च कार्यस्य कारणमिष्येत, असत् तर्हि कार्यं प्रागुत्पत्तेरिति प्रसज्येत। अनिष्टं चैतत् सत्कार्यवादिनस्तवेति चेत्, नैष दोषः। प्रतिषेधमात्रत्वात्। प्रतिषेधमात्रं हीदम्, नास्य प्रतिषेधस्य प्रतिषेध्यमस्ति। न ह्ययं प्रतिषेधः प्रागुत्पत्तेः सत्त्वं कार्यस्य प्रतिषेद्धुं शक्नोति। कथम्? यथैव हीदानीमपीदं कार्यं कारणात्मना सदेवं प्रागुत्पत्तेरपीति गम्यते। न हीदानीमपीदं कार्यं कारणात्मानमन्तरेण स्वतन्त्रमेवास्ति। 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद' (बृ.उ. २।४।६) इत्यादिश्रवणात्। कारणात्मना तु सत्त्वं कार्यस्य प्रागुत्पत्तेरविशिष्टम्। ननु शब्दादिहीनं ब्रह्म जगतः कारणम्। बाढम्। न तु शब्दादिमत् कार्यं कारणात्मना हीनं प्रागुत्पत्तेरिदानीं

प्रकटार्थविवरणम्

असदिति चेन्न प्रतिषेधमात्रत्वात्।। वैलक्षण्याभ्युपगमेऽपसिद्धान्तमापादयति—**यदि चेतनमित्यादिना।।** स्वरूपेणानिर्वाच्यस्य कार्यस्य कारणतादात्म्येन तत्सत्तया सत्त्वमिति हि सत्कार्यवादोऽस्मदिष्टः। तस्य न काचित् क्षतिर्वैलक्षण्येऽपीत्याह—**नैष दोष इत्यादिना।।** कारणतादात्म्यमपि न संभाव्यते, विरुद्धधर्माक्रान्तत्वादित्याह—**ननु शब्दादिहीनमिति।।** शुक्तिरूप्ययोर्विरुद्धरूपत्वेऽपि यथा मिथ्या तादात्म्यं तथाऽत्रापि भविष्यति, कल्पितस्वातन्त्र्यादर्शनादित्याह—**बाढमित्यादिना।।**

भाष्यभावप्रकाशिका

असदिति चेन्न प्रतिषेधमात्रत्वात्।।७।। सत्कार्यवादिभिः कार्यस्य कारणेऽवस्थानमङ्गीक्रियते, तदयुक्तम्; कार्यकारणयोर्विरुद्ध-स्वभावत्वात्, अतः कारणात्मना प्रागवस्थानाभावादसत्त्वमुत्पत्तेः प्राक् कार्यस्याभ्युपगन्तव्यमित्याह—**यदीति।।** ननु कथं प्रतिषेध्याभावः? उत्पत्तेः प्राक् सत्त्वस्य प्रतिषेध्यत्वादिति, अतः आह—**न ह्ययमिति।।** किं कार्यस्य कारणात्मना यत्सत्त्वम्, तत्प्रतिषिध्यते, किं वा सत्त्वान्तरमिति विकल्प्य, आद्ये दूषणमाह—**यथैवेति।।** कारणात्मकसत्त्वस्य सदा भावादित्यर्थः। द्वितीयपक्षे दूषणमाह—**न हीदानीमिति।।** कारणसत्त्वव्यतिरेकेण सत्त्वान्तराभावे प्रमाणमाह—**सर्वं तमिति।।** अनवगतपराभिप्रायःशङ्कते—**ननु शब्दादि[हीनमि]ति।।** तेन शब्दादिमत् जगदसदेव जायत इत्याशयः। तथापि शब्दाद्यात्मककार्यस्य ब्रह्मणि परिकल्पितत्वान्न पृथक् सत्त्वमिति परिहरति—**बाढमिति।।** ननु कल्पितत्वमेवासिद्धमिति, तत्राह—**विस्तरेणेति।।७।।**

न्यायनिर्णयः

असत्कार्यवादापत्तिमाशङ्क्य परिहरति—**असदिति चेदिति।** तत्र चोद्यं विवृणोति—**यदीति।** कार्यकारणयोर्विरुद्ध[स्वभाव]त्वात् कारणात्मना प्रागनवस्थानात् कार्यस्य प्रागसत्त्वं स्यादित्यर्थः। इष्टापत्तिमाशङ्क्य निराचष्टे—**अनिष्टं चेति।** कार्यासत्त्वमेतच्छब्दार्थः। तत्र हेतुं सूचयति—**सत्कार्यवादिन इति।** चेतनकार्यस्य कारणेऽवस्थानस्वीकारादित्यर्थः। नेत्यादि व्याकुर्वन् परिहरति—**नैष दोष इति।** प्राक्कालीनकार्यसत्त्वस्य प्रतिषेध्यत्वात् तदभावासिद्धिरित्याशङ्क्याह—**न हीति।** यथेह घटो नास्तीति घटसंसर्गसत्ता भूतले वर्तमानकाले निषिध्यते तथा प्रागसदिति कार्यस्य प्राक्कालीनं सत्त्वं शक्यं निषेद्धुमिति शङ्कते—**कथमिति।** कार्यस्य कारणात्मना सत्त्वं वा निषेध्यं, सत्त्वान्तरं वा? नाद्य इत्याह—**यथैवेति।** कारणात्मना सत्त्वस्य सदातनत्वान्न निषेध्यतेत्यर्थः। द्वितीयं प्रत्याह—**न हीति।** कारणसत्त्वातिरिक्तसत्त्वाभावे मानमाह—**सर्वमिति।** सत्यं कारणात्मनैव कार्यस्य सत्त्वं, तदेव कालविशेषे निषेध्यमित्या-शङ्क्याह—**कारणात्मनेति।** किं तदा कार्यं नास्ति, किं वा कारणमपि। नाद्यः, सदापि तस्य कारणातिरिक्तस्यासत्त्वाद् विशेषण-वैयर्थ्यम्। न द्वितीयः, तस्य सर्वदा सत्त्वान्निषेधानवकाशादित्यर्थः। उक्तमभिप्रायमविद्वान् मिथो विरुद्धयोरैक्यायोगादसदेव शब्दादि-मज्जगज्जायत इति शङ्कते—**नन्विति।** ब्रह्मणः शब्दादिहीनत्वमङ्गीकृत्य परिहरति—**बाढमिति।** तर्हि प्रागसदेव शब्दादिमज्जगदिदानीं जायते, नेत्याह—**न त्विति।** ब्रह्मणः शब्दादिहीनत्वे शब्दाद्यात्मकस्य जगतो ब्रह्मणि कल्पितत्वान्न सत्त्वं वास्तवं पृथगस्तीत्यर्थः।

वाऽस्ति। तेन न शक्यते वक्तुं प्रागुत्पत्तेरसत् कार्यमिति। विस्तरेण चैतत् कार्यकारणानन्यत्ववादे वक्ष्यामः।।७।।

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्।।८।।

अत्राह—यदि स्थौल्यसावयवत्वाचेतनत्वपरिच्छिन्नत्वाशुद्ध्यादिधर्मकं कार्यं ब्रह्मकारणकमभ्युपगम्येत, [1]तदपीतौ प्रलये प्रतिसंसृज्यमानं कार्यं कारणाविभागमापद्यमानं कारणमात्मीयेन धर्मेण दूषयेदित्यपीतौ कारणस्यापि ब्रह्मणः कार्यस्येवाशुद्ध्यादिरूपप्रसङ्गात् सर्वज्ञं ब्रह्म जगत्कारणमित्यसमञ्जसमिदमौपनिषदं दर्शनम्। अपि च समस्तस्य विभागस्याविभागप्राप्तेः पुनरुत्पत्तौ नियमकारणाभावाद् भोक्तृभोग्यादिविभागेनोत्पत्तिर्न प्राप्नोतीत्यसमञ्जसम्। अपि च भोक्तृणां परेण ब्रह्मणाऽविभागं गतानां कर्मादिनिमित्तप्रलयेऽपि पुनरुत्पत्तावभ्युपगम्यमानायां मुक्तानामपि पुनरुत्पत्तिप्रसङ्गादसमञ्जसम्। अथेदं जगदपीतावपि विभक्तमेव परेण ब्रह्मणाऽवतिष्ठेत, एवमप्यपीतिश्च न संभवति, कारणाव्यतिरिक्तं च कार्यं न संभवतीत्यसमञ्जसमेवेति।।८।।

प्रकटार्थविवरणम्

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्।। असत्कार्यवादपरिहाराय कार्यस्य कारणतादात्म्यं चेदिष्यते तर्ह्यनिष्टान्तरमापद्यते, कारणसत्तया कार्यसत्त्ववत् कार्याशुद्धत्वेन कारणस्याशुद्धत्वप्रसङ्गादित्याह—**अत्राहेत्यादिना**।। सूत्रस्य योजनान्तरमाह—**अपि च समस्तस्येति**।। तद्वत्प्रसङ्गादिति कारणवत् सर्वस्यैकरूप्यप्रसङ्गादित्यर्थः। प्रकारान्तरमाह—**अपि च भोक्तृणामिति**।। उक्तदोषभयादविभागानभ्युपगमे दोषान्तरमाह—**अथेदं जगदपीतावपीति**।।

भाष्यभावप्रकाशिका

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्।।८।। **आत्मीयेन धर्मेण दूषयेदिति**।। यथा क्षीरे संसृज्यमानमुदकं स्वधर्मेण तद् दूषयति, यथा वोदके संसृज्यमानं लवणमुदकं दूषयेत् [यति], तद्वदित्यर्थः। कल्पान्तरेणासामञ्जस्यमाह—**अपि चेति**।। समुद्रस्य फेनोर्मिबुद्बुदादिपरिणामे, रज्ज्वाःसर्पधारादिविभ्रमे वा यथाऽनियमः, क्रमानियमश्च; तद्वत् स्यादित्यर्थः। प्रकारान्तरेणासामञ्जस्यमाह—**अपि च भोक्तृणामिति**।। **कर्मादिनिमित्तप्रलय इति**।। कर्मादीनां निमित्तानां प्रलय इत्यर्थः। निमित्ताभावेऽप्युत्पत्तौ मुक्तानामपि जन्मप्रसङ्ग इत्याह—**पुनरुत्पत्ताविति**।। कल्पनान्तरं शङ्कापूर्वकमाह—**अथेदमिति**।। इमामाशङ्कां सूत्रयोजनया परिहरति—

न्यायनिर्णयः

कल्पितत्वमेव जगतो ब्रह्मणीति स्थिते फलितमाह—**तेनेति**। जगतो ब्रह्मणि कल्पितत्वमसंप्रतिपन्नमित्याशङ्क्याह—**विस्तरेणेति**।।७।।

जगद्ब्रह्मणोरुक्तं कार्यकारणत्वममृष्यमाणश्चोदयति—**अपीताविति**। पूर्वपक्षसूत्रं व्याकरोति—**अत्रेत्यादिना**। जगतो ब्रह्मकारणत्वं सप्तम्यर्थः। तमेवोक्तिप्रकारं प्रकटयति—**यदीति**। अशुद्ध्यादीत्यादिशब्देन रागद्वेषादिग्रहणम्। तदपीतावित्यत्र तत्पदं कार्येण संबध्यते। प्रतिसंसृज्यमानमित्यस्यार्थमाह—**कारणेति**। यथा क्षीरे संसृज्यमानमुदकं स्वधर्मेण क्षीरं दूषयति, यथा वा लवणमुदके संबध्यमानमुदकं दूषयेत् तथा कार्यमपि कारणे युज्यमानं स्वधर्मेण कारणं दूषयतीत्याह—**कारणमिति**। कार्यसमानधर्मवत्त्वे ब्रह्मणः स्वीकृते फलितमाह—**इत्यपीताविति**। सूत्रस्य व्याख्यान्तरमाह—**अपि चेति**। सर्वस्य कार्यस्य प्रलये कारणवदैकरूप्यप्रसङ्गात् पुनर्विभागेनोत्पत्तौ हेत्वभावात् तदप्राप्तिरित्यसामञ्जस्यमित्यर्थः। प्रकारान्तरेणासामञ्जस्यमाह—**अपि चेति**। कर्मादीनां पुनरुत्पत्तिनिमित्तानां लये सत्यपीति यावत्। प्रलयावस्थायां कर्मादिप्रलये निमित्तमन्तरेणापि पुनर्भोक्तृणामुत्पत्तौ तद्वदेव मुक्तानामपि पुनर्जन्मप्रसङ्गादसमञ्जसमिदं दर्शनमित्यर्थः। शङ्कापूर्वकं व्याख्यान्तरमाह—**अथेति**। स्थिताविवेत्यपेरर्थः। ब्रह्मवादिनामित्थमनङ्गीकारं सूचयितुमेवमपीत्युक्तम्।

---

१. 'तदाऽपीतौ' इति पा.।

अत्रोच्यते-

न तु दृष्टान्तभावात्।।९।।

नैवास्मदीये दर्शने किंचिदसामञ्जस्यमस्ति। यत्तावदभिहितं कारणमपिगच्छत् कार्यं कारणमात्मीयेन धर्मेण दूषयेदिति, तददूषणम्। कस्मात्? दृष्टान्तभावात्। सन्ति हि दृष्टान्ता यथा कारणमपिगच्छत् कार्यं कारणमात्मीयेन धर्मेण न दूषयति। तद्यथा शरावादयो मृत्प्रकृतिका विकारा विभागावस्थायामुच्चावचमध्यमप्रभेदाः सन्तः पुनः प्रकृतिमपिगच्छन्तो न तामात्मीयेन धर्मेण संसृजन्ति। रुचकादयश्च सुवर्णविकारा अपीतौ न सुवर्णमात्मीयेन धर्मेण संसृजन्ति। पृथिवीविकारश्चतुर्विधो भूतग्रामो न पृथिवीमपीतावात्मीयेन धर्मेण संसृजति। त्वत्पक्षस्य तु न कश्चिद् दृष्टान्तोऽस्ति। अपीतिरेव हि न संभवेद् यदि कारणे कार्यं स्वधर्मेणैवावतिष्ठेत। अनन्यत्वेऽपि कार्यकारणयोः कार्यस्य कारणात्मत्वं, न तु कारणस्य कार्यात्मत्वम्, आरम्भणशब्दादिभ्यः इति वक्ष्यामः (ब्र. सू. २।१।१४)।

प्रकटार्थविवरणम्

दृष्टान्तबलेन परिहरति—**अत्रोच्यत इति**।।

न तु दृष्टान्तभावात्।। कार्यधर्मेण कारणं न संस्पृश्यत इत्यत्र वहवो दृष्टान्ताः सन्ति; स्पृश्यत इत्यत्र तु न कश्चिदपि दृष्टान्तोऽस्तीति भावः। ननु यथा हिङ्गुद्रव्यं मुद्गादौ क्षिप्तं तेनाविभागमापद्यमानं स्वगन्धेन तं दूषयति तथाऽस्त्वित्याशङ्क्याह—**अपीतिरेव हीति**।। हिङ्गुद्रव्यस्य स्वधर्मसहितस्य विद्यमानत्वात् भवेद् दूषकत्वं, न कार्य[कार्यं] प्रलये तथाऽस्तीत्यर्थः। ननु अभेदस्याविशिष्टत्वात् कारणसत्तया सत्त्ववत् स्यादित्याशङ्क्याह—**अनन्यत्वेऽपीति**।।

भाष्यभावप्रकाशिका

एवमपीति।। **तद्वदिति**।। स्थितिकालवल्लयाभावप्रसङ्गादित्यर्थः।।८।।

न तु दृष्टान्तभावात्।।९।। ननु भवत्वेवं दृष्टान्तः, तथापि विपरीतपक्षस्यापि कश्चिद् दृष्टान्तः स्यादिति, अत आह—**त्वत्पक्षस्येति**।। न च पूर्वोदाहृतानां क्षीरनीरादीनां दृष्टान्तता; तेषामकार्यकारणरूपत्वात् कारणे कार्यलयनिदर्शनत्वायोगादिति भावः। लयसमये कार्यधर्माणामवस्थाने कार्यस्यापि तदाश्रयतयाऽवस्थानाल्लय एव न स्यादिति, अत आह—**अपीतिरेवेति**।। ननु कारणाविभागे कार्यस्य यदि न धर्मावस्थानम्, तदा कारणस्यापि धर्मा न भवेयुः, अभेदाविशेषादिति, अत आह—**अनन्यत्वेऽपीति**।। यथा रजतस्यारोपितस्य परमार्थरूपं शुक्तिः, न तु शुक्ते रजतम्, एवमिदमपीत्यर्थः।

न्यायनिर्णयः

यदि लयकालेऽपि कार्यं कारणाद् विभक्तं तदा स्थितिकालवल्लयाभावप्रसङ्गादसमञ्जसमेवेदं ब्रह्मकारणत्वमित्यर्थः।।८।।

सिद्धान्तसूत्रमवतारयति—**अत्रेति**। तत्र तुशब्दस्यावधारणार्थत्वमुपेत्य प्रतिज्ञाभागं विभजते—**नैवेति**। तदेव दर्शयितुमादौ परोक्तमनुवदति—**यत्तावदिति**। कारणमपिगच्छत्, तस्मिन्नविभागमापद्यमानमिति यावत्। तस्यादोषत्वं प्रतिज्ञाय प्रश्नपूर्वकं हेतुमवतार्य व्याचष्टे—**तददूषणमिति**। दृष्टान्तानेव विभजते—**तद्यथेति**। विभागावस्था स्थितिकालः। पुनरिति प्रलयकालोक्तिः। चतुर्विधो भूतग्रामो जरायुजाण्डजस्वेदजोद्भिज्जरूपो भूतसमुदायः। अनेकदृष्टान्तोपादानं बुद्धिसौकर्यार्थम्। परपक्षस्यापि कश्चिद् दृष्टान्तो भविष्यतीत्याशङ्क्याह—**त्वत्पक्षस्येति**। क्षीरनीरादीनामकार्यकारणरूपत्वात् कारणे कार्यलये दृष्टान्तत्वासिद्धिरिति भावः। किंच लयकाले कार्यधर्मस्थितौ कार्यस्यापि धर्मिणः स्थितेर्लयासिद्धिः; कारणाश्रयत्वेन च तदवस्थाने स्फटिकलौहित्यवत् तद्धीर्भ्रान्तिः स्यादित्याह—**अपीतिरेवेति**। ननु प्रलयकाले कार्यधर्माश्चेन्नावतिष्ठेरन् न तर्हि कारणधर्मा अपि तिष्ठेयुस्तयोरभेदात्, तत्राह—**अनन्यत्वेऽपीति**। अधिष्ठानमेवारोपितस्य तत्त्वं, न विपरीतमित्यर्थः।

अत्यल्पं चेदमुच्यते कार्यमपीतावात्मीयेन धर्मेण कारणं संसृजेदिति। स्थितावपि हि समानोऽयं प्रसङ्गः, कार्यकारणयोरनन्यत्वाभ्युपगमात्। 'इदं सर्वं यदयमात्मा' (बृ.उ. २।४।६) 'आत्मैवेदं सर्वम्' (छा.उ. ७।२५।२), 'ब्रह्मैवेदममृतं पुरस्तात्' (मु.उ. २।२।११) 'सर्वं खल्विदं ब्रह्म' (छा.उ. ३।१४।१) इत्येवमाद्याभिर्हि श्रुतिभिरविशेषेण त्रिष्वपि कालेषु कार्यस्य कारणानन्यत्वं श्राव्यते। तत्र यः परिहारः– कार्यस्य तद्धर्माणां चाविद्याध्यारोपितत्वान्न तैः कारणं संसृज्यत इति, अपीतावपि स समानः। अस्ति चायमपरो दृष्टान्तो यथा स्वयं प्रसारितया मायया मायावी त्रिष्वपि कालेषु न संस्पृश्यते, अवस्तुत्वात्, एवं परमात्माऽपि संसारमायया न संस्पृश्यत इति। यथा च स्वप्नदृगेकः स्वप्नदर्शनमायया न संस्पृश्यत इति, प्रबोधसंप्रसादयोरनन्वागतत्वात्; एवमवस्थात्रयसाक्ष्येकोऽव्यभिचार्यवस्थात्रयेण व्यभिचारिणा न संस्पृश्यते। मायामात्रं ह्येतत्, यत्परमात्मनोऽवस्थात्रयात्मनाऽवभासनम्, रज्ज्वा इव सर्पादिभावेनेति। अत्रोक्तं वेदान्तार्थसंप्रदायविद्भिराचार्यैः–'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते। अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा' (गौड. का. १।१६) इति। तत्र यदुक्तमपीतौ कारणस्यापि कार्यस्येव स्थौल्यादिदोषप्रसङ्ग इति, एतदयुक्तम्।

प्रकटार्थविवरणम्

विशेषणमतितुच्छमित्याह—**अत्यल्पं चेदमिति**।। विवर्तवादानुसारेण दृष्टान्तमाह—**अस्ति चायमपर इति**।। **यत्परमात्मन इति**।। अविद्यया[द्यायां] प्रतिबिम्बिततयाऽऽपन्नजीवभावस्येत्यर्थः।। यदा मायावादे जीवस्यापि तत्त्वतोऽवस्थात्रयसंबन्धो नास्ति, तदा किं वक्तव्यम् परमात्मनः प्रपञ्चसंबन्धस्तत्त्वतो नास्तीत्याह—**तत्र यदुक्तमिति**।।

भाष्यभावप्रकाशिका

ननु इदमपि दूषणान्तरमेवेति, अत आह—**तत्र य इति**।। अविद्याध्यारोपिततया संस्पर्शाभावे दृष्टान्तमाह—**अस्ति चायमिति**।। मायाविनो निमित्तकारणत्वम्, नोपादानत्वम्, अतो नायमनुरूपो दृष्टान्त इत्याशङ्क्य, अनुरूपं दृष्टान्तमाह—**यथा च स्वप्नदृगिति**।। **प्रबोधसंप्रसादयोरनन्वागतत्वादिति**।। तयोरवस्थयोर्मायाया अननुगम्यमानत्वादित्यर्थः।। अवस्थात्रयेऽप्युत्पत्ति-[त्रयेत्युत्पत्ति]स्थितिप्रलयाः कथ्यन्ते।। उक्तमर्थमुपसंहरति—**तत्र यदुक्तमिति**।।

न्यायनिर्णयः

किंच कार्यमात्मीयेन धर्मेण कारणं दूषयतीत्यत्रापीतिविशेषणमनर्थकमित्याह—**अत्यल्पं चेति**। विशेषणवैयर्थ्ये हेतुमाह—**स्थिताविति**। प्रसङ्गसाम्ये हेतुः—**कार्येति**। अभ्युपगमस्य मानमूलतां दर्शयति—**इदमिति**। इदमपि दूषणान्तरमेवेत्याशङ्क्याह—**तत्रेति**। कार्यस्याविद्यया विद्यमानत्वात् तेन कारणस्य वस्तुतोऽसंस्पर्शे दृष्टान्तमाह—**अस्ति चेति**। तत्र मायाविनो वस्तुत्वेऽपि तदीयमायाया अवस्तुत्वादिति हेतुमाह—**अवस्तुत्वादिति**। दृष्टान्तनिविष्टमर्थं दार्ष्टान्तिके योजयति—**एवमिति**। विधान्तरेण सूत्रयोजनासमाप्तावितिशब्दः। मायाविनो मायां प्रत्यनुपादानत्वान्नेदमनुरूपमुदाहरणमित्याशङ्क्याह—**यथा चेति**। एकःअवस्थान्तरेऽपि स्वयमनुगच्छन्निति यावत्। तया तस्यासंस्पर्शे हेतुमाह—**प्रबोधेति**। जागरिते सुषुप्ते चानुगच्छतस्तस्य तयाऽननुगम्यमानत्वाभावादिति हेत्वर्थः। न हि स्वप्नदर्शनरूपा माया जागरादावनुवर्तमाना दृष्टेति भावः। चेतनोपादानत्वानुगुणं दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह—**एवमिति**। अवस्थात्रयमुत्पत्तिस्थितिप्रलयरूपम्। स्वप्नदर्शनं मायामात्रमिति वस्तुतस्तेनास्पर्शेऽपि परमात्मनोऽवस्थात्रयेण संस्पर्शो दुर्वारस्तस्य वस्तुत्वादित्याशङ्क्याह—**मायामात्रमिति**। अत्रापि सूत्रस्य विधान्तरेण योजनां विवक्षित्वेतिशब्दः। परमात्मनो वस्तुतोऽवस्थात्रयासंबन्धे वृद्धसंमतिमाह—**अत्रेति**। यदेत्याचार्यप्रतिबोधनावस्थोक्तिः। अजमित्युत्पत्त्यवस्थया स्पर्शशून्यत्वम्, अनिद्रमिति लयावस्थयाऽस्वप्नमिति स्थित्यवस्थया चेति विवेक्तव्यम्। अद्वैतमिति पूर्णतोक्तिः। परस्यावस्थात्रयासंबन्धे फलितमाह—**तत्रेति**।

यत्पुनरेतदुक्तं समस्तस्य विभागस्याविभागप्राप्तेः पुनर्विभागेनोत्पत्तौ नियमकारणं नोपपद्यत इति, अयमप्यदोषः; दृष्टान्तभावादेव। यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यामविभागप्राप्तौ मिथ्याज्ञानस्यानपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवत्येवमिहापि भविष्यति। श्रुतिश्चात्र भवति– 'इमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति' (छा.उ. ६।९।२,३) इति। यथा ह्यविभागेऽपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवदव्याहतः स्थितौ[1] दृश्यते, एवमपीतावपि मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते। एतेन मुक्तानां पुनरुत्पत्तिप्रसङ्गः प्रत्युक्तः। सम्यग्ज्ञानेन मिथ्याज्ञानस्यापोदितत्वात्। यः पुनरयमन्तेऽपरो विकल्प उत्प्रेक्षितः–अथेदं जगदपीतावपि विभक्तमेव परेण ब्रह्मणाऽवतिष्ठेतेति, सोऽप्यनभ्युपगमादेव प्रतिषिद्धः। तस्मात् समञ्जसमिदमौपनिषदं दर्शनम्।।९।।

प्रकटार्थविवरणम्

चोद्यान्तरनिराकरणेऽपि पुनः सूत्रं योजयति—**यत्पुनरेतदुक्तमित्यादिना**।।

भाष्यभावप्रकाशिका

दृष्टान्तोऽप्ययमसंप्रतिपन्न इत्याशङ्क्याह—**श्रुतिश्चात्रेति**।। सति संपन्नस्य पुनः पूर्ववद्विभागेनोत्पत्तिः कथमिति? अत आह—**त इहेति**।। ननु सुषुप्त्यवस्थायां "न किंचिदवेदिष"मिति परामृश्यमानस्याज्ञानस्य सद्भावात् तथैवोत्पत्तिः, प्रलयावस्थायां तु तथाभूताज्ञानसद्भावे प्रमाणाभावात् कथं विभागेनोत्पत्तिनियम इति? तत्राह—**यथा हीति**।। विभागशक्तेरविद्यावशेषलयस्य सुषुप्ताविवानुमीयमानत्वाद् अविद्याशक्तेर्नियतत्वाद् उत्पत्तिनियमो न विरुध्यत इत्यर्थः। **एतेनेति**।। मिथ्याऽज्ञानप्रतिबन्धविभाग-शक्तिप्रतिनियमप्रदर्शनेन तद्धीनानां मुक्तानां पुनरुत्पत्तिप्रसङ्गो निराकृतः; कारणाभावे कार्याभावादित्यर्थः।।९।।

न्यायनिर्णयः

उक्तमसामञ्जस्यान्तरमनुवदति—**यत्पुनरिति**। न त्वित्यादिसूत्रेण परिहरति—**अयमपीति**। दृष्टान्तभावमेव विभजते—**यथा हीति**। **मिथ्याज्ञानस्य** मिथ्याभूतस्याज्ञानस्येति यावत्। दृष्टान्ते संप्रतिपत्त्यभावं मन्वानं प्रत्याह—**श्रुतिश्चेति**। सुषुप्तिसमये सत्संपत्तेरज्ञानसद्भावस्य च श्रुतत्वेऽपि कथं सति संपन्नस्य पूर्ववत्पुनर्विभागेनोत्थानमित्याशङ्क्याह—**त इहेति**। सुषुप्तादयस्तच्छब्देन परामृश्यन्ते। **इहेति** पूर्वबोधादेरुक्तिः। यद्यदिति कर्माद्यर्जितं जातिविशेषरूपमुक्तम्। तदा भवन्तीत्युत्तरप्रबोधादेरतीतवासनानुसारिणो ग्रहणम्। ननु न किंचिदवेदिषमित्युत्थितेन परामृश्यमानाज्ञानस्य सुषुप्ते सत्त्वात् पुनः प्रबोधे पूर्ववदुत्थानं युक्तम्। प्रलये तु तथाविधाज्ञानसद्भावे मानाभावात् कुतो विभागेनोत्पत्तिर्नियम्यते, तत्राह—**यथा हीति**। तत्त्वज्ञानपर्यन्तं विभागव्यवहारस्याव्याहतत्वे दृष्टान्तमाह—**स्वप्नवदिति**। सुषुप्त्यवस्थायां परस्मिन्नज्ञाते ब्रह्मणि समस्तस्य कार्यजातस्य लीनत्वेऽपि लयस्याविद्याशेषत्वात् पुनरुत्थितावुत्तरप्रबोधावस्थायां सौषुप्ताविद्यानिमित्तो विभागव्यवहारः स्वप्नावस्थायामिव यावत्तत्त्वज्ञानमबाधितोऽभ्युपगम्यते। तथा प्रलयावस्थायामपि विभागशक्तिर्विभक्तकार्यलयलक्षणा मिथ्याज्ञानशब्दिताविद्याप्रतिबद्धा तच्छेषैवानुमास्यते। विमतो लयः सावशेषः, तत्त्वज्ञानाधीनलयत्वात्, सौषुप्तलयवत्। तथा चाविद्याशक्तेर्नियतत्वादुत्पत्तिनियतिरित्यर्थः। असामञ्जस्यान्तरमुक्तमतिदेशेन शिथिलयति—**एतेनेति**। अविद्याशक्तिवशादेव पुनर्विभागेनोत्पत्तिरित्युक्तन्यायेनेति यावत्। तथापि कथं तेषां पुनरुत्पत्तिप्रसङ्गो निवार्यते, कारणाभावे कार्याभावादित्याह—**सम्यगिति**। परिचोदनापूर्वकमुक्तमसामञ्जस्यान्तरं निरस्यति—**यः पुनरिति**। आशङ्कितासामञ्जस्यनिरसनफलमुपसंहरति—**तस्मादिति**।।९।।

---

१. 'स्थितः' इति पा.।

स्वपक्षदोषाच्च।।१०।।

स्वपक्षे चैते प्रतिवादिनः साधारणा दोषाः प्रादुःष्युः। कथमित्युच्यते। यत्तावदभिहितं विलक्षणत्वान्नेदं जगद् ब्रह्मप्रकृतिकमिति, प्रधानप्रकृतिकतायामपि समानमेतत्, शब्दादिहीनात्प्रधानाच्छब्दादिमतो जगत उत्पत्त्यभ्युपगमात्। अत एव च विलक्षणकार्योत्पत्त्यभ्युपगमात् समानः प्रागुत्पत्तेरसत्कार्यवादप्रसङ्गः। तथाऽपीतौ कार्यस्य कारणाविभागाभ्युपगमात् तद्वत्प्रसङ्गोऽपि समानः। तथा मृदितसर्वविशेषेषु विकारेष्वपीतावविभागात्मतां गतेष्विदमस्य पुरुषस्योपादानमिदमस्येति प्राक्प्रलयात् प्रतिपुरुषं ये नियता भेदाः, न ते तथैव पुनरुत्पत्तौ नियन्तुं शक्यन्ते कारणाभावात्। विनैव कारणेन नियमेऽभ्युपगम्यमाने कारणाभावसाम्यान्मुक्तानामपि पुनर्बन्धप्रसङ्गः। अथ केचिद्भेदा अपीतावविभागमापद्यन्ते केचिन्नेति चेत्, ये नापद्यन्ते तेषां प्रधानकार्यत्वं न प्राप्नोतीत्येवमेते दोषाः साधारणत्वान्नान्यतरस्मिन् पक्षे चोदयितव्या भवन्तीत्यदोषतामेवैषां द्रढयति, अवश्याश्रयितव्यत्वात्।।१०।।

प्रकटार्थविवरणम्

स्वपक्षदोषाच्च।। अभ्युपगम्य दोषान् पर्यहार्षीदाचार्यः। अधुना दोषवत्त्वमेव नास्ति, सर्वसंमतत्वेन गुणत्वादित्याह— **स्वपक्षदोषाच्चेति**।। उक्तं हि— "यत्रोभयोः समो दोषः परिहारोऽपि वा समः। नैकः पर्यनुयोक्तव्यः तादृगर्थविचारणे।।" इति।।

पुरुषस्योपादानं (परिहारो) भोगसाधनमिन्द्रियार्थमित्यर्थः।।

भाष्यभावप्रकाशिका

स्वपक्षदोषाच्च।।१०।। इदमस्य सुखदुःखोपादानं क्लेशकर्माशयादि इदमस्य चेति योजना।। प्रतिपुरुषं नियतान् भेदान्विहायासाधारणा एव विलीयन्त इति शङ्कते—**अथेति**।। ननु दूषणसाम्याद् नान्यतरपक्षस्योपादेयत्वमित्याशङ्क्य, नास्मत्पक्षे दोषः; परिहारस्य दर्शितत्वादित्याह—**अदोषतामेवेति**।।१०।।

न्यायनिर्णयः

स्वपक्षे विलक्षणत्वादिदोषान् परिहृत्य 'यश्चोभयोः' इत्यादिन्यायादनुद्भाव्यत्वमेव तेषामित्याह—**स्वपक्षेति**। सूत्राक्षराणि व्याचष्टे—**स्वपक्षे चेति**। तथा च वादिनं प्रत्यनुद्भाव्यता तेषामिति शेषः। ब्रह्मवादिन्युक्तानां विलक्षणत्वादीनां प्रधानवादिनि प्रसङ्गाभावात् कुतः साधारण्यमिति शङ्कते—**कथमिति**। प्रधानवादिनि दोषसाम्यमापादयितुमारभते—**उच्यत इति**। उक्तप्रकारमेव प्रकटयन् विलक्षणत्वादित्यत्रोक्तमनूद्य साम्यमाह—**यत्तावदिति**। 'असदिति चेत्' इत्यत्रोक्तस्यापि दोषस्य साधारण्यमाह—**अत एवेति**। अतःशब्दस्यैवार्थकथनं विलक्षणेत्यादि। न हीदं कार्यं कारणेन विलक्षणं लक्ष्यमाणं कारणात्मना प्रागवस्थायां स्थातुमर्हति विरोधात्। नापि स्वेनैवात्मना कार्यं प्रागुत्पत्तेर्वर्तितुं पारयति, प्रलयप्रतिहतिप्रसङ्गात्। तेन प्रागसदेव कार्यं भवन्मतेऽपीत्यर्थः। अपीतिसूत्रोक्तमसामञ्जस्यं परमतेऽपि प्रसञ्जयति—**तथेति**। यत्तु समस्तस्य विभागस्याविभागप्राप्तेः पुनरुत्पत्तौ नियामकाभावाद् भोक्तृणां भोगस्य च विभागेनोत्पत्तिर्न प्राप्नोतीति, अत्राह—**तथा मृदितेति**। उपादानं सुखादिकारणं क्लेशकर्माशयादि। यत्तु भोक्तृणां परेणाविभागं गतानामित्यादि, तत्राह—**विनैवेति**। प्रतिपुरुषं प्रतिनियतान् भेदान् विहाय साधारणानामेव भेदानां प्रलयाभ्युपगमान्नाति-प्रसक्तिरिति चोदयति—**अथेति**। ये प्रतिपुरुषं प्रतिनियता भेदास्ते नित्याः स्युरनित्या वा? नित्यत्वे पुरुषेषु गुणेषु वाऽन्तर्भावात्र प्रतिपुरुषं प्रतिनियमस्तदात्मत्वात् तत्साधारण्याच्च। अनित्यत्वे प्रधानकार्यत्वस्यावश्यकत्वात् तेषामपीतावविभागानापत्तिरयुक्तेति परिहरति—**ये नापद्यन्त इति**। विलक्षणत्वादीनां साधारणत्वे फलितमाह—**इत्येवमिति**। तर्हि दोषसाम्यान्नान्यतरपक्षस्यादेयतेत्या-शङ्क्यास्मत्पक्षे परिहारस्योक्तत्वान्नैवमित्याह—**इत्यदोषतामिति**।।१०।।

तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः ।।११।।

इतश्च नागमगम्येऽर्थे केवलेन तर्केण प्रत्यवस्थातव्यम्। यस्मान्निरागमाः पुरुषोत्प्रेक्षामात्रनिबन्धनास्तर्का अप्रतिष्ठिता भवन्ति, उत्प्रेक्षाया निरङ्कुशत्वात्। तथा हि—कैश्चिदभियुक्तैर्यत्नेनोत्प्रेक्षितास्तर्का अभियुक्ततरैरन्यैराभास्यमाना दृश्यन्ते। तैरप्युत्प्रेक्षिताः सन्तस्ततोऽन्यैराभास्यन्त इति न प्रतिष्ठितत्वं तर्काणां शक्यमाश्रयितुम्, पुरुषमतिवैरूप्यात्। अथ कस्यचित् प्रसिद्धमाहात्म्यस्य कपिलस्य वाऽन्यस्य वा[1] संमतस्तर्कः प्रतिष्ठित इत्याश्रीयेत। एवमप्यप्रतिष्ठितत्वमेव। प्रसिद्धमाहात्म्यानुमतानामपि तीर्थकराणां कपिलकणभुक्प्रभृतीनां परस्परविप्रतिपत्तिदर्शनात्। अथोच्येत—अन्यथा वयमनुमास्यामहे, यथा नाप्रतिष्ठादोषो भविष्यति। न हि प्रतिष्ठितस्तर्क एव नास्तीति शक्यते वक्तुम्। एतदपि हि तर्काणामप्रतिष्ठितत्वं तर्केणैव

प्रकटार्थविवरणम्

तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः।। किञ्च तर्कस्य संभावितदोषत्वादपि न निरस्तसमस्तदोषस्य तद्विरोधेऽप्यप्रामाण्यमित्याह—**तर्काप्रतिष्ठानादिति**।। कः पुनस्तर्को नाम? न तावत् प्रमाणम्, बाह्लादिप्रदेशस्थत्वात् [बाह्लादिप्रदेशवत्त्वात्] पुरुषेणानेन भवितव्यमिति संभावनामात्रबुद्धिहेतुत्वात्, संभावितनिश्चयस्तु प्रमाणादेव; नापि संशयः, भवितव्यमित्यंशेन ततो व्यतिरेकात्; न च विपर्ययः, न भवत्येवेति बाधानवगमात्; नापि स्मृतिः, [2]असंस्कारमात्रजत्वात्; परिशेषात् प्रमाणादिविवेचकः प्रत्ययविशेषस्तर्कः। तस्य च केवलस्याव्यवस्थितत्वं दृश्यते, पुरुषमतिवैचित्र्यादित्यर्थः। पुरुषविशेषगौरवात् तर्कविशेषे विश्वासो भविष्यतीत्याह—**अथ कस्यचिदिति**।। भवेदेवं विश्वासो यद्येक एव महात्मा स्यात्, न तदस्तीत्याह—**एवमपीति**।। सूत्रस्य पूर्वपक्षभागं व्याचष्टे—**अथोच्येतेत्यादिना**।। यद्यपि व्यभिचारिणो विलक्षणत्वादिहेतोरप्रतिष्ठितत्वम्, तथापि यस्य निरुपाधिकः संबन्धोऽविनाभावोऽस्ति विपक्षबाधकश्च सहकारी, तथाविधो हेतुः प्रतिष्ठितो भविष्यतीत्यर्थः।। ननु विमतस्तर्कोऽप्रतिष्ठितः, तर्कत्वात्, संप्रतिपन्नवत्, इत्यनुमीयतामप्रतिष्ठितत्वं तस्यापीत्याशङ्क्याह—**न हि प्रतिष्ठित इति**।। येन हेतुना त्वमप्रतिष्ठितत्वं

भाष्यभावप्रकाशिका

तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः।।११।। अप्रतिष्ठिततामुपपादयति—**तथा हीति**।। अन्यथाऽनुमेयमिति सूत्रभागं विवृणोति—**अथोच्येतेति**।। यथाऽप्रतिष्ठितत्वदोषो न भवति, तथा व्याप्तिमनुसन्धाय तर्क उत्प्रेक्ष्यत इत्यर्थः।। ननु त्वदीयतर्कस्यापि तर्कत्वाविशेषादप्रतिष्ठिततेत्याशङ्क्य, किं सर्वस्य तर्कस्याप्रतिष्ठितत्वम्, उत कस्यचिदिति विकल्प्य, आद्ये दूषणमाह—**न हीति**।। कुतो न शक्यत इति? तदाह—**एतदपि हीति**।। तर्काणामप्रतिष्ठितताप्रसाधकस्तर्कः

न्यायनिर्णयः

विलक्षणत्वादितर्कावष्टम्भेन ब्रह्मकारणवादप्रतिक्षेपासंभवे हेत्वन्तरमाह—**तर्काप्रतिष्ठानादिति**। सौत्रमपिपदं व्याकरोति—**इतश्चेति**। तर्कस्य कैवल्यमनुग्राह्यागमराहित्यम्। इतःशब्दार्थमेव स्फुटयति—**यस्मादिति**। आगममूलविकलानां कुतस्तर्काणां प्रादुर्भावः, तत्राह—**पुरुषेति**। औत्प्रेक्षिकतर्काणामप्रतिष्ठितत्वे हेतुमाह—**उत्प्रेक्षाया इति**। तर्काणामप्रतिष्ठितत्वं विवृणोति—**तथाहीति**। पुरुषमतीनामनेकरूपत्वेऽपि कपिलादौ पुरुषविशेषे माहात्म्यस्य प्रसिद्धत्वात् तदीयस्तर्कोऽप्रतिष्ठितो न भवतीति शङ्कते—**अथेति**। कपिलादेर्माहात्म्यप्रसिद्धिमभ्युपेत्य परिहरति—**एवमपीति**। अन्यथेत्यादिसूत्रावयवेन चोदयति—**अथोच्येतेति**। यथा तर्कस्य नाप्रतिष्ठितत्वदोषस्तथा व्याप्तिमनुसंधायासावुत्प्रेक्ष्यते। तथा च विलक्षणत्वादीनां व्यभिचारिणामसाधकत्वेऽपि व्याप्तिमतस्तर्कस्य साधकत्वसिद्धिरित्यर्थः। सोऽपि तर्कस्तर्कत्वादप्रतिष्ठितः स्यादित्याशङ्क्य सर्वस्य वा तर्कस्याप्रतिष्ठितत्वं कस्यचिदे[व] वेत्ति विकल्प्याद्यं दूषयति—**न हीति**। तत्र हेतुमाह—**एतदपीति**। तदेव स्पष्टयति—**केषांचिदिति**। यस्तर्काणाम-

१. 'कपिलस्यान्यस्य वा' इति पा.। २. संस्कारमात्रजन्यभिन्नत्वादित्यर्थः।

प्रतिष्ठाप्यते। केषांचित्तर्काणामप्रतिष्ठितत्वदर्शनेनान्येषामपि तज्जातीयकानां तर्काणामप्रतिष्ठितत्वकल्पनात्। सर्वतर्काप्रतिष्ठायां च लोकव्यवहारोच्छेदप्रसङ्गः। अतीतवर्तमानाध्वसाम्येन ह्यनागतेऽप्यध्वनि सुखदुःखप्राप्तिपरिहाराय प्रवर्तमानो लोको दृश्यते। श्रुत्यर्थविप्रतिपत्तौ चार्थाभासनिराकरणेन सम्यगर्थनिर्धारणं तर्केणैव [1]वाक्यवृत्तिनिरूपणरूपेण क्रियते। मनुरपि चैवं मन्यते—'प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्। त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता।।' इति, 'आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना। यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः।।' (मनु. १२।१०५,१०६) इति च ब्रुवन्। अयमेव[2] तर्कस्यालंकारो यदप्रतिष्ठितत्वं

प्रकटार्थविवरणम्

सिषाधयिषसि स किं प्रतिष्ठितो न वा? प्रथमे सिद्धं नः समीहितम्। चरमे त्वप्रतिष्ठितत्वासिद्धौ प्रतिष्ठितत्वसिद्धिरिति भावः। इतश्च तर्कः प्रतिष्ठित इत्याह—**सर्वतर्काप्रतिष्ठायां चेति**।। अतीतवर्तमानभोजनादेः समीहितसाधनत्वमनुभूयागामिन्यपि तज्जातीयत्वेनेष्टसाधनत्वमनुमाय प्रवर्तते, अनिष्टसाधनत्वं चानुमाय निवर्तते। तर्कस्याप्रतिष्ठायां तदभावः प्रसज्यत इति भावः। किञ्च तर्कस्याप्रतिष्ठायां बादरायणस्य शारीरकप्रणयनमपि न स्यादित्याह—**श्रुत्यर्थविप्रतिपत्तौ चेति**।। मनुरपि तर्कविशेषस्यादरणीयतां मन्यत इत्याह—**मनुरपीति**।। किञ्च तर्काप्रतिष्ठितत्वं न दोषाय, अन्यथा पूर्वपक्षाभावप्रसङ्गादित्याह—**अयमेव च तर्कस्येति**।।

भाष्यभावप्रकाशिका

प्रतिष्ठितः, न प्रतिष्ठितो वा। प्रतिष्ठितत्वे सर्वतर्काप्रतिष्ठितत्वं न सिध्यति; तत्र व्यभिचारात्, अप्रतिष्ठितत्वे तर्काणां [अ] प्रतिष्ठितत्वं न सिध्यति; तत्साधकतर्कस्यैवाप्रतिष्ठितत्वादित्यर्थः। लोकयात्राहेतुत्वादपि तर्कस्य प्रतिष्ठितत्वमित्याह—**सर्वतर्केति**।। तदेवोपपादयति—**अतीतेति**।। अनुभूतेष्टानिष्टसाधनसजातीयसंदर्शनात् तस्यापि तत्साधनतामनुमाय लोको व्यवहरतीत्यर्थः। अध्वा प्रवृत्तिनिवृत्तिव्यवहारविषयः। तत्सामान्येन तत्सजातीयतया। अनागते अननुभूते अध्वनि व्यवहाराविषय इति यावत्। श्रुत्यर्थाभासनिराकरणेन तदर्थत्वनिश्चयस्यापि तर्काधीनत्वात्र तर्कोऽप्रतिष्ठ [ष्ठित] इत्याह—**श्रुत्यर्थेति**।। मनुनाऽपि तर्कस्य वेदार्थनिर्णयहेतुत्वेन परिगृहीतत्वात् प्रतिष्ठितत्वमित्याह—**मनुरपीति**।। कस्यचित्तु तर्कस्याप्रतिष्ठितत्वं न दोषः, अपि तु गुण

न्यायनिर्णयः

प्रतिष्ठितत्वसाधकः स प्रतिष्ठितो न वा? प्रथमे कुतः सर्वतर्काप्रतिष्ठितत्वं, तदुपपादके तर्के तदभावात्। द्वितीयेऽपि कुतः सर्वतर्काप्रतिष्ठितत्वं, तत्प्रसाधकतर्कस्यैवाप्रतिष्ठितत्वादित्यर्थः। लोकव्यवहारहेतुत्वादपि प्रतिष्ठितत्वं तर्कस्यास्थेयमित्याह—**सर्वेति**। तदेवोपपादयति—**अतीतेति**। अध्वा प्रवृत्तिनिवृत्तिव्यवहारविषयस्तत्सामान्यं तत्सजातीयत्वम्। **अनागतेऽध्वनि** अननुभूते व्यवहारविषय इति यावत्। अनुभूतेष्टानिष्टसाधनजातीयसंदर्शनात् तस्यापि समीहितसाधनत्वमसमीहितसाधनत्वं वाऽनुमाय लोकस्तत्र प्रवर्तते, ततो वा निवर्तते। तदेवं लोकयात्रामुद्वहन्ननुमानाख्यस्तर्को नाप्रतिष्ठितो भवितुमर्हतीत्यर्थः। ननु लोकयात्रा यथाकथंचित् प्रतिष्ठितेनाप्रतिष्ठितेन वा तर्केण निर्वहति, तस्या दृष्टत्वादेव दुर्निवारत्वात्। वेदार्थनिर्णयानुपयोगित्वात्तु तर्कस्याप्रतिष्ठितत्वं वैदिकैरुच्यते, तत्राह—**श्रुत्यर्थेति**। पूर्वोत्तरतन्त्रप्रणयनानुपपत्त्या तर्कस्य प्रतिष्ठितत्वमेष्टव्यम्। न हि प्रतिष्ठिततर्कावष्टम्भमन्तरेण तन्त्राभ्यां वाक्यार्थनिर्धारणसिद्धिरिति भावः। न केवलं लौकिकवैदिकव्यवहारानुपपत्तिरेव तर्कस्य प्रतिष्ठितत्वे मानं, किंतु मनुवचनमपीत्याह—**मनुरपीति**। शास्त्रस्य नानाचार्यमुखप्राप्तसंप्रदायसाहित्यं विविधागमत्वम्। धर्मस्य शुद्धिरधर्मान्निष्कृष्य निर्धारणम्। तत्र शास्त्रं निर्धारितशक्तितात्पर्यवदव्यवधानेनोपयुक्तं, प्रत्यक्षानुमाने तद्व्यवधानेनेति विभागः। अत्रानुमानं चेत्येतदुपजीव्यम्। आर्षो धर्मोपदेशो मन्वत्रिविष्णुहारीतयाज्ञवल्क्यादिप्रणीतं धर्मशास्त्रम्। वेदशास्त्राविरोधिनेति विशेषणाद् धर्मनिर्णये शुष्कतर्कानुप्रवेशो नेति सूचितम्। धर्मशब्दाच्चात्र साधारणाद् ब्रह्मापि गृहीतम्। सर्वस्य तर्कस्याप्रतिष्ठितत्वपक्षमेवं

१. वाक्यवृत्तीति। वाक्यतात्पर्येत्यर्थः। २. 'अयमेव च' इति पा।

नाम। एवं हि सावद्यतर्कपरित्यागेन निरवद्यस्तर्कः प्रतिपत्तव्यो भवति। न हि पूर्वजो मूढ आसीदित्यात्मनाऽपि मूढेन भवितव्यमिति किंचिदस्ति प्रमाणम्। तस्मान्न तर्काप्रतिष्ठानं दोष इति चेत्? एवमप्यविमोक्षप्रसङ्गः। यद्यपि क्वचिद्विषये तर्कस्य प्रतिष्ठितत्वमुपलक्ष्यते तथापि प्रकृते तावद्विषये प्रसज्यत एवाप्रतिष्ठितत्व-दोषादनिर्मोक्षस्तर्कस्य। न हीदमतिगम्भीरं भावयाथात्म्यं मुक्तिनिबन्धनमागममन्तरेणोत्प्रेक्षितुमपि शक्यम्। रूपाद्यभावाद्धि नायमर्थः [1]प्रत्यक्षस्य गोचरः, लिङ्गाद्यभावाच्च नानुमानादीनामिति चावोचाम।

अपि च सम्यग्ज्ञानान्मोक्ष इति सर्वेषां मोक्षवादिनामभ्युपगमः। तच्च सम्यग्ज्ञानमेकरूपं वस्तुतन्त्रत्वात्। एकरूपेण ह्यवस्थितो योऽर्थः स परमार्थः। लोके तद्विषयं ज्ञानं सम्यग्ज्ञानमित्युच्यते, यथाऽग्निरुष्ण इति।

प्रकटार्थविवरणम्

सिद्धान्तभागमवतार्य व्याचष्टे—**यद्यपि क्वचिदित्यादिना**।। नास्माभिरपि सर्वस्यैव तर्कस्याप्रतिष्ठितत्वमुच्यते, किन्त्वतीन्द्रियार्थेन लिङ्गस्याविनाभावग्रहणासंभवात् तत्र सामान्यतोदृष्टस्य स्वातन्त्र्येण प्रामाण्यासंभवात् अप्रतिष्ठितत्वमननुप्रवेश इत्यर्थः।

एवमप्यविमोक्षप्रसङ्ग इत्यस्यार्थान्तरमाह—**अपि च सम्यग्ज्ञानादिति**।। यद्यप्यतीन्द्रिये तर्कस्यास्ति प्रवेशः, एवमप्यविमोक्ष एव स्यात्। तर्कोत्थस्य परस्परपराहतत्वेनानिश्चितार्थत्वादित्यर्थः। ननु तर्हि वेदप्रभवविज्ञानं न सम्यग्ज्ञानम्, तत्रापि कदाचित्

भाष्यभावप्रकाशिका

एवेत्याह—**अयमेव चेति**।। तदुपपादयति—**एवं हीति**।। विचारात्मकस्तर्कः तार्किकपूर्वपक्षपरित्यागेन तर्किक[तर्कित] राद्धान्ताङ्गीकारहेतुः पूर्वपक्षविषये तर्के प्रतिष्ठारहिते सति प्रवर्तते; तदभावे विचाराप्रवृत्तेरित्यर्थः।। ननु पूर्वतर्कवदुत्तरतर्कस्यापि तर्कत्वाविशेषादप्रतिष्ठितत्वं स्यादिति, अत आह—**न हि पूर्वज इति**।। अप्रतिष्ठितत्वे प्रशिथिलमूलत्वादिकं प्रयोजकम्, न तु तर्कत्वमिति भावः। तामिमां शङ्कां सूत्रभागेन परिहरति—**एवमपीति**।। किं प्रतिष्ठितोऽपि कश्चित्तर्कोऽस्तीति साध्यते? किं वा जगत्कारणविषयस्तर्कः प्रतिष्ठित इति? यद्याद्यः, अङ्गीक्रियत इत्याह—**यद्यपीति**।। ननु जगत्कार्यलिङ्गेन कारणानुमानात् कारणमपि तर्कगोचर इत्याशङ्क्य, कारणमात्रस्य तर्कगम्यत्वेऽपि कारणगतैकत्वानन्दात्मकत्वादिविशेषणात्र [षाणां न] तर्कगोचरतेत्याह—**न हीदमिति**।। कुत इत्याकाङ्क्षायामागमव्यतिरिक्तप्रमाणागोचरत्वादित्याह—**रूपाद्यभावादिति**।।

न्यायनिर्णयः

दूषयित्वा कस्यचिदप्रतिष्ठितत्वमङ्गीकरोति—**अयमेवेति**। तदेवोपपादयति—**एवं हीति**। तर्को हि विचारात्मकस्तर्कितपूर्वपक्षप्रतिक्षेपमुखेन तर्कितसिद्धान्ताभ्युपगममूलम्। स च पूर्वपक्षविषये तर्के प्रतिष्ठारहिते सति प्रवर्तते, तदप्रतिष्ठितत्वाभावे विफलतया विचाराप्रवृत्तेरित्यर्थः। पूर्वतर्कवदुत्तरतर्कस्यापि तर्कत्वादप्रतिष्ठितत्वमनुमेयमित्याशङ्क्याप्रतिष्ठितत्वे तर्कस्य मूलशैथिल्यादि प्रयोजकं, न तर्कत्वमिति मत्वाऽऽह—**न हीति**। अन्यथेत्यादिचोद्यविभजनमुपसंहरति—**तस्मादिति**। सर्वतर्काप्रतिष्ठाया दुरुपपादनत्वात् किंचित्तर्काप्रतिष्ठाया गुणत्वादित्यर्थः। परिहारमवतारयति—**एवमपीति**। प्रतिष्ठितोऽपि कश्चित्तर्कोऽस्तीति वा जगत्कारणविषयस्तर्कस्तथेति वा साध्यते। तत्राद्यमङ्गीकरोति—**यद्यपीति**। द्वितीयं दूषयति—**तथापीति**। जगत्कारणमपि कार्यलिङ्गकानुमानगोचरतया तर्कगम्य-मित्याशङ्क्य कारणमात्रस्य तद्गम्यत्वेऽपि तद्गतैकत्वादिविशेषस्य नास्ति तद्गम्यतेत्याह—**न हीति**। अतिगम्भीरत्वमागमातिरेकिमानायोग्यत्वम्। भावयाथात्म्यं कारणगतमद्वितीयत्वम्। मुक्तिनिबन्धनं परमानन्दसच्चिदेकतानत्वम्। यदुक्तमतिगम्भीरत्वं तदेव प्रागुक्तं स्मारयन्नुपपादयति—**रूपादीति**।

एवमपीत्यादिभागं विधान्तरेण व्याकर्तुमारभते—**अपि चेति**। तर्कप्रतिष्ठितत्ववादिनाऽपि तार्किकं वा वैदिकं वा ज्ञानं मोक्षसाधनं विवक्षितमिति विकल्प्याद्यं दूषयितुं संप्रतिपन्नमर्थमाह—**सम्यगिति**। तस्य तर्कसमुत्थत्वासंभवं वक्तुमेकरूपत्वमाह—

१. 'प्रत्यक्षगोचरः' इति पा.।

तत्रैवं सति सम्यग्ज्ञाने पुरुषाणां विप्रतिपत्तिरनुपपन्ना। तर्कज्ञानानां त्वन्योन्यविरोधात् प्रसिद्धा विप्रतिपत्तिः। यद्धि केनचित् तार्किकेणेदमेव सम्यग्ज्ञानमिति [1]प्रतिष्ठापितं तदपरेण व्युत्थाप्यते, तेनापि प्रतिष्ठापितं ततोऽपरेण व्युत्थाप्यत इति प्रसिद्धं लोके। कथमेकरूपानवस्थितविषयं तर्कप्रभवं सम्यग्ज्ञानं भवेत्? न च प्रधानवादी तर्कविदामुत्तम इति सर्वैस्तार्किकैः परिगृहीतो येन तदीयं मतं सम्यग्ज्ञानमिति प्रतिपद्येमहि। न च शक्यन्तेऽतीतानागतवर्तमानास्तार्किका एकस्मिन् देशे काले च समाहर्तुं येन तन्मतिरेकरूपैकार्थविषया सम्यङ्मतिरिति स्यात्। वेदस्य तु नित्यत्वे विज्ञानोत्पत्तिहेतुत्वे च सति व्यवस्थितार्थविषयत्वोपपत्तेः तज्जनितस्य ज्ञानस्य सम्यक्त्वमतीतानागतवर्तमानैः सर्वैरपि तार्किकैरपह्नोतुमशक्यम्। अतः सिद्धमस्यैवौप-

प्रकटार्थविवरणम्

कस्यचिद्विप्रतिपत्तेरित्याशङ्क्याह—**वेदस्य तु नित्यत्व इति**।। वेदस्य स्वरसेन सम्यग्ज्ञानहेतुतैव; अन्यथाज्ञानं तु पुरुषस्य तात्पर्याज्ञानादिति भावः।

भाष्यभावप्रकाशिका

एवमप्यविमोक्ष इत्यस्य सूत्रभागस्य व्याख्यानान्तरमाह—**अपि चेति**।। वस्तुतन्त्रत्वेऽप्यनेकरूपता स्थाणुपुरुषविषयविज्ञानवत् किं न स्यादित्याशङ्क्याह—**एकरूपेणेति**।। स्थाणुर्वा पुरुषो वेति ज्ञानं न वस्तुतन्त्रम्, अपि तु पुरुषतन्त्रमिति भावः।। भवत्वेवं भूतं वस्तु, तथापि तस्य भ्रान्तिपरिकल्पितानि सन्त्येवानेकानि रूपाणीति, तत्राह—**तद्विषयमिति**।। भवत्वेकरूपत्वम्, तथापि किमायातमिति? तत्राह—**तत्रैवमिति**।। भवत्वेवम्, तथापि तर्कजन्यं सम्यग्ज्ञानं किं न स्यादिति? अत आह—**तर्कज्ञानानामिति**।। विप्रतिपत्तिमेव दर्शयति—**यद्धीति**।। किं तत इति? तत्राह—**कथमेकरूपेति**।। भवतु तर्हि साङ्ख्यपक्षतर्कस्योत्कृष्टत्वात् तज्जन्यमेव सम्यग्ज्ञानमिति, तत्राह—**न चेति**।। ननु तैरपरिगृहीतत्वेऽपि तन्मतनिरासेन स्वपक्षस्योपपादितत्वात् तस्यैवोपादेयत्वमिति, तत्राह—**न च शक्यन्त इति**।। तन्मतनिरासोऽप्यसिद्धः, अशक्यत्वादिति भावः।। अथवा—सर्वतार्किकसंमतमेव तर्हि वस्त्वस्त्विति, तत्राह—**न च शक्यन्त इति**।। ननु वेदार्थेऽपि वेदविदां विप्रतिपत्तिदर्शनात् तज्जन्यमपि ज्ञानमेकरूपं न भवेदिति, तत्राह—**वेदस्य त्विति**।। स्वसामर्थ्यादेकरूपार्थावगमहेतुरेव वेदः, पुरुषमतिदोषजास्त्वन्यथाबुद्धय इत्यर्थः। ततो वेदजमेव

न्यायनिर्णयः

तच्चेति। वस्तुतन्त्रत्वेऽपि स्थाणुपुरुषविषयज्ञानवदनेकरूपत्वमाशङ्क्याह—**एकरूपेणेति**। न हि स्थाणुर्वा पुरुषो वेति ज्ञानं वस्तुतन्त्रं किंतु पुरुषतन्त्रमिति भावः। ऐकरूप्येऽपि वस्तुतस्तस्य भ्रान्तिविकल्पितानि सन्त्येवानेकरूपाणीत्याशङ्क्याग्न्यौष्ण्यज्ञानवदेकरूपवस्तुविषयमेव सम्यग्ज्ञानमित्याह—**तद्विषयमिति**। मोक्षसाधनसम्यग्ज्ञानस्योक्तप्रकारेणैकरूप्येऽपि किमायातमिति, तत्राह—**तत्रेति**। अविप्रतिपन्नमपि सम्यग्ज्ञानं तर्कसमुत्थं भविष्यतीत्याशङ्क्याह—**तर्केति**। विप्रतिपत्तिमेव तार्किके ज्ञाने प्रकटयति—**यद्धीति**। व्युत्थापनं बाधनम्। सत्यां विप्रतिपत्तौ फलितमाह—**कथमिति**। एकरूपेणानवस्थितोऽर्थो विषयो यस्य ज्ञानस्य तत् तथा। [2]प्रधानब्रह्मवादिनः सर्वोत्कृष्टतया सर्वैरिष्टत्वात् तदुत्प्रेक्षिततर्कप्रसूतं ज्ञानं सम्यग्ज्ञानं भविष्यतीत्याशङ्क्याह—**न चेति**। तैरपरिगृहीतत्वेऽपि तन्मतनिरासेन प्रधानवादिना स्वमतस्य स्थापितत्वात् तस्यैवादेयत्वं सर्वतार्किकसंमतमित्याशङ्क्याह—**न च शक्यन्त इति**। एकरूपो योऽसावेकार्थः सांख्यैरुक्तस्तद्विषयेति यावत्। तर्कोत्थज्ञानं मोक्षहेतुरिति पक्षं प्रतिक्षिप्य वैदिकज्ञानं तथेत्यङ्गीकर्तुं वेदार्थेऽपि वेदविदां विवादात् तज्जन्यमपि ज्ञानमेकरूपं न भवतीत्याशङ्क्याह—**वेदस्येति**। स हि स्वसामर्थ्यादेकरूपार्थधीप्रसवहेतुः, पुरुषमतिदोषात्त्वन्यथा प्रतिभासत इत्यर्थः। वैदिकस्य ज्ञानस्यासम्यग्ज्ञानत्वापादकत्वाभावे[3] फलितमाह—**अत इति**। वैदिकादेव सम्यग्ज्ञानान्मोक्षसंभवात् पक्षान्तरेषु मोक्षहेतुसम्यग्ज्ञानाभावान्मोक्षासिद्धिरिति सूत्रावयवार्थ-

---

१. 'प्रतिपादितम्' इति पा.। २. 'प्रधानवादिनः' इति पाठः स्यात्। ३. 'पादकाभावे' इति पाठः स्यात्।

निषदस्य ज्ञानस्य सम्यग्ज्ञानत्वम्। अतोऽन्यत्र सम्यग्ज्ञानत्वानुपपत्तेः संसाराविमोक्ष एव प्रसज्येत। अत आगमवशेनागमानुसारितर्कवशेन च चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेति स्थितम्।।११।।

।।इति तृतीयं नविलक्षणत्वाधिकरणम्।।

४।।शिष्टापरिग्रहाधिकरणम्।।सू. १२।।

एतेन शिष्टापरिग्रहा अपि व्याख्याताः।।१२।।

वैदिकस्य दर्शनस्य प्रत्यासन्नत्वाद् गुरुतरतर्कबलोपेतत्वाद् वेदानुसारिभिश्च कैश्चिच्छिष्टैः केनचिदंशेन परिगृहीतत्वात् प्रधानकारणवादं तावद् व्यपाश्रित्य यस्तर्कनिमित्त आक्षेपो वेदान्तवाक्येषूद्भावितः, स

शारीरकन्यायसंग्रहः

एतेन शिष्टापरिग्रहा अपि व्याख्याताः।।१२।। ब्रह्मचैतन्यं जगत्समवायिकारणविशेषगुणो न भवति, जगति समानजातीयगुणान्तरानारम्भकत्वात्, यो हि गुणो यस्मिन् कार्ये समानजातीयं गुणान्तरं नारभते, स तत्समवायिकारणविशेषगुणो न भवति, यथा तन्तुशौक्ल्यं घटस्य समवायिकारणविशेषगुणो न भवतीति वैशेषिकाद्यनुमानस्य पूर्ववच्चैतन्यगुणवत्त्वाज्जगतोऽसिद्धानैकान्तिककालात्ययापदिष्टत्वान्युच्यन्ते शकृदवयवगतश्यामत्वादीनां रक्तवृश्चिकेऽनारम्भादिति।।

प्रकटार्थविवरणम्

यस्मात् तर्कोऽप्रतिष्ठितः, तर्काज्ञानाच्च न मोक्षसंभवः तत इत्युपसंहरति—**अत आगमवशेनेति**। इति तृतीयं नविलक्षणत्वाधिकरणम्।।

एतेन शिष्टापरिग्रहा अपि व्याख्याताः।। पूर्वोत्तराधिकरणयोरुपदेशातिदेशभावेन संबन्धे कारणमाह—**वैदिकस्येति**।। ब्रह्मचैतन्यं जगत्समवायिकारणस्य विशेषगुणो न भवति, कार्ये समानजातीयगुणानारम्भकत्वात्; यः कार्ये समानजातीयगुणारम्भको न भवति नासौ तत्समवायिकारणस्य विशेषगुणः, यथा तन्तुगतं शौक्ल्यं न घटसमवायिकारणस्य विशेषगुण इत्यनुमानविरोधं

भाष्यभावप्रकाशिका

सम्यग्ज्ञानमित्युपसंहरति—**अतस्सिद्धमिति**।। तस्मादप्यनिर्मोक्षप्रसङ्गो युक्त एवेति निगमयति—**अतोऽन्यत्रेति**।। इदानीमधिकरणार्थमुपसंहरति—**अत आगमेति**।।११।। इति तृतीयं नविलक्षणत्वाधिकरणम्।।

एतेन शिष्टापरिग्रहा अपि व्याख्याताः।।१२।। अतः [अत्र] प्रधानकारणवादिभिरुद्भाविताक्षेपनिराकरणन्यायातिदेशेन कस्मादितरेषां निराकरणम्? विपरीतं किमिति न कृतमित्याशङ्क्य तद्वादस्य प्राधान्यादित्याह—**वैदिकस्येति**।। कार्य-

न्यायनिर्णयः

मुपसंहरति—**अतोऽन्यत्रेति**। तर्कावष्टम्भेन ब्रह्मणि प्रत्यवस्थानासंभवं प्रसाध्य प्रकृतमधिकरणार्थमुपसंहरति—**अत आगमवशेनेति**।।११।।इति तृतीयं नविलक्षणत्वाधिकरणम्।।

समन्वयस्य सांख्यन्यायाविरोधेऽपि परमाण्वादिवादिभिरुद्भावितन्यायविरोधान्नासौ सिध्यति, तेषां तार्किकत्वेन प्रसिद्धत्वात् तदीयन्यायानामबाध्यत्वादित्याशङ्क्य तन्निरासायोक्तन्यायमतिदिशति—**एतेनेति**। अतिदेशत्वादुपदेशवत् पादादिसंगतिचतुष्टयं फलभेदश्च। चेतनाद् ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः। स किमीश्वरो न द्रव्योपादानं, व्यापित्वात्, दिगादिवदित्यादिना तार्किकन्यायेन तदनाभासत्वाभासत्वाभ्यां विरुध्यते न वेति संदेहे पूर्वोत्तराधिकरणयोरुपदेशातिदेशभावेन संबन्धे कारणमाह—**वैदिकस्येति**। कार्यकारणयोरभेदस्यात्मनः स्वप्रकाशत्वासङ्गत्वयोः सम्यग्दर्शनस्यासहायस्य मुक्तिहेतुतेत्येवमादीनामभ्युपगमात् प्रत्यासन्नत्वम्। परिमाणसमन्वयादिर्गुरुतरस्तर्कः। देवलप्रभृतयः शिष्टाः। **केनचिदंशेन** कार्यकारणयोरनन्यत्वादिनेति यावत्।

परिहृतः। इदानीमण्वादिवादव्यपाश्रयेणापि कैश्चिन्मन्दमतिभिर्वेदान्तवाक्येषु पुनस्तर्कनिमित्त आक्षेप [1]आशङ्क्यत इत्यतः प्रधानमल्लनिबर्हणन्यायेनातिदिशति। परिगृह्यन्त इति परिग्रहाः; न परिग्रहा अपरिग्रहाः; शिष्टानामपरिग्रहाः शिष्टापरिग्रहाः। एतेन प्रकृतेन प्रधानकारणवादनिराकरणकारणेन शिष्टैर्मनुव्यासप्रभृतिभिः [2]केनचिदप्यंशेनापरिगृहीता येऽण्वादिकारणवादास्तेऽपि प्रतिषिद्धतया व्याख्याता निराकृता द्रष्टव्याः। तुल्यत्वान्निराकरणकारणस्य नात्र पुनराशङ्कितव्यं किंचिदस्ति। तुल्यमत्रापि परमगम्भीरस्य जगत्कारणस्य तर्कानवगाह्यत्वं, तर्कस्याप्रतिष्ठितत्वमन्यथानुमानेऽप्यविमोक्ष आगमविरोधश्चेत्येवंजातीयकं निराकरणकारणम् ।।१२।।

।।इति चतुर्थं शिष्टापरिग्रहाधिकरणम्।।

प्रकटार्थविवरणम्

कश्चिदाशङ्केतेत्याह—**पुनस्तर्कनिमित्त इति**।। चेतनाद् ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः। तस्य वैशेषिकानुमानविरोधोऽस्त्युत नेति संदेहः। सांख्यानुमानेऽनैकान्तिकत्वदोषवद् वैशेषिकानुमाने दोषानुपलम्भादस्ति विरोध इति पूर्वः पक्षः। सिद्धान्तं सूत्रयोजनया दर्शयति—**परिगृह्यन्त इत्यादिना**।। **आगमविरोधश्चेति**।। चकारात् गोमयश्यामत्वेऽनैकान्तिको हेतुः; तस्य कपिले वृश्चिके समानजातीयगुणानारम्भकत्वाद् द्रष्टव्यः।। इति चतुर्थं शिष्टापरिग्रहाधिकरणम्।।

भाष्यभावप्रकाशिका

कारणयोरभेदस्यात्मनः स्वप्रकाशत्वासङ्गत्वयोः सम्यग्दर्शनस्य च केवलस्य मोक्षसाधनत्वस्येत्येवमादीनामभ्युपगमात् प्रत्यासन्नत्वम्; वैशेषिकादीनां केवलतार्किकत्वप्रसिद्धेः, तेषां तत्राभियोगविशेषसंभवात् तन्मतानुरोधेन कारणं व्यवस्थापनीयमितीमामभ्यधिकाशङ्कां निराकरोति—**नात्र पुनरिति**।।१२।। इति चतुर्थं शिष्टापरिग्रहाधिकरणम्।।

न्यायनिर्णयः

अण्वादीति। आदिपदेन स्वभावाभाववादौ गृहीतौ। **तर्कनिमित्त आक्षेप इति**। अयमर्थः—विमतं कार्यद्रव्यं नेश्वरोपादानकं, गुणत्वानधिकरणत्वात्, ईश्वरवत्। ईश्वरो न कार्यद्रव्योपादानं, कार्यद्रव्ये समानजातीयविशेषगुणारम्भकविशेषगुणानधिकरणत्वाद्, व्यापित्वाद्वा, दिगादिवत्। ब्रह्मचैतन्यं जगत्समवायिकारणविशेषगुणो न भवति, कार्ये समानजातीयविशेषगुणानारम्भकत्वात्, यथा तन्तुगतं शौक्ल्यं न घटसमवायिकारणविशेषगुण इत्येवंविधानुमानविरोधं समन्वयस्य कश्चिच्चोदयेदिति। तामेतामाशङ्कां निराकर्तुमिदं सूत्रमित्याह—**इत्यत इति**। सूत्राक्षराणि व्याचष्टे—**परिगृह्यन्त इति**। शिष्टापरिग्रहशब्दस्य समासमुक्त्वा वाक्यार्थमाह—**शिष्टैरिति**। अतिदेशेन निराकरणे हेतुमाह—**तुल्यत्वादिति**। पूर्वोक्तानुमानेष्वदूषितेषु कथमिष्टसिद्धिरित्याशङ्क्याह—**नात्रेति**। समन्वयः सप्तम्यर्थः। गुणत्वानधिकरणत्वादित्यत्रानुपादानत्वस्यैवोपाधित्वात्, ईश्वरो द्रव्योपादानवृत्तिद्रव्यत्वावान्तरजातिमान्, अश्रावणविशेषगुणवत्त्वात्, पृथिवीवदिति परमतेन व्यापित्वादेः सत्प्रतिपक्षत्वात्, कार्ये समानजातीयगुणान्तरानारम्भकत्वस्यातिलोहितवृश्चिक-समवायिकारणगोमयविशेषगुणश्यामत्वे व्यभिचारात्, विमतमीश्वरोपादानकम्, उपादानवत्त्वात्, ईश्वरनिष्ठसंयोगवदित्यनुमानात्र प्रकृते समन्वये किंचिदाशङ्कितव्यमिति भावः। यदुक्तं तुल्यत्वान्निराकरणकारणस्येति, तदेव व्यनक्ति—**तुल्यमिति**। वैशेषिकादिपक्षानुसारि चोद्यं सप्तम्यर्थः। तुल्यमत्रापि निराकरणकारणमिति संबन्धः। [3]तदेव प्रागुक्तं संक्षिपति—**परमगम्भीरस्येत्यादिना**।।१२।।इति चतुर्थं शिष्टापरिग्रहाधिकरणम्।।

---

१. 'आशङ्क्येत' इति पा.। २. 'केनचिदंशेन' इति पा.। ३. 'तदेवं' इति मुद्रितः पाठः।

५।।भोक्त्रापत्त्यधिकरणम्।।सू. १३।।

भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्।।१३।।

अन्यथा पुनर्ब्रह्मकारणवादस्तर्कबलेनैवाक्षिप्यते। यद्यपि श्रुतिः प्रमाणं स्वविषये भवति तथापि प्रमाणान्तरेण विषयापहारेऽन्यपरा भवितुमर्हति। यथा मन्त्रार्थवादौ। तर्कोऽपि स्वविषयादन्यत्राप्रतिष्ठितः स्यात्। यथा धर्माधर्मयोः। 'किमतो यद्येवम्? अत इदमयुक्तं यत् प्रमाणान्तरप्रसिद्धार्थबाधनं श्रुतेः। कथं

शारीरकन्यायसंग्रहः

भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्।।१३।। भेदाभेदयोर्वस्तुतोऽसंभवेऽपि प्रातिभासिकं रूपमादाय भोक्तृभोग्याभ्यामभिन्नतया अद्वितीयब्रह्मपरसमन्वयस्य भोक्तृभोग्यविभागप्रत्यक्षेणाबाधो दर्शितः।।

प्रकटार्थविवरणम्

भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्।। संबन्धमाह—**अन्यथा पुनरिति।।** ननु पूर्वं शब्दैकसमधिगम्ये नास्ति तर्कनिमित्त आक्षेप इत्युक्तम्; कथं पुनराशङ्केति, तत्राह—**यद्यपि श्रुतिरिति।।** "आदित्यो यूपः" इत्यादौ प्रमाणान्तरेण विषयापहारेऽन्यपरता दृष्टा। अतः श्रुत्यर्थे प्रमाणान्तरविरोधो नास्तीति न नियम इति भावः। यच्चोक्तं तर्कस्याप्रतिष्ठितत्वं, तत्राह—**तर्कोऽपीति।।** धूमादग्निज्ञानस्य प्रतिष्ठितत्वदर्शनात् भवत्वेवं तर्कस्य स्वविषये प्रतिष्ठितत्वम्; एतावता समन्वये किमायातमित्याह—**किमत इति।।** पूर्ववाद्याह—**यदीति।।** यद्येवं तव बुभुत्सा वर्तते तर्हि इदं वक्ष्यमाणमयुक्तम्, प्रत्यक्षस्य प्रमाणज्येष्ठत्वात् विरोधे श्रुतेरुपचरितार्थत्वमेव युक्तमिति भावः। श्रुतेः स्वार्थबोधनेनोपक्षयान्नान्यबाधकत्वम्; नापि श्रुतिविपरीतार्थग्राहि प्रमाणान्तरमस्तीत्याह—

भाष्यभावप्रकाशिका

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्।।१३।। तर्कबलेनैवेत्यवधारणमयोगव्यावृत्तिपरम्; प्रत्यक्षादिप्रमाणविरोधेनाप्याक्षेप-दर्शनात्। ननु श्रुत्येकसमधिगम्यत्वात् तर्कनिमित्त आक्षेपः पुनः किमिति क्रियत इत्याशङ्क्याह—**यद्यपीति।।** निर्णीतार्थश्रुति-विरोधे प्रमाणान्तरस्यैव [अ]प्रामाण्यम्, अनिर्णीता श्रुतिरनुमानविरोधेनोपचरितार्था ऽभ्युपगन्तव्येत्यर्थः। प्रमाणान्तरेण विषयापहारे प्रमाणान्तरस्य वा प्रत्यक्षादेर्विषयापहारे प्राप्ते सतीति योजना।। ननु तर्कस्याप्रतिष्ठितत्वमुक्तमिति, अत आह—**तर्कोऽपीति।।** यद्यपि तर्कस्य स्वविषयादन्यत्र [अप्र]वृत्तिरिति न श्रुत्या सहैकविषयत्वम्;

न्यायनिर्णयः

वैशेषिकादितर्कविरोधं समन्वयस्य परिहृत्याध्यक्षादिविरोधमाशङ्क्य परिहरति—**भोक्त्रापत्तेरिति।** अद्वितीयाद् ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः। स किं द्वैतग्राहिप्रत्यक्षादिना विरुध्यते न वेति तस्य तत्त्वावेदकत्वानावेदकत्वाभ्यां संदेहे जगत्कारणे तर्कस्याप्रतिष्ठितत्वेऽपि जगद्भेदे तस्य प्रतिष्ठितत्वसंभवादद्वैतासिद्धिरित्यभिसंधाय पूर्वपक्षयति—**अन्यथेति।** समन्वयस्याध्यक्षादिविरोधसमाधानात् पादादिसंगतिसौलभ्यम्। फलं तु पूर्ववत्। तर्कशब्दोऽनुमानविषयः, अवधारणमयोगव्यावृत्त्यर्थम्। आम्नायैकगम्ये मानान्तरनिमित्ताक्षेपस्यानवकाशत्वमाशङ्क्याह—**यद्यपीति।** निर्णीतार्थश्रुतिविरोधे मानान्तरस्यैवाप्रामाण्यम्; अनिर्णीतार्था तु श्रुतिर्मानान्तरविरोधे सत्युपचरितार्था स्यादित्यर्थः। मानान्तरेण श्रुतेर्विषयापहारे सत्यन्यपरतेत्यत्रोदाहरणमाह—**यथेति।** यत्तु तर्कस्याप्रतिष्ठितत्वान्न श्रुत्यर्थे तन्निमित्तस्याक्षेपस्य सावकाशत्वमिति, तत्राह—**तर्कोऽपीति।** श्रुतिवदित्यपेरर्थः। तर्कस्य स्वविषये प्रतिष्ठितत्वेऽपि श्रुत्या तुल्यविषयत्वाभावान्न तयोर्विरोधशङ्केति शङ्कते—**किमत इति।** श्रुत्या सहैकविषयत्वाभावेऽपि स्वविषयस्थापनेनार्थात् तर्कस्य तद्विरोधे श्रुतिरमानं तदुत्तरकालत्वात् तत्प्रवृत्तेरिति मत्वाऽऽह—**अत इति।** श्रुतेः स्वार्थबोधनोपक्षयादन्यबाधस्यानवकाशत्वान्न विरोधशङ्केति पुनः सिद्धान्ती शङ्कते—**कथमिति।** अद्वैतं स्वार्थं बोधयन्त्येव श्रुतिरर्थाद् द्वैतमपबाधमाना तद्विषयाध्यक्षादिभिर्विरुध्येतेति

१. 'किमतः? यद्येवम्', इति प्रकटार्थकृतां भाष्ययोजनाप्रकारः।

पुनः प्रमाणान्तरप्रसिद्धोऽर्थः श्रुत्या बाध्यत इति। अत्रोच्यते—प्रसिद्धो ह्ययं भोक्तृभोग्यविभागो लोके—भोक्ता चेतनः शारीरो, भोग्याः शब्दादयो विषया इति। यथा भोक्ता देवदत्तो, भोज्य ओदन इति। तस्य च विभागस्याभावः प्रसज्येत यदि भोक्ता भोग्यभावमापद्येत, भोग्यं वा भोक्तृभावमापद्येत। तयोश्चेतरेतरभावापत्तिः परमकारणाद् ब्रह्मणोऽनन्यत्वात् प्रसज्येत। न चास्य प्रसिद्धस्य विभागस्य बाधनं युक्तम्। '१यथा त्वद्यत्वे भोक्तृभोग्ययोर्विभागो दृष्टस्तथाऽतीतानागतयोरपि कल्पयितव्यः। तस्मात् प्रसिद्धस्यास्य भोक्तृभोग्यविभागस्याभावप्रसङ्गादयुक्तमिदं ब्रह्मकारणतावधारणमिति चेत् कश्चिच्चोदयेत्, तं प्रतिब्रूयात्—स्याल्लोकवदिति। उपपद्यत एवायमस्मत्पक्षेऽपि विभागः, एवं लोके दृष्टत्वात्। तथाहि—समुद्रादुदकात्मनोऽनन्यत्वेऽपि तद्विकाराणां फेनवीचीतरङ्गबुद्बुदादीनामितरेतरविभाग इतरेतरसंश्लेषादिलक्षणश्च व्यवहार उपलभ्यते। न च समुद्रादुदकात्मनोऽनन्यत्वेऽपि तद्विकाराणां फेनतरङ्गादीनामितरेतरभावापत्तिर्भवति। न च तेषामितरेतरभावानापत्तावपि समुद्रात्मनोऽन्यत्वं भवति। एवमिहापि न च

प्रकटार्थविवरणम्

कथं पुनरिति।। तत्र भोक्तृभोग्याभिन्नब्रह्मणो जगत्सर्गप्रतिपादकश्रुतिविपरीतार्थग्राहि प्रत्यक्षमस्तीत्याह—**उच्यत इत्यादिना।।** श्रुतेस्तद्बाधकत्वमप्यर्थादस्तीत्याह—**तस्य च विभागस्येति।।** एकस्मादभेदात् भोक्तृभोग्ययोरप्येकत्वं प्रसज्येत; अन्यथा ब्रह्मणोऽपि भेदप्रसङ्गात्; अतो भोक्तृभोग्याभिन्नब्रह्मणो जगत्सर्गं ब्रुवाणया श्रुत्याऽर्थात् भेदो बाधितः स्यादिति भावः। अस्तु तर्हि बाध इत्यत्राह—**न चास्येति।।** बाधव्यवहाराभावादेव। नन्विदानीं बाधव्यवहाराभावेऽपि कालान्तरे भविष्यतीत्याशङ्क्याह—**यथा चाद्यत्व इति।।** विमतः कालो भोक्त्रादिबाधकव्यवहारवान्न भवति, कालत्वादिदानीन्तनकालवदित्यर्थः। पूर्वपक्षमुपसंहरति—**तस्मादिति।।**

भाष्यभावप्रकाशिका

तथाप्यर्थात् स्वविषयस्याव्यवस्थापनेन विरोधो भवति। तर्कविरोधे च श्रुतिरप्रमाणम्; तदुत्तरकालभावित्वाच्च श्रुतिप्रवृत्तेरित्यर्थः। प्रत्यक्षविरोधं तावदाह—**प्रसिद्धो हीति।।** ननु भोक्तृभोग्ययोरेकता नास्माभिः कथ्यत इति, तत्राह—**तयोश्चेति।।** अनुमानविरोधमाह—**यथा चाद्यत्व इति।।** यद्यतीतानागतयोर्विभागो न भवेत्, तदा तेनैवाद्यतनस्य बाधः स्यात् स्वप्नदर्शने[न स्ये]व जाग्रद्दर्शनेन, न त्वेतदस्ति; अबाधिताद्यतनविभागेन तयोरपि विभागानुमानादित्यर्थः। इमामाशङ्कामापाततो लोकप्रसिद्धदृष्टान्तप्रदर्शनेन निराकरोति—**स्याल्लोकवदिति** सूत्रभागेन। तद्व्याचष्टे—**उपपद्यत इति।।** ननु फेनादीनां भिन्नत्वे तदभेदात् समुद्रस्यापि भिन्नत्वमिति, अत

न्यायनिर्णयः

पूर्ववाद्याह—**उच्यत इति।** तत्रादावध्यक्षविरोधं श्रुतेरादर्शयति—**प्रसिद्धो हीति।** लौकिकीं प्रसिद्धिमेव दृष्टान्तद्वारेणाभिनयति—**भोक्तेति।** प्रसिद्धो विभागस्तथैवास्ताम्, श्रुतिश्च स्वार्थं बोधयिष्यति, का हानिरित्याशङ्क्याह—**तस्य चेति।** भोक्तृभोग्ययोरेकता नास्माभिरुक्तेत्याशङ्क्याह—**तयोश्चेति।** अस्तु तर्हि श्रुत्याऽद्वैतं बोधयन्त्या बाधोऽस्येति, नेत्याह—**न चेति।** श्रुतेरुपचरितार्थत्वेन सावकाशत्वान्निरवकाशं प्रत्यक्षं बलवदिति भावः। अनुमानविरोधमधुना श्रुतेरुपन्यस्यति—**यथेति।** विमतौ भोक्तृभोग्यविभागव्यवहारवन्तौ, कालत्वात्, वर्तमानकालवत्। यद्वा विमतो विभागोऽबाधितः, विभागत्वात्, इदानीन्तनविभागवदित्यर्थः। उक्ताध्यक्षानुमानविरोधादसिद्धिः समन्वयस्येत्युपसंहरति—**तस्मादिति।** तामिमामाशङ्कामापाततो लोकसिद्धदृष्टान्तावष्टम्भेन प्रत्याचष्टे—**तं प्रतीति।** सूत्रावयवं व्याकरोति—**उपपद्यत इति।** लोके दृष्टत्वमेव स्फुटयति—**तथाहीति।** इतरेतरसंश्लेषादीत्यादिशब्देन विश्लेषपरिमाणविशेषादि गृह्यते। ननु फेनादीनां समुद्रादभेदे परस्परभावापत्तेर्नैतरेतरविभागादि संभवति। न खल्वेकस्मादभिन्नानां मिथो भिन्नत्वमेकस्यैवोपपद्यते, तत्राह—**न चेति।** फेनादीनां मिथो भिन्नत्वे नैकस्मादभिन्नत्वमन्यथा समुद्रस्यापि तदभेदेन भेदप्रसङ्गादित्याशङ्क्याह—**न च**

१. 'यथा च' इति पा.।

भोक्तृभोग्ययोरितरेतरभावापत्तिः, न च परस्माद् ब्रह्मणोऽन्यत्वं भविष्यति। यद्यपि भोक्ता न ब्रह्मणो विकारः, 'तत्सृष्ट्वा। तदेवानुप्राविशत्' (तै.उ. २।६) इति स्रष्टुरेवाविकृतस्य कार्यानुप्रवेशेन भोक्तृत्वश्रवणात्, तथापि कार्यमनुप्रविष्टस्यास्त्युपाधिनिमित्तो विभागः, आकाशस्येव घटाद्युपाधिनिमित्त इत्यतः परमकारणाद् ब्रह्मणोऽनन्यत्वेऽप्युपपद्यते भोक्तृभोग्यलक्षणो विभागः समुद्रतरङ्गादिन्यायेनेत्युक्तम्।।१३।।

।।इति पञ्चमं भोक्त्रापत्त्यधिकरणम्।।

शारीरकन्यायसंग्रहः

६।।आरम्भणाधिकरणम्।।सू. १४-२०।।

तदनन्यत्वमारम्भणशब्दादिभ्यः।।१४।।

अत्राङ्गीकृतप्रपञ्चस्य मिथ्यात्वं साध्यते। आगमेनापेक्ष्यमाणत्वात्, अदृष्टव्यभिचारित्वात्, अव्याकुलत्वात्, अन्यत्रानवकाशत्वात्, पूर्वभावित्वेन प्रतिष्ठितत्वात्, पदपदार्थादिव्यवहाराविसंवादेनार्थतोऽपि मुख्यत्वाच्च तत्त्वावेदकतया स्वभावतो भेदप्रमापकैः प्रत्यक्षादिभिर्बाध्यतयोपचरितार्थः समन्वय इति प्राप्तम्। तत्र श्रुत्यैव प्रत्यक्षागमयोस्तत्त्वातत्त्वविषयतया व्यवस्थापनात् निरपेक्षप्रमाणत्वे सति उत्तरभावित्वात्, असम्भावितदोषत्वात्, अद्वितीयवस्तुपरतया [1]सिद्धभेदाश्रयकर्मवाक्यैरव्याकुलत्वात्, अन्यत्रानवकाशत्वात्, अदृष्टव्यभिचारित्वाच्च समन्वयस्य; तेन प्रत्यक्षादेरागमेनैव मायावस्तुविषयतया व्यवस्थापितस्य, प्रमितावनपेक्ष्यमाणस्य, देहात्मप्रत्ययवदर्थक्रियासमर्थवस्तुविषयतया च ब्रह्मप्रमितिकार्यसमर्थस्य, भेदाभेदादिविरुद्धवस्तुविषयतया समाकुलस्य, काचकामलादिदोषवत्तया सम्भावितकारणदोषस्यातात्त्विकमायावस्तुविषयता सावकाशस्य, पूर्वभावितयोत्तरभाविप्रमाणबाध्यस्य देहात्मप्रत्ययस्येव समन्वयेन बाधान्नाद्वितीयनिष्प्रपञ्चब्रह्मप्रतिपादनपरः समन्वयो बाध्यत इत्यधिकरणार्थः।

अस्यार्थस्य सिद्धये, द्वैतस्य प्रत्यक्षादिविषयस्य सूत्रैर्यथाक्रमं मिथ्यात्वं साध्यते। अत्र तु वाचारम्भणशब्दात्, "मृत्तिकेत्येव

प्रकटार्थविवरणम्

भोक्तृभोग्यविभागप्रत्यक्षविरुद्धः समन्वय इति पूर्वः पक्षः। सिद्धान्तमाह—**स्याल्लोकवदिति**।। समुद्रस्य वीच्यादिकारणत्वे यत्प्रमाणं तस्य यथा वीच्यादिभेदग्राहकप्रमाणविरोधो नास्ति, तथा ब्रह्मणोऽपि भोक्त्रादिकारणत्वप्रतिपादकवेदस्य भोक्त्रादिभेदग्राहकप्रमाणविरोधो न भविष्यति, प्रातिभासिकभेदाभ्युपगमादिति भावः। ननु समुद्रतरङ्गदृष्टान्तो नानुकूलः, कार्यत्वाभावाद् भोक्तुरित्याशङ्क्याह—**यद्यपि भोक्तेति**।। निरुपाधिककार्यत्वाभावेऽपि सोपाधिकं कार्यत्वं भोक्तुरस्तीति भावः।। इति पञ्चमं भोक्त्रापत्त्यधिकरणम्।।

भाष्यभावप्रकाशिका

आह—**न चेति**।। दार्ष्टान्तिकमाह—**एवमिहेति**।। ननु फेनादीनां समुद्रकार्यत्वात् तदभेदः संभवति; जीवानां तु ब्रह्मकार्यताऽभावात् कथं तदभेद इत्याशङ्क्याह—**यद्यपीति**।। ननु तर्ह्यत्यन्ताभेद एवेति भोक्तृविभागाभावाद् भोग्यस्यापि प्रतिनियमो न स्यादिति, तत्राह—**तथापीति**।।१३।। इति पञ्चमं भोक्त्रापत्त्यधिकरणम्।।

न्यायनिर्णयः

तेषामिति। दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह—**एवमिति**। इहेति ब्रह्मवादोक्तिः। फेनादीनां समुद्रकार्यत्वात् तदभेदेऽपि जीवानां ब्रह्माकार्यतया तदभेदायोगादस्ति वैलक्षण्यमित्याशङ्क्याह—**यद्यपीति**। तर्हि जीवब्रह्मणोरत्यन्ताभेदाद् भोक्तृविभागाभावाद् भोग्यस्यापि प्रतिनियमासिद्धेर्विभागावगाहिप्रमाणविरोधतादवस्थ्यमित्याशङ्क्याह—**तथापीति**। दार्ष्टान्तिकमुपसंहरति—**इत्यत इति**। **समुद्रतरङ्गादिन्यायेन** समुद्रादभेदेऽपि फेनतरङ्गादीनां मिथोभेददृष्टान्तेनेत्यर्थः। विभागोपपत्तौ तद्विषयाध्यक्षादेरविरुद्धतेति युक्तमेव जगतो ब्रह्मकारणत्वमुक्तमित्यधिकरणार्थं निगमयति—**उक्तमिति**।।१३।इति पञ्चमं भोक्त्रापत्त्यधिकरणम्।।

१. **सिद्धेति**। लोकसिद्धेत्यर्थः।

६।।आरम्भणाधिकरणम्।।सू. १४-२०।।

तदनन्यत्वमारम्भणशब्दादिभ्यः।।१४।।

अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं स्याल्लोकवदिति परिहारोऽभिहितः। न त्वयं

शारीरकन्यायसंग्रहः

सत्यम्'' इत्यवधारणशब्दात्, ''इन्द्रो मायाभिः'' ''मायां तु प्रकृतिं विद्यात्'' इत्यादिमायाशब्दात्, ''नेह नानास्ति किञ्चन'' इति प्रतिपन्नोपाधौ निषेधादिशब्दात्, ''यत्र हि द्वैतमिव भवति'' इति इवशब्दात्, ''नासदासीन्नो सदासीत्'' ''तम आसीत्'' इति सदसद्विलक्षणतमःशब्दाच्च मुख्यया वृत्त्या द्वैतस्य मिथ्यात्वमुक्तम् ''आरम्भणशब्दस्तावत्'' इत्यादना भाष्येण। तथा ''ऐतदात्म्यमिदं सर्वम्'' इत्यादिना च भाष्येण अद्वितीयनिष्प्रपञ्चब्रह्मपरसमन्वयश्रुत्यर्थापत्त्या द्वैतस्य मिथ्यात्वमुक्तम्। ''स्थितिगतिवत्स्यादिति चेन्न कूटस्थनित्यस्येति विशेषणात्'' इति भाष्येण सत्यज्ञानानन्दकूटस्थनिरवयवापरिच्छिन्नब्रह्मणः स्वास्थ्यात् कयाचिदपि कलया अप्रच्युतस्वभावस्य सर्वप्रकारतद्विपरीतकार्याकारपरिणामश्रुत्यन्यथानुपपत्तिः कार्याकारस्य मिथ्याविवर्ततां दर्शयति, रजतादिविवर्ते तद्विपरीतशुक्तिकाया अप्रच्युतेः, घटपरिणामे तद्विपरीतपिण्डनिवृत्तेश्चेति दर्शितम्। एवं त्रीणि प्रमाणान्युक्तानि।।

भावे चोपलब्धेः।।१५।। कार्यं सर्वं स्वानुगते कारणस्वभावे कल्पितम्, तस्मिन्ननुगतस्वभावे सत्येव उत्पत्तिस्थितिमत्त्वात्, यस्य यस्मिन्ननुगतस्वभावे सत्येव उत्पत्तिस्थितिमत्त्वं, तत् तस्मिन् कल्पितम्, यथा व्योम्नि कार्ष्ण्यम्। तथा, इदं कार्यं स्वानुगते एकस्मिंश्चिद्वस्तुनि परिकल्पितम्, प्रत्येकमेकस्वभावानुविद्धत्वे सति विभक्तत्वात्, यदेवं तत्तथा यथा चन्द्रभेदः इत्याद्यनुमानमुक्तम्।

भावाच्चोपलब्धेः। लोके प्रतिपन्ननिरपेक्षोपाधौ प्रतिपन्नस्य तत्रैव निषेध्यमानत्वं मिथ्यात्वं नाम। ततश्च प्रतिपन्नस्य अभावविशिष्टाधिष्ठानयाथात्म्यप्रत्यक्षज्ञानं मिथ्यात्वेऽपि प्रत्यक्षमुच्यते, प्रतिपन्नोपाधौ निषेधप्रतियोगितया तस्यापि तज्ज्ञानेऽवभासनात्। तथा घटोऽस्ति, पटोऽस्ति, कालोऽस्ति—इत्यस्त्यर्थोपाधौ प्रतिपन्नानां घटपटतदुपाधिकालादीनामभावविशिष्टतया स एवास्तीत्यर्थः प्रत्यक्षेणावगम्यते—घटो नास्ति, पटो नास्ति, कालो नास्ति इति ; न च कालभेदेन व्यवस्था, तस्यापि निषेधात्, अस्त्यर्थे कालान्तराभावाच्च; तस्मात् स्वप्रतिपत्त्युपाधौ घटाद्यभावविशिष्टास्त्यर्थप्रत्यक्षमेव घटादिमिथ्यात्वेऽपि प्रत्यक्षमिति प्रत्यक्षोपन्यासः कृतः।।

सत्त्वाच्चावरस्य।।१६।। असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्।।१७।। युक्तेः शब्दान्तराच्च।।१८।। पटवच्च।।१९।। यथा च प्राणादि।।२०।। ''सदेव सोम्येदमग्र आसीत्'' ''आत्मा वा इदमेक एवाग्र आसीत्'' इति चावधारणादि प्रलयश्रुत्याऽपि स्वोपाधौ ब्रह्मणि सह कालेन कार्योपाधिना प्रपञ्चस्याभावं प्रतिपादयन्त्या द्वैतस्य मिथ्यात्वं दर्शितम्, स्वोपाधावविद्यमानस्य मिथ्यात्वादिति। एवं प्रत्यक्षानुमानागमार्थापत्तिभिर्द्वैतस्य मिथ्यात्वप्रदर्शनेन समन्वयस्याबाधो दर्शितः। नन्वेतान्यपि द्वैतविषयत्वान्न मिथ्यात्वं व्यवस्थापयितुमलम्; तन्न, प्रपञ्चोपाधौ मिथ्यात्वस्य बाधाभावात् तत्र प्रामाण्यसिद्धेः। एवं वैदिकसाध्यसाधनप्रमाणप्रमेयसम्बन्धादीनां स्वोपाधिबाधाभावादेव प्रामाण्यसिद्धेः बाध्यमानप्रपञ्चधर्मतया मिथ्यात्वस्याप्यनिर्वचनीयत्वात् परमार्थसत्यमेकमेव ब्रह्मेति सिद्धम्।।

प्रकटार्थविवरणम्

तदनन्यत्वमारम्भणशब्दादिभ्यः।। अधिकरणसङ्गतिमाह—**अभ्युपगम्य चेममिति।।** अद्वितीयब्रह्मपरः समन्वयो विषयः।

भाष्यभावप्रकाशिका

तदनन्यत्वमारम्भणशब्दादिभ्यः।।१४।। पूर्वं प्रत्यक्षादीनां तत्त्वावेदनलक्षणं प्रामाण्यमभ्युपगम्य परिणामवादाश्रयणेन

न्यायनिर्णयः

परिणामवादमवलम्ब्यापाततो विरोधं समाधाय विवर्तवादमाश्रित्य परमसमाधानमाह—**तदनन्यत्वमिति।** अद्वितीयब्रह्मणो

विभागः परमार्थतोऽस्ति, यस्मात् तयोः कार्यकारणयोरनन्यत्वमवगम्यते। कार्यमाकाशादिकं बहुप्रपञ्चं जगत्, कारणं परं ब्रह्म, तस्मात् कारणात् परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः कार्यस्यावगम्यते। कुतः? आरम्भणशब्दादिभ्यः। आरम्भणशब्दस्तावत्, एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय दृष्टान्तापेक्षायामुच्यते— 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छा.उ. ६।१।४) इति। एतदुक्तं भवति—एकेन मृत्पिण्डेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृन्मयं

प्रकटार्थविवरणम्

तस्य भेदग्राहकप्रत्यक्षादिविरोधोऽस्त्युत नेति सन्देहः। पूर्वाधिकरणेऽभ्युपगतप्रामाण्यस्य प्रत्यक्षादेः सत्यभेदविषयतया तत्त्वावेदकत्वादस्ति विरोध इति पूर्वः पक्षः। सिद्धान्तमाह—**न त्वयं विभाग इति**। आगमाद्भेदस्य मिथ्यात्वावगमात् तद्ग्राहकाणां प्रत्यक्षादीनां देहात्मप्रत्ययवद् व्यावहारिकत्वात् देहव्यतिरिक्तात्मग्राहकप्रमाणस्याविरोधवदद्वैतागमस्याप्यविरोध इति भावः। ब्रह्मव्यतिरेकेणाभाव इत्यभावशब्दः परमार्थसन्न भवतीत्यनेनाभिप्रायेण, तुच्छव्यावृत्तिलक्षणसत्त्वाभ्युपगमात् विकाराभ्युपगमाच्चेति। आरम्भणशब्दार्थं दर्शयितुं कृत्स्नमेव वाक्यं व्याख्याति—**एतदुक्तं भवतीति**॥

भाष्यभावप्रकाशिका

परिहार उक्तः, इदानीं तदेव नास्तीति परिहाररहस्यमाह—**अभ्युपगम्येति**॥ ननु कार्यस्य कारणादभिन्नत्वे कारणवदेव सत्त्वात् कारकव्यापारानर्थक्यं स्यात्। न चाभिव्यक्त्यर्थः कारकव्यापारः; अभिव्यक्तेरपि कारणात्मना सत्त्वात्, असत्त्वे व्यङ्ग्यस्यापि तद्वत्प्रसङ्गः। किञ्च न विद्यमानस्येन्द्रियादिसमवधाने सत्यनभिव्यक्तिरप्युपपन्ना। न च—कार्यान्तरप्रतिबन्धाद् विद्यमानमपि कार्यं नोपलभ्यत इति—शङ्कनीयम्; प्रतिबन्धककार्यान्तराणामपि कारणात्मना सदातनत्वेन सदैव कार्यस्यानुपलम्भप्रसङ्गात्, कादाचित्कत्वे च तेषां न कारणात्मकत्वम्। नित्यत्वानित्यत्वलक्षणविरुद्धधर्मसंसर्गस्य भेदकत्वात्। न च भेदे कार्यकारणभावासंभवः; कुलालघटयोर्भेदेऽपि तस्य दृष्टत्वात्। भिन्नत्वाविशेषेऽपि समवायवशादुपादानोपादेयभावसंभवात्, अभेदे च कारणरूपवत् तदनुपपत्तेः। अतो नान्यत्वं [नानन्यत्वं] कार्यकारणयोरिति, अत आह—**व्यतिरेकेणाभाव इति**॥ अयं भावः—न वयमनन्यत्वमित्यभेदं ब्रूमः किन्तु भेदाभावम्। अतो नाभेदाश्रयदोषप्रसङ्गः। तेन [अ]भेदनिराकरणमस्माकमनिर्वचनीयवादिनामनुरूपमेवेति। भेदनिषेधहेतुं व्याचष्टे—**आरम्भणेति**॥ ननु अयमारम्भणशब्दो जगद्विषयो न भवति; घटादिविषयत्वात्, तेन कथं जगतो मिथ्यात्वं साध्यत इत्याशङ्क्य जगतो मिथ्यात्वप्रसाधनायोपादीयमानदृष्टान्तस्थ-वाचारम्भणत्वं दार्ष्टान्तिकेऽप्युपादेयमित्यभिप्रेत्य परिहरति—**एकविज्ञानेनेति**॥

न्यायनिर्णयः

जगत्सर्गवादिनः समन्वयस्य पूर्ववद्भेदग्राहिप्रत्यक्षादिविरोधसंदेहे पूर्वाधिकरणेऽपि भेदग्राहिमानाविरोधोपपादनात् पुनरुक्तिमाशङ्क्य संगतिं वदन्नगतार्थत्वमाह—**अभ्युपगम्येति**। अङ्गीकृत्य हि भेदग्राहिप्रमाणस्य प्रामाण्यं भेदाभेदयो रूपभेदेन विरोधः समाहितः। सम्प्रति स्वीकृतं प्रामाण्यं तत्त्वावेदकत्वात् प्रच्याव्य व्यावहारिकत्वे व्यवस्थाप्यते। तथा च विषयभेदादपौनरुक्त्यम्। संगतिफले तु पूर्ववदिति भावः। यथोक्तविभागस्य वस्तुतोऽसत्त्वे हेतुत्वेन तदनन्यत्वमिति सूत्रावयवं विभजते—**यस्मादिति**। कार्ये विप्रतिपत्तिनिरासार्थं विशिनष्टि—**कार्यमिति**। कारणेऽपि विप्रतिपत्तिं निराकर्तुं विशेषमादत्ते—**कारणमिति**। कार्यकारणयोरनन्यत्वमित्युक्ते मिथोऽनन्यत्वं शङ्कितं व्यावर्तयति—**तस्मादिति**। ननु कार्यप्रपञ्चस्य भेदाभेदाभ्यामनिर्वाच्यतामिच्छन् कारणात् परमार्थतोऽनन्यत्वं व्याचक्षाणः स्वोक्तिविरोधं कथं नाधिगच्छति, तत्राह—**व्यतिरेकेणेति**। यस्मादेवमवगम्यते तस्मात् परमार्थतो विभागो नास्तीति तद्ग्राहि मानं व्यावहारिकमानत्वात् तात्त्विकमानस्य समन्वयस्याविरोधीत्यर्थः। कार्यस्य कारणातिरेकेणाभावे हेतुं पृच्छति—**कुत इति**। बुभुत्सितहेतुविषयं सूत्रभागमवतारयति—**आरम्भणेति**। तत्र भेदनिषेधहेतुमारम्भणशब्दं व्याकरोति—**आरम्भणशब्दस्तावदिति**। घटादिविषयत्वादेष शब्दो जगद्विषयो न भवति, तत्कथं मिथ्यात्वं तेन सिध्यतीत्याशङ्क्य जगतो मिथ्यात्वसाधनार्थमादिष्टदृष्टान्तनिविष्टं वाचारम्भणत्वं दार्ष्टान्तिकेऽपि साम्यार्थमास्थेयमित्यभिप्रेत्याह—**एतदुक्तमिति**। परमार्थतो विज्ञातमिति संबन्धः। कथमन्यस्मिन्विदितेऽन्यद्

घटशरावोदञ्चनादिकं मृदात्मकत्वाविशेषाद् विज्ञातं भवेत्; यतो वाचारम्भणं विकारो नामधेयम्, वाचैव केवलमस्तीत्यारभ्यते विकारो घटः शराव उदञ्चनं चेति; न तु वस्तुवृत्तेन विकारो नाम कश्चिदस्ति; नामधेयमात्रं ह्येतदनृतम्, मृत्तिकेत्येव सत्यमिति। एष ब्रह्मणो दृष्टान्त आम्नातः। तत्र श्रुताद् वाचारम्भणशब्दाद् दार्ष्टान्तिकेऽपि ब्रह्मव्यतिरेकेण कार्यजातस्याभाव इति गम्यते। पुनश्च तेजोबन्नानां ब्रह्मकार्यतामुक्त्वा तेजोबन्नकार्याणां तेजोबन्नव्यतिरेकेणाभावं ब्रवीति—'अपागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्' (छा.उ. ६।४।१) इत्यादिना। आरम्भणशब्दादिभ्य इत्यादिशब्दात् 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' (छा.उ. ६।८।७), 'इदं सर्वं यदयमात्मा' (बृ.उ. २।४।६), 'ब्रह्मैवेदं सर्वम्' (मु.उ. २।२।११), 'आत्मैवेदं सर्वम्' (छा.उ. ७।२५।२), 'नेह नानाऽस्ति किंचन' (बृ.उ. ४।४।१९) इत्येवमाद्यप्यात्मैकत्वप्रतिपादनपरं वचनजातमुदाहर्तव्यम्। न चान्यथैकविज्ञानेन

प्रकटार्थविवरणम्

यत्पुनः **भास्करेण** व्याख्यातम्—"विकारो वाच्यः, नामधेयं वाचकम्; एतदुभयं वाचो वागिन्द्रियस्यारम्भणम्, वागिन्द्रियं ह्युभयमालम्ब्य व्यवहारं प्रवर्तयति" इति, तदसत्, पूर्वापरासङ्गतेः; पूर्वभागे हि मृद्विज्ञानेन मृत्कार्यविज्ञानं प्रस्तुतम्; तत्र हेत्वाकाङ्क्षायां मृत्सत्तयैव तत्कार्यस्य सत्ता, पृथक्सत्त्वं नास्तीत्येतदेव वक्तव्यम्, न त्वकिञ्चित्करं वाच उभयारम्भकत्वम्, परत्रापि मिथ्याविरोध्यर्थाभिधायिनं सत्यशब्दं मृद्येव प्रयुञ्जान आम्नायो विकारे पूर्वत्रानृतत्वमुक्तं सूचयति। यदपि **केशवेनावादि**—"वाचारम्भणश्रुत्या कारणात्कार्यस्यात्यन्तिकभेदो निषिध्यते; स्वरूपेण तु कार्यस्य सत्त्वमेव" इति, तत्र स्वरूपेण सत्त्वमिति कोऽर्थः? किं कारणसत्तैव कार्यस्वरूपसत्ता, किं वा सत्तान्तरम्? तत्राद्ये न विवादः। द्वितीये नैकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धिः, [1]कारणसत्ता कार्यसत्तापरिज्ञानाभावात्; [2]अभेदात् ज्ञाने भेदादज्ञानमपि स्यात्। मम त्वनिर्वाच्यानां विकाराणां कारणसत्तयैव सद्व्यवहारगोचरत्वात् कारणसत्तापरिज्ञाने सर्वसत्तापरिज्ञानं सिध्यतीति।

भाष्यभावप्रकाशिका

ननु कथमन्यस्मिन्विज्ञातेऽन्यद्विज्ञातं स्यादिति? अत आह श्रुतिः—**वाचारम्भणमिति**।। ननु मृत्पिण्डग्रहणे तद्विरुद्धघटादीनां कथं ग्रहणमिति? तत्राह—**परमार्थत इति**।। ननु विकारवत् कारणमप्यनृतमेव, तत्रापि शब्दमात्रत्वादिति, अत आह—**मृत्तिकेति**।। तथापि ब्रह्मणि किमायातमिति? अत आह—**एष ब्रह्मण इति**।। ब्रह्मकार्याणां मिथ्यात्वं तत्कार्याणां मिथ्यात्वप्रदर्शनेनापि प्रदर्श्यत इत्याह—**पुनश्चेति**।। आदिशब्देनान्याऽपि श्रुतिः प्रमाणतया संगृहीतेत्याह—**ऐतदात्म्यमिति**।। एकविज्ञानेन सर्वविज्ञानश्रवणानुपपत्तिरप्यभेदप्रमाणमादिशब्देन संगृहीतमित्याह—**न चान्यथेति**।। यदि ब्रह्मैव तत्त्वं जगतो भवेत्, तदा तज्ज्ञानेन

न्यायनिर्णयः

विज्ञातं स्यादित्याशङ्क्याह—**यत इति**। कारणमपि विकारवदनृतमेव शब्दमात्रत्वाविशेषादित्याशङ्क्याह—**मृत्तिकेति**। एवशब्देनेतिशब्दः संबध्यते। तथापि ब्रह्मणि किमायातं, तत्राह—**एष इति**। दृष्टान्तस्य कारणातिरिक्तकार्याभावविषयत्वेऽपि दार्ष्टान्तिकस्य नैवमित्याशङ्क्य फलितमाह—**तत्रेति**। संनिहितो दृष्टान्तः सप्तम्यर्थः। प्रकारान्तरेणारम्भणशब्दं व्याचष्टे—**पुनश्चेति**। दृष्टान्तवशाद्दार्ष्टान्तिके ब्रह्मातिरेकिकार्याभावप्रतिपत्त्यनन्तरं चेत्यर्थः। ब्रह्मकार्याणां मिथ्यात्वं तत्कार्याणां मिथ्यात्वोक्त्याऽपि दर्शितमिति भावः। आदिशब्दं व्याख्याति—**आरम्भणेति**। एवमादीत्यादिशब्दात् 'तदात्मानं स्वयमकुरुत' इत्यादि गृहीतम्। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानुपपत्तिरपि भेदाभावे मानतया सौत्रेणादिशब्देन गृहीतेत्याह—**न चेति**। यदि जगतो ब्रह्मैव तत्त्वं तदा तज्ज्ञानेन तत्त्वतो ज्ञायेत, यथा

---

१. 'कारणसत्तापरिज्ञानेऽपि' इति पाठः स्यात्। २. आत्यन्तिकभेदनिषेधे भेदाभेदाङ्गीकारात् अभेदांशमादाय प्रतिज्ञोपपत्तिं निराचष्टे—**अभेदादिति**।

सर्वविज्ञानं संपद्यते। तस्माद् यथा घटकरकाद्याकाशानां महाकाशानन्यत्वम्, यथा च मृगतृष्णिकोदकादीनामूषरादिभ्योऽनन्यत्वं दृष्टनष्टस्वरूपत्वात् स्वरूपेणानुपाख्यत्वात्, एवमस्य भोग्यभोक्त्रादिप्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभाव इति द्रष्टव्यम्।

नन्वनेकात्मकं ब्रह्म, यथा वृक्षोऽनेकशाख एवमनेकशक्तिप्रवृत्तियुक्तं ब्रह्म। अत एकत्वं नानात्वं चोभयमपि सत्यमेव। यथा वृक्ष इत्येकत्वं शाखा इति नानात्वम्; यथा च समुद्रात्मनैकत्वं फेनतरङ्गाद्यात्मना नानात्वम्; यथा च मृदात्मनैकत्वं घटशरावाद्यात्मना नानात्वम्। तत्रैकत्वांशेन ज्ञानान्मोक्षव्यवहारः सेत्स्यति; नानात्वांशेन तु कर्मकाण्डाश्रयौ लौकिकवैदिकव्यवहारौ सेत्स्यत इति। एवं च मृदादिदृष्टान्ता अनुरूपा भविष्यन्तीति। नैवं स्यात्। 'मृत्तिकेत्येव सत्यम्' इति प्रकृतिमात्रस्य दृष्टान्ते सत्यत्वावधारणात्।

प्रकटार्थविवरणम्

एवं तावदागमाद् विकारानृतत्वमुक्त्वा प्रक्रान्तमुपसंहारच्छलेनाह—**तस्माद्यथा घटकरकाद्याकाशानामिति**।। जीवेश्वरादिविभागो मिथ्या; विभागत्वादौपाधिकत्वाद्वा, घटाकाशादिविभागवत्। भूधरादिकमसत्यम्, अन्तवत्त्वात् कार्यत्वाद्वा, ऊषरोदकवदित्यर्थः।। **अनुपाख्यत्वादिति**।। वास्तवसत्त्वविधुरत्वादित्यर्थः।।

एवं स्वमतानुसारेण व्याख्यायाचार्यदेश्यव्याख्यामनुभाषते—**नन्वनेकात्मकमिति**।। अनेकाभिः शक्तिभिः प्रवृत्तयः अधिकाराः; तद्युक्तं ब्रह्म। दूषयति—**नैवं स्यात्, मृत्तिकेत्येव सत्यमिति**।। यदि भिन्नाभिन्नं ब्रह्माभिप्रेतं स्यात् ततो विकारभेदोऽपि सत्य एवेति

भाष्यभावप्रकाशिका

तत्त्वतो ज्ञायेत, यथा रज्जुज्ञानेन भुजगादितत्त्वम्। तत्त्वज्ञानमेव च ज्ञानम्, अतोऽन्यस्य मिथ्याज्ञानतयाऽज्ञानत्वादित्यर्थः। जीवप्रपञ्चयोर्ब्रह्मणोऽनन्यत्वे यथाक्रमं दृष्टान्तमाह—**तस्माद्यथेति**।। कथमूषरादिभ्योऽनन्यत्वमिति? तत्राह—**दृष्टनष्टेति**।।

सम्प्रति भेदाभेदवादमुत्थापयति—**नन्वनेकात्मकमिति**।। ननु एकस्यानेकात्मकत्वं विरुद्धमित्याशङ्क्याह—**यथा वृक्ष इति**।। उभयसत्यत्वमपि लोकप्रसिद्धमित्याह—**यथा वृक्ष इति**।। ननु दृष्टान्तसामर्थ्यात् सम्भावनैव भवति, न तु निश्चयः प्रमाणं विनेत्याशङ्क्य व्यवस्थानुपपत्तिं प्रमाणमाह—**तत्रैकत्वेति**।। विशिष्टदृष्टान्तप्रदर्शनानुपपत्तिरप्यनेकात्मकत्वे प्रमाणमित्याह—**एवं चेति**।। जीवस्य कार्यप्रपञ्चस्य च ब्रह्मणो भिन्नाभिन्नत्वं प्रमाणसिद्धमिति भावः।। इदानीमनेकान्तवादं दूषयति—**नैवं स्यादिति**।।

न्यायनिर्णयः

रज्जुतत्त्वज्ञानेन भुजङ्गादितत्त्वम्। तत्त्वज्ञानमेव च ज्ञानं, ततोऽन्यस्य मिथ्याज्ञानत्वेनाज्ञानत्वादिति भावः। सिद्धान्तमुपसंहरति—**तस्मादिति**। जीवप्रपञ्चयोर्ब्रह्मणोऽनन्यत्वे क्रमेण दृष्टान्तद्वयम्। तेषामूषरादिभ्योऽनन्यत्वे हेतुमाह—**दृष्टेति**। कदाचिद् दृष्टं पुनर्नष्टम्। अनित्यमिति यावत्। तत्स्वभावत्वान्मृगतृष्णिकोदकादीनामूषरादिभ्यो भेदेन नास्तित्वम्। विमतमधिष्ठानातिरिक्तसत्ताशून्यं, सावधित्वात्, चिदात्मवदिति व्यतिरेकानुमानादित्यर्थः। दृष्टग्रहणसूचितं प्रतीतिकालेऽपि सत्ताराहित्यम्। तत्रैव हेत्वन्तरमाह—**स्वरूपेणेति**।

एकत्वैकान्ताभ्युपगमे द्वैतग्राहिप्रत्यक्षादिविरोधान्नाद्वितीये ब्रह्मणि समन्वयसिद्धिरिति पूर्वपक्षयन्ननेकान्तवादमुत्थापयति—**नन्विति**। एकस्यानेकात्मकत्वं विप्रतिषिद्धमित्याशङ्क्याह—**यथेति**। अनेकाभिः शक्तिभिश्चिद्रूपाभिस्तदधीनप्रवृत्तिभिश्च युक्तमिति यावत्। एकस्यानेकात्मकत्वे संभाविते फलितमाह—**अत इति**। उभयसत्यत्वमपि वृक्षदृष्टान्ते दृष्टमित्याह—**यथेति**। प्रतिपत्तिदार्ढ्यार्थमुदाहरणान्तरमाह—**यथा चेति**। अंशांशिभावेन जीवब्रह्मणोर्भिन्नाभिन्नत्वे दृष्टान्तावुक्त्वा कार्यकारणात्मना जगद्ब्रह्मणोस्तथात्वे दृष्टान्तमाह—**यथा चेति**। दृष्टान्तसामर्थ्यादुक्तार्थसंभावनायामपि मानं विना निर्धारणासिद्धिरित्याशङ्क्य व्यवस्थानुपपत्तिं प्रमाणयति—**तत्रेति**। विशिष्टदृष्टान्तप्रदर्शनानुपपत्तिरपि प्रकृतेऽर्थे ...मत्याह—**एवं चेति**। जीवजगतोर्ब्रह्मणो भिन्नाभिन्नत्वे प्रत्यक्षाद्यविरोधेऽपि, केवलभेदे [केवलाभेदे] तद्विरोधः स्यादेवेति प्राप्तभेदाभेदवादं दूषयति—**नैवमिति**। यदुक्तमेकत्वं

वाचारम्भणशब्देन च विकारजातस्यानृतत्वाभिधानात्। दार्ष्टान्तिकेऽपि 'ऐतदात्म्यमिदं सर्वं तत्सत्यम्' (छा.उ. ६।८।७) इति च परमकारणस्यैवैकस्य सत्यत्वावधारणात्। 'स आत्मा तत्त्वमसि श्वेतकेतो' इति च शारीरस्य ब्रह्मभावोपदेशात्। स्वयंप्रसिद्धं ह्येतच्छारीरस्य ब्रह्मात्मत्वमुपदिश्यते, न यत्नान्तरप्रसाध्यम्। अतश्चेदं शास्त्रीयं ब्रह्मात्मत्वमवगम्यमानं स्वाभाविकस्य शारीरात्मत्वस्य बाधकं संपद्यते, रज्ज्वादिबुद्ध्य इव सर्पादिबुद्धीनाम्। बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति यत्प्रसिद्धये नानात्वांशोऽपरो ब्रह्मणः कल्प्येत। दर्शयति च–'यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्येत्'

प्रकटार्थविवरणम्

कारणमात्रे सत्यतावधारणं न स्यादित्यर्थः। मम तु सांव्यवहारिकसत्यतानुपमर्देन दृष्टान्तो न विरुध्यते, अन्यथा दार्ष्टान्तिकव्याकोपात्। किञ्च यदि जीवगतः संसारः कल्पितः स्यात्, तदेव तस्यासंसारिब्रह्मात्मता घटते; अन्यथा सत्यतः 'संसारिणो ब्रह्मात्मतोपदेशासंभवप्रसङ्गादित्याह—**स आत्मा तत्त्वमसीति**।। ननु ब्रह्मांशस्य जीवस्य ज्ञानकर्मसमुच्चयानुष्ठानात् भाविब्रह्मभावापेक्षया तादात्म्योपदेशो भविष्यति; नेत्याह—**स्वयंप्रसिद्धं हीति**।। 'सोऽयं देवदत्तः' इतिवद् विशिष्टपरामर्शेन 'स्वरूपपर्यवसायि सामानाधिकरण्यम्, अन्यथा तत्त्वं भविष्यसि इति व्यपदेशप्रसङ्गादिति भावः। ननु बाधकादर्शनात् जीवस्य सत्यमेव संसारित्वम्, न ब्रह्मात्मत्वं स्वतःसिद्धमित्याशङ्क्याह—**अतश्चेदमिति**।। यतो जीवस्य ब्रह्मभावः प्रयत्नान्तरसाध्यो न भवति अत एव शास्त्रादवगम्यमानं जीवस्य ब्रह्मात्मत्वं नैसर्गिकमविद्यासिद्धस्य संसारित्वस्य बाधकं संपद्यत इत्यर्थः। ब्रह्मैवाहं न संसारीत्यस्तु बाधः; ततः किमित्याशङ्क्याह—**बाधिते चेति**।। स्वभावोऽविद्या; तत्कृतः स्वाभाविकः प्रमातृत्वप्रमुखः कर्तृत्वभोक्तृत्वलक्षणो

भाष्यभावप्रकाशिका

कार्यप्रपञ्चस्यापि ब्रह्मवत् सत्यत्वे तद्विशिष्टस्य जीवस्य तद्भावोपदेशोऽपि न सङ्गच्छत इत्याह—**स आत्मेति**।। ननु जीवस्य ज्ञानादिसाध्यमेकत्वम्, अतस्तदभिप्रायेणायमेकत्वोपदेश इति, अत आह—**स्वयंप्रसिद्धमिति**।। जीव-ब्रह्मणोः संसारित्वासंसारित्वेन विरुद्धस्वभावत्वादेकत्वानुपपत्तेः, तत् त्वं भविष्यसीति वाक्यस्य विपरिणामः कर्तव्य इत्याशङ्क्याह—**अतश्चेति**।। स्वाभाविकस्यानाद्यविद्याकृतस्य विरुद्धत्वस्य कल्पितत्वेनैकत्वोपपत्तौ विपरिणामो न कार्य इत्यर्थः।। यदुक्तम्—नानात्वांशेन लौकिक-वैदिकव्यवहारः सेत्स्यति—इति, तत्र वक्तव्यम्—एकत्वावगत्युत्तरकालीनव्यवहारसिद्धये भेदांशस्य सत्यत्वं कल्पितम्, किं वा प्राक्तनव्यवहारसिद्धय इति। न तावदाद्यः, उत्तरकालव्यवहाराभावादित्याह—**बाधिते चेति**।। प्रमातृत्वादिबाधात् तदाश्रयव्यवहारो नास्तीत्यर्थापत्तिरभिहिता, व्यवहाराभावे सम्प्रति श्रुतिमाह—**दर्शयतीति**।। अथोत्तरकल्पः ; तत्रापि प्राक्तनव्यवहारस्य

न्यायनिर्णयः

नानात्वं चोभयमपि सत्यमिति, तत्राह—**मृत्तिकेति**। न केवलमेवकारसामर्थ्याद् निकारानृतत्वम्, किंतु वाचारम्भणश्रुतेश्चेत्याह—**वाचारम्भणेति**। तथापि कथमाकाशादिविकारवैतथ्यम्, दार्ष्टान्तिके पूर्वोक्तावधारणादेरभावादित्याशङ्क्य तत्रापि दृष्टान्तनिविष्टार्थानुषक्तेर्मैवमित्याह—**दार्ष्टान्तिकेऽपीति**। किंच कार्यप्रपञ्चस्यापि ब्रह्मवत् सत्यत्वे तद्विशिष्टजीवस्य तद्भावोपदेशासिद्धिरित्याह—**स आत्मेति**। जीवस्य ब्रह्मैक्यं ध्यानादिसाध्यमभिसंधायोपदेशो भविष्यतीत्याशङ्क्याह—**स्वयमिति**। जीवब्रह्मणोः संसारित्वासंसारित्वेन विरुद्धत्वादैक्यायोगात् तत् त्वं भविष्यसीति वाक्यविपरिणामः स्यादित्याशङ्क्याह—**अतश्चेति**। उपदेशवशादित्येतत्। स्वाभाविकस्यानाद्यविद्याकृतस्येति यावत्। विरुद्धत्वस्य काल्पनिकत्वेनोपपत्तौ वाक्यस्वारस्यं भङ्क्त्वा विपरिणामकल्पना न युक्तेति भावः। यदुक्तं नानात्वांशेन सर्वव्यवहारोपपत्तिरिति, तत्र किमैक्यज्ञानोत्तरकालीनव्यवहारसिद्धये भेदांशस्य सत्यत्वं कल्प्यते, किं वा प्राक्तनव्यवहारसिद्ध्यर्थमिति विकल्प्याद्यं दूषयति—**बाधिते चेति**। प्रमातृत्वादिबाधात् तदाश्रयव्यवहारो नास्तीति व्यवहाराभावेऽर्थापत्तिमुक्त्वा श्रुतिमुपन्यस्यति—**दर्शयतीति**। द्वितीये प्राक्तनव्यवहारस्य भ्रान्तत्वमभ्रान्तत्वं

१. अकल्पितसंसारवतः इत्यर्थः। २. लक्षणयेति शेषः।

(बृ.उ. ४।५।१५) इत्यादिना ब्रह्मात्मत्वदर्शिनं प्रति समस्तस्य क्रियाकारकफललक्षणस्य व्यवहारस्याभावम्। न चायं व्यवहाराभावोऽवस्थाविशेषनिबद्धोऽभिधीयत इति युक्तं वक्तुम्, 'तत्त्वमसि' इति ब्रह्मात्मभावस्यानवस्थाविशेषनिबन्धनत्वात्[1]। तस्करदृष्टान्तेन चानृताभिसंधस्य बन्धनं सत्याभिसंधस्य च मोक्षं दर्शयन्नेकत्वमेवैकं पारमार्थिकं दर्शयति, (द्र.छा.उ. ६।१६) मिथ्याज्ञानविजृम्भितं च नानात्वम्। उभयसत्यतायां हि कथं व्यवहारगोचरोऽपि जन्तुरनृताभिसंध इत्युच्येत। 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (बृ.उ. ४।४।१९) इति च भेददृष्टिमपवदन्नेतदेव दर्शयति। न चास्मिन् दर्शने ज्ञानान्मोक्ष इत्युपपद्यते, सम्यग्ज्ञानापनोद्यस्य कस्यचिन्मिथ्याज्ञानस्य संसारकारणत्वेनानभ्युपगमात्। उभयसत्यतायां हि कथमेकत्वज्ञानेन नानात्वज्ञानमपनुद्यत इत्युच्यते।

प्रकटार्थविवरणम्

व्यवहारो बाधितः स्यादित्यर्थः। ननु प्रमातृत्वं पूर्वं सत्यमेव मोक्षावस्थायां निवर्तत इति किं न स्यादित्याशङ्क्याह—**न चायं व्यवहाराभाव इति**।। इतश्च न भेदोऽपि सत्य इत्याह—**तस्करदृष्टान्तेनेति**।। कश्चित् तस्करत्वेनाभिशस्तोऽनृतवादी चेत् तप्तपरशुग्रहणे दह्यते बध्यते च, सत्यवादी चेन्न दह्यते मुच्यते चेत्यनेन दृष्टान्तेनेत्यर्थः। भेददृष्टेः निन्दितत्वादप्येकत्वमेव पारमार्थिकमित्याह—**मृत्योः स इति**।। किञ्च भेदाभेदवादे ज्ञानान्मोक्षोऽपि न सिध्यतीत्याह—**न चास्मिन्निति**।। मोक्षप्रतिबन्धकनिवृत्त्युपाधौ हि मोक्षस्य ज्ञानसाध्यत्वम्; न च ते मोक्षप्रतिबन्धकं किञ्चित् ज्ञाननिवर्त्यमस्ति, भ्रमस्य क्षणिकतया स्वयं निवृत्तेः, सन्तानस्य च तद्व्यतिरिक्तस्याभावात्, संस्कारस्य तत्त्वज्ञानेन सहभावदर्शनात्, स्वयमग्रहणनिवृत्तिरूपत्वाच्चेति भावः। ननु नानात्वांशो ज्ञाननिवर्त्योऽस्त्वित्याशङ्क्याह—**उभयसत्यतायां हीति**।। ज्ञानस्य वस्तुविनाशकत्वादर्शनादिति भावः। तस्मात् ज्ञानान्मोक्षस्य साध्यत्वसिद्ध्यन्यथानुपपत्त्याऽनाद्यनिर्वाच्याज्ञानसिद्धो भेदोऽभ्युपगन्तव्य इति।

भाष्यभावप्रकाशिका

पारमार्थिकत्वं स्वीकृत्योच्यते, किं वा भ्रान्तित्वम्? न तावदुत्तरः कल्पः; तथाभूतव्यवहारस्य काल्पनिकभेदेनैवोपपत्तेः। अथाद्यः, स नास्तीत्याह—**न चायमिति**।। कुत इति? तत्राह—**तत्त्वमसीति**।। तात्पर्यविरोधादित्यर्थः। "पुरुषं सोम्योत हस्तगृहीतमानयन्ती" त्यादिसत्यानृताभिसन्धानी[न]निदर्शनसामर्थ्यादप्येतदेव गम्यत इत्याह—(**तस्मिन्निति**।। ननु भेदांशोऽपनोद्य इति, तत्राह—**उभयसत्यतायामिति**।।) **तस्करेति**।। एतावता कथमेकत्वस्यैव सत्यत्वमिति? तत्राह—**उभयसत्यतायामिति**।। अपवादोऽपि नानात्वस्य मिथ्यात्वं गमयतीत्याह—**मृत्योःस मृत्युमिति**।। एकत्वज्ञानस्य मोक्षसाधनत्वश्रवणमपि भेदाभेदपक्षेऽनुपपन्नमित्याह—**न चास्मिन्निति**।। ननु भेदांशोऽपनोद्यत इति, तत्राह—**उभयसत्यतायामिति**।। विपरीतं किं न स्यादित्यर्थः।

आगमेन स्वरूपसिद्धयेऽपेक्ष्यमाणत्वाददृष्टव्यभिचारत्वादव्याकुलत्वादन्यत्रानवकाशत्वात् पूर्वभावित्वेन प्रतिष्ठितत्वात्

न्यायनिर्णयः

वा? प्रथमे तथाविधव्यवहारस्य काल्पनिकभेदेनोपपत्तिरिति मत्वा चरमं निरस्यति—**न चेति**। तत्र श्रुतितात्पर्यविरोधं हेतुमाह—**तत्त्वमिति**। 'पुरुषं सोम्योत हस्तगृहीतमानयन्ति' इत्यादिना सत्यानृताभिसंधपुरुषनिदर्शनप्रदर्शनसामर्थ्यादपि सिद्धमैक्यस्यैव सत्यत्वमित्याह—**तस्करेति**। कथमेतावता सत्यत्वमेकस्यैव नियम्यते, तत्राह—**उभयेति**। विपरीतमपि किं न स्यादित्यपेरर्थः। इतश्चैकत्वमेवैकं पारमार्थिकं, न नानात्वमपीत्याह—**मृत्योरिति**। एकत्वधियो मुक्तिहेतुत्वोक्तिरपि भेदाभेदवादेऽनुपपन्नेत्याह—**न चेति**। भेदांशधियोऽभेदांशधिया बाध्यत्वादपनोदनीयाभावासिद्धिरित्याशङ्क्य वैपरीत्यस्यापि संभवान्मैवमित्याह—**उभयेति**।

१. अवस्थाविशेषनिबन्धनत्वाभावादित्यर्थः। सदातनत्वादिति यावत्।

नन्वेकत्वैकान्ताभ्युपगमे नानात्वाभावात् प्रत्यक्षादीनि लौकिकानि प्रमाणानि व्याहन्येरन् निर्विषयत्वात्, स्थाण्वादिष्विव पुरुषादिज्ञानानि। तथा विधिप्रतिषेधशास्त्रमपि भेदापेक्षत्वात् तदभावे व्याहन्येत। मोक्षशास्त्रस्यापि शिष्यशासित्रादिभेदापेक्षत्वात् तदभावे व्याघातः स्यात्। कथं चानृतेन मोक्षशास्त्रेण प्रतिपादितस्यात्मैकत्वस्य सत्यत्वमुपपद्येतेति। अत्रोच्यते—नैष दोषः। सर्वव्यवहाराणामेव प्राग्ब्रह्मात्मताविज्ञानात् सत्यत्वोपपत्तेः। स्वप्नव्यवहारस्येव प्राक्प्रबोधात्। यावद्धि न सत्यात्मैकत्वप्रतिपत्तिस्तावत् प्रमाणप्रमेयफललक्षणेषु विकारेष्वनृतत्वबुद्धिर्न कस्यचिदुत्पद्यते। विकारानेव त्वहं ममेत्यविद्ययाऽऽत्मात्मीयेन भावेन सर्वो जन्तुः प्रतिपद्यते स्वाभाविकीं ब्रह्मात्मतां हित्वा। तस्मात् प्राग्ब्रह्मात्मताप्रतिबोधादुपपन्नः सर्वो लौकिको वैदिकश्च व्यवहारः। यथा सुप्तस्य प्राकृतस्य जनस्य स्वप्न उच्चावचान् भावान् पश्यतो निश्चितमेव प्रत्यक्षाभिमतं

प्रकटार्थविवरणम्

इदानीं प्रत्यक्षादिषु प्रामाण्यप्रसिद्ध्यनुपपत्त्यर्थापत्तिबलात् सत्यो भेदोऽभ्युपगन्तव्य इति शङ्कते—**नन्विति**।। किञ्चाद्वैतज्ञानसिद्ध्यन्यथानुपपत्त्याऽपि प्रमाणादिभेदः सत्यो वक्तव्य इत्याह—**कथं चानृतेनेति**।। प्रथमार्थापत्तेस्तावदन्यथाप्युपपत्तिमाह—**अत्रोच्यत इति**।।

भाष्यभावप्रकाशिका

पदपदार्थादिव्यवहारहेतुत्वाच्च प्रत्यक्षादेः प्राबल्यात्र तद्विरोधेनात्यन्ताभेदोऽभ्युपगन्तव्य इति शङ्कते—**नन्वेकत्वेति**।। भावनाभाव्यकरणेतिकर्तव्यताभेदापेक्षत्वात् कर्मकाण्डस्यापि बाधः प्रसज्येतेत्याह—**तथेति**।। न केवलं तस्यैव, मोक्षशास्त्रस्यापि भवदभिमतस्याप्रामाण्यं स्यादित्याह—**मोक्षेति**।। किञ्चैकत्वस्याप्यसत्यत्वं प्रमाणानामनृतत्वेन स्यादित्याह—**कथं चेति**।। प्रत्यक्षादीनां तत्त्वावेदकप्रामाण्याभावेऽपि व्यवहारसमर्थवस्त्वङ्गतालक्षणं प्रामाण्यं व्यवहारे बाधाभावात् संभवतीत्याह—**अत्रोच्यत इत्यादिना**।। **सत्यत्वोपपत्तेरिति**।। सत्यत्वाभिमानोपपत्तेरित्यर्थः। एतत् प्रपञ्चयति—**यावदिति**।। कथं तर्हि बुद्धिरुत्पद्यत इति? अत्राह—**विकारानेव त्विति**।। आत्मभावेनात्मीयभावेन च देह-पुत्रपश्वादिविकारानभिमन्यत इत्यर्थः। स्वप्नव्यवहारस्येवेत्युक्तं दृष्टान्तं प्रपञ्चयति—**यथा सुप्तस्येति**।।

न्यायनिर्णयः

इदानीं पूर्ववादी स्वाभिप्रायं प्रकटयति—**नन्विति**। प्रत्यक्षादेरागमेन स्वसिद्ध्यर्थमपेक्ष्यमाणत्वाददृष्टव्यभिचारत्वादव्याकुलत्वादन्यत्रानवकाशत्वात् पूर्वभावित्वेन प्रतिष्ठितत्वात् पदपदार्थविभागव्यवहारहेतुत्वाच्च प्राबल्यात् तद्विरोधे सत्याम्नायतो नात्यन्तिकमैक्यमादेयमिति भावः। निरालम्बनत्वेनाप्रामाण्ये दृष्टान्तः—**स्थाण्वादिष्विवेति**। न केवलमेकत्वैकान्ताभ्युपगमे प्रत्यक्षादिविरोधः, किंतु कर्मकाण्डविरोधश्चेत्याह—**तथेति**। **भेदापेक्षत्वात्** भावनाभाव्यकरणेतिकर्तव्यतादिसापेक्षत्वादिति यावत्। ननु प्रत्यक्षादीनां कर्मकाण्डस्य चाप्रामाण्यमद्वैतवादिनां नानिष्टं, ते हि ज्ञानकाण्डमेवैकं प्रमाणमाश्रयन्ते, तत्राह—**मोक्षशास्त्रस्येति**। ननु मिथ्याभूतशिष्यादिभेदपराधीनस्य मोक्षशास्त्रस्य मिथ्यात्वेऽपि तत्प्रमेयस्य प्रत्यगैक्यस्य सत्यत्वादस्मत्पक्षसिद्धिरिति, तत्राह—**कथं चेति**। प्रत्यक्षादिना काण्डद्वयेन च विरोधान्न समन्वयाधिगम्यमैक्यं संभावितमिति चोदिते परिहरति—**अत्रेति**। यत्तावदेकत्वैकान्ताभ्युपगमे लौकिकवैदिकव्यवहारव्याहतिरिति, तत्राह—**नैष दोष इति**। तत्त्वज्ञानादूर्ध्वं प्राचि वा काले व्यवहारानुपपत्तिरिति विकल्प्याद्यमङ्गीकृत्य द्वितीयं प्रत्याह—**सर्वव्यवहाराणामिति**। प्रत्यक्षादीनां द्वैतावगाहिनां तात्त्विकप्रमाणत्वाभावेऽपि व्यवहारे बाधाभावाद् व्यवहारसमर्थवस्त्वङ्गतारूपप्रामाण्यसिद्धेः सम्यग्ज्ञानात्पूर्वं सर्वव्यवहारसिद्धिरित्यर्थः। तत्त्वज्ञानात्पूर्वं सत्यत्वाभिमानद्वारा व्यवहारोपपत्तौ दृष्टान्तमाह—**स्वप्नेति**। आत्मनो ब्रह्मात्मतायाः स्वाभाविकत्वाद् विकारेष्वनृतत्वमनीषासमुन्मेषे कथं सर्वव्यवहारसिद्धिरित्याशङ्क्याह—**यावद्धीति**। तथापि स्वभावसिद्धब्रह्मात्मतानुरोधेन विकारेष्वौदासीन्यसंभवात् कुतो व्यवहारोपपत्तिरित्याशङ्क्याह—**विकारानिति**। मिथ्याभिमानवतो वस्तुस्वाभाव्यमपहाय प्राक् तत्त्वज्ञानाद् व्यवहारोपपत्तिं निगमयति—**तस्मादिति**। यदुक्तं स्वप्नव्यवहारस्येव प्राग्बोधादिति, तद् विवृणोति—**यथेति**। 'या निशा सर्वभूतानाम्' इत्यादिस्मृतेर्ज्ञानी

विज्ञानं भवति प्राक्प्रबोधात्, न च प्रत्यक्षाभासाभिप्रायस्तत्काले भवति, तद्वत्।

कथं त्वसत्येन वेदान्तवाक्येन सत्यस्य ब्रह्मात्मत्वस्य प्रतिपत्तिरुपपद्येत? न हि रज्जुसर्पेण दष्टो म्रियते; नापि मृगतृष्णिकाम्भसा पानावगाहनादिप्रयोजनं क्रियत इति। नैष दोषः। शङ्काविषादिनिमित्त-मरणादिकार्योपलब्धेः। स्वप्नदर्शनावस्थस्य च सर्पदंशनोदकस्नानादिकार्यदर्शनात्। तत्कार्यमप्यनृतमेवेति चेद् ब्रूयात्, तत्र ब्रूमः—यद्यपि स्वप्नदर्शनावस्थस्य सर्पदंशनोदकस्नानादि कार्यमनृतं तथापि तदवगतिः सत्यमेव फलं, प्रतिबुद्धस्याप्यबाध्यमानत्वात्। न हि स्वप्नादुत्थितः स्वप्नदृष्टं सर्पदंशनोदकस्नानादि कार्यं

प्रकटार्थविवरणम्

द्वितीयार्थापत्तिमनुवदति—**कथं त्वसत्येनेति**।। किञ्च विप्रतिपन्नः प्रपञ्चः सत्यः अर्थक्रियाकारित्वात् आत्मवद [दित्य]भिप्रेत्याह—**न हि रज्जुसर्पेणेति**।। तत्रानुमाने तावदनैकान्तिकत्वमाह—**शङ्काविषादीति**।। सर्पेणादष्टोऽपि दष्टत्वविभ्रमान्म्रियते, मूर्छां गच्छतीति प्रसिद्धम्; न च तत्र विषस्मरणं मरणकारणमतिप्रसङ्गादित्यर्थः।। व्यभिचारान्तरमाह—**स्वप्नदर्शनेति**।। ननु सत्यार्थक्रिया-कारित्वादिति हेतुर्विशेष्यते स्वप्ने चार्थक्रिया मिथ्येति नानैकान्तिकत्वमित्याह—**तत्कार्यमपीति**।। मिथ्याभूतार्थेन्द्रियसंप्रयोगादौ सत्यावगतिसाधनभूते तर्ह्यनैकान्तिकतेत्याह—**तत्र ब्रूम इत्यादिना**।।

भाष्यभावप्रकाशिका

कथं चानृतेन मोक्षशास्त्रेणेति यदुक्तम्, तदनुभाषते—**कथं त्वसत्येनेति**।। तदेवोपपादयति—**न हि रज्जुसर्पेणेति**।। अस्मत्पक्षेऽसत्यात्सत्यस्योत्पत्तिर्नास्ति, किन्तु [अ]सत्यात्सत्यस्य प्रतीतिरेव; उत्पद्यमानस्य सर्वस्यासत्त्वाङ्गीकारात्। केचित्तु सत्यस्याप्युत्पत्तिमिच्छन्ति। तदवलम्बनेन परिहारमाह—**नैष दोषः; शङ्केति**।। ननु स्वरूपसत्याः शङ्कायाः मरणं कार्यम्, न मिथ्याविषस्येति चेत्, तर्ह्यस्मत्पक्षेऽपि शब्दादिविषयज्ञानात् सत्यात् सत्यस्य प्रतिपत्तिः, न केवलशब्दादिभ्य इति समानम्। ननु ज्ञानस्य सुलभत्वान्नियमानुपपत्तिरिति चेत्, तर्हि शङ्काया अपि सुलभत्वान्न नियमः स्यात्। अथ विषे शङ्काया इति विशेषणान्न दोषः इति, तर्हि शब्दादिज्ञानादिति विशेषणादस्मद्दर्शनेऽपि न दोष इति द्रष्टव्यम्। निदर्शनान्तरमाह—**स्वप्नदर्शनेति**।। ननु एतदसत्यात्सत्यस्योत्पत्तौ निदर्शनं न भवतीति शङ्कते—**तत्कार्यमिति**।। ननु अवगतेरप्यनिर्वचनीयविषयतया विषयादिभिःसह बाधात् कथं सत्यत्वमित्याशङ्क्याह—**न हि स्वप्नादिति**।। ननु अवगतिशब्देन स्वरूपचैतन्यमुच्यते, किं वा वृत्तिज्ञानम्? यद्याद्यः,

न्यायनिर्णयः

व्यवहारावस्थायां सुप्तो भवति, ततो व्यावर्तयति—**प्राकृतस्येति**। प्रत्यक्षाभिमतमित्युक्तत्वादाभासत्वाभिमाने प्राप्ते प्रत्याह—**न चेति**। उक्तदृष्टान्तवशात् तत्त्वज्ञानात्प्राच्यामवस्थायां प्रमाणादिषु सत्यत्वाभिमानद्वारा सर्वव्यवहारसिद्धिरिति दार्ष्टान्तिकमाह—**तद्वदिति**।

कथं चानृतेन मोक्षशास्त्रेणेत्युक्तमनुभाषते—**कथमिति**। असत्यान्न सत्यप्रतिपत्तिरित्यत्र दृष्टान्तमाह—**न हीति**। असत्यादपि मरणातिरिक्तं सत्यमेव कार्यं भविष्यतीत्याशङ्क्याह—**नापीति**। इतिशब्दो दार्ष्टान्तिकप्रदर्शनार्थः। सत्यस्यासत्यादुत्पत्तिर्वा प्रतिपत्तिर्वा प्रतिषिध्यते? नाद्यः, सत्यस्योत्पत्तेरनिष्टत्वात्, उत्पद्यमानस्य सर्वस्यैव वाचारम्भणत्वादित्यभिप्रेत्याह—**नैष दोष इति**। सत्यस्यापि केचिदुत्पत्तिमुपगच्छन्ति, तत्पक्षेऽपि न दोष इत्याह—**शङ्केति**। शङ्कायाः स्वरूपेण सत्यत्वेऽपि विषयविशेषितत्वेनासत्यतेति भावः। द्वितीयेऽपि सत्या वाऽसत्या वा प्रतिपत्तिरसत्यान्नेति विकल्प्याद्यं निरस्यति—**स्वप्नेति**। स्वप्नदर्शनवत् तत्कार्यस्यापि सर्पदंशनादेरसत्यत्वात् तद्विशेषितदर्शनमपि तथेति नासत्यात् सत्यप्रतिपत्त्युत्पत्ताविदमुदाहरणमिति शङ्कते—**तत्कार्यमपीति**। विषयस्यासत्यत्वेऽपि विषयिणो ज्ञानस्य सत्यत्वान्नैवमिति परिहरति—**तत्रेति**। नन्ववगतिशब्देन स्वरूपचैतन्यं वृत्तिज्ञानं वोच्यते। प्रथमे तस्याजन्यत्वादसत्यान्न सत्यप्रतिपत्त्युत्पत्तौ दृष्टान्तत्वम्। द्वितीये तस्य विषयातिरिक्ताकाराभावात् 'अर्थेनैव विशेषो हि निराकारतया धियाम्' इत्यङ्गीकारात् तदनिर्वाच्यतायामनिर्वाच्यत्वेनासत्यत्वान्नासत्यात् सत्यप्रतिपत्त्युत्पत्तिः, तत्राह—**न हीति**।

मिथ्येति मन्यमानस्तदवगतिमपि मिथ्येति मन्यते कश्चित्। एतेन स्वप्नदृशोऽवगत्यबाधनेन देहमात्रात्मवादो दूषितो वेदितव्यः। तथा च श्रुतिः–'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने।।' (छा.उ. ५।२।९) इत्यसत्येन स्वप्नदर्शनेन सत्यायाः समृद्धेः प्रतिपत्तिं दर्शयति। तथा प्रत्यक्षदर्शनेषु केषुचिदरिष्टेषु जातेषु 'न चिरमिव जीविष्यतीति विद्यात्' इत्युक्त्वा 'अथ स्वप्नाः, पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति' (ऐ.आ. ३।२।४) इत्यादिना तेन तेनासत्येनैव स्वप्नदर्शनेन सत्यं मरणं सूच्यत इति दर्शयति। प्रसिद्धं चेदं लोकेऽन्वयव्यतिरेककुशलानामीदृशेन स्वप्नदर्शनेन साध्वागमः सूच्यत ईदृशेनासाध्वागम इति। तथाऽकारादिसत्याक्षरप्रतिपत्तिर्दृष्टा रेखानृताक्षरप्रतिपत्तेः।

प्रकटार्थविवरणम्

प्रसङ्गान्मतान्तरनिराकरणेऽप्यतिदिशति—**एतेनेति**।। स्वप्ने कदाचिद् व्याघ्रदेहो द्रष्टा भूत्वा जागरणेऽप्यनुसन्दधानो दृश्यते; देह एव चेदात्मा व्याघ्रदेहापगमे द्रष्टुरपगमान्नानुसन्धानं स्यादिति भावः। यच्चोक्तं नासत्यात्सत्यप्रतिपत्तिः संभवति मिथ्याधूमगृहीतादिव बाष्पादग्निप्रतिपत्तिः, अतोऽद्वैतब्रह्मप्रतिपत्त्यन्यथानुपपत्त्यैव प्रमाणादिप्रपञ्चस्य सत्यता वक्तव्येति, तत्रान्यथाप्युपपत्तिमाह—**तथा च श्रुतिरित्यादिना**।। मिथ्याधूमस्य त्वव्याप्तत्वादगमकत्वम्, ज्ञानस्वरूपसत्यतायामपि मिथ्यार्थावच्छिन्नस्य मिथ्यात्वात् भ्रमादभ्रमप्रतिपत्तिवदसत्यात् सत्यप्रतिपत्त्यविरोधः। उदाहरणान्तरमाह—**तथाकारादि[दी]ति**।। यद्यपि मषिद्रव्यं स्वरूपेण सत्यम्, सङ्केतवशाच्च वर्णप्रत्यायकम्, स एव संकेतः 'अयं ककारः, अयं गकारः' इति समारोपितरूपेण; न पुनरीदृशीं रेखां दृष्ट्वा अयं वर्णः स्मर्तव्य इति; तस्माद् द्वैतसत्यत्वं विनाऽनुपपत्त्यभावात् न परमार्थभेदकल्पनं न्याय्यम्।

भाष्यभावप्रकाशिका

तदा तस्याजन्यत्वात्र दृष्टान्तत्वम्, यदि द्वितीयः, तस्यानिर्वचनीयतया न सत्यत्वम्, इति कथमसत्यात्सत्योत्पत्तिरिति चेत्, सत्यम्; परपक्षे ज्ञानस्य सत्यस्यापि जन्यत्वमस्ति, अस्मत्पक्षेऽप्यभिव्यक्तिरस्तीत्यदोषः। तथा वृत्तिरूपज्ञानस्यापि लौकिकाभिप्रायेण सत्यत्वादसत्यात्सत्योत्पत्तौ निदर्शनत्वमविरुद्धमिति द्रष्टव्यम्।। अत्रान्तराले **लोकायतिकानां** मतमपाकरोति—**एतेनेति**।। स्वप्नजाग्रद्देहयोर्व्यभिचारेऽपि तदनुगतात्मनः प्रत्यभिज्ञानादेकत्वसिद्धेः देहधर्मत्वे च चैतन्यस्य स्थूलदेहानुपलम्भ उपलम्भाभावप्रसङ्गाद् अवगत्यबाधनेन तद्रूपस्योभयदेहातिरिक्तत्वोपपत्तेश्चेत्यर्थः। असत्याच्च सत्यप्रतिपत्तिः श्रुतितोऽन्वयव्यतिरेकतश्च सिद्धेत्याह—**तथा च श्रुतिरिति**।। दृष्टान्तान्तरमाह—**तथाऽकारादि[दी]ति**।। यद्यपि रेखास्वरूपं सत्यम्; [तथापि] तस्याकारादिरूपताया असत्यत्वाद् असत्यात्सत्यप्रतिपत्तिरित्यर्थः।

न्यायनिर्णयः

परपक्षे सत्यस्यापि ज्ञानस्य जन्यत्वाभ्युपगमादस्मत्पक्षे चाभिव्यक्तिस्वीकाराद् वृत्तिरूपस्यापि ज्ञानस्य लौकिकाभिप्रायेण सत्यत्वादसत्यात्सत्यप्रतिपत्त्युत्पत्तौ दृष्टान्तत्वमविरुद्धमिति भावः। नन्ववगतिर्न स्वरूपचैतन्यम्, नापि वृत्तिज्ञानम्, किंतु शरीराकारपरिणतभूतचतुष्टयनिविष्टं रूपादितुल्यं ज्ञानमिति लौकायतिकमतमाशङ्क्याह—**एतेनेति**। एतच्छब्दार्थमेव विशदयति—**स्वप्नदृश इति**। स्वप्नजाग्रद्देहयोर्व्यभिचारेऽपि प्रत्यभिज्ञानात् तदनुगतात्मैक्यसिद्धेः, चैतन्यस्य च देहधर्मत्वे रूपादिवत्तदनुपलब्धावनुपलब्धिप्रसङ्गात्, अवगतेश्चाबाधात् तद्रूपस्यात्मनो देहद्वयातिरेकसिद्धेर्देहमात्रात्मवादो न युक्त इत्यर्थः। सत्या प्रतिपत्तिरसत्याद्भवतीत्युपपाद्य सत्यस्य प्रतिपत्तिर्नासत्यादिति पक्षं श्रुत्या निराचष्टे—**तथा चेति**। असत्यात्सत्यप्रतिपत्त्युत्पत्तौ छान्दोग्यश्रुतिवदैतरेयकश्रुतिरपि भवतीत्याह—**तथेति**। सत्यस्य प्रतिपत्तिरसत्याद्भवति, तत्रान्वयव्यतिरेकावपि प्रमाणमित्याह—**प्रसिद्धं चेति**। असत्यात्सत्यस्य प्रतिपत्तौ दृष्टान्तान्तरमाह—**तथेति**। रेखास्वरूपस्य सत्यत्वेऽप्यकारादिरूपतया तथात्वाभावादसत्यात्सत्यप्रतिपत्तिरित्यभिसंधायानृतेति विशेषणम्।

अपि चान्त्यमिदं प्रमाणमात्मैकत्वस्य प्रतिपादकम्, नातः परं किंचिदाकाङ्क्ष्यमस्ति। यथा हि लोके यजेतेत्युक्ते किं केन कथमित्याकाङ्क्ष्यते, नैवं 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्युक्ते किंचिदन्यदाकाङ्क्ष्यमस्ति, सर्वात्मैकत्वविषयत्वादवगतेः। सति ह्यन्यस्मिन्नवशिष्यमाणेऽर्थ आकाङ्क्षा स्यात्। न त्वात्मैकत्वव्यतिरेकेणावशिष्यमाणोऽन्योऽर्थोऽस्ति य आकाङ्क्ष्येत। न चेयमवगतिर्नोत्पद्यत इति शक्यं वक्तुम्, 'तद्धास्य विजज्ञौ' (छा.उ. ६।१६।३) इत्यादिश्रुतिभ्यः। अवगतिसाधनानां च श्रवणादीनां वेदानुवचनादीनां च विधानात्[1]। न चेयमवगतिरनर्थिका भ्रान्तिर्वेति शक्यं वक्तुम्। अविद्यानिवृत्तिफलदर्शनात्, बाधकज्ञानान्तराभावाच्च।

प्रकटार्थविवरणम्

किञ्च यदि युगपद्भेदप्रयुक्तो[2] व्यवहारः स्यात् तदोभयसत्यताकल्पना युज्येत; न चास्ति, ब्रह्मात्मैकत्वज्ञाने सति सकलहानोपादानादिव्यवहारनिवृत्तेरित्याह—**अपि चान्त्यमिदमिति**। नन्वेतादृशी प्रतिपत्तिरेव कस्यापि नोदपादि, तत्राह—**न चेयमवगतिरिति**। तद् ब्रह्म किलास्य पितुर्वचनात् श्वेतकेतुर्विजज्ञौ विज्ञातवानित्यर्थः। किञ्च सति पुष्कलकारणे कार्यं नोत्पद्यत इति साहसमात्रमित्याह—**अवगतिसाधनानां चेति**। ननु ब्रह्मावगतिर्निष्फला भ्रान्तिश्च, मिथ्याकार्यत्वात्, बौद्धशास्त्रप्रसूतबुद्धिवदित्याशङ्क्याह—**न चेयमवगतिरिति**। बाधितविषयत्वानैकान्तिकत्वे स्फुटे इति भावः। ननु सूत्रकारेण मिथ्याभूतत्वात् स्वप्नाज्जागरितस्य वैलक्षण्यमुक्तम् 'वैधर्म्याच्च न स्वप्नादिवत्'' इति। ''सत्यं चानृतं च सत्यमभवत्'' इति च श्रुतिः। अतः कथं

भाष्यभावप्रकाशिका

निरपेक्षत्वे सत्युत्तरकालभाविप्रमाणत्वात् प्रत्यक्षादिबाधकत्वमागमस्योपपन्नमित्याह—**अपि चान्त्यमिति**। ननु प्रयोजनपर्यन्तत्वादागमप्रामाण्यस्य प्रयोजनस्य च क्रियासाध्यत्वात् क्रियायाश्च भेदप्रमितिपूर्वकत्वात् कथमन्त्यतेति? अत आह—**नातः परमिति**। तदेव व्यतिरेकदृष्टान्तेन साधयति—**यथा यजेतेति**। ननु प्रत्यक्षादिविरोधादवगतिरेव नोत्पद्यत इत्याह—**न चेयमिति**। अवगत्युद्देशेन साधनविधानादपि तदुत्पत्तिरेष्टव्येत्याह—**अवगतिसाधनानामिति**। सिद्धवस्तुनि स्वरूपेण प्रयोजनाभावादानर्थक्यम्, प्रमाणान्तरविरोधाद् भ्रान्तित्वं वेत्याशङ्क्याह—**न चेयमिति**। ननु सर्वस्यापारमार्थिकत्वे सत्यानृत-

न्यायनिर्णयः

आगमादसत्यादेव सत्यस्य ब्रह्मात्मनः सुज्ञानत्वेऽपि पूर्वोक्तनीत्या बलवतोऽध्यक्षादेरागमबाध्यत्वं कथमित्याशङ्क्याह—**अपि चेति**। उक्तशङ्कानिवृत्त्यर्थमपिचेत्युक्तम्। निरपेक्षत्वे सत्युत्तरभाविप्रमाणत्वात् प्रत्यक्षादिबाधकत्वमागमस्येत्याह—**अन्त्यमिति**। आगमप्रामाण्यस्य फलपर्यन्तत्वात् तस्य क्रियासाध्यत्वात् तस्या भेदप्रमितिपूर्वकत्वात् कथमात्मैक्यज्ञानस्यान्त्यतेत्याशङ्क्याह—**नात इति**। तदेव व्यतिरेकदृष्टान्तेन स्पष्टयति—**यथेति**। तत्त्वमसीत्युक्ते सर्वाकाङ्क्षोपशान्तिरित्यत्र हेतुमाह—**सर्वात्मेति**। या वाक्यादवगतिरुत्पद्यते सा सर्वस्य पूर्णस्य ब्रह्मणः प्रत्यगात्मनश्चैकरस्यमधिकृत्य भवति। तथाच प्रत्यगात्मातिरिक्तस्याकाङ्क्षणीयस्यानवशिष्टत्वाद् युक्ता सर्वाकाङ्क्षोपशान्तिरित्यर्थः। श्रुताद् वाक्यादवगतौ सत्यामवशिष्यमाणार्थाभावेनाकाङ्क्षाभावं विवृणोति—**सति हीति**। प्रत्यक्षादिविरोधादवगतिरेवाद्वैतमवगाहमाना नोत्पद्यते, कुतः सर्वाकाङ्क्षानिवृत्तिरित्याशङ्क्याह—**न चेति**। अस्य पितुर्वचनात् तदात्मतत्वं श्वेतकेतुर्विज्ञातवान् किलेति यावत्। आदिशब्दात् 'आनन्दो ब्रह्मेति व्यजानात्' इत्याद्या श्रुतिर्गृह्यते। किंचावगतिमुद्दिश्यान्तरङ्गबहिरङ्गसाधनविधानादपि तदुत्पत्तिरेष्टव्येत्याह—**अवगतीति**। नन्ववगतिरुत्पन्नाऽपि नार्थवती, सिद्धेऽर्थे स्वरूपेण फलाभावान्मानान्तरविरोधाद्वा भ्रान्तिरेवेत्याशङ्क्याह—**न चेयमिति**। आनर्थक्याभावे हेतुमाह—**अविद्येति**। भ्रान्तित्वाभावे हेतुमाह—**बाधकेति**। न हि प्रत्यक्षादि बाधकं, तस्य कल्पितद्वैतविषयत्वेन तात्त्विकाद्वैतप्रमित्यविरोधित्वादित्यर्थः। ननु सर्वस्य कल्पितत्वे सत्यासत्यव्यवहारो लौकिको वैदिकश्च न स्यादित्याशङ्क्य स्वप्नदृष्टान्तेनोक्तं स्मारयति—**प्राक्चेति**।

१. 'विधीयमानत्वात्' इति पा.। २. 'भेदाभेदप्रयुक्तः' इति पाठः संभाव्यते।

[1] प्राक्त्वात्मैकत्वावगतेरव्याहतः सर्वः सत्यानृतव्यवहारो लौकिको वैदिकश्चेत्यवोचाम। तस्मादन्त्येन प्रमाणेन प्रतिपादित आत्मैकत्वे समस्तस्य प्राचीनस्य भेदव्यवहारस्य बाधितत्वान्नानेकात्मकब्रह्मकल्पनावकाशोऽस्ति।

ननु मृदादिदृष्टान्तप्रणयनात् परिणामवद् ब्रह्म शास्त्रस्याभिमतमिति गम्यते, परिणामिनो हि मृदादयोऽर्था लोके समधिगता इति। नेत्युच्यते। 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म' (बृ.उ. ४।४।२५), 'स एष नेति नेत्यात्मा' (बृ.उ. ३।९।२६), 'अस्थूलमनणु' (बृ.उ. ३।८।८) इत्याद्याभ्यः सर्वविक्रियाप्रतिषेधश्रुतिभ्यो ब्रह्मणः कूटस्थत्वावगमात्। न ह्येकस्य ब्रह्मणः परिणामधर्मत्वं तद्रहितत्वं च शक्यं प्रतिपत्तुम्। स्थितिगतिवत् स्यादिति चेत्। न, कूटस्थस्येति विशेषणात्। न हि कूटस्थस्य ब्रह्मणः

प्रकटार्थविवरणम्

सर्वमिथ्यात्वमित्याशङ्क्याह—**प्राक्त्वात्मैकत्वावगतेरिति**। यथा स्वप्न एव शुक्त्यादि सत्यं रूप्याद्यसत्यमित्यवान्तरव्यवहारः, तथा तत्त्वज्ञानात् प्राक् सति प्रमातरि बाध्यमसत्यम्, सहैव प्रमातृत्वेन बाध्यं सत्यमित्यवान्तरविभागो न विरुध्यते इत्यर्थः। प्रकृतमुपसंहरति—**तस्मादिति**।। **बाधितत्वादिति**।। प्रतिषिद्धसत्यत्वादित्यर्थः।

न मया कल्प्यते, श्रुतेरेवेत्याह—**ननु मृदादीति**।। परिणामिदृष्टान्तोपादानाद् ब्रह्म तत्वतः परिणामि भिन्नाभिन्नमिति लिङ्गं श्रुतिविरोधे बाध्यत इत्याह—**नेत्युच्यत इत्यादिना**।। मृदादिदृष्टान्तोऽप्यनन्यत्वे न परिणामित्वे; अन्यथा जाड्यस्यापि प्रसङ्गात्। ननु यथा विरुद्धे अपि स्थितिगती क्रमेण सङ्गच्छेते, तथा सृष्टेः प्रागविक्रियं ब्रह्म, सृष्टौ च विकारीत्युभयोपपत्तौ सत्यां किमित्येकस्य बाधः कल्प्यते? अगतिका हीयं गतिः यद् बाधकल्पनमित्याह—**स्थितिगतिवदिति**।। परिहरति—**न, कूटस्थस्येति**।। "नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः" इति स्थाणुत्वं पूर्वमभिधायानन्तरमचलत्वं ब्रुवन् सर्वविक्रियावर्जितं कूटस्थत्वमाह, परिस्पन्दाभावस्य सर्वगतत्वादेव सिद्धेः। अतो न क्रमेणापि विकाराविकारावविति भावः। किञ्च ब्रह्म तत्वतोऽपरिणामि निरवयवत्वात्,

भाष्यभावप्रकाशिका

व्यवहारो लौकिकः पीड्येतेति, तत्राह—**प्राक्त्विति**।। स्वप्ननिदर्शनेन दर्शितमित्यर्थः।।

ननु अनेकात्मकत्वं नास्माभिः कल्प्यते, किन्तु श्रौतमेवेति शङ्कते—**ननु मृदादीति**।। दृष्टान्तगतं विवक्षितांशमुक्त्वा प्रमाणान्तरविरुद्धोंऽशो नाङ्गीकरणीयः; अतिप्रसङ्गात्, अस्ति चेह प्रमाणान्तरविरोधः, तस्य कूटस्थत्वश्रवणादित्याह—**नेत्युच्यत इति**।। ननु कूटस्थस्यापि परिणामः कस्मान्न भवेदिति? अत आह—**न हीति**। कालभेदेन कूटस्थत्वं परिणामित्वं चास्त्विति शङ्कते—**स्थितिगतिवदिति**।। परिहरति—**न, कूटस्थस्येति**।। परिणामिनां हि बाणादीनां क्रमेणापि स्थितिगती, न परिणामायोग्यस्य

न्यायनिर्णयः

आगमादर्थवती सर्वाकाङ्क्षाशान्तिहेतुर्ब्रह्मात्मप्रतिपत्तिर्भवतीति स्थिते फलितमाह—**तस्मादिति**।

कल्पनाममृष्यमाणः श्रौतमेव ब्रह्मणोऽनेकात्मकत्वमिति शङ्कते—**नन्विति**। कथं यथोक्तदृष्टान्तावष्टम्भात् परिणामि ब्रह्म श्रौतमित्याशङ्क्य दृष्टान्तदार्ष्टान्तिकयोः साम्यध्रौव्यादित्याह—**परिणामिनो हीति**। दृष्टान्तगतं विवक्षितमंशं हित्वा मानान्तरविरुद्धोंऽशो दार्ष्टान्तिके नाभ्युपेतव्योऽतिप्रसङ्गात्। अस्ति च परिणामित्वे ब्रह्मणो मानान्तरविरोधस्तस्य कौटस्थ्यश्रुतेरिति परिहरति—**नेत्युच्यत इति**। श्रुतिद्वयानुरोधात् कूटस्थत्वपरिणामित्वे स्यातामित्याशङ्क्य युगपत् क्रमेण वेति विकल्प्याद्यं विरोधेन निरस्यति—**न हीति**। द्वितीयं शङ्कते—**स्थितीति**। कूटस्थस्य ब्रह्मणो न परिणामितेति विशेषणान्न तस्य कदाचिदपि परिणामयोग्यता, स्वरूपप्रच्युतिप्रसङ्गादित्याह—**नेति**। तदेव स्फुटयति—**न हीति**। परिणामिनां हि बाणपाषाणादीनां क्रमेण स्थितिगती युक्ते, न तु परिणामायोग्यस्य क्रमेण परिणामतद्राहित्ये ब्रह्मणः स्यातामित्यर्थः। ब्रह्मणि विरुद्धधर्मासंभवे कूटस्थत्वं हित्वा

१. 'प्राक् तु' इति पा.

स्थितिगतिवदनेकधर्माश्रयत्वं संभवति। कूटस्थं च नित्यं ब्रह्म सर्वविक्रियाप्रतिषेधादित्यवोचाम। न च यथा ब्रह्मण आत्मैकत्वदर्शनं मोक्षसाधनमेवं जगदाकारपरिणामित्वदर्शनमपि स्वतन्त्रमेव कस्मैचित् फलायाभिप्रेयते, प्रमाणाभावात्। कूटस्थब्रह्मात्मत्वविज्ञानादेव हि फलं दर्शयति शास्त्रम्–'स एष नेति नेत्यात्मा' इत्युपक्रम्य 'अभयं वै जनक प्राप्तोऽसि' (बृ.उ. ४।२।४) इत्येवंजातीयकम्। तत्रैतत्सिद्धं भवति–ब्रह्मप्रकरणे सर्वधर्मविशेषरहितब्रह्मदर्शनादेव फलसिद्धौ सत्यां यत् तत्राफलं श्रूयते ब्रह्मणो जगदाकारपरिणामित्वादि तद् ब्रह्मदर्शनोपायत्वेनैव विनियुज्यते, फलवत्संनिधावफलं तदङ्गमितिवत्; न तु स्वतन्त्रं फलाय कल्प्यत इति। न हि परिणामवत्त्वविज्ञानात् परिणामवत्त्वमात्मनः फलं स्यादिति वक्तुं युक्तम्, कूटस्थनित्यत्वान्मोक्षस्य।

प्रकटार्थविवरणम्

न यदेवं न तदेवं यथा क्षीरम्। [1]यदत्र गदितम्—न तावदवयवातिरेकेणावयवी मायावादिनां कश्चिदस्ति; तत्र क्षीरावयवाः परिणमन्त इति वक्तव्यम्; ते च निरवयवाः इतरथाऽनवस्थानात्, अवयवानन्त्येन क्षीरसमुद्रस्य [क्षीरक्षीरसमुद्रसाम्य] प्रसङ्गाच्च; तस्मान्निरवयवस्यैव परिणामो दृष्ट इति; तदसत्, तथा हि—किमेतल्लौकिकं नैयायिकं वा? नाद्यः, सावयवस्यैव क्षीरादेः लोके परिणामदर्शनात्। मायावादिना प्रसिद्ध्यनपह्नवेन विचारासहत्वमेवावेद्यते। यदि द्वितीयः, तर्हि किं तेऽनादयः सादयो वा? आद्ये—अपसिद्धान्तः, परमाणुवादाश्रयणं च स्यात्; अन्त्ये सावयवत्वं दुर्निवारम्; ततो यत्किञ्चिदेतत्। ननु ब्रह्मणः परिणामित्वप्रतिपादने श्रुतेरेव तात्पर्यं कल्प्यते, व्यवहारसिद्धेः प्रयोजनस्य सद्भावादित्याशङ्क्याह—**न च यथा ब्रह्मण इति**। व्यवहारसिद्धिः प्रयोजनं न श्रुतं तावत्; नापि कल्पनीयम्, अन्यथाऽपि लाभादिति भावः। भवतु परिणामज्ञानं निष्फलं, शुद्धब्रह्मात्मताज्ञानं च सफलम्; ततः किमित्यत आह—**तत्रैतत्सिद्धमिति**॥

भाष्यभावप्रकाशिका

ब्रह्मणः क्रमेणापि परिणाम-तद्राहित्यसंभव इति भावः॥ तदेव कथमिति? तत्राह—**कूटस्थनित्यं चेति**॥ एतदुक्तं भवति—कूटस्थनिरवयवापरिच्छिन्नब्रह्मणःस्वरूपादप्रच्युतस्वभावस्य सर्वप्रकारतद्विपरीतकार्याकारपरिणामश्रुत्यन्यथानुपपत्तिः कार्याकारस्य मिथ्याविवर्ततां दर्शयति, स्वरूपादप्रच्युतशुक्तिकाया रजताकारपरिणामवदिति। परिणामश्रुतेः स्वार्थे फलाभावादपि परिणामो न विवक्षित इत्याह—**न च यथेति**॥ ननु ब्रह्मात्मविज्ञानस्य यत्फलम्, तदेव परिणामिब्रह्मज्ञानस्य फलमिति, अत आह—**कूटस्थेति**॥ ननु एवं तर्हि परिणामश्रुतीनामानर्थक्यमेव प्रसज्यत इत्याशङ्क्य, फलवच्छेषतया सफलत्वमित्याह—**तत्रैतदिति**॥ ननु "तं यथा यथोपासते तदेव भवती"ति सामान्यशास्त्रात् फलवत्त्वं परिणामिश्रुतीनां स्यादिति, तत्राह—**न हि परिणामेति**॥ "तस्य तावदेव

न्यायनिर्णयः

परिणामित्वमेवेष्यतामित्याशङ्क्याह—**कूटस्थं चेति**। अनवयवानवच्छिन्नकूटस्थब्रह्मणः स्वरूपादप्रच्युतस्वभावस्य सर्वप्रकारतद्विपरीतकार्याकारपरिणामश्रुत्यनुपपत्त्या कार्यप्रपञ्चस्य स्वरूपादप्रच्युतशुक्त्यादे रजतादिपरिणामवन्मिथ्याविवर्तत्वं सिध्यतीत्युक्तम्। सम्प्रति परिणामश्रुतेः स्वार्थे फलाभावादपि परिणामो न विवक्षित इत्याह—**न चेति**। यद् ब्रह्मज्ञानस्य फलं तदेव परिणामिब्रह्मज्ञानस्यापि, शास्त्रमेव चात्र प्रमाणमित्याशङ्क्याह—**कूटस्थेति**। तर्हि परिणामिश्रुतीनामानर्थक्यादध्ययनविधिविरोधः स्यादित्याशङ्क्य फलवच्छेषतया साफल्यान्मैवमित्याह—**तत्रेति**। सृष्ट्यादिश्रुतीनां स्वार्थे फलवैकल्ये सतीति यावत्। तत्र मीमांसकसंमतमुदाहरणमाह—**फलवदिति**। यथा हि स्वर्गादिफलवतो दर्शपूर्णमासादेः संनिधाने श्रुतं प्रयाजादि स्वतो विफलं तदङ्गमित्यङ्गीक्रियते, तथा सृष्ट्यादिदर्शनमपि ब्रह्मज्ञानशेषतया तत्फलेनैव फलवत्त्वात् तदङ्गमित्यर्थः। ननु प्रयाजादेः श्रूयमाणफलेनैव फलवत्त्वसंभवे फलवदङ्गत्वं किमित्यङ्गीकर्तव्यमित्याशङ्क्य प्रधानफलेनैव फलवत्त्वसिद्धौ फलान्तरकल्पने गौरवादङ्गेषु च फलश्रुतेरर्थवादत्वाङ्गीकारादित्याह—**न त्विति**। इतिशब्दः सिद्धं भवतीत्यनेन संबध्यते। 'तं यथा यथोपासते तदेव भवति' इति श्रुत्या परिणामिब्रह्मज्ञानात् तत्प्राप्तिरेव फलमित्याशङ्क्याह—**न हीति**। 'तस्य तावदेव' इत्यादिना प्रतिपन्नं कैवल्यं

१. द्र. भास्करभाष्यम्. पृ. ९६।

कूटस्थब्रह्मात्मवादिन एकत्वैकान्त्यादीशित्रीशितव्याभाव ईश्वरकारणप्रतिज्ञाविरोध इति चेत्, न; अविद्यात्मकनामरूपबीजव्याकरणापेक्षत्वात् सर्वज्ञत्वस्य। 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' (तै.उ. २।१) इत्यादिवाक्येभ्यो नित्यशुद्धबुद्धमुक्तस्वरूपात् सर्वज्ञात् सर्वशक्तेरीश्वराज्जगज्जनिस्थितिप्रलयाः, नाचेतनात्प्रधानादन्यस्माद्वेत्येषोऽर्थः प्रतिज्ञातः 'जन्माद्यस्य यतः' (ब्र.सू. १।१।२) इति। सा प्रतिज्ञा तदवस्थैव, न तद्विरुद्धोऽर्थः पुनरिहोच्यते। कथं नोच्यतेऽत्यन्तमात्मन एकत्वमद्वितीयत्वं च ब्रुवता? शृणु यथा नोच्यते। सर्वज्ञस्येश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया शक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते। ताभ्यामन्यः सर्वज्ञ ईश्वरः, 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म' (छा.उ. ८।१४।१) इति श्रुतेः; 'नामरूपे व्याकरवाणि'

प्रकटार्थविवरणम्

पूर्वापरविरोधमुद्भावयति—**कूटस्थब्रह्मवादिन इति**।। एकत्वस्यैकान्ततो नियतस्याभ्युपगतत्वादीशितव्याभावे सति "जन्माद्यस्य यतः"[इति] ईश्वरकारणप्रतिज्ञा विरुध्यते कूटस्थं ब्रह्मास्मिन्नधिकरणे वदत इति भावः। परिहरति—**नाविद्यात्मकेति**। अविद्यात्मके जडे ये नामरूपकारणत्वात् नामरूपे, ते जगतो बीजम्, तद्व्यप का[तद्व्याक]रणापेक्षत्वात् तत्परिणामोपाधिकत्वादीश्वरस्य न विरोध इत्यर्थः। एतदेव विवृणोति—**तस्माद्वा इत्यादिना**।। **अविद्याकल्पिते [इ]ति**।। अविद्यात्मना जाड्यरूपेण कल्पिते स्वीकृते

भाष्यभावप्रकाशिका

चिरम्" इत्यादिना प्रतिपन्नं कैवल्यं विहाय शास्त्रान्तरसिद्धफलाकर्षणे वाक्यभेदः स्यादित्यर्थः।

"तदनन्यत्व"मित्यस्य प्रतिज्ञाविरोधं श्रुतिविरोधं च चोदयति—**ननु कूटस्थब्रह्मेति**।। परिहरति—**नाविद्यात्मकेति**।। नामरूपे एव बीजम्, तस्य व्याकरणं कार्यप्रपञ्चः, तदपेक्षत्वादैश्वर्यस्य। प्रतिज्ञासूत्रस्य च न परमार्थानन्यत्वेन विरोध इति भावः।। संग्रहवाक्यं विवृणोति—**तस्माद्वा इति**।। उक्तमेवार्थं चोद्य-परिहाराभ्यां स्पष्टयति—**कथं नोच्यते इत्यादिना**।। "मायां तु प्रकृतिं विद्यात्", "देवात्मशक्तिम्" "प्रकृतिं पुरुषं चैव" "माया ह्येषा" "शक्तयः सर्वभावाना" मित्यादिश्रुतिस्मृत्योरवगम्येते इत्याह—**माया शक्तिरिति**।। ननु ईश्वरस्यात्मभूते चेद् नामरूपे, तर्हीश्वरोऽपि ताभ्यामनन्य एवेति जडः स्यादिति, तत्राह—**ताभ्यामिति**।। तत्र प्रमाणमाह—**आकाश इति**।। तद्व्याकरणे प्रमाणमाह—**नामरूपे इति**।। कथमीशितव्याभाव ईश्वरभाव इति? अत आह—

न्यायनिर्णयः

विहाय सामान्यशास्त्रसिद्धफलाकर्षणे वाक्यभेदः स्यादिति भावः।

कूटस्थाद्वयत्वे ब्रह्मणः श्रुतिप्रतिज्ञयोर्विरोधः स्यादिति शङ्कते—**कूटस्थेति**। विरोधद्वयं परिहरति—**नेत्यादिना**। अविद्यात्मके नामरूपे एव बीजं तस्य व्याकरणं कार्यप्रपञ्चस्तदपेक्षत्वादैश्वर्यस्य प्रतिज्ञासूत्रस्य तदनुसारिश्रुतिवचनस्य च पारमार्थिककूटस्थाद्वयत्वे न विरोधोऽस्तीत्यर्थः। संग्रहवाक्यं विवृणोति—**तस्मादित्यादिना**। उक्तमेवार्थं चोद्यपरिहाराभ्यां स्फोरयति—**कथमित्यादिना**। नामरूपयोरात्मभूतत्वे वस्तुत्वशङ्कायामिवेत्युक्तम्। उपमार्थत्वमिवकारस्य वारयन्नाभासार्थत्वं स्फुटयति—**अविद्येति**। तयोरविद्याकल्पितत्वं साधयति—**तत्त्वान्यत्वाभ्यामिति**। न हीश्वरत्वेन ते निरुच्येते, जडाजडयोरभेदायोगात्। नापि ततोऽन्यत्वेन निरुक्तिमर्हतः, स्वातन्त्र्येण सत्तास्फूर्त्यसंभवात्। न हि जडमजडानपेक्षं सत्तास्फूर्तिमदुपलक्ष्यते, जडत्वभङ्गप्रसङ्गात्। तस्मादविद्यात्मके नामरूपे इत्यर्थः। तयोश्च कार्यलिङ्गकमनुमानं प्रमाणयति—**संसारेति**। तयोराश्रयं विषयं च दर्शयति—**सर्वज्ञस्येति**। तयोरेव श्रुतिस्मृती प्रमाणयति—**मायेति**। 'मायां तु प्रकृतिं विद्यात्,' 'देवात्मशक्तिम्' इत्येवंविधा श्रुतिः। 'प्रकृतिं पुरुषं चैव' 'माया ह्येषा' इत्येवंप्रकारा च स्मृतिः। नामरूपे चेदीश्वरात्मभूते तर्हि सोऽपि ताभ्यामभिन्नत्वात् तद्वदेव जडः स्यादित्याशङ्क्याह—**ताभ्यामिति**। ईश्वरस्य नामरूपाभ्यामर्थान्तरत्वे प्रमाणमाह—**आकाश इति**। यत्तु नामरूपबीजव्याकरणापेक्षमैश्वर्यमिति, तत्र तद्व्याकरणे प्रमाणमाह—

(छा.उ. ६।३।२), 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते' (तै.आ. ३।१२।७), 'एकं बीजं बहुधा यः करोति' (श्वे.उ. ६।१२) इत्यादिश्रुतिभ्यश्च। एवमविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति, व्योमेव घटकरकाद्युपाध्यनुरोधि। स च स्वात्मभूतानेव घटाकाशस्थानीयानविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातानुरोधिनो जीवाख्यान् विज्ञानात्मनः प्रतीष्टे व्यवहारविषये। तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च, न परमार्थतो विद्ययाऽपास्तसर्वोपाधिस्वरूप आत्मनीशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते। तथा चोक्तम्–'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' (छा.उ. ७।२४।१) इति। 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' (बृ.उ. ४।५।१५) इत्यादिना च। एवं परमार्थावस्थायां सर्वव्यवहाराभावं वदन्ति वेदान्ताः सर्वे। तथेश्वरगीतास्वपि–'न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः। न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते।। नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः। अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।।'

प्रकटार्थविवरणम्

इत्यर्थः।। **एवमविद्याकृतेति**।। अविद्याकार्यव[र्यत्वा] दनिर्वाच्ये नामरूपे एवोपाधिर्माया तत्प्रतिबिम्बितश्चिद्धातुरीश्वरो भवतीत्यर्थः। विद्यया लक्ष्यतत्पदार्थविवेकेन अपसारितसर्वोपाधिविशेषे बिम्बभूते ब्रह्मणीत्यर्थः। स्वभावः नैसर्गिकी माया, प्रवर्तते। तदेवं श्रुतिस्मृतिपर्यालोचनया सोपाधिकत्वानुपाधिकत्वाभ्यां सविशेषत्वं निर्विशेषत्वं चाविरुद्धम्।।

भाष्यभावप्रकाशिका

स चेति।। उपसंहरति—**तदेवमिति**। परमार्थत ईश्वरत्वानुपपत्तौ कल्पनयोपपत्तौ च यथाक्रमं प्रमाणमाह—**तथा चोक्तमिति**।। ननु

न्यायनिर्णयः

नामरूपे इति। जीवस्य व्याकर्तृत्वं व्यासेद्धुं वाक्यान्तरमुदाहरति—**सर्वाणीति**। नामरूपव्याकरणस्य नानाविधत्वसिद्ध्यर्थं श्रुत्यन्तरं पठति—**एकमिति**। आदिशब्देन 'सच्च त्यच्चाभवत्' इत्याद्या श्रुतिर्गृह्यते। दर्शितश्रुतिभ्यो नामरूपव्याकरणमीश्वरायत्तं सिद्धम्, तदपेक्षं चास्यैश्वर्यमित्यर्थः। स्वाभाविकत्वादैश्वर्यस्य कुतो व्याकरणापेक्षेत्याशङ्क्याह—**एवमिति**। उक्तश्रुतिस्मृत्यनुरोधादविद्याकृते तदात्मके ये नामरूपे तद्रूपानवच्छिन्नोपाध्यभिव्यक्तश्चिदात्मा ताभ्यामेव नामरूपाभ्यां विरचितं विचित्रं प्रपञ्चं नियमयन्नीश्वरो नाम। ततो न स्वाभाविकमैश्वर्यमित्यर्थः। ईश्वरस्योपाध्यनुरोधित्वे दृष्टान्तमाह—**व्योमेति**। अविद्याकृतजगदीशितृत्वेऽपि जीवानामतत्कृतत्वात् कुतस्तान्प्रत्यैश्वर्यमित्याशङ्क्याह—**स चेति**। स्वात्मभूतत्वे भेदाभावात् कुतो नियम्यतेत्याशङ्क्याह—**घटेति**। ननु घटवदुपाधेरनधिगमे कथमौपाधिकभेदानुरोधेन नियम्यनियन्तृत्वं कल्प्यते, तत्राह—**अविद्येति**। ईश्वरस्येश्वरत्वं काल्पनिकमिति स्पष्टयितुं विशिनष्टि—**व्यवहारेति**। कल्पितमीश्वरत्वमित्युपपादितं निगमयति—**तदेवमिति**। सर्वज्ञत्वादिवदीश्वरत्वस्य वास्तवत्वमाशङ्क्याह—**सर्वज्ञत्वमिति**। सर्वज्ञत्वं चाविद्यात्मकोपाधिपरिच्छेदापेक्षमिति संबन्धः। पूर्वत्रोक्तेन प्रकारेणाविद्यात्मको योऽसावुपाधिस्तेन कृतो यो जीवप्रपञ्चाख्यः परिच्छेदस्तदपेक्षमिति यावत्। अन्वयमुखेनोक्तमर्थं व्यतिरेकद्वारा निरूपयति—**नेत्यादिना**। परमार्थतश्चिद्धातोरीश्वरत्वानुपपत्तौ श्रुतिं प्रमाणयति—**तथा चेति**। ननु परमार्थावस्थायां दर्शनादिव्यवहारराहित्यमिहोच्यते, न पुनरीशित्रीशितव्यादिव्यवहारासत्त्वमित्याशङ्क्य दर्शनादिव्यवहाराभावस्योपलक्षणत्वादत्र समस्तव्यवहारराहित्यं विवक्षितमित्याह—**एवमिति**। बहुवचनं 'स एष नेति नेत्यात्मा' 'अदृश्येऽनात्म्ये' 'यत्तदद्रेश्यम्' 'अस्थूलम्' इत्यादिवाक्यसंग्रहार्थम्। श्रौतेऽर्थे भगवतोऽपि संमतिमाह—**तथेति**। वेदान्तेष्विव भगवद्गीतास्वपि परमार्थावस्थायां व्यवहाराभावः प्रदर्श्यत इति संबन्धः। कथं तर्हि क्रियाकारकफलतत्संबन्धबुद्धिः, तत्राह—**स्वभावस्त्विति**। अनाद्यविद्यावशात् क्रियाकारकादिप्रवृत्तिरित्यर्थः। तथापि भक्तानितरांश्चानुगृह्णन् निगृह्णंश्च तदीयसुकृतदुष्कृते परमेश्वरो वस्तुतो नाशयतीत्याशङ्क्याह—**नादत्त इति**। सर्वेषां परमात्मैक्ये कुतः सुकृतदुष्कृतयोर्विभागेन प्रवृत्तिरित्याशङ्क्याह—

(भ.गी. ५।१४-१५) इति परमार्थावस्थायामीशित्रीशितव्यादिव्यवहाराभावः प्रदर्श्यते। व्यवहारावस्थायां तूक्तः श्रुतावपीश्वरादिव्यवहारः-'एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय' (बृ.उ. ४।४।२२) इति। तथा चेश्वरगीतास्वपि-'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया।।' (भ.गी. १८।६१) इति। सूत्रकारोऽपि परमार्थाभिप्रायेण तदनन्यत्वमित्याह। व्यवहाराभिप्रायेण तु स्याल्लोकवदिति महासमुद्रस्थानीयतां ब्रह्मणः कथयति। अप्रत्याख्यायैव कार्यप्रपञ्चं[1] परिणामप्रक्रियां चाश्रयति सगुणेषूपासनेषूपयोक्ष्यत इति।।१४।।

प्रकटार्थविवरणम्

अत्रैव सूत्रकारसंमतिमाह—**सूत्रकारोऽपीति**।। यच्चोक्तम्—'न सूत्रकारः क्वचिदपि मायाशब्दं प्रयुङ्क्ते' इति, तदसत्; "मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" इति सूत्रवचनात्; तत्र स्वप्ने मात्रग्रहणं कुर्वन् जागरणस्यापि मायामयत्वं सूचयति। यच्च 'मायेति प्रज्ञोच्यते' इति व्याख्यानम्, तदसत्, मिथ्याभूते करिनरतुरगादौ मायाशब्दस्य लौकिकानां प्रयोगदर्शनात् वेदेऽपि "मायां तु प्रकृतिम्" इत्यत्र स एवार्थो ग्राह्यः। यच्चोक्तम्—"अजामेकाम्" इति तेजोबन्नलक्षणाया भूतप्रकृतेः प्रकृतत्वात् सैव निर्मिमीते स्वविकारानिति व्युत्पत्त्या मायोच्यत इति, तदसत्, योगाद् रूढेर्बलीयस्त्वात्। "किंकारणं ब्रह्म" इति तेजःप्रभृतिकं प्रति ब्रह्मणो निरंशस्य कारणत्वासंभवाशङ्कायां तन्निर्वाहिकायाः शक्तेः स्वगुणैः निगूढायाः प्रक्रान्तत्वाच्च। तदेवं श्रुतिस्मृतिसूत्रप्रसिद्धो मायावाद इति स्थितम्।

यदत्र **भास्करो** रुरोद—"कथं मिथ्यात्वमवगतम्? न तावत्प्रत्यक्षानुमानाभ्याम्, [ताभ्यां] हीदं प्रपञ्चजातं परिच्छिन्नम्; न च कारणदोषबाधकप्रत्ययौ स्तः; पृथिव्यादिज्ञानस्य आसंसारं सर्वेषां प्राणिनामनुवृत्तेः; अतः पारमार्थिक एवायं भेदः" इति, तत्र यदि प्रत्यक्षबाधाभावात् सत्यत्वमभिप्रेतम्, तदा चन्द्रप्रादेशत्ववर्णदैर्घ्यादिदेहाद्यात्मभावानामपि सत्यत्वप्रसङ्गः, तेषामप्यासंसारमनुवृत्तेः। अथ तत्रानुमानिकस्यागमिकस्य [वा बाधस्य] विद्यमानत्वात् तत एव दोषस्यापि कल्प्यमानत्वादसत्यता सदा सिद्धैवावगम्यते, तर्हीहाप्यागमानुमानयोरुपन्यस्तत्वादविद्यादोषस्य च संभावितत्वात् प्रागनिर्ज्ञातमपि मिथ्यात्वमवगम्यताम्। यच्चोक्तम्—ब्रह्मज्ञानमपि तर्हि मिथ्या स्यादविद्याप्रसूतत्वात्, ज्ञानत्वाद्वा प्रपञ्चज्ञानवदिति, तदतिफल्गु; स्वरूपमिथ्यात्वसाधने सिद्धसाधनत्वात्[2], विषयमिथ्यात्वसाधने चागमाबाधितत्वात्[3]। यच्च मिथ्याशब्दस्य तुच्छार्थत्वं गृहीत्वाऽऽगमस्याबोधकत्वादिवल्गनं तत् पररहस्याविज्ञानविजृम्भितमित्यपहसन्ति सुज्ञाः। तथा हि—मिथ्यात्वं नाम बाध्यत्वम्; तच्चाज्ञानकार्यस्य प्रत्यक्षबाधे ज्ञाननिवर्त्यत्वम्; परोक्षबाधे, मायाकार्ये वा परमार्थसत्यत्ववैधुर्यप्रकटीकरणम्। न च तादृशमिथ्यात्वविशिष्टस्यार्थक्रियायां काचित् क्षतिः, घटस्येवानित्यताविशिष्टस्य।

भाष्यभावप्रकाशिका

कार्यस्य मिथ्यात्वमयुक्तम्; "स्याल्लोकवदि"ति वदता सूत्रकारेण सत्यत्वाभ्युपगमादिति, अत आह—**सूत्रकारोऽपीति**।। ननु "आत्मकृतेः परिणामात्" "क्षीरवद्धी" त्यादिना परिणामव्यपदेशात् सत्यत्वमित्याशङ्क्य, अन्यार्थत्वान्न तद्विवक्षेत्याह—**परिणामेति**।।१४।।

न्यायनिर्णयः

अज्ञानेनेति। ऐश्वर्यादेर्वस्तुतोऽनुपपत्तिमुक्त्वा कल्पनयोपपत्तौ श्रुतिस्मृती क्रमेणोदाहरति—**व्यवहारेति**। श्रुताविवेश्वरगीतास्वपि व्यवहारावस्थायामीश्वरादिव्यवहार उक्त इति संबन्धः। परमार्थावस्थायां सर्वव्यवहाराभावे सूत्रकारस्यापि संमतिमाह—**सूत्रेति**। 'तदनन्यत्वम्' इत्यनेनायुक्तं कार्यमिथ्यात्वं कथ्यते, 'स्याल्लोकवत्' इति पूर्वसूत्रे तत्सत्यत्ववचनादित्याशङ्क्याह—**व्यवहारेति**। 'आत्मकृतेः परिणामात्' 'क्षीरवद्धि' इत्यादिना परिणामोक्तेरेष्टव्यं कार्यप्रपञ्चस्य सत्यत्वमित्याशङ्क्यान्यार्थत्वात् परिणामवादस्य न तद्विवक्षेत्याह—**परिणामेति**।।१४।।

---

१. 'कथयति अप्रत्याख्यायैव कार्यप्रपञ्चम्'। इत्येवं ग्रन्थविभागः स्यादिति व्याख्याधृतप्रतीकेन संभाव्यते।

२. वृत्तेर्मिथ्यात्वस्येष्टत्वादिति भावः। ३. 'बाधितत्वात्' इति पाठः स्यात्। यद्वा 'आबाधितत्वात्' इति च्छेदः।

प्रकटार्थविवरणम्

यच्च **केशवेनोक्तम्**—''यथा स्वप्ने सुरापानं न प्रायश्चित्तकारणं तथा जागरणेऽपि न स्यात्, मिथ्यात्वाविशेषात्'' इति, तदसत्; क्षीरसुरादीनां द्रवद्रव्यताऽविशेषेऽप्यवान्तरवैलक्षण्यादर्थक्रियासामर्थ्यभेदवत् स्वप्नजागरितयोः मिथ्यात्वाविशेषेऽप्यवान्तरवैलक्षण्यादर्थक्रियासामर्थ्यविशेषोपपत्तेः। किञ्चैतद्दुर्दमनं दुर्ज्ञानानां क्षुद्रोपद्रवमात्रम्, न प्रमाणसिद्धमिथ्यात्वमन्यथाकारं कर्तुं शाशकीतीति पुनः प्रयुज्यते—विमतं न सत्यं जडत्वात्, दृश्यत्वात्; परतन्त्रत्वात्, आत्मान्यत्वात्, विशिष्टत्वाद्वा; संप्रतिपन्नवत्; न च सर्वं सत्यमेवेत्यप्रसिद्धविशेषणत्वं पक्षस्येति केनापि वादिनाऽपवदितव्यं पर[परस्पर] पक्षस्य परस्परमसत्यताभ्युपगमात्, बाधव्यवहारविलोपापाताच्च; शुक्तिरजताद्यनिर्वाच्यतायाः प्रसाधितत्वान्न शिष्यस्याप्रतिपत्तिः; न च बाध्यत्वमुपाधिः, [1]बाध्यत्वादेव; न च दोषगम्यत्वम्[2], तद्गम्यस्य तद्धेतोस्तस्य[3] चामिथ्यात्वात्; न च दोषमात्रगम्यत्वम्[4], शुक्तिरूप्यस्यापि संस्कारादेः कारणत्वात्, साधनव्यापकत्वाच्च; न च भ्रान्तिविषयत्वम्, अंशे[5] व्यभिचारात्; न चाप्रामाणिकत्वम्, स्मृतिविषयस्यामिथ्यात्वात्; नापि झटित्युच्छिन्नव्यवहारत्वम्, साध्यासमव्याप्तेः, दिङ्मोहादौ व्यभिचारात्। न धर्मिग्राहकप्रमाणबाधः ; तथा हि—प्रत्यक्षं वर्तमानकालावच्छिन्नां सत्तां गृह्णाति; न च तदभावोऽनुमानेनावेद्यते, येन विरोधो भवेत्। किञ्च प्रत्यक्षस्याबाध्यार्थत्वसाधने सिद्धसाधनम्; अत्यन्ताबाध्यार्थत्वसाधने वर्तमानावभासिताविरोधः, आगमविरोधश्च। अद्वैतागमस्य त्वबाध्यार्थविषयस्यानियतकालवस्तुपरिच्छेदकत्वादत्यन्ताबाध्यार्थ-परिच्छेदकत्वमविरुद्धम्। तस्मादद्वैतागमवत् प्रत्यक्षस्य तत्त्वावेदकत्वाभावात् न धर्मिग्राहकप्रमाणबाधः। अप्रामाणिकत्वाच्चाश्रयासिद्धिः कुतः? किमप्रामाणिकत्वादेव? किं वाऽन्यत्रादर्शनात्? उतासत्त्वादतिप्रसङ्गाद्वा? नाद्यः; [6]एतमेव हेतुं प्रत्याश्रयत्वानाश्रयत्वयोः तदसिद्धेः; न द्वितीयः, प्रतिबिम्बादौ दर्शनात्; न तृतीयः, प्रतीतिपराहतेः; न चाप्रामाणिकत्वमसत्त्वव्याप्तमज्ञातसत्त्वेष्टेः; न चैवमाश्रयासिद्धिविलोपः, विधिव्यवहारे निरुपाख्यस्य तद्योग्यत्वात्। न च जडत्वादेः स्वात्मनि वृत्त्यभावेन भागासिद्धिः, भेदान्योन्याभावादिवत् स्वपरनिर्वाहकत्वात्। आत्मन्यनैकान्तिक इति चेन्न, स्वप्रकाशताया दर्शितत्वात्; परसिद्धात्मनश्च पक्षनिक्षेपात्; न च सन्दिग्धानैकान्तिकत्वम्, स्वप्रकाशत्वावगमादेवास्वप्रकाशतारूपजडताव्यावृत्तेः निश्चेतुं शक्यत्वात्; न चास्यैवानुमानस्य सत्यत्वासत्यत्वयोः [7]अनैकान्तिकत्वासाधकत्वे; असत्यस्यापि निर्दि[निर्दु]ष्टतया साधकत्वात् प्रतिबिम्बवर्णदैर्घ्यादिवत्; तत्संवेदनस्य सत्यस्यैव साधकत्वं चेदिहापि जडत्वादिसंवेदनं साधकमस्तु। न [न च]आत्मभेदान्न व्यभिचारः; अविच्छिन्नस्य च मिथ्याभूतस्यैव साधकत्वमसाधि। न चानवस्था, स्वाध्यायविध्यादिवदुपपत्तेः। न चाविद्यानिवृत्तावनैकान्तिकता, तस्या अपि मिथ्यात्वात्, ''नेह नानास्ति किञ्चन'' इत्यविशेषनिषेधात्; उपादानं[दाने] चैकवचनप्रयोगादेव अप्राप्तनानात्वप्रतिषेधप्रसङ्गादात्मातिरिक्तवस्त्वभाव एव तात्पर्यम्। न च मिथ्याकार्योपादानात् विद्या[दानत्वादविद्या]सद्भावप्रसङ्गः, प्रध्वंसस्य निरुपादानत्वात्; न च तस्या मिथ्यात्वेऽविद्यासद्भाव एव वास्तव इति वाच्यम्, तस्या मिथ्याभूताया मिथ्यानाशेनापि नाशसंभवात्, मायानिर्मितहस्त्यादिवत्। एतेनानिर्वचनीयस्य नानिर्वचनीया निवृत्तिरित्यपास्तम्। स्वप्नमायानाशवत्, परेषां सत्यस्य घटस्य सत्यनाशवच्च; विमता निवृत्तिरविद्यातत्कार्ययोरन्यतरा मिथ्यात्वात्, तद्वन्न संबन्धेनैकान्तिकनिवृत्तिमत्त्वमुपाधिः; न च तदपि साध्यमनवस्थानात्; यत्र वावस्थितिः सैवाविद्यानिवृत्तिः; आस्माकीने च विपक्षे बाधविरहादप्रयोजकता वाच्या; मिथ्यात्वधर्मविशिष्टस्य सत्यत्वे तर्कसहत्वप्रसङ्गात्; न चायं भेदाभेदादितर्कं सासहीति संवित्संसर्गमार्गणवानपि; बाध्यत्वमपि सत्यत्ववैधुर्यमेवेष्टम्। मिथ्यात्वावगमात्; न कालात्ययापदिष्टता प्रतिज्ञा[ज्ञाता]र्थस्य सत्यत्वग्राहिणाऽनपहारात्; तस्मिन् सत्ये च तन्मिथ्यात्वसंभवाच्च तावता कालात्ययापदिष्टत्वं वाक्छलमात्रम्। सत्यत्ववैधुर्यस्य च संसर्गाभावात् तद्ग्राहकाणां प्रत्यक्षादीनामतत्त्वावेदकत्वादद्वैतागमस्य सत्यतावत् स्वपरनिर्वाहकत्वात्। तस्मात् प्रपञ्चमिथ्यात्वे दोषाभावात् न कश्चिद्विरोध इति स्थितम्।।

---

१. 'साध्यत्वादेव' इति पाठः स्यात्। बाध्यत्वमेवात्र साध्यम्। साध्यं च नोपाधिः। यथाश्रुते 'पक्षस्यापि' इति शेषः। तथा च साधनव्यापकत्वान्न तदुपाधिः।
२. उपाधिरित्यनुषज्यते। एवमग्रेऽपि। ३. तथा च परीत्या मिथ्यात्वाभाववति सत्त्वेन न साध्यसमव्यापकता। ४. तच्च दोषे तद्धेतौ च नास्तीति नोक्तदोष इत्यभिमानः। साध्याव्यापकत्वेन दूषयति—शुक्तीति। ज्ञाने इति शेषः। ५. अंशे = धर्म्यंशे। ६. अप्रामाणिकत्वरूपहेतुमित्यर्थः। अप्रामाणिस्यैव तदाश्रयत्वात्। ७. यथासंख्यमन्वयः।

भावे चोपलब्धेः।।१५।।

इतश्च कारणादनन्यत्वं कार्यस्य, यत्कारणम्, भाव एव कारणस्य कार्यमुपलभ्यते, नाभावे। तद्यथा– सत्यां मृदि घट उपलभ्यते, सत्सु च तन्तुषु पटः। न च नियमेनान्यभावेऽन्यस्योपलब्धिर्दृष्टा। न ह्यश्वो गोरन्यः सन् गोर्भाव एवोपलभ्यते; न च कुलालभाव एव घट उपलभ्यते, सत्यपि निमित्तनैमित्तिकभावेऽन्यत्वात्। [1]नन्वन्यस्य भावेऽप्यन्यस्योपलब्धिर्नियता दृश्यते, यथाऽग्निभावे धूमस्येति। नेत्युच्यते; उद्वापितेऽप्यग्नौ गोपालघुटिकादिधारितस्य धूमस्य दृश्यमानत्वात्। अथ धूमं कयाचिदवस्थया विशिंष्यादीदृशो धूमो नासत्यग्नौ भवतीति। नैवमपि कश्चिद् दोषः। तद्भावानुरक्तां हि बुद्धिं कार्यकारणयोरनन्यत्वे हेतुं वयं वदामः। न चासावग्निधूमयोर्विद्यते।

प्रकटार्थविवरणम्

भावे चोपलब्धेः। पुनरप्युपादानात् कार्यस्य भेदो निरूपयितुं न शक्यत इत्याह अनिर्वाच्यत्वसमर्थनार्थमेव—**इतश्च कारणादित्यादिना**।। कार्यं नोपादानाद्वस्त्वन्तरं तद्भावनियतभावत्वात्; यद्यस्माद्वस्त्वन्तरं न तत्तद्भावनियतभावम्, यथा अश्वो न गोभावनियतभाव इति। नन्वकार्यकारणत्वात् गवाश्वयोः अनियतिरित्याशङ्क्याह—**न च कुलालभाव एवेति**।। इदानीं हेतोर्व्यभिचारं शङ्कते—**नन्वन्यभावेऽपीति**।। धूममात्रस्य तावन्नाग्निभावेन नियतो भाव इति न व्यभिचार इत्याह—**नेत्युच्यत इति**।। यदि बहलोर्ध्वत्वादिविशिष्टस्याग्निभावनियतभावत्वमभिधीयते तर्हि मदीयहेत्वर्थस्यापि न व्यभिचार इत्याह—**अथ धूममित्यादिना**।। तद्भावनियतभावत्वादिति हेतोरयमर्थः—उपादानभावानुरक्तबुद्धिविषयत्वादिति। न चासौ बुद्धिरग्निधूमयोः विद्यते, अग्नेर्निमित्त-कारणत्वादिति भावः।

भाष्यभावप्रकाशिका

भावे चोपलब्धेः।।१५।। कार्य-कारणयोरनन्यत्वेऽनुमानं प्रमाणमाह—**इतश्चेति**।। ननु सत्यपि घटे घट उपलभ्यते; तथापि नान्यत्वमित्याशङ्क्य, तयोः सहोपलम्भनियमो नास्तीत्याह—**न च नियमेनेति**।। व्यतिरेकव्याप्तिमाह—**न ह्यश्व इति**।। ननु कार्य-कारणभावकृता नियमेनोपलब्धिः न त्वनन्यत्वकृतेत्याशङ्क्याह—**न च कुलालेति**।। नियमेनोपलम्भेऽपि परपरिकल्पितत्वं न दृश्यत इति व्यभिचारमाशङ्कते—**नन्वन्येति**।। आपाततः परिहारमाह—**नेत्युच्यते इति**।। परमार्थतः परिहारं वक्तुं शङ्कामुत्थापयति—**अथेति**।। इदानीं सम्यक्परिहारमाह—**नैवमिति**।। न च—तद्भावानुरक्तत्वं चैतन्यस्यापि विद्यते; घटाद्युपरक्तत्वात्, अतस्तत्र व्यभिचार इति—शङ्कनीयम्, घटादिचैतन्यस्य पटाद्यनुगततया प्रतीतेः, इह च कारणोपलम्भभावयोःसतोरेव कार्योपलम्भ[भाव]योरनन्यत्वे

न्यायनिर्णयः

तदनन्यत्वमित्यस्य श्रुत्यादिविरोधः समाहितः। सम्प्रति तदनन्यत्वे मानमनुमानमाह—**भावे चेति**। कारण[स्य]भावे भाने च कार्यस्य भावाद्भानाच्च तस्य कारणादनन्यत्वमित्यर्थः। विमतं कारणानतिरिक्तं तद्भावभाननियतभावभानत्वात्, तत्स्वरूप-वदित्यनुमानं सूत्रयोजनया दर्शयितुं चकारार्थमाह—**इतश्चेति**। इतःशब्दार्थं स्फुटयन्नवशिष्टं व्याचष्टे—**यत्कारणमिति**। हेतुमुदाहरणारूढतया द्रढयति—**तद्यथेति**। सत्यपि घटे पटोपलब्धिदर्शनात् कारणभावे कार्योपलब्धिर्नाभेदसाधनमित्याशङ्क्याह—**न चेति**। अन्यस्य भावेऽन्यस्योपलब्धिरनियतेत्यत्र दृष्टान्तमाह—**न हीति**। ननु गवाश्वयोरकार्यकारणत्वादनियतोपलम्भेऽपि कार्यकारणयोरनन्यत्वमन्तरेणैव कार्यकारणत्वकृता नियतोपलब्धिरित्याशङ्क्याह—**न चेति**। नियमेनोपलम्भेऽपि नानन्यत्वमिति व्यभिचारं शङ्कते—**नन्विति**। धूममात्रस्याग्निना नियतोपलब्धिर्धूमविशेषस्य वेति विकल्प्याद्यं प्रत्याह—**नेत्युच्यत इति**। द्वितीयं शङ्कते—**अथेति**। ईदृशत्वं बहलोर्ध्वाग्रत्वादिविशिष्टत्वमसत्यग्नौ न भवति, न भाति चेति द्रष्टव्यम्। धूमविशेषस्याग्निना नियतोपलब्धिमुपेत्य हेतुशिक्षया व्यभिचारं परिहरति—**नैवमिति**। तद्भावानुविधायिभावत्वं तद्भानानुविधायिभानत्वं च कार्यस्य

१. 'नन्वन्यभावे' इति पा.।

भावाच्चोपलब्धेरिति वा सूत्रम्। न केवलं शब्दादेव कार्यकारणयोरनन्यत्वम्, प्रत्यक्षोपलब्धिभावाच्च तयोरनन्यत्वमित्यर्थः। भवति हि प्रत्यक्षोपलब्धिः कार्यकारणयोरनन्यत्वे। तद्यथा–तन्तुसंस्थाने पटे तन्तुव्यतिरेकेण पटो नाम कार्यं नैवोपलभ्यते, केवलास्तु तन्तव आतानवितानवन्तः प्रत्यक्षमुपलभ्यन्ते, तथा तन्तुष्वंशवोंऽशुषु तदवयवाः। अनया प्रत्यक्षोपलब्ध्या लोहितशुक्लकृष्णानि त्रीणि रूपाणि, ततो वायुमात्रमाकाशमात्रं चेत्यनुमेयम्। ततः परं ब्रह्मैकमेवाद्वितीयम्, तत्र सर्वप्रमाणानां निष्ठामवोचाम।।१५।।

प्रकटार्थविवरणम्

पाठान्तरेणार्थान्तरमाह—**भावाच्चेति**।। प्रथमसूत्रे कारणात्कार्यस्यान्यत्वाभावे शब्दः प्रमाणमुपन्यस्तः; द्वितीये प्रथमपाठे[प्रथमपाठेऽनुमानम्; द्वितीये] प्रत्यक्षमिति विभागः। न तावत् पट इति स्वातन्त्र्योपलम्भः तन्तुव्यतिरिक्तपटसद्भावे प्रमाणम्, वनवदुपपत्तेः; नाप्येकबुद्धिविषयत्वम्, प्रावरणाद्येकार्थक्रियोपाधिकत्वात्, वर्णेष्विवैकपदबुद्धि [बुद्धेः], नाप्येकदेशकर्षणे सर्वाकर्षणम्, काष्ठभारवदुपपत्तेः; तस्मान्निरूप्यमाणे तन्तव एव संस्थानविशेषात् पटबुद्धिभाज इति भावः। एवं मूलकारणपर्यन्तं सर्वत्र कार्यं कारणव्यतिरिक्तं न भवतीत्यतिदिशति—**तथा तन्तुष्वित्यादिना**।। ननु प्रधानादीनामपि मूलकारणत्वात् कथं ब्रह्मैकमेव मूलं व्यवतिष्ठत इत्याशङ्क्याह—**तत्र सर्वेति**।। सर्वेषां जगत्कारणवादिवाक्यानां ब्रह्मण्येव तात्पर्यमुक्तवन्तो वयम्; अतो नान्यन्मूलकारणमिति भावः।।

भाष्यभावप्रकाशिका

हेतुतया विवक्षितत्वात्, अन्यथा तद्भाव एव भावमात्रस्य तदुपलम्भ एव चोपलम्भस्य वह्निभावानुविधायिभाविना धूमभेदेन प्रभारूपानुविद्धबुद्धिबोध्येन च चाक्षुषेण व्यभिचारात्, भावशब्देन विषयवाचिना विषयिण्या उपलब्धेरपि सूचितत्वात् उपलब्धिपदेन च तद्विषयस्य भावस्यापि सूचनाद्विशिष्ट एव हेतुः सूत्रित इति द्रष्टव्यम्।

पाठान्तरेणेदमेव सूत्रं व्याचष्टे—**न केवलमिति**।। प्रत्यक्षं दर्शयति—**भवति हीति**।। ननु आतान-वितानात्मकस्तन्तु-व्यतिरेकेण पट उपलभ्यत इति? तत्राह—**केवलास्त्विति**।। न च—तन्तुष्वेकशब्दबुद्धिगोचरत्वासंभवो बहुत्वादिति—शङ्कनीयम्, बहूनामपि तन्तूनामेकप्रावरणलक्षणार्थक्रियावच्छेदात् तरूणामिवैकदेशकालावच्छिन्नानां तद्गोचरत्वोपपत्तेः। न च बहूनामेकार्थ-क्रियाकारित्वासंभवः। बहूनामपि वर्णानामेकार्थप्रत्ययजनकत्वदर्शनादिति भावः।। अनया रीत्या मूलकारणं ब्रह्मैव, परमार्थसत्, अवान्तरकारणानि त्वनिर्वाच्यानीत्याह—**तथा तन्तुष्विति**।। ननु कारणत्वात् तन्त्वादिवद् ब्रह्मणोऽपि कारणान्तरमनुमेयमिति, अत

न्यायनिर्णयः

काणादनन्यत्वे हेतुः। धूमविशेषस्य चाग्निभावानुविधायिभावत्वेऽपि न तद्भानानुविधायिभानत्वमग्निभानस्य धूमभानाधीनत्वात्। न च तद्भानानुविधायिभानत्वमेवास्तु हेतुः, प्रभाभानानुविधायिभाने चाक्षुषरूपे व्यभिचारात्। तस्माद् विशिष्टहेत्ववष्टम्भात् कार्यस्य कारणादनन्यत्वमुचितमिति भावः।

एतदेव सूत्रं पाठान्तरेण व्याकुर्वन् कार्यस्य कारणादनन्यत्वे मानान्तरमाह—**भावाच्चेति**। प्रत्यक्षोपलब्धिमेव प्रतिज्ञोदाहरणाभ्यां विवृणोति—**भवति हीति**। तन्तुव्यतिरेकेणातानवितानाभ्यां पटो भातीत्याशङ्क्याह—**केवलास्त्विति**। बहुत्वेऽपि तन्तूनामेकप्रावरणार्थ-क्रियावच्छेदादेकशब्दगोचरत्वं, बहूनामपि वर्णानामेकार्थबुद्धिहेतुत्ववदेकार्थक्रियाकारित्वं च तेषामविरुद्धमिति भावः। तन्तुव्यतिरिक्तपटा-भाववदंशुव्यतिरिक्ततन्त्वभावोऽपि प्रत्यक्षः सिध्यतीत्याह—**तथेति**। अंशवोऽपि स्वावयवव्यतिरेकेण न सन्तीति प्रत्यक्षमित्याह—**अंशुष्विति**। ननु प्रत्यक्षे कार्यकारणभावे कार्यं कारणमात्रमिति शक्यं प्रत्यक्षयितुम्, यत्र त्वसौ प्रत्यक्षो न भवति तत्र कथमिति, तत्राह—**अनयेति**। विमतं स्वोपादानाव्यतिरिक्तं , कार्यत्वात्, पटवदित्यनुमानं मूलकारणपर्यन्तं धावतीत्यर्थः। प्रत्यक्षानुमानाभ्यां फलितमर्थमाह—**तत इति**। ब्रह्मैव मूलकारणं परमार्थसत्, अवान्तरकरणानि त्वनिर्वाच्यानीत्यर्थः। कारणत्वाविशेषात् तन्त्वादिवद् ब्रह्मणोऽपि कारणान्तरमनुमेयमित्याशङ्क्याह—**तत्रेति**। सर्वजगद्भ्रमाधिष्ठानतया तस्याकल्पितत्वान्नाधिष्ठानान्तरापेक्षेति भावः।।१५।।

सत्त्वाच्चावरस्य।।१६।।

इतश्च कारणात् कार्यस्यानन्यत्वम्, यत्कारणम्, प्रागुत्पत्तेः कारणात्मनैव कारणे सत्त्वमवरकालीनस्य कार्यस्य श्रूयते 'सदेव सोम्येदमग्र आसीत्' (छा.उ. ६।२।१), 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ.उ. १।१) इत्यादाविदंशब्दगृहीतस्य कार्यस्य कारणेन सामानाधिकरण्यात्। यच्च यदात्मना यत्र न वर्तते न तत् तत उत्पद्यते, यथा सिकताभ्यस्तैलम्। तस्मात् प्रागुत्पत्तेरनन्यत्वादुत्पन्नमप्यनन्यदेव कारणात् कार्यमित्यवगम्यते। यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरत्येवं कार्यमपि जगत् त्रिषु कालेषु सत्त्वं न व्यभिचरति। एकं च पुनः सत्त्वम्, अतोऽप्यनन्यत्वं कारणात् कार्यस्य।।१६।।

प्रकटार्थविवरणम्

सत्त्वाच्चावरस्य।। प्रमाणान्तरं भेदाभावे कथयति—**सत्त्वाच्चेति।।** यदिदानीं स्थूलमुपलभ्यते तस्य सृष्टेः प्राक् कारणसामानाधिकरण्यान्यथानुपपत्त्या तदा तत्तादात्म्योपगमादपि नास्ति वस्तुभेद इत्यर्थः। युक्तितोऽपि सूक्ष्मरूपेण सृष्टेः प्राक् कारणतादात्म्यमवगम्यत इत्याह—**यच्च यदात्मनेति।।** सूत्रस्यार्थान्तरमाह—**यथा च कारणमिति।।** सत्त्वं भिद्यमानं किं वा सद्रूपेण भिद्यते, किं वाऽसद्रूपेण? आद्ये यद्भिद्यते तदेव सत्; द्वितीये यतो भिद्यते तदेवैकम्; भेदकासाधारणाकारमन्तरेण भेदे नैकं किञ्चन स्यात्; न च सन् घट इत्यादावनुवृत्तव्यावृत्तसत्त्वद्वयग्राहिप्रत्ययभेदो दृश्यते। सदिदं रूप्यमितिवदापरोक्ष्यानुगमोपपत्तिः। अतः कारणवत् कार्यस्य सत्त्वात् सत्त्वभेदे च प्रमाणाभावान्नास्ति वस्तुभेद इति भावः।।

भाष्यभावप्रकाशिका

आह—**तत्र सर्वेति।।** सर्वजगद्विभ्रमाधिष्ठानतया तस्यापरिकल्पितत्वान्नाधिष्ठानान्तरापेक्षेति भावः।।१५।।

सत्त्वाच्चावरस्य।।१६।। ननु उत्पत्तेः प्राक् कारणस्य सत्त्वमेवावगम्यते, न तु कार्यस्येत्याशङ्क्याह—**इदंशब्दगृहीतस्येति।।** न केवलं श्रुतिरेव, युक्तिश्चात्रास्तीत्याह—**यच्चेति।।** तथाप्युत्पन्नं ततो भिन्नं स्यादिति, तत्राह—**तस्मादिति।।** एतदुक्तं भवति—यथा सिकतास्वविद्यमानं तैलं ततो न जायते, एवमात्मनोऽपि जगन्न जायेत, जायते च। तस्मादात्मात्मनाऽऽसीदिति निश्चीयत इति। उपपत्त्यन्तरमाह—**यथा च कारणमिति।। एवं कार्यमपीति।।** यथा घटःसर्वदा घट एव, न तु कदाचित् पटो भवति, एवं सदपि कार्यं सर्वदा सदेव, न तु कदाचिदसद्भवितुमर्हतीत्यर्थः। भवत्वेवम्, किं तत इति? अत आह—**एकं चेति।।** सत्त्वानन्यत्वात् ते अपि मिथो न भिद्यन्ते, सत्तावदेवेति भावः।।१६।।

न्यायनिर्णयः

कार्यस्य कारणादनन्यत्वे श्रुतार्थापत्तिं प्रमाणान्तरमाह—**सत्त्वाच्चेति।** श्रुतार्थापत्तिमेव स्फोरयितुं प्रथमं चशब्दव्याख्यानपूर्वकं श्रुतिमुदाहरति—**इतश्चेति।** प्रागुत्पत्तेः सत्त्वं कारणस्यैवात्र श्रुतं, न कार्यस्येत्याशङ्क्याह—**इदंशब्देति।** यदिदानीं स्थूलकार्यं दृष्टं तस्य सृष्टेः प्राक्कारणसामानाधिकरण्यानुपपत्त्या तत्तादात्म्यावगमान्न वस्तुभेदोऽस्तीत्यर्थः। कार्यकारणयोरनन्यत्वे प्रमिते प्रमाणानुग्राहिकां युक्तिमपि समुच्चिनोति—**यच्चेति।** कार्यस्य प्रागवस्थायां कारणात्मना सत्त्वेऽपि निष्पन्नं ततो भिन्नं स्यादित्याशङ्क्याह—**तस्मादिति।** यथा सिकतास्वविद्यमानं तैलं न ततो जायते, तथाऽऽत्मनोऽपि जगन्न जायेत, यद्यात्मरूपेण प्रागवस्थायां नासीत्; जायते च। तस्मादात्मात्मना प्रागासीदिति निश्चयसिद्धिरित्यर्थः। कार्यकारणयोरनन्यत्वे युक्त्यन्तरं वक्तुं भूमिकां करोति—**यथा चेति।** यथा घटः सदा घट एव, न जातु पटो भवत्येवं सदपि कारणं सदा सदेव, न कदाचिदसदिष्टं, तथा कार्यमपि सच्चेन्न कदाचिदसद्भवितुमर्हतीत्यर्थः। कार्यकारणयोर्भेदेनापि सत्त्वसंभवादनन्यत्वं कथमित्याशङ्क्याह—**एकं चेति।** सतोऽसतो वा सद्भेदकत्वाभावात् तदेकतेत्यर्थः। अभिन्नसत्त्वाभिन्नत्वान्मिथोऽपि कार्यकारणे न भिद्येते सत्त्ववदिति फलितमाह—**अतोऽपीति।।१६।।**

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्।।१७।।

ननु क्वचिदसत्त्वमपि प्रागुत्पत्तेः कार्यस्य व्यपदिशति श्रुतिः-'असदेवेदमग्र आसीत्' (छा.उ. ३।१९।१) इति, 'असद्वा इदमग्र आसीत्' (तै.उ. २।७।१) इति च। तस्मादसद्व्यपदेशान्न प्रागुत्पत्तेः कार्यस्य सत्त्वमिति चेत्; नेति ब्रूमः; न ह्ययमत्यन्तासत्त्वाभिप्रायेण प्रागुत्पत्तेः कार्यस्यासद्व्यपदेशः, किं तर्हि, व्याकृतनामरूपत्वाद्धर्मादव्याकृतनामरूपत्वं धर्मान्तरम्, तेन धर्मान्तरेणायमसद्व्यपदेशः प्रागुत्पत्तेः सत एव कार्यस्य कारणरूपेणानन्यस्य। कथमेतदवगम्यते? वाक्यशेषात्। यदुपक्रमे संदिग्धार्थं वाक्यं तच्छेषान्निश्चीयते। इह च तावत् 'असदेवेदमग्र आसीत्' इत्यसच्छब्देनोपक्रमे निर्दिष्टं यत् तदेव पुनस्तच्छब्देन परामृश्य सदिति विशिनष्टि 'तत्सदासीत्' इति। असतश्च पूर्वापरकालासंबन्धादासीच्छब्दानुपपत्तेश्च। 'असद्वा इदमग्र आसीत्' इत्यत्रापि 'तदात्मानं स्वयमकुरुत' इति वाक्यशेषे 'विशेषणान्नात्यन्तासत्त्वम्। तस्माद् धर्मान्तरेणैवायमसद्व्यपदेशः प्रागुत्पत्तेः कार्यस्य। नामरूपव्याकृतं हि वस्तु सच्छब्दार्हं लोके प्रसिद्धम्। अतः प्राङ्नामरूपव्याकरणादसदिवासीदित्युपचर्यते।।१७।।

प्रकटार्थविवरणम्

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्।। कारणात्मना सत्त्वादिति पूर्वहेतोरसिद्धिमाशङ्क्य परिहरति—**असद्व्यपदेशादित्यादिना।।** "यदुपक्रमे सन्दिग्धार्थम्" इत्यस्यायमर्थः—यथा "अक्ताः शर्करा उपदधाति" इत्यत्र केनेति तैलघृतादिषु सन्देहे "तेजो वै घृतम्" इति वाक्यशेषवशात् घृतेनाभ्यक्ता इति निर्णीतम्, तथाऽत्राप्यसच्छब्देन तुच्छ[त्व]मुच्यते व्यक्तसद्वैलक्षण्यं वेति सन्देहे वाक्यशेषे सत्त्वश्रवणात्तुच्छत्वं नोच्यत इति। किञ्च भूतकालसंबन्धिसत्ताभिधायकासीच्छब्दादपि तुच्छत्वमसच्छब्दार्थो न भवतीत्याह—**असतश्च पूर्वापरेति।।** उक्तन्यायं वाक्यान्तरेऽप्यतिदिश्योपसंहरति—**असद्वा इत्यादिना।।**

भाष्यभावप्रकाशिका

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्।।१७।। ननु कस्माद्धर्मान्तरत्वमभिप्रेत्य धर्मान्तरेणेति सूत्रे व्यपदेश इति? तत्राह—**व्याकृतनाम [रूपा] दिति।।** युक्त्यन्तरमाह—**असतश्चेति।।** ननु वृद्धव्यवहाराभावे कथमसच्छब्दः सति वर्तत इत्याशङ्क्य, उपपादितमित्याह—**नामरूपव्याकृतं हीति।।१७।।**

न्यायनिर्णयः

प्रागुत्पत्तेः सत्त्वं कारणात्मना कार्यस्येत्युक्तमाक्षिप्य समाधत्ते—**असदिति।** तत्र चोद्यं विभजते—**नन्वित्यादिना।** परिहारभागमवतारयति—**नेतीति।** नञर्थमाह—**न हीति।** तर्हि केनाभिप्रायेणायमसद्व्यपदेश इत्याशङ्क्य धर्मान्तरेणेति व्याचष्टे—**किं तर्हीति।** तत्र प्रश्नपूर्वकं गमकं कथयति—**कथमिति।** सूत्रावयवं व्याख्याति—**यदिति।** 'अक्ताः शर्करा उपदधाति' इत्यत्र केनेति तैलघृतादौ संदेहे 'तेजो वै घृतम्' इति वाक्यशेषाद् घृतेनेति निश्चितमित्यर्थः। सामान्यन्यायं प्रकृते दर्शयति—**इह चेति।** 'असदेवेदम्' इत्यादावसच्छब्देन तुच्छमुच्यते किंवा सदेवानभिव्यक्तनामरूपमिति संदेहे 'तत् सदासीत्' इति वाक्यशेषात् तुच्छव्यावृत्तं सदेवानभिव्यक्तनामरूपमसच्छब्दितमिति निश्चीयते, तस्य तच्छब्देन परामृष्टस्य सच्छब्देन निर्देशादित्यर्थः। इतश्चात्र तुच्छमसच्छब्दवाच्यं न भवतीत्याह—**असतश्चेति।** 'असद्वा इदम्' इत्यत्र 'तत्सदासीत्' इति वाक्यशेषाभावात् कुतो निश्चयसिद्धिरित्याशङ्क्याह—**असद्वेति।** वाक्यशेषस्य सत्कार्यविषयत्वे फलितमाह—**तस्मादिति।** वृद्धव्यवहाराभावे कथमसच्छब्दस्य सति प्रयोग इत्याशङ्क्योपचारादित्याह—**नामेति।।१७।।**

---

१. क्रियमाणत्वविशेषणं शून्यस्यासंभवीति भावः।

युक्तेः शब्दान्तराच्च।।१८।।

युक्तेश्च प्रागुत्पत्तेः कार्यस्य सत्त्वमनन्यत्वं च कारणादवगम्यते, शब्दान्तराच्च। युक्तिस्तावद् वर्ण्यते—दधिघटरुचकाद्यर्थिभिः प्रतिनियतानि कारणानि क्षीरमृत्तिकासुवर्णादीन्युपादीयमानानि लोके दृश्यन्ते। न हि दध्यर्थिभिर्मृत्तिकोपादीयते, न घटार्थिभिः क्षीरम्। तदसत्कार्यवादे नोपपद्यते। अविशिष्टे हि प्रागुत्पत्तेः सर्वस्य सर्वत्रासत्त्वे कस्मात् क्षीरादेव दध्युत्पद्यते, न मृत्तिकायाः, मृत्तिकाया एव च घट उत्पद्यते, न क्षीरात्। अथाविशिष्टेऽपि प्रागसत्त्वे क्षीर एव दध्नः कश्चिदतिशयो न मृत्तिकायाम्, मृत्तिकायामेव च घटस्य कश्चिदतिशयो न क्षीर इत्युच्येत, [1]तर्ह्यतिशयवत्त्वात्प्रागवस्थाया असत्कार्यवादहानिः, सत्कार्यवादसिद्धिश्च। शक्तिश्च कारणस्य कार्यनियमार्था कल्प्यमाना नान्याऽसती वा कार्यं नियच्छेत्। असत्त्वाविशेषादन्यत्वाविशेषाच्च।

प्रकटार्थविवरणम्

युक्तेः शब्दान्तराच्च।। सत्त्वा[न]न्यत्वयोः हेत्वन्तरमाह—**युक्तेश्चेत्यादिना**।। कार्यार्थिभिः कारणस्योपादानान्यथानुपपत्त्या कार्यस्य तत्र सत्त्वमवगम्यत इत्याह—**दधिघटेति**।। ननु इष्यमाणकार्यजनकत्वात् मृदाद्युपादानं न तु सत्त्वादित्यन्यथाप्युपपत्तिमाशङ्क्याह—**अविशिष्टे हीति**।। भवेदन्यथाप्युपपत्तिः यद्यसज्जनकत्वं संभाव्येत; असत्त्वे तुल्ये नियामकादर्शनादिति भावः। नियामकमतिशयं शङ्कते—**अथाविशिष्टेऽपीति**।। अतिशयो नातिशयवद्व्यतिरेकेण स्वतन्त्रं तिष्ठतीति कार्यस्यापि सद्भाव आपद्यत इत्याह—**तर्ह्यतिशयवत्त्वादिति**।। नन्वतिशयः कार्यधर्मो न भवति, किं तु कारणगता शक्तिरित्याशङ्क्याह—**शक्तिश्चेति**।। अन्वयव्यतिरेकावधारितस्य कारणस्य कार्योत्पादनियता शक्तिः कार्योत्पादप्रकल्प्याऽपि न कार्यासंसृष्टा, ताभ्यां भिन्ना कल्प्या; तथा सति नियामकत्वासंभवात्; अतोऽनभिव्यक्तकार्यसंसृष्टा शक्तिः तदभिव्यक्तिं नियमयतीत्यर्थः।

भाष्यभावप्रकाशिका

युक्तेः शब्दान्तराच्च।।१८।। इदानीं सदसद्विलक्षणतया कार्यस्यानिर्वचनीयत्वं दर्शयितुं प्रथममसदुत्पत्तिपक्षं निराकरोति—**युक्तेश्चेति**।। सोऽतिशयः किं कार्यधर्मः, किं वा कारणधर्म इति विकल्प्य, आद्यपक्षे धर्मस्य धर्मिव्यतिरेकेणासिद्धेः सत्कार्यवादः स्यादित्याह—**अतिशयवत्त्वादिति**।। द्वितीयपक्षे दूषणमाह—**शक्तिश्चेति**।। नान्या कार्यकारणाभ्याम्, नाप्यसती कार्यात्मनेति योजना।।

न्यायनिर्णयः

ननु कार्यस्यासतोऽर्थान्तरत्वे[2] सत्त्वमास्थेयम्, परस्परविरोधिनोर्विधान्तराभावात्। तथा च कार्यस्यानिर्वाच्यत्वाभ्युपगमभङ्गप्रसङ्गादपसिद्धान्तः स्यादित्याशङ्क्य कारणस्यैवाप्राकृतकारणत्वस्य सत्त्वं, कार्यस्य पुनरनिर्वाच्यत्वमेवेति प्रतिपादयितुं प्रक्रमते—**युक्तेरिति**। हेतुद्वयं प्रतिज्ञाद्वयेन योजयति—**युक्तेश्चेति**। काऽसौ युक्तिरित्यपेक्षायां युक्तिं प्रकटयन्नसदुत्पत्तिं तावत् प्रत्याह—**युक्तिरिति**। प्रतिनियममेव प्रकटयति—**नेत्यादिना**। कार्यार्थिनां प्रतिनियतकारणोपादानानुपपत्त्या कार्यस्य तत्र सत्त्वं सिध्यतीत्यर्थापत्तिमाह—**तदिति**। नन्वपेक्ष्यमाणघटादिजनकत्वान्मृदादिरेवोपादानम्, न तु मृदादौ घटादेः सत्त्वादित्यन्यथोपपत्तिरर्थापत्तेरिति, तत्राह—**अविशिष्टे हीति**। नियामकाभावादसज्जननासंभवान्नान्यथोपपत्तिरित्यर्थः। नियामकमतिशयमाशङ्कते—**अथेति**। अतिशयो हि कार्यस्य कारणस्य वेति विकल्प्याद्ये धर्मस्य धर्मिपरतन्त्रत्वादपसिद्धान्तापत्तिरित्याह—**अत इति**। सार्वविभक्तिकत्वात् तसिः सप्तम्यर्थे शङ्कितपक्षवाची। प्रागवस्था दध्यादिकार्यावस्था। द्वितीयं दूषयति—**शक्तिश्चेति**। कारणस्य हि धर्मः शक्तिरतिशयशब्दिता नियामकत्वेनेष्टा कार्यकारणाभ्यामन्या कार्यात्मना चासती कार्यं न नियच्छेदिति। अत्र हेतुमाह—**असत्त्वेति**। कार्यात्मना शक्तेरसत्त्वे तथैवानियामकत्वमसत्त्वस्योभयत्र तुल्यत्वात्। द्वाभ्यामन्यत्वे च तस्या न नियामकत्वं,

१. 'अतस्तर्हि' इति न्यायनिर्णयधृतः पाठः। २. असद्भिन्नत्वे इत्यर्थः।

तस्मात् कारणस्यात्मभूता शक्तिः, शक्तेश्चात्मभूतं कार्यम्।

अपि च कार्यकारणयोर्द्रव्यगुणादीनां चाश्वमहिषवद् भेदबुद्ध्यभावात् तादात्म्यमभ्युपगन्तव्यम्। समवायकल्पनायामपि समवायस्य समवायिभिः संबन्धेऽभ्युपगम्यमाने तस्य तस्यान्योऽन्यः संबन्धः कल्पयितव्य इत्यनवस्थाप्रसङ्गः। अनभ्युपगम्यमाने च विच्छेदप्रसङ्गः। अथ समवायः स्वयं संबन्धरूपत्वादनपेक्ष्यैवापरं संबन्धं संबध्यते, संयोगोऽपि तर्हि स्वयं संबन्धरूपत्वादनपेक्ष्यैव [1]समवायं संबध्येत। तादात्म्यप्रतीतेश्च द्रव्यगुणादीनां समवायकल्पनानर्थक्यम्।

प्रकटार्थविवरणम्

किञ्चात्यन्तिकभेदे कदाचिद् भेदेनाप्युपलम्भो भवेत्; तदभावात् तादात्म्यभेदतन्मात्र [दात्म्यं भेदमात्र] विरोधि-स्वरूपमभ्युपगन्तव्यमित्याह—**अपि चेति**।। ननु समवायसंबन्धात् पृथगमनुपलम्भ इत्याशङ्क्याह—**समवायेति**।। तस्य समवायिभिः संबन्धोऽभ्युपगम्यते, नो वा? प्रथमे अनवस्था; द्वितीये कार्यकारणादीनां परस्परसंसृष्टत्वं न स्यात् , स्वयमसंसृष्टस्य संसृष्टत्वानापादकत्वादित्यर्थः। समवायस्य स्वरूपनिर्वाहकत्वात् नास्त्यनवस्थेत्याह—**अथ समवाय इति**।। अनिष्टापादनेन परिहरति—**संयोगोऽपीति**।। किमिदं स्वनिर्वाहकत्वं नाम? किं स्वव्यवहारे स्वजातीयनिरपेक्षत्वं प्रदीपवत्? किं वा स्वसंबन्धत्वो [संबन्धो] त्पत्तिनिमित्तत्वम्? किं वा स्वसंसृष्टत्वव्यवहारप्रवर्तकत्वम्? तत्राद्ये विशिष्टसमवायमात्रव्यवहारावतारोपकारः प्रकट एव। द्वितीये तु संबन्धोत्पत्तेः प्राक् पृथगवस्थानं सर्वेषाम्। तृतीये तु संबन्धान्तरविरहेण संसृष्टताया नभस्तलनलिनायमानत्वात् कुतो व्यवहारप्रवर्तकत्वमिति वस्तुतः स्वरूपनिर्वाहकता न निरूपणपद्धतिमध्यास्ते। किञ्च सिद्धे भेदे संबन्धप्रतीतौ वा समवायः कल्प्येत। इह तदभावात् समवायकल्पना व्यर्थेत्याह—**तादात्म्यप्रतीतेश्चेति**।। किञ्चायुतसिद्धानामाधाराधेयभूतानामिहप्रत्ययहेतुर्यः संबन्धः स

भाष्यभावप्रकाशिका

इदानीं कार्यकारणयोस्तादात्म्यादसत्कार्यवादोऽनुपपन्न इत्याह—**अपि चेति**।। ननु भेदबुद्ध्यभावःसमवायनिबन्धन इत्याशङ्क्याह—**समवायेति**।। **विच्छेदप्रसङ्ग इति**।। अवयवावयविनोर्द्रव्यगुणादीनां च मिथो विच्छेदः स्यादित्यर्थः।। ननु समवायः स्वपरनिर्वाहको यथा सतां[सत्ता] द्रव्यादीनां सत्त्वमापादयति, न स्वस्मात् सत्तान्तरमपेक्षते, तद्वदित्याशङ्कते—**अथ समवाय इति**।। परिहरति—**संयोगोऽपीति**।। न च—संयोगस्य कार्यत्वात् कारणे समवायः कल्प्यत इति—वाच्यम्; अजसंयोगे समवायाभावप्रसङ्गात्। अपि च तत्तत्सम्बन्ध्यधीननिरूपणत्वेऽपि यथा समवायस्य न भेदः, तन्नाशे च न नाशः, एवं संयोगोऽप्येको नित्यश्च किं न स्यात्? अथैतत्प्रसङ्गभिया समवायो भिन्नोऽनित्यश्चेत्यभ्युपगम्येत, तर्हि स यथैकस्मान्निमित्तकारणादेव जायते, तथा संयोगोऽपि स्यादित्याशयः। सम्बन्धावगमश्च सम्बन्धकल्पनाबीजम्, न तादात्म्यावगमः, तस्य नानात्वे एकत्वाश्रयसम्बन्धविरोधादित्याह—**तादात्म्येति**।। किञ्च भेदे सिद्धे समवायसिद्धिः, समवायाच्च भेदसिद्धिरिति परस्पराश्रयतेति भावः।।

न्यायनिर्णयः

तयोरिवान्योन्यं शक्तेस्ताभ्यामन्यत्वस्येष्टत्वादित्यर्थः। शक्तेरसत्त्वेऽन्यत्वे च नियामकत्वासंभवे फलितमाह—**तस्मादिति**। तथा चापसिद्धान्ततादवस्थ्यमिति शेषः।

असत्कार्यवादे दोषान्तरमाह—**अपिचेति**। भेदबुद्ध्यभावे समवायो निमित्तं न तु तादात्म्यमित्याशङ्क्य समवायस्तर्हि परतन्त्रः स्वतन्त्रो वेति विकल्प्याद्ये संबन्धद्वारा स्वभावाद्वा पारतन्त्र्यमिति पुनर्विकल्प्याद्यं प्रत्याह—**समवायेति**। समवायस्य स्वातन्त्र्यपक्षं दूषयति—**अनभ्युगम्यमाने चेति**। समवायस्य समवायिभिः संबन्धो नेष्यते, किंतु स्वातन्त्र्यमेवेत्यत्रावयवावयविनोर्द्रव्यगुणादीनां च विप्रकर्षः स्यात् संनिधापकाभावदित्यर्थः । स्वभावादेव समवायस्य पारतन्त्र्यमिति पक्षमुत्थापयति—**अथेति**। स्वपरनिर्वाहकत्वं संयोगस्यापि स्यादविशेषादिति परिहरति—**संयोगोऽपीति**। तर्कपादे चैतद् व्यक्तीभविष्यति। द्रव्यगुणादिषु समवायकल्पनामङ्गीकृत्य दोषमुक्त्वा तत्कल्पनैवायुक्तेत्याह—**तादात्म्येति**। सिद्धे हि भेदे द्रव्यगुणादीनां समवायसिद्धिः, समवायसिद्धौ च

१. 'अपरं समवायम्' इति पा.।

कथं च कार्यमवयविद्रव्यं कारणेष्ववयवद्रव्येषु वर्तमानं वर्तते? किं समस्तेष्ववयवेषु 'वर्तेतोत प्रत्यवयवम्? यदि तावत् समस्तेषु वर्तेत ततोऽवयव्यनुपलब्धिः 'प्रसज्येत, समस्तावयवसंनिकर्षस्याशक्यत्वात्। न हि बहुत्वं समस्तेष्वाश्रयेषु वर्तमानं व्यस्ताश्रयग्रहणेन गृह्यते। अथावयवशः समस्तेषु वर्तेत, तदाप्यारम्भकावयवव्यतिरेकेणावयविनोऽवयवाः कल्प्येरन् यैरारम्भकेष्ववयवेष्ववयवशोऽवयवी वर्तेत। कोशावयवव्यतिरिक्तैर्ह्यवयवैरसिः कोशं व्याप्नोति। अनवस्था चैवं प्रसज्येत। तेषु तेष्ववयवेषु

प्रकटार्थविवरणम्

समवाय इत्यलौकिकं समवायं लक्षयन्ति। तत्र भेदे सिद्धे सत्याधाराधेयभावसिद्धिः, तत्सिद्धौ च समवायसिद्धिः, ततश्च सामानाधिकरण्यस्यान्यथासिद्धौ भेदसिद्धिरिति चक्रकक्रकचादितं लक्षणमपि व्याकुलम्। या च 'इह घटे शौक्ल्यसमवायः' इत्यादिप्रतीतिः सा तेषामेव पारिभाषिकी, 'शुक्लो घटः' इत्यादिप्रतीतेरेव सर्वजनीनत्वात् आश्रयासिद्धिः, 'शुक्लो घटः' इति विशेषणविशेष्यभावः संबन्धनिबन्धनो जातिमद्विशेषणविशेष्यभावत्वाद् दण्डीति विशेषणविशेष्यभाववत् इत्यत्र विशेषणविशेष्यभावस्य द्रव्यादिष्वनन्तर्भावादनिरूपणासहत्वादाश्रयासिद्धिः। अतः समवायकल्पना न प्रमाणप्रयोजनवतीति।

कारणातिरिक्तं कार्यं, तस्य स्वकारणे समवायलक्षणा वृत्तिरित्येतद् यद्यपि समवायि[वाय]निरासेनैव निरस्तम्, तथाप्यधिकदोषाभिधित्सया विकल्पयति—**कथं चेत्यादिना**। प्रथमे दोषमाह—**यदि तावदिति**।। यदनेकत्र वर्तमानं तदनेकग्रहणं विना न गृह्यते यथा बहुत्वम्, मध्यस्थानम् [स्थानां] पराचीनानां चावयवानामर्वाचीनावयवव्यवधानात् ग्रहणमशक्यमित्यवयविनो ग्रहणं न स्यादित्यर्थः। बहुत्वस्यैकरूपत्वात् यद्यप्यग्रहणम्, तथाप्यवयविनो बहुप्रदेशत्वादेकावयवसन्निकर्षेऽप्येकं रूपं ग्रहीतुं शक्यत इत्याह—**अथावयवश इति**।। अनवस्थाप्रसङ्गेन परिहरति—**तदापीत्यादिना**।। द्वितीयविकल्पमुद्भाव्य दूषयति—

भाष्यभावप्रकाशिका

वृत्त्यनुपपत्तेश्च कार्यस्य कारणे परिकल्पितत्वमेवेत्याह—**कथं च कार्यमिति**।। **समस्तावयवसंनिकर्षस्येति**।। मध्यपरभागयोरर्वाग्भागव्यवहितत्वादित्यर्थः। अथ समस्तावयवव्यासङ्ग्यपि कतिपयावयवसन्निकर्षादुपलभ्यत इत्याशङ्क्याह—**न हि बहुत्वमिति**।। बहुत्वस्य व्यासज्य वर्तमानत्वाद् एकतमसंख्येयाग्रहणेऽप्यग्रहणम्, अवयविनस्तु न स्वरूपेणावयवव्याप्तिः, अपि त्ववयवशः, तेन यथा सूत्रमवयवैः कुसुमानि व्याप्नुवत् कतिपयकुसुमग्रहणेऽपि गृह्यते, तद्वत् कतिपयावयवग्रहणेऽप्यवयवी गृह्येतेति शङ्कते—**अथावयवश इति**।। ननु आरम्भकावयवैरेव तेष्ववयवी वर्ततामित्याशङ्क्य, यत्र यद्वर्तते तत्र तद्व्यतिरिक्तावयवि द्रव्यं वर्तमानं दृष्टमित्याह—**कोशेति**।। कल्प्यताम्, तर्हि को दोष इति? अत आह—**अनवस्थेति**।। कल्पितानन्तावयवव्यवहिततया

न्यायनिर्णयः

भेदसिद्धिरित्यत्रान्योन्याश्रयता। न हि सामानाधिकरण्येन तादात्म्ये तेषां भाति स्वारसिको भेदः सिध्यतीति भावः।

असत्कार्यवादनिरासेन कार्यस्य कारणे कल्पितत्वमुक्तम्। इदानीं कार्यस्य कारणे वृत्त्यनुपपत्तेश्च कल्पितत्वमित्याह—**कथं चेति**। कथंशब्दसूचितं विकल्पद्वयं विशदयति—**किमिति**। तत्राद्यमनूद्यावयविनः स्वरूपेण वाऽवयवेषु वृत्तिरवयवशो वेति विकल्प्याद्ये दोषमाह—**यदीत्यादिना**। तत्र हेतुमाह—**समस्तेति**। मध्यपरभागयोरर्वाग्भागव्यवहितत्वादित्यर्थः। सर्वावयवव्याप्तावपि कतिपयावयवसंनिकर्षादवयविनो दृष्टिरिष्टेत्याशङ्क्याह—**न हीति**। कल्पान्तरमुत्थापयति—**अथेति**। तथा च यथाऽवयवैः सूत्रं कुसुमानि व्याप्नुवत् कतिपयकुसुमग्रहणेऽपि गृह्यते तथा कतिपयावयवग्रहणेऽपि भवत्यवयविनो ग्रहणमित्यर्थः। तत्र किमारम्भकावयवैरेव तेष्ववयवी वर्तते किंवा तदतिरिक्तावयवैरिति विकल्प्याद्यं प्रत्याह—**तदापीति**। यत्र यद् वर्तते तत्तदतिरिक्तावयवैरेव तत्र वर्तमानं दृष्टमिति दृष्टान्तगर्भं हेतुमाचष्टे—**कोशेति**। द्वितीयं दूषयति—**अनवस्थेति**। कल्पितानन्तावयवव्यवहिततया प्रकृतावयविनो

१. व्यासज्यवृत्तीत्यर्थः। २. व्यासज्यवृत्तिधर्मप्रत्यक्षस्य यावत्स्वाश्रयप्रत्यक्षाधीनत्वादित्यर्थः।

वर्तयितुमन्येषामन्येषामवयवानां कल्पनीयत्वात्। अथ प्रत्यवयवं वर्तेत, तदैकत्र व्यापारेऽन्यत्राव्यापारः स्यात्। न हि देवदत्तः स्रुघ्ने संनिधीयमानस्तदहरेव पाटलिपुत्रेऽपि संनिधीयते। युगपदनेकत्र वृत्तावनेकत्वप्रसङ्गः स्यात्, देवदत्तयज्ञदत्तयोरिव स्रुघ्नपाटलिपुत्रनिवासिनोः। गोत्वादिवत् प्रत्येकं परिसमाप्तेर्न दोष इति चेत्? न, तथा प्रतीत्यभावात्। यदि गोत्वादिवत् प्रत्येकं परिसमाप्तोऽवयवी स्यात्, यथा गोत्वं प्रतिव्यक्ति प्रत्यक्षं गृह्यत एवमवयव्यपि प्रत्यवयवं प्रत्यक्षं गृह्येत। न चैवं नियतं गृह्यते। प्रत्येकपरिसमाप्तौ चावयविनः कार्येणाधिकारात् तस्य चैकत्वाच्छृङ्गेणापि स्तनकार्यं कुर्यादुरसा च पृष्ठकार्यम्। न चैवं दृश्यते।

प्रागुत्पत्तेश्च कार्यस्यासत्त्वे उत्पत्तिरकर्तृका निरात्मिका च स्यात्। उत्पत्तिश्च नाम क्रिया, सा सकर्तृकैव भवितुमर्हति, गत्यादिवत्। क्रिया च नाम स्यादकर्तृका चेति विप्रतिषिध्येत। घटस्य चोत्पत्तिरुच्यमाना न

प्रकटार्थविवरणम्

अथ प्रत्यवयवमित्यादिना।। यथा गोत्वस्य युगपदनेकत्र वृत्तावपि नानेकत्वं तथा भविष्यतीत्याह—**गोत्वादिवदिति**।। अनुभवविरोधेन परिहरति—**न, तथेति**।। इतश्च नावयविनः प्रत्येकसमाप्तिरित्याह—**प्रत्येकसमाप्तौ चेति**।। अधिकारात् संबन्धात्। तस्मादतिरिक्तस्यावयविनो निरूपणासहत्वादसन्नवयवी जायत इत्यसङ्गतम्।

इतश्चासत्कार्यवादोऽनुपपन्न इत्याह—**प्रागुत्पत्तेश्चेति**।। उत्पत्तिः साश्रया क्रियात्वाद्, [1]गमिवत्; उत्पद्यमानं च तस्या आश्रयः; तदभावे सा न स्यादेवेत्यर्थः। क्रियात्वमसिद्धमित्याशङ्क्याह—**उत्पत्तिश्च नामेति**।। [2]धात्वर्थत्वाद्गमनवदित्यर्थः। अकर्तृत्वे च

भाष्यभावप्रकाशिका

[illegible]नावयवावयविनोर्दूरविप्रकर्षः स्यादिति भावः। द्वितीयकल्पमुत्थापयति—**अथ प्रत्यवयवमिति**।। तदापि क्रमेण, युगपद्वा। यदि [illegible] [illegible]।। तदेवोपपादयति—**न हीति**।। द्वितीयकल्पे दूषणमाह—**युगपदिति**।। ननु प्रतिव्यक्ति कात्स्न्र्येन युगपद् क्रमेण, तत्राह—तद[illegible] [illegible] न भेद इति शङ्कते—**गोत्वादिवदिति**।। निराकरोति—**न तथेति**।। तदेव वर्तमानस्य सामान्यस्य न भेदो यथा, तथाऽवयव[illegible] [illegible] तद् बाहुलेये नास्ति, तद्वत् स्यादिति, अत दर्शयति—**यदीति**।। दोषान्तरमाह—**प्रत्येकमिति**।। गोत्वस्यापि यच्छाबलेय[illegible] आह—**कार्येणाधिकारादिति**।। तत्र न जातेः कार्यान्वयः, अपि तु व्यक्तेरिति भावः।।

भवत्वकर्तृकत्वमिति, अत आह—**निरात्मिकेति**। आश्रयरूपकारणाभावादुत्पत्तिक्रियालक्षणकार्यमनुपपन्नं निरात्मकं स्यादित्यर्थः। क्रियायाःसकर्तृकत्वमनुमिनोति—**उत्पत्तिश्चेति**। विपक्षे दोषमाह—**क्रिया चेति**।। अस्तु तर्हि कारणाश्रयेति, तत्राह—**घटस्य चेति**।।

न्यायनिर्णयः

दूरविप्रकर्षात् तन्तुनिष्ठत्वं पटस्य न स्यादिति भावः। कल्पान्तरमनुवदति—**अथेति**। तत्रापि क्रमेण वा प्रत्यवयवं वर्तेताक्रमेण वेति विकल्प्याद्ये दोषमाह—**तदेति**। तदेव दृष्टान्तेनोपपादयति—**न हीति**। द्वितीयं निराचष्टे—**युगपदिति**। यथा प्रातिस्विक[illegible] साकल्येन युगपद् वर्तमानं सामान्यं न भिद्यते तथाऽवयविनोऽपि वस्तुतो न भेदोऽस्तीति शङ्कते—**गोत्वादिवदिति**। वैषम्यं दर्शयन् दूषयति—**न तथेति**। तदेव स्पष्टयति—**यदीति**। प्रत्येकमवयवेष्ववयविनः परिसमाप्तिपक्षे दोषान्तरमाह—**प्रत्येकेति**। यद्धि गोत्वस्य शाबलेये कार्यं न तद् बाहुलेयेऽस्ति, तथेहापि स्यादित्याशङ्क्याह—**कार्येणेति**। न हि गोत्वस्य कार्यान्वयः, किंतु व्यक्तेरेव। प्रकृते त्ववयवानां तदनन्वयादवयविनस्तद्भावात् तस्य सर्वत्रैक्यादर्थक्रियाव्यवस्थानुपपत्तिः। न च तत्तदवयवनिष्ठस्यैवावयविनस्तत्कार्यम्, अवयवानां कार्यानन्वये सत्युक्तनियमायोगात्, प्रतीत्या तन्नियमे युक्त्यभिमानित्वव्याघातादिति भावः।

वृत्तिविकल्पानुपपत्त्या कार्यस्य कारणे कल्पितत्वं प्रसाध्यासत्कार्यवादे दोषान्तरमाह—**प्रागिति**। भवत्वकर्तृकत्वमित्याशङ्क्याश्रयरूपकारणाभावादुत्पत्तिक्रियाख्यं कार्यमनुत्पन्नं निरात्मकं स्यादित्याह—**निरात्मिकेति**। इतश्चोत्पत्तेरकर्तृकत्वमयुक्तमित्यनुमानेन दर्शयति—**उत्पत्तिश्चेति**। क्रियात्वेऽपि सकर्तृकत्वाभावे किं बाधकमित्याशङ्क्याह—**क्रिया चेति**। अस्तु तर्हि कारणाश्रयोत्पत्तिः,

---

१. 'गतिवत्' इति पा.। २. 'उत्पत्तिः क्रिया, धात्वर्थत्वात् गमनवत्' इति पाठः स्यात्।

घटकर्तृका, किं तर्ह्यन्यकर्तृकेति कल्प्या स्यात्। तथा कपालादीनामप्युत्पत्तिरुच्यमानाऽन्यकर्तृकैव कल्प्येत। तथा च सति घट उत्पद्यत इत्युक्ते कुलालादीनि कारणान्युत्पद्यन्त इत्युक्तं स्यात्। न च लोके घटोत्पत्तिरित्युक्ते कुलालादीनामप्युत्पद्यमानता प्रतीयते। उत्पन्नताप्रतीतेश्च। अथ स्वकारणसत्तासंबन्ध एवोत्पत्तिरात्मलाभश्च कार्यस्येति चेत्, कथमलब्धात्मकं संबध्येतेति वक्तव्यम्। सतोर्हि द्वयोः संबन्धः संभवति, न सदसतोरसतोर्वा। अभावस्य च निरुपाख्यत्वात् प्रागुत्पत्तेरिति मर्यादाकरणमनुपपन्नम्। सतां हि लोके क्षेत्रगृहादीनां मर्यादा दृष्टा, नाभावस्य। न हि वन्ध्यापुत्रो राजा बभूव प्राक्पूर्णवर्मणोऽभिषेकादित्येवंजातीयकेन मर्यादाकरणेन निरुपाख्यो वन्ध्यापुत्रो राजा बभूव भवति भविष्यतीति वा विशेष्यते। यदि

प्रकटार्थविवरणम्

स्वातन्त्र्यप्रसङ्ग इत्यभिप्रेत्याह—**क्रिया च नामेति**।। ननु कुलालादिकर्तृका भविष्यति घटोत्पत्तिरित्याशङ्क्याह—**घटस्य चोत्पत्तिरिति**।। उत्पादयिता कुलालो न तूत्पत्ता; तस्मात् कुलाल एव घटस्योत्पत्तिकर्तेत्यनुपपन्नं कल्पनीयं स्यात्; तच्चानुभवविरुद्धमिति भावः। उत्पत्तिः क्रियेति स्वाभिप्रायेणोक्त्वा स्वकारणसमवायः सत्तासमवायो वा जनिरिति तार्किकाभिप्रायमुद्भाव्य दूषयति—**अथ स्वकारणेत्यादिना**। अनित्यत्वाज्जन्मनः प्रध्वंसस्यापि जन्माभ्युपगमाच्च। किञ्च विमतं न कारणेन सत्तया वा संबध्यतेऽसत्यत्वात् नरविषाणवदित्यर्थः। ननु नरविषाणमत्यन्तासत्, कार्यं तु प्रागसदिति विशेष इत्याशङ्क्याह—**अभावस्य चेति**।। असतः पूर्वकालसंबन्धाभावे प्राक्त्वं वाङ्मात्रमिति भावः। असत् मर्यादाशून्यम्, असत्त्वात् वन्ध्यापुत्रवदित्युक्तम्। ननु

भाष्यभावप्रकाशिका

उत्पादना हि सिद्धानां कपाल-कुलालादीनां व्यापारः, नोत्पत्तिः। न चोत्पादनैवोत्पत्तिः, प्रयोज्यप्रयोजकव्यापारतया भिन्नत्वात्, अन्यथा घटमुत्पादयतीतिवद् घटमुत्पद्यत इत्यपि प्रयोगप्रसङ्गादिति भावः।। ननु घटशब्दो घटजननाभिमुखेषु कारकेषु तादर्थ्यनिमित्तोपचारात् प्रयुज्यत इत्याशङ्क्य प्रतीतिविरुद्धमेतदित्याह—**न च लोक इति**।। ननु उत्पत्तिर्न क्रिया, किन्तु स्वकारणसमवायः, सत्तासमवायो वा, ततो नोक्तदोष इति शङ्कते—**अथ स्वकारणेति**।। सोऽप्यसतोऽनुपपन्न इत्याह—**कथमलब्धेति**।। अपि च प्रागुत्पत्तेरसत्त्वं कार्यस्येति कार्याभावस्य भावेन मर्यादाकरणमयुक्तमित्याह—**अभावस्य चेति**।। तत्र दृष्टान्तमाह—**न हि वन्ध्येति**।। ननु वन्ध्यापुत्रस्यात्यन्तासत्त्वादवधिकरणमनुपपन्नम्, घटप्रागभावस्य तु संभवति; घटेनोपाख्येयतया

न्यायनिर्णयः

तथा च सिद्धसाध्यतेत्याशङ्क्याह—**घटस्येति**। घटोत्पत्तावुक्तन्यायं कपालोत्पत्तावतिदिशति—**तथेति**। इष्टापत्तिमाशङ्क्य निराचष्टे—**तथा चेति**। उत्पादना हि कारकव्यापारो नोत्पत्तिः। न च तयोरैक्यं, प्रयोज्यप्रयोजकव्यापारतया भिन्नत्वात्। अन्यथा घटमुत्पादयतीतिवद् घटमुत्पद्यत इति स्यादिति भावः। ननु घटो जायत इत्यत्र घटशब्दो घटजननोन्मुखेषु कारकेषु [1]तादात्म्यनिमित्तोपचारात् प्रयुज्यते, तथा च घटोत्पत्त्युक्तौ कुलालादिकारकोत्पत्त्युक्तिरविरुद्धेति, तत्राह—**न चेति**। सिद्धसाध्यत्वाभावेऽपि क्रियात्वहेतोरसिद्धिरिति शङ्कते—**अथेति**। **स्वकारणसत्तासंबन्धः** स्वकारणसमवायः सत्तासमवायो वेति यावत्। कार्यस्य क्रियारूपोत्पत्त्यनभ्युपगमे कथमात्मलाभः स्यादित्याशङ्क्याह—**आत्मलाभश्चेति**। क्रियात्वाभावमङ्गीकृत्योत्पत्तेः साश्रयत्वं साधयति—**कथमिति**। आक्षेपमेव विवृणोति—**सतोर्हीति**। असतोर्वेति दृष्टान्तोक्तिः। उत्पत्तिः साश्रया, संबन्धत्वात्, संयोगवदित्यक्रियात्वेऽपि शक्यं साश्रयत्वं प्रतिपादयितुमिति भावः। कार्यस्यासतोऽपि तदाश्रयत्वोपपत्तेः सिद्धसाध्यतेत्याशङ्क्य निरुपाख्यत्वं तद्विलक्षणत्वं वा कार्यस्य विवक्षितमिति विकल्प्याद्ये मर्यादाकरणानुपपत्तिरित्याह—**अभावस्येति**। कार्यशब्दितस्येति शेषः। अनुपपत्तिमेव स्फोरयति—**सतां हीति**। अभावस्य मर्यादा न दृष्टेत्यत्र दृष्टान्तमाह—**न हीति**। कार्यस्य कारकव्यापारसाध्यतया निरुपाख्यवैलक्षण्यान्न

१. 'तादर्थ्य' इति पाठो भाष्यभावप्रकाशिकातोऽवगम्यते।

च वन्ध्यापुत्रोऽपि कारकव्यापारादूर्ध्वमभविष्यत्, तत इदमप्युपापत्स्यत कार्याभावोऽपि कारकव्यापारादूर्ध्वं भविष्यतीति। वयं तु पश्यामो वन्ध्यापुत्रस्य कार्याभावस्य चाभावत्वाविशेषाद् यथा वन्ध्यापुत्रः कारकव्यापारादूर्ध्वं न भविष्यत्येवं कार्याभावोऽपि कारकव्यापारादूर्ध्वं न भविष्यतीति।

नन्वेवं सति कारकव्यापारोऽनर्थकः प्रसज्येत। यथैव हि प्राक्सिद्धत्वात् कारणस्वरूपसिद्धये न कश्चिद् व्याप्रियते, एवं प्राक्सिद्धत्वात् तदनन्यत्वाच्च कार्यस्य स्वरूपसिद्धयेऽपि न कश्चिद् व्याप्रियेत। व्याप्रियते च। अतः कारकव्यापारार्थवत्त्वाय मन्यामहे प्रागुत्पत्तेरभावः कार्यस्येति। नैष दोषः। यतः कार्याकारेण कारणं व्यवस्थापयतः कारकव्यापारस्यार्थवत्त्वमुपपद्यते। कार्याकारोऽपि कारणस्यात्मभूत

प्रकटार्थविवरणम्

वन्ध्यापुत्रः कारकव्यापारादूर्ध्वमपि नोपपद्यते; कार्यं तूपपत्स्यत इत्याशङ्क्याह—**यदि च वन्ध्यापुत्र इति**।। उत्पत्स्यते [उपापत्स्यत]उपपन्नमभविष्यत् ।। **कार्याभावोऽपीति**।। असत्कार्यमित्यर्थः।। कस्तर्हि निर्णय इत्याशङ्क्याह—**वयं त्विति**।। यदसत् तदसदेव न कदाचित् सत्त्वमापद्यते; सच्च नासत्त्वमापद्यते स्वभाववैपरीत्यायोगादिति भावः।

इदानीं कारकव्यापारस्यार्थवत्त्वान्यथानुपपत्त्या कार्यस्यासत्त्वं वक्तव्यमित्याह—**नन्वेवं सतीति**।। अन्यथाप्युपपत्त्या परिहरति—**नैष दोष इति**।। ननु कारणं कार्याकारं कर्तुं यदि कारकव्यापारस्तर्हि कार्याकारोऽसन्नेव जायत इत्यायातमित्याशङ्क्याह—**कार्याकारोऽपीति**।। [1]यदि प्राक्तनोऽपि रूपेण कार्यं नासीत् तदा स्यादसत्कार्यवादः; कारणात्मना तु सूक्ष्मरूपेण यदासीत् तदेव यदा स्थूलं भवति तदा कुतोऽसत्कार्यवाद इत्यर्थः।। ननु कार्यमुपादानाद्भिन्नम्, तद्विरुद्धधर्माक्रान्तत्वात् वस्त्वन्तरवदित्याशङ्क्याह—

भाष्यभावप्रकाशिका

निरुपाख्यत्वाभावादिति, अत आह—**यदि चेति**।। ननु इह कारकसंभवादुपपन्नोत्पत्तिः, नेतरत्र ; तदभावादिति, तत्राह—**वयं त्विति**।। असतः कारकत्वमप्ययुक्तमिति भावः।।

अत्रासत्कार्यवादी शङ्कते—**नन्वेवमिति**।। ननु सिद्धस्यापि कारणानन्यत्वसिद्धये कारकव्यापार इति, अत आह—**तदनन्यत्वाच्चेति**।। यथा मायाविनो व्याघ्राद्याकारेणोत्पत्तौ मणि-मन्त्राद्यपेक्षा, तद्वदिहोपपद्यत इत्याह—**यतः कार्याकारेणेति**।। ननु व्याघ्रादि कार्यं पूर्वमस्ति वा, उत न? अस्ति चेत्, कारकव्यापारवैयर्थ्यम्, नास्ति चेत्, असदुत्पत्तिरिति, अत आह—**कार्याकारोऽपीति**।। यथा भुजगतत्त्वं रज्जुरेव, एवं कार्यतत्त्वमपि कारणमेव, अतोऽनिर्वाच्यं कार्यरूपं भिन्नमिवाभिन्नमिव

न्यायनिर्णयः

वन्ध्यापुत्रतुल्यतेति द्वितीयमाशङ्क्याह—**यदि चेति**। घटप्रागभावस्य घटेन प्रतियोगिनोपाख्येयतया कारकव्यापारसाध्यत्वं युक्तं, वन्ध्यापुत्रस्य तु नैवमित्याशङ्क्याह—**वयं त्विति**। विमतं न कारकव्यापारवत्, असत्त्वात्, संमतवदिति भावः।

कार्यस्यासत्त्वं निरस्यता सत्त्वमेव साधितमिति मन्वानश्चोदयति—**नन्विति**। कारकव्यापारो हि सत्कार्यवादे कार्यस्वरूपसिद्धये वा तदनन्यत्वसिद्धये वा? नाद्य इत्याह—**यथेति**। द्वितीयं प्रत्याह—**तदनन्यत्वाच्चेति**। कार्यस्य कारणेनाभिन्नत्वस्य सत्कार्यवादे सदा भावान्न तादर्थ्येनापि कारकव्यापारोऽर्थवानित्यर्थः। मा तर्हि कारकव्यापारो भूदित्याशङ्क्याह—**व्याप्रियते चेति**। परमते कारकव्यापारस्यानर्थक्यात् तदर्थवत्त्वानुपपत्तिरसत्त्वं कार्यस्य प्राक्काले साधयतीति फलितमाह—**अत इति**। मायाविनो व्याघ्राद्याकारतापत्तौ मन्त्राद्यपेक्षावत् कारणस्यापि कार्याकारापत्तौ कारकव्यापारापेक्षाऽस्तीति समाधत्ते—**नैष दोष इति**। ननु प्रागपि कार्याकारोऽस्ति न वा? प्रथमे कारकव्यापारवैयर्थ्यम्, चरमे त्वसदुत्पत्तिः, तत्राह—**कार्याकारोऽपीति**। रज्जुरिव भुजङ्गस्य कारणमेव कार्यस्य तत्त्वम्, अतोऽनिर्वाच्यं कार्यरूपं भिन्नमिव चाभिन्नमिव च भाति। असत्कार्यवादस्य प्रागुक्तन्यायप्रत्युदस्तत्वादित्यर्थः।

---

१. 'प्राक् केनापि' इति पाठः स्यात्।

एवानात्मभूतस्यानारभ्यत्वादित्यभाणि। न च विशेषदर्शनमात्रेण वस्त्वन्यत्वं भवति। न हि देवदत्तः [1]संकोचितहस्तपादः प्रसारितहस्तपादश्च विशेषेण दृश्यमानोऽपि वस्त्वन्यत्वं गच्छति, स एवेति प्रत्यभिज्ञानात्। तथा प्रतिदिनमनेकसंस्थानानामपि पित्रादीनां न वस्त्वन्यत्वं भवति, मम पिता मम भ्राता मम पुत्र इति प्रत्यभिज्ञानात्। जन्मोच्छेदानन्तरितत्वात् तत्र युक्तं नान्यत्रेति चेत्, न; क्षीरादीनामपि दध्याद्याकारसंस्थानस्य प्रत्यक्षत्वात्। अदृश्यमानानामपि वटधानादीनां समानजातीयावयवान्तरोपचितानामङ्कुरादिभावेन दर्शनगोचरतापत्तौ जन्मसंज्ञा। तेषामेवावयवानामपचयवशाददर्शनापत्तावुच्छेदसंज्ञा। तत्रेदृग्जन्मोच्छेदान्तरितत्वाच्चेदसतः सत्त्वापत्तिः, सतश्चासत्त्वापत्तिस्तथा सति गर्भवासिन उत्तानशायिनश्च भेदप्रसङ्गः। तथा च बाल्ययौवनस्थाविरेष्वपि भेदप्रसङ्गः, पित्रादिव्यवहारलोपप्रसङ्गश्च। एतेन क्षणभङ्गवादः प्रतिवदितव्यः।

प्रकटार्थविवरणम्

न च विशेषेति।। उदाहरणान्तरेण व्यभिचारमाह—**तथा प्रतिदिनमिति**।। पिण्डमुपमृद्य घटो जायते, बीजं चोपमृद्य अङ्कुरो जायत इति जन्मविनाशलक्षणविरुद्धधर्माक्रान्तत्वं मया हेतुत्वेनोपक्रान्तम्, तस्य च व्यभिचारो नास्तीत्याह—**जन्मोच्छेदेति**।। दृष्टान्ते जन्मोच्छेदव्यवधानाभावात् वस्त्वन्यत्वं नास्तीत्येतद्युक्तम्; दार्ष्टान्तिके तु वस्त्वन्यत्वमेव जन्मोच्छेदलक्षणविरुद्धधर्माक्रान्तत्वादित्येतन्न वक्तव्यम्, हेतोरसिद्धत्वादित्याह—**न, क्षीरादीनामपीति**।। क्षीरमृत्सुवर्णादीनां दध्यादिभावस्य प्रत्यक्षत्वात् [2]संस्थानविनाशेऽपि तदन्वयिन एवोपादानत्वात् असिद्धो हेतुरित्यर्थः।। ननु यत्रान्वयो दृश्यते तत्रास्त्वसिद्धिः, यत्र तु वटबीजादीनामङ्कुरादावन्वयो न दृश्यते जन्मोच्छेदव्यवधानात् तत्र वस्त्वन्यत्वमेवेत्याशङ्क्याह—**अदृश्यमानानामपीति**।। तत्राप्यन्वयिनामवयवानां न स्त एव जन्मोच्छेदौ; किन्त्ववयवोपचयापचयनिबन्धनो जन्मोच्छेदव्यवहारः। तावन्मात्राच्चेद्वस्तुभेदस्तदाऽनैकान्तिकत्वमतिप्रसङ्गश्चेति

भाष्यभावप्रकाशिका

चावभासत इत्यर्थः।। विवर्तवादाभिप्रायेण परिहार उक्तः, इदानीं परिणामवादावलम्बनेन परिहरति—**न च विशेषेति**।। एतद् दृष्टान्तेनोपपादयति—**न हि देवदत्त इति**।। **वस्त्वन्यत्वम्** वस्तुतः परमार्थतोऽन्यत्वम्। दृष्टान्तान्तरमाह—**तथा प्रतिदिनमिति**।। बीजस्य वृक्षाकारेण परिणममानस्याप्रत्यक्षत्वादविद्यमानकार्योत्पत्तिः स्यादिति, अत आह—**अदृश्यमानानामिति**।। ननु एवंविधजन्मनाशाभ्युपगमेऽप्यविद्यमानत्वं कार्यस्येति, अत आह—**तत्रेदृगिति**।।

न्यायनिर्णयः

विवर्तवादेन परिहारमुक्त्वा परिणामवादेनापि परिहरति—**न चेति**। **वस्त्वन्यत्वं** परमार्थतो भिन्नत्वमिति यावत्। तदेव दृष्टान्तेन स्पष्टयति—**न हीति**। देवदत्ते विशेषदृष्टिमात्रेण वस्तुतोऽन्यत्वाभावे हेतुमाह—**स एवेति**। उक्तार्थमुदाहरणान्तरेण द्रढयति—**तथेति**। दृष्टान्ते जन्मोच्छेदव्यवधानाभावान्न वस्त्वन्यत्वमिति युक्तं, दार्ष्टान्तिके तु वस्त्वन्यत्वमेव, जन्मोच्छेदरूपविरुद्धधर्माध्यासादिति शङ्कते—**जन्मेति**। हेत्वसिद्ध्या परिहरति—**नेत्यादिना**। क्षीरस्य मृदः सुवर्णादीनां च दधिघटरुचकादिभावस्याध्यक्षत्वात् संस्थाननाशेऽपि तदन्वयिन एवोपादानत्वाद्धेत्वसिद्धिरित्यर्थः। यत्रान्वयो दृश्यते तत्र हेत्वसिद्धावपि यत्र पटबीजादीनामङ्कुरादावन्वयो न दृश्यते जन्मविनाशव्यवधानात् तत्र वस्त्वन्यत्वमित्याशङ्क्याह—**अदृश्यमानानामिति**। तत्राप्यन्वयिनामवयवानां न स्त एव जन्मविनाशौ, किं त्ववयवोपचयापचयनिमित्तस्तद्व्यवहार इति नास्ति वस्त्वन्यत्वमित्यर्थः। यथोक्तजन्मविनाशोपगमेनापि वस्त्वन्यत्वमनुमेयमित्याशङ्क्यानैकान्तिकत्वमाह—**तत्रेति**। बीजाङ्कुरादाविति यावत्। व्यभिचारान्तरमाह—**तथेति**। अतिप्रसङ्गाच्च भेदानुमानमयुक्तमित्याह—**पित्रादीति**। अन्वयिकारणस्य प्रत्यभिज्ञायमानतया नित्यत्वसाधनेन क्षणभङ्गवादोऽपि प्रत्युक्तो वेदितव्य इति प्रसङ्गादतिदिशति—**एतेनेति**।

---

१. 'संकुचित' इति पा.। २. संस्थानम् = आकारः अवयवसंनिवेशविशेषरूपः।

यस्य पुनः प्रागुत्पत्तेरसत् कार्यं तस्य निर्विषयः कारकव्यापारः स्यात्। अभावस्य विषयत्वानुपपत्तेराकाशहननप्रयोजनखड्गाद्यनेकायुधप्रयुक्तिवत्। समवायिकारणविषयः कारकव्यापारः स्यादिति चेत्? न; अन्यविषयेण कारकव्यापारेणान्यनिष्पत्तेरतिप्रसङ्गात्। समवायिकारणस्यैवात्मातिशयः कार्यमिति चेत्। न; सत्कार्यतापत्तेः। तस्मात् क्षीरादीन्येव द्रव्याणि दध्यादिभावेनावतिष्ठमानानि कार्याख्यां लभन्त इति न कारणादन्यत् कार्यं वर्षशतेनापि शक्यं निश्चेतुम्। तथा मूलकारणमेवाऽऽन्त्यात्कार्यात् तेन तेन कार्याकारेण नटवत् सर्वव्यवहारास्पदत्वं प्रतिपद्यते। एवं युक्तेः कार्यस्य प्रागुत्पत्तेः सत्त्वमनन्यत्वं च कारणादवगम्यते।

शब्दान्तराच्चैतदवगम्यते। पूर्वसूत्रेऽसद्व्यपदेशिनः शब्दस्योदाहृतत्वात् ततोऽन्यः सद्व्यपदेशी शब्दः शब्दान्तरम्–'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्यादि। 'तद्धैक आहुरसदेवेदमग्र आसीत्' इति चासत्पक्षमुपक्षिप्य 'कथमसतः सज्जायेत' इत्याक्षिप्य 'सत्त्वेव सोम्येदमग्र आसीत्' (छा.उ. ६।२।१, २) इत्यवधारयति। तत्रेदंशब्दवाच्यस्य कार्यस्य प्रागुत्पत्तेः सच्छब्दवाच्येन कारणेन सामानाधिकरण्यस्य श्रूयमाणत्वात् सत्त्वानन्यत्वे प्रसिध्यतः। यदि तु प्रागुत्पत्तेरसत् कार्यं स्यात्, पश्चाच्चोत्पद्यमानं कारणे

प्रकटार्थविवरणम्

भाव:। अन्वयिकारणस्य प्रत्यभिज्ञायमानत्वेन नित्यत्वसाधनेन क्षणिकवादोऽपि प्रत्युक्तो वेदितव्य: इति प्रसङ्गादतिदिशति—**एतेनेति**॥

पूर्वमर्थापत्तेरन्यथाऽप्युपपत्तिरुक्ता; अधुनाऽन्यथैवोपपत्तिमाह—**यस्य पुनरिति**॥ प्रकृतमुपसंहृत्य परिशिष्टं सूत्रपदं व्याचष्टे—**तस्मादित्यादिना [शब्दान्तरादित्यादिना]**॥ किमिति महता प्रबन्धेन कार्यस्य सत्यत्वानन्यत्वे सूत्रकार: साधयतीत्याशङ्क्याह—

भाष्यभावप्रकाशिका

स्वपक्षे दोषं परिहृत्यासत्कार्यवादिपक्षे दूषणमाह—**यस्य पुनरिति**। न ब्रह्मण: कारणत्वं सिध्यति; प्रतिकार्यं क्षीरादिसद्भावादिति, अत आह—**तथा मूलेति**॥ "शब्दान्तराच्चे"ति सूत्रावयवमवतार्य व्याचष्टे—**एवं युक्तेरित्यादिना**॥

अन्तरादिति विशेषणस्य तात्पर्यमाह—**पूर्वसूत्र इति**॥ तथापि कार्यस्य कथं सत्त्वसिद्धिरिति? अत आह—**तत्रेदंशब्देति**॥ प्रतिज्ञानुपपत्तिरप्येतद् गमयतीत्याह—**यदि त्विति**॥ कथं तर्हि प्रतिज्ञोपपद्यत इति? तदाह—**सत्त्वानन्यत्वेति**॥१२॥

न्यायनिर्णयः

स्वपक्षे दोषं परिहृत्य परपक्षे तं प्रसञ्जयति—**यस्येति**। तन्मते कारकव्यापारस्य कार्यप्रागभावो वा तत्समवायिकारणं वा विषय:? नाद्य इत्याह—**अभावस्येति**। द्वितीयं शङ्कते—**समवायीति**। कार्यं समवायिकारणाद्भिन्नमभिन्नं वेति विकल्प्याद्यं निरस्यति—**नेत्यादिना**। द्वितीयं शङ्कित्वा दूषयति—**समवायीति**। असत्कार्यवादनिरसनफलमुपसंहरति—**तस्मादिति**। कार्यस्य कारणाभेदे कारकव्यापारस्य सविषयत्वं, नान्यथेति तच्छब्दार्थ:। कथं तर्हि प्रतिकार्यं क्षीरादिकारणभेदात् कारणत्वं ब्रह्मण: सिध्यतीत्याशङ्क्याह—**तथेति**। कारणान्नान्यत् कार्यमिति स्थिते सतीत्यर्थ:। विवर्तवादं व्यक्तीकर्तुं नटवदित्युदाहरणम्। युक्तेरिति सूत्रावयवव्याख्यानमुपसंहरति—**एवमिति**।

सूत्रावयवान्तरमुपादत्ते—**शब्दान्तराच्चेति**। युक्तेरिव शब्दादपि कार्यस्य सत्त्वमनन्यत्वं च सिध्यतीति वक्तव्ये कथमन्तरपदमन्तराले प्रयुज्यते, तत्राह—**पूर्वसूत्र इति**। प्रकारान्तरेण शब्दान्तरं विभजते—**तद्धैक इति**। कारणस्येत्थं सत्त्वेऽपि कथं कार्यस्य सत्त्वसिद्धिरित्याशङ्क्याह—**तत्रेति**। उक्ता श्रुति: सप्तम्यर्थ:। प्रतिज्ञानुपपत्तेश्च न सत्कार्यवादानुपपत्तिरिति चकारसूचितामुपपत्तिमाह—

समवेयात्, तदाऽन्यत् कारणात् स्यात्। तत्र 'येनाश्रुतं श्रुतं भवति' (छा.उ. ६।१।३) इतीयं प्रतिज्ञा पीड्येत। सत्त्वानन्यत्वावगतेस्त्वियं प्रतिज्ञा समर्थ्यते।।१८।।

पटवच्च।।१९।।

यथा च संवेष्टितः पटो न व्यक्तं गृह्यते–किमयं पटः, किं वाऽन्यद् द्रव्यमिति। स एव प्रसारितो यत् संवेष्टितं द्रव्यं तत् पट एवेति प्रसारणेनाभिव्यक्तो गृह्यते। यथा च संवेष्टनसमये पट इति गृह्यमाणोऽपि न विशिष्टायामविस्तारो[1] गृह्यते, स एव प्रसारणसमये विशिष्टायामविस्तारो गृह्यते–न संवेष्टितरूपादन्योऽयं भिन्नः पट इति। एवं तन्त्वादिकारणावस्थं पटादिकार्यमस्पष्टं सत् तुरीवेमकुविन्दादिकारकव्यापाराभिव्यक्तं[2] स्पष्टं गृह्यते। अतः संवेष्टितप्रसारितपटन्यायेनैवानन्यत् कारणात् कार्यमित्यर्थः।।१९।।

यथा च प्राणादि।।२०।।

यथा च लोके प्राणापानादिषु प्राणभेदेषु प्राणायामेन निरुद्धेषु कारणमात्रेण रूपेण वर्तमानेषु जीवनमात्रं कार्यं निर्वर्त्यते, नाकुञ्चनप्रसारणादिकं कार्यान्तरम्। तेष्वेव प्राणभेदेषु पुनः प्रवृत्तेषु जीवनादधिकमाकुञ्चनप्रसारणादिकमपि कार्यान्तरं निर्वर्त्यते। न च प्राणभेदानां प्रभेदवतः प्राणादन्यत्वं, समीरणस्वभावाविशेषात्; एवं कार्यस्य कारणादनन्यत्वम्। अतश्च कृत्स्नस्य जगतो ब्रह्मकार्यत्वात्

प्रकटार्थविवरणम्

यदि तु प्रागुत्पत्तेरिति।।

पटवच्च।। ननु कार्यमुपादानाद्भिन्नम्, तस्मिन्नुपलभ्यमानेऽप्यनुपलभ्यमानत्वात्, वस्त्वन्तरवत्, इत्याशङ्क्यानैकान्तिकत्वमाह— **यथा चेत्यादिना।।** कार्यमुपादानाद्भिन्नम्, ततोऽधिकपरिमाणत्वात्, वस्त्वन्तरवदित्याशङ्क्यानैकान्तिकत्वमाह— **तथा च संवेष्टनेति।।**

यथा च प्राणादि। कार्यमुपादानाद्भिन्नम्, भिन्नार्थक्रियाकारित्वात्, वस्त्वन्तरवदित्याशङ्क्यानैकान्तिकत्वमाह— **यथा च लोक इति।।** एवं तावल्लोके कारणात् कार्यस्य पृथक्सत्ता नास्तीत्युपपाद्य ब्रह्मण्युपसंहरति— **अतश्च कृत्स्नस्येति।।**

भाष्यभावप्रकाशिका

पटवच्च।।१९।। ननु कारणे कार्यं सच्चेत्, कारणवत् तत्किमिति नोपलभ्यते? किमिति वा कारकव्यापारमपेक्षत इति? तत्राह— **पटवदिति।।** व्याख्यानान्तरमाह— **यथा चेति।।१३।।**

यथा च प्राणादि।।२०।। ननु कारणावस्थायां कार्यमस्ति चेत्, किमिति तदा स्वोचितार्थक्रियां न करोतीति? तत्राह— **यथा च प्राणादीति।।** ननु उत्पद्यमानास्ततो भिन्ना एवेति, अत आह— **न च प्राणेति।।** दार्ष्टान्तिकमाह— **एवमिति।।** अधिकरणार्थमुपसंहरति—

न्यायनिर्णयः

यदि त्विति। कथं तर्हि प्रतिज्ञोपपद्यते, तत्राह— **सत्त्वेति।।१८।।**

कार्यमुपादानाद्भिन्नम्, तदुपलब्धावप्यनुपलभ्यत्वात्, ततोऽधिकपरिमाणत्वाच्च, संमतवदित्यनुमानयोर्व्यभिचारमाह— **पटवच्चेति।** सूत्रं व्याचष्टे— **यथा चेति।** व्याख्यानान्तरमाह— **यथा चेत्यादिना।** दृष्टान्तनिविष्टमर्थं दार्ष्टान्तिके योजयति— **एवमिति।** तथापि किमायातं जगद्ब्रह्मणोरित्याशङ्क्याह— **अत इति।** प्रागुक्तहेतोः सव्यभिचारत्वेन दुष्टत्वादिति यावत्।।१९।।

कार्यमुपादानाद्भिन्नं, भिन्नकार्यकरत्वात्, संमतवदित्याशङ्क्य व्यभिचारमाह— **यथा चेति।** सूत्रं विभजते— **यथा चेत्यादिना।** तेषामात्यन्तिकं निरोधं व्यासेधति— **कारणमात्रेति।** पुनःप्रवृत्तानां प्राणभेदानां भिन्नत्वमेवेत्याशङ्क्याह— **न चेति।** दृष्टान्तोक्तमर्थं

---

१. आयामो दैर्घ्यम्, विस्तारः परिणाहः। २. 'व्यापारादिभिर्व्यक्तं' इति पा।

तदनन्यत्वाच्च सिद्धैषा श्रौती प्रतिज्ञा–'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' (छा.उ. ६।१।३) इति ।।२०।।

।।इति षष्ठमारम्भणाधिकरणम्।।

७।।इतरव्यपदेशाधिकरणम्।।सू. २१-२३।।

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः।।२१।।

शारीरकन्यायसंग्रहः

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः।।२१।। अधिकं तु भेदनिर्देशात्।।२२।। अश्मादिवच्च तदनुपपत्तिः।।२३।। जीवब्रह्मणोरैक्यात् जगत्स्रष्टृत्वात् हिताकरणादिदोषयोः जीवब्रह्मगतयोः एकत्र समवायेऽपि सत्यनुमानमुच्यते—ब्रह्म अनिष्टस्य कार्यप्रपञ्चस्याकारणम्, अनिष्टसम्बन्धिनो वा जीवाद्भिन्नं भवितुमर्हति, बुद्धिपूर्वकारितया स्वतन्त्रत्वात्; यो हि बुद्धिपूर्वकारी स्वतन्त्रः, सोऽनिष्टस्य कार्यप्रपञ्चस्याकर्ता, अनिष्टसम्बन्धिनो वा जीवाद्भिन्नो दृष्टः, यथोदासीनः पुरुष इति। अत्र प्रतिबिम्बघटाकाशादेः श्यामत्वाल्पत्वादिधर्मवतोऽभिन्नस्यापि बिम्बाकाशादेरौपाधिकभेदाश्रयेण श्यामादिधर्मासंस्पर्शः स्वाभाविकावदातत्वादिधर्मवत्त्वं च यथा, तथा हिताकरणादिदोषसंसर्गिणोऽपि जीवादभिन्नस्यापि ब्रह्मणस्तद्धर्मासंस्पर्शो जगत्स्रष्टृत्वं चौपाधिकभेदेन व्यवस्थाप्यत इति हेतोरनैकान्तिकत्वम्, आगमविरोधश्च सुप्रसिद्धः इति दर्शितम्।।

प्रकटार्थविवरणम्

तदेवमत्यन्तभेदवादः प्रबन्धेन निरस्तः। एकान्ततः कार्यकारणयोरभेदेऽपि कार्येण कारणानुमानादिव्यवहाराभावप्रसङ्गात् सोऽपि विशदावद्य इत्युपेक्षितः। क्षपणकाधिकरणे त्वनैकान्तवादं स्वयमेवापाकरिष्यति; विरोधाच्च भेदाभेदयोरेकत्रासंभवः स्फुट एव। यदप्यभाणि **भास्करेण** "प्रमाणसिद्धत्वात् कोऽयं विरोधः" इति, तत्र ब्रूमः—सत्यम्, यदि भेदाभेदग्राहकं प्रमाणं स्यात्; न तावत् 'मृद् घट' इति प्रत्यक्षम्, तस्य घटस्य मृदात्मतामात्रविषयत्वेन भेदाभेदयोरौदासीन्यात्; नाप्यनुवृत्तव्यावृत्तप्रत्ययाभ्याम्, प्रत्यययोः संभूय प्रमापकत्वे सापेक्षप्रामाण्यप्रसङ्गात्; न चोभयान्यथानुपपत्तिः प्रमाणम्, ह्रस्वोऽकारो दीर्घोऽकार इत्यनुवृत्तव्यावृत्तप्रत्ययद्वये [1]प्रकारस्य ह्रस्वतादिभिः भेदाभेदानङ्गीकारात्। तस्मात् भेदे न किञ्चन प्रमाणमस्तीति यथासंभवं भेदोऽनिर्वाच्योऽभ्युपेयः; तत्त्वे तु न भेदगन्धोऽप्यस्तीति नाद्वैतावगमस्य प्रत्यक्षादिविरोध इति सिद्धम्।।इति षष्ठमारम्भणाधिकरणम्।।

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः।। जीवाभिन्नाद् ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः। तस्य–चेतनस्य स्वानर्थकार्यहेतुत्वं न संभवतीति लौकिकन्यायेन विरोधोऽस्त्युत नेति सन्देहः। पूर्वं द्वैतस्य मिथ्यात्वापादनेन तद्विषयप्रत्यक्षादेः अतत्त्वावेदकं[दकत्वान्न] प्रामाण्यमिति विरोधः परिहृतः; इह तु प्रत्यक्षादेरतत्त्वावेदकत्वेन विरोधाभावेऽपि चेतनस्य स्वतन्त्रस्य

भाष्यभावप्रकाशिका

अतश्चेति।।२०।। इति षष्ठमारम्भणाधिकरणम्।।

न्यायनिर्णयः

दार्ष्टान्तिके दर्शयति—**एवमिति**। अधिकरणार्थमुपसंहरति—**अतश्चेति**।।२०।।इति षष्ठमारम्भणाधिकरणम्।।

एकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धये कार्यस्य कारणादनन्यत्वं वदता तेनैव न्यायेन जीवस्यापि ततोऽनन्यत्वमुक्तम्, तर्हि जीवधर्मा हिताकरणादयो ब्रह्मणि प्रसज्येरन्निति शङ्कते—**इतरव्यपदेशादिति**। जीवाभिन्नं ब्रह्म जगदुपादानं वदन् समन्वयो विषयः। स किं यदि तादृग्ब्रह्म जगज्जनयेत् तर्हि स्वानिष्टं न जनयेदिति न्यायेन विरुध्यते न वेति तदनाभासत्वाभासत्वाभ्यां संदेहे

---

१. 'ऽप्यकारस्य' इति पाठः स्यात्।

अन्यथा पुनश्चेतनकारणवाद आक्षिप्यते। चेतनाद्धि जगत्प्रक्रियायामाश्रीयमाणायां [१]हिताकरणादयो दोषाः प्रसज्यन्ते। कुतः? इतरव्यपदेशात्। इतरस्य शारीरस्य ब्रह्मात्मत्वं व्यपदिशति श्रुतिः—'स आत्मा तत्त्वमसि श्वेतकेतो' (छा.उ. ६।८।७) इति प्रतिबोधनात्। यद्वा इतरस्य च ब्रह्मणः शारीरात्मत्वं व्यपदिशति 'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै.उ. २।६) इति स्रष्टुरेवाविकृतस्य ब्रह्मणः कार्यानुप्रवेशेन शारीरात्मत्वप्रदर्शनात्। 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छा.उ. ६।३।२) इति च परा देवता जीवमात्मशब्देन व्यपदिशन्ती न ब्रह्मणो भिन्नः शारीर इति दर्शयति। तस्माद् यद् ब्रह्मणः स्रष्टृत्वं तच्छारीरस्यैवेति। [२]अतः स स्वतन्त्रः कर्ता सन् हितमेवात्मनः सौमनस्यकरं कुर्यात्, नाहितं जन्ममरणजरारोगाद्यनेकानर्थजालम्। न हि कश्चिदपरतन्त्रो बन्धनागारमात्मनः कृत्वाऽनुप्रविशति। न च स्वयमत्यन्तनिर्मलः सन्नत्यन्तमलिनं देहमात्मत्वेनोपेयात्। कृतमपि कथंचिद् यद् दुःखकरं तदिच्छया

प्रकटार्थविवरणम्

स्वानर्थकार्यहेतुत्वादर्शनेन विरोध इति पूर्वपक्षमुपक्रमते—**अन्यथा पुनरिति**।। ब्रह्म स्वानिष्टकार्यस्य कारणं न भवति, बुद्धिपूर्वकारित्वात्, देवदत्तवदित्याह—**न हि कश्चिदपरतन्त्र इति**।। हिताकरणादीत्यादिशब्दसूचितं दोषान्तरमाह—**न च स्वयमित्यादिना**।।

भाष्यभावप्रकाशिका

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः।।२१।। पूर्वपक्षसूत्रतात्पर्यमाह—**अन्यथेति**।। यस्य स्रष्टृत्वं ब्रह्मणः, न तस्य हितादिसम्बन्धः, यस्य च हितादिसम्बन्धो जीवस्य, न तस्य स्रष्टृत्वमित्याक्षेपमेवाक्षिपति—**कुत इति**।। नैवम्, तयोरभेदश्रवणादिति परिहरति—**इतरव्यपदेशादिति**।। तदेतत्सूत्रपदं व्याचष्टे—**इतरस्येति**।। इतरशब्देन जीवोऽभिलप्यत इति व्याख्यातम्, इदानीं परमात्माऽभिलप्यत इति व्याचष्टे—**इतरस्य चेति**।। केचिद् विकृतस्य ब्रह्मणोऽनुप्रवेशं वर्णयन्ति, तदर्थं विशिनष्टि—**अविकृतस्येति**।। ब्रह्मकर्तृको वा व्यपदेशः इतरव्यपदेश इति व्याचष्टे—**अनेनेति**।। राजादिना नियुक्तो भृत्यः स्वयमेव स्वस्यानर्थं कुर्वाणो दृष्ट इति, अतो विशिनष्टि—**स्वतन्त्रः कर्तेति**।। स्वतन्त्रस्याप्यज्ञस्यैतत् संभवति, न तु ब्रह्मणः सर्वज्ञस्येति भावः।। नन्वेतदुपाध्यविवेकाज्जीवस्य परमात्माभेदमजानतो जायत इत्याशङ्क्य, जीवानां परमात्मताननुभवेऽपि परमात्मा जीवात्मनोऽभिन्नाननुभवन्न जीवानात्मभूतान् बध्नीयादित्याह—**न हि कश्चिदिति**।। ननु तत्त्वगत्याऽनुप्रवेशोऽपि नास्ति मिथ्यात्माभिमानं मुक्त्वेत्याशङ्क्य, सोऽपि तर्हि न स्यादित्याह—**न च स्वयमिति**।। ननु तथापि लीलयैव तत्करोतीति, अत आह—**कृतमपीति**।। सर्वज्ञत्वात्

न्यायनिर्णयः

पूर्वपक्षसूत्रतात्पर्यमाह—**अन्यथेति**। समन्वयस्य न्यायविरोधसमाधानात् पादादिसंगतीरभिप्रेत्य फलं च पूर्ववत्पूर्वोत्तरपक्षयोर्विवक्षित्वाऽऽक्षेपं विवृण्वन् प्रतिज्ञाभागं विभजते—**चेतनाद्धीति**। यस्य ब्रह्मणः स्रष्टृत्वं न तस्य हितादिसंबन्धः, यस्य च जीवस्य हितादिसंबन्धो न तस्य स्रष्टृत्वमित्याक्षिपति—**कुत इति**। सूत्रावयवेन परिहरति—**इतरेति**। इतरशब्दो जीवविषय इति व्याख्याय परमात्मविषय इति व्याख्यान्तरमाह—**इतरस्य चेति**। परिणामिब्रह्मणोऽनुप्रवेशपक्षं प्रतिक्षिपति—**अविकृतस्येति**। ब्रह्मकर्तृको व्यपदेश इतरव्यपदेश इति व्याख्यानान्तरमाह—**अनेनेति**। जीवब्रह्मणोरभेदे श्रुतिसिद्धे फलितमाह—**तस्मादिति**। भृत्यो राजादिना नियुक्तः स्वयमेव स्वस्यानर्थं कुर्वन् दृश्यते ततो विशिनष्टि—**स्वतन्त्र इति**। स्वतन्त्रस्याप्यज्ञस्य स्वानर्थकारित्वं संभवति; ब्रह्मणस्तु सर्वज्ञस्य नैवमिति भावः। हितमेव विभजते—**आत्मन इति**। अहितं विशिनष्टि—**जन्मेति**। जीवस्योपाध्यविवेकात् परमात्माभेदमपश्यतो युक्तमनर्थकारित्वमित्याशङ्क्य तस्य परमात्मताननुभवेऽपि परमात्मा जीवमात्माभिन्नमनुभवन् न तं बध्नीयादित्याह—**न हीति**। मिथ्याज्ञानं मुक्त्वा तात्त्विकोऽनुप्रवेशोऽपि नास्तीत्याशङ्क्यातात्त्विकोऽपि न स्यादित्याह—**न चेति**। लीलया परस्यात्मनो

---

१. हिताकरणेत्यत्र नञ्व्यत्यासेनाहितकरणं दोषो विवक्षितः। रत्नप्रभा। २. 'अतश्च स्वतन्त्रः' इति पा.।

जह्यात्, सुखकरं चोपाददीत। स्मरेच्च—मयेदं जगद्बिम्बं विचित्रं विरचितमिति। सर्वो हि लोकः स्पष्टं कार्यं कृत्वा स्मरति—मयेदं कृतमिति। यथा च मायावी स्वयं प्रसारितां मायामिच्छयाऽनायासेनैवोपसंहरति, एवं शारीरोऽपीमां सृष्टिमुपसंहरेत्। स्वमपि तावच्छरीरं शारीरो न शक्नोत्यनायासेनोपसंहर्तुम्। एवं हितक्रियाद्यदर्शनादन्याय्या चेतनाज्जगत्प्रक्रियेति गम्यते।।२१।।

अधिकं तु भेदनिर्देशात्।।२२।।

तुशब्दः पक्षं व्यावर्तयति। यत् सर्वज्ञं सर्वशक्ति ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं शारीरादधिकमन्यत्, तद् वयं जगतः स्रष्टृ ब्रूमः। न तस्मिन् हिताकरणादयो दोषाः प्रसज्यन्ते। न हि तस्य हितं किंचित् कर्तव्यमस्त्यहितं वा परिहर्तव्यम्, नित्यमुक्तस्वभावत्वात्। न च तस्य ज्ञानप्रतिबन्धः शक्तिप्रतिबन्धो वा क्वचिदप्यस्ति, सर्वज्ञत्वात् सर्वशक्तित्वाच्च। शारीरस्त्वनेवंविधस्तस्मिन् प्रसज्यन्ते हिताकरणादयो दोषाः।

प्रकटार्थविवरणम्

अधिकं तु भेदनिर्देशात्।। सिद्धान्तसूत्रमवतारयति—**अधिकं त्विति**।। ब्रह्म स्वानिष्टस्य कार्यस्य कारणं न भवतीत्येतत्सिद्धसाधनम्, तस्यानिष्टाभावादेवेत्यर्थः। नन्वज्ञाच्छारीरादभेदात् ब्रह्मणोऽप्यज्ञत्वादिप्रसङ्ग इत्याशङ्क्याह—**न च तस्य ज्ञानप्रतिबन्ध इति**।। यथा घटाकाशादल्पत्वादिविशिष्टादभेदेऽपि महाकाशस्य न तद्धर्मप्राप्तिः, तथा जीवादभिन्नमपि ब्रह्म न तद्धर्मभागित्यर्थः। पूर्ववाद्युक्तं

भाष्यभावप्रकाशिका

स्मर्तृत्वमपि प्रसज्यत इत्याह—**स्मरेच्चेति**।। ननु अनुभूतं सर्वं स्मर्यत एवेति नियमो नास्तीत्याशङ्क्य, विस्पष्टत्वात् स्मरणयोग्यमेतदित्याह—**सर्वो हीति**।। ननु मायामयत्वादुक्तानि दूषणानि न प्रभवन्ति, अतस्तत्परिहारायाधिकरणारम्भो व्यर्थ इत्याशङ्क्याह—**यथा चेति**।। उपसंहर्तृत्वं शारीरस्यापि क्वचिद्विषये दृश्यत इति, अत आह—**स्वमपीति**।। ब्रह्म, अनिष्टस्य कार्यप्रपञ्चस्य न कारणम्, चेतनत्वे सति स्वतन्त्रत्वात्; विवक्षितपुरुषवदित्यनुमानं दर्शयन्नुपसंहरति—**एवमिति**।।२१।।

अधिकं तु भेदनिर्देशात्।।२२।। यदुक्तम्—कर्तृस्मरणेन भवितव्यम्, स्वयमेव चोपसंहर्तव्यम्—इति; तद्दूषणमित्याह—**न च तस्येति**।। कस्य तर्हि ज्ञानप्रतिबन्धादय इति? तत्राह—**शारीरस्त्विति**।। तर्हि तदभेदात् परमात्मन्यपि भवेयुरिति, तत्राह—

न्यायनिर्णयः

जगत्कर्तृत्वमित्याशङ्क्याह—**कृतमपीति**। स्मर्तृत्वमपि प्रसज्येत सर्वज्ञत्वादित्याह—**स्मरेच्चेति**। अनुभूते स्मृतिनियमाभावान्नैवमित्याशङ्क्य स्पष्टत्वेन स्मृतियोग्यमेतदित्याह—**सर्वो हीति**। न चेश्वरस्यास्त्येव स्मर्तृत्वं, जीवेऽपि तदभिन्ने तत्प्रसङ्गादिति भावः। जगतो मायामयत्वादुक्तदोषानवकाशात् तत्परिहारार्थमधिकरणमनारभ्यमित्याशङ्क्याह—**यथा चेति**। शारीरस्यापि क्वचिदुपसंहर्तृत्वं दृष्टमित्यनिष्टापत्तिराहित्यमाशङ्क्याह—**स्वमपीति**। बुद्धिपूर्वकारी हितमेवात्मनः सृजतीति न्यायविरोधाज्जीवाभिन्नाद् ब्रह्मणो विश्वसृष्टिवादिनः समन्वयस्यासिद्धिरित्युपसंहरति—**एवमिति**। ब्रह्मानिष्टस्य कार्यप्रपञ्चस्य न कारणं, चेतनत्वे सति स्वतन्त्रत्वात्, विवक्षितपुरुषवदिति भावः।।२१।।

सिद्धान्तसूत्रमवतारयति—**अधिकं त्विति**। तद् व्याचष्टे—**तुशब्द इति**। यदुक्तं हिताकरणादयो दोषा ब्रह्मणि प्रादुःष्युरिति, तत्राह—**यत्सर्वज्ञमिति**। तत्र हेतुमाह—**न हीति**। नित्यमुक्तस्यापि ब्रह्मणो मायाशक्तियोगाद् विश्वनिर्मातृत्वमविरुद्धमिति भावः। यत्तु कर्तृत्वेन स्मर्तृत्वेन च भवितव्यं स्वयमेव चोपसंहर्तव्यमिति, तत्राह—**न चेति**। क्वचिदपि ज्ञानप्रतिबन्धो नेत्यत्र हेतुमाह—**सर्वज्ञत्वादिति**। क्वचिदपि शक्तिप्रतिबन्धो नास्तीत्यत्रापि हेतुमाह—**सर्वशक्तित्वाच्चेति**। तर्हि क्वचिदपि ज्ञानप्रतिबन्धाद्य-भावादस्मदादिष्वपि स्मरणादिप्रसक्तिरित्याशङ्क्याह—**शारीरस्त्विति**। तदभेदात् परस्मिन्नपि स्रष्टरि तेषां प्रसक्तिमाशङ्क्योक्तम्—

न तु तं वयं जगतः स्रष्टारं ब्रूमः। कुत एतत्? भेदनिर्देशात्। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.उ. २।४।५), 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छा.उ. ८।७।१), 'सता सोम्य तदा संपन्नो भवति' (छा.उ. ६।८।१), 'शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढः' (बृ.उ. ४।३।३५) इत्येवंजातीयकः कर्तृकर्मादिभेदनिर्देशो जीवादधिकं ब्रह्म दर्शयति। नन्वभेदनिर्देशोऽपि दर्शितः 'तत्त्वमसि' इत्येवंजातीयकः। कथं भेदाभेदौ विरुद्धौ [1]संभवेयाताम्? नैष दोषः। [2]आकाशघटाकाशन्यायेनोभयसंभवस्य तत्र तत्र प्रतिष्ठापितत्वात्। अपि च यदा तत्त्वमसीत्येवंजातीयकेनाभेदनिर्देशेनाभेदः प्रतिबोधितो भवति, अपगतं भवति तदा जीवस्य संसारित्वं ब्रह्मणश्च स्रष्टृत्वं, समस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन बाधितत्वात्। तत्र कुत एव सृष्टिः? कुतो वा हिताकरणादयो दोषाः? अविद्या-प्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातोपाध्यविवेककृता हि भ्रान्तिर्हिताकरणादिलक्षणः संसारो न तु परमार्थतोऽस्तीत्यसकृदवोचाम। जन्ममरणच्छेदनभेदनाद्यभिमानवत्। अबाधिते तु व्यवहारे 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' इत्येवंजातीयकेन भेदनिर्देशेनावगम्यमानं ब्रह्मणोऽधिकत्वं हिताकरणादिदोषप्रसक्तिं निरुणद्धि।।२२।।

प्रकटार्थविवरणम्

स्मारयति—**नन्वभेदेति**।। भेदस्येतरस्य च सत्यत्वे ज्ञानात्तन्निवृत्त्यसंभवस्य प्रदर्शितत्वादौपाधिकभेदालम्बना भेदश्रुतिः, स्वाभाविकाभेदालम्बना चाभेदश्रुतिरिति न कश्चिद्विरोध इत्याह—**नैष दोष इति**।। इतश्च पारमार्थिकभेदाभिप्रायेण न जीवब्रह्मणोरितरेतरधर्मसांकर्यमित्याह—**अपि चेत्यादिना**।।

भाष्यभावप्रकाशिका

न तु तं वयमिति।। हेतुत्वेन सूत्रावयवमवतारयति—**भेदनिर्देशादिति**।। उभयमप्यस्त्विति, तत्राह—**कथं भेदाभेदाविति**।। यद्यपि परमार्थत एकत्वम्, तथाप्यौपाधिको भेदो विद्यत इत्याह—**आकाशेति**।। तत्त्वमसीति वाक्यार्थज्ञानोत्तरकालमभेदावगमाद् ब्रह्मणःस्रष्टृत्वं जीवस्य प्रसज्यत इत्युच्यते, किं वा तदवगमात् प्राग् इति विकल्प्य, आद्यपक्षे दूषणमाह—**अपि च यदेति**।। मिथ्याज्ञानविजृम्भितत्वं कथं भेदव्यवहारस्येति? तदाह—**अविद्याप्रत्युपस्थापितेति**।। कार्यकरणसङ्घाताविवेककृता भ्रान्तिरित्यत्र दृष्टान्तमाह—**जन्ममरणेति**।। द्वितीयपक्षस्य परिहारमाह—**अबाधिते त्विति**।। जीवानां सुख-दुःखादिवेदनासङ्गोऽविद्यावशात्, न तु तत्त्वतोऽस्तीति विजानन् आत्मनश्च तत्रोदासीनतया तल्लेपाभावं पश्यन्न हिताकरणादिदोषैः स्पृश्यत इति भावः।।२२।।

न्यायनिर्णयः

न त्विति। सत्यभेदे दर्शितव्यवस्थानुपपत्तिरिति शङ्कते—**कुत इति**। सूत्रावयवं हेतुमवतार्य व्याचष्टे—**भेदनिर्देशादिति**। कर्तृकर्मादीत्यादिशब्दो व्यक्तिभेदविषयः। सर्वस्यापि जीवब्रह्मणोर्भेदनिर्देशस्य कर्तृकर्मान्तर्भावात्। इदानीं पूर्ववादी पूर्वोक्तं स्मारयन् भेदनिर्देशस्यासाधकत्वमाशङ्कते—**नन्विति**। तुल्यबलतया द्वयोरपि निर्देशयोः साधकत्वमाशङ्क्याह—**कथमिति**। वास्तवमेकत्वमौपाधिकं नानात्वमित्युभयनिर्देशोपपत्तिरिति परिहरति—**नैष दोष इति**। इतश्च ब्रह्मगतं स्रष्टृत्वं, जीवगतं वा हिताकरणादि परस्परं न संभवतीत्याह—**अपि चेति**। तत्त्वमसीति वाक्यार्थज्ञानादूर्ध्वमभेदावगमाद् ब्रह्मणः स्रष्टृत्वं जीवस्य, तस्य च हिताकरणादि ब्रह्मणः स्यादिति वा प्रागेव वा तदवगमादिति विकल्प्याद्ये दोषमाह—**यदेति**। भेदव्यवहारस्य मिथ्याज्ञानविजृम्भितत्वमसिद्धमित्याशङ्क्याह—**अविद्येति**। कार्यकरणाविवेककृता भ्रान्तिरित्यत्र दृष्टान्तमाह—**जन्मेति**। द्वितीयं प्रत्याह—**अबाधिते त्विति**।।२२।।

---

१. 'संभवेताम्' इति पाठः स्यात्। २. 'महाकाशघटाकाश' इति पा.।

अश्मादिवच्च तदनुपपत्तिः।।२३।।

यथा च लोके पृथवीत्वसामान्यान्वितानामप्यश्मनां केचिन्महार्हा मणयो वज्रवैडूर्यादयः, अन्ये मध्यमवीर्याः सूर्यकान्तादयः, अन्ये प्रहीणाः श्ववायसप्रक्षेपणार्हाः पाषाणा इत्यनेकविधं वैचित्र्यं दृश्यते। यथा चैकपृथिवीव्यपाश्रयाणामपि बीजानां बहुविधं पत्रपुष्पफलगन्धरसादिवैचित्र्यं चन्दनकिंपाकादिषूपलक्ष्यते। यथा चैकस्याप्यन्नरसस्य लोहितादीनि केशलोमादीनि च विचित्राणि कार्याणि भवन्ति। एवमेकस्यापि ब्रह्मणो जीवप्राज्ञपृथक्त्वं कार्यवैचित्र्यं चोपपद्यत इत्यतस्तदनुपपत्तिः परपरिकल्पितदोषानुपपत्तिरित्यर्थः। श्रुतेश्च प्रामाण्याद् विकारस्य च वाचारम्भणमात्रत्वात् स्वप्नदृश्यभाववैचित्र्यवच्चेत्यभ्युच्चयः।।२३।।

।।इति सप्तममितरव्यपदेशाधिकरणम्।।

प्रकटार्थविवरणम्

अश्मादिवच्च तदनुपपत्तिः।। ननु कथमेकस्यैव चिद्धातोः कस्मिंश्चिदुपाधौ स्रष्टृत्वं कस्मिंश्चित् संसारित्वं तद्विकाराणां चेष्टत्वमनिष्टत्वं चेति वैचित्र्यमित्याशङ्क्य दृष्टान्तेन संभावयति—**यथा च लोक इत्यादिना**।। किंपाक इति महातालफलम्। सूत्रगतचकारस्यार्थमाह—**श्रुतेश्चेत्येवमादिना**।। ब्रह्मानिष्टस्रष्टृ न भवति, जीवाद्वाऽनिष्टसंबन्धिनो नाभेदं क्षमते, स्वतन्त्रचेतनत्वात्, देवदत्तवत्, इत्यनुमानं श्रुतिबाधितमित्यर्थः। ब्रह्म स्वाभिन्नं जीवं न पश्यति चेदसर्वज्ञता; पश्यति चेत् स्वात्मन्येव संसारं पश्येदित्यपि कुचोद्यमित्याह—**विकारस्य चेति**।। यथा कृपाणादौ मलिनमात्मानं पश्यन्नपि देवदत्तः तस्य मिथ्यात्वात्र तेनात्मानं शोचति; तथा जीवान् पश्यदपि ब्रह्म तद्गतसंसारस्य वाचारम्भणमात्रत्वात् न तेनात्मानं शोचतीत्यर्थः। यथा च स्वप्ने दृश्यानां भावानां पण्डितमूर्खादिवैचित्र्यमेकस्वप्नदृगधिष्ठानत्वेऽपि दृष्टं तथैकचिदधिष्ठानत्वेऽपि जीवेश्वरादिभेदवैचित्र्यमविरुद्धमिति भावः।।इति सप्तममितरव्यपदेशाधिकरणम्।।

भाष्यभावप्रकाशिका

अश्मादिवच्च तदनुपपत्तिः।।२३।। एकरूपस्य चिदात्मकस्य जगत् कार्यं चेत्, जीववच्चेतनमेव प्रसज्येतेति, तत्राह—**अश्मादिवदिति**।। "यथा च लोक" इत्यादिः स्वरूपवैचित्र्ये प्रथमो दृष्टान्तः, द्वितीयस्तु धर्मवैचित्र्ये, तृतीयस्तु कार्यवैचित्र्ये। दार्ष्टान्तिकं दर्शयति—**एवमेकस्येति**।। सौत्रस्य चकारस्यार्थं दर्शयति—**श्रुतेश्चेति**।।२३।इति सप्तममितरव्यपदेशाधिकरणम्।।

न्यायनिर्णयः

परस्यैवाविद्याकृतावच्छेदस्य जीवशब्दितस्य सुखदुःखादिसंबन्धो, न तु तत्त्वतो जीवो वा तन्निष्ठदुःखादि वाऽस्तीति पश्यतो हिताकरणादिदोषासंस्पर्शाद् युक्तं तस्य जगत्कारणत्वमित्युक्तम्। इदानीं चिदात्मकत्वेनैकरूपस्य ब्रह्मणो जगत् कार्यं चेत् तदपि चेतनमेव स्यादित्याशङ्क्याह—**अश्मादिवच्चेति**। तत्र स्वरूपवैचित्र्यपरमश्मदृष्टान्तं व्याचष्टे—**यथा चेति**। धर्मवैचित्र्यदृष्टान्तमाह—**यथा चैकेति**। अर्थक्रियावैचित्र्यमुदाहरति—**यथा चैकस्येति**। दृष्टान्तत्रयस्य दार्ष्टान्तिकं दर्शयति—**एवमिति**। ब्रह्मणश्चेतनत्वात् तत्कार्यत्वे जगतोऽपि तथात्वं स्यात्, तदभावान्न ब्रह्म जगत्कारणमिति परपरिकल्पितो दोषः। सौत्रस्य चकारस्यार्थमाह—**श्रुतेश्चेति**। ब्रह्म स्वाभिन्नं जीवं न पश्यति चेदसर्वज्ञं ब्रह्मकारणवादिन्याः श्रुतेरप्रामाण्ये हेत्वभावात् पूर्वपक्षानुमानं तद्विरोधादप्रमाणमित्यर्थः। ब्रह्म स्वाभिन्नं जीवं न पश्यति चेदसर्वज्ञं स्यात्, पश्यति चेदात्मन्येव संसारं पश्येदित्याशङ्क्याह—**विकारस्येति**। यथा दर्पणादौ मलिनमात्मानं पश्यन्नपि मैत्रस्तस्य मिथ्यात्वं जानन्न तेनात्मानं शोचति। तथा स्वाभिन्नं जीवं पश्यदपि ब्रह्म तद्गतत्वेन भातसंसारस्य वाचारम्भणमात्रत्वान्न तेनात्मानं शोचितुमर्हतीत्यर्थः। यत्तु जगत्येकरूपब्रह्मकार्ये कुतो वैचित्र्यमिति, तत्राह—**स्वप्नेति**। यथा स्वप्नदृश्यानां भावानामेकस्वप्नदृगधिष्ठानत्वेऽपि पण्डितमूर्खादिवैचित्र्यं दृष्टमेवमेकचिदात्माधिष्ठानत्वेऽपि जीवेश्वरादिवैचित्र्याविरोधाज्जगतश्चेतनकारणत्वमविरुद्धमिति भावः।।२३।इति सप्तममितरव्यपदेशाधिकरणम्।।

८।।उपसंहारदर्शनाधिकरणम्।।सू. २४-२५।।

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि।।२४।।

चेतनं ब्रह्मैकमद्वितीयं जगतः कारणमिति यदुक्तं तन्नोपपद्यते। कस्मात्? उपसंहारदर्शनात्। इह हि लोके कुलालादयो घटपटादीनां कर्तारो मृद्दण्डचक्रसूत्रसलिलाद्यनेककारकोपसंहारेण संगृहीतसाधनाः सन्तस्तत्तत्कार्यं कुर्वाणा दृश्यन्ते। ब्रह्म चासहायं तवाभिप्रेतम्, तस्य साधनान्तरानुपसंग्रहे सति कथं स्रष्टृत्वमुपपद्येत? तस्मान्न ब्रह्म जगत्कारणमिति चेत्? नैष दोषः; यतः क्षीरवद् द्रव्यस्वभावविशेषादुपपद्यते। यथा हि लोके

शारीरकन्यायसंग्रहः

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि।।२४।। देवादिवदपि लोके।।२५।। ब्रह्म जगदुपादानकारणं न भवति, स्वव्यतिरिक्तोपकरणाधिष्ठात्रादिकारकशून्यत्वात्, यदेवंविधकारकशून्यं न तत् कार्यस्योपादानं दृष्टम्, यथा केवलमृदादिः; तथा ब्रह्म जगतो न निमित्तकारणम्, स्वव्यतिरिक्ताधिष्ठेयादिसामग्रीशून्यत्वात्, यदेवंविधसामग्रीशून्यं न तन्निमित्तकारणम्, यथा केवलकुलाल इत्यनयोरनैकान्तिकत्वं क्षीरे देवादौ च, आगमविरोधश्च सुप्रसिद्ध इति दर्शितम्।।

प्रकटार्थविवरणम्

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि।। असहायाद् ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः। तस्य किं ससहायस्य कार्यहेतुत्वमिति लौकिकन्यायेन विरोधोऽस्ति उत नास्तीति सन्देहे पूर्ववाद्याह—**चेतनं ब्रह्मैकमित्यादिना।।** पूर्वत्रौपाधिकभेदाङ्गीकरणेन विरोधः परिहृतः; इह त्वौपाधिकस्यापि ब्रह्मसहायस्याभावाद् विरोधोऽस्ति। तथा हि–ब्रह्म जगदुपादानं न, असहायत्वात्, वस्तुमात्रवत् इत्यनुमानस्य प्रमाणत्वात् विरोधोऽस्तीति भावः। क्षीरेऽनैकान्तिकत्वात् विरोधो नास्तीत्याह—**नैष दोष इति।।**

भाष्यभावप्रकाशिका

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि।।२४।। उपसंहारदर्शनादिति।। लोके कारणभेदादेव कार्यभेदस्य संभवदर्शनात् इतरथा तस्याकस्मिकत्वप्रसङ्गाच्च कार्यक्रमस्य कारणक्रमापेक्षत्वात् इह चाद्वितीयतया ब्रह्मणः क्रमवत्सहकारिसम्बन्धाभावादेकरूपत्वाच्च न क्रमवद्विचित्ररूपजगज्जनिहेतुत्वमित्याह—**इह हीति।।** एकैकं मृदादि कारकम्। तेषां सामग्र्यम् साधनम्। ब्रह्म, उपादानकारणं न भवति, स्वव्यतिरिक्तोपकरणाधिष्ठात्रादिकारकशून्यत्वात्; केवलमृद्वत्, तथा ब्रह्म, जगतो निमित्तकारणं न भवति, स्वव्यतिरिक्ताधिष्ठेयादिसामग्रीशून्यत्वात्, केवलकुलालादिवदित्याह—**तस्येति।।** विशुद्धब्रह्मापेक्षयेदमुच्यते, किं वा विशिष्टापेक्ष-

न्यायनिर्णयः

सजातीयभेदाभावावष्टम्भेन ब्रह्मणो जगद्धेतुत्वमाक्षिप्य परिहृतम्। इदानीं विजातीयभेदाभावमादाय तद्धेतुत्वमाक्षिप्य परिहरति—**उपसंहारदर्शनादिति।** असहायाद् ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः। स किं ब्रह्म नोपादानमसहायत्वात् संमतवदिति न्यायेन विरुध्यते न वेति तदनाभासत्वाभासत्वाभ्यां संदेहे—पूर्वत्रौपाधिकभेदाद्धिताकरणादिदोषः समाहितः। सम्प्रत्युपाधितोऽपि विभक्तमधिष्ठात्रादि नास्तीश्वरनानात्वाभावात्, ततश्च विचित्रकार्यानुपपत्तिरिति पूर्वपक्षमाह—**चेतनमिति।** अत्रापि समन्वयस्य न्यायविशेषविरोधसमाधानात् पूर्ववदेव पादादिसंगतिफले। प्रतिज्ञाते पूर्वपक्षे प्रश्नपूर्वकं हेतुमाह—**कस्मादिति।** लोके कारणभेदादेव कार्यभेददर्शनादन्यथा तदाकस्मिकत्वापातात्, कार्यक्रमस्य च कारणक्रमापेक्षत्वादद्वितीये ब्रह्मणि क्रमवत्सहकारिसंबन्धाभावादैकरूप्याच्च न क्रमवद्विचित्ररूपजगज्जन्महेतुतेत्याह—**इह हीति।** अत्र साधनशब्दस्तत्सामग्रीं ब्रूते। ब्रह्म नोपादानम्, असहायत्वात्, केवलमृद्वत्। ब्रह्म जगतो न निमित्तम्, असहायत्वात्, केवलकुम्भकारवदिति मन्वानः सन्नाह—**ब्रह्म चेति।** उक्तानुमानफलमुपसंहरति—**तस्मादिति।** विशुद्धब्रह्मापेक्षया विशिष्टब्रह्मापेक्षया वेदमुच्यते, नाद्यः;सिद्धसाध्यत्वादित्यभिप्रेत्य द्वितीये तस्योपादानत्वनिषेधं दूषयति—**नैष दोष इति।** किं बाह्यसहकारिविरहादनुपादानत्वं किंवान्तरसहकारिराहित्यादिति

क्षीरं जलं वा स्वयमेव दधिहिमकरकादिभावेन परिणमतेऽनपेक्ष्य बाह्यं साधनम्, तथेहापि भविष्यति। ननु क्षीराद्यपि दध्यादिभावेन परिणममानमपेक्षत एव बाह्यं साधनमौष्ण्यादिकम्, कथमुच्यते क्षीरवद्धीति? नैष दोषः; स्वयमपि हि क्षीरं यां च यावतीं च परिणाममात्रामनुभवति ([1]तावत्येव)त्वार्यते त्वौष्ण्यादिना दधिभावाय। यदि च स्वयं दधिभावशीलता न स्यात्, नैवौष्ण्यादिनाऽपि बलाद् दधिभावमापद्येत। न हि वायुराकाशो वौष्ण्यादिना बलाद् दधिभावमापद्यते। साधनसामग्र्या च तस्य पूर्णता संपाद्यते। परिपूर्णशक्तिकं तु ब्रह्म। न तस्यान्येन केनचित् पूर्णता संपादयितव्या। श्रुतिश्च भवति–'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।।' (श्वे.उ. ६।८) इति। तस्मादेकस्यापि ब्रह्मणो विचित्रशक्तियोगात् क्षीरादिवद् विचित्रपरिणाम उपपद्यते।।२४।।

प्रकटार्थविवरणम्

क्षीरस्याप्यसहायत्वाभावात् नानैकान्तिकत्वमित्याह—**ननु क्षीराद्यपीति**।। अनैकान्तिकत्वं समाधत्ते—**नैष दोष इति**।। यद्रूपां यत्परिमाणां च परिणाममात्रां क्षीरमनुभवति तां स्वयमपि अनुभवत्येव, सत्यपि कालस्य सहकारित्वे असहायत्वं नामाधिष्ठातृरहितत्वं क्षीरस्यास्तीत्यनैकान्तिकत्वमिति भावः। सर्वथा सहकारिरहितत्वं त्वसिद्धम्, सामान्यादृष्टादेः सहकारित्वाभ्युपगमादिति द्रष्टव्यम्। ननु यदि क्षीरं कालवशेन स्वयमेव दधि भवति किमिति तर्ह्युष्णाद्यपेक्षेत्याशङ्क्याह—**त्वार्यते त्विति**।। ननु त्वरा शैघ्र्यम्; त्वार्यते क्षीरं दधिभावायौष्ण्यादिनेति किमित्येवं कल्प्यते? क्षीरं स्वयमशक्तमेव, औष्ण्यादिना तु शक्तं क्रियत इत्येतत् कस्मान्न कल्प्यत इत्याशङ्क्याह—**यदि च स्वयमिति**।। ननु यद्यपि क्षीरं स्वयं समर्थम्, तथापि तक्रप्रक्षेपादिना च पुष्कलतां लभमानं यथा दधिविशेषं जनयति, तथा ब्रह्मणोऽपि कार्यविशेषजननाय सहकार्यपेक्षा भविष्यतीत्याशङ्क्याह—**साधनसामग्र्या चेति**।।

भाष्यभावप्रकाशिका

येति वक्तव्यम्। यद्याद्यः पक्षः, तदाऽङ्गीक्रियते। अथ द्वितीयः, तदाप्युपादानकारणत्वदूषणपक्षे परिहारमाह—**यतः क्षीरवदिति**।। एतदुक्तं भवति—अत्यन्तव्यतिरिक्तसहकारिकारणराहित्यादनुपादानत्वं साध्यते चेत्, क्षीरादिष्वनेकान्तः, कालपरिपाकवशेन तेषां स्वत एव परिणामदर्शनादिति।। ननु औष्ण्याद्यपेक्षाऽन्वयव्यतिरेकसिद्धेति, अत आह—**त्वर्यते त्विति**।। अशक्तस्य सहकार्यपेक्षयाऽपि कार्योत्पादकत्वादर्शनात् क्षीरादेर्दध्यादिभावे स्वतस्सिद्धं सामर्थ्यमित्याह—**यदि चेति**।। किमर्था तर्हि साधनापेक्षेति? तत्राह—**साधनेति**।। विद्यमानैव शक्तिरुपचीयत इत्यर्थः।। ननु क्षीरादेर्यद्यपि बाह्यं साधनं नास्ति; तथाप्यान्तरसाधनसद्भावादुपपद्यते कारणता, ब्रह्मणः पुनरेकरसत्वान्नान्तरमपि साधनमिति कथं कारणतेति? अत आह—**परिपूर्णेति**।। कार्यक्रमेण तच्छक्तिपरिपाकोऽपि क्रमवानुन्नेयः, शक्तिभेदाच्च तद्विशिष्टकारणेऽपि भेदसिद्धिरिति भावः।।२४।।

न्यायनिर्णयः

विकल्प्याद्यं व्यभिचारित्वेन निरस्यन्नुदाहरणं विवृणोति—**यथा हीति**। दृष्टान्ते विवदमानः शङ्कते—**नन्विति**। क्षीरादिषु स्वत एव कालपरिपाकवशेन परिणामदर्शनादसंप्रतिपत्तिरयुक्तेति परिहरति—**नैष दोष इति**। औष्ण्याद्यपेक्षा तत्रान्वयव्यतिरेकसिद्धेति कुतो नैरपेक्ष्यमित्याशङ्क्याह—**त्वार्यते त्विति**। त्वार्यते शैघ्र्यं कार्यते क्षीरं दधिभावायौष्ण्यादिना। किंचाशक्तस्य सहकार्यपेक्षयाऽपि कार्योत्पादकत्वादर्शनाद् दध्यादिभावे स्वतः सिद्धं क्षीरादेः सामर्थ्यमित्याह—**यदि चेति**। तदेव दृष्टान्तेन स्पष्टयति—**न हीति**। किमर्था तर्हि कारणसामग्र्यपेक्षेति, तत्राह—**साधनेति**। 'न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यत' इति न्यायाद् विद्यमानैव क्षीरादिशक्तिः साधनसामग्र्योपचीयत इत्यर्थः। क्षीरादेर्बाह्यसाधनाभावेऽप्यान्तरसाधनसद्भावात् कारणता युक्ता। ब्रह्मणस्त्वेकरस्यात्रान्तरमपि साधनमदृष्टादीष्टमिति कथं कारणतेति द्वितीयमाशङ्क्याह—**परिपूर्णेति**। ब्रह्म परिपूर्णशक्तिकमित्यत्र प्रमाणमाह—**श्रुतिश्चेति**। कार्यक्रमेण तच्छक्तिपरिपाकोऽपि क्रमवानुन्नेयः। शक्तिभेदाच्च तद्विशिष्टकारणेऽपि भेदसिद्धिरित्यभिसंधायोपसंहरति—**तस्मादिति**।।२४।।

---

१. अत्र 'तामनुभवत्येव' इति सम्यक्पाठः। प्रकटार्थविवरणे च तत्रानुकूलमिति अभोगटिप्पण्यां श्रीरामशास्त्रिणः।

देवादिवदपि लोके।।२५।।

स्यादेतत्–उपपद्यते क्षीरादीनामचेतनानामनपेक्ष्यापि बाह्यं साधनं दध्यादिभावः, दृष्टत्वात्। चेतनाः पुनः कुलालादयः साधनसामग्रीमपेक्ष्यैव तस्मै तस्मै कार्याय प्रवर्तमाना दृश्यन्ते। कथं ब्रह्म चेतनं सदसहायं प्रवर्तेतेति? देवादिवदिति ब्रूमः। यथा लोके देवाः पितर ऋषय इत्येवमादयो महाप्रभावाश्चेतना अपि सन्तोऽनपेक्ष्यैव किंचिद् बाह्यं साधनमैश्वर्यविशेषयोगादभिध्यानमात्रेण स्वत एव बहूनि नानासंस्थानानि शरीराणि प्रासादादीनि रथादीनि च निर्मिमाणा उपलभ्यन्ते, मन्त्रार्थवादेतिहासपुराणप्रामाण्यात्। तन्तुनाभश्च स्वत एव तन्तून् सृजति। बलाका चान्तरेणैव शुक्रं गर्भं धत्ते। पद्मिनी चानपेक्ष्य किंचित्प्रस्थानसाधनं सरोन्तरात् सरोन्तरं प्रतिष्ठते। एवं चेतनमपि ब्रह्मानपेक्ष्य बाह्यं साधनं स्वत एव जगत् स्रक्ष्यति। स यदि ब्रूयात्–य एते देवादयो ब्रह्मणो दृष्टान्ता उपात्तास्ते दार्ष्टान्तिकेन ब्रह्मणा न समाना भवन्ति। शरीरमेव ह्यचेतनं

प्रकटार्थविवरणम्

देवादिवदपि लोके। सूत्रनिरस्याशङ्कामाह—**स्यादेतदिति।।** ब्रह्म न जगत्कारणम्, स्वातिरिक्ताधिष्ठेयशून्यत्वात्, देवदत्तमात्रवदिति भावः। अनैकान्तिकत्वमाह—**देवादिवदिति।।** लोक्यतेऽनेनेति लोकं शास्त्रम्, वृद्धव्यवहारश्च। अपिशब्दादुदाहरणान्तरमाह—**तन्तुनाभ इत्यादिना।** अधिष्ठेयशून्यत्वादिति हेतुर्देवादिषु न वर्तते, तत्तद्देहस्याधिष्ठेयत्वात्; अतो नास्त्यनैकान्तिकत्वमित्याह—**स यदि ब्रूयादित्यादिना।।** अनैकान्तिकत्वं समर्थयति—**तं प्रति ब्रूयादित्यादिना।।** देहस्य देहिना तादात्म्यापन्नत्वात् स्वशब्देन

भाष्यभावप्रकाशिका

देवादिवपि लोके।।२५।। अथ चेतनत्वे सतीति विशेषणान्न क्षीरादिभिर्व्यभिचारः, तस्मान्नोपादानत्वम्। कुलालादीनां चेतनानां बाह्यमृदाद्यपेक्षया निमित्तकारणत्वदर्शनान्न निमित्तत्वमपीत्याशङ्क्य परिहरति—**स्यादेतदित्यादिना।।** क्वचिद् बाह्यसाधनापेक्षत्वं दृष्टमित्येतावता सर्वत्र तथैवाभ्युपगन्तव्यमिति नियमभङ्गाय दृष्टान्तान्तरमाह—**बलाका चेति।।** एतमेवाभिप्रायं चोद्यपूर्वकं स्पष्टयति—**स यदि ब्रूयादित्यादिना।।२५।।**इत्यष्टममुपसंहाराधिकरणम्।।

न्यायनिर्णयः

चेतनत्वे सत्यसहायत्वादिति विशेषणादुक्तमनैकान्तित्वं परिहर्तुं शक्यमित्याशङ्क्याह—**देवादिवदिति।** सूत्रव्यावर्त्यामाशङ्कामाह—**स्यादेतदिति।** चेतनत्वविशेषणेन व्यभिचारनिवारणमाह—**उपपद्यत इति।** विशिष्टेन हेतुना ब्रह्मणो जगद्धेतुत्वं निषेद्धुं दृष्टान्तमाह—**चेतना इति।** विवक्षितमनुमानं निगमयति—**कथमिति।** विशिष्टस्यापि हेतोरनैकान्तिकत्वं तदवस्थमिति परिहरति—**देवादिवदिति।** तत्र दृष्टान्तं व्याचष्टे—**यथेति।** अस्मदादिभ्यो देवादिषु विशेषं दर्शयति—**महाप्रभावा इति।** तेषामपीश्वरानुग्रहसापेक्षत्वादसिद्धमसहायत्वमित्याशङ्क्याह—**अनपेक्ष्येति।** तथापि शुक्रशोणितसंनिपातस्य मृद्दार्वादीनां चाभावे कुतो देहादीनां प्रासादादीनां च निर्माणमित्याशङ्क्याह—**ऐश्वर्येति।** अस्मदादिष्वसंभाव्यमानमैश्वर्यविशेषस्तद्वशेन योगस्तत्कार्यघटनसामर्थ्यं तस्मादिति यावत्। तत्तत्कार्योचितसामग्रीसंपत्तौ हेत्वन्तरमाह—**अभिध्यानेति।** संकल्पातिरिक्तकारणानपेक्षत्वमुक्तमेव मात्रशब्दार्थः। तस्यैव स्पष्टीकरणम्—**स्वत एवेति।** लोके नैवमुपलम्भोऽस्तीत्याशङ्क्याह—**मन्त्रेति।** सूत्रे लोकशब्देन लोक्यतेऽनेनेति व्युत्पत्त्या शास्त्रम्, अपिशब्देन वृद्धव्यवहारश्च संगृहीतः। यस्तु देवादिषु मन्त्रादिप्रामाण्ये च विप्रतिपद्यते, तं प्रति लौकिकान्युदाहरणानि दर्शयति—**तन्तुनाभश्चेति।** उक्तदृष्टान्तानां दार्ष्टान्तिकमाह—**एवमिति।** देवादिदृष्टान्तेन विशिष्टस्य हेतोर्न व्यभिचारः, तत्रोपादानांशे चेतनत्वाभावादिति शङ्कते—**स यदीति।** ऊर्णनाभदृष्टान्ते च तुल्यं व्यभिचारनिवारणमित्याह—**तन्तुनाभस्येति।** बलाकादृष्टान्ते

देवादीनां शरीरान्तरादिविभूत्युत्पादन उपादानम्, न तु चेतन आत्मा। तन्तुनाभस्य च क्षुद्रतरजन्तुभक्षणाल्लाला कठिनतामापद्यमाना तन्तुर्भवति। बलाका च स्तनयित्नुरवश्रवणाद् गर्भं धत्ते। पद्मिनी च चेतनप्रयुक्ता सत्यचेतनेनैव शरीरेण सरोन्तरात् सरोन्तरमुपसर्पति, वल्लीव वृक्षम्, न तु स्वयमेवाचेतना सरोन्तरोपसर्पणे व्याप्रियते। तस्मान्नैते ब्रह्मणो दृष्टान्ता इति। तं प्रति ब्रूयात्—नायं दोषः; कुलालादिदृष्टान्तवैलक्षण्यमात्रस्य विवक्षितत्वादिति। यथा हि कुलालादीनां देवादीनां च समाने चेतनत्वे कुलालादयः कार्यारम्भे बाह्यं साधनमपेक्षन्ते, न देवादयः; तथा ब्रह्म चेतनमपि न बाह्यं साधनमपेक्षिष्यत इत्येतावद् वयं देवाद्युदाहरणेन विवक्षामः। तस्माद् यथैकस्य सामर्थ्यं दृष्टं तथा सर्वेषामेव भवितुमर्हतीति नास्त्येकान्त इत्यभिप्रायः।।२५।।

।।इत्यष्टममुपसंहाराधिकरणम्।।

शारीरकन्यायसंग्रहः

९।।कृत्स्नप्रसक्त्यधिकरणम्।।सू. २६-२९।।

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा।।२६।। श्रुतेस्तु शब्दमूलत्वात्।।२७।। आत्मनि चैवं विचित्राश्च हि।।२८।। स्वपक्षदोषाच्च।।२९।। निरवयवस्य ब्रह्मणो विकारासंस्पृष्टतयाऽवस्थानमाकाशाकारेण च परिणामावस्थानं पुनर्व्याकारेण परिणामावस्थानमिति विरुद्धार्थप्रतिपादकानां वाक्यानां परस्परविरोधे सति श्रुतिप्रामाण्यादेव व्यवस्था कर्तव्या, ''उदिते जुहोति'' ''अनुदिते जुहोति,'' ''आहवनीये जुहोति'' ''पदे जुहोति'' इत्यादाविव—इति न्यायेन ''मायां तु प्रकृतिम्'' ''इन्द्रो मायाभिः'' ''नासदासीन्नो सदासीत्'' ''तम आसीत्'' इत्यादिसदसद्विलक्षणानिर्वचनीयप्रपञ्चनिवेदकैर्वाक्यैः परिणामस्याद्वितीयब्रह्मप्रतिपत्तिशेषतया स्वप्नसृष्टिनिदर्शनेन च प्रपञ्चस्य सत्यमिथ्याविभागव्यवस्थया [1]विकारस्पृष्टत्वापरिणामयोरविरोधो दर्शितः।।

प्रकटार्थविवरणम्

संगृहीतत्वात् तद्व्यतिरिक्तं मृद्दार्वाद्यधिष्ठेयं देवादीनां नास्तीत्यनैकान्तिकत्वमिति भावः।। इत्यष्टमनुपसंहाराधिकरणम्।।

न्यायनिर्णयः

चासहायत्वाभावाद् विशिष्टहेतोर्न व्यभिचारोऽस्तीत्याह—**बलाका चेति**। पद्मिनीदृष्टान्तेऽप्यूर्णनाभदृष्टान्तवद् व्यभिचारसमाधिरित्याह—**पद्मिनी चेति**। व्यभिचार-परिहारफलपूर्वोक्तानुमानोपपत्तिमाह—**तस्मादिति**। देवादिदेहस्यापन्नचैतन्यस्यैव देहादिकारणत्वात्र [2]व्यभिचारसमाधिरिति समाधत्ते—**तं प्रतीति**। प्रागुक्तदृष्टान्तानामसंभवोऽयमुच्यते। विवक्षितं वैलक्षण्यमेव स्पष्टयति—**यथा हीति**। सिद्धे व्यभिचारे फलितं सूत्रतात्पर्यमुपसंहरति—**तस्मादिति**। कुलालादेरिव ससहायस्यैव कारणत्वं ब्रह्मणो न शक्यं नियन्तुं देवादिवदसहायस्यापि तदुपपत्तेरिति भावः।।२५।।इत्यष्टममुपसंहाराधिकरणम्।।

---

१. 'विकारास्पृष्टत्वपरिणामयोः' इति पा.।

२. हेतौ चेतनत्वमहंधीविषयत्वरूपं चित्तादात्म्यापन्नदेहसाधारणं ग्राह्यम्। न तु मुख्यमात्मत्वम्। कुलालदृष्टान्ते साधनवैकल्यापत्तेः। असहायत्वं च चेतनस्य स्वातिरिक्तहेतुशून्यत्वम्। तदुभयं देवादिष्वस्तीति व्यभिचारः। देवादिदेहस्य स्वान्तः पातित्वेन स्वातिरिक्तत्वाभावात् उक्तासहायत्वस्य तत्र सत्त्वात्। द्र.रत्न.

९।।कृत्स्नप्रसक्त्यधिकरणम्।।सू. २६-२९।।

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा।।२६।।

चेतनमेकमद्वितीयं ब्रह्म क्षीरादिवद् देवादिवच्चानपेक्ष्य बाह्यं साधनं स्वयं परिणममानं जगतः कारणमिति स्थितम्। शास्त्रार्थपरिशुद्धये तु पुनराक्षिपति। कृत्स्नप्रसक्तिः कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः प्राप्नोति, निरवयवत्वात्। यदि ब्रह्म पृथिव्यादिवत् सावयवमभविष्यत् ततोऽस्यैकदेशः पर्यणंस्यदेकदेशश्चावास्थास्यत। निरवयवं तु ब्रह्म श्रुतिभ्योऽवगम्यते–'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' (श्वे.उ. ६।१९), 'दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः' (मु.उ. २।१।२), 'इदं महद्भूतमनन्तमपारं विज्ञानघन एव' (बृ.उ. २।४।१२), 'स एष नेति नेत्यात्मा' (बृ.उ. ३।९।२६), 'अस्थूलमनणु' (बृ.उ. ३।८।८) इत्याद्याभ्यः सर्वविशेषप्रतिषेधिनीभ्यः। ततश्चैकदेशपरिणामासंभवात्

प्रकटार्थविवरणम्

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा।। सङ्गतिमाह—**चेतनमेकमिति**।। क्षीरदृष्टान्तश्रवणसमुपजातकृत्स्नपरिणामशङ्कापाकरणेन शास्त्रार्थस्य विवर्तवादस्य परिशुद्धये पुनराक्षिपतीत्यर्थः। निरवयवाद् ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः। तस्य–निरवयवस्य चेत्परिणामः, कृत्स्नस्यैव स्यादिति लौकिकन्यायेन विरोधोऽस्त्युत नेति सन्देहे पूर्ववाद्याह—**कृत्स्नप्रसक्तिरिति**।। व्यतिरेकमुखेन विवृणोति—**यदि ब्रह्मेति**।। पर्यणंस्यत् परिणतमभविष्यत्। यदा चापरिणतं मूलभूतं ब्रह्म न विद्यते तदा "आत्मा वा अरे द्रष्टव्यः"

भाष्यभावप्रकाशिका

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा।।२६।। ननु वक्ष्यमाणपूर्वपक्षस्य मायामयत्वेन परिहृतत्वान्नेदमधिकरण-मारम्भणीयमित्याशङ्क्य, अधस्तनाधिकरणे क्षीरादिदृष्टान्तेन परिणामवादस्य शङ्कितत्वात् तन्निराकरणेन विवर्तवादं दृढीकर्तुमयमारम्भ इत्याह—**चेतनमेकमिति**।। परिणामित्वेऽपि पृथिव्यादिवन्निरवयवस्य नैकदेशस्य परिणाम इत्याह—**यदि ब्रह्मेति**।। कला: अवयवाः। निष्कलम् निरवयवम्। अमूर्तत्वादपि निरवयवत्वमाह—**अमूर्त इति**।। सर्वगतत्व-नित्यत्वाभ्यां च निरवयवत्वं सिद्ध्यतीत्याह—**अनन्तमपारमिति**।। परिणामिमूर्तत्वनिषेधाच्च निरवयवत्वमाह—**नेतीति**।। न च—कथं मूलोच्छेदप्रसङ्गः? सुवर्णस्य स्वस्तिकाकारेण कार्त्स्न्येन परिणतस्यापि मूलोच्छेदादर्शनादिति—शङ्कनीयम्, विरुद्धाकारपरिणामे तद्विरुद्धाकारस्य

न्यायनिर्णयः

पूर्वाधिकरणोक्तक्षीरादिदृष्टान्तात् परिणामित्वभ्रमे तन्निराकरणार्थमधिकरणमवतारयन् पूर्वपक्षयति—**कृत्स्नप्रसक्तिरिति**। निरवयवाद् ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः। स किं सावयवस्यैव नानाकार्योपादानतेति न्यायेन विरुध्यते न वेति तदनाभासत्वाभासत्वाभ्यां संदेहे वक्ष्यमाणपूर्वपक्षस्य मायामयत्वेन परिहारादधिकरणानारम्भमाशङ्क्य संगतिमाह—**चेतनमिति**। शास्त्रार्थस्य परिशुद्धिर्नाम परिणामपराकरणेन विवर्तदृढीकरणम्, तदर्थमधिकरणारम्भे प्रथममाक्षेपसूत्रमित्यर्थः। अत्रापि समन्वयस्य न्यायविरोधसमाधानात् पादादिसंगतिचतुष्टयं फलं च द्रष्टव्यम्। यदि क्षीरमिव दध्यात्मना ब्रह्म जगदाकारेण परिणमेत् तदा साकल्येन वा तदेकदेशेन वा? आद्यं प्रत्याह—**कृत्स्नेति**। ततश्च कारणभूतब्रह्माभावे तत्पराधीनस्य कार्यस्यापि सत्त्वायोगान्न किंचिदपि स्यादिति शेषः। द्वितीयं निरस्यति—**यदीति**। ब्रह्मणः सावयवत्वाभावादेकदेशपरिणामानुपपत्तिरित्यर्थः। भवतु तर्हि ब्रह्मणः सावयवत्वं, नेत्याह—**निरवयवं त्विति**। अमूर्तत्वादपि ब्रह्म निरवयवमित्याह—**दिव्यो हीति**। सर्वगतत्वनिरवयवत्वाभ्यां [नित्यत्वाभ्यां] च तन्निरवयवमित्याह—**इदमिति**। आपेक्षिकमानन्त्यं वारयति—**अपारमिति**। विज्ञप्तितावन्मात्रत्वाच्च निरवयवमित्याह—**विज्ञानेति**। मूर्तामूर्तद्वैतनिषेधाच्च तथेत्याह—**स एष इति**। न हि ब्रह्मणः सावयवत्वमुपादानत्वेऽपि सुवर्णादिवत् प्रत्तिपत्तुं शक्यं श्रुतिविरोधादित्यर्थः। द्वितीयविकल्पासंभवे प्रथमविकल्पप्राप्तौ फलितमाह—**ततश्चेति**। कृत्स्नपरिणामपक्षे दोषान्तरमाह—

कृत्स्नपरिणामप्रसक्तौ सत्यां मूलोच्छेदः प्रसज्येत। द्रष्टव्यतोपदेशानर्थक्यं चापद्येत[1], अयत्नदृष्टत्वात् कार्यस्य, तद्व्यतिरिक्तस्य च ब्रह्मणोऽसंभवात्। अजत्वादिशब्दकोपश्च[2]। अथैतद्दोषपरिजिहीर्षया सावयवमेव ब्रह्माभ्युपगम्येत, तथापि ये निरवयवत्वस्य प्रतिपादकाः शब्दा उदाहृतास्ते प्रकुप्येयुः। सावयवत्वे चानित्यत्वप्रसङ्ग इति। सर्वथाऽयं पक्षो न घटयितुं शक्यत इत्याक्षिपति।।२६।।

श्रुतेस्तु शब्दमूलत्वात्।।२७।।

तुशब्देनाक्षेपं परिहरति। न खल्वस्मत्पक्षे कश्चिदपि दोषोऽस्ति। न तावत् कृत्स्नप्रसक्तिरस्ति। कुतः? श्रुतेः। यथैव हि ब्रह्मणो जगदुत्पत्तिः श्रूयत एवं विकारव्यतिरेकेणापि ब्रह्मणोऽवस्थानं श्रूयते, प्रकृतिविकारयोर्भेदेन व्यपदेशात् 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छा.उ. ६।३।२) इति, 'तावानस्य महिमा ततो ज्यायांश्च पूरुषः। पादोऽस्य सर्वा

प्रकटार्थविवरणम्

इत्याद्युपदेशोऽनर्थकः स्यादित्याह—**द्रष्टव्यतेति**।। "अज आत्मा महान् ध्रुवः" इत्यादिशब्दानामपि प्रामाण्यहानिः स्यात्, ब्रह्मणः कार्यमात्रत्वे सतीत्याह—**अजत्वादीति**।। "निरवयवत्वशब्दकोपो वा" इति सूत्रभागमवतारयति—**अथैतद्दोषेत्यादिना**।।

श्रुतेस्तु शब्दमूलत्वात्।। सिद्धान्तसूत्रं व्याचष्टे—**तुशब्देनेत्यादिना**।। कृत्स्नस्यैव तावत् ब्रह्मणः कार्यभावापत्तिर्नास्ति,

भाष्यभावप्रकाशिका

स्वस्तिकस्येव रुचकाकारपरिणामे सत्युच्छेदो यतः प्रसज्यते; ज्ञानानन्दादिरूपस्य ब्रह्मणो जडदुःखादिरूपप्रपञ्चाकारपरिणामस्य विरुद्धत्वादिति भावः। कृत्स्नपरिणामे दोषान्तरमाह—**द्रष्टव्यतेति**।। परिणतं ब्रह्म द्रष्टव्यम्, उत तद्व्यतिरिक्तमिति विकल्प्य यथाक्रमं दूषणमाह—**अयत्नदृष्टत्वादित्यादिना**।। कृत्स्नस्य कार्यात्मना जन्माभ्युपगमेन "न जायत" इत्यादिश्रुतिविरोध इत्याह—**अजत्वादीति**।। न केवलं श्रुतिविरोधः, न्यायविरोधश्च स्यादित्याह—**सावयवत्वे चेति**।।२६।।

श्रुतेस्तु शब्दमूलत्वात्।।२७।। प्रथमं परिणामवादालम्बनेन सूत्रं योजयति—**तुशब्देनेत्यादिना**।। विरुद्धाकारपरिणामे सति तद्विरुद्धस्योच्छेदाद् द्रष्टव्य इत्यादिव्यपदेशोऽनर्थक इत्येषोऽपि दोषो न प्रसज्यत इत्याह—**एवं विकारेति**।। व्याकार्यव्याकर्तृत्वेन भेदं दर्शयति—**सेयं देवतेति**।। अविकृतरूपेणावस्थानश्रवणादप्येवमित्याह—**तावानिति**।। सर्वस्य विकृतत्वे सर्वायतनत्वाद्

न्यायनिर्णयः

द्रष्टव्यतेति। ब्रह्मणो द्रष्टव्यत्वसंभवात् कुतस्तदुपदेशानर्थक्यमित्याशङ्क्य परिणतं वा ब्रह्म तदतिरिक्तं वा द्रष्टव्यमिति विकल्प्याद्ये दोषमाह—**अयत्नेति**। द्वितीयं दूषयति—**तद्व्यतिरिक्तस्येति**। किंच ब्रह्मणः साकल्येन कार्यात्मना जन्माभ्युपगमे 'न जायते म्रियते वा' इत्यादिश्रुतिस्मृतिविरोधः स्यादित्याह—**अजत्वादीति**। प्रथमपक्षदूषणं संक्षेपविस्तराभ्यामुक्त्वा द्वितीयपक्षदूषणं संक्षिप्तं विवृणोति—**अथेत्यादिना**। न केवलं शब्दविरोधो न्यायविरोधश्चेत्याह—**सावयवत्वे चेति**। पूर्वपक्षमुपसंहरति—**सर्वथेति**।।२६।।

सिद्धान्तसूत्रमादत्ते—**श्रुतेरिति**। परिणामवादमेवाश्रित्य प्रथमं व्याचष्टे—**तुशब्देनेति**। परिहारमेवाभिनयति—**न खल्विति**। यदुक्तं ब्रह्मणो जगदाकारेण परिणामे कृत्स्नप्रसक्तिरिति, तत्राह—**न तावदिति**। निरवयवं ब्रह्म परिणमते च, न च कृत्स्नमिति कुतः संभावनेति पृच्छति—**कुत इति**। श्रौतेऽर्थे नासंभावनेति परिहरति—**श्रुतेरिति**। यत्तु ब्रह्मणो विरुद्धाकारेण परिणामे मूलोच्छेदाद् द्रष्टव्यतोपदेशानर्थक्यमिति तत् परिहरन् हेतुं विवृणोति—**यथेति**। विकारातिरेकेण स्थितं ब्रह्मेति श्रुतिरश्रुता, तत्कुतस्तथाविधं ब्रह्माधिकृत्य द्रष्टव्यतोपदेशस्यार्थवत्तेत्याशङ्क्याह—**प्रकृतीति**। तत्र द्रष्टृद्रष्टव्यत्वेन, प्रवेष्टृप्रवेष्टव्यत्वेन व्याकर्तृव्याकार्यत्वेन च भेदव्यपदेशं दर्शयति—**सेयमिति**। व्याप्यव्यापकत्वेनापि भेदव्यपदेशोऽस्तीत्याह—**तावानिति**। अंशांशित्वेनापि भेदव्यपदेशमुदाहरति—

१. 'आपन्नम्' इति पा.। २. 'व्याकोपश्च' इति पा.।

भूतानि त्रिपादस्यामृतं दिवि' (छा.उ. ३।१२।६) इति चैवंजातीयकात्। तथा हृदयायतनत्ववचनात् सत्संपत्तिवचनाच्च। यदि च कृत्स्नं ब्रह्म कार्यभावेनोपयुक्तं स्यात् 'सता सोम्य तदा संपन्नो भवति' (छा.उ. ६।८।१) इति सुषुप्तिगतं विशेषणमनुपपन्नं स्यात्। विकृतेन ब्रह्मणा नित्यसंपन्नत्वादविकृतस्य च ब्रह्मणोऽभावात्। तथेन्द्रियगोचरत्वप्रतिषेधाद् ब्रह्मणो विकारस्य चेन्द्रियगोचरत्वोपपत्तेः। तस्मादस्त्यविकृतं ब्रह्म। न च निरवयवत्वशब्दकोपोऽस्ति, श्रूयमाणत्वादेव निरवयवत्वस्याप्यभ्युपगम्यमानत्वात्। शब्दमूलं च ब्रह्म शब्दप्रमाणकम्, नेन्द्रियादिप्रमाणकम्, तद् यथाशब्दमभ्युपगन्तव्यम्। शब्दश्चोभयमपि ब्रह्मणः प्रतिपादयत्यकृत्स्नप्रसक्तिं निरवयवत्वं च। लौकिकानामपि मणिमन्त्रौषधिप्रभृतीनां देशकालनिमित्त-वैचित्र्यवशाच्छक्तयो विरुद्धानेककार्यविषया दृश्यन्ते। ता अपि तावन्नोपदेशमन्तरेण केवलेन तर्केणावगन्तुं शक्यन्ते—अस्य वस्तुन एतावत्य एतत्सहाया एतद्विषया एतत्प्रयोजनाश्च शक्तय इति। किमुताचिन्त्यस्वभावस्य

प्रकटार्थविवरणम्

विकाराद् भेदेन स्वरूपसद्भावश्रवणादित्यर्थः। इतश्च कृत्स्नस्य कार्यभावापत्तिर्नास्तीत्याह—**तथेति**।। लिङ्गान्तरमाह—**तथेन्द्रियेति**।। "यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह" इत्यादिना वागिन्द्रियगोचरत्वप्रतिषेधोऽपि न सङ्गच्छेत, कार्यमात्रं चेद् ब्रह्मेत्यर्थः। यस्माच्छ्रुतिलिङ्गेभ्यो न तस्य कार्यभावापत्तिः तस्मादस्त्यविकृतं ब्रह्म; यथा तस्य कार्यापत्तिर्निर्वहति तथा सावयवत्वमभ्युपगन्तव्यमिति भावः। ननु सावयवत्वे निरवयवत्वशब्दाप्रामाण्यं दर्शितमित्याशङ्क्याह—**न चेति**।। निरवयवत्वाविरोध्येव सावयवत्वमिष्टमिति भावः। ननु निरवयवत्वाविरोधि सावयवत्वं क्वाप्यदृष्टं; कथं प्रतिपत्तुं शक्यमित्याशङ्क्याह—**शब्दमूलं चेति**।। किंपुनर्न्यायमाह—**लौकिकानामपीति**।। प्रकृतिभ्यः प्रत्यक्षदृष्टपदार्थस्वभावेभ्यः परं विलक्षणं यदाचार्याद्युपदेशगम्यं तदचिन्त्यमुच्यत इत्यर्थः। इदानीं

भाष्यभावप्रकाशिका

विशेषेण हृदयायनतत्वं न कथ्येत, कथ्यते च, तेनाविकृतस्यैव हृद्यवस्थानं गम्यत इत्याह—**तथा हृदयेति**।। सत्सम्पत्तिवचनादप्यविकृतमस्तीति दर्शयति—**सत्संपत्तीति**।। तत् प्रपञ्चयति—**यदि चेति**।। इन्द्रियगोचरत्वनिषेधादप्येवमवगम्यत इत्याह—**तथेन्द्रियेति**।। ननु विरुद्धोऽर्थः कथं प्रत्याय्यत इति? अत आह—**शब्दमूलमिति**।। स्वरूपेण प्रत्यक्षादिसिद्धानामपि यत्र शक्तयस्तर्कागोचराः, तत्र किमु वक्तव्यम् शब्दैकगम्यस्य तर्कागोचरत्वमित्याह—**लौकिकानामपीति**।।

न्यायनिर्णयः

पादोऽस्येति। इतश्चाविकृतमस्ति ब्रह्मेत्याह—**त्रिपादिति**। अविकृतब्रह्मास्तित्वे हेत्वन्तरमाह—**तथेति**। सर्वस्य ब्रह्मणो विकारात्मना समाप्तौ सर्वायतनत्वाद्विशेषेण हृदयायतनत्वं 'हृद्यन्तर्ज्योतिः' इत्यादिना नोच्येत, तद्वचनादविकृतस्यैव हृद्यवस्थानसिद्धेस्तदस्तीतितेत्यर्थः। अस्त्यविकृतं ब्रह्मेत्यत्र हेत्वन्तरमाह—**सदिति**। सुषुप्तौ जीवस्य सत्संपत्तिश्रुतिमात्रेण कथमविकृतमस्ति ब्रह्मेत्याशङ्क्याह—**यदि चेति**। कुतो विशेषणानुपपत्तिरित्याशङ्क्य विकृतेनाविकृतेन वा ब्रह्मण संपत्तिः सुषुप्ताविष्टेति विकल्प्य क्रमेण दूषयन्ननुपपत्तिं प्रकटयति—**विकृतेनेत्यादिना**। किंच विकारस्येन्द्रियगोचरत्वात् 'न चक्षुषा गृह्यते नापि वाचा' इत्यादिना ब्रह्मणस्तद्गोचरत्वनिषेधात्तदस्ति विकारातिरिक्तमित्याह—**तथेति**। यत्तु परिणामित्वे ब्रह्मणो निरवयत्वशब्दकोपः स्यादिति, तत्राह—**न चेति**। श्रुत्याऽपि कथं विरुद्धोऽर्थः समर्प्यते, तस्याः स्वार्थप्रतिपादनस्याविरोधसापेक्षत्वादित्याशङ्क्याह—**शब्देति**। ब्रह्मणः शब्दप्रमाणकत्वाद् यथाशब्दमिष्टत्वेऽपि कथमकृत्स्नपरिणामनिरवयवत्वयोरुपपत्तिः, तत्राह—**शब्दश्चेति**। तत्राकृत्स्नप्रसक्तौ भेदव्यपदेशश्रुतिरुक्ता, निरवयवत्वे तु श्रुतिरुदाहृता पूर्वपक्षे। ननु निरवयवत्वपरिणामित्वे नैकाधिकरणे सिध्यतो मिथोविरुद्धत्वादौष्ण्यशैत्यवदित्याशङ्क्य श्रुतिविरोधान्नैवमिति मत्वा कैमुतिकन्यायमाह—**लौकिकानामपीति**। स्वरूपेण प्रत्यक्षादिसिद्धानामपि यत्र शक्तयस्तर्कागोचरास्तत्र किमु वक्तव्यं शब्दैकगम्यस्य तर्कागोचरत्वमित्यर्थः। उक्तेऽर्थे स्मृतिं संवादयति—**तथा चेति**। अचिन्त्यानां भावानामचिन्त्यत्वादेव तर्कायोग्यत्वेऽपि

ब्रह्मणो रूपं विना शब्देन न निरूप्येत। तथा चाहुः पौराणिकाः–'अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्। प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम्।।' इति। तस्माच्छब्दमूल एवातीन्द्रियार्थयाथात्म्याधिगमः।

ननु शब्देनापि न शक्यते विरुद्धोऽर्थः प्रत्याययितुम्–निरवयवं च ब्रह्म परिणमते, न च कृत्स्नमिति। यदि निरवयवं ब्रह्म स्यान्नैव परिणमेत। कृत्स्नमेव वा परिणमेत। अथ केनचिद्रूपेण परिणमेत केनचिच्चावतिष्ठेतेति, रूपभेदकल्पनात् सावयवमेव प्रसज्येत। क्रियाविषये हि 'अतिरात्रे षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं गृह्णाति' इत्येवजातीयकायां विरोधप्रतीतावपि विकल्पाश्रयणं विरोधपरिहारकारणं भवति, पुरुषतन्त्रत्वाच्चानुष्ठानस्य। इह तु विकल्पाश्रयणेनापि न विरोधपरिहारः संभवत्यपुरुषतन्त्रत्वाद् वस्तुनः। तस्माद् दुर्घटमेतदिति। नैष दोषः। अविद्याकल्पितरूपभेदाभ्युपगमात्। न ह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु संपद्यते। न हि तिमिरोपहतनयनेनानेक इव चन्द्रमा दृश्यमानोऽनेक एव भवति।

प्रकटार्थविवरणम्

निरवयवत्वाविरोधि यत् सावयवत्वं शब्दैकसमधिगम्यं तत् स्फुटीकर्तुं चोद्यमुद्भावयति—**ननु शब्देनापीति**।। परिहरति—**नैष दोष इति**।। अविद्यात्मना जाड्यरूपेण कल्पितस्य स्वीकृतस्य रूपविशेषस्य मायाविलक्षणस्य ब्रह्मणोऽभ्युपगमात् तत्कृतं सावयवत्वमित्यर्थः।। यच्चोक्तं स्वीकृतं चेत् सावयवत्वं तर्हि निरवयवत्वव्याघात इति, तत्राह—**न ह्यविद्याकल्पितेनेति**। मिथ्या-

भाष्यभावप्रकाशिका

आकाङ्क्षासंनिधियोग्यतावशाच्छब्दोऽर्थं बोधयति, तेषामभावान्न शब्दस्यापि तथाविधार्थबोधकत्वसंभव इत्येकदेशिव्याख्यान-माक्षिपति—**ननु शब्देनेति**।। विरोधं दर्शयति—**निरवयवं चेति**।। एकस्मिन्नपि परिणामापरिणामावविरुद्धौ षोडशिग्रहणाग्रहणवत् स्यातामित्याशङ्क्याह—**क्रियाविषय इति**।। निरवयवस्य ब्रह्मणो विकारास्पृष्टतयाऽवस्थानस्याकाशाद्याकारेण परिणामस्य च श्रूयमाणस्य परस्परविरोधे सति व्यवस्थाया "उदिते जुहोति" "अनुदिते जुहोति" इतिवदभ्युपगन्तव्यत्वात् तात्त्विकं विकारा-स्पृष्टत्वम्, "मायां तु प्रकृतिं विद्याद्" इत्यादिश्रुतिप्रतिपन्नमायाकृतं च परिणामित्वं स्वीकर्तव्यमिति परिहरति—**अविद्याकल्पितेति**।। ननु रूपभेदाभ्युपगमात् सावयवत्वं स्यादिति, अत आह—**न ह्यविद्येति**।। तदेव दृष्टान्तेनोपपादयति—**न हि तिमिरेति**।। ननु

न्यायनिर्णयः

किं तदचिन्त्यमित्यपेक्षायामाह—**प्रकृतिभ्य इति**। प्रत्यक्षदृष्टपदार्थस्वभावेभ्यो यत्परं विलक्षणमाचार्याद्युपदेशगम्यं तदचिन्त्यमित्यर्थः। शब्दमूलं चेत्यादिना शब्दमूलत्वादित्येतद् व्याख्याय शब्दैकसमधिगम्यस्य ब्रह्मणस्तर्कागोचरत्वे फलितमाह—**तस्मादिति**।

आकाङ्क्षादिवशेन शब्दस्यार्थप्रत्यायकत्वाद् विरुद्धार्थप्रत्यायने चाकाङ्क्षाद्यभावान्न शब्दस्यापि तथाविधार्थबोधकतेत्येक-देशिव्याख्यानमाक्षिपति—**नन्विति**। विरोधमेव दर्शयति—**निरवयवं चेति**। कथमयमर्थो विरुध्यते, न हि प्रमाणसिद्धं विरुद्धमुप-यन्तीत्याशङ्क्य विरोधं प्रपञ्चयति—**यदीति**। सावयवेष्वेव क्षीरादिषु परिणामदृष्टेरित्यर्थः। विपक्षे कृत्स्नप्रसक्तितादवस्थ्यमित्याह—**कृत्स्नमेवेति**। यदि कथंचित् कृत्स्नप्रसक्तिः समाधीयते तदा निरवयवशब्दकोपः स्यादित्याशयवानाह—**अथेति**। एकत्रापि परिणामापरिणामौ षोडशिग्रहणाग्रहणवदविरुद्धावित्याशङ्क्याह—**क्रियेति**। **इहेति**। ब्रह्मणि परिणामापरिणामयोरित्यर्थः। परिणामादिविषयो वस्तुशब्दः। स्वयूथ्यो व्याख्यानस्यानुपपन्नत्वमुपसंहरति—**तस्मादिति**। विवर्तवादमादाय सिद्धान्ती परिहरति—**नैष दोष इति**। निरवयवस्य ब्रह्मणो विकारास्पृष्टतयाऽवस्थानस्य विकारात्मना परिणामस्य च श्रूयमाणस्य मिथो विरोधे तात्त्विकं विकारास्पृष्टत्वं मायिकं च परिणामित्वमिति व्यवस्थायां नास्ति दौस्थ्यमित्यर्थः। रूपभेदमभ्युपगच्छतस्ततसावयवत्वं दुर्वारमित्याशङ्क्याह—**न हीति**। तदेव दृष्टान्तेन स्पष्टयति—**न हि तिमिरेति**। नामरूपभेदश्चेदविद्याकृतस्तर्हि ब्रह्मणो न कारणत्वमविद्याया एव तद्भावादित्याशङ्क्याह—

अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते। पारमार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणतमवतिष्ठते। वाचारम्भणमात्रत्वाच्चाविद्याकल्पितस्य नामरूपभेदस्येति न निरवयवत्वं ब्रह्मणः कुप्यति। न चेयं परिणामश्रुतिः परिणामप्रतिपादनार्था, तत्प्रतिपत्तौ फलानवगमात्। सर्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था त्वेषा, तत्प्रतिपत्तौ फलावगमात्। 'स एष नेति नेत्यात्मा' इत्युपक्रम्याह–'अभयं वै जनक प्राप्तोऽसि' (बृ.उ. ४।२।४) इति। तस्मादस्मत्पक्षे न कश्चिदपि दोषप्रसङ्गोऽस्ति।।२७।।

आत्मनि चैवं विचित्राश्च हि।।२८।।

अपि च नैवात्र विवदितव्यं कथमेकस्मिन् ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः स्यादिति। यत आत्मन्यप्येकस्मिन् स्वप्नदृशि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः पठ्यते–'न तत्र रथा न रथयोगा न

प्रकटार्थविवरणम्

सावयवत्वेन किं सिद्धमित्याशङ्क्याह—**अविद्याकल्पितेन चेति**।। ननु मायासंबन्धोऽपि निरवयवस्य न घटते। अतः संबन्धमभ्युपगच्छतो निरवयवत्वव्याघात इत्याशङ्क्याह—**वाचारम्भणमात्रत्वाच्चेति**।। मायारूपस्यानिर्वाच्यत्वात्तत्संबन्धोऽप्यनिर्वाच्यो न वस्तुनो निरवयवत्वं निरुणद्धीति भावः। ननु परिणामश्रुतिप्रामाण्यान्निरवयवस्यैव शक्तिवशादकृत्स्नपरिणामित्वं किं न स्यात्? किं मिथ्यासावयवत्वपरिकल्पनेनेत्याशङ्क्याह— **न चेयं परिणामश्रुतिरिति**।। परिणामस्याद्वितीयब्रह्मशेषत्वात् "नासदासीन्नो सदासीत्" "तम आसीत्" इत्यादिसदसद्विलक्षणप्रपञ्चसमर्पकवाक्यैश्च सत्यमिथ्याविभागाङ्गीकरणेनैवाविरोध इति भावः।।

आत्मनि चैवं विचित्राश्च हि।। स्वप्नदृष्टिनिदर्शनेनापि विवर्तवाद एवाभ्युपगन्तव्य इत्याह—**अपि चेत्यादिना**।।

भाष्यभावप्रकाशिका

तस्याविद्याया एव कारणत्वाद् न ब्रह्मणः कारणत्वमिति, तत्राह—**अविद्याकल्पितेन चेति**।। ननु नामरूपभेदसिद्धौ कारणत्वसिद्धिः, तत्सिद्धौ च तद्भेदसिद्धिरिति, अत आह—**व्याकृताव्याकृतात्मकेनेति**।। ननु अस्मिन्नपि पक्षे पूर्वरूपनिवृत्तिः स्याद् विरुद्धाकारप्राप्तावित्याशङ्क्याह—**तत्त्वान्यत्वाभ्यामिति**।। अनिर्वचनीयरजताद्याकारापत्तौ शुक्त्यादेरन्यथात्वादर्शनाद्, ब्रह्मणोऽपि तद्वद् न स्यादिति भावः।। मायाविवच्च विरुद्धानेकाकारपरिणामोऽपि न विरुध्यत इत्याह—**सर्वव्यवहारास्पदत्वमिति**।। सृष्टेः प्रतिपाद्यत्वमङ्गीकृत्यैतदवोचाम, प्रतिपाद्यत्वमेव तु नास्ति; ब्रह्मात्मैकत्वप्रतिपादनपरतया सृष्टिवाक्यानां स्वशेषिविरोधित्वासंभवादित्याह—**न चेयमिति**।। कथं फलावगम इति? तदाह—**शराव [स एष] इति**।।२७।।

न्यायनिर्णयः

अविद्येति। नामरूपभेदसिद्धौ कारणत्वसिद्धिस्तत्सिद्धौ च नामरूपभेदसिद्धिरित्यन्योन्याश्रयतेत्याशङ्क्याह—**व्याकृतेति**। विवर्तवादेऽपि विरुद्धाकारप्राप्तौ पूर्वरूपनिवृत्तेस्तुल्या मूलोच्छित्तिरित्याशङ्क्यानिर्वाच्यरजताकारापत्तौ शुक्तिकादेरन्यथात्वादर्शनाद् ब्रह्मणोऽपि कल्पिताकारापत्तौ पूर्वरूपानिवृत्तेर्मैवमित्याह—**तत्त्वेति**। ब्रह्मणो मायाविवन्मायया सर्वव्यवहारास्पदत्वेऽपि कुतोऽस्यापरिणामित्वादिसिद्धिरित्याशङ्क्याह—**पारमार्थिकेनेति**। एवं कृत्स्नप्रसक्तिं निराकृत्य निरवयवत्वशब्दकोपं निराकरोति—**वाचारम्भणेति**। प्रतिपाद्यत्वं सृष्टेरभ्युपेत्यैतदुक्तम्। तदेव नास्तीत्याह—**न चेति**। किंपरा तर्हीयं श्रुतिरित्याशङ्क्याह—**सर्वेति**। ब्रह्मात्मैक्यप्रतिपादनपरतया सृष्टिवाक्यानां स्वशेषिविरोधित्वायोगान्नास्ति सृष्टौ तात्पर्यमित्यर्थः। ब्रह्मात्मप्रतिपत्तौ फलावगतिमुदाहरति—**स एष इति**। विवर्तवादे दोषाभावमुपसंहरति—**तस्मादिति**।।२७।।

उक्तं विवर्तवादं सूत्रकाराभिप्रेतत्वेन स्पष्टयति—**आत्मनीति**। सूत्रार्थं विवृण्वन् दृष्टान्तसद्भावाद् विवर्तवादे विवादो नास्तीत्याह—***अपि चेति***। विवादस्याकर्तव्यत्वे हेतुमाह—**यत इति**। दृष्टान्तदार्ष्टान्तिकयोरेकार्थत्वं विशिनष्टि—**स्वप्नदृशीति**।

पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते' (बृ.उ. ४।३।१०) इत्यादिना। लोकेऽपि देवादिषु मायाव्यादिषु च स्वरूपानुपमर्देनैव विचित्रा हस्त्यश्वादिसृष्टयो दृश्यन्ते। तथैकस्मिन्नपि ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिर्भविष्यतीति।।२८।।

स्वपक्षदोषाच्च।।२९।।

परेषामप्येष समानः स्वपक्षे दोषः। प्रधानवादिनोऽपि हि निरवयवमपरिच्छिन्नं शब्दादिहीनं प्रधानं सावयवस्य परिच्छिन्नस्य शब्दादिमतः कार्यस्य कारणमिति स्वपक्षः। तत्रापि कृत्स्नप्रसक्तिर्निरवयवत्वात् प्रधानस्य प्राप्नोति, निरवयवत्वाभ्युपगमकोपो वा। ननु नैव तैर्निरवयवं प्रधानमभ्युपगम्यते, सत्त्वरजस्तमांसि त्रयो गुणा नित्यास्तेषां साम्यावस्था प्रधानम्, तैरेवावयवैस्तत्सावयवमिति। नैवंजातीयकेन सावयवत्वेन प्रकृतो दोषः परिहर्तुं पार्यते। यतः सत्त्वरजस्तमसामप्येकैकस्य समानं निरवयवत्वम्। एकैकमेव

प्रकटार्थविवरणम्

स्वपक्षदोषाच्च।। किञ्च कृत्स्नप्रसक्त्यादिचोद्यं न सांख्यादिभिः कर्तुं शक्यमित्याह—**परेषामपीत्यादिना**।। ननु 'त्वं चोरः'

भाष्यभावप्रकाशिका

आत्मनि चैवं विचित्राश्च हि।।२८।। ननु स्वप्नस्य स्मृतिरूपत्वाद् विरुद्धा सृष्टिरेव तत्र नास्ति, येनायं दृष्टान्तः स्यादिति, अत्राह—**सृष्टिः पठ्यत इति**।। अपरोक्षत्वाच्च स्वप्नस्य स्मृतिरूपत्वं न संभवतीति भावः।। हिशब्दसूचितमर्थं दर्शयति—**लोकेऽपीति**।।२८।।

स्वपक्षदोषाच्च।।२९।। परपक्षे दोषं दर्शयितुं परपक्षमनुवदति—**प्रधानवादिनोऽपीति**।। ननु एतावता कथं सावयवत्वमिति? तत्राह—**नैवेति[तैरेवेति]**।। परिहरति—**नैवञ्जातीयकेनेति**।। यद्यपि समुदायः सावयवः, तथापि प्रत्येकं सत्त्वादयो निरवयवाः, अतः प्रत्येकमनवयवानां परिणामाभ्युपगमात् कृत्स्नपरिणामे मूलोच्छेदः, एकदेशपरिणामे च सावयवत्वमनिष्टं प्राप्नोत्येवेत्यर्थः। भवतु तर्हि संभूयैव परिणाम इति, तत्राह—**एकैकमेव चेति**।। तथा सति कार्यवैषम्यं न स्यादिति भावः।।

न्यायनिर्णयः

स्वप्नस्य स्मृतित्वाभ्युपगमाद् विरुद्धा सृष्टिरेव तत्र नास्तीति कुतोऽस्य दृष्टान्ततेत्याशङ्क्यापरोक्षतया स्वप्नस्यास्मृतित्वमभिप्रेत्याह—**पठ्यत इति**। स्वप्ने रथादीनामभावे कथं तत्प्रथेत्याशङ्क्याह—**अथेति**। आत्मनि चेति व्याख्याय विचित्राश्च हीति व्याचष्टे—**लोकेऽपीति**। एवमिति सूत्रपदं व्याकुर्वन् दार्ष्टान्तिकमाह—**तथेति**। इतिशब्दो विवर्तवादसमाप्त्यर्थः।।२८।।

'यश्चोभयोः' इति न्यायेन कृत्स्नप्रसक्त्यादीनामनुद्भाव्यत्वं दर्शयति—**स्वपक्षेति**। सूत्राक्षराणि व्याचष्टे—**परेषामिति**। तथा च ब्रह्मवादिनि विशेषेणानुद्भाव्यतेति शेषः। तत्र प्रधानवादे दोषसाम्यं वक्तुं तत्पक्षमनुभाषते—**प्रधानेति**। दोषसाम्यमधुना दर्शयति—**तत्रापीति**। प्रधानं हि महदाद्याकारेण परिणममानं साकल्येन वा परिणमत एकदेशेन वा? प्रथमे निरवयवत्वात् प्रधानस्य कृत्स्नस्यैव कार्याकारेण परिणतत्वादवशिष्टस्याभावात् तदाश्रितस्य कार्यस्याप्ययोगात् कार्यं कारणं चेत्युभयमपि समुच्छिद्येत। द्वितीये प्रधानस्य निरवयवत्वस्वीकारो विरुध्येतेत्यर्थः। दोषद्वयं परिहर्तुं शङ्कते—**नन्विति**। निरवयवत्वानुपगमं स्फुटयितुं प्रधानस्वरूपमनुवदति—**सत्त्वेति**। कथमेतावता निरवयवत्वानभ्युपगमः, तत्राह—**तैरिति**। सावयवत्वे च प्रधानस्यैकदेशेन परिणामोऽवस्थानं चैकदेशेनेत्यङ्गीकारान्न कृत्स्नप्रसक्त्यादिदोषावकाशोऽस्तीत्यर्थः। उक्तं सावयवत्वमङ्गीकृत्य परिहरति—**नेत्यादिना**। तत्र हेतुमाह—**यत इति**। समुदायस्य सावयवत्वेऽपि प्रत्येकं सत्त्वादीनां निरवयवत्वात् तेषां च परिणामस्वीकारात् कृत्स्नपरिणामे मूलोच्छित्तिरेकदेशपरिणामे सावयवत्वम्। अतो दोषद्वयं प्रधानवादे दुर्वारमित्यर्थः। संभूय सत्त्वादीनां परिणामपरिग्रहान्न दोषद्वयमित्याशङ्क्याह—**एकैकमेवेति**। समुदायस्यैव परिणामित्वे कार्यवैषम्यासिद्धिरिति भावः। एवं प्रधानवादे कृत्स्नप्रसक्त्यादिदोषसाम्यात्र

चेतरद्वयानुगृहीतं सजातीयस्य प्रपञ्चस्योपादानमिति समानत्वात् स्वपक्षदोषप्रसङ्गस्य। तर्काप्रतिष्ठानात् सावयवत्वमेवेति चेत्। एवमप्यनित्यत्वादिदोषप्रसङ्गः। अथ शक्तय एव कार्यवैचित्र्यसूचिता अवयवा इत्यभिप्रायः; तास्तु ब्रह्मवादिनोऽप्यविशिष्टाः। तथाऽणुवादिनोऽप्यणुरणवन्तरेण संयुज्यमानो निरवयवत्वाद् यदि कात्स्न्येंन संयुज्येत, ततः प्रथिमानुपपत्तेरणुमात्रत्वप्रसङ्गः; अथैकदेशेन संयुज्येत तथापि निरवयवत्वाभ्युपगमकोप इति स्वपक्षेऽपि समान एष दोषः। समानत्वाच्च नान्यतरस्मिन्नेव पक्ष उपक्षेप्तव्यो भवति। परिहृतस्तु ब्रह्मवादिना स्वपक्षे दोषः।।२९।।

।।इति नवमं कृत्स्नप्रसक्त्यधिकरणम्।।

प्रकटार्थविवरणम्

इत्युक्ते 'त्वमपि चोरः' इतिवन्मतानुज्ञालक्षणं निग्रहस्थानमित्याह—**परिहृतं तु [तस्तु] ब्रह्मवादिनेति**।। यः स्वपक्षे मनागपि दोषं

भाष्यभावप्रकाशिका

निरवयवत्वापादनतर्कस्याप्रतिष्ठितत्वात् सावयवत्वमित्याशङ्कते—**तर्केति**।। ननु घटादीनां यादृशं सावयवत्वं द्रव्यावयवत्वेन, तादृशं नेष्यते, येनानित्यत्वं प्रसज्येत, प्रकारान्तरेण त्वनेकधर्मवत्तया सावयवत्वमित्याशङ्कते—**अथ शक्तय इति**।। **तथाऽणुवादिनोऽपीति**।। द्वाभ्यामणुभ्यां संयुज्य द्व्यणुकमारभ्यते, त्रिभिर्द्व्यणुकैस्त्र्यणुकमारभ्यत इति प्रक्रिया। तत्रानवयव-परमाणुनिष्ठसंयोगस्याव्याप्यवृत्त्यसंभवात् कात्स्न्येंन वृत्तिरङ्गीकर्तव्या। तथा चोपर्यधःपार्श्वस्थाः षडपि परमाणवःसमानदेशा इति प्रथिमानुपपत्तेरणुमात्रः पिण्डः प्रसज्येतेत्यर्थः। अव्यापने च षडवयवः परमाणुः स्यादिति अनवयवत्वव्याकोपः। सावयवत्वे च परमाणोरनन्तावयवकत्वेन मेरुसर्षपयोः समानपरिमाणत्वप्रसङ्ग इत्यभिप्रेत्याह—**अथैकदेशेनेति**।। ननु त्वं चोर इत्युक्ते त्वमपि चोर इत्येतावता यथा स्वदोषः परिहृतो न भवति, तथा स्वस्य दोषोद्भावने परपक्षदोषोद्भावनेन स परिहृतो न भवतीति, अत आह—**समानत्वादिति**।। तस्य यः परिहारः, स एव नः परिहार इत्यर्थः। आपातमात्रेण साम्यमापादितम्, परमार्थतस्तु तात्त्विकं परिणाममङ्गीकुर्वतां तेषामेव दोषः, न त्वस्माकं मायावादिनामित्याह—**परिहृतस्त्विति**।।२९।। इति नवमं कृत्स्नप्रसक्त्यधिकरणम्।।

न्यायनिर्णयः

तेन ब्रह्मवादिनि तदुद्भावनीयमित्युपसंहरति—**समानत्वादिति**। तर्काप्रतिष्ठानन्यायेन निरवयवत्वापादकतर्कस्याप्रतिष्ठानत्वात् प्रधानस्य सावयवत्वमेवेति शङ्कते—**तर्केति**। अभ्युपेतहानमपिना सूचयन् दूषयति—**एवमपीति**। आदिशब्देन घटादिवन्मूल-कारणत्वासंभवोऽपि गृहीतः। घटादीनामिव द्रव्यावयवत्वेन प्रधानस्य सावयवत्वानभ्युपगमादनेकधर्मवत्तया तदङ्गीकारान्ना-नित्यत्वादिदोषप्रसक्तिरित्याह—**अथेति**। ब्रह्मणोऽपि कार्यवैचित्र्यसूचितविचित्रशक्तिरूपावयवोपगमादुक्तदोषसमाधिरित्याह—**ता इति**। प्रधानवादिनो दोषसाम्यमुक्त्वा परमाणुवादिनोऽपि तत्साम्यमाह—**तथेति**। अणुवादिनोऽपि समान एव दोष इत्यत्र संबन्धः। द्वाभ्यामणुभ्यां संयुज्यमानाभ्यां द्व्यणुकमारभ्यते, त्रिभिर्द्व्यणुकैः संयुक्तैस्त्र्यणुकं, त्र्यणुकैः संयुक्तैश्चतुरणुकमित्यस्यां प्रक्रियायाम् अणुरण्वन्तरेण संयुज्यमानः कात्स्न्येंन वा संयुज्यत एकदेशेन वेति विकल्प्याद्यमनूद्य दूषयति—**अणुरिति**। कात्स्न्येंन संयोगे सत्येकस्मिन् परमाणौ परमाण्वन्तरस्य संमितत्वात् तदारब्धे द्व्यणुके परमाणोरधिकपरिमाणाभावात् तस्यापि पारिमाण्डल्य-वत्त्वप्रसङ्गादणुत्वादिपरिमाणान्तराङ्गीकारविरोधः स्यादित्यर्थः। द्वितीयमनूद्य प्रत्याह—**अथेति**। तदेवं परमाणुवादिन्यपि प्रागुक्तदोषसाम्यात्र तेनापि ब्रह्मवादिनि तदुद्भावनमुचितमित्याह—**इति स्वपक्षेऽपीति**। 'त्वं चोर' इत्युक्ते 'त्वमपि चोर' इतिवत् स्वस्य दोषोद्भावने परस्यापि तदुद्भावनमात्रेण न तत्परिहारसिद्धिरित्याशङ्क्य परस्य यः परिहारः स एवास्माकमपीत्यभिप्रेत्याह—**समानत्वाच्चेति**। आपाततः साम्यमुक्त्वा पारमार्थिकं कार्यकारणत्वमिच्छतामेव चायं दोषो नास्माकं विवर्तवादिनां कार्यं कारणं च कल्पितमिच्छतामित्याह—**परिहृतस्त्विति**।।२९।। इति नवमं कृत्स्नप्रसक्त्यधिकरणम्।।

१०।।सर्वोपेताधिकरणम्।।सू. ३०-३१।।

सर्वोपेता च तद्दर्शनात्।।३०।।

एकस्यापि ब्रह्मणो विचित्रशक्तियोगादुपपद्यते विचित्रो विकारप्रपञ्च इत्युक्तम्। तत्पुनः कथमवगम्यते विचित्रशक्तियुक्तं परं ब्रह्मेति। तदुच्यते—सर्वोपेता च तद्दर्शनात्। सर्वशक्तियुक्ता च परा देवतेत्यभ्युपगन्तव्यम्। कुतः? तद्दर्शनात्। तथा हि दर्शयति श्रुतिः सर्वशक्तियोगं परस्या देवतायाः—'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः' (छा.उ. ३।१४।४) 'सत्यकामः सत्यसंकल्पः' (छा.उ. ८।७।१), 'यः सर्वज्ञः सर्ववित्' (मु.उ. १।१।९), 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' (बृ.उ. ३।८।९) इत्येवंजातीयका।।३०।।

शारीरकन्यायसंग्रहः

सर्वोपेता च तद्दर्शनात्।।३०।। विकरणत्वान्नेति चेत्तदुक्तम्।।३१।। ब्रह्म विचित्रकार्यव्यापारतच्छक्तिमत् न भवति, चेतनत्वे सत्यकार्यकरणत्वात्; यश्चेतनत्वे सत्यकार्यकरणः, स विचित्रव्यापारतच्छक्तिमान्न भवति, यथा सुप्तः पुरुष इत्यनुमानस्य पूर्वस्मिन् क्षणे कार्यकरणाभिमानहीनस्य सुषुप्तादुत्तिष्ठतो जीवस्य मनआदिशरीरेन्द्रियव्युत्थापनव्यापारतच्छक्तिमत्तादर्शनेनानैकान्तिकत्वम्, आगमविरोधश्च सुप्रसिद्धः इति दर्शितम्।।

प्रकटार्थविवरणम्

न परिहरति, केवलं परपक्ष एव प्रसञ्जयति, तस्यैव निग्रहस्थानम्; प्रशिथिलमूलत्वापनयाय प्रतिबन्दिनि [बन्दी] ग्रहस्तु सदुत्तरमेवेति भावः।इति नवमं कृत्स्नप्रसक्त्यधिकरणम्।।

सर्वोपेता च तद्दर्शनात्। सङ्गतिमाह—**एकस्यापीति।।** पूर्वं मायाशक्तिमत्त्वेन परिणामादिव्यवहारास्पदत्वं संभवतीत्युक्तम्। इदानीं कार्यकरणरहितस्य मायाशक्तिमत्त्वमपि न संभवतीत्याशङ्कायां तद्व्याख्यानायोपक्रमते—**सर्वोपेता चेत्यादिना।।** मायाशक्तिब्रह्म [क्तिमद्ब्रह्म] समन्वयस्य किम् अशरीरस्य मायावित्वं न संभवतीति न्यायेन विरोधोऽस्त्युत नेति [संशये] सशरीरस्यैव देवदत्तादेः मायावित्वप्रसिद्धेरस्ति विरोध इति पूर्वः पक्षः। सिद्धान्तस्तु—ब्रह्म न मायावि; अशरीरत्वात्, मुक्तवदित्यनुमानं न मानम्, विपक्षबाधकाभावात् अतिप्रसङ्गित्वाच्च। मायावशेनैव सर्वशक्तियोगं दर्शयति श्रुतिः। अतः श्रुतिगम्यत्वादेव न विरोध इति भावः।।

भाष्यभावप्रकाशिका

सर्वोपेता च तद्दर्शनात्।।३०।। सर्वोपेतेति।। ब्रह्मणो विचित्रशक्तियुक्तत्वात् कारणत्वं युक्तमित्युक्तं पूर्वाधिकरणे, इदानीं सर्वशक्तियुक्तत्वे प्रमाणमुपन्यस्यति सूत्रकार इत्याह—**एकस्यापीति।।३०।।**

न्यायनिर्णयः

पूर्वाधिकरणे ब्रह्मणो विचित्रशक्तियुक्तत्वाद् युक्तं कारणत्वमित्युक्तम्। इदानीं तस्य विचित्रशक्तित्वे प्रमाणमाह—**सर्वोपेता चेति।** मायाशक्तिमतो ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः। तस्य किमशरीरस्य नास्ति मायेति न्यायेन विरोधोऽस्ति न वेति तदनाभासत्वाभासत्वाभ्यामेव संदेहे संगतिमाह—**एकस्येति।** प्रमाणप्रश्नपूर्वकं तदुपन्यासपरं सूत्रमादत्ते—**तत्पुनरिति।** पूर्ववदिहापि संगतिफले द्रष्टव्ये। सूत्राक्षराणि व्याचष्टे—**सर्वेति।** अवगतिहेतुं प्रश्नपूर्वकमाह—**कुत इति।** सिद्धान्तहेतुं नानाविधश्रुत्यवष्टम्भेन विवृणोति—**तथा हीति।।३०।।**

विकरणत्वान्नेति चेत् तदुक्तम्।।३१।।

स्यादेतत्–विकरणां परां देवतां शास्ति शास्त्रम्–'अचक्षुष्कमश्रोत्रमवागमनः' (बृ.उ. ३।८।८) इत्येवंजातीयकम्। कथं सा सर्वशक्तियुक्ताऽपि सती कार्याय प्रभवेत्? देवादयो हि चेतनाः सर्वशक्तियुक्ता अपि सन्त आध्यात्मिककार्यकरणसंपन्ना एव तस्मै तस्मै कार्याय प्रभवन्तो विज्ञायन्ते। कथं च 'नेति नेति' (बृ.उ. २।३।६) इति प्रतिषिद्धसर्वविशेषाया देवतायाः सर्वशक्तियोगः संभवेदिति चेत्? यदत्र वक्तव्यं तत् पुरस्तादेवोक्तम्–श्रुत्यवगाह्यमेवेदमतिगम्भीरं ब्रह्म, न तर्कावगाह्यम्; न च यथैकस्य सामर्थ्यं दृष्टं तथाऽन्यस्यापि सामर्थ्येन भवितव्यमिति नियमोऽस्तीति। प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगः

प्रकटार्थविवरणम्

विकरणत्वान्नेति चेत्तदुक्तम्।। पूर्वं सिद्धान्तेनोपक्रम्येदानीं पूर्ववादिनोऽभिप्रायमुद्भाव्योक्तं दोषं स्मारयति—**विकरणत्वादित्यादिना**।।इति दशमं सर्वोपेताधिकरणम्।।

भाष्यभावप्रकाशिका

विकरणत्वान्नेति चेत्तदुक्तम्।।३१।। कुलालादीनां कार्यकरणवतां मृदाद्यधिष्ठाय कर्तृत्वदर्शनाद् ब्रह्मणस्तद्रहितस्यानधिष्ठातृत्वाद् न कारणत्वमिति शङ्कते—**स्यादेतदिति**।। ननु सर्वशक्तियुक्तत्वादुपपद्यत इति, अत आह—**कथं सेति**।। ननु सर्वशक्तियोगाद् देवादिवत् संभवतीत्युक्तमिति, तत्राह—**देवादय इति**।। सर्वशक्तियोगश्च न संभवतीत्याह—**कथं चेति**।। ब्रह्म विचित्रकार्यव्यापारतच्छक्तिमन्न भवति, चेतनत्वे सत्यकार्यकरणत्वात्, सुप्तपुरुषवदित्यर्थः। तदुक्तमिति सूत्रावयवं व्याचष्टे—**यदत्रेति**।। किं तदुक्तमिति, तदाह—**श्रुत्यवगाह्यमिति**।। ननु तर्कानवगाह्यत्वे स्वविषयोपस्थापनेन ब्रह्मप्रमाणप्रतिबन्धकत्वं तर्कस्य स्यादिति, तत्राह—**न च यथेति**।। सुषुप्तोत्थानसमये शरीराद्यभिमानशून्यस्य शरीरेन्द्रियाद्युपादानव्यापारतच्छक्तिमत्त्वदर्शनादनेकान्तो हेतुरित्यर्थः। यदुक्तम्—सर्वशक्तियोगो न संभवतीति, तत्र वक्तव्यम्—परमार्थतोऽभावः, किं वा व्यवहारतोऽपि। यद्याद्यः, तदाऽङ्गीक्रियते। द्वितीयस्त्वनुपपन्न इत्याह—**प्रतिषिद्धेति**।। इदानीमनुमानस्यागमविरोधमाह—**तथा च शास्त्रमिति**।।३१।। इति दशमं सर्वोपेताधिकरणम्।।

न्यायनिर्णयः

पूर्वपक्षमनुभाष्य दूषयति—**विकरणत्वादिति**। यद्यप्यन्तर्याम्यधिकरणे जगद्ब्रह्मणोर्मायार्जितत्वसंबन्धे सिद्धे कार्यकरणविरहिणोऽपि नियन्तृत्वमुक्तम्, तथापि कार्यकरणविरहिणो मायासंबन्ध एव न संभवतीति विवक्षितत्वात् कुलालादीनां कार्यकरणवतां मृदाद्यधिष्ठातृत्वदर्शनाद् ब्रह्मणस्तद्धीनस्य नाधिष्ठातृत्वेन कारणत्वमिति चोद्यं विवृणोति—**स्यादेतदिति**। ब्रह्मणः सर्वशक्तित्वादकार्यकरणत्वेऽपि कारणत्वमुपपन्नमित्याशङ्क्याह—**कथं सेति**। न हि कार्यकरणरहितस्य मुक्तवन्मायाशक्तिमत्त्वम्, तद्वत्त्वेऽपि न कार्यक्षमत्वम्, सुषुप्तवदित्यर्थः। सर्वशक्तियोगाद् देवादिवद् ब्रह्मणः संभवति विचित्रकार्यकरत्वमित्याशङ्क्याह—**देवादयो हीति**। **विज्ञायन्ते**। मन्त्रार्थवादादिष्विति शेषः। **कथं सा सर्वशक्तियुक्तापीत्य**त्रापिना सूचितमर्थं स्फोरयति—**कथं चेति**। 'तदुक्तम्' इति सूत्रावयवेन परिहरति—**यदत्रेति**। किं तदुक्तमित्यपेक्षायां नविलक्षणत्वाधिकरणादावुक्तं स्मारयति—**श्रुतीति**। यत्तु कुलालादीनां कार्यकरणवतामेव मृदाद्यधिष्ठातृत्वोपलम्भाद् ब्रह्मणस्तद्रहितस्य नाधिष्ठातृत्वेन कारणत्वमिति, तदपि परिहृतमित्याह—**न चेति**। न हि कार्यकरणविरहिणः सुषुप्तवदकार्यकरत्वम् शक्यं नियन्तुं, समुत्थानसमये शरीराद्यभिमानशून्यस्य देहेन्द्रियाद्युपादानव्यापारतस्तच्छक्तिमत्तोपलब्ध्या दृष्टान्तस्य साध्यविकलत्वादिति भावः। यत्तु ब्रह्मणो मायाशक्तिमत्त्वं मुक्तवदशरीरत्वादयुक्तमिति, तदपि पुरस्तादेव परास्तमित्याह—**प्रतिषिद्धेति**। परमार्थतो व्यवहारतो वा मायाशक्तिमत्त्वाभावः साध्यते? नाद्यः, सिद्धसाधनत्वात्। न द्वितीयः, मायायाश्चिन्मात्रे प्रतीतिसिद्धत्वात्। न चाज्ञोऽहमिति प्रतीतिर्जीवमधिकरोति, तस्य ब्रह्मानतिरेकात्, कल्पितस्य चाविद्यामयत्वेनाविद्याश्रयत्वायोगादिति भावः। किंच मायाविनां देहेन्द्रियवतां बाह्यं हेतुमनपेक्ष्य कार्यकरत्वदर्शनात्, कुलालादीनां

संभवतीत्येतदप्यविद्याकल्पितरूपभेदोपन्यासेनोक्तमेव। तथा च शास्त्रम्–'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः' (श्वे.उ. ३।१९) इत्यकरणस्यापि ब्रह्मणः सर्वसामर्थ्ययोगं दर्शयति।।३१।।

।।इति दशमं सर्वोपेताधिकरणम्।।

११।।न प्रयोजनवत्त्वाधिकरणम्।।सू. ३२-३३।।

न प्रयोजनवत्त्वात्।।३२।।

अन्यथा पुनश्चेतनकर्तृत्वं जगत आक्षिपति। न खलु चेतनः परमात्मेदं जगद्बिम्बं विरचयितुमर्हति। कुतः? प्रयोजनवत्त्वात् प्रवृत्तीनाम्। चेतनो हि लोके बुद्धिपूर्वकारी पुरुषः प्रवर्तमानो न मन्दोपक्रमामपि तावत् प्रवृत्तिमात्मप्रयोजनानुपयोगिनीमारभमाणो दृष्टः, किमुत गुरुतरसंरम्भाम्। भवति च लोकप्रसिद्ध्यनुवादिनी श्रुतिः–'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति' (बृ.उ. २।४।५)

शारीरकन्यायसंग्रहः

न प्रयोजनवत्त्वात्।।३२।। लोकवत्तु लीलाकैवल्यम्।।३३।। ब्रह्म जगत्कारणं न भवति, साक्षाद्वा परम्परया वा स्वात्मप्रयोजनशून्यत्वात्; य एवंविधप्रयोजनशून्यः सः कार्यं न करोति, यथा लौकिकः पुरुष इत्यनुमानस्य सुखोल्लासनिमित्त-क्रीडायामुच्छ्वासादौ चानैकान्तिकत्वम्, आगमविरुद्धत्वं च दर्शितम्।।

प्रकटार्थविवरणम्

न प्रयोजनवत्त्वात्।। पूर्वत्र कार्यकरणरहितस्यापि मायाशक्तिमत्त्वप्रदर्शनेन विरोधः परिहृतः। इदानीं शक्तिविषयप्रयोजनाभावात् विरोध इत्याह—**अन्यथा पुनरिति।।** लौकिकस्यापि मायाविनो द्रव्यादिप्राप्तये हस्त्या दिप्रदर्शकत्वम्; ब्रह्मणस्तु प्रयोजनशून्यत्वान्माययाऽपि न स्रष्टृत्वमित्यर्थः। ननु या चेतनप्रवृत्तिः सा प्रयोजनोद्देशेनेति नियमश्चेत् तर्ह्यस्तु परमात्मनोऽपि किञ्चित्प्रयोजनमित्याशङ्क्याह—

भाष्यभावप्रकाशिका

न प्रयोजनवत्त्वात्।।३२।। ननु प्रयोजनाभावेऽपि लीलादिषु प्रवृत्तिर्दृष्टेति, अत आह—**किमुतेति।।** अल्पायाससाध्या लीला भवति, न तु बह्वायासेत्यर्थः। आत्मप्रयोजनाय सर्वः प्रवर्तत इतीमर्थं श्रुतिरप्यनुवदतीत्याह—**भवति च लोकप्रसिद्धीति।।** ननु

न्यायनिर्णयः

च तथाविधानामेव बाह्यसाधनव्यपेक्षाणामर्थक्रियाकारित्वात्, तेषु दृष्टवैचित्र्यावष्टम्भादन्तरेणापि शरीरादिना ब्रह्मणि मायासंबन्धसिद्धिरित्यभिसंधाय प्रागुक्तानुमानद्वयस्यागमविरोधं दर्शयति—**तथा चेति।।३१।।** इति दशमं सर्वोपेताधिकरणम्।।

पूर्वं श्रुत्यवष्टम्भेन सर्वशक्ति ब्रह्मेत्युक्तम्। सम्प्रति शक्तस्यापि प्रयोजनाभिसंध्यभावादकर्तृत्वमित्याक्षिपति—**न प्रयोजनवत्त्वादिति।** परितृप्ताद् ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः। स किं ब्रह्म विना फलेन न सृजत्यभ्रान्तचेतनत्वाद् विवक्षितपुरुषवदिति न्यायेन विरुध्यते न वेति पूर्ववदेव संदेहे पूर्वपक्षसूत्रतात्पर्यमाह—**अन्यथेति।** पादादिसंगतिफले पूर्ववदुन्नेये। सूत्राक्षराणि व्याकुर्वन् नञोऽर्थमाह—**न खल्विति।** तत्र प्रश्नपूर्वकं हेतुमादाय व्याचष्टे—**कुत इति।** भ्रान्तस्याबुद्धिपूर्वकारिणः स्वपरप्रयोजनानुपयोगिन्यपि प्रवृत्तिर्दृष्टेति विशिनष्टि—**बुद्धिपूर्वकारीति।** लीलादौ फलाभावेऽपि प्रवृत्तिर्दृष्टेत्याशङ्क्य तत्रापि तात्कालिकमुद्देश्यफलाभावेऽपि फलमस्त्येवेति मत्वाऽऽह—**न मन्देति।** या चेतनस्याभ्रान्तस्य प्रवृत्तिः सा फलाभिसंधिपूर्विकेति व्याप्तिमुक्त्वा कैमुतिकन्यायमपिना सूचितं दर्शयति—**किमुतेति।** लीलादेरल्पायाससाध्यत्वेऽपि फलवत्त्वदर्शनान्महायाससाध्यजगतः सृष्टिरफला न श्लिष्टेत्यर्थः। फलाभि-संधिपूर्विका बुद्धिपूर्वकारिप्रवृत्तिरित्यत्र श्रुतिमुपन्यस्यति—**भवति चेति।** प्रवृत्त्याभासत्वाज्जगद्विरचनायां न फलापेक्षेत्याशङ्क्याह—

इति। गुरुतरसंरम्भा चेयं प्रवृत्तिर्यदुच्चावचप्रपञ्चं जगद्बिम्बं विरचयितव्यम्। यदीयमपि प्रवृत्तिश्चेतनस्य परमात्मन आत्मप्रयोजनोपयोगिनी परिकल्प्येत, परितृप्तत्वं परमात्मनः श्रूयमाणं बाध्येत। प्रयोजनाभावे वा प्रवृत्त्यभावोऽपि स्यात्। अथ चेतनोऽपि सन्नुन्मत्तो बुद्ध्यपराधादन्तरेणैवात्मप्रयोजनं प्रवर्तमानो दृष्टस्तथा परमात्माऽपि प्रवर्तिष्यत इत्युच्येत। तथा सति सर्वज्ञत्वं परमात्मनः श्रूयमाणं बाध्येत। तस्मादश्लिष्टा चेतनात् सृष्टिरिति।।३२।।

लोकवत्तु लीलाकैवल्यम्।।३३।।

तुशब्दनाक्षेपं परिहरति। यथा लोके कस्यचिदाप्तैषणस्य राज्ञो राजामात्यस्य वा व्यतिरिक्तं किंचित् प्रयोजनमनभिसंधाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवन्ति, यथा चोच्छ्वासप्रश्वासादयोऽनभिसंधाय

प्रकटार्थविवरणम्

यदीयमपीति।। न केवलमाप्तकामश्रुतिविरोधः; प्राप्तेऽपि सृष्टिसमये स्वप्रयोजनाभावे कदाचिदप्रवृत्तिः स्यादित्याह— **प्रयोजनाभावे वेति**।। ननु बुद्धिपूर्वकसृष्टेः प्रयोजनान्वेषणं स्यात्; न त्वियं बुद्धिपूर्वेत्यांशङ्क्य दूषयति—**चेतनोऽपीत्यादिना**।।

लोकवत्तु लीलाकैवल्यम्।। अनैकान्तिकत्वाभिधानेन परिहरति—**लोकवत्त्विति**।। किं या बुद्धिपूर्वकारिणः प्रवृत्तिः सा स्वप्रयोजनोद्देशेनेति व्याप्तिः, किं वा प्रयोजनोद्देशेन? प्रथमे सुखातिशयप्राप्तिनिमित्तहास्यादिप्रवृत्तावनेकान्तः, कारुण्यप्रवृत्तौ च। द्वितीयेऽसिद्धिः, पूर्वकल्पोपार्जितादृष्टानां जीवानां फलदानाय सृष्टिकरणादिति भावः। व्यभिचारस्थलान्तरमाह—**यथा चेति**।।

भाष्यभावप्रकाशिका

अयमपि प्रवृत्त्याभास इति, अत्राह—**गुरुतरेति**।। तर्हि प्रयोजनपूर्विकैवास्त्विति, अत आह—**यदीयमपीति**।। ननु यद्यप्यस्मदादीनां गुरुतरसंरम्भेयं प्रवृत्तिः, तथापि परमेश्वरस्य लीलैवेति न प्रयोजनान्वेषणेत्याशङ्क्याह—**प्रयोजनाभाव इति**।। उद्देश्यप्रयोजनाभावेऽपि लीलादौ तात्कालिकं प्रयोजनमस्ति, अतः—ब्रह्म, जगत्कारणं न भवति, साक्षात्परम्परया वाऽऽत्मप्रयोजनशून्यत्वात्, तथाभूतलौकिकपुरुषवदिति भावः।।

लोकवत्तु लीलाकैवल्यम्।।३३।। सुखोल्लासनिमित्तक्रीडायामुच्छ्वासादौ च प्रयोजनाभिसन्धानाभावादनेकान्तो हेतुरिति परिहरति—**यथा लोक इति**।। किमिति प्रयोजनमेव न कल्प्यत इति? तत्राह—**न हीति**।। आप्तकामत्वादिति भावः।। ननु

न्यायनिर्णयः

गुरुतरेति। अस्तु तर्हि फलाभिसंधिपूर्विकैवेयमपि प्रवृत्तिरित्याशङ्क्य स्वस्य परस्य वा फलमुद्देश्यमिति विकल्प्याद्ये दोषमाह— **यदीति**। अस्मदादीनां गुरुतरसंरम्भाऽपीयं प्रवृत्तिरीश्वरस्यानायाससाध्या न प्रयोजनपूर्विकेत्याशङ्क्य, ब्रह्म न जगत्कारणं, साक्षात्परम्परया वा स्वफलविकलत्वात्, तथाभूतलौकिकपुरुषवदित्याह—**प्रयोजनाभावे वेति**। दृष्टान्तेन शङ्कयित्वा दूषयति— **अथेत्यादिना**। बुद्ध्यपराधो विवेकवैधुर्यम्। नापि परप्रयोजनोपयोगिनी परस्येश्वरस्य प्रवृत्तिः, प्रागुत्पत्तेरनुग्राह्याभावादिति मत्वोपसंहरति—**तस्मादिति**।।३२।।

सिद्धान्तयति—**लोकवत्त्विति**। सूत्रं व्याचष्टे—**तुशब्देनेति**। यत्तु साक्षात्परम्परया वा स्वप्रयोजनाभावान्न ब्रह्म जगत्कारणमिति, तत्र सुखोल्लासनिमित्तक्रीडायामुच्छ्वासादौ च फलाभिसंध्यभावादनैकान्तिको हेतुरित्याह—**यथेति**। एषणासंपत्तौ संभावितमुदाहरणद्वयमाह—**राज्ञ इति**। **व्यतिरिक्तं** लीलायाः सकाशादिति यावत्। क्रीडार्था विहारा देशविशेषाः संस्कृतास्तेष्विति यावत्। भवतु वा राजादीनां लीलारूपासु प्रवृत्तिष्वपि किंचिदुद्देश्यं प्रयोजनम्, तथापि न निश्वासादिषु तथाविधं फलमुपलभ्यमित्यनैकान्तिकत्वतादवस्थ्यमित्याह—**यथा चेति**। दृष्टान्ते स्वभावो देहस्य प्राणादिमत्त्वम्, दार्ष्टान्तिके तु

बाह्यं किंचित्प्रयोजनं स्वभावादेव संभवन्ति, एवमीश्वरस्याप्यनपेक्ष्य किंचित्प्रयोजनान्तरं स्वभावादेव केवलं लीलारूपा प्रवृत्तिर्भविष्यति। न हीश्वरस्य प्रयोजनान्तरं निरूप्यमाणं न्यायतः श्रुतितो वा संभवति। न च स्वभावः पर्यनुयोक्तुं शक्यते। यद्यप्यस्माकमियं जगद्बिम्बविरचना गुरुतरसंरम्भेवाभाति, तथापि परमेश्वरस्य लीलैव केवलेयम्, अपरिमितशक्तित्वात्। यदि नाम लोके लीलास्वपि किंचित्सूक्ष्मं प्रयोजनमुत्प्रेक्ष्येत तथापि नैवात्र किंचित्प्रयोजनमुत्प्रेक्षितुं शक्यते, आप्तकामश्रुतेः। नाप्यप्रवृत्तिरुन्मत्तप्रवृत्तिर्वा, सृष्टिश्रुतेः, सर्वज्ञश्रुतेश्च। न चेयं परमार्थविषया सृष्टिश्रुतिः, अविद्याकल्पितनामरूपव्यवहारगोचरत्वात्, ब्रह्मात्मभावप्रतिपादनपरत्वाच्चेत्येतदपि नैव विस्मर्तव्यम्।।३३।।

।।इत्येकादशं न प्रयोजनवत्त्वाधिकरणम्।।

प्रकटार्थविवरणम्

स्वभावादेवेति।। समीरणस्य सञ्चरणस्वाभाव्यादित्यर्थः। एवमीश्वरस्यापि स्वप्रयोजनमन्तरेणेश्वरस्वाभावाव्यादेव लीलातुल्या सृष्ट्यादिर्भविष्यतीत्यर्थः। नन्वीश्वरस्य वा विपरीतः स्वभावः किं न स्यादित्याशङ्क्याह—**न च स्वभाव इति**।। सृष्ट्यादिकर्तृत्वाभावे नेश्वरशब्दार्थः परिपूर्णः स्यादिति भावः। यच्चोक्तं गुरुतरसंरम्भेयं जगद्विरचना न स्वप्रयोजनाभावे भवितुमर्हतीति, तत्राह—' **यद्यप्यस्माकमिति**।। ननु कुमाराणां लीलाऽपि किञ्चित् प्रयोजनमुद्दिश्य भवति; तथा सृष्टिरपि लीला चेत् किञ्चित्प्रयोजनमनुमीयतामित्याशङ्क्याह—**यदि नामेति**।। नन्वाप्तकामश्रुतिविरोधात् प्रयोजनानुमानं न घटते चेत् तर्हि नास्त्येव सृष्टौ प्रवृत्तिः, उन्मत्तप्रवृत्तिर्वेत्याशङ्क्याह—**नापीति**।। तर्हि सृष्टिश्रुतिप्रामाण्यादेव स्वप्रयोजनं किञ्चित् कल्प्यतामित्याशङ्क्याह—**न चेयमिति**।।इत्येकादशं नप्रयोजनवत्त्वाधिकरणम्।।

भाष्यभावप्रकाशिका

अस्मदादीनां लीलादौ कदाचिन्निवृत्तेरपि दर्शनादीश्वरस्यापि तथा भावे संसाराभावः स्यादिति, अत आह—**न च स्वभाव इति**।। एवंभूतलीलाऽपि स्वभाव इति भावः। गुरुतरसंरम्भत्वात् प्रयोजनेन भवितव्यमिति यदुक्तम्, तत्राह—**यद्यपीति**।। अपि च नेयं पारमार्थिकी सृष्टिः, अपि त्वनाद्यविद्यानिबन्धना, ततो गन्धर्वनगरादिभ्रमेष्विव न प्रयोजनापेक्षेत्याह—**न चेयमिति**।। अपि च श्रुतीनां ब्रह्मात्मभावप्रतिपत्तिपरत्वान्न सृष्टौ तात्पर्यम्। अतःसृष्टेरविवक्षितत्वात् तदाश्रयो दोषो निर्विषय एवेत्याह—**ब्रह्मात्मेति**।।३३।। इत्येकादशं नप्रयोजनवत्त्वाधिकरणम्।।

न्यायनिर्णयः

स्वभावोऽविद्येति द्रष्टव्यम्। अथेश्वरस्य जगद्बिम्बविरचना किमित्यविद्याकृतलीलामात्रत्वेनाफला कल्प्यते? फलमेव किंचित् कल्प्यतामित्याशङ्क्याप्तकामत्वन्यायविरोधात् परमानन्दत्वश्रुतिविरोधाच्च नैवमित्याह—**न हीति**। ननु लीलादावस्मदादीनामकस्मादेव निवृत्तेरपि दर्शनादीश्वरस्यापि मायामय्यां लीलायां तथाभावे विनाऽपि सम्यग्ज्ञानं संसारसमुच्छित्तिरिति, तत्राह—**न चेति**। अनिर्वाच्या खल्वविद्या परस्येश्वरस्य स्वभावो लीलेति चोच्यते। तत्र न प्रातीतिकस्वभावायामनुपपत्तिरवतरतीत्यर्थः। यत्तु जगद्रचनाया गुरुतरसंरम्भत्वाद् भवितव्यं फलेनेति, तत्रास्मद्दृष्ट्या वा तस्या गुरुतरसंरम्भत्वमीश्वरदृष्ट्या वेति विकल्प्याद्ये हेतुसद्भावेऽपि प्रागुक्तश्रुतिन्यायविरोधान्नानुमानप्रवृत्तिरित्यभिप्रेत्य द्वितीयं निरस्यति—**यद्यपीत्यादिना**। लीलास्वपि तात्कालिकं फलमुद्देश्यफलाभावेऽपि भातीत्युक्तमित्याशङ्क्याह-**यदीति**। ईश्वरप्रवृत्तिरत्रेत्युक्ता। **किंचिदिति**। स्वकीयं परकीयं वेत्यर्थः। प्रयोजनाभावे वेत्यादिनोक्तं प्रत्याह—**नापीति**। किंच सृष्टेरविद्यानिबन्धनत्वेनावस्तुत्वाद् गन्धर्वनगरादिभ्रमेष्विव न फलापेक्षेत्याह—**न चेति**। किं च ब्रह्मात्मत्वधीपरत्वान्न सृष्टौ सृष्टिश्रुतीनां तात्पर्यम्, अतः सृष्टेरविवक्षितत्वात् तदाश्रयो दोषो निर्विषयत्वान्न प्रसरतीत्याह—**ब्रह्मेति**। प्रकृतोपयोगित्वान्न तत्पुनरुक्तिरिति सूचयति—**इत्येतदपीति**।।३३।। इत्येकादशं नप्रयोजनवत्त्वाधिकरणम्।।

१२।।वैषम्यनैर्घृण्याधिकरणम्।।सू. ३४-३६।।

वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति।।३४।।

पुनश्च जगज्जन्मादिहेतुत्वमीश्वरस्याक्षिप्यते स्थूणानिखननन्यायेन प्रतिज्ञातस्यार्थस्य दृढीकरणाय। नेश्वरो जगतः कारणमुपपद्यते। कुतः? वैषम्यनैर्घृण्यप्रसङ्गात्। कांश्चिदत्यन्तसुखभाजः करोति देवादीन्, कांश्चिदत्यन्तदुःखभाजः पश्वादीन्, कांश्चिन्मध्यमभोगभाजो मनुष्यदीनित्येवं विषमां सृष्टिं निर्मिमाणस्येश्वरस्य पृथग्जनस्येव रागद्वेषोपपत्तेः श्रुतिस्मृत्यवधारितस्वच्छत्वादीश्वरस्वभावविलोपः प्रसज्येत। तथा खलजनैरपि जुगुप्सितं निर्घृणत्वमतिक्रूरत्वं दुःखयोगविधानात् सर्वप्रजोपसंहाराच्च प्रसज्येत। तस्माद् वैषम्यनैर्घृण्यप्रसङ्गान्नेश्वरः

शारीरकन्यायसंग्रहः

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति।।३४।। न कर्माविभागादिति चेत् नानादित्वात् ।।३५।। उपपद्यते चाप्युपलभ्यते च।।३६।। ब्रह्म परेषामर्थानर्थहेतोः प्रपञ्चकार्यस्य कारणं न भवति, चेतनत्वे सति निरवद्यत्वात्; यश्चेतनत्वे सति निरवद्यः स परेषामर्थानर्थहेतोः कार्यस्य न कारणम्, यथा विशिष्टो लौकिकः पुरुष इत्यस्यानुमानस्य निरवद्येऽपि राज्ञि सेवाचौर्यादिकर्मापेक्षया परेषामर्थानर्थौ कुर्वाणेऽनैकान्तिकत्वम्, आगमविरोधश्च दर्शितम्।।

प्रकटार्थविवरणम्

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति।। संबन्धमाह—**पुनश्चेति**।। यदि स्वप्रयोजनाभावेऽपि जीवानां फलदानाय स्रष्टृत्वम्, तर्हि सर्वेषां समं सुखमेव दद्यात् वैषम्यनैर्घृण्यविरुद्धमिति भावः। पृथग्जनस्येव प्राकृतजनस्येवेत्यर्थः। रागादिविधुरब्रह्मसमन्वयो वैषम्यकारी दृष्ट [दुष्ट] इति न्यायेन विरुध्यते न वेति सन्देहे—ईश्वरो रागादिमान्, वैषम्यादिमत्त्वात्, देवदत्तवत् इत्यनुमानस्य प्रामाण्याद्विरुध्यत इति पूर्वः पक्षः।।

भाष्यभावप्रकाशिका

वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति।।३४।। वैषम्येति।। पूर्वोक्तमेव परिहारमाक्षेपान्तरस्यापि परिहारतया प्रदर्शयितुमधिकरणारम्भ इत्याह—**स्थूणेति**।। एवं देवादीनां वैषम्येऽपि कथमीश्वरस्य वैषम्यमिति? तदाह—**एवं विषमामिति**।। अस्तु वैषम्यम्, को दोष इति? अत आह—**श्रुतिस्मृतीति**।। नैर्घृण्यं दर्शयति—**तथा खलजनैरिति**।। ब्रह्म, परेषामर्थानर्थहेतोः कार्यस्य न कारणम्, चेतनत्वे सति निरवद्यत्वाद्, विशिष्टपुरुषवदित्येतदनुमानमुपसंहारव्याजेनाह—**तस्माद्वैषम्येति**।।

न्यायनिर्णयः

पूर्वसूत्रे मायामय्या लीलया ब्रह्मणः स्रष्टृत्वमादिष्टम्। सम्प्रति सैव सापेक्षस्य न संभवत्यनीश्वरत्वप्रसङ्गात्, निरपेक्षत्वे रागादिमत्त्वापत्तेरित्याक्षिप्य समाधत्ते—**वैषम्येति**। निरवद्याद् ब्रह्मणो जगत्सर्गं वदन् समन्वयो विषयः। स किं यो विषमसृष्टिकारी स सावद्यो, ब्रह्म च विषमं सृजतीति न्यायेन विरुध्यते न वेति यथापूर्वं संदेहे पूर्वपक्षमाह—**पुनश्चेति**। पुनराक्षेपस्य फलमाह—**स्थूणेति**। जगतो ब्रह्मैव कारणमिति प्रतिज्ञातोऽर्थस्तद्दृढीकरणमाक्षेपद्वारेणाधिकरणकृत्यमित्यर्थः। पादादिसंगतिफले पूर्ववदुन्नेये। आक्षेपं विवृण्वन् 'वैषम्यनैर्घृण्ये न' इति सूत्रावयवं पूर्वपक्षे योजयन्नञर्थमाह—**नेश्वर इति**। प्रश्नपूर्वकं हेतुं गृहीत्वा प्रथमं वैषम्यप्रसङ्गं प्रकटयति—**कुत इत्यादिना**। देवादीनामेवं वैषम्येऽपि कथमीश्वरस्य वैषम्यमित्याशङ्क्याह—**इत्येवमिति**। वैषम्येऽपि किं स्यादित्याशङ्क्योक्तम्—**श्रुतीति**। 'निष्कलं निष्क्रियम्' इत्याद्या श्रुतिः। 'न मे द्वेष्योऽस्ति न प्रियः', 'बलं बलवतां चाहं कामरागविवर्जितम्' इत्याद्या च स्मृतिः। स्वच्छत्वादीत्यादिशब्देन निष्क्रियत्वनिष्कलत्वादि गृह्यते। वैषम्यप्रसङ्गं प्रदर्श्य नैर्घृण्य-**प्रसङ्गं दर्शयति—तथेति**। ब्रह्म परेषामर्थानर्थहेतुकार्यस्य न कारणं, चेतनत्वे सत्यनवद्यत्वात्, विशिष्टपुरुषवदित्यभिप्रेत्योपसंहरति—

कारणमित्येवं प्राप्ते ब्रूमः—वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्येते। कस्मात्? सापेक्षत्वात्। यदि हि निरपेक्षः केवल ईश्वरो विषमां सृष्टिं निर्मिमीते, स्यातामेतौ दोषौ वैषम्यं नैर्घृण्यं च। न तु निरपेक्षस्य निर्मातृत्वमस्ति। सापेक्षो हीश्वरो विषमां सृष्टिं निर्मिमीते। किमपेक्षत इति चेत्? धर्माधर्मावपेक्षत इति वदामः। अतः सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिरिति नायमीश्वरस्यापराधः। ईश्वरस्तु पर्जन्यवद् द्रष्टव्यः। यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणं भवति, व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवासाधारणानि सामर्थ्यानि कारणानि भवन्ति, एवमीश्वरो देवमनुष्यादिसृष्टौ साधारणं कारणं भवति, देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतान्येवासाधारणानि कर्माणि कारणानि भवन्ति। एवमीश्वरः सापेक्षत्वान्न वैषम्यनैर्घृण्याभ्यां दुष्यति। कथं पुनरवगम्यते सापेक्ष ईश्वरो नीचमध्यमोत्तमं संसारं निर्मिमीत इति? तथा हि दर्शयति श्रुतिः—'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषते' (कौ. उ. ३।८) इति, 'पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन' (बृ.उ. ३।२।१३) इति च। स्मृतिरपि प्राणिकर्मविशेषापेक्षमेवेश्वरस्यानुग्रहीतृत्वं निग्रहीतृत्वं च दर्शयति—'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' (भ.गी. ४।११) इत्येवंजातीयका।।३४।।

प्रकटार्थविवरणम्

सिद्धान्तत्वेन सूत्रं योजयति—**वैषम्यनैर्घृण्ये नेश्वरस्येत्यादिना**।। एष ह्येवेश्वरः प्राक्तनकर्मसंस्कारानुसारेण तं पुरुषं शोभनं कर्म कारयति, यम् उत् ऊर्ध्वं नेतुमिच्छतीत्यर्थः। पुण्यः शोभनफलभाग् भवतीत्यर्थः।।

भाष्यभावप्रकाशिका

सापेक्षश्चेदीश्वरोऽपि न भवेदित्याक्षिपति—**किमपेक्षत इति**।। सेवाचौर्यादिकर्मभेदापेक्षया राजादीनां फलदानेऽप्यनीश्वरता न दृश्यत इत्यभिप्रेत्य परिहरति—**धर्माधर्माविति**।। ननु कर्मनिमित्ता चेत् सृष्टिः, किमीश्वरेणेति? अत आह—**ईश्वरस्त्विति**।। **एवमीश्वर इति**।। सेवाचौर्यादिकर्मापेक्षया निरवद्येऽपि राजनि परेषामर्थानर्थौ कुर्वाणेऽनैकान्तिको हेतुरिति भावः।। सूत्रभागस्य शङ्कापूर्वकमर्थं दर्शयति—**कथं पुनरिति**।। न चैवं मन्तव्यम् ईश्वर एव साध्वसाधुनी कर्मणी कारयित्वा स्वर्गं नरकं वा लोकं नयति चेद् वैषम्यनैर्घृण्ये स्यातामेव इति; तज्जातीयपूर्वकर्माभ्यासवशात् तत्र तत्र प्रवृत्तानामेव प्रवर्तकत्वादीश्वरस्य, पारमार्थिकत्वाभावाच्च सृष्टेर्मायाकारस्येवाङ्गसाकल्यवैकल्यादिभेदेन विचित्रान् प्राणिनो दर्शयतःसहसा च हरतः परमेश्वरस्य न वैषम्यम्, न च नैर्घृण्यमिति भावः।।३४।।

न्यायनिर्णयः

तस्मादिति। पूर्वपक्षमनूद्य सिद्धान्तमवतार्य प्रतिजानीते—**एवं प्राप्त इति**। प्रश्नपूर्वकं हेतुमादत्ते—**कस्मादिति**। व्यतिरेकद्वारा विभजते—**यदि हीति**। नैरपेक्ष्यमेव व्याचष्टे—**केवल इति**। उक्तमेवार्थमन्वयमुखेनान्वाचष्टे—**सापेक्षो हीति**। सापेक्षत्वे सत्यनीश्वरत्वापत्तिरिति विवक्षन्नाक्षिपति—**किमिति**। सेवादिभेदापेक्षया राजादीनां फलदानेऽपि नानीश्वरता दृष्टेति मन्वानः समाधत्ते—**धर्मेति**। सापेक्षत्वे फलं वदन्नुक्तमेव व्यनक्ति—**अत इति**। विषमा सृष्टिर्धर्मादिनिमित्ता चेत् कृतमीश्वरेणेत्याशङ्क्याह—**ईश्वरस्त्विति**। दृष्टान्तं विवृणोति—**यथा हीति**। व्रीहियवादिवैषम्यं तर्हि किं कृतमित्याशङ्क्याह—**व्रीहीति**। चेतनत्वे सत्यनवद्यत्वादिति हेतुं व्यभिचारयन् दार्ष्टान्तिकमाह—**एवमिति**। सेवादिभेदापेक्षया परेषामर्थानर्थौ कुर्वति राजादावनैकान्तिको हेतुरिति भावः। सापेक्षत्वफलमुपसंहरति—**एवमिति**। तथा चागमावधारितस्वच्छत्वादीश्वरस्वभावस्य नैव भङ्गोऽस्तीति भावः। सापेक्षस्येश्वरस्य विषमसृष्टिहेतुत्वे मानं पृच्छति—**कथमिति**। सूत्रावयवेनोत्तरमाह—**तथा हीति**। स्मृतिरपि श्रौतमर्थमनुगृह्णातीत्याह—**स्मृतिरपीति**। न च साध्वसाधुनी कर्मणी कारयित्वा स्वर्गं नरकं वा प्राणिनो नयन्नीश्वरो वैषम्यादिना कथं न दुष्यतीति वाच्यम्,

न कर्माविभागादिति चेन्नानादित्वात्।।३५।।

'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा.उ. ६।२।१) इति प्राक्सृष्टेरविभागावधारणान्नास्ति कर्म, 'यदपेक्ष्य[1] विषमा सृष्टिः स्यात्। सृष्ट्युत्तरकालं हि शरीरादिविभागापेक्षं कर्म, कर्मापेक्षश्च शरीरादिविभाग इतीतरेतराश्रयत्वं प्रसज्येत। अतो विभागादूर्ध्वं कर्मापेक्ष ईश्वरः प्रवर्ततां नाम। प्राग्विभागाद् वैचित्र्यनिमित्तस्य कर्मणोऽभावात् तुल्यैवाद्या सृष्टिः प्राप्नोतीति चेत्। नैष दोषः। अनादित्वात् संसारस्य। भवेदेष दोषो यद्यादिमान् संसारः स्यात्। अनादौ तु संसारे बीजाङ्कुरवद्धेतुहेतुमद्भावेन कर्मणः सर्गवैषम्यस्य च प्रवृत्तिर्न विरुध्यते।।३५।।

कथं पुनरवगम्यतेऽनादिरेष संसार इति? अत उत्तरं पठति–

उपपद्यते चाप्युपलभ्यते च।।३६।।

उपपद्यते च संसारस्यानादित्वम्। आदिमत्त्वे हि संसारस्याकस्मादुद्भूतेर्मुक्तानामपि पुनः संसारोद्भूति-

प्रकटार्थविवरणम्

न कर्माविभागादिति चेन्नानादित्वात्।। राजादिवत् कर्मानुसारेण विषमं फलं प्रयच्छतोऽपि नास्ति दोष इत्युक्तम्। तदेव प्रथमसर्गे न संभवतीत्याह—**सदेव सोम्येदमित्यादिना**।। इतरेतराश्रयत्वपरिहारार्थमाद्या सृष्टिः समानैव वक्तव्येत्याह—**अतो विभागादूर्ध्वमिति**।। अनादित्वेनेतरेतराश्रयत्वं परिहरति—**नैष दोष इत्यादिना**।। अविभागावधारणमपि विभागानभिव्यक्त्यभिप्रायं द्रष्टव्यम्।।

अनादित्वप्रपञ्चनाय पृच्छति—**कथं पुनरिति**।।

भाष्यभावप्रकाशिका

न कर्माविभागादिति चेन्नानादित्वात्।।३५।। प्रलयसमये कर्मणोऽभावात् तदपेक्षा सृष्टिरित्यनुपपन्नमिति शङ्कते—**सदेवेति**।। प्राक्तनकर्माभावेऽपि सृज्यमानप्राणिकर्मवैचित्र्यात् सृष्टिवैचित्र्यं स्यादित्याशङ्क्य कर्मवैचित्र्यस्यापि शरीरादिवैचित्र्याधीनत्वादितरेतराश्रयत्वमित्याह—**सृष्ट्युत्तरकालं हीति**।।३५।।

उपपद्यते चाप्युपलभ्यते च।।३६।। सिद्धवदुपन्यस्तस्यानादित्वस्य साधनार्थमुत्तरसूत्रमवतारयति—**कथं पुनरिति**।।

न्यायनिर्णयः

तज्जातीयपूर्वकर्माभ्यासात् तत्र प्रवृत्तानामेवेश्वरस्य प्रवर्तकत्वात्, मायाविवच्च तस्य मायामयसृष्टिहेतोर्वैषम्यादिप्रसङ्गाभावादिति भावः।।३४।।

सापेक्षत्वमाक्षिप्य समाधत्ते—**न कर्मेति**। चोद्यं व्याकुर्वन् प्राचीनं पराचीनं वा कर्मापेक्षमाणमिति विकल्प्याद्यं दूषयति—**सदेवेति**। द्वितीयं निरस्यति—**सृष्टीति**। पराचीनं हि कर्म प्रथमसृष्टेश्वरमसृष्टेर्वा हेतुरिति विकल्प्याद्ये परस्पराश्रयत्वमुक्त्वा द्वितीयं प्रत्याह—**अत इति**। देवादिवैचित्र्यादूर्ध्वं कर्मवैचित्र्ये सति तदपेक्षयेश्वरस्य प्राणिषु सुखादिवैचित्र्यनिर्मातृत्वेऽपि प्राथमिकविचित्रसृष्टिहेत्वभावात् तदैकरूप्यं स्यादित्यर्थः। सूत्रावयवं व्याकुर्वन्नुत्तरमाह—**नैष दोष इति**। तदेव स्फोरयति—**भवेदित्यादिना**। सृष्टेरैकरूप्यं संसारस्य सादित्वेन नानाहेत्वभावाद्भवति। तस्य त्वनादित्वे पूर्वपूर्वकर्मवैचित्र्यवशादुत्तरोत्तरविचित्रसृष्टिसिद्धिरित्यर्थः।।३५।।

सिद्धवदुक्तस्य संसारानादित्वस्य समर्थनार्थमुत्तरसूत्रमुत्थापयति—**कथमिति**। सूत्रं व्याकरोति—**उपपद्यते चेति**। उपपत्तिमेव

---

१. 'यदपेक्षा' इति पा.।

प्रसङ्गः, अकृताभ्यागमप्रसङ्गश्च, सुखदुःखादिवैषम्यस्य निर्निमित्तत्वात्। न चेश्वरो वैषम्यहेतुरित्युक्तम्। न चाविद्या केवला वैषम्यस्य कारणम्, एकरूपत्वात्। रागादिक्लेशवासनाक्षिप्तकर्मापेक्षा त्वविद्या वैषम्यकरी स्यात्। न च '[1]कर्मान्तरेण शरीरं संभवति, न च शरीरमन्तरेण कर्म संभवतीतीतरेतराश्रयत्वप्रसङ्गः। अनादित्वे तु बीजाङ्कुरन्यायेनोपपत्तेर्न कश्चिद् दोषो भवति। उपलभ्यते च संसारस्यानादित्वं श्रुतिस्मृत्योः। श्रुतौ तावत् 'अनेन जीवेनात्मना' (छा.उ. ६।३।२) इति सर्गप्रमुखे शारीरमात्मानं

प्रकटार्थविवरणम्

उपपद्यते चाप्युपलभ्यते च।। ननु निर्निमित्तत्वमसिद्धम्, ईश्वरस्य निमित्तत्वादित्याशङ्क्याह—**न चेश्वर इति**।। तर्ह्यविद्या सुखादिवैषम्ये हेतुरस्तु; किं कल्पान्तरीयकर्मणेत्याशङ्क्याह—**न चाविद्येति**। जाड्यमात्रैकरूपत्वादित्यर्थः। कथं तर्हि संसारकारणमित्याशङ्क्याह—**रागादीति**।। रागादीनां क्लेशानां वासनाभिः प्रापितानि यानि कर्माणि तत्सहकृतैवाविद्या संसारवैषम्यहेतुरित्यर्थः। सर्वैरिवेतरेतराश्रयत्वपरिहाराय प्रवाहानादित्वमभ्युपगन्तव्यमित्याह—**न च कर्मान्तरेणेति**।। सूत्रावयवस्यार्थमाह—**उपलभ्यते चेत्यादिना**।।

भाष्यभावप्रकाशिका

उपपत्तिं दर्शयति—**आदिमत्त्वे हीति**।। कर्मकाण्डप्रामाण्यायाप्यनादित्वमङ्गीकर्तव्यमित्याह—**अकृताभ्यागमेति**।। अकृते कर्मणि फलमागच्छेत्, तथा च विधि-निषेधशास्त्रानर्थक्यमित्यर्थः।। न चाविद्येति लयाभिप्रायम्। विक्षेपलक्षणाविद्यासंस्कारस्तु स्वोत्पत्तौ पूर्वविक्षेपमपेक्षते। स च सुखदुःखे, ते च शरीरम्, तच्च पुण्यापुण्ये, ते पुना राग-द्वेषौ इत्यनादिः संसार इत्याह—**रागादीति**।। राग-द्वेष-मोहा रागादयः, त एव पुरुषं दुःखादिभिः क्लिश्यन्तीति क्लेशाः, तेषां वासनाः कर्मप्रवृत्त्यनुगुणाः, ताभिराक्षिप्तं कर्म, तदपेक्षाऽविद्या वैषम्यकरी। "सदेव सोम्येदमि" त्याद्यविभागावधारणं च समुदाचरद्रूपरागाद्यभावाभिप्रायमित्यर्थः। आदिमत्त्वे तु परस्पराश्रयत्वं स्यादित्याह—**न चेति**।। सूत्रावयवं व्याचष्टे—**उपलभ्यते चेति**।। तथापि संसारस्यानादित्वं कथमिति?

न्यायनिर्णयः

मोक्षकाण्डप्रामाण्यानुपपत्तिलक्षणां विवृणोति—**आदिमत्त्व इति**। अन्यथा कर्मकाण्डप्रामाण्यानुपपत्तेश्च संसारस्यानादित्वमादेयमित्याह—**अकृतेति**। अननुष्ठिते कर्मणि फलप्राप्तौ विधिनिषेधशास्त्रानर्थक्यमिति भावः। सुखादिवैषम्यस्य कर्मनिमित्तत्वाभावेऽपि निमित्तान्तरं भविष्यतीति चेत्, तत्किमीश्वरः किंवाऽविद्या अथवा शरीरमिति विकल्प्याद्यं दूषयति—**न चेति**। **उक्तम्**। 'ईश्वरस्तु पर्जन्यवत्' इत्यादाविति शेषः। द्वितीयेऽपि केवलाऽविद्या वैषम्यहेतुरुत रागाद्यपेक्षेति विकल्प्याद्यं प्रत्याह—**न चाविद्येति**। स्वापादावदर्शनादिति भावः। कल्पान्तरे संसारस्यानादित्वं दुर्वारमिति मत्वाऽऽह—**रागादीति**। रागद्वेषमोहा रागादयः। ते च पुरुषं दुःखादिभिः क्लिश्यन्तीति क्लेशाः, तेषां वासनाः कर्मप्रवृत्त्यनुगुणाः, ताभिराक्षिप्तं धर्मादिलक्षणं कर्म, तदपेक्षाऽविद्या स्वाश्रये सुखादिवैषम्यं करोति। अविद्या खल्वनादिरनिर्वाच्या चिन्मात्रे प्रतीचि वर्तमाना तत्र भ्रान्तिमुपनयति, सा च शोभनाशोभनाध्यासरूपा रागद्वेषद्वारा पुण्यापुण्ये निर्वर्तयति, ते च विचित्रे सुखदुःखे संचिनुत इत्यनाद्यविद्यायाः परंपरया वैषम्यहेतुत्वे संसारस्यानादित्वमावश्यकम्, उक्तविभ्रमादेरेव संसारत्वात् तस्य च प्रवाहरूपेणानादित्वादिति भावः। तृतीयं निरस्यति—**न चेति**। अस्तु तर्हि कर्मनिबन्धनं शरीरं वैषम्यकारणं, तत्राह—**न च शरीरमिति**। कथं तर्हि परस्पराश्रयत्वं परिहर्तुं पार्यते, तत्राह—**अनादित्वे त्विति**। उपपत्तेः हेतुफलभावस्येति शेषः। संसारस्यानादित्वसाधनमुपपत्तिरनुग्राह्यमानाभावे न तदुपपादयितुमलमित्याशङ्क्य सूत्रावयवं व्याकरोति—**उपलभ्यते चेति**। संसारोऽनादिरित्येवंवादिन्यौ श्रुतिस्मृती नैव दृश्येते, तत्कथमिदमीदृशमित्याशङ्क्य श्रौतं लिङ्गं संसारस्यानादित्वसाधकमादर्शयति—**श्रुतौ तावदिति**। शारीरस्यात्मनः सर्गप्रमुखे प्राणधारणनिमित्तेन जीवशब्देन परदेवतायाः

---

१. कर्म अन्तरेणेति पदविभागः।

जीवशब्देन प्राणधारणनिमित्तेनाभिलपन्ननादिः संसार इति दर्शयति। आदिमत्त्वे तु प्रागनवधारितप्राणः सन् कथं प्राणधारणनिमित्तेन जीवशब्देन सर्गप्रमुखेऽभिलप्येत? न च धारयिष्यतीत्यतोऽभिलप्येत। अनागताद्धि संबन्धादतीतः संबन्धो बलवान् भवति, अभिनिष्पन्नत्वात्। 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्' (ऋ.सं. १०।१९०।३) इति च मन्त्रवर्णः पूर्वकल्पसद्भावं दर्शयति। स्मृतावप्यनादित्वं संसारस्योपलभ्यते– 'न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा' (भ.गी. १५।३) इति। पुराणे चातीतानामनागतानां च कल्पानां न परिमाणमस्तीति स्थापितम्।।३६।।

।।इति द्वादशं वैषम्यनैर्घृण्याधिकरणम्।।

शारीरकन्यायसंग्रहः

सर्वधर्मोपपत्तेश्च।।३७।। ब्रह्म नानाकार्यशक्तियुक्तं न भवति, अखण्डैकरसत्वात्; यद्यदखण्डैकरसं तत्तन्नानाकार्यशक्तिमन्न भवति, यथा क्षणिकः पदार्थः परमाणुर्वेत्यस्यानुमानस्य एकस्मिन्नग्निस्वलक्षणे स्वलक्षणान्तरं धूमविशेषं स्वविषयज्ञानं च देशभेदेन कुर्वाणे, कर्मसंयोगात् द्व्यणुकहेतौ च परमाणावनैकान्तिकत्वम्, आगमविरुद्धत्वं च दर्शितम्।।

इति भगवत्प्रकाशात्मविरचिते शारीरकन्यायसंग्रहे
द्वितीयस्याध्यायस्य प्रथमः पादः

प्रकटार्थविवरणम्

ननु भाविवृत्त्याश्रयणेनापि जीवशब्दो भविष्यतीत्याशङ्क्याह—**न च धारयिष्यतीति**।। अस्य संसारवृक्षस्य रूपं तथा मायामयं नोपलभ्यते प्राकृतैः, नान्तोऽवसानं न चादिर्न च संप्रतिष्ठा मध्यमित्यर्थः।।इति द्वादशं वैषम्यनैर्घृण्याधिकरणम्।।

भाष्यभावप्रकाशिका

अत्राह—**आदिमत्त्व इति**।। ननु ''गृहस्थः सदृशीं भार्या''मित्यादिवत् स्यादित्यत्राह—**न चेति**।।३६।। इति द्वादशं वैषम्यनैर्घृण्याधिकरणम्।।

न्यायनिर्णयः

परामृश्यमानत्वेऽपि कुतः संसारस्यानादित्वमित्याशङ्क्याह—**आदिमत्त्वे त्विति**। प्रागनवधारितप्राणः सन्नात्मा शारीर इति शेषः। ननु भाविनीं वृत्तिमाश्रित्यात्मनि जीवशब्दो 'गृहस्थः सदृशीं भार्याम्' इतिवद्भविष्यति, नेत्याह—**न चेति**। संसारस्यानादित्वे श्रौतं लिङ्गान्तरमाह—**सूर्येति**। श्रुतौ स्मृतौ चोपलभ्यते संसारस्यानादित्वमिति प्रतिज्ञाय श्रौतमुपलम्भमुपदर्श्य स्मार्तमुपलम्भमुपदर्शयति—**स्मृताविति**। अस्य संसारवृक्षस्य परिकल्पितस्य रूपं पारमार्थिकमधिष्ठानं परं ब्रह्म तत् तथा घटादिवत् प्राकृतैर्व्यवहारभूमौ नोपलभ्यते। न चान्तोऽवसानमन्तरेण ब्रह्मविद्यामस्य दृश्यते। आदिश्चासत्त्वादेवास्य नावसीयते। संप्रतिष्ठा मध्यं चास्य न प्रतिभाति। अनिर्वाच्यत्वादित्यर्थः। श्रुतिस्मृतिसिद्धेऽर्थे पौराणिकीं संमतिमाह—**पुराणे चेति**।।३६।।इति द्वादशं वैषम्यनैर्घृण्याधिकरणम्।।

पूर्वाधिकरणे कर्मवशादीश्वरस्य विषमसृष्टिहेतुत्वमुक्तं तथापि तस्य सगुणत्वमुपादानत्वान्मृदादिवदित्याशङ्क्याह—**सर्वधर्मेति**। निर्गुणस्य ब्रह्मणो जगदुपादानत्ववादिसमन्वयो विषयः। स किं यन्निर्गुणं न तदुपादानं यथा गन्ध इति न्यायेन विरुध्यते न वेति

---

१. 'अतीतानागतानां कल्पानां' इति पा.।

१३।।सर्वधर्मोपपत्त्यधिकरणम्।।सू. ३७।।

सर्वधर्मोपपत्तेश्च।।३७।।

चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेत्यस्मिन्नवधारिते वेदार्थे परैरुपक्षिप्तान् विलक्षणत्वादीन् दोषान् पर्यहार्षीदाचार्यः। इदानीं परपक्षप्रतिषेधप्रधानं प्रकरणं प्रारिप्समानः स्वपक्षपरिग्रहप्रधानं प्रकरणमुपसंहरति। यस्मादस्मिन् ब्रह्मणि कारणे परिगृह्यमाणे प्रदर्शितेन प्रकारेण सर्वे कारणधर्मा उपपद्यन्ते 'सर्वज्ञं सर्वशक्ति महामायं च ब्रह्म' इति, तस्मादनतिशङ्कनीयमिदमौपनिषदं दर्शनमिति।।३७।।

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यशंकरभगवत्पूज्यपादकृतौ शारीरकमीमांसाभाष्ये
द्वितीयाध्यायस्य प्रथमः पादः समाप्तः।।१।।

प्रकटार्थविवरणम्

सर्वधर्मोपपत्तेश्च।। वृत्तानुवादपूर्वकं संबन्धमाह—**चेतनं ब्रह्मेत्यादिना**।। निर्गुणाद् ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः। तस्य किं सगुणमेवोपादानमिति लौकिकन्यायेन विरोधोऽस्त्युत नास्तीति संशये एकरसत्वाय[त्वात्] ब्रह्मणः अस्तीति पूर्वः पक्षः। सिद्धान्तस्तु यद्यपि स्वतोऽखण्डैकरसं ब्रह्म तथापि मायाप्रतिबिम्बितस्य सर्वकारणधर्मोपपत्तेः न कोऽपि ब्रह्मणि वेदान्तसमन्वयस्य विरोधः शङ्कनीय इति।। इति त्रयोदशं सर्वधर्मोपपत्त्यधिकरणम्।।

इति श्रीमच्छारीरकमीमांसाभाष्यविवरणे प्रकटार्थे
द्वितीयस्याध्यायस्य प्रथमः पादः।

भाष्यभावप्रकाशिका

सर्वधर्मोपपत्तेश्च।।३७।। ननु अखण्डत्वादेव धर्मा नोपपद्यन्त इति, तत्राह—**महामायमिति**।। अत उपादानत्वं निमित्तत्वं च परमेश्वरस्योपपन्नमित्युपसंहरति—**तस्मादिति**।।३७।। इति त्रयोदशं सर्वधर्मोपपत्त्यधिकरणम्।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्य-
श्रीचित्सुखमुनिविरचितायां भाष्यभावप्रकाशिकायां
द्वितीयस्याध्यायस्य प्रथमः पादः समाप्तः।।

न्यायनिर्णयः

पूर्ववदेव संदेहे वृत्तमनूद्य संगतिमाह—**चेतनमित्यादिना**। निर्गुणस्य गन्धवदनुपादानत्वाद् ब्रह्मणः सगुणत्वे मृदादिवदुपादानत्वेन प्राप्ते, विवर्ताधिष्ठानत्वस्यात्रोपादानत्वात् तस्य च निर्गुणेऽपि जात्यादावनित्यत्वाद्यारोपवदविरोधाद् युक्तं निर्गुणस्यापि ब्रह्मणो जगदुपादानत्वमिति राद्धान्तमभिसंधाय सूत्राक्षराणि व्याचष्टे—**यस्मादिति**। पादादिसंगतिचतुष्टयं फलं च पूर्वोत्तरपक्षयोर्यथापूर्वमवधेयम्। यद्यपि लोके सर्वज्ञत्वं कस्यचित्कारणस्य धर्मो न दृश्यते, तथापि कुलालादौ मृदादिप्रेरकत्वदर्शनाद् ब्रह्मण्यपि नियन्तरि तेन भवितव्यं, तस्य सर्वप्रेरकत्वस्य श्रौतत्वादर्थादेव सर्वज्ञत्वसिद्धिरित्याह—**सर्वज्ञमिति**। एवं ब्रह्मणि सर्वशक्तिमत्त्वमपि शक्यमुपपादयितुमिति मत्वाऽऽह—**सर्वशक्तीति**। तेनोपादानत्वमुपपादितं, सर्वज्ञत्वेन निमित्तत्वमिति भेदः। निर्गुणत्वादिप्रयुक्तसर्वानुपपत्तिशङ्कोपशान्तये विशिनष्टि—**महामायं चेति**। एतेन ब्रह्मण्यनवच्छिन्नं मायाऽविद्यादिशब्दितमनिर्वाच्यमज्ञानं कारणत्वादिसर्वव्यवहारनिर्वाहकमस्तीत्युक्तम्। यस्मादित्यस्यापेक्षितं पूरयन् पादार्थमुपसंहरति—**तस्मादिति**। स्मृतिन्यायविरोधः समन्वयस्य नास्तीति सिद्धमिति वक्तुमितिशब्दः।।३७।। इति त्रयोदशं सर्वधर्मोपपत्त्यधिकरणम्।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्य-
भगवदानन्दज्ञानविरचिते श्रीमच्छारीरकभाष्यन्यायनिर्णये
द्वितीयाध्यायस्य प्रथमः पादः समाप्तः।।१।।